महर्षिप्रवरश्रीकृष्णद्वैपायनप्रणीतम्

श्रीमद्भागवतम्।

श्रीश्रीपादश्रीधरस्वामिकृतभावार्थदीपिका, श्रीराधारमणदासगोस्वामिविरचितदीपिन्याख्यतट्टिप्पनी, श्रीम[illegible]वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका, श्रीमद्विजयध्वज[illegible]कृतपदरत्नावली, श्रीमद्वल्लभा-[illegible]सुबोधिनी, श्रीगौडीयवैष्णवाचार्य्यप्रवरश्रीमज्जीव[illegible]स्वामिकृतक्रमसन्दर्भाख्यटीका, श्रीमद्विश्वनाथचक्रव[illegible]सारार्थदर्शिनी, श्रीनिम्बार्कसम्प्रदायिश्रीम[illegible]शुकदेवकृतसिद्धान्त-[illegible] [illegible]तम्।

परमहंसपरिव्राजकाचार्य [illegible]ानन्दसरस्वतीपूज्यपादशिष्य

[illegible]ब्रह्मचारिणा

[illegible]दितम्;

[illegible]विनोद प्रेम सेवा परायण राजर्षि राय

[illegible]देशान्तर्गत ताड़ास भूप[illegible]

[illegible]ला[illegible] य बहादुरस्य

[illegible]पूर्णसाहाय्येन

[illegible] १।

तच्च

[illegible]मण्डलान्तर्वर्ति 'कान्दूर' पं० श्रीरङ्गाचार्येण

श्रीवृन्दावनधामनि

स्वकीय "श्रीदेवकीनन्दन" य[illegible]

[illegible]मुद्रितम्।

[illegible]सम्वत् १

श्रीमद्भागवतम् ।



षष्ठस्कन्धः ।

प्रथमोऽध्यायः

ओं नमः श्रीकृष्णाय ।

राजोवाच ।

निवृत्तिमार्गः त्रैगुण्य ... ता यथा ।
क्रमयोगोपलब्धेन ... संसृतिः ॥ १ ॥
प्रवृत्तिलक्षणो नाना ... यो मुने ! ।
योऽसावव्याकृता ... र्गः पुनः पुनः ॥ २ ॥
अधर्मलक्षणानि ... रकाश्चानुवर्णिताः ।
मन्वन्तरश्चादिमनु ... आद्यः स्वायम्भुवो यतः ॥ ३ ॥
(१) प्रियव ... शास्तच्चरितानि च ।
द्वीपवर्षस ... नवनस्पतीन् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीगयोः ... अम्बिकाऽर्धा ...
पुरुषार्थये नृसिंहनामसिंहो ... वराजते ।
... तः पञ्चाय ... कल्मष ... अराः ॥ १ ॥
विसर्ग ... मर ... वाम् संस्थिताम् ।
विष्णुः पालयति ... पे स्थितम् ॥ २ ॥
अजामिलो ... ऽयते ।
अजामिलो मनुष्येषु ... म ॥ ३ ॥
विश्वरूपाभिघाती च यथा ... आऽश्रितः ।
अजामिलस्य भक्तत्वं विष्णुदू ... बालव ॥ ४ ॥
सङ्केतनामग्रहणं ... अनुष ... कपितम् ।
... ऽपि भगवद्भक्तः ... म ॥ ५ ॥
तदधीनसुरैश्वर्यं ... निर्जय ... नु सेवकः ।
तत्रादौ त्रिभिरध्यायैरजामि ... ताः ॥ ६ ॥
... कथोऽयते ।

विश्वरूपकथा बहुभिरिन्द्रदोषे ... कथ्यते ततः ।
इन्द्रस्यैव तु दोषोक्त्यै वृत्राख्यायि ततोऽपि ... ॥ ७ ॥
द्वाऽर्यां च मरुदाख्यानमेवं प्र ... ।
तत्रादौ प्रथमे विष्णोर्दूतैः ... ... णम् ॥ ८ ॥
तत्पापक्षयापनायोक्तं ...
अथ षष्ठस्कन्धो व्याख्या ... पूर्वाकाङ्क्षानुधावपूर्वकं निर ... वृत्तिमार्ग इति षड्भिः । क ... र्पा ... रोपायं पृच्छ ... इत्यादिना भगवता त्वया यथा द्वितीये ... "वैश्वा ... योगोऽर्चिरादिप्राप्तिस्तेनोपलब्धो वा यथेन मार्गेण ... भवति ।

तेन सहासंस्तुत ... ह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
ब्रह्मणा ... सह ते ... कृता मानः प्रविशन्ति परम्पदम् ॥
इति वचनात् ... । १ ॥

... त्रैगुण्य ... आदिसुखं तदेव विषयः प्राप्यं यस्य ... प्रकृतिर्यस्य तस्य पुंसः पुनः पुनर्गुणात्मको भोगार्थं ... रूपो ... मार्गः स च कथितस्तृतीये ।

(१) प्रियव्रतोत्तानपादौ ... ... कथ्योऽयते ।

[illegible] आयो [illegible]

[illegible] बाणवार्यं [illegible] वर्णी [illegible]

[illegible] व्याकरण [illegible]

[illegible] विद्वान् [illegible]

[illegible] विशेषाख्यो [illegible]

[illegible] त्वथर्वा [illegible]

[illegible] ज्ञानमशीर्षकं [illegible] आयातौ [illegible]

[illegible] सर्वेषां [illegible]

[illegible]

१६५ [illegible] तथा [illegible] सर्वो [illegible]

[illegible] परिग्रहमत्र [illegible] इत्यादि

[illegible] सरवादि [illegible]

[illegible] इति वा योगविभाग: ॥ २ ॥

[illegible] पृथक्संज्ञा [illegible] इति [illegible] वा [illegible] ये [illegible] पञ्चमाक्त [illegible] मत्वर्थीय [illegible] विकार [illegible] अव्ययत्वात् [illegible] प्रार्थनिकः केन सूत्रे [illegible] इति । [illegible] इति वा ॥ ३ ॥

ननु [illegible] सामान्ययोः मनुविदेः [illegible] सत्वाद् [illegible] इति [illegible] बतो [illegible] इति [illegible]

श्रीमज्जी [illegible]

श्री [illegible]

श्रीकृष्ण [illegible]

गोपाल [illegible]

[illegible] क्रियते [illegible]

[illegible]

[illegible]

[illegible] इति [illegible] योगविभाग [illegible]

[illegible] अथवा [illegible] इति [illegible] ॥

[illegible] पुरुषस्यार्थ [illegible] ॥ ४ ॥

[illegible] सर्वत्र [illegible] यथा [illegible] इत्या- [illegible] प्रातर्यो [illegible] तेन सह [illegible] अर्थात्

ब्रह्मणा सह ते सर्वे [illegible]

परस्यान्ते [illegible] प्रविशन्ति [illegible] पदम्

[illegible]

धराम ... लसंस्थानं भागलक्षणमानतः ।
ज्योतिषां विवराणां च यथेदमसृजद्विभुः ॥ ५ ॥
अधुनेह महाभाग ! यथैव नरकान्नरः ।
नानोग्रय तनाम्नेयात्तन्मे व्याख्यातुमर्हसि ॥ ६ ॥

श्रीशुक उवाच ।

न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ।
ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥ ७ ॥
तस्मात् पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना ।
दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित् ॥ ८ ॥

राजोवाच ।

दृष्टश्रु ... भ्यां ... पापं जानन्नप्यात्मनोऽहितम् ।
करोति भूयो विवशः प्रायश्चित्तमथो कथम् ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

र्यकः मोक्षधर्मः ।

तस्माद्भारत ! सर्वात्मा भगवान् हरिरीश्वरः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छता भयम् ।

इत्यादिना आदौ ... तत्र मुमुक्षूपादेयत्वेन यथा यथावत्कथितः यत् येन ... योगोपलक्षणेन पूर्वपुण्यार्जितशुभजन्मतीर्थवाससत्सङ्गादिकमयोगात्सुखेन प्राप्तेन अनुष्ठितेन असंसृतिर्मुक्तिः स चान्येन ... दुष्प्रापकय इति सूचयितुमाह । अहमया आहमणदेहधारिणा भ ... व्रता त्वयेत्यर्थः ॥ १ ॥

प्रवृत्तिलक्षणश्च ... ऐहिकामुष्मिकलोकप्रापककर्मानुष्ठानादौ प्रवृत्तिरेव लक्षणं स्व ... यस्य सः पुरुषार्थत्रयसाधनरूपो धर्मः ... त्वान्यतया

... जेन्द्र ! नृणां सन्ति सहस्रशः ।
... वं गृहेषु गृहमेधिनाम् ।

इत्यादिना ... कथितः त्रैगुण्यमैहिकामुष्मिकसुखं तदेव विषयः ... सः न ... ना प्रकृतिः सांसारिकः स्वभावो यस्य तत्र ... गुणो रागादिभिः सर्गो जन्म तदुपलक्षितं जन्ममरणा ... नः इमौ श्लोकौ कश्चिदर्चिरादिमार्गद्वयपरत्वेन व्याख्यातौ ... कम् । निवृत्तिप्रवृत्तिधर्मयो ... आदौ स्कन्धचतुष्टयेऽपि वर्णि ... सम्भवमा ... नुवादानैषित्यान्मार्गद्वयस्य तत्रैवान्त ... ॥ २ ॥

अधर्मस्य लक्षणं फलं येषु ते ... न्वन्तरः मन्वादिषड्रूपः व्याख्यातः यतो यस्मिन् ... स्वायम्भुवो व्याख्यातः प्रियव्रतोत्तानपदोर्वंशस्तचारि ... नि ... व्याख्यातानि द्वीपादीन् भागशो लक्षणतो मा ... तश्च ... भोगण्डलस्य संस्थानं ज्योतिषां विवराणां च संस्थानम् इदं ... ण्डं यथा विभुर्विष्णुः असृजत् तथा च त्वमुक्तवानिति ... श्लोका ... ॥ ४ ॥ ५ ॥

भाषा टीका ।

॥ दोहा ॥

रामानुज पद वन्दिकर, कृष्ण चरण चितलाय ।
भाषा षष्ठस्कन्ध की, लक्ष्मणदास बनाय ॥ १ ॥

राजा परीक्षित जी बोले आपने पहिले निवृत्ति मार्ग का ... न यथार्थ से ... किया है जिस मार्ग में क्रम से ब्रह्मज्ञान ... प्राप्त होने प ... संसारसे मोक्ष होता है ॥ १ ॥

... त्रिगुण के ... य स्वर्गादि सुख को प्राप्त होने वाला जि ... का प्रकृति सम्बन्ध नष्ट नहीं भया है तिस जीव के बार म्वार गुणों ... सृष्टि होने का प्रवृत्ति मार्ग भी आप ने कथन किया है ॥ २ ॥

अधर्म से ... प्राप्त होने वाले अनेक नरक भी आपने वर्णन ... ह ... मन्वन्तर भी आपने कहा है जिस में कि स्वायम्भुव ... ॥ ३ ॥

प्रियव्रत उत्तानपाद इन दोनों के वंश और उन के ... चरित्र भी कहे उस द्वीपवर्ष समुद्र पर्वत नदी उद्यान ... इन सबों का क ... ॥ ५ ॥

श्रीधर ... दीपिका ।

नाना उग्रा यातन ... येनोपायेन नेयान्न- गच्छेत्तन्मेऽधुना व्याख्या ... ॥ ६ ॥

तत्र तावन्मन्वादयुक्तं ... प्रायश्चित्तं विना नरका दुर्नि ... इत्याह । न चेदिति द्वाभ्याम् ... मनउक्तिपाणिभिर्मनोवाक्कायैः कृत ... हसस्तैरेवेहैवापचितिं प्रा ... यश्चित्तं न कुर्याच्चेत्तर्हि स पुरुषः प्रे ... मृत्वा नरकान् ध्रुवमुपैति ... मया ये भवतः कीर्तिताः तिग्मा दारुणा यातना येषु तान् ॥ ७ ॥

यस्मादेवं तस्मात् पाप ... प्रायश्चित्ते यतेत कदा मृत्योः पुरैव । तथापि ... अविपद्यता अक्षीणेनात्मना देहेन । यद्वा । अविपद

[illegible] री न[illegible]

[illegible] कारित्वात [illegible] [illegible]मत्वम् ॥ ११ ॥

[illegible] नतः [illegible]ध्यमेवात्[illegible] [illegible]ऽभिमन्यन्ति [illegible]

एवं नियमकृद्राजन्[illegible] [illegible] [illegible]ल्पते ॥ १२ ॥

[illegible] मलमाचार्यवृत्ति [illegible]

[illegible]विहितो [illegible] [illegible] एवमेव [illegible] [illegible]ल्पाद्यु मन्यथा [illegible] [illegible] त्रिगुणं [illegible]र्हति इति [illegible] [illegible] [illegible] तदनुरूपे [illegible] [illegible] [illegible] [illegible]रूपं चिकित्सेत [illegible]

[illegible] चोदयति [illegible] इह राजन्[illegible] [illegible] [illegible]आत्मनः पाप[illegible] [illegible]पि भूयः [illegible] [illegible] कथं प्रायश्चित्तं तेन [illegible] [illegible] [illegible] [illegible]दिति [illegible] ॥ ९ ॥

[illegible] कश्चित्[illegible] [illegible] [illegible] कुरुते [illegible] [illegible] [illegible] पुनर्[illegible] [illegible] [illegible] [illegible]मिति [illegible] १० ॥

[illegible] कृच्छ्रा[illegible] [illegible] [illegible] [illegible]

[illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्याह भगवान् बादरायणिः । कर्मणेत्यादिना । कर्मणा प्रतिपदोक्तप्रायश्चित्तरूपेण कर्मणा कर्मणः पापकर्मणो निर्हारः आत्यन्तिकः पुनः पापसम्बन्धरहितो न भवति यथोपदेशमेव दुरितनिवर्तकं प्रायश्चित्तं न तु तावता दुरुत्तरस्यापि साकल्येन विनाशकमिति भावः तर्हि प्रायश्चित्तविधिर्वैयर्थ्यमत आह । अविद्वदधिकारित्वाद्विदुषोऽपरमात्मोपासकस्याहङ्कारममकाररागद्वेषादिमतः प्रायश्चित्ते अधिकारित्वाद्विदुष उत्तरपूर्वाघयोरश्लेषविनाशकरस्य वेदनस्यैव सत्त्वात् तत्पापनिवृत्तये प्रायश्चित्तापेक्षेति । यद्यपि तद्विधिवैयर्थ्यं तदाप्यविदुषस्तात्कालिकरोगोपशामकौषधवदिदुरितनिरसनाय प्रायश्चित्तमपेक्षितमिति न तद्विधिवैयर्थ्यमिति भावः अत उच्यते । प्रायश्चित्तं विमर्शनमिति । विमृश्यत इति विमर्शनं "कृत्यल्युटो बहुलम्" इति बहुवचनात्कर्मणि घञ् पापनिवर्तकत्वेन प्रायश्चित्तं विमृश्यते न कार्त्स्न्येनेत्यर्थः । यद्वा विमृश्यते विविच्यते पृथक्कृत्य निवर्त्यतेऽनेन पापमिति ॥ ११ ॥

एवं प्रतिपदोक्तप्रायश्चित्तान्यधिकारी प्रत्युदुरितनिरसनक्षमाणि वेदनं तु निःशेषदुरितनिवर्तनद्वारा नरकपरिहारकमित्युक्तं तर्हि तादृशं वेदनं कथमुत्पद्यत इत्यत्र तन्निष्पत्तिप्रतिबन्धकनिरसनोपायैर्नियमैस्तन्निष्पद्यते एव दृष्टान्तमाह । नाश्नत इति । पथ्यमेवान्नमदनतः पुरुषस्य रोगा नाभिभवन्ति न बाधन्ते हि हे राजन् ! एवं नियमकृत्सश्रयमाणो नियमवान् शनैः क्षेमाय दुःखासम्भिन्ननिरतिशयसुखाय कल्पते क्षमते ... भवतीत्यर्थः शनैरित्यनेनेयं प्रसादपरम्पराभिप्रेता ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भागतो विभागतो लक्षणतो मानतश्च ज्योतिषां स्वरूपमिति शेषः विवरणात् भुवनानां संस्थानमिति शेषः विभुरिदं जगद्यथा येन ... सृजत्सोऽपि द्वितीयतृतीयादौ कथित ...ावः ॥ ॥

प्रश्नकुर्वीयतामे ... दृष्टकारणाय स्वस्वोकाशेमहत्सामर्थ्यं ... विवक्षितार्थं पृच्छति । अधुनेति । अधुनेममर्थं भवन्तं पृच्छामीति शेषः । इह जीवलोके दुष्कर्मापि नरो यथा येन साधनेन नानोग्रयातनाः नरकाणि ... गच्छेदधुना दुष्कर्मपरिहारपरीयः साधनं व्याख्यातुमर्हसीत्यन्वयः "यातना तीव्रवेदना" इत्यभिधानात् नानाविधा यातनास्तीव्रवेदना येषु नरकेषु तथा तानीति नरकविशेषणमेतत् ॥ ६ ॥

"न(१)चेदिहावेदीन्महती विनष्टिः" इति श्रुत्यर्थं पश्यन्नुक्तिं । न चेदिति । यः पुरुषः मनउक्तिपाणिभिः(२)मनोवाक्कायैः कृतस्यांहसः अपचितिं प्रायश्चित्तोपलक्षणं नाशमिहैव न कुर्याच्चेत् ... पापी प्रेत्य नरकाननुपतीत्यन्वयः कीदृशानत्राह । यैः कीर्तिना इति । वा इत्यनेन पारम्पर्यप्रतीतिमर्थमाह । कथङ्कारमपचितिः इत्युक्तम् । यथेति । अहमो गुरुलाघवं यथा तथा प्रायश्चित्तकं ... इत्यर्थः न वेदगोपन्यासिकं ध्रुवं निश्चितमिति यस्मिन् जन्मन्यार ... तस्मि-

(१) इहैव पापप्रायश्चित्तं नावेदीच्चेन्महतीहानिरिति मूलार्थः ।

(२) पाणिर्हस्त इतिख्यातः करश्चेहि उपलक्षणमभिधानम् ।

न्मार्गाश्रमलोकेष्वपि शिष्टं गुरुदोषनिवृत्तिलक्षणफलदायि स्पष्टेन दर्शयति ॥ ७ ॥

यस्मादेवमनर्थप्राप्तिस्तस्मादेहवियोगात्पूर्वमेव कालदेशे पापनिष्कृतौ पापपरिहारे यतेत यतनमपि मध्यमे ... वेत्यभिप्रायेणोक्तमर्थविपर्ययदिति बाल्ये वार्धके वा दौर्बल्यप्राप्तिसम्भवात्तदयये तद्योगात्समर्थ इत्यर्थः अनेन ... आदि सम्पत्तावेव प्रयतनीयमिति ध्वनितं यथेत्युक्तं विद्वानिति । यद्रमन इति । आत्मनो दोषस्य गुरुत्वं लघुत्वं च तद्दृष्ट्वा तदनुसारेणेत्यर्थः अत्रैव दृष्टान्तमाह । यथेति । रुजां रोगाणां "निदानत्वादिकारणम्" इत्यभिधानान्मूलनिमित्तज्ञानी भिषग्वैद्यो यथा चिकित्सेत चिकित्सते आत्मनो दोषस्य गुरुलाघवज्ञानाभावे तद्गुरुमुखादपि ज्ञात्वा कर्तव्यमिति सूचितमनेन दृष्टान्तेन । यद्वा । यावदात्मनो देहस्य मृत्योः सकाशादन्मरणलक्षणाविपत्ति भवति तस्मात्तावत्पूर्वमेव पापस्य गुरुलाघवज्ञानपूर्वकं निष्कृतौ यतेत इममर्थं सदृष्टान्तमाह । दोषस्येति ॥ ८ ॥

राजा निष्कृतेर्वैयर्थ्यं शङ्कते । दृष्टेति । चौर्यादिकारिणां राजदण्डादिदर्शनेन "मृतो नरकमभ्येति ... " इति श्रुतेः स्वात्मनः पापप्रहितं दुःखसाधनं जानन्नपि विवशः स्वकर्मा ... भूयः पश्चादपि पापं करोतीति यस्मादर्थां तस्मात्प्रायश्चित्तं कथं भवतीत्यन्वयः ॥ ९ ॥

असकृदिति विद्वानिति । कश्चिद्भद्रात्प्रायश्चित्तेन निवर्तते कामात्सहसा मन्त्रमाचरतीति यथो तस्मात्प्रायश्चित्तमपार्थं अन्निष्प्रयोजनं कुञ्जरशौचेन ज्ञानं कथयति ॥ १० ॥

प्रायश्चित्तं कर्मापार्थमिति वदन् किं केवलं व्यर्थमेव विद्वद्भिर्विमृश्य विहितमाहोस्विज्ज्ञानपूर्वकमपि ... नित्यमिति तदाह । सम्मत इत्याह । कर्मणेति । प्रायश्चित्तेन कर्मणा कर्मनिर्हारः पापकर्मविनाशः आत्यन्तिक ... उभयोरप्यज्ञानमूलत्वेनाधिकृतत्वात् द्वितीयं व्यर्थमित्याह । प्रायश्चित्तेति । विद्वद्भिरविदुषोऽधिकृत्य प्रायश्चित्तं कर्म विमर्शनं कृत्वा विहितं कर्म व्यर्थं नेष्यते इति पूर्वेणान्वयः ॥ ११ ॥

(३) तृतीयं ... मिति ... तदकुर्वाणेन ... अयमाणमु... मया ... तं पापमिति ... वा तच्चेदं प्रायश्चित्तमिति जानीहि ... पि क्रियमाणं कर्म व्यर्थं किन्तु सार्थकमिति भावेनाह । नाश्नत इति । एवमिति वचनात्... पथ्यमेवान्नमश्नतः पुंसः व्याधयो नाभिभवन्ति यथा ... "अत्यम्बुपानाद्... समाचरो वह्निविकार ... मुहुर्मुहुर्वारि पिबेदभूरि ... हि शब्देनाक्षिप्तं ... एवंभाति । नियमकृत्पा... कुर्वन् शनैः ... पुण्यप्रचयेन ज्ञानोदयात् ... मोक्षाय समर्थो भवति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रष्टव्यमाह । अधुनेति । लोकानां यत्तद्साधने ... ज्ञाने तन्निष्परिहारसाधनमपि ... इति भावः ॥ ६ ॥

... अत्र समर्तं प्रायश्चित्तं ... ज्ञानोत्पादकत्वेन ... । भ... ति ॥ ७ ॥ ८ ॥

(३) ज्ञानपूर्वकक्रियमाणनिषये ।

[illegible] ॥ ९ ॥ १० ॥
[illegible] ॥ १३—१४ ॥

[illegible] हृषीकेश । [illegible]

[illegible] इयात् न [illegible] [illegible] तथाविधपरिहार- [illegible] ॥ ८ ॥

[illegible] परीक्षित [illegible] नश्यति [illegible] [illegible] न कुर्यात् [illegible] ॥ ७ ॥

[illegible] अन्यथा [illegible] [illegible] ॥ ६ ॥

[illegible] ॥ ४ ॥

[illegible]

[illegible] ॥ ७ ॥

[illegible] ॥ ६ ॥

[illegible] महाराजो [illegible] [illegible] पापकारी [illegible]

[illegible] ॥ ५ ॥

[illegible] ॥ ४ ॥

[illegible]

तपसा ब्रह्मचर्येण शमेन च दमेन च ।
त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ १३ ॥
देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः ।
क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः ॥ १४ ॥
केचित्केवलया भक्त्या वासुदेवपरायणाः ।
अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ॥ १५ ॥
न तथा ह्यघवान् राजन् ! पूयेत तपआदिभिः ।
यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥ १६ ॥
सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः ।
सुशीलाः [illegible] यत्र नारायणपरायणाः ॥ १७ ॥
प्रा[illegible] [illegible]र्णानि नारायणपराङ्मुखम् ।
न [illegible] राजेन्द्र ! सुराकुम्भमिवापगाः ॥ १८ ॥
सकृन्मनः कृष्ण[illegible]र्निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भ[illegible]न् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥ १९ ॥
अत्र चोदाहरन्तीमा[illegible]तिहासं पुरातनम् ।
दूतानां विष्णुयमयोः सं[illegible]दस्तं निबोध मे ॥ २० ॥

भाषा टीका

तिस हेतु से मरने से पहिले शीघ्रही देह केवल रहते ही पापों के प्रायश्चित्त करने का यत्न करै तिस मे दोषों का गौरव लाघव देख कर प्रायश्चित्त करै जैसे कि रोगों के निदान को जानने वाला [illegible] रोग के अनुसार चिकित्सा करता [illegible] ॥ ८ ॥

राजा बोले पापके [illegible]रनेसे राजादिकोंसे दण्डको देखतेहैं शास्त्रसे सुनतेहैं तब अपना अहित जानकरभी स्वभावके परवश होकर फिरपाप करतेहैं तो प्रायश्चित्त [illegible] होमकाहे ॥ ९ ॥

यह मनुष्य कहींपर पापसे निवृत्त होजाताहै कहीं फिर उसी पापको करताहै तिससे प्रायश्चित्त तो हाथिके स्नानके तुल्य व्यर्थही मालूम पडताहै ॥ १० ॥

श्री शुकदेवजी बोले कर्म से कर्म का नाश करना करना तो अच्छी तरह से नहीं होता है क्योंकि केवल कर्मो से कर्मों का नाश करने का उपाय थोडे ज्ञानी के वास्ते कहा है ज्ञानी के वास्ते तो परमा[illegible]के स्वरूपादि का ज्ञानही प्रायश्चित्त रूप होजाता है ॥ ११ ॥

जो पुरुष पथ्य [illegible] को खाता है [illegible] रोग नहीं लगते हैं हे राजन् । इसी प्रकार शास्त्रोक्त नियमोंके करने वाला पुरुष [illegible] में संसार रोग से छूटकर मोक्ष को प्राप्त होजाता है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एतदेव विवृ[illegible]ति द्वाभ्याम् । तपसा ऐकाग्र्येण ।
"मनस[illegible]न्द्रियाणां च ऐकाग्र्यं परमं तपः„
इ[illegible] स्मृतेः ब्रह्मचर्येणाष्टाङ्गेन तदुक्तम् ।
स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रिया निर्वृत्तिरेव च ॥
एत[illegible]मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।
विपरीतं [illegible] एतदेवाष्टलक्षणम् ॥
[illegible]ति । शमो मनसो नि[illegible]मनं दमो बाह्येन्द्रियाणां त्यागो दानं यमो [illegible] हिंसादिः नियमो जप[illegible]दिः ॥ १३ ॥ १४ ॥

अत्यातिदुष्करत्वान्मुख्य[illegible] [illegible]श्चित्तमाह । केचिदित्यनेन । एवम्भूता भक्तिप्रधाना [illegible] र्धयन्ति । केवलया तपआदिनिरपेक्षया वासुदेवपर[illegible] [illegible]कारिविशेषणमेतत्किलव्येषां श्रद्धया तत्रप्रवृत्ते[illegible] [illegible]स्तानादनुवादमात्रम् ॥ १५ ॥

एतच्च ज्ञानमार्गादपि [illegible]त्तममित्याह । न तथा पूयेत शुद्ध्येत तत्पूरुषनिषेवया कृष्णे[illegible] [illegible]ः प्राणा येन ॥ १६ ॥

तत्र हेतुः सध्रीचीन [illegible] समीचीनः अयं पन्था भक्तिमार्गः यतः [illegible]मः क्षेमत्वे हेतुः [illegible] [illegible] सुशीलाः [illegible] [illegible] यत्र [illegible] [illegible] नि[illegible]ष्ठाः अतो न [illegible] [illegible] अयं [illegible] [illegible] [illegible]भ्यो भयमिति भावः ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

[illegible] रपेक्षत्वमुक्तं कृच्छ्रादीनि तु भक्तिं विना न शोध- [illegible] यश्चित्तानीति । महतामप्यशोधकत्वे दृष्टान्तमाह । [illegible] आ नद्य इवेति ॥ १८ ॥

[illegible] पुनात्येव [illegible] । सकृदिति । तस्य गुणेषु [illegible] न तु ज्ञानं यस्य तन्मनः तावतैव चीर्णं निष्कृतं [illegible] ॥ १९ ॥

[illegible] तिहासेनोपपादयति । अत्र चेति मे मतः ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

[illegible] र्दाभिर्नियमैर्वेदनोत्पत्तिप्रतिबन्धकदुरितनिवृत्तिः ततो वेदनस्य निष्पत्तिस्ततो ब्रह्मप्राप्तिप्रतिबन्धकपूर्वोत्तराघाविद्वेद- नाशाश्लेषौ ततो ब्रह्मप्राप्तिस्ततः क्षेम इति नियमात् दर्शयन् तेषां वेदनोत्पत्तिप्रतिबन्धकदुरितनिवर्त्तकत्वमाह । तपसेति द्वाभ्याम् । तपसानशनादिना "तपसानाशकेन" इति श्रुतेः अनाशकेनेत्यत्यशन- निषेधः न तु सुतरामशननिषेधः तथा सति देहधारणासम्भवे- नोपासनानिष्पादात् तथा चोक्तं भगवता "युक्ताहारविहारस्य" इति ब्रह्मचर्येण ऋतुनियतकालिकस्त्रीसङ्गादिराहित्येन शमेनान्तरिन्द्रि- यनिग्रहेण दमेन बाह्येन्द्रियनिग्रहेण त्यागेन सत्पात्रदानेन सत्यशौ- चाभ्यां सत्यं भूतहितकारित्वमनृतावदनं च शौचं सदाचारः यमः कामानभिष्वङ्गः नियमः वर्णाश्रमधर्मः पञ्चमहायज्ञादिस्तेन ॥ १३ ॥

एभिः धीराः [illegible] द्वन्द्वसहनशीलाः धर्मज्ञाः निरतिशयसुखम [illegible] प्रतिपादकशास्त्रजन्यज्ञान- वन्तः श्रद्धया [illegible] युक्ताः सन्तः देहवाङ् [illegible] क्रतुशयजं [illegible] वेणुगुल्मानिव [illegible] आदौ वेदनोत्पत्तिप्र- तिबन्धकस्य [illegible] ब्रह्मप्राप्तिप्रतिबन्धका [illegible] निरस्यन्तीत्याह । केचिदिति । [illegible] सहस्रेषु कश्चिद्यतति सिद्धये" इत्युक्तरीत्या [illegible] कश्चिदित्युक्तम् ॥ १४ ॥

ये केचिद्वासुदेव [illegible] प्राप्तिसाधनमा [illegible] येषां तादृशाः सन्तः [illegible] धतया [illegible] पासनात्मकवेदनया [illegible] प्रतिबन्धकं [illegible] सूर्यो नीहारं तुहिनमिव [illegible] कृत्स्नं [illegible] तपआदि [illegible] पापं क्षपयन्तीत्यभिप्रेतम् ॥ १५ ॥

कात्स्न्येन पुनन्तीत्युक्तं [illegible] तथापि । हे [illegible] ! अघवान्पापी तपआदिभिः [illegible] प्रायश्चित्तैः [illegible] न पूयेत न शुद्ध्येत [illegible] प्राणाः जीवात्मा येन [illegible] रीत्या भगवच्चरणारविन्दयोः [illegible] यायां आनन्दानां [illegible]

[illegible]

समुद्राणेऽयं भगवद्भक्तिरूपः पन्थाः उपायः [illegible] चीनः समीचीनः कुतः हि यतोऽकुतोभयः कुतश्चिदपि भयरहितः क्षेमः आनन्दो मोक्षात्मको भवति अत एव शोभनाचाराः साधवो नारा [illegible] यत्र भगवद्भक्त्याख्ये पथि वर्त्तन्त इति [illegible] परायणा नारायणपरायणा इत्यन- योग [illegible] इत्यनेनात्मसमर्पणपूर्वकं भगव- त्यैवा [illegible] नमेव वासुदेवपरायणा [illegible] सूच्यते एवं च [illegible] निरतिशयसुखङ्कुर इति सूचितं स [illegible] भक्त्यङ्गतया [illegible] ॥ १७ ॥

[illegible] तद्दुःसहनरकप्राप्तिनिमित्तदुरितनिवर्त्त- [illegible] प्रायश्चित्तान्यपि [illegible] पुनन्तीत्याह । प्रायश्चित्तानीति । चीर्णान्य- [illegible] नारायणपराङ्मुखं कदाचिन्नारायणम- [illegible] न पवित्रयन्ति यथा सुरया पूर्णमागर- [illegible] तद्वन्नारायण [illegible] प्राय- श्चित्तानि [illegible] । न केवला [illegible]

[illegible] यथैव न [illegible] परि- हार [illegible] सकृदिति । ये [illegible] भगवता [illegible] मनः कृष्णपदा [illegible] न [illegible] यमभटांश्च [illegible] कुतः हि [illegible] निष्कृताः निष्कृति [illegible] पदारविन्दयोः [illegible] नादृशाः [illegible] येननायमर्थोऽभिप्र [illegible] योगानां निरयप्राप्ति [illegible] आनन्दस्वरूप- [illegible] किमु वक्तव्य [illegible] इव सुतरा [illegible] हारक इति तथा [illegible]

[illegible] अज्ञानतोऽपि [illegible]
[illegible] ॥
[illegible] ॥ १९ ॥

[illegible] दुरितनिवर्त्तक [illegible] प्रायश्चित्तानि [illegible] ॥ २० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न तपआदिप्रायश्चित्तकर्माणि [illegible] क्षपयन्तीत्य [illegible]

[illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

भावनाह। न तथेति। कृष्णे अर्पिताः प्राणाः श्रोत्रादयो यस्य स तथा कृष्णार्पितप्राणत्वं केन स्यादत्राह। तत्पूरुषेति। तस्य कृष्णस्य पूरुषाः तेषां निषेवया "भक्त्या त्वनन्यया शक्यः" इत्यादिप्रसिद्धि हिशब्देन दर्शयति ॥ १६ ॥

अत्र त्रिषु दुष्कृतपरिहारमार्गेषु भक्तिमार्गस्यैव प्राधान्यमित्याह। सध्रीचीन इति। लोके प्रायश्चित्तलक्षणसाधनसमूहे आनन्दरूपत्वाच्चेम इत्युच्यते। तत्राधिकारिणमाह। सुशीला इति ॥ १७ ॥

तपआदीनामपि भक्त्योपचितबलानां पापनिर्हरणहेतुत्वं न केवलानामित्यतोऽपि भक्तेरेव प्राधान्यमित्याह। प्रायश्चित्तानीति ॥ १८ ॥

ननु केवलभक्त्या पापनिर्हरणप्रकारः क इत्यत्राह। सकृदिति। पापनिर्हरणं तपआदाविव चिरकालं न भवति किन्तु क्षिप्रमेवेत्यतो वा भक्तेः प्राधान्यमित्याह। सकृदिति। कृतपापानुतापपूर्वकं श्रीकृष्णाङ्घ्रिपद्मं सकृन्मनोनिवेशनेन येषां ते कृताः कृतप्रायश्चित्ताः ॥ १९ ॥

नन्वेवं वैदिकानामस्तु अवैदिकानां स्त्रीशूद्रादीनां पापप्रायश्चित्तं कथं स्यादित्याशङ्क्य भक्त्या तेषां नामसङ्कीर्तनेन दुष्कृतनिष्कृतिः स्यादितीममर्थमितिहासेन दर्शयति। अत्रेति। [illegible] भगवन्नामसङ्कीर्तनादपि दुष्कर्मनाशः स्यात्किमु वक्तव्यं [illegible] स्येकमनस्कत्वेन श्रीहरिचरणस्मरणादिनेत्यतो येममर्थमाख्यायिकया दर्शयति। अत्रेति। अत्र वैदिकानामवैदिकानामपि भक्त्या नामसङ्कीर्तनेनाघवधस्य (१) एवकारेणायोगं व्यवच्छिनत्ति न त्वन्ययोगं तथात्वे पूर्वोक्ता व्यर्थाः स्युरित्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

क्रमतमाह। केचिदित्यादिना। तृतीयाध्यायं यावत्। अत्र भक्तिर्द्विविधा। सम्यता [illegible] प्रासङ्गिकी च तत्राद्या द्विविधा आसक्तिमात्रयुक्ता रागमयी च [illegible] तु त्रिधा रागाभासमयी तच्छून्यस्वरूपभूता आभासभूता। तत्राभासभूताया अपि सर्वोत्तमप्रायश्चित्तत्वं दर्शयितुं रागमय्याः [illegible] मुत्वबोधकमासक्तिमय्या माहात्म्यमाह। केचिदिति। कार्त्स्न्येन वासनया सहेत्यर्थः। भास्करदृष्टान्तेन स्वाभाविकया भास्वानीयया भक्त्या नीहारस्थानीयस्यागन्तुकस्य स्पष्टमशक्तस्य चाघस्य कुत्स्यानुषङ्गिकतयैव सद्यो निःशेषक्षननमिति ज्ञापितम् ॥१५—१७॥

प्रायश्चित्तानीति निश्चितं न पुनन्ति ॥ १८ ॥

अथ रागाभासमय्याहत्ततोऽप्यून इत्याह। सकृदिति। रागोरस्याभासः सकृच्छब्दप्रयोगात् साक्षादुक्तौ सत्यामश्रद्धेन तन्निवेशः स्यात् "दधाति सकृन्मनस्तस्मिन् य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान्" इति श्रीमत्स्तुतेः अत एव टीकायां तस्य गुणेषु रागमात्रमस्ति न तु ज्ञानादिमित्युक्तं रागमात्रे यत्किञ्चिद्रागः आतश्च याथार्थ्येनानुभव इति अपरं पूर्वेभ्यः उत्तमत्वं भक्तभक्त्याप्रसङ्गेन यमादीनां तद्दृष्टिपथेऽपि गन्तुमशक्यत्वात्महाप्रभावरूपं दर्शितम् ॥ १९ ॥

अथ तत्र तत्र कमुख्य दर्शयितुमितिहासमुपक्षिपति। अत्रेति ॥ २०—२३ ॥

(१) अत्रेत्यादिरन्यो [illegible] मूले इदम्।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

एतदेव विशदयति द्वाभ्याम्। तपसा भोगराहित्येन ब्रह्मचर्येण स्त्रीप्रेक्षणादित्यागेन शमेन यथाशक्तिमनोनियमेन दमेन बाह्येन्द्रियनिग्रहेण त्यागेन दानेन यमेनाहिंसादिना [illegible] न जपादिना ॥ १३ ॥ १४ ॥

अत्रापि वेणुगुल्मानलदृष्टान्तेन पुनरपि पापप्ररोहसूचनादप्रसन्नमनसं राजानं भक्तानां मतेनाह। केचिदिति। एते पुनर्निरवप्रचारा इति भावः। केवलया कर्मज्ञानादिरहितया सतोऽपि गुणीभूतान् कर्मज्ञानादीननपेक्षमाणया च अत्र कार्त्स्न्येन इति प्रयोगान्नीहारभास्करदृष्टान्तेन च पापनिर्मूलनं भक्त्यैव नान्ययेति सूचितम् ॥ १५ ॥

अत्रापि पापप्रशमने तुच्छ एव वस्तुनि भक्तिमहादेव्या विनियोगोऽनुचित इति भक्तिशास्त्रतात्पर्यविज्ञानां मतेन स्वाभिमतेनान्यमताक्षेपपूर्वकमाह। नेति। कृष्णार्पितप्राणा इति। पापकर्माणि मां समुचितशिक्षादण्डार्थं नरके पातयतु न पातयतु [illegible] एव मे गतिस्तस्यैवाहमित्यात्मन एव सम- [illegible] समर्पयन्तः शुद्धभक्तिमानित्यर्थः। कृष्णा- [illegible] कथं [illegible] दित्यत आह। तत्पुरुषेति ॥ १६ ॥

[illegible] सर्वतः श्रेष्ठः न कुतोऽपि [illegible] भक्तियोग इति वाच्य- [illegible] निश्चितम् अयमेव सर्वतः श्रेष्ठः न कुतोऽपि [illegible] सुशीलाः साधव इति ज्ञानमार्गे इव [illegible] न नापि कर्ममार्गवन्मत्सरतादिहेतुकं [illegible] ॥ १७ ॥

[illegible] भक्तिरेव पापप्रशमनी [illegible] न [illegible] प्रायश्चित्तानीति। बहुवचनेन कर्मज्ञानम- [illegible] भक्तिभक्तोः कर्मयोः श्रुत- [illegible] भक्तिस्तु ज्ञानकर्मादिहीनमपि [illegible] ॥ १८ ॥

[illegible] इत्याह। सकृदपि किं पुनरसकृत [illegible] मनो गुणरागि विषयासक्तं [illegible] किं पुनः साक्षात्साधनमात्र- [illegible] अत्र सकृदित्यादिपदैः [illegible] पौनःपुन्येऽप्युत्खातदं- [illegible] कुञ्जरशौचवदाचेप- [illegible] सुदुराचारो भजते [illegible] इत्यादि [illegible]

अत्रार्थे [illegible] अत्रेति। यः एक्वादश निबोध मे मतश्च या तथा ॥ २० ॥

[illegible] श्रीमच्छु[illegible]कृतसिद्धान्तप्रदीपः।

विस्तरे [illegible] प्रोक्तानि मन्वादिभिः प्रायश्चित्तानि मंस्तपतो दर्शयति। [illegible] तपसेति द्वाभ्याम्। तपसा कृच्छ्रादिना ब्रह्मचर्येण आश्रमविहितपथ [illegible] शमेन देवताध्यानेन दमेनेन्द्रियनिग्रहेण त्यागेन दा[illegible] सत्येन पापप्रख्यापनवाक्येन शौचेन गङ्गास्नानादिना यमेन [illegible] अहिंसादिना नियमेन जपादिना ॥ १३ ॥ १४ ॥

कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ।
नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥ २१ ॥
बन्द्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः ।
बिभ्रत्कुटुम्बमशुचिर्यातयामास देहिनः ॥ २२ ॥
एवं निवसतस्तस्य लालयानस्य तत्सुतान् ।
कालोऽत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः ॥ २३ ॥
तस्य प्रवयसः पुत्रा दश तेषां तु योऽवमः ।
बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम् ॥ २४ ॥
स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि ।
निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम् ॥ २५ ॥
भुञ्जानः प्रपिबन् खादन् बालकं स्नेहयन्त्रितः ।
भोजयन् पाययन्मूढो न वेदागतमन्तकम् ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उक्तप्रायश्चित्तस्य दुष्करत्वात् वेणुगुलमिवाग्निः इत्य... भूयः पापप्ररोहद्योतनाद्वासुदेवप्रमादरूपवक्षः... मन्वानो भगवान् बादरायणिः सुदृढं सर्वपुरुषार्थदं सर्वसाध... नाङ्गीभूतं सर्वशास्त्रसारं सर्ववृत्तिघ्नं श्रीकृष्णभजनमाह । केचि... दित्यादिना । केचिदित्यनेन अभाग्यैः लौकिकैरज्ञातप्रभावा ... ज्ञापितं वासुदेवः परमुत्कृष्टमयनमाश्रयो येषां ते केवलया पुरुष... साधुने स्वतन्त्रया ॥ १५ ॥

अघवांस्तस्य श्रीकृष्णस्य पुरुषाणां निषेवया हे... तथा कृष्णार्पितप्राणः कृष्णेऽर्पितः प्राणः इन्द्रियगण... प्राणोपलक्षित आत्मा च येन सः श्रीकृष्णभजनपरः सन् ... पूयेत शुद्ध्येत् तथा तपआदिभिर्न पूयेत श्रीकृष्णपराङ्... त्वात् ॥ १६ ॥

अयं पन्थाः श्रीकृष्णभक्तिमार्गः ... समीचीनः ... चीर्णं सम्पादितं निष्कृतं प्रायश्चित्तं ... ॥ १८ ॥

विष्णुयमयोर्दूतानां यः संवादस्तत्र ... अकमितिहासमुदाहरन्ति तन्मे मत्तः शृणु ॥ २० ॥

तप ब्रह्मचर्य शम दम ... बाहिर भीतर ... शौच अहिंसादि यम आदि नियमों के करने के श्रद्धा युक्त धर्मज्ञ धीर पुरुष मन वचन देह के बड़े पाप को जैसे अग्नि बांसके पेड़ों को जलाता है तैसे नाश कर देते हैं ॥ १३ ॥ १४ ॥

कोई वासुदेव के भक्त पुरुष तो केवल भगवद्भक्तिमात्र से ... जैसे सूर्य कुहरी का नाश करे तैसे संपूर्ण पाप को नाश कर देते हैं ॥ १५ ॥

हे राजन् ! तपआदिकों से पापी पुरुष वैसा पवित्र नहीं होता है ... जैसे श्रीकृष्ण चरण कमल में मन लगाकर भगवद्भक्तों का सेवन करने वाला पवित्र होता है ॥ १६ ॥

इस लोक में यही एक सुन्दर सर्वत्र निर्भय मार्ग है जिस ... इस मार्ग में नारायण परायण सुशील साधुजन चलते हैं ॥ १७ ॥

हे राजेन्द्र ! अच्छे किये प्रायश्चित्त भी नारायण से विमुख पुरुष को पवित्र नहीं करसकते हैं जैसे कि नदी एक भी मदिरा के घड़े को नहीं पवित्र करसकती हैं ॥ १८ ॥

जिन पुरुषोंने भगवान् के गुणोंके अनुरागयुक्त मनको एक बार भी श्रीकृष्णचरणारविन्दमें लगाया है उनके सवप्राय-श्चित्त होचुके वे पुरुष स्वप्नमेंभी यम ... पुरुषोंको अथवा यम-पाश को नहीं देखतेहैं ॥ १९ ॥

इसी विषयमें एक प्राचीन इतिहासको कहते हैं जिसमें श्रीविष्णुदूत तथा यमदूत इनों का सम्वाद है तिसको तुम मेरे से श्रवण करो ॥ २० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

कान्यकुब्जे पुरे दास्याः पतिः नाम्ना अजामिलः ॥ २१ ॥

... द्यूतेन कैतवैश्छलनादिभिश्च वृत्तिं जीविका बिभ्रत् पुष्णन् यातयामास पीडयामास ॥ २२ ॥

... महान् कालोऽत्यगात् । संख्यानिर्देशमाया ... अष्टाशीत्या संख्यया युक्ताः समाः सम्वत्सराः ॥ २३ ॥

प्रवयसो वृद्धस्य ॥ २४ ॥

बद्धं हृदयं येन जरठो वृद्धः ॥ २५ ॥

एतच्च तनुपालनमपि श्रीनारायणनामोच्चारणमाहात्म्येन तद्भ-क्तिरेवाभूदिति सिद्धान्तोपयोगित्वेनापि द्रष्टव्यम् ॥ २६ ॥ २७ ॥

स एवं वर्त्तमानोऽज्ञो मृत्युकाल उपस्थिते ।
मतिं चकार तनये बाले नारायणाह्वये ॥ २७ ॥
स पाशहस्तांस्त्रीन् दृष्ट्वा पुरुषान् भृशदारुणान् ।
वक्रतुण्डानूर्ध्वरोम्ण आत्मानं नेतुमागतान् ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

वक्राणि तुण्डानि मुखानि येषामूर्ध्वानि रोमाणि येषां तान् ॥२८॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

प्रतिज्ञातार्थमितिहासमाह । कान्यकुब्ज इत्यादिना । कान्यकुब्जाख्ये जनपदे कश्चिदजामिल इति प्रसिद्धो द्विजः दास्याः शूद्रायाः पतिरासीदिति शेषः स च नष्टः सदाचारः स्ववर्णाश्रमधर्मो यस्य तादृशस्तत्र हेतुर्दास्याः संसर्गेण दूषितः पतितः ॥ २१ ॥

गर्हितामार्यैर्गर्हितां वृत्तिमाश्रितो बन्द्यक्षभौर्य्यादिच्छलपूर्वैः कैतवैः शाठ्यैश्च कुटुम्बं बिभ्रत्नित्यमशुचिः यद्वा बन्द्यक्षादिभिः कुटुम्बस्यानिर्वाहस्तदा देहिनः प्राणिनो यातयामास पक्षिमृगान् हिंसितवानित्यर्थः ॥ २२ ॥

[illegible] तस्य दास्याः सुतान् स्वोत्पादितान् लालयतः [illegible] हे महाराजन् ! सप्तासीतिवर्ष [illegible] कालः अष्टयादतिक्रान्तः कियान् कालो [illegible] अशीतिः । परिमिता आयुषः सम्वत्सराः [illegible] ॥ २३ ॥

तस्य [illegible] दश पुत्राः स्थितास्तेषां मध्येऽवमः [illegible] स च नाम्ना नारायण इति प्रसिद्धः [illegible] कथनमपि पापातिशयज्ञापनार्थं "दास्यां च [illegible]" इति स्मरणात् स नारायणाख्यः [illegible] नितरां दयितः प्रियः ॥ २४॥

स द्विजः [illegible] कलभाषिणस्तस्य [illegible] लीलां चेष्टां [illegible] हृष्यन् ॥ २५ ॥

[illegible] भोजयन् स्वयमपि [illegible] मृत्युं न वेद ॥ २६ ॥

[illegible] मृत्युकाले उपस्थिते सत्यज्ञो नारायणाख्ये पुत्रे मतिं चकार मतिमासक्तामकरोदित्यर्थः ॥ २७ ॥

[illegible] व्याकुलचित्तः दूरे [illegible] नारायणं [illegible] वक्राणि [illegible] तुण्डानि मुखानि येषाम् ऊर्ध्वमुखानि रोमाणि येषां [illegible] आत्मानं प्रति नेतुमागतान् ॥ २८ ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अजया प्रकृत्या ज्ञानस्य मीलो मीलनं तिरोभावो यस्य स तथा पश्चादजाज्ञदूरः पूर्णपुण्यसम्पन्नज्ञानस्यामील उन्मीलनं यस्य स तथेत्युभयथा वाऽजामिलत्वं युक्तं नहस्वत्वं छान्दसं सन् समीचीन आचारः सदाचारः (१) ॥ २१ ॥

बन्दिग्रहणाक्षदेवनैः "कितवः स्यादनृतवादी कैतवं तस्य भाषणम्" इत्यभिधानात् असत्यव्यवहारैश्चौर्यैः परस्वापहरणलक्षणव्यापारैः वृत्तिं वर्त्तनं जीवनोपायं देहिनं यातयामास नरकगमनाभिमुखमकरोत् शरीरयात्रायुक्तमकृतेति वा ॥ २२ ॥

अष्टाशीत्यायुषो याः समाः ये सम्वत्सराः तत्परिमाणलक्षणः कालः ॥ २३ ॥

अवमः कनिष्ठः ॥ २४ । २५ ॥

अन्तकं मृत्युम् ॥ २६ ॥

मृत्युकाले देहवियोगलक्षणकाले मृत्योः सर्वदोषापहरस्य हरेरनुग्रहात् काले दत्तज्ञानलक्षणे उपस्थिते हृदि प्रकाशिते (२) तनये पूर्णज्ञाने बाले पञ्चवर्षकल्पे प्रादेशमात्रे नारायणाह्वये मूर्तिविशेषे मतिं स्मरणसमर्थं चित्तं चकार भक्त्याऽस्मरोदित्यर्थः अजामिलोऽपि स्मरणाद्भक्त्या मृत्योरमुच्यतेत्येतद्वाक्यमर्थग्रहं विवृणीत्यत्र प्रमाणत्वेन वक्ष्यमाणमत्राप्यनुसन्धेयमिति ज्ञातव्यम् ॥ २७ ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

[illegible] दयित इति मातुरपि कृतार्थत्वमुक्तम् ॥ २४—२९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

बन्दीग्रहः छलितजनता तया [illegible] नित्यर्थः । अक्षैश्च द्यूतेन [illegible] वृत्तिं जीविकां यातयामास पीडयामास ॥२२॥

आयुषः सम्बन्धी [illegible] स्त्वगात् स कियानित्यपेक्षायामाह । अष्टाशीत्या सङ्ख्या [illegible] समाः सम्वत्सराः ॥ २३ ॥

प्रवयसो वृद्धस्य ॥ २४ ॥

जरठो वृद्धः ॥ २५ ॥

खादन् चर्वयन् ॥ २६ ॥

(१) यत्र चाण्डालाभासा में तथा मत्स्यहारिणः ।
तमसर्वाणिकटं देशं कान्यकुब्जं स्वदन्ति हि ।

२ नर्म्मनिस्तारं । येतिशा [illegible] समुद्दिष्टमिति धातुप्रमाणाद्वयासमयमर्थः गृह्यतः ।

दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयम्।
प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः॥ २९॥
निशम्य म्रियमाणस्य ब्रुवतो हरिकीर्त्तनम्।
भर्तुर्नाम महाराज! पार्षदाः सहसापतन्॥ ३०॥
विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम्।
यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा॥ ३१॥
ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः।
के यूयं प्रतिषेद्धारो धर्म[illegible]॥ ३२॥
कस्य वा कुत आयाता [illegible]षेधथ।
किं देवा उपदेवा वा [illegible]माः॥ ३३॥
सर्वे पद्मपलाशाक्षाः पी[illegible]सः।
किरीटिनः कुण्डलिनो लसत्पु[illegible]मालिनः॥ ३४॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

एतच्च तदुपलालनादि श्रीनारायणनामोच्चारणमाहात्म्यं [illegible] तद्भक्तिरेवाभूदिति सिद्धान्तोपयोगित्वेन द्रष्टव्यमिति श्रीस्वामि[illegible]चरणाः॥ २७॥

आनिति। अजामिलेन कृतानामनन्तानामपि पापानां काचि[illegible] वाचिकमेलनत्वेन त्रैविध्याच्चय एव याम्या आगताः ना[illegible] यणनाम्नश्चतुरक्षरत्वाच्चत्वारो विष्णुपार्षदा आगता [illegible] ज्ञेयम्।॥ २८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

कान्यकुब्जे पुरे॥ २१॥

बन्दीप्राणिनिग्रहक्रियः तया भक्षैश्च द्यूतेन कैतवे[illegible] [illegible]विधैः गर्हितां वृत्तिं जीविकामाश्रितः [illegible] विग्रहैहिनः यातयामास [illegible] तस्याः [illegible] दूषितः॥ २२॥

तस्य दास्याः सुतान् [illegible] [illegible]भी महान् [illegible]त्यगात् तमेवाह। अष्टाशीत[illegible] समा[illegible] [illegible]सराः [illegible] २३॥

तस्याजामिलस्य प्रवय[illegible] कनि[illegible]

कलभाषिणा मधुरभा[illegible] येन [illegible] वृद्धः॥ २५—२८॥

भाषा टीका।

कान्यकुब्ज नाम [illegible] का पति कोई अजामिल नाम का ब्राह्मण [illegible] के सङ्ग में दुष्ट हो [illegible] सदाचार सब नष्ट होगये थे॥ २१॥

[illegible] वाले कपटी बंदी और इन्होंके साथ खोटी [illegible] था अपवित्र होकर कुटुंब के पोषण करने के [illegible] प्राणियों को पीडा देता था॥ २२॥

हे राजन्! इस प्रकार से अपनी दासी के पुत्रों के लाड करके [illegible] करते हुये उसके बडा भारी काल बीत गया अठासी [illegible] गये॥ २३॥

[illegible] के दश पुत्र थे उनके मध्य में जो छोटा था उस बालक का नारायण नाम था वह माता पिता दोनों का [illegible] था॥ २४॥

[illegible] वचन बोलने वाले उस बालक के ऊपर उसका [illegible] था उसकी लीला को देखकर वह वृद्ध बहुत खुसी [illegible]॥ २५॥

बालक के स्नेह मे बन्ध कर खाते पीते समय में उस [illegible] खवावे पिवावे इस प्रकार से उस मूर्खने आवते [illegible] काल को नहीं जाना॥ २६॥

वह अज्ञानी इस प्रकार वर्तमान होकर रहा था इतने में [illegible] काल उपस्थित होगया तब नारायण नाम के बालक में [illegible] मन लगाया॥ २७॥

उसने पाशों को हाथ में लिये हुये बडे कठोर टेढे मुख वाले [illegible] को खडे रोमों वाले अपने लेनेको आये हुये तीन पुरुषों को देखा॥ २८॥

श्रीधरस्वामिकृतभावार्थदीपिका।

प्लावितेन प्लुतत्वं नीतेन॥ २९॥

हरिकीर्तनं निशम्यापतन्। यतस्तद्भर्तुर्नाम॥ ३०॥ ३१॥

पुरःसरा भृत्याः॥ ३२॥

सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः ।
धनुर्निषङ्गासिगदाशङ्खचक्राम्बुजश्रियः ॥ ३५ ॥
दिशो वितिमिरालोकाः कुर्वन्तः स्वेन रोचिषा ।
किमर्थं धर्मपालस्य किङ्करान्नो निषेधथ ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्य नयनं निषेधथ ॥ ३३ ॥

वयं युष्मान्न जानीम इति न कोपः कार्यो यतोऽलौकिकाद्भुतरूपा यूयमित्याहुः । सर्वे इति सार्धाभ्याम् । लसन्त्यः पुष्करमालाः सन्ति येषाम् ॥ ३४ ॥

नूत्नं नवं वयो येषां निषङ्ग इषुधिः धनुर्निषङ्गादिभिः श्रीः शोभा येषां ते ॥ ३५ ॥

विगतं तिमिरमालोकश्चान्यस्य प्रकाशो यासु तथाभूता दिशः कुर्वन्तः भवतामेतदनुचितमित्याहुः । किमर्थमिति ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

म्रियमाणस्य भर्तुर्मुखनस्य मुखेन यद्धरिः कीर्त्यते येन तद्धरिकीर्त्तनम् इति नामविशेषणं तन्निशम्य श्रुत्वा हे महाराज ! भर्तुर्भगवतः पार्षदाः सहसा त्वरया अभ्यपतन्नाजग्मुरित्यर्थः ॥ ३० ॥

तेऽभिपतिता विष्णुदूता ओजसा बलात्कारेण दासीपतिमजामिलमन्तर्हृदयात्स्वाकर्षतः यमप्रेष्यान् वारयामासुः ॥ ३१ ॥

एवं निषेधितास्ते वैवस्वतस्य यमस्य पुरः सराः भृत्याः ऊचुः उक्तिमेवाह । क इति धर्मराजस्य यमस्य शासनमाज्ञां प्रतिषेद्धारो यूयं के ॥ ३२ ॥

कस्य वा सम्बन्धिनः कस्माल्लोकादागता अस्य कस्माद्धेतोः धर्मराजस्य नामनं निषेधथ यूयं किं देवा उत उपदेवा गन्धर्वा अथवा सिद्धश्रेष्ठाः ॥ ३३ ॥

एवं पृष्ट्वा पुनस्तान् वर्णयन्तो यमशासनप्रतिषेधप्रयोजनं पृच्छन्ति । सर्वे इति त्रिभिः । सर्वे यूयं पद्मपलाशे इवाक्षिणी येषां पीतं कौशेयं कृमिकोशोत्थं वासो वस्त्रं येषां किरीटानि येषां सन्ति तथा कुण्डले येषां सन्ति तथा लसन्त्यः पुष्करमालाः कमलमाला येषां सन्तीति ॥ ३४ ॥

तथा सर्वे यूयं नूत्नं नवं वयः येषां ते चारवः सुन्दराश्चत्वारो भुजा येषां धनुरादीनां श्रीः शोभा येषां धनुरादिधरा इत्यर्थः तत्र निषङ्गः इषुधिरसिः खड्गः अम्बुजं कमलम् ॥ ३५ ॥

स्वेन रोचिषा दिशो वितिमिरालोका विगतं तिमिरं तमः यस्मात्स आलोकः प्रकाशो यासां तादृशीः दिशः कुर्वन्तः धर्मराजस्य किङ्करानस्मान् किमर्थं निषेधथ कस्मै प्रयोजनाय निषेधथेत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दूरे भगवद्बहिः स्थितं जगत्सर्जनादिलीलाविलासोपेतं पुंनाम्नो नरकान्त्रातारं नारायणनामानमुखैः प्लावितेन चतुरादिमात्रात्मना स्वरेण पूर्वाचरितपुण्यप्रचयेनोत्पन्नया भक्त्याकुलेन्द्रियः ॥ २९ ॥

हरेः कीर्तनं किं (१) गुणारूपं नेत्याह । भर्तुरिति । भर्तुः स्वामिनो नारायणेति नामरूपं दोषहरणशीलं कीर्तनं यस्य नाम्नस्तद्धरिकीर्तनं भर्तुर्नाम निशम्येति वा हरिरित्यक्षरद्वयं नारायणेत्यक्षरचतुष्टयमनेनोक्तमिति ज्ञापनायानन्वितत्वेनोक्तमिति वा अनेन पुत्रस्नेहमन्तरेण प्राचीनादृष्टबलादुद्भूतया भक्त्या भगवन्नामसङ्कीर्तनं कृतमिति ज्ञायते ॥ ३० ॥

ओजसाऽवष्टम्भेन बलेन वा "ओजोऽवष्टम्भबलयोः" इति यादवः ॥ ३१ ॥ ३२ ॥

निषेधथ अस्य नयनमिति शेषः ॥ ३३ ॥

नूत्नवयसः षोडशवर्षवयसः धनुरादिभिः श्रीर्येषां ते तथा ॥ ३४ ॥ ३५ ॥

वितिमिरालोका इत्यत्र वीत्युपसर्गः प्रत्येकमभिसम्बद्ध्यते विगतानि तिमिराणि विगताः आलोकाः अन्यप्रकाशाश्च यासु दिक्षु तास्तथा निरस्तान्धकारान्यप्रकाशा इत्यर्थः ॥ ३६ ॥ ३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्लाविनेन प्लुतत्वं नीतेन ॥ २९ ॥

हरिकीर्त्तनं निशम्यापतन् कथम्भूतस्य भर्तुर्नाम ब्रुवतः ॥३०॥

अजामिलमिमं वैष्णवं मा विकर्षथ रे मा विकर्षथ यदि जीविमिच्छथेति वारयामासुः ॥ ३१ ॥

पुरःसरा भृत्या अस्य नयनं निषेधथ ॥ ३२—३४ ॥

आकृत्या च यूयं परं शिष्टा एव लक्ष्यध्वे इत्याहुः । सर्वे इति ॥३५॥

विगतं तिमिरमालोकश्चान्यदीयो यासु ताः कर्मणा तु यमाशिष्टा इत्याहुः । किमर्थमिति ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्लावितेन दैन्याक्रान्तेन ॥ २९ ॥

पार्षदाः भर्तुर्नाम ब्रुवतः सानुकूलनामोच्चारणं कृतवतस्तदेव हरिकीर्त्तनं निशम्य श्रुत्वा सहसा आपतन् ॥ ३० ॥

ओजसा बलात्कारेण वारयामासुः ॥ ३१ ॥

वैवस्वतस्य यमस्य पुरःसराः भृत्याः धर्म एव शुक्ला धर्मराजः अस्याजामिलस्य नयनं कस्मान्निषेधथ ॥ ३२ ॥ ३३ ॥

(१) अप्रधानम् ।

॥ श्रीशुक उवाच ॥

इत्युक्ते यमदूतैस्तैर्वासुदेवोक्तकारिणः ।
तान् प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥ ३७ ॥

विष्णुदूता ऊचुः ॥

यूयं वै धर्मराजस्य यदि निर्देशकारिणः ।
ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणम् ॥ ३८ ॥
कथंस्विद्ध्रियते दण्डः किंवास्य स्थानमीप्सितम् ।
दण्ड्याः किं कारिणः सर्वे आहोस्वित्कतिचिन्नृणाम् ॥ ३९ ॥

यमदूता ऊचुः ॥

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ।
वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम ॥ ४० ॥
येन स्वधाम्न्यमी भावा रजःसत्त्वतमोमयाः ।
गुणनामक्रियारूपैर्विभाव्यन्ते यथातथम् ॥ ४१ ॥
सूर्योऽग्निः खं मरुद्गावः सोमः सन्ध्याऽहनी दिशः ।
कं कुः कालो धर्म इति ह्येते दैह्यस्य साक्षिणः ॥ ४२ ॥
एतैरधर्मो विज्ञातः स्थानं दण्डस्य युज्यते ।
सर्वे कर्मानुरोधेन दण्डमर्हन्ति कारिणः ॥ ४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लसन्त्यः पुष्करमालाः सन्ति येषां ते ॥ ३४ ॥

नूत्नं वयो येषां ते निषङ्गः इषुभिः धनुर्निषङ्गादिभिः श्रीः शोभा येषां ते ॥ ३५ ॥

विगतः तिमिर आलोक इतरप्रकाशश्च याभ्यस्ताः ॥ ३६-३७ ॥

भाषा टीका

सब उसकी इन्द्रियां व्याकुल होगईं तब दूर में खेल में आसक्त नारायण नामक पु[illegible] स्वर से पुकारने लगा ॥ २९ ॥

हे महाराज ! मरते समय [illegible] सुनकर अपने पति का नाम जानकर हरि[illegible] शीघ्रही विष्णु के पार्षद आगये ॥ ३० ॥

शरीर हृदय के मध्य में से दासक पति अजामिल को खैंचते हुये देखकर यमदूतों को विष्णुदूतों ने अपने तेज से निवारण किया ॥ ३१ ॥

निषेध करते मात्र यमराज के दूत उन विष्णुदूतों से बोलने लगे कि धर्मराज के आज्ञा को निषेध करने वाले तुम कौन हो ॥ ३२ ॥

किसके दूत हो कहां से आये हो क्यों इसका लेजाना निषेध करते हो क्या देव हो अथवा उपदेव हो क्या कोई सिद्धेश्वर हो ३३ ॥

आप सब कमल सरीके नेत्रों वाले हो पीत रेसम के वस्त्रधारण किये हो किरीट कुण्डल धारण किये हो प्रकाशमान कमलकी माला धारण किये हो ॥ ३४ ॥

सब नई अवस्था वाले हो सब सुंदर चार भुजों वाले हो धनुः तरकस तरवार गदा शंख चक्र कमल इनकी शोभा आपके हाथों में होरही है ॥ ३५ ॥

अपने तेजसे दिशों को अन्धकार रहित अधिक प्रकाश करते हो धर्मराजके किङ्कर हमलोगों को क्यों निषेध करते हो ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अहो दण्ड्यादण्ड्यादिज्ञानशून्या एते चोरा एवास्मान्निरुन्धन्तीति धर्मराजस्य किङ्करा इत्युक्ते वदन्तीति विस्मयेन प्रहस्य तान् प्रत्यूचुः मेघस्येव निर्ह्रादो ध्वनिर्यस्यास्तया ॥ ३७ ॥

तत्त्वं स्वरूपं लक्षणं प्रमाणम ॥ ३८ ॥

कथंस्वित्केन प्रकारेण स्थानं विषयः कारिणः कर्मिणः नृणामिति सर्व एव न धावान्ययः तेष्वपि कतिचिदेवेत्यर्थः ॥ ३९ ॥

वेदेन प्रणिहितो विहितो धर्मः वेदप्रमाणक इत्यर्थः अनेन

सम्भवन्ति हि भद्राणि विपरीतानि चानघाः !
कारिणां गुणसङ्गोऽस्ति देहवान्नह्यकर्मकृत् ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यो वेदप्रमाणकः स धर्मो यो धर्मः स वेदप्रमाणक इति स्वरूपं प्रमाणं चोक्तम् । यथाह जैमिनिः "चोदनालक्षणोऽर्थो धर्मः" इति व्याख्यातं च भट्टैः "द्वयमेकेन सूत्रेण श्रुत्यर्थाभ्यां निरूप्यते" इति अपृष्टस्याप्यधर्मस्य स्वरूपं लक्षणं च दण्डस्थानकथनायाहुः । तद्विपर्ययो यो वेदानिषिद्धः सोऽधर्मः निषेधश्च तस्मिन् प्रमाणमित्यर्थः वेदस्य प्रामाण्ये हेतुः वेदो नारायणादुद्भूतः स एव साक्षादित्युपचारः स्वयम्भूरिति च निःश्वासमात्रेण स्वयमेव भवतीति । तथा च श्रुतिः । "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद" इति ॥ ४० ॥

कोऽसौ नारायणस्तत्राहुः । येन स्वधाम्नि स्वस्वरूपेऽमी भावाः प्राणिनो गुणाः शान्त्यादयः नामानि ब्राह्मण इत्यादीनि क्रियाश्चाध्ययनाद्या रूपाणि वर्णाश्रमादयस्तैर्विभाव्यन्ते विविच्यन्ते यथातथं यथावत् स नारायणः ॥ ४१ ॥

तथाप्यधर्मोऽनेन कृत इति कुतो ज्ञायते तत्राहुः । सूर्य इति । अहनी अहश्च रात्रिश्च कमुदकं कुः पृथ्वी देहस्य जीवस्य यथाहुः

आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥

इति ॥ ४२ ॥

स्थानमाहुः । एतैर्निमित्तभूतैर्विज्ञातः दण्ड्यानाहुः । सर्व इति ॥४३॥

विपरीतान्यभद्राण्यपि कर्मिणां सम्भवन्ति यतस्तेषां गुणसङ्गोऽस्ति यदि कश्चिदकर्ता स्यात्तर्हि तस्याभद्राणि न स्युर्न त्वेतदस्तीत्याहुः । नहि देहवानकर्मकृदस्तीति अतः सर्वे कर्मिणः कर्मिणां च पापस्यावश्यंभावित्वात्ते सर्वे दण्डमर्हन्तीत्यर्थः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुक्ता विष्णुपार्षदा आहुरित्याह मुनिः । इत्युक्ता इतीत्थं यमदूतैरुक्ताः वासुदेवाज्ञाकारिणः पार्षदाः प्रहस्य तान् यमदूतान् प्रतीदं वक्ष्यमाणं गर्जितमेघवद्गम्भीरया गिरा प्रत्यूचुः ॥ ३७ ॥

उक्तिमेवाह । यूयमिति । धर्मराजस्येति हेतुगर्भं धर्म एव यमरूपेणावस्थित इत्यर्थः तस्य यदि यूयं निर्देशकारिणः शासनकारिणः तर्हि यूयमपि धर्माधर्मस्वरूपज्ञा भवेयुरतो धर्मस्य तत्त्वं याथात्म्यं यद्धर्मस्य लक्षणं स्वरूपं तच्च नोऽस्माकं ब्रूत । यद्वा । धर्मस्याधर्मस्य च तत्त्वं लक्षणं प्रमाणं चेत्यन्वयः ॥ ३८ ॥

तत्र दण्डनस्य प्रकारविषयादिकं पृच्छन्ति । कथं स्विदिति । दण्डः केन प्रकारेण क्रियते नित्यं दण्डस्य स्थानं विषयः किं स्थानमेव विकल्पयन्ति । दण्ड्या इति कारिणः । सर्वे नरा दण्ड्या आहोस्वित्कारिणां नृणां मध्ये कतिचिदेव ॥ ३९ ॥

एवमुक्ता यमदूता आहुः । वेदेत्यादिना । वेदेन प्रणिहितः कर्तव्यत्वेन बोधितो धर्मः अधर्मस्तु तद्विपर्ययः अकर्तव्यत्वेन बोधितः अनेन वेद एवायं धर्मोऽयमधर्म इत्यत्र प्रमाणमिति [illegible]मुक्तं वेदप्रणिहिततद्विपर्ययावेव धर्माधर्मयोः स्वरूपमिति चोक्तम् । ननु वेदस्यापि पौरुषेयत्वात्पुरुषस्य च भ्रमविप्रलम्भादिदोषसम्भवात्कथं वेदस्य धर्मप्रमापकत्वमित्यत आह । वेदो नारायण इति । साक्षान्नारायणादेव वेदः प्रसूतः 'न पौरुषेयत्वाशङ्केति भावः कारणवाचिनो नारायणशब्दस्य कार्यकारणयोरभेदात्कार्यभूते वेदे वृत्तिः नारायणाद्वेदस्याविर्भावो लक्ष्यते "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत" इति च कार्यत्वप्रयुक्तानित्यत्वशङ्कां वारयति । स्वयम्भूरिति । स्वयमित्यात्मनेत्यर्थः स्वयमात्मनैवाविकृतरूपेणैवाविच्छिन्नपूर्वानुपूर्व्या प्रादुर्भवतीति स्वयम्भूरितिशुश्रुम यमादिभ्य इति शेषः" ॥ ४० ॥

कोऽसौ नारायणः यतः प्रादुर्भूतो वेदस्तत्राह । येनेति । येन स्वधाम्नि स्वस्वरूपेऽन्तःप्रविश्य धारकेऽमी भावाः वेददेवमनुष्यादयः पदार्था रजआदिगुणत्रयप्रचुराः गुणनामक्रियारूपैः यथायथं यथाकर्म भाव्यन्ते विभाव्यन्ते सृज्यन्ते स नारायण इत्यर्थः तत्र गुणाः शान्तिक्षमामार्दवादयः नामानि वेदो देवो मनुष्यो ब्राह्मण इत्यादि क्रिया अर्थप्रत्यायनाध्ययनादयः" रूपाणि शब्दात्मकत्वार्थात्मकत्वादीनि ॥ ४१ ॥

भवतु धर्मे वेदः प्रमाणं वेदप्रणिहितो धर्मः वेदश्च नारायणादुद्भूतो नारायणस्त्वीदृशस्तथापि प्रतिक्षणसंसारिभिरनुष्ठितौ धर्माधर्मावनन्तौ कथं ज्ञायेते तत्राह । सूर्य इति । खमाकाशः अहश्च रात्रिश्चाहनी [illegible]वचनानिर्देशसामर्थ्याद्रात्रिर्विवक्षिता कमुदकं कुः पृथ्वी स्वयं साक्षाद्धर्मश्च खादयः तदधिदेवताः सूर्याग्निसोमाश्चेत चतुर्दश देहस्य देहस्य कर्म देहो ब्राह्मणादित्वात्कर्मणि ष्यञ् बुद्धीन्द्रियमनःप्राणात्मकेन देहेन क्रियमाणस्य कर्मणः साक्षिणः साक्षाद्द्रष्टारः सूर्यादिमुखेन देह्यो धर्मो ज्ञायत इत्यर्थः ॥ ४२ ॥

एतैरेवाधर्मोऽपि ज्ञायत इत्याहुः । एतैरधर्मो विज्ञात इति तैर्ज्ञापितो ऽधार्मिको दण्डस्य विषय इत्याहुः । स्थानं दण्डस्य युज्यत इति दण्ड्याः किं कारिणः सर्वे इत्यस्योत्तरमाहुः । सर्वे कारिणः अतस्ते सर्वे कर्मानुरोधेन दण्डं प्रत्यर्हन्ति धर्ममनुतिष्ठतामपि विषयपरवशत्वादधर्मोऽप्यर्जनीयः अधर्मफलानुभवदशायां च ते दण्डमर्हन्तीत्यभिप्रायेण सर्वे कर्मानुरोधेन दण्डमर्हन्तीत्युक्तम् ॥ [illegible] ॥

एतदेव प्रतिपादयन्ति सम्भवन्ति हीति । हे अनघाः ! भद्राणि पुण्यानि विपरीतान्यपुण्यानि च सम्भवन्ति भद्राणि कुर्वताम् भद्राण्यवर्जनीयतया ओपतन्तीत्यर्थः कुतः यतस्तेषां कारिणां गुणेषु शब्दादिविषयेषु सङ्गः ऽत्यासक्तिरस्ति विषयपरवशत्वात्तेषामभद्राण्यपि सम्भवन्तीत्यर्थः धर्माधर्मपरिहारेण तूष्णीं वर्तमाना न दण्डमर्हेयुस्तत्राहुः देहवान्नह्यकर्मकृत् नहि देहवानकर्मकृदस्तीत्यर्थः स्वरूपतः कर्मपरिहारेणावस्थातुं न कोऽपि हि प्रभुरिति सर्वोऽपि देहिनः कारित्वात्पर्यायेण दण्डमर्हन्तीति भावः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्त्वमनारोपितं रूपं लक्षणं व्यावर्तकधर्मम् ॥ ३८ ॥

कथंस्वित्केन प्रकारेण स्थानं देशः विषयो वा नृणां मध्ये कतिभ्यः कर्मकारिभ्यः सर्वेऽपि दण्ड्याः किमाहोस्वित् कतिचिदेव दण्ड्याः तत्रापि किङ्कारिणो वा किमकारिणो वा इति ब्रूत ॥ ३९ ॥

यच्चाधर्मस्य लक्षणमित्यत्राहुरित्याह । वेदेति । वेद एव धर्माधर्मौ मिथो व्यावर्त्य वक्तीत्यनेन प्रमाणं चोक्तं धर्मस्य तत्त्वं श्रुतेत्यत्रोत्तरमाहुरित्याह । वेद इति । वेदो नारायणवक्तृकः तपःशक्त्या दृष्टवेदवक्तृमुनिव्यावृत्त्यर्थं साक्षादिति तदुक्तम् ।

वेदानां प्रथमो वक्ता हरिरेव यतो विभुः ।
अतो विष्णवात्मका वेदा इत्याहुर्वेदवादिनः । इति

देवदत्तवन्नारायणोऽपि किमन्यस्मादवाप्तवेद इति नेत्याह । स्वयम्भूरिति । अनेन नारायणवक्तृत्वेऽपौरुषेयत्वेनानारोपितरूपत्वाभावेन तदुक्तधर्माधर्मनिश्चयायोग इत्याशङ्का परिहृता । तेषां स्वयम्भूत्वेनाभिव्यक्तिरेव हरेर्न तु पुराणादिवदन्यथा रचितत्वम् "यावद्ब्रह्म विष्ठितं तावती वाक्" इति श्रुतेः ॥ ४० ॥

नन्वेतावता नारायण इतरस्मात्कथं व्यावृत्तस्तथा ज्ञायत इति तल्लक्षणमाह । येनेति । स्वधाम्नि स्वाधारतया गुणाः शुक्लादयः नामान्ययं स्तम्भोऽयं घट इत्यादीनि क्रियाः पचति पठतीत्यादयः रूपाणि क्षिपावनुर्ध्यादित्यादीनि क्रिया पञ्चविधं कर्मेति वा गुणाः शमदमादयः रूपाणि शुक्लादीनि । यथातथमसाङ्कर्येण विभाव्यन्ते उत्पाद्यन्ते ॥ ४१ ॥

किं वाऽस्य स्थानमीप्सितमित्यत्राहुरित्याह । सूर्योऽग्निरिति । गाव आपः "गौर्भूमिरापः" इति वचनात् सन्ध्याबाहस्त्व सन्ध्याहनी कालाभिमानी देवः स्वयं पापपुण्ययोः कर्ता देवशब्दवाच्यः श्रीहरिर्वा कालः हृदयं मन इति द्वे स्वयमित्यनेन व्याख्याते धर्मस्येतत्सुमलक्षणम् अधर्मस्यापि साक्षादीत्युक्त इति साक्षिणः ॥ ४२ ॥

धर्माधर्मलक्षणपुण्यपापदर्शिभिरेतैः सूर्यादिभिः न धर्मो यस्य सोऽधर्मः अधर्म इति विज्ञातो यः पुरुषः स एव दण्डस्य स्थानं दण्ड्य इति युज्यते यमस्तु दण्ड एवाधिकृतः कथंचित् क्रियते दण्ड इत्यस्योत्तरमाहुरित्याह । सर्व इति । कारिणः पापकारिणः सर्वे क्रमानुगेण पापकर्मानुसारतस्तारतम्येन दण्ड्याः किं कारिणः सर्वे इत्यत्राहुरित्यतो वा आह । सर्वे इति । पापकारिणः सर्वे दण्डमर्हन्तीत्यनेन पापकारिण एव यमेन दण्ड्याः न पुण्यकारिण इति च ग्राह्यम् ॥ ४३ ॥

ननूभयेषामपि दृष्टश्रुताभ्यामैहिके सुखदुःखफले जानताम् उभयविधकर्मसम्भवः कथमत्राह । सम्भवन्तीति । विपरीतानि पापविरुद्धपुण्यानि राज्याद्यवाप्तिनिमित्तसुखफलप्रदानि "आचतुर्दशमादूर्ध्वं कर्माणि नियमेन तु । दशावरगाणाम्" इत्यनेनाद्यशब्दगृहीतं सम्भवेऽपि किं कारणमत्राह । कारणमिति । त्रिगुणसम्बन्ध एव कारणमिति भावः । नन्वेतल्लिङ्गशरीरायत्तत्वं तस्य कर्माकरणादित्याशङ्क्य स्थूलदेहविलक्षणोक्तमिति भावेनाह । देहवानिति । यो गुणसङ्गवान् पुण्यवान् कर्म करोति शान्तादिति चेत्तत्राह । देहवानिति वा । देही चेत्कर्मकृत्वानन्येव गुणानां तादृशशक्तिमत्त्वात् "कार्यते ह्यवशः" इत्युक्तेः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वेदे प्रणिहितो विहित इत्यर्थः साक्षादिति स्वयमेवेत्यर्थः । अत एव स्वयम्भूः ॥ ४० ॥

येन परमेण हेतुना ॥ ४१ ॥

साक्षिणः आदित्यचन्द्रावित्यादिमन्त्रमयपरीक्षादौ तद्भद्राभद्रव्यञ्जकाः ॥ ४२ ॥

युज्यते भवतीत्यर्थः ॥ ४३—४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रहस्येत्यरे धर्ममेव न जानीथ किमित्यस्मद्भयेन धर्मराजस्य किङ्करा इति ब्रूथ किन्तु यूयं प्रेतविशेषा एवास्मद्भ्रान्तपतिताः कथमद्य जीविष्यथेति भावः ॥ ३७ ॥

ननु वयं धर्मराजस्य दूता भवाम एव के तावदस्मान् परिच्छिन्दन्तीत्यत आहुर्यूयमिति । निर्देशो निदेशः नोऽस्मान् प्रति तत्त्वं स्वरूपं लक्षणं प्रमाणम् ॥ ३८ ॥

कथमिति । दण्डस्य प्रकारप्रश्नः तिष्ठत्यस्मादिति स्थानमिति दण्डस्य कारणप्रश्नः कारिणः कर्मिण इति विषयप्रश्नः सर्वे इति किं पश्वादयोऽपि किं वा नृणां मध्ये कतिचिदिति तत्र व्यवस्थाप्रश्नः ॥ ३९ ॥

वेदेन प्रणिहितो विहितः वेदविहितत्वं धर्मत्वमिति धर्मस्वरूपं तत्र वेदविधिरेव प्रमाणमिति प्रमाणञ्चोक्तं दण्डकारणप्रश्नेनाधर्मस्यापि पृष्टत्वादधर्मस्य स्वरूपं प्रमाणञ्चाहुः । तद्विपर्ययो यो वेदनिषिद्धः सोऽधर्मः वेदनिषेध एव तस्मिन् प्रमाणमित्यर्थः स्वयम्भूरिति नारायणस्य निःश्वासमात्रेण स्वयमेव भवतीति तथा च श्रुतिः "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः" इति ॥ ४० ॥

कोऽसौ नारायणस्तत्राहुः । येन स्वधाम्नि वैकुण्ठे स्थित्वैव अमी भावाः प्राणिनः सङ्कल्पमात्रेणैव गुणाः शान्तत्वादयः नामानि ब्राह्मण इत्यादीनि क्रिया अध्ययनाद्याः रूपाणि वर्णाश्रमादीनि तैर्विभाव्यन्ते विविधतया सृज्यन्ते यथायथं यथावत् ॥ ४१ ॥

कोऽपि न जानातीति पापं पुण्यमाचरितं कियत् अत्र सूर्यादयो देहस्य जीवस्य साक्षिणो येन विभाव्यन्त इति पूर्वेणान्वयः अहश्च रात्रिश्च कमुदकं कुः पृथिवी यथाहुः ।

आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मोऽपि जानाति नरस्य वृत्तम्
इति ॥ ४२ ॥

स्थानमाहुः । धर्मेति । दण्ड्यानाहुः सर्व एव प्राणिनः ॥ ४३ ॥

सर्वेषां दण्ड्यत्वे हेतुः । सम्भवन्तीति । विपरीतान्यभद्राणि पापानि यतः कारिणां कर्मिणां गुणसङ्गोऽस्त्येव गुणाश्च सत्त्वाद्याः पुण्यपापहेतव एव यावज्जीवमयं धार्मिकोऽधार्मिको वेति तु भूम्नैव व्यपदेशः । ननु कारिणामपि गुणसङ्ग इत्युच्यते यदि कश्चिदकारी स्यात् स त्वदण्ड्य एवेति तत्राहुः । देहवानिति । देहधारी नरः अथ च कर्मरहित इति प्रसक्तिरसम्भावित्यर्थः ॥ ४४ ॥

येन यावान् यथाधर्मो धर्मो वेह समीहितः।
स एव तत्फलं भुङ्क्ते तथा तावदमुत्र वै ॥ ४५ ॥
यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते।
भूतेषु गुणवैचित्र्यात्तथान्यत्रानुमीयते ॥ ४६ ॥
वर्त्तमानोऽन्ययोः कालो गुणाभिज्ञापको यथा।
एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनम् ॥ ४७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

किमर्थं धर्मराजस्य किङ्करान्नो निषेधथेत्यत्राहुः। यदि धर्मराजस्य निर्देशकारिणः निर्देशकारिणस्तर्हि धर्मस्य तत्त्वं स्वरूपं लक्षणं प्रमाणं च नोऽस्मान् प्रति ब्रूत ॥ ३८ ॥

कथंस्वित् केन प्रकारेण दण्डः ध्रियते इति दण्डप्रकारप्रश्नः अस्य दण्डस्य निमुख्यस्मादिति स्थानं हेतुरिति दण्डहेतुप्रश्नः ईप्सितं स्वरूपप्रमाणाभ्यां ज्ञातुमिष्टं लक्ष्यमाणस्य दण्डहेतोरधर्मस्यानेन स्वरूपप्रमाणप्रश्नः कारिणः कर्मिणः सर्वे दण्ड्याः किमाहोस्विन्नृणां मध्ये कतिचिदिति दण्डविषयप्रश्नः ॥ ३९ ॥

उत्तरमाहुः। वेदेत्यादिना। वेदैः प्रणिहितो विहितो हि धर्मः अनेन वेदविहितत्वं धर्मत्वमिति धर्मस्वरूपं विधिवाक्यं तत्प्रमाणमिति चोक्तम् अधर्मस्तद्विपर्ययः इत्यनेन वेदैर्निषिद्धत्वमिति स्थानस्य स्वरूपं निषेधवाक्यञ्च तत्प्रमाणञ्चोक्तं वेदस्यान्यप्रमाणनिरपेक्षत्वान्नित्यत्वान्नारायणात्मकत्वाच्च प्रामाण्य प्राहुः वेदस्वरूपमन्यप्रमाणनैरपेक्ष्येण भगवन्निःश्वसितरूपेण भवति नित्यनिष्पन्नपदवाक्यरूपः प्रादुर्भवतीति स्वयम्भूः तथा च श्रुतिः "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः। ऋच सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्माद्यजुरजायत" इति। स्मृतिश्च "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा" इति निःश्वासभूतस्य स्वरूपतो भिन्नस्यापि वेदस्य निःश्वासवतः सकाशात् अपृथक्स्थितिप्रवृत्तिमत्त्वेनाभिन्नत्वमाहुः। साक्षान्नारायण इति शुश्रुम इति ॥ ४० ॥

कोऽसौ साक्षान्नारायण इत्याकाङ्क्षायामाहुः। येन स्वधाम्नि सर्वाधारे [illegible] गुणाः ब्रह्मादिस्तम्बपर्यन्ताः रजआदिप्रचुरास्तत्तदनुरूपगुण[illegible]यथातथं विविक्ततया भाव्यन्ते सृज्यन्ते स साक्षान्नारायणः ॥ ४१ ॥

अधर्मो [illegible] केन ज्ञायते इत्यत्राहुः। सूर्य इति। अहनी अहश्च [illegible] कमुदकं कुः पृथ्वी धर्मराजः देहस्य धर्मस्य साक्षिणः साक्षाद्रष्टारः ॥ ४२ ॥

एतैः [illegible]ऽभिज्ञातः सन् दण्डस्य स्थानं युज्यते अधर्म एव [illegible] हेतुरित्यर्थः दण्डविषयमाहुः। सर्वे इति ॥ ४३ ॥

सर्वेषां दण्डार्हत्वे हेतुमाहुः। सम्भवन्तीति। कारिणां कर्तृणां [illegible] न असङ्गेन पापानि च सम्भवन्ति यतो गुणसङ्गो गुणकार्यरूपदेहेन्द्रियसम्बन्धोऽस्ति देहवांश्च अकर्मकृत् कर्मकर्तृत्वरहितो न अतः सर्वेषां गुणकार्यरूपदेहवतां पापकारित्वे सिद्धे तद्धेतुकदण्डविषयत्वमित्यर्थः ॥ ४४ ॥

भाषा टीका।

श्रीशुकदेवजी बोले इस प्रकार यमदूतों के कहने पर वासुदेव की आज्ञा करने वाले दूत हंसकरके मेघ सरी की गर्जनावाली गंभीर वाणी से उन यमदूतों से बोलने लगे ॥ ३७ ॥

विष्णु दूत बोले आप लोग यदि धर्मराज के आज्ञा करनेवाले हो तो जो धर्मका तत्त्व होवे जो धर्मका लक्षण होवै सो हमसे कहो ॥ ३८ ॥

किस प्रकार दंड दिया जाता है कौन सा उस दंडनीय पुरुष का योग्य स्थान है क्या पापादि करने वाले सब ही दंड न योग्य हैं अथवा मनुष्यों में कितने एकही हैं ॥ ३९ ॥

यमदूत बोले वेद में आज्ञा रूप विधि से प्रतिपादित जो है सोई धर्म है उससे जो विपरीत है वही अधर्म है वेद तो साक्षात् स्वयंभू होने से नारायण रूप ही है ऐसा सुनते हैं ४०

जो अपने स्वरूप से रज सत्त्व तमोगुणमय इन सब प्राणियों को गुण नाम क्रिया रूपों से ब्राह्मणादि नाम अध्ययनादिक क्रिया द्विहस्तादिरूप इन प्रकार से यथा योग्य बनाते हैं वही श्रीमान् नारायण हैं ॥ ४१ ॥

सूर्य अग्नि आकाश पवन सरस्वती सोम दिन रात दिशा जल पृथिवी काल धर्म इनों के अभिमानी देवता सब जीव मात्र के किये पाप पुण्य के साक्षी हैं ॥ ४२ ॥

इनका जाना हुआ जो अधर्म वही दण्डका हेतु होजाता है [illegible] करने वाले सबही कर्मके अनुसार दण्ड पाते हैं ॥ ४३ ॥

हे [illegible]! हो सब जीवों में भले बुरे कर्म होतेही हैं क्यों [illegible] वाले गुणों के सङ्गी हैं जो देह धारी है सो बिना कर्म किये नहीं रहता है ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कथं स्विद्ध्रियते दण्ड इत्यस्योत्तरम्। येनेति। धर्मो वेति दृष्टान्तः अधर्मानुसारेण दण्डो धर्मानुसारेण सुखवदित्यर्थः ॥ ४५ ॥

मनसैव पुरे देवः पूर्वरूपं विपश्यति ।
अनुमीमांसतेऽपूर्वं मनसा भगवानजः ॥ ४८ ॥
यथाज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि ।
न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ ४९ ॥
पञ्चभिः कुरुते स्वार्थान् पञ्च वेदाथ पञ्चभिः ।
एकस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते ॥ ५० ॥
तदेतत् षोडशकलं लिङ्गं शक्तित्रयं महत् ।
धत्तेऽनु संसृतिं पुंसि हर्षशोकभयार्तिदाम् ॥ ५१ ॥
देह्यज्ञोऽजितषड्वर्गो नेच्छन् कर्माणि कार्यते ।
कोशकार इवात्मानं कर्मणाच्छाद्य मुह्यति ॥ ५२ ॥
नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ॥ ५३ ॥
लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत ।
यथायोनि यथाबीजं स्वभावेन बलीयसा ॥ ५४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न केवलं सूर्यादय एव धर्माधर्मज्ञापकाः किन्त्वर्थापत्तिरपीत्याहुः । यथेति । हे देवप्रवराः ! इह जन्मनि शान्तघोरमूढत्वेन वा सुखदुःखमिश्रत्वेन वा धार्मिकत्वादिना वा त्रैविध्यं भूतेषु यथोपलभ्यते तथान्यत्र जन्मान्तरेऽनुमीयते त्रैविध्यान्यथानुपपत्त्या कल्प्यते ॥ ४६ ॥

वर्तमानजन्मना पूर्वापरजन्मधर्माधर्मज्ञानं भवतीति सदृष्टान्तमाहुः । वर्तमानो वसन्तादिकालः अन्ययोर्भूतभविष्यतोर्वसन्तयोर्ये गुणाः पुष्पफलादयस्तेषामभिज्ञापको यथा एवमेतज्जन्म अन्ययोर्भूतभाविजन्मनोर्धर्माधर्मौ निदर्शयतीति तथा ॥ ४७ ॥

अयं च धर्माधर्मज्ञानप्रकारोऽन्येषां धर्मराजस्तु मनसैव सर्वं पश्यतीत्याहुः । पुरे संयमिन्यां स्थित एव देवो यमो देहे स्थितोऽन्तर्यामी वा जीवस्य पूर्वरूपं धर्माधर्मादियुक्तं विशेषेण पश्यति अनन्तरमपूर्वं रूपं मीमांसते यद्यस्यानुरूपं तद्विचार्यात् । यतोऽसौ भगवानजः ॥ ४८ ॥

जीवस्त्वीश्वरेणोपस्थापितं वर्त्तमानं देहं पश्यति न तु पूर्वमपरञ्चेत्याहुः । यथेति । अज्ञोऽविद्योपाधिर्जीवस्तु व्यक्तमेव प्राचीनकर्माभिव्यक्तं वर्तमानमेव देहाद्युपास्ते अभिमन्यते पूर्वमपरं वा न वेद अत्र हेतुः । नष्टा जन्मनां स्मृतिर्यस्य अत्र दृष्टान्तः तमसा निद्रया युक्तो यथा स्वप्नेऽपि व्यक्तमेव देहाद्युपास्ते न तु जाग्रद्देहादिपूर्वस्वप्नादिगतं वा तद्वदित्यर्थः ॥ ४९ ॥

एवं [illegible] — [illegible]स्य संसारं प्रपञ्चयति पञ्चभिः श्लोकैः । ष (१) अज्ञः जीवः पञ्चः कर्मज्ञानादीन् कुरुते पञ्च शब्दाअनुभवतीत्यर्थः । मनसा सह सप्तदशः षोडशोपाध्यन्तर्गतोऽपि स्वयन्त्वेक एव सर्वेन्द्रियविषयप्रतिसन्धानात् त्रीन् ज्ञानकर्मेन्द्रियमनोविषयान् प्राप्नोति ॥ ५० ॥

तदेतल्लिङ्गशरीरं शक्तित्रयं गुणत्रयकार्यं महदादि पुंसि जीवे अन्वनु संसृतिं धत्ते ॥ ५१ ॥

नेच्छन्ननिच्छन्नप्ययंनैव कर्माणि कार्यते कोशकारः कीटविशेष मुह्यति निर्गमोपायं न जानाति ॥ ५२ ॥

कार्यत इत्यत्रानुभवं प्रमाणयन्ति । नहीति । गुणैर्गुणकार्यैरागादिभिः स्वाभाविकैः पूर्वकर्मसंस्कारोद्भूतैः ॥ ५३ ॥

कर्मवशेन च तदनुरूपो देहो भवतीत्याहुः । लब्ध्वेति । अव्यक्तमदृष्टं निमित्तं लब्ध्वा व्यक्ताव्यक्तं तदनुरूपं स्थूलं सूक्ष्मं च शरीरं भवति यथायोनि मातृसदृशं यथाबीजं पितृसदृशं स्वभावो वासना शुक्रशोणितयोरेकत्वेऽपि कर्मवासनया मातापितृसदृशो देहो भवतीत्यर्थः ॥ ५४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथं स्थिक्रियते दण्ड इत्यस्योत्तरमाहुः । येन गुणत्रयसंसृष्टेन जीवेन कर्त्रा यथा स्वस्वगुणानुसारेण धर्मोऽधर्मो वा यावान् देहसमीहितः देहेन बुद्धीन्द्रियमनःप्राणमञ्ज्ञानरूपेण देहेन करणेन समीहितः स कर्ता तावदेव तत्फलं स्वर्गनरकादिरूपं धर्माधर्मफलममुत्र भुङ्क्ते न धार्मिको नरकं न वा अधार्मिकः स्वर्गं नाप्यल्पपापान्महद्दुःखं नाल्पपुण्यान्महत्सुखं भुङ्क्ते इत्यर्थः । धर्मो यथेति दृष्टान्तो वा तदाशयः गणा धर्मो यावान् देहसमीहितः तावदेव तत्फलं सुखमत्र स्वर्गे भुङ्क्ते एवमधर्मोऽपि यावांस्तावदेव तत्फलं दुःखं भुङ्क्ते इति ॥ ४५ ॥

न केवलं परत्रैव कर्मानुसारेण तत्फलभोग अपि त्विहापि लोके

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्राचीनकर्मानुसारेणैव फलभोग उपलभ्यमानतद्वत्परलोकेऽप्यनुमीयत इत्याहुः । यथेति । हे देवप्रवराः ! इह लोके भूतेषु गुणवैचित्र्यात्सत्त्वादिगुणनिमित्तप्राचीनसात्त्विकादिकर्मवैचित्र्यात्तद्वैविध्यं सुखित्वदुःखित्वमूढत्वरूपं त्रैविध्यम् उपलभ्यते गुणवैचित्र्यनिमित्तमिदं त्रैविध्यमिति सर्वजनीनं ज्ञायते तथान्यत्र परलोकेऽपि गुणवैचित्र्यात्त्रैविध्यमनुभूयत इत्यर्थः ॥ ४६ ॥

एवं भूतभाविष्यद्वर्त्तमानकालत्रयगोचरेषु कारिषु कर्मानुसारेणैव फलभोगः कर्म च धर्माधर्ममिश्ररूपं तच्च सत्त्वादिगुणोत्पन्नेषु निमित्तमिति चोक्तम् इदानीं धर्मादिरूपं कर्म सत्त्वादिगुणोत्पन्नेषु निमित्तमिति कथं ज्ञायत इत्यपेक्षायां कार्येण कारणमनुमीयत इति सदृष्टान्तमाहुः । वर्त्तमान इति । यथा वर्त्तमानः कालः सुखदुःखाद्यनुभवसहचारितः कालः अनयोर्धर्माधर्मयोर्गुणाः निमित्तभूताः सत्त्वादयस्तेषां सुखदुःखमोहरूपैः कार्यैरभिज्ञापकः यथा वर्त्तमानकालिकाधर्मादिनिमित्ताः सुखदुःखमोहाः स्वनिमित्तभूतानां धर्मादीनां सत्त्वादिगुणोत्पन्नमूलत्वं ज्ञापयन्तीत्यर्थः एवमेतद्वर्त्तमानकालिकं दुःखादित्रयं जन्मान्यपोरन्यजन्मनोः बहुलवचनाद्विशेषणस्य परनिपातः पूर्वापरजन्मनोः धर्माधर्मयोर्निदर्शनं तयोः सत्त्वादिगुणोत्पन्नमूलत्वाभिज्ञापकमित्यर्थः सत्त्वादयो हि धर्मादिरूपकर्मोपादानद्वारा तत्फलत्वेन सुखदुःखादीन् जनयन्ति न साक्षादतः सुखादीनां सत्त्वादिकार्यत्वात्कार्यभूतैस्तैः स्वनिमित्तभूतधर्मादीनां सत्त्वादिमूलत्वमनुमीयते कार्येण कारणानुमानादिति भावः ॥ ४७ ॥

येन यावान् यथाधर्म इति कर्मैव स्वानुरूपसुखदुःखादिकारणमित्युक्तं तस्य क्षणिकत्वात्कथं कालान्तरे सुखादिनिमित्तत्वमित्यत आहुः । मनसैवेति । पुरे देहे देवः स्वतेजसा दीप्यमानः न तु जीववत्कर्मणा सङ्कुचितज्ञान इत्यर्थः जीवान्तरात्मतयावस्थितः परमात्मा मनसैव नित्यासङ्कुचितापरिच्छिन्नधर्मभूतज्ञानेनैव पूर्वरूपं प्राक्तनजन्मसम्बन्धिपुण्यपापादिरूपं विपश्यति पुण्यपापादिरूपदर्शनेन चिकीर्षितानुग्रहनिग्रहवान् भवतीति भावः तथाजो भगवान् मनसा पूर्वमनु प्राचीनं कर्मानुसृत्यैव मीमांसते तत्फलदानादिप्रकारं चिन्तयति कर्मणः क्षणिकत्वेऽपि तन्निमित्तानुग्रहनिग्रहवान् परमात्मा तदनुसारेण सुखदुःखादिफलदो भवतीति भावः ॥ ४८ ॥

यदि कर्मनिमित्तनिग्रहानुग्रहस्तदनुरोधिफलदः परमात्मा तर्हि जीवः परमात्मानुग्रहावहं शुभमेव कर्माचरन् सुखमेव किं नाश्नुत इत्यत्राहुः । यथेति । तमसा युक्तः अन्धकारेणाभिभूतः अत एवाज्ञः यथा व्यक्तं शरीरेणोपात्तं चिन्तयति न तु पूर्वं पुरः स्थितमपरं पृष्ठतः स्थितं च वेद निद्रया युक्तं स्वप्नेऽपि व्यक्तं देहाद्युपात्तं न तु तत्पूर्वदेहादि वेदेति यावत् तथा जीवोऽपि तमसाज्ञानेन युक्तः देहात्माभिमानस्तत्स्वात्माभिमानयुक्त इत्यर्थः अत एवाज्ञः कर्मणा सङ्कुचितज्ञानः व्यक्तं वर्त्तमानं देहमुपात्तोऽनुसन्धत्ते न तु पूर्वं प्राक्तनमपरं भाविष्यच्च शरीरं वेद तत्र हेतुः नष्टजन्मस्मृतिः पूर्वापरजन्मस्मृतिर्यस्य सः पूर्वापरजन्मविषयकस्मृत्यभावात्कालवर्त्तमानदेहात्माभिमानशीलत्वाच्च तत्परवशोऽज्ञो जीवः प्रकृतेः देहसुखोचितमेव कर्म करोति न तु परमात्मप्रसादापादकं शुभं कर्मेति भावः ॥ ४९ ॥

एवं जीवानाद्यविद्याकर्मवासनाभिस्तिरोहितस्वरूपाणां सत्त्वादिगुणत्रयसंसृष्टानां स्वस्वगुणोत्पन्ननिमित्तधर्माधर्ममिश्ररूपेण कर्मणां सुखदुःखमिश्ररूपफलानुभवाय देवतिर्यङ्मनुष्यरूपेण संसरतां धर्मादिनिमित्तेश्वरानुग्रहहेतुकः सुखाद्यनुभव उक्तः अथैषां संसरणप्रकारं तद्धेतुं च प्रपञ्चयन्तस्तन्निस्तरणोपायमाहुः । पञ्चभिः पञ्चभिः । पञ्चभिः कर्मेन्द्रियैः पाण्यादिभिः स्वार्थानुपादानगत्यादीन् पञ्च कुरुते अथ ननु पञ्चभिर्ज्ञानेन्द्रियैः श्रोत्रादिभिः पञ्च शब्दादीन्वेद केन करोति वेद च षोडशेन भूतपञ्चकदशेन्द्रियापेक्षया षोडशं मनः तेन मनःसंयुक्तैः पञ्चभिः कुरुते पञ्चभिर्वेद इत्यर्थः कथंभूतः स्वयं जीव एक एव शरीरवदनेकद्रव्यसङ्घातरूपत्वाभावादेक इत्युक्तमिति जीवनानात्वमत्र निषिध्यत इति न भ्रमितव्यं सप्तदशः उक्तषोडशतत्त्वापेक्षया सप्तदशः त्रीन् सुखदुःखमोहान् भुङ्क्तेऽनुभवतीत्यर्थः ॥ ५० ॥

तदेतत् षोडशकलं षोडश कला अवयवा यस्य तत् षोडशकलं षोडशतत्त्वात्मकं शक्तित्रयं शक्तीनां त्रयं यस्मिन्निति व्यधिकरणपदो बहुव्रीहिः प्रकाशक्रियावरणशक्तिमत्सत्त्वादिगुणत्रयात्मकमविद्याकर्मवासनारूपशक्तित्रयाश्रयं वा महत्कार्यदशायां स्थूलाकारं लिङ्गं सूक्ष्मशरीरं पुंसि जीवे हर्षशोकभयार्त्तिदामनुसंसृतिं गर्भजन्माद्यवस्थां परिवृत्तिरूपां धत्ते आपादयति षोडशकलात्मकलिङ्गसम्बन्धनिमित्तो जीवस्य संसार इति भावः ॥ ५१ ॥

एवं लिङ्गं संसृतिं पुंस्यादधाति सत्ययं देही अज्ञः देहात्माभिमानवानत एवाजितषड्वर्गः अजितषडिन्द्रियकार्यः नेच्छन्नपि बलादित्यर्थः कर्माणि धर्माधर्ममिश्ररूपाणि कारयते शक्तित्रयात्मकेन लिङ्गेनेति शेषः एवं कृतेन कर्मणा कोशकार इवात्मानं स्वस्वरूपमाच्छाद्य निरोधात्पमुह्यति देह एवाहमिति मोहं प्राप्नोति कोशकारः कीटविशेषः स यथा तन्तून् करण्डरूपेण सृष्ट्वा स्वनिर्गमोपायं न जानाति तद्वदिति दृष्टान्तार्थः ॥ ५२ ॥

नेच्छन् कर्माणि कार्यत इत्येतदेव प्रतिपादयति । न हि कश्चिदिति । कश्चिद्देही जातु कदाचिदपि अकर्मकृत् कर्माकुर्वन्न तिष्ठति अन्ततस्तृणच्छेदादिकमपि कुर्वन्नेव तिष्ठतीति भावः स्वाभाविकैः रागादिभिः गुणैः सत्त्वादिभिर्बलात्कर्माणि विषयादीनि कार्यते एवेत्यर्थः ॥ ५३ ॥

एवमव्यक्तं संसरता जीवेनाव्यक्तमनभिज्ञातं निमित्तं संसृतिनिमित्तमवर्जनीयतया कर्मं कर्म लब्ध्वा कर्मवासनाश्रयं सदित्यर्थः लिङ्गमिति कर्तृपदसापेक्षार्थं व्यक्ताव्यक्तं स्थूलसूक्ष्मरूपं भवति उत्पत्तिदशायां देहरूपेण स्थूलाकारं मरणदशायां सूक्ष्माकारं च भवतीत्यर्थः यद्वाव्यक्तं मूलप्रकृतिरूपं प्रधानं कर्तृ नाशनिमित्तं जन्ममरणनिमित्तं कर्म लब्ध्वाऽवलम्ब्य व्यक्ताव्यक्तं भवति कदाचित् षोडशकलात्मकत्वेनाव्यक्तं कदाचिद्देवादिदेहाकारेण व्यक्तं भवति एकस्य प्रधानस्य स्थूलावस्था उत्पत्तिः तस्यैव पुनः सूक्ष्मावस्था मरणमिति हि जन्ममरणयाथात्म्यविद आचक्षते तथा चोक्तं भगवता ।

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव इति । यता । कर्मानुसारेणैव पिपीलिकादि[illegible] रूपाः स्थूलाश्च देहा भवन्तीत्यर्थः तद्दृष्टान्तरम् । येनेति । धर्मो वेति दृष्टान्तस्याहुः । यथायोनीति । कर्मानुसारेण सुखवदित्यर्थः ॥ ४५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कर्मानुसारेण । यद्वा । यथायोनि मातृसदृशं यथाबीजं पितृसदृशं च वर्तीयसा स्वभावेन सात्त्विकादिकर्मवासनारूपस्वभावेन भवतीत्यर्थः ॥ ५४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमत इत्यतः फलितमाह । येनेति । अमुत्र परलोके ॥ ४५ ॥

ननु "यावज्जीवं सुखं जीवेदृणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥

इति वचनात्स एवामुत्र स्वकृतं भुङ्क्ते इति न घटत इत्यत्राह । यथेति । स्वकृतफलदातारो दृश्यन्ते प्रमाणात इति शेषः वाक्यप्रामाण्यानङ्गीकारेऽपि प्रत्यक्षगृहीतव्याप्तिकानुमानात्सिद्धमित्याह । त्रैविध्यमिति । सत्त्वादिगुणानां वैचित्र्याद्भूतेषु उत्तमाधममध्यमत्वभेदेन त्रैविध्यमुपलभ्यते यथा प्रत्यक्षेणेति शेषः अन्यत्र जन्मान्तरे परलोके वा ॥ ४६ ॥

अनुमानस्य प्रामाण्यं ग्राहयितुम् एतदर्थं सदृष्टान्तमुपपादयन्तीत्याह । वर्तमान इति । वर्तमानः प्रतीयमानः वसन्तादिकालः अन्ययोः अतीतैष्यद्वसन्तयोः गुणानां फलपुष्पादिकार्याणामभिज्ञापको यथा एवमेतद्वर्तमानं जन्म धर्माधर्मज्ञापकमनयोरतीतानागतजन्मनोः यौ धर्माधर्मौ तौ नितरां दर्शयति ज्ञापयतीति धर्माधर्मनिदर्शनम् ॥ ४७ ॥

इतोऽप्यनुमानं प्रमाणमिति ज्ञापयितुं जीवसमवेतधर्माधर्मसद्भावे हरेः प्रत्यक्षं प्रमाणयन्तीत्याह । मनसेति । पुरे जीवशरीरे स्थितो देवः श्रीनारायणः जीवस्य पूर्वरूपमपूर्वमनागतरूपं च तत्समवेतधर्माधर्मौ च स्वमनसैव विपश्यति । अपरोक्षीकृत्य वर्तते दर्शनस्य क्वापि बाधो नास्तीति लट्प्रयोगः अन्येषामदर्शनमेव किं नेत्याहुरित्याह । अनुमीमांसत इति । अजः परमेष्ठी भगवान्मनसानुमीमांसते तदनुग्रहेणालोच्य विचार्य पश्यतीत्यर्थः सर्वजीवसाधारणाजशब्दप्रयोगादन्ये देवा अपि यथायोग्यं जानन्तीति ग्राह्यम् । किञ्च जीवात्मनोऽपि धर्माधर्मसमवेतपूर्वापररूपे वर्तमानसिद्धे इत्याहुरित्यतो वाह । मनसेति । सुरनरतिर्यगादिपुरे देवः क्रीडन् भगवान्भाग्यगुणोपेतः जीवः पूर्वानुभवसंस्कारसंस्कृतेन मनसैव पूर्वरूपं धर्माधर्मसमवायात्मकं रूपं विपश्यति विजानाति अपूर्वमनागतं मनसानुमीमांसते विचार्यानुमिनोति (१)"अजो ह्येको जुषमाणोऽनुशेत" इति श्रुतेः ॥ ४८ ॥

पूर्वापररूपे जानाति चेत्तर्हि कथमन्यत्र मृतोऽन्यत्र जातोऽहमिति न जानातीत्याशङ्क्य श्रीनारायणानुग्रहमन्तरेण तादृशज्ञानं न सुलभं सर्वेषामित्यभिप्रेत्याह । यथेति । अज्ञोऽविवेकी अव्यक्तं प्रकृतिनिमित्तं देहमेवोपाश्रित्य देहात्मनोरभेदं कल्पयति । व्यक्तमेव पुरःस्थितमेव जानाति न तु पूर्वापरं इति वा । तत्र कारणमाहुरित्याह । तमसेति । विपरीतप्रत्ययापादकतमोगुणयुक्तत्वादत एव पूर्वमपरं च न वेद यावज्जीवं सुखं जीवेदिति चार्वाकमतमज्ञप्रलपितमिति ज्ञायत इति भावः ॥ ४९ ॥

देही चेत्कर्म करोत्येवमुक्तं तत्र कर्मकरणप्रकारं दर्शयति ।

पञ्चभिरिति । पञ्चभिर्वागादिकर्मेन्द्रियैः स्वार्थान् स्वविषयानभिवदनशिल्पगतिविसर्गानन्दाख्यान् पञ्चभिः श्रोत्रादिज्ञानेन्द्रियैः पञ्च शब्दादीन् सप्तदश स्वयमेक आत्मा षोडशेन षोडशभेदयुक्तेन लिङ्गशरीरेण त्रीन् सत्त्वादिगुणैस्त्रिधा विभक्तं सुखं दुःखं मिश्रं च भुङ्क्ते "सत्त्वं सुखे संजयति" इत्यादेः देहात्मनोर्भेदप्रकाशनाय सप्तदश इत्युक्तम् ॥ ५० ॥

तर्हि कस्मात्संसारोऽस्येति तत्राह । तदेतदिति । षोडश कलाः श्रोत्रादीन्द्रियाणि मनश्च पञ्च भूतानि यस्मिंस्तत्तथा शक्तीनां प्रकाशक्रियावरणलक्षणानां त्रयं यस्मिंस्तत्तथा सत्त्वादिगुणशक्तियुक्तमित्यर्थः अत एव महापुरुषाभिभवसमर्थं त्रिशक्तियुक्तत्वादपर्यादप्रदं लिङ्गं लिङ्गशरीरं पुंस्यनु स्वकर्मानुकूल्येन संसृतिं धत्त इत्यन्वयः । अभिकरणत्वमात्रप्रदर्शनाय पुंसीति सप्तमी तस्माद्देहाभिमाननिमित्तमिदं सर्वमित्यर्थः ॥ ५१ ॥ ॥

आत्मनः संसारप्रकारं निरूपयति । देहीति । अवशीकृतषडिन्द्रियवर्गोऽनिच्छन्नपि कर्माणि कार्यते गुणाधीनषडिन्द्रियैरिति शेषः । निरिगृहीतवत्कुलात्कार्यमाणश्चेत्स्वसंपादितपदो वेत्ति किं नेत्याह । कोशकार इति । यथा कोशकारः कृमिः स्वकर्मणा निर्मितकोशेनात्मानमाच्छाद्य कोश एव तमसि मुह्यति कोशनाशनाशौ न जानाति तथा देह्यपि कर्मणात्मानमाच्छाद्य मुह्यतीत्यर्थः ॥ ५२ ॥

मोहोऽस्यास्तीति कुतो ज्ञायत इत्याशङ्क्य पुनः पुनः कर्मकरणादित्यभिसन्धिमतः स्वोक्तार्थे प्रमाणं दर्शयन्तीत्याह । नहीति । ॥ ५३ ॥

जननमरणे अपि देहस्यैव आत्मनस्तदभिमानादुपचर्यते इत्याहुरित्याह । लब्ध्वेति । संसारनिमित्तमव्यक्तं प्रकृतिकार्यं शरीरं लब्ध्वा व्यक्ताव्यक्तमुत जन्ममरणमपि भवति जीवस्योपचार इति शेषः । "देहस्य सर्वथा नाशाविनाशौ भवनस्य च" इत्यादेः निमित्तं कारणमव्यक्तं प्रकृतिं लब्ध्वा प्राप्य व्यक्ताव्यक्तं जन्ममरणात्मकं शरीरं भवति जीवस्येति शेष इति वा कथं यथायोनि पश्वादियोनिमनतिलङ्घ्य यथाबीजं कर्मराशिमनतिक्रम्य सत्त्वादिनिमित्तस्वभावेन ॥ ५४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अनुमीयते सर्वैरपीति शेषः ॥ ४६ ॥

वर्तमानः पूर्वसन्ध्यादिर्वसन्तादिर्वा स यथा पूर्वभागे स्वपूर्वकालस्य रात्र्यादेः शिशिरादेर्वा गुणांशान् व्यञ्जयति । उत्तरभागे च स्वपरकालस्य दिवसादेर्निदाघादेर्वा तथा वर्तमानजन्मापि स्वपूर्वजन्मादेरित्यर्थः ॥ ४७ ॥

भगवानज इति यमपि तद्विभूतित्वाङ्गत्या तदभेदनिर्देशः ॥ ४८—५३ ॥

लब्ध्वेति अदृष्टेन निमित्तेन ये योनिबीजे प्राप्येते तत्स्वभावानुसारेण देही भवतीत्यर्थः ॥ ५४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कथं दृष्ट इत्यस्योत्तरमाहुः । यावान् यत्प्रमाणकः यथा येन प्रकारेण अधर्मो धर्मो वा कृतः । तत्फलं दुःखं सुखं वा तावत्तत्प्रमाणकं शास्त्रदृष्ट्यैवेति शेषः ॥ ४५ ॥

---

(१) अजः जीवः एकः कर्म जुषमाणः सेवमानः सन् शरीरे अनुशेते इति श्रुत्यर्थः ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सत्त्वादिगुणसङ्गः प्रत्यक्षमेवं परलोकेऽप्यतामित्याहुः । इह लोके त्रैविध्यं पुण्यपापमिश्रकर्मत्वेन नृणां त्रैविध्यं यथा तथैवान्यत्र परलोकेऽन्यजन्मनि वा सुखित्वमिश्रत्वदुःखित्वेन त्रैविध्यम् अनुमीयते शास्त्रदृष्ट्यैवेति भावः ॥ ४६ ॥

वर्त्तमानजन्मनैव पूर्वापरजन्मधर्माधर्मज्ञानं भवतीति सदृष्टान्तमाहुः । वर्त्तमानो वसन्तादिकालः अन्ययोर्भूतभविष्यतोर्वसन्तयोर्ये गुणाः पुष्पफलादयस्तेषामभिज्ञापको यथा एवमेतज्जन्मैव अन्ययोर्भूतभाविनोर्जन्मनोर्धर्माधर्मौ निदर्शयतीति तथा ॥४७॥

अयञ्च धर्माधर्मज्ञानप्रकारस्त्वन्येषां प्रायिकः धर्मराजस्तु मनसैव निश्चितमेव सर्वं पश्यतीत्याहुः । पुरे संयमन्यां स्थित एव देवो यमः पूर्वरूपं पूर्वजन्मस्वरूपं धर्माधर्मादियुक्तं पश्यति । अनु अनन्तरमपूर्वं वर्त्तमानं भाविरूपं मीमांसते । यद्यस्यानुरूपं तद्विचारयति भगवान् सर्वज्ञः अजो ब्रह्मतुल्यः ॥ ४८ ॥

जीवस्य तु पूर्वापरज्ञानाभावात् पापादौ प्रवृत्तिर्न चित्रमित्याहुः । यथा तमसा युक्तः पश्वादिर्व्यक्तं वर्त्तमानदेहमेव उपास्ते यथेष्टाहाराद्यैः सुखयति तथैव नरोऽपि नष्टा जन्मनैव स्मृतिर्यस्येति पूर्वापरज्ञानाभावे हेतुः ॥ ४९ ॥

ततश्च पञ्चभिः कर्मेन्द्रियैर्यथेष्टं स्वार्थान् कुरुते पञ्चभिर्ज्ञानेन्द्रियैः पञ्च शब्दादिविषयभोगाननुभवति षोडशेन मनसा इन्द्रियेण तु त्रीन् ज्ञानकर्मेन्द्रियमनोविषयान् अश्नुते प्राप्नोति स्वयं सप्तदशो जीवः ॥ ५० ॥

सप्तदशस्य तस्य तदेतल्लिङ्गशरीरं कर्तृ शक्तित्रयं गुणत्रयकार्यं पुंसि जीवे अनुसंसृतिं धत्ते महत् दुर्निवारम् ॥ ५१ ॥

अनेन लिङ्गेनैव कदाचित् कर्म कर्तुमनिच्छन्नपि बलात् कर्माणि कार्यते ततश्च कोशकारः कीट इव मुह्यति निर्गमोपायं न जानाति ५२

स्वाभाविकैः पूर्वसंस्कारोद्भूतैः ॥ ५३ ॥

एवञ्च निमित्तमदृष्टं लब्ध्वा तत्कर्मानुसारेण व्यक्ताव्यक्तं स्थूलं सूक्ष्मञ्च शरीरं भवति यथायोनि कचिन्मातृसदृशं यथाबीजं क्वचित् पितृसदृशं कचिदुभयसदृशं स्वभावेन हिंस्रत्वसौम्यत्वेन च युक्तम् ॥ ५४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कथञ्चिदित्यपेक्षायाम् इत्यस्योत्तरमाहुः । येनेति । यावान् स्वरूपतो यथा येन प्रकारेण शान्तघोरादिस्वभावेन इह लोके येन धर्मः कृतः स एव तावान् तथा तेनैव प्रकारेण तत्फलं भुङ्क्ते येनाधर्मो वा यावान् यथा समीहितः स एव तावदेव तथैव तत्फलं भुङ्क्ते एवं लान्वयः ॥ ४५ ॥

यावानिति [illegible] च धर्माधर्मरूपस्य फलस्य च सुखदुःखरूपस्य स्वरूपतस्त्रैविध्यं [illegible] तत्स्फुटनयाहुः । यथेति । भूतेषु [illegible] गुणानां सत्त्वादीनां वैचित्र्यात्त्रैविध्यम उत्तममध्यमाधमसाधनकर्तृत्वमुपलभ्यते तथान्यत्र फलभोगकालेऽपि त्रैविध्यं त्रिविधफलभोक्तृत्वमनुमीयते ॥ ४६ ॥

धार्मिकमधार्मिकं वा वर्त्तमानं जन्म पूर्वापरयोरपि जन्मनोर्धर्ममधर्मं च प्रायः ज्ञापयतीत्याहुः । वर्तमान इति । वर्तमानः वसन्तादिः कालः अन्ययोर्भूतभविष्यवसन्तादिकालयोः गुणाभिज्ञापकः पुष्पादिसमृद्धिसूचको यथा एवमेतद्वर्तमानजन्म अन्ययोः पूर्वापरयोः धर्माधर्मौ निदर्शयति ज्ञापयतीति धर्माधर्मनिदर्शनम् ॥ ४७ ॥

परमेश्वरस्तु सर्वेषां सर्वदा सर्वं धर्मादिकं जानातीत्याहुः । पुरे तत्प्राणिदेहे वर्त्तमानोऽजः तत्तत्पुरसम्बन्धिजन्मादिसंसर्गरहितः परमेश्वरः मनसैव स्वसङ्कल्पेनैव पूर्वरूपं धर्मादिकं विपश्यति तथा अपूर्वं धर्मादिकमनुमीमांसते स हि धर्मराजादिद्वारा धर्मादिफलं ददाति न तु तत्र निग्रहं करोतीति भावः ॥४८॥

जीवस्तु अनादिमायापरियुक्तरूपत्वात् स्वकृतं धर्मादिकं पूर्वमपरं च न जानाति प्राप्तमप्राप्तं धर्माधर्मफलं सेवते स्वकृतैः कर्मभिः स्वर्गनरकादौ भ्रमतीत्याहुः । यथाज्ञ इति षड्भिः । अज्ञः अनादिना मायया सङ्कुचितज्ञानः व्यक्तं वर्तमानमेव कर्मफलमुपास्ते निषेवते पूर्वं भूतजन्मसम्बन्धि अपरं भविष्यजन्मसम्बन्धि न वेद यतो नष्टा जन्मना स्मृतिर्यस्य सः यथा तमसा निद्रया युक्तो व्यक्तं स्वप्ने दृष्टमेव सेवते न तु पूर्वं पूर्वरात्रिगतमपररात्रिगतं वेद तद्वत् ॥ ४९ ॥

पञ्चशब्देन पञ्चभूतमयो देहोऽत्र गृह्यते तमाश्रित्येति शेषः पञ्चभिः कर्मेन्द्रियैः पाण्यादिभिः करणैः स्वार्थानादानादीन् कुरुते पञ्चभिः ज्ञानेन्द्रियैः श्रोत्रादिभिः करणैः स्वार्थान् शब्दादीन् वेद षोडशेन मनसा करणेन त्रीन् सुखं दुःखं मध्यमं च हर्षं शोकं भयम्वाश्नुते भुङ्क्ते अचेतनानां देहादीनां भोक्तृत्वासम्भवात्स्वयमित्युक्तं सप्तदशः तेभ्यो भूतेन्द्रियमनोभ्यो विलक्षणः एकस्तेषां स्वामी जीवः ॥ ५० ॥

तदेतत् पूर्वोक्तं षोडश कला अवयवा यस्य तल्लिङ्गशरीरं शक्तित्रयं शक्तीनां सत्त्वादीनां गुणानां त्रयं त्रिगुणमयमित्यर्थः तन्महद् दृढं पुंसि जीवे अन्वनु संसृतिं धत्ते योजयति जीवसंसृतौ निमित्तं भवतीत्यर्थः ॥ ५१ ॥

अज्ञः अत एव अजितषड्वर्गः नेच्छन्ननिच्छन्नपि कर्माणि कार्यते लिङ्गदेहेनेति शेषः कर्मणा स्वकृतेन कोशकारः कीटविशेष इवात्मानमाच्छाद्य मुह्यति मुक्त्युपायहरिभजनं हित्वा संसृतिप्रापकाणि कर्माणि करोति ॥ ५२ ॥

एतदेवाहुः । नहीति ॥ ५३ ॥

अव्यक्तं भगवच्छक्तिभूतां प्रकृतिं लब्ध्वानादितोऽवलम्ब्य स्वभावेन वासनामयेन यथायोनि यथाबीजं मातृपितृसदृशं व्यक्तं मनुष्यादिरूपमव्यक्तं च सूक्ष्मकीटादिरूपं शरीरं भवति तत्तच्छरीरतादात्म्यं प्राप्नोति न त्वात्मानं विजानाति एवमनादितो जीवः संसारे भ्रमतीत्यर्थः ॥ ५४ ॥

भाषा टीका ।

इहांपर जिसने जितना जैसा धर्म किया होवै अथवा अधर्म किया होवै सोई पुरुष उसी प्रकार के उस पाप पुण्य के फलको परलोक मे भोगता है ॥ ४५ ॥

हे देवश्रेष्ठ हो ! इस लोक मे गुणोंकी विचित्रतासे जैसे तीनप्रकार दीखते हैं सबप्राणियोंमें वैसाही परलोकमे भी फलका अनुमान होता है ॥ ४६ ॥

एष प्रकृतिसङ्गेन पुरुषस्य विपर्ययः ।
आसीत् स एव न चिरादीशसङ्गाद्विलीयते ॥ ५५ ॥
अयं हि श्रुतसम्पन्नः शीलवृत्तगुणालयः ।
धृतव्रतो मृदुर्दान्तः सत्यवान् मन्त्रविच्छुचिः ॥ ५६ ॥
गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहङ्कृतः ।
सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥
एकदासौ वनं यातः पितृसंदेशकृद्द्विजः ।
आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥ ५८ ॥
ददर्श कामिनं कञ्चिच्छूद्रं सह भुजिष्यया ।
पीत्वा च मधुमैरेयं मदाघूर्णितनेत्रया ॥ ५९ ॥
मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपम् ।
क्रीडन्तमनुगायन्तं हसन्तमनयान्तिके ॥ ६० ॥
दृष्ट्वा तां कामलिप्तेन बाहुना परिरम्भिताम् ।
जगाम हृच्छयवशं सहसैव विमोहितः ॥ ६१ ॥
स्तम्भयन्नात्मनात्मानं यावत्सत्त्वं यथाश्रुतम् ।
न शशाक समाधातुं मनो मदनवेपितम् ॥ ६२ ॥
तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ।
तामेव मनसा ध्यायन् स्वधर्माद्विरराम ह ॥ ६३ ॥
तामेव तोषयामास पित्र्येणार्थेन यावता ।
ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥ ६४ ॥

भाषा टीका ।

जैसे वर्तमान वसंतादि कालसे बीते तथा आनेवाले वसंतादि कालका पुष्पादिकों का अनुमान होता है तैसे ही वर्तमान जन्मसे भूत भविष्यत् जन्म का अनुमान होता है तैसे उहां के धर्माधर्मों का अनुमान होता है ॥ ४७ ॥

यम अन्तर्यामी देवतो अपने स्थानमे रहकर सब के धर्माधर्म पूर्वरूप को जान जाता है सो अज भगवान् पहिले ही मन से विचार कर लेता है ॥ ४८ ॥

जैसे एकही शरीरमे पशुआदि जीव वर्तमान कालको ही जानता है भूत भविष्यत् नहीं जानता है तैसे यह मनुष्य अपने जन्मों के स्मरण न रहने से दूसरे जन्म को नहिं जानता है ॥४९॥

सोलहमे मन के सहित सतेरह वां एक जीव पांच कर्मेन्द्रियों से गमनादि स्वार्थों को करता है पांच ज्ञानेन्द्रियोंसे पांच शब्दादिकों को जानता है कर्मेन्द्रिय ज्ञानेन्द्रिय मन इन के विषयों को इसी प्रकार भोगता है ॥ ५० ॥

यह इस प्रकार षोडश कला वाला तीन गुण शक्ति वाला अति कठिन यही लिंग शरीर पुरुष को हर्ष शोक भयदुःख देने वाले संसार को प्राप्त करता है ॥ ५१ ॥

जो जीव अज्ञानी है काम क्रोधादि षड्वर्ग को नहीं जीतता है तो नहीं इच्छा करता है तो भी कर्म कराया जाता है जैसे कोशकार कीडा अपने आप से शरीर को ढांक फेर मरता है तैसे कर्म से यह जीव मोहित होकर बंध जाता है ॥ ५२ ॥

कोई भी किसी वक्त मे कभीभी क्षण मात्र भी बिना काम किये नहीं रहता है परवश होने से स्वाभाविक गुणों से जबरदस्ती उसको कर्म करना पड़ता है ॥ ५३ ॥

पुण्य पाप रूप निमित्त को प्राप्त होकर बलवान स्वभाव से माता पिता के बीज योनि के सदृश स्थूलसूक्ष्मरूप को धारण करता है ॥ ५४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

संसारचक्रमुपसंहरन्तो मुक्तिप्रकारमाहुः । एष इति । ईशसङ्गात्परमेश्वरभजनात् ॥ ५५ ॥

तदेवं सामान्यतो धर्मादिनिर्णयमुक्त्वा प्रस्तुतस्याजामिलस्याधर्म

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रश्नश्लोकत्रयं दण्डत्वमाहुः । अयं हीति यावदध्यायसमाप्तिः । तत्र श्लोकत्रयं तत्पूर्ववृत्तान्तानुवादोऽध्यायातिरिक्तप्रदर्शनार्थः शीलं सुस्वभावो वृत्तं सदाचारो गुणाः क्षमादयस्तेषामालयः ॥ ५६ ॥

निरहङ्कृतो निरहङ्कारः ॥ ५७ ॥

तत आवृत्तो वनात्परावृत्तः ॥ ५८ ॥

भुजिष्यया भोगास्त्रिया दास्या मैरेयं मधु पैष्टीं सुरां पीत्वा मदेनाघूर्णिते नेत्रे यस्याः ॥ ५९ ॥

विशेषेण श्लथन्ती नीवी यस्यास्तया सह व्यपेतं स्वाचाराद्भ्रष्टम् ॥ ६० ॥

कामेन कामोद्दीपकेन तदङ्गरागेण हरिद्रादिना लिप्तेन ॥ ६१ ॥

स्तम्भयन्नपि मदनेन कम्पितं मनः समाधातुं नियमितुं शक्तोऽपि नाभूत् ॥ ६२ ॥

तद्दर्शनमेव निमित्तं यस्य स्मरव्याजग्रहस्य तेन ग्रस्तः विचेतनो गतस्मृतिः ॥ ६३ ॥

यावता समग्रेण ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रपञ्चितं संसारप्रकारं तद्धेतुं चोपसंहरति । एष इति । पुरुषस्य जीवस्य प्रकृतिसङ्गेन यो विपर्ययः संसारः स एव एवम्विधः अथ संसारनिस्तरणोपायमाहुः । असदिति । असदसतोऽर्वाचीनः स एवं विपर्यय एव । यद्वा । असदपुरुषार्थरूपः प्रकृतिकार्यरूपो वा परमार्थतो जीवेऽविद्यमानो वा विपर्ययस्य प्रकृतिसङ्गप्रयुक्तत्वस्यानुपदमेवोक्तत्वादीशसङ्गादीश्वरभक्त्या न चिराद्दाशु विलीयते विलीनो भवति निवर्त्तत इत्यर्थः ॥ ५५ ॥

एवं प्रश्नान् परिहृत्य प्रकृतस्याजामिलस्य दण्डत्वज्ञापनाय तद्वृत्तं प्रपञ्चयन्ति । अयं हीत्यादिना यावदध्यायम् । अयमजामिलः तावच्छ्रुतसंपन्नः वेदशास्त्राध्ययनसम्पन्नः शीलं सुस्वभावः वृत्तं सदाचारः गुणाः शान्त्यादयः एषामाश्रयः धृतं व्रतं स्त्रीसङ्गराहित्यात्मकब्रह्मचर्यरूपं येन मृदुः कोमलहृदयः दान्तो जितबाह्येन्द्रियः सत्यवाग्नृतवादी मन्त्रवित्सावित्र्यादिमन्त्रोपासकः शुचिः सदा पवित्रः ॥ ५६ ॥

गुर्वादीनां शुश्रूषुः सेवकः अनहङ्कृतः । उक्तगुणाकृताहङ्काररहितः सर्वभूतानां सुहृत्प्रियकारी साधुः परकार्यसाधकः मितवाग्यथोचितवक्ता अनसूयकः गुणेषु दोषानाविष्कारकः ॥५७॥

एवम्भूतोऽसौ द्विजः कदाचित्पितृनिर्देशं पित्रा आदिष्टं प्रयोजनं करोमीति तथा वनं प्रति गतः ततो वनात्फलादीनादायावृत्तः ॥ ५८ ॥

पुनर्निवृत्त तत्र वने भुजिष्यया दास्या सह वर्त्तमानं कञ्चित्कामिनं शूद्रं दृष्टवान् कथम्भूतया दास्या मैरेयं मधु पैष्टीं सुरां पीत्वा मदेन मैरेयमधुमदेनाघूर्णिते भ्रमन्ती नेत्रे यस्यास्तया ॥ ५९ ॥

मत्तत्वात् एव विश्लथन्त्या विश्लथन्ती स्रंसमाना नीवी धृतवस्त्रग्रन्थिर्यस्यास्तया कथम्भूतं शूद्रं व्यपेतं सत्पथादपेतं व्रात्यकल्पमित्यर्थः अत एव निरपत्रपं निर्लज्जमेवम्भूतमनयोर्दासीशूद्रयोर्मध्ये भुजिष्यया सहान्तिके समीप एव क्रीडादिकं कुर्वन्तं शूद्रम् ॥ ६० ॥

कामेन गर्वितेन शूद्रेण कर्त्रा बाहुना भुजेन परिरम्भिताम् आलिङ्गितां तां दासीं च दृष्ट्वा हृच्छयस्य मनसिजस्य वशं जगाम प्राप कथम्भूतः सहसा बलाद्दैवेन स्वकीयपुरदृष्टेन विमोहितः ॥ ६१ ॥

यावत्सत्त्वं यावद्बलं यथाश्रुतं गुरुमुखाच्छ्रुतं मनोनिग्रहप्रकारमनतिक्रम्यात्मना विवेकेनात्मानं मनः स्तम्भयन्नियमयन्नपि मदनवेपितं मनः समाधातुं नियन्तुं न शशाक नाशक्नोत् ॥ ६२ ॥

सा दासी निमित्तं यस्य सः स्मर एव व्याजग्रहः कपटपिशाचस्तेन ग्रस्तः गृहीतः अत एव विचेतनः विगतपूर्वस्मृतिः तां दासीमेव मनसा चिन्तयन् स्वधर्मात्सन्ध्योपासनादेर्विरराम धर्मं तत्याज हन्ति खेदे अहो एवम्भूतस्येदृशी दशा प्राप्तेति ॥ ६३ ॥

यावता कृत्स्नेन पित्र्येण पितृसम्बन्धिना अर्थेन वित्तेन तां दासीमेव तोषयामास तथा ग्राम्यैर्ग्रामेषु साधुभिरभिलषितैः कामैः स्त्राभरणादिभिर्यथा प्रीयेत सा तथा तां तोषयामास ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवं संसारप्रसङ्गमुक्त्वा निवृत्त्युपायमाहुरित्याह । एष इति । य एषः पुरुषस्य विपर्ययः संसारः प्रकृतिसङ्गनासीत् स एव ईश्वरसङ्गादीश्वरसेवालक्षणाच्च चिरात्क्षिप्रं विलीयते समूलं विच्छिद्यते ॥ ५५ ॥

विद्वत्त्वादिगुणसम्पन्नत्वेन बुद्धिपूर्वकमेव पापकारित्वेन प्रायश्चित्तानधिकारित्वेन नाममात्रोच्चारणस्य प्रायश्चित्तत्वे सर्वेषामपि मुक्तिप्रसङ्गेन दण्डयजनाभावेन युष्मत्स्वाम्याज्ञाकारिणो यमस्याज्ञालङ्घनदोषप्रसक्त्याधिकारहानिलक्षणानर्थः स्यादित्यतो यमसकाशं गत्वायं तत्र दण्डेन शुद्धो भवत्वित्याहुरित्याह । अयं चेति । मन्त्रवित्छन्दज्ञः ॥ ५६ ॥ ५७ ॥

आवृत्तो निवृत्तः ॥ ५८ ॥

भुजिष्यया दास्या मैरेयाख्यं मधुविशेषम् ॥ ५९ ॥

विश्लथन्ती नीवी वस्त्रग्रन्थिर्यस्याः सा तथा ॥ ६० ॥

स्वेदकम्पादिलक्षणजनकेन कामेन लिप्तेन वशीकृतेन हृच्छयः कामः तस्य वशम् ॥ ६१ ॥

यावत्सत्त्वं यथाशक्ति यथाश्रुतं "शूद्रायां योनौ पतेद्विजः" इत्यादिशास्त्रश्रवणमनुसृत्य मदनवेपितं कामबीजावपनस्य क्षेत्रीभूतस्त्रा ॥ ६२ ॥

स्मर इति व्याजग्रहेण ग्रस्तः विचेतनः शास्त्रविरुद्धज्ञानः ॥ ६३ ॥

ग्राम्यैः कामभोगसाधनैः काम्यन्त इति कामाः विषयास्तैः ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एष इति । अयं द्वितीयाभिनिवेशतः स्यादितिवत् ॥ ५५ ॥

अत्र प्रकरणे तादृशस्वधर्मनिष्ठयापि पातान्न रक्षितोऽभूत्

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

किन्तु भक्त्याभासेनैव स रक्षित इति यमदूतवाक्यद्वारा श्रीशुकदेवस्याभिप्रायः ॥ ५६—६८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एष इति । प्रकृतिपुरुषयोः सङ्गाऽयमेव बन्धमोक्षौ भवत इत्यर्थः ॥ ५५ ॥

तदेवं धर्माधर्मादिस्वरूपमुक्त्वा प्रस्तुतस्याजामिलस्य दण्ड्यत्वज्ञापनायाधर्मं प्रपञ्चयन्ति । अयं हीत्यादिना । तत्रात्यन्तिकायानौचित्यं ज्ञापयितुं द्वाभ्यां धार्मिकत्वमाहुः । शीलं सुस्वभावः वृत्तं सदाचारः गुणाः क्षमादयः ॥ ५६—५८ ॥

भुजिष्यया दास्या सम्भुज्यमानया मैरेयं पैष्टं मधु मद्यं व्यपेतं लोकभयरहितमनया सह ॥ ५९ ॥ ६० ॥

कामलिप्तेन कामोद्दीपकहारिद्रद्रवलिप्तेन ॥ ६१ ॥

आत्मानं मनः सत्त्वं धैर्यं श्रुतं ज्ञानम् ॥ ६२ ॥

विरराम हेति । तादृशस्वधर्मनिष्ठया ज्ञानेन च स तथा पतनाद्रक्षितुं शक्यो नाभूत् किन्तु नाम्न आभासेनापि तादृशाधःपातादपि रक्षित्वा वैकुण्ठं प्रस्थापयामास इति प्रकरणार्थेन धर्मज्ञानभक्तीनां प्रातिस्विकं बलं दर्शितम् ॥ ६३ ॥

यावता अर्थेन स्थितं तावतैव इति शेषः । सा यथा प्रसीदेत तथा अवेष्टतेति शेषः ॥ ६४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मुक्त्युपायमाहुः । एष उक्तप्रकारः पुरुषस्य जीवस्य विपर्ययः जन्ममरणालक्षणः संसारः ईशे भगवति यः सङ्ग आसक्तिर्भक्तिः तस्माद्विलीयते निवर्त्तते ॥ ५५ ॥

प्रस्तुतमाहुः । अयमित्यादिना । श्रुतसम्पन्नः गुरुमुखाच्छ्रुतेन शास्त्रेण संयुक्तः शीलं सुस्वभावः वृत्तं सदाचारः गुणाः क्षमादयस्तदालयः ॥ ५६ ॥

एवं बहुगुणाढ्योऽपि निरहङ्कारः गताहङ्कारः ॥ ५७ ॥

ततो वनादावृत्तः परावृत्तः ॥ ५८ ॥

मैरेयं पैष्टं मधु मद्यं पीत्वा भुजिष्यया दास्या सह क्रीडन्तमनुगायन्तं हसन्तं कञ्चिच्छूद्रमन्तिके निकटे ददर्शेति द्वयोरन्वयः मदेनाघूर्णिते नेत्रे यस्यास्तया ॥ ५९ ॥

विशेषतः स्रस्तनीवी नीवी यस्यास्तया अनया नयरहितया धर्ममर्यादारहितया कया तं कामिनं धर्मरक्षावतां श्रेष्ठम् ॥ ६० ॥

कामलिप्तेन मदनप्रचिह्नेन भुजेन करेण बाहुना करेण परिरम्भितां दृष्ट्वा सहसैव विमोहितो हृच्छयवशं जगाम मदनाविष्टोऽभूत् ॥ ६१ ॥

आत्मनो चित्तेन आत्मानं मनः यावत्सत्त्वं धैर्यं यथा श्रुतं यथोपदेशं स्तम्भयन्नपि मदनेन वेपितं कम्पितं मनः समाधातुं न शशाक ॥ ६२ ॥

तद्दर्शननिमित्तेन स्मरव्याजेन मदनमिषेण ग्रहेण ग्रस्तचेतनो नष्टस्मृतिः अधर्मात् उपरराम विमुखोऽभूत् ॥ ६३ ॥

पित्र्येण पितृसम्बन्धिना अर्थेन वित्तेन ग्राम्यैः कामुकजनप्रियैः कामैर्वस्त्रालङ्कारादिभिर्यथा सा प्रसीदेत तथा तामेव तोषयामास ॥ ६४ ॥

भाषा टीका ।

प्रकृति के संग से जो यह पुरुष का विपर्यय होता है सोई थोड़े काल में ईश्वर के संग से नष्ट होजाता है ॥५५॥

यह अजामिल वेद पढ़ा था शील आचरण गुणों वाला था व्रतों का धारण करने वाला था कोमल चित्तवाला था इन्द्रियों को जीतने वाला सत्य बोलने वाला मन्त्रों को जानने वाला पवित्र था ॥ ५६ ॥

गुरु अग्नि अतिथि वृद्धों की सेवा करने वाला अहङ्कार रहित सर्व भूतों का सुहृत् साधु थोड़े बोलने वाला निन्दा नहीं करने वाला था ॥ ५७ ॥

एक दिन यह पिता की आज्ञा से बनको गया फल फूल समिध कुशों को लेकर उहां से जब आता था तब ॥ ५८ ॥

मदिरा के पीने से मद के मारे जिसके नेत्र घूमरहे हैं ऐसी एक व्यभिचारिणी स्त्री के साथ क्रीड़ा करते हुए किसी शूद्र को रस्ते में इसने देखा ॥ ५९ ॥

नीचे का पहिरा वस्त्र जिसका खुलता सा था ऐसी मतवाली व्यभिचारिणी के पास में उसी के साथ क्रीड़ा करता था गाता था भ्रष्ट आचार वाला था निर्लज्ज था हसता था ऐसे शूद्रको इसने देखा ॥ ६० ॥

काम उद्दीपन करने वाले चन्दनादि से रात भुजा से आलिंगन करी हुई उस स्त्री को देखकर मोहित होगया शीघ्रही काम के वश होगया ॥ ६१ ॥

जितना इसका शास्त्र सुनने का ज्ञान था जितनी बुद्धि थी जिससे मन से जिसको बहुत रोका तो भी कामदेव से कंपित मनको नहीं रोक सका ॥ ६२ ॥

उसके निमित्त से काम पिशाची ग्रह से ग्रसित होगया चेतना नहीं रही मन करके भी नारी का ध्यान करने से अपने धर्म से निवृत्त होगया ॥ ६३ ॥

प्राप्य मनोरम कामों से और पिता का जितना धन मिला तिस से जैसे उस का सन्तोष होवे तैसे उस नारी को सन्तुष्ट करता था ॥ ६४ ॥

विप्रां स्वभार्यामप्रौढां कुले महति लम्भिताम् ।
विससर्जाचिरात् पापः स्वैरिण्यापाङ्गविद्धधीः ॥ ६५ ॥
यतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनम् ।
बभारास्याः कुटुम्बिन्याः कुटुम्बं मन्दधीरयम् ॥ ६६ ॥
यदसौ शास्त्रमुल्लङ्घ्य स्वैरचार्यार्यगर्हितः ।
अवर्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६७ ॥
तत एनं दण्डपाणेः सकाशं कृतकिल्बिषम् ।
नेष्यामोऽकृतनिर्वेशं यत्र दण्डेन शुद्ध्यति ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां षष्ठस्कन्धे
अजामिलोपाख्याने श्रीविष्णुयमपुरुषसम्वादे
प्रथमोऽध्यायः ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लम्भितां परिणीताम् ॥ ६५ ॥ ६६ ॥

अघरूपमायुर्यस्य मलमेव तदीयमन्नादिकमस्तीति मलात् ॥ ६७ ॥

अकृतनिर्वेशमकृतप्रायश्चित्तम् अस्यैव च हितार्थं नेष्याम इत्याहुः । यत्रेति । ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अप्रौढामनङ्गःप्रादुर्भावां प्रियां सुन्दरीं महति कुले सत्कुले लम्भितां लब्धां भार्यामचिरादाशु विससर्ज पापः पापाचारः स्वैरिण्या कटाक्षपाङ्गेन करणेन विद्धा विनाशिता धीर्विवेको यस्य सः ॥ ६५ ॥

न्यायतोऽन्यायतो वा यतस्ततो धनमुपनिन्ये आनीतवान् मन्दधीरयमजामिलः कुटुम्बिन्याः पुत्रवत्याः कुटुम्बं पुत्रादिरूपं बभार पुपोष ॥ ६६ ॥

एवं तस्य वृत्तिमभिधायावश्यमस्य दण्डं प्रत्यर्हतास्तीत्याहुः । यद्यस्मादसावजामिलः शास्त्रपथमतिक्रम्य स्वेच्छाचारी आर्यैः शिष्टैर्गर्हितः अघायुः पापाभिवृद्धायुष्कः दासीसङ्गरूपान्मलादशुचिः सन् चिरङ्कालमवर्त्तत ॥ ६७ ॥

ततः कृतं किल्बिषं पापं येन अकृतः निर्वेशः निष्कृतिर्येन तमेनं दण्डपाणेर्यमस्य सकाशं प्रति नेष्यामः प्रापयिष्यामः सकाशं विशिनष्टि । यत्र दण्डपाणेः सकाशे दण्डेन नरकानुभवरूपेण शुद्ध्यति ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

(१) अप्रौढामनवाप्तयौवनाम् ॥ ६५ ॥ ६६ ॥

स्वैरचारी निरङ्कुशत्वेन वर्तमानः अघायुः पापजीवनः मद्यान्नाद्यागादिदोषात् ॥ ६७ ॥

अकृतनिर्वेशं यावता निर्वेशेन पापशुद्धिः स्यात्तावत्पापप्रायश्चित्तं न कृतवांस्तं यत्र नीतो यमभटकृतदण्डेन शुद्धो भवति ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

लम्भितां तस्याः पित्रा विचार्यैव दत्तामित्यर्थः । स्वैरिण्यापाङ्गेति सन्धिरार्षः ॥ ६५ ॥ ६६ ॥

अघरूपमघार्थं वा आयुर्यस्य सः । मलं वेश्योच्छिष्टमेवास्तीति सः अकृतप्रायश्चित्तं यत्र शुद्ध्यति तस्योपकार एव प्रवर्त्तमानानस्मान् कथं वारयथेति भावः ॥ ६७ ॥ ६८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ॥
षष्ठस्य प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

(१) अनाप्तयौवना प्रौढा विप्रा चाप्यभिधारिणीति प्रमाणम् ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अप्रौढां किशोरीं कामितां परिणीतां स्वैरिणीपापाक्रान्त्यच सन्धिरार्थः अपाङ्गेन विद्धा धीर्यस्य सः ॥ ६५ ॥

... पुपोष ॥ ६६ ॥

... स्वेच्छाचारी अघरूपमायुर्यस्य सः मलं दास्या उच्छिष्टमन्नादिकमस्तीति मलाशनः अवर्तत ॥ ६७ ॥

ततो हेतोः अकृतनिर्वेशमकृतप्रायश्चित्तं दण्डपाणेः सकाशं नेष्यामः यत्र दण्डेन शुद्ध्यति पवित्रो भविष्यतीत्यर्थः ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

प्रथमोऽध्यायः ॥ १ ॥

भाषा टीका ।

ब्राह्मणी युवती अपनी भार्या जोकि उत्तम कुल मे प्राप्त है तिनको उस पापी ने व्यभिचारिणी के नेत्रों के देखने मे मन के फसजाने से छोड़दिया ॥ ६५ ॥

इस कुबुद्धि ने इधर उधर से न्याय से अन्याय से धन लाकर उस कुटुंबवाली के कुटुंब को पोषण किया ॥ ६६ ॥

जिस हेतु मे यह ब्राह्मण शास्त्र के मर्यादा को उल्लङ्घन करके सत्पुरुषों से निंदित होकर यथेच्छाचारी होगया पापी होकर बहुत काल पर्यन्त संसार मे रहा है ॥ ६७ ॥

तिस हेतु से पाप करने वाले इस को दण्ड पाणि यमराज महाराज के पास लेजांयगे इसने प्रायश्चित्त भी नहीं किया है तब उहां दण्ड से शुद्ध होजायगा ॥ ६८ ॥

इति श्रीभागवत षष्ठस्कन्ध प्रथम अध्यायका

भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ १ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे प्रथमोऽध्यायः समाप्तः ॥ १ ॥



॥ द्वितीयोऽध्यायः ॥

श्रीशुक उवाच ।

(१) एवं ते भगवद्दूता यमदूताभिभाषितम् ।
उपधार्याथ तान् राजन् ! प्रत्याहुर्नयकोविदाः ॥ १ ॥

विष्णुदूता ऊचुः ।

अहो कष्टं धर्मदृशामधर्मः स्पृशते सभाम् (२) ।
यत्रादण्ड्येष्वपापेषु दण्डो यैर्ध्रियते वृथा ॥ २ ॥
प्रजानां पितरो ये च शास्तारः साधवः समाः ।
यदि स्यात्तेषु वैषम्यं कं यान्ति शरणं प्रजाः ॥ ३ ॥
यद्यदाचरति श्रेयानितरस्तत्तदीहते ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ ४ ॥
यस्याङ्के शिर आधाय लोकः स्वपिति निर्वृतः ।
स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ॥ ५ ॥
स कथं न्यर्पितात्मानं कृतमैत्रमचेतनम् ।
विश्रम्भणीयो भूतानां सघृणो द्रोग्धुमर्हति ॥ ६ ॥
अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ।
यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥ ७ ॥
एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम् ।
यदा (३) नारायणायेति जगाद चतुरक्षरम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वितीये वैष्णवैर्योऽयं नाममाहात्म्यमङ्गलम् ।
आभाष्यित्वा द्विजो विष्णोर्लोकं नीत इतीर्यते ॥ १ ॥

नयकोविदाः न्यायनिपुणाः ॥ १ ॥

धर्मदृशां सतां सभामधर्मः स्पृशति तदाहुः । यत्र सभायां वैधर्मैर्दण्डमभक्तेभ्यो तां सभाम् ॥ २ ॥

पितरः पितृवत्पालकाः शास्तारोऽनुशिक्षकाः वैषम्यमदण्ड्यदण्डनम् ॥ ३ ॥

एतत्प्रवर्तितमधर्ममन्योऽपि करिष्यतीति महत्कष्टमभूदित्याहुः । यद्यदिति । श्रेयान् श्रेष्ठः ॥ ४ ॥

विश्वस्तवञ्चनादर्पीत्याहुः । यस्येति द्वाभ्याम् । निर्वृतो निश्चिन्तः ॥ ५ ॥

न्यासेन नितरामर्पित आत्मा येन तं विश्रम्भणीयो विश्वसनीयः सघृणश्चेत् ॥ ६ ॥

ननु एवं पापिनो दण्डे किमर्थमाक्रोशः क्रियते तत्राहुः । अयं हीति । यद्यस्माद्विवशोऽपि हरेर्नाम व्याजहारोच्चारितवान् न केवलं प्रायश्चित्तमात्रं हरेर्नामापि तु स्वस्त्ययनं मोक्षसाधनमपि

"सकृदुच्चारितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति" ॥

इति स्मृतेः ॥ ७ ॥

(१) एतत्सं । (२) सताम् । (३) नारायणेति जगादेति श्रीविजय० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु कर्मसाद्गुण्यकरं हरेर्नामेतियुक्तम् ।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

इत्यादिवचनात् स्वातन्त्र्येण त्वघनिवर्तकं हरेर्नाम कथं स्यात्तत्राहुः । एतेनैवेति । अघोनः अघवतः अघवच्छब्दवद्रूपं यत् आ इति च्छेदः आदिपदाभासमात्रं चतुरक्षरं यन्नाम जगाद एतेनैव केवलेन चतुरक्षरमित्यनेनाधिक्यं च दर्शितं कथं जगाद नारायण आय आगच्छ इत्येवं विक्रोशरूपेण पुत्राह्वानेन अयं भावः कर्माङ्गत्वेऽपि हरिनाम्नः खादिरत्वादिवत्संयोगपृथक्त्वेन सर्वप्रायश्चित्तार्थत्वं युक्तमेव तथा हि "अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः । पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव,,इत्यादिभिः पुराणे तावत्सहस्रशो नाम्नः स्वातन्त्र्यमवगम्यते न चैतेऽर्थवादा इति शङ्कनीयं विधिशेषत्वाभावात् न च विध्यश्रवणादन्यशेषता कल्पनीया "यदाग्नेयोऽष्टाकपालो भवति" इत्यादिवदप्राप्तार्थत्वेन विधिकल्पनोपपत्तेः मन्त्रेषु च "मर्ता अमर्त्यस्य ते भूरिनाम मनामहे विप्रासो जातवेदसः । आस्य जानन्तो नामचिद्विवक्तन" इत्यादिषु नाम्नस्तपोदानादिसर्वधर्माधिक्यमवगम्यते उपपादितं च मन्त्रार्थवादानामपि स्वार्थे प्रामाण्यं देवताधिकरणे तस्माच्छ्रीनारायणनामाभासमात्रेणैव सर्वाघनिष्कृतं कृतं स्यादिति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं यमदूतैरुक्ता विष्णुदूता आहुरित्याह मुनिः । एवमिति । हे राजन्! एवं यमदूतैर्विशेषेण भाषितमुपधार्य श्रवणेन मनसि धृत्वा न्यायनिपुणा भगवद्दूतास्तान् यमदूतान् प्रत्याहुः ॥ १ ॥

उक्तमेवाह । अहो इत्यादिना । "स वेद परमं गुह्यं धर्मस्य भगवान् यमः" इत्यन्तेन अहो कष्टं प्राप्तं किं तद्धर्मदृशां सभामधर्मः स्पृशते कोऽधर्मस्तत्राहुः । यत्र यमस्य सभायामपापेष्वत एवादण्ड्येषु दण्डः यैर्भवाद्दृशैर्ध्रियते कार्यतेऽयमेवाधर्म इति भावः ॥ २ ॥

धर्माधर्मविभागेन शास्तृणां वैषम्यमनुचितमित्याहुः प्रजानामिति । ये शास्तारो भवादृशाः ते समाः वैषम्यरहिताः साधवः दोषाणाकरणरूपपरकार्यसाधका अत एव प्रजानां पितरः हितकारिणः यदि इदृशेषु भवत्स्वेव वैषम्यं स्यात्तर्हि प्रजाः कं शरणं प्राप्नुवन्ति ॥ ३ ॥

युष्मादृशः श्रेष्ठः कृत्स्नविधयत्कर्माचरति तत्तदेव कर्मेतरोऽज्ञस्तन्निदर्शाहते चरेत् सः श्रेष्ठो यदेव शास्त्रं प्रमाणं कुरुते प्रमाणमिति मन्यते तदेवेतरो लोकोऽनुवर्त्तते अतः श्रेयसां स्वानुष्ठानेन धर्मप्रवर्तकानां वेदानुवर्तिनामिदमदण्ड्यदण्डनमनुचितमित्यर्थः ॥ ४ ॥

किञ्च सापराधलोकस्य दण्डयिता यमः न त्वपापिनामिति विश्वासविषय एव प्राकृतवैषम्येणानपराधिनोऽपि दण्डयिता स्यात्तर्हि विश्वस्तघातकतादोषः प्रसज्यते तल्लोकपरिपाटीमुखेनाहुः । यस्येति । यस्य विश्वस्तनीयस्याङ्के उत्सङ्गे शिरः आधाय विन्यस्य यो लोको जनः निर्वृतः सुखितः स्वपिति तमेव लोकं स एव भूतानां विश्रम्भणीयः कृपावांश्च कथं द्रोग्धुमर्हतीत्यन्वयः निर्वृतो लोकः कथम्भूतः यथा पशुः तद्वत् स्वयं धर्ममधर्मं वा न वेद किन्तु केवलं ममायं हितकारीत्येवं वेदेति भावः ॥ ५ ॥

लोकं कथम्भूतं न्यार्पितात्मानं नितरामर्पितः समर्पितः आत्मा देहो येन कृतं मैत्रं विश्वासो येन अचेतनं न विद्यते चेतना विवेको यस्य अकेतनमिति पाठे न विद्यते केतनं शरणमन्यद्यस्य तम् ॥ ६ ॥

नन्वस्य पापिनो दण्डे किमर्थमाक्रोशः क्रियते तत्राहुः । अयं हीति । जन्मनां कोटिभिरर्जितानामंहसां पापानां कृतः निर्वेशः प्रायश्चित्तं येन तथाभूतोऽयं कोऽसौ निर्वेशः तत्राहुः विवशः परवशोऽपि हरेः स्वस्त्ययनं शुभावहं नाम व्याजहार जगादेति यदसावेव निर्वेश इत्यर्थः ॥ ७ ॥

ननु "नान्यः पन्था अयनाय विद्यते" इति ध्यानोपासनव्यतिरिक्तोपायान्तरनिषेधात्कथं पारवश्यकृतस्य सङ्कीर्तननामोच्चारणस्याखिलांहसो निरसनद्वारेण मुक्तिसाधनत्वमित्यत्राहुः । एतेनैवेत्यादिना यतस्त्वद्विषया मतिरित्यन्तेन । यदा प्रयाणसमये नारायणायेत्येतच्चतुरक्षरं नाम जगादेति यदेतेनैवास्याघोनः अघानां निष्कृतं कृतं स्यात् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रीहरिनामसंकीर्तनमाहात्म्यमस्मिन्नध्याये वक्ति तदर्थं श्रीविष्णुदूता यमदूतान्प्रत्युपोद्घातं रचयन्तीत्याह । बादरायणिरिति (१) नयकोविदाः प्रायश्चित्तशास्त्रोक्तन्यायसूक्ष्मपरिज्ञाताः ॥ १ ।२। ३।

यद्वाक्यं प्रमाणत्वेन करोति तद्वाक्यमनुसृत्य वर्तते लोको जनः ॥ ४ ॥

स्वयं परबोधमन्तरेण पशुः पूर्वापरादिदिगनभिज्ञः ॥ ५ ॥

सः प्रमाणभूतः पुरुषः आत्मन्यर्पित आत्मा सर्वस्वलक्षणो येन स तथा तम अचेतनमज्ञानिनं विस्रम्भणीयो विश्वसनीयः "घृणा द्रवीभावे,, इति धातोः परक्लेशदर्शने यस्य चित्तं द्रवीभवति स सघृणः ॥ ६ ॥

अकृतनिर्वेशमित्यत्राहुरित्याह । अयमिति । यमदूतास्त्वया पुत्र सङ्कीर्तितमपि नारायणनाम स्मृत्वास्य नाम्नो हरेरेव मुख्यार्थ इति प्राचीनपुण्यनिचयादुत्पन्नभक्त्या विवशः इतीममर्थं हिशब्दो वक्ति ॥ ७ ॥

विश्वासजननार्थं पुनरुक्तार्थं द्रढयति । एतेनेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ यत्त् के यूयमित्यादिना यमदूतैः स्वप्रभोर्धर्मराजत्वालोकपालत्वं दर्शितं तदभ्युपगमवादेन तदाक्षिपन्ति । अहो कष्टमित्यादिपद्यैः ॥ १—६ ॥

विवशोऽपि अस्तु तावदेतमेव पुत्रमुद्दिश्य पुनःपुनःस्फुटोच्चरितनाम्नो महिमेति भावः ॥ ७ ॥

ननु तर्हि तन्नामकरणे प्रथमतस्तस्यैव जन्मकोट्यंहसां नाशोऽभूत्तदनन्तरं मुहुः कृतपापस्यास्य तन्नामाभिधानेनैवाभूदिति वक्तुं युज्यते इत्याशङ्क्य पूर्ववाक्याभिप्रायं स्वयमेवाह । एतेनेति ।

(१) बादरायणिरुवाचेति मूलद्वयम् ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

यदि पूर्वं तन्नोच्चारितवान् तथाप्येतेनैव निष्कृतं कृतं स्यादिति हि तत्रार्थ इत्यर्थः। इत्यन्याकूतं सुतरां परिहृतम् ॥ ८ ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

द्वितीये नाममाहात्म्याद्यमदूताः पराहताः।

अजामिलस्य निर्वेदो वैकुण्ठारोह उच्यते ॥

नयकोविदा नीतिशास्त्रज्ञा यथा वदन्ति तथा ॥ १ ॥

अरे ज्ञाताः स्थ ज्ञाताः स्थ धर्मराजस्यैव किङ्कराः यूयमलं प्रलापैः किन्तु धर्मराजस्यैव धर्मराजता विपरीतलक्षणयैवेति जानीम इत्याहुः। अहो इत्यस्मत्कर्णपथमद्यावधि वार्त्तेयं नापतदिति भावः। कष्टमित्येतावता अन्यायेन लोकानां का गतिर्भविष्यतीति भावः। ननु के किमेवमाक्षिप्यन्ते तत्र किं ब्रूमः शृणु-तरे शृणुतेत्याहुः। धर्मदृशां धर्मदर्शिनामपि सभामधर्म एव स्पृशति धर्मेऽप्यधर्ममेव पश्यन्तीति भावः। यत्र सभायामपापेष्वपि जनेषु अपापत्वाददण्ड्येषु दण्डो ध्रियते इत्येवाधर्मदर्शितेति भावः ॥ २ ॥

शृणुतेरे प्रजानां पितृत्वं शास्तृत्वं साधुत्वं साम्यञ्च युष्मत्स्वामिनां यत् श्रूयते तत् खलु किं सम्प्रत्यनृतमेवाभूदित्याहुः। प्रजानामिति। वात्सल्यात् पितरः धर्मशिक्षणात् शास्तारः सर्वत्र स्वसुखदुःखसाम्यदर्शनात् समाः। तेषु वैषम्यमिति पितरोऽपि प्रजापीडकाः शास्तारोऽपि स्वकिङ्करानपि धर्मं न शिक्षयन्ति साधवोऽप्यहितकारिणः समा अपि परदुःखानभिज्ञाः के यान्तीति प्रजानां कष्टदर्शनमेतदस्माभिस्तु दुःसहमेवेति भावः ॥ ३ ॥

तद्देशमाचरेण धर्ममार्गे एषोत्क्रमो भविष्यतीत्याहुः। यद्यदिति ॥ ४ ॥

किञ्च विश्वस्तघातादधिकं कमधर्मं ब्रूम इत्याहुः। यस्येति द्वाभ्याम् ॥ ५ ॥

विश्वासेन नितरामर्पित आत्मा येन तं कथं विश्वसिता इत्यत आहुः। भूतानां विश्वसनीयः सदयश्च ॥ ६ ॥

ननु परःसहस्रमहापापकृतमकृतप्रायश्चित्तमजामिलं शोधयितुमेव नरकं निनीषुभिरस्माभिरस्मत्स्वामिभिर्वा किमपराद्धं गदे नमोऽर्पणेति तत्राहुः। अयं हि निश्चितमेव कृतप्रायश्चित्त एव न केवलमेकजन्मकृतपापानामपि तु जन्मकोटीनामिति यदस्माद्विवशोऽपि हरेर्नाम व्याजहार

नाम्नो हि यावती शक्तिः पापनिर्हरणे हरेः।

तावत् कर्त्तुं न शक्नोति पातकं पातकी नरः।

इति।

अवशेनापि यन्नाम्नि कीर्त्तिते सर्वपातकैः।

पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव।

इति स्मृतेः। न केवलं प्रायश्चित्तमात्रं हरेर्नाम अपि तु स्वस्त्ययनं मोक्षसाधनमपि

सकृदुच्चारितं येन हरिरित्यक्षरद्वयम्।

बद्धः परिकरस्तेन मोक्षाय गमनं प्रति।

इति स्मृतेः ॥ ७ ॥

ननु हरेर्नामेति बुद्ध्या प्रायश्चित्तत्वेन नाम न गृहीतं किन्त्वस्मद्दर्शनोत्थभयेन स्वपुत्राह्वानमेव कृतमिति चेत् न जानीथ रे तत्त्वं बहिर्मुखा न जानीथेत्याहुः। एतेनैव हि निश्चितमेव अघोनः अघवतः अघवन्तोऽद्यवद्रूपं पुत्राह्वानेनैव अघनिष्कृतमपि कृतं स्यादघनिष्कृतानुसन्धानाभावेऽपीत्यर्थः। यदेति। इदानीमेव पुत्राह्वानेन अघनिष्कृतं स्यादिति कियदेतत् किन्तु यदा पूर्वं नामकरणादिसमयेऽपि हे नारायण! आयस्व मातुरङ्कान्ममाङ्कमागच्छेत्यपभ्रंशभाषयापि जगाद तदैवाघनिष्कृतं कृतमभूदित्यर्थः। चतुरक्षरमिति नारायणनाम्न एकद्व्यक्षरेणापि सर्वपातकनाशो भवेदिति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवन्नाममाहात्म्यं निर्णीय भगवत्पार्षदा यमदूतेभ्योऽजामिलममूमुचन् स च कृतभगवदाराधनो भगवत्पदं गत इति वर्ण्यते द्वितीयेनाध्यायेन। नयकोविदाः सिद्धान्ताभिज्ञाः ॥ १ ॥

अहो आश्चर्यमिदं कष्टं दुःखं च तदेवाहुः। धर्मदृशां धर्मदर्शिनामपि सभामधर्मः स्पृशते कां केषां यत्र सभायां यैर्धर्मैरपि रदण्ड्येषु वृथा दण्डो ध्रियते तां तेषाम् ॥ २ ॥

आश्चर्यं कष्टं च पुनर्दर्शयन्ति। प्रजानामिति। पितरः शास्तारः अनुशिक्षकाः साधवः शुभाचाराः समाः सर्वसुहृदश्च यदि तेषु वैषम्यम् अपितृवत् अशास्तृवत् असाधुवत् विषमवत् विपरीतकारित्वं स्यात्तदा कं शरणं रक्षितारं प्रजा यान्ति श्रेष्ठस्य श्रेष्ठाचारो लोकानां क्षेमकरः अन्यथाचारस्तु नाशहेतुरित्याहुः। यद्यदिति। श्रेष्ठेन धर्मराजेनादण्ड्यदण्डने कृते अन्येऽप्येवं करिष्यन्तीति महत्कष्टमिति भावः ॥ ३-४ ॥

अपापस्य दण्डनं धर्मराजोऽपि न कुर्यादित्याहुः। यस्याङ्के इति द्वाभ्याम्। यथा पशुः धर्ममधर्मं न जानाति तद्वत् स्वयं धर्ममधर्मं वा न वेद किन्तु अधर्मनाशार्थं गुर्वाद्युपदेशवर्जितो भवति एवम्विधो लोकः यस्य लोकपालस्याङ्के शिर आधाय आत्मानं रक्षणीयतया तस्मिन् समर्प्येत्यर्थः। निर्वृतः सुखितः स्वपिति अस्मद्धर्माधर्मानुसारेण लोकपालः फलं यथार्थं दास्यतीति विश्वस्तो भवति ॥ ५ ॥

स भूतानां विश्रम्भणीयो लोकपालः सघृणः सदयः स्वार्पितात्मानं नितरामर्पित आत्मा रक्षणीयतया येन तं कृतमैत्रं कृतविश्वासमचेतनं पशुवत्स्वातन्त्र्येण धर्माधर्मविवेकहीनं कथं द्रोग्धुमर्हति न कथमपीत्यर्थः ॥ ६ ॥

अजामिलस्तु सर्वथा निष्पाप इत्याहुः। अयमिति पञ्चभिः। न जन्मकोटिपापनिराकरणमात्रेण चरितार्थं किन्तु स्वस्त्ययनं परमपुरुषार्थदम्।

सकृदुच्चारितं येन हरिरित्यक्षरद्वयम्।

बद्धः परिकरस्तेन मोक्षाय गमनं प्रति

इति स्मृतेश्च ॥ ७ ॥

अघोनः अघवतः अस्य यत् आ ईषदाभासमात्रमपि नारायण! आय आगच्छेति पुत्राह्वानेन चतुरक्षरं जगाद एतेनैव अघनिष्कृतं स्यात् ॥ ८ ॥

स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः ।
स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥ ९ ॥
सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ १० ॥
न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान् व्रतादिभिः ।
यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भकम् ॥ ११ ॥
नैकान्तिकं तद्धि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्पथे ।
तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्त्वभावनः ॥ १२ ॥
अथैनं मापनयत कृताशेषाघनिष्कृतम् ।
यदसौ भगवन्नाम म्रियमाणः समग्रहीत् ॥ १३ ॥
साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥
पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः ।
हरिरित्यवशेनाह पुमान्नार्हति यातनाम् ॥ १५ ॥
गुरूणां च लघूनां च गुरूणि च लघूनि च ।
प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥ १६ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले हे राजन् ! श्रीभगवान् के दूत इस प्रकार से यमदूतों के भाषण को सुन कर नीति में बड़े निपुण होने से इन वचनों को बोले ॥ १ ॥

विष्णुदूत बोले अहो बड़े कष्ट की बात है कि धर्म जानने वालों के सभा में भी अधर्म का प्रवेश होता है जो लोग कि नहीं दंड के योग निष्पापी पुरुषों के ऊपर दंड व्यर्थ धारण करते हैं ॥ २ ॥

जो कि प्रजों के पिता के तुल्य हैं शासन करने वाले हैं सम बुद्धि वाले साधु हैं उन्हीं में यदि वैषम्य होगा तो प्रजा किस के शरण जाँयगे ॥ ३ ॥

श्रेष्ठ पुरुष जिस जिस क्रिया का आचरण करते हैं दूसरा भी उसी क्रिया का आचरण करेगा श्रेष्ठ लोग जिसको प्रमाण मानते हैं उसी को सब लोग अनुवर्तन करते हैं ॥ ४ ॥

पशु जैसे अपने मालिक के पालन के विश्वास से रहता है तैसे सब लोक जिसके गोद में मस्तक रख कर निर्भय सोते हैं स्वयं धर्म या अधर्म क्या जाने है वह श्रेष्ठ पुरुष सब के विश्वास करने के योग्य होकर कृपालु होकर अपने आत्मा को समर्पण कर देने वाले मित्रता करने वाले अज्ञानि प्रजों को कैसे पीड़ा देने को योग्य है ॥ ५ ॥ ६ ॥

इसने अजामिलने तो कोटिन जन्मों के सब पापों का प्रायश्चित्त कर लिया है जो कि परवश होकर भी सर्व मंगल कारक श्री हरि के नाम को इसने उच्चारण किया है ॥ ७ ॥

जो कि इसने नारायण ऐसे चार अक्षर उच्चारण किये हैं इसीसे इस पापी के सब प्रायश्चित्त हो चुके अब कुछ पाप बाकी नहीं रहा है ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु कामकृतानां बहूनां महापातकानां सहस्रशः आवर्तितानां द्वादशाब्दादिकोटिभिरप्यनिवर्त्यानां कथमिदमेकमेव प्रायश्चित्तं स्यात्तत्राहुः । स्तेन इति द्वाभ्याम् ॥ ९ ॥

सुनिष्कृतं श्रेष्ठं प्रायश्चित्तमिदमेव तत्र हेतुः । यतो नामव्याहरणात्तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयं मया सर्वतो रक्षणीय इति विष्णोर्मतिर्भवति ॥ १० ॥

श्रेष्ठत्वमेवोपपादयन्ति । नेति द्वाभ्याम् । ब्रह्मवादिभिर्मन्वादिभिरुक्तैर्व्रतादिभिर्निष्कृतैस्तथा न शुध्यति उदाहृतैर्नामभिर्यथा नामपदैरित्यनेन नमामीत्यादिक्रियायोगोऽपि नापेक्षित इति दर्शितं किञ्च तन्नामपदोच्चारणमुत्तमश्लोकस्य गुणानां चोपलम्भकं ज्ञापकं भवति न तु कृच्छ्रचान्द्रायणादिवत्पापनिवृत्तिमात्रोपक्षीणमित्यर्थः ॥ ११ ॥

नैकान्तिकं नात्यन्तशोधकं तन्निष्कृतं यस्मिन् कृतेऽप्यसत्पथे

श्रीधरस्वामिकृतभावार्थदीपिका

पापमार्गे मनो धावति चेत् कर्मणां पापानां निर्हारमात्यन्तिकं नाशमिच्छतां हरेर्गुणानुवाद एव प्रायश्चित्तं यतोऽसौ खलु सत्त्वभावनः शुद्धिशोधकः ॥ १२ ॥

अथ तस्मादेनं मा अपमार्गेण नयत कृतमशेषाणामघानां निष्कृतं येन यद्यस्मात् समग्रहीत्सम्पूर्णमुच्चारितवान् नामैकदेशनात्पर्यमिति भावः म्रियमाण इत्यनेन पुनः पापान्तरासम्भव उक्तो न तु तत्कालत्वमेव विवक्षितं तदानीं कृच्छ्रादिविधिविच्छिन्नामोच्चारणविधेरप्यसम्भवात् न च विधिं विना काकतालीयनामोच्चारणं पापापहमिति प्रमाणमस्ति ॥ १३ ॥

नन्वयं पुत्रनामाग्रहीन्न तु भगवन्नाम तत्राहुः । साङ्केत्यं पुत्रादौ सङ्केतितं पारिहास्यं परिहासेन कृतं स्तोभं गीतालापपूरणार्थं कृतं हेलनं किं विष्णुनेति सावज्ञमपि च वैकुण्ठनामोच्चारणम् ॥ १४ ॥

ननु नायं सङ्कल्पपूर्वकं वैकुण्ठनामाग्रहीत्किन्तु पुत्रस्नेहपरवशः संस्तत्राहुः । पतित इति । अवशेनापि यो हरिरित्याह । स यातनां नार्हति पुमानित्यनेन नात्र वर्णाश्रमादिनियम इत्युक्तम् अयशत्वमेवाह । पतितः प्रासादादिभ्यः स्खलितो मार्गे भग्नो भग्नगात्रः संदष्टः सर्पादिभिः तप्तो ज्वरादिना आहतो दण्डादिना ॥ १५ ॥

ननु महतः पापस्य महदेव प्रायश्चित्तं युक्तं नत्वल्पं नामग्रहणमात्रं पापतारतम्येन कृच्छ्रादितारतम्यवत् तत्राहुर्द्वाभ्याम् । गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां च लघूनि तारतम्यं ज्ञात्वा मन्वादिभिरुक्तानि अतस्तत्र तथैव व्यवस्था हरिनाम्नस्तु नैवं व्यवस्थोक्ता ।

"विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैः" इति वचनात् न च सुराबिन्दुपाने महापातकत्वस्मरणवन्नाम्नस्तत्प्रायश्चित्तत्वस्मरणस्यायमतिभारः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं प्रतिपदोक्तप्रायश्चित्तादिवदन्तिमं नामस्मरणं कतिपयपापानां निष्कृतं किन्तु महापातकोपपातकसंकीर्णादिरूपाणां बहुविधानां सर्वेषामपीत्याहुः। स्तेन इत्यादिना। स्तेनः स्वर्णचोरः स्तेनादयो ये महापातकिनः ये च मित्रस्त्र्यादिहन्तार उपपातकिनः अपरे च ये नानाविधाः पातकिनः ॥ ९ ॥

तेषां सर्वेषामप्यघवतामिदमन्तिमं विष्णोर्नामव्याहरणमेकमेव सुनिष्कृतमुत्कृष्टं प्रायश्चित्तं यतः विष्णोर्नामव्याहरणात्तद्विषया विष्णुविषया मतिर्भवति भगवद्विषयकमत्युत्पत्तिप्रतिबन्धिसकलदुर्जननिरसनद्वारेण मत्युत्पादकं स्मरणं तत उत्पन्ना च मतिर्भगवत्प्राप्तिप्रतिबन्धकनिरसनद्वारा मुक्तिहेतुरिति "नान्यः पन्था" इत्यस्य न विरोध इति भावः । अन्यथा नामोच्चारणेनैव मुक्तिसिद्धेरुपासनशास्त्रवैयर्थ्यम् । मैवम् । "यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्" इत्युक्तन्यायेन तत्तदन्तिमस्मरणस्य तत्तद्भावापत्त्यापादकत्वाद्भगवत्स्मरणस्य भगवद्भावापत्त्यापादकत्वे स्थिते भगवदन्तिमस्मरणोपायतया प्रयाणपर्यन्तमुपासनं तदुच्चारणेन विधीयते तदेव स्मरणं प्राचीनसंस्कारवशादकस्मात्पकूपादि गङ्गानिपतनन्यायेन पतितं चेत्तेनैव मुक्तिः सति जीवनहेतावन्तिमस्मरणपर्यन्ताया भक्तेर्नामोच्चारणमभ्यस्तं सत् कर्मज्ञानयोगादिवदनुग्राहकम् असति तु तादात्विकस्मरणस्य साक्षान्मुक्तिसाधनस्यानुग्राहकमिति न कोऽपि विरोधः । ननु जीवद्भिरस[...] वृत्तमपि नाम न भक्तिनिर्वर्त्तकत्वेन दृष्टमिति चेत्तर्हि तैरनुष्ठिताः कर्मयोगादयोऽपि तन्निष्पादकत्वेन न दृष्टाः अथ प्रबलप्रतिबन्धवशाद्भक्तियोगानधिकाराद्वा विच्छिन्नस्य तद्वदेव नरकपरिहारकत्वं पुनर्जन्मान्तरे भक्तियोगारम्भापादकत्वं च तदा भक्तियोगानुग्राहकत्वाभावेऽपि जन्मान्तरेषु प्राचीनसंस्कारवशादारभ्यमाणभक्तियोगनिष्पादकाः कर्मयोगादय इति चेत्तर्हि नामोच्चारणमप्येवमेवेत्यवधेयं कर्मयोगादीनामभिसंहितफलानामैश्वर्यकैवल्यादिसाधनत्वमनभिसंहितफलानां तु भक्तियोगनिर्वर्त्तकत्वं संयोगपृथक्त्वन्यायेन नामोच्चारणस्य तु सति जीवनहेतावसकृदावृत्तस्य भक्तियोगोत्पत्तिप्रतिबन्धनिरसनेनाभिसंहितफलकर्मादियोगवद्भक्तियोगानुग्राहकत्वम् । इयांस्तु विशेषः असति त्वन्तिमप्रत्ययजनने न स्वतन्त्राभ्यासयोगवत्साक्षान्मुक्तिसाधनत्वमिति अलमतिविस्तरेण ॥ १० ॥

"सर्वेषामप्यघवतामिदमेव सुनिष्कृतम्" इत्यनेन कतिपयदुरितनिवर्त्तकात्प्रतिपदोक्तप्रायश्चित्तात्सकलदुरितनिवर्त्तकत्वेन नामोच्चारणस्योत्कृष्टत्वं सूचितं तदेव प्रतिपादयन्ति । नेति द्वाभ्याम् । ब्रह्मवादिभिर्मन्वादिभिर्वेदैरुक्तैर्व्रतादिभिः प्राजापत्यकृच्छ्रचान्द्रायणादिव्रतादिभिः प्रायश्चित्तैरघवान् पुरुषस्तथा न शुध्येत् कथं यथोदाहृतैर्हरेर्भगवतोनामरूपैः नामपदैः शुद्ध्येत् तत्र हेतुः तदुत्तमश्लोकगुणानुलम्भकमिति तदुच्चरितनामपदोदाहरणमुत्तमश्लोकस्य भगवतः तद्गुणानां चोपलम्भकं ज्ञापकम् उत्तमश्लोकतद्गुणविषयकमत्युत्पादकमित्यर्थः जीवद्दशायामनभिसंहितफलकर्मयोगादिभक्तिरूपमत्युत्पादकमन्तिमदशायां तु साक्षान्मुक्तिसाधनान्तिमस्मरणरूपमत्युत्पादकमिति विवेकः ॥ ११ ॥

ब्रह्मवादिभिरुक्तं निष्कृतं नैकान्तिकं नात्यन्तशोधकं कुतः हि यतः निष्कृते तस्मिन् कृतेऽपि असत्पथे पापमार्गे पुनर्मनो धावति चेदित्यवकारार्थः निपातानामनेकार्थत्वाद्धावत्येवेत्यर्थः तत्तस्मात्कर्मणां पापानां निर्हारमात्यन्तिकं नाशमभीप्सतामिच्छतां भूतानां हरेर्गुणानुवादः स एव प्रायश्चित्तं गुणा अनूद्यन्ते येन स गुणानुवादः नामव्याहारः स हि सत्त्वभावनः सम्यग्ज्ञानहेतुभूतस्सत्त्ववर्द्धकः ॥ १२ ॥

अथ हे यमदूताः ! कृतमशेषाघनिष्कृतं येन तमेनं मापनयत माप्रापयत यमालयमिति शेषः कुतः यद्यस्मादयमजामिलः म्रियमाणो भगवतो नाम समग्रमग्रहीदुच्चचार ॥ १३ ॥

नन्वसौ पुत्रे सङ्केतितं नारायणेति पदमुच्चारितवानतः तत्पुत्रविषयकमत्युत्पादनद्वारा एवं संसारयेदेव न तु भगवद्विषयकमत्युत्पादनद्वारा मोचयेदित्याशङ्कायां यदृच्छया भस्मादिबुद्ध्या वास्पृष्टस्याग्नेर्यदृच्छया पीतस्यौषधस्य दाहकत्वारोग्यजनकत्ववद्वस्तूनां विलक्षणस्वभावत्वात्सङ्केतितस्यासङ्केतितस्य वान्यादृशो भगवन्नाम्नः सर्वाघनिवर्त्तकत्वं भगवद्विषयकमत्युत्पादकत्वं च स्वाभाविको धर्म इत्याहुः । साङ्केत्यमित्यादिना सन्त्रोऽप्युदाहृत इत्यन्तेन ग्रन्थेन । साङ्केत्यं पुत्रादौ सङ्केतकृतं पारिहास्यमुच्चारणासमर्थजनपरिहासकृतं स्तोभं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

(१) निरालापकृतम् । यद्वा । भूताभिषङ्गस्य मन्त्रशक्त्यादिभिरालापनं स्तोभस्तत्कृतमित्यर्थः । हेलनं स्वविरोधिजननिन्दाद्यन्तर्भूतम् । यद्वा । किं विष्णुनेति सावज्ञं हेलनरूपं वा अन्यदपि प्रकारान्तरमापन्नं वैकुण्ठस्य भगवतो नामग्रहणं निःशेषपापहरं विदुः नामसामर्थ्ययाथात्म्यविद इति शेषः ॥ १४ ॥

तथा पतितः प्रासादादेः मार्गे भगवदाज्ञारूपवर्णाश्रमधर्माद्वा स्खलितः भग्नः भग्नपादाद्यवयवः संदष्टः सर्पादिभिः तप्तो ज्वरादिना आहतो दण्डादिना एतदन्यतमावस्थां प्राप्तः पुमान् यदवशेनापि हरिरित्याह । तर्हि यातनाः प्रति नार्हति ॥ १५ ॥

ननु महतः पापस्य महदेव प्रायश्चित्तं स्वल्पं नामग्रहणं पापतारतम्येन प्रायश्चित्ततारतम्यस्य मन्वादिभिरुक्तत्वादन्यथा प्रायश्चित्तशास्त्रवैयर्थ्यं स्यादित्यन्तरा कस्यचिन्मन्दाशङ्कां निराकुर्वन्ति । गुरूणामिति । गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां लघूनि महर्षिभिर्यथावज्ज्ञात्वा यद्यप्युक्तानि ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न केवलं सांकेत्यप्राप्तपापहरं हरिनामकीर्तनं स्तैन्यादिप्राप्तसर्वपापक्षयकरमित्याहुरित्याह । स्तेन इति ॥ ९ ॥

यतस्तद्विषयेत्यनेन भक्तिपूर्वकत्वमाह ॥ १० ॥

ब्रह्मादिभिर्वेदवादिभिः तस्मात् उदाहरणमुत्तमश्लोकस्य हरेः गुणानानन्दादीनुपलम्भयति तत्प्रीतिविम्बभूतान् प्रापयतीति तदुत्तमश्लोकगुणोपलम्भकम् ॥ ११ ॥

हरेर्नामसंकीर्तनेनैव पापनिर्मूलनं न तपआदिभिरित्येतदुपपादयति । नेति । निष्कृते पापप्रायश्चित्ते कृतेऽपि अघवतः मनः पुनरसत्पथे शास्त्रनिषिद्धमार्गे धावति अतः प्रायश्चित्तमैकान्तिकं नियतम् अव्यभिचारि न भवतीति यस्मात्तस्मात्कर्मनिर्हारमाकाङ्क्षमाणानां हरेर्गुणानामनुवादः ऐकान्तिक एवेत्यन्वयः तत्रैतेनापि मनोदोषनाशे पूर्वस्मादविशेषः स्यादिति तत्राह । सत्त्वेति । सत्त्वभावनोऽन्तःकरणशुद्धिहेतुः खलु ॥ १२ ॥

अथ तस्मात् ॥ १३ ॥

नन्वनेन न हरेर्नामग्राहि किं तु पुत्रनामैवेति तत्राह । सांकेत्यमिति । पुत्रादिसङ्केतादिविषयत्वेन नारायणेत्यादिभगवन्नामसंकीर्तनमशेषाघहरम् तदुक्तमाचार्यैः नारायणोऽयमित्यन्यहेलनविषयत्वेनोक्तमघहरमिति भक्तिपूर्वकमेवोदाहृतं हरिनामाशेषाघहरमिति तात्पर्यमत्र वाक्यमेतदप्युक्तं 'सर्वथाघहरं विष्णोर्नाम तद्भक्तिपूर्वकं अभक्त्योदाहृतं नैव फलदात् भविष्यति । नाम स्वामितया तस्य स्मरणं जायते यतः । भक्तस्यातो नामकीर्तिः संकेतादावपीरिता । अजामिलोऽपि स्मरणाद्भक्त्या मृत्योरमुच्यत' इति स्मरणप्राचुर्यदर्शनाय साङ्केत्यादिस्थलबाहुल्यकथनं संकेते रूढिमात्रेण व्यवहारनिर्वाहात्स्मरणासंभवेन परिहासे तस्मात्स्मरणं संभवति चित्तविकासोद्रेकव्यवहारात् ततोऽपि स्तोभे स्मरणं कोपजननाय नर्म-

वचनं स्तोभः मधुमक्षिकासूदनासमर्थस्त्वं किं मधु सूदितवान् असौ हरिदेवेभ्यो वैधात्मधुसूदन इत्युपपन्नमिति ततोऽपि हेलनं नामस्वामिहरणं हरेरन्यं नारायणादिनाम्ना पित्रादिभिर्वत्सनोपचरितं कञ्चनपुरुषं दृष्ट्वा निन्दयेत्सात्त्वत्पयोधिशायी नारायणः किलेति हरिद्वेषेण हरिनामकीर्तनमघहरं न स्यात् "अभक्त्योदाहृतं नैव फलदात् भविष्यति" इत्यादेश्च नामस्वामिस्मरणाभावे देवदत्ते नामपीडितार्थे भवति यथाः सूदनान्मधुसूदन इत्यर्थस्याभावात् हरौ तद्भावात्ततोऽजामिलेन भक्त्या नाम स्वामिनं स्मृत्वा नामकीर्तनं कृतमिति ज्ञातव्यं तदुक्तं च "नामस्वामितया तस्य स्मरणं जायते यतः" इत्यादि यानि यानि श्रीहरेर्नामानि तानि सर्वाणि पापहरणसामर्थ्योपेतानि भवन्तीति ज्ञापनाय वैकुण्ठनामेति अत्रैव हरिरित्यवशेनाह यः पुमानिति वक्ष्यति स्मरणं च ज्ञानपूर्वकमपेक्षितमित्यतो विदुरिति ॥ १४ ॥

संदष्टः सर्पादिना आहतो लकुटेन यातना दुःखम् ॥ १५ ॥

ननु नामसंकीर्तनेन पापपरिहारे गुरुलघुपापपरिहारार्थं गुरुलघुप्रायश्चित्तविधानं व्यर्थमित्याशङ्क्य प्रायश्चित्तेन तत्तत्पापपरिहारेऽपि संसारहेतुभूतं पापसंस्कारव्यञ्जकं प्राकृतं लिङ्गं मनो भगवदनुग्रहेण क्षीयते नान्येनेत्याह । गुरूणामिति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

यत इति । तस्य विष्णोरनुभवोऽपि यतो भवतीत्यर्थो वा ॥ १० ॥

ब्रह्मवादिभिरिति । ब्रह्मात्र कर्मकाण्डमात्रं मुख्यत्वाम्नायश्रादिनः इति वर्णामरूपैः पदैः एकस्य नाम्न एवाघान्तरपदैः उत्तमःश्लोकस्य गुणानामुपलम्भकमनुभवहेतुश्च ॥ ११ ॥

न केवलं नामैव तादृक् किन्तु गुणा अपीत्याहुः । नैकान्तिकमिति । गुणानामनुवादोऽपि ॥ १२ ॥

अथैनमिति । म्रियमाणोऽपीत्यर्थः । साङ्केत्यमित्यादिवक्ष्यमाणवशाच्च तत्कालमात्रावश्यकत्वं विवक्षितमिति ॥ १३ ॥

परिहास्यमिति । परिहासोऽत्र प्रीतिगर्भमन्यपरिभववचनं न तु निन्दागर्भं तत्तूपहास एवोच्यते तस्मात्स्तोभोपाहृतकं यत् किञ्चिद्गवल्गनामात्रमित्यर्थः । हेलनमत्र हेलया निरस्कृत इति धृतनराहित्यमयमेवोच्यते न त्ववमानात्मकमिति ज्ञेयं तथा सति वेणोऽपि दोषावहत्वं न स्यात् नाम्नो ह्यशापराध्यां चाश्रद्धानादिकं प्रत्युपदेशोऽपि दोषः श्रूयते अपराधजननेऽपि प्राचीनपापक्षयः स्यादेवेति तु केचित् ॥ १४ ॥

न केवलं साङ्केत्यादिकन्तु प्रस्तुतदुःसहामीकयापि तादृशत्वमित्याहुः । अवशेनापीति । पूर्ववत् यातना इति बहुवचनं क्वचित् ॥ १५ ॥

गुरूणामिति । पद्यत्रयेणैव विवक्षितप्रतिपादनं यानि प्रायश्चित्तान्युक्तानि तैस्तान्यघानि पूयन्ते एव किन्तु तद्वर्त्मना तु हृदाद्यनुगत्यैव पूयते तस्माद्युत्तमःश्लोकनाम तत्पुनरज्ञानात् ज्ञानाद्वा सङ्कीर्तितं सत् पुंसामस्याघमनलः एध इव निःशेषमेव दहेदित्यर्थः ॥ १८—१९ ॥

(१) निरालापकृतमिति निरालापैः यथावद्वर्णोच्चारणासमर्थैः कृतमुच्चारितमित्यर्थः यथा नारायणानि वक्तव्ये नाना ननेत्युक्तिः एतच्च श्रीरहस्यत्रयसारप्रभावव्यवस्थाधिकारव्याख्यायाम् स्पष्टम् ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु भवतु नाम पातकानां नाशः किन्तु कामकृतानां बहूनां महापातकानां महस्रश आवर्त्तितानां द्वादशाब्दकोटिभिरप्यनिवर्त्यानां कथमेकेनैव नामाभासेन प्रायश्चित्तं स्यादित्यत आहुः । स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः... एतेन इदमेव सुनिष्कृतं पापनिर्मूलीकरणाच्छ्रेष्ठं प्रायश्चित्तम् । ननु द्वादशाब्दादिकम् पापनाशकत्वेऽपि पापनिर्मूलनासामर्थ्यात् नाप्येतन्मात्रफलकं यतो नामव्याहरणात् तद्विषया मतिः... मदीयोऽयं मया सर्वथा रक्षणीय इति विष्णोर्मतिर्भवतीति स्वामिचरणाः । स्वनाम श्रुत्वैव तदुच्चारकमजामिलं स्मृत्वैव तमानेतुमस्मानादिष्टवानिति किमुत मेव्यत्वेन विष्णुविषयामतिस्तस्य पुरुषस्य यदि स्यादिति भावः । अतः यमदूतान् साक्षाद्दर्शयितुमेवाजामिलस्य तदानीन्तनं नामव्याहरणं सर्वपापप्रायश्चित्तत्वेन विष्णुदूता ऊचुः । वस्तुतस्तु पुत्रनामकरणसमयमारभ्यैव पुत्राह्वानादिषु बहुशो व्याहृतानां नाम्नां मध्ये यत् प्रथमं तदेव सर्वपापप्रशमकमभूदन्यानि तु भक्तिसाधकानीति व्याख्येयम् । यद्व्याजहारेति परोक्षनिर्देशात् प्रथमं नामोद्दिश्यैवोक्तम् । विवश इति पुत्रस्नेहविवश इति व्याख्येयम् । नच पुनः पुनर्नामव्याहरणानन्तरमपि पुनः पुनरुत्पन्नानां वेश्याभिगमसुरापानादीनां सर्वेषां पापानां प्रशमनार्थमन्तिमसमयोत्थमेव नामव्याहरणमपेक्षितं यदनन्तरं पुनः पापानुत्पत्तिरिति वाच्यम् "वैकुण्ठनामग्रहणमशेषाघहरं विदुः" इत्यत्राशेषपदोपादानात् । "वर्त्तमानञ्च यत् पापं यद्भूतं यद्भविष्यति । तत् सर्वं निर्दहत्याशु गोविन्दानलकीर्त्तनात्" इति । "यन्नाम सकृच्छ्रवणात् पुल्कशोऽपि विमुच्यते संसारात्" इति "चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम्" इत्यादिषु संसारबन्धादिप्रयोगाच्च तत्र तत्र समयविशेषनियमानभिधानाच्च प्रथमनामग्रहणेनैव सर्वपापानां तद्वासनायास्तन्मूलभूताविद्याया अपि नाशावगतेः पुनः पापप्ररोहासम्भवात् । ननु तर्हि प्रथमनामग्रहणानन्तरमेवाजामिलेन निर्विद्य ततः कथं नापसृतं पापप्ररोहाभावेऽपि तस्यामेव दास्यामासज्य तत्सङ्गेन पापं तावत्कालपर्यन्तं प्रत्युत कृतम् उच्यते संस्कारवशाज्जीवन्मुक्तानां कर्मेव तस्यापि तावत्कालपर्यन्तं तत्सङ्गेन पापं पुनः पुनरुत्पद्यमानमप्युत्खातदंष्ट्रोरगदंशवन्न फलजनकम् । किम्वा मतान्तरोत्थानाभावार्थं भगवतैव पापबीजाभावेऽपि पुनः पापं प्रवर्त्तितं भवेदित्येव व्याख्येयमन्यथा स्तुत्यर्थवादे कल्पनान्तरे वा व्याख्यायमाने "तथार्थवादो हरिनाम्नि कल्पनम्" इति पाठोक्तनामापराधप्रसक्तौ । "नाम्नोऽपि सर्वसुहृदो ह्यपराधात् पतत्यधः" इति । "अर्थवादं हरेर्नाम्नि सम्भावयति यो नरः । स पापिष्ठो मनुष्याणां निरये पतति स्फुटम्" । इति । "यन्नामकीर्त्तनफलं विविधं निशम्य न श्रद्दधाति मनुते यदुतार्थवादम् । यो मानुषस्तमिह दुःखचये क्षिपामि संसारघोरविविधार्त्तिनिपीडिताङ्गम्" । इति श्रीनिम्बुकपुराणेषु नाममाहात्म्यवादेषु । सोऽर्थवाद इति ब्रुवते तेषां निरयत्वं इति पाद्मकात्यायनसंहितादिवचःसहस्रवचनाद् द्वापर एव स्यात् । अत एव श्रीविष्णुपुराणेन । "कश्चिद्धितकर्म्मणोऽपराद्धात् किमिच्छति तेनुनः । प्रायश्चित्तमथोऽपार्थं मन्ये कुञ्जरशौचवत्" । इति पुनः पापप्रवृत्तिदर्शने प्रायश्चित्तसमाश्रितपञ्चपि भक्तिप्रसङ्गे भक्तानामपि कस्य कस्यचित् पुनः पुनः पापप्रवृत्तिदर्शनेऽपि तेनाश्रयः कृतः । अपि च यथा नामाभासबलेनाजामिलो दुराचारोऽपि वैकुण्ठं प्रापितस्तथैव स्मार्त्तादयः सदाचाराः शास्त्रज्ञा अपि बहुशो नामग्राहिणोऽप्यर्थवादकल्पनादिनामापराधबलेन घोरसंसारमेव प्राप्यन्त इत्यतो नाममाहात्म्यदृष्ट्या सर्वमुक्तिप्रसङ्गोऽपि नाशङ्क्यः । तदेवं भगवन्नाम सकृत्प्रवृत्तमपि सद्य एव समूलं पापं संहरदपि फलमपि वृक्षः काले एव फलतीतिन्यायेन प्रायः किञ्चिद्विलम्बत एव स्वीयफलविङ्कं लोके दर्शयितुमयमहमुखशास्त्रमतोच्छेदाभावार्थं कश्चिन्न दर्शयित्वा च स्वव्याहर्तृजनान् स्वापराधरहितान् भगवद्धाम नयतीति सिद्धान्तो वेदितः नन्वर्थवादादिनामापराधवतां नामापराधहेतुकोऽधःपातो भवतु नाम तत्र न विवदामहे । नामग्रहणहेतुकः सर्वपापक्षयो भवति न वा आद्ये कर्मिज्ञानियोगिभक्तानां तद्भिन्नानामपि नृणां मध्ये पारदारिकपरहिंसादिगम्येषु नरकेषु केनापि न गन्तव्यं द्वितीये कर्मिप्रभृतिभिरिव भक्तैरपि पापभोगार्थं नरकेषु गन्तव्यमेव । अत्रोच्यते यथा महाजनः स्वाश्रितानामाश्रयणतारतम्येन पालनतारतम्यं कुर्वन्नपि तानेव नैव पालयति यदि ते तदपराधिनः स्युरिति तस्याप्रमाद एव स्वाश्रितापालने कारणं न तु पालनासामर्थ्यं कल्पनीयम् । तेषामेवापराधक्षयतारतम्येन तेषु तस्य प्रसादतारतम्यञ्च ! सर्वापराधक्षये प्रसाद एव । एवमेव नामोपलक्षितां भक्तिदेवीं ये गुणीभावेनाश्रयन्ते कर्म्मादिफलसिद्ध्यर्थं तेषु गुणीभूताया भक्तेर्वर्त्तमानत्वेऽपि प्राधान्येन व्यपदेशा भवन्तीति न्यायेन ते कर्मिज्ञान्यादिशब्देनाभिधीयन्ते । न तु वैष्णवशब्देन ते च स्वरूपत एवैकनामापराधवन्तः । यदुक्तम् । "धर्म्मव्रतत्यागहुतादिसर्वशुभक्रियासाम्यमपि प्रमाद" इति नाम्नो धर्म्मादिभिः साम्यमप्यपराधः किमुत धर्म्माद्यङ्गत्वेन गुणीभूतत्वामित्यर्थः । तदपि तादृशस्त्राश्रयणगुणलेशग्रहणेनैषां कर्म्मयोगादयो मा विफला भवन्त्विति स्वीयदाक्षिण्येन स्वापकर्षं स्वीकृत्यापि भक्तिदेवी तेषां कर्म्माद्यङ्गभूतैव कर्म्मादिफलं निष्प्रत्यूहमुत्पादयति यथा तथैव तेषां पापमपि प्रायश्चित्ताङ्गभूतैव नाशयति नान्यथेत्यतस्तैरेवाकृतप्रायश्चित्तैस्तत्तत्पापफलभोगार्थं तेषु तेषु नरकेषु गन्तव्यमेव न तु वैष्णवैः यदि च ते पुनरन्यानर्थवादसाधुनिन्दादीन् नामापराधान् कुर्वाणा एव धर्म्मादिकमनुतिष्ठन्ति तदा धर्म्माद्यङ्गभूतापि न तत्तत्फलमुत्पादयति । "के तेऽपराधा विप्रेन्द्र ! नाम्नो भगवतः कृताः । विनिघ्नन्ति नृणां कृत्यम्" इत्यादिवचनेभ्यः । किञ्च । तेषामपि तत्तदपराधेभ्यो निवृत्य तदुपशमकनामकीर्त्तनादिपराणां नामापराधक्षयतारतम्येन कर्म्मफलप्राप्तितारतम्यं साधुसङ्गवशात सर्व्वनामापराधक्षये तु भक्तिदेवी सम्यक्प्रसादेन नामफलप्राप्तिरेव निर्विवादा । नन्वजामिलस्यापि "अयं हि श्रुतसम्पन्नः" इत्यादियमदूतवाक्यैः प्राक्तनं कर्मित्वमवगम्यते । सत्यं मदिरापानाद्ब्राह्मण्यमप्यस्य नष्टमेव किमुत कर्मित्वं यदुच्यते । "एवं स विप्लावितसर्व्वधर्म्मा दास्याः पतिः पतितो गर्ह्यकर्म्मणा" इति । कर्म्मापगमत्वगुण एव भक्तेर्गुणीभावेऽपगतः पुनश्च स्वपुत्राह्वानादौ नारायणनामोच्चारणनिबन्धना केवलानन्यैव भक्तिरस्याभूदिति । ननु कर्म्मज्ञानाद्यङ्गत्वे भक्तिं कुर्वीतेति यदि विधिवाक्यमेवास्ति तर्हि कुतस्तेषां नामापराधः । उच्यते भक्त्यैव सर्व्वेऽपि धर्म्माः सम्यगेव सिद्ध्यन्ति भक्तिलेशेनापि महापातकान्यपि नश्यन्तीत्यादिपरःशतशास्त्रवाक्येष्वर्थवादत्वमतां कर्म्मज्ञानवादिव श्रद्धालूनां

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

भक्तिबहिर्मुखानामशुद्धकुटिलचित्तानामप्यनेनैव प्रकारेण भक्तिर्भवत्विति दयामयमेव वेदशास्त्रं धर्म्मज्ञानाद्युक्तत्वेन भक्तिविघ्न इत्यतो न शास्त्रवाक्यमुपालम्भनीयमिति तनञ्च वैधपशुहिंसाकृतो विधिबलात् स्वर्गप्राप्तावपि यथा तद्धिंसादोषानपगमस्तथैव भक्तिगुणीभावकरणरूपापराधवतो विधिबलात् कर्म्मफलप्राप्तावपि तदपराधानपगम एव ज्ञेय इति। अथ ये नामापराधिनो वैष्णव्या दीक्षया वैष्णवमेव गुरुकृत्य भक्तिदेवीं कैवल्येन प्राधान्येन वाश्रयमाणाः नामकीर्त्तनादिभिर्भगवन्तं भजन्ते। तेषामपि वैष्णवशब्देनाभिधीयमानानां भक्तितारतम्येनैवापराधत्वयतारतम्यं भक्तेर्मुख्यफलोदयतारतम्यञ्च भक्तिदेव्याः प्रसादतारतम्येनैव। यदुक्तं भगवतैव। "यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः। तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम्" इति। "भक्तिः परेशानुभवो विरक्तिः" इत्यादि च "शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्त्तनः। हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत् सताम्" इत्यादिवचनव्यज्यमानचतुर्द्दशभूमिकारोहश्च क्रमेणैव तेषां ज्ञेयः। एतदर्थमेव तत्र तत्र श्रद्धारुच्यादिविधानम्। अत्रापि प्रकरणे "गुणानुवादः खलु सत्त्वभावन" इति अतस्तेषां क्षीणसर्व्वापराधत्वे सत्येव भगवन्तं प्राप्तानां न पुनर्भवः। निरपराधानान्तु भगवत्प्राप्तौ नास्ति विलम्बस्तेषां हि भगवन्नामग्रहणं वैकुण्ठारोहणश्रेणि। द्वे एव भूमिके यथा अजामिलादीनां यदुक्तम्। "न वासुदेवभक्तानामशुभं विद्यते क्वचित्। जन्ममृत्युजराव्याधिभयं वाप्युपजायते" इति "स्वधर्म्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चितामेति ततः परं हि माम्। अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधाः कलात्यये" इति निरपराधानामपि केषाञ्चित् प्रेमविशेषलिप्साविपूर्णां भगवत्प्राप्तौ किञ्चिद्विलम्बोऽपि। यथैवादिभरतस्य जन्मत्रयमभूत्। किञ्च। सापराधानां मध्ये यदि केचिद्भजनाभ्यासाभावादक्षीणप्राचीनपापाः क्रियमाणपापनामापराधाश्च स्युस्तदपि तैर्देहत्यागानन्तरं नरकेषु न गन्तव्यं "स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले। परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम्" इति "तेषां वयं नच वयं प्रभवाम दण्डे" इत्यादियमवचनेभ्यः। "प्राहास्मान् यमुनाभ्राता सादरं हि पुनः पुनः। भवद्भिर्वैष्णवस्त्याज्यो विष्णुश्चेद्भजते नरः" इति पाद्ममाघमाहात्म्यीयदेवदूतवचनाच्च। किञ्च। नह्यङ्गोपक्रमे ध्वंसो मद्धर्म्मस्योद्धवाण्वपि इति भगवद्वाक्यात् किञ्चिद्भक्त्यङ्कुरस्याप्यनश्वरत्वभावात् पापादिदुर्निक्रमत्वादमोघत्वाच्चावश्यं तेन जनिष्यमाणपत्रपुष्पाद्यर्थमेव तेषां जन्म भवेन्न त्वदृष्टपापपुण्यनिबन्धनम् यदुक्तम्। "न कर्म्मबन्धनं जन्म वैष्णवानाञ्च विद्यते" इति। अतो जन्मान्तरे तेषां प्राचीनभक्तिसंस्कारोत्थैर्नामकीर्त्तनादिः पापापराधक्षयान्तर्भक्तिदेव्याः प्रसादेन भगवत्प्राप्तिः। यदुक्तम् "नैवं जनो जातु कथञ्चनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग! संसृतिम्। स्मरन् मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छन्न रसग्रहो जनः" इति अत्रान्यवदिति कर्म्मिजनादिवत् संसृतिं पुण्यपापफलभोगमयीं नाप्नोति किन्तु भगवद्दत्तां सुखदुःखमयीं संसृतिं प्राप्नोतीत्यर्थः। यदुक्तं श्रुत्या। "त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयानिति" तेषां यावन्नामापराधक्षयाभावस्तावदनष्टानि पापानि अभुक्तफलान्येव तिष्ठन्ति भक्तिसूक्ष्मया तदभ्यासेन नामापराधक्षये सति सद्य एव समूलपापक्षयात् भगवन्तं प्राप्नोतीत्यतो भक्तिसूक्ष्मगर्भकर्म्मिश्रजन्मानि वैष्णवा अपि प्राप्नुवन्ति। तेषां दृश्यमानानि वैषयिकसुखानि भक्तिधर्म्मोत्थानि यदुक्तम्। "धर्म्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते। नार्थस्य धर्म्मैकान्तस्य कामो लाभाय हि स्मृतः। कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता" इति दुःखानि तु कानिचित् स्वभक्तभक्तिवर्द्धनचतुरेण भगवता लङ्घनकटुकौषधपाययनादिभिः क्षुधावृद्धिप्रतिपादकेन भिषजेव दत्तानि "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः" इति तदुक्तेः। कानिचित्तु प्रबलनामापराधफलानि यतो दशसु नामापराधेषु मध्ये अर्थवादार्थान्तरकल्पनशुभकर्म्मसाम्यानीति त्रयः साक्षाद्वैष्णवताया एव व्याघातकाः। तदन्येषु तु मध्ये ह्यतिप्रबलौ महदपराधनामबलेहतुकपापप्रवृत्ती यतः कृपानि यानि कथमु सहते नामगर्हामिति "नाम्नो बलाद्यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः" इति विशेषविशेषिकोक्तेरतस्तौ समुचितदुःखभोगसहितसन्ततनामकीर्त्तनेनैवोपसाम्यतो नान्यथा। अन्ये नामापराधास्तु सन्ततनामकीर्त्तनादिभिरेव शाम्यन्तीति ये च नामापराधिनः कर्म्मज्ञानादिरहिताः श्रवणकीर्त्तनादिभक्तिमन्तः किन्त्वनाश्रितगुरुचरणास्तथादीक्षितास्तेऽपि वैष्णवशब्देनैवाभिधीयन्ते। तथा हि वैष्णव इति "सास्य देवता" इति सूत्रेण "भक्तिः" इति सूत्रेण च सिद्धत्वात् ये दीक्षया देवतीकृतविष्णवो ये च भजनेन भजनीयीकृतविष्णवस्ते उभये अपि व्यपदेशान्तररहिताद्वैष्णवा एवेति तेषामपि न स्वाकारकपातादि पूर्ववदिति केचिदाहुः। नैतत् सुसङ्गतम्। "यतो नृदेहमाद्यम्" इत्यादौ गुरुकर्णधारमित्युक्तेर्गुरुं विना न भगवन्तं सुखेन प्राप्नुवन्ति अतस्तेषां भजनप्रभावेणैव जन्मान्तरे भक्त्या भगवत्प्राप्तिर्नान्यथेत्याचक्षते। अथ चानाश्रितगुरोरप्यजामिलस्य सुखेनैव भगवत्प्राप्तिर्दृश्यत एव तस्माद्विषयमत्र व्यवस्था। ये गोगर्द्दभादय इव विषयेष्वेवेन्द्रियाणि सदा चारयन्ति को भगवान् का भक्तिः को गुरुरिति स्वप्नेऽपि न जानन्ति तेषामेव नामाभासादिरीत्या गृहीतहरिनाम्नामजामिलादीनामिव निरपराधानां गुरुं विनापि भवत्येवोद्धारः। हरिर्भजनीय एव भजनं तत्प्रापकमेव तदुपदेष्टा गुरुरेव गुरूपदिष्टा भक्ता एव पूर्वे हरिं प्रापुरिति विवेकविशेषवत्त्वेऽपि यो दीक्षां नच सत्क्रियां नच पुरश्चर्यां मनागीक्षते मन्त्रोऽयं रसनास्पृगेव फलति श्रीकृष्णनामात्मक इति प्रमाणदृष्ट्या अजामिलादिदृष्टान्तेन च किं मे गुरुकरणश्रमेण नामकीर्त्तनादिभिरेव मे भगवत्प्राप्तिर्भविष्यतीति मन्यमानस्य गुर्व्ववज्ञालक्षणमहापराधादेव भगवन्तं न प्राप्नोति किन्तु तस्मिन्नेव जन्मनि जन्मान्तरे वा तदपराधक्षये सति श्रीगुरुचरणाश्रित एव प्राप्नोतीति। देवतान्तरभक्तानां पापापराधयोः कर्म्मिणामिव व्यवस्थेत्येके। भक्तिदेव्या आश्रयणामाहात्म्याभावात्तेऽपि न न्यूनकक्षायां निविष्टा इत्यपरे। यदुक्तम्। "येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः। तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकम्। अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते" इति। ये तु [illegible]श्रित एव तेषां नैवोद्धारः। यदुक्तं "तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु। आसुरीं

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय! ततो यान्त्यधमां गतिम्" इति । ये तु तेषामपि मध्ये कंसादयस्तेषाम्

कामाद्द्वेषाद्भयात् स्नेहाद्यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥

इत्यादिवचनबलाद्भगवदावेशेनैव नामापराधक्षयान्मुक्तिरिति केचित् । नामान्येव हरन्त्यघमित्युपलक्षणं ध्यानादीनामप्यतो ध्यानपरैः पुन्यमवावेश इत्यन्ये । कृष्णावतारत्वे तत्रैकान्तिकं मनः केचिदावेशरहिता अपि नरकवाणादिकौरवादिभिर्न्यगतास्तत्कृष्णस्मरणप्रभावात् केचिद्दर्शनमात्रस्यापि प्रभावात्तं प्रापुरिति पूर्वत्रैवोक्तमित्यपरे ॥ ९ ॥ १० ॥

सर्वमहापातकप्रायश्चित्तत्वेऽपि नाम्नः परमवैशिष्ट्यमाहुः । नेति द्वाभ्याम् । ब्रह्मवादिभिर्मन्वादिभिर्नामपदैः साङ्केत्यादिना नाम्नांश्चिह्नमात्रैः । यद्वा । नारायणादिनाम्नः एकेनापि पदेन सुबन्तशब्दमात्रेणापि बहुत्वं गौरवेण अर्थापत्त्यापि नापेक्षितव्यमिति भावः उदाहृतैरुच्चारितैरिति मनोनिवेशोऽपि नापेक्षितव्य इति भावः। अघवान् कर्मिप्रभृतिभिन्न एव पापीत्युक्तयुक्त्या व्याख्येयम् । न च नाम समूलपापनिवृत्तिमात्र एवोपक्षीणमित्याहुः तन्नाम उत्तमःश्लोकस्य गुणानैश्वर्यमाधुर्यसौन्दर्यादीनप्युपलम्भयति प्रेम्णा अनुभावयतीति तत् । यद्वा । ननु तपोव्रतादिमहाकृच्छ्रैरप्यमहापातकं निवर्त्यते तन्नाम्नः सुखोच्चारणमात्रेण कथं निवर्त्यतामित्यत आहुः । तदिति । उत्तमःश्लोकस्य महायशस्विनो हरेस्तदेव गुणस्य प्रभावस्य ज्ञापकं परमेश्वरस्येयमर्थका परमेश्वरत्वेत्यर्थः ॥ ११ ॥

द्वादशाब्दादिप्रायश्चित्तानां ततो निकृष्टत्वमाहुः। नैकान्तिकं नात्यन्तशोधकं तत्प्रायश्चित्तं यस्मिन् कृतेऽपि असत्पथे पापमार्गे मनो धावति चेत् तस्मात् कर्मणां निर्हारमात्यन्तिकं नाशमभीप्सतां हरेर्गुणानुवादः नाम्नामिव गुणानामप्यनुवादोऽनुकथनं कस्यचिन्मुखाच्छ्रुतानां तेषां पश्चात्कथनं "पश्चात्सादृश्ययोरनु" इत्यमरः। सत्त्वभावनः वासनाया अपि नाशकत्वात् सत्त्वशोधकः। ननु मनः पुनर्धावतीति प्रायश्चित्तानन्तरं पुनः पापकरणं कथं निन्द्यते तस्यापि संस्काराधीनत्वादुत्खातदंष्ट्रोरगदंशसदृशत्वमस्माभिर्व्याख्येयमिति चेद् भ्रान्ताः स्थः तथा व्याख्यानमस्माकं नाम्नः सवासनपापनाशकत्वप्रतिपादकवचनानुरोधादेव न तु स्वकपोलकल्पितम्। भवतान्तु प्रायश्चित्तशास्त्रे तादृशवचनाभावात् कर्ममार्गे ह्यर्थवादजन्यप्रत्यवायस्याप्यश्रवणात्कथं तथा व्याख्यातुं शक्तिरिति प्रागेवोक्तम् ॥ १२ ॥

अथ यस्मादेवं तस्मादेनं मा अपनयत । कृताशेषेति पुत्रनामकरणसमये प्रथमेनैव नाम्नेत्यर्थः । एतेनाजामिलस्य प्राचीननामापराधराहित्यमवगम्यते । यद्वतो निष्पापत्वादेव म्रियमाणः स नाम सम्यगग्रहीत् पापसत्त्वे म्रियमाणस्य जिह्वायां कथं नाम प्रादुर्भवेदिति भावः। यदुक्तं गीतासु "येषां त्वन्तगतं पापम्" इत्युपक्रम्य अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् । यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः" इति । तेन मृत्युकाल एव नामाद्याविर्भावाभ्यां नामापराधसत्त्वासत्त्वे अनुमेये इति व्याचक्षते ॥ १३ ॥

कीदृशं नाम सर्वपापहरं स्यादित्यपेक्षायां कैमुत्येनाहु । साङ्केत्यं पुत्रादौ सङ्केतः स्वार्थे ष्यञ् सर्वत्र तृतीयार्थे प्रथमा सङ्केतादिभिरपीत्यर्थः । पारिहास्यमिति प्रीतिगर्भमेव न तु निन्दागर्भम् । यथा भो विख्यातकीर्त्ते ! कृष्णनाम दृष्टा तव कीर्त्तिर्यतो मां मोक्तुमशक्तस्त्वमिति स्तोभं कथागीतालापादिपूरणार्थं श्री हेलनमत्र हेलया गिरिकृत इति वचस्तद्राहित्यमेवोच्यते यथा आहारविहारनिद्रावावश्यवहेलया एव यावन्ति कृष्णनामान्ययं गृह्णाति न तावन्त्यन्ये प्रयत्नेनापि ग्रहीतुं शक्नुवन्तीति न तु निन्दावज्ञादिकम् । तथा सति "निन्दां भगवतः शृण्वन्" इत्यादेर्भगवतो निन्दके किम्वा विष्णुनेति तद्वमन्तरि वैष्णवादावपि दोषावहत्वं न स्यादशेषाघहरं वासनापर्यन्तसर्वपापनाशकम् ॥ १४ ॥

साङ्केत्यादिभ्योऽप्यस्य पञ्चमस्य वैशद्यप्रभेदमाह । पतितः प्रासादादिभ्यः स्खलितो मार्गेण भग्नो भग्नगात्रः सन्दष्टः सर्पादिभिः तप्तो ज्वरादिना आहतो दण्डादिना पुमान् कर्मिप्रभृतिभ्योऽन्य इति व्याख्यातयुक्त्या ज्ञेयम् ॥ १५ ॥

ननु पापतारतम्येन कृच्छ्रादितारतम्यं शास्त्रे दृश्यते कथमेक एव नामाभासः सर्वमहापातकानि विनाशयेदित्यत आहुः । गुरूणामिति । तेषां परिमितशक्तित्वात्तथा तथैव व्यवस्था नाम्नस्त्वविचिन्त्यमहाशक्तेरेकस्यैव महापातकपुञ्जसंहर्त्तृत्वमेकांशेनैव यथा साम्बमोचने प्रवृत्तस्य बलभद्रस्यैकस्यैव दुर्योधनादिसर्वकौरवसंहारक्षमत्वमनायासेनैवेति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अपरे हीनप्रतिज्ञत्यक्तव्रतकृतघ्नप्रभृतयः ॥ ९ ॥

सुनिष्कृतं सुष्ठु प्रायश्चित्तं नामव्याहरणात्तद्विषया मतिः नामोच्चारकरक्षणविषया मतिर्हरेर्भवतीत्यर्थः । यद्वा । हरिनामोच्चारकस्य तद्विषया हरिस्वरूपगुणादिविषया मतिर्भवतीत्यर्थः ॥१०॥

ब्रह्मवादिभिर्हरेर्नामरूपैः पदैरुदाहृतैरघवान् यथा विशुद्ध्यति तथा कृच्छ्रादिव्रतादिभिर्निष्कृतैः प्रायश्चित्तैः सदुदितैः स न शुद्ध्यति तद्धरिनामोच्चारणम् उत्तमकीर्तेर्हरेः गुणानामुपलम्भनं ज्ञापकं भवति हरिनामोच्चारणेन निखिलपापनिर्नाशपूर्वकं हरिनामोच्चारकः सर्वपुरुषार्थं लभते यदि हरिनामोच्चारकस्यापि सर्वपुरुषार्थदं हरिप्रापकं न भवत्यपि तु पापकर्मप्रापकं भवति तदा तस्य हरिनाम्नि अर्थवादादिकल्पनया नामापराधित्वं ज्ञेयम्

अर्थवादं हरेर्नाम्नि सम्भावयति यो नरः ।
स पापिष्ठो मनुष्याणां निरये पतति स्फुटम् ॥
मन्नामकीर्तनफलं विविधं निशम्य
न श्रद्दधाति मनुते यदुतार्थवादम् ।
यो मानुषस्तमिह दुःखचये क्षिपामि
संसारघोरविविधार्तिनिपीडिताङ्गम् ।

इत्यादिपुराणान्तरेभ्यः नामापराधनिवृत्तिरपि नामोच्चारणावृत्त्या भवति ।

नामापराधयुक्तानां नामान्येव हरन्त्यघम् ।
अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि च ॥

इति वचनात् ॥ ११ ॥

तैस्तान्यघानि पूयन्ते तपोदानजपादिभिः ।
नाधर्मजं तद्धृदयं तदपीशाङ्घ्रिसेवया ॥ १७ ॥
धर्मो योऽयमुपन्यस्तः परमस्तु सनातनः ।
क्रियतेऽहरहः शुद्धिरात्मनो वाससो यथा ॥ ० ॥[१]
नैकान्तशुद्धिः स्यात् कर्तुः क्रिययाऽकर्तृना यतः ।
अकर्तुरात्मनस्तस्माद्व्रजेतानीहया हरिम् ॥ ० ॥
अज्ञानादथवाज्ञानादुत्तमश्लोकनाम यत् ।
सङ्कीर्तितमघं पुंसो दहेदेधो यथाऽनलः ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यस्मिन्निष्कृतेऽपि मनः असत्पथे पापमार्गे धावति तन्निष्कृतमात्यन्तिकमत्यन्ततः शोधकं न भवति तत्तस्मात् कर्मनिर्हारमभीप्सतां हरेर्गुणानुवाद एव सत्त्वभावनः अन्तःकरणशोधकः मुख्यं निष्कृतमित्यर्थः ॥ १२ ॥

तदेवं धर्मराजनये निष्पापदण्डनासम्भवादस्य च सर्वथा निष्पापत्वाच्च "नत एनं दण्डपाणेः सकाशं कृतकिल्बिषं नेष्याम" इत्येवं मृषावादिनो यूयमेवैनं नेतुं पापित्वभ्रमात्प्रवृत्ताः अतो माऽपनयत ॥ १३ ॥

ननु पुत्रोद्देशेनोच्चारितं तन्नाम कथं निष्पापत्वकारणमत्राहुः । साङ्केत्यमिति । साङ्केत्यमन्यसङ्केतेन कृतं पारिहास्यं परिहासार्थं कृतं स्तोभं गीतालापपूर्त्यर्थं कृतं हेलनं सावज्ञङ्किम्विष्णुनेत्येवं "वैकुण्ठनामग्रहणमशेषाघहरं विदुः

श्रवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥

इत्यादिस्मृतयः तन्मूलभूताः श्रुतयश्च "मर्ता अमर्त्यस्य ते भूरि नाम मनामहे । विप्रासो जातवेदसः आस्य जानन्तो नाम चिद्विवक्तन" इत्याद्याः ॥ १४ ॥

नन्वनेन अवहिततया सङ्कल्पपूर्वकं नामग्रहणं न कृतमतो यातनार्होऽयमित्यत्राहुः । पतित इति । पुमानित्युपलक्षणं स्त्र्यादीनाम पतितः उच्चस्थानात् स्खलितः निम्नस्थानादिप्रयोगतः भग्नः खड्गादिना खण्डिताङ्गः संदष्टो वृश्चिकादिना तप्तः ज्वरादिना आहतो तुरुष्कादिना एवमवशेन अनवहितत्वेन हरिरिति य आह स यातनाः नार्हति ॥ १५ ॥

अत्र यातनाप्रापकाप्रापकाधर्मजहृदयशुद्धिर्हरिनामोच्चारणादिरूपेशाङ्घ्रिसेवयैव भवतीति हेतुमाहुः । गुरूणामिति द्वाभ्यां गुरूणां महतां लघूनामल्पानां पापानां महर्षिभिः ज्ञात्वा तत्तदनुरूपतया निश्चित्य गुरूणि लघूनि च प्रायश्चित्तानि यान्युक्तानि ॥ १६ ॥

भाषा टीका ।

*सुवर्णादि चोरी करने वाला मदिरा पान करने वाला मित्रद्रोही ब्राह्मणघाती गुरुस्त्रीगामी स्त्री को मारने वाला पिता को मारने वाला राजा को मारने वाला और जो पातकी हैं सम्पूर्ण पाप वालों को यही एक उत्तम प्रायश्चित्त है जो कि भगवान् के ध्यान पूर्वक श्रीविष्णु भगवान् के नाम का उच्चारण किया जाय ॥ ९ ॥ १० ॥

मन्वादिकों के कहे हुये प्रायश्चित्तोंसे पापी पुरुष वैसा पवित्र नहीं होता है जैसा कि उत्तमश्लोक विष्णु भगवान के गुणों के प्रकाश करने वाले नामों के उच्चारण करने मात्र से पवित्र होता है ॥ ११ ॥

वे सब प्रायश्चित्त अत्यन्त शोधक नहीं हैं क्यों कि प्रायश्चित्त करने पीछे भी मन असत् मार्गों में जाता है तब तो पापों के नाश करने की इच्छा वाले पुरुषों को भगवान् का गुणानुवाद ही करना उत्तम है क्योंकि उसके करने से भगवान् अन्तःकरणको शुद्ध करदेते हैं तब फिर मन खोटेमार्ग मे नहीं जाता है ॥ १२ ॥

इससे इसको मत लेजाओ क्यों कि इसने सब पापों का प्रायश्चित्त करलिया है जिससे कि इसने मरते समय मे भगवान् के नामका ग्रहण किया है ॥ १३ ॥

किसी दूसरे वस्तुके संकेत से अथवा परिहास से अथवा गानके ध्रुवपदादि मे अवलम्ब लेनेको अथवा किसी प्रकार की अवज्ञासे ग्रहण किया जो भगवान् का नाम वही सब पापों का नाश करनेवाला है ऐसा नाम माहात्म्य जानने वाले पुरुष कहते हैं ॥ १४ ॥

गिरने से ठोकरके लगने से शरीर भङ्ग होने से किसी जन्तुके काटने से ज्वरादि ताप होने से दण्डादि आघात होने से परवश होकर भी जो पुरुष हरिः ऐसे दो अक्षर को कहता है सो पुरुष मात्र कोई होवे कभी यम दण्ड को नहीं प्राप्त होता है ॥ १५ ॥

छोटे बड़े पापों के दूर करने के वास्ते छोटे बड़े प्रायश्चित्त महर्षिजनोंने जान कर निरूपण किये हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च । तैस्तपोदानादिभिस्तान्यघान्येव पूयन्ते नश्यन्ति अधर्माज्जातं मलिनं तु तस्य पापकर्तुर्हृदयम् । यद्वा । तेषामघानां हृदयं

(१) इमौ श्लोकौ मध्विमते श्रीविजयध्वजतीर्थपाठे ।

यथाऽगदं वीर्यतममुपयुक्तं यदृच्छया ।
अजानतोऽप्यात्मगुणं कुर्यान्मन्त्रोऽप्युदाहृतः ॥ १९ ॥
पतिं वः पृच्छत भटा ! धर्मेऽस्मिन् यदि संशयः । (१)
स वेद परमं गुह्यं धर्मस्य भगवान् यमः ॥ ० ॥

॥ श्रीशुक उवाच ॥

त एवं सुविनिर्णीय धर्मं भागवतं नृप ! ।
तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् ॥ २० ॥
इति प्रत्युदिता याम्या दूता यात्वा यमान्तिके ।
यमराज्ञे यथा सर्वमाचचक्षुररिन्दम ! ॥ २१ ॥
द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः ।
ववन्दे शिरसा विष्णोः किङ्करान् दर्शनोत्सवः ॥ २२ ॥
तं विवक्षुमभिप्रेत्य महापुरुषकिङ्कराः ।
सहसा पश्यतस्तस्य तत्रान्तर्दधिरेऽनघ ! ॥ २३ ॥
अजामिलोऽप्यथाकर्ण्य दूतानां यमकृष्णयोः ।
धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयम् ॥ २४ ॥
भक्तिमान् भगवत्याशु माहात्म्यश्रवणाद्धरेः ।
अनुतापो महानासीत् स्मरतोऽशुभमात्मनः ॥ २५ ॥
अहो मे परमं कष्टमभूदविजितात्मनः ।
येन विप्लावितं ब्रह्म वृषल्यां जायतात्मना ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सूक्ष्मं रूपं संस्काराख्यं न शुध्यति तदपीशाङ्घ्रिसेवया कीर्तनादिना शुध्यतीत्यर्थः । अयम्भावः । महान्त्यपि पापानि सकृदुच्चारेणैव नाम्ना नश्यन्ति सकृत्प्रवर्तितेन दीपेनेव गाढध्वान्तानि तदावृत्त्या तु पापान्तरस्यानुत्पत्तिः दीपधारया इव तमोऽन्तरस्य ततश्च वासनाक्षयात् हृदयशुद्धिः एतदर्थमेव तत्र तत्रावृत्तिविधानम् "पापक्षयश्च भवति स्मरतां तमहर्निशम्" इत्यादिषु तदेवात्राप्युक्तम् "गुणानुवादः खलु सत्त्वभावनः तदपीशाङ्घ्रिसेवया" इति च अतोऽत्र हरिनाम्नैव सर्वपापक्षयो वासनाक्षयस्तु महापुरुषदर्शनादिभिरिति ॥ १७ ॥

तथापि पापप्रायश्चित्तमिदमिति ज्ञात्वा नोच्चारितमिति चेत्तत्राहुः । अज्ञानादिति । बालकेनाज्ञानादपि प्रक्षिप्तोऽग्निर्यथा काष्ठराशिं दहति तद्वत् ॥ १८ ॥

नन्विदमपि पर्यवनुपदिष्टं श्रद्धाहीनं च कथं प्रायश्चित्तं स्यात्तत्राहुः । यथेति । अगदमौषधं वीर्यवत्तममिति वक्तव्ये वीर्यतममित्युक्तं यदृच्छया श्रद्धादिहीनमुपयुक्तं भक्षितं परन्मुखादजानतोऽपि स्वगुणमारोग्यं कुर्यान्मन्त्रोऽपि नामात्मकस्तथा स्वकार्यं कुर्यादेव न हि वस्तुशक्तिः श्रद्धादिकमपेक्षते इत्यर्थः । तदुक्तं विष्णुधर्मेषु ।

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥

इति ॥ १९ ॥

तं विप्रममूमुचन्मोचयामासुः ॥ २० ॥

प्रत्युदिता निराकृताः सन्तो यात्वा गत्वा यमराजाय यथावत्कथयामासुः ॥ २१ ॥

दर्शनेनोत्सवो यस्य ॥ २२ ॥

विवक्षुं वक्तुमिच्छन्तं ज्ञात्वा ॥ २३ ॥

त्रैविद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं यमदूतानां धर्मं कृष्णदूतानां च भागवतं भगवत्प्रधानं शुद्धं निर्गुणं धर्ममाकर्ण्येति योज्यं भक्तिमानासीदित्युत्तरश्लोकेनानुषङ्गः ॥ २४ ॥ २५ ॥

अनुतापं प्रपञ्चयति । अहो इति चतुर्भिः । येनात्मना मया

(१) अयं सटीकः श्रीवीरराघवश्रीविजयध्वजतीर्थयोः पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका

वृषल्यां पुत्रतया जायमानेन ब्रह्म ब्राह्मणजातिर्विप्लावितं नाशितम् ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथापि तैस्तैः तपआदिभिः प्रायश्चित्तैरघानि प्रतिनियतानि-वर्त्यानि पूयन्ते निवर्त्यन्ते न त्वधर्मजमधर्मं जनयतीत्यधर्मजं हृदय मनश्चित्तशुद्धिर्नै जायत इत्यर्थः तर्ह्यधर्मस्य निमित्तं हृदयं केन शुद्ध्यतीत्यत्राहुः। तदपीति। तत्पुरुषमर्पाश्रयाङ्घ्रिसेवया नामस्मरणादिरूपया भगवत्सेवया शुद्ध्यतीत्यर्थः ॥ १७ ॥

तत्तस्मादज्ञानादिदं भगवन्नामाशेषाघानवत्कर्मेति ज्ञानादथवा अज्ञानात्सङ्केतपरिहासादिनिमित्ताद्वा सङ्कीर्तितमुत्तमश्लोकस्य भगवतो नाम पुंसः पापिनोऽघं दहत्येव निवर्तयत्येव यथानलोऽग्निः ज्ञानादज्ञानाद्वा स्पृष्टो दहति तद्वदित्यर्थः ॥ १८ ॥

यथा च वीर्यवत्तममगदमौषधं यदृच्छया ज्ञानादज्ञानाद्वा उपयुक्तं भक्षितं सदारोग्यं जनयतीति शेषः तथा भगवन्नामास्मर्ता मन्त्रोऽपि आत्मनः स्वस्य गुणं नाम्नः सामर्थ्यमजानतापि पुरुषेणोदाहृतः उच्चारितः समग्रं दहत्येवेति पूर्वेणान्वयः वस्तूनां विलक्षणस्वभावत्वादिति भावः ॥ १९ ॥

यद्यस्मदुक्तार्थे युष्माकं सन्देहस्तर्हि स्वपतिं यमं पृच्छतेत्याहुः । पतिमिति हे भटाः! हे दूताः! यद्यस्मिन्नस्मदुक्ते धर्मे यदि संशयस्तर्हि वो युष्माकं पतिं यमं पृच्छत स तु धर्मं सूक्ष्मं जानातीत्याहुः । स इति । स भगवान् ।

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

इत्युक्तविधः यमः धर्मस्य भगवद्धर्मस्य गुह्यं रहस्यमत एव परमं श्रेष्ठं वेद जानातीत्यर्थः ॥ ० ॥

एवमुक्त्वा यमदूताः क्षिप्रं मुमुचुरित्याह मुनिः । त इति । हे नृप! ते यमभटा एवमुक्तविधं भागवतं भगवन्नामोच्चारणरूपं धर्मं विनिर्णीय निःशेषदुरितक्षपणसमर्थं विनिश्चित्य तं विप्रं याम्यपाशान्निर्मुच्य विमुक्तं कृत्वा मृत्योरमूमुचन् मोचितवन्तः मृत्योरमूमुचन्नित्यस्यायमभिप्रायः आयुः क्षयकरात्पापाधिक्यात्तस्य मृत्युः प्रसक्तः तत्समये च तमानेतुं याम्याः पुरुषा आजग्मुः तस्मिन्नाधिके पापे अन्तिमनामोच्चारणेनाकस्मादापतितेन समूलं विनष्टे सति मृत्योरपि निवृत्तिरित्यत एवं "स एव वर्तमानोऽज्ञो मृत्युकाल उपस्थिते मतिं चकार तनये" इति पूर्वग्रन्थस्य "द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः" इत्युत्तरग्रन्थेन सह न विरोधः अन्यथा प्रसक्तमृत्योर्निवारणासम्भवात्पुनर्जीवनकथनं भक्तियोगोपसंहारकथनं च विरुध्येतेति ॥ २० ॥

ततो यमदूता द्विजो विष्णुदूताश्च किमकार्षुरित्यत्राह । इतीत्थं प्रत्युदिताः प्रत्याख्याताः याम्या दूताः यमसमीपं यान्ति गत्वा यमराज्ञे यमराजाय समासविधेरनित्यत्वात्त टच् आपं-त्वाद्वा हे अरिन्दम ! यथासर्वमुक्तं सर्वमनतिक्रम्य यथावच्चक्षुः कथितवन्तः इति ॥ २१ ॥

द्विजो यमपाशाद्विनिर्मुक्तः गतभीर्निर्भयः प्रकृतिं पूर्वावस्थां गतः पुनर्जीवितवांश्चेत्यर्थः विष्णोः किङ्कराणां दर्शनोत्सवं

हर्षो यस्य तादृक् शिरसा वचन्दे नमस्कृतवान् हे अनघ ! ॥ २२ ॥

तं द्विजं विवक्षुं किञ्चिद्वक्तुमिच्छुमभिप्रेत्यालक्ष्य महापुरुषस्य भगवतः किङ्कराः सहसा आशु तस्य द्विजस्य पश्यतः सतः अन्तर्दधिरेऽन्तर्हितवन्तः अस्य भगवत्प्राप्त्यपेक्षाजननार्थमन्तर्धानम्।

सर्वज्ञोऽपि हि सर्वेशः सदा कारुणिकोऽपि सन् ।
संसारतन्त्रवाहित्वाद्रक्षापेक्षामपेक्षते ।

इतिह्युक्तम् ॥ २३ ॥

अथ तदन्तर्धानानन्तरमजामिलः यमकृष्णयोर्दूतानां शुद्धं भागवतं धर्ममाकर्ण्य भगवन्माहात्म्यश्रवणाद्भगवद्भक्तिमानासीदित्युत्तरेणान्वयः । तत्र यमदूतानां त्रैविध्यं गुणाश्रयं धर्ममाकर्ण्य कृष्णदूतानां शुद्धं भागवतं धर्ममाकर्णयेत्यन्वयः त्रिविधो वेदः ऋग्यजुःसामात्मकत्वात्तद्विहितं त्रैविध्यं पूर्वभागविहितं कर्म गुणाश्रयं गुणत्रयवश्यजनाधिकारं शुद्धं सत्त्वगुणप्रधानजनाधिकारं भागवतं भगवतः सकाशात्तं भगवत्पार्श्वेति पाठे आसीदिति क्रियापदाध्याहारः आकर्ण्येत्यस्याकर्णितं सतस्यगत्यर्थेत्यर्थः अन्यथा निरोधानात्पूर्वमेवाकर्णितत्वादथेत्यनेन सह विरोधापत्तेः अथेत्यस्य तन्निवृत्ति वार्थः ॥ २४ ॥

आत्मनः स्वस्याशुभं पापं स्मरतस्तस्य महाननुतापः परितापआसीत् ॥ २५ ॥

तस्यानुतापप्रकारमेवाह । अहो इति । अविजित आत्मा मनो येन तस्य मे मम महत्कष्टमहो अभूत्कि तद्वृषल्यां शूद्रायां जायमानेन येनात्मना मया ब्रह्म ब्रह्मत्वं विप्लावितं विनाशितम् इति यत् "तज्जाया जाया भवति यदस्यां जायते पुनः" इति श्रुत्यर्थमभिप्रेत्य जायमानेनेत्युक्तम् ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हृदयं लिङ्गं मनः ॥ १७ ॥

अजामिलस्यापि सकृन्नामसङ्कीर्तनेन वृषलीसङ्गादिमहापापहारेण देहवियोगलक्षणमन्त्यां मुक्तिः न तु संसारान्तरं तन्नामोच्चारणादिमेवाहरहः कर्तव्यमिति विधीयते । धर्म इति । धर्मो नामसङ्कीर्तनलक्षणः आत्मनः शुद्धिः अचिन्मनोनाशेन चिन्मनसः कैवल्यलक्षणा शुद्धिर्भवति वासनो निर्मार्जनेनेति शेषः ॥ ० ॥

नन्वीश्वरसेवया यथा मनःशुद्धिस्तथा निरन्तरप्रायश्चित्तक्रिययापि सा किं न स्यादिति तत्राह । नैकान्तशुद्धिरिति । अकर्तुः स्वकर्तृतारहितस्यात्मनः जीवस्य प्रायश्चित्तकर्मकर्तुः प्रायश्चित्तक्रियया एकान्तशुद्धिर्मनःशुद्धिपूर्विका शुद्धिर्न स्यात् अकर्तृता स्वतन्त्रकर्तृत्वं नास्तीति यतः तस्मादनीहया निष्कामकर्मोकरणेन निरन्तरहरिनामसङ्कीर्तनलक्षणक्रियया हरिं भजेतेत्यन्वयः ॥ ० ॥

नामसङ्कीर्तनस्य सर्वाघनाशसामर्थ्यादरूपेणोपसंहरति । अज्ञानादिति । अज्ञानादिलक्षणेन सर्वात्मना ज्ञानाभावोऽपि न विवक्ष्यते किन्तु सर्वाघक्षयकारकाः गुणाः तेषामाश्रयो नारायणः इत्यार्थविषयकत्वेन भावः अन्यथा हरेः सर्वशब्दवाच्यत्वेन घटपटादीनां नामग्रहणेऽपि नाम्निहाय नारायणादिनामसङ्कीर्तनानुपपत्तेः अत उपचारात्रमिदमिति ज्ञातव्यम् ॥ १८ ॥

सर्वशब्दानां भगवन्नामत्वेऽपि (१) तदावृत्त्यापि फलानुदयात्

(१) [illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नारायणादिनाम्ना तदुदयोपलम्भादुभयेषां विशेषः कस्मादित्याशङ्क्य मन्त्रोऽगदवदित्याहुरित्याह । यथेति । अजानत इत्यत्रापि उपदेशादिना मागान्यज्ञानमस्त्येव सूपयुक्तमित्यस्योपदेशापेक्षितत्वाद्यर्थतरस्तत्वमूलशब्दमात्रेभ्यः मन्त्रौषधयोः वैशिष्ट्यफलत्वं चेश्वरत्वमेवतनामभिधानात्तथात्रापीति भावः ॥ १९ ॥

भगवद्भिरस्मदुक्तार्थो विस्रम्भणीयः युष्मत्पृष्टस्याप्युक्तार्थस्यैकत्वोपपत्तेरित्याशयेनाहुरित्याह । पति च इति ॥ ० ॥

मृत्योर्देहवियोगलक्षणात् ॥ २० ॥

विष्णुदूतैः सद्गुणीकृताः याम्याः पुनः किमकुर्वन्निति तत्राह । इतीति ॥ २१ ॥

अजामिलेन मुक्तमृत्युना पुनः किमकारीति तत्राह । द्विज इति । प्रकृतिं गतः सात्त्विकावस्थां प्राप्तः ॥ २२ ॥

मर्त्यदेहस्थेन तेन द्विजेन संलापायोगाद्विष्णुदूतैः किं कृतमत्राह । ते विवक्षुमिति ॥ २३ ॥

प्रकृतिं गत इत्युक्तं विवृणोति । अथेति । त्रैविद्यं त्रिवेदविहितं धर्ममतदेव स्पष्टयति । गुणाश्रयमिति ॥ २४ ॥

स्वर्गादिविषयं श्रुत्वा पथिकवदुदासीनोऽभूत्किमत्राह । भक्तिमानिति । अभूदिति शेषः कृतदोषप्रायश्चित्ताभावे हरौ भक्तिः सुदृढा न स्यादित्यतस्तत्प्रायश्चित्तक्रियाप्रकारमाह । अनुताप इति ॥ २५ ॥

अहो ब्राह्मणं विप्लावितं विनाशितं जायता रेतोरूपेण जायमानेन ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथागदमिति । मन्त्रशब्देनात्र नामोक्तिः मन्त्रस्य तथा प्रभावे श्रद्धाद्यपेक्षत्वादस्य तु तदनपेक्षत्वादत्रैव मन्त्रशब्दस्य मुख्या प्रवृत्तिरित्यभिप्रायेण ज्ञेया । पूर्वपद्यस्य दृष्टान्तान्तर एव वा सर्वं पद्यम् ॥ १९ ॥

सुनिर्णीयेति । यद्यपि यमदूतास्तदानीं तत्र सम्यग्बुद्धच रस्तथाप्यामध्ये सुष्ठु निर्णीयानुवादं कृ. इत्यर्थः । अत्र साङ्केत्यमित्यादौ सकृन्नामाभासेनापि यन्निःशेषाघहरणनोक्त्या वासनापर्यन्तक्षय उ. ते । गुणानुवाद इत्यादौ तु भक्त्यावृत्त्यैवेति यत्तत्तु यथा कृतं नामापराधशून्यतद्युक्तभजनापेक्षया ज्ञेयम् ।

नामापराधयुक्तानां नामान्येव हरन्त्यघम् ।
अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि यत् ॥

इति पाद्मात् तदेवं नाम्नः सर्वत्र स्वातन्त्र्येऽपि कर्मादिः पूर्ववर्थं तदङ्गत्वेन कृतमप्यपराध एव हुतादिसर्वशुभक्रियासाम्यमपि पाद्मदशापराधां गणितं तस्मात् तदविशाकृधिसंवन्धेत्यतदपि नादृशापराधशान्त्यर्थमेव ज्ञेयम् । नन्वेवं चेन्म्रियमाणोऽयं नामाग्रहीत्तर्हि कथं सद्य एव पार्षदैर्वैकुण्ठं न नीतः श्रूयते हि

'यस्यावतारगुणकर्मविडम्बनानि
नामानि येऽसुविगमे विवशा गृणन्ति ।

तेऽनेकजन्मशमलं सहसैव हित्वा
संयान्त्यपावृतमृतं तमजं प्रपद्ये ।

इति । अत्रोच्यते श्रीभगवन्नामग्रहणं खलु द्विधा भवति केवलत्वेन स्नेहसंयुक्तत्वेन च । तत्र पूर्वेणापि प्रापयत्येव सद्यस्तल्लोकं तन्नाम । परेण च तत्सामीप्यमपि प्रापयति । "मयि भक्ति र्हि भूतानाममृतत्वाय कल्पते । दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापन" इति तद्वाक्यात् । किन्तु "नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तिवृत्तये" इति तद्वाक्यदिशा विलम्बेन प्रापयति । स्नेहस्त्वमीषामनुवृत्तिर्मदनुसेवैव वृत्तिर्जीवनहेतुस्तदर्थमित्यभिप्रायो दर्शितः । तदेवं सत्यजामिलोऽप्ययमारोपितनाम्नः पुत्रस्य संबन्धेन तन्नाम्नापि स्निह्यति स्म तस्मिंश्च स्वनाम्नि श्रीभगवतोऽप्यभिमानसान्द्रो दृश्यते । यतस्तद्विषया मतिरित्यत्र । यतः पार्षदानामपि महानेव तत्रादरो दृष्टः तस्मात् स्नेहसंवलनया गृहीतस्वनाम्नि तस्मिन्नुत्कण्ठापूर्वकमात्मनिजकीर्त्तनादिद्वारा साक्षान्निजस्नेहं प्रकटं दत्त्वानेतुमिच्छति प्रभुरिति ज्ञात्वा सहसानात्मभिः सह तं नीतवन्त इति सर्वं समञ्जसम् ॥ २०--२२ ॥

तं विवक्षुमिति । तेन सहसम्भाषणमुत्कण्ठां वर्द्धयित्वा सम्यग्भक्तत्वापादनार्थं तदर्थमेव हि त्यागो बुध्यते ॥ २३ ॥ २४ ॥ २५ ॥

उत्कण्ठापूर्वकमात्मानं तद्भजनमेव दर्शयति । अहो इत्यादिना धाम्नि मनो भगवति शुद्धं तत्कीर्त्तनादिभिरित्यन्तेन ॥ २६--२८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्च तैस्तथाविधैरपि पूयन्ते नश्यन्ति पुत्र विनाशे अधर्मोज्जातं अघानां हृदयं मूलं सूक्ष्मं रूपं तु न पूयते न नश्यति तदपि ईशाङ्घ्रिसेवया हरिचरणयोर्भक्त्या नवानां भक्तीनां मध्ये एकया प्राकरणिक्या कीर्त्तनरूपयापि वासनापर्यन्तपापक्षयात्तदपि शुद्ध्यति ॥ १७ ॥

तथापि प्रायश्चित्तमिदमिति ज्ञात्वा नोच्चारितमिति चेत्तत्राहुः । अज्ञानादिति । बालकेनाज्ञानादपि प्रक्षिप्तोऽग्निर्यथा काष्ठराशिं दहति तद्वत् ॥ १८ ॥

न केवलमघदहनमेव करोति नाम किन्तु भगवत्प्रेमसाक्षिध्यादिकञ्चेत्यत्र दृष्टान्तान्तरमाहुः । यथा अगदमौषधं वीर्यवत्तममिति वक्तव्ये वीर्यतममित्युक्तम् मतुप्लोपाद्वीर्यशब्दो वा आयुर्जन्तो वा यदृच्छया अकस्मादज्ञानेनापि इत्यर्थः उपयुक्तं भक्षितं सद्गात्मगुणमेव स्वं बलपुष्ट्यादिकञ्च करोति मन्त्रोऽपि । जाग्रदुपस्थापितं नामेत्यर्थः । यद्वा । नामात्मकोऽयं मन्त्रस्तथा स्वकार्यं कुर्यादेव न हि वस्तुशक्तिर्ज्ञानादिकमपेक्षत इत्यर्थः ॥ १९ ॥ २० ॥

प्रतिहताः प्रत्याख्याता यमराजं यमराजाय ॥ २१ ॥ २२ ॥

अन्तर्दधिरे इति । तस्यायुःशेषसत्त्वेऽपि पापेन यथाशास्त्रमायुः क्षयं ज्ञात्वा यमदूतैराकर्षणोपक्रमः कृत इति स एव मरणो मरणाकालत्वेनोपचरितः वस्तुतः पापक्षयादायुर्भङ्गाभावादिति ज्ञेयम् ॥ २३ ॥

यमदूतानां कृष्णदूतानाञ्च धर्ममाकर्ण्य कृष्णदूतानां धर्मं शुद्धं गुणातीतं भागवतं भगवत्प्रणीतं यमदूतानान्तु त्रैवेद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयमशुद्धम् ॥ २४ ॥ २५ ॥

धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम् ।
हित्वा बालां सतीं योऽहं सुरापामसतीमगाम् ॥ २७ ॥
वृद्धावनाथौ पितरौ नान्यबन्धू तपस्विनौ ।
अहो मयाधुना त्यक्तावकृतज्ञेन नीचवत् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मना मया वृषल्यां जायता पुत्रतया जायमानेन ब्रह्म ब्राह्मणत्वं विप्लावितं नाशितम ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तैस्तपआदिभिः तान्येवाघानि पूयन्ते अधर्मजमधर्माज्जातं मलिनं तेषामघानां हृदयं सूक्ष्मरूपं तु न पूयते न शुद्ध्यति तदपीशाङ्घ्रिसेवया हरिकीर्तनादिना शुद्ध्यतीत्यर्थः ॥ १७ ॥

ज्ञानिना अज्ञानिना वा कृतं हरिनामकीर्तनादिरूपं हरिसेवनं स्वभावत एव सफलम्भवतीति सदृष्टान्तमाहुः। अज्ञानादिति द्वाभ्याम। अजानता वा केनचित्प्रक्षिप्तोऽनलः एधां दहेदेव तद्वत् ॥ १८ ॥

यथा वीर्यतमम् अमृतरसायनादि अगदमौषधं यदृच्छयोपयुक्तं सेवितमजानतोऽप्यात्मगुणं कुर्यात्तथा मन्त्रोऽपि हरये नम इत्यादिः आत्मगुणं सर्वपापनिर्णाशपूर्वकं परानन्दप्राप्तिलक्षणं मोक्षं कुर्यादेवेत्यर्थः ॥ १९ ॥

भागवतं धर्मं भगवन्नामोच्चारणादिरूपं धर्मं सुष्ठु विनिर्णीय तं याम्यपाशान्निर्मुच्य मृत्योः अमूमुचन् मुक्तो भविष्यतीति सङ्कल्पमात्रेण जन्ममरणादिप्रवाहलक्षणात् संसारान्मोचयामासुरित्यर्थः ॥ २० ॥

प्रत्युदिताः प्रत्याख्याताः यमयति नरान् इति यमस्तस्य सम्बोधने हे यम ! हे नृप ! राज्ञे धर्माय आर्षत्वाट्टजभावे तु यमराज्ञे इत्येकं पदं यमान्तिके यात्वा यथावत् कथयामासुः ॥ २१ ॥

प्रकृतिं गतः स्वस्थः दर्शनेन तेषां दर्शनेनोत्सवो यस्य सः ॥ २२ ॥

विवक्षुं वक्तुमिच्छन्तमभिप्रेत्य तस्य पश्यतः अन्तर्दधिरे ॥ २३ ॥

यमदूतानां त्रैविध्यं विहितनिषिद्धमिश्रभेदात्त्रिविधं स्वार्थं यस्य स्वर्गादिफलकं गुणाश्रयं सत्त्वादिगुणा आश्रयाः निमित्तं यस्य तं गुणमयदेहाभिमानिजीवकर्तृकमित्यर्थः। कृष्णदूतानां शुद्धं शुद्धाधिकारिविषयं भागवतं भगवत्प्राप्तिफलकं च धर्ममाकर्ण्य भगवति भक्तिमानाभीत् आत्मनः अशुभं स्मरतस्तस्यानुतापश्चासीत् ॥ २४—२५ ॥

अनुतापं तमेवाष्टभिः प्रपञ्चयति। अहो इति चतुर्भिः। वृषल्याम आत्मना पुत्ररूपेण जायता मया ब्रह्म ब्रह्मत्वं विप्लावितं लोपितम ॥ २६ ॥

भाषा टीका ।

उन तप दान जपादिकों के सेवन से पाप सब नष्ट हो जाते हैं परन्तु उन पापों का सूक्ष्म [illegible] भी परमेश्वर के [illegible] से नष्ट हो जाता है ॥ १७ ॥

जो यह परम सनातन धर्म कहा है इस से प्रति दिन आत्मा की शुद्धि होती है जैसे धोने से वस्त्र की शुद्धि होती है ॥ ० ॥

आत्मा जो स्वयं अकर्ता है उसकी अत्यंत शुद्धि केवल क्रिया मात्र से नहीं होती है इससे निष्काम होकर हरि का भजन करे ॥ ० ॥

अज्ञान से अथवा ज्ञानसे कीर्तनकिया जो भगवान् का नाम सोई पुरुष मात्र के पाप को नाश कर देता है जैसे कि अग्नि लकड़ी को जल्दी जलाय देता है ॥ १८ ॥

जैसे कि उत्तम गुण कारक औषध किसी प्रकार भी सेवित हो जाने से नहीं जानने वाले पुरुष को भी अपना गुण दिखा देताहै जैसे गरुडादिकों का मंत्र सर्प विष को नाश करदेता है तैसेही नाम भी उच्चारण मात्र से अपने फल को कर देता है ॥ १९ ॥

हे दूतो हो यदि इस धर्म मे संदेह हो तो तुमारे पति यमराज जी से पूंछो वे धर्मराज भगवान् धर्म के रहस्य को जानते हैं ॥ ० ॥

श्रीशुकदेवजी बोले हे नृप ! उन विष्णु पार्षदोंने इस प्रकार से भागवत धर्म का निर्णय करके उस ब्राह्मण को यमपास से छुड़ा कर मरने से भी बचा दिया ॥ २० ॥

हे राजन् इस प्रकार से विष्णु दूतों के निषेध करने से यमके दूत यमराज के समीप मे गये जाकर यमराज से जैसा हाल सब कहते भये ॥ २१ ॥

ब्राह्मण अजामिल तो पाशमें से छूट गया भय के निवृत्त होने से अपने होस में आगया विष्णुपार्षदों के दर्शन से उस को आनंद भया फिर उनको उसने नमस्कार किया ॥ २२ ॥

हे अनघ ! विष्णुपार्षदों ने जब जाना कि यह कुछ कहना चाहता है तब उसके देखते ही वहाँ पर अदृश्य होगये २३

अजामिलने भी श्रीकृष्ण के दूत तथा विष्णुके दूत इनके संवाद में यमदूतों से वैदिकत्रिगुणधर्म को सुना विष्णुदूतोंसे शुद्ध भागवत धर्म को सुना ॥ २४ ॥

फिर श्री हरि के माहात्म्य श्रवण करने से श्रीभगवान् मे उसकी भक्ति होगई और अपने अशुभों को स्मरण करने से उसको बड़ा भारी पश्चात्ताप हुआ ॥ २५ ॥

अहो मैंने अपने मन को नहीं जाना अब बड़ा कष्ट और हानी करी जो कि मैंने शूद्री में अपने को पुत्र रूप से उत्पन्न करके ब्रह्म तेज को नष्ट कर दिया ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुष्कृतं दोषकर्तारं कुलस्य कज्जलं कलङ्कम ॥ २७ ॥

[illegible]

सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे ।
धर्मघ्नाः (१) कामिनो यत्र विन्दन्ति यमयातनाः ॥ २९ ॥
किमिदं स्वप्न आहोस्वित् साक्षाद्दृष्टमिहाद्भुतम् ।
क्व याता अद्य ते ये मां व्यकर्षन् पाशपाणयः ॥ ३० ॥
अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः ।
व्यमोचयन्नीयमानं बद्ध्वा पाशैरधो भुवः ॥ ३१ ॥
अथापि मे दुर्भगस्य विबुधोत्तमदर्शने ।
भवितव्यं मङ्गलेन येनात्मा मे प्रसीदति ॥ ३२ ॥
अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः ।
वैकुण्ठनाम ग्रहणं जिह्वा वक्तुमिहार्हति ॥ ३३ ॥
क्व चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः ।
क्व च नारायणेत्येतद्भगवन्नाम मङ्गलम् ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदानीं तस्य विमर्शपूर्वकं मोक्षक्रममाह । किमिदमित्यष्टभिः । साक्षात्प्रत्यक्षमिह जाग्रतैव दृष्टम् ॥ ३० ॥

ये मां व्यमोचयंस्ते च क्व गताः ॥ ३१ ॥

यद्यप्यहमस्मिन् जन्मनि दुर्भगः पापीयानथापि जन्मान्तरे नूनं पुण्यवानित्याह । विबुधोत्तमदर्शने इति निमित्तसप्तमी तेषां दर्शनार्थं पूर्वेण मङ्गलेन महता पुण्येन भवितव्यं येन दर्शनेन ॥ ३२ ॥

अन्यथा पूर्वपुण्यं विना कथम्भूतं वैकुण्ठनाम गृह्यते वशीक्रियते चित्तमनेनेति ग्रहणम् ॥ ३३ ॥

ब्रह्मघ्नो विप्रत्वनाशकः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सद्भिरार्यैर्विशेषेण गर्हितं मां धिक् "उभसर्वतसोः कार्या धिगुपर्यादिषु" इति सम्बन्धसामान्ये षष्ठ्यपवादिका द्वितीया धिगिति निन्दाद्योतकमव्ययं मां मम धिक् निन्दा निन्द्योऽहमित्यर्थः कथम्भूतं मां दुष्कृतं दुष्टं कृतवान् दुष्कृतं कुलकज्जलं कुलकलङ्कं किञ्च सतीं विशुद्धां बालां योषां स्त्रियं हित्वा सुरापां सुरां पिबतीति तामत एवासतीमगामगच्छम् ॥ २७ ॥

वृद्धौ प्रवयसावनाथौ रक्षकरहितौ न विद्यतेऽन्यो बन्धुः पुत्रादिर्ययोस्तौ तपस्विनौ तपन्तौ पितरौ मातापितरावकृतज्ञेन कृतघ्नेन मयाधुना तस्मिन्नेव नीचेनेवाहो त्यक्तौ ॥ २८ ॥

स एवम्भूतोऽहं नूनं नितरां दारुणे नरके पतिष्यामि यत्र नरके धर्मघ्नाः धर्मनाशकाः सन्ति कामिनो मादृशाश्च यमयातना विन्दन्ति [illegible] ॥ २९ ॥

एवं तस्य परिता[illegible] इदानीं विमर्शपूर्वकं मुक्तिसाधनधर्मानुष्ठानक्रममाह । कि[illegible]त्यादिना ब्रह्मण्यनुभवात्मनीत्यन्तेन । किमिदं यमकृष्याद्भुतागमन[illegible]भाषणादिदर्शनं स्वप्नः आहोस्वित् साक्षाज्जाग्रता मया महाद्भुतं दृष्टमद्याधुना दूताः क्व याताः ये पाशपाणयः सन्तो मामाकृष्टवन्तः ॥ ३० ॥

अथ ते चत्वारः प्रियदर्शनाः सुन्दराः सिद्धाः क्व गताः येपाशैः बद्ध्वाधो भुवः नरकान्प्रति नीयमानं मां मोचितवन्तः ॥ ३१ ॥

यद्यप्यहं मन्दभाग्यस्तथापि मे दुर्भगस्यापि विबुधोत्तमानां दर्शने निमित्तसप्तमी दर्शनेन निमित्तेनेत्यर्थः मङ्गलेन भवितव्यं किं तद्येन मङ्गलेन शुभकर्मणा ममात्मा मनः परमात्मा वा प्रसीदति ॥ ३२ ॥

अन्यथा यदि मङ्गलेन न भवितव्यं पुण्येन चेदित्यर्थः वृषलीपतेरत एवाशुचेर्म्रियमाणस्य मर्तुमुद्य[illegible] जिह्वा वैकुण्ठस्य नाम ग्रहणं गृह्यते वशीक्रियते [illegible] नामरूपं ग्रहणं वक्तुं नार्हति ॥ ३३ ॥

कितवो मूर्खो ब्रह्मघ्नः विप्रत्वनाशकः [illegible] पाठे त्यक्तवेदः निर्लज्जोऽहं क्व मङ्गलावहं ना[illegible] क्व ईदृशस्य ममान्तकाले तन्नामोच्चारणं पुण्येन [illegible]मवेदित्यर्थः ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्न[illegible]

[illegible]लकज्जलं ब्राह्मण्यकुलमषीभूतम् ॥ [illegible]

भुवो[illegible]: नरकम् ॥ ३१ ॥

यत्किञ्चित्पुण्यमस्ति चेद्विष्णुदूतसंदर्शनसाधनं तत्स्यादिति प्रार्थयते । अथापीति । येन पुण्येनात्मा मनः ॥ ३२ ॥

अन्यथा पूर्वार्जितपुण्याभावे ॥ ३३ ॥

ब्रह्मोज्झः त्यक्तब्राह्मण्यः ॥ ३४ ॥ ३५ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

सोऽहं व्यक्तं पतिष्यामीति । स्वदोषमात्रदृष्ट्यैव नाममाहात्म्यदृष्ट्या तु वक्ष्यते । अन्यथा म्रियमाणस्येति ॥ २९—३१ ॥

सोऽहं तथा यतिष्यामि यतचित्तेन्द्रियानिलः ।
यथा न भूय आत्मानमन्धे तमसि मज्जये ॥ ३५ ॥
विमुच्य तमिमं बन्धमविद्याकामकर्मजम् ।
सर्वभूतसुहृच्छान्तो मैत्रः करुण आत्मवान् ॥ ३६ ॥
मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया ।
विक्रीडितो ययैवाहं क्रीडामृग इवाधमः ॥ ३७ ॥
ममाहमिति देहादौ हित्वा मिथ्यार्थधीर्मतिम् ।
धास्ये मनो भगवति शुद्धं तत्कीर्त्तनादिभिः ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अधीपीत्यनेन प्राचीनास्य भक्तिरस्ति किन्तु केनाप्यपराधे-नावृत्ताभूदिति गम्यते ॥ ३२—३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दुष्कृतं पापरूपं दोषकर्त्तारं वा ॥ २७ ॥

अधुना अत्र जन्मनि ॥ २८—३० ॥

भुवोऽधः नरकं प्रति नीयमानम् ॥ ३१ ॥

विबुधोत्तमानां दर्शने विषये कारणान्तरेण केनापि मङ्गलेन तच्च कस्यचित्कस्य कारुण्यमेवानुमेयं तेन विना तत्र भक्तिबीजवप-ना[illegible] ॥ एव स्वपुत्रस्य नारायण इति नाम चकार ॥३२॥

[illegible] । वैकुण्ठनाम कीदृशं गृह्णाने प्राप्यते अनेनेति [illegible]: ॥ ३३—३६ ॥

[illegible] शुकदेवकृतसिद्धान्तप्रदीपः ।

[illegible] कुलकज्जलं वंशदूषकम् ॥ २७ ॥

[illegible] पुत्रादिर्ययोस्तौ तपस्विनौ मत्त्रिमित्तनापयुक्तौ म[illegible] विवेकाईजन्मनि नीचवद्विधेयकिवद्वि-[illegible] ॥

[illegible] ॥ २९ ॥

[illegible] दर्शनादिकं संस्मृत्याह । किमिदमिति । इद-म[illegible] किं स्वप्नः आहोस्वित्साक्षाज्जाग्रत् । ये मां व्यकर्षन्पाशहस्तास्ते क याताः ॥ ३० ॥

ये भुवोऽधो नरकं नीयमानं मां व्यमोचयन् विमोचितव-न्तस्ते च क गताः ॥ ३१ ॥

अस्मिन् जन्मनि दुर्भगस्य पापीयसोऽपि मे विबुधदर्शने जाते केनचिन्मङ्गलेन जन्मान्तरीयेण पुण्येन भवितव्यं येन दर्श-नेन मे आत्मा प्रसीदति ॥ [illegible] ॥

अन्यथा जन्मान्तरीय[illegible] वैकुण्ठनाम गृहीत [illegible] वैकुण्ठनामग्रहणं आश्चर्य[illegible] जिह्वा कथं वक्ष्यतीति ॥ ३३ ॥

ब्रह्मघ्नः विप्रत्वघातकः ॥ ३४ ॥

भाषा टीका ।

मै अपने कुलको काला लगाने वाला भया सत्पुरुष मेरी निंदा करते हैं मेरे को धिक्कार है जिस मैंनेकि छोटी अवस्था वाली स्त्री को छोड़के मद्य पान करने वाली दुष्ट स्त्री का संग किया ॥ २७ ॥

जिनके कोई बंधु नहीं थे ऐसे अनाथ पिता माता को मै अकृतज्ञ ने छोड़ दिया मेरे छोड़ने से इस बखत वे बड़े तपस्वी होकर भी दुःखी होगये मैं बड़ा नीच हूं ॥ २८ ॥

निश्चित है कि सो मै अति कठिन नरक में गिरूंगा जहाँ पर कि धर्म नाश करने वाले कामी पुरुष यम दंड को भोगते हैं ॥ २९ ॥

क्या आज यह स्वप्न मैंने देखा है अथवा साक्षात् मैंने यह क्या अद्भुत देखा जोतीन हाथ में पाश लेकर मो को खेंचते थे वे दूत कहां चले गये ॥ ३० ॥

और वे सुंदर दर्शन वाले चार सिद्ध कहां गये जिन्होंने कि पाशों से बँधकर पृथि के नीचे नरकमें लेजाते समय मेरे को छुटाया है ॥ ३१ ॥

तौ भी अब तो उन देवतों के दर्शन होने से मेरे को दुर्भागी होने पर भी मंगल ही होगा क्योंकी मेरा मन बड़ा प्रसन्न है ॥ ३२ ॥

यदि ऐसा न होता तो अति अपवित्र शूद्री का पति मेरे मरने समय मेरी जिव्हा कभी भी नारायण के नाम को कहने को योग्य न होती ॥ ३३ ॥

मै पापी ब्रह्मघाती निर्लज्ज कपटी कहां और सर्व मंगलरूप श्री भगवान् का नारायण ऐसा नाम कहां उसको मैंने उच्चारण किया तो भलाही होगा ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

[illegible]

श्रीशुक उवाच ॥

इति जातसुनिर्वेदः क्षणसङ्गेन साधुषु ।
गङ्गाद्वारमुपेयाय मुक्तसर्वानुबन्धनः ॥ ३९ ॥

स तस्मिन् देवसदन आसीनो योगमाश्रितः ।
प्रत्याहृतेन्द्रियग्रामो युयोज मन आत्मनि ॥ ४० ॥

ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना ।
युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि ॥ ४१ ॥

यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत् पुरुषान् पुरः ।
उपलभ्योपलब्धान् प्राग्ववन्दे शिरसा द्विजः ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मुक्तं सर्वमनुबन्धनं पुत्रादिस्नेहो येन सः ॥ ३९ ॥

प्रत्याहृत इन्द्रियग्रामो येन ॥ ४० ॥

गुणेभ्यो देहेन्द्रियादिभ्य आत्मानं वियुज्य विशोध्य आत्मसमाधिना चित्तैकाग्र्येण भगवतो धाम्नि स्वरूपे ॥ ४१ ॥

तस्मिन् भगवद्धाम्नि उपारता निश्चला धीर्यस्य स तस्मिन्काले ऽद्राक्षीदिति वा पुरः पुरतः ततश्च प्रागुपलब्धानेव तानुपलभ्य प्रत्यभिज्ञाय ववन्दे ॥ ४२ ॥ ४३ ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सोऽहं सिद्धदर्शनवैकुण्ठनामग्रहणादिसूचितधर्मयुक्तोऽहं यत्ताः नियमिताः चित्तादयो येन तथाभूतः सन् तथा यतिष्यामि यत्नं करिष्यामि कथं यथा भूयः पुनरात्मानमन्धे तमसि नरके न मज्जये मग्नं न कुर्याम् ॥ ३५ ॥

किं कृत्वा अविद्या देहात्माभिमानमूलमज्ञानं कामः शब्दादिविषयाभिलाषः कर्म एभिर्जातं तमिमं बन्धं गर्भजन्माद्यवस्थापत्तिरूपं संसारं विमुच्यापोह्य कथम्भूतः सर्वेषु भूतेषु सुहृत् शान्तः निगृहीतान्तरिन्द्रियः करुणः सर्वभूतेषु कृपावानात्मवान् प्रशस्तमनस्कः ॥ ३६ ॥

योषिद्रूपाजया भगवन्मायया प्रहतमात्मानं मोचये तां विशिनष्टि । ययैवाहमधमो ज्ञानशून्यः क्रीडामृग इव क्रीडितः ॥ ३७ ॥

देहे आदिशब्दात्तदनुबन्धिन्यहंममेति वा मिथ्यार्थधीर्मतिः तत्स्वरूपयाथार्थ्यधीर्देहाद्यर्थविषया धीस्तद्रूपा मतिस्ताम् । अनहमर्थदेहाद्यर्थविषयकाहंधियो विपरीतरूपत्वान्मिथ्यार्थधीरित्युक्तं मोहार्थधीरिति [illegible] तत्रापि मोहात्मिकामहन्त्वेन देहादिरूपार्थधीरूपामसदर्थां हित्वा त्यक्त्वा भगवति तत्कीर्तनादिभिः शुद्धं मनो धास्ये आधास्ये ॥ ३८ ॥

इतीत्थं जात उत्पन्नः सुष्ठु नितरां निर्वेदो यस्य तादृशः साधुषु क्षणमात्रसङ्गेन मुक्तं सर्वानुबन्धनं पुत्रादिस्नेहो येन सः गङ्गाद्वारं हरिक्षेत्रम् उपेयायोपगतवान् ॥ ३९ ॥

सोऽजामिलः तस्मिन् देवसदने देवो भगवान् सीदति सन्निहितो भवत्यस्मिन् गङ्गाद्वारे उपविष्टः योगं भगवद्भक्तियोगमाश्रितः आरभतेत्यर्थः प्रत्याहृतः विषयेभ्यः इन्द्रियग्रामः अन्तर्बाह्येन्द्रियसङ्घो येन तादृशः प्रथममात्मानं प्रत्यगात्मानं गुणेभ्यः गुणपरिणामेभ्यः विविच्य पृथक्त्वेनानुसन्धाय तस्मिन्नात्मनि प्रत्यगात्मनि मनो युयुजे ॥ ४० ॥

तत आत्मनः जीवान्तर्यामिणः परमात्मनः समाधिना ध्यानेन तस्मिन् ब्रह्मणि स्वरूपेण गुणैश्च निरतिशयबृहत्यनुभवात्मनि ज्ञानस्वरूपे भगवद्धाम्नि भगवच्छब्दवाच्ये तेजसि युयुजे स्थिरीकृतचित्तः सन् यर्हि यदोपरता शब्दादिभ्यो निवृत्ता धीर्यस्य तादृशस्तस्मिन् काले पुरोऽग्रे पुरुषान् पूर्वदृष्टान् भगवत्पार्षदानद्राक्षीत्ततः प्रागुपलब्धान् प्राप्तान् पुरुषानुपलभ्याभिज्ञाय द्विजः शिरसा ववन्दे ॥ ४१ ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्ममायया हरेरधीनया लोकमोहनशक्त्या कथा यथावत् ॥ ३७ ॥ ३८ ॥

गङ्गाद्वारं नाम तीर्थविशेषम् ॥ ३९ ॥

[illegible]त्याहृतो वशीकृत इन्द्रियग्रामो येन स तथा [illegible] ति । आत्मनि हरौ ॥ ४० ॥

[illegible]न्द्रियादिभ्यः आत्मानं स्वस्वरूपं भगवद्धाम्नि [illegible] अनुभवात्मनि ज्ञानात्मनि ॥ ४१ ॥

[illegible]धीः बाह्यविषयान्निवृत्य हरा[illegible] काले [illegible] अस्यामभूमौ प्रागुपलब्धान् दृष्टान् ॥ ४२ ॥

श्रीम[illegible]कृतक्रमसन्दर्भः ।

एवं साधुसङ्गमपर्यन्तं नाम्न. फलमुक्त्वा साधुसङ्गस्य च फलविशेषमाह । इतीति । जातः सुष्ठु भगवद्भक्त्युत्पादनपूर्वत्वेन निर्वेदो यस्य सः ॥ ३९ ॥

हित्वा कलेवरं तीर्थे गङ्गायां दर्शनादनु ।
सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्त्तिनाम् ॥ ४३ ॥
साकं विहायसा विप्रो महापुरुषकिङ्करैः ।
हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र सति धास्ये मन इत्यादिना यद्विचारितं तत्र कृतैस्तत्कीर्त्तनादिभिः शुद्धेन तल्लब्धस्फुरणविशेषेण च मनसा पुनरिदं विचारितम् । ईदृशस्यापि मनसो भगवत्पर्यन्ता गतिर्न स्यात् । "ब्रह्मणो हि प्रतिष्ठाहम्" इति न्यायेन परात् परा हि सविशेषावस्थितिः तस्मान्निर्विशेषतत्प्रकाशलक्षणब्रह्मानुभवार्थमेव प्रयतिष्ये । तदग्रिमवार्त्ता तु महाकृपालुना श्रीभगवतैव निर्वाहयिष्यते तदेतद्विचार्य तेन यत्कृतं तद्दर्शयति । स तस्मिन्निति द्वाभ्याम् ॥ ४० ॥

यर्ह्युपारतेत्यनेन ब्रह्मानुभवानन्तरमपि श्रीवैकुण्ठवैभवाविर्भाव इति समर्थ्यते ॥ ४१ ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यथैव क्रीडामृग इवाधमो लोको भवति तथैवाहमुत्तमो विप्रोऽप्यनया विक्रीडितः ॥ ३७ ॥

देहादौ मिथ्याबुद्ध्या [illegible] अर्था इति धीर्यस्य तथाभूतश्च सन् ममाहमिति [illegible] ॥ ३८ ॥

[illegible] स्त्रीपुत्राद्यासक्तिः ॥ ३९ ॥

यो[illegible] हरौ ॥ ४० ॥

गु[illegible]यः वियुज्य वियुक्तीकृत्य आत्मसमाधिना वि[illegible] भगवत्स्वरूपे ॥ ४१ ॥

तस्मिन् [illegible] उपारतधीः निश्चलबुद्धिः पुरोऽग्र एव पूर्वप[illegible] ॥ ४२–४५ ॥

श्री[illegible]शुकदेवकृतसिद्धान्तप्रदीपः ।

[illegible]मुपायं करिष्यामीत्याह । सोऽहमित्यादिना । [illegible] यथा न मज्जये ॥ ३५ ॥

[illegible]कामकर्मजम् अज्ञानहेतुकसकामकर्मजं बन्धं [illegible] विमुच्य ॥ ३६ ॥

आत्मनः परमेश्वरस्य मायया योषिन्मय्या आत्मानं [illegible] ॥ ३७ ॥

[illegible] अहं मनुष्योऽस्मि स्थूलोऽस्मि गृहादिकं ममैवेत्येवं [illegible] स्याः सा धीर्यस्य सः देहादौ देहे अहमिति [illegible] च मतिं मिथ्यार्थधियं हित्वा भगवदंशभूतः ज्ञानरूपः देहादिविलक्षणः भगवदीयमायामयदेहगेहादिभ्यो विरक्तः सन् भगवति तन्नामकीर्त्तनादिभिर्मनो धास्य इत्यन्वयः ॥ ३८ ॥

तस्य कृत्यमाह । इतीत्यादिना । इत्येवं साधुषु क्षणसङ्गेन जातः सुमु निर्वेदो देहगेहादौ वैराग्यं यस्य सः अतो मुक्तं सर्वमनुबन्धनं पुत्रादिस्नेहो येन गङ्गाद्वारमुपेयाय ॥ ३९ ॥

तस्मिन् गङ्गाद्वारे देवसदने भगवदालये प्रत्याहृतः इन्द्रियग्रामो येन सः आत्मनि क्षेत्रज्ञे मनो युयोज ॥ ४० ॥

गुणेभ्यः विषयेभ्यः ततः क्षेत्रज्ञाच्च आत्मानं मनो वियुज्य भगवद्धाम्नि भगवत्स्वरूपे ब्रह्मणि बृहति अनुभवात्मनि परज्ञानस्वरूपे युयुजे ॥ ४१ ॥

यर्हि यदा तस्मिन् भगवत्स्वरूपे उपारता धीर्यस्य सः तदा पुरः अग्रे पुरुषान् अद्राक्षीत् तदनन्तरं प्रागुपलब्धानुपलभ्य प्रत्यभिज्ञाय शिरसा ववन्दे ॥ ४२ ॥

भाषा टीका ।

सो अब मैं मन इन्द्रिय प्राण को रोककर ऐसा यत्न करूंगा कि जिससे यह मेरा आत्मा नरक में न गिरने पावै ॥ ३५ ॥

अज्ञान काम कर्म से होने वाले इस बंध को मैं छोड़ूंगा सर्व भूतों का सुहृत् शांत होकर मित्र करुणा वाला होकर आत्मज्ञानी होऊंगा ॥ ३६ ॥

स्त्री रूपी परमेश्वर की माया जो है जिसने मो अधम को क्रीडा मृगसा बनाकर मेरा आत्मा को ग्रस लिया है सो मैं अब छुटाऊं गा ॥ ३७ ॥

मैं इसका मालिक हूं यह मेरी वस्तु है इस प्रकार से देहादि को मैं झूटी यथार्थ बुद्धि को छोड़कर भगवान् के दर्शनादि को से शुद्ध करे मन को भगवान में लगाऊंगा ॥ ३८ ॥

क्षणमात्र भागवतों के संग होने से इस प्रकार सुंदर वैराग्यको प्राप्त होने से सब बंधनों से छूटकर हरिद्वारक्षेत्र को अजामिल चला गया ॥ ३९ ॥

शुकदेवजी बोले वह अजामिल उस देव स्थान में स्थित होकर योगका आश्रय करके मन इंद्रियों को एकाग्र करके मन को परमात्मा में लगाता भया ॥ ४० ॥

तदनन्तर आत्मसमाधि द्वारा सब गुणों में से मन को रोककर अनुभव स्वरूप परब्रह्म भगवत्स्वरूप में इसने संयुक्त किया ॥ ४१ ॥

उसी स्थान पर सब तरफ से उसकी चित्तवृत्ति जब हट गई तब जिन विष्णु पुरुषों को पहिले देखा था उनको ही इसने फिर देखा तब उनको प्राप्त होकर उसने मस्तक से प्रणाम किया ॥४२॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपसंहरति । एवमिति द्वाभ्याम् । विप्लाविताः सर्वे धर्मा येन हृतं व्रतं ब्रह्मचर्यनियमादि यस्य ॥ ४५ ॥

एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा ।
निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ॥ ४५ ॥
नातः परं कर्मनिबन्धकृन्तनं मुमुक्षतां तीर्थपदानुकीर्तनात् ।
न यत् पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोऽन्यथा ॥ ४६ ॥

य एवं परमं गुह्यमितिहासमघापहम् ।
शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्तयेत् ॥ ४७ ॥
न वै स नरकं याति नेक्षितो यमकिङ्करैः ।
यद्यप्यमङ्गलो मर्त्यो विष्णुलोके महीयते ॥ ४८ ॥
म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम् ।
अजामिलोऽप्यगाद्धाम किं पुनः श्रद्धया गृणन् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
षष्ठस्कन्धेऽजामिलोपाख्याने
द्वितीयोऽध्यायः ॥ २ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्मनिबन्धस्य पापमूलस्य कृन्तनं छेदकमतःपरं नास्ति कस्मात्परं तीर्थपदस्यानुकीर्तनात् तत्र हेतुः यद्यतोऽनुकीर्तनात् ततोऽनुकीर्तनादन्यथा प्रायश्चित्तान्तरे रजस्तमोभ्यां कलिलं मलिनमेव तिष्ठति यत्तन्मनः कर्मसु पुनर्न सज्जते ॥ ४६ ॥ ४७ ॥

न वीक्षितो भवति ॥ ४८ ॥

म्रियमाणोऽवशत्वेन श्रद्धाविहीनोऽपि ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

[illegible] दर्शनादनन्तरं गङ्गायास्तीर्थे कलेवरं त्यक्त्वा गङ्गायां [illegible] द्वारे तत्र गङ्गायां त्यक्त्वेत्यर्थः सद्यः भगवत्पा- [illegible] तत्समानं रूपं जगृहे गृहीतवान् ॥ ४३ ॥ [illegible] महापुरुषकिङ्करैः साकं हैमं विमानमारुह्य [illegible] आकाशमार्गेणाचिरादिने [illegible] यथौ गतः [illegible] श्रियः लक्ष्म्याः पतिरास्ते वैकुण्ठे इत्यर्थः भगवत्पार्श्ववर्तिन [illegible] मूर्धन्यक्रमेण वैकुण्ठगमनानन्तरं वेदितव्यं तत्र गतस्य तत्सायुज्यत्वादिति भावः ॥ ४४ ॥

उक्तमितिहासमुपसंहरन् भगवन्नामकीर्तनात्सद्विषयमत्यापादकमुपायान्तरमुत्कृष्टं नास्तीत्याह । एवमिति द्वाभ्याम् । एवमित्थं स द्विजः विप्लावितः विनाशितः सर्वः स्ववर्णाश्रमोचितः धर्मो येन दास्याः पतिरत एव पतितः स्वधर्माच्च्युतः गर्ह्यं निन्दितं कर्म यस्य हतं व्रतं अयं तु श्रुतसम्पन्नः शीलवृत्तगुणालय इत्यादिनोक्तं यस्य अत एव नरके निपात्यमानः यमभटैरिति शेषः तथाभूतोऽपि भगवन्नाम गृह्णन्नुच्चरन् सद्यः विमुक्तोऽभूदित्यर्थः ॥ ४५ ॥

मुमुक्षतां संसारबन्धनान्मोक्तुमिच्छतां तन्मूलकर्मरूपबन्धस्य निकृन्तनं कृत्यते छिद्यतेऽनेनेति कृन्तनमतस्तीर्थपदस्य भगवतोऽनुकीर्तनात्परमन्यन्नास्ति यद्यस्मादनुकीर्तनाद्रजस्तमोभ्यां कलिलं कश्मलं मनः कर्मसु संसृतिहेतुषु पुनर्न सज्जते न सक्तं भवत्यन्यथोपायान्तरेण न च न सज्जते इति न किन्तु संसृ[illegible]षु कर्मसु सज्जत एवेत्यर्थः ॥ ४६ ॥

[illegible] श्रवणादिफलमाह । य इति । परममतीव गुह्यं [illegible] अघापहमिममितिहासं यः पुमान् श्रद्धया युक्तः [illegible] भक्त्यानुकीर्तयेत्कथयेत् ॥ ४७ ॥

[illegible] न याति नैव प्राप्नोत्येव यमकिङ्करैरीक्षितोऽपि [illegible] पापवानपि मर्त्यः श्रवणादिकं कुर्वन्विष्णुलोके [illegible] महीयते पूज्यते भगवद्विषयकमत्युत्पत्तिद्वारा [illegible] तत्रस्थैरनुमन्यत इत्यर्थः ॥ ४८ ॥

एवं श्रवणकीर्तना [illegible] योगारम्भस्य कैमुत्यन्यायेन यमवश्यतापरिहारकत्वं वक्तुं कथितमितिहासमजामिलदृष्टान्तन्यायेन तद्वदनुपसंहरति । म्रियमाण इति । अजामिलो म्रियमाणः पुत्रोपचारेण अमुख्यया वृत्त्या प्रयुक्तमुपचरित [illegible] हरेर्नाम गृ-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

धाम हरेः स्थानमगात् प्राप्तः किमुत श्रद्धया हरेर्गुणान् गुणप्रतिपादकान्नारायणादिशब्दान् कीर्तयन्नित्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवत्पार्श्ववर्तिनां मुक्तानां स्वरूपं निर्दोषत्वादिलक्षणम् ॥ ४३ ॥ ४४ ॥

नामसङ्कीर्तने श्रद्धातिशयं जनयन्नुपसंहरति । एवमिति । दास्याःपतिरित्याक्रोशे षष्ठी अजामिलनाम मुक्त्वा दास्याः पतिरित्याह पति लोक इत्यर्थः ॥ ४५ ॥

अन्यथा तीर्थपदानुकीर्तनं विना ॥ ४६ ॥ ४७ ॥

अमङ्गलो यद्यपि तथापि ॥ ४८ ॥

दासीसङ्गादवाप्तपापमुक्तिकरो अन्ते नारायणास्मृतिरिति जानन्नजामिलोऽपि मुक्तकर्मतयोपलब्ध्या नित्याऽऽयासेन मरणासमयेऽपि नामस्मरणार्थं पुत्रोपचारितं कृत्वा श्रद्धया पुत्राह्वानव्याजेन कीर्तयन्मुक्तिमगात् नतु पुत्रस्नेहेन भगवति श्रद्धया "भक्तियोगो भवति तन्नामग्रहणादिभिः" इत्युत्तरत्र वक्ष्यमाणत्वात् पुत्रादिसाङ्केतिकं नाम उक्त्वा मुक्तकर्मत्वेन श्रीहरिनामकीर्तयन् किमुत श्रद्धयेत्युच्यते अस्य फलाधिक्यं च दर्शयितुं पृथग्वाक्यैरिति ज्ञातव्यम् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

[illegible] जीवन्मुक्तो बभूव ॥ ४३ ॥ ४४ ॥

[illegible] । य एवमिति द्वाभ्याम् । अमङ्गलो नाम[illegible] ४७-४८ ॥

[illegible] इति ॥ ४९ ॥

इति श्रीम[illegible]गवते महापुराणे ष[illegible]स्कन्धे
श्रीम[illegible]वगोस्वामिकृतक्रम[illegible]न्दर्भे
द्वितीयोऽध्या[illegible] ॥ २ ॥

श्रीमद्विश्व[illegible]ना ।

यत्तीर्थानुकीर्तनात् कर्म[illegible] अन्यथा प्रायश्चित्तान्तरैस्तु कलिलं मलिनमेव ॥ ४६-[illegible] ॥

प्रकरणमुपसंहृत्यापि पुनः सर्वथा प्रतीत्यर्थमेकेनैव वाक्येन [illegible]माह । म्रियमाण इति । म्रियमाणोऽपि किं पुनर्जीवन्नित्यर्थः पुत्रोपचारितमपि किं पुनः साक्षादेव अजामिलो महापातक्यपि किं पुनर्निष्पाप इत्यवधारणचतुष्टयम् ॥ ४९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्कन्धे द्वितीयोऽयं सङ्गतः सङ्गतः सताम् ॥ २ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य मुक्तिमाह । हित्वेति द्वाभ्याम् ॥ ४३ ॥ ४४ ॥

नामोच्चारणादिरूपया भगवद्भक्त्या पतितोऽपि मुक्तो भवतीति प्रकरणार्थमुपसहरति । एवमिति द्वाभ्याम् । विप्लावितानि सर्वे धर्मा यस्य सः हतानि व्रतानि यस्य सः अतएव गर्ह्यकर्मणा पतितः निरये पात्यमानो भगवन्नाम गृह्णन् सद्यो विमुक्तः ॥ ४५ ॥

मुमुक्षूनां मुक्तिमिच्छताम् अतः पूर्वत्र वर्णितप्रभावात् तीर्थपदस्य श्रीकृष्णस्यानुकीर्त्तनात् परमन्यत् कर्मरूपानिबन्धस्य कृन्तनं छेदकं नास्ति यत् यतः तीर्थपदानुकीर्त्तनात् मनः पुनः कर्मसु न सज्जते ततः तीर्थपदानुकीर्तनात् अन्यथा प्रायश्चित्तान्तरैः रजस्तमोभ्यां कलिलमेव तिष्ठति पुनः कर्मसु सज्जते इत्यर्थः ॥ ४६ ॥

अस्येतिहासस्य श्रवणादिफलमाह । य इति द्वाभ्याम् ॥ ४७ ॥

यमकिङ्करैरीक्षित एव न भवति नरकं न यातीति किम् वक्तव्यम् । किन्तु अमङ्गलो यद्यपि पूर्वं तथापि इतिहासश्रवणादिना सुमङ्गलो भूत्वा विष्णुलोके महीयते आद्रियते ॥ ४८ ॥

एतदेवाह । म्रियमाणः अस्वस्थमनस्कोऽपि श्रद्धाविहीनस्तत्रापि पुत्रोपचारितं हरेर्नाम गृह्णन् अजामिलोऽपि तद्धामागात् इतिहासश्रवणादिना जातया श्रद्धया गृणन् हरेर्नामोच्चारयन् विष्णुधाम यातीति किं वक्तव्यमित्यर्थः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वितीयाध्यायार्थप्रकाशः ॥ २ ॥

भाषा टीका

उनके दर्शन मात्र ही से गङ्गाजी में उसने शरीर दिया फिर शीघ्र ही भगवान् के पार्षदों के रूप[illegible] किया ॥ ४३ ॥

तब वह ब्राह्मण दिव्य विमान पर [illegible] में होकर उन विष्णु पार्षदों के सा[illegible] कान्त भगवान् है तहां पहुँचा ॥ ४४ ॥

इस प्रकार सब धर्मों को नाश [illegible] वह दासी का पति निन्दित कर्म से पतित होकर [illegible] व्रत के नाश होने से नरक में गिराया जाता था सो भगवान् के नाम ग्रहण मात्र से छूट गया ॥ ४५ ॥

भाषा टीका ।

मोक्ष चाहनेवाले को श्रीनारायण नाम कीर्तन से दूसरा उपाय कर्मबन्ध छुटाने वाला कोई नहीं है इस कीर्तन के करने में मन अन्यत्र नहीं लगता है और प्रायश्चित्तों के तो करने पर भी मन रजोगुण तमोगुण से लिप्त होजाता है ॥४६ ॥

जो पुरुष इस पापहारी इतिहास को सुने अथवा श्रद्धा से सुनावे यत्नवान् होवे भक्तियुक्त होवे ॥ ४७ ॥

वह पुरुष कभी नरक में नहीं जावेगा न यमपुरुष उसको देखेंगे यद्यपि पापी मनुष्य होवे तो भी विष्णु लोक में प्रतिष्ठित होवेगा ॥ ४८ ॥


मरते समय मैं पुत्र के निमित्त से हरिनाम ग्रहण करने से ऐसा पापी अजामिल भी हरिधाम को चला गया तो जो मनुष्य श्रद्धा से नाम लेंगे वे क्यों नहीं वैकुंठ को जॉयगे ॥ ४९ ॥

इति श्रीभागवत षष्ठस्कंध दूसरे अध्याय का

भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ २ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे द्वितीयोऽध्यायः समाप्तः ॥ २ ॥



॥ तृतीयोऽध्यायः ॥

—○:*:○—

राजोवाच ।

निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तान् प्रति धर्मराजः ।
एवं हताज्ञो विहतान् मुरारेर्नैदेशिकैर्यस्य वशे जनोऽयम् ॥ १ ॥
यमस्य देवस्य न दण्डभङ्गः कुतश्चनर्षे ! श्रुतपूर्व आसीत् ।
एतन्मुने ! वृश्चति लोकसंशयं न हि त्वदन्य इति मे विनिश्चितम् ॥ २ ॥

श्रीशुक उवाच ।

भगवत्पुरुषै राजन् ! याम्याः प्रतिहतोद्यमाः ।
पतिं विज्ञापयामासुर्यमं संयमिनीपतिम् ॥ ३ ॥

यमदूता ऊचुः ।

कति सन्तीह शास्तारो जीवलोकस्य वै प्रभो ! ।
त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ॥ ४ ॥
यदि स्युर्बहवो लोके शास्तारो दण्डधारिणः ।
कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा ॥ ५ ॥
किं तु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणाम् ।
शास्तृत्वमुपचारो हि यथा मण्डलवर्तिनाम् ॥ ६ ॥
अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः ।
शास्ता दण्डधरो नृणां शुभाशु[illegible]विवेचनः ॥ ७ ॥
तस्य ते विहतो दण्डो न लोके [illegible]धुना ।
चतुर्भिरद्भुतैः [illegible] ते [illegible]नता ॥ ८ ॥
नीयमानं [illegible] तनागृहान् ।
व्यमोचयन् पातकिनं [illegible]त्वा पाशान् प्रसह्य ते ॥ ९ ॥
तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमम् ।
नारायणे[illegible]हते माभैरित्यापयुर्द्रुतम् ॥ १० ॥

श्रीधरस्वामिकृतभ[illegible] ।
तृतीये तु यमेनापि वैष्णव[illegible]र्षवर्णनैः ।
[illegible] ॥ १ ॥

विष्णुदूतनिर्णीतं शास्त्रार्थं यममुखेन द्रढयितुं तृतीयाध्यायारम्भः । तत्र यदुक्तं यमराज यथा सर्वमाचचक्षुरिति ततः किं तत्र [illegible] ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं विहतान् अत एव हता आज्ञा यस्य । यस्य वशवर्त्ययं जनः सोऽपि तान् प्रति किमाह ॥ १ ॥

अत्याश्चर्यमेतदित्याह । यमस्येति । हे अङ्ग ! यमस्य दण्डभङ्गः कुतश्चन कस्माच्चिदपि श्रुतपूर्वो नासीत् एतदेतस्मिन्नर्थे । यद्वा न श्रुतपूर्वः एतद्यमदूतनिराकरणं चासीत् अतः सर्वस्यापि लोकस्य संशयो वर्तते तं त्वत्तोऽन्यो न छिनत्तीति मे निश्चितमतः कथयेति शेषः ॥ २ ॥

भगवतः पुरुषैः प्रतिहत उद्यमो येषां ते याम्याः पुरुषाः ॥ ३ ॥

कति सन्तीत्याक्षेपोक्तिः त्रैविध्यं त्रिविधं स्वार्थे ष्यञ् । यद्वा त्रैविध्यं यथा भवति तथा कर्म कुर्वतः तथा कर्मफलस्याभिव्यक्तिहेतवः कति सन्तीति ॥ ४ ॥

सन्तु बहवः को बाधस्तत्राहुः । यदीति । मृत्युर्दुःखममृतं सुखं तयोः विप्रतिपत्तौ ते उभे अपि कस्य स्यातां न कस्यापि परस्परविरोधिनोभयोरपि प्रतिबन्धात् एकमत्ये तु कस्य वा न स्याताम् एकः सुखं कर्तुमिच्छति दुःखं चान्यः एकमत्ये च तयोः परस्परकार्यानुमोदनेनोभयोरपि प्राप्तं कस्य वा ते उभे अपि न स्यातामित्यर्थः ॥ ५ ॥

ननु बहूनां कर्मिणां व्यवस्थया बहवः शास्तारो भवन्तु तथा सति नायं दोषः स्यात्तत्राहुः । बहूनां कर्मिणां व्यवस्थया शास्तृबहुत्वे शास्तृत्वं स्यात् घटेत किन्तु तदा यत्सर्वशास्तरि मुख्यं शास्तृत्वं तदेकदेशे उपचारमात्रमेव स्यात् यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं मण्डलवर्तिनामुपचारमात्रं निरङ्कुशत्वाभावात् ॥ ६ ॥

यस्मादेवं शास्तृबहुत्वं न घटतेऽतस्त्वमेक एव शास्ता शुभाशुभे विविनक्तीति तथा ॥ ७ ॥

विप्रलम्भिता वञ्चिता लङ्घितेत्यर्थः ॥ ८ ॥

तदेवाहुः । नीयमानमिति ॥ ९ ॥

ते त्वत्तः यदि नोऽस्माकं क्षमं हितं मन्यसे अन्यथा ज्ञानतस्तदज्ञाने तवाप्यनर्थः स्यात् अतर्क्यो हि तेषां प्रभावो यतो नारायणेति केवलमभिहिते माभयङ्कुर्विति वदन्तः शीघ्रमागताः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमितिहासमुखेनाकीर्तितभगवन्नाममाहात्म्यः राजा "पतिवः पृच्छति इति धर्मोऽस्मिन् यदि संशयः । स एव परमं गुह्यं धर्मस्य भगवान् यम"इति भगवत्पार्षदैरासनमन्त्रेणाभिहितयममुखेन नाममाहात्म्यं कथयितुं पृच्छति द्वाभ्याम् । निशम्येति । एवमित्थं देवो धर्मराजः स्वगर्ह्यं पतिं निशम्याकर्ण्य मुरारेर्भगवतो नैर्देशिकैराज्ञाकारिभिः किङ्करैर्विहत निराकृतान् तान् किङ्करान् प्रति स्वयं विहता निराकृता आज्ञा यस्य तादृशः किमुक्तवान् धर्मराजं विशिनष्टि । यस्य धर्मराजस्य वशेऽयं जनः यद्वशवर्ती अयं सांसारिकजनः स किमाहेत्यर्थः ॥ १ ॥

हे अङ्ग ! देवस्य यमस्य एतादृशो दण्डस्य भङ्गः कुतश्चिदासीदिति [illegible] श्रुतपूर्वः न श्रुत इत्यर्थः एतस्मिन्नर्थे सर्वस्यापि संशयो वर्तत इति शेषः हे मुने ! तमिमं लोकस्य मादृशस्य संदेहं त्वदन्यः न हि वृश्चति न छिनत्ति इति मया सुनिश्चितम् ॥ २ ॥

उत्तरमाह मुनिः । भगवत्पुरुषैरिति । हे राजन् ! भगवत्किङ्करैः प्रतिहतः उद्यमो येषां ते याम्या यमभटाः पतिमधिपतिं संयमिनीपुर्याः पतिं यमं प्रति विज्ञापयामासुः ॥ ३ ॥

विज्ञापनप्रकारमेवाह । कतीत्यादिना आयथुरुद्धृतमित्यन्तेन । हे प्रभो ! यम इह लोके त्रैविध्यं त्रिविधमेव त्रैविध्यं स्वार्थे ष्यञ् पुण्यपापतदुभयमिश्ररूपेण त्रिविधं कर्म कुर्वतो जीवलोकस्य शास्तारः फलस्य सुखादिरूपस्य याभिव्यक्तिः प्रादुर्भावस्तस्या हेतवः कति सन्तीत्याक्षेपः ॥ ४ ॥

सन्तु बहवः को बाधस्तत्राहुः । यदीति । बहवः यदि दण्डधारिणः शास्तारः दण्डरूपशासनकारिणः दण्डपूर्वकशिक्षाकारिणो वा बहवः स्युस्तर्हि मृत्युर्दुःखममृतं सुखं च कस्य वा न स्यातां कस्याप्युभे स्यातामित्यर्थः अयं भावः अन्योन्यविरोधिशास्तृबहुत्वे सति शास्त्रन्तराधीनस्य सुखदुःखस्य शास्त्रन्तरेण निवारणसम्भावनया कस्याप्युभे न स्यातां किन्तु भयपरिहारेणोदासीनो लोकः स्यादिति ॥ ५ ॥

परस्परविरोधिशास्तृबहुत्वे यद्यप्युभे स्यातां तथापि शास्तृत्वममुख्यं स्यादित्याहुः । किन्त्विति । धर्मिणां कर्मिणां यत् शास्तृभिराचमानं सुखादि स्यादेव किन्तु शास्तृत्वमुपचारः तेषां शास्तृत्वममुख्यं हि स्याद्वा यथा मण्डलवर्तिनामल्पजनपदाधिपतीनां शास्तृत्वं यथा न मुख्यं निरङ्कुशत्वाभावात् ॥ ६ ॥

अस्य त्वच्छासनं न निरङ्कुशं इदमतः शास्तृबहुत्वं न घटते इत्यभिप्रेत्य त्वमेक एव शास्ता त्वच्छासनं चेदानीं विहतमित्याहुः शास्तेति । दण्डधरः पापिनां नृणां दण्डं धारयति कारयतीति तथा शास्ता हिताहितयोर्विविच्य ज्ञापयिता शुभाशुभे पुण्यापुण्ये विविनक्ति विभजतीति शुभाशुभविवेचकः । नन्द्यादित्वात्कर्तरि ल्युः ॥ ७ ॥

तस्यैवम्भूतस्य ते तव दण्डः शासनं लोके क्वाप्येतत्पर्यन्तं विहतो न वर्तते किन्त्वविहत एवाधुना त्वदुक्तरूपैश्चतुर्भिः सिद्धैस्ते तवाज्ञा विप्रलम्भिता वितथीकृता ॥ ८ ॥

कथं विप्रलम्भितेत्यत्राहुः । नीयमानमिति । तवादेशादस्माभिर्यातनागृहं नरकं प्रति नीयमानं पापकिनं ते सिद्धा व्यमोचयन् किं कृत्वा प्रसह्य बलात् पाशान् छित्त्वातः सिद्धान् वेदितुं तद्बलतदधिपतिनामादिप्रभावादिकं सर्वं वेदितुमिच्छाम इत्यर्थः नोऽस्माकं क्षमं हितं यदि मन्यसे तर्हि कथयेति शेषः तान्विशिनष्टि । नारायणेत्यनेनास्मत्कृतेऽभिहिते उच्चारिते सति द्रुतं आश्वायपुराजग्मुः ॥ ९ ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्तिपूर्वकं नामसङ्कीर्तनं मुक्तिसाधनमित्येतस्मिन्नध्यायेऽभिधीयते तत्र राजा पृच्छति । निशम्येति । हता आज्ञा यस्य स हताज्ञः । मुरारेर्नैर्देशिकैराज्ञाकारिभिः किङ्करैरित्यर्थः विहतान् प्रतिहतान् स्वामिनिर्देशकरणाशक्त्या पीडितानित्यर्थः अयं जनो यस्य यमस्य वशे वर्तते ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दण्डभङ्गः आज्ञाभङ्गः वृश्चति छिनत्ति ॥ २ ॥

"यामं यमे प्रेतपतौ यमने च यमः स्मृतः" इत्यभिधानात् संशयनिराकरणाय संयमनीपतिमिति ॥ ३ ॥

फलाभिव्यक्तिहेतवः फलदातारः कति सन्तीत्यस्यायमर्थः । किमेकः शास्ताऽथवा बहवः । तत्रापीयन्त इति नियमोऽस्ति किं वा नेति ॥ ४ ॥

द्वितीयं प्रत्याहुरित्याह । यदि स्युरिति । इयन्त इति सङ्ख्याना बहवः मृत्यमृतयोः दानसमार्था उत न न द्वितीय इत्याहुरित्याह । कस्येति । मृत्युलक्षणो बन्धः अमृतलक्षणो मोक्षश्च कस्य स्यातामिति वक्तव्यं न कस्यापि स्यातां दातृत्वं सामर्थ्याभावात् प्रथमं परिहरन्तीत्याह । न वेति । तौ कस्य न स्यातां सर्वेषामपि स्यातां सामर्थ्यात् ॥ ५ ॥

नचैतद्युक्तमसम्भवात् मिथो विरोधापातादित्याहुरित्याह । किंत्विति । मण्डलवर्तिनां मण्डलेश्वराणाम् ॥ ६ ॥

यत एवं बहुत्वे दोषः अतः एकः शास्ता सर्वैकस्त्वमेवेति प्रथमपक्षोऽभिमत इत्याहुरित्याह । अत इति । शुभाशुभविवेचनः शुभाशुभविवेककर्ता ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ओकसंशयमिति । स्वस्य तु न संशय इति भावः ॥ १–९ ॥

अथ तेषां ज्ञानाय किञ्चिद्दृष्टादिकमुच्यतां तत्राहुः । नारायणा इति ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

[illegible] प्रादुर्भूतास्ते स्वावमाननम् ।
[illegible] विज्ञापयामास भर्तुरैश्वर्यमद्भुतम् ॥
[illegible] यमो यद्यपि धिक्कृतः ।
[illegible] स्वामिभक्तयादनुनमवान् ॥ ०

विष्णुदूतैर्[illegible] यममुखेनापि द्रढयितुं तृतीयाध्यायमारभते । [illegible] यमराजे यथासर्वमाचचक्षुरिति तत्र तनः किं वृत्तमिति पृच्छति । निशम्येति । नैदेशिकैः[illegible] विहतान् [illegible] इताः ॥ १ ॥

[illegible] हे प्रभो ! कस्मादपि न श्रुतपूर्वः एतत् एतम् ॥२॥३॥

[illegible] [illegible] तेषां [illegible] [illegible] तेषां [illegible] न कुम[illegible] [illegible] त्रिविधः [illegible] ॥

सन्तु [illegible] कर्मफलं हि द्विविधं मृत्युर्नरकममृतं स्वर्गः [illegible] स्वस्वमार्पयितुमिच्छतां तेषां मध्ये कस्य ते के स्याताम[illegible] विरोधे सति न कस्यापीत्यर्थः । देहादिकमत्येन तेषामविर[illegible] कस्य वा न स्यातामपि तु ते द्वे अपि सर्वस्य स्यातां नत्वेकं [illegible] पुनर्विरोध एव भवेदिति भावः ॥ ५ ॥

[illegible] कर्मिणां [illegible] शास्तारो [illegible] सति नायं दोषः स्यात्तत्राहुः । किन्त्विति । सर्वशास्तत्वैव शास्तृत्वं मुख्यमेकदेशे तूपचार एव । यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं मण्डलवर्तिनां कर्मिणां त्वौपचारिकं निरङ्कुशत्वाभावात् ॥ ६ ॥ ७ ॥

विप्रलम्भिता धर्षिता खण्डितेत्यर्थः ॥ ८ ॥

केन प्रकारेणोत्यत आहुः । नीयमानमिति । तेन तानत्रानीय यदि तदपराधदण्डं दातुं त्वं पारयिष्यसि तदैव त्वं शास्ता अस्माकमपि दुःखाग्निर्निर्वातीति भावः ॥ ९ ॥

ननु ते स्वप्रभुस्थानं गताः सम्प्रति के तानत्रानयन्तु यतो दण्डयामीति चेत्तत्राहुः । तांस्ते त्वत्तो महासर्वज्ञत्वात् घोदितुमिच्छामः कस्य ते दूताः क्व वसन्तीति जानिष्यामस्त बलात्रयमेनेति भावः । यदि नः शुभं हितं मन्यसे अन्यथा पराभवासहिष्णुतया वयं मरिष्याम एवेति भावः । तान् ज्ञातुं तेषां चेष्टितं किमपि दर्शयति चेदहा हन्तान्द्भुतं तेषां चाद्भुतमित्याहुः । नारायणेतीति । आभिमानिषितारिति पापिनमप्यमूचुरहो अन्याय इति भावः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिपार्षदवाक्यैर्भगवद्भक्तेः सर्वपापनिवर्तकत्वं सर्वपुरुषार्थदत्वं चोक्त्वाय श्रीशुकः यममतेन स्वमतेन च श्रीभागवद्भक्तेः सर्वपापनिष्कृतित्वं सर्वपुरुषार्थप्रदत्वं चाह तृतीयेनाध्यायेन । यमराजे तथासर्वमाचचक्षुरित्युक्तं तदनन्तरं यमराजः किमुक्तवानिति पृच्छति । यस्य वशे अयं सर्वोऽपि जनः स प्रजासंक प्रकारेण मुरारेर्नैदेशिकैः हता आज्ञा यस्य सः स्वभटोक्तमेवोक्तं श्रुत्वा मुरारेर्नैदेशिकैर्विहतान् स्वभटान् प्रति किं प्रत्याह प्रत्युत्तरमाह ॥ १ ॥

हे प्रभो ! यमस्य दण्डभङ्गः कुतश्चन कस्मादपि श्रुतपूर्वो नासीत् एतदेवं मे मम सर्वस्य लोकस्य च संशयं त्वदन्यो न हि वृश्चति छिनत्ति अतः कथयेति शेषः ॥ २ ॥

प्रतिहतः उद्यमो येषां ते ॥ ३ ॥

त्रैविध्यं त्रिविधं स्वार्थे ष्यञ् विहितं निषिद्धं मिश्रं कर्म कुर्वतः जीवलोकस्य फलानां सुखादीनामभिव्यक्तेर्निष्पत्तेर्हेतवः शास्तारः शिक्षकाश्च कति सन्ति ॥ ४ ॥

एवं क्षुभिताः कति शास्तारः सन्तीत्याक्षिप्य किञ्चिद्वैपरीत्यमवलम्ब्य बहुशास्तृसम्भवकथनपूर्वकमेकस्यैव भगवतोऽस्य शास्तृत्वं स्वयमेवाहुः । यदीति त्रिभिः । यदि बहवः शास्तारः लोके स्युः तर्हि मृत्युर्मरणममृतं जन्मचैतदुभे कस्य शास्तृत्वाज्ञया वा स्यातां कस्य वा नैव स्यातामित्यन्वयः [illegible] यदा बहूनां शास्तॄणां पृथक् पृथक् कृतयः बहूनि च [illegible] [illegible] तत्र कस्य [illegible] [illegible] प्राणिजन्ममरणे नर्मिणोऽपि देशे काले संभवे [illegible] विशेषमवलम्ब्यान्यस्मिन् देशे काले संभवे [illegible] स्यातां कस्य नेत्यर्थः अतो बहवः [illegible] एव सम्भवन्तीति भावः ॥ ५ ॥

किंतु इह कर्मलोके बहूनां [illegible] [illegible] त्वमुपचारः औपचारिकं स्यात मुख्य[illegible] [illegible] सम्भवति यथा मण्डलवर्तिनामौपचारिकं [illegible] मुख्यं शास्तृत्वं [illegible] ॥ ६ ॥

॥ श्रीशुक उवाच ॥

इति देवः स आपृष्टः प्रजासंयमनो यमः ।
प्रीतः स्वदूतान् प्रत्याह स्मरन् पादाम्बुजं हरेः ॥ ११ ॥

॥ यम उवाच ॥

परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वम् ।
यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः ॥ १२ ॥
यो नामभिर्वाचि जनान्निजायां बध्नाति तन्त्यामिव दामभिर्गाः ।
यस्मै बलिं त इमे नामकर्मनिबन्धबद्धाश्चकिता वहन्ति ॥ १३ ॥
अहं महेन्द्रो निर्ऋतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरिञ्चिः ।
आदित्यविश्वे वसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः ॥ १४ ॥
अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽस्पृष्टरजस्तमस्काः ।
यस्येहितं न विदुः स्पृष्टमायाः सत्त्वप्रधाना अपि किं ततोऽन्ये ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतो हेतोः सेश्वराणाम् ईश्वरैर्नानानियन्तृभिः सहितानां त्वमेक एव शास्ता नियन्ता ॥ ७ ॥

अधुना ते आज्ञा विप्रलम्भिता लङ्घिता ॥ ८ ॥

ते प्रसह्य बलात् पाशान् छित्वा पातकिनं व्यमोचयन् विमोचितवन्तः ॥ ९ ॥

यदि नो क्षमं योग्यं तद्वेदनं मन्यसे तर्हि ते त्वत्तो वेदितुमिच्छामः ॥ १० ॥

भाषा टीका ।

राजा बोले जिस यमराज के वशमे यह सब जगमात्र है नारायण के दूतों ने जब उनके दूतों को हटा दिया तब यमराजकी आज्ञा भग्न होगई फिर अपने दूतों के वचनों को सुन कर धर्मराज ने उन दूतों से क्या कहा सो आप मेरे से कहिये ॥ १ ॥

हे महर्षिजी ! यमदेव के दंड का भंग होना कभी कहीं किसी से नहीं सुना था हे मुने ! लोक के इस संशय को आप के बिना दूसरा कोई दूर नहीं कर सकता है यह बात मेरे को निश्चित है सो आप कहिये ॥ २ ॥

श्री शुकदेव जी बोले हे राजन् ! भगवान् के पार्षदों ने जब यमराज के दूतों का उद्यम नष्ट कर दिया तब अपने मालिक संयमिनी पुरी के पति को यमदूतों ने उस बात का निवेदन किया ॥ ३ ॥

यमदूत बोले हे प्रभो ! जीव लोक के शासन करनेवाले कितने पुरुष हैं जो कि तीन गुणों के किये कर्मों के फल के प्रगट करने वाले हैं ॥ ४ ॥

यदि लोक में बहुत से दंडधारी शासन कर्ता होंगे तब तो किस पुरुष को सुखदुःख नरक स्वर्ग होगा किस को न होगा ॥ ५ ॥

और भी बहुत दंड देने वाले होंगे तो कर्म करने वाले मनुष्यों का शासन करने मे किसी दंडधारी को छोटा मानना होगा जैसे कि चक्रवर्ति के नीचे छोटे राजा होते हैं ॥ ६ ॥

इस से सब देवादिकों के भी ईश्वर आप एकही हो शासन करने वाले मनुष्यों के शुभाशुभ विवेचन करने वाले हो ॥ ७ ॥

तिन आपका दंड इस वखत नष्ट होगया लोक में नहीं है क्यों कि चार अद्भुत सिद्धों ने तुम्हारी आज्ञा को आज लङ्घन कर दिया है ॥ ८ ॥

आपकी आज्ञा से हम जब एक पुरुष को दंडस्थान को ले जाने लगे तब उन चारों ने आकर हमारे पाशों को काट कर उस पापी को भी छुटा लिया ॥ ९ ॥

यदि आप हमसे कहने का उचित समुझैं तो उनको आपसे जानना चाहते हैं जो कि चार पुरुष नारायण कहतेमात्र शीघ्रही आगये थे ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रजाः संयमयतीति तथा ॥ ११ ॥

मत्तोऽन्यो जगतस्तस्थुषश्च परोऽधीश्वरोऽस्ति । अहं तु जङ्गमानामेव तत्रापि नृणामेव तत्रापि पापिनामेव तत्किङ्करः सर्वेश्वरः स तु सर्वेश्वरः कोऽसौ यत्र यस्मिन्विश्वमोतं प्रोतं चोर्ध्वतिर्यक्तन्तुषु पटवत् यस्य स्वांशेभ्यो विष्णुब्रह्मरुद्रेभ्योऽस्य स्थित्यादयो भवन्ति यस्य च वशे लोको वर्तते नसि नासिकायां प्रोतबलीवर्दवत् ॥१२॥

एतत्प्रपञ्चयति । ब्राह्मणादिनामभिर्वाचि निजायां तन्त्यां दामभ्यां जनान् यो बध्नाति दामभिर्गा बलीवर्दानिव त इमे जीवाः

यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते ।
आत्मानमन्तर्हृदि सन्तमात्मनां चक्षुर्यथैवाकृतयस्ततः परम् ॥ १६ ॥
तस्यात्मतन्त्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः ।
प्रायेण दूता इह वै मनोहराश्चरन्ति तद्रूपगुणस्वभावाः ॥ १७ ॥
भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिङ्गानि महाद्भुतानि ।
रक्षन्ति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥ १८ ॥
धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुरृषयो नापि देवाः ।
न सिद्धमुख्या अमरा मनुष्याः कुतश्च विद्याधरचारणादयः ॥ १९ ॥
स्वयम्भूर्नारदः शम्भुः कुमारः कपिलो मनुः ।
प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

[illegible]नामकर्मभिर्निबन्धैरदृढबन्धसाधनैर्बद्धा यस्मै बलिं वहन्ति यद-धीनाः कर्म कुर्वन्तीत्यर्थः ॥ १३ ॥

यस्य च लीला दुर्विभाव्येत्याह । महमिति द्वाभ्याम् ॥ १४ ॥

न स्पृष्टं रजस्तमश्च यैः इङ्गितमभिप्रेतं चेष्टितं वा न विदुः [illegible]पृष्टमाया मायया स्पृष्टाः ततस्तेभ्योऽन्ये न विदुरिति किं पुनर्व-क्तव्यम् ॥ १५ ॥

तन्मायया विमोहितत्वान्न जानन्तीत्युक्तमविषयत्वाच्च तस्ये-त्याह । यमिति । [illegible]रिन्द्रियैर्हृदा चित्तेन न विचक्षते न पश्यन्ति । यद्वा "यामश्रुतिः [illegible] भक्तो न मनुते" इत्यादिश्रुतेः आत्मनां जीवाना-[illegible] रूपाणि चक्षुर्यथा कर्मभूतं न जानन्ति [illegible]तः [illegible]कं न हि प्रमाता प्रमाणस्य विषय[illegible] ति [illegible]श्वरो मदन्योऽस्तीति पूर्वेणैव सम्बन्धः ॥ १६ ॥

[illegible] परमेश्वरो ये पुनरस्माभिर्भर्त्स्यं पापिनं [illegible]ह । तस्येति द्वाभ्याम् । तस्येव रूपं [illegible] स्वभावो भक्तवात्सल्यादिर्येषां ते ॥ १७ ॥

[illegible] दुर्दर्शानि द्रष्टुमशक्यानि लिङ्गानि [illegible] तद्भक्तिमतो विष्णुभक्तान् परेभ्यः शत्रु-[illegible] सर्वतोऽन्यादिभ्यश्च रक्षन्ति ॥ १८ ॥

[illegible]कथमधर्मपक्षपातं कृतवन्तस्तत्राह [illegible] [illegible] ॥ १९ ॥

ननु [illegible] जानन्ति तस्य सर्वे [illegible] तत्राह । स्वयम्भूरि[illegible]ः सनत्कुमारः वयमित्य[illegible] बहुमन्य-मानो निर्दिशति ॥ २० ॥

— —

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

एवमापृष्टो यमस्तान् प्रत्याह इत्याह [illegible] । इतीत्थमापृष्टः प्रजानां संयमनः संयमयति शास्तीति तथा । कर्तरि ल्युः यमो देवः प्रीतः [illegible] प्रत्याह ॥ ११ ॥

उक्तिमेवाह । पर इत्यादिना पुराय भूम्न इत्यन्तेन । मन्मत्तः पर उत्कृष्टोऽन्योऽस्ति न केवलं मत्तः परः किन्तु जगतः जङ्गमात्स्थाणु-श्चाचराचरात्मकाद्ब्रह्मस्तम्बपर्यन्ताज्जगतः उत्कृष्टोऽन्योऽस्तीत्यर्थः अतो भवन्त इव तच्छासनकारित्वादस्माकं मुख्यं प्रशास्तृत्व-मिति भावः कोऽसौ यत्र यस्मिन्निदं विश्वं तन्तवः पट इवोतं प्रोतमायाममतो विस्तरतश्च स्यूतं सर्वतो व्याप्तमित्यर्थः यस्य चांशतः अंशादेवास्य जगतः जन्मादयो भवन्ति तस्यात्मवशा-त्मिकायामोतवत् प्रोतबलीवर्दवद्यस्य वशेऽयं लोकः यद्वशवर्त्ययं लोक इत्यर्थः ॥ १२ ॥

एवं सर्वाश्रयधिकत्वसर्वव्यापकत्वसर्वजन्मादिकारणत्व-सर्वप्रशास्तृत्वधर्मयुक्तो भगवानन्योऽस्तीत्युक्तम् अथान्यांश्च भग-वतो धर्मान् प्रपञ्चयति । य इति । यो भगवान्निजायां वाचि वेदा-त्मिकायां तन्त्यां दामन्यां नामभिर्वर्णाश्रमनामभिर्जनं दामभिः प्र-ति[illegible]रज्जुभिः स्थूलतन्त्यां गाः बलीवर्दानिव बध्नाति नामभिरि-त्यनेन ब्राह्मणक्षत्रियब्रह्मचार्यादिवर्णाश्रमनामनिर्देशपूर्वकं वेदोक्ता वर्णा-श्रमधर्माः विवक्षिताः तैरीश्वराज्ञारूपायां तदुल्लङ्घने दण्डना-त्मिकायां वाचि बध्नाति वागधीनानि करोतीति यावत् । यस्मै च त इमे नामकर्मभिर्निबन्धः कृतः बन्धो येषां तादृशाः प्रतिनियतनामकर्माणः चकिता बिभ्यतः बलिं पूजां वहन्ति कुर्वन्तीत्यर्थः ॥ १३ ॥

अहं यमः प्रचेता वरुणः ईशानो रुद्रः अर्कः सूर्यः [illegible] योनिर्ब्रह्मा आदित्या अदितेः पुत्रा विश्वावसुप्रभृतयः [illegible] [illegible]र्जः दक्षादयः अस्पृष्टं रजस्तमश्च यैः [illegible] यस्येहितमभिप्रायं न विदुः तत उक्तेभ्योऽन्ये [illegible] किं वक्तव्यम् । अवेदने हेतुः स्पृष्टमायाः [illegible] स्वादित्यर्थः ॥ १४ ॥ १५ ॥

असुभृतः प्राणभृतः यं [illegible] यामिर्हृदा चित्तेन गिरा वा [illegible] पश्यन्ति न जानन्तीत्यर्थः । कथम्भूतमात्मनां जीवा[illegible] आत्मनमन्तर्हृदि सन्तं न [illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

रूपाणि ततः परमाकृतिभ्यो विलक्षणमाकृतीनां प्रकाशकं चक्षुरिन्द्रियं न विचक्षते तद्वदिति ॥ १६ ॥

एवं सर्ववशित्वसर्वाराध्यत्वसर्वाविज्ञाताभिप्रायत्ववाङ्मनसागोचरापरिच्छिन्नस्वरूपस्वभावत्वसर्वान्तरात्मत्वादयो धर्मा उक्ताः एभिरन्यैश्च कल्याणगुणैश्चिदचिदात्मकजगतो विलक्षणस्य स्वतन्त्रस्य मायाधिपतेरधीशितुः सर्वेश्वरस्य महात्मनो निरतिशयप्रभावस्य हरेर्मनोहराः दूताः भगवत इव गुणरूपस्वभावा येषां तादृशा इह लोके चरन्ति ॥ १७ ॥

विष्णोर्भूतानि किङ्करात्मकानि भूतानि सुरैर्ब्रह्मादिभिः पूजितानि दुर्दर्शान्युज्ज्वलानि लिङ्गानि स्वरूपाणि येषां तानि महाद्भुतानि दृष्टविसजातीयानि भगवद्भक्तिमतो जनान् मत्तो मृत्योश्चान्येभ्यश्च सर्वेभ्यः रक्षन्ति ॥ १८ ॥

तद्भक्तिमतो रक्षन्तु नामायं त्वजामिलो निरतिशयदुष्कृद्भक्तिशून्यश्चेति कथमेनं रक्षितवन्तस्तत्राह। धर्ममिति। साक्षाद्भगवता प्रणीतमभिहितं धर्मम्नृपिप्रभृतयस्ते विदुर्भागवतधर्मप्रभाव ईदृश इति भावः ॥ १६ ॥

यदि केऽपि न विदुस्तर्हि स्तद्धर्मः शशविषाणवद्सत्कल्पः स्यात्तत्राह। स्वयम्भूरिति। वयमहम् "अस्मदो द्वयोश्च" इति बहुवचनमेकत्वे बोद्धव्यम्। स्वयम्भूर्ब्रह्मा शम्भुः रुद्रः कुमारः सनत्कुमारः मनुः स्वायम्भुवः वैयासकिः शुकः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

यमः स्वदूतान् प्रति वक्तीत्याह। इतीति ॥ ११ ॥

यदुक्तं भवद्भिस्त्वमेक एव शास्तेति तदनालोच्य कश्चित् मदन्यस्यात्युत्तमस्य सत्त्वादित्याह। पर इति। मदन्यो जगतो जङ्गमस्य तस्थुषः स्थावरस्य च शास्तास्ति स क इत्यत उक्तम्। पर इति "परोऽरिपरमात्मनोः" इत्यभिधानात् स शास्ता परः परमात्मा तस्य लक्षणमाह। ओतमिति। अयमर्थः पटवद्यथा कन्था पटः सूत्रे तन्तौ दीर्घतया ओतः तिरश्चीनतया प्रोतः तन्त्वाधारत्वेन स्थितः तथेदं विश्वं यत्र परमात्मनि ओतप्रोतधर्मेण तदाधारत्वेन स्थितं "यस्मिन्निदं सं च विचैति सर्वं" यथा (१) कन्था पटाः सूत्र ओताः प्रोताश्च संस्थिताः एवं विष्णाविदं विश्वमोतं प्रोतं च संस्थितमित्यादिश्रुतिस्मृतियलादेतल्लक्षणमव्याप्त्यतिव्याप्त्यादिदोषरहितं यद्यस्य धारको न स्यात्तर्हि पतिष्यति वेगासंस्कारराहितशरवदित्यादितर्कोत्थ लक्षणान्तरं चाह। यदंशत [illegible]। यस्यांशतो वासुदेवादिस्वरूपांशैर्भिन्नांशैर्ब्रह्मादिभिरस्य [illegible]तः स्थितिजन्मसंहाराः भवन्तीति शेषः "यतो वा इमानि [भू]तानि जायन्त" इत्यादिश्रुतेः।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
[अभ्यु]त्थानमधर्मस्य तदात्मानं सृजाम्यहम्।

[इ]त्यादेर्व्यासरूपेणा[दि]ति धारकत्वं तस्यैवेति निश्चयाय चशब्देन प्रेहर्णं जन्मनाशावेव लक्षणान्तरे इति जातपक्षपचि-

(१) कन्थानिर्माणाय छिन्नाः पटाः यथा त्रिगुणीकृतसूत्रे ओताः प्रोताश्च तथा ब्रह्माणि विश्वम् ओतप्रोतम्। तथा च मूले पटशब्देन त्रिगुणीकृतसूत्रस्य विवक्षितत्वेनभेदाशङ्का नास्ति ॥

वत् पुनरस्याधीनं न स्यादिति नेत्याह। नसीति, नासिकायामोता :गाव इति च ॥ १२ ॥

हरेः शास्तृत्वं नाम दण्डधरस्य दण्डेनैव न किं[तु] लक्षणया वाचेत्याह। य इति। य ईशः निजायां स्वस्माद् [अभिन्नत्वेन नित्य]कायां वाचि वेदलक्षणायां नामभिर्ब्रह्मादिलक्षणैर्बध्नाति [स्व]मात्मीयनित्ययोः" इत्यभिधानं बन्धनेन किं प्रयोजनमत्राह। इति। नामकर्मणामात्मानन्त्यप्रकटनाय बहुवचनमन्यथा न्या[य]भ्यामित्युक्तं दृढं बन्धो निर्बन्धस्तेन बद्धाः ॥ १३ ॥

लोकतः सर्वज्ञानामस्माकं स्वविषयज्ञानजनकत्वमाहात्म्य श्रीहरिलक्षणमित्याह। अहमित्यादिना ॥ १४ ॥

न स्पृष्टा रजस्तमोभ्यामस्पृष्टरजस्तमस्काः शुद्धसात्त्विकाः। ततो भृग्वादिभ्यो अन्ये मन्वादयः सत्त्वप्रधाना इत्यनेन प्रचुरमन्ये रजस्तमसी च किञ्चित् स्त इति ज्ञायते कुत उक्तं स्पृष्टेति ईहितमिच्छाविषयमभिप्रायम् ॥ १५ ॥

तत्प्रसादमन्तरेणादृष्टलक्ष्यवेधवच्चक्षुरादीन्द्रियाविषयत्वेन [तदीय]ज्ञानं दुष्करमित्याह। यं वा इति। गोभिश्चक्षुरादीन्द्रियैः [प्राण]भृतो जीवाः आत्मनां जीवानामात्मानमन्तर्यामिणं स्वरूप[मित्यर्थः] चाह अन्तर्हृदि सन्तं अथवात्मनामन्तर्हृदि सन्तम् अ[न्तर्यामि]तयो रूपाणि स्वप्रकाशं चक्षुरिन्द्रियमनेन निक[टव]र्तिनां चक्षुरादीन्द्रियाभिमानिनां देवानामपि तद्विषयज्ञा[नाभा]व उक्त इति ज्ञातव्यं स्वरूपत्वेन नाकृतयः पश्यन्त[ीति] चेत्तत्राह। तत इति। ततः आकृतिभ्यः परं विलक्षणं भि[न्न]मित्यर्थः इदमपि हरिलक्षणं स पर इति पूर्वेणान्वयः ॥ १६ ॥

तांस्तु वेदितुमिच्छाम इत्यस्योत्तरमाह। तस्येति। मायाधिप[तेः] लक्ष्मीपतेः आत्मतन्त्रत्वलक्ष्मीपतित्वे पूर्वोक्तलक्षणसाधके [इति] ज्ञातव्यं प्रायेणेति कथितार्थनिर्धारणाय तस्य हरेः रूपं इव [सुन्दर]वर्णा गुणाः विप्रप्रियत्वादयः स्वभावो नित्यनिर्दोषत्वं येषां तथा ॥ १७ ॥

तेषां किं कृत्यमिहेति तत्राह। भूतानीति। विष्णोर्भूतानि पार्ष[दाः] दुर्दर्शलिङ्गानि दर्शनायोग्यलक्षणानि तद्भक्तिमतः विष्णुभक्ति[मतः] ॥ १८ ॥

विष्णुदूताश्चेत्तर्हि पातकिनं किमित्युद्धमुमुचानिति तत्राह। ध[र्म]मिति। तुशब्दात्सूक्ष्मज्ञानं युष्माकं नास्तीत्याह ॥ १९ ॥

तर्हि के विदुरिति तत्राह। स्वयम्भूरिति ॥ २०। २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

प्र॰ इति। श्रीनारायणपुरुषत्वनिर्णयात् पूर्वं त्वदीयस्वज्ञाने दुःखं [जा]तमासीदिति ॥ ११—१५ ॥

यं वै इति। श्रीभगवद्रूप एव वागाद्यगोचरतया श्रुतिभिर्वर्ण्यत इति व्यज्य तस्य स्वप्रकाशत्वं व्यञ्जितम् न विचक्षते न विषयीकुर्वन्ति ॥ १६–२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

स्मरन् प्रीत इति। नारायणनामश्रवणमात्रादेवेति भावः॥११॥

किमरे अपराधिनः! प्रलपथ तत्त्वं शृणुथेत्याह। पर इति। यं मां लोकशास्तारं जानीथ तस्मान्मत्तोऽपि मदुपलक्षितेभ्यो ब्रह्मादिभ्योऽ[पि]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रः अधोऽधीश्वरोऽस्ति । अहन्तु जङ्गमानामेव तत्रापि पापिनामेव आपि तत्किङ्करः सर्वेश्वरः सतु सर्वेश्वरः । कोऽसौ यत्र यस्मिन् विश्वमोतं प्रोतञ्च । ऊर्ध्वतिर्यक्तन्तुषु पटवत् । यदंशेभ्यो विष्णु-ब्रह्मरुद्रेभ्यः नस्योतवक्षसि प्रोतबलीवर्द्दवत् ॥ १२ ॥

एतदेव प्रपञ्चयति । य इति । वाचि वेदलक्षणायां नामानि ब्राह्मणादीनि कर्माणि यजनादीनि तैरेव निबन्धैर्निबन्धकैर्बद्धाः ॥ १३ ॥

न केवलं स मद्विधेभ्यः पर एव किन्तु वयं विरिञ्चिपर्यन्ताः सर्वेशा अपि स कदा किं कुर्यादित्यपि न विद्म इत्याह । अहमिति । हितं चिकीर्षितं यदुक्तं । "नहास्य कर्हिचिद्राजन् ! पुमान् वेदविधि-त्सितम । यद्विजिज्ञासया युक्ता मुह्यन्ते कवयोऽपि हि„ इति ॥१४॥

अस्पृष्टरजस्तमस्का अपि स्पृष्टा सत्त्वमयी माया यैस्ते सत्त्व-प्रधानाः ॥ १५ ॥

तत्त्वतीन्द्रियत्वात् सुतरामेव न जानीम इत्याह । यमिति । गोभि-रिन्द्रियैः मनसा सविकल्पतया असुभिः कर्मेन्द्रियैः हृदा चित्तेन निर्विकल्पतया च न विचक्षते न जानन्ति आत्मनां जीवानामेकेषाम् एकमेवात्मानमन्तर्यामिणमाकृतयो रूपाणि चक्षुर्यथा स्वप्रभूतं ततः प्रकाश्येभ्यः परं प्रकाशकम ॥ १६ ॥

ननु भवत्वेवं भूतः परमेश्वरस्तं न जिज्ञासामहे ये त्वस्मानि-तस्य पातकिनं ररक्षुस्ते क इत्यत आह । तस्येति । प्रायेण मनोहरा इति युष्मत्कृन्तु न मनोहरा इति भावः ॥ १७ ॥

सुरपूजितानीति । रे मूर्खास्तान् अपूजितवन्तो यूयमपराधिन एवेति भावः । तद्भक्तिमतो विष्णुभक्तान् मत्तश्चेति यूयं के वराका इति भावः ॥ १८ ॥

नन्वेवञ्चेत्तर्हि ते कथमधर्मपक्षपातिन इति चेद्धर्मतत्त्वं युष्म-द्विधा मूढाः कुतो ज्ञास्यन्ति महाविद्वांसो मुनयोऽपि न जानन्तीत्याह । धर्ममिति ॥ १९ ॥

ननु केऽपि [illegible] जानन्ति तर्हि तस्य सत्त्वे किं प्रमाणं तत्राह । [illegible] इति । ननु निजकृतस्मृतिशास्त्रेष्वपि स्पष्टं [illegible] तैरेव गुह्यं परमतत्त्वत्वात् संवृत्यैव स्थाप्यं [illegible] "सर्वगुह्यतमं भूयः शृणु मे" इत्यत्र [illegible] विशुद्धं गुणातीतं सगुणस्मृतिशास्त्रेषु वक्तम-[illegible] कर्मभिरर्थवादादिदीपकालिबान्तःकरणैर्दुर्ज्ञेय-[illegible]

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

[illegible] रक्षवाक्येन पृष्टः अत एव [illegible] सन् संयमयतीति [illegible] दूतान् [illegible] ॥ ११ ॥

[illegible] तस्थुषः स्था[illegible] त्याह । यस्य [illegible] स्मिन् [illegible] यस्य [illegible] स सर्व-[illegible] सर्वेश्वरः [illegible] इत्यर्थः ॥१२॥

[illegible] बलीवर्दानिव [illegible] ब्राह्मणादिशब्दैः निजायां [illegible] वाचि तन्त्यां ज[illegible] इमे जनाः नाम-कर्मभिर्निबन्धैर्बद्धा [illegible]

ये बलिं वहन्ति ते के इत्याकाङ्क्षायां तान् वदन् सर्वे एते तस्य चेष्टितं न जानन्तीत्याह । अहमिति द्वाभ्याम् ॥ १४ ॥

येऽस्पृष्टरजस्तमस्काः सत्त्वप्रधाना यस्येहितं न विदुः ततस्तेभ्यः सत्त्वप्रधानेभ्योऽन्ये रजस्तमःप्रधानाः स्पृष्टमायाः क्षुद्राधिकारिणो न विदुरिति किं वाच्यम ॥ १५ ॥

आत्मनामखिलजीवानामात्मानमन्तर्हृदि सन्तम "अन्तः प्रविष्टः शास्ता जनानाम्" इति श्रुतेः गोभिर्वाग्भिः मनसा च असुभिरन्यैरिन्द्रियैश्च न विचक्षते कार्त्स्न्येन नैव पश्यन्ति इयत्तानवच्छिन्नत्वात् "यद्वाचा नभ्युदितं यन्मनो न मनुते" यस्यामतं तस्य मतं मतं यस्य न वेद सः" इत्यादिश्रुतेः इतुगर्भितं विशेषणं ततः परं गवादिभ्यः परं चक्षुः प्रकाशकं तत्प्रकाश्याकृतयो यथा न विचक्षते तद्वत् सर्वथा निषेधस्तु नास्ति "तं त्वौपनिषदं पुरुषं पृच्छामि मनसैवानुद्रष्टव्यः सदा पश्यन्ति सूरयः" इत्यादिश्रुतिभ्यः स मदन्य इति पूर्वेणैवान्वयः ॥ १६ ॥

भवतु त्वदन्यः सर्वेश्वरः सर्वनियन्ता ये पाशान् छित्त्वा पापिनं विमोचितवन्तस्ते के इत्यतस्तानाह । तस्येति द्वाभ्याम् । तस्य आत्मतन्त्रस्य स्वतन्त्रस्य तद्रूपगुणस्वभावाः तस्येव रूपं गुणाः स्वभावश्च येषां ते इह चरन्ति ॥ १७ ॥

भूतानि पार्षदरूपाणि सुदर्शानि द्रष्टमत्यद्भुतानि लिङ्गानि रूपाणि येषां तानि तद्भक्तिमतः विष्णुभक्तियुक्तान् ॥ १८ ॥

ननु यदि ते विष्णुपार्षदास्तर्हि धार्मिकरक्षां कुतः कृतवन्त-स्तत्राह । धर्ममिति । ऋष्यादयोऽपि यदा न विदुस्तर्हि असुरादयः कुतो विदुः ॥ १९ ॥

एते तु भगवदनुग्रहतो जानन्तीत्याह । स्वयम्भूरिति ॥ २० ॥

भाषा टीका ।

श्रीशुकदेवजी बोले कि प्रजाओंके नियम न करने वाले यमराज देव से जब इस प्रकार दूतों ने पूछा तब यम धर्मराज बड़े प्रसन्न होकर श्रीहरिचरणारविन्द को स्मरण करके अपने दूतों के प्रति यह वचन बोले ॥ ११ ॥

यमराज बोले स्थावर जङ्गम सब लोक में और मेरे से भी बड़े ईश्वर और हैं जिन में यह सब जगत् जैसे सूतों में कपड़ा सीधा तिरछा पुहा रहता है तैसे पोहा है जिनके अंश से इस जगत् की स्थिति नाश होता है और सब लोक जिस [illegible] आत्मा के वश में है ॥ १२ ॥

जो भगवान् निज वेद लक्षण निज वाणी रूप [illegible] में ब्राह्मणादि नाम रूप डोरी रस्सियों से [illegible] [illegible] रहते हैं वे सब जीव चकित होकर ना[illegible] [illegible] बंधे हुये जिन भगवान् को भेट पूजा [illegible]

हम महेन्द्र निर्ऋति वरुण [illegible] ब्रह्माजी आदित्य देवतागण विश्वेदेव [illegible] सिद्धगण ॥ १४ ॥

और जो संसार की सृष्टि करने वा[illegible] रजोगुण तमोगुण से रहित जो भृगु आदिक माया स्पर्श होने से सत्त्व गुण वाले [illegible]

द्वादशैते विजानीमो धर्मं भागवतं भटाः ! ।
गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वाऽमृतमश्नुते ॥ २१ ॥
एतावानेव लोकेऽस्मिन् पुंसां धर्मः परः स्मृतः ।
भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ २२ ॥
नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः ! ।
अजामिलोऽपि येनैव मृत्युपाशादमुच्यत ॥ २३ ॥

एतावताऽलमघनिर्हरणाय पुंसां सङ्कीर्तनं भगवतो गुणकर्मनाम्नाम् ।
विक्रुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिम् ॥ २४ ॥
प्रायेण वेद तदिदं न महाजनोऽयं देव्या विमोहितमतिर्बत माययाऽलम् ।
त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥ २५ ॥
एवं विमृश्य सुधियो भगवत्यनन्ते सर्वात्मना विदधते खलु भावयोगम् ।
ते मे न दण्डमर्हन्त्यथ यद्यमीषां स्यात् पातकं तदपि हन्त्युरुगायवादः ॥ २६ ॥
ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः ।
तान्नोपसीदत हरेर्गदयाऽभिगुप्तान्नैषां वयं (१) न च वयः प्रभवाम दण्डे ॥ २७ ॥
तानानयध्वमसतो विमुखान् मुकुन्दपादारविन्दमकरन्दरसादजस्रम् ।
निष्किञ्चनैः परमहंसकुलैरसङ्गैर्जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान् ॥ २८ ॥
जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदाऽपि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥ २९ ॥
तत्क्षम्यतां स भगवान् पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः ।
स्वानामहो न विदुषां रचिताञ्जलीनां क्षान्तिर्गरीयसि नमः पुरुषाय भूम्ने ॥ ३० ॥

भाषा टीका ।

जिन भगवान् को प्राणिमात्र मन वचन कर्म से हृदय से प्राणों से भी सब आत्माओं के आत्मा होकर हृदय में रहने पर भी नहीं जानते हैं जैसे कि घट पटादि रूपादिक चक्षु को नहीं देखते हैं तिस प्रकार सब से परे होने से उस परमात्मा को कोई नहीं जानता है ॥ १६ ॥

वे परमात्मा हरि स्वतन्त्र हैं सब के आधीश सब से परे हैं माया के अधिपति हैं महात्मा हैं उनके दूत उनके ही, स्वभाव रूप गुणवाले इस जगत् में प्रायः करके विचरते रहते हैं ॥ १७ ॥ कोई जिनके स्वरूप को देख नहीं सकता है देवतों से जो सदा पूजित हैं [illegible] अद्भुत ऐसे श्रीविष्णु भगवान् के भृत्यजन विचरते हुवे भगवद्भक्तिमान् मनुष्यों को अन्यदुष्टों से तथा मेरे दंड से भी रक्षा करते हैं ॥ १८ ॥

साक्षात् भगवान् ने प्रवृत्त किया जो धर्म है तिसको ऋषि अथवा देवता उत्तम सिद्ध असुर सिद्ध चारणादिक भी नहीं जानते हैं तो मनुष्य तो कहां से जान सकेंगे ॥ १६ ॥

ब्रह्माजी नारदजी श्रीमहादेवजी सनत्कुमारजी मनुजी प्रह्लादजी जनकजी भीष्मजी बलि महाराज श्रीशुकदेवजी हम ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे भटाः ! ॥ २१ ॥

तमेव धर्ममाह । एतावानिति ॥ २२ ॥

न चात्र प्र[illegible] वक्तव्यं इत्याशङ्क्याह । नामोच्चारणेति । येनैव केवलेन सकृदुच्चरितेन ॥ २३ ॥

ननु नामाभासेन कथं सर्वपापक्षयः स्यात् । अश्वमेधाद्युपायैरपि विधानात् तथाहि "सायंप्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते" इति अनुदिनमिदमादरेण शृण्वन्निति । "श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः । जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम्" । इत्यादिभिश्चैव पुराणे तत्र तत्र पठ्यते पुराणान्तरे च "पापक्षयश्च भवति स्मरतां तमहर्निशम्" इति ।

(१) भयामिति श्रीवीरराघ०

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्रैव च ।

तस्मात्सङ्कीर्तनं विष्णोर्जगन्मङ्गलमंहसाम्
महतामपि कौरव्य ! विद्ध्यैकान्तिकनिष्कृतम् ।

इत्यादिना सम्यक्कीर्तनादेव मुच्यते। किञ्च। तथा सति किमिति मन्वादयो द्वादशाब्दादीनि स्मरेयुः तस्मादिदमनुपपन्नमिव तत्राह। एतावतेति। भगवतो गुणानां कर्मणां च नाम्नां च सम्यक्कीर्तनमिति यदेतावता पुंसामघनिर्हरणाय पापक्षयमात्राय अलमुपयोगो नास्ति अलंशब्दोऽत्र वारणे। यथाहामरसिंहः "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इति उपयोगाभावमेवाह। अजामिलो महापातक्यपि नारायणेति विक्रुश्य न तु सम्यक्कीर्तयित्वा तथा पुत्रं विक्रुश्य न तु हरिम् अघवानशुचिरपि म्रियमाणोऽस्वस्थचित्तोऽपि मुक्तिमवाप न त्वघनिर्हरणमात्रमतो नामाभासेनापि सर्वपापक्षय इत्येव तत्त्वमावृत्तिश्रद्धादिविषयस्तु पापवासनाक्षयार्था इत्युक्तमेव हरेर्गुणानुवादः खलु सत्त्वभावन इत्यत्र ॥ २४ ॥

यदुक्तं व्यर्थं तर्हि द्वादशाब्दादिस्मरणमिति तत्राह। प्रायेणेति। महाजनो मन्वादिः। अयम्भावः। यथा मृतसंजीवनौषधिमजानन्तो वैद्या रोगनिर्हरणाय त्रिकटुकनिम्बादीनि स्मरन्ति तथा स्वयम्भूशम्भुप्रमुखद्वादशव्यतिरेकेणायं महाजनोऽतिगुह्यमिदमज्ञात्वा द्वादशाब्दादिकं स्मरतीति। किञ्च। मायया देव्या अलं विमोहितमतिरयं जनो मधु मधुरं यथा भवत्येवं पुष्पितायां पुष्पस्थानीयैरर्थवादैर्मनोहरायां त्रय्यां जडीकृता अभिनिविष्टा मतिर्यस्य अतो महत्येव कर्मणि श्रद्धया युज्यमानो नाल्पे प्रवर्तते दृश्यते हि प्राकृतस्य लोकस्य महति मन्त्रादौ श्रद्धा अल्पेऽश्रद्धा तस्मादस्य ग्राहको नास्तीति तैर्नोक्तम्। यद्वा। स्वामीनः सिंहोऽस्त्येतावता श्वसृगालादिनिवारणाय तं यथा न प्रयुङ्क्ते तथाऽतिक्षुद्रपापस्य न तन्निरसनाय परममङ्गलं हरेर्नाम स्मरन्ति। यद्वा नाममाहात्म्यज्ञाने सर्वमुक्तिप्रसङ्गादित्येषा दिक् अन्यदिक्लयः ... नातिप्रपञ्च्यते ॥ २५ ॥

... भक्तियोगममीषां पातकं न स्यादेव यदि ... वादः कीर्तनम् ॥ २६ ॥

... निर्णीय भृत्याननुशास्ति। न इति। ये भगवत्प्रपन्नाः ... तत्समीपमपि न गच्छत ... ॥ २७ ॥

... नार्हन्ति ... मुकुन्दपादारविन्दयोः ... स्वधर्मेण ... ॥

जिह्वा ... इत्यादि। ... विष्णुः ... ॥ २८ ॥

... आपयनि। नादिनि ... नः स्वपुरुषैरकम- ... स्वपुरुषैः स्वीयैरेव पुरुषैर्यदस्मादसदन्याय्यं कृतं तत्त- ... क्षम्यतां महतां स्वानां स्वीयानां भक्तानां ... युक्तैव। मह इति पाठे स्वीयानां माहात्म्यमविदुषां नः क्षमां करोत्वित्यर्थः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एते वयं द्वादश हे भटाः ! भागवतं धर्मं जानीमः तत्प्रभावं जानीम इत्यर्थः कथम्भूतं गुह्यं गोप्यं विशुद्धं केवलसत्त्वप्रधानाधिकारं दुर्बोधमितरैर्दुर्विज्ञेयं यं धर्मं ज्ञात्वामृतं मुक्तिमश्नुते प्राप्नोति ॥ २१ ॥

कोऽसावीदृशो धर्मः कियान् वा तत्राह। एतावानेवेति। भगवति तन्नामग्रहणादिभिरनुगृहीतो यो भक्तियोगः स एव पुंसां लोके परं उत्कृष्टो धर्मः लोके पुरुषैः साध्य उत्कृष्टो धर्मः भगवद्भक्तियोग एव स्वैतावानविच्छिन्नप्रेमपूर्वानुध्यानपर्यन्त एव"प्रेमपूर्वमनुध्यानं भक्तिरित्यभिधीयत" इति वचनार्थमभिप्रेत्य भक्तिशब्देनैवार्थलाभादेतावानेवेत्युक्तम् ॥ २२ ॥

आस्तां भगवद्भक्तियोगप्रभावस्तावन्नामोच्चारणप्रभावमेव पश्यतेत्याह। नाम्नेति। हे पुत्रकाः ! हरेर्नामोच्चारणमाहात्म्यं पश्यत येन नामोच्चारणमाहात्म्येनाजामिलोऽपि अपिशब्दस्तस्य सुतरां मुक्त्यनर्हतां सूचयति। मृत्युपाशात् संसारपाशान्मुक्तोऽभूत् ॥ २३ ॥

अतः पुंसामघस्य निर्हरणाय निःशेषक्षपणाय एतावतैवालं कियता भगवतो गुणकर्मप्रतिपादकनाम्नां सङ्कीर्तनामितीयता कुतः यद्यस्मादघवान् पाप्यपि अजामिलो म्रियमाणः पुत्रं नारायणेति विक्रुश्याहूय मुक्तिमुपेत्यगादित्यर्थः ॥ २४ ॥

नन्वेवं विधं नाममाहात्म्यादिकं स्वयम्भ्वादिवदन्येऽप्यधीतशास्त्रा अपि किं न जानीयुस्तत्राह। प्रायेणेति। महाजनः शास्त्रज्ञोऽप्ययं जनः तदिदं नाममाहात्म्यादिकं प्रायशो न वेद तत्र हेतुः देवस्य भगवतः संबन्धिन्या माययाऽलमत्यर्थं विमोहिता मतिर्यस्य तादृशः तं प्रति विवृतानि वदेति। किञ्च। मधु पुष्पितायां मधु मधुरं यथा भवति तथा पुष्पितायां पुष्पस्थानीयक्षुद्रस्वर्गादिफलप्रकाशकार्थवादैर्मनोरमायामित्यर्थः एवंभूतायां त्रय्यां जडीकृताभिनिविष्टा मतिर्यस्य अत एव वैतानिके महत्येव कर्मणि युज्यमानः भगवन्मायामोहितत्वादर्थवादाश्रयणे कर्मासक्तचित्तत्वाच्च न वेदेत्यर्थः ॥ २५ ॥

एवं विविच्य ये भगवन्तं भजन्ति न तेषामस्मदुपद्रवेन्याह। एवमिति। सुधियः कुशलाः ये जना एवं नाममाहात्म्यादिकं विमृश्यानन्ते त्रिविधपरिच्छेदरहिते षाड्गुण्यपूर्णे भगवति ... भक्तियोगं विदधते कुर्वते खलु ते मम दण्डं प्र... ... तेषां पापकाभावादित्यर्थः यदि किञ्चित्तेषां पापं स्यात्तर्हि तदपि पातकमुरुगायस्य भगवतो वा... गुणाभि... दात्मकनामग्रहणादिरूपो हन्ति क्षपयति ॥ २६ ॥

एवमाक्षेपस्योत्तरमभिधायाधुना ... भिः। ये जनाः साधवः साधुगुण... भगवदात्मकत्वेन सर्वं पश्यन्तीति ... उपायोपेयभावेन भगवन्तं शरणं ... ये परिगीताः पवित्राश्च गाथा येषां ... आपसीदत न तत्समीपं गच्छतेत्यर्थः ... गुणान् ...

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेषां दण्डे वयं प्रभवामः समर्थो भवेम ॥ २७ ॥

तर्हि क आदेयास्तत्राह । तानिति । तानानयध्वं कानजस्रं सम्यतं निष्कामैः परमहंसानां ज्ञानिनां कुलैः सङ्घैः रसज्ञैः जुष्टात् सेवितान्मुकुन्दस्य पादारविन्दयोर्मकरन्दतुल्यो रसः तस्माद्विमुखानत एवासतः पापिष्ठान्नरकद्वारे गृहे बद्धतृष्णान् कृताभिलाषान् ॥ २८ ॥

किञ्च । येषां जिह्वा चेतः शिरांसि भगवन्नामधेयचरणारविन्दवचनस्मरणनमस्कारान् कुर्वन्ति तानानयध्वमित्याह । जिह्वेति । भगवतो गुणप्रतिपादकं नामधेयं यस्य जिह्वा न वक्ति यस्य चेतः भगवच्चरणारविन्दं न स्मरति यस्य च शिरः सकृदपि श्रीकृष्णाय नो नमति तान् कृतं विष्णोः कृत्यमाराधनं यैस्तानत एवासतः दुष्टानानयध्वम् ॥ २९ ॥

एवं स्वदूतानादिश्य दूतकृतापराधभिया भगवन्तं क्षमापयति । तदिति । स्वपुरुषैरस्मद्भटैर्यद्यत्कृतमपराद्धं तत्पुराणः पुरुषो भगवान्नारायणः क्षाम्यतां दिवादित्वात्कर्त्रर्थे सार्वधातुके श्यन् स्वानां स्वभक्तानामज्ञानां कृताञ्जलीनां नोऽस्माकं क्षान्तिरस्मद्विषया क्षान्तिरित्यर्थः अहो गरीयसी गुरुतरा बहुला भगवति वर्तत इतिभावः तस्मै भूम्ने सर्वान्तर्यामिणे नमः "अञ्जलिः परमा मुद्रा क्षिप्रं देवः प्रसीदति" इत्युक्तत्प्रसादनिमित्ताञ्जलिबन्धनेन नमस्करोतीति भावः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किञ्च । धर्मस्वरूपं निवेदयतु भवानित्याशङ्क्य उत्तमं धर्मं वदामीत्यभिप्रायेणाह । एतावानिति । तस्य हरेर्नामग्रहणादिभिर्भगवति यो भक्तियोगः एतावानुत्तमः परो धर्मः स्मृत इत्यन्वयः "एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः" इति स्मृतावुक्तम् ॥२२॥२३॥

नारायणेत्यादिगुणनाम्नां मधुसूदनेत्यादिकर्मनाम्नां गुणानां कर्मणां नाम्नां वा यत्सङ्कीर्तनमेतावता पापनिर्हरणाबाधं साधनान्तरं नापेक्षितमित्यन्वयः आक्रुश्य आहूय ॥ २४ ॥

देव्या बहुविधविलासोपेतया मधुपुष्पितायां स्वर्गादिपुष्पप्रकाशिकायां वैतानिके वेदविहिते यज्ञसम्बन्धिनि वा युज्यमानः प्रेर्यमाणः ॥ २५ ॥

भागवतं भक्तियोगमुरुगायवादः भगवन्नामकीर्तनम् ॥ २६ ॥

गाथाः सङ्कीर्तनानि वेदादिभिर्नित्यगीतसङ्कीर्तनाः गदया कौमोदकया ॥ २७ ॥

असतः लोकनिन्दितकर्मनिरतान् निरयवर्त्मनि नरकद्वारे गृहे आर्यान्त्री ॥ २८ ॥

अकृतविष्णुकृत्यान् अननुष्ठितविष्णुपादार्चनादिकर्मणः ॥२९॥

(१) सकृदाङ्घ्रिपद्ममधुलिट् कृष्णपादारविन्दमकरन्दं संसेवमानः पुमान् स्वकर्मणोद्भवेषु मायागुणेषु विषयेषु न रमते पुरुषार्थबुद्धिं न करोति यतः कर्मणः पुनः रजः रागः स्यात्तादृशं कर्म तुच्छेन कर्दमजलेन कर्दमप्रक्षालनमिवेति दर्शयति ॥ ३० ॥

---

(१) इतः परमध्यायसमाप्तिपर्यन्तं श्रीधरस्वामिपाठापेक्षया श्लोकानां कश्चित्संख्याविपर्यासो विद्यते ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

विजानीम एव ननु निजस्मृत्यादौ स्पष्टं कथयाम इत्यर्थः तत्र हेतुः । गुह्यं लोकमर्यादारक्षणाय गोप्यम् । किञ्च । साधारणजनैर्दुर्बोधञ्च । दुर्बोधत्वे हेतुः विशुद्धं नहि शुद्धाः शुद्धं ज्ञातुमर्हन्तीति गुह्यत्वे हेतुविशेषः । यमिति । हे भटा ! इति तस्माद्यूयं तु सुतरां न जानीथेत्यर्थः ॥ २१ ॥

लोकेऽस्मिन्निह जगतीत्यर्थः तन्नामग्रहणादिभिरिति तृतीया प्रकृत्यादिभ्य इतिवत् ॥ २२ ॥ २३ ॥

एतावतेत्यस्य टीकायां पापवासनाक्षयार्थो इत्यत्र तथापि महदपराधाद्यालम्बनेन तिष्ठति या पापवासना तस्याः क्षयार्थो इत्यर्थः मरणे तु निरपराधस्यैव सतो मुखे नामाविर्भावः स्यादिति भावः । इत्थमेव द्वितीये "एतावान् साङ्ख्ययोगाभ्याम्" इत्यत्र व्याख्यातम् । अन्ते तु परमो लाभ इति । तदुक्तम् । कृष्णः कृष्णः कृष्ण इत्यन्तकाले जल्पन् जन्तुर्जीवितं यो जहाति । आत्मः शब्दः कल्पते तस्य मुक्त्यै व्रीडानम्रो तिष्ठतोऽन्याङ्गणस्यौ" इति । मुक्तिमियायेति जीवन्मुक्त्यपेक्षया ॥ २४ ॥

महाजनो ब्रह्मघोतरमुम्यादिः । स एव देव्या विमोहितमतिरित्यादिलक्षणः ॥ २५ ॥

एवं पूर्वोक्तभगवद्भक्तिमहिमप्रकारम् । सर्वान्मनेति । नित्यनैमित्तिकपरित्याग उक्तः तथापि दण्डं नार्हन्ति । तत्र यदि दैवाद्विविधाचरणेन पातकं स्यात्तदपि यथा कथञ्चित्तत्कीर्तनमात्रं हर्तीत्यर्थः ॥ २६ ॥

तेषामेव माहात्म्यानुवादपूर्वकं शिक्षयति । ते देवेति । नोपसृतेति । तन्निकटे पातक्यपि चेद्व्रजति तदपीति भावः ॥ २७ ॥ २८ ॥

अस्तु तावत्तेषां वार्ता यतो जिह्वा नवक्तीति । यस्य जिह्वापि श्रीभगवतो गुणञ्च नामधेयञ्च वा एकदा जन्मम यदा कदापि न वक्ति जिह्वाया अभावे चेतश्च तच्चरणारविन्दमेकदापि न स्मरति चेतसां विक्षिप्तत्वे शिरश्च कृष्णाय कृष्णं वस्यीकर्तुं नो नमति । "शाठ्येनापि नमस्कारं कुर्वतः शार्ङ्गधन्वने । शतजन्मार्जितं पापं तत्क्षणादेव नश्यति" इति स्कान्दोक्तमहिमानं नमस्कारं न करोति तानानयध्वम् । तत्र हेतुः असतः असत्त्वे हेतुः । अकृतविष्णुकृत्यान् । यथा च स्कान्दे रेवाखण्डे श्रीब्रह्मोक्तौ । स कर्त्ता सर्वधर्माणां भक्तो यस्तव केशव ! । स कर्त्ता सर्वपापानां यो न भक्तस्तवाच्युत ! । पापं भवति धर्मोऽपि तवाभक्तैः कृतो हरे । निःशेषधर्मकर्त्ता ... भक्तो नरके हरे । सदा तिष्ठति भक्तस्ते ब्रह्महापि विमुच्यते । श्रीपाद्मे मार्कण्डेयं कृतं पापमपि धर्माय कल्पते । मामनादृत्य धर्मोऽपि पापं स्यान्मत्प्रभावत" इति । युक्तञ्च तत् । श्रवणकीर्तनश्रवणादिना सर्वेषां भक्त्युपासनमित्यादिना सर्वे विधिनिषेधाः स्युरित्यादिना च परमनित्यत्वादिप्रतिपादनात् एवं सङ्कीर्तनादीनां श्रवणानामति सुकराणामभावे परेषां सुतरामेवाभावो भवेदिति सामान्येनैव विष्णुकृत्यरहितत्वमुक्तम् । जिह्वादीनां करणभूतानामपि कर्तृत्वेन निर्देशः । पुरुषानिच्छयापि यथोचितकीर्तनादिकमादचे चरणारविन्दमिति विशेषाकृतिर्निर्देशः यमस्य भक्तिव्यापक एव ननु तन्नामस्मरणनियामकः अत्राभक्तानामानयनेन भक्तानामानयनमेव विधीयते "आनयनस्योत्सर्गसिद्धत्वात्" "वेवस्वतं संयमनं जनानाम्" इति श्रुतेः "सकृन्मनः कृष्णपदारविन्दयो" इत्यादौ तद्युक्तम्

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

णीति विशेषणं तु तेषां तदुद्दिष्टपथगमनसामर्थ्यस्यापि घातकं तादृशानन्तस्मरणस्य प्रभावविशेषमेव बोधयतीति ज्ञेयम् । यथैव नारसिंहे ।

अहममरगणार्च्चितेन धात्रा यम इति लोकहिताहिते नियुक्तः ।
हरिगुरुविमुखान् प्रशास्मि मर्त्यान् हरिचरणप्रणतान् नमस्करोमि ।

इति । तथैवाग्रे स्कान्दवचनम् । तथैव स्कान्दवचनम् ।

न ब्रह्मा न शिवाग्नीन्द्रा नाहं नान्ये दिवौकसः ।
शक्तास्तु निग्रहं कर्त्तुं वैष्णवानां महात्मनाम् ।

इति ॥ २९ ॥

स्वपुरुषैर्द्वारभूतैर्यश्चोऽस्माभिरसत्कृतम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तर्हि तमेव धर्ममस्मान् भवकान् शिक्षयित्वा त्रायस्वेत्यत आह । एतावानेव । प्रभेदबाहुल्येऽपि वस्तुतस्त्वयमेवेति भावः । पर इति । परशब्दविशेष्यत्वेनोच्यमानः तन्नामग्रहणादिभिरिति कर्मोपलक्षणाः सगुणयोगो व्यावृत्तः एतदेव श्रीभागवतस्याभिधेयं तत्त्वम् । यदुक्तं शास्त्रारम्भ एव "धर्मः प्रोज्झितकैतवोऽत्र परम" इति "स वै पुंसां परो धर्म" इति ॥ २२ ॥

न चात्र प्रमाणमन्वेष्टव्यं साक्षाद्दृष्टत्वादित्याह । नामेति ॥२३॥

ननु सकृदुच्चरितेनैव नामाभासेन कथं सर्वपापक्षयः । तन्नामग्रहणादिभिरिति त्वयाद्यादिपदोपादानात् कीर्त्तनश्रवणकभक्तियोगेन परमधर्मेण सर्वपापक्षयपूर्वकमोक्षप्राप्तिरित्युक्तत्वादित्यत आह । एतावतेति । भगवतो गुणानां कर्मणां नाम्नां ... कीर्त्तनमित्येतावता पुंसामघनिर्हरणाय पापक्षयमात्राय ... नाहित अलंशब्दोऽत्र वाच्यो नामादीनामेकतरस्यापि ... कीर्त्तनादपि सर्वाघनिर्हरणसिद्धेरिति भावः ... न तु सम्यक् कीर्त्तयित्वा तच्च नारायणेति ... पुत्रं विकुर्वन् न तु हरिम् अघवानशुचिरपि न ... अन्यैः ... गिर्ह्योऽप्यतिप्रसिद्धमहापातक्यपि ... गणादुःअविवशोऽपि न तु सुष्ठुचित्तः मुक्ति... पापनिर्हरणमात्रं तस्मात्तन्नामग्रहणादिभिरिति "... कीर्त्तनं ध्यानं हरेरद्भुतकर्मणः । जन्मकर्म... विचेष्टितम्" इति "तस्मात् सङ्कीर्त्तनं विष्णोः" ... "... मादरेण शृण्वन्" इत्यादिषु भक्त... नाम्नां ... आदेरपि यद्विधानं तन्निरपराधानां ... नामापराधक्षयार्थञ्च । "... नुनक... मि" इत्यत्र ... "... मनुष्याणामुद्धारणमिदं ... भगि ... ... मोऽस्त्यावधिकम्" इति ... ... इत्यनेन मोक्षक निर्... ...युक्तानां नामाभास... मत्यगम् । अधिकारि...युक्तानि ... वचनाङ्करणा ... पापक्षयश्च भवति स्मरतां तमहर्निशम्" इत्यत्र तु चकारात् ... प्रेमभक्तिश्चेति व्याख्येयमिति पापक्षयमात्रा... विद्याक्षयः सायुज्यसालोक्यादिकन्तु नामाभासस्यैक... ...मित्येतदुपाख्यान एव दृष्टम् ॥ २४ ॥

... नामसङ्कीर्त्तनादि भगवद्भजनं प्रायेणानुपदिशन्तः किमिति विद्वांसः कर्मयोगमेवोपदिशन्ति कुर्वते च तत्राह । प्रायेणेति । महाजनो जैमिन्यादिरिदं न वेद ननु शास्त्रकृत कथं न वेद तत्राह । देव्या परमेश्वर्या । अविद्यया मोहने खलु न किमप्यैश्वर्यमतो विद्वांसमपिकं मोहयेदिति भावः अत एव मधु मधुरं यथा स्यात्तथा पुष्पितायामर्थवादः पुष्पाणि सञ्जातानि यस्यास्तस्यां त्रय्यां जडीकृता अर्थाभिनिवेशाद्विवेकरहितीकृता मतिर्यस्य सः । अत एव वैतानिके द्रव्यानुष्ठानमन्त्रादिविस्ताररवति कर्माणि महति दर्शपौर्णमासादियागे च बहुलायासवति लौकिकप्रतिष्ठादिहेतावयुञ्जमानो युक्तोऽल्पायासे नाम कीर्त्तनादौ न रज्यतीत्यर्थः ॥ २५ ॥

अथापि ते देव पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि "जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोऽपि चिरं विचिन्वन्" इति ब्रह्मोक्तेः शास्त्रज्ञा अपि भगवत्तत्त्वानभिज्ञाः स्युरनधीतशास्त्रा अपि भगवदनुगृहीताः शुद्धबुद्धयः सन्तो विवेकिनो भगवन्तं भजन्त्येवेत्याह । एवमिति । सर्वात्मना सर्वेणैव मनसा न तु नित्यनैमित्तिककर्माद्यनुष्ठानार्थम् । मनस्यः कर्मव्यथां परित्यज्येत्यर्थः । दण्डं नित्यकर्माकरणप्रत्यवायजनितम् । यदि दैवात् पातकं निषिद्धाचरणलक्षणं स्यात्तदुरगायवादः कीर्तनम् ॥ २६ ॥

तस्मादेतावद्दिनपर्यन्तं यत्कृतं तत्कृतमेव भाग्येनैव रक्षिता अभूत अतः परन्तु यदि यदुपदिशामि तच्छृणुतेत्याह । ते इति । गाथाः कथाः समदृशः स्वस्य परस्य च सुखदुःखादिकं समं पश्यन्तः गदयाभिगुप्तानिति सकृदचनतो युष्माकमपराधो विष्णुदूतैः चान्न इत्यहं मन्ये यदि पुनरपि भक्तानां समीपं यास्यथ तदा हरेरेव गदया तेषां हस्तस्थितया चूर्णीभविष्यथेति भावः यूयं तावत् वराकाः के तावत् वयं मत्सहिता ब्रह्माद्या अपि वयः कालो ब्रह्मादेर्नियन्तापि ॥ २७ ॥

तर्हि कीदृशानानेष्यामस्तत्राह । तानमतः असाधून् असाधूनां लक्षणमाह । मुकुन्दपादारविन्दयोर्मकरन्दरसात् तत्प्राप्तिसाधनात् भक्तियोगाद्विमुखान् तादृशभक्तियोगमकुर्वाणानित्यर्थः । ननु तेषां वैमुख्यादेव स खलु मकरन्दरसो न लिप्सनीय इत्यतो मकरन्दरसं विशिनष्टि । निष्किञ्चनैः केवलभक्तिमद्भिः परमहंसकुलैश्च प्रधानीभूतभक्तिमद्भिर्नुशुप्रात् सेवितात् अत एव निरयवर्त्मनि नरकप्रापके गृहे बद्धतृष्णान् ॥ २८ ॥

किञ्च । मुकुन्दस्य सकृदपि कीर्त्तनस्मरणादिकं तत्प्राप्तिसाधनं भवतीति तद्भक्तोऽपि सत्कृत्तनाभिधीयन्त इत्यनन्ताञ्जिह्वा एवानेतव्याः इत्याह । जिह्वेति । जिह्वाया अभावे चेतश्चेत्यादि चेतसां त्रितयत्वे कृष्णायेत्यादि एकदापीति सर्वत्रान्वेति तान् कैवल्येन प्राधान्येन वा अकृतविष्णुकृत्यान् विष्णोः ... मपि कृ... ...कृतवन्तः अत एव असतः अवैष्णवान् । अत्र जन्ममध्ये ... ...मध्ये वेति यथा स्वमतं व्याचक्षते इत्यर्थः ॥ २९ ॥

भृत्यापराधेन स्वामिनो दण्ड इति न्यायेन ... भावयन् सविनयं प्रणमति । तत्तस्मात् ... स्वपुरुषैः सुष्ठु अपुरुषैः कुपुरुषैरस्माभिः ... नः कीदृशानां स्वानां तत् ... न विदुषाम् अतोऽज्ञत्वादेव रचिता ... । ... गुरवोऽपि तु समर्था एव क्षमन्ते तत्राह । स्वानिगीरं ... इदम् , तदपि त्वमेव युक्ता स्वानां मह इति पाठे ... नानां यस्माद्दीमाहात्म्यं तदाम्नातम् ॥ ३० ॥

तस्मात् सङ्कीर्तनं विष्णोर्जगन्मङ्गलमंहसाम् ।
महतामपि कौरव्य ! विद्ध्यैकान्तिकनिष्कृतम् ॥ ३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भागवतं धर्ममर्थाद्भगवदनुग्रहादेव विजानीमः ॥ २१ ॥

एतस्मस्य विष्णोर्नामग्रहणादिभिरङ्गैः सहिता भक्तिर्भवति एतावान् धर्मः तथोक्तम् "प्रथमे स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे" इति ॥ २२ ॥ २३ ॥

भगवतो गुणानां कर्मणां नाम्नां च सङ्कीर्तनं पुंसामघनिर्हरणाय दुरितक्षयमात्राय भवतीति एतावता एतावन्मात्रेण फलकथनेन अलं भारणं फलसङ्कोच इत्यर्थः अलं वारणे "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इति कोशात् यतः अघवान् अजामिलः नारायणेति पुत्रं विक्रुश्य मुक्तिमिवाय अवाप ॥ २४॥

भगवन्मायामोहिताः महाजनत्वेन प्रसिद्धाः अपीदं न जानन्तीत्याह । प्रायेणेति । त्रय्यां कर्मप्रतिपादकवेदत्रय्यां मधुरं यथा भवति तथा पुष्पितायां पुष्पं तत्तुल्यैरर्थवादैः "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्यादिवाक्यैर्मनोहरायां जडीकृताभिनिविष्टा मतिर्यस्य सः अत एव वैतानिके वेदप्रोक्ते महति कर्मणि युज्यमानः अयं कर्मनिष्ठो महाजनः इदं भगवन्नामकीर्तनादिरूपायाः भक्तेर्माहात्म्यं प्रायेण न वेद यतो देव्या देवमाययालमत्यर्थं विमोहितमतिस्तस्मात् प्राचीनबर्हिर्वत्केचिन्महदुपदेशेन जानन्त्यपीति प्रायेणेत्युक्तम् ॥ २५ ॥

भावयोगं भक्तियोगं विदधते कुर्वते उरुगायस्य बहुधा गीयमानस्य भगवतो वाङ्गं नामकीर्तनादिरूपां हन्ति यदि किञ्चित्पातकं स्याद्भवतु तेषां तन्नास्तीत्यर्थः ॥ २६ ॥

भृत्यान् प्रति धर्मतत्त्वमुपदिश्याद्दण्ड्यान् दण्ड्यांश्चाह । त इति त्रिभिः । तान्नोपसीदत तत्समीपं न गच्छत वयः कालश्च न प्रभवति ॥ २७ ॥

परमहंसानां कुलैः समूहैर्जुष्टात् सेवितान्मुकुन्दपादारविन्दयोः मकरन्दरसस्तदङ्कितरसस्तस्मादजस्रं सततं नित्यं विमुखान् [illegible]रहितास्तान् ॥ २८ ॥

नानेयात । जिह्वेति । यद्येषाम् ॥ २९ ॥

भगवन्तं क्षमापयति । नः अस्मत्पुरुषैः असमर्थायैः सुष्ठु अपुकर्षेर्निर्मितैर्भिन्नैर्यदसङ्गतमयुक्तं कृतं तस्य हितत्वस्वत्वेन प्रसिद्धो भगवान् क्षमतां महतामहो नामसंकीर्तनादिमाहात्म्यं न विदुषामस्माकं स्वानां रचिताञ्जलीनां भृत्यानां [illegible]णी चान्तिर्गरीयसि स्वामिनि युक्तैवेति शेषः सर्वमङ्गलाभाय [illegible]मामि । नम इति ॥ ३० ॥

भाषा टीका ।

हे दूत हों यह चारह भक्त अति गुप्त विशुद्ध दुर्बोध भागवत धर्म को जानते हैं जिस धर्म को कि जान कर मनुष्य मुक्ति को प्राप्त हो जावे ॥ २१ ॥

इस जगत् में इतनाही पुरुषों का परम धर्म है भगवान् (के) नारायण आदि नाम को ग्रहणादि करके भगवान् में भक्तियोग होता है ॥ २२ ॥

हे पुत्रो ! नारायण के नामोच्चारण के माहात्म्य को आप लोग देखो ऐसा पापी अजामिल भी जिससे मृत्यु पास में से छूट गया ॥ २३ ॥

मनुष्यों के पापों के नाश करने को इतनाही बहुत है जोकि भगवान् के गुण कर्म नामों का कीर्तन करना है जिन भगवान् के संबंध से ऐसा पापी अजामिल भी अपने पुत्र के पुकारने में नारायण ऐसा कह कर मुक्ति को प्राप्त हो गया ॥ २४ ॥

प्राय करके भगवान् की माया देवी से अत्यंत मति के मोहित हो जाने से यह जीव खोटी पुष्प सरी की वेद की वाणी से जड होकर बड़े भारी यज्ञादि कर्म में लग जाता है सो भक्ति नहीं करता है ॥ २५ ॥

इस प्रकार विचार करके बुद्धिमान् लोग सब प्रकार से भगवान् में परम भाव से नाम संकीर्तनादिक करते हैं वे पुरुष मेरे दण्ड के योग्य नहीं होते हैं यदि उनके कोई पातक भी होवें तो भगवान् का गुणानुवाद ही उस पातक को नाश करदेता है ॥ २६ ॥

जो समदृष्टि वाले हैं भगवान् के भक्त हैं वे साधु हैं देवता सिद्ध जन उनकी पवित्र कथाओं को गाते हैं श्री हरि के गदा से वे रक्षित रहते हैं उनके पास तुम लोग मत जाना उनके दण्ड देने में हम अधिकारी तथा काल कोई समर्थ नहीं है ॥ २७ ॥

उन पुरुषों को तुम ले आओ जोकि नरक के मार्ग घर में तृष्णा को बांधे हैं तथा निष्किञ्चन परमहंस रसज्ञों के समूह से सेवित जो मुकुन्द भगवान् का चरणकमल रस तिस से निरन्तर विमुख हैं ॥ २८ ॥

और उनको ले आओ जिनकी जिह्वा भगवान् के गुण नामधेयको नहीं कथन करती है जिन का चित्त कभी भगवान् के चरणारविन्द को नहीं स्मरण करता है जिन का मस्तक एक वार भी श्रीकृष्णचरण में नम्र नहीं होता है इसप्रकार जो विष्णु भगवान् के सेवा नहीं करने वाले हैं तिन असत्पुरुषों को तुम ले आओ ॥ [illegible] ॥

अपने नौकरों के द्वारा जो हमने भगवान् का अपराध किया है सो हम नहीं जानते थे अब हाथ जोडते हैं वे श्रीनारायण पुराण पुरुष भगवान् हमारे ऊपर क्षमा करें अग्र पुरुषों में तो क्षमा रहती है इसी से हम उन भूमा पुरुष के अर्थ नमस्कार करते हैं ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्मादित्यादिः शुकोक्तिः अंहसोऽपि मङ्गलरूपम् ॥ ३१ ॥

शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः ।
यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः ॥ ३२ ॥
कृष्णाङ्घ्रिपद्ममधुलिण्न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु ।
अन्यस्तु कामहत आत्मरजः प्रमार्ष्टुमीहेत कर्म यत एव (१)रजः पुनः स्यात् ॥ ३३ ॥
इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिङ्करास्ते ।
नैवाच्युताश्रयजनं प्रतिशङ्कमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ! ॥ ३४ ॥
इतिहासमिमं गुह्यं भगवान् कुम्भसम्भवः ।
कथयामास मलय आसीनो हरिमर्चयन् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चस्कन्धे पारमहंस्यां संहितायां
वैयासिक्याम् अजामिलोपाख्यानं नाम
तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकान्तिकत्वमेवाह । शृण्वतामिति । व्रतादिभिस्तथा न शुद्ध्येत् ॥ ३२ ॥

एतदुपपादयति । कृष्णाङ्घ्रिपद्मयोर्मधु लेढि आस्वादयतीति तथा मधुलिडतातितुच्छत्वेन विसृष्टा ये मायागुणा विषयास्तेषु पुनर्न रमते अन्यस्तु तन्मध्वास्वादरहितोऽत एव कामाभिभूतः स्वस्यात्मनो रजः पापं प्रमार्ष्टुमपि कर्मैव प्रायश्चित्तरूपमीहेत यतः कर्मणः पुनरपि रजः पापं स्यादेव कुञ्जरशौचवत् [illegible] ।भावात् ॥ ३३ ॥

[illegible] ।भयो बभूवुः किं तु सत्यमुक्तमिति मेनिरे ततः [illegible] प्रतिश[illegible]माना अस्मानेव हन्यादिति शङ्कां वहन्तस्तं द्रष्टुं [illegible] स्म पाठान्तरे तु विस्मितधियो जाताः ते च ततः [illegible] स्मेत्यर्थः ॥ ३४ ॥

कु[illegible]भवोऽगस्त्यो मलये पर्वते आसीनोऽव्यग्रो हरिमर्चयन् पुन[illegible]सार्थं हरेः पादौ स्पृशन्नित्यर्थः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्च[illegible]न्धे
श्रीधरस्वामिकृतभावार्थदी[illegible]कायाम्
तृतीयोऽध्या[illegible] ॥ ३ ॥

श्रीमद्वीरराघवा[illegible]र्यकृत[illegible]चन्द्र[illegible]न्द्रिका ।

एवं [illegible]त्याह किं तान् प्रति [illegible] पूर्वां यमोक्तिमभिधाय [illegible]मुपसं[illegible]ष्यमाणोऽन्तरा रा[illegible] [illegible]स्य यथैव नरकान्तरः नानो[illegible]त्मना तेषामित्यस्योत्तरं सङ्क्रमयति मुनिः । तस्मादिति त्रिभिः । [illegible] ! तस्मादितिहासमुक्तेन नाममाहात्म्यस्य श्रुतत्वाद्[illegible]मोक्त्वा सर्वादितन्नाम्न विष्णोः सङ्कीर्तनं जगतो मङ्गलावहं महतां विपुलानामप्यंहसां पापानामेकान्तिकात्यन्तिकनिष्कृतिं मुख्यं प्रायश्चित्तं विद्धि जानीहि ॥ ३१ ॥

व्रतादिकं तु न मुख्यमित्याह । शृण्वतां हरेरुद्दामानि निपुणानि वीर्याणि यशांसि मुहुर्मुहुः शृण्वतां गृणतां कथयतां चात्मा चित्तं भगवति श्रवणादिना सुजातया भक्त्या यथा शुद्ध्यति तथा व्रतादिभिर्न शुद्ध्यति ॥ ३२ ॥

कृष्णस्याङ्घ्रिपद्मयोर्यन्मधु रसस्तं लेढ्यास्वादयतीति तथा पुनर्वृजिनावहेषु दुरितापादकेषु विसृष्टेषु प्रकृतिकार्यगतशब्दादिषु न रमते न सज्जते अन्यस्तु कृष्णाङ्घ्रिपद्मध्याननिरतस्तु कामैः शब्दादिभिर्हतोऽभिभूतः आत्मनः स्वस्य रजः पापं प्रमार्ष्टुमपनेतुं कर्म प्रायश्चित्तरूपमीहेत कुर्यादित्यर्थः कर्म विशिनष्टि । यतः कर्मणोऽनन्तरं पुनः रजः पापं स्यात् सम्भाव्येत पुनः इति रेफलोपे दीर्घः ॥ ३३ ॥

यमोक्तिमुपसंहरति । इत्थमिति । हे राजन्नित्थं भर्त्रा यमेन गदितं "कर्तृकरणे" इति समासः भगवतो महित्वं माहात्म्यं संस्मृत्य प्रत्य[illegible]भिज्ञाय विष्णुदूतोक्तिरीत्या एवं ज्ञात्वा विस्मिता धीर्येषां ते [illegible] [illegible]राः तेन यमशासनेनाच्युताश्रयजनं प्रति शङ्कमानाः [illegible] [illegible]गमनेनास्माकं भर्तृदण्डनं स्यादिति शङ्कमानाः [illegible] ततः प्रभृति तं द्रष्टुं च बिभ्यति भयं प्राप्नुवन्तीत्यर्थः ॥ ३४ ॥

उक्तस्य प्रामाण्यज्ञापनाय तस्याप्रवर्तकमाह । इतिह[illegible] मलये पर्वते आसीनो भगवान् कुम्भसम्भवोऽगस्त्यः हरिम[illegible] यमिमं गुह्यमितिहासं कथयामास [illegible] ॥ ३५ ॥

इति श्रीमद्भागवते महापु[illegible]
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यत् स्वपुरुषैरनुष्ठितं नाऽस्माकं तत् क्षन्तव्यमित्यन्वयः न विदुषां हरेर्माहात्म्यमजानताम् । ननु क्षान्त्यर्थं को दण्ड इति तत्राह । रचितेति । किमनेनानायासेनेति तत्राह । नम इति । द्रव्यादिलक्षणदण्डमन्तरेण कथं क्षान्तिरिति तत्राह । क्षान्तिरिति । वरीयसि वरतरे परतम पुरुषाय नमः इत्येतावता द्रव्यादिदानाधिकेन क्षान्तिर्भवतीति शेषः "भूयिष्ठान्ते(१)नम उक्तिं विधेम" इति श्रुतेः सर्वदा सर्वाहिता सन्निष्ठते महति क्षमेति मर्ममा ३१।३२

अंहसां पापानामकान्तिविनिष्कृतं नियतं प्रायश्चित्तं न केवलं स्त्रीशूद्रादीनां नामसङ्कीर्तनं विधीयते अन्येषामपीति भावेनाह । महतामिति ॥ ३३ ॥

सर्वाणि साधनान्यनुष्ठीयमानान्यपि भक्तिसहितानि बलवन्तीत्यभिप्रेत्याह । शृण्वतां इति ॥ ३४ ॥

कुम्भसम्भवोऽगस्त्यः मलये पर्वते ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमद्विजयध्वजकृतपदरत्नावल्याम्

तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्मादित्यादिश्रीशुकोक्तिः तस्मात् सङ्कीर्त्तनन्तु जगतां सापराधनिरपराधानां सर्वेषामेव महतामंहसामपराधपर्यन्तानाम् ॥३१॥

सुष्ठु जातया रतिरूपया भक्त्या तु यथा मुक्तिपर्यन्तस्य किमुत पापमात्रस्य वासनाक्षयप्रकारेणात्मा मनः शुद्ध्येत् तथा व्रतादिभिर्नेत्यर्थः ॥ ३२ ॥

तदेव व्यनक्ति । कृष्णाङ्घ्रीति । अन्यः भक्तिमात्रहीनः ॥३३।३४॥

कुम्भसम्भवोऽगस्त्योऽपीत्यर्थः संहिताध्ययने श्रीद्वैपायनाच्छ्रुतत्वात् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विष्णुदूतानां यमस्य च वाक्यप्रामाण्येन यदि यत्किञ्चित् कीर्त्तनेनैव सर्वपापक्षयस्तदा किमुत सम्यक्कीर्त्तनेनेत्याह । तस्मादिति श्रीशुकः ॥ ३१ ॥

अथ नामकीर्त्तनाभ्यासवतां भक्तानां सापराधानामपि भक्तिरेव पूर्णा स्यादयुक्तमनामापराधयुक्तानां नामान्येव शरणमित्याशयः । अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि इति । तस्यां सत्यान्तु जीवात्मैव शुद्ध्येत् । किं पुनर्मन इत्याह । शृण्वतामिति । आत्मा जीवः अविद्यामालिन्याद्यथा शुद्ध्यति न तथा व्रतादिभिः कर्मकृतैः प्रायश्चित्तैः पापक्षये सत्यपि पापबीजस्याक्षयान्मनः किञ्चिन्मात्रमेवापातनः शुद्ध्यतीत्यर्थः । तेन भो राजन्! "प्रायश्चित्तमथोऽपार्थं मन्ये कुञ्जरशौचवत्" इति यत्त्वयाक्षिप्तं तत् सत्यमेव मूलपापक्षपो भक्तानां भक्त्यैव तेषामेव नरकगमनाभावो भगवत्प्राप्तिश्च तदभावात् कामिनान्तु पापपुण्यवशान्नरकस्वर्गयातायातं पुनः पुनरित्युपाख्यानेन सिद्धान्तः प्रतिपादित इति द्योतितम् ॥ ३२ ॥

तदेवं सापराधा निरपराधा वा भक्ता भक्तिमेव कुर्वीरन् न तु प्रायश्चित्तं भक्तावविश्वस्ताः स्मार्त्तास्त्वर्थवादाविकुतर्ककर्कशमतयः प्रायश्चित्तमेव । ननु नामकीर्तनमित्यतः प्रायश्चित्तशास्त्रमपि सार्थकमित्याह । कृष्णाङ्घ्रिपद्मयोर्मधुलिड्भ्रमरः स यथा गोगर्दभादिभक्ष्येषु घासोदनादिषु क्षुधा म्रियमाणोऽपि न विषज्जते तथैव भक्तः पूर्वदशायां दुर्विषयरतोऽपि भक्तत्वे सति विसृष्टे मायागुणास्तेषु न रमते रमधातुप्रयोगात् यद्यपि कनिष्ठभक्तस्तान् सेवते तदपि "जुषमाणश्च तान् कामान् दुःखोदर्कांश्च गर्हयन्" इत्युक्तरीत्या तेषु नैव रमते । अन्यः स्मार्त्तस्तु आत्मनो रजः पापं प्रमार्ष्टुं कर्म ईहतैव प्रायश्चित्तं कुर्वीतैव यत एव रजः पापं कुञ्जरशौचवत् पुनः स्यादेव नामापराधवत्त्वादिति भावः ॥ ३३ ॥

अच्युताश्रयजनं प्रति नैव गच्छन्तीति शेषः । तेनाच्युतेति पाठे ते विस्मृतधियो बभूवुः पुनस्ते च बिभ्यतीति ॥ ३४ ॥

कुम्भसम्भवोऽगस्त्यो मलयपर्वते आसीनोऽव्ययो हरिमर्चयन् पुनः पुनर्विश्वासार्थं हरेः पादौ स्पृशन्नित्यर्थं इति श्रीस्वामिचरणाः ॥ ३५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

षष्ठस्कन्धे तृतीयोऽयं सङ्गतः सङ्गतः सताम् ॥ ३ ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जगतां मङ्गलं सर्वपुरुषार्थपदं विद्धि महतामंहसां महापापानामप्यैकान्तिकनिष्कृतिं च विद्धि ॥ ३१ ॥

संकीर्त्तनादिरूपाया भक्तेः सर्वांहसामैकान्तिकनिष्कृतित्वमाह । शृण्वतामिति । हरेर्वीर्याणि शृण्वतां सुजातया भक्त्या यथा आत्मा सर्वपापमूलरूपवासनायुक्तं मनः शुद्ध्येत् तथा व्रतादिभिः कृच्छ्रचान्द्रायणादिव्रतैः आदिना तपोयज्ञादिभिश्च नेत्यर्थः ॥ ३२ ॥

मनसः शुद्धिर्निर्वासनत्वं तत् कृष्णभक्त्यैव भवति नान्यथेत्याह कृष्णेति । कृष्णाङ्घ्रिपद्मयोर्यन्मधु रसस्तल्लिट् तदास्वादयतीति स तथा कृष्णभक्तः दुःखनावहेषु दुःखप्रदेषु मायागुणकार्येषु विषयेषु विसृष्टेषु त्यक्तेषु पुनः न रमते तद्वासनारहितमनस्कत्वादन्यस्तु कृष्णाभक्तस्तु आत्मनो मनसः रजः विषयवासनात्मकं रागं प्रमार्ष्टुं प्रक्षालयितुं यतः पुनः राग एव स्यात्तत् कर्म यज्ञतपोव्रतादिकर्माहेतेत्यन्वयः ॥ ३३ ॥

तदनन्तरं यमदूतानां चेष्टितमाह । इत्थमिति । इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य सत्यमेवोक्तमिति मत्वा नैव विस्मृतधियस्सम ततः प्रभृति प्रतिशङ्कमानाः आत्मानं प्रति [illegible]

(१) वयं ते तुभ्यं भूयिष्ठां महतीं नम इत्युक्तिं विधेम न तु त्वत्प्रीतिं कर्तुं शक्नुम इति ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

शङ्कमानाः अच्युताश्रयं जनं द्रष्टुं च बिभ्यति स्म ॥ ३४ ॥

कुम्भसम्भवोऽगस्त्यः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

तृतीयाध्यायार्थप्रकाशः ॥ ३ ॥

भाषा टीका।

जिस हेतु से हे परीक्षितजी! जगत् का मङ्गलकारक तथा बड़े अपराधों का नाशक श्रीविष्णु के नाम संकीर्तन सब पापों का अत्यन्त प्रायश्चित्त है ऐसा जानो ॥ ३१ ॥

और श्रीहरिके मनोहर चरितों के वारम्वार सुनने वालों के कथन करने वालों के हृदय मे अच्छी उत्पन्न हुई भक्ति से आत्मा शुद्ध हो जाता है व्रतादिकों से तैसा शुद्ध नहीं होता है ॥ ३२ ॥

श्रीकृष्ण चरण कमल का भ्रमर पुरुष तो स्वयं छांड़े हुये पाप दुःखके देने वाले माया कृत गुणों मे रत नही होता है अन्य पुरुष तो कामनाओं से हत होने से आत्मा के रजको दूर करने को प्रायश्चित्तादि कर्म की चाहना करता है जिस के कि करने से फिरभी रजोगुण ही उत्पन्न हो जाता है ॥ ३३ ॥

हे राजन्! इस प्रकार से अपने पति का कहा भगवान् का जो माहात्म्य तिसको स्मरण करके बुद्धि से विस्मित होकर ये यमराज के किंकर उस दिन से शंका कर के नारायण भक्त के प्रति नहीं जाते हैं भगवद्भक्तों को देखकर भी डरजाते हैं ॥ ३४ ॥


इस पवित्र इतिहास को अगस्त्य भगवान् ने मलयाचल पर्वत के ऊपर भगवान् की पूजा करते समय में हमसे कहा है ॥ ३५ ॥

इति श्रीभागवत पञ्चस्कन्ध तीसरे अध्याय का

भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चस्कन्धे तृतीयोऽध्यायः समाप्तः ॥ ३ ॥



॥ चतुर्थोऽध्यायः ॥

राजोवाच ।
देवासुरनृणां सर्गो नागानां मृगपक्षिणाम् ।
सामासिकस्त्वया प्रोक्तो यस्तु स्वायम्भुवेऽन्तरे ॥ १ ॥
तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन् ! यथा ।
अनुसर्गं यया शक्त्या ससर्ज भगवान् परः ॥ २ ॥
सूत उवाच ।
इति संप्रश्नमाकर्ण्य राजर्षेर्बादरायणिः ।
प्रतिनन्द्य महायोगी जगाद मुनिसत्तमाः ! ॥ ३ ॥
श्रीशुक उवाच ।
यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः ।
अन्तःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृताम् ॥ ४ ॥
द्रुमेभ्यः क्रुद्ध्यमानास्ते तपोदीपितमन्यवः ।
मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ५ ॥
ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह ! ।
राजोवाच महान् सोमो मन्युं प्रशमयन्निव ॥ ६ ॥
मा द्रुमेभ्यो महाभागाः ! दीनेभ्यो द्रोग्धुमर्हथ ।
विवर्द्धयिषवो यूयं प्रजानां पतयः स्मृताः ॥ ७ ॥
(१) अहो प्रजापतिपतिर्भगवान् हरिरव्ययः ।
वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥ ८ ॥
अन्नं चराणामचरा ह्यपदः पादचारिणाम् ।
अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥ ९ ॥
यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः ! ।
प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।
चतुर्थादित्रिभिर्विश्वरूपजन्मविवक्षया ।
प्रचेतःसुतदक्षस्य वंशस्तावत् प्रतन्यते ॥ १ ॥
चतुर्थे तु प्रजासृष्ट्यै दक्षेणाराधनं हरेः ।
तपसा हंसगुह्याख्यस्तोत्रेण च निरूप्यते ॥ २ ॥
प्रसक्तानुप्रसक्तेन स्वायम्भुवमनोरन्वयं ।
नामप्रभावमाकर्ण्य वंशव्याख्यां बुभुत्सते ॥ ३ ॥
देवासुरेति द्वाभ्याम् । सामासिकः संक्षिप्तो यः प्रोक्तस्तृतीयस्कन्धे ॥ १ ॥

(१) आदौ प्रजापतिरिति श्रीवीर० श्रीविजय० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यासं विस्तारं ते त्वत्तो यया शक्त्या यथा ससर्ज तां शक्तिं तत्प्रकारं च ज्ञातुमिच्छामि अनुसर्गमनुवृत्तं सर्गम् ॥२॥३॥

दक्षादिरूपेण ससर्जेति यदुक्तं दक्षजन्मप्रकारमाह । यदेति । प्राचीनबर्हिषः पुत्रा यदा समुद्रमध्यादुन्मग्ना निर्गतास्तदा गां पृथ्वीं द्रुमैर्वृतां ददृशुः नारदोपदेशतः प्राचीनबर्हिषो निवृत्त्या अराजके सति कृष्याद्यभावात् ॥ ४ ॥

तपसा दीपितो मन्युर्येषां ते तेषां द्रुमाणां दग्धुमिच्छया ॥ ५ ॥

ताभ्यां वाय्वग्निभ्यां दह्यमानांस्तान् द्रुमान् वनस्पतीनां राजा सोम उवाच मा द्रुमेभ्य इति नवभिः ॥ ६ ॥

हे महाभागाः ! विवर्धयिषवो विशेषेण वर्धयितुमिच्छवः ॥ ७ ॥

प्रजापतीनां तद्भक्ष्यभोज्यदाहोऽनुचित इत्याह । अहो इति त्रिभिः । ऊर्जं भक्ष्यम् इषमन्नम् ॥ ८—१० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमाकर्णितस्वायंभुवतत्पुत्रोत्तानपादप्रियव्रतसंमतिचरित्रस्तत्प्रसंगात्पृष्टभूगोलभगोलेषु तत्संस्थानतत्प्रसंगात्पृष्टनरकानिस्तारोपायः धर्मपरिहारश्च पूर्वं संक्षेपेण श्रुतं मनुसर्गं विस्तरेण बुभुत्सुः पृच्छति राजा । देवासुरेति द्वाभ्याम् । स्वायंभुवे मन्वन्तरे सतु देवादीनां सर्गः सामासिकः संक्षिप्तः त्वया प्रोक्तः ॥ १ ॥

हे [illegible] ! [illegible] सर्गस्य व्यासं विस्तरं त्वत्तो ज्ञातुमिच्छामि । कोऽसौ [illegible] आह । भगवान् परः सृज्यमानप्रकृतिपुरुष[illegible] यथानुसर्गं यं यं व्यष्टिसर्गं ससर्जाकरोत् ॥ २ ॥

[illegible] आह सूतः । इतीति । हे मुनिसत्तमाः इतीत्थं [illegible] तं प्रश्नमाकर्ण्य प्रतिनन्द्य साधुपृष्टमिति [illegible] महायोगी जगाद ॥ ३ ॥

[illegible] इति । तत्र भगवान् बादरायणिर्विस्तरेण पूर्वं [illegible] अनुशयकन्यान्तं प्राचीनबर्हिषः पुत्राणां च [illegible] प्रकरोति । यत आपतिनाम्नय इत्यन्तेन । प्रा[illegible] दश पुत्राः यदा अन्तःसमुद्रात सर्वसमुद्र[illegible] निर्गतास्तदा गां भूमिं ददृशुः कथंभूतां द्रु[illegible] उपदेशात् प्राचीनबर्हिषो निवृत्त्याऽराजके कृष्याद्यभावात [illegible] ॥ ४ ॥

[illegible] तपसा उद्दीपितः मन्युः [illegible] येषां ते तेषां वृक्षाणां दिधक्षया दग्धुमिच्छया मुखाद्वायुमग्निं च ससृजुरुत्पादितवन्तः ॥ ५ ॥

ताभ्यां वाय्वग्निभ्यां नितरां दह्यमानांस्तान् द्रुमानुपलभ्य दृष्ट्वा हे कुरूद्वह ! महान् सन् सोमो राजा चन्द्रः मन्युं तत्कोपं शमयन्निव प्रशमयितुमित्यर्थः उवाच योचितवान् ॥ ६ ॥

[illegible] इत्युक्त्वा प्रतिबुध्यमित्यन्वेन । हे महाभागाः ! [illegible] कर्तुं [illegible] विवर्धयि[illegible] प्रजानां [illegible] उक्ताः विवर्धयिषूणां प्रजापतीनामिदं वनस्पतिदाहनमनुचितमिति भावः ॥ ७ ॥

सत्यं विवर्धयिषवः प्रजापतयश्च किं द्रुमैः प्रयोजनमित्यत्राह । आदाविति । प्रजापतीनां ब्रह्मादीनामपि पतिर्विभुरखिलद्रुमेष्वन्तरात्मतया अव्ययः अपरिस्पृष्टतद्गतविकारः भगवान् हरिरादौ जगदादिकाले वनस्पतीनोषधीश्च ससर्ज तान् तांश्च विशिनष्टि । ऊर्जमिषमिति । ऊर्जं पितॄनुद्दिश्य दीयमानमन्नम् इषं देवानुद्दिश्य दीयमानम् इषोर्जरूपा वनस्पतय इत्यर्थः । अयं भावः । देवपितृयज्ञावशिष्टेन प्रजानां जीवनं विहितम् "यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः" इति स्मरणात् "भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्" इति यज्ञानवशिष्टान्नभक्षणनिन्दनाच्च एवं देवाद्युपजीव्यान्नरूपेण परिणममानान् वनस्पत्यादीन् निर्दग्धुं मार्हथेति ॥ ८ ॥

एतदेवोपपादयति । अन्नमिति । यावत् पादचारिणां चराणां भूतानामपादचारिणोऽचराः अन्नम् । अन्येषु भक्ष्यभक्षकभावो नास्ति किंतु तेषामुपभोग्यत्वाकार एक एवेति भावः चरेषु त्वाकारद्वयमस्तीत्याह । अहस्ता इति । हस्तयुक्तानां द्विपदाम् अहस्ताः चतुष्पदः अन्नमदनीयाः सामान्याभिप्रायकमेकत्वं क्लीबत्वं च । चरेषूभयाकारकथनं व्यतिरेकदृष्टान्तार्थम् । यथा चरेषु केषाञ्चिदत्तृत्वमन्येषामदनीयत्वं न तथाचरेषु किंत्वदनीयत्वमेवेति सर्वोपभोग्यत्वान्निरपराधत्वाच्च तद्द्रोहः न कार्य इति तात्पर्यम् ॥ ९ ॥

किञ्च । हे अनघाः ! यूयं पित्रा प्राचीनबर्हिषा देवदेवेन तपसा तोषितेन भगवता च प्रजासर्गाय निर्दिष्टाः हि यतः एवमतः कथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुख्याविति सूत इत्यत्र यं यदुक्तं ब्रह्मादीनाममाहात्म्यं हरिभक्तजनाधिक्यं यत इत्यत्र च यः सर्गोऽभिहितः प्रतिज्ञातः सोऽपि भगवदेकनिष्ठ इति प्रतिपाद्यतेऽस्मिन्नध्याये । तत्र तृतीयाध्याये कथितः सर्गो भगवदेकनिष्ठ इतान्यनिष्ठः साक्षादन्यनिष्ठोऽपि भगवत्प्रसादायत्त इत्यभिप्रेत्य राजोक्तार्थमनूद्य तद्विस्तरं पृच्छत्याह । देवेति । सामासिकः संक्षिप्तः ॥ १ ॥

[illegible] ॥ २ ॥

[illegible]

[illegible]

[illegible]

किञ्च । [illegible]

[illegible]

[illegible] इति [illegible]

पूर्वकमुपक्रमते । यदेति । प्रचेतस इति [illegible]

दश पुत्राः यदान्तःसमुद्रादुत्थिताः [illegible] ॥४॥

तदा मुखतो वायुमग्निं च ससृजुः [illegible] तेषां वृक्षाणां [illegible] ॥ ५ ॥

[illegible] तत्प्रकारं कथयति । ताभ्यामिति । [illegible] ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमाहेति तत्राह । मा द्रुमेभ्य इति । कुधद्रुहेत्यादिना चतुर्थी तत्र हेतुमाह । विवर्धयिषव इति । विवर्धयिषवः प्रजावृद्धिं करिष्यन्तः यूयं पतयः पातारः स्मृता इति यदतो द्रुमेभ्यो द्रोग्धुं नार्हथेत्यन्वयः ॥ ७ ॥

दाहे नारायणानुग्रहदूरत्वं भवतां स्यादित्यभिप्रेत्याह । आवार्वाति । ऊर्जं पित्र्यम् इयं देवान्नम् ॥ ८ ॥

वनस्पत्योषधीनामूर्जाद्यत्वं कथमत्राह । अन्नमिति । अचराश्चराणामन्नम् इत्याद्यन्वेतव्यम् ॥ ९ ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सामासिकः षष्ठादिमन्वन्तरजातविस्ताराकथनात् ॥ १ ॥

व्यासं तन्मन्वन्तरजातदक्षानन्तरशाखोपशाखारूपम् ।

पूर्वसर्गस्य केनचित् कारणेन नष्टप्रायत्वादनुसर्गम् ॥ २ ॥ ३ ॥

यदेति । उत्तानपादवंशान्तमारभ्य कथनं तस्यैवान्तिमराज्यत्वात् ॥ ४—८ ॥

ऊर्जमन्नातिरिक्तं भक्ष्यम् । अन्नमिति सबलानां दुर्बलमन्नमसृजदित्यर्थः ॥ ९—२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पुनश्च पोषणं वाच्यमिन्द्रस्याचार्यघातिनः ।
सचाचार्यो विश्वरूपो दक्षकन्यासुतोद्भवः ॥ १ ॥
दक्षस्यातश्चतुर्थान्ते संक्षेपेणोक्तजन्मनः ।
कथाध्यायत्रयेणेह स्कन्धे वाच्या सविस्तरम् ॥ २ ॥
राजापि सृष्टेः प्रस्तावे स्वायम्भुवसुतान्वयौ ।
सप्रसङ्गौ समाकर्ण्य भूयः पप्रच्छ तत्पुनः ॥ ३ ॥
चतुर्थे तु प्रचेतोभ्यः जातो दक्षः प्रजाः सृजन् ।
हंसगुह्यस्तवेनेशं तुष्टावेति निरूप्यते ॥ ४ ॥

देवासुरेति द्वाभ्याम् । सामासिकः संक्षिप्तः यः प्रोक्तस्तृतीयस्कन्धे व्यासं विस्तारम् । ते त्वत्तः अनुसर्गमनुवृत्तं सर्गम् । यया शक्त्या यथा ससर्ज तां शक्तिं तं प्रकारञ्च परो ब्रह्मा ॥ १—३ ॥

दक्षादिरूपेण ससर्जेति वक्तुं रुद्रापराधाच्छागमुखस्य दक्षस्यावमानदुःखेन देहं त्यक्तवतः पुनर्जन्मप्रकारमाह । यदेति । गां पृथ्वीं द्रुमैर्वृतां ददृशुः । नारदोपदेशतः प्राचीनबर्हिषि विरज्य वनं गते सत्यराजकत्वेन कृष्याद्यभावात् ॥ ४ ॥

कोपोद्दीपितेति । तपसः कोपाविष्प्रानत्वात् ॥ ५ ॥

सोमो अधिष्ठाता स एव वृक्षाणां राजा प्रशमयन्निवेति प्रथमं साम्नोपायेन मन्योरपगमासम्भवादिति भावः ॥ ६ ॥ ७ ॥

ऊर्जमन्नातिरिक्तं फलादि भक्ष्यं वनस्पतिहेतुकम् । इयमन्नं गोधूमाद्योपधिहेतुकम् । चराणां पद्भ्यां चरतां भ्रमरादीनाम् अचराः पुष्पलताद्या एवान्नम् । पादचारिणां पद्भिश्चरतां गामहिषादीनाम् अपदो घासाद्या एवान्नं तेष्वेव हस्तयुक्तानां व्याघ्रादीनाम् महतां गवादयः द्विपदां पद्भ्यां चरतां मनुष्याणां चतुष्पदो हरिणाद्याश्चकारात् अचरा धान्यगोधूमाद्याश्च ॥ ८—१० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं पापकारिणो रक्षणमुक्त्वाथ चतुर्थे दक्षजन्मानुवादपूर्वकं दक्षकर्तृकं भगवदाराधनं वर्णयन् पुण्यकारिणो दक्षस्य हंससम्पादनेन रक्षणं वर्णयति । तत्र तावत् संक्षेपतः उक्तां देवादिसृष्टिं श्रुत्वा तां विस्तरतो बुभुत्सुः राजर्षिः पृच्छति । देवेति द्वयेन । सामासिकः संक्षिप्तस्तृतीये स्कन्धे त्वया यः प्रोक्तः ॥ १ ॥

हे भगवन् ते त्वत्तः तस्यैव सर्गस्य व्यासं विस्तरं वेदितुमिच्छामि को विस्तर इत्यत्राह । भगवान् मुख्यो विश्वहेतुः यया शक्त्या येन नियोज्यकर्त्रा यथा अनुसर्गमनुकृतं ससर्ज तत् श्रोतुमिच्छामीति योजना ॥ २ ॥ ३ ॥

दक्षेण नियोज्यकर्त्राऽनुसर्गमकरोदिति वक्तुं तज्जन्मानुवदति यदेत्यादिना । उन्मग्ना निर्गताः गां भुवम् ॥ ४ ॥

तद्दिधक्षया द्रुमाणां दग्धुमिच्छया ॥ ५ ॥

हे कुरूद्वह ! परीक्षित् वनस्पतीनां राजा सोमः ताभ्यामग्निवायुभ्यां नितरां दह्यमानान् तान् द्रुमानुपलभ्य ज्ञात्वा मन्युं प्रचेतसां क्रोधमुपशमयन्नुवाच ॥ ६ ॥

तदुक्तिमेवाह । मेति नवभिः । हे महाभागाः ! द्रुमेभ्यः द्रोहं कर्तुं मार्हथ यतो यूयं विवर्द्धयिषवः प्रजाः वर्द्धयितुमिच्छवः प्रजानां पतयः स्मृताः ॥ ७ ॥

प्रजावृद्धिकामानां प्रजापतीनां तद्भक्ष्यभोज्यदाहो न कार्य इत्याह । अहो इति त्रिभिः । ऊर्जं भक्ष्यमिषमन्नं ससर्ज ॥ ८ ॥ ९ ॥ १० ॥

भाषा टीका ।

राजा परीक्षितजी बोले देवता असुर मनुष्य नाग मृग-पक्षी इनों की सृष्टि संक्षेप से आपने कही है जोकि स्वायंभुव मन्वन्तर में भई है ॥ १ ॥

हे भगवन् ! उसीका विस्तार मैं सुनने चाहता हूं पर भगवान् ने अनुसर्गको जैसे जिस शक्ति से सृजा है सो भी मैं सुनने चाहता हूं ॥ २ ॥

श्रीसूतजी बोले राजर्षि परीक्षित के ऐसे प्रश्न को श्रवण करके मुनिसत्तम बादरायण पुत्र श्री शुकदेवजी परीक्षितजी की प्रशंसा करके फिर बोले ॥ ३ ॥

श्रीशुकदेवजी बोले जिस समय में प्राचीन बर्हि राजाके पुत्र दश प्रचेता समुद्र में से निकले तब उन्होंने सब पृथिवी को पेड़ों के मारे भरी हुई देखा ॥ ४ ॥

अन्नके न होने से वे बड़े क्रोध से दीपित होगये वृक्षों पर उनने बड़ा कोप किया तब उन वृक्षों के जलाने की इच्छा से मुखमें से अग्नि तथा वायु दोनों को पैदा किया ॥ ५ ॥

हे कुरूद्वह परीक्षित जी ! उन अग्नि वायु से वृक्षों को जलते देखकर उनके क्रोधको शान्त करने को सोम राज प्रचेतों से बोलते भये ॥ ६ ॥

आतिष्ठत सतां मार्गं कोपं यच्छत दीपितम्।
पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥ ११ ॥
तोकानां पितरौ बन्धू दृशः पक्ष्म स्त्रियाः पतिः।
पतिः प्रजानां भिक्षूणां (१) गृह्यज्ञानां बुधः सुहृत् ॥ १२ ॥
अन्तर्देहेषु भूतानामात्मास्ते हरिरीश्वरः।
सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ ॥ १३ ॥
यः समुत्पतितं देह आकाशान्मन्युमुल्बणम्।
आत्मजिज्ञासया यच्छेत् स गुणानतिवर्तते ॥ १४ ॥
अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः।
वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यताम् ॥ १५ ॥
इत्यामन्त्र्य वरारोहां कन्यामाप्सरसीं नृप !।
सोमो राजा ययौ दत्त्वा ते धर्मेणोपयेमिरे ॥ १६ ॥
तेभ्यस्तस्यां समभवद्दक्षः प्राचेतसः किल।
यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ॥ १७ ॥
यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः।
रेतसा मनसा चैव तन्ममावहितः शृणु ॥ १८ ॥
मनसैवासृजत् पूर्वं प्रजापतिरिमाः प्रजाः।
देवासुरमनुष्यादीन्नभस्स्थलजलौकसः ॥ १९ ॥
तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः।
विन्ध्यपादानुपव्रज्य सोऽचरद्दुष्करं तपः ॥ २० ॥

भाषा टीका।

हे महाभाग प्रचेता हो दुखित वृक्षोंपर कोप मतकरो तुमतो प्रजाओं के पतिहो प्रजावृद्धि करने वालेहो ॥ ७ ॥

अहो प्रजापतियों के पति भगवान् ईश्वर ने वनस्पति ओषधियोंको पितरों का अन्न देवतों का अन्न रूप सृजा है ॥ ८ ॥

चर जीवों के अचर जीव आहार हैं पादचारी जीवों के आहार बिना पादचारी जीव हैं बिना हाथवाले जीव हाथ वालों के आहार हैं चार पांव वाले जीव दो पांववालों के आहार हैं ॥ ९ ॥

हे अनघ हो भगवान् ने और आप के पिताने तो आप लोगों को सृष्टि के वास्ते आज्ञादिया है आप लोक कैसे वृक्षों का द्रोह करते हो ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अत आतिष्ठत आश्रयत सतां मार्गमुपशमं पित्रादिभिर्जुष्टम् ११

प्रजानां प्रजापतिरिव बन्धुरनन्तर्ज्ञानिकानाशां न कर्तव्य इति दृष्टान्तपञ्चकेनाह। तोकानां बालानां मातापितरौ अज्ञानां ज्ञानदो बुध एव सुहृत् ॥ १२ ॥

ईश्वराधिष्ठानत्वाच्च भूतद्रोहो न युक्त इत्याह। अन्तर्देहेष्विति। वो युष्माभिः ॥ १३ ॥

आकाशाद्देहे समुत्पतितमाकस्मिकमित्यर्थः। आत्मविचारेण यो नियच्छेत् ॥ १४ ॥

खिलानां शेषाणां वो युष्माकं च शिवमस्तु वृक्षरक्षणार्थं तदीयां कन्यां ददाति वार्क्षी वृक्षैः पालिता ॥ १५ ॥

आमन्त्र्य सान्त्वयित्वा आप्सरसीमप्सरसः [illegible] सुताम ॥ १६ ॥ १७ ॥

दुहितृवत्सल इति। तस्य कन्यावंश एवेत्यु[illegible] प्रजापतिर्दक्षः ॥ १८ ॥ [illegible] तस्य-

अबृंहितमसंवृद्धं विन्ध्यस्य पादान् संनिहि[illegible] निवृत्तं [illegible] यस्मात्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सतां साधूनां मार्गमातिष्ठताश्रयत । कथंभूतं वः युष्माकं पित्रा प्रचेतसा पितामहेन तत्पित्रा ये च वः युष्माकं प्रपितामहादयः तैश्च जुष्टं सेवितम् । पित्राद्याचरितमेव सन्मार्गमाश्रयतेत्यर्थः । दीपितं कोपं यच्छत उपसंहरत ॥ ११ ॥

किञ्च । भगवतः सर्वरक्षकस्य शरीरत्वाद्वनस्पतिषु क्रोधोऽयुक्त इत्याह । तोकानामिति । तोकानां बालानां पितरौ यथा बन्धू रक्षकौ यथा दृशः पक्ष्म बन्धुः यथा च स्त्रियाः पतिर्बन्धुः तथा प्रजानां नृपः यथा च भिक्षूणां भिक्षेत्यध्याहारः यथा गुह्यज्ञानां प्रयोगकुशलानां बुधः धीमान्साभिज्ञः तथा भगवान् रक्षकः सुहृच्च भूतानामन्तर्देहेषु हृदयेष्वात्मेश्वरः अन्तः प्रविश्य नियन्ता हरिरास्तेऽतः सर्वं जगत् अस्य भगवतो धिष्ण्यमेवमीक्षतोऽसौ भगवान् वः युष्माकं तोषितो भवति । यद्वा । प्रतिनियतरक्षकत्वव्यवस्थामुल्लङ्घ्य कथं द्रोग्धुमर्हथेत्याह । तोकानामिति । पित्रादय इव प्रजानां चराचरात्मकानां नृपः बन्धुः रक्षकः सुहृच्च । किञ्च । भगवच्छरीरत्वाच्च न द्रोहः कार्य इत्याह । अन्तर्देहेष्विति । उक्त एवार्थः गुह्यज्ञानामिति भिक्षुविशेषणं वा गुह्यं रहस्यभूतं परमात्मस्वरूपादिकं ज्ञातुमिच्छतां बुध इव तदुपदेष्टा विद्वानित्यर्थः रक्षणं च सर्वत्रानिष्टपरिहारेष्टप्रापणात्मकमेव ॥ १२ ॥ १३ ॥

किञ्च । क्रोधोपशमस्याभ्युदयहेतुत्वाच्च तमुपसंहरतेत्याह । य इति । देहे आकाशात् समुत्पतितं यदृच्छयोत्पन्नमित्यर्थः । यद्वा । देहे आकाशाद्धृदयाकाशात् समुत्पतितमुल्वणं दुःसहं मन्युं क्रोधमात्मजिज्ञासया स्वात्मपरमात्मयाथात्म्यविचारेण यच्छेदुपसंहरेत् स पुमान् गुणान् सत्त्वादीनतिवर्तते क्रमेण संसारबन्धान्मुक्तो भवतीत्यर्थः ॥ १४ ॥

अतो दग्धैरल एव दीनैः द्रुमैरलं वीतद्रुमदाहनेनालमित्यर्थः खिलानामवशिष्टानां द्रुमाणां वः युष्माकं च शिवमस्तु । वार्क्षी वृक्षैः पालिता एषा वरा सुलक्षणा कन्या मारिषाख्या पत्नीत्वेनेत्यर्थः । प्रतिगृह्यतां युष्माभिरिति शेषः ॥ १५ ॥

इतीत्थमामन्त्र्य [illegible] सम[illegible]दिहादीनिर्भूतामृषि[illegible] वरारोहां [illegible]मारिषां कन्यां तेभ्यो दत्त्वा सोमो राजा ययौ गतः [illegible] प्रचेतसः सर्वे धर्मेण तामुपयेमिरे [illegible] । [illegible] "अपुत्रस्य[illegible]शीलानां सर्वेषां वः [illegible] । अपुत्रस्य[illegible]शीलस्य [illegible] पत्न्यादिनाशगा" इति भगवतो [illegible] पालि[illegible] इति शङ्का न कार्येति [illegible] ॥ १६ ॥

तेभ्यः [illegible] हे राजन् ! दक्षः प्रजापतिः प्राचेतसोऽभूदुत्पन्नः [illegible] ब्रह्मणोऽङ्गुष्ठजातो [illegible] [illegible] देहे [illegible] मारिषायां प्राचेतसतादृशोंऽशः तथाचोक्तं [illegible] महद्दत्त्वानादज्य- प्राचेतस [illegible] । यस्येति । यस्य प्राचे- प्रजासर्गेण त्रयो लोका आपूरिताः प्रायशो [illegible]रूपा इत्यर्थः ॥ १७ ॥

: दुहितृषु [illegible]युक्तः येन[illegible] वीर्येण [illegible] प्रजाः ससर्ज काः देवादींस्तथा नभ लमेकः स्थानं येषां तान् ॥ १९ ॥

सोमो
प्रथमं सामोपाये
ऊर्जमत्यातिरि
मायेऽपि धिद्रुतम् ।
पुष्पवताया एव[illegible]
अपवो घासाद्या एव

तमेवं मनसा क्रियमाणं प्रजासर्गमबृंहितमवृद्धमालोक्य स प्रजापतिः प्राचेतसः विन्ध्यस्य पादान् प्रत्यन्तपर्वतानुपव्रज्य उपागत्य दुश्चरमितरैः कर्तुमशक्यं तप आचरत् कृतवान् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मार्गं विशिनष्टि । पित्रेति ॥ ११ ॥

अनन्यशरणानां वृक्षाणां दाहे शरणागतवधदोषोऽपि युष्माकं स्यादित्याशयवानाह । तोकानामिति । तोकानां बालानां पितरौ मातापितरौ बन्धू इत्येतत् सर्वत्रान्वेतव्यं गृही गृहस्थः भिक्षूणाम् अज्ञानां ज्ञानदानान्नजीवनेन ॥ १२ ॥

किञ्चानेनेश्वरद्रोहोऽपि स्यादित्याशयवानाह । अन्तरिति भूतानामिति विशेषणाद्वृक्षदाहेनेश्वरदाहः कथं स्याद्भूतदाहाकरणादिति तत्राह । सर्वमिति । तस्य हरेर्धिष्ण्यं निवासस्थानम् अनेन किं फलं स्यादत्राह । एवमिति । असौ हरिः ॥ १३ ॥

इतोऽपि कोपो न कार्य इत्याह । यः समुत्पतितमिति । देहे आकाशाद्धृदयाकाशादुत्पतितमुज्ज्वलितं मन्युं यो यच्छेत् कथमात्मनः परमात्मनः जिज्ञासया विचारेण "अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः" इति श्रुत्यर्थपर्यालोचनया भूतद्रोहेण श्रीनारायणद्रोह एव स्यादिति चिन्तया स पुमान् गुणान् संसारहेतुभूतांस्तरतीत्यन्वयः ॥ १४ ॥

वार्क्षी वृक्षदुहिता वरा वरारोहा ॥ १५ ॥

वरः श्रेष्ठः आरोहो नितम्बप्रदेशो यस्याः सा तथा ताम् आप्सरसीम् अप्सरोजातिमतीम् ॥ १६ ॥

यस्य वक्षस्य ॥ १७ ॥ १८ ॥

पूर्वमादिसृष्टौ इमाः प्रजाः मनसैवासृजत् प्रजापतिर्ब्रह्मा ॥ १९ ॥

यो ब्रह्मणा कृतः प्रजासर्गः तमबृंहितमपूर्णं दृष्ट्वा ब्रह्मानुज्ञया विन्ध्यगिरेः पादान् प्रत्यन्तपर्वतानुपगम्य तपोऽचरत् स प्राचेतसो दक्षः यो मनसासृजत् स तपोऽचरदित्येकवाक्यं वा ॥ २० ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पित्रादिभिर्जुष्टं सतां मार्गम् । उपशममातिष्ठत ॥ ११ ॥

यूयं हि प्रजापालकाः द्रुमादयः प्रजाः प्रजोपजीव्या इत्येतान् पालयत । नहि पालकानां नाशकत्वं दृष्टमित्यत्र दृष्टान्तपञ्चकमाह । तोकानां बालानां स्त्रियाः पतिर्भर्ता प्रजानां पतिर्नृपः ॥ १२ ॥

ईश्वराधिष्ठानत्वाच्च भूतद्रोहो न युक्त इत्याह । अन्तरिति । यो युष्माभिरयं सर्वभूतदययैव प्रसादीश्वरस्तोषित इति किं न स्मरथेति भावः ॥ १३ ॥

ननु कोपकाले कृत एतावान् विचारस्तत्राह । य इति । आकाशादिव देहे समुत्पतितमाकस्मिकमित्यर्थः । आत्मनो जिज्ञासया विचारेण यच्छेत् उपशमयेत स गुणानिति अन्यथा यूयं गुणैरेव ग्रस्ता भविष्यथेति सामोक्त्या भेदश्च ध्वनितः ॥ १४ ॥

भेदेनाप्युपशमाभावमालक्ष्य दानमाह । अलमिति । खिलानां शेषाणां वार्क्षी वृक्षैः पालितत्वाद्वृक्षकन्या ॥ १५ ॥

तत्राघमर्षणं नाम तीर्थं पापहरं परम् ।
उपस्पृश्यानुसवनं तपसाऽतोषयद्धरिम् ॥ २१ ॥
अस्तौषीद्धंसगुह्येन भगवन्तमधोक्षजम् ।
तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः ॥ २२ ॥
॥ प्रजापतिरुवाच ॥
नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबन्धवे ।
अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयम्भुवे ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आप्सरसीम् अप्सरसः प्रम्लोचायाः सुताम् ॥ १६ ॥

समभवदिति दक्षस्य स्वायम्भुवमनुवंश्यत्वात् स्वायम्भुवे मन्वन्तरे जन्म यस्य प्रजाविसर्गेणेति प्रजाविसर्गस्त्वस्य चाक्षुष एव

चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे कालविद्रुते ।
यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥

इति चतुर्थोक्तेः । तस्मान्मध्ये मन्वन्तरपञ्चकमभिव्याप्यास्य तप एव पौर्वकालिकैश्वर्यप्राप्त्यर्थकमवगम्यते ॥ १७ ॥

दुहितृवत्सलः इति पुत्रवंशप्रभावः सूचितः ॥ १८ ॥ १९ ॥

प्रजापतिर्दक्षः विन्ध्यस्य पादान् प्रत्यन्तपर्वतान् ॥ २० ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यो युष्माकं पित्रादिभिर्जुष्टं सेवितं सतां मार्गमुपशमात्मकमातिष्ठत आश्रयत दीपितं कोपं यच्छतोपसंहरत ॥ ॥ ११ ॥

लोकानां बालानां बन्धुः सहायः सुहृत् सखा ॥ १२ ॥

भगवत्परितोषार्थं सर्वेषु भगवदधिष्ठितेषु सहायभाव एव कर्तव्यो न द्रोह इत्याह । अन्तरिति । यो युष्माभिः ॥ १३ ॥

यः आकाशावृतयाकाशात् देहे समुत्पतितं मन्युं नियच्छेदुपसंहरेत् स आत्मजिज्ञासया परमेश्वरोपासनया गुणान् अतिवर्तते त्रिगुणं प्रपञ्चमतिक्रम्य मुक्तो भवतीत्यर्थः ॥ १४ ॥

खिलानामवशिष्टानां वो युष्मत्तः शिवमस्तु वार्क्षी वृक्षैः पालिता युष्माभिः पत्नीत्वे प्रतिगृह्यताम् ॥ १५ ॥

इत्येवमामन्त्र्य सान्त्वयित्वा आप्सरसीं प्रम्लोचासुतां दत्त्वा ययौ स्वस्थानमगात् ॥ १६ ॥ १७ ॥

रेतसा वीर्येण मनसा सङ्कल्पमात्रेण मम मत्तः ॥ १८ ॥

प्रजापतिर्दक्षः पूर्वं मनसैवासृजत् ॥ १९ ॥

तं प्रजासर्गमबृंहितमसंवृद्धमालोक्य विन्ध्यस्य पादान् प्रत्यन्तभूतान् पर्वतान् ॥ २० ॥

भाषा टीका ।

सत्पुरुषों के मार्गमें स्थिति करो प्रदीपित कोपको शान्तकरो तुमारे पिता पितामह प्रपितामहने जिस मार्ग का सेवन किया है तिसी मार्ग को तुम सेवन करो ॥ ११ ॥

बालकों के बन्धु मातापिता होते हैं नेत्रके बन्धु पलकें होते हैं स्त्री का बन्धु पति होता है प्रजाओं का बन्धु नृप होता है भिक्षुकों का बन्धु गृहस्थ होता है अज्ञानियोंका बन्धु ज्ञानी होता है ॥ १२ ॥

सब देहों के भीतर मे ईश्वर हरि आत्मा हैं सब जीवों को भगवान् का स्थान जानोगे तब भगवान् सन्तुष्ट हो जांयगे ॥ १३ ॥

जो पुरुष देह आकाश के मध्यमें से उत्पन्न भये क्रोध को आत्मज्ञान से निवारण करदेता है उस के तीनों गुणो के दोष छूट जाते हैं ॥ १४ ॥

अब इन वृक्षों को मत जलाओ ये अतिदुखी हैं बाकी जो बचे हैं इन से आप का भी कल्याण होगा इन वृक्षों की एक सुन्दर कन्या है तिसको तुम पत्नी रूप से ग्रहण करो ॥ १५ ॥

हे नृप ! इस प्रकार से उनको कहकर उत्तम रूपवती अप्सरा की कन्या को उन्हे देकर सोम राजा चले गये उनने धर्मकी रीति से उसका विवाह किया ॥ १६ ॥

उन प्रचेतों में से तिस कन्या मे दक्ष नामक पुत्र उत्पन्न भया जिसके प्रजासृष्टि करने मे तीनों लोक भर गये ॥ १७ ॥

जिस प्रकार से पुत्रियों के प्रेमी दक्ष ने सब भूतों को पैदा किया वीर्य से या मन मे तिसको तुम सावधानता से सुनो ॥१८॥

प्रजापति ने पहिले मनहीं से इन प्रजाओं को सृजा है देवता असुर मनुष्य आकाशचारी पृथिवीचारी जलचर इन सबों को पैदा किया है ॥ १९ ॥

प्रजापतिने उस प्रजा की सृष्टि को नहीं बढती हुई [illegible] कर विन्ध्य पर्वत के नीचे स्थल मे जाकर अतिकठिन [illegible] आरंभ किया ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदी[illegible]

हंसगुह्याख्येन स्तोत्रेण कस्य [illegible]

पराय सर्वोत्तमाय नमो [illegible] अवितथा अनुभूतिश्चिच्छक्तिर्यस्य [illegible] निमित्तं माया च तयोर्बन्धवे नियन्त्रे [illegible] तत्त्वबुद्धिर्येषां तैर्जीवैरदृष्टं धाम स्वरूपं यस्य [illegible] निवृत्तं मानं यस्मात् पाठान्तरे निवृत्तं [illegible] यस्मात्

न यस्य सख्यं पुरुषोऽवैति सख्युः सखा वसन् संवसतः पुरेऽस्मिन् ।
गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि ॥ २४ ॥
देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ।
सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तर्हि कथं तस्य सिद्धिरत आह । स्वयम्भुवे स्वप्रकाशाय ॥ २३ ॥

अदृष्टधामत्वं दर्शयन्नाह । नेति । पुरुषः सखा जीवोऽस्मिन् पुरे देहे वसन्नप्येकत्रैव संवसतः सख्युर्यस्य सख्यं करणप्रवर्तकत्वादिकं नावैति न जानाति तस्मै कुतः व्यक्तदृष्टेः प्रपञ्चद्रष्टुः न हि द्रष्टा दृश्यो भवतीति । प्रथमान्तपाठे व्यक्ते प्रपञ्च एव दृष्टिर्यस्य सः गुणो विषयो गुणिनो विषयिण इन्द्रियादेः सख्यं प्रकाशकत्वं यथा न वेत्ति तद्वत् ॥ २४ ॥

ननु गुणो जडत्वान्न जानातीति जीवस्तु चेतनः किमिति न जानात्यत आह । देह इति । देहश्चासवश्च प्राणा अक्षाणीन्द्रियाणि मनवश्चान्तःकरणानि भूतानि च मात्राश्च तन्मात्राणयात्मानं स्वरूपं दृश्यमन्यमिन्द्रियवर्गं तयोः परं देवतावर्गं च न विदुः पुमान् जीवस्तु सर्वमेतत्त्रयं वेद गुणांश्च तन्मूलभूतान् वेद तज्ज्ञोऽपि सन् यं सर्वज्ञं न वेद तमनन्तमीडे स्तौमि ॥२५॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र विन्ध्यपादेषु त्रिकालमघमर्षणाख्यं पापहरं पुण्यं तीर्थमुपस्पृश्य तत्र स्नात्वेत्यर्थः तपसा हरिमतोषयदाराधितवान् ॥२१॥

तथा भगवन्तमधोक्षजं हंसगुह्याख्येन स्तोत्रेणास्तौषीत्तदेव स्तोत्रं तुभ्यमभिधास्यामि स्तोत्र विशिनष्टि । यतो येन स्तोत्रेण हरिः कस्य प्रजापतेर्दक्षस्यातुष्यत्तुष्टोऽभूत् । प्रसन्नोऽभूदित्यर्थः ॥ २२ ॥

हंसगुह्याख्यं स्तोत्रमुपदिशति । नमः परायेत्यादिना । स ईश्वरो मे कुरुतान्मनोरथमित्यन्तेन ग्रन्थेन । तत्र प्रथमं प्रकृतिपुरुषविलक्षणं सत्यसङ्कल्पं प्रकृतेर्नियन्तारमपरिच्छिन्नं प्रमाणशून्यावधिं सर्वकारणं नमस्करोति । पराय चिदचिद्विलक्षणाय तावच्चिदचिद्व्यावर्तकधर्मयोगमाह । अवितथानुभूतये इति । अवितथाऽमोघाऽनुभूतिः सङ्कल्परूपात्मकं ज्ञानं यस्य सत्यसङ्कल्पायेत्यर्थः । जीवस्त्वसत्यसङ्कल्प इति ततः तेनास्य व्यावृत्तिः अचिद्व्यावर्तकधर्ममाह । गुणत्रयाभासनिमित्तबन्धवे गुणत्रयाभासः सत्त्वादिगुणत्रयाभिव्यक्तस्य निमित्तं कारणं प्रकृतिः तस्या बन्धवे आश्रयभूताय प्रकृतिशरीरकाय तन्नियन्त्रे इत्यर्थः अनेनाचिद्व्यावृत्तिः एवं पदद्वयेन चिदचिद्व्यावृत्तिः । नन्वयं प्रजापतिर्वा [illegible]दिताविर्भूतसत्यसङ्कल्पः प्रकृतिविमुक्तः किं मुक्तो जीवः नेत्याह [illegible] गुणतत्त्वबुद्धिभिर्गुणत्रयकार्यभूतपृथिव्यादितत्त्वविषयबुद्धिभिरदृष्टमनुपलक्षितं धाम स्वरूपं यस्य मुक्तस्तु संसारदशायां पृथिव्यादिसङ्घातपरिणामभूतशरीरविषयबुद्धिभिर्देवोऽयं मनुष्योऽयमित्युपलक्षित इति ततोऽप्येतेनैव व्यावृत्तिः तर्हि किं नित्यसिद्धः नेत्याह । निवृत्तं मानं यस्मान्निवृत्तमानः तादृशोऽवधिरियत्ता यस्य स तथोक्तः प्रमाणशून्यावधये त्रिविधपरिच्छेदरहितस्वरूपायेत्यर्थः । नित्यसिद्धस्तु जीवः स्वरूपतः परिच्छिन्नः इति ततः तेनास्य व्यावृत्तिः स्वयम्भुवे स्वयं कारणान्तरशून्याय सर्वकारणायेति भावः ॥ २३ ॥

गुणत्रयाभासनिमित्तबन्धवे इत्यनेनाचिदाश्रयत्वमुक्तमथ चेतनबन्धुत्वमाह । न यस्येति । पुरे देहे संवसतः जीवान्तरात्मतया वसतः सख्युर्हितैककारिणः । यस्य परमात्मनः सख्यं तत्स्वरूपभावं पुरुषो नावैति । गुणिनो रत्नादेर्गुणा इव प्रभादिवत् अपृथक्सिद्धप्रकारभूतो वसन् तत्कार्यत्वेन वसन् सखा तद्गतातिशयाधानैकस्वरूपतया मित्रमयं पुरुषः नावैति नानुसन्धत्ते इत्यर्थः । तत्र हेतुरव्यक्तदृष्टिः । देहगोचरज्ञानः तस्मै सख्ये परमपुरुषाय नमस्करोमि । "द्वा सुपर्णा" इति श्रुत्यर्थोऽत्र विवक्षितः ॥ २४ ॥

नावैतीत्येतत् प्रपञ्चयति । देह इति । देहश्चासव इन्द्रियाणि प्राणा वा मनसः मनोवृत्तयः ज्ञानेन्द्रियाणि वा भूतानि पृथिव्यादीनि मात्रा गन्धादीनि तद्ग्राहकाणि कर्मेन्द्रियाणि वा एताः आत्मानं स्वस्वरूपं परं स्वेभ्यः विलक्षणमन्यं जीवात्मानं न विदुः पुमान् जीवस्तु यत् सर्वं देहादिकं तद्वेद जानातीत्यर्थः एवं तत्तज्ज्ञो देहाद्यभिज्ञोऽपि जीवः देहादिकं स्वगुणान् स्वात्मानं च जानाति तं भगवन्तं सर्वज्ञं तद्गुणांश्च न वेद तमनन्तमपरिच्छिन्नमीडे स्तौमि देहादयो दृष्टान्तार्थमुपात्ताः यथा देहादयः स्वस्वरूपं तस्माद्विलक्षणं जीवात्मानं च न विदुरेवं पुमान् देहाद्यभिज्ञोऽपि सर्वज्ञं तद्गुणांश्च न वेदेत्यर्थः ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नाम्ना हंसगुह्येन स्तोत्रेण कस्य दक्षस्य यतो येन ॥ २२ ॥

सर्वनामसंज्ञाभावाल्लोकवैलक्षण्यप्रदर्शनाय पराय नम इत्यन्वयः परत्वमुपपादयति । अवितथेत्यादिना । अवितथा यथार्था काप्यप्रतिहतानुभूतिर्यस्य स तथा तस्मै सत्यज्ञानाय "सत्यं ज्ञानम्" इति श्रुतेः गुणत्रयेणाभासः सृष्टिस्तन्निमित्तयोः प्रकृतिपुरुषयोर्बन्धुभूताय तत्र स्थित्वा ताभ्यां सृष्टौ प्रवर्तमानाय गुणत्रयप्रतीतिनिमित्ताव्यक्ताश्रयाय वा [१] "सतो बन्धुमसति निरविन्दन्" इति श्रुतेः गुणेषु शब्दादिविषयेषु यथार्थबुद्धिर्येषां ते तथा तैर्बहिर्मुखैरदृष्टधाम्नेऽज्ञातस्वरूपाय "न चक्षुषा पश्यति कश्चनैनम्" इति श्रुतेः निवृत्तो मानावधिः परिमाणलक्षणो यस्मात् स तथा तस्मै "अनन्तं ब्रह्म" इति श्रुतेः जन्मादिमतः [illegible] मनन्तत्वमिति तत्राह । स्वयम्भुव इति । स्वयम्भुवे स्वतः सिद्धाय "स भगवान् कस्मिन् प्रतिष्ठित इति स्वे महिम्नि" इति श्रुतेः ॥

[१] सतः मुख्यप्रमाणस्य बन्धुं हरिं असति प्रलये नि[illegible] प्राप्तुरिति श्रुत्यर्थः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुणात्मत्वबुद्धिभिरदृष्टधाम्न इत्येतदुपपादयति । न यस्येति । यं पुरुषो यस्य स्वरूपं न वेत्ति तस्मै महेशाय शिवादस्युत्तमाय नमस्करोमीत्यन्वयः कीदृशस्य अस्मिन् पुरे शरीरे स्थितः स्वयं च सहैव वसन् "तद्दूरे तदन्तिके" इतिश्रुतेः स्थुः सखेत्यनेदस्मिन् पुरे वर्तमानत्वादुभयोः समम् । "द्वा सुपर्णा सयुजा सखाया समानं वृक्षम्" इति श्रुतेः । अत्र दृष्टान्तमाह । गुणा इति । यथा कश्चित्पुरतः स्थितोऽपि गुणभूतो भृत्यः गुणिनः प्रधानभूतस्य राज्ञो ममासौ सखेति गम्भीरेण प्रज्ञा चिन्तितं स्वरूपं न वेत्ति । कुतोऽत्राह । अव्यक्तेति । अल्पदृष्टेः भृत्यस्य स्थूलज्ञानत्वात् राज्ञः । सूक्ष्मदृष्टित्वादित्यर्थः गुणो रूपादिर्गुणिनो द्रव्यस्य स्वरूपं यथा न वेत्ति । कुतः अव्यक्तदृष्टेः दृष्टिरहितत्वाज्जडत्वादित्येतदुपव्याख्यानम्

यथा राज्ञः प्रियत्वं तु भृत्या वेद न चात्मनः ।
तथा जीवो न यत्सख्यं वेत्ति तस्मै नमोऽस्तु ते ॥

इत्यनेनापहस्तितमिति ज्ञातव्यम् ॥ २४ ॥

मुह्यन्ति यं सुरय इति यदुक्तं तदधुना स्पष्टयति । देह इति । "ता आप ऐक्षन्त" इत्यादिवद्देहादीनां जडानां ज्ञातृत्वादिधर्मानुपपत्त्या तद्व्यतिरिक्तः कश्चित् ज्ञानाश्रयोऽङ्गीकर्तव्यः जीवस्य ज्ञानाश्रयत्वेऽपि सम्यक्स्वपरवेदनासामर्थ्यस्य प्रत्यक्षत्वेन तस्य हरेस्तज्ज्ञानाविषयत्ववर्णनेन माहात्म्यमाविर्भूतं न स्यादिति कश्चिद्विशिष्टः सर्वज्ञोऽपेक्षितस्तस्य सर्वज्ञत्वविशिष्टाभ्यसद्भावे घटते तेनान्यैश्च सम्भूयाप्यवेद्यमहिमा हरिरित्यनेन हरेर्निरतिशयमाहात्म्यं विज्ञातं स्यादिति तदर्थं देहादिशब्देन तदभिमानित्वेन ते लक्ष्यन्ते संबन्धात्शयाहि प्रधानाभिमानित्वाद्वैश्रवणादयो देहादय इति समानाधिकरण्येनोच्यन्ते ननु तावतापि कुतः देहः अभिमानी वैश्रवणः असवः प्राणाभिमानिनो मरुतः अक्षा इन्द्रियाणि तदभिमानिनः इन्द्राग्निप्रमुखादय मनश्च इति मनसोऽन्तःकरणस्य वृत्तिबाहुल्यादुपलक्षणं तस्याभिमानी रुद्रः भूतानामभिमानिनः पृथिव्याद्याः सुपर्णाद्याः वा मात्राः शब्दादयः तद्देवताः रुद्रसूनवः सौपर्णाद्या वा इत्येते देवाः वैश्रवणाद्याः आत्मानं स्वस्वरूपमन्यं स्वव्यतिरिक्तं प्रपञ्चं न विदुः यदुभयस्मात् परमुत्तमं ब्रह्म तन्न विदुरिति किमुत तत्प्रसादमन्तरेणेति शेषः पुमान् जीवाभिमानी ब्रह्मा स्वात्मानं प्रपञ्चं चेति सर्वं वेद न केवलं तावदेव किन्तु तत्तद्वस्तुगतगुणांश्च शब्दांस्तद्विशेषांश्च क्रियादींश्च वेद तर्हि परमात्मानं वेद किं नेत्याह नेत्य इति । तानि सर्वाणि जानातीति तज्ज्ञोऽपि ब्रह्मा तं सर्वज्ञं हरिं न वेद यथासौ हरिः स्वात्मानं स्वव्यतिरिक्तं सर्वं वेत्ति तथेति शेषः तत्रापि स्वापरिच्छेद्यत्वेन परिमितः किं नेत्याह । अनन्तमिति । अनन्तमात्मानमपरिच्छेद्यत्वेन ज्ञातारं तस्य ज्ञातृत्वस्य यथार्थत्वादतः स एव सर्वमुख्यः सर्वज्ञो न ब्रह्मेति

"ब्रह्मावित् अहं ब्रह्मास्मि" इति श्रुतिः विष्णोर्नु कं वीर्याणि इति
अत एवास्मिन् परमात्मानमीड इत्यर्थः एतत् सर्वं
(१) देहाभिमानी वैश्रवणो मरुतः प्राणमानिनः ।
इन्द्राद्या इन्द्रियात्मानो रुद्रोऽन्तःकरणात्मकः ।

देहादयो न विदुरित्यत्र देहादीनां जडत्वेन तत्र ज्ञानप्रसक्तेरभावात्
न विदुरिति असङ्गतमित्यतोऽत्र देहादिशब्दार्थविवक्षितार्थप्रमा-
णं । इदं ... ।

नैते विदन्ति स्वात्मानं परं चापि विमोहिताः
जीवाभिमानी ब्रह्मा तु सर्वं वेद प्रजापतिः ।
सोऽपि वेद हरिं नैव सम्यक्सैव हि सर्ववित् ।

इत्यनेन सिद्धम् ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

परापरकामेन निष्कामेण वा परमेश्वर एव भजनीयो नान्यस्तस्य मायाजीववशीकारिशक्तित्वादन्यस्य तन्मायाधीनतुच्छशक्तित्वादिति । स्वभावसिद्धमैश्वर्यं दर्शयंस्तदर्थं स्तुतिविशेषणोपतिष्ठते । नम इति । अचिन्त्याव्यभिचारिचिच्छक्ती दर्शिते । गुणत्रयेति । तादृशक्रियाशक्तिर्दर्शिता जीवमायानियन्तृत्वात्तासां तादृशशक्तीनां तत्सदर्भतत्वेन स्वरूपभूतत्वं च तथापि गुणेषु सत्त्वादिष्वेव तत्त्वबुद्धिः कारणज्ञानं येषां तैरदृष्टं तर्कयितुमशक्यं किमुतानुभवितुमशक्यं धाम तादृशशक्तिप्रकाशोऽपि किमुत स्वरूपतत्पूर्णाशक्तिर्यस्य तस्मै सर्वत्र हेतुः स्वप्रकाशायेति । गुणत्रयस्याभासः स्वाज्ञानेनारोपो यस्मिन् स जीव इति जीवस्य चिद्रूपत्वे तदज्ञानस्पृष्टत्वाभासतो निकर्ष एव व्यक्तीकृतः । रश्मिस्थानीयत्वात्तस्य ॥ २३—२४ ॥

देहेति । अन्यं देवतावर्गं परं पुमांसञ्च ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हंसगुह्येन स्तोत्रेण पूर्वसिद्धेनैव निगमेन न तु दक्षकृतेनेत्यर्थः कस्य दक्षस्य ॥ २२ ॥

पराय जीवमायोपाधिकेभ्य इत्यर्थः । कुतः अवितथानुभूतये सत्यानुभवाय गुणत्रयाभासो जीवः निमित्तं माया तयोर्नियन्त्रे एवमपि गुणेषु तत्त्वबुद्धिर्येषां तैर्जीवैरदृष्टस्वरूपाय । तद्भिन्नैरपि सम्यगनवगम्यधामेत्याह निवृत्तो मानावधिः परिमाणसीमा यस्य तस्मै नह्यतावद्गुणरूपैश्वर्यकः परमेश्वर इति कोऽपि वक्तुं शक्नोतीति भावः । यदुक्तं ब्रह्मणा "गुणात्मनस्तेऽपि गुणान् विमातुं हितावतीर्णस्य क ईशिरेऽस्य" इति । निवृत्तमानाय वयं इति पाठे भासां ज्ञानं वयं करोमि तदा नम इति कर्म पदं नहि कथं तस्य सिद्धिस्तत्राह । स्वयम्भुवे स्वप्रकाशाय ॥ २३ ॥

अदृष्टधामत्वमुपपादयति । येति । यस्य परमात्मनः सख्यं कारणप्रवर्तकत्वादिकं पुरुषो जीवो गतिमान् न जानाति अस्मिन्नेव पुरे देहे वसतोऽपि सख्युरपि आत्मारामस्येऽपि सख्यादेव तत्कामितान् विषयान् भोजयितः स्वय सख्यापि तस्य तत्सख्यमननुभवन्नपि अत्रैव देहे तस्मिन्नपि नैव वेद व्यक्तदृष्टिरिति पञ्चवत्पाठे बुद्धीन्द्रियादिप्रकाशादेव यद्विषयकं ज्ञानं व्यक्तमेव तद्यापारं तस्य प्रधानत्वपाठे तस्मादेव हेतोस्तत्कर्तृकं ज्ञानं ... सोऽपि जीवः गुणः शब्दस्पर्शादिर्यथा गुणिनः श्रोत्रादीन्द्रियस्य सख्यं समानुयायित्वादिलक्षणं न वेत्ति तद्वदित्येव ॥

ननु गुणा जडत्वान्न जानन्तु जीवस्तु चेतनः कथं न जानाति तत्र सर्वेऽपि चेतनोऽपि परमेश्वरं न जानन्तीत्याह । देहश्च तत्रत्या असवः प्राणाश्च अक्षा इन्द्रियाणि च मनश्चान्तःकरणानि च भूतानि पृथिव्यादीनि च मात्राः शब्दादयश्च आत्मानं

यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात् ।
य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः ॥ २६ ॥
मनीषिणोऽन्तर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः ।
वह्निं यथा दारुणि पाञ्चदश्यं मनीषया निष्कर्षन्ति गूढम् ॥ २७ ॥
स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः ।
स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्वस्वरूपम् आत्मनां मध्ये अन्यमन्यस्वरूपम् आत्मभ्यः सर्वेभ्य एव परं जीवस्वरूपञ्च न विदुः । पुमान् जीवस्तु चेतनत्वात् सर्वम् आत्मानं देहादीन् गुणान् सत्त्वादीन्मूलभूतांश्च वेद जीवन्मुक्तस्वदशायां तं परमात्मानञ्च जानातीति तज्ज्ञः । तदपि सर्वज्ञं परमेश्वरं न वेद । ननु तज्ज्ञ इति ब्रूषे तदपि न वेदेति कुतस्तत्राह । अनन्तम् अप्राकृतगुणानामनन्तानामज्ञानात्तदप्यज्ञानमेव यदुक्तम् "द्युपतय एव ते न ययुरन्तमनन्ततया" इति ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तत्र विन्ध्यपादेषु ॥ २१ ॥

तद्धंसगुह्याख्यं स्तोत्रं यतो येन स्तोत्रेण कस्य दक्षस्य अतुष्यत्तुष्टोऽभूत् ॥ २२ ॥

पराय चेतनाचेतनेभ्यो विलक्षणाय नमः तत्राचेतनेभ्यः प्रकृतिकालादिभ्यः वैलक्षण्यमाह । गुणत्रयाभासनिमित्तबन्धवे इति । गुणत्रयस्य आभास उन्मेषो यस्मात्तत् प्राधानं निमित्तं कालस्तयोः प्रकृतिकालयोर्बन्धवे नियन्त्रे अणुपरिमाणकेभ्यश्चेतनेभ्यो वैलक्षण्यमाह । निवृत्तमानावधये इति । निवृत्तो मानावधिः स्वरूपगुणपरिमाणसीमा यस्मात्तस्मै मुमुक्षुभ्यो ज्ञानप्रदोऽयमित्याह । अवितथा सत्यफला अनुभूतिरुपासकस्य यस्मात्तस्मै "ददामि बुद्धियोगन्तं येन मामुपयान्ति ते" इति श्रीमुखवचनात् नित्यमद्धानां बुभुक्षूणां दुर्ज्ञेयोऽयमित्याह । गुणान्तत्त्वबुद्धिभिः गुणाः विषया एव तत्त्वमिति बुद्धिर्येषां तैरदृष्टधाम्ने दुर्ज्ञेयस्वरूपाय अनन्यसिद्धत्वमाह । स्वयम्भुवे इति ॥ २३ ॥

बुभुक्षुर्जीवस्य कृतघ्नत्वमाह । पुरुषो भगवद्बहिर्मुखो जीवः पुरे देहे वसन्नपि यस्य अस्मिन्नेव पुरे सम्यग् वसतः सख्युर्हितकारिणः सख्यं हितकारित्वं स्थितिप्रवृत्त्यादिप्रदत्वं नावैति तस्मै नमस्करोमि कुत इत्यत्र हेतुगर्भविशेषणं व्यक्तदृष्टिः व्यक्ते संसारे एव दृष्टिर्यस्य सः यथा गुणो गुणकार्यो देहो गुणिनः देहिनः धारकत्वप्रकाशकत्वादिकं नावैति तद्वदयं भावः यथा देहस्य जडत्वाज्जीवस्वरूपगुणादिज्ञाने सर्वदायोग्यता तथा भगवद्धस्य संसारासक्तस्य जीवस्य चेतनत्वेऽपि भगवत्स्वरूपगुणादिज्ञानेऽयोग्यतेति ॥ २४ ॥

एतदेव वर्णयन्निव्यवद्धजीवदुर्ज्ञेयं भगवन्तं सर्वज्ञतया स्तौति । देह इति । सर्वज्ञमीडे स्तौमि असवः इन्द्रियाणि मनवः मनोबुद्धिचित्ताहङ्काराः भूतान्याकाशादीनि मात्राश्च शब्दादितन्मात्राणि । आत्मानं स्वस्वरूपं न विदुः अन्यं स्वविलक्षणं परं देहेन्द्रियादिभ्यः श्रेष्ठं ज्ञानस्वरूपं यत्तत्त्वं जीवाख्यं तत्कुतो विदुः अचेतनत्वादेव विदुरित्यर्थः । पुमान् गुणतत्त्वबुद्धिर्नित्यबद्धो जीवः यतो ज्ञः ज्ञाता ततस्सर्वं सुखदुःखादिकं गुणान् विषयांश्च वेद अनन्तं परमात्मानं न वेद अहो तस्याभाग्यम् ॥ २५ ॥

भाषा टीका ।

वहां पर पाप नाश करने वाला अघमर्षणनामक ती[र्थ] है तीनों काल वहां स्नानादि करके तपस्या से दक्षजी [ने] भगवान् का स्तुति किया ॥ २१ ॥

अधोक्षज भगवान् को हंसगुह्य स्तोत्र से उनने स्तुति किया सो हम तुमसे कहेंगे जैसें कि भगवान् दक्ष प्रजापति पर सन्तुष्ट भये हैं ॥ २२ ॥

दक्ष प्रजापति बोले यथार्थ ज्ञानवाले तीनो गुणों [के] आभास निमित्त जीव माया इनों के बन्धु आपके अर्थ नम[स्]कार है गुणविषयों में यथार्थ बुद्धि रखने वाले आप[के] स्वरूप कों नहीं जानते हैं आप सब परिमाणों से रहित [हैं] आप स्वयंभू हैं आपके अर्थ नमस्कार है ॥ २३ ॥

इस शरीर में निवास करने वाला सखा जीव जिस परमेश्वर सखा के सखाभाव को नहीं जानता है जैसें कि रूपादिक प्रका[]शक चक्षु आदि के प्रकाशकपन को नहीं जानते हैं जो प्रपं[च] के देखने वाले हैं तिन आपके अर्थ नमस्कार है ॥ २४ ॥

देह प्राण इंद्रिय अंतःकरण पंचभूत तन्मात्रा ए सब अप[ने] को भी नहीं जानते हैं दूसरं को भी नहीं जानते हैं पुरुष जीव [] इन सबों को जानता है परंतु वह जीव भी जिनको नहीं जान[ता] है तिन सर्वज्ञ अनंत आपको मै स्तुति करता हूं ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अदृष्टधामत्वमुक्त्वा स्वप्रकाशत्वमाह । यदा मनस उपराम[ः] समाधिर्न तु सुषुप्तिवल्लयो न च जाग्रत्स्वप्नयोरिव विक्षेपः तदाह नामरूपे रूप्येते येन तत्तथा तस्य उपरामे हेतुः दृष्टं दर्शनं स्मृतिश्च तयोः सम्प्रमोषान्नाशात् तदा यः केवलेन स्वरूपज्ञानेन प्रतीयते तस्मै हंसाय शुद्धाय शुचि शुद्धं मनः सद्म प्रतीतिस्थानं यस्य तस्मै नमः ॥ २६ ॥

एवम्भूतः केषां प्रतीयत इत्यपेक्षायामाह । मनीषिण इति

यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसा वोत यस्य ।
माभूत् स्वरूपं गुणरूपं हि तत्तत् स वै गुणापायविसर्गलक्षणः ॥ २९ ॥
यस्मिन् यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च ।
परावरेषां परमं प्राक् प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकम् ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ज्याम । विवेकिनो यं निष्कर्षन्ति विविच्य ध्यायन्ति स निर्वाणा-नुभूतिर्मम प्रसीदतामिति द्वयोरन्वयः । एवं निष्कर्षतां प्रतीयत इति भावः । किमिति निष्कर्षन्ति स्वशक्तिभिर्गूढमप्रकाशमानं कान्तिभिर्नवभिः पुनश्च त्रिवृद्भिः त्रिगुणाभिः समष्टिव्यष्ट्युपाधिभिर्गूढमपाविशं निष्कर्षन्तीत्यर्थः । यद्वा नवभिः प्रकृतिपुरुषमहदहङ्कारपञ्चतन्मात्ररूपाभिः । त्रिवृद्भिस्त्रिगुणात्मिकाभिः चकारात्षोडशविकाररूपाभिश्च । कथम्भूतं निष्कर्षन्ति मनीषयान्तर्हृदि सन्निवेशितं निश्चलीकृतं पाञ्चदश्यं पञ्चदशसामिधेनीमन्त्रैः प्रकाश्यमलौकिकं वह्निमिवाहङ्कारास्पदाद्दारात्मनोऽन्यं परमात्मानं निष्कर्षन्तीत्यर्थः ॥ २७ ॥

अशेषा विशेषा यस्यास्तया मायया निषेधेन निर्वाणसुखेऽनुभूतिर्यस्य अप्रत्यक्तनिषेधासम्भवात्प्रसक्तिमाह । स एव सर्वनामा स एव विश्वरूप इति । तद्रूपत्वेऽपि वास्तवत्वाभावान्निषेधः सम्भवतीत्याह । अनिरुक्ता आत्मनि शक्तिर्माया यस्य सः ॥२८॥

ननु यदि केवलया स्वसंस्थया प्रतीयते तर्हि सर्वनामत्वं विश्वरूपत्वं चानुपपन्नं वागाद्यगोचरत्वादित्याशङ्क्य सर्वनामभिर्वाच्यं प्रत्यक्षादिदृश्यं च तस्य स्वरूपं वस्तुतो माभूत्तथापि मायया घटत इति श्लोकत्रयेणोपपादयन्नमस्करोति । यद्यदिति । यद्यद्वचसा निरुक्तमभिहितं धिया निरूपितं व्यवसितमक्षभिर्वा इन्द्रियैर्निरूपितं गृहीतमुतापि मनसापि निरूपितं सङ्कल्पितं यस्य स्वप्रकाशत्वं तस्य तत्स्वरूपं माभूत् स्वरूपत्वाभावे हेतुः हि यस्मात्तत्तद्गुणानामेव रूपं पाठान्तरे गुणैर्बन्धनम् स तु गुणव्यतिरिक्तः । यतो गुणानामपायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्ष्यत इति तथा चेतनाधिष्ठानं विना तयोरसम्भवात् । यद्वा । यस्य स्वरूपं माभून्न भवति तस्मै नम इति तृतीयेनान्वयः॥२९॥

तदेवं वस्तुतो गुणस्वरूपत्वाभावमङ्गीकृत्यानिरुक्तात्मशक्तिरित्यनेन द्योतितं मायया सर्ववाच्यत्वेन विश्वरूपत्वमाह । यस्मिन्नधिकरणे यतोऽपादानाद्येन करणेन यस्य सम्बन्धि यस्मै सम्प्रदानाय यदपि स्वतन्त्रः यः कर्ता कुरुते स्वतन्त्रः कार्यते चान्येन प्रयोज्यकर्ता तद्ब्रह्मेति प्रत्येकं सम्बन्धः अत्र च सप्तभिर्यच्छब्दैः सप्तविभक्त्यर्था दर्शिताः यथेति च क्रियाकारकसम्बन्धप्रकारवाचिनामव्ययानामर्थाः कुरुते कार्यते चेति स्वार्थपरार्थक्रियान्वयश्च सर्वेषां दर्शितः । चशब्देन भावकर्मादिविहितप्रत्ययार्थाः सङ्गृहीताः । तद्ब्रह्मैवेति कुतस्तत्राह । तद्धेतुस्तेषां कारणं तत्कुतः सर्वेभ्यः प्राक्प्रसिद्धम् । ननु ब्रह्मावयस्त-त्त्वतः श्रूयन्तेऽपरे च दृश्यन्ते तत्कथं ब्रह्मैव तद्धेतुस्तत्राह । परावरेषां च हेतूनां परमं कारणम् । ननु सर्वकारणत्वे तस्य किं नाम सहकारि भवेत्तदानीमन्यस्याभावात् सत्यं निरपेक्षमेव तत्कारणमित्याह । अनन्यद्विजातीयशून्यम् एकं सजातीयशून्यं च तस्मै नम इत्युक्तेनान्वयः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सर्वज्ञमित्यनेनाभिप्रेतं परमात्मनः सर्वज्ञत्वं जीवस्य परमात्मनां संश्रुपदशायामपि तदनभिज्ञतां चोपपादयति । यदेति । नामरूपरूपस्य देवमनुष्यब्राह्मणादिनामरूपकस्य मनसो यदा द्रष्टृस्मृतिसंप्रमोषाद्दृष्टस्य स्मृतिः स्मरणं स्वप्नावस्थोच्यते तस्याः संप्रमोषान्निवृत्त्योपरामः सुषुप्तिः तदा यः परमात्मा ईक्षते प्राप्यते जीवेन समन्वितो भवति "प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चनवेद नान्तरम् एष सुप्तेषु जागर्ति" इति श्रुत्यर्थोऽत्र विवक्षितः जीवस्याप्रबोधेऽपि परमात्मा प्रबुद्ध इत्यर्थः सर्वथा दुर्ज्ञेयत्वे-ऽनुपास्यत्वं स्यादिति शङ्कां वारयति । यदेति । केवलया इत्यनुषज्यते यश्च केवलया रागादिकालुष्यरहितया स्वसंस्थया स्वाभाविकज्ञानेनयतेऽवगम्यते प्राप्यते वा तस्मै हंसाय शुद्धाय शुचिसद्मने शुद्धान्तःकरणसद्मने उपासनविशुद्धान्तःकरणं संनिहितायेत्यर्थः । यद्वा । केवलया स्वसंस्थया हंसाय विशुद्धाय रागाद्यकलुषितेनापरिच्छिन्नानन्दरूपनित्यकालिकत्वासङ्कुचितापरिच्छिन्नधर्मभूतज्ञानेन विशुद्धायास्पृष्टावद्यचिद्धर्माय शुचिसद्मने उपासनया परिशुद्धमन्तःकरणं सद्म अभिव्यक्तिस्थानं यस्य तस्मै इत्यर्थः 'हंसः शुचिषत्' इति श्रुत्यर्थोऽत्राभिप्रेतः ॥ २६ ॥

शुचिसद्मन इत्येतदेव प्रपञ्चयति । मनीषिणा इति । त्रिवृद्भिः त्रयाणां वृद्धिर्यत्र तास्त्रिवृत्तत्रिकाभिरर्थः तद्रूपाभिस्त्रिकत्रयमापन्नाभिरिति यावत् नवभिः शक्तिभिः । "श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया । विद्ययाविद्यया शक्त्या मायया च निषेवितम्" इति वक्ष्यमाणाभिः शक्तिभिः कार्योपयोग्यपृथक्सिद्धविशेषणरूपाभिः शक्तिभिः सहान्तर्हृदि संनिवेशितं स्वच्छया संनिविष्टं गूढं बाह्यकरणैरग्राह्यम् अनेन "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा" इति श्रुत्यर्थोऽत्र विवक्षितः दुर्दर्शं मनसा अदृश्यमित्यर्थः गुहायां हृदये निहितं गह्वरे ... निष्कर्षन्त्यन्तरात्मतयेति तथा ये मनीषिणः परमात्मयाथात्म्यविवेचनकुशलाः मनीषया योगपरिशुद्धया धिया निष्कर्षन्ति प्रकृतिपुरुषाभ्यां विविच्य पश्यन्तीत्यर्थः यथा यज्ञा मथनत्वाग्नेरनोऽरणिस्थितम् ... पाञ्चदश्यमग्निं निष्कर्षन्ति ... पञ्चदशीयत्वं सामिधेनीपञ्चदशत्वं दर्शपूर्णमासप्रकरणे ... नमयति ... पाञ्चदश्य इत्युच्यते ... तस्मै नम इत्युत्तरेणान्वयः ॥ २७ ॥

एवमुक्तविधं परमात्मानमन्येऽत्र तद्रसायनमिष्टमर्थितोऽपि-स्तदनुग्रहं प्रार्थयते । स वा इति । स वै ... भगवानशेषाः सर्वे विशेषा विकारा यस्यास्तया मायायाः निवृत्त्या याऽवधा-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

याम्सुखं दुःखासंभिन्नं मोक्षसुखं तस्मिन्ननुभूतिरनुभवो यस्य मुक्तानामनुभवविषय इत्यर्थः य ईदृशः स एव सर्वनामा सर्वैः शब्दैर्वाच्य इत्यर्थः सर्वशब्दनाम यस्येति वा "सर्वः शर्वः शिवः स्थाणुः" इतिनामपाठात् सर्वशब्दप्रवृत्तिनिमित्तपौष्कल्याश्रय इत्यर्थः सर्वनामत्वे हेतुः स च विश्वरूप इति विश्वशरीरकत्वात् सर्वशब्दवाच्य इति भावः । विश्वान्तर्गतवस्तुवाचिनः शब्दास्तच्छरीरं तमेवाभिदधति शरीरवाचिनां शब्दानां शरीरिपर्यन्तबोधनशक्तेः यद्वा । सर्वशब्दस्य कृत्स्नजगद्वाचित्वात् तस्य च तच्छरीरत्वात्प्रवृत्तिनिमित्तपौष्कल्येन तमेवाभिधत्त इति भावः । ननु विश्वरूपत्वं परगतधर्मासंस्पर्शनं चेति कथमुभयं तत्राह । अनिरुक्तात्मशक्तिः वाङ्मनसापरिच्छेद्याः स्वाभाविक्यः शक्तयो यस्य सः विचित्रशक्तित्वात्तदुभयोपपत्तिरिति भावः । एवंभूतो भगवान् मम प्रसीदतां मामनुगृह्णात्वित्यर्थः ॥ २८ ॥

ननु यदि विश्वं तस्य शरीरं न तु स्वरूपं तर्हि केन लक्ष्यते इत्यत्राह । यद्यदिति । यद्यद्वचसा निरुक्तं शब्देनाभिहितं जातिगुणादिकं प्रवृत्तिनिमित्तीकृत्य शब्देन बोधितं तथा धिया निरूपितं व्यवसितमक्षभिरिन्द्रियैर्गृहीतमुतापि मनसा निरूपितं सङ्कल्पितं यद्यपि यस्य स्वरूपं माभूत भवति किन्तु शरीरमेवेति भावः । वचआदिभिर्निरुक्तादेस्तत्स्वरूपत्वाभावे हेतुः गुणरूपहेत्विति गुणरूपाः सत्त्वादिगुणात्मका हेतवो यस्य तद्गुणरूपहेतु सत्त्वादिगुणत्रयकार्यं सत्त्वादिगुणगतमेव न तु तत्स्वरूपगतोऽसाधारणो धर्मो येन तदुपलक्ष्यं परमात्मस्वरूपं स्यात् गुणरूपं हि तदिति पाठे हि यस्मात्तद्गुणानामेव रूपं गुणरूपं वर्धितमिति पाठान्तरे गुणरूपैः सत्त्वादिगुणगतैरसाधारणाकारैर्वर्धितमारब्धमित्यर्थः तथाप्यसौ परमात्मा गुणापायविसर्गलक्षणः गुणकार्यभूतप्रपञ्चस्य संहारसर्गौ लक्षणं यस्य तथोक्तः अपायविसर्गाभ्यां स्थितिरपि लक्ष्यते यद्यपि कार्यात्मकं जगन्न परमात्मनो लक्षणं तथापि कार्यप्रपञ्चगतोत्पत्तिस्थितिप्रलयकारणत्वं परमात्मनोऽसाधारणो धर्म इति तेन तत्स्वरूपमुपलक्ष्यते इत्यर्थः । प्रपञ्चजन्मादिकारणत्वमपि न परमात्मनः स्वरूपविशेषणतया लक्षणं कारणत्वस्य चिदचिद्विशिष्टब्रह्मनिष्ठत्वेन विशेष्यभूतब्रह्मस्वरूपनिष्ठत्वाभावात् । किं तु चन्द्रादेः शाखाग्रादिवत्तदुपलक्षणतया लक्षणमिति बोध्यम् ॥ २९ ॥

ननु देवमनुष्यादिशरीरनिर्वर्त्यं कर्म तदात्मभूतजीवकर्तृकं तद्बन्धकं च दृष्टं यतस्तस्य सुखदुःखादिचेतनधर्मत्वादेवं कृत्स्नं चिदचिदात्मकं जगत् परमात्मनः शरीरञ्चेत्तद्व्यापारोऽप्यनेककारकनिर्वर्त्यः परमात्माश्रय एव स्यादिति तथा सति स बध्येत तथा च "निष्क्रियं निष्कलम्" इत्यादिश्रुतिविरोधः । किञ्चैकस्य चेतनस्यैकदैकमेव शरीरं दृष्टमतः कथमेकस्य परमात्मनो देवमनुष्याद्यनेकानि शरीराणीति न विश्वरूपत्वं परमात्मनः सम्भवति यद्यसौ कारणत्वात् कार्यभूतविश्वरूपः कार्यकारणयोरभेदादित्युच्यते तर्हि वचआदिभिर्निरुक्तादिकं तस्य स्वरूपमेव स्यात् परिणामिकारणस्याधिष्ठात्रपेक्षत्वदर्शनात्तस्याप्यधिष्ठात्रपेक्षेति पूर्वोक्तपरत्वविरोध इत्याद्याशङ्कां निराकरोति । यस्मिन्निति । तावदनेककारकनिर्वर्त्यस्य व्यापारस्य परमात्मायत्तत्वमभ्युपगम्यत एवेति न तच्चोदनीयमित्याह । यस्मिन्निति पूर्वार्धेन । तत्र यस्मिन्नित्यादिभिर्विभक्तिभिरधिकरणोपादानकरणसम्प्रदानकर्मकर्तृशक्तयो विवक्षिताः यस्येति षष्ठ्या तु सम्बन्धसामान्यं कुरुते इति प्रयोजककर्तृशक्तिः कार्यत इति प्रयोज्यकर्तृशक्तिः यदेत्यनेन कालः उक्तशक्तीनां कालोपाधिकत्वात् । यथेति पाठे तूक्तकारकशक्तिगताः प्रकारविशेषा विवक्षिताः क्रियते कार्यते चेति कृञ्धातुना तत्कारकनिष्पाद्या क्रिया विवक्षितेति तत्तत्कारकाश्रयत्वकृताः क्रियागतविशेषा वा निर्दिश्यन्ते यस्मिन्नित्यादीनां तदित्युत्तरेणान्वयः सप्तम्यादिविभक्तिप्रकृतिभूतैर्यच्छब्दैस्तत्तदधिकरणादिकारकशक्त्याश्रयाणि वस्तूनि विवक्षितानि कुरुते कार्यते चेत्यत्र लकारेण प्रयोज्यप्रयोजककर्तृशक्त्याश्रयं द्रव्यमपि विवक्षितं लकाराणां कृतिमत्येव शक्तिरित्यन्यत्र विस्तरः । सुप्तिङन्तस्थले च प्रकृत्यर्थविशेष्यकः शाब्दबोधः । एवं च तत्तद्व्यापारनिर्वर्तकाधिकरणादिशक्त्याश्रयाणि द्रव्याणि सम्बन्धसामान्याश्रयत्वं च तद्ब्रह्मेत्यर्थः शक्त्याश्रयवस्तूनां परमात्मशरीरत्वेन विशेषणत्वात्तस्यैव मुख्यत्वेन कारकशक्त्याश्रयत्वादाधारशक्त्याश्रयत्वात् सर्वस्य व्यापारस्य तदायत्तत्वमुपपन्नमिति भावः । नन्वेवं कारकशक्त्याश्रयत्वप्रयुक्तं परमात्मनः सक्रियत्वं तत्प्रयुक्तं कार्यत्वं तत्प्रयुक्तमनित्यत्वं च प्रसज्येत तथाच "निष्क्रियं निष्कलं नित्यं विभुम्" इत्यादिश्रुतिविरोधः अत आह । प्राक् प्रसिद्धमिति । हेतुरिति च । हेतुः प्राक्प्रसिद्धमित्यनेन कार्यावस्थायाः पूर्वं कारणत्वेनावस्थितत्वमुच्यते । अयं भावः । तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" इत्यादिप्रमाणवशात् कार्यस्य जगतः चिदचिदीश्वरात्मकत्वमभ्युपेत्यं कार्यसजातीयत्वाच्च कारणस्य तदपि तत्त्वत्रयात्मकमेव युक्तिबलात् "सदेव सोम्येदमग्र आसीत् प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि" इत्यादिप्रमाणबलाच्चाभ्युपगन्तव्यं तत्र कार्यावस्थायां कारणावस्थायां च "यः आत्मनि तिष्ठन् यः पृथिव्यां तिष्ठन् योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं योऽव्यक्तमन्तरे सञ्चरन् यस्याव्यक्तं शरीरम्" इत्यादिप्रमाणबलादात्मत्वेन परमात्मनो विशेष्यत्वं चिदचितोः शरीरत्वेन विशेषणत्वं चेष्टितव्यम् । एवं च कारणत्वेनावस्थितं ब्रह्म सूक्ष्मचिदचिद्विशिष्टं कार्यावस्थायां स्थूलचिदचिद्विशिष्टत्वेनावस्थितमिति कारकशक्त्याश्रयत्वस्य तस्य तस्मिन् शरीरभूतचिदचिदात्मकत्वात्तत्प्रयुक्तं सक्रियत्वादिकमपि सद्वारकमेवेति विशेष्यभूते तस्मिन्न तस्य साक्षात् प्रसङ्गः निष्क्रियत्वादिश्रवणं तु विशेष्यभूतब्रह्मस्वरूपाभिप्रायकमिति न तद्विरोधः । कार्यावस्थकारणावस्थयोस्तस्य चिदचिच्छरीरकत्वादेव विश्वरूपत्वमप्युपपन्नम् । "एषोऽणुरात्मा" इतिश्रुतिवशाज्जीवस्याणुपरिमाणत्वावगमात्तस्यैकदानेकशरीरान्तःप्रवेशासम्भवेऽपि "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुत्या तत्स्वरूपस्यापरिच्छिन्नत्वावगमात्तस्यानेकशरीरेषु जीवान्तःप्रवेशेन नियमनं सम्भवतीत्यनेकशरीरकत्वोपपत्तिः कार्यावस्थायां कारणावस्थायां च चिदचिच्छरीरकत्वाद्विश्वरूपत्वमपि तस्योपपन्नम् । ननु विश्वरूपत्वं नाम विश्वं रूपं शरीरं यस्य तस्य भावस्तत्त्वमिति न विवक्षितं तथा सति "सर्वं खल्विदं ब्रह्म ऐतदात्म्यम्" इत्यादिजगद्ब्रह्मतादात्म्यश्रवणविरोधापत्तेः । किं तु विश्वरूपत्वं नाम विश्वानन्यत्वमेव एवं च नमः परायेत्युपक्रान्तपरत्वविरोधस्तत्राह । अनन्यदिति । विश्वानन्यदित्यर्थः विश्वरूपत्वस्य विश्वानन्यात्मकत्वेऽपि न विरोधः । यत्प्राक् प्रसिद्धं कारणं सूक्ष्मचिदचिद्विशिष्टं तदेव कार्यावस्थायां स्थूलचिदचिद्विशिष्टमित्येकस्यैवावस्थाद्वययोगित्वेन कारणावस्थकार्यावस्थयोरेकद्रव्यग-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ति विश्वानन्यत्वोपपत्तेः अनेनासत्कार्यवादव्युदासः तथाच रिकं सूत्रम् । तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ २ ॥ १ ॥ १५॥ । ।

ज्ञाने परत्वं तत्प्रयुक्तं निःसमाभ्यधिकत्वं च विशेष्यनिष्ठ-पभिप्रायेण परमं परावरेषामिति चोक्तं परावरेषां ब्रह्मादि-षानामपि परं कारणमात्रस्याधिष्ठानत्वेऽपेतत्वशङ्कां वारयति । एक-ति । निस्समाभ्यधिकमेकमेव प्राक्प्रसिद्धमित्यर्थः इदं चैकत्वं रूपनिष्ठमिति विशेषाकारेण निमित्तत्वं विशिष्टा-रेण उपादानत्वमित्युक्तं भवति । लोके मृत्कुलालबीजे-त्वादसर्वशक्तित्वाच्च तयोर्निमित्तोपादानयोर्भेदः परमात्मनस्तु द्चिद्विशिष्टस्य सर्वशक्तित्वाज्जगदाकारेण परिणामस्य र्वेश्वरत्वान्निमित्तत्वस्य चोपपत्तिरित्यभिप्रायः । यद्वा । तच्चतु-त्वेनेन निमित्तकारणत्वमुच्यते एकमित्यनेनैकमेवाद्वितीय-मित्यादावविभक्तनामरूपसूक्ष्मचिदचिद्विशिष्टत्वमुच्यते प्रप-ञ्चस्यानेककारकात्मत्वेन बहुत्वस्य पूर्वमुक्तत्वात्तस्य च नाम-रूपविभागनिबन्धनत्वात्तत्प्रतिसम्बन्धिनामरूपविभागाभावनिबन्ध-कत्वस्यैकपदग्राह्यत्वौचित्यात् तथाचैकमविभक्तनामरूपत्वेन सूक्ष्मचिदचिद्विशिष्टं ब्रह्म प्राक्प्रसिद्धमित्यर्थः ब्रह्मेत्यनेन निमित्तत्वोपादानत्वोपयुक्तसार्वज्ञ्यसत्यसङ्कल्पत्वादिगुणानन्त्यरूप-गुणातिशयबृहत्त्वमुच्यते ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनुमानतोऽपि तज्ज्ञानं सुकरमित्याह । यदेति । यदा स्वप्नसु-षुप्त्यादौ नामरूपरूपस्य नामरूपात्मकप्रपञ्चापादकस्य मनसो दृक्स्मृतिसंप्रमोषाच्छ्रुतस्मरणलक्षणज्ञाने प्रमुष्टापह्नत्योपरामः व्यापाराभावः तदा यः केवलया स्वसंस्थया इयते जीव-साक्षात्त्वात् स्वप्नावबोधादिदर्शनाच्च जीवेच्छाराहित्येन शुद्धया स्वरूपसत्तया स्वप्नादिनियामकत्वेन जीवादन्य ईश्वरोऽस्तीति ज्ञायते इत्यन्वयः । तस्मै हंसाय नित्यशुद्धाय श्यामरूपाय मा नम उपास्तिर्विशिष्टाधिष्ठानेन च भाव्येति अनन्तज्ञावमाह । शुचिसद्-मन इति । शुचिर्वाङ्मुखेव सद्म निवासस्थानं यस्य स तथा तस्मै नामरूपात्मकप्रपञ्चविषये जीवस्य चानुपमानसाक्षात्परिहाराद्वा ।

> यदोपरामो मनसः स्वप्नसुप्तिलयादिषु ।
> तदावस्थाप्रबोधादिकारणत्वेन केशवः ॥
>
> अज्ञानन्त्यात्तु जीवस्य विद्यतेऽन्यो नियामकः ।
> जीवानुवृत्त्यानुकूल्याज्ज्ञायतेऽसौ सदा विभुः ॥

[illegible]नुगृहीतव्याप्तिकत्वाल्लिङ्गमव्यभिचारीति भावः ॥२६॥

[illegible]नुगृहीतत्वाच्च लिङ्गं यद्विशिष्टमित्याशयेनाह । मनीषिणा [illegible] समर्थाः मनीषिणः मनीषया अन्तर्हृदि संनिवेशितं [illegible] निष्कृष्य जानन्तीत्यन्वयः कथमिव अग्निविदो [illegible] निर्मथ्य जानन्ति यथा तथा इह जीवराशि [illegible] शेषः । त्रिवृद्भिः इच्छाज्ञानक्रियात्मना त्रिधा [illegible]मलोत्कर्षेणाज्ञानक्रियेत्यादिनवत्वसंख्याविशिष्टा-- [illegible]भिः शक्तिभिर्लक्षितमिति शेषः । दशेन्द्रिय [illegible]प्राणप्रधानरूपाणि चतुर्दशतत्त्वानि तेभ्य उत्तमत्वेन

पञ्चदशाश्रयत्वात्पाञ्चदश्यं मनोबुद्ध्यहङ्कारचित्तचेतनभेदेन तत्प्रे-रकतया स्थितत्वाद्वा । तदुक्तम् "इच्छादित्वेन त्रिविधा विमलाद्यास्तु शक्तयः" इति चशब्दात्तद्भिन्नाहतज्ञाताश्चान्याः सन्तीति ग्राह्यं तदप्युक्तम्—

> विष्णोः स्वरूपभूतायास्ताश्चव्यक्तात्मिकाः पराः ।
> जायन्ते तत्प्रसादेन ताश्च पीठेऽभिपूजयेत् ॥
> तद्भिन्नजीवादस्यैव प्रसादात्तत्समीपगाः ।

इति अनेन नवभिः नवद्वाराभिव्यक्ताभिः त्रिवृद्भिः गुणात्रयात्म-भिरित्येतन्निरस्तम् । दशेन्द्रियाणामाश्रयत्वेन पाञ्चदश्य इति व्याख्यातं तत्र किं मानमितीयमाशङ्का ।

> दशेन्द्रियाणि च मनोबुद्धिप्राणप्रधानकाः ।
> चतुर्दशैषां परमः पाञ्चदश्यो हरिः स्मृतः ॥
> बुद्धिभेदेन चैतेषु पाञ्चदश्योऽथ संस्थितः ।

इत्यनेन परिहर्तव्या । अनेन पञ्चदशीति सङ्ख्यातिथौ वर्तमानत्वा-त्पाञ्चदश्यमित्येतदपव्याख्यानं निरस्तमिति ज्ञातव्यम् ॥ २७ ॥

यो मनीषिभिर्निर्मथ्य ज्ञातः स हरिर्मम प्रसीदतामित्यन्वयः किमन्येभ्यो विशिष्य अस्य प्रसादः प्रार्थ्यते "प्रजापते ! न त्वदे-तान्यन्य" इत्यादिश्रुतेः अन्येषामप्यतिशयितमाहात्म्यप्रतीतेरित्या-शङ्क्य "एष ह्येव शतानन्दः" इत्यादिश्रुतेः इतरेषामानन्दादेरियत्ता-विशिष्टत्वात् "एतस्यानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति न ते विष्णो ! जायमानः" इत्यादिश्रुतेः । अस्यापरिच्छिन्नानन्दानुभ-वरूपत्वादित्याह । अशेषेति । अशेषो विशेषः इयत्ताख्यः अशेष-विशेषः स च मायाप्रकृतिश्च ते अशेषविशेषमाये तयोर्निषेधो यस्य तत्तथा तच्च निर्वाणमशरीरभोग्यं च यत् सुखं तस्याशेष-विशेषमायानिषेधनिर्वाणसुखस्यानुभूतिः एतादृशानन्दोऽहमिति स तथा अपरिमितप्राकृतशरीरभोग्यानन्दानुभवरूप इत्यर्थः ।

> इयत्ता तु विशेषः स्यादानन्दादेः तदुज्झितः ।
> सर्वविशेषरहित उच्यते हरिरव्ययः ॥
>
> अप्राकृतस्वरूपत्वान्निर्माय इति कथ्यते ।

इति अतोऽयमेवार्थ इति ज्ञायते प्रजापत्यादिशब्दमुख्यार्थोऽपि अयमेवेति भावेनाह । स सर्वनामेति । अतोऽपन्यस्ता (१) श्रुतिः सावकाशेति ज्ञातव्यम् "यो देवानाम" इति श्रुतेश्च नीरूपस्य सर्व-नामत्वं कथमित्यत उक्तं स चेति विश्वानि रूपाणि यस्य स तथा विश्वस्य रूपमिव रूपं यस्येत्यत्र विश्वरूपसदृशो विश्वरूप इति अन्यथा योज्यम् । ननु प्रतीतार्थं परित्यज्य अप्रसिद्धार्थ-कल्पने किं कारणमित्यतश्चशब्दसूचितायाः ।

> तद्रूपसदृशं रूपं यतः सर्वस्य सर्वदा ।
> सर्वरूपो यतः शब्दमुख्यार्थः सर्वनामकः ॥

इति स्मृतेः समाख्याने कारणं स स इति तच्छब्दद्वयेन तत्तच्छब्दमुख्य-सर्वनामत्वसर्वरूपत्वे परामृशति । नन्वदृष्टत्वादेकस्य सर्वनाम-त्वादि कथं युज्यते न च श्रौतत्वाद्गतिकमत् । श्रुतीनामनन्त-त्वेनैकत्रान्यथोक्तिसम्भवादिति तत्राह । अनिरुक्तेति । "विचित्रशक्तिः पुरुषः पुराणः" इति श्रुतेः "गतिसामान्यात्" इति सूत्रेण श्रुतीनाम-र्थविषयत्वेन ज्ञानोत्पादकधर्मत्वस्य निर्णीतत्वात् । ननु हरेः सर्व-नामत्वे "अवचनेनैव प्रोवाच" इत्यादिश्रुतेः का गतिरित्यतो वाह अनिरुक्तेति । सर्वात्मनेति शेषः । अनिर्वाच्या स्वकीया ज्ञानशक्तिः ।

(१) प्रजापते न त्वदेतान्यादि ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इत्येतच्छ्रुतेर्गुणातिगाविलक्षणायाः दोषाविष्कारोक्त्यसम्भवेना- सङ्गतं स्यादिति अलौकिकत्वान्नो विष्णुरनिरुक्तो निरूपितः तथापि वेदैकवेद्यत्वादुक्तो रूपी स एव चेतिवाक्याविरुद्धत्वान्नोक्त एवार्थः ॥ २८ ॥

स च विश्वरूप इति विश्वरूपोक्तिं विशदयति । यद्यदिति । वचसा यदुक्तं इति निरुक्तं धियाऽक्षभिर्मनसा निरूपितं यद्यरा- त्तदस्य हरेः स्वरूपं माभूत्र भवति कुतः (१) सत्त्वादिगुणासमू- हेन वर्त्तिनत्वात्तर्हि स कीदृश इति तत्राह । स वा इति । सत्त्वा- दिगुणानामपायः राहित्यमेव निसर्गलक्षणं स्वाभाविकलक्षणं यस्य स तथा ता इत्यनेन "केवलो निर्गुणश्च" इति श्रुतिं प्रमाणयति अनेन तद्रूपं त्रिगुणात्मकं भगवद्रूपमप्राकृतमिति निरणायि माभूदित्यनेन जगत् साक्षाद्भगवद्रूपं न जानीहीत्यर्थोऽपि सूचित इति ज्ञातव्यम् ॥ २९ ॥

कालकारणत्वं च ब्रह्मणः स्वरूपलक्षणमित्याह । यस्मिन्निति । यस्मिन्नधिकरणभूते काले इदं वर्तते यतो यस्मादपादानभूता- त्कालादन्येन कारणभूतेन कालेन जायते यस्य सम्बन्धि- भूतस्य कालस्याधीनमिदं यस्मै संप्रदानभूताय कालाय कल्पते यं कर्मभूतं कालं प्रतीक्षते यः कर्तृभूतः कालः प्रेरयति यथा येन प्रकारेण पुरुषः कर्म कुरुते स्वयं वापरेण कार्यते तत्तस्य सतोऽभिव्यक्त्यर्थस्य कालस्य प्रकाराणां प्रेरकस्य च यत् परावरेषां ब्रह्मादीनां सकाशात् प्राक्पूर्वं स्वसिद्धं कार्यकारणात्मकप्रपञ्च- व्यतिरिक्तत्वेन स्वत एव सिद्धम् । अत एव परतमत्युत्तमम् अनन्य- दन्यसादृश्यरहितम् । एकमवतारादिरूपाभिन्नं तद्ब्रह्म हेतुः कार- णमित्यन्वयः । तत्कालस्य सदातनसत्ताप्रदत्वमस्त्येव नान्यस्येति ज्ञापनाय सर्वनियामकत्वार्थस्तेन कालो विशेषितः । अन्यथा कालस्य कारणं ब्रह्मेति कृतं स्यादिति तदुक्तम् "सर्वसत्ताप्रदत्वतः" इति तत्त- त्कालीनसर्ववस्तुसत्ताप्रदत्वाद्ब्रह्म कुतस्तत्कल्प्यत इति चेत् नियामकत्वार्थस्य कालस्य प्रकाराणां च कारणम् । एक एव परो विष्णुः" इति स्मृतेः अयमेवार्थो न तु यस्मिन्नित्यादिना क्रियमाणकारक- फलरूपेण ब्रह्मणोऽवस्थितिरिति "अनन्यः सदृशाभावादेको रूपाद्य- भेदतः" इति वचनादनन्यदेकशब्दयोरुक्त एवार्थः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वसंस्थया स्वरूपशक्त्या ॥ २८ ॥

मनीषिणः इति गुणमयम् । त्रिभुवन[illegible] सति कथं स्वतो निर्गुणं तत एवात इत्याह । अशेषेति । अनुभूतिस्वरूपं सत्त्व- [illegible] पुरुषार्थैरपि सिद्धैः । [illegible] तद्गुणा- [illegible] भावः । [illegible] । प्रसीदता- मिति । ननु तादृशो निष्क्रियत्वात् कथं तत्सम्पन्नामरूपः तत्राह । अनिरुक्तेति । [illegible] ॥ २७ ॥ २८ ॥

ननु भवत्यन्तर्यामिस्वरूपं ब्रह्माख्यं स्वरूपं तस्यानुभूतिक- मेव भवतीति [illegible] भवतु । यत्तु गुणान्तर्वर्तितं स्वरूपं तत्तु तत्स्वरूपं भवेत् । जगत्सादृश्यात्तत्राह । यद्यदिति त्रिकेण । गुणान्तरेणापि [illegible] यत् स्वरूपं तदपि । तत्-

र्वादिगोचरो यद्यद्वस्तु तन्न भवति तत्र हेतुः । स वै इति । सगुणरूप- बृंहितस्वरूपस्त्वं गुणप्रलयसृष्टिभ्यां लक्ष्यते तर्ह्यत एव तत्स्वनु- भूयत इति । यद्वा । गुणानामपायोऽपगमो यस्मात्तस्मिन् विगत- सर्गे नित्यसिद्धे वैकुण्ठे लक्ष्यते तदधिष्ठातृत्वेन दृश्यत इति ॥ २९ ॥

तदेव दर्शयति । यस्मिन्निति । यदिति यत्र विवदमानानां मनुष्याणां वादिनां तत्तद्वादेऽपि तादृशवस्तुतर्कनच्छक्तय एव कारण- त्वेनोपस्थिता इत्याह । यच्छक्तय इति । अत एवानन्तगुणत्वं भूमत्वं च तस्येत्यर्थः ॥ ३० ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु तज्ज्ञोऽपि न वेदेति यदुक्तं तत्र तदेव वेद्यं वस्तु द्विविधं सुज्ञेयं दुर्ज्ञेयं च । तत्र सुज्ञेयं निर्विशेषस्वरूपमाह । यदेति । यदा मनस उपरामः उपरामातिशयः समाधिः । नतु सुषुप्ताविव लयः । न च जाग्रत्स्वप्नयोरिव विक्षेपः कीदृशस्य नामरूपे रूप्येते येन तस्य । उपरामातिशये हेतुः दृष्टं दर्शनं स्मृतिश्च तयोः सम्प्रमोषात् सम्यक- तयैव नाशात् तदा यः केवलया स्वस्य संस्थयैव निर्विशेषज्ञानगम्य- तया वस्तुमात्रत्वेनेत्यर्थः । ईयते प्रतीयते तस्मै हंसाय शुद्धाय शुचि शुक्लं चित्तं सत्त्वं प्रतीतिस्थानं यस्य तस्मै । एतत् स्वरूपस्य सुज्ञेयत्वमुक्तं ब्रह्मणा यथा । "तथापि भूमन् महिमाऽगुणस्य ते विबोद्धुमर्हत्यमलान्तरात्मभिः" इति ॥ २६ ॥

दुर्विज्ञेयं सविशेषस्वरूपमाह । मनीषिणः शुद्धभक्ताः गूढम् अन्तर्हृदि सन्निवेशितं "प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम्" इत्युक्तरीत्या श्रवणभक्त्या अन्तर्हृदि प्रवेशितं पुनर्मनीषया प्रेम- भक्त्युत्थया निष्कर्षन्ति । अन्तर्हृदयान्निष्कृष्य चक्षुरादिभिरिन्द्रियैः सौन्दर्यादिमाधुर्यमास्वादयन्तीत्यर्थः । कीदृशं सन्तं निष्कर्षन्ति स्वशक्तिभिश्चिच्छक्तिभिः सहितं कातिभिर्नवभिर्विमलाद्याभि- स्तत्रापि त्रिवृद्भिश्चिच्छक्तेरेव तिसृभिर्वृत्तिभिः ह्लादिनीसन्धिनी- संविद्भिश्च सहितम् । यदुक्तम् । विष्णुपुराणे "ह्लादिनी सन्धिनी संवित् त्वय्येका सर्वसंश्रये । ह्लादतापकरी मिश्रा त्वयि नो गुण- वर्जिते" इति । यथा दारुणि काष्ठे पाञ्चदश्यं पञ्चदशसामिधेनी- मन्त्रैः प्रकाश्यमलौकिकं वह्निं निष्कर्षन्ति स प्रसीदतामित्युक्त- रेणान्वयः । अस्य सविशेषस्वरूपस्याप्राकृतानन्तगुणस्य दुर्वि- ज्ञेयत्वं भक्तिहीनैरनुभवितुमशक्यत्वात् भक्तैरनुभूयमानत्वेऽपि माधुर्यैश्वर्ययोः पाराज्ञानात् । यदुक्तं ब्रह्मणैव । "गुणात्मनस्तेऽपि गुणान् विमातुं हितावतीर्णस्य क ईशिरेऽस्य । कालेन यैर्वा विमि- ताः सुकल्पैर्भूपांशवः खे मिहिका द्युभासः" इति ॥ २७ ॥

यत्तु तस्य मायिकं सविशेषं रूपं तद्व्यतिरिक्तमेव ममोपास्यमित्याह । स मम प्रसीदताम् । अशेषा विशेषा यस्या- स्तस्या मायायाः निषेधेन यज्जीवानामसुखं वाणी ह्लादिदारका माताभिमानादिदुःखदाः केऽपि न सन्ति यत्र तस्मिन्नेव सुखे अनुभूतिर्यस्य सः "ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते" इति वैष्णवोक्तेः । असमर्थानामसम्भवात् प्रसक्तिमाह । स एव सर्वनामा स एव विश्वरूप इति ब्रह्मादितृणान्तानां यानि नाम- रूपाणि तानि तस्यैवेत्यर्थः । मायायास्तच्छक्तित्वेन मायिकविश्व- स्यापि तद्रूपत्वात् तस्य स्वरूपभूता शक्तिस्तु मायायाश्चेमाविका- द्विश्वस्माच्चान्यैवेत्याह । अनिरुक्ता मायिकवाङ्मनसाभ्यामनि- र्वक्तव्यविषयीभूता आत्मभूता शक्तिर्यस्य सः ॥ २८ ॥

(१) हेतुगर्भविशेषणमित्यभिप्रायः ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नाम्गुणाद्युपाधिकन्तु सर्वं मायिकमेव तेन निरूपितमपि सर्वं मायिकमेव भवेत । तच्च न तत्स्वरूपमित्याह । यद्याहृति । यद्वच-सा निरुक्तमभिहितं धिया निरूपितं व्यवसितम् अक्षभिर्वा इन्द्रियैः निरूपितं गृहीतम् उत अपि मनसापि निरूपितं सङ्कल्पितं तत्तत्सर्वं यस्य स्वरूपं माभूत् न भवति तस्मै नम इति तृतीयेनान्वयः । यतस्तद्गुणानामेव रूपम् गुणावृहितं हि तादिति पाठे गुणा-वृहितं स तु गुणाव्यतिरिक्त इत्यर्थः । यतः गुणानाम् अपाय-सर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्षणं यस्य सः । यः सृष्टिप्रलयौ करोति स ईश्वर इत्यतः सृष्टेः पूर्वञ्च प्रलयात् परञ्च च तस्य सत्त्व-सङ्केः । अत्र "दृश्यते त्वग्र्यया बुद्ध्या" इति "मनसैवानुद्रष्टव्य" मिति । "तमेव विदित्वा अतिमृत्युमेति" इति "आत्मा वा अरे मन्तव्यः", इत्यादि "तस्मात् सर्वात्मना राजन् ! भगवान् हरिरीश्वरः । श्रोतव्यः कीर्त्तितव्यश्च" इति परस्सहस्रश्रुतिस्मृतिवाक्यविरोधादीश्वरानुगृहीतैरेव वचनादिभिरिति व्याख्येयम् । अत एव श्रुतावपि ग्रयेति विशेषणम् । "अतः श्रीकृष्णनामादि न भवेद्ग्राह्यमिन्द्रियैः । सेवोन्मुखे हि जिह्वादौ स्वयमेव स्फुरत्यदः" इत्यभियुक्तवचनं च । कश्चित्तु कात्स्न्र्येन निरूपणाभावान्न निरूपितमित्याहुः । "यतोऽप्राप्य निवर्त्तन्ते वाचश्च मनसा सह" इत्यत्रापादाननिर्देशात् वाङ्मनसाप्राप्यत्वं निवर्त्तन्त इति अन्तालाभाद्वाङ्मनसागम्यत्वश्रुति-वत् ॥ २९ ॥

ननु गुणमयं रूपं यदि तत्स्वरूपं न भवति तर्हि तस्यापुरुषत्वं प्रसज्जेतेत्यत आह । यस्मिन्नधिकरणे यतोऽपादानाद्येन करणेन यस्य सम्बन्धिनः यस्मै सम्प्रदानाय यदीप्सिततमं यः कर्त्ता कुरुते स्वतन्त्रः कार्यते वा अन्येन प्रयोज्यकर्त्ता तद्ब्रह्मेति प्रत्ये-कमन्वयः । अत्र सप्तभिर्यच्छब्दैः सप्तविभक्त्यर्था दर्शिताः । यर्थेति क्रियाकारकसंबन्धप्रकारवाचिनामव्ययानामर्थाः कुरुते कार्यते इति स्वार्थपरार्थक्रियान्वयश्च दर्शितः । चशब्देन च भावकर्मादिविहितप्रत्ययार्थाश्च संगृहीताः । तद्ब्रह्मैवेति कुतस्तत्राह । तद्धेतुस्तेषां कारणम् । कारणत्वं कुतः । प्राक्प्रसिद्धम् । ननु ब्रह्माद्यस्तत्रतत्र दृश्यन्ते अपरे च दृश्यन्ते तत्राह । परेषामवरेषां च परमं तेषां कारणानामपि कारणत्वात् परमं कारणमित्यर्थः । ननु सर्वकारणत्वे तस्य किं नाम सहकारि भवेत्तत्राह । एकम् अन्यनिरपेक्षमेव तत् कारणमित्यर्थः । ननु चिच्छक्तीनां विमलायादीनां नवविधानां चिच्छक्तिवृत्तीनां ह्लादिन्यादीनां त्रिविधानां तद्विलासानां वैकुण्ठतत्पार्षदादीनां वासुदेवसङ्कर्षणादीनां च नित्यसिद्धत्वश्रवणात् कालमायाजीवादृष्टानान्तु जगत्कारणत्वस्य च श्रवणात् कथमेकमित्युच्यत इत्यत आह । अनन्यत् न विद्यते अन्यद्यतस्तच्छक्तीनां तद्विलासानां च तत्स्वरूपभूतत्वाद्वासुदेवादीनां तदंशत्वात् कालमायादीनामस्वरूपभूतत्वेऽपि तच्छक्तित्वात्तदनन्य-मित्यर्थः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

[illegible] इत्याह । यदेति द्वाभ्याम् । नामरूपप्रपञ्च [illegible] रूपयन्ति जिज्ञ्यन्ते अनेनेति तथा । [illegible] दृष्टोपलक्षितदृष्टश्रुतमायिकपदार्थस्मृतेः प्रशमः [illegible] उपरामः भगवत्स्वरूपगुणादिध्यानसुख-[illegible] तदा केवलया निरतिशयया स्वकीयया संस्थया

ईर्यते मुमुक्षुभिर्ज्ञायते यस्तस्मै हंसाय शुचिषद्मने शुद्धचित्तालयाय अप्राकृतलोकाय वा नमः॥ २६ ॥

एतदेव स्पष्टयताह । मनीषिण इति । यथा याज्ञिकाः पञ्चदशसामिधेनीमन्त्रैः प्रकाश्य दारुणि गूढं वह्निं निष्कर्षन्ति उपायतः प्रत्यक्षं कुर्वन्ति तद्वन्मनीषिणः विमलबुद्ध्यादिस्वशक्तिभिः धारणाध्यानसमाधिभिरुपायैः नवभिः स्वशक्तिभिः सह अन्तर्हृदि सन्निवेशितं सम्यक् स्थापितं मनीषया निष्कर्षन्ति । सुरासुरपदार्थविलक्षणतया यं पश्यन्तीत्यर्थः । तमीडे इति पूर्वेणान्वयः । नवशक्तयस्तु "श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया । विद्ययाऽविद्यया शक्त्या मायया च निषेवितम्" इति वक्ष्यमाणा ज्ञेयाः । यद्वा । अस्तीति बुद्धिरूपया मनीषया अन्तर्हृदि सन्निवेशितम् । स्वशक्तिभिः स्वानुष्ठिताभिर्भक्तिरूपाभिः शक्तिभिः । त्रिवृद्भिस्त्रिगुणाभिः नवभिः श्रवणादिरूपाभिर्निष्कर्षन्ति प्रत्यक्षं कुर्वन्तीत्यर्थः ॥ २७ ॥

बुभुक्षूणां दुर्ज्ञेयत्वेन मुमुक्षूणां सुज्ञेयत्वेन यो वर्णितः स मम प्रसीदताम् । कथंभूतः । अनिरुक्ताः असङ्ख्याताः स्वरूपतश्च वक्तुमशक्याः आत्मशक्तयः स्वकीयाः शक्तयः नत्वागन्तुका यस्य सः । स्वाभाविकानन्तशक्तौ प्रसङ्गे सति सर्वसिद्धिः स्यादेवेति भावः । चेतनाचेतनात्मकं सर्वं विश्वं तदीयचिदचिच्छक्तिमयतया तदनतिरिक्तमतस्तदनुग्रहकामेन सर्वत्र स्पर्शासूयादित्यागवता विश्वाकारतयापि भजनीय इत्याशयेनाह । स सर्वनामा स च विश्वरूप इति । स्वरूपतस्तु विश्वविलक्षणः परमानन्दरूप इत्याह । अशेषाः निखिला विशेषाः महदादिसूक्ष्मान्ता विकारा यस्या मायायाः निषेधेनेति नेतीति निराकरणे सति अन्ते यत् प्रोक्तमानन्दमयं निर्वाणं निर्गताः बाधा बाधप्रदाः सर्वे आध्यात्मिकादयस्तापाः यस्मात् । तस्मिन् सुखे अनुभूतिर्यस्य सः विश्वविलक्षणपरमानन्दस्वरूप इत्यर्थः ॥ २८ ॥

पूर्वश्लोकस्यार्थः प्रपञ्च्यते । यद्यदिति द्वयेन । तत्र अशेषविशेषणायाऽनिर्वाणनिर्वाणसुखानुभूतिरित्येतस्य प्रपञ्चः । यदिति । यत् वचसा निरुक्तं वर्णितं धियाक्षभिरिन्द्रियैः उत मनसा निरूपितं विपर्यीकृतं तत्सर्वं हि निश्चितं यस्य रूपं माभूत् न भवति । स प्रसीदतामित्यन्वयः । "सत्यं ज्ञानमनन्तं ब्रह्म" "तं त्वौपनिषदं पुरुषं पृच्छामि" "सर्वे वेदा यत्पदमामनन्ति तमाम" "सर्वस्य प्रतिष्ठा यत्र शाश्वती" इत्यादिवचनैर्निरुक्तस्य "दृश्यते त्वग्र्यया बुद्ध्या सदा पश्यन्ति सूरयः" "मनसैवानुद्रष्टव्यः" इत्यादिषु बुद्ध्यादिष्वविषयीकृतस्य स्वरूपस्य व्यावृत्त्यर्थमाह । गुणावृहितं प्रकृतिगुणमयमित्यर्थः । यतः गुणानामपायविसर्गाभ्यां संहारसर्गाभ्यामुपलक्षणमेतत् स्थितिरपि विश्वसृष्टिस्थितिसंहारलक्षणं यस्य सः । लक्षणं तु विश्वजन्मादिहेतुत्वे सति प्रकृतितद्गुणातिलङ्घनत्वे सति सत्यत्वादिमत्त्वं ब्रह्मत्वम् इति ॥ २९ ॥

स सर्वनामा स च विश्वरूप इत्येतस्य प्रपञ्चः । यस्मिन्निति । यस्मिन्नधिकरणे यतोऽपादानात् येन करणेन यस्य सम्बन्धिनः यस्मै सम्प्रदानाय यदीप्सिततमं यः कुरुते कार्यते चेति प्रयोजकप्रयोज्यभेदेन द्विविधः कर्त्ता । अत्र यच्छब्दैः षट्कारकाणि दर्शितानि यस्येत्यनेन सम्बन्धसामान्यं दर्शितं कुरुते कार्यते चेति स्वार्थपरार्थश्च अन्वयो दर्शितः । यथेति च क्रियाकारकसम्बन्धप्रकारवाचिनामव्ययानामर्थाः सङ्गृहीताः । चशब्देन भावकर्मादिविहितप्रत्ययार्थाः सङ्गृहीताः यतस्तद्धेतुस्तेषां कारणं यतः

यच्छक्तयो वदतां वादिनां वै विवादसम्वादभुवो भवन्ति ।
कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥ ३१ ॥
अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः ।
अवेक्षितं किञ्चन योगसाङ्ख्ययोः समं परं ह्यनुकूलं बृहत्तत् ॥ ३२ ॥
योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननन्तः ।
नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु ॥ ३३ ॥
यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ।
यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथम् ॥ ३४ ॥

॥ श्रीशुक उवाच ॥

इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे ।
आविरासीत् कुरुश्रेष्ठ ! भगवान् भक्तवत्सलः ॥ ३५ ॥
कृतपादः सुपर्णांसे प्रलम्बाष्टमहाभुजः ।
चक्रशङ्खासिचर्मेषुधनुष्पाशगदाधरः ॥ ३६ ॥
पीतवासा घनश्यामः प्रसन्नवदनेक्षणः ।
वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आकप्रसिद्धं यतः परेषां प्रकृतिपुरुषकालादीनामवरेषां महदादीनां च ब्रह्मादीनां च परममाश्रयमनन्यत् विजातीयशून्यं एकं सजातीयशून्यं स्वगतभेदस्त्वस्यतो हि स्वभावत एव द्वैताद्वैतमित्यर्थः । तद्ब्रह्म प्रसीदतामिति सम्बन्धः ॥ ३० ॥

भाषा टीका ।

जिस दशा में दर्शन स्मरण दोनों के नाश होनेपर मन की भी निवृत्ति होजाती है उस समय पर भी केवल साक्षीरूप से जो किंचित रहते हैं ऐसे जो शुद्ध मनके मध्य में निवास करने वाले आप तिनके अर्थ नमस्कार है ॥२६॥

मनके नियमन करनेमें समर्थ विवेकी योगी जन तीन गुणों-वाली शक्तियों से सहित अपने हृदय में विराजमान जिनको पृथक करते हैं जैसे कि याज्ञिक लोग अरणी में किंचित पञ्चदश सामिधेनी मंत्र से प्रकाश करने योग्य गुप्त अग्निको मथनसे प्रगट करते हैं ॥ २७ ॥

अनेक विशेष वाली जो माया तिसके निषेध होने से निर्वाण सुख अनुभव रूप जो हैं सब नामों वाले हैं विश्वरूप हैं जिनकी शक्ति माया में कथन नहीं करी जाती है वे परमेश्वर मेरेपर प्रसन्न होवें ॥ २८ ॥

जो कुछ पदार्थ वचन से निरूपण किया जाता है बुद्धि से इन्द्रियों से मनसे जो निरूपण किया जाता है वह सब सत्त्वादि गुणों का विकार है वह आप का स्वरूप नहीं है क्यों-कि आप गुणों की उत्पत्ति स्थिति नाश से वर्जित होते हो ॥ २९ ॥

जिस आधार में जिस अपादान से जिस करण करके जिस-का संबन्धि जिस संप्रदान के अर्थ जिसका कर्म किया जाता है और जो कर्ता है कार्य कारण सब से जो पूर्व है और परम प्रसिद्ध है सो ब्रह्म उन सबों का कारण सदृश द्वितीयरहित एक ही परब्रह्म हैं सो आपही ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वेवं ब्रह्म चेद्विश्वस्य हेतुस्तर्हि न कदाचिदनीदृशं जगदिति वदन्तो मीमांसकाः कुतोऽत्र विवदन्ते तेऽन्ये स्वभाववादिनः सम्वदन्ते ते च ते च तत्त्वावद्बोधिता अपि कुतः पुनः पुनर्मुह्यन्ति तत्राह । यस्य मायाविद्यादाः शक्तयो विवादस्य कोचित्सम्वादस्य भुवः स्थानानि भवन्ति तस्मै नमः ॥३१॥

ननु किन्तद्ब्रह्म यस्य शक्तयो विवादादिभुवो भवन्ति तत्राह । अस्तीति । योग उपासनाशास्त्रं तत्र हि विराड्रूपेणोपासनार्थं पातालपादादिकमस्तीत्युपास्यत्वेन विधीयते । नास्तीति साङ्ख्यं ज्ञानशास्त्रं तत्र ह्यपाणिपादः अचक्षुरश्रोत्रमिति च पादादि नास्तीति निषिद्धयते तयोर्योगसाङ्ख्ययोर्यत्किञ्चित्सममनुवर्त्तमानमवेक्षितं प्रतीतं तद् बृहद् ब्रह्म विवादास्पदं भवेदित्यर्थः। विवादं स्फुटयति । भिन्नावस्ति नास्तीत्येतद्रूपौ विरुद्धौ धर्मौ ययोस्तयोर्भिन्नविषयत्वेऽपि विरोधो न स्यादित्येकस्थयोरित्युक्तमेकविषययोः । कुतो वस्तुनिष्ठयोः पादादिविधिप्रतिषेधयोरेकवस्तुनिष्ठत्वात् । समन्वये हेतुः । परं हि यतो विधिप्रतिषेधयोर्विषयस्तयोः पादादिविषयत्वात् । तथा तदधिविषयस्य सङ्कु

महाकिरीटकटकः स्फुरन्मकरकुण्डलः ।
काञ्च्यङ्गुलीयवलयनूपुराङ्गदभूषितः ॥ ३८ ॥
त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः ।
वृतो नारदनन्दाद्यैः पार्षदैः सुरयूथपैः ।
स्तूयमानोऽनुगायद्भिः सिद्धगन्धर्वचारणैः ॥ ३९ ॥
रूपं तन्महदाश्चर्यं विचक्ष्यागतसाध्वसः ।
ननाम दण्डवद्भूमौ प्रहृष्टात्मा प्रजापतिः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किं प्रमाणं तदाह । अनुकूलमधिष्ठानं विना पादादिकल्पनायोगात् । अवधिं विना तन्निषेधायोगाच्च । तयोरुपपादकत्वेन सिद्धमित्यर्थः । तस्मै नम इति पूर्वस्यानुषङ्गः ॥ ३२ ॥

ननूदासीनस्य समस्य नमस्कारे को लाभस्तत्राह । य इति । पादमूलं भजतामनुग्रहार्थं प्राकृतनामरूपरहितोऽपि जन्मभिरवतारैर्विशुद्धोर्जितसत्त्वानि रूपाणि कर्मभिर्नामानि च यो भजे । तत्कुतः । भगवाननन्तैश्वर्यः स मह्यं प्रसीदतु ॥ ३३ ॥

ननु त्वादृशाः सकामा गणेशादीन् प्रार्थयन्ते त्वं तु तानिहाय किमिति भगवन्तमेव प्रार्थयसे तत्राह । प्राकृतैरर्वाचीनैर्जनपथैरुपासनामार्गैर्यथाशयं तत्तद्वासनानुसारेण यो देहगतोऽन्तर्यामी तत्तद्देवतारूपेण विविधो भाति यथा वायुः पार्थिवं गुणं चम्पकादिगन्धमेवमाश्रित्य नानागन्धवानिवभाति रेणुगुणं धूम्रत्वादिकमाश्रित्य नानारूपवान् प्रतीयते तद्वत्तस्यैव तत्तद्देवतारूपेण फलदातृत्वात् स ईश्वर एव मे मनोरथं सत्यं करोतु । किमन्तर्गतबहुभिर्देवतान्तरैरित्यर्थः । तदुक्तं गीतासु ।

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान् इति ॥
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।

इति चेति ॥ ३४ ॥

संस्तुवतो वत्सस्य स भगवान् प्रत्यक्षोऽभूत् ॥ ३५ ॥

तं वर्णयति सार्धैस्त्रिभिः । सुपर्णस्यांसे स्कन्धे न्यस्तौ पादौ येन । प्रलम्बा अष्टौ महान्तो भुजा यस्य । ३६ ॥

प्रसन्नं वदनमीक्षणे च यस्य । वनमालया निवीतं सकलाङ्गमापादान्तमाममङ्गं यस्य । लसन्तौ श्रीवत्सकौस्तुभौ यस्य ॥ ३७ ॥

महान्ति किरीटकटकानि यस्य । स्फुरन्ती मकरकुण्डले यस्य [illegible] काञ्च्यादिभिर्विभूषितः । वलयमत्र पादभूषणं [illegible] ॥ ३८ ॥

[illegible]मोहनं श्रीपुरुषोत्तमाख्यं सुरयूथपैर्लोकपालैः । ३९-४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु विश्वं परमाणुकारणकमीश्वरस्तु निमित्तमिति वैशेषिकादयः । प्रधानकारणकं पुरुषातिरेकेणेश्वरः स्यान्न वा पुरुषस्तु निमित्तमात्रमिति साङ्ख्यादयो वदन्ति । किञ्च । सर्वमपि वस्तु नित्यमनित्यं च भिन्नमभिन्नं चेति । तथा सदसत् सदसदात्मकं चेति वदन्ति । अतः कथं कृत्स्नस्य जगतः ब्रह्मैककारणत्वं तदनन्यत्वं चोच्यते इतीमां शङ्कां परिहरन्नमस्करोति । यस्येत्यादि । वदतां ग्रन्थनिबन्धनेन स्वशास्त्रमुपदिशतामित्यर्थः । वादिनां वादं कुर्वतां वैशेषिकादीनां यस्य परमात्मनः शक्तयः पृथिव्यादयः विवादसंवादयोः परस्परविरुद्धाविरुद्धयोः स्थलयोः भुवः विषयभूता भवन्ति । शक्तिशब्देन पृथिव्यादय उच्यन्ते । तेषां भगवतः कार्योपयोग्यपृथक्सिद्धविशेषणत्वात्तथा च भगवान् पराशरः "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्" इति जगदात्मकान् पृथिव्यादीन् शक्तिशब्देन व्यपदिष्टवान् । ननु सर्वैरपि पृथिव्यादिस्वरूपाभ्युपगमाद्धानिर्विवादभुवस्तत्राह । कुर्वन्तीति । यस्य शक्तयः पृथिव्यादयः आत्ममोहं स्वविषयकमोहं तेषां वादिनां कुर्वन्ति । पृथिव्यादिस्वरूपाभ्युपगमेऽपि परमाणुकारणकत्वनित्यानित्यत्वादिधर्मविषयस्य सदसत्त्वादिरूपविप्रतिपत्तिं कुर्वन्ति । प्रधानकारणकत्वादिविप्रतिपत्तिविषयकारणत्वः शक्तयो भवन्ति इत्यर्थः । तस्मै अनन्तगुणायासङ्ख्येयकल्याणगुणगणाय भूम्ने स्वरूपतोऽपि गुणतोऽपि महते नमः । यद्यप्येवं वादिनां विप्रतिपत्तिविषयत्वेऽपि पृथिव्यादीनां परमात्मशरीरत्वतत्कारणकत्वयोः पृथिव्यादिस्वरूपवत् अनित्यत्वेऽपि कृत्स्नस्य नित्यतायाः तस्य सर्वपरिणामित्वादात्मकत्वाच्चादृष्टं श्रुतिस्मृत्यादिवचनप्रमाणप्रतिपन्नत्वादित्यर्थः केवलं विप्रतिपत्तिरेव भान्तिः । यतस्तु "यस्यात्मा शरीरं यस्य पृथिवी शरीरं यस्यापः शरीरं यस्याव्यक्तं शरीरं [illegible] आकाशः सम्भूतः तेजस ओजसा विस्मयी भूमौ [illegible] सदाभिज्ञदार्नी तम आसीत्" इत्यादयः श्रुतयश्च [illegible] सकाशादुद्भवः प्रभ कृत्स्नस्य जगतः प्रभवः प्रलयश्च । यद्वस्तु [illegible] कायस्ततो निधः । वसुन्धरा [illegible] पर्वताद्यैर्युता । तदेतदखिलं नित्यं जगत् स्थावरजङ्गमम् । प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत्" इत्यादयोऽनुसन्धेयाः । अनन्तगुणायेत्यनेन निर्गुणत्ववादो भ्रममूलक इति सूचितम् । "यः सर्वज्ञः सर्ववित्" इत्यादिश्रुतिभिः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

कल्याणगुणाकरत्वस्य सम्प्रतिपन्नत्वात्। भूम्न इत्यनेन जीवानामभूमत्वं ज्ञापनम्। एवं पृथिव्यादिस्वरूपाभ्युपगमेऽपि तत्प्रकारविप्रतिपत्तिरुक्तेति ॥ ३१ ॥

इदानीं परमात्मस्वरूपप्रतिपत्तिं वदन् वादिविप्रतिपत्तीनां शास्त्रानुसारेण परिहार्यत्वमाह। अस्तीति। घटपटादिवस्तुनिष्ठावस्तित्वनास्तित्वधर्मौ दृष्टौ योगसाङ्ख्ययोर्मतयोः। तावेकस्यामीश्वरविषयौ चाविरुद्धौ स्याताम्। एवमस्तित्वनास्तित्वयोर्भिन्नयोर्विरुद्धयोर्धर्मयोरैक्यवाह्मिणगुणयोः सतोरन्यत्किञ्चनापेक्षितं वेदान्तवाक्यमपेक्षितम्। अतीन्द्रियेश्वरविषयकास्तित्वनास्तित्वयोः प्रमाणजिज्ञासायामनादिनिधनाविच्छिन्नसम्प्रदायासम्भावितदोषगन्धं वेदान्तवाक्यमेव प्रमाणमपेक्षितमित्यर्थः। तच्च वेदान्तवाक्यं "सत्यं ज्ञानम्" इत्यादि। तद्रूपं च समम्मेकरूपमनुकूलमानन्दरूपं परं सर्वविलक्षणं बृहदपरिच्छिन्नमतो वेदान्तवाक्यरूपं प्रमाणं विहाय केवलास्तित्वनास्तित्वविवादो भ्रममूलो व्यर्थ इति भावः। यद्वा। अनन्तगुणवत्त्वेन गुणा न सन्तीति वादो भ्रममूल इति सूचितम्। तदेवोपपादयति। अस्तीति। "यः सर्वज्ञ" इत्यादिभिर्गुणज्ञानमस्तीत्यवगम्यते निष्कलं निष्क्रियमित्यादिभिर्नैर्गुण्यं तौ चास्तित्वनास्तित्वधर्मावुभावेकवस्तुनिष्ठौ चाविरुद्धौ। तयोश्च भिन्नाधिकरणयोर्विरुद्धयोर्धर्मयोर्वस्तुनिष्ठयोरेकस्थयोः सतोरेकस्मिन् वस्तुनि तयोर्विरोधे सतीत्यर्थः। तत्रान्यतरव्यवस्थापकं किञ्चिद्ब्रह्मस्वरूपबोधकं वेदान्तवाक्यं प्रमाणमपेक्षितम्। एवं साङ्ख्ययोगयोरपि समं तुल्यं तयोरपीश्वरस्वरूपसद्भावाभावयोर्विरोधे सत्यन्यतरव्यवस्थापकं किञ्चित्प्रमाणमपेक्षितमित्यर्थः। तच्च वाक्यं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिकं तद्वाक्यप्रतिपन्नं च वस्तु परमनुकूलं बृहच्च। परत्वानुकूलत्वबृहत्त्वादिगुणायुक्तमिति निर्गुणवादो निरीश्वरवादश्च भ्रममूलक इति भावः। योगसाङ्ख्ययोरिति दृष्टान्तार्थं तयोर्मध्ये यथा निरीश्वरवादस्तथागुणास्तत्ववादोऽपीति। अत्र परशब्देन प्रकृतिपुरुषविलक्षणत्वाचिना सत्यशब्दार्थो विवक्षितः। अनुकूलशब्देन ज्ञानशब्दार्थो व्याख्यातः। आनन्दरूपज्ञानस्यैवानुकूलत्वात् बृहत्त्वादिनानन्तशब्दार्थः। स्वरूपेण गुणैश्चापरिच्छिन्नं हि बृहच्छब्दार्थः। सङ्कोचकप्रमाणाभावात् ॥ ३२ ॥

एवं वादिनां विप्रतिपत्तिविषयत्वेन ब्रह्मस्वरूपगुणविभूतीनां दुर्ज्ञेयत्वमुक्तम्। अथैवं दुर्ज्ञेयस्वरूपगुणशक्तिरप्याश्रितसुलभ इति वदन् तदनुग्रहं प्रार्थयते। यो भगवान् स्वपादमूलं भजतामनुग्रहार्थं स्वाभाविकरूपः। अकृतकर्मफलोऽपि जन्मकर्माणि अवतारचरितानि सह नामानि दुरितक्षपणानि रामकृष्णादिनामानि रूपाणि स्वेच्छोपात्तान्यप्राकृतानि शरीराणि च भजे आत्मानं दर्शयितुं परिगृह्णाति। स परमः निःसमाभ्यधिकः मह्यं प्रसीदताम् ॥ ३३ ॥

एवं स्वेच्छोपात्ताप्राकृतदिव्यमङ्गलविग्रहविशिष्टो भक्तानुग्रहार्थं भवतीति निरूपलभ्यत इत्युक्तम्। विश्वरूपेणापि निरूपलभ्यत इत्याह। यः प्राकृतेति। प्राकृतार्थगोचरेन्द्रियैर्निरूप्यमाणाशयं मनोवृत्त्यनुगुणामिन्द्रियाणां मनोवृत्त्यनुगुणप्रवृत्तेः देहगतः स्वदेहभूतविग्रहस्त्वनुगतो विभाति प्रकाशते। अयमर्थः। यथा राजशरीरे दृष्टे राजा दृष्टो भवति एवं जगतः परमात्मशरीरत्वात् जगद्याथात्म्यविद्भिर्जगद्दर्शने सति परमात्मा दृष्टो भवतीति। जगद्विलक्षणस्याप्यस्य विशिष्टतया प्रकाशे दृष्टान्तमाह। यथाऽनिल इति। स्वयं पृथिवीविलक्षणो वायुः पार्थिवगुणमाश्रितः पार्थिवपुष्पपरागसंस्पृष्टो गन्धवह इति प्रकाशते। तद्वज्जगद्विलक्षणोऽपि जगच्छरीरकत्वात्तन्मात्ररूपभाक्तया परमात्मावभातीत्यर्थः। "काठिन्यवान् यो बिभर्ति तस्मै भूम्यात्मने नमः" इति ह्युक्तम् ॥ ३४ ॥

एवं तूष्णीमुपविष्टेनानेन स्तोत्रेणाभिष्टुतो भगवान् प्राचेतसस्य प्रसन्नोऽभूदित्याह मुनिः। इतीति। हे कुरुश्रेष्ठ! इतीत्थं स्तुतो भगवान् तस्मिन्नघमर्षणे तीर्थे संस्तुवतो दक्षस्य प्रादुरासीत् प्रत्यक्षोऽभूत् पुरत इतिशेषः। तत्र हेतुः भक्तवत्सलः ॥३५॥

प्रादुर्भूतं भगवन्तं वर्णयति। कृतपाद इति। सुपर्णस्य गरुत्मतोऽसे स्कन्धयोः कृतौ विन्यस्तौ पादौ येन। प्रलम्बा आजानुलम्बिनः अष्टौ महाभुजा यस्य। शङ्खाद्यायुधधरः। तत्रासिः खड्गः चर्म खेटः ॥ ३६ ॥

पीतं वाससी यस्य सः। घन इव श्यामः प्रसन्नं वदनं ईक्षणं च यस्य सः। वनमालया निर्वीतमङ्गं यस्य सः। लसन् श्रीवत्सः कौस्तुभश्च यस्य सः ॥ ३७ ॥

महान्ति किरीटं स्फुरन्ती कटके च यस्य सः। मकराकारे कुण्डले यस्य काञ्च्यादिभिर्भूषितः अलङ्कृतः। तत्र काञ्ची कटिमेखला वलयमत्र पादभूषणं कटकस्यांकरत्वात् ॥ ३८ ॥

त्रैलोक्यं मोहयतीति त्रैलोक्यमोहनं नन्द्यादित्वाल्ल्युः। श्रीपुरुषोत्तममन्त्रोपास्यं श्रीपुरुषोत्तमाख्यं तद्रूपं बिभ्रत् त्रिभुवनेश्वरः। नारदादिभिः पार्षदैः सुरश्रेष्ठैश्च परिवृतः। अनु पृष्ठतो गायद्भिः सिद्धादिभिरनुष्टुतः अनुसृतः एवंविधः प्रादुरासीदिति पूर्वेणान्वयः ॥ ३९ ॥

तन्महदाश्चर्यं भगवतो रूपमिवलोक्य गतसाध्वसः वीतभयः प्रजापतिः प्राचेतसः प्रहृष्टचित्तो भूमौ दण्डवन्नमस्कृतवान् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अतितक्याचिन्त्यनिरवद्यमद्भुतगुणानि। यच्छक्तय इति। विवादसम्वादभुवः विप्रतिपत्तिसंप्रतिपत्त्योर्भुवो विषयाः वदतां वादं कुर्वतां वादिनां मतमज्ञानीनिमित्तमित्याह। कुर्वन्तीति ॥ ३१ ॥

विवादसम्वादौ च कथंकारं स्यातामिति तत्राह। अस्तीति। गुणानां विरुद्धयोर्धर्मयोरपेक्षितं विषयः किमाकारयोर्मध्ये ईश्वरोऽस्ति नास्तीति वादिभिः प्रतिपाद्यमानयोः। भिन्नस्वविरुद्धत्वं कथमत्राह। वस्त्विति। भिन्नवस्तुनिष्ठत्वात् एकस्मिन् वस्तुन्यस्तित्वनास्तित्वयोरङ्गीकारे विरुद्धयोः। यद्यप्येकस्य स्वरूपेण सत्त्वं परस्वरूपेणासत्त्वमिति द्वौ धर्मौ स्तः तथापि नैतादृशी एते सत्त्वासत्त्वे स्वरूपस्थैर्ये यत इति योजनायेति पदद्वयं यद्व किञ्चनार्थिकं यच्च साङ्ख्ययोगयोः समं कर्मानुष्ठानतुणायांगादिपाद्कर्मकाण्डे तत्तद्वादानृत्वेन प्रतिपाद्यं … च यथार्थज्ञानसाधनं वेदान्ते विचारितं तच्च … सर्वेषां प्रथमं तत्त्वादीनां तत्तद्विजनकत्वेन … गुरुफलदातृत्वेन वर्तमानं वा तत्परं बृहत् परं प्रपद्य इति वाक्यशेषः सर्वदा वर्धमानं न कदाप्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अभिरूपनो बृहदिति अस्तित्वपक्ष एव श्रेयान् स्थितः । तस्य हृग्वाचीति विशदीकरणाय साङ्ख्ययोगयोरिति विशेषणं "सर्वे वेदा यत्पदमामनन्ति" इति श्रुतिं हिशब्देन सूचयति । अस्ति तं नेक्षिषति निष्ठा साङ्ख्ययोगयोः नास्ति तद्वैतं वस्तुमेवेति निष्ठासुरीत्यतो वा इति । तदुक्तम् "भवत्यो नास्ति सर्वेश इति विरूपासुरं मतम् । अस्तीति दैवमुभयोर्हरिरेव प्रवेदिनः । निषेधविध्योर्विषयः फलदाता च केशवः । तात्पर्यं च कथनयोश्चाश्चनीययोः" इति (१) ॥ ३२ ॥

इतोऽपि भवन्य ईश्वरोऽस्तीति पक्ष एव श्रेयानित्यभिप्रेत्याह । ऽनुग्रहार्थमिति । योऽनन्तो भगवान् पादमूलं भजतामनुग्रहार्थं जन्मकर्मभिर्नामानि रूपाणि च भेजे स परमो महां प्रसीदत्वित्यन्वयः । अलौकिकत्वेन तं विशिनष्टि । अनामरूप इति । देवदत्तकर्तृकादिकर्मणामप्रत्यक्षत्वाद्धुण्णुभिवरूपवदीशरूपाणामदर्शनादनामरूपः । न तु स्वरूपकर्मोज्झितत्वात् "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशम् अथैनमाहुः सत्यकर्मेति सर्वकर्मा सर्वनामा सर्वरूपः" इत्यादिश्रुतेः । अवतारैर्नामकर्मणां दर्शनाच । तदुक्तं "तत्कर्मणामदृष्टत्वादनामाऽयमदर्शनात् । अरूपस्त्ववतारेण रूपकर्माणि दर्शयन् । नित्यरूपो नित्यकर्माऽप्यव्यक्तत्वमवेक्ष्य तत् । अरूपकर्मेत्युदितो रूपकर्मोज्झितेर्न तु" इति । किञ्च । भगवद्व्यतिरिक्तपुरुषानुपपन्नार्थवाचि नाम यस्य सोऽनामा यथा मुक्तानां परमा गतिः कमलाकान्त इति कंसादिनिग्रहाद्वाप्तं कंसारिः मुरारिरित्यादिवाच्यार्थसमत्वात् सर्वं नामा मुख्यरूपस्यात्यन्तमव्यक्तत्वादरूपः अनामासोऽधिकार्थत्वादव्यक्तत्वादरूपकः । कंसारित्वादिसाम्यार्थो व्यक्तरूपोऽवतारगः" इति "लोकरूढ्याधिकार्याणि मुख्यनामानि केशवे । अथ दामोदरादीनि लोकरूढ्या समानि तु ।

. . आनन्दोऽव्यक्तरूपस्तु मुख्यरूपमुदाहृतम् ।

. स एव व्यक्तिमापन्नः प्रादुर्भाव उदाहृतः ॥

इति अनेन उक्तस्मृत्यर्थोऽपि स्पष्टीकृत इति ज्ञातव्यम् ॥ ३३ ॥

यथाधिकारं स्वविषयज्ञानस्य तारतम्यजनकत्वेन प्रमाणसिद्धत्वान्मदन्यो नास्तीश्वर इति मतमासुरमित्याशयेनाह । यः प्राकृतैरिति । यो भगवान् प्राकृतैर्ज्ञानपथैर्जनानां स्वबुद्ध्यनुसृतसिद्धान्तेन विभाति स ईश्वरो मे मनोरथं कुर्यादित्यन्वयः । क्वचित् इत्यत उक्तम् । देहेति । अयं भावः । अधमानां जनानां जीवदेहगतो जीवः तदभिन्न इति प्रतीयते । अहं ब्रह्मास्मीति मध्यमानां जनानां देहगतः सन् देहगतोऽनिर्णीत इति यावज्जीवमनन्यो वा हरिरिति उत्तमानां जीवानां प्रकर्षेणाप्राकृतज्ञानोत्पत्तिकेन ज्ञानेन देहगतो देहगाज्जीवाद्भिन्न इति शेषः । ईश्वरः पूर्णानन्दादिगुण इति प्रकाशते तत्रोदाहरणम् । यथेति । यथाऽनिलो वायुः पार्थिवं पृथिवीकार्यं गुणं सुखदुःखभोगसाधनं शरीरमाश्रितः प्रकृतिविकृतैर्ज्ञानसाधनैरिन्द्रियैः प्राकृतानां श्वास इति मध्यमानां शारीरः प्राण इति अप्राकृतानामुत्तमानां सर्वदेवोत्तमः सूत्रात्मेति प्रतिभाति तथेति । "स्वदेहस्थं हरिं प्राहुरधमा जीवमेव तु । मध्यमाश्चाप्यनिर्णीतं जीवाद्भिन्नं जनार्दनम् । पूर्णानन्दादिगुणकं सर्वजीवविलक्षणम् । उत्तमास्तु हरिं प्राहुस्तारतम्येन तेषु च । बुद्धिशुद्ध्यनुसारेण यथा प्राणं शरीरिणाम् । श्वासमात्रं जनाः प्राहुरनिर्णीतं च मध्यमाः । देवदेवेश्वरं सूत्रमानन्दं प्राणवेदिनः" इति स्मृतिसमाख्यासिद्धत्वात्रैविध्यनार्थकथनं युक्तमिति भावः ॥ ३४ ॥

नेयं स्तुतिर्जिह्वाप्रगुडवत् स्तुत्ये चित्तद्रवविकारहेतुरिति । भावेनाह । इतीति ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

नेदं रूपं मायाकल्पितं किन्तु निजमेव अर्थक्रियाकारित्वादित्याशयेनाह । रूपमिति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र विवादावसरे तादृग्गुणरूपवृंहितस्वरूपमपि भिद्यत इत्याह । अस्तीति । योगः स्थूलोपासनाशास्त्रम् । तत्र हि भगवतो नामरूपित्वं श्रूयते । तत्र दृष्टकल्पनालाघवात् घटपटादिलक्षणाखिलनामधेयत्वं पातालपादादिकत्वं चेति विधीयते । नास्तीति साङ्ख्यं ज्ञानशास्त्रम् । तत्र हि निषेधश्रुतिभिस्तस्य नामरूपित्वं प्रतिषिध्यते तत् प्रापञ्चिकनामरूपित्वस्य कल्पितत्वात् सर्वथैव नास्तीति निर्धार्यते । तदुक्तमुभयमतमत्रैव प्राक् । "स सर्वनामा स च विश्वरूप" इत्यादिना । "यदात्मकं वचसा निरूपितम्" इत्यादिना च । अस्तीति नास्तीति वस्तुनिष्ठा ययोः । तमेव विवादं स्फुटयति भिन्नौ अस्तीति नास्तीत्येवंभूतौ विरुद्धौ धर्मौ ययोस्तयोः । नन्वाऽऽस्तामनयोर्विभिन्नविषयत्वं नेत्याह । एकस्थयोः समानविषययोः तदेवं विवादे सति तयोर्यत् किञ्चित् समं समञ्जसत्वेनैव । अर्थात् तत् प्रतीतं वस्तु तद्द्वयोरपि बृहत् । बृहदनुकूलं भवति । किं तत् समञ्जसं यत् परं नाम रूपादनन्तं तदभावाच्च विजातीयं यत्र युगपन्नामरूपित्वमनामरूपित्वमपि वक्तुं शक्यते तादृग्लक्षणं किमपि नामरूपलक्षणमेव वास्त्वित्यर्थः । एतदुक्तं भवति । एकस्मिन्नेव वस्तुनि नामरूपित्वविधिनिषेधाभ्यां परस्परं भ्रमतः पराहताः स्युः । अत्र तु परत्वेनोभयत्रापि प्राकृतयुक्त्या समञ्जसमप्राकृतनामरूपित्वमेव विधिनिषेधश्रुतितात्पर्यगोपन्यस्यत इति तत्साम्यतं विवादमात्रम् । इत्थमेव श्रीध्रुवेण निर्विवादत्वमुक्तम् । "नित्यं क्रतुनर्गाद्विजसर्गमूर्धसंकल्पवृत्त्यायुर्विधिभिः परिचितं भवदर्चितादोरम् । रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः" इति ॥ ३२ ॥

तदेव व्यनक्ति । यो नाम रूपरहित एव नामानि रूपाणि भेजे प्रकटितवान् । जन्मकर्मभिः सहितानि च प्रकटितवानित्यर्थः । व्यतिरेके दोषमाह । अनन्तः यदि तस्मिन्नामरूपित्वादिकं नास्ति तर्हि तच्छक्तिमत्त्वं प्रति स्वान्तत्वमेव प्रसज्जयेतेति । तदुक्तं प्रचेतोभिः ।

न ह्यन्तो यद्विभूतीनां सोऽनन्त इति गीयसे इति ।

तत्तत् प्रकाशने हेतुः । भगवान् भगवात्मकशक्तिमान् तस्याः शक्तेर्मायात्वं निषेधति । परमः पराख्यशक्तिरूपा मा लक्ष्मीर्यस्मिन् । अन्यथा परत्वव्याघातः स्यादिति भावः । "तस्मात् माया सर्वं सर्वैश्वर्यसम्भवम् । अमायो हीश्वरो यस्मात्तस्मात्

(१) अस्तीति नास्तीति श्लोकस्यायमर्थः । भिन्नविरुद्धधर्मयोः भिन्नविरुद्धधर्मप्रतिपादकयोः । एकस्थयोः एकवस्तुविषयकयोः अस्तीति नास्तीति च वस्तुनिष्ठयोः मदभ्युदिति शेषः । मदन्यदीश्वराख्यं वस्तु अस्तीति दैवं मतं [illegible] नास्तीति आसुरं मतं तयोर्मतयोरित्यर्थः [illegible] विषयः किञ्चन लोकत्रिलक्षणममुष्यतोऽवस्थाफलप्रदम् अनुकूलं तादृशमतभेदेन द्विविधबुद्धिजनकं [illegible] ज्ञानयोगकर्मयोगयोः परं मुख्यतात्पर्यविषयं यत् तद् भवतीति

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

"परमं विदुः" इत्युक्तेः । ननु सर्वेन्द्रमविश्वरूपत्वे तद्राहित्ये च सन्त्येव तत्तदुपासकाः प्रमाणाम् । अत्र के स्युरित्याशङ्क्याह । पादमूलं भजतामनुग्रहार्थमिति । योगसांख्ययोस्तत्त्वं न सम्यक् प्रकाशते किन्तु भक्तावेव "भक्तिरेवैनं दर्शयति" इत्यादिश्रुतेः । तस्मात्तदुक्तं तदाश्रितादमात्रत्वमिति भावः । अत एव लक्ष्यतेऽनन्तरमेव इतीत्यादौ प्रादुरासीत् कुरुश्रेष्ठ ! भगवान् भक्तवत्सलः । कृतपादः सुपर्णांसे इत्यादि । पादमूलं भजतामित्यनेन तान् प्रति रूपप्राकट्यात् पूर्वमपि रूपमस्त्येवेति व्यञ्जितम् । "चरणं पवित्रं विततं पुराणम्" इत्यादिश्रुतेः । भज इत्यतीत निर्देशः प्रामाण्यद्योतनया माहित्यं बोधयति । अनन्तपदस्य च नामानि रूपाणि चानन्तान्येवेति भावः । अत्र प्राकृतनामरूपरहितोऽसीति टीका च ॥ ३३ ॥

ननु विभूतिकामस्य तव तत्तद्विभूतिसम्बन्धितगणपत्याद्युपाधित्वेनैव ममोपासना युक्ता कथं सर्वात्मना निरुपाधित्वेन स्तौषि । तत्राह । यः प्राकृतैरिति । तत्र तत्रानिलवत् स्वकार्यकरत्वं भवत एव तदुपाधिभिरिति स्थिते किमुपाधिभावनयेति भावः ॥ ३४ ॥

इतीति सार्द्धपञ्चकम् ॥ ३५—४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नन्वत्र मते सजातीयविजातीयस्वगतभेदासहिष्णवोऽन्येऽद्वैतवादिनो विवदन्ते तेभ्योऽन्ये नैयायिकाः षोडशपदार्थवादित्वात् द्वैतवादिनो विवदन्ते तेभ्योऽन्ये वैशेषिकाः सम्वदन्ते । तैः सर्वेभ्योऽन्ये न कदाचिदनीदृशं जगदिति वदन्तो मीमांसका विवदन्ते तेभ्योऽन्ये स्वभाववादिनः सम्वदन्ते ते च तत्त्वविद्भिर्निर्णीता अपि कुतः पुनर्मुह्यन्तीति तत्राह । यच्छक्तयः । यस्य मायाशक्तिवृत्तयो वदतां समादधतां वादिनां तत्राक्षेपकर्तां विवादस्य काचित् सम्वादस्य च भूय उत्पत्तिहेतवो भवन्ति प्रयोजनमाह । आत्ममोहमिति । आत्मानं जिज्ञासमानानामपीत्यर्थः । मुहुरिति । तत्राविच्छेदः सूचितः । अनन्तगुणायेत्यनन्तशब्दस्यानेकार्थत्वेनानाशवाचित्वात् गुणानामनश्वरत्वं निःसीमत्वं चोक्तम् "इमे चान्ये च भगवन्नित्या यत्र महागुणाः" इति पृथिव्युक्तौ नित्या इति पदेन "नान्तं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपादमुख्याः" इति सूतोक्तौ च अगुणस्येति योगेश्वरा इति पदाभ्याम् "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः" इति पराशरोक्तौ च विना हेयैरित्युपन्यासेन च तदीयगुणानामप्राकृतत्वावगमेऽप्यवास्तवत्वमाचक्षाणास्तेऽपराधिनः कथमविद्यया न मुह्यन्तीति भावः ॥ ३१ ॥

ननु ते शास्त्रज्ञाः किमिति निन्द्यन्ते शास्त्राणामेवैकमत्याभावेन परस्परविरोधादिति चेन्मैवं वादीरित्याह । अस्तीति । योगसाङ्ख्ययोः योगो भक्तियोगशास्त्रं साङ्ख्यं ज्ञानशास्त्रं तयोस्तत् प्रसिद्धं परं सर्वोत्कृष्टं ब्रह्म समम् अनुकूलं च यथा स्यात्तथा व्यञ्जितम् । परस्परविरुद्धयोस्तयोर्द्वयोरेव शास्त्रयोरवंचयोः किमपि वैषम्यं प्रातिकूल्यं च नास्तीत्यर्थः । तयोः कथम्भूतयोः अस्तीति नास्तीति भिन्नविरुद्धधर्मयोः । योगशास्त्रे हि "कृष्णं पिशङ्गाम्बरमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम्" इत्यादिना नामरूपगुणपाणिपादाद्यङ्गोपाङ्गपार्षदधामादि अस्तीत्युपास्यत्वेन विधीयते । साङ्ख्यशास्त्रे ह्यनामरूपगुणमपाणिपादमचक्षुःश्रोत्रमकर्माद्वितीयमपि नामरूपादिकं नास्तीति निषिध्यते इत्येवं भूतौ भिन्नौ परस्परविरुद्धौ च धर्मौ ययोस्तयोः । भिन्नविषयत्वे विरोधो न स्यादित्येकस्थयोः एकस्मिन् आश्रये तिष्ठत इत्येकं ब्रह्मैव विषयीकुर्वतोरित्यर्थः । ननु तर्हि कथमवैषम्यमप्रातिकूल्यं वा तत्राह । वस्तुनिष्ठयोः वस्तुनि वास्तववस्तुन्येव निष्ठा प्रतिपादकत्वलक्षणा ययोः । तेन भक्तिशास्त्रं विधिना वास्तवं वस्त्वेव प्रतिपादयति तत्त्ववास्तवम् । तथा ज्ञानशास्त्रं निषेधेन वास्तवं वस्त्वेव प्रतिपादयति तत्त्ववास्तवम् । तेन भक्तिशास्त्रेण परमेश्वरस्य रामकृष्णादिमूर्त्तेर्नामरूपादिकवस्तुप्रतिपादने सिद्धे ज्ञानशास्त्रमपि तस्य वस्तुनिष्ठत्वादत्र तस्य नामरूपादिकं नैव निषेधति किन्तु तस्य मायिकमूर्त्तेर्विराज एव अत एव पुनर्भक्तिशास्त्रमपि ज्ञानशास्त्रेणनिषिद्धं विराड्रूपमुपास्यत्वेन नोपादत्ते । यदुक्तम् ।

अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते ।
उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः ।

इति विराड्रूपस्यापि धारणायामुपादानं तु कस्यचिदेव प्रथमदशायामेव चित्तशुद्ध्यर्थमेव न तु सर्वदोपासनार्थमिति भक्तिज्ञानशास्त्रयोर्वस्तुतस्त्वविरोध एवेति शास्त्राविरोधेऽपि विवदमानाः शास्त्रतात्पर्यमविद्वांसो दार्शनिका एव विगीता इति भावः ॥ ३२ ॥

अतो नामरूपादिविधिनिषेधाभ्यां शास्त्रद्वयाविरोधं व्यञ्जयन् भक्तवत्सलस्य भगवतः स्वस्मिन्ननुग्रहं प्रार्थयते ! य इति अनामरूपः प्राकृतनामरूपादिरहितोऽपि जन्माभिरवतारैर्विशुद्धोर्जितसत्त्वानि रूपाणि कर्मभिर्नामानि च भेजे इति स्वामिचरणाः । भेजे प्रकटीचकार ॥ ३३ ॥

तदेवं न यस्य सख्यमित्यनेन "सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे" इत्यनेन च जीवेश्वरयोरल्पज्ञत्वसर्वज्ञत्वाभ्यां वास्तवमेव पार्थक्यमवधारितमेव । ततश्च "यत्रोपरतं मनस" इत्यनेन मनीषिणोऽन्तर्हृदीत्यनेन च तस्यैवेश्वरस्यैकस्य व्यवहारिकनिर्विशेषसविशेषज्ञानगम्यत्वेन निर्विशेषं सविशेषस्वरूपञ्च यथामति व्यञ्जितम् । पुनश्च स वै ममाशेषेति त्रयं मायिकवस्तूनां तद्रूपत्वेऽपि तत्स्वरूपभूतत्वाभाव उक्तः पुनरस्तीति नास्तीति द्वयेन भक्तिशास्त्रज्ञानशास्त्रयोरविरोधो गूढोऽपि स्पष्टीकृतः । इदानीं ये जीवेश्वरयोः पार्थक्यमुपाधिकृतमेव न वास्तवमित्याचक्षते तेषां ज्ञानिमानिनामसमञ्जसपथगामित्वं व्यञ्जयन् स्वमनोरथासिद्धिं गायते । यः प्राकृतैर्ज्ञानपथैर्जनानां देहगतः यथाशयम् आशयमन्तःकरणं दुष्टं शिष्टं वा अनतिक्रम्य तद्धर्माक्रान्त एव विभाति जीवरूपेण भासते यथा वायुः पार्थिवं दुष्टं शिष्टं वा गन्धमाश्रितो गन्धवान् भवति न तु वस्तुतः ॥ ३४ ॥

संस्तुवतो दक्षस्य ॥ ३५—३६ ॥

कटकः पादकटकः वलयं हस्तस्थम् ॥ ३७—४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु ब्रह्मैव विश्वहेतुश्चेत्तर्हि ब्रह्मकारणवादिभिः सह प्र[illegible] परमाणवादिकारणवादिनः कुतो विवदन्ते इत्यत्राह । यच्छक्तय इति [illegible] ब्रह्मणः शक्तयः प्रकृत्याद्या अज्ञाततया वादिनां पूर्वपक्षि[illegible] साङ्ख्यादीनां विवादस्य पूर्वपक्षस्य ज्ञानत । च [illegible]

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वादिनां सिद्धान्तिनां सम्वादस्य सिद्धान्तस्थापनस्य भूयो भूयः निमित्तानि भवन्ति । एषां वादिनां भगवच्छक्त्यनभिज्ञानां मुहुरात्ममोहं च कुर्वन्ति तस्मै भूम्ने अनन्ताय नमः । अथ प्रधानादिविश्वहेतुत्वे अयोग्यतां ब्रह्मणस्तत्र योग्यतां च दर्शयति । अनन्तगुणायेति । सृज्यमानविश्वे तस्य सृजनादिगमनधारणपालना- दयोऽनन्ताः अवाच्याः नित्या गुणा यस्मिन् तस्मै । ते च "अनन्त- कल्याणगुणात्मकोऽसौ" इत्यादिश्रुतिषु प्रसिद्धाः "ज्ञानशक्तिबलै- श्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ।" इति श्रीपराशरेणोक्ताश्च । अत्रापि "इमे चान्ये च भगव- न्नित्या यत्र महागुणाः" इत्यादिषु प्रसिद्धाः । अचेतनानां प्रधाना- नामीश्वितृत्वादिगुणहीनानां न जगत्कारणत्वमिति भावः ॥३१॥

तेषां मोहितत्वं दर्शयन् वेदप्रमाणकं ब्रह्मैव विश्वकारण- मित्याह । अस्तीति । एकस्थमीश्वरभावनिष्ठं योगशास्त्रम् नास्तीति एकस्थमीश्वरसाङ्ख्यशास्त्रम् । एकस्थं च एकस्थं च एकस्थे तयोः अन्यविरुद्धधर्मिणोः अन्योऽन्यभिन्नौ विरुद्धौ च धर्मौ प्रतिपाद्यौ तदर्थौ ययोस्तयोः वस्तुतः तदभिमतं जगत्कारणं तन्निष्ठयोः योगसाङ्ख्ययोः किमवेक्षितमहो किं विचारितं न च किमपीत्यर्थः । अयमर्थः । साङ्ख्ये प्रोक्तमीश्वरो नास्ति प्रधानम- तस्य जगतः कारणं न ब्रह्मेति तदयुक्तम् "यतो वा इमानि भूतानि जायन्ते" इत्युपक्रम्य "तद् ब्रह्म तद्विजिज्ञासस्व" इति श्रुतिवि- रुद्धत्वात् ॰ योगे चोक्तमीश्वरोऽस्ति निमित्तमात्रं जगदुपादा- नकारणं तु प्रधानमिति तदप्ययुक्तं "तदात्मानं स्वयमकुरुत तदैक्षत बहु स्याम्" इत्यादिश्रुतिविरोधात् । तस्मात् बृहद्ब्रह्मैव परं जगत्कारणमनुकूलं ध्यातॄणां हितं भवति । यतः समं सर्वात्मभूतमित्यर्थः "कारणं तु ध्येयम" इतिश्रुतेः सर्वात्मभूतब्रह्म- ध्यानेनैव मुक्तिर्भवति न प्रधानाद्यनात्मध्यानेनेति फलितोऽर्थः । तेन सर्वे वेदविरुद्धवादिनो भगवन्मायामोहिता इति बोधितम्॥३२॥

एवं मायामोहितैरज्ञातोऽपि यः पादमूलं भजतामनुग्रहार्थं जन्मभिः रूपाणि मूर्तीः कर्मभिर्नामानि च भेजे स महां प्रसीदताम् तानि रूपाणि नामानि चाप्राकृतानीति द्योतयितुं नामरूपे व्याक- रवाणीति श्रुतिप्रसिद्धेः अनित्यप्राकृतनामरूपसंबन्धाभावं भगवतः प्राह । अनामरूप इति ॥ ३३ ॥

एवं परायणेतथानुभूतये इत्यादिना परत्वसर्वात्मत्वमायामो- हितजनदुर्ज्ञेयत्वविभुत्वसर्वात्मत्वसर्वप्राकृतनामरूपविलक्षणत्वादि- भिर्गुणैः स्वरूपतो जीवविलक्षण एव भगवानित्युक्तम् । अत्र प्राकृतास्तु देहे जीवः स एवेति जानन्तीत्याह । प्राकृतैः प्रकृतिमोहि- तजीवप्रवर्तितैः ज्ञानमार्गैः जनानां यथाशयमाशयमन्तःकरण- मनतिक्रम्य यो देहगतो विभाति जीवधारकोऽपि जीवो विभाति न तु स जीवः "अन्तः प्रविष्टः शास्ता जनानां द्वा सुपर्णा सयुजा सखाया" इत्यादिश्रुतिगणव्याकोपात्तत्र दृष्टान्तमाह । यथा पार्थिवं गुणं गन्धं श्रितः तद्धारकः न तु पार्थिवगुणस्वरूपः अनिलः तथापि भ्रान्तेर्दृष्टिभिः जनानां विभाति तद्वदित्यर्थः । स मे मनोरथं कुरु- [illegible]गुणप्रदानेन रचतु ॥ ३४ ॥

[illegible]कारेण संस्तुवतो दक्षस्य स भगवानाविः प्रन्पदः [illegible] ॥३५॥ ३६ ॥ ३७ ॥

महान्ति किरीटकटकानि शिरस्ककरणगतानि यस्य सः कान्च्या- दिभिर्भूषितश्च वलयं हस्तभूषणं कटकस्याकत्वात् ॥ ३८ ॥ ३९॥ आगतसाध्वसः । आनन्दातिशयाज्ञानसंभ्रमः ॥ ४० ॥

भाषा टीका ।

जिन परमेश्वर की अनेक विचित्र शक्तियों को देखकर शास्त्राज्ञ लोगों के परस्पर मे अनेक वाद विवाद उत्पन्न होते हैं फिर भी वे कुछ निश्चय नहीं कर सकते हैं उनको मोह ही वारंवार होता है उन अनन्त गुण वाले व्यापक परमात्मा के अर्थ नमस्कार है ॥ ३१ ॥

परमात्मारूप एक वस्तु मे गुणादिकों का निषेध करने वाला साङ्ख्यशास्त्र है गुणादिकों का विधान करने वाला योग शास्त्र है इन दोनों में एक वस्तु मे कथन किया जो अस्ति नास्ति ये विरुद्ध धर्म प्रतीत होता है सो भी उसके विचार से देखने पर विरोध नहीं होता है क्यों कि निषेध प्राकृत गुणों का है विधान दिव्यगुणों का है इस प्रकार धर्म वाले सर्वत्र व्याप्त सबके अनुकूल समरूप परब्रह्म हैं ॥ ३२ ॥

जो परमात्मा प्राकृत नाम रूप रहित भी हैं तो भी चरण कमल भजने वालों के अनुग्रह से अनन्त भगवान् होनेसे दिव्य जन्म कर्मों को करके नाम रूपो को धारण करते हैं वे परम ईश्वर मेरे अर्थ प्रसन्न होवें ॥ ३३ ॥

जो ईश्वर सब प्राणि मात्र के देह गत होने पर भी प्राकृत बुद्धि के अनुसार अनेक ज्ञान मार्गो से अनेक देवतादिरूप प्रतीत होते हैं जिस प्रकार से धूली को उड़ाने वाला पवन धूली के वर्ण से गिना जाता है ऐसी जिन की महिमा है सो ईश्वर मेरे मनोरथ को पूरा करें ॥ ३४ ॥

श्रीशुकदेवजी बोले हे कुरुश्रेष्ठ ! इस प्रकार स्तुति करने से उस अघमर्षण तीर्थमे भक्तवत्सल भगवान् स्तुति करने वाले दक्ष के सन्मुख प्रगट भये ॥ ३५ ॥

श्रीभगवान् गरुडजी के कांधे पर विराजे हैं उनके लंबायमान महा आठ भुजा हैं चक्र शङ्ख तलवार ढाल बाण धनुष पाश गदा इन आयुधों को भगवान् ने धारण किया है ॥ ३६ ॥

पीत पीतांबर को धारण किये हैं मेघ सरी के श्यामहैं मुखार विन्द औ नेत्र भगवान के अति प्रसन्न हैं वनमाला से शरीर भूषित है श्रीवत्स कौस्तुभ से अति शोभायमान हैं ॥ ३७ ॥

बड़े भारी किरीट कङ्कण इन से शोभित हैं मकरकुण्डल प्रकाशमान हो रहे हैं कांति मेखला मुद्रिका कड़ा नूपुर बाजूबन्द इनों से भूषित हैं ॥ ३८ ॥

तीनों भुवनों के ईश्वर भगवान् तीनों लोकों के मोहन करने के रूप को धारण किये हैं नारदजी नन्दादी देवता के गणपति पार्षदों से भगवान सेवित हैं ॥ ३९ ॥

गान करते हुये सिद्ध चारणादिक भगवान के गान करते हैं और करते हैं बड़े आश्चर्य युक्त ऐसे रूप को दर्शन करने मात्र भय भीत सा होकर नमस्कार दक्ष करने लगे ॥ ४० ॥

न किञ्चनोदीरयितुमशकत्तीव्रया मुदा ।
आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः ॥ ४१ ॥
तं तथावनतं भक्तं प्रजाकामं प्रजापतिम् ।
चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ॥ ४२ ॥

॥ श्रीभगवानुवाच ॥

प्राचेतस ! महाभाग ! संसिद्धस्तपसा भवान् ।
यच्छ्रद्धया मत्परया मयि भावं परं गतः ॥ ४३ ॥
प्रीतोऽहं ते प्रजानाथ ! यत्तेऽस्योद्बृंहणं तपः ।
ममैष कामो भूतानां यद्भूयासुर्विभूतयः ॥ ४४ ॥
ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः ।
विभूतयो मम ह्येता भूतानां भूतिहेतवः ॥ ४५ ॥
तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रिया कृतिः ।
अङ्गानि क्रतवो जाता धर्म आत्मासवः सुराः ॥ ४६ ॥
अहमेवासमेवाग्रे नान्यत् किञ्चान्तरं बहिः ।
संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥ ४७ ॥
मय्यनन्तगुणेऽनन्ते गुणतो गुणविग्रहः ।
यदासीत्तत एवाद्यः स्वयम्भूः समभूदजः ॥ ४८
स वै यदा महादेवो मम वीर्योपबृंहितः ।
मेने खिलमिवात्मानमुद्यतः सर्गकर्मणि ॥ ४९ ॥
अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणम् ।
नव विश्वसृजो युष्मान् येनादावसृजद्विभुः ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आपूरितानि मनोद्वाराणि इन्द्रियाणि तैः । यथा ह्रदिन्यो नद्यो निर्झरैरापूर्यन्ते तथा महानन्दपूर्णत्वेनाघूर्णितकण्ठाद्यगादीनां न किञ्चिदुक्तुं शक्तोऽभूदित्यर्थः ॥ ४१ ॥

यद्यप्यसौ नाभ्यधात्तथापि चित्तज्ञ इदं वक्ष्यमाणमाह ॥ ४२ ॥

भावं भक्तिं गतः प्राप्तः ॥ ४३ ॥

यद्यस्मात्ते तपोऽस्य विश्वस्योद्बृंहणं वृद्धिकरमतस्तेऽहं प्रीतः ननु तपसो लोकसमृद्ध्यर्थत्वे त्वत्प्रीतेः किं कारणं तत्राह । ममेति । भूतानां विभूतयः समृद्धयो भूयासुरिति यदेष एव मम कामः अतो मत्कामपूरणादेवाहं प्रीतोऽस्मीत्यर्थः ॥ ४४ ॥

भूतिविस्तारप्रयत्नश्च तवोचित एवेत्याह । ब्रह्मेति । भवन्तः प्रजापतयः भूतेरुद्भवस्य हेतवः ॥ ४५ ॥

विश्ववृद्ध्यर्थेन त्वत्तपसाहं प्रीत इत्युक्तं तदेव तपः स्तुवन् प्रसङ्गादन्यान्यपि लोकवृद्धिकराणि विद्यादीनि स्तौति । तपो यमनियमादिसहितं ध्यानं मे हृदयम् विद्या साङ्गमन्त्रजपः ध्यानं तनोतीति तनुर्देहः क्रिया ध्यानादिविषयः पुंव्यापारो भावनाशब्दवाच्यस्तेन हि ध्यानादिकमाक्रियत इत्याकृतिः । जाताः सुनिष्पन्नाः क्रतवोऽङ्गानि शिरो वा "एतद्यत्प्रवर्ग्यः ग्रीवा उपसदश्चक्षुषी आज्यभागौ" इत्यादिश्रुतेः धर्मः क्रत्वाद्यपूर्वमात्मा मनः हृदयाश्रयत्वात् । सुरा यज्ञभुजस्त एवासवः प्राणाः सन्तर्पणीयत्वात् ॥ ४६ ॥

तपसः सन्तानवृद्धिहेतुत्वं दर्शयितुं द्वितीयतृतीयोक्तमितिहासमाह चतुर्भिः । अहमेवेति । वस्त्वन्तरव्यावृत्तिः आसमेवेति क्रियान्तरव्यावृत्तिः आन्तरं ग्राहकं बहिर्ग्राह्यं संज्ञानमात्रं चैतन्यमात्रमव्यक्तमिन्द्रियवृत्तिभिरनभिव्यक्तम् अत एव प्रसुप्तमिव विश्वतः सर्वत्र ॥ ४७ ॥

गुणतो मायातः गुणमयो विग्रहो ब्रह्माण्डं [illegible] अजोऽयोनिजः ॥ ४८ ॥

खिलमसमर्थमिव ॥ ४९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मे मया तप तपेत्यभिहितः सन् । येन तपसा ॥ ५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तीव्रया निरतिशयया मुदा आपूरितानि मनोहराणीन्द्रियाणि तैर्यथा ह्रादिन्यां नद्यो निर्झरैरापूर्यन्ते तथा महानन्दापूर्णत्वान्मनोहराणां तैर्युक्तो न किञ्चिदपि मनीषितं कर्तुं शक्तोऽभूदित्यर्थः ॥ ४१ ॥

तथा निरतिशयया मुदा स्वमनीषितविज्ञानेऽप्यशक्तमवनतं नम्रीभूतं प्रजाः कामयमानं भक्तं प्रजापतिं दक्षं प्रति सर्वेषां सत्त्वानां भूतानां चित्तज्ञः अभिप्रायज्ञो भगवान् जनार्दनः इदं वक्ष्यमाणमुवाच ॥ ४२ ॥

उक्तमेवाह । प्राचेतस इति । हे महाबुद्धिमन् ! प्राचेतस ! भवान् तपसा संसिद्धः । यत् यस्मात् परया श्रद्धया मयि परमुत्कृष्टं भावं भक्तिं गतः प्राप्तवान् ॥ ४३ ॥

हे प्रजानाथ ! ते तुभ्यमहं प्रीतः । कुतः । यस्मात्ते तव तपः अस्य जगत उद्बृंहणं वर्धकं जगद्वर्धकत्वात्तपसस्ते माहं प्रीत इति भावः । एतदेवोपपादयति । ममैषस्वर्धन । ममायमेव कामः कोऽसौ कामस्तत्राह । यद्भूतानां भूतयः समृद्धयो भूयासुः भवेयुरिति यत्तन्मन्मनीषितं,जगद्वृद्धिकरत्वात्त्वत्तपसस्तेनाहं प्रीत इत्यर्थः ॥४४॥

ब्रह्मादयनुभवेन भूतविस्तारप्रयत्नश्च तवोचित एवेत्याह । ब्रह्मेत्येकेन श्लोकेन । ब्रह्मा चतुर्मुखः भवो रुद्रः भवन्तः प्रजापतयः मनवः स्वायम्भुवादयः विबुधेश्वरा इन्द्रादयश्च ये ते सर्वे मम विभूतयः अंशाः । भूतानां भूतिहेतवः समृद्धिहेतवः पाति हेतव इति पाठे पालयश्च हेतवश्चेत्यर्थः ॥ ४५ ॥

विश्ववृद्धिकरत्वात्तपसाहं प्रीत इत्युक्तं तदेवस्तुवन् प्रसङ्गादन्यान्यपि लोकवृद्धिकराणि स्तौति । तप इति । हे ब्रह्मन् तपः ध्यानं मम हृदयं विद्या मन्त्रजपः तनुः शरीरं क्रियाः स्मार्तक्रिया आकृतिः संस्थानं क्रतवो यज्ञाश्च ममाङ्गान्यवयवाः । सोमसाध्या यज्ञाः क्रतवश्च पुरोडाशादिसाध्या यज्ञा इति भेदः । क्रतवो जाता इति पाठे क्रतवो ममाङ्गानि जाता इत्यर्थः । धर्मः स्मार्तो दानादिरूपः आत्मा मनः असवः प्राणाः । तपआदीनां स्वहृदयत्वेन रूपणं तत्तुल्यत्व स्वस्य जगदुत्पत्तिस्थितिलयहेतुत्वाज्जगत्कारणभावयवत्वेन रूपणे हि तपआदीनां स्तुतिः सम्पन्ना भवति । यद्वा । हृदयतन्वाकृत्यङ्गात्मासूनां लोके प्रीतिविषयत्वदर्शनात्स्वस्य तपआदयो नितरां प्रीतिविषया इति ज्ञापनाय हृदयादिभावेन रूप्यन्ते ॥ ४६ ॥

भगवतस्तपोपबृंहितत्वमेव वक्तुं तावज्जगदुत्पत्तेः प्राक्कारणस्य वस्तुनोऽवस्थानप्रकारमाह । अहमेवेति । अग्रे सृष्टेः प्रागहमेवासमहमेक एवाविभक्तनामरूपचिदचिच्छरीरकोऽवस्थित इत्यर्थः । त…वोपपादयति । अन्यदान्तरं चिद्रूपं बाह्यमचिद्रूपं किञ्चिन्नासीत् कार्यावस्थापन्नं चिदचित्तत्त्वं किञ्चिन्नासीदित्यर्थः । तदा जीवप्रकृतिस्वरू[illegible]इत्यर्थमाह । संज्ञानमात्रमिति । संजानातीति संज्ञानं [illegible]कर्तरि ल्युः । तदेव तन्मात्रं मात्रशब्देन देवमनुष्यादि[illegible]व्यावृत्तिः । नामरूपविभागरहितं ज्ञानं तथा विश्वतः [illegible]प्रसुप्तं प्रलीनं सूक्ष्ममव्यक्तं प्रधानं च प्रसुप्तमिवेतीव शब्देन तस्य लीनत्वेऽपि जगदात्मना परिणामशक्तिस्तस्यानपगतेति सूच्यते ॥ ४७ ॥

अनन्तकल्याणगुणाकरे स्वरूपतोऽप्यनन्ते मयि आसीदिति क्रियापदविपरिणामेनान्वयः । मयि शरीरत्वेनावस्थितमासीदित्यर्थः । एवं सूक्ष्मचिदचिच्छरीरकत्वेनावस्थितस्य मम शरीरभूताद्गुणत्रयात्मकप्रधानान्महदादिक्रमेण गुणविग्रहः त्रिगुणपरिणामरूपो ब्रह्माण्डात्मको विग्रहो मम देहः यदासीत्तदा ततो गुणविग्रहादेवाद्यः समष्टिपुरुषः स्वयम्भुरयोनिजः अजो ब्रह्मा आसीत् ॥ ४८ ॥

स वै महादेवो ब्रह्मा मम वीर्येण सङ्कल्परूपज्ञानेन उपबृंहितः अनेन जीवेनात्मनानुप्रविश्येत्युक्तरीत्या सङ्कल्परूपज्ञानेन व्याप्त इत्यर्थः । तदा सर्गकर्मणि जगत्सृष्टिकर्मणि उद्युक्तोऽपि स्विद्यमसमर्थमिवात्मानं स्वात्मानं मेनेऽमन्यत ॥ ४९ ॥

अथासमर्थत्वेनात्मनो मननानन्तरं मे मयाभिहितः तप तपेत्यभिहितः दारुणं दुष्करं तपोऽतप्यताकरोत् । स च तप्ततपा विभुर्ब्रह्मा येन तपोबलेन विश्वसृजः प्रजापतीन् युष्मान् दक्षादीनसृजत्तत्तप एव विश्वस्योपबृंहणमित्यभिप्रायः ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ह्लादिन्यः ह्लादिनीभवो जलनिर्गमः ॥ ४१ ॥

इदमपि निजरूपत्वसाधकमित्याशयेनाह । तं तथेति ॥ ४२ ॥

भावं भक्तिम ॥ ४३ ॥

बृंहणं प्रजापूरणयोजनं कामोऽभिप्रायः ॥ ४४ ॥

विभूतयः मम विशेषेण सन्निधानस्थानभूताः । "विशेषव्यक्तिपात्रत्वाद्ब्रह्माद्यास्तु विभूतयः । तदन्तर्यामिणश्चैव मत्स्याद्या विभवा इति" इति वचनात् ॥ ४५ ॥

ब्रह्म पूर्णं तपो मे हृदयं प्रियं कुतस्तपोऽभिमानी रुद्रः मम हृदयाज्जातः तदाश्रितश्चेत्येवं व्याख्येयं विद्या मम तनुः स्वरूपं विद्याभिमानिन्युमा तनोर्जाता तदाश्रिता क्रियाभिमानी त्विन्द्रो हरेराकृतिः शृङ्गाराज्जातस्तदाश्रितश्च क्रतवो यज्ञाः सङ्कल्पा वा तदाश्रिताश्च अभिमानी च पूर्वोक्त एव । धर्मो धर्मराजः हरेरात्मा मध्यदेहाज्जातः तदाश्रितश्च । सुराः सुरोऽभिमानमेव राः (१) कुल्याम्नं यस्य स सुराः वायुश्चित्तगतः हरेर्गतिप्रियः असवो हरेः प्राणाज्जातस्तदाश्रितश्च । असव इति बहुवचनमप्शब्दवत् (२) । ब्रह्माद्याः सुराश्च हरेरसुशब्दवाच्येभ्यः श्रोत्रादीन्द्रियेभ्य उत्पन्नाः । तदाश्रिताश्चेति क्रियावृत्त्या व्याख्येयम् ।

तपोऽभिमानी रुद्रश्च विष्णोर्हृदयमाश्रितः ।
विद्यारूपा तथा चोमा विष्णोस्तनुमुपाश्रिता ॥
शृङ्गाराकृतिगतः क्रियात्मा पाकशासनः ।
अङ्गेषु क्रतवः सर्वे मध्यदेहे च धर्मराट् ॥
प्राणो वायुश्चित्तगतो ब्रह्माद्याः स्वेषु देवताः ।

---

(१) राशब्दस्य कुल्यान्नवाचित्वात्कुल्यान्नमित्युक्तम् कुल्यान्नं स्नातव्यकुल्ययोग्यान्नम् ।

(२) अप्शब्दवदित्यनेन अप्शब्दो नित्यं बहुवचनान्त इति सूच्यते "पुंसि भूम्न्यसवः प्राणाः" इत्यभिधानम् सुराः सुरायै सुराय इति रूपम् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतिवचनानुक्त एवार्थो ग्राह्यः । रुद्रादीनां हरेस्तद्रूपशब्दवाच्यत्वम् "यदाश्रयं यद्भवति तत्तन्नामकमीरितम्" इत्यभिधानात् सिद्धम् ॥४६॥

अत्राद्वैतवादिनो निर्गुणं वाङ्मनसागोचरं जगत्कारणं सगुणमिति द्विविधं कल्पयन्ति तन्मतनिराकरणायाह । अहमेवेत्यादिना । "सप्तम्यु प्रथमा" इति सूत्रात् । अहं मम यदिदं स्वरूपं त्वया तपसा दृष्टं तदेवाग्रे सृष्टेः प्राक् लये आस अन्यद्वाङ्मनसागोचरं नाम "सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा" इतिश्रुतेः । असति प्रलये कीदृशमन्तर्बहिः सर्वान्तः स्थितं सर्वस्माद्बहिरपि स्थितम् "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेः । तपसा दृष्टं प्राकृतं चेदुक्तार्थानुपपत्तिरित्यत उक्तं संज्ञानमात्रमिति समित्येनेन ज्ञानस्य स्वरूपाभेदं ध्वनयति मात्रशब्देन प्रकृतिप्राकृतरूपराहित्यमवताररूपाणां च तदात्मत्वं सूचयति "सत्यं ज्ञानम्" इति श्रुतेः । अत एवाव्यक्तमतिसूक्ष्मम् "तदव्यक्तमाह हि" इति सूत्रात् । हरेः स्वापवचनमपि लोकव्यामोहनार्थमिति भावेनाह । प्रसुप्तमिवेति । कृतचक्षुर्निमीलनमात्रं नत्वज्ञानात्मकनिद्रया युतं श्रियं विनार्थान्तरं स्वापावस्थाभागित्यर्थः । सर्वं हरौ लीनं चेन्मुख्यतस्तद्विशेष एव किं न स्यादित्यत उक्तं विश्वत इति । विश्वस्माद्भिन्नमिति शेषः । अनेन हरेर्नानावर्णत्वं तथा करचरणाद्यवयवत्वं भिन्नमन्तरेणावस्थानं ध्वनितं तत्कथं युज्यत इतीयमाशङ्का "नानावर्णो हरिस्त्वेको बहुशीर्षभुजोरुपात् । आसील्लये तदन्यत्तु सूक्ष्मरूपं श्रियं विना । असुप्तः सुप्त इव च मीलिताक्षो भवेद्धरिः । अन्यत्रानादरात्स्वीय विष्णौ लीनेव कथ्यते । सूक्ष्मत्वेन हरौ स्थानाल्लीनमन्यदपीष्यते" । इत्यनेन परिहर्तव्येति । सृष्टौ स्वीकृतनानावर्णं ज्ञानात्मकावयवं यद्रूपं दृष्टं तदेव प्रलये स्वोदरलीनप्रपञ्चनित्यप्रबुद्धमपि स्वलीनवस्तुत्वात् मीलितत्वेन मीलिताक्षमपारार्द्धकं श्रीहरिरूपमिति भावः ॥ ४७ ॥

एवमुक्त्वा सृष्टिमाह । मयीति । मयि मत्सम्बन्धिनाभेः यत्पद्ममासीत् ततः पद्मादेव स्वयम्भूः समभूदित्यन्वयः । कोऽसौ स्वयम्भूरित्यत उक्तमज इति "अजा विष्णुहरच्छागा" इत्यतः कथं निर्णय इत्यत उक्तमाद्य इति । जगदादौ भूतश्चतुर्मुख एवेत्यर्थः । "अजः पितामहो ब्रह्मा" इत्यभिधानाच्च । कीदृशे मयि अनन्तगुणे असङ्ख्यातज्ञानादिगुणे गुणतोऽनन्ते प्रत्येकशोऽप्यसङ्ख्याते अनन्तविग्रहे असङ्ख्यातरूपे "प्रत्येकशो गुणानां तु निःसीमत्वमुदीर्यते । अनन्तत्वं तु गुणतस्ते-चानन्ता हि संख्यया । अतोऽनन्तगुणो विष्णुर्गुणतोऽनन्त एव च" इति वचनं चात्रमानम् ॥ ४८ ॥

महादेवः देवेभ्यो महानुत्तमः । स ब्रह्मा अकल्पमशक्तं स्रष्टुमिति शेषः ॥ ४९ ॥

अथ तदा मे मया येन तपसा ॥ ५०—५२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तीव्रया नितान्तया मुदा स्वात्मस्थितनन्दरूपया । आपूरितैः सर्वांशेनैव पूरितैः मनोद्वारैः ज्ञानेन्द्रियैरिति तत्तद्वारेण स्वात्मनः सर्वांशेन पूरितैर्निर्झरैरन्तर्निर्गमैर्हृदिन्य इवेति ॥४१—४४॥

नन्वकामस्य तव कथंभूतविभूतिकामना । उच्यते । भक्तसम्बन्धात्तद्वात्सल्येनैवेत्याह । ब्रह्मेति । ब्रह्मादयो भक्ता हि मनवः मम विभूतयः ते चान्येषां भूतिहेतव इति ॥ ४५ ॥

यतो भक्तिः खलु ममान्तरङ्गा शक्तिरित्याह । तप इति ॥ ४६ ॥

तत्र भक्त एव मम सृष्ट्यादिसम्बन्धे हेतुरिति दर्शयितुमाह । अहमिति । पद्यमिदं जगदधिकृत्य नतु वैकुण्ठमधिकृत्येति ज्ञेयम् ॥ ४७ ॥

भक्तमेव दर्शयति । मयीति ॥ ४८ ॥

वीर्योपबृंहितः वीर्याज्जातः ॥ ४९ ॥

तस्य च भक्तिं दर्शयति । अथेति । तस्माद्भवतोऽपि भूतिविभूतिहेतुत्वं भक्तत्वादेवेति ॥ ५०—५२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यथा ह्रदिन्यो निर्झरैरापूर्यन्ते तथा मुदा आनन्देन आपूरितानि मनोद्वाराणि चक्षुरादीन्द्रियाणि तैर्हेतुभिः किञ्चित् उदीरयितुं वक्तुं द्रष्टुं श्रोतुं वा नाशकत् ॥ ४१—४२ ॥

मयि परं भावं परमात्मैवायमिति श्रेष्ठां भावनाम् ॥ ४३ ॥

अस्य विश्वस्य उद्बृंहणं वृद्धिकरं यत्ते तपोऽभूत् एष ममैव कामः । मदिच्छयैव तव तपः सिद्धं बभूवेत्यर्थः । ननु किमाकारस्ते कामस्तत्राह । भूतानां विभूतयः समृद्धयो भूयासुरिति । यदेव एवेति ॥ ४४ ॥

ननु भवादृशा निकृष्टा एवेत्याह । ब्रह्मेति ॥ ४५ ॥

कर्मयोगे समुचितं मे रूपं श्रावयत्याह । तपः यमनियमादिकं मे हृदयम् । विद्या साङ्गमन्त्रजपो मे तनुः । क्रिया नित्यनैमित्तिकाद्या ममाकृतिः आकारः । क्रतवो ममाङ्गानि शिरो वा । "एतद्यत् प्रवर्ग्य उपसदश्चक्षुषी आज्य भागौ" इत्यादि श्रुतेः । जाता अभूवन् । धर्मः क्रत्वाद्यपूर्वं ममात्मा मनः । ममासवो देवाः सच्चिदानन्दस्वरूपस्य मम हृदयादिविभूतयस्तपआदयः ॥४६॥

भक्तियोगे समुचितं मे स्वरूपं श्रावयत्याह । अहमेव त्वया दृष्टैतत्स्वरूपचक्राद्यलङ्कारवाहनपार्षदादिविशिष्ट एवाग्रे सृष्टेः पूर्वमासमेव । तथैवाग्रे महाप्रलयानन्तरमपि भविष्याम्येवेत्यग्रे इत्यस्य पूर्वोत्तरकालवाचित्वाल्लभ्यते । साम्प्रतं त्वस्म्येवेत्यस्य अत एव प्राप्तिरिति स्वस्य त्रैकालिकी सत्ता दर्शिता । किञ्च । ममान्तरं बाह्यञ्च अन्यत् किमपि नास्ति । परिच्छिन्नस्यापि मत्स्वरूपस्य व्यापकत्वादित्यचिन्त्यशक्तिमत्त्वञ्च दर्शितम् । यदुक्तं "न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् । पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः । तं मत्वात्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम् । गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा" इति । ज्ञानयोगे समुचितं स्वरूपं श्रावयत्याह । संज्ञानमात्रं चैतन्यमात्रम् । अव्यक्तमिन्द्रियवृत्तिभिरग्राह्यं विश्वतः सर्वत्र ॥ ४७ ॥

स्वस्वरूपसत्त्वमुपदिश्य सृष्टौ प्रवर्त्तयितुमितिहासमाह मयीति । गुणतो मायातः । गुणविग्रहो महासमष्टिब्रह्माण्डं तत्र स्तन्मध्य एव स्वयम्भूर्युष्माकमाद्यः ॥ ४८ ॥

खिलमसमर्थमिव ॥ ४९ ॥

मे मया तप तपेत्युक्तः सन् येन तपसा ॥ ५० ॥

एषा पञ्चजनस्याङ्ग ! दुहिता वै प्रजापतेः ।
असिक्नी नाम पत्नीत्वे प्रजेश ! प्रतिगृह्यताम् ॥ ५१ ॥
मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः ।
मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ॥ ५२ ॥
त्वत्तोऽधस्तात् प्रजाः सर्वा मिथुनीभूय मायया ।
मदीयया भविष्यन्ति हरिष्यन्ति च मे बलिम् ॥ ५३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निर्झरैर्द्विन्यो नद्य इव मुदा आपूरितमनोद्वारैरानन्दितान्तःकरणबहिरिन्द्रियैः किञ्चनाप्युदीरयितुं नाशकत् ॥४१॥ ४२ ॥

भावं भक्तिम् ॥ ४३ ॥

यत् यस्मात्ते तपः अस्योदुपबृंहणां वृद्धिकरमतस्ते तुभ्यं प्रीतोऽहं प्रीतिमेव दर्शयति । भूतानां विभूतयः समृद्धयो भूयासुर्भवेयुरिति यदेष ममैव कामः ॥ ४४ ॥

भूतिहेतवो विभूतिवृद्धिकराः तपसेति शेषः ॥ ४५ ॥

प्रस्तुतं स्वप्रीतिजनकं तपः स्तुवंस्तद्वृद्ध्यादीन्यपि स्वप्रीतिजनकानि स्तौति । तप इति । हृदयं मनः । तनुर्देहः क्रिया सदाचारः । आकृतिः आकारः । जाताः स्वनुष्ठिताः क्रतवः मखानि आत्मा स्वरूपम् ॥ ४६ ॥

ननु यस्तपसा प्रीतोऽभूत् यस्य च ब्रह्मादयो विभूतयः स त्वं कः कुतश्च ते तव विभूतय इत्यत्र अहं सर्वहेतुर्ब्रह्मादयो मत्कार्यत्वान्मद्विभूतय इति सूचयन् पुनस्तपस्तौति । अहमिति चतुर्भिः । अग्रे सृष्टेः पूर्वम् अहं सर्वबीजभूतं ब्रह्मैव आसमेव अन्यत्ततः पृथगान्तरं भोक्तृत्वं बाह्यभोग्यवस्तु किञ्चन किञ्चनापि नासीत् । सर्वस्य सूक्ष्मरूपेण मदन्तर्गतत्वात् । कथम्भूतम् । संज्ञानमात्रं सम्यग् ज्ञानमात्रं ज्ञेयस्य विश्वस्य स्वस्मिन्नुपसंहृतत्वादित्यर्थः । अत एवाव्यक्तं विश्वाकारं व्यक्तावस्थारहितम् । विश्वतः सर्वतः प्रसुप्तमिव ॥ ४७ ॥

गुणाः शक्तिगुणेभ्यः । गुणविग्रहो ब्रह्माण्डाख्यो मम देहः । ततस्तदनन्तरम् आद्यः प्रजानां पूर्वः अजोऽयोनिजः ॥ ४८ ॥

स महादेवो ब्रह्मा मम वीर्येणोपबृंहितः उत्पादितः । सर्गकर्मणि उद्यतः आत्मानं खिन्नमसमर्थमनाथमिव मेने नाथे मयि विद्यमानेऽपीति द्योतयितुमिवशब्दः ॥ ४९ ॥

दारुणं दुष्करं विभुर्विपुलबोधः ॥ ५० ॥

भाषा टीका ।

... तब पृथिवी मे दंड की नाईं गिरकर भगवान् ... या बडे भारी आनन्द के होने से मुख से ... से समर्थ नहीं होसके ॥ ४१ ॥

जैसे झरनाओं से नदी भरजाती हैं तैसे प्रजापति के मन इन्द्रियद्वार सब आनन्द से भरगये स्तोत्र के फलरूप प्राप्त परमात्मा को नमस्कार करते रहगये ॥ ४२ ॥

प्रजाओं की कामना करने वाले तिस प्रकार से नम्र प्रजापति को देखकर सब के चित्त को जानने वाले जनार्दन भगवान् इस वचन को बोले ॥ ४३ ॥

श्रीभगवान् बोले हे महा भाग ! प्राचेतस ! तुम अब तपस्या से सिद्ध होगये जिससे कि परमश्रद्धा से मेरे में परम प्रेम को करते हो ॥ ४४ ॥

हे प्रजानाथ ! मै तुमारे ऊपर प्रसन्न हूं जो तुमने प्रजावृद्धिके लिये तप किया है सो हमारे को भी अभिमत है क्योंकि हम चाहते हैं कि संसार मे सबकी विभूति बढे ॥ ४५ ॥

ब्रह्मा महादेवजी आप मनु लोग इन्द्र यह सब हमारी विभूति हैं जोकि प्रजाओं की विभूतियों के हेतु हैं ॥ ४६ ॥

सृष्टिके पूर्वकालमें केवल मैंहीं रहा और भीतर अन्तःकरण से बाहिर चक्षु आदिकों से जानने लायक कुछ नहीं था सब जगत् सोया सरीका होगया था केवल ज्ञानमात्र ही था ॥ ४७ ॥

अनन्तगुणवाले अनन्त मेरे विषे गुणों से सत्वादि गुणरूप भारी गुणोंकी मूर्तिवाला सबका आद्यस्वयम्भू अज ब्रह्मा भया ॥४८॥

वह ब्रह्मा जब हमारे वीर्यसे वृद्धिको प्राप्त भया तब भी सृष्टि के कर्म मे उद्यत होने पर अपने को ब्रह्माने असमर्थ समुझा ॥ ४९ ॥

तब उस देव ब्रह्माने मेरे कथन से अति कठिन तप किया जिस तपके करने मे समर्थ होकर ब्रह्माने आदिमे आप दक्षादि नौ प्रजापतियों को सृजा है ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सन्ततिवृद्ध्युपायमाह । एषेति । अङ्ग ! हे दक्ष ! पञ्चजनाख्यस्य प्रजापतेः ॥ ५१ ॥

मिथुनस्य यो व्यवायो रतिः स एव धर्मो यस्य स त्वम् । तथाभूतायां तस्याम् ॥ ५२ ॥

॥ श्रीशुक उवाच ॥

इत्युक्त्वा मिषतस्तस्य भगवान् विश्वभावनः ।
स्वप्नोपलब्धार्थ इव तत्रैवान्तर्दधे हरिः ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कन्धे प्रचेतसां दक्षोत्पत्ति-
वर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मायया निमित्तभूतया । स्त्रिया सह मिथुनीभूय भविष्यन्ति पुत्रादिरूपेणोत्पत्स्यन्ते ॥ ५३ ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सन्ततिवृद्ध्युपायमाह । एषेति । भद्र हे दक्ष ! पञ्चजनस्य प्रजापतेर्याऽसिक्नी नाम दुहिता सैषा हे प्रजेश ! पत्नीत्वे भार्यात्वेनेत्यर्थः । प्रतिगृह्यतां त्वयेति शेषः ॥ ५१ ॥

मिथुनस्य यो व्यवायो रतिः स एव धर्मो यस्य सः त्वं मिथुनव्यवायधर्मिण्यामसिक्न्यामिमं प्रजासर्गं भूरिशो भावयिष्यसि वर्द्धयिष्यसीत्यर्थः । उभयोरपि मिथुनव्यवायधर्मविशेषणं परस्परस्यानुकूल्यसूचनार्थम् ॥ ५२ ॥

त्वत्तोऽधस्तादर्वाचीनाः प्रजाः सर्वाः मदीयया मायया मत्सङ्कल्पेन मिथुनीभूय भविष्यन्ति । मिथुनीभूता भविष्यन्ति मिथुनकर्मणोत्पत्स्यन्त इत्यर्थः । त्वत्तोऽधस्तात् प्रजा इत्यनेन प्राचेतसात्पूर्वं केवलसङ्कल्पादिभिरपि प्रजानामुत्पत्तिरासीत् सूचितम् । तथा मे मह्यं च बलिं हरिष्यन्ति । मदाराधनरूपं यज्ञादिकर्म करिष्यन्तीत्यर्थः ॥ ५३ ॥

इतीत्थमुक्त्वा विश्वस्य भावन उत्पादको भगवान् हरिस्तस्य प्राचेतसस्य मिषतः पश्यतः सतः स्वप्नोपलब्धार्थ इवेति विस्मयनीयत्वे चिरदृष्टत्वे च दृष्टान्तः । यथा "रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम्" इति ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्र-
चन्द्रिकायां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मदीयया मत्स्वरूपया मायया स्त्रीरूपिण्या अधस्तादर्वाचीनाः । बलिं मे हरिष्यन्ति दास्यन्ति ॥ ५३ ॥

मिषतः पश्यतः ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मिथुनीभूयेति केवलं मिथुनीभूयैवेत्यर्थः ॥ ५३—५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्वमपि सर्वरूपे पैतृके धर्मे यतस्वेत्याह । एषेति ॥ ५१ ॥

मिथुनस्य स्त्रीपुंसयोर्यो व्यवायः रतिः स एव धर्मो यस्य स त्वम् । तथा भूतायां तस्यामिति तादृशहंसगुह्यस्तवेन स्तुतेनापि दर्शितनिजश्रीमूर्त्तिदर्शनप्रसादेनापि उपदिष्टनिजतत्त्वोऽपि दक्षो भगवता यत् कर्ममार्गगम्ये विषयभोगे निःसीमके निक्षिप्तो न तु स्वप्रेमामृतसिन्धौ । तत्खलु स्वमहाभक्तश्रीरुद्रापराधशेषस्याभङ्गुरत्वेन हेतुना इति गम्यते । अतएवानन्तराध्याये श्रीमुनीन्द्रेणापि विष्णुमायोपबृंहित इत्याख्यास्यमानो दक्षो नारदमप्याक्षेप्स्यतीति पुनरप्यस्य महदपराधः फलिष्यति । न च कर्दमोऽपि भगवता विषयभोग एव निक्षिप्त इति वाच्यम् । तस्यैषत्सकामत्वमात्रस्यैव भगवता सावधिक एव विषयभोगवरो दत्तः । न तु निरवधिक एव । यदुक्तं तत्रैव "त्वञ्च सम्यगनुष्ठाय निदेशं म उशत्तमः । मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे" इति । स च कर्दमोऽपि अनुग्रहायास्त्वयीत्यादिना भक्तिमेवान्ते प्रार्थयामास । एवं सकामा अपि सर्व्वे एव भक्ता ध्रुवादयो भक्तिमेवाकाङ्क्षुरेव दक्षस्त्वजं भक्तिं नाकाङ्क्षति स्म भगवानपि तां तद्दर्शितेनैवापराधशेषस्यास्तित्वे लक्षयामिति ॥ ५२ ॥

भविष्यन्ति पुत्रादिरूपेण जनिष्यन्ते ॥ ५३-५४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्कन्धे चतुर्थोऽयं सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

कुरुतान्मे मनोरथमिति तद्वाञ्छितं प्रजावृद्ध्युपायमाह । एवंति । ॥ ५१ ॥

मिथुनस्य स्त्रीपुरुषयुग्मस्य यो व्यवायो रतिः स एव धर्मो यस्य। स त्वं तथाभूतायां प्रजासर्गं भूरिशः बहुप्रकारं भावयिष्यसि ॥५२ ॥

अधः अधस्तात्पश्चात् । मिथुनीभूय द्वन्द्वीभूय भविष्यन्त्यपत्यरूपैरुत्पत्स्यन्ते ॥ ५३ ॥

मिषतः पश्यतः ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रो मच्छुकदेवकृतसिद्धान्तप्रदीपे

चतुर्थाध्यायार्थप्रकाशः ॥ ४ ॥

भाषा टीका ।

अब हे प्रजेश ! दक्ष ! यह पञ्चजन प्रजापति की पुत्री असिक्नी नाम की है इसको तुम पत्नी रूपसे ग्रहण करो ॥ ५१ ॥

स्त्रीपुरुष के सङ्गसे रति करनेवाले तुम होवो यह भी मिथुन धर्मवाली है इसमें तुम फिर बहुत प्रजाओंकी उत्पत्ति करोगे ॥५२॥

हमारी माया से तुमारे से नीचे के सब प्रजा मैथुन धर्मवाले होकर पैदा होंगे और मेरी सेवा करेंगे ॥ ५३ ॥

श्रीशुकदेवजी बोले विश्वपालक भगवान् हरि इस प्रकार कहकर दक्ष के देखते ही देखते स्वप्नमे मिले पदार्थ सरीके उसी ठिकाने अन्तर्धान होगये ॥ ५४ ॥

इति श्रीभागवत षष्ठस्कन्ध चौथे अध्यायका

भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ ४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

॥ पञ्चमोऽध्यायः ॥

—-◌०◌—-

॥ श्रीशुक उवाच ॥

तस्यां स पाञ्चजन्यां वै विष्णुमायोपबृंहितः ।
हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः ॥ १ ॥
अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा नृप ! ।
पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशम् ॥ २ ॥
तत्र नारायणसरस्तीर्थं सिन्धुसमुद्रयोः ।
सङ्गमो यत्र सुमहन्मुनिसिद्धनिषेवितम् ॥ ३ ॥
तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ।
धर्मे पारमहंस्ये च प्रोत्पन्नमतयोऽप्युत ॥ ४ ॥
तेपिरे तप एवोग्रं पित्रादेशेन यन्त्रिताः ।
प्रजाविवृद्धये यत्तान् देवर्षिस्तान् ददर्श ह ॥ ५ ॥
उवाच चाथ हर्यश्वाः ! कथं स्रक्ष्यथ वै प्रजाः ।
अदृष्ट्वान्तं भुवो यूयं बालिशा बत पालकाः ॥ ६ ॥
तथैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमम् ।
बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिम् ॥ ७ ॥
नदीमुभयतोवाहां पञ्चपञ्चाद्भुतं गृहम् ।
क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमिम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चमे नारदेनाथ बोधात्कृष्टांस्तु नाशितान् ।
सुतानाकर्ण्य दक्षोऽमुं शशापेति निरूप्यते ॥ १ ॥ १ ॥

अपृथग्धर्मशीला एकाचारस्वभावाः ॥ २ ॥

तत्र प्रतीच्यां दिशि सिन्धोर्नद्याः समुद्रस्य च यत्र सङ्गमस्तत्रस्थं नारायणसरोनाम तीर्थं प्रययुरित्यन्वयः । सुमहदिति तीर्थविशेषणम् ॥ ३ ॥

विनिर्धूतो मलो रागादिर्यस्मात् स आशयो येषाम् ॥ ४ ॥

तान् शुद्धसत्त्वानपि पित्रादेशादेव प्रजाविवृद्धये यत्तान् युक्तान् ददर्श ॥ ५ ॥

अहो कष्टं मोक्षमार्गाधिकारिणः सन्त एते प्रवृत्तिनिष्ठैः कर्मभिर्नश्यन्तीति कृपया तान्निगूढार्थैर्वाक्यैरुपादिशत् स्म । तदाह । उवाचेति चतुर्भिः । पालकाः सन्तोऽपि बालिशा अज्ञा यूयं कथं प्रजाः स्रक्ष्यथ । बतेति खेदे । पालका इति पाठे बालिशत्वे हेतुः ॥ ६ ॥

एक एव पुरुषो यस्मिंस्तद्राष्ट्रमदृष्ट्वेत्यनुषङ्गः । बिलञ्चान्यादि-क्लिष्टनिर्गमनमविज्ञाय कथं सर्गं करिष्यथेति तृतीयेनान्वयः ॥ ७ ॥

पञ्च पञ्चानां पञ्चविंशतेरद्भुतं गृहं क्षौरपव्यं क्षुरैः पविभिर्वज्रैश्च निर्मितमिवातितीक्ष्णं दृढं चेत्यर्थः । स्वयं स्वतन्त्रं भ्रमिं भ्रमणस्वभावम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः प्राचेतसः किमकरोदित्यत्राह मुनिः । स इति । [illegible] मायोपबृंहितः भगवत्सङ्कल्पेन व्याप्तः स विभुर्दक्षः [illegible] जन्यां पञ्चजनस्य दुहितरि हर्यश्वसंज्ञानयुतं [illegible] यत् ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तानिवशितनिष्ठ । हे नृप ! सर्वे दाक्षायणाः दक्षस्य पुत्राः । अनन्तरापत्यं फणार्थः । अपृथग्धर्मशीलाः समानधर्माचरणशीलाः । प्रजासर्गे निमित्तं पित्रा प्राचेतसेन प्रोक्ताः आदिष्टाः प्रतीचीं दिशं प्रययुः ॥ २ ॥

क सिन्धुसमुद्रयोर्यत्र सङ्गमः यत्र नारायणसरआख्यं सुमहत्पुण्यतमं एव मुनिभिः सिद्धैश्च निषेवितं तीर्थं वर्त्तते तत्र ययुरित्यर्थः ॥ ३ ॥

तस्य तीर्थस्योपस्पर्शनादेव विनिर्धूतमलाः निरस्तमला आशयोऽन्तःकरणं येषां तादृशास्ते । पारमहंस्ये धर्मे । परमहंसानां ज्ञानिनां कर्म पारमहंस्यं तस्मिन्निवृत्तिधर्मे प्रोत्पन्ना मतिर्येषां तादृशाश्चाभवन् ॥ ४ ॥

एवंभूता अपि पित्रादेशेन प्राचेतसाज्ञया यन्त्रिता वशीकृताः उग्रं तप एव तेपिरे चक्रुः । पारमहंस्यधर्मपरा अपि पित्रादिष्टप्रजावृद्धिविधानोपयुक्तं तप एव चक्रुरित्यर्थः । एवं प्रजाभिवृद्धये यत्तान् प्रजाभिवृद्धचर्युक्तयत्नं कुर्वाणांस्तान् हर्यश्वान् देवर्षिः श्रीनारदो ददर्श । इति देवर्षिदर्शनस्य दौर्लभ्यं द्योतयति ॥ ५ ॥

हर्यश्वान् प्रत्युवाच उक्तमेवाह । कथमित्यादिना सर्गं करिष्यथेत्यन्तेन । हे बालकाः ! यूयं बालिशा अज्ञाः सन्तः प्रजाः कथं स्रक्ष्यथ सृजतामित्याह । अदृष्ट्वेति । भुवोऽन्तमदृष्ट्वा कथं स्रक्ष्यथेत्यन्वयः । यद्यपि भूमेः अन्तज्ञानादिकं सृष्ट्युपयोगीव प्रतिभाति तथापि न तत्सृष्ट्युपयोगितेनोच्यते । तस्य भूः क्षेत्रमित्यादिभिः सृष्टिप्रतिक्षेपकत्वावगमात् । किन्त्वदृष्ट्वा सर्गं कर्त्तुमुद्यताः दृष्ट्वा तु भवन्तः सर्गोद्योगान्निवृत्ता एव भवेयुरित्यत्रोच्यते । कथंशब्देन भुवोऽन्तज्ञानाज्ञाने सर्गोद्योगस्य सम्भावना द्योत्यते । अविज्ञाय कथंचित्सर्गं कर्त्तुमुद्यताः विज्ञाय सुतरां तदुद्योगान्निवृत्ता भवन्तः भवेयुरित्यर्थः । भुवः पार्थिवस्य देहस्यान्तमवसानमदृष्ट्वानालोच्येत्यर्थः ॥ ६ ॥

एकः पुरुष ईश्वरो यस्मिन्नस्तद्राष्ट्रम ईश्वरनियाम्यं जगत् राष्ट्रादीनां द्विवीयान्तानामविज्ञायेत्यनेनान्वयः । अदृष्टनिर्गममनिर्गमं सोपायं जीवात्मस्वरूपस्याधिष्ठानं हृदयबिलं बहुरूपामनेकरूपां स्त्रियं बुद्धिरूपां पुंश्चल्या इवाभिचारिण्याद्यचपलाया बुद्धेः पतिं तत्संसृष्टजीवस्वरूपम् ॥ ७॥

उभयतोवाहां सृष्ट्युपसंहारकर्त्रीं नदीं मायारूपां पञ्चपञ्चाद्भुतं पञ्चविंशतितत्त्वात्मकं गृहं स्वर्तावशरीररूपम् । चित्रकथं विचित्रं हंसं बन्धमोक्षहेत्वाधारतात्मककथारूपाभ्यां विचित्रपक्षाभ्यां युक्तं मोक्षवर्णिति भावः । क्षुरपव्यम ऋषुः पविभिर्वज्रैश्च निर्मितं तीक्ष्णा दृढं चेत्यर्थः । एवं निधं स्वयं भ्रमणशीलं कालचक्रमिति भावः ॥ ८ ॥

— — —

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानमन्तरेण केवलकर्मणां परमश्रेयःसाधनत्वं निषिध्यतेऽस्मिन्नध्याये । तैः सोपादुपात्तं रचयति । तं यामिति । पाञ्चजन्यां पञ्चजनप्रजापतेः पुत्र्याम् विष्णुमायया विष्णुमहिम्ना ॥ १-२ ॥

तत्र प्रतीच्यां सिन्धुसमुद्रयोः सङ्गमोऽस्ति यत्र सङ्गमे नारायणसरोनाम तीर्थं चास्ति सुमहान्तो मुनयश्च सिद्धाश्च सुमहत्सु सिद्धाः तैर्निषेवितम् ॥ ३ ॥

तस्य तीर्थजलस्य स्नानाचमनादिना विनिर्धूतमलः आशयो येषां ते तथोक्ताः ॥ ४ ॥

यत्तान् सन्नद्धान् ॥ ५ ॥

हे हर्यश्वाः ! सर्जनलक्षणं कर्म प्रयोजनेन (१) मतिमत्त्व (२)तत्कथं स्रक्ष्यति न कथमपि (३) ज्ञानाभावात् । तत्त्वा-नात्मविवेकलक्षणं वा इत्यनेन सूचयति "परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः" इति श्रुतेः । इतरेषां दुर्बोधाय हर्यश्वानां स्वर्गिकज्ञानसद्भावप्रकटनाय च परोक्षवचनेन ज्ञानाभावं दर्शयति । अदृष्ट्वेति । यस्माद्बालकाः अतएव च बालिशा इत्युपचारमात्रवचनम् ॥ ६ ॥ ७ ॥ ८ ॥

— — —

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उवाच चेति चतुष्कम । पञ्च गामिताः पञ्च आश्रयरूपा यत्र तद्गृहमाश्रयरूपसङ्गतम् ॥ १—१४ ॥

— — —

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

षाच: कूटेन हर्यश्वानस्यांश्चाकृत बोधनात ।
पञ्चमे नारदः शप्तः स दक्षेणेति वर्ण्यते ॥ १—२ ॥

तत्र । दिशि नारायणसरस्तीर्थं महद्वर्त्तते । यत्र सिन्धोर्नद्याः समुद्रस्य च सङ्गमः ॥ ३—४ ॥

यत्तान् । उद्यतान् ॥ ५ ॥

शुद्धान्तःकरणा एते मोक्षधर्माधिकारिणः । अनुरोधात् पितुः कस्मादत्र सज्जन्ति कर्मणि । तस्मादेतान् मोचये तत्त्वमुपदिश्येति गूढवाक् । इति कारुणिको वाच कूटोक्त्यात्र नारदः । हे हर्यश्वाः ! भुवोऽन्तमदृष्ट्वा प्रजाः कथं स्रक्ष्यथ ब्याख्यातिणां स्वयमेवाग्रे कारष्यत इति न व्याख्यायन्ते । तस्मात् यूयं बालिशा मूर्खा एव यतो बालकाः पालका इति पाठे प्रजानां पालका अपि यूयं बालिशा एव । बतेति निकाये । एक एव पुरुषो यत्र तद्राष्ट्रमित्यादिद्वितीयान्तानामविज्ञाय कथं सर्गं करिष्यथेति वर्तमानेनान्वयः । उभयतोवाहाम् । उभयतो वाहस्त्रतां पञ्चपञ्चानां पञ्चविंशतितत्त्वानामद्भुतं गृहं निघ्नम् परमाराद्धीयमानत्वात् भक्तानां तानि तत्त्व आत्मसमर्पितानि भावः । क्षुरः । पविभिर्वज्रैश्च निर्मितमतितीक्ष्णा कलात्मकं वस्तु । स्वयम्भ्रमतः सर्वाध्य ॥ ६-९ ॥

— — —

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पञ्चमे श्रीनारदर्षिणा हरिणा हर्यश्वादिपोषणं कृतमित्यानुच्यते विभुपिपुत्रानाचः ॥ १ ॥

अपृथग्धर्मः शीलं स्वभावश्च येषां ते ॥ २ ॥

---

(१) ज्ञानाख्यप्रयोजनेन । (२) न सर्जनम् ।

(३) ज्ञानाख्यप्रयोजनाभावात् ।

कथं स्वपितुरादेशमविद्वांसो विपश्चितः ।
अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ॥ ९ ॥

श्रीशुक उवाच ॥

तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया ।
वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया ॥ १० ॥
भूः क्षेत्रं जीवसंज्ञं यदनादिनिजबन्धनम् ।
अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ॥ ११ ॥
एक एवेश्वरस्तुर्यो भगवान् स्वाश्रयः परः ।
तमदृष्ट्वाभवं पुंसः किमसत्कर्मभिर्भवेत् ॥ १२ ॥
पुमान्नैवैति यद्गत्वा बिलस्वर्गं गतो यथा ।
प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत् ॥ १३ ॥
नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता ।
तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्र प्रतीच्यां दिशि यत्र सिन्धोर्नद्याः समुद्रस्य च सङ्गमः तत्र सुमहन्नारायणसरस्तीर्थं प्रययुरिति पूर्वेणान्वयः ॥ ३ ॥

तस्मिन् सरसि उपस्पर्शनात् स्नानात् विनिर्धूतमलं आशयोऽन्तःकरणं येषां ते ॥ ४ ॥

पित्रादेशेन प्रजाविवृद्धये यत्तानपि पारमहंस्ये धर्मे प्रोत्पन्नमतितया मोक्षाधिकारिणो ज्ञात्वा देवर्षिस्तान् ददर्श ॥ ५ ॥

अथ दर्शनानन्तरमुवाच मोक्षोपायं दशभिर्गूढार्थैर्वाक्यैस्तान् प्रत्युपदिष्टवान् । हे हर्यश्वाः हे पालकाः ! प्रजापतिपुत्राः भुवोऽन्तमदृष्ट्वा अतएव बालिशाः अज्ञा यूयं कथं प्रजाः स्रक्ष्यथ ॥ ६ ॥

तथा राष्ट्रादिकमविज्ञाय अहो कथं सर्गं करिष्यथेति त्रयाणामन्वयः ॥ ७ ॥

पञ्चपञ्चानां पञ्चविंशतितत्त्वानामद्भुतं गृहमाश्रयम् । क्षुरैः पविभिश्च निर्मितम् ॥ ८ ॥

भाषा टीका

श्रीशुकदेवजी बोले उन दक्षजी ने विष्णु की माया से संयुक्त होकर उस पांच जनी भार्या मे हर्यश्व नामक दश हजार पुत्रों को उत्पन्न किया ॥ १

हे नृप दक्ष प्रजापति के वे पुत्र सब एक स्वभाव वाले थे उनको पिता ने प्रजा सृजने की आज्ञा दी तब वे सब पश्चिम दिशा को चले गये ॥ २ ॥

उस पश्चिम दिशा मे सिंधु नाम की नदी तथा समुद्र के संगम मे जहां सिद्धों से सेवित बडा भारी नारायण सरोवर नाम का तीर्थ है ॥ ३ ॥

तहां उस तीर्थ मे स्नान पान करते मात्र उनके मनके कल्मष सब दूर होगये तिस से उन सबों की परम हंस धर्म मे बुद्धि उत्पन्न होगई ॥ ४ ॥

पिता की आज्ञा के परवश होकर प्रजाओं की वृद्धि के निमित्त उग्रतपस्या को करने लगे उन को उस प्रकार यत्न युक्त होने पर देवर्षि नारदजी ने जाकर देखा ॥ ५ ॥

उन से नारदजी बोले हे हर्यश्वो हो तुम जगत् पालक होने पर भी अज्ञानी हो क्योंकि पृथवी के अन्त को न देखकर कैसे प्रजाओं की सृष्टि करोगे ॥ ६ ॥

तैसे ही एक पुरुष वाले राज्य को न देखकर पैठे पीछे नहीं निकलने लायक बिलको न देखकर बहुत रूप वाली स्त्री को न देखकर पुंश्चली स्त्री के पति पुरुष को न देखकर दोनों तरफ को वहने वाली नदी को न देखकर पच्चीस वस्तुओं के अद्भुत घरको न देखकर विचित्र कथा वाले हंसको न देखकर छुराओं से वज्रों से बने हुये घूमने वाले पदार्थ को न देखकर कैसे सृष्टि करोगे ॥ ७ ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विपश्चितः । सर्वज्ञस्य स्वपितुरादेशमात्मनोऽनुरूपमविद्वांसोऽजानन्तः पूर्वोक्तं चैकपुरुषं राष्ट्रमित्याद्यविज्ञायाहो कथं सर्गं करिष्यथेत्यन्वयः ॥ ९ ॥

वाचः कूटम् परोक्षवादेनार्थान्तरमिव प्रतीयमानं वचनम् । औत्पत्तिकी सहजा मनीषा विचारशक्तिर्येषां तथा धिया स्वयमेव विममृशुर्विचारितवन्तः ॥ १० ॥

तत्सङ्गभ्रंशितैश्वर्यं संसरन्तं कुभार्यवत् ।
तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १५ ॥
सृष्ट्यप्ययकरीं मायां वेलाकूलान्तवेगिताम् ।
मत्तस्य तामविज्ञस्य किमसत्कर्मभिर्भवेत् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नारदोक्तदृष्टान्तवाक्यानां तैर्विमृश्य निर्णीतानर्थानाह दशभिः । अदृष्ट्वान्तं भुव इत्यत्र भूशब्दार्थमाह । भूरिति । क्षेत्रं तथात्र जीवसंज्ञं लिङ्गशरीरं यन्निजबन्धनमात्मनो बन्धकारणम् । अन्तशब्दार्थमाह । निर्वाणं नाशम् । असद्भिर्मोक्षानुपयोगिभिः कर्मभिः किं भवेन्न किमपि ॥ ११ ॥

एकपुरुषमित्यस्यार्थमाह । एक एवेति । तुर्यः सर्वसाक्षी । स्वाश्रयः स्वाधारः । अभवं नित्यमुक्तम् । असद्भिरीश्वरासमर्पितैः कर्मभिः ॥ १२ ॥

बिलं चादृष्टनिर्गममित्यस्यार्थमाह । पुमान् यद्गत्वा प्राप्य बिलस्वर्गं पातालं गत इव नैवेति नावर्तते तत् प्रत्यग्धाम ज्योतीरूपं ब्रह्माविदोऽविदुषोऽसद्भिर्नश्वरस्वर्गादिसाधनैः कर्मभिः ॥ १३ ॥

बहुरूपां स्त्रियमित्यस्यार्थमाह । नानारूपेति । स्वैरिणीव पुंश्चलीव विमोहकैः रजआदिगुणैरन्विता । तन्निष्ठां तस्या अवसानं विवेकमगतस्याप्राप्तस्य । असद्भिरशान्तैः ॥ १४ ॥

पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह । तस्याः सङ्गेन भ्रंशितमैश्वर्यं स्वातन्त्र्यं यस्य । कुत्सिता भार्या यस्य तद्वत् । तस्या गतीः सुखदुःखलक्षणाः । संसरन्तं गच्छन्तं जीवमबुधस्याजानतः । असद्भिर्बुद्धिविवेकप्राप्तैः ॥ १५ ॥

नदीमुभयतोवाहामित्यस्यार्थमाह । सृष्ट्यप्ययौ करोतीत्युभयतः प्रवाहो दर्शितः । वेलाकूलं प्रवाहपतितानां निर्गमस्थानं तपोविद्यादि तस्यान्ते समीपे वेगितां निर्गमप्रतिबन्धाय क्रोधाहङ्कारादिभिः कृतवेगां मत्तस्य तद्वेगेन विवशस्यात एव तां तथाभूतामविज्ञस्याविचारयतः । असद्भिर्मायिकैः । यद्वा । वेलाकूलं समुद्रस्य व्यवहारस्थानं तस्य समीपे समुद्रवृद्धिह्रासाभ्यां यथोभयतोऽन्तर्बहिः कृतवेगा नदी भवत्येवं समुद्रतुल्यस्यात्मनो व्यवहारस्थाने देहे जन्ममरणादिभिः कृतवेगामित्यर्थः । वेगिनीमिति पाठे वेगवतीम् ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विपश्चितः सर्वज्ञस्य स्वपितुरनन्तजन्मसु हितोपदेशेन रक्षकस्य शास्त्रस्यादेशमनुशासनमनुकूलमविद्वांसो यूयं कथंचित्सर्गं करिष्यथ विज्ञाय तु न यतिष्यथेति भावः ॥ ॥ ९ ॥

एवमन्यापदेशरूपाणि देवर्षेर्वचांस्याकर्ण्य ते तु हर्यश्वाः स्वयं विममृशुरित्याह मुनिः । तदिति । तद्देवर्षेर्वचो निशम्याकर्ण्य हर्यश्वा औत्पत्तिकमनीषया स्वभावसिद्धा मनीषा विचारशक्तिर्यस्यास्तया बुद्ध्या । देवर्षेर्वाचः कूटं कूटमयोघनवद्दुर्भेद्यं वाचः कूटं प्रच्छन्नाभिप्रायं वाक्यमित्यर्थः । विममृशुः विचारपूर्वकमभिप्रायं निश्चितवन्तः ॥ १० ॥

कथं विममृशुरित्यपेक्षायां तैर्विमृश्य निर्णीतानर्थानाह । भूरित्यादिदशभिः । तावद्भूशब्दार्थमाह । भूः क्षेत्रमिति । जीवति प्राणान् धारयतीति जीवः सप्राणः । स एव संज्ञा यस्य तत्सप्राणशरीरमित्यर्थः । यद्वा । जीवः प्रत्यगात्मैव तेन स्वस्वरूपापत्तेरिति तज्जीवसंज्ञं बाहुलकात्कर्मणि क्तः । जीवेन धार्यमित्यर्थः । "एतद्यो वेत्ति तम्" इति शरीरस्य जीवेन ज्ञेयत्वगमनात् । अनादिनिजबन्धनमनादिपुण्यपापकर्मनिबन्धनं यत्क्षेत्रं तद्भूशब्दार्थ इति विममृशुरित्यर्थः । अन्तशब्दार्थं निर्वाणमिति वदन् समुदायाभिप्रायमाह । अदृष्ट्वेति । तस्य भूशब्दस्य विवक्षितस्य क्षेत्रस्य निर्वाणमन्तशब्दविवक्षितं प्रकृतेर्देहस्य प्रलयमदृष्ट्वाऽनालोच्यासत्कर्मभिः किं भवेत् जन्मजरामरणादिमद्देहापादककर्मनिबन्धनानिवर्तकैः प्रत्युत संसृत्यापादकैः कर्मभिः न कोऽपि पुरुषार्थोऽस्तीत्यर्थः । अत्र सर्वत्र विचारश्लोकेषु किमसत्कर्मभिर्भवेदिति चतुर्थः पादो ज्ञेयः ॥ ११ ॥

तथैकपुरुषं राष्ट्रमित्यस्य तैर्निश्चितमर्थमाह । एक इति । तुर्यः जाग्रदाद्यवस्थात्रयातीतः स्वाश्रयः अनन्याधारः परः प्रकृतिपुरुषविलक्षणः भगवान् षाड्गुण्यपूर्णो निरस्तनिखिलदोष एक एवेश्वरः अन्तः प्रविश्य धारयन् नियन्ता तमेवं भूतमभवं भवप्रतिभटमविदित्वानुपास्य । एक एवेश्वर इत्यनेन पुरुषशब्दार्थ उक्तः । अनेनैवेश्वरप्रतिसम्बन्धीशितव्यं जगद्राष्ट्रमिति फलितम् । ईशितव्यानामीश्वरानुवर्तनस्यैवोचितत्वादाराध्येश्वराननुरूपैरीश्वरवैमुख्यापादकैः कर्मभिः किमित्यर्थः ॥ १२

बिलं चादृष्टनिर्गममित्यस्यार्थमाह । पुमानिति । बिलस्वर्गं पातालं गत इव पुमान् जीवः यद्गत्वा यद्धृदयबिलं प्राप्य "हृद्ययमात्मा प्रतिष्ठित" इति वचनात्स्थितोऽपि नावगच्छति । यथा बिलस्वर्गं गतो निस्सरणमार्गमसतो मदान्धः स्वस्वरूपादिकं न विजानाति ततो न निर्गच्छति च तथा प्रत्यगात्मस्वरूपं प्रकृतिनियुक्तं यत्र हृदयदेशे स्थितः नावगच्छति तज्ज्ञानस्वरूपस्याधिष्ठानं हृदयं बिलं चादृष्टनिर्गमनिरयेनेन निर्वाच्यमित्यर्थः । समुदायाभिप्रायमाह । प्रत्यग्धाम हृदयबिलस्थं प्रकाशमानं धाम ज्योतिः जीवात्मस्वरूपमविदुषः अजानतः असत्कर्मभिः देवमनुष्यादिशरीरहृदयबिलावस्थापादकैः कर्मभिः किं भवेत् किमपि श्रेयो नास्ति प्रत्युतानर्थ एवेति भावः ॥ १३ ॥

बहुरूपामित्यस्यार्थमाह । नानेति । आत्मनो जीवस्य या नानारूपा बहुरूपा मतिः स्वैरिणीव पुंश्चलीव रागादिभिर्गुणैरन्विता बुद्धिः सैव बहुरूपां स्त्रियमित्यनेनाभिप्रेतेत्यर्थः । तस्या निष्ठामन्तं विवेकमगतस्याप्राप्तस्येह लोकेऽसत्कर्मभिः किं भवेत् प्रत्युत संसाररूपानर्थ एवेति भावः ॥ १४ ॥

पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह । तत्सङ्गेति । तस्याः सङ्गेन पारवश्येन भ्रंशितैश्वर्यमस्वातन्त्र्यं च यस्य तमत एव कुत्सिता

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मार्या यस्य। तेन तुल्यं कुभार्यवत् । भार्याभिलषितवस्त्राभरणाद्यर्जना-यामदुःखिनमिव सरन्तं जन्मजरामरणादिपरिवृत्तिरूपसंसारमनुभवन्तं संसृष्टजीवस्वरूपम् । तद्गतीः । बुद्ध्वा यत्तस्वर्गनरकादिगतीश्चाबुधस्याजानतः । असत्कर्मभिः स्वर्गनरकादिगत्यापादकैः कर्मभिः किं भवेन्न किमपि श्रेयः सम्भवति । प्रत्युत दुःखमेव स्यादिति भावः ॥ १५ ॥

नदीमुभयतोवाहामित्येतद्विवृणोति । सृष्टयप्ययकरीमिति । जन्ममरणकरीमनेनोभयतः प्रवाहो दर्शितः । वेलाकूलशब्दौ तार-ह्मयपरौ तयोरन्तेऽवसाने वेगिनां संजातवेगाम् । इहलोकपरलोकौ वेलाकूलत्वेन रूपितौ । वेगेनेहलोकपरलोकप्राप्तिकरीमित्यर्थः । एवम्भूतां मायां तदविज्ञस्य तत्त्वनाविज्ञस्य तथाभूतामविज्ञस्याविचारयतः । तत्र हेतुः । मत्तस्य मायापरवशस्यासत्कर्मभिरिहपरलोकप्राप्तिहेतुभिः कर्मभिः किं भवेन्न किमपि प्रत्युतानन्ततः स्थावरत्वादिप्राप्तिरूपोऽनर्थ एवेति भावः ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनुरूपमात्मानात्मविवेकलक्षणाम् ॥ ९ ॥

औत्पत्तिकमनीषया स्वाभाविकज्ञानसम्पन्नया धिया विचार-विशुद्धया बुद्ध्या वाचः कूटं वचनसमूहं गुह्यभावात्मकत्वेन कूटमिव प्रतीयमानं वा अल्पबुद्धिभिर्दुर्बोधं वा स्वयं परोपदेशं विना विममृशुः विचार्यालोच्य निश्चितवन्त इत्यर्थः । "मनीषा स्यात् ज्ञानं बुद्धिर्मतिस्तथा" इत्यभिधानम् । "कूटं तु कैतवं ज्ञेयं समूहो मलवं तथा" इति च औत्पत्तिकमनीषया निरूप्योक्तं धिया विममृशुरिति वा ॥ १० ॥

कथं निश्चिक्युरिति तत्राह । भूः क्षेत्रमिति । भुवोऽन्तमित्यत्र भूशब्देन क्षेत्रं सूक्ष्मशरीरं लिङ्गशब्दवाच्यमुच्यते । कस्य विद्यमानमत्राह । बीजेति बीजसंज्ञस्य जीवस्य यच्छरीरमनादिकालमारभ्य जीवं निरन्तरं बध्नातीति अनादिनिबन्धनम् । अस्मिन् काले प्रारब्धमित्यनियमादनादि (१)अनेन लिङ्गशरीरस्य भूशब्दवाच्यत्वं युक्तम् "भू सत्तायाम्" इति धातोः सत्तायास्तथात्वात् (२) तस्य शरीरस्यान्तं निर्वाणं सर्वात्मना नाशमदृष्ट्वानेनोपायेन नाशो भवतीत्यज्ञात्वासत्कर्मभिरात्मानात्मविवेकाजनकैः सर्जनलक्षणैः कर्मभिः किं फलं न किमपीत्यर्थः ॥ ११ ॥

तमेकपुरुषं राज्यमित्यस्य विमृष्टार्थमाह । एक एवेति । तुर्योऽवस्थात्रयातीतः । अभवं न भवः संसारः उत्पत्तिर्वा यस्य स तथा तं नित्यमुक्तमित्यर्थः । अदृष्ट्वाविज्ञाय पुरुषस्य पशुहिंसालक्षणैः भगवदर्पणबुद्धिशून्यैः यागादिकर्मभिः किं नित्यं फलं भवेन्न स्यादित्यर्थः । पुंसोऽभवं मुक्तिप्रदं वा ॥ १२ ॥

बिलं चाहष्टनिर्गममित्यस्यालोचितार्थमाह । पुमानिति । पुमान् यत्प्रत्यगात्मना सर्वात्मनानुगतं ब्रह्मस्वरूपं गत्वा नापैति तद्दविपयत्वलात्मकत्वाद्बिलशब्दवाच्यं ब्रह्माविद्वोऽजानतः पुंस इह जंलोके नित्यनैमित्तिकाद्यसत्कर्मभिः इतरविषयैः बिलं स्वर्व्यतिरेकरणान्तः । अनेन अदृष्टनिर्गममित्यस्य पुनरावृत्तिशून्योऽतरत्रानिष्क्रमणार्थ इति सूचितम् ॥ १३ ॥

बहुरूपामित्यस्य युक्तार्थमाह । नानारूपेति । आत्मनो जीवस्य या बुद्धिः चिदचिदात्मिका सत्त्वादिगुणैरुपरक्ता विकृता अत एव नानारूपा "अजामेकां लोहितशुक्लकृष्णाम्" इति श्रुतेः । नानाविधसंस्कारादिवासितत्वात्स्वैरिणी स्वच्छन्दवर्तिनी स्त्रीव तस्तस्याः बुद्धेश्चेतमायाः निष्ठां भगवत्परतामचिदात्मिकायाः नाशमगतस्य भगवद्भक्त्यादिसामग्रीमकुर्वतः पुरुषस्य बुद्धिदोषनाशसमर्थैः दानादिलक्षणैः कर्मभिः ॥ १४ ॥

पुमांसं पुंश्चलीपतिमित्यस्य विवक्षितार्थमाह । तत्सङ्गेति तस्याः रजस्तमःप्रकृतबुद्धेः सङ्गेन वशवर्तित्वलक्षणेन भ्रंशितमस्तं नष्टमैश्वर्यं भगवज्ज्ञानलक्षणं शमदमादिलक्षणं वा यस्य स तथा तम् । अत एव संसरन्तं सुखदुःखे भुञ्जानं जीवं तद्गतं तस्य जीवस्य गतीः स्वर्गनरकादिलक्षणाश्चाबुधस्याजानतः पुंसः असद्भिः भगवदनुद्देशेन प्रसक्तैः कर्मभिः तीर्थस्नानादिलक्षणैः दुःखनिवृत्तिः फलं भवेत् किम् । कुत्सिता शास्त्रलोकनिन्दिता भार्या पुंश्चली यस्य । स तथा तस्य या नरकादिगतिः तद्वत् अनेन पुंश्चलीपतिशब्दार्थ उक्तः ॥ १५ ॥

नदीमुभयतोवाहामित्यस्याभिमतार्थमाह । सृष्टीति । वेलाकूलशब्दाभ्यां सृष्टिसंहारौ लक्ष्येते । तयोरन्तयोर्वाहशब्दोपलक्षितवेगयुक्तस्थितौ शनैः प्रवर्तमानां तथांकां(२)क्रमव्युत्क्रमतः उभयतो वाहत्वमेवंविधां भीश्वरमायां मत्तस्य विषयरागेण विस्मृतस्य अत एव तदविज्ञानात्तद्विषयज्ञानाभावादसद्भिः कर्मभिः अभक्त्या कृतजपादिलक्षणैः मायाविनिवर्तकं फलं प्रसिद्धनद्याश्च वृष्टिहासाभ्यामुभयतो वाहत्वं सिन्धुसङ्गमे इष्टं नदीमातृके देशे सस्यादिसंहारं च ॥ १६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्सङ्गभ्रंशितैश्वर्यमिति । जीवस्य स्वज्ञानादिरूपं स्वरूपसामर्थ्यं दर्शितम् ॥ १५-१६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वाचः कूटं परोक्षवादेनार्थान्तरमिव प्रतीयमानं वचनम् ॥ १० ॥ नारदोक्तानि दश वाक्यानि सुखबोधार्थं स्वयमेव व्याचष्टे दशभिः । तत्र अदृष्ट्वान्तं भुव इति व्याचष्टे । भूरिति । क्षेत्रं तथात्र जीवसंज्ञं लिङ्गशरीरमनादि आदिशून्यं निजस्य जीवात्मनो बन्धनं यतस्तत्तस्य निर्वाणम् अन्तं ज्ञानेन नाशमित्यर्थः । असत्कर्मभिः अवास्तवैः कर्ममार्गैस्तेन कर्मनिर्वाणमेव प्रत्युत बन्धमिति भावः ॥ ११ ॥

तदेकपुरुषं राष्ट्रमित्येतद्व्याचष्टे । एक इति । तुर्यः विश्वतैजसप्राज्ञेभ्यो भिन्नश्चतुर्थः । राष्ट्रं जगदिति ज्ञेयम् । अभवं न विद्यते

---

(१) अनादिशब्देन ।

(२) अनादित्वात् ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चः संसारो भक्तानां यतस्तम् । अदृष्ट्वा भजनैरप्रत्यक्षीकृत्य । तेन किं भजतेति भावः ॥ १२ ॥

बिलं आदृष्टनिर्गममिति व्याचष्टे । पुमानिति । यत् प्रत्यग्धाम नाश्चो भगवतो धाम वैकुण्ठं गत्वा प्राप्य न पुनरेति न पुनरावर्त्तते । बिलस्वर्गं पातालं गतो यथा तत्रैवासज्य तिष्ठतीत्यर्थः । अविदः अविदुषो जनस्य तेन वैकुण्ठप्रापके यतध्वं प्रति भावः ॥ १३ ॥

बहुरूपां स्त्रियमित्येतद्व्याचष्टे । नानेति । स्वैरिणीव कुविषयोन्मुखी । तु कृष्णविषयोन्मुखी गुणाः सौन्दर्यवैदग्ध्यादयः । पाण्डित्यादयश्च तैरन्विता । तस्या निष्ठां अद्यावद्यप्रवृत्तिमन्तस्य अजानतः अविचारवत इत्यर्थः । अतो विवेकेन बुद्धिं कृष्णोन्मुखीं कुरुतेति भावः ॥ १४ ॥

पुमांसं पुंश्चलीपतिमिति व्याचष्टे । तदिति । कुत्सितभार्य्यं गृहस्थमिव संसरन्तं जीवमबुधस्य अजानतः पश्चयभाव भावेः । तस्य गतीः स्वर्गनरकाद्या अप्यजानतः तेनात्मानमात्मनैवोद्धरतेति भावः ॥ १५ ॥

नदीमुभयतो वाहामिति व्याचष्टे । सृष्ट्यप्ययौ करोतीति । तां सृष्टिकाले पूर्वपूर्वतत्त्वानि निःसरन्ति अप्ययकाले उत्तरोत्तरतः पूर्वे पूर्वे प्रविशन्तीत्युभयतः प्रवाहो दर्शितः । वेलाकूलस्यान्तं समीपं "वेला स्वामीरतीरयोः" इत्यभिधानात् । संसारप्रवाहपतितानां निर्गमस्थानं तपोविद्यादि तत्रैव वेगिनीं निर्गमप्रतिबन्धाय तपोविद्यादिमत्सु दृष्टेः कोपाहङ्कारादिभिः कृतवेगां वेगितामिति च पाठः । मत्तस्य तत्तद्वेगेन विवशस्य । अत एव तां तथाभूतामविज्ञस्य अविचारवतः । तेन लौकिकप्रतिष्ठादिकमपि परित्यज्य वारं भजतेति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विपश्चितः । सर्वज्ञस्य आदेशमाज्ञामविद्वांसः अजानन्तः ॥ ९ ॥

औत्पत्तिकी स्वाभाविकी मनीषा यथावदर्थचिन्तनरूपा बुद्धिवृत्तिस्तया धिया वाचः कूटं गूढार्थं वाक्यं विमृशुः विचारितवन्तः ॥ १० ॥

ते कथं विममृशुरित्याकाङ्क्षायां श्रीनारदोक्तदशकूटानां तैर्विमृश्य निर्णीतानर्थानाह । भूमिरिति दशभिः । तत्र तावत् अदृष्टान्तं भुव इत्यस्यार्थमाह । क्षेत्रं संसारप्रापककर्माश्रयस्थानं जीवति प्राणान् धारयतीति जीवः । स एव संज्ञा यस्य तज्जीवसंज्ञं लिङ्गशरीरम् । तस्य निवर्त्तं मोक्षोपायमदृष्ट्वा असद्भिः क्षुद्रैः पितृलोकादिफलकैः मोक्षप्रतिबन्धकैः कर्मभिः किं स्यात् ॥ ११ ॥

तथैकपुरुषं राष्ट्रमित्यस्यार्थमाह । एक इति । तुर्य्यो जागराद्यवस्थात्रयरहितः । ननु अवस्थात्रयसाक्षी जीवः किमित्यत आह । आश्रयः स्वतन्त्रः परः स्वराक्षरभिन्नस्वरूपः । नास्ति भवः संसारो यस्मात्तमदृष्ट्वा अनर्च्य असद्भिस्तदर्चनानुपयोगिभिः कर्मभिः किं गतेन किमपीत्यर्थः ॥ १२ ॥

बिलं आदृष्टनिर्गममित्यस्यार्थमाह । पुमानिति । बिलस्वर्गं पातालं गतो यथा नैति तथा यद्गत्वा ज्ञात्वा नैवैति देहादिकर्मात्मत्वादिना नैव जानाति तत्प्रत्यग्जीवाश्रयं धाम स्वरूपमविद अजानतः । असद्भिः प्रत्यक्स्वरूपस्मरणानुपयोगिभिः ॥ १३ ॥

बहुरूपां स्त्रियं चापीत्यस्यार्थमाह । नानेति । गुणान्विता त्रिगुणान्विता तन्निष्ठां तस्याः निष्ठां संसारप्रदां ब्रह्मणि तत्साधर्म्यप्रदामगतस्य अजानतः असद्भिः संसारप्रापकैः ॥ १४ ॥

पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह । तदिति । तस्याः बुद्धेः सङ्गात् भ्रंशितमैश्वर्यं ज्ञानं यस्य तं तस्याः बुद्धेर्गतीः संसारप्रापकान् मार्गान् । संसरन्तं सम्यगनुसरन्तमात्मानमबुधस्य असद्भिः बुद्धिपारवश्यकृतैः ॥ १५ ॥

नदीमुभयतो वाहामित्यस्यार्थमाह । सृष्ट्यप्ययकरीमिति । सृष्टिसंहारकरीत्यनेनोभयतः प्रवाहो दर्शितः । वेलाकूलं जलनिधेः प्राप्तिकरं तटं तद्वदिह वेलाकूलं परमानन्दनिधेः प्राप्तिकरं भजनं तस्मिन् अन्तो निष्ठा यस्य । तस्माद्रुक्षादुद्व्याक्षीव वेगितां विप्लुतामविज्ञस्य असत्कर्मभिः भगवद्भजनानुपयोगिभिः मायाप्रापकैः ॥ १६ ॥

भाषा टीका ।

विद्वान् अपने पिता की अपने अनुकूल योग्य आज्ञाको न जानकर अहो किस प्रकार तुम सृष्टिकरोगे ॥ ९ ॥

श्रीशुकदेवजी बोले वे हर्यश्वगण नारदजी की उस अप्रकट वाणी को सुनकर स्वभावसिद्ध अपनी बुद्धि से उस वाणी के अर्थ को विचारने लगे ॥ १० ॥

उस के अर्थ को कहते हैं कि अपना जो लिङ्गशरीर है सोई भूमी है वही जीव के बन्धन का कारण है उस शरीर को छुटा कर मोक्ष होने का उपाय नहीं जाना तो असत् कर्मोंसे क्या होगा ॥ ११ ॥

जाग्रत आदि अवस्थाओं से परे एक ईश्वर पर अपने ही आश्रम रहने वाला है अजन्मा है उस ईश्वर को नहीं जानने से पुरुषको असत्कर्मों से क्या काम होगा ॥ १२ ॥

जहां जाने पीछे पाताल को गया सर्पका पुरुष फिर नहीं आसका है उस ज्योतिरूपस्थानको न जानने से असत् कर्मों से मनुष्यको क्या होगा ॥ १३ ॥

जीवकी बुद्धि गुणों से युक्त होने से नाना रूपवाली व्यभिचारिणी स्त्री सरीकी होजाती है उसको यथार्थ जाने विना असत्कर्मों के करने से पुरुष को क्या होगा ॥ १४ ॥

उस बुद्धि के सङ्ग से जिसका दिव्यज्ञानादि ऐश्वर्य नष्ट होगया है खोटी स्त्री वाले की नाई दुःख पाताहै संसार मे भ्रमता है उस बुद्धिकी गतियों को जाने विना असत्कर्मों से इस पुरुषको क्या होगा ॥ १५ ॥

उत्पत्ति संहार करने वाली मोक्ष को जाने वालों को भुला कर रोकने वाली भगवान् की मायाको न जानकर प्रमाद मे रहने वाले पुरुषको असत्कर्मों से क्या प्रयोजन सिद्ध होगा ॥ १६ ॥

पञ्चविंशतितत्त्वानां पुरुषोऽद्भुतदर्पणम् ।
अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १७ ॥
(१) ऐश्वरं शास्त्रमुत्सृज्य बन्धमोक्षानुदर्शनम् ।
विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् ॥ १८ ॥
कालचक्रं भ्रमिस्तीक्ष्णं सर्वं निष्कर्षयज्जगत् ।
स्वतन्त्रमबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १९ ॥
शास्त्रस्य पितुरादेशं यो न वेद निवर्तकम् ।
कथं तदनुरूपाय गुणविस्रम्भ्युपक्रमेत् ॥ २० ॥
इति व्यवसिता राजन् ! हर्यश्वा एकचेतसः ।
प्रययुस्तं परिक्रम्य पन्थानमनिवर्त्तनम् ॥ २१ ॥
स्वरब्रह्मणि निर्भातहृषीकेशपदाम्बुजे ।
अखण्डं चित्तमावेश्य लोकाननुचरन्मुनिः ॥ २२ ॥
नाशं निशम्य पुत्राणां नारदाच्छीलशालिनाम् ।
अन्वतप्यत कः शोचन् सुप्रजस्त्वं शुचां पदम् ॥ २३ ॥
स भूयः पाञ्चजन्यायामजेन परिसान्त्वितः ।
पुत्रानजनयद्दक्षः सवलाश्वान् सहस्रशः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चपञ्चेत्यस्यार्थमाह। पञ्चविंशतितत्त्वानां पुरुषोऽन्तर्यामी अद्भुतदर्पणमाश्चर्यरूप आश्रयः अध्यात्मं कार्यकारणसंघाताधिष्ठातारं तमबुधस्य । असद्भिर्मिथ्यास्वातन्त्र्यकृतैः ॥ १७ ॥

क्वचिद्धंसमित्यस्यार्थमाह । ऐश्वरमीश्वरप्रतिपादकं विविक्तं पदं चिज्जडरूपं वस्तु येनेति हंसपदव्याख्यानम् । बन्धमोक्षावनुदर्शयतीति तथा । अनेन चित्राः कथा यस्येति व्याख्यातं तदुत्सृज्यानभ्यस्य अज्ञायाविदुषः । असद्भिर्बहिर्मुखैः ॥ १८ ॥

क्षौरपव्यमित्यस्यार्थमाह । कालचक्रमिति । भ्रमिर्भ्रमणात्मकम् । तीक्ष्णमिति निष्कर्षयदिति च क्षौरपव्यपदं व्याख्यातम् । तदबुधस्यानपेक्ष फलस्य नित्यबुद्ध्या काम्यकर्मानुष्ठाने वैगुण्यबाहुल्यादसद्भिः ॥ १९ ॥

स्वपितुरादेशमित्यस्यार्थमाह । शास्त्रस्य स्वपितुर्द्वितीयजन्महेतोः । तदनुरूपाय(२)निवृत्त्यनुरूपाय निवर्तकमादेशं यो न वेद स कथं गुणविश्रम्भी गुणमयप्रवृत्तिमार्गविश्वासवान् सन्नुपक्रमेत् स्वव्यापारे प्रवर्तेत । "मोक्षशास्त्रप्रवृद्धानां जीवमायान्तरात्मनाम् । शास्त्रकालोपदेशानामज्ञाने किमु कर्मभिः" इति वाचः कूटसंग्रहश्लोकः ॥ २० ॥

इति व्यवसिता एवं निश्चितवन्तः । एकचेतस ऐकमत्ययुक्ताः । तं नारदं प्रदक्षिणीकृत्यापुनरावृत्तिमार्गं प्रययुः ॥ २१ ॥

(१) ईश्वरम् इति श्रीवीरराघवाचार्यपाठः । (२) निवृत्त्यनर्हायेति नैलकण्ठपाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

निर्भातः साक्षात्कृतो यो हृषीकेशस्तस्य पदाम्बुजे अनुचरन्नचरदित्यर्थः ॥ २२ ॥

नाशमदर्शनं स्वधर्मभ्रंशं वा । शीलेन शालन्ते शोभन्त इति तथा तेषाम् । कः दक्षः । सुप्रजस्त्वं सत्पुत्रवत्त्वं शुचां शोकानां स्थानम् २३

अजेन ब्रह्मणा । सहस्रशः सहस्रसंख्यान् ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पञ्चपञ्चाद्भुतगृहमित्येतान्विवृणोति । पञ्चविंशतीति । पञ्चविंशतितत्त्वानां जीवपर्यन्तानां सङ्घातरूपं यत्पुरुषस्य परमपुरुषस्याद्भुतं दर्पणं शरीरमात्मन्यध्यात्मं परमपुरुषायत्तेनावस्थितममुष्यस्याविचारयतः । असत्कर्मभिर्देहात्मभ्रमस्वतन्त्रात्मभ्रमापादकैः कर्मभिः किं भवेन्न किमपि प्रत्युत देहात्मादिभ्रमप्रयुक्तोऽनर्थ एवेति भावः ॥ १७ ॥

क्वचिद्धंसं चित्रकथमित्येतद्व्याचष्टे । ईश्वरमिति । अनेन हंसशब्दार्थ उक्तः । हन्ति पापानीति हंसः निरस्तनिखिलदोषः । तमीश्वरं शास्त्रं शास्त्रैकवेद्यं बन्धमोक्षानुदर्शनं बन्धमोक्षावनुदर्शयति बन्धमोक्षहेतुप्रवृत्तिनिवृत्तिधर्मानुष्ठापनेन तौ दर्शयतीति तथा कर्मणि ल्युः । अनेन चित्रकथशब्दार्थ उक्तः । विविक्तं पदं यस्य तं विविक्तस्थानवर्तिनं हृदयकुहरे स्थितमित्यर्थः । अनेन क्वचिद्दशब्दार्थ उक्तः । उत्सृज्य त्यक्त्वा अज्ञाय उक्तार्थं तमनालोच्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

ऐश्वरं शास्त्रमिति पाठान्तरम् । तत्रैश्वरमीश्वरप्रतिपादकमध्यात्मशास्त्रमनुसृत्यानधीत्य बन्धमोक्षानुदर्शनं विविक्तपदमीश्वरमविज्ञायानुपाहत्येत्यर्थः । ऐश्वर्यमिति पाठे तु ईश्वरस्य सम्बन्धि ऐश्वर ईश्वरप्रतिपादकं तदेवैश्वर्यं स्वार्थे ष्यञ् । ईश्वरस्वरूपरूपगुणप्रतिपादकमित्यर्थः । अत्रापि परशब्देन हंसशब्दार्थ उक्तः । असत्कर्मभिरीश्वरगुणापादकैः कर्मभिः किमपि न भवित्यात्मनाशरूपोऽनर्थ एवेति भावः ॥ १८ ॥

श्रीरपदमित्येतद्व्याचष्टे । कालचक्रमिति । यत्सर्वमाब्रह्मस्तम्बपर्यन्तं जगन्निष्कर्षयन्निष्कासयत्त्रोटयदित्यर्थः । अनेन पव्यशब्दार्थ उक्तः । तीक्ष्णं गर्भजन्मजरामरणादिनिमित्तत्वेन दुःसहमनेन क्षौरशब्दार्थ उक्तः । भ्रमत्परिवर्त्तमानं स्वतन्त्रमपरवशं कालचक्रं तदबुध्यस्याविचारयतः असत्कर्मभिः कालवद्यताद्दर्कैः न किमपि प्रत्युत तापत्रयाभिहतिरेवेति भावः ॥ १९ ॥

स्वपितुरादेशं विदुषोऽपीति । शास्त्रस्य पितुः शास्त्रमेव हि सर्वस्य पिता हितोपदेष्टृत्वात्तस्यादेशं विविच्य ज्ञापनरूपमनुशासनं निवर्त्तकं प्रवृत्तिधर्मानुष्ठाननिवृत्तिज्ञापकं यः पुमान्न वेद स गुणविस्रम्भी गुणमयशब्दादिविषयविश्वासवान् । तदनुरूपाय उक्तादेशानुकूलाय कथं सृष्ट्यादावुपक्रमेत् । सृष्ट्याद्यनुक्रमस्य पित्रादेशप्रतिकूलत्वात्तदुपरम एव । तदादेशानुकूलः पित्रादेशानुवर्ती न सृष्ट्यादौ यतेतेति भावः ॥ २० ॥

एवं वर्षिः कृत्वं विमृश्य किमकुर्वन्नित्यत्राह मुनिः । इतीति । राजन्नितीत्थं व्यवसिताः निश्चयवन्तः । व्यवसायो व्यवसितं भावे क्तः सोऽस्त्येषामिति व्यवसिताः अर्शआदित्वान्मत्वर्थीयोऽच् हर्यश्वाः सर्वे एकचेतसः एकमतयः तं नारदं परिक्रम्यानिवर्त्तनं न विद्यते निवर्त्तनं निवृत्तिः यस्मात्तं पन्थानं प्रययुः परब्रह्मोपासनेन मुक्तिं भगवन्तं प्रापुरित्यर्थः ॥ २१ ॥

मुनिर्नारदस्तु स्वरब्रह्मणि ब्रह्मसाक्षित्प्रापकवल्लकीस्वरे निर्भातः सान्निध्यकृतो यो हृषीकेशः तस्य पदाम्बुजे चित्तमनपगममविच्छिन्नं यथा तथावेश्य लोकाननुचरत् अन्वचरत् अटमान इत्यर्थः ॥ २२ ॥

ततः को दक्षः । शीलशालिनां सुशीलानां पुत्राणां नारदात् नाशं निशम्य सृष्ट्युद्योगनिवृत्तिपूर्वकमुक्तिं निशम्याकर्ण्य शोचमन्वतप्यतादुःखयत् । सुप्रजास्त्वं शुचां पदमिति लोकोक्तिप्रकारः सुप्रजस्त्वं सत्पुत्रवत्त्वं शोकानां स्थानमिति हि किं वदन्तीत्यर्थः । अत्र प्रजाशब्देन प्रजानिष्पत्तिरुपलक्ष्यते ॥ २३ ॥

स दक्षोऽजेन ब्रह्मणा परिसान्त्वितः समाहितः पुनः पाञ्चजन्यायां सवलाश्वसंज्ञान् सहस्रसंख्याकान् पुत्रानजनयत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पञ्चपञ्चान्यस्य विमर्शप्रकारमाह । पञ्चेति । पञ्चविंशतितत्त्वानामद्भुतत्वेन दर्शयत इत्यद्भुतदर्शनः गृहकथानां यो यः पुरुषस्तस्य स्वात्मसात्सानमविकृत्य वर्तमानमिन्द्रियं चानुपश्याज्ञ ततः पुरुषस्यास्तकारिणि "आमिसम्पकात्तरं ब्रह्म व्याहरन्मामनुस्मरन्" इतिस्मृतिविहितविधिविनाऽक्षमाणास्सत्कर्माः वाग्व्रमादादिः फलम् । अनेन पञ्चपञ्चमेत्र पञ्चकं वं भ्रमणमिति सूचितम् ॥ १७ ॥

कश्चित्संसं चित्रकथमित्यस्यार्थं दर्शयति । ऐश्वरमिति । ईश्वरप्रतिपादकं समाख्याद्यापाश्रयेण चित्राः कथाः यस्मिंस्तत् बन्धमोक्षावनुदर्शयतीति बन्धमोक्षानुदर्शनम् । अत एव हंसं विविक्तपदं विविक्तं सर्वतः सारभूतं पदं प्राप्नोति अनेन पुरुष इति । हंसो यथा सारं क्षीरमेव गृह्णाति तद्वदिति लुप्तोपमम् । एवंविधं भारतादिशास्त्रमनुसृत्याभ्यासतद्विनिवर्तीकादिशास्त्रश्रवणलक्षणः ज्ञानलक्षणं फलम् ॥ १८ ॥

क्षुरान्तं स्वयं भ्रमिमित्यस्यानुरूपार्थमाह । कालचक्रमिति । भ्रमिमित्यनुग सर्वं जगन्निष्कर्षयदिति व्याख्याति "भ्रामयन्सर्वभूतानि" इति स्मृतेः । क्षुरान्तमित्यस्यार्थं तीक्ष्णमिति । क्षुरान्तं क्षुरधारा तद्वत्तीक्ष्णमित्यर्थः । स्वयमित्यस्यार्थः स्वतन्त्रमिति । एतेर्थः किं लक्ष्यत इति तदाह । कालचक्रमिति । द्वादशमासादिदलान्वितत्वात्कालचक्रव्यपदेशः । तत्स्वरूपमप्यजानतः पुंसस्तत्तत्कालविहिताविषयैः कालजयलक्षणं फलम् ॥ १९ ॥

कथं स्वपितुरादेशमित्यस्यानुगुणार्थमाह । शास्त्रस्येति । "मातेव रक्षति पितेव हिते नियुङ्क्ते" इति वचनात् पितेव हितोपदेष्टृत्वात् पितृशब्देन शास्त्रमुपलक्ष्यते "प्रातरुत्थाय यथा सन्ध्यामुपासीत" इत्यादेः अनुरूपं संसारनिवर्तकं शास्त्रलक्षणं पितुरादेशं यो न वेद स गुणविश्रम्भी गुणविश्वासी पुरुषस्तदनुरूपाय शास्त्रविधानानुगुणाय कथं सत्कर्म उपक्रमेदज्ञानादिति शेषः ॥ २० ॥

इति ऋषेरभिप्रायं व्यवसिताः निश्चितवन्तः एकमतयः एकबुद्धयः । अनिवर्तकं पन्थानं संन्यासलक्षणं मार्गं सन्न्यासानन्तरं पुनराश्रमान्तराभावादनिवर्तकं वा न निवर्तकं यस्य स तथा तम् ॥ २१ ॥

स्वरब्रह्मणि षड्जादिस्वरलक्षणब्रह्मणि गान्धर्वे नितरां भाते प्रकाशिते यथा अखण्डं निरन्तरं भवति तथा निर्भातमितिपाठे चित्तविशेषणं निध्यातमित्यर्थः ॥ २२ ॥

को दक्षः । सुप्रजास्त्वं शोभनसन्ततिमत्त्वं शुचां शोकानां पदं स्थानमिति सञ्चिन्त्य । सुप्रजास्त्वमित्यसिङ्गरसो वा असिचिति छन्दोऽनुकारिप्रयोगः ॥ २३ ॥

सहस्रं सङ्ख्येषामस्तीति सहस्रिणः ॥ २४–२९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लोहानामिव पञ्चविंशतितत्त्वानां सङ्घातरूपः पुरुषोऽद्भुतो दर्पणः स्यात् आत्मा आश्रयो मुक्तावपि । ऐश्वरं भगवल्लीलात्मकं । चित्रकथमित्युक्तत्वात् । विविक्तानि पदानि सर्वेऽस्यर्थो यस्मात् ॥ १७–१९ ॥

तदनुरूपाय निवृत्त्यनुरूपाय ज्ञानाय । तद्वेदने तत्रैव यत्तेतेति भावः ॥ २०—२१ ॥

नारदस्य च चेष्टेयं सर्वेषां तत्सुमुखीकरणोत्कण्ठामयेन श्रीभगवदनुरागेणेत्याह । स्वरब्रह्मणीति । उत्तमस्वरजातिस्वभावोऽयम् । यः सामान्यतः स्वस्वोत्कण्ठाविषयं स्मारयति विशेषतो भक्तानां भगवन्तमित्यनुभवः ॥ २२–२९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पञ्चपञ्चाद्भुतं गृहमित्येतद्व्याचष्टे । पञ्चेति । पुरुषो विष्णुः अद्भुतदर्पण इति । सर्का हि स्वचित्तादीनि पञ्चविंशतितत्त्वानि विष्णावर्पयन्ति तानि च विष्णुगतानि भूत्वा निर्मलान्यप्राकृतानि नित्यानि प्रतिबिम्बतां परित्यज्य विष्णुरूपदर्पणस्वधर्मा-श्रयेव भवन्तीति विष्णुरूपदर्पणस्याद्भुतत्वम् । अन्यदर्पणगतं मुखादिकन्तु यथास्थितरूपं यत्तत् प्रतिबिम्बमेव भवेन्न तु दर्पणगतनैर्मल्यमप्रहीत्यर्थः । तं पुरुषं विष्णुम् अध्यात्म आत्मन्येव वर्त्तमानम् । अबुधस्य अव्यक्तत्वेनाजानतः । तस्मादिहात्मानो हरये समर्पयन्तीति भावः ॥ १७ ॥

कञ्चिद्धंसं चित्रकथामिति व्याचष्टे । ऐश्वर्यमीश्वरप्रतिपादकं बन्धमोक्षौ विचित्राभिः कथाभिरनुदर्शयतीति । चित्रकथमिति व्याख्यातं श्रीरतीतिमिव विविक्तमात्मानात्मवस्तु येनेति हंसपदं व्याख्यातम् । विविक्तानि विचारयुक्तान्येव पदानि सुविविक्तानि वर्त्तन्ते तत्त्वात्मकमुचितमतो मोक्षार्थमीश्वरं भजन्तीति भावः ॥ १८ ॥

क्षौरपव्यं स्वयं भ्रमीति व्याचष्टे । कालचक्रमिति । क्षुरपवि-रूपमिव निवृत्तमिति, भयप्रदत्वात् क्षौरपव्यं भ्रमणात्मकत्वा-द्भ्रमि । नारायणपार्षदानां निष्कर्षयत् विनाशयत् । तेन भवः परश्वो वा मोक्ष्यथ किमिति हरिं न भजन्तीति भावः ॥ १९ ॥

कथं स्वपितुरादेशमविद्वांस इति व्याचष्टे । शास्त्रस्येति । तत्राधानकर्त्तैव पिता किन्तु शास्त्रमेव तस्य पितुरादेशोऽपि निव-र्त्तक एव न तु प्रवर्त्तकः । अतो यद्यादेशं निवर्त्तकं न वेद तदा तदनुरूपाय आदेशानुरूपं कर्त्तुं कथमुपक्रमेत् । यतोऽयं गुणा प्रवृत्तिमार्ग एव विश्रम्भी अयमयादेश इति विश्वासवान् अत. शास्त्रस्य शास्त्रानुसारिणः पितुश्च निवृत्तिधर्मे या आज्ञा सैव वास्तवी तामेव पालयेदिति ध्वनिः । अतः शास्त्रतात्पर्यप्रति-कूलमादिष्टं चरतः पितृत्वाभासात्तदाज्ञाया अपालने वा नास्ति प्रत्यवाय इत्यनुध्वनिः । तस्मात्सत्त एव विष्णोर्मन्त्रं गृहीत्वा कश्चिदेकान्ते उपविश्य तं विष्णुमेव भजन्तीति सर्वानु-ध्वनिः ॥ २० ॥

इति विशेषेण अवसितं निश्चितं येस्ते एकचेतसः ऐकम-त्यवन्तः परिक्रम्यन्ति । गुरुकरणाचरणामृतग्रहणादगडवत्-प्रणमनादयोऽप्युपलक्ष्यन्ते ॥ २१ ॥

हन्त हन्त एतावन्तो जीवा नरकादुद्धृतास्तत् प्रमोदेन उपवीणयामीति नारदस्यानन्दसमुद्रे निमज्जनमाह । स्वरः षड्-जादय एव ब्रह्म तत्र निर्मितस्य लीलागानेन साक्षात् कृतस्य हृषीकेशस्य सर्वेन्द्रियाकर्षकस्य कृष्णस्य चरणकमल ॥ २२ ॥

नाशं वैष्णवत्वमेव गृहस्थाना मते नाशस्तम । कं दक्षः । अतः तप्यत । हन्त हन्त तादृशा मे पुत्रा नारदेन भ्रंशिता इति विषसाद सुप्रजस्त्वं सत्पुत्रवत्त्वं शुचां पदं शोकाना स्थानं शोकदुःखादृष्टवन्त एव लोकाः सुप्रजसा भवन्तीति विललापः ॥ २३ ॥

सवलाश्वान् सवलाश्वसंज्ञान् सहस्रिणः सहस्रसङ्ख्यातान् ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पञ्चपञ्चाद्भुतं गृहमित्यस्यार्थमाह । पञ्चेति । पञ्चविंशतितत्त्वानां जीवस्याहितस्य चतुर्विंशतिप्राकृतपदार्थमयस्य देहस्येत्यर्थः । पुरुषः अन्तर्यामी अद्भुतदर्पणः सर्वधारकत्वेऽपि सर्वदोषास्पृ-ष्टत्वनाश्चर्यरूपः आश्रयः तमध्यात्मं सर्वप्रेरकतयात्मन्यपि स्थि-तमपि अबुधस्य नियन्तृत्वेनाजानतः असद्भिः सर्वैव ज्ञातव्यता कृतानीति वृथाख्यानरूपकृतैः ॥ १७ ॥

कञ्चिद्धंसं चित्रकथमित्यस्यार्थमाह । ऐश्वर्यमिति । ऐश्वर्यमीश्व-रस्वरूपं च शास्त्रमुत्सृज्य अत एव तदर्थभूतं विविक्तपदं कार्यका-रणप्रपञ्चातीतं पदं स्थानं मुक्तगम्यं स्वरूपं वाविज्ञाय असद्भि-स्तत्पदाप्रापकैः कर्मभिः किं भवेत् ॥ १८ ॥

क्षौरपव्यमित्यस्यार्थमाह । कालचक्रमिति । भ्रमि स्वयं भ्रम-णशीलं तीक्ष्णं क्षुरवत् स्वतन्त्रं वज्रवद्दुर्निवारं निष्कर्षयत् विनाशयद्वृथाचक्षुसद्भिः स्वाभाविकतैः ॥ १९ ॥

स्वपितुरादेशमविद्वांस इत्यस्यार्थमाह । शास्त्रस्येति । पितुः हितोपदेष्टुः शास्त्रस्यादेशं विधिरूपं निवर्त्तकं निषेधवाक्यं च यो न वेद स तदनुरूपाय स्वानुकूलाय कथमुपक्रमेत् । हितं अहितं वा केन प्रकारेण प्रवृत्तो निवृत्तो वा भवेत् । यतः स्वभा-वतो बालवत् गुणविस्रम्भी इन्द्रियार्थेषु विश्वासवान् विपर्यासं कर्म कुर्वन् संसारं भ्रमन्नतु मुक्तो भवेदिति भावः ॥ २० ॥

इत्येवं विशेषतो अवसितं निश्चितं येस्ते तं श्रीनारदं परि-क्रम्य नास्ति निवर्त्तनं संसारे पुनः पतनं यस्मात्तं भगवद्भा-वापत्तिप्रदं पन्थानं प्रययुः ॥ २१ ॥

"स्वतो रञ्जयति श्रोतुश्चित्तं स स्वर उच्यते" इत्येवं लक्षणः षड्जादिस्वर एव ब्रह्मरूपेणोपास्यमानत्वात् तस्मिन्नुल्लकया प्रव-र्त्यमाने निर्मितो गुणगानेन साक्षात्कृतो यो हृषीकेशस्तस्य पदा-म्बुजमखण्डमविच्युतम् अनुस्मरन् अन्वचरत् अडमात्र भावः ॥ २२ ॥

को दक्षः । शीलेन शालन्ते शोभन्ते इति तथा तेषां नारदा-देतुभूतात् नाशं प्रवृत्तिमार्गभ्रंशं निशम्य श्रुत्वा शोकमन्व-तप्यत । तत्र हेतुमाह । सुप्रजस्त्वमिति शुचां शोकानां पदं स्थानं किं पुनर्दुष्प्रजस्त्वमिति भावः ॥ २३ ॥

सहस्रशः सहस्रसङ्ख्याकान् ॥ २४–२५ ॥

भाषा टीका ।

पचीस तत्वों का अन्तर्यामी पुरुष है सो आश्चर्य रूप है इस अध्यात्म को जो नहीं जानता है उस के असत् कर्मों के करने से क्या होगा ॥ १७ ॥

बन्ध मोक्षके जनाने वाले अध्यात्म शास्त्रको जड चेतन के भेदको न जानने से असत्कर्मो से क्या होगा ॥ १८ ॥

सब जगत् के खैंचने वाले भ्रमण करने वाले स्वतन्त्र काल चक्रको नहीं जानने वाले को असत्कर्म से क्या होगा ॥ १९ ॥

शास्त्र रूपी पिताकी निवर्तनकी आज्ञाको जो नहीं जानता है सो गुणों का विश्वास करने वाला निवृत्ति मार्गको कैसे प्राप्त होगा ॥ २० ॥

तेऽपि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः ।
नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः ॥ २५ ॥
तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ।
जपन्तो ब्रह्म परमं तेपुस्तत्र महत्तपः ॥ २६ ॥
अब्भक्षाः कतिचिन्मासान् कतिचिद्वायुभोजनाः ।
आराधयन्मन्त्रमिममभ्यस्यन्त इडस्पतिम् ॥ २७ ॥
ओं नमो नारायणाय पुरुषाय महात्मने ।
विशुद्धसत्त्वधिष्ण्याय महाहंसाय धीमहि ॥ २८ ॥
इति तानपि राजेन्द्र ! प्रतिसर्गधियो मुनिः ।
उपेत्य नारदः प्राह वाचःकूटानि पूर्ववत् ॥ २९ ॥
दाक्षायणाः ! संशृणुत गदतो निगमं मम ।
अन्विच्छतानुपदवीं भ्रातॄणां भ्रातृवत्सलाः ॥ ३० ॥
भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् ।
स पुण्यबन्धुः पुरुषो मरुद्भिः सह मोदते ॥ ३१ ॥
एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः ।
तेऽपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ! ॥ ३२ ॥

भाषा टीका।

हे राजन् ! वे हर्यश्व ऐसा निश्चय करके नारदजी की परिक्रमा करके भगवन्मार्ग को चले गये ॥ २१ ॥

श्रीनारदजी स्वर ब्रह्म से प्रकाशमान जो हृषीकेशभगवान् तिन के चरणकमल में मन को लगाकर लोकों में विचरने लगे ॥ २२ ॥

सुन्दर स्वभाव वाले पुत्रों का विरक्त होकर नाश होजाना सुनकर दक्षप्रजापति ने बहुत शोच किया क्योंकि सुन्दर पुत्रों का होना शोच का हेतु है ॥ २३ ॥

उनके पीछे ब्रह्माजी ने उनको शान्त किया तब फिर दक्षजी ने पांचजनी भार्या में शबलाश्व नाम के हजार पुत्रों को उत्पन्न किया ॥ २४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका।

परमं ब्रह्म प्रणवं वक्ष्यमाणमन्त्रं वा ॥ २६ ॥

इडस्पतिं वाचां मन्त्राणां पतिं विष्णुमाराधयामासुः ॥ २७ ॥

विशुद्धसत्त्वाश्रयाय परमहंसाय नमो धीमहि ॥ २८ ॥

प्रतिसर्गे धीर्येषां तान्। वाचःकूटानि अदृष्टान्तंभुव इत्यादीनि पूर्वोक्तानि प्राह ॥ २९ ॥

हे दाक्षायणाः ! संशृणुत हे भ्रातरः पुनरन्यदपि प्राह। निगममुपदेशम। अन्विच्छतावलोकयत ॥ ३० ॥

प्रायणं प्रकृष्टं गमनम्। पुण्यमेव बन्धुर्यस्य मरुद्भिर्भ्रातृवत्सलैर्देवैः ॥ ३१ ॥

अमोघं दर्शनं यस्य हे मारिष ! आर्य ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तेऽपि सबलाश्वाः पित्रा दक्षेण प्रजासर्गे निमित्ते सकृदादिष्टाः धृतं व्रतं पित्रादेशकारणरूपं यैस्ते नारायणसरआख्यं तीर्थं ययुः। यत्र नारायणसरसि स्वपूर्वजाः हर्यश्वाः सिद्धा बभूवुः ॥ २५ ॥

तस्य नारायणसरस्तीर्थस्योपस्पर्शनादेव विनिर्धूतं निरस्तं मनसो मलं वासनारूपं येषां तादृशाः परममुत्कृष्टं ब्रह्म प्रणवं जपन्तः महत्तपस्तेपुश्चक्रुः। ब्रह्मशब्दो वक्ष्यमाणमन्त्रस्याप्युपलक्षकः। तस्य प्रणवघटितत्वादिति भावः ॥ २६ ॥

महत्तप एव प्रपञ्चयति। अब्भक्षा इति। अप एव भक्षयन्तीति तादृशाः कतिचिन्मासान् कतिचिच्च मासान् वायुं भुञ्जन्तीति वायुभोजनाः कर्मणि ल्युट्। इमं वक्ष्यमाणं मन्त्रमभ्यस्यन्तः इडस्पतिमाराध्यन् इत्यन्वयः। इडेतीडा मन्त्रः। आर्षत्वाद्ह्रस्वः पारस्करादित्वात्सुट्। तस्य पति-

सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः ।
नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीरिव ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सभिदेवैर्व भगवन्तमाराधयामासुः आकृपूर्वाद्रा भयतेलेङ् आङ्काटोः सवर्णादीर्घः ॥ २७ ॥

मन्त्रमाह । ओमिति । नारस्य जीवसमूहस्यायनाय प्राप्याय प्रापकाधाराय च पुरुषाय हृदयकमलस्थाय परमात्मनेऽन्तःप्रविश्य नियन्त्रे विशुद्धमुपासनेन निर्मलं सत्त्वमन्तःकरणं धिष्ण्यमभिव्यक्तिस्थानं यस्य । यद्वा । शुद्धं रजस्तमोभ्यामननुविद्धं सत्त्वं धिष्ण्यं स्थानं यस्य तस्मै । परमहंसैर्मानसवायेति भावः । महांश्चासौ हंसस्तस्मै महाकल्याणगुणैर्महान् हंसो निरस्तनिखिलदोषः । एवंभूताय नमः उक्तविधं धीमहि ध्यायेम ॥ २८ ॥

इतीत्थं मन्त्रं जपतः प्रजासर्गे धीर्येषां तान् सबलाश्वानपि हे राजेन्द्र ! मुनिर्नारद उपेत्य पूर्ववद्वाचः कूटान्यदृष्टान्तं भुवो यूयमित्यादीनि प्राहोक्तवान् ॥ २९ ॥

पूर्वोक्तात् किञ्चिद्विशेषमाह । हे दाक्षायणाः ! गदतो ब्रुवतो मम निगममुपदेशं संशृणुत भ्रातॄणामग्रजानामनुपदर्शी मार्गानुसरणमन्विच्छत । अनुगता पदवी अनुपदवी "कुगतिप्रादय" इति समासः । यतो यूयं भ्रातृषु वत्सलाः ॥ ३० ॥

भ्रातॄणां प्रायणं प्रकृष्टमनुवर्त्तनं भ्राता धर्मविदनुतिष्ठति करोति स पुण्यमेव बन्धुर्यस्य तादृशो मरुद्भिर्देवैः सह मोदते ॥ ३१ ॥

अमोघं दर्शनं यस्य स परमार्थदर्शी नारदः । एतावदियदुक्त्वा प्रययौ । तेऽपि मारिषा शाबाः मारिषेति पाठे राज्ञः सम्बोधनं मारिष इति तस्य नामान्तरं भ्रातॄणामग्रजानामेव मार्गं परब्रह्मोपासनरूपमन्वगमन्ननुसृतवन्तः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अभ्यस्यन्तः अभ्यस्यन्तः । इडस्पतिं इलापतिम् ॥ २७ ॥

विशुद्धसत्त्वधिष्ण्याय विशुद्धसत्त्वगुणाश्रयाय निर्दोषमलज्ञानस्वरूपाय वा महाहंसाय सारग्राहिश्रेष्ठाय ॥२८।२९॥३०॥

प्रायणं प्रयाणमाश्रमप्रातिसञ्चरणं पुण्यमेव बन्धुर्यस्य स तथा मरुद्भिर्देवैः ॥ ३१-३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ब्रह्म परमं वक्ष्यमाणं मन्त्रम् ॥ २६—२९ ॥

निगममुपदेशम् ॥ ३० ॥

प्रायणं प्रव्रज्यं मरुद्भिर्भ्रातृवत्सलैर्देवैः । अयं दृष्टान्तप्रोक्तः । यूयं तु वैकुण्ठगामिभिरग्रजैः सह मोदिष्यध्वे इति भावः ॥ ३१ ॥

मारिष हे आर्य ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ब्रह्म वक्ष्यमाणं मन्त्रम् ॥ २६ ॥

इडस्पतिं मन्त्राणां पतिं भगवन्तमाराधयामासुः ॥ २७ ॥

मन्त्रमाह । ओमिति ॥ २८ ॥

प्रजासर्गे धीर्येषां तान् । अलुक् समासः । पूर्ववत् वाचः कूटानि अदृष्टान्तं भुव इत्यादीनि प्राह ॥ २९ ॥

अन्यदपि प्राह । हे दाक्षायणाः ! गदतो मम निगममुपदेशं शृणुत भ्रातॄणामनुपदवीमन्विच्छत अवलोकयत ॥ ३० ॥

प्रायणं प्रकृष्टमयनमनुवर्तनम् ॥ ३१ ॥

मारिष ! हे आर्य ! ॥ ३२ ॥

भाषा टीका ।

वे पुत्र भी पिता की आज्ञा पाकर दृढ़ व्रत को धारण करते उहां गये जहां कि अपने से पूर्वजसिद्ध भये हैं ॥ २५ ॥

उस नारायण सरोवर के स्नान पान करने से उनके मन के मल नष्ट हो गये तब वे परं ब्रह्म प्रणव को जप करके भारी तप को करने लगे ॥ २६ ॥

कितनेक महिनों तक जल पान करके रहे कितने महिने वायु भोजन करके रहे इस मंत्र का जप करके भगवान् का आराधन करते रहे ॥ २७ ॥

उस मंत्र का अर्थ यह है कि पुरुष महात्मा विशुद्ध सत्त्व के स्थान महा हंस श्रीमन्नारायण आप के अर्थ नमस्कार है ॥२८॥

हे राजेन्द्र ! इस प्रकार से रहते हुये उन दक्ष पुत्रों को प्रति सर्ग के मनोरथी जान कर नारदजी पासमें आकर पहिले सरीके कूट वचनों को कहने लगे ॥ २९ ॥

नारदजी बोले हे दक्ष पुत्र ! हो कहने से मेरी आज्ञा को तुम श्रवण करो तुम तो भ्राताओं के प्रीति करने वाले हो तो भ्राताओं की पदवी का अनुसरण करो ॥ ३० ॥

जो धर्मज्ञ भ्राता अपने भ्राताओं के मार्ग का अनुष्ठान करता है वह पुरुष पुण्यवान् होता है देवतों के सहित आनंद करता है ॥ ३१ ॥

इतना कह कर सफल दर्शन देने वाले नारदजी चले गये हे श्रेष्ठ राजन् ! वे कुमार भी अपने बड़े भ्राताओं के मार्ग में चलने लगे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सध्रीचीनं समीचीनम् । प्रतीचीनम् । प्रत्यग्वृत्तिलभ्यं अनुपथं मनुगुणं पन्थानम् । पश्चिमा यामिनीर्गतारात्रय इव ॥ ३३-३४ ॥

एतस्मिन् काल उत्पातान् बहून् पश्यन् प्रजापतिः ।
पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत् ॥ ३४ ॥
चुक्रोध नारदायासौ पुत्रशोकविमूर्च्छितः ।
देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः ॥ ३५ ॥

॥ दक्ष उवाच ॥

अहो असाधो ! साधूनां साधुलिङ्गेन नस्त्वया ।
असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ॥ ३६ ॥
ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम् ।
विघातः श्रेयसः पाप ! लोकयोरुभयोः कृतः ॥ ३७ ॥
एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः ।
पार्षदमध्ये चरसि यशोहा निरपत्रपः ॥ ३८ ॥
ननु भागवता नित्यं भूतानुग्रहकातराः ।
ऋते त्वां सौहृदघ्नं वै वैरङ्करमवैरिणाम् ॥ ३९ ॥
नेत्थं पुंसां विरागः स्यात्त्वया केवलिना मृषा ।
मन्यसे यद्युपशमं स्नेहपाशनिकृन्तनम् ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुत्राणां पारमहंस्यनिष्ठामुपश्रुत्य दक्षोऽपि प्रायशो विरक्तः स्याद्धिति तदनुग्रहार्थं देवर्षिस्तत्पार्श्वं गतस्तदा तमुपलभ्य दक्ष आह ॥ ३५ ॥

साधोरिव लिङ्गं वेषो यस्य तेन त्वया नोऽस्मदीयानामर्भकाणामसाध्वकारि कृतं तदेवाह । साधूनां स्वधर्मे प्रवृत्तानां भिक्षोर्यो मार्गः स प्रदर्शितः ॥ ३६ ॥

ननु सन्न्यासिनो मार्गः साधुरेव मोक्षहेतुत्वात् । सत्यम् । ऋणत्रयापाकरणं विना तु महाननर्थ एवेत्याह । ऋणैरिति । "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वासि" इतिश्रुतेः । ऋणैरमुक्तानां न मीमांसितानि न विचारितानि कर्माणि यैः तेषां तावदृणाद्विमोक्षो नास्ति तद्वृत्तरकालभावित्वाच्च पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवर्षिऋणाद्विमुक्तिश्च नास्ति । अतो हे पाप ! विषयभोगत्यागादिह लोके श्रेयसो विघातः कृतः । मोक्षानधिकारित्वाच्च परलोकेऽपि श्रेयसो विघातः कृत इत्यर्थः । तथा च मनुः ।

"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः" ॥

इति ॥ ३७ ॥

बालानां मतिं पुत्रादिविषयां भिनत्तीति तथा एवं निरनुक्रोशो निर्घृणो हरेर्यशोनाशकः संस्तत्पार्षदानां मध्ये कथं चरसि ॥ ३८ ॥

निर्लज्जत्वमेवाह । नन्विति । ननु त्वामृते भागवताः सर्वे भूतानुग्रहपरवशास्त्वं तु भूतविप्रियं कुर्वन् कथं न लज्जस इति भावः ॥ ३९ ॥

ननु वैराग्यादुपशम उपशमाच्च भूतस्नेहपाशच्छेदनं भवति न च विरक्तस्य ऋणत्रयापाकरणमावश्यकम् "यदहरेव विरजेत्तदहरेव प्रव्रजेत् यद्विवेतरथा ब्रह्मचर्यादेव प्रव्रजेत्" इत्यादि श्रुतेः । अतो वैराग्योपदेशेन तेषां मयानुग्रह एव कृत इति चेत्तत्राह । नेति । यद्यपि त्वमेवं मन्यसे तथापि मृषा केवलिना ज्ञानं विनावधूतवेषेण त्वयेत्थं मतिचालने कृतेऽपि पुंसां विरागो नैव स्यात् । नच विरागं विनोपशमो न च तेन विना स्नेहपाशनिकृन्तनमित्यर्थः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्ते सध्रीचीनं सहाञ्चति गच्छतीति सध्र्यङ् प्रातिवाहिकैः सह गन्ता जीवः तेन गम्यं सध्रीचीनं प्रतीचीनं स्वस्य आत्ममात्रेण ब्रह्मात्मकस्वात्मयाथात्म्यसाक्षात्कारवता गम्यं प्रतीचीनं परस्य परमपुरुषस्यानुबन्धमनुकूलमर्चिरादिमार्गं गता अद्यापि न निवर्त्तन्ते न पुनरावर्त्तन्ते "एतं देवयानं पन्थानमापद्य न पुनरावर्त्तन्ते" इति श्रुत्यर्थोऽत्र विवक्षितः । न पुनरावृत्तौ दृष्टान्तः । यामिनीरिव पश्चिमा इति । पश्चिमा अतीता यामिनीर्यामिन्यो रात्रयो यथा न पुनरावर्त्तन्ते तथेत्यर्थः ॥ ३३ ॥

नानुभूय न जानाति पुमान् विषयतीक्ष्णताम् ।
निर्विद्यते स्वयं तस्मान्न तथा भिन्नधीः परैः ॥ ४१ ॥
यन्नस्त्वं कर्मसन्धानां साधूनां गृहमेधिनाम् ।
कृतवानसि दुर्मर्षं विप्रियं तव मर्षितम् ॥ ४२ ॥
तन्तुकृन्तन ! यन्नस्त्वमभद्रमचरः पुनः ।
तस्माल्लोकेषु ते मूढ ! न भवेद्भ्रमतः पदम् ॥ ४३ ॥

श्रीशुक उवाच ।

प्रतिजग्राह तद्बाढं नारदः साधुसम्मतः ।
एतावान् साधुवादो हि तितिक्षेतेश्वरः स्वयम् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कन्धे नारदशापोनाम
पञ्चमोऽध्यायः ॥ ५ ॥

भाषा टीका ।

चिन्ह को धारण करके बडा असाधु पना किया जो कि बालकों को भिक्षुक मार्ग दिखादिया ॥ ३६ ॥

हे पापी ! जिन बालको ने देवऋण पितृऋण ऋषिऋण को नहीं दूर किया है जिनोंने कर्म का विचार नहीं किया है उन के दोनों लोकके पुण्य सुखका तैंने नाश करदिया ॥ ३७ ॥

तू इस प्रकार का निर्दयी है बालकों की मति बिगाडने वाला है यश के नाश करने वाला है निर्लज्ज है श्रीहरि के पार्षदों के मध्यमे घूमता है ॥ ३८ ॥

क्यों रे भक्तजन तो नित्यही लोगों के अनुग्रह करने मे व्यग्र रहते हैं एक तूही बिना बैर वालों से बैर करने वाला सुहृदपन के नाश करने वाला है ॥ ३९ ॥

बिना ज्ञान के विरक्त होने वाले तेरे कहने से इस प्रकार से झूठ मे किसी को वैराग्य नहीं होगा जो कि तू जानता है स्नेह रूपी पाश छूट जाय और शान्ति होजाय सो नहीं होना है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इत्थं विरागो न स्यादित्यत्र हेतुमाह । नानुभूयाननुभूय विषयाणां तीक्ष्णतां दुःखहेतुत्वं न जनाति । तस्माद्विषयानुभवेन तीक्ष्णत्वज्ञानात् ॥ ४१ ॥

अतस्त्वयाऽस्माकमप्रियमेव कृतं तथापि वयं न कुर्म इत्याह । यन्निति । कर्मसन्धानां कर्ममर्यादानाम् । कर्तुमन्धानामिति पाठे विप्रियं कर्तुमजानतामित्यर्थः । दुःसहं यत्त्वं कृतवानसि तन्मर्षितं सोढम् ॥ ४२ ॥

तथापि तवाभद्रं भविष्यत्येवेत्याह । तन्तुकृन्तन ! सन्तानच्छेदक । यद्यस्मादभद्रं पुत्राणां स्थानभ्रंशमचरस्तस्मात्तव लोकेषु भ्रमतः पदं स्थानं न भवेदिति मृदुच्छलेन शापः ॥ ४३ ॥

बाढं तथेति स्वीकृतवान् । ईश्वरोऽपि प्रतिशप्तुं समर्थोऽपि तितिक्षेत सहेतेति यदेतावानेव ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कुतः । यतः पुमान्नानुभूय अननुभूय विषयाणां तीक्ष्णतामन्ततो दुःखरूपतां न जानाति । यथा विषयाननुभूय स्वयमेव तस्माद्विषयान्निर्विद्येत विरज्येत । तथा परैर्भिन्नधीश्चालितधीर्न निर्विद्येत ॥ ४१ ॥

यत्त्वं कर्मसन्धानां कर्मण्यासक्तचित्तानां कर्तुमन्धानामिति पाठे प्रतिविप्रियं कर्तुमजानतां गृहस्थानां साधूनामस्माकं दुर्मर्षं सोढुमशक्यं विप्रियं कृतवानसि तदप्रियममर्षितमस्माभिरिति शापः । न मृष्यतेऽस्माभिरित्यर्थः ॥ ४२ ॥

एवं नारदाय क्रुद्धवान् दक्षः शशाप । तन्त्विति हे तन्तुकृन्तन ! सन्तानच्छेदक ! यस्मात्त्वमभद्रं पुत्रविनाशमचरः कृतवानसि चरतेर्लङ् मध्यमैकवचनं हे मूढ ! तस्मात्सर्वेषु लोकेषु भ्रमतस्तव पदं स्थानं न भवेत्क्वचिदपि भवान्न चिरमवतिष्ठेत्किन्तु भ्राम्यतीति शापः ॥ ४३ ॥

तं च शापं साधूनां सम्मतो नारदो बाढं तथैवास्त्विति प्रतिजग्राह स्वीकृतवान् । कुतः हि यस्मादीश्वरोऽपि स्वयं प्रति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कर्तुं समर्थोऽपि तितिक्षेत सहेतेति यदेतावानेव साधूनां वादः । तु प्रतिशापप्रदानवाद इति भावः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कुतो व्यर्थं इति तत्राह । नेति । नानुभूयाननुभूय विषयमेवाम-द्धेत्यर्थः । विषयतीक्ष्णतां संसारापादनपटुताम् । तज्ज्ञानाद्वैराग्यं स्यात्किमिति तत्राह । निर्विद्येत इति । यथा विषयभोगेन तत्स्वरूपं ज्ञात्वा स्वयं परोपदेशमन्तरेण तस्माद्विषयग्रामान्निर्विद्यते विरक्तो भवति तथा परोक्तिभ्यो: प्रबोधितबुद्धिः न विरक्तो भवति प्रज्ञातविषयतीक्ष्णत्वादिति शेषः ॥ ४१ ॥

गालीवचनमन्तरेण क्रोधफलमाह । यदिति । त्वं दुर्मर्षं दुःसहं विरोधं कृतवानसीति यत्तन्मर्षितं सोढमेवेत्यन्वयः ॥ ४२ ॥

तर्हि किं मर्षितासीति तत्राह । तन्तुवृन्तेति । हे मूढ ! अस्मदभि-मतविरुद्धबोधक ! तन्तुकृन्तं सन्ततिकरणानां नः तनयानामभद्र-मैहिकमुत्तानुगर्भविरोधिरूपमचरः । पुनः यस्मात्तस्माल्लोकेषु भ्रम-तस्ते पदमेकत्र निवासलक्षणं स्थानं न भवेदित्यन्वयः ॥ ४३ ॥

स्वयं शोभनदेवो नारद ईश्वरः प्रतिशप्तुं समर्थोऽपि न प्रशाप दत्तशापं तितिक्षेत सहेत हि यदेतावान् साधूनां वादः स्व-भावलक्षणः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्मात्त्वमतोऽभिज्ञो गजनार्यं गतः शृणिवत्याह । नेति । विषयाणां तीक्ष्णतां दुःखदातृत्वमननुभूय न जानाति । अतस्त-स्माद्विषयभोगोत्थादेव तदीयतीक्ष्णत्वज्ञानात् स्वयमेव निर्वि-द्येत यथा न तथा परैस्तत्त्वाद्युक्तिभिर्भ्यो: विद्योतामतिः ॥ ४१ ॥

एवं त्वया यथा मम निष्कृतकं मैत्रं कृतं तस्य प्रतिफलमहमपि तवातुर्गुणितं स्वयमेव दातुं शक्तोऽस्मि तथापि न ददामीति पदय गृहस्थानामप्यस्माकं तितिक्षामित्याह । यदिति । कर्मण्येव कर्ममार्गे एव सन्धा मर्यादा येषां तेषां कर्त्तुमन्धानामिति पाठे परेषां विप्रियं कर्त्तुमजानतामित्यर्थः । दुर्मर्षं दुःसहमपराधमेव ज्ञानमार्गमर्यादाभ्रष्टस्य परं विप्रियं कर्तुं वाञ्छतः । असाधोः परमहंसाभिमिषाः मर्षितं क्षान्तम् ॥ ४२ ॥

तथापि तवाभद्रन्तु भविष्यत्येवेत्याह । तन्तुकृन्तन ! सन्ता-नच्छेदक ! अभद्रं मत्पुत्राणां स्थानभ्रंशम् अचरः शापकरोः पदं स्थानम् ॥ ४३ ॥

प्रतिजग्राह । बाढं तथेति स्वीचकार साधूनां सम्मत इति । साधव एवमेव सहन्त इत्यर्थः । प्रसिद्धस्य साधुवादशब्दस्या-र्थमेव निरुक्तिरित्याह । एतावानिति । ईश्वरः प्रतिशप्तुं समर्थोऽपि । ननु दक्षमनुग्रहीतुमागतो नारदो दक्षेण बहुशस्तिरस्कृतस्तत्र तास्तिरस्कारान् श्रुत्वा नारदेन तत्समीपात् कथं नापसृतम् । उच्यते । नारदस्यायमभिप्रायः । क्रोधवशोऽयं बहुशस्तिरस्कारानपि करोतु शापञ्च ददातु । ततश्च "क्रोधस्यैतत्फलोदयात्"इत्युक्तेर्यदा क्रोधः शाम्येत् माञ्च प्रति तिरस्कारादिकमकुर्वाणो सर्वमेव सहमानमालोक्य हन्त हन्त भगवद्भक्तोऽयं तिरस्कृतः शप्तश्चेति वैकुण्ठगतानां सनकादीनामिवानुतापश्च यदा भविष्यति तदा भक्तिबीजवपनयोग्यं चित्तभूतेऽस्मिन् शुद्धभक्तिबीजमुप्त्वा यास्या-मीति बुद्ध्या तावत्पर्यन्तमपि स्थितम् । दक्षस्य तु तच्चदृष्ट्वा अहो चन्द्रार्द्धमौलिरपराधेऽपप्राबल्यमिति स्मृत्वा ततोऽपसृतम् ॥ ४४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

षष्ठस्य पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नानुभूय विषयाननुभवमकृत्वा विषयाणां तीक्ष्णतां दुःखो-दर्कतां न जानाति तस्माद्विषयानुभवेन तत्तीक्ष्णत्वज्ञानात्स्वयमेव निर्विद्येत विषयेभ्यो विरज्येत परैस्तत्त्वाद्युक्तिभिर्वादैस्तु तथा न विरज्येत ॥ ४१ ॥

कर्माणि कर्ममार्गे सन्धा निष्ठा येषां तेऽस्माकं दुःसहमप्रियं कृतवानसि यत्तत्तव मर्षितं क्षान्तं मया ॥ ४२ ॥

इदं तु तव सर्वाप्रियकारिणः भविष्यत्येवेत्याह । हे तन्तु-कृन्तन ! वंशघ्न ! यस्मात्त्वं नोऽस्माकमभद्रमप्रियमचरैस्तस्मात्ते भ्रमतः पदं स्थानं न भवेत् ॥ ४३ ॥

तच्छापं नाहं तथास्त्विति प्रतिजग्राह स्वीकृतवान् । ईश्वरोऽपि प्रतिशप्तुं समर्थोऽपि तितिक्षेतेति यदेतावानेव साधु-वादः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चमाध्यायार्थप्रकाशः ॥ ५ ॥

भाषा टीका ।

पुरुष बिना अनुभव किये विषय की तीक्ष्णताको नहीं जान सकता है जानने से स्वयं उससे निवृत्त हो जावगा तैसा दूसरों के बुद्धि भेदन से नहीं निवृत्त होगा ॥ ४१ ॥

वैदिक कर्म के सङ्कल्प वाले गृहस्थ साधु हम लोगों का बड़ा दुःसह अप्रिय तैंने किया है सो हमने एक बखत सह लिया ॥ ४२ ॥

हे सन्तानमाशक ! तैंने जो हमारा फिर भी बुरा किया है हे मूर्ख ! तिस से तेरे को संसार मे घूमते घूमते कहीं ठिक नहीं मिलैगा ॥ ४३ ॥

श्रीशुकदेवजी बोले साधुओं के संमान्य श्रीनारदजी ने शाप को तथास्तु करके ग्रहण कर लिया जो कि समर्थ हो। भी सह लेना है इतनाही साधुका साधुपना है ॥ ४४ ॥

इति श्रीभागवत षष्ठस्कन्ध पांच मे अध्यायका

भाषानुवाद ब्रह्मचाऱ्यार्यंकृत

समाप्त ॥ ५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥



॥ षष्ठोऽध्यायः ॥

श्रीशुक उवाच ।

ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयम्भुवा ।
षष्टिं संजनयामास दुहितॄः पितृवत्सलाः ॥ १ ॥
दश धर्माय कायेन्दोर्द्विषट् त्रिणव दत्तवान् ।
भूताङ्गिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः ॥ २ ॥
नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु ।
यासां प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः ॥ ३ ॥
भानुर्लम्बा ककुब्जामिर्विश्वा साध्या मरुत्वती ।
वसुर्मुहूर्ता सङ्कल्पा धर्मपत्न्यः सुताञ्शृणु ॥ ४ ॥
भानोस्तु देव ऋषभ इन्द्रसेनस्ततो नृप ! ।
विद्योत आसील्लम्बायास्ततश्च स्तनयित्नवः ॥ ५ ॥
ककुभः सङ्कटस्तस्य कीकटस्तनयो यतः ।
भुवो दुर्गाणि जामेयः स्वर्गो नन्दिस्ततोऽभवत् ॥ ६ ॥
विश्वेदेवास्तु विश्वाया अप्रजांस्तान् प्रचक्षते ।
साध्यो गणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ॥ ७ ॥
मरुत्वांश्च जयन्तश्च मरुत्वत्यां बभूवतुः ।
जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठे दक्षेण सृष्टानां कन्याषष्ट्यां प्रकीर्तिताः ।
पृथग्वंशा यतो जातो विश्वरूपोऽदितेः सुतात् ॥१॥

नारदात्पुत्राणां नाशमाशङ्कमानो दुहितॄर्जनयामास ॥१॥

काय कश्यपाय द्विषट् द्विगुणाः षट् द्वादश याश्च ताः । त्रयोदशेत्यर्थः । इन्दोः सोमाय त्रिणव सप्तविंशतिं तार्क्ष्याय नामान्तरं प्राप्ताय कश्यपायैव अपरा अवशिष्टाश्चतस्रः ॥ २ ॥

सापत्यानामपत्यसहितानाम् । मे मत्तः शृणु । प्रसूतिप्रसवैः पुत्रपौत्रादिभिः ॥ ३ ॥ ४ ॥

ततो देवऋषभात् ॥ ५ ॥

यतः कीकटाद्भुवो दुर्गाणि दुर्गाभिमानिनो देवाः । जामेयो जामिजाः सुतः स्वर्गस्ततः स्वर्गान्नन्दिः पुत्रोऽभवत् ॥ ६ ॥

तत्सुतः । साध्यानां सुतः ॥ ७ ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नारदात्पुत्रनाशमाशङ्कमानो दक्षः पुत्रोत्पादनयत्नाद्विरतः तूष्णीमवस्थितो ब्रह्मणा परिसान्त्वितस्ततो दुहितॄरजनयदित्याह मुनिः । तत इति । प्राचेतसो दक्षः स्वयम्भुवानुनीतः अनुमानितोऽसिक्न्यां भार्यायां दुहितॄः पितृवत्सलाः षष्टिसङ्ख्याकाः सञ्जनयामास ॥१॥

तासां मध्ये दश कन्यकाः भानुलम्बाद्याख्या धर्मायादात् काय कश्यपाय द्विषट्कांश्च त्रयोदशेत्यर्थः । अदितिर्दितिर्दनुः काष्ठारिष्टासुरसेळामुनिक्रोधवशाताम्रासुरभीसरमातिमयः इति त्रयोदशाख्या अदात् । इन्दवे सोमाय त्रिणव त्रयाणां नवानां समाहारस्त्रिणवं सप्तविंशतिसङ्ख्याकाः कृत्तिकारोहिण्याद्याख्या नक्षत्ररूपा अदात् । भूतो रुद्रः भूताङ्गिरःकृशाश्वेभ्यः त्रिभ्यः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्वे द्वे कन्ये अदात्तत्र कृशाश्वस्य अरूपा अन्या च प्रसिद्धेति द्वे भार्ये अङ्गिरसस्तु स्वधा सती चेति द्वे कृशाश्वस्य स्वर्चिर्भार्ये चेति द्वे इति विवेकः । अपराश्चशिष्टाश्चतस्रो दुहितॄः तार्क्ष्याय तार्क्ष्यो नाम कश्चिद्देवः तस्मै प्रदादित्यर्थः ॥ २ ॥

अमीषां दक्षस्य दुहितॄणां सापत्यानां पुत्रपौत्रादिभिसहितानां नामधेयानि मे मत्तः शृणु ताः विशिनष्टि । यासां दक्षकन्यानां प्रसूतिप्रसवैः पुत्रपौत्रादिभिः त्रयो लोका आपूरिताः ॥ ३ ॥

तावद्धर्मस्य दश भार्या निर्दिशति । भानुरिति । भान्वादयः सङ्कल्पान्ताः दश धर्मस्य भार्याः तासां सुतान् क्रमेण शृणु इत्यर्थः ॥ ४ ॥

तत्रैकैकस्याः सन्तानं क्रमेणाह । भानोस्त्विति । भानोर्धर्मभार्यायां देवः ऋषभ इति द्वौ पुत्रौ तत्र ऋषभादिन्द्रसेनः हे नृप ! लम्बायां विद्योतः पुत्र आसीत्ततो विद्योतात्स्तनयित्नवः विद्युस्स्तनयित्नुशब्दौ तदभिमानिदेवतापरौ ॥ ५ ॥

ककुभः भार्यायाः कीकटस्तनयः यतः कीकटात्सङ्कटः तत्तनयोऽभवदित्यन्वयः । जामेयाः जाम्याः पुत्राः भूमेर्दुर्गाणि दुर्गाभिमानिनो देवाः ततः जामेयेभ्यः स्वर्गो नन्दिश्चाभवत् ॥ ६ ॥

विश्वायां धर्मस्य भार्यायां विश्वेदेवाख्याः पुत्रा बभूवुः । तान् विश्वेदेवानप्रजानपुत्रान् प्रचक्षते कथयन्ति । साध्यायां साध्यगणाः बभूवुः तत्सुतः साध्यगणसुतस्त्वर्थसिद्धोऽभूत् ॥ ७ ॥

मरुत्वत्यां तु मरुत्वान् जयन्तश्चेति द्वौ पुत्रौ बभूवतुः । तत्र जयन्तो वासुदेवस्य भगवतोंऽशभूतः यं जयन्तमुपेन्द्र इति विदुः तस्योपेन्द्रस्य भूयस्त्वादन्ते निर्देशः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सदसज्ज्ञानतारतम्यज्ञानं च भगवन्माहात्म्यज्ञानोपयोगीत्यतिप्रेत्य दक्षपरम्परासांक्रप्रसूतिप्रसवं प्रपञ्चयत्यस्मिन्नध्याये । ततः प्राचेतस इत्यादिना ॥ १ ॥

कालस्य नयने ज्ञापने युक्ताः योग्याः सप्तविंशतिं ददाविति शेषः अपराः षट्पञ्चाशत्सङ्ख्या ताभ्यः शिष्टाश्चतस्रः कन्यास्ताभ्योऽपि ददाविति शेषः ॥ २ ॥

सापत्यानामपत्यतदपत्यादिभिः सहितानां प्रसूतिप्रसवैः पुत्रपौत्रादिभिः भान्वादीनां सपुत्राणां नामधेयं मे मम सकाशादिति शेषः ॥ ३ ॥ ४ ॥

ततो वेदऋषभात् । ततः । इन्द्रसेनात् ॥ ५ ॥

यतः सङ्कटात् जामीपुत्राः जामेयाः । दुर्गाख्यगम्यस्थानाभिमानिनः ॥ ६ ॥

अप्रजान् पुत्ररहितान् । तत्सुतः साध्यगणसुतः ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

धर्माद्ययोऽप्येते भूर्यदक्षजामातृभ्योऽन्ये इति ज्ञेयाः ॥ १–६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षष्ठे दक्षस्य कन्यानां वंशाः पृथगुदीरिताः ।
यत्रादितेः सुतास्त्वष्टुर्विश्वरूपोऽप्यजायत ॥

पुत्रशोकेन निर्विण्णया: पुनर्ब्रह्मवचनाद्दाहदस्यं कृत्वा नारदो मयि वैरं न हास्यतीति मत्वा तस्मात् पुत्राणां नष्टा माशङ्कमानः कन्या एव जनयामासेत्याह । तत इति । असिक्न्यां भार्यायाम् ॥ १ ॥

काय कश्यपाय द्विषट् द्विगुणिताः षट् द्वादशेति न्यून सङ्ख्या व्यवच्छिन्ना तेन त्रयोदश इत्यर्थः । इन्दवे सोमाय त्रिणव त्रिगुणिता नव सप्तविंशतिं द्वे द्वे इति । भूताय द्वे अङ्गिरसे द्वे कृशाश्वाय द्वे । अपरा अवशिष्टाश्चतस्रः तार्क्ष्याय तार्क्ष्यनाम्ने कश्यपायैव ॥ २–५ ॥

यतः । कीकटात् सुतो दुर्गाणि दुर्गाभिमानिनो देवाः यामेयः याम्याः पुत्रः स्वर्गः ॥ ६ ॥

तत्सुतः । साध्यानां सुतः ॥ ७ ॥

यं विदुरित्यदित्याः पुत्र उपेन्द्र इव जयन्तोऽप्युपेन्द्रसंज्ञ इत्यर्थः ॥ ८–११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ दक्षकन्योद्भवेन्द्रादिपोषणं वक्तुं दक्षकन्यावंशानाह "षष्ठेनाध्यायेन । ततस्तदनन्तरमनुनीतः सान्त्वितः ॥ १ ॥

ता अतन्द्रिभिर्योजितवानित्याह । दुहितॄः धर्माय काय कश्यपाय द्विषड् द्विगुणाः षड् द्वादश यास्ताः त्रयोदश । इन्दोश्चन्द्रस्य त्रिणव सप्तविंशतिं भूतादिभ्यो द्वे द्वे । अपराः शेषाः चतस्रः तार्क्ष्य नामान्तरं गताय कश्यपायैव दत्तवान् ॥ २ ॥

मे । मत्तः प्रसूतिप्रसवैः पुत्रपौत्रादिभिः ॥ ३ ॥

ततो वेदऋषभतः ॥ ५ ॥

दुर्गाणि । तदभिमानिनो देवाः ॥ ६ ॥

तत् । तेषां साध्यानाम् ॥ ७ ॥ ८ ॥ ६ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले तिसके पीछे ब्रह्माजी के समझाने से दक्षप्रजापति ने असिक्नी भार्या में पिता के बड़े प्रेम करने वाली साठ पुत्री उत्पन्न कीनी ॥ १ ॥

तिन में से दश तो धर्मदेव को दी तेरा कन्या कश्यपजी को दी सत्ताईस चन्द्रमा को दीनी भूतको अङ्गिरा को और कृशाश्व को दो दो दी बाकी जो बची सो कश्यप ही को देदीनी ॥ २ ॥

अब पुत्र सन्तानों के सहित इन सब कन्याओं के नामों को तुम सुनो जिनके सन्तान के होने से तीनों लोक भरगये ॥ ३ ॥

भानु लम्बा ककुप जामि विश्वा साध्या मरुत्वती वसु मुहूर्ता सङ्कल्पा ये दश धर्म की नारी हैं अब इन के सन्तानों को सुनो ॥ ४

मौहूर्तिका देवगणा मुहूर्त्तायाश्च जज्ञिरे ।
ये वै फलं प्रयच्छन्ति भूतानां स्वस्वकालजम् ॥ ६ ॥
सङ्कल्पायाश्च सङ्कल्पः कामः सङ्कल्पजः स्मृतः ।
वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ॥ १० ॥
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः ।
द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥ ११ ॥
प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवः ।
ध्रुवस्य भार्या धरणिरसूत विविधाः पुरः ॥ १२ ॥
अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः ।
अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः ॥ १३ ॥
स्कन्दश्च कृत्तिकापुत्रो ये विशाखादयस्ततः ।
दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कला ॥ १४ ॥
वसोराङ्गिरसी पुत्रो विश्वकर्माकृतीपतिः ।
ततो मनुश्चाक्षुषोऽभूद्विश्वे साध्या मनोः सुताः ॥ १५ ॥
विभावसोरसूतोषा व्युष्टं रोचिषमातपम् ।
पञ्चयामोऽथ भूतानि येन जाग्रति कर्मसु ॥ १६ ॥

भाषाटीका

हे नृप! भानु के देव ऋषभ दो पुत्र भये उस के इन्द्रसेन भया लम्बा के विद्योत भया तिस के मेघ भये ॥ ५ ॥

ककुभ के सङ्कटभया उस का पुत्र कीकट भया तिस स पृथिवी के दुर्ग स्थानों के अभिमानी देवताभये जामि का पुत्र स्वर्ग भया तिस से नन्दी भया ॥ ६ ॥

विश्वा के विश्वेदेवा भये वे विश्वेदेवा अपुत्रही रहगये साध्या के साध्यगण भये उन साध्यों का पुत्र अर्थ सिद्धिनामक भये ॥ ७ ॥

मरुत्वती के मरुत्वान् जयन्त दो पुत्र भये जयन्त वासुदेव का अंश है जिस को उपेन्द्र कहते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वसोर्वंशस्य भूयस्त्वादन्ते निर्देशः । मे मत्तः ॥ १० ॥

अभिमतिर्नाम पत्नी तस्या हर्षादयः पुत्राः ॥ ११ ॥

सहश्चायुश्च पुरोजवश्च पुत्राः । पुरः पुराणि ॥ १२ ॥ १३ ॥

स्कन्दश्च कृत्तिकासुतोऽग्नेः पुत्रः षाण्मातुर इत्यग्निभूरिति च प्रसिद्धः । ततः स्कन्दात् ॥ १४ ॥

आकृतीपतिः शिल्पाचार्यः । ततो विश्वकर्मणश्चाक्षुषो मनुरासीत् ॥ १५ ॥

विभावसोरुषानाम भार्या । अथ आतपात्पञ्चयामो दिवसो जातः । अत एव रात्रिदिनयामा प्रदोषप्रत्यूषयोर्दिवसस्यावयवत्वात् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मुहूर्त्तायां भार्यायां मौहूर्त्तिका मुहूर्त्ताभिमानिनो देवगणा उद्बभूवुः । तान् विशिनष्टि । ये वै मौहूर्त्तिकाः स्वस्वमुहूर्त्तकालजं सुखदुःखादिरूपं फलं भूतानां देहिनां प्रयच्छन्त्यर्पयन्ति ॥ ६ ॥

सङ्कल्पायाः सङ्कल्पस्तनयोऽभूत् । कामस्तु सङ्कल्पाज्जात इति स्मृतः । वसोः पुत्रास्त्वष्टौ वसवः । तेषां नामानि मे मत्तः शृणु ॥ १० ॥

द्रोणादयो विभावस्वन्ता अष्टौ वसवः । तत्र द्रोणादीनां सन्तानमाह क्रमेण । द्रोणस्येति । द्रोणस्याभिमतिः पत्नी तस्या हर्षादयस्तनया बभूवुः ॥ ११ ॥

प्राणस्य तु ऊर्जस्वती भार्या तस्याः पुत्रा आयुःसहपुरोजवाः ध्रुवस्य धरणिर्भार्या सा च विविधाः पुरः पुराणि पुराभिमानिनो देवानसूत ॥ १२ ॥

अर्कस्य तु भार्या वासना तस्यास्तर्षादयः पुत्राः । अग्नेस्तु भार्या वसोर्धारा तस्यास्तनयास्तु द्रविणकादयः ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्कन्दः कुमारस्त्वग्नेरेव कृत्तिकासु जातः षाण्मातुर इत्यग्निभूरिति च प्रसिद्धेः । ये विशाखादयस्ते ततः स्कन्दाज्जाताः दोषस्य तु भार्या शर्वरी तस्याः पुत्रः शिशुमारः । स च हरेः कलांशभूतः ॥ १४ ॥

वसोराङ्गिरसी भार्या तस्याः पुत्रो विश्वकर्मा स च कृतीपतिः शिल्पाचार्यः ततो विश्वकर्मणः चाक्षुषाख्यो मनुरभून्मनोश्चाक्षुषस्य विश्वे साध्याः सुता बभूवुः ॥ १५ ॥

विभावसोर्भार्या उषा सा च व्युष्टं रोचिषं चातपं च पुत्रानसूत प्रसूतवती अथातपात्पञ्चयामः दिवसः । अत एव रात्रिस्त्रियामा प्रदोषप्रत्यूषयोः पूर्वोत्तरदिवसावयवत्वात्पञ्चयामशब्दः तदभिमानिदेवपरः । तं विशिनष्टि । येन पञ्चयामेन भूतानि प्राणिनः कर्मसु स्वस्वव्यापारेषु जाग्रति जागरूकाणि भवन्तीत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मौहूर्तिकाः मुहूर्ताभिमानिनः । यथाफलं यथोचितं फलं स्वस्वमुहूर्तजम् ॥ ९ ॥ १० ॥

अभिमतिः अभिमानदेवता हर्षादयः हर्षाद्यन्तःकरणदेवताः ॥ ११ ॥

सहआयुःप्रभृतयः पुत्राः । पुरः पुराभिमानिदेवताः ॥ १२ ॥

वसोः पुत्रस्याग्नेर्भार्या धारा स्वाहापरपर्याया द्रविणकादयस्तत्पुत्राः ॥ १३ ॥

स्कन्दस्याग्निपुत्रः धात्रीत्वेन कृत्तिकापुत्रः उपचारमात्रमेतत् मुख्यतस्तु सदाशिवपुत्रः ये विशाखादयस्ते ततः स्कन्दाज्जाताः । दोषभार्या शर्वरी तत्पुत्रः शिशुमारः । कोऽसाविति तत्राह । हरेरिति ॥ १४ ॥

वसोर्भार्याङ्गिरसी तत्पुत्रः विश्वकर्मा कृतिपतिः कृतीनां शिल्पानाम् इरिज्ञा तस्याः पतिः शिल्पिनां कुलाचार्य इत्यर्थः । कृत्याः देव्याः पतिरिति वा ततो विश्वकर्मणः ॥ १५ ॥

अथ पञ्चयामो दिवसाभिमानी आतपाज्जात इति शेषः । येन पञ्चयामेन ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वसोर्वंशस्य भूयस्त्वादन्ते निर्देशः मे मतः ॥ १० ॥

अभिमतिर्नाम पत्नी तस्या हर्षादयः ॥ ११–१४ ॥

ततो मनुरित्यर्द्धकम् । अयं ध्रुववंशेऽपि पूर्वं जातोऽपि दक्षवशिष्ठादिवत् पुनरत्र जात इति गम्यते ॥ १५–४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ऊर्जस्वतीति सप्तम्यर्थे प्रथमा ॥ १२ ॥

कृत्तिकास्वाग्नेर्भार्या ॥ १३ ॥ १४ ॥

आकृत्याः पतिः ततो मनुश्चाक्षुष इति ध्रुववंशजोऽप्यसौ दक्षवशिष्ठादिवदत्रापि जात इति गम्यते ॥ १५ ॥

अथ आतपात् पञ्चयामः । प्रदोषप्रत्यूषयोर्दिवसावयवत्वात् पञ्चयामो दिवसः । अत एव रात्रिस्त्रियामा ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मे मतः ॥ १० ॥

अभिमतिः पत्नी तस्याः ॥ ११ ॥

प्राणस्योर्जस्वती भार्या सहआदयः सुताश्च ॥ १२ १३ ॥

कृत्तिकापुत्रः कृत्तिकासु जातः स्कन्दश्चाग्नेः पुत्रः ततः स्कन्दात् दोषस्य शर्वरीपुत्रः शर्वर्यां जातः शिशुमारः पुत्रः ॥१४॥

वसोराङ्गिरसीपुत्रः आङ्गिरस्यां जातो विश्वकर्मा स च कृतीपतिः शिल्पाचार्यः ततो विश्वकर्मण्याश्चाक्षुषो मनुरभूत मनोर्विश्वे साध्याः पुत्राः अभूवन् ॥ १५ ॥

विभावसोः सकाशादुषा व्युष्टादीन् त्रीनसूत तत्रातपात् पञ्चयामो दिवसो जातः । प्रदोषप्रत्यूषयोः रात्रिगतयोरपि स्नानादिक्रियार्थं दिवसे गृहीतत्वादतो रात्रिस्त्रियामेति वस्तुतस्तु "यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे" इति मुख्यो व्यवहारः प्राक् प्रदर्शित एव ॥ १६ ॥

भाषा टीका ।

मुहूर्तों के मौहूर्तिक देवगण भये जोकि सब भूतों को अपने अपने काम के फल को देते हैं ॥ ९ ॥

सङ्कल्पा के सङ्कल्प भया सङ्कल्प मे से काम भया वसु के पुत्र आठ वसु भये अब उन वसुओं के नाम मेरे से सुनो ॥ १० ॥

द्रोण प्राण ध्रुव अर्क अग्नि दोष वसु विभावसु । द्रोण की भार्या अभिमति के हर्ष शोक भय आदिक भये ॥ ११ ॥

प्राणकी ऊर्जस्वती भार्या भई उसके सह आयु पुरो जव तीन पुत्र भये ध्रुवकी भार्या धरणी भई उसने नानापुराभिमानी देवतों को पैदाकिया ॥ १२ ॥

अर्क की भार्या वासना भई उस के पुत्र तर्षादिक भये अग्नि की भार्या वसुधारा भई उस के पुत्र द्रविणकादिक भये ॥ १३ ॥

अग्नि से कृतिका का पुत्र स्कन्द उस के विशाखादि पुत्र भये । दोष की भार्या शर्वरी है उस का पुत्र शिशुमार है सो श्रीहरिका अंश है ॥ १४ ॥

वसु का आङ्गिरसी मे विश्वकर्मा पुत्र भया वसु की भार्या आकृती है उस से चाक्षुष मनु भया मनु के पुत्र विश्वे और साध्य हैं ॥ १५ ॥

सरूपासूत भूतस्य भार्या रुद्रांश्च कोटिशः ।
रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः ॥ १७ ॥
अजैकपादहिर्बुध्न्यो बहुरूपो महानिति ।
रुद्रस्य पार्षदाश्चान्ये घोरा भूतविनायकाः ॥ १८ ॥
प्रजापतेरङ्गिरसः स्वधा पत्नी पितॄनथ ।
अथर्वाङ्गिरसं वेदं पुत्रत्वे चाकरोत् सती ॥ १९ ॥
कृशाश्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत् ।
धिषणायां वेदशिरो देवलं वयुनं मनुम् ॥ २० ॥
तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनी इति ।
पतङ्ग्यसूत पतगान् यामिनी शलभानथ ॥ २१ ॥
सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाहनम् ।
सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः ॥ २२ ॥
कृत्तिकादीनि नक्षत्राणीन्दोः पत्न्यस्तु भारत ! ।
दक्षशापात् सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः ॥ २३ ॥
पुनः प्रसाद्य तं सोमः कला लेभे क्षये दिताः ।
शृणु नामानि लोकानां मातॄणां शङ्कराणि च ॥ २४ ॥

भाषा टीका

विभावसुकी भार्या ऊषा भई उसने व्युष्ट रोचिष आतप-तीन पुत्रो को पैदा किया । आतप से पञ्चयामदिवसाभिमानी देवता भया जिस से सब प्राणि कामों मे जाग्रत रहते हैं ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भूतस्य द्वे भार्ये तयोर्वंशमाह । सरूपेति ॥ १७ ॥

महानित्येवमेकादशरूपस्य रुद्रस्य पार्षदाः प्रेतादयोऽन्येऽन्यस्यां जाताः ॥ १८ ॥

आङ्गिरसः स्वधा सती चेति द्वे भार्ये तयोर्वंशमाह । प्रजापतेरिति । स्वधा नाम पत्नी पितॄन् पुत्रत्वेऽकरोत् । अथ सती चाथर्वाङ्गिरसं नाम वेदम् ॥ १९ ॥

कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये तयोर्वंशमाह । कृशाश्व इति ॥ २० ॥ २१ ॥

सुपर्णा विनता अनूरुमरुणम् ॥ २२ ॥

रोहिण्यामेव प्रेमातिशयेनान्यासामुपेक्षणात्कुपितस्य दक्षस्य शापाद्यक्ष्मग्रहार्दितः क्षयरोगपीडितः संस्तास्वनपत्योऽभूत् ॥ २३ ॥

तं दक्षं प्रसाद्य केवलं कला एव लेभे न त्वपत्यानि । कथम्भूताः क्षये कृष्णपक्षे दिताः खण्डिताः सतीः पाठान्तरे क्षये सति पुनरर्धिताश्तेनैव वर्धिताः सतीः ॥ ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं धर्मभार्याणां सन्तानमभिधायाथ कश्यपसोमयोः सन्तानं भूयस्त्वाद्वक्ष्यमाणो भूतस्य तावत्सन्तानमाह । सरूपेति चतुर्भिः । भूतस्य शम्भोर्भार्या सरूपा सा च रुद्रान् कोटिशः असूत प्रसूतवती । तत्र प्रधानानेकादश रुद्रान् गणनायकानाह । रैवत इति सार्धेन । यद्वा । रैवतादिरूपैरेकादशधाभिन्नस्य रुद्रस्य पारिषदा घोररूपा प्रेतादिरूपेणानेकविधा अन्येऽन्यस्यां भार्यायां च बभूवुरित्यन्वयः ॥ १७ ॥ १८ ॥

अथाङ्गिरसः सन्तानमाह । प्रजापतेरिति । आङ्गिरसः प्रजापतेः पत्नी स्वधा सती च । तत्र स्वधा पितॄन् सती त्वथर्वाङ्गिरसं नाम वेदं वेदाभिमानिनं पुरुषं पुत्रत्वेनाकरोत् ॥ १९ ॥

अथ कृशाश्वसन्तानमाह । कृशाश्वः अर्चिषि भार्यायां धूम्रकेशं पुत्रमजीजनत् । धिषणायां पत्न्यां तु वेदशिरसं देवलं वयुनं मनुं चेति पुत्रानजीजनत् ॥ २० ॥

अथ तार्क्ष्यस्य सन्तानमाह । तार्क्ष्यस्य विनताद्याश्चतस्रो भार्याः । तत्र पतङ्गी पतगान् पक्षिणः असूत । यामिनी तु शलभानसूत ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सुपर्णेति । विनताया एव नामान्तरम् । सा तु साक्षाद्यज्ञेशस्य विष्णोर्वाहनभूतं गरुडं सूर्यस्य सूतमनूरुमरुणं चासूत कद्रूस्त्वनेकशो नागान् सर्पानसूत ॥ २२ ॥

अथ सोमस्य पत्नीराह । इन्दोः सोमस्य पत्न्यस्तु कृत्तिकादीनि नक्षत्राणि सप्तविंशतिः हे भारत ! स च इन्दुः दक्षशापात् रोहिण्यामेव प्रेमातिशयेनान्यासूपेक्षारूपाभिमितादक्षस्य शापाद्यक्ष्मग्रहेण राजयक्ष्मरोगेण पीडितः सन् तासु कृत्तिकादिष्वनपत्योऽभूत् ॥ २३ ॥

तं दक्षं पुनः प्रसाद्य प्रसन्नं कृत्वा केवलं कला एव लेभे न त्वपत्यानि । कथंभूताः क्षये कृष्णपक्षे आर्दिताः खण्डिताः क्षयेधिता इति पाठे क्षये सति पुनरेधिता वर्द्धिताः । अथ लोकमातॄणां कश्यपपत्नीनां लोकस्य शं सुखं कुर्वन्तीति तथा तानि नामानि शृणु लोकानां मातृत्वे हेतुः इदं जगद्यत्प्रसूतं याभिः कश्यपपत्नीभिः प्रसूतम् । ता निर्दिशति । अदितिरिति । ॥ २४ ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भूतस्य सन्ततिमाह । भूतस्य भार्या नाम्ना भूता भार्या एकादश रुद्रानसूत तस्यान्या सुरूपा भार्या कोटिशो रुद्रानसूत तथा रुद्राणां पार्षदानसूत । तथा प्रेतान् विनायकांश्च प्रथमरुद्ररूपाणां नामान्याह । रैवत इति ॥ १७ ॥ १८ ॥

आङ्गिरसः प्रजापतेः नाम्ना स्वधा पत्नी पितॄनसूत । अथ तस्यैवान्या भार्या अथर्वाङ्गिरसं वेदं पुत्रत्वेऽकरोत् ॥ १९ ॥

वेदशिरा इति कृशाश्वस्य नामान्तरम् ॥ २० ॥

पुत्राणां जातिभेदसूचनाय यामिनी इति सन्धिकार्याभावः ।२१।

अनूरुम् । ऊरुरहितमरुणमित्यर्थः ॥ २२ ॥

यक्ष्मग्रहार्दितः क्षयरोगार्तः । कीदृश्यः कलाः कृष्णपक्षे क्षयाः क्षीणाः शुक्लपक्षे एधिताः वर्धिताः वृद्ध्यभावः छान्दसः । अथ एधवृद्धाविति धातोः । अथवा इधिवीप्ताविति धातुः निष्ठायां नुमो लोपे इधिता इति रूपं सिद्ध्यति । तस्य गुणः । शङ्कराणि सुखकराणि ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भूतस्य द्वे भार्ये तयोर्मध्ये सरूपा ॥ १७ ॥

रैवताद्य एकादश रुद्राः महानिति विशेषणम् । अन्ये रुद्रस्य पार्षदा अन्यस्यां भार्यायाम् ॥ १८ ॥

आङ्गिरसः स्वधा सती चेति द्वे भार्ये तयोर्मध्ये स्वधा ॥ १९ ॥

कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये तयोर्मध्ये अर्चिषि ॥ २० ॥

तार्क्ष्यस्य तार्क्ष्यनाम्नः कश्यपस्य ॥ २१ ॥

सुपर्णा विनता अनूरुमरुणम् ॥ २२ ॥

रोहिण्यामेव प्रीत्यतिशयेनान्यासामुपेक्षणात् कुपितस्य दक्षस्य शापात् । यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् तास्वनपत्योऽभूत् ॥ २३ ॥

कला एव लेभे न त्वपत्यानि ! कीदृशीः क्षये कृष्णपक्षे दिताः खण्डिताः सतीः । क्षयेधिता इति पाठे क्षये सति पुनरेधितास्तेनैव वर्द्धिताः सतीः ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

धर्मपत्नीवंशमुक्त्वा भूतपत्नीवंशमाह । सरूपेति । तत्र मूलभूता रैवताद्यः सप्त । अजैकपादष्टमः अहिर्बुध्न्यो नवमः बहुरूपो दशमः एकादशो महानित्येकादश रुद्राः । अन्ये अन्यस्यां जाताः रुद्रस्य पार्षदाः ॥ १७ ॥ १८ ॥

आङ्गिरसो भार्यावंशमाह । स्वधा पितॄन् पुत्रत्वे सती च अथर्वाङ्गिरसं नाम वेदं पुत्रत्वे अकरोत् ॥ १९ ॥

कृशाश्वभार्यासन्ततिमाह । कृशाश्व इति ॥ २० ॥

तार्क्ष्यपत्नीवंशमाह । तार्क्ष्यस्येत्यादिना ॥ २१ ॥

सुपर्णा विनता सूर्यसूतम् । अपक्वाण्डभेदनेन अनूरुमरुणं तदनन्तरं बहुकालपक्वाण्डभेदनेन कनिष्ठं साक्षाद्यज्ञेशवाहनं गरुडं चासूतोत्पादितवती ॥ २२ ॥

चन्द्रपत्नीसन्तत्यभावमाह । कृत्तिकादीनीति । स चन्द्रः सर्वासु समो भवेति दक्षेणोक्तोऽपि रोहिण्यामत्यन्ततः प्रीतिमानभूत्तन्निमित्ताद्दक्षशापात् यक्ष्मग्रहार्दितः क्षयरोगपीडितः तासु अनपत्योऽभूत् ॥ २३ ॥

क्षयेधिताः क्षये सति एधिताः तेनैव वर्द्धिताः सतीः कलाः लेभे अथ कश्यपपत्नीनां शङ्कराणि कल्याणकराणि नामानि शृणु । यतः याभ्यः इदं जगत् प्रसूतमुत्पन्नम् ॥ २४ ॥ २५ ॥

भाषा टीका ।

भूत की भार्या सरूपा ने कोटिन रुद्रों को पैदा किया । रैवत अज भव भीम वाम उग्र वृषाकपि ॥ १७ ॥

अजएकपाद अहिर्बुध्न्य बहुरूप महान् एग्यारह रुद्र हैं रुद्रजी के पार्षद और भी प्रेत भूत विनायक हैं ॥ १८ ॥

प्रजापति अंगिरा की स्वधा पत्नी है उस ने पितरों को पैदा किया अथर्वांगिरस वेद को उनकी सती ने पैदा किया ॥ १९ ॥

कृशाश्व ने अर्चि भार्या में धूम्रकेश को पैदा किया धिषणा भार्या ने वेदशिरा देवल वयुन मनु इन पुत्रों को पैदा किया ॥ २० ॥

तार्क्ष्य की भार्या विनता कद्रू पतङ्गी यामिनी ए चार भई तिनों में पतङ्गी ने पतिङ्गान को पैदा किया यामिनी ने शलभों को पैदा किया ॥ २१ ॥

सुपर्णा ने गरुडजीको पैदा किया जोकि साक्षात् विष्णु भगवान् के वाहन हैं । और सूर्य के सारथि अनुरु को भी सुपर्णा ने पैदा किया । कद्रू ने अनेक नागों को पैदा किया ॥ २२ ॥

हे भारत ! चन्द्रमा की पत्नी कृत्तिकादिक हैं सो चन्द्रमा की रोहिणी में आसक्त होने से दक्ष ने शाप दिया तब

अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ।
अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ॥ २५ ॥
मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः ।
तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः ॥ २६ ॥
सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप ! ।
ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः ॥ २७ ॥
दन्दशूकादयः सर्पा राजन् ! क्रोधवशात्मजाः ।
इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः ॥ २८ ॥
अरिष्टायाश्च गन्धर्वाः काष्ठाया द्विशफेतराः ।
सुता दनोरेकषष्टिस्तेषां प्राधानिकाञ्छृणु ॥ २९ ॥
द्विमूर्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः ।
अयोमुखः शङ्कुशिराः स्वर्भानुः कपिलोऽरुणः ॥ ३० ॥
पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः ।
धूम्रकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः ॥ ३१
स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल ।
वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ॥ ३२ ॥

भाषा टीका।

चन्द्रमा को क्षयरोग की पीडा भई तिस से उन नक्षत्रों मे कोई संतान नहीं भये ॥ २३ ॥

फिर चन्द्रमा ने दक्ष को प्रसन्न किया तब जो कला नष्ट होते थे सो लब्ध होगये । अब लोकों के माताओं के नामों को तुम सुनो जो कि मनुष्यों के कल्याण करने वाले हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अल्पत्वेन सुगमत्वाद्यथायथं व्युत्क्रमेण तासां वंशानाह। तिमेरित्यादिना ॥ २६ ॥ २७ ॥

सौरसाः सुरसायाः पुत्राः ॥ २८ ॥

प्राधानिकान् मुख्यानष्टादश शृणु ॥ २९—३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अल्पत्वेन सुगमत्वाद्यथायथं व्युत्क्रमेण तासां वंशानाह। तिमेरिति। तिमेः कश्यपस्य भार्याया यादोगणाः आसन् । सरमायाः सुताः श्वापदाः श्वानः व्याघ्रमार्जारादयश्चासन् । सुरभेः पुत्रास्तु महिषा गावश्चान्ये द्विशफाश्चासन् । हे नृप ! ताम्रायाश्च पुत्राः श्येनाः गृध्राः आदिशब्देन श्येनादिसदृशा वाजिनः पक्षिणो विवक्षिताः। मुनेः सुतास्त्वप्सरसां गणाः हे राजन् ! क्रोधवशाया आत्मजास्तु दन्दशूकादयः दंष्ट्रनख-भावादयः सर्पा आसन् । इलायास्तु सर्वे भूरुहाः आत्मजाः । सौरसाः सुरसायाः अपत्यानि सर्वे यातुधानाः। अरिष्टाया-स्त्वात्मजा गन्धर्वाः। काष्ठायास्तु द्विशफेतराः एकशफाः अश्व-गर्दभाः बभूवुः । दनोः सुतास्त्वेकषष्टिस्तेषां मध्ये प्राधानिका-नष्टादश पुत्रान् शृणु ॥ २८ ॥ २९ ॥

द्विमूर्धा च शम्बरश्च अरिष्टश्च हयग्रीवश्च विभावसुश्च अयोमुखश्च शङ्कुशिराश्च स्वर्भानुश्च कपिलश्चारुणश्च पुलोमा च वृषपर्वा च एकचक्रश्च सुतापनश्च धूम्रकेशश्च विरूपाक्षश्च विप्रचित्तिश्च दुर्जयश्चेतेऽष्टादश ॥ ३० ॥ ३१ ॥

एषां मध्ये स्वर्भानुः नमुचेः कन्यां दुहितरं सुप्रभामुवाह अयमेव स्वर्भानुरन्यो दनुजः न तु राहुः तस्योत्पत्तेर्वक्ष्यमा-णत्वात्। वृषपर्वणस्तु कन्यां शर्मिष्ठां नाहुषो नहुषात्मजो बलवान् ययाती राजोवाह ॥ ३२ ॥

वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः ।
उपदानवी हयशिरा पुलोमा कालका तथा ॥ ३३ ॥
उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप ! ।
पुलोमां कालकां च द्वे वैश्वानरसुते तु कः ॥ ३४ ॥
उपयेमेऽथ भगवान् कश्यपो ब्रह्मचोदितः ।
पौलोमाः कालकेयाश्च दानवा युद्धशालिनः ॥ ३५ ॥
तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता ।
जघान स्वर्गतो राजन्नेक इन्द्रप्रियङ्करः ॥ ३६ ॥
विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् ।
राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागतः ॥ ३७ ॥
अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः ।
यत्र नारायणो देवः स्वांशेनावतरद्विभुः ॥ ३८ ॥
विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः ।
धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ॥ ३९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्रापि ।मिथो वैलक्षण्यद्योतनाय सन्धिकार्याभावः ॥ २५ ॥

सूचीकटाहन्यायेन प्रातिलोम्येन सन्ततिमाह । तिमेरिति । ॥ २६ ॥ २७ ॥

भूरुहाः वृक्षाः । सुरसायाः पुत्राः सौरसाः ॥ २८ ॥

द्विशफेतराः एकशफाः । प्राधानिकं प्रधानविषयसङ्ख्यानम् ॥ २९ ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सूचीकटाहक्रमेण तासां वंशानाह । तिमिरित्यादिना । ॥ २६—३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तासां सन्ततीर्वर्णयति । तिमेरित्यादिना । यादोगणाः जलचरगणाः ॥ २६ ॥ २७ ॥

सौरसाः सुरसासुताः ॥ २८ ॥

प्राधानिकान् मुख्यान् शृणु ॥ २९ ॥ ३१ ॥

प्राधानिकानुक्त्वा तन्मध्ये कयाश्चिद्वंशानाह। स्वर्भानोरिति ॥३२॥

भाषा टीका ।

जो कि कश्यपजी की पत्नी हैं जिनसे यह सब जगत् पैदा भया है अदिति दिति दनु काष्ठा अरिष्टा सुरसा इला ॥ २५॥

मुनि क्रोधवशा ताम्रा सुरभी सरमा तिमि तिमि से यादोगण भये सरमा के सुतश्वापद भये ॥ २६ ॥

सुरभी के गऊभैंस भये हे राजन् ! और भी जो दो खुर वाले हैं वेभी सुरभी के भये । ताम्राके श्येन गृध्र आदि भये मुनीके अप्सरा गण भये ॥ २७ ॥

हे राजन् दन्द शूकादिक क्रोध वशाके पुत्र हैं इलाके सब वृक्षादिक भये सुरसा के सब यातुधान गणभये ॥ २८ ॥

अरिष्टा के गन्धर्व भये काष्ठा से एक खुर वाले जीव भये दनु के सुत एक षठि हैं तिनों मे प्रधानों को सुनो॥ ॥ २९ ॥

द्विमूर्धा शंबर अरिष्ट हय ग्रीव विभावसु अयोमुख शंकुशिरा स्वर्भानुः कपिल अरुण ॥ ३० ॥

पुलोमा वृष पर्वा एक चक्र अनुतापन धूम्रकेश विरूपाक्ष विप्रचित्ति दुर्जय ये हैं ॥ ३१ ॥

स्वर्भानु की सुप्रा नामकी कन्या को नमुची ने विवाहा वृष पर्वा की कन्या शर्मिष्ठा से नहुष के पुत्र ययाति ने विवाह किया ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वैश्वानरो दनोः पुत्रस्तस्य सुताः ॥ ३३ ॥

कः । प्रजापतिः कश्यपः उपयेम इत्यन्वयः ॥ ३४ ॥

विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुम् ।
मिथुनं च महाभागा यमं देवं यमीं तथा ।
सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दानवीपरिणयने हेतुः । ब्रह्मणा चोदित इति ॥ ३५ ॥

तयोः षष्टिसहस्राणि निवातकवचाः पुत्रा जातास्तांश्च स्वर्गतः संस्ते पितामहोऽर्जुनो जघान ॥ ३६ ॥

राहुर्ज्येष्ठो यस्य ॥ ३७—३६ ॥

असूयताजनयत् । भुवि वर्तमाना ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपदानवीहयशिरापुलोमाकालिकाख्याः ॥ ३३ ॥

तासां मध्ये उपदानवीं हिरण्याक्ष उदवहत् हयशिरां तु क्रतुः प्रजापतिः वैश्वानरस्य सुते पुलोमाकालकाख्ये तु कः कश्यपः उपयेमे दानवीपरिणयने हेतुः । ब्रह्मणा चोदित इति । तयोः पुलोमाकालकयोः षष्टिसहस्राणि पौलोमास्तषामेव निवातकवचा इति नामान्तरम् । तथा कालकेयाश्च युद्धशालिनो दानवा जाताः तांश्च दानवान् यज्ञघ्नान् ते तव पितुः पितार्जुनः कदाचिदेकः स्वर्लोकं गतः इन्द्रस्य प्रियङ्करो भूत्वा जघान हतवान् ॥ ३४—३६ ॥

विप्रचित्तिः सिंहिकायां भार्यायां शतं चैकमेकशतं दानवानजीजनत् तत्रैकशतमध्ये राहुर्ज्येष्ठः इतरे शतं तु केतवः राहुज्येष्ठमिति पाठे राहुर्ज्येष्ठो यस्य तत्केतुशतमित्यर्थः । कोऽसौ राहुर्यं ज्येष्ठमजीजनत्तत्राह । यो ग्रहत्वमुपागतः प्राप्तः स्वयं दानवाधमोऽपि भगवदनुग्रहवशात् ग्रहत्वमुपागत इत्युक्तं पञ्चमे ॥ ३७ ॥

अथ तिथ्यादीनां वंशश्रवणानन्तरमतस्तासां वंशस्य श्रुतत्वाददितेर्वंशः श्रूयताम् । मया कथ्यमान इति शेषः । दितेर्वंशस्त्वष्टादशाध्याये वक्ष्यते । अदितेर्वंशं विशिनष्टि । यत्र वंशे विभुर्नारायणो देवः स्वांशेनावतरत् ॥ ३८ ॥

विवस्वदादयः पुत्रास्तत्रोरुक्रमो भगवान् साक्षादवतीर्णः ॥ ३९ ॥

तत्र विवस्वतः भार्या संज्ञाख्या श्राद्धदेवं यमं यमीं चेति मिथुनं च यमयमीरूपं च मिथुनमसूयत असूत । हे महाभाग! सैव संज्ञैव वडवा भूत्वा भुवि वर्तमाना नासत्यावश्विनौ सुषुवे ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ते तव पितुरभिमन्योः पितार्जुनः ॥ ३६—३९ ॥
भुवि वर्तमानेति शेषः । नाम्ना वडवा ॥ ४०—४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वैश्वानरो दनोः पुत्रस्तस्य सुताः ॥ ३३ ॥ ३४ ॥

दानवीपरिणये हेतुर्ब्रह्मणा चोदित इति ॥ ३५ ॥

तयोः षष्टिसहस्राणि निवातकवचा जाताः । तांश्च स्वर्गतः सन् तव पितामहोऽर्जुनो जघान ॥ ३६-३९ ॥

नासत्यावश्विनीकुमारौ ॥ ४० ॥ ४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

या वैश्वानरस्य दनुपुत्रस्य सुतास्ताः श्रूयतामिति शेषः ॥ ३३ ॥ ॥ ३४ ॥

दनुपुत्रकन्यास्वीकारे कारणमाह । ब्रह्मणोदित इति । तयोः पुलोमाकालिकयोः षष्टिसहस्राणि यज्ञघ्ना असुरा जाता इति शेषः । ते च पौलोमाः कालिकेयाश्च दनुर्दितिश्चेत्याहादानवाः । तांश्च ते पितुरभिमन्योः पिता अर्जुनः जघान । इन्द्रस्य गुरोः शिक्षासमाप्तौ दानववधेन प्रियङ्करः । असूयत अजनयत् विवस्वद्भयात् वडवा भूत्वा तत एवाश्वरूपिणः साकाशात् नासत्यौ सुषुवे ॥ ३५—४० ॥

भाषा टीका ।

वैश्वानर जो दनु का पुत्र है जिसके चार पुत्री उत्तम रूपवाली भई उपदानवी हय शिरा पुलोमा कालका ये चार हैं ॥३३॥

उपदानवी को हिरण्याक्ष ने व्याहा क्रतु ने हय शिरा को व्याहा पुलोमा कालका दोनो वैश्वानर की पुत्रियों को ब्रह्मा जी के कहने से भगवान कश्यप जी ने विवाह किया पुलोमा कालका के पुत्र पौलोम कालकेय बडे युद्धशाली भये सो साठ हजार हैं यज्ञों के नाश करने वाले हैं हे राजन् उनों को तुमारे पिता ने स्वर्ग मे जाकर इन्द्र के प्रीति के वास्ते मारा है ॥ ३४ ॥ ३५ ॥ ३६ ॥

सिंहिका मे विप्रचित्ति ने एकसौ एक पुत्र उत्पन्न किये तिन मे सौ तो केतु भये जेष्ठ राहु भया जोकि ग्रह होगया है ॥ ३७ ॥

अब क्रमसे अदिति के वंश को सुनो जहां पर नारायण विभु अंश सहित अवतीर्ण भये हैं ॥ ३८ ॥

विवस्वान् अर्यमा पूषा त्वष्टा सविता भग धाता विधाता वरुण मित्र शक्र उरुक्रम ए अदिति के पुत्र भये ॥ ३९ ॥

विवस्वान् से संज्ञाने श्राद्धदेव मनुको पैदा किया और उस महाभागी ने यम और यमुना दोनों को उत्पन्न किया उसीने फिर वडवा होकर अश्विनीकुमारों को पृथिवी मे पैदा किया ॥ ४० ॥

छाया शनैश्चरं लेभे सावर्णिं च मनुं ततः ।
कन्यां च तपतीं या वै वव्रे सम्वरणं पतिम् ॥ ४१ ॥
अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः ।
यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥ ४२ ॥
पूषानपत्यः पिष्टादो भग्नदन्तोऽभवत् पुरा ।
योऽसौ दक्षाय कुपितं जहास विवृतद्विजः ॥ ४३ ॥
त्वष्टुर्दैत्यानुजा भार्या रचना नाम कन्यका ।
सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान् ॥ ४४ ॥
तं वव्रिरे सुरगणा दौहित्रं द्विषतामपि ।
विमतेन परित्यक्ता गुरुणाङ्गिरसेन यत् ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां संहितायां
वैयासिक्यां प्रियव्रतवंशानुकीर्तनं नाम
षष्ठोऽध्यायः ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततो विवस्वतः ॥ ४१ ॥

चर्षणयः कृताकृतज्ञानवन्तः पश्यतिकर्मत्वेन नियवशा-नुक्तेः । यत्र येषु आत्मानुसन्धानविशेषेण मानुषीजातिश्चोप-कल्पिता तथाच श्रुतिः "पुरुषत्वेचाविस्तरामात्मा" इति ॥ ४२ ॥

कुपितं हरमितिशेषः । विवृतद्विजः प्रकटितदन्तः सन् ॥ ४३ ॥ ४४ ॥

यद्यदा विमतेनावज्ञातेन बृहस्पतिना परित्यक्तास्तदा द्विषतां शत्रूणां भागिनेयमपि विश्वरूपं पौरोहित्ये वृतवन्तः ॥४५॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा छाया भूत्वा शनैश्चरं सावर्ण्याख्यं मनुश्रेष्ठं च लेभे सुषुवे । तथा तपतीं तपत्याख्यां च लेभे । या कन्या संवरणं पतिं वव्रे ॥ ४१ ॥

अथार्यम्णो वंशमाह । अर्यम्णः पत्नी मातृकाख्या तयोरर्यम-मातृकयोः कर्त्तरि षष्ठी ताभ्यामित्यर्थः । चर्षणयः कर्मशीलाः जनाः कृता उत्पादिताः । के ते चर्षणयस्तत्राह । यत्र येषु मानुषी जातिर्ब्रह्मणोपकल्पिता मानुषजात्याश्रयाहि सदा व्यापा-रिणो भवन्तीत्यतस्ते चर्षणयः कृषेरौणादिक इनिप्रत्ययः ॥४२॥

पूषात्वनपत्यः अपुत्रः पूर्वं भग्नदन्तः पिष्टादः पिष्टभुगभवत् भग्नदन्तत्वे हेतुं वदन्तं विशिनष्टि । योऽसौ पूषा दक्षाय कुपितं रुद्रं विवृतद्विजः प्रकटितदन्तः सन् जहास प्रहसितवान् । चतु-र्थे चैतद्वृत्तान्तः अभिव्यक्तः ॥ ४३ ॥

त्वष्टुर्दैत्यानामनुजा रचना नाम कन्यका भार्या तयोस्त्वष्टृरचनयोः संनिवेशात् समावेशाद्विश्वरूपो वीर्यवान् जज्ञे जातः ॥ ४४ ॥

तं विश्वरूपं द्विषतां दैत्यानां स्वकीयं भागिनेयमपि देवाः यद्यदा विमतेनावज्ञानेनाङ्गिरसः पुत्रेण गुरुणा बृहस्पतिना परित्यक्तास्तदा वव्रिरे वृतवन्तः पुरोहितं कृतवन्तः इत्यर्थः ४५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् ।
षष्ठोऽध्यायः ॥ ६

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विवृतद्विजः प्रकाशितदन्तः दक्षाय कुपितं हरमिति शेषः ॥ ४३ ॥

तथा रचनया त्वष्टुः सन्निवेशो नाम सुतो जज्ञे विश्वरूपश्चाः भूदिति शेषः ॥ ४४ ॥

तं विश्वरूपं रचना देवानामपि स्वसा कश्यपऋषेर्वा कश्यप-पुत्रत्वेन मिथो भ्रातृत्वाद्देवानां स्वकीयं स्वसुः पुत्रं द्विषता-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

असुराणामपि स्वकीयमित्यर्थः । देवैः सहेन्द्रेण विमतेनावज्ञाते-नाङ्गिरसेन गुरुणा बृहस्पतिना परित्यक्ता अभूवन्निति यद्‌तोऽसुरजयार्थं विश्वरूपं वव्रिरे इत्यर्थः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुरा पूर्वजन्मनि ॥ ४३-४५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तयोरर्य्यममातृकयोः चर्षणयः कृताकृतज्ञानवन्तः । यत्र येषु आत्मानुसन्धानविशेषवत्सु मानुषीजातिर्ब्रह्मोपकल्पिता । तथाच श्रुतिः "पुरुषत्वे चाविस्तरामात्मा" इति ॥ ४२ ॥

कुपितं रुद्रमिति शेषः । विवृतद्विजः प्रकटितदन्तः ॥४३॥

दैत्यात्मजा रचना नाम कन्या त्वष्टुर्भार्य्या । तयोस्ताऽश्याम॥४४॥

यत् । यदा विमतेनावज्ञातेन । बृहस्पतिना त्यक्तास्तदा मत्यन्तरामभावात् द्विषतां दैत्यानां दौहित्रमपि पौरोहित्येन वव्रिरे ॥ ४५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्कन्धस्य षष्ठोऽयं सङ्गतः सङ्गतः सताम् ॥६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

छाया संज्ञानिर्मिता ततो विवस्वतः ॥ ४१ ॥

तयोरर्यममातृकयोः चर्षणयः कृताकृतविशेषज्ञानवन्तः सुताः । यत्र येषु "पुरुषत्वे चाविस्तरामात्मा" इति श्रुतेः परमात्मज्ञानोपयोगित्वेन ब्रह्मणा मानुषीजातिरुपकल्पिता ॥ ४२ ॥

यः पुरा दक्षाय कुपितं शिवं जहास स अदन्तोऽभूत् ॥४३॥

त्वष्टुर्भार्या रोचना नाम सा कन्यका दैत्यात्मजा तयोस्ताऽश्याम ॥ ४४ ॥

द्विषतां दैत्यानां दौहित्रं तं विश्वरूपं सुरगणाः पौरोहित्येन वव्रिरे । तत्र हेतुः । यदतः विमतेनावज्ञातेनाङ्गिरसेन आङ्गिरसः पुत्रेण गुरुणा त्यक्ताः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षष्ठाध्यायार्थप्रकाशः ॥ ६ ॥

भाषा टीका ।

सूर्य की भार्या छायाने शनैश्चर को पैदा किया फिर सावर्णि-मनु को पैदा किया फिर तपती कन्या को पैदा किया उसने संवरण पति को वरण किया ॥ ४१ ॥

अर्यमा की मातृका पत्नी है उन दोनों के चर्षणी पुत्र भये जिनमे ब्रह्माजी ने मानुषीजाति कल्पना की है ॥ ४२ ॥

पूषा बिना पुत्र का है सतुआके खाने वाला है जिसने पहिले दक्ष पर कोप करते महादेवजीको दांत खोलकर हंसाया वह बिना दांत का है ॥ ४३ ॥

दैत्यों की अनुजा त्वष्टा की भार्या है इसका नाम रचना है तिन दोनों में से सन्निवेश वीर्यवान् विश्वरूप भया ॥ ४४ ॥

वह यद्यपि शत्रुओं का भेवता है तो भी देवतों ने पुरोहित पना में इसको वरण किया था जबकी बडे दोष से बृहस्पति ने देवतों को छोड दिया था ॥ ४५ ॥

इति श्रीभागवत षष्ठस्कन्ध के छठे अध्याय का
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ ६ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

—:*:—

॥ सप्तमोऽध्यायः ॥

—○:*:○—

॥ राजोवाच ॥

कस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः ।
एतदाचक्ष्व भगवञ्छिष्याणामक्रमं गुरौ ॥ १ ॥

॥ श्रीशुक उवाच ॥

इन्द्रस्त्रिभुवनैश्वर्यमदोल्लङ्घितसत्पथः ।
मरुद्भिर्वसुभी रुद्रैरादित्यैर्ऋभुभिर्नृप ! ॥ २ ॥
विश्वेदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रितः ।
सिद्धचारणगन्धर्वैर्मुनिभिर्ब्रह्मवादिभिः ॥ ३ ॥
विद्याधराप्सरोभिश्च किन्नरैः पतगोरगैः ।
निषेव्यमाणो मघवान् स्तूयमानश्च भारत ! ॥ ४ ॥
उपगीयमानो ललितमास्थानाध्यासनाश्रितः ।
पाण्डुरेणातपत्रेण चन्द्रमण्डलचारुणा ॥ ५ ॥
युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः ।
विराजमानः पौलोम्या सहार्धासनया भृशम् ॥ ६ ॥
स यदा परमाचार्यं देवानामात्मनश्च ह ।
नाभ्यनन्दत सम्प्राप्तं प्रत्युत्थानासनादिभिः ॥ ७ ॥
वाचस्पतिं मुनिवरं सुरासुरनमस्कृतम् ।
नोच्चचालासनादिन्द्रः पश्यन्नपि सभागतम् ॥ ८ ॥
ततो निर्गत्य सहसा कविराङ्गिरसः प्रभुः ।
आययौ स्वगृहं तूष्णीं विद्वान् श्रीमदविक्रियाम् ॥ ९ ॥
तर्ह्येव प्रतिबुद्ध्येन्द्रो गुरुहेलनमात्मनः ।
गर्हयामास सदसि स्वयमात्मानमात्मना ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तमे विश्वरूपोऽसौ पौरोहित्ये वृतः सुरैः ।
गुरुणा सम्परित्यक्तैः पौरोहित्यमथाकरोत् ॥ १ ॥

कस्य हेतोः कस्माद्धेतोरात्मनः शिष्याः सुराः परित्यक्ताः अक्रममपराधम् ॥ १ ॥

स इन्द्रो यदा सम्प्राप्तं वाचस्पतिं नाभ्यनन्दत नाद्रतवांस्तदा स आङ्गिरसस्ततो निर्गत्य तूष्णीं स्वगृहमाययावित्यष्टानामन्वयः । अनादरे हेतुं मदं दर्शयितुं तं विशिनष्टि । त्रिभुवनैश्वर्यमदेनोल्लङ्घितः सतां पन्था येन सः ॥ २ ॥

परिश्रितः परिवृतः ॥ ३ ॥ ४ ॥

श्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

... श्रीधरस्वामिकृतभावार्थदीपिका ।

आस्थानं सभा तस्मिन्नध्यासनं सिंहासनं तदास्थितः ॥ ५ ॥

पारमेष्ठ्यैर्महाराजचिह्नैः । आसनस्यार्धे स्थितया पौलोम्या सह विराजमानः सन् ॥ ६ ॥

प्रत्युत्थानादिना नाभ्यनन्दत नादृतवान् ॥ ७ ॥

न चोच्चचाल आसन एव स्थितोऽपि किञ्चिन्न चलितवान् ॥ ८ ॥

श्रीमदेन या विक्रिया तां विद्वान् जानन् ॥ ९ ॥

प्रतिबुध्यानुस्मृत्य ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

देवाः विमतेन गुरुणा परित्यक्ताः विश्वरूपं विवव्रिरे इत्युक्तं तदेव सप्रपञ्चं बुभुत्सुः पृच्छति राजा । कस्येति । कस्माद्धेतोराचार्येण गुरुणा आत्मनः शिष्याः सुराः परित्यक्ताः हे भगवन्मुने एतदाचक्ष्व कथय तथा शिष्याणां गुरौ विषयं अक्रममपराधं चाचक्ष्व ॥ १ ॥

एवमापृष्टो मुनिर्देवानां गुरौ कृतमपराधं वक्तुमुपक्रमते । इन्द्र इति । इन्द्रो यदा सम्प्राप्तं वाचस्पतिं नाभ्यनन्दत नादृतवान् तदाङ्गिरसः ततो निर्गत्य तूष्णीं स्वगृहमाययौ इत्यष्टानामन्वयः अनादरहेतुं मदं दर्शयितुमिन्द्रं विशिनष्टि । त्रिभुवनैश्वर्यमदेनोल्लङ्घितः सतां पन्था येन । हे नृप! मरुद्गणादिभिः परिश्रितः परिवृतः ब्रह्मवादिभिर्वेदान् पठद्भिर्मुनिभिः सिद्धादिभिश्च यथायथं निषेव्यमाणः स्तूयमानश्च ॥ २ ॥ ३ ॥ ४ ॥

ललितं यथा तथोपगीयमानश्च भगवानिन्द्रः आस्थानं सभा तस्मिन्नध्यासनं सिंहासनं तदास्थितः अधिष्ठितः हे भारत! चन्द्रमण्डलवच्चारुणा सुन्दरेण पाण्डुरेण श्वेतेनातपत्रेण छत्रेण ॥ ५ ॥

तथा पारमेष्ठ्यैर्महाराजचिह्नैश्चामरादिभिर्युक्तः । अर्धासनया आसनस्यार्धे स्थितया पौलोम्या शच्या सह नितरां विरोचमानः ॥ ६ ॥

स इन्द्रो यदा देवानामात्मनः स्वस्य च परमं पूज्यमाचार्यं सुरासुरवन्दितं मुनिश्रेष्ठं बृहस्पतिं सम्प्राप्तं प्रत्युत्थानासनादिभिर्नाभ्यनन्दत नादृतवान् न चचाल किं तु सभागतं पश्यन्नप्यासन एव स्थित इत्यर्थः ॥ ७ ॥ ८ ॥

तूष्णीं तदा कविर्विद्वान् प्रभुः समर्थं आङ्गिरसो बृहस्पतिः श्रीमदेन या विक्रिया तां विद्वान् जानन् तूष्णीं स्वगृहं प्रति ययौ ॥ ९ ॥

तर्ह्येव इन्द्र आत्मनः स्वस्य गुरुहेलनं प्रतिबुध्यानुस्मृत्य आत्मना स्वेनैवात्मानं सदसि सभायां गर्हयामास निन्दितवान् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुरुद्वारा प्रमादकृदवं त्विति वचनाद्गुरुप्रसाद एव बलीयान् भक्तिज्ञानादिसमुद्रेकसिद्धये तदभावः सर्वोऽनर्थपरम्पराहेतुरतो ज्ञानार्थिना पुरुषेण स्वप्नेऽपि गुरुर्नावमन्तव्यः । किन्तु निरन्तरं स बहुमानं प्रसादसमृद्धये निषेवणीय इत्येतदस्मिन्नध्याये निरूप्यते । तत्र राजा पृच्छति । यस्येति । यस्य कस्य आत्मनः आचार्येण शिष्याणां पुत्राणामक्रममपराधम् ॥ १ ॥

राजप्रश्नं परिहर्तुमुपक्रमते । इन्द्र इति ॥ २ ॥ ३ ॥ ४ ॥

आस्थानं सभा तत्राध्यासनं सिंहासनमाश्रितः ॥ ५ ॥

पारमेष्ठ्यैः श्रेष्ठैः ॥ ६ ॥

नाभ्यनन्दत सन्तुष्ट्या नापूजयत् ॥ ७ ॥

प्रत्येकशः पूजार्हत्व इति द्योतनाय वाचस्पत्यादिविशेषणबाहुल्यम् ॥ ८ ॥

श्रीनिमित्तमदस्य विक्रियां विकारम् ॥ ९ ॥

तर्ह्येव तदानीमेव गुरोर्हेलनमवज्ञानम् ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इन्द्र इति सार्द्धसप्तकम् ॥ १—२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सप्तमे गुरुणा त्यक्तैर्देवैर्दैत्यपराजितैः ।
विश्वरूपो गुरुत्वेन वृतो ब्रह्मोपदेशतः ॥

आत्मनः शिष्याः सुराः ॥ १ ॥

इन्द्रो यदा सम्प्राप्तं वाचस्पतिं नाभ्यनन्दत् तदा स स्वगृहमाययावित्यष्टानामन्वयः ॥ २ ॥ ३ ॥ ४ ॥

आस्थानं सभा तस्मिन्नध्यासनं सिंहासनमाश्रितः ॥ ५ ॥

पारमेष्ठ्यैर्महाराजचिह्नैः । पौलोम्या शच्या । अर्द्धमासनमर्द्धासनं यस्यास्तया सह मृगलोचनेति बहुव्रीहौ आसनपदस्य वृत्तावन्तर्भावः ॥ ६ ॥

आचार्यं बृहस्पतिम् ॥ ७ ॥

अप्रत्युत्थानमेव स्पष्टयति । वाचस्पतिमिति । आसनादासनमारुह्य स्थितोऽपि किमपि न उच्चचाल न पस्पन्दे ॥ ८ ॥

ततः । सभातः कविः एवं भविष्यतीति भाविकालवित् । प्रभुः शास्ता समर्थः । विद्वान् गुर्ववमानं हेतुत्वेन जानन् ॥ ९ ॥

प्रतिबुध्य श्रीमदमदिरानिद्रात इत्यर्थः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गुरुणा परित्यक्ताः सुरगणा विश्वरूपं ववव्रिर इत्युक्तं तत्प्रपञ्चबुभुत्सुः पृच्छति । यस्येति । यस्येति षष्ठी पञ्चम्यर्थे । यस्माद्धेतोः आचार्येण आत्मनः स्वकीयाः सुराः परित्यक्ताः अस्वकीयाः कृताः एतत् एवम्भूतं गुरौ शिष्याणामक्रमं व्यतिक्रममाचक्ष्व कथयेत्यन्वयः ॥ १ ॥

अहो बत ममासाधु कृतं वै दभ्रबुद्धिना ।
यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः ॥ ११ ॥
को गृद्ध्येत् पण्डितो लक्ष्मीं त्रिविष्टपपतेरपि ।
ययाहमासुरं भावं नीतोऽद्य विबुधेश्वरः ॥ १२ ॥
ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कञ्चन ।
प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः ॥ १३ ॥
तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः ।
ये श्रद्दध्युर्वचस्ते वै मज्जन्त्यश्मप्लवा इव ॥ १४ ॥
अथाहममराचार्यमगाधधिषणं द्विजम् ।
प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् ॥ १५ ॥
एवं चिन्तयतस्तस्य मघोनो भगवान् गृहात् ।
बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उत्तरमाह । इन्द्र इत्यादिना । इन्द्रः यदा देवानामात्मनश्च परमाचार्यं वाचस्पतिं प्रत्युत्थानादिभिः नाभ्यनन्दतेति तु किं वाच्यं सभागतं पश्यन्नपि आसनाच्चोच्चचाल तदा प्रभुरपि तन्नाशं कर्तुं समर्थोऽपि ततः स्वगृहं तूर्ष्णीमाययाविलयदा-नामन्वयः । त्रिभुवनैश्वर्यमदेनोल्लङ्घितः सतां पन्था येन सः ॥ २ ॥
परिश्रितः परिवृतः ॥ ३—४ ॥

आस्थाने सभायां यदच्चासनं सिंहासनं तदास्थितः ॥ ५ ॥
पारमेष्ठ्यैः महाराजचिह्नैर्युक्तः पौलोम्या पुलोम्नोऽपत्यभूतया अर्धे वामभागे आसनं यस्यास्तया सह विराजमानः ॥ ६ ॥ ७ ॥ ८ ॥

ततः । सभातः ॥ ९ ॥ १० ॥

भाषा टीका ।

राजा परीक्षितजी बोले बृहस्पतिजी ने अपने देवतों को किस हेतु से छोडा हे भगवन् ! इस बात को आपकहो जैसे कि शिष्यों ने गुरुका अपराध किया हो ॥ १ ॥

श्रीशुकदेवजी बोले त्रिभुवन के ऐश्वर्य के प्राप्त होने से इंद्र को मदभया तब उसने सत् मार्ग का त्याग कर दिया तब हे नृप ! उनचास पवन आठवसु एकादश रुद्र द्वादश आदित्य ऋभु देवता ॥ २ ॥

विश्वेदेवा साध्य अश्विनी कुमार सिद्ध चारण गंधर्व ब्रह्मा-वादि मुनि इनों से इंद्र सहित थे ॥ ३ ॥

हे भारत ! विद्याधर अप्सरा किन्नर पतग उरग ए सब इंद्र की सेवा करते थे और स्तुति करते थे ॥ ४ ॥

बडे ऊंचे सिंहासन पर इंद्र बैठे थे और सब उनका गान करते थे चंद्र के मंडल सरी का सफेद छत्र उनके मस्तक (लगा था ॥ ५ ॥

और भी चामर पंखा आदि सब पदार्थों से सेवित अर्ध आसन में इंद्राणी बैठी थी इस प्रकार से विराज मा थे ॥ ६ ॥

तिसी समय पर सब देवतों के और अपने भी परमाचा देव दानवों के वंदनीय वाचस्पति मुनीश्वर को सभा में आ हुये देखकर भी इंद्रने प्रत्युत्थान आसन आदि से सन्मान ना किया आसन से उठा भी नहीं ॥ ७ ॥ ८ ॥

तब तो बृहस्पति भगवान् शीघ्र ही उहां से निकल क धनी के मद के विकार को जानकर चुप चुप अपने घर कों चा आये ॥ ९ ॥

तिसी समय में इंद्र ने जब अपने से हुई गुरू की अवज्ञ को जाना तब उसी सभा के मध्य में अपने को आपही निं करने लगा ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मम कृतं कर्म अहो असाधु यद्यस्माद्दभ्रबुद्धिनाऽल्पमतिन मया कात्कृतः तिरस्कृतः ॥ ११ ॥

विबुधानां सात्त्विकानां देवानामीश्वरोऽप्यहम् ॥ १२ ॥

ननु सिंहासनस्थो राजाऽभ्युत्थानं न कुर्यादिति वृद्धा वदन्ति तत्राह । ये इति द्वाभ्याम् । धिषणमासनम् ॥ १३ ॥

कुपथं दिशन्त्युपदिशन्तीति कुपथदेष्टारस्तेषां वचः । अश्ममः प्लवो येषां ते यथा मज्जन्तं प्लवमनु मज्जन्ति तद्वत् ॥ १४ ॥

अगाधा गम्भीरा धिषणा यस्य तम् । निशठः शाठ्यहीन सन् ॥ १५ ॥

अधिकया आत्ममायया ॥ १६ ॥

गुरोर्नाधिगतः संज्ञां परीक्षन् भगवान् स्वराट् ।
ध्यायन् धिया सुरैर्युक्तः शर्म नालभतात्मनः ॥ १७ ॥
तच्छ्रुत्वैवासुराः सर्व आश्रित्यौशनसं मतम् ।
देवान् प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः ॥ १८ ॥
तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नाङ्गोरुबाहवः ।
ब्रह्माणं शरणं जग्मुः सहेन्द्रा नतकन्धराः ॥ १९ ॥
तांस्तथाभ्यर्दितान् वीक्ष्य भगवानात्मभूरजः ।
कृपया परया देव उवाच परिसान्त्वयन् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गुरोः संज्ञां ज्ञानोपायं परीक्षमाणोऽपि नाधिगतोऽप्राप्तः सन् ॥ १७ ॥

आततायिन उद्यतास्त्राः ॥ १८ ॥

निर्भिन्नान्यङ्गान्युत्तमाङ्गानि शिरांसि ऊरवो बाहवश्च येषाम् ॥ १९—२० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गर्हाप्रकारमाह । अहो इति पञ्चभिः । अहो बताहो मम कष्टं प्राप्तम् । असाधु कर्म मया कृतं वै यदस्माद्-दभ्रबुद्धिनाल्पमतिना ऐश्वर्यमत्तेन मया सदसि गुरुः कात्कृतः तिरस्कृतः ॥ ११ ॥

पण्डितो विद्वान् नित्यानित्यविवेकसम्पन्न इत्यर्थः । को वा पुमान् त्रिविष्टपपतेः त्रीँल्लोकान्पातीति त्रिविष्टपं तस्य पतेः सत्यलोकाधिपतेरपि लक्ष्मीं गृध्येदभिकाङ्क्षेत् किन्तु तुच्छं मन्येतेत्यर्थः । विबुधानां सात्त्विकानामीश्वरोऽप्यहमासुरं भावं मोहमिति यावत् नीतः प्रापितः ॥ १२ ॥

ननु सिंहासनस्थो राजा प्रत्युत्थानादिकं न कुर्यादिति वदन्ति शास्त्रज्ञास्तत्राह । य इति द्वयाम् । पारमेष्ठ्यं धिषणं परमेष्ठी महाराजस्तत्सम्बन्ध्यासनं धिषणं तदधितिष्ठन् कञ्चन प्रति नोत्तिष्ठेदिति ये ब्रूयुस्ते परं केवलं धर्मं न विदुः ॥ १३ ॥

किञ्च । तेषां कुपथदेष्टॄणां कुमार्गोपदेष्टॄणामत एवाधस्तमसि नरके पततां वचः ये जनाः श्रद्दध्युस्तेऽश्मप्लवाः बृहत्पाषाणयुक्तप्लवारूढा इव मज्जन्त्यधो यान्ति ॥ १४ ॥

अथातः अहममराणामाचार्यमगाधा धिषणा बुद्धिर्यस्य तं मत्कृतापराधमगणयन्तं द्विजं वाक्पतिं प्रसादयिष्ये प्रार्थये कथंभूतः निशठः निर्गतशाठ्यः सन् । तस्य गुरोश्चरणौ शीर्ष्णा स्पृशन् ॥ १५ ॥

एवं तस्य मघोन इन्द्रस्य चिन्तयतः सतः भगवान् बृहस्पतिरध्यात्ममायया योगप्रभावेण गृहादृष्टां गतिं गतः अदृश्योऽभूदित्यर्थः । ततो भगवान् स्वराडिन्द्रः गुरोः संज्ञां दर्शनोपायं परीक्ष्य विचार्यापि नाधिगतः न प्राप्तः धिया ध्यायन् दर्शनोपायं चिन्तयन् शुचा शोकेन युक्तः आत्मनः स्वस्य शर्म सुखं नालभत न प्राप ॥ १६ ॥ १७ ॥

तदिन्द्रस्य गुर्वपराधप्रयुक्तक्लेशचिन्तादिकं श्रुत्वा तदैव औशनसम्मतमुशनसा मन्त्रितमाश्रित्य सर्वेऽसुराः दुर्मदा अतिवीर्यमदाः आततायिनः जिघांसवः देवान् प्रत्युद्यमं युद्धोद्योगं चक्रुः ॥ १८ ॥

तैरसुरैर्विसृष्टैः प्रयुक्तैस्तीक्ष्णैरिषुभिर्निर्भिन्नान्यङ्गान्युत्तमाङ्गानि शिरांसि ऊरवो बाहवश्च येषां ते इन्द्रसहिता देवा नम्रशिरसो ब्रह्माणं शरणं ययुः ॥ १९ ॥

अभ्यर्दितान् तदा पीडितांस्तान् देवान् वीक्ष्य भगवानात्मभूः परमात्मजः अजो ब्रह्मा परयाधिकया कृपया युक्तस्तान् सान्त्वयन्नुवाच ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सदसीत्यनेनावज्ञानस्योद्रिक्ततामाह । दभ्रबुद्धिनाल्पबुद्धिना कात्कृतः धिक्कृतः ॥ ११ ॥

को गृध्येदिति "गृधु" अभिकाङ्क्षायाम् ॥ १२ ॥

राजयोग्यसिंहासनमधिष्ठितो न प्रत्युत्तिष्ठेदिति शास्त्रकारवचनात्कथमासुरं भावं नीत इति चेत्तत्राह । य इति । पारमेष्ठ्यधिषणं सिंहासनस्थानमधितिष्ठन् राजा कञ्चन नोत्तिष्ठेदिति प्रत्युत्थानं न कुर्यादिति ये पण्डितंमन्या ब्रुवन्ते परमं धर्मं न विदुरित्यन्वयः ॥ १३ ॥

तादृशानां वाक्ये विश्वासेन प्रवर्तमानस्यानर्थफलहेतुत्वाद्बुद्धिमता न कर्तव्यमित्यभिप्रेत्याह । तेषामिति । अश्मना कृताः प्लवाः नावोऽश्मप्लवाः ॥ १४ ॥

यत एवमतोऽथ तस्मादगाधधिषणं गम्भीरबुद्धिम् ॥ १५ ॥

अध्यात्ममायया योगसामर्थ्येन अदृष्टां गतिमदृश्यत्वलक्षणां स्थितिम् ॥ १६ ॥

संज्ञां स्वरूपाविषयज्ञानं स्वराडिन्द्रः ॥ १७ ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

निर्भिन्नान्यङ्गानि शरीराणि ऊरवश्च बाहवश्च येषां ते तथा ॥ १९ ॥

आत्मनः परमात्मनो भवतीत्यात्मभूः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

कात्कृतः तिरस्कृतः ॥ ११ ॥

स्वसम्पत्तिमेव तिरस्कारहेतुत्वेन ज्ञात्वा निन्दति। को गृध्येत् वाञ्छेत् ॥ १२ ॥

ननु "सिंहासनस्थो राजा कमपि नाभ्युत्तिष्ठेत्" इति नीतिशास्त्रज्ञा आहुः। सत्यं ते अज्ञा एवेत्याह। ये इति। पारमेष्ठ्यं धिषण्यं परमेष्ठिनोऽप्यासनम् ॥ १३ ॥

अश्ममयः प्लवो येषां ते यथा मज्जन्तं प्लवमनुमज्जन्ति तथेति राजनीत्युपदेष्टृषु पुंसु श्रद्धेषु कोपो व्यञ्जितः ॥ १४ ॥

तस्मादस्यां विपत्तौ कः प्रत्युपायः स्वयं विमृश्य स्वयमेवाह। अथाहमिति। निशठः शाठ्यहीनः सन् ॥ १५ ॥

चिन्तयतः। चिन्तयन्तमधवन्तमनादृत्य। अधिकया आत्मनो मायया ॥ १६ ॥

संज्ञां ज्ञानोपायं परीक्षन् परितः ईक्षमाणोऽपि नाधिगतः अप्राप्तः सन् ॥ १७-२१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

वच्चबुद्धिना अल्पमतिना कात्कृतः कदर्थीकृतः ॥ ११ ॥

गृध्येदभिकाङ्क्षेत् ॥ १२ ॥

पारमेष्ठ्यं महाराजसंबन्धिधिषण्यमासनमधितिष्ठन् कंचन प्रति नोत्तिष्ठेदिति ये ब्रूयुः ते परं धर्मम्।

आयान्तमग्रतो गच्छेत् गच्छन्तं तमनुव्रजेत्।
आसने शयने वापि न तिष्ठेदग्रतो गुरोः।

इत्यादि शास्त्रोक्तं न विदुः ॥ १३ ॥

कुपथं कुत्सितं मार्गं दिशन्त्युपदिशन्तीति कुपथदेष्टारस्तेषाम् अत एवाधस्तमसि नरके पतताम् ये वचः श्रद्दध्युः ते अश्मप्लवा इव अश्मा पाषाणः तन्मयः प्लवो येषां तद्वत् मज्जन्ति उपदेष्टृभिः सहिताः अधस्तमसि पतन्तीत्यर्थः ॥ १४ ॥

निशठः नितरां शठः कृतापराधः ॥ १५ ॥

एवं चिन्तयतः सतः अध्यात्ममायया अधिका या आत्मनो माया अन्तर्धानशक्तिस्तया ॥ १६ ॥

धिया ध्यायन् सुरैर्युक्तश्च परीक्षन् परितः ईक्षमाणोऽपि गुरोः संज्ञां दर्शनोपायं नाधिगतः अलभमानः सन् आत्मनः स्वस्य शर्म सुखं नालभत ॥ १७ ॥

औशनसं मतम् "आपदि शत्रुः सपदि धर्षणीयः" इति उशनसः शुक्रस्य नीतिम्। आततायिनः गृहीतशस्त्राः ॥ १८ ॥

निसृष्टैः छिन्नैर्निर्भिन्नान्यङ्गानि उत्तमाङ्गादीनि ऊरवो बाहवश्च येषां ते शरणं रक्षितारम् ॥ १९ ॥

अभ्यर्दितान् पीडितान् ॥ २० ॥

भाषा टीका।

अहो मैं अल्प बुद्धि वाला हूँ मैंने बड़ा खोटा काम किया जो कि मैंने ऐश्वर्य में मत्त होकर सभा में गुरु का अपमान किया ॥ ११ ॥

तीनों लोकों के पति की लक्ष्मी को पण्डित होकर कौन चाहना करेगा जिस लक्ष्मी ने देवेश्वर होने पर भी मेरे को असुर भाव को प्राप्त कर दिया ॥ १२ ॥

जो कोई पुरुष राजा के किसी स्थान को आश्रय करके सिंहासन में स्थित रहने वाला किसी के वास्ते नहीं उठे ऐसा कहते हैं वे लोग परमधर्म को नहीं जानते हैं ॥ १३ ॥

कुमार्ग दिखाने वाले उन लोगों के वचन पर जो श्रद्धा करते हैं वे लोग पत्थर की नौका में चढ़े सरी के डूब जाते हैं ॥ १४ ॥

अब मैं अमरों के गुरु अगाधबुद्धि वाले ब्राह्मण गुरुजी को प्रसन्न करूंगा कपट छोड़कर उनके चरण का स्पर्श करूंगा ॥ १५ ॥

इस प्रकार से इन्द्र के विचारते तक बृहस्पति भगवान् अपनी विद्या के प्रभाव से अदृश्य गति को प्राप्त होगये ॥ १६ ॥

इंद्र भगवान् ने ढूंढने पर भी बृहस्पति का पता नहीं पाया देवतों के सहित बुद्धि से चिन्ता करते रह गये मन में शान्ति नहीं प्राप्त भई ॥ १७ ॥

इस बात को सुनते मात्र ही सब असुरों ने शुक्राचार्य के मत को आश्रय करके बड़े अभिमान से शस्त्रधारी होकर देवतों के जीतने का उद्यम किया ॥ १८ ॥

उनके चलाये हुये तीक्ष्ण बाणों से देवतों के मस्तक जांघ बाहु कट गये तब इंद्र सहित सब देवता मस्तकों को नम्र करके श्रीब्रह्माजी के समीप में गये ॥ १९ ॥

आत्म भू अज भगवान् ब्रह्माजी ने देवतों को तिस प्रकार पीडित देखा तब ब्रह्म देव परम कृपा युक्त होकर उनके सांतन करते हुये यह वचन बोले ॥ २० ॥

ब्रह्मोवाच ।

अहो बत सुरश्रेष्ठाः ! ह्यभद्रं वः कृतं महत् ।
ब्रह्मिष्ठं ब्राह्मणं दान्तमैश्वर्यान्नाभ्यनन्दत ॥ २१ ॥
तस्यायमनयस्यासीत् परेभ्यो वः पराभवः ।
प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः ! ॥ २२ ॥
मघवन् ! द्विषतः पश्य प्रक्षीणान् गुर्वतिक्रमात् ।
सम्प्रत्युपचितान् भूयः काव्यमाराध्य भक्तितः ।
(१) आददीरन्निलयनं ममापि भृगुदेवताः ॥ २३ ॥
त्रिविष्टपं किं गणयन्त्यभेद्यमन्त्रा भृगूणामनुशिक्षितार्थाः ।
न विप्रगोविन्दगवीश्वराणां भवन्त्यभद्राणि नरेश्वराणाम् ॥ २४ ॥
तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवन्तम् ।
सभाजितोऽर्थान्(२) स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥ २५ ॥

श्रीशुक उवाच ।

त एवमुदिता राजन् ! ब्रह्मणा विगतज्वराः ।
ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥ २६ ॥

देवा ऊचुः ।

वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते ।
कामः सम्पाद्यतां तात ! पितॄणां समयोचितः ॥ २७ ॥
पुत्राणां हि परो धर्मः पितृशुश्रूषणं सताम् ।
अपि पुत्रवतां ब्रह्मन् ! किमुत ब्रह्मचारिणाम् ॥ २८ ॥
आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ।
भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्क्षितेस्तनुः ॥ २९ ॥
दयाया भगिनी मूर्तिर्धर्मस्यात्मातिथिः स्वयम् ।
अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वो युष्माकं कृतं करणं महदभद्रम् । तदाह । ब्रह्मिष्ठमिति । नाभ्यनन्दत नाभिनन्दितवन्तः ॥ २१ ॥

परेभ्यः शत्रुभ्यो वः पराभव इति यदयं तस्यानयस्यान्यायस्य सम्बन्धी फलरूप आसीत् । उक्तं च

ब्राह्मणं कुलसम्पन्नं भक्तं विष्णोर्महात्मनः ।
आयान्तं वीक्ष्य नोत्तिष्ठेत्स दुःखैः परिभूयते ॥

इति स्वयमेव वैरिणो हन्तारो येषां तेभ्यः ॥ २२ ॥

गुरुनिरस्कारसत्काराववेवापचयोपचयकारणमित्यसुरदृष्टान्तेनाह । मघवन्निति । द्विषतः शत्रून् । काव्यं भार्गवं गुरुमेवासेव्योपचितान् । उपचितत्वमेवाह । आददीरन् गृह्णीयुः ॥ २३ ॥

अभेद्यो मन्त्रो येषाम् । अनुशिक्षितार्थाः शिष्याः । यतो विप्रा गोविन्दो गावश्चेश्वरा अनुग्राहका येषां तेषामेवाभद्राणि न भवन्त्यन्येषां तु भवन्ति ॥ २४ ॥

तत्तस्मात् । अथानन्तरमेव भजत । अस्य कर्मासुरपक्षपातम् ॥२५॥

उदिता उक्ताः ॥ २६—२७—२८ ॥

अतिथीनां पितॄणां च प्रशंसार्थमाहुः । आचार्य उपनीय वेदाध्यापकः । ब्रह्मणो वेदस्य मूर्तिः ॥ २९ ॥

(१) (अद्य श्वो वा परश्वो वा हमाहते बलशालिनः) अत्रायमधिकः पाठः श्रीवीरराघवाचार्यमते। (२) स भाविनार्थान् इति श्रीधरा०

श्रीधरस्वामिकृतभावार्थदीपिका ।

धर्मस्यात्मा मूर्तिरतिथिः । स्वयं साक्षात् । आत्मनः श्रीविष्णोः । यद्वा । आत्मनः स्वस्य सर्वभूतेष्वात्मदृष्टिः कर्तव्येत्यर्थः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तिमेवाह । अहो इत्यादिना क्षमिष्यध्वमुतास्य कर्मेत्यन्तेन । हे सुरश्रेष्ठाः ! अहो बत महत्कष्टं वः प्राप्तं महदभद्रमसाधु युष्माभिः कृतम् । किं तद्ब्रह्मिष्ठमतिशयेन ब्रह्मज्ञानसंपन्नं ब्रह्मिष्ठत्वं ब्राह्मणं दान्तं जितेन्द्रियमैश्वर्योन्मदान्नाभ्यनन्दत नाभिनन्दितवन्तः ॥ २१ ॥

हे सुराः ! परेभ्यः शत्रुभ्यः पराभव इति यदयं तस्यानयस्य संबन्धी फलरूपः आसीत्कथम्भूतानां वः प्रक्षीणेभ्यः ऐश्वर्यं गहि तेभ्यः सपत्नेभ्यः समृद्धानां सम्पन्नानाम् ॥ २२ ॥

गुरुतिरस्कारसत्कारावेवापचयोपचयकारणमित्यसुरदृष्टान्तेनाह । मघवन्निति । हे मघवन् ! द्विषतः शत्रूनसुरान् गुर्वतिक्रमाद्धेतोः प्रक्षीणान् संप्रति तु काव्यं शुक्रं भक्तितः आराध्य उपचितान् समृद्धान् पश्य गुर्वाराधनाद्युष्मान् बाधन्त इति किं वक्तव्यम् । यतस्ते मत्स्थानमपि गृह्णीयुरिति सम्भावयति । अद्येति । अद्यास्मिन्नहनि श्वः परस्मिन्नहनि परश्वः ततः परस्मिन्नहनि वा बलशालिनोऽत एव दृप्ताः गर्विताः ते मम निलयनं मम स्थानमपि आददीरन् गृह्णीयुः यतस्ते भृगुः शुक्रः काव्य एव देवता येषां तादृशाः ॥ २३ ॥

अभेद्यो मन्त्रो येषां ते भृगूणां भृगुकुलप्रभवाणामनुशिक्षितार्थाः शिष्याः त्रिविष्टपमपि किं गणयन्ति न गणयन्त्येवेत्यर्थः । विप्राः गोविन्दो भगवांश्च गावश्चेश्वरा अनुग्राहकाः पूज्या वा येषां तेषामेव अभद्राणि न भवन्ति इतरेषामीश्वराणामपि न भवन्तीति न किन्त्वभद्राणि भवन्त्येवेत्यर्थः ॥ २४ ॥

तत्तस्मादद्यानन्तरमेवाशु त्वष्टुः पुत्रमात्मवन्तं जितेन्द्रियं तपस्विनं विश्वरूपाख्यं द्विजं भजत यूयमनुवर्तध्वं तत्पौरोहित्ये वृणुतेत्यर्थः । स विश्वरूपो वः युष्मान् भावितार्थान् भावितः निष्पादितः अर्थोऽभिलषितं प्रयोजनं येषां तादृशान् विधास्यति करिष्यति । अस्य विश्वरूपस्य कर्मासुरपक्षपातादिरूपं यूयमुत क्षमिष्यध्वं यदि क्षमिष्यध्वं तर्हि सविधास्यते इत्यर्थः । यद्वा । उत अपि तु तस्य कर्म क्षमिष्यध्वं सर्वथा तस्य कर्म युष्माभिः क्षन्तव्यमित्यर्थः ॥ २५ ॥

एवमुक्ता विश्वरूपं प्रार्थयितुं देवा ययुरित्याह मुनिः । त इत्यादिना । हे राजन् ! ते देवा ब्रह्मणैवमित्थमुदिता उक्ता विगतज्वरः आधिर्येषां ते त्वाष्ट्रमृषिं विश्वरूपमुपव्रज्य उपेत्य परिष्वज्यालिङ्ग्य पुत्रत्वात् परिष्वज्येत्युक्तं न तु नमस्कृत्येति इदं वक्ष्यमाणमब्रुवन् ॥ २६ ॥

उक्तिमेवाह । वयमिति । वयं ते तवातिथयः प्राप्ताः ते तवाश्रमं भद्रमशून्यमस्तु आतिथ्याभावे आश्रमः शून्य इति व्यपदिश्यत इति भावः । तथा तव पितॄणामस्माकं समयोचितः तत्कालोचितः कामः इच्छाविषयोऽर्थः सम्पद्यतां त्वत्तः संपन्नो भवतु ॥ २७ ॥

हे ब्रह्मन् ! पुत्रवतामपि सतां पुत्राणां पितृशुश्रूषणं प[रो] धर्मः ब्रह्मचारिणां सतां पुत्राणां पितृशुश्रूषणं परो धर्म इति किमुत किमु वक्तव्यम् । त्वन्तु ब्रह्मचारी पुत्रश्चेति अस्मच्छुश्रूषणमत्यन्तोचितमिति भावः ॥ २८ ॥

किञ्चाचार्यो ब्रह्मणः परब्रह्मणो मूर्तिरीश्वरदृष्ट्या आचा[र्यः] आराधनीय इति भावः । पिता तु प्रजापतेर्विरिञ्चस्य मूर्तिः भ्राता इ[न्द्रस्य] मरुत्पतेरिन्द्रस्य मूर्तिर्माता साक्षात्क्षितेर्भूमेस्तनुर्मूर्तिः ॥ २९ ॥

भगिनी तु दयाया मूर्तिरात्मा स्वयं तु धर्मस्य मूर्तिरतिथिस्तु स्वयमेव स्वात्मनो मूर्तित्वेन द्रष्टव्यः । स्वशरीरत्वेन द्रष्टव्य इति यावत् । अभ्यागतस्त्वग्नेराहवनीयादेर्मूर्तिः सर्वभूतानि चात्मनो मूर्तिरात्मतुल्यत्वेन द्रष्टव्यानीत्यर्थः । यद्वा । परमूर्तिः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

व इति षष्ठी तृतीयार्थे युष्माभिरित्यर्थः ॥ २१ ॥

तस्यानयस्यान्यायस्य परिपाकः कोऽसाविति तत्राह । परेभ्य इति ॥ २२ ॥

काव्यं शुक्रं निलयनं युष्मदधिकृतं स्वर्गमिति शेषः । भृगुरेव देवताः येषान्ते भृगुदेवताः जनः ममापि अभेद्यं निलयनमाददीरन् हारयन्तीति वा ॥ २३ ॥

अनुशिक्षितः अभ्यस्तमाधितोऽर्थो यैस्तै तथा भृगूणां मन्त्राः त्रिविष्टपमभेद्यं गणयन्ति किं नैव ब्राह्मणशक्तिरचिन्त्यविभवेत्याह । न विप्रेति । विप्राश्च गोविन्दश्च गावश्च ईश्वराः येषां न तथा तेषां विप्रभक्तिर्गोविन्दगोभक्तयश्चितनाभूतानि दर्शनाय सदैवोक्तं सापि तारतम्यापेता शुभदेत्यतो गदितेति ॥ २४ ॥

तत्तस्मात्तपस्वित्वादिगुणाधिकं गुणोऽस्यास्तीत्याह । अद्येति । आत्मवत्त्वादपरः कल्याणगुणो नास्तीत्यतोऽर्थमिति । नेक एवार्थोऽनेन किन्त्वपेक्षिताशेषार्थोऽस्यास्तीत्यतोऽर्थानीति नेदानीमुत्तरकाल्ययमेवाशीमित्यतो विधास्यत इति । तत्रेतिकर्तव्यतामाह । यदीति । उताप्यर्थः ॥ २५ ॥

ते देवाः ॥ २६ ॥

पितॄणां नः समयोचितः एतत्कालयोग्यः । काम्यत इति कामोऽर्थः ॥ २७ ॥

सतां पुत्राणां ब्रह्मचारिणामपुत्रवतां पुत्राः उभयेषामपि शुश्रूषणं कुर्वन्तीत्यर्थः ॥ २८ ॥

पित्रादिशुश्रूषणेन रुद्रादिदेवताशुश्रूषणमपि कृतं स्यात्तेषां तेषु विशेषसन्निधानादित्याह । आचार्य इति । ब्रह्मणश्चतुर्मुखस्य मूर्तिः सन्निधानस्थानम् । प्रजापतेः रुद्रस्य "प्रजापतिः शिवः स्थाणुरुमेशो वृषवाहन" इत्यभिधानात् । मरुत्पतेरिन्द्रस्य अतिथिः स्वयं धर्मस्यात्मा मूर्तिः अभ्यागतः प्राहुणकः । आत्मनः सर्वभूतानि मूर्तिः "एको देवः सर्वभूतेषु गूढः,, इति श्रुतेः ॥ २९ ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्रिविष्टपमिति । अत्र गोविन्देति दृष्टान्तेनोपन्यस्तम् ॥ २४—४०॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

परेभ्यः अन्येभ्यः सकाशात् केभ्यः स्ववैरिभ्यः ॥ २२ ॥

गुरुतिरस्कारसत्कारावेव विपत्सम्पदोः कारणमित्यसुरदृष्टान्तेनैवाह । मघवन्निति । अथैषां तथा बलं दृश्यते यथा ममापि निलयनं सत्यलोकमाददीरन् । तत्र हेतुः । भृगुदेवताः गुरुभक्ताः ॥ २३ ॥

अत्र सामदानदण्डा उपायाः न सम्भवन्तो दृश्यन्ते । भेदोऽप्यशक्य इत्याह । न भेद्यः मन्त्रो मन्त्रणा येषां ते सर्वत्र हेतुः । भृगूणां शुक्राचार्याणामनुशिक्षितमेव अर्थः पुरुषार्थत्वेनोपादेयो येषां ते । ननु तर्हि किं वयं मरिष्याम एवेति तत्र सान्त्वयन्नाह । न विप्रेति । विप्रा गोविन्दो गाव ईश्वरा अनुग्राहका येषां तेषाम् ॥ २४ ॥

तत्तस्माद्वयमेव सम्प्रत्युपाय इत्याह । विश्वरूपं गुरुत्वेन भजत । वत्सस्य विश्वरूपस्य कर्म्मासुरपक्षपातम् ॥ २५—२८ ॥

आचार्यो वेदाध्यापकः । ब्रह्मणो वेदस्य । मरुत्पतेरिन्द्रस्य अतिथिस्तु धर्म्मस्यात्मैव मूर्त्तिरिति किं वक्तव्यमिति भावः । आत्मनः परमेश्वरस्य ॥ २९—३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यो युष्माभिः महदमद्रममङ्गलं कृतं तदेवाह । ब्रह्मिष्ठं ब्रह्मसंपन्नं दान्तं ब्राह्मणमैश्वर्य्यात् प्रभुत्वमदात् नाभ्यनन्दत नाभिनन्दितवन्तः ॥ २१ ॥ २२ ॥

आद्यो गुर्वतिक्रमात् प्रक्षीणान् सम्प्रति काव्यं गुरुमाराध्य भूय उपचितान् द्विषतः शत्रून् पश्य गुरुतिरस्कारसत्कारौ विपत्संपदोर्हेतुरित्यर्थः । यदि ममापि निलयनं स्थानमाददीरन् वृहीयुः यतो भृगुदेवताः भृगवः भृगुवंश्याः शुक्रतत्पुत्रादयो देवता येषां ते गुरुभक्ताः ॥ २३ ॥

तथा अभेद्यो मन्त्रो येषां ते तथा भृगूणामनुशिक्षितार्थाः शिष्याः त्रिविष्टपं किं गणयन्ति न किमपीत्यर्थः । अत्यन्ततो भीतानामस्य तच्छरणं सूचयति । नेत्यर्धेन ॥ २४ ॥

विशेषतः आश्रयणीयमाह । तदिति । तत्तस्मात् सभाजितः सेवितः अस्य विश्वरूपस्य कर्म मातामहकुलपक्षपातं यदि क्षमिष्यध्वम् क्षमिष्यध्वे ॥ २५ ॥

ते देवा एवमनेन प्रकारेणोदिता उक्ताः उपव्रज्य तन्निकटं गत्वेदमब्रुवन् ॥ २६ ॥

समये, अभिमतापत्काले उचितः ॥ २७ ॥ २८ ॥

आत्मनोऽतिथित्वं पितृत्वं च तं प्रति निर्दिश्याथातिथीनां पितृणां पूज्यत्वं बहुभिर्दृष्टान्तैराहुः । आचार्य इति द्वाभ्याम् ॥ २९॥

धर्मस्य आत्मा मूर्तिरतिथिः आत्मनो जगत्कारणस्य भगवतो मूर्तिः सर्वभूतानि ॥ ३० ॥ ३१ ॥

भाषा टीका ।

ब्रह्माजी बोले हे ! देवश्रेष्ठ हो तुम लोगों ने बडा बुरा काम किया जो कि इन्द्रियों को दमन करने वाले ब्राह्मण वृहस्पति का तुमने ऐश्वर्य के मारे सम्मान नहीं किया ॥ २१ ॥

तिसी अन्याय से तुमको शत्रुओं से पराभव भया है पहिले तुमारे वैरी क्षीण होगये थे तुम बलवान् होगयेथे अब उस अन्याय से तुमको दुःख की उत्पत्ती भई है ॥ २२ ॥

हे इन्द्र ! अपने शत्रुओं को तुम देखो गुरु के अतिक्रम करने से क्षीण होगये थे वेही असुर अब भक्तिपूर्वक शुक्राचार्य की आराधना करने से अब मेरे स्थान को भी लेने के लायक होगये हैं ॥ २३ ॥

भृगुओं के सिखाने से अभेद्य मंत्रवाले होगये हैं सो स्वर्ग को प क्या गिनते हैं जो कोई भी ब्राह्मण गुरुगोविन्द को ईश्वर मानते हैं तिन पुरुषों को कभी अमङ्गल नहीं होता है ॥ २४ ॥

इस हेतु से अब तुम लोग त्वष्टाके पुत्र आत्मज्ञानी तपस्वी ब्राह्मण के शरण जाओ उसकी सेवा करके उसके असुर पक्षपात रूप कर्म को तुम सहते रहोगे तब यह विश्व रूप तुम्हारे सब मनोरथों को पूरा करदेगा ॥ २५ ॥

श्रीशुकदेवजी बोले इस प्रकार ब्रह्माजी के कहने से देवता शोक रहित होगये फिर विश्वरूप ऋषि के पास आकर आलिङ्गन करके इस वचन को बोले ॥ २६ ॥

देवता बोले हम लोग तुमारे अतिथि होकर तुमारे आश्रम में आये हैं तुमारा कल्याण होगा हे तात ! हम पिता लोगोंके समय के अनुसार मनोरथ को पूरा करो ॥ २७ ॥

सत् पुत्रों का परमधर्म यही है कि जो पिताओं की सेवा करना यदि पुत्र वालों का यही धर्म है तो फिर ब्रह्मचारियों का होवे इसमें क्या कहना है ॥ २८ ॥

आचार्य ब्रह्माकी मूर्ति है पिता प्रजापति की मूर्ति है बडा भ्राता इन्द्र की मूर्ति है माता तो साक्षात् पृथिवी की मूर्ति है ॥ २९ ॥

बहिनदया की मूर्ति है अतिथी धर्म की मूर्ति है पहिचान का जो अभ्यागत वह अग्नि की मूर्ति है सब भूत मात्र भगवान् की मूर्ति हैं ॥ ३० ॥

तस्मात्पितृणामार्त्तानामार्तिं परपराभवम् ।
तपसापनयंस्तात ! सन्देशं कर्तुमर्हसि ॥ ३१ ॥
वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुम् ।
यथाऽञ्जसा विजेष्यामः सपत्नांस्तव तेजसा ॥ ३२ ॥
न गर्हयन्ति ह्यर्थेषु यविष्ठाङ्घ्र्यभिवादनम् ।
छन्दोभ्योऽन्यत्र न ब्रह्मन् ! वयो ज्यैष्ठ्यस्य कारणम् ॥ ३३ ॥

ऋषिरुवाच ।

अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः ।
स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ॥ ३४ ॥

विश्वरूप उवाच ।

विगर्हितं धर्मशीलैर्ब्रह्मवर्च उपव्ययम् ।
कथं नु मद्विधो नाथा ! लोकेशैरभियाचितम् ।
प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ॥ ३५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परेभ्यः पराभव एवार्तिस्ताम् ॥ ३१ ॥

सन्देशमाहुः । वृणीमह इति ॥ ३२ ॥

ननूपाध्यायत्वे कनिष्ठस्य ममाभिवन्दनं करिष्यथ तच्च गर्हितं तत्राऽऽहुः । नेति । अर्थेषु प्रयोजननिमित्तं यविष्ठानामभिवादनं न निन्दन्ति । किञ्च । छन्दोभ्यो मन्त्रेभ्योऽन्यत्र वयो ज्यैष्ठ्यस्य कारणं न तु मन्त्रेषु अतोऽस्मभ्यं मन्त्रदातृत्वेन त्वमेव ज्येष्ठो भविष्यसि । यद्वा । छन्दोभ्योऽन्यत्र वेदान्विहाय वय एव ज्यैष्ठ्यस्य कारणं न भवति । किन्तु । वेदा एव मुख्यं कारणं तत्साम्ये तु वयः । वेदज्ञत्वाच्च त्वमेव ज्येष्ठ इत्यर्थः ॥ ३३—३४ ॥

निर्विन्नमपि मद्यान्यभङ्गभयेन करिष्यामीत्याह सार्द्धेन । विगर्हितं पौरोहित्यं धर्मशीलैः अधर्महेतुत्वात् । किञ्च । ब्रह्मवर्च उपव्ययं पूर्वार्जितस्य ब्रह्मवर्चसो व्ययकरम् । प्रत्याख्यातुं च मादृशो नार्हतीत्याह । कथं न्विति । तेषां शिष्यः शिक्षणार्हः । स एव । प्रत्याख्यानाभाव एव हि शिष्यस्य स्वार्थ उच्यते ॥ ३५ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्माद्धे तात ! त्वत्पितॄणामार्तानां पीडितानामस्माकं शत्रुभ्यः पराभवरूपामार्तिं तपसा तपःप्रभावेणापनयन्नस्माकं सन्देशं कर्तुमर्हसि योग्यो भवसि ॥ ३१ ॥

सन्देशमेवाहुः । वृणीमह इति । ब्रह्मिष्ठं ज्ञानिनं तत्रापि ब्राह्मणमत एव सर्ववर्णानां गुरुं त्वामुपाध्यायं वृणीमहे यथा येन प्रकारेणाञ्जसा सुखेनैव तव तेजसा ब्रह्मतेजसा सपत्नान् शत्रून्विजेष्यामः तथानुगृहाणेति शेषः ॥ ३२ ॥

ननूपाध्यायत्वे कनिष्ठस्य ममाङ्घ्र्यभिवादनं कथं करिष्यथ तत्तु गर्हितं तत्राहुः । न गर्हयन्तीति । स्वार्थेषु स्वप्रयोजननिमित्तं यविष्ठाङ्घ्र्यभिवादनं न गर्हयन्ति । हे ब्रह्मन् ! छन्दोभ्योऽन्यत्रैव वेदाध्ययनादिरन्यत्रैव कर्मणि वयः ज्यैष्ठ्यस्य कारणं छन्दोभ्यो मन्त्रेभ्योऽन्यत्र वयो ज्यैष्ठ्यस्य कारणं न तु मन्त्रेष्वतोऽस्मभ्यं मन्त्रदातृत्वेन त्वमेव ज्येष्ठो भवसीति भावः । यद्वा । छन्दोभ्योऽन्यत्र वेदान्विहाय वय एव ज्यैष्ठ्यस्य कारणं न भवति । किन्तु । वेदा एव मुख्यं कारणं तत्साम्ये तु वयः अतो वेदज्ञत्वात्त्वमेव ज्येष्ठ इत्यर्थः ॥ ३३ ॥

एवमुक्तो विश्वरूपो देवानुवाचेत्याह मुनिः । अभ्यर्थित इति । एवं सुरगणैः पौरोहित्यं पुरोहितस्य कर्म प्रति प्रार्थितः । स महातपाः विश्वरूपः प्रहसन् श्लक्ष्णया मृदुया गिरा तान् देवानाह ॥ ३४ ॥

उक्तिमेवाह सार्द्धैस्त्रिभिः । विगर्हितमिति । धर्मशीलैर्विगर्हितं तावद्धर्मशीलाः पौरोहित्यं विगर्हयन्तीत्यर्थः । किञ्च । तत्पौरोहित्यं ब्रह्मवर्चसस्य व्ययकरम् । आर्त्विज्यात् "ब्रह्महन्निष्कृतं वर्चसः" इति समाम्नानाभावः । एवं पौरोहित्यस्य विगर्हितत्वं स्वधर्मनाशकत्वं चाभिधायाधुना तदप्रत्याख्येयं चेत्याह । कथमिति । लोकेशैर्भवद्भिरभियाचितो मद्विधः पितृसेवकः कथं नु तत्प्रत्याख्यास्यति नाम न प्रत्याख्यास्यत्येवेत्यर्थः । मद्विध इत्यनेनाभिप्रेतं विशदयति । तच्छिष्य इति । तेषां शिष्यः शिक्षणार्हः शिष्योऽपि प्रत्या-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ह्यां तत्राह । स एव । प्रत्याख्यानाभाव एव हि शिष्यस्य स्वार्थ उच्यते मद्विधो नाथ इत्येकवचनपाठे नाथां याचितनाथत्वेन युष्मकत्वेन याचितः स एव स्वार्थः इति लोकेशाः शिष्यैर्नियुक्तै इति यतः स एव स्वार्थः परमो लाभ इत्यर्थः ॥ ३५ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वोक्तवाक्यस्य कर्तव्यत्वे हेतुमुक्त्वा निगमयन्ति । तस्मादिति । परेभ्यः शत्रुभ्यः प्राप्तपराभवलक्षणामार्तिमपनयन् ॥ ३१ ॥

त्वा त्वाम् ॥ ३२ ॥

नन्वहं युष्मदुपाध्यायश्चेत्कनिष्ठस्य मम पादाभिवन्दनं निन्दितं भवतामिति तत्राह । नेति । अर्थेषु प्रयोजनेषु यविष्ठस्य कनिष्ठस्य "आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापयति सर्वा देवता वेदविदि ब्राह्मणे निवसन्ति" इत्यादिश्रुतेः । वेदाभिज्ञानमेव ज्येष्ठ्यस्य कारणं न वय इत्याह । छन्दोभ्य इति । अत्र छन्दोभ्य इत्यनेन तदभिज्ञानं लक्ष्यते । वेदाभिज्ञानमन्तरेण ज्येष्ठ्यकारणं वयो न भवति तज्ज्ञानमेतत्सम्भाक्ति तस्मात्त्वदङ्घ्रिप्रवन्दनं न निन्दितं धौम्यादौ पाण्डवादीनां दृष्टत्वादित्यर्थः ॥ ३३ ॥ ॥ ३४ ॥

• धर्मशीलैर्विगर्हितम् (१) पौरोहित्यमिति शेषः । कस्मादिति तत्राह । ब्रह्मेति । ब्रह्मवर्चसः उपव्ययो नाशो यस्मात्तथा पौरोहित्यं ब्रह्मवर्चः उपगतव्ययं प्राप्तनाशं स्यादिति यत्तस्माद्धर्मशीलैर्विगर्हितमिति वा योजना । तर्हि तत्र शक्यमित्युच्यतामितिवत्तत्राह । कथं न्विति । हे नाथाः ! लोकेशैः अभियाचितो मद्विधो विप्रः किं नु प्रत्याख्यास्यति कथमपि न निराकरोतीत्यर्थः । गुर्वाज्ञालङ्घने दोषापत्तेरित्यभिप्रेत्याह । तच्छिष्य इति । परकार्यत्वेन निराकार्यमिति तत्राह । स एवेति ॥ ३५ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तन्त्वलं धर्मोपदेशस्तुतिभ्यां विश्वजितं प्रेत्य आहुः । तस्मादिति ॥ ३१ ॥

त्वा त्वां गुरुं गुरुत्वेन वृणीमहे । प्रयोजनमाहुर्ययेति ॥ ३२ ॥

ननु मां गुरुं कुरुथेति चेत् भ्रातृपुत्रत्वेन कनिष्ठस्य कथं ममाभिवादनं करिष्यथेति तत्राहुः । नेति । छन्दोभ्योऽन्यत्र अन्येषु व्यावहारिककृत्येषु यविष्ठाङ्घ्र्यभिवादनं न गर्हयन्ति न अपि तु गर्हयन्त्येव । यतो वय एव ज्येष्ठत्वस्य कनिष्ठत्वस्य च कारणम् । अधिकवयस्त्वे ज्येष्ठः । अल्पवयस्त्वे कनिष्ठ इति । छन्दस्सु वैदिककृत्येषु नतु तत्र छन्दोज्ञत्वमेव ज्येष्ठत्वस्य कारणमित्यर्थः । तस्मात्त्व वेदज्ञ-

(१) पौरोहित्यं रात्रिकत्वं मासिकपत्यं मठं च ॥ यः करोति स देवोऽपि भ्रातरनानि सप्ततन्तुः इति कौतिपाकौः ।

त्वाधिक्यात् त्वमेवास्माकं पौरोहित्यं कुर्वन् मन्त्रप्रदो गुरुर्भवेति भावः ॥ ३३ ॥ ३४ ॥

धर्मशीलैर्मुनिभिः पौरोहित्यं विगर्हितं यतो ब्रह्मवर्चस ब्रह्मतेजस उपव्ययोऽपचयो यतस्तत् । किञ्च । तथापि भवद्भिर्मम तत् कर्तव्यमेवाभूदित्याह । कथमिति । हे नाथाः ! लोकेशैर्युष्माभिः तच्छिष्यः तेषां युष्माकं शिष्यः । तस्मात् । स एव । प्रत्याख्यानाभाव एव शिष्यस्य स्वार्थः ॥ ३५ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्वा त्वाम् ॥ ३२ ॥

हे ब्रह्मन् । छन्दोभ्योऽन्यत्र वेदाध्ययनादिव्यवहारव्यतिरिक्ते लौकिके व्यवहारे अर्थेषु प्रयोजनेषु यविष्ठाङ्घ्र्यभिवादनं न गर्हयन्तीति न अपि तु गर्हयन्ति हि यतः ज्येष्ठत्वस्य कारणं वयो भवति वयसैव ज्येष्ठः स्वीक्रियते । वेदाध्ययनादिव्यवहारे तु यविष्ठाङ्घ्र्यभिवादनं न गर्हयन्ति अतः पितॄणामपि वैदिकव्यवहारनिर्वाहाय पुत्रोऽपि त्वं गुरुर्भवितुमर्हसीति फलितोऽर्थः ॥ ३३ ॥

अभ्यर्थितः प्रार्थितः श्लक्ष्णया बहुगुणयुक्तया ॥ ३४ ॥

ब्रह्मवर्च उपव्ययं ब्रह्मतेजोनाशकम् । स एव । प्रत्याख्यानाभाव एव शिष्यस्य स्वार्थ उच्यते ॥ ३५ ॥

———

भाषा टीका ।

हे तात ! जिस हेतु से पितर हम लोगों को शत्रु से पराभव होने से जो दुःख है जिसको तुम तपस्या के प्रभाव से दूर करने को हमारी आज्ञा को करने के योग्य हो ॥ ३१ ॥

अब हम लोग ब्राह्मण तुमको उपाध्याय गुरु करके वरण करते हैं जिससे कि तुमारे तेज से शत्रुओं को जीतेंगे ॥ ३२ ॥

हे ब्रह्मन् ! छोटे के चरणों का वन्दन सब व्यवहार कार्यों में निन्दित है तो भी वैदिक कार्यों में निन्दित नहीं है तुम वेद ज्ञानी उत्तम हो तिस से तुमारा चरण वंदन हम करेंगे ॥ ३३ ॥

ऋषि श्रीशुकदेवजी बोले इस प्रकार से पुरोहित कर्म में देवताओं के प्रार्थना करने से यशस्वी विश्वरूप प्रसन्न होकर मधुर वाणी से बोले ॥ ३४ ॥

विश्वरूप बोले यद्यपि पुरोहित कर्म धर्मात्मा पुरुषों ने निन्दित है क्योंकि उसमें ब्रह्म तेज का नाश होता है तो भी आपलोगों के वचन को मैं कैसे नहीं मानूंगा मैं तो आपका शिष्य हूं मेरा तो यही स्वार्थ है ॥ ३५ ॥

———

अकिञ्चनानां हि धनं शिलोञ्छनं तेनेह निर्वर्तितसाधुसत्क्रियः ।
कथं विगर्ह्यं नु करोम्यधीश्वराः ! पौरोधसं हृष्यति येन दुर्मतिः ॥ ३६ ॥
तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् ।
भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥ ३७ ॥

श्रीशुक उवाच ।

तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः ।
पौरोहित्यं वृतश्चक्रे परमेण समाधिना ॥ ३८ ॥
सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया ।
आच्छिद्यादान्महेन्द्राय वैष्णव्या विद्यया विभुः ॥ ३९ ॥
यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः ।
तां प्राह स महेन्द्राय विश्वरूप उदारधीः ॥ ४० ॥
(यां प्रविश्यासुराञ्छश्वत् कक्ष्यां नारायणात्मिकाम् ।
अजैषीद्वृषभस्तात सिंहः क्षुद्रमृगानिव ॥ ० ॥)

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहंस्यां संहितायां
षष्ठस्कन्धे विश्वरूपोपाख्यानं नाम
सप्तमोऽध्यायः ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु पौरोहित्येन धनलाभात्स्वधर्मः सिद्ध्येदन्यथा निर्धनस्य कुतो धर्मः । अत एव तेन लोको हृष्यति तत्राह । अकिञ्चनानां शिलोञ्छनं हि धनम् । क्षेत्रे स्वाम्युपेक्षितकणिशोपादानं शिलम् । हट्टादौ पतितश्रीह्यादेरुपादानमुञ्छनम् । इह गृहाश्रमे । तेनैव निर्वर्तिता साधूनां सत्क्रिया येन ॥ ३६ ॥

कियदेतत्प्रार्थितमल्पमेव । अत्यधिकमपि करिष्यामीत्याह । भवतामिति ॥ ३७ ॥

परमेण समाधिना परमोद्यमेन ॥ ३८ ॥

वैष्णव्या श्रीनारायणकवचात्मिकया ॥ ३९ ॥

असुरचमूर्दैत्यसेनाः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु पौरोहित्ये धनलाभात्स्वधर्मः सिद्ध्येदन्यथा निर्धनस्य कुतो धर्मः अत एव तेन लोको हृष्यतीत्यत्राह । अकिञ्चनानामिति । अकिञ्चनानां निष्कामानां शिलोञ्छनम् "उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्" एतदन्यतरवृत्तिसम्पाद्यमेव हि धनं तेनैव उक्तान्यतरेणैव निर्वर्तिताः निष्पादिताः सत्क्रियाः पञ्चमहायज्ञादिरूपाः क्रिया यैस्तादृशा भवन्ति यतो हे अधीश्वराः ! विगर्हितं पौरोहित्यं पुरोहितकर्माहं कथं नु करोमि येन पौरोहित्येन दुर्मतिर्मूर्खः तुष्यति पौरोहित्यं दुर्मतेस्तोषहेतुरकिञ्चनस्य तु शिलोञ्छनमेवेति भावः ॥ ३६ ॥

तथापि पौरोहित्यस्य गर्हितत्वेऽपि न प्रतिब्रूयां प्रत्याचक्षे यद्यस्माद्गुरुभिः पितृभिर्युष्माभिः प्रार्थितं कियदिति भावः । कियदेतत्प्रार्थितम् इतोऽधिकमपि करिष्यामीति भावः । अतो भवतां सर्वं प्रार्थितं धर्मैस्तपआदिभिः प्राणैश्च साधये प्राणपर्यन्तं यथा सामर्थ्यं साधय इत्यर्थः ॥ ३७ ॥

एवमुक्तैर्देवैर्वृतः पौरोहित्यमकरोद्विश्वरूप इत्याह मुनिः । तेभ्य इति । इतीत्थं तेभ्यो देवेभ्यः प्रतिश्रुत्य प्रतिज्ञाय महातपाः विश्वरूपः देवैर्वृतः पौरोहित्यं सावधानेन चित्तेन कृतवान् ॥ ३८ ॥

(१) अयमधिकः श्रीविजयध्वजतीर्थपाठेऽस्ति ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पौरोहित्यकरणमेवाह । सुरद्विषामिति । औशनस्या उशनसः सम्बन्धिन्या विद्यया गुप्तां रक्षितामपि सुरद्विषां श्रियं वैष्णव्या नारायणवर्मात्मिकया मन्त्रविद्यया आच्छिद्य तेभ्य आकृष्य विभुर्विश्वरूपः महेन्द्राय प्रादात् ॥ ३९ ॥

वैष्णव्या विद्यया आच्छिद्यादादित्युक्तमेवं विवृणोति। ययेति। यद्रक्षितः इन्द्रो यया वैष्णव्या विद्यया गुप्तो रक्षितः अत एव विभुः समर्थो भूत्वासुरसेना अग्रे हतवान् तां विद्यामुदारधीर्धिषणमतिर्विश्वरूपो महेन्द्राय प्राह विश्वरूपोपदिष्टवैष्णवविद्यारक्षितः शक्रः शत्रूञ्जित्वा श्रियं लब्धवानित्यर्थः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदेव स्पष्टमाह । अकिञ्चनानामिति । लूनसस्ये केदारे स्वामिना च परित्यक्ते एकैकावशिष्टमञ्जरीग्रहणं शिलं तादृशे क्षेत्रे एकैकव्रीहिग्रहणमुञ्छनं शिलं चोञ्छनं यस्तेनैव न प्रतिग्रहादिना निर्वर्तिताः साधूनां सत्यः क्रिया अग्निहोत्रलक्षणा यस्य स तथा एवंविधो विगर्हितं पौरोधसं कथं करोमि । दुर्मतिः दुःखितमतिः विषयाकृष्टचित्त इत्यर्थः । येन पौरोहित्येन प्राप्तेन हृष्टो भवति तदिति शेषः ॥ ३६ ॥

गुरुभिः प्रार्थितं कियदिति धिक्कृत्य न करोमीति न वक्ष्मीति कथं तर्हि निर्णय इति तत्राह । भवतामिति ॥ ३७ ॥ ३८ ॥

औशनस्या उशनसः शुक्रस्य विद्यमाना औशनसी तया आच्छिद्य स्वीकृत्य विष्णुर्देवता अस्या इति वैष्णवी तया ॥ ३९ ॥ ४० ॥

कथ्यां कवचलक्षणां रक्षाम् ॥ ० ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु पौरोहित्येन धनलाभात्कर्मः सिद्ध्येत् । अन्यथा निर्धनस्य कुतो धर्मस्तत्राह । अकिञ्चनानां शिलोञ्छमेव धनम् । क्षेत्रे स्वाम्युपेक्षितकणिशोपादानं शिलम् । हट्टादौ पतितव्रीह्यादेरुपादानमुञ्छनम् । येन पौरोधसेन दुर्म्मतिः पुमानेव हृष्यति न तु सुमतिः । यद्वा । मुदा मतिरेव स्वानुकूल्याद् हृष्यति ॥ ३६ ॥

न प्रतिब्रूयां न प्रत्याचक्षे किमप्येतत् प्रार्थितमल्पमेव अभ्यधिकमपि करिष्यामीत्याह । भवतामिति ॥ ३७ ॥

समाधिना विपश्चितामप्रचेता ॥ ३८—३९ ॥

तां वैष्णवीं विद्याम् ॥ ४० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्य सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अकिञ्चनानां शिलोञ्छनं शिलं क्षेत्रे पतितकणिशोपादानं उञ्छनं हट्टादिपतितव्रीह्याद्युपादानं च धनम् । तेनैव निर्वर्तिताः साधु सम्यक् सत्क्रिया येन सोऽहं कथं नु विगर्हितं पौरोधसं पौरोहित्यं करोमि येन पौरोहित्येन दुर्मतिर्हृष्यति धनलोभेन तुष्यति ॥ ३६ ॥ ३७ ॥

तैर्वृतः समाधिना विपश्चितामप्रचेता पौरोहित्यं चक्रे ॥ ३८ ॥ ३९॥

यया गुप्तः विभुः समर्थः सन्नसुरचमूः जिग्ये तां महेन्द्राय सहस्राक्षाय प्राह उदारधीरिति पदेन सा गोपनीयेति सूच्यते ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

सप्तमाध्यायार्थप्रकाशः ॥ ७ ॥

भाषा टीका ।

हे अधीश्वर हो ! अकिंचन ब्राह्मणों का धन तो खेतों में से बाल दूकानों में से दाना बीनना मात्र है उसीसे वह सुन्दर क्रियाओं को करता रहता है जिस पुरोहित पना में खोटे पुरुषको हर्ष होता है तिसको मैं कैसे करूंगा ॥ ३६ ॥

तो भी गुरु लोगों के प्रार्थितको मैं निषेध नहीं करूंगा क्योंकि यह कितनी बडी बात है आपके प्रार्थना किये हुये सब बातों को मैं प्राणों से और धनों से सिद्ध करूंगा ॥ ३७ ॥

श्रीशुकदेवजी बोले वह महातपस्वी विश्वरूप ने वरण करने से सावधान से पौरोहित्यको स्वीकार किया ॥ ३८ ॥

देवतों के शत्रु असुरों ने शुक्राचार्य की विद्या से जो लक्ष्मी

भाषा टीका ।

संपादन की थी उस संपत्ति को वैष्णवी विद्या से छीन कर महेन्द्र को विश्व रूप ने दे दिया ॥ ३९ ॥

जिस विद्या से रक्षित होकर इंद्र ने असुरों की सेना को जीता था उसी विद्या को उदार बुद्धि वाले विश्वरूप ने महेंद्र के अर्थ कथन किया ॥ ४० ॥

जिसनारायण कवच नामकी कवचा को धारण करके इन्द्रने जैसे त्रिलोकीश्वरोंको जीतता है तैसे असुरोंको जीता था सो वही विद्या है ॥ ० ॥

इति श्रीभागवत षष्ठस्कन्ध सातवें अध्याय का भाषानुवाद ब्रह्मचार्यकृत समाप्त ॥ ७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे सप्तमोऽध्यायः समाप्तः ॥ ७ ॥

॥ अष्टमोऽध्यायः ॥

—०:*:०—

राजोवाच

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥
भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।
यथाततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥ २ ॥

श्रीशुक उवाच

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥

विश्वरूप उवाच

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥ ४ ॥
(१)नारायणमयं वर्म सन्नह्येद्भय आगते ।
(२) पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ ५ ॥
मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ।
ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ ६ ॥
करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ।
प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ॥ ७ ॥
न्यसेद्धृदय ओङ्कारं विकारमनु मूर्द्धनि ।
षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ॥ ८ ॥
वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु ।
मकारमस्त्रमुद्दिश्य मन्त्रमूर्त्तिर्भवेद्बुधः ॥ ९ ॥
सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर्दिशेत् ।
ॐ विष्णवे नम इति ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमे विश्वरूपस्तु वर्म नारायणात्मकम् ।
इन्द्राय प्राह येनेन्द्रो गुप्तो दैत्यानथाजयत् ॥ १ ॥
त्रिलोक्याः सम्बन्धिनीं श्रियम् ॥ १ ॥ २ ॥ ३ ॥

मन्त्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां कृतः अङ्गेषु करयोश्च न्यासो येन ॥ ४ ॥

नारायणमयं वर्म सन्नह्येदित्यभिधानात् । तत्राष्टाक्षरेण पादाद्यङ्गेषु न्यासमाह । पादयोरिति सार्धेन ॥ ५ ॥

---

(१) नारायणपरं वर्म) इति श्रीमच्छुकदेवपाठः ।
(२) दैवभूतात्मकर्मभ्यो नारायणमयः पुमान्) इति श्रीवीरराघ० श्रीविजयध्वज० मतेऽयमधिकः पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रणवसम्पुटितमोङ्काराद्येकैकमक्षरं विन्यसेत् । विपर्ययं यथा भवत्येवं शिरआदिपादान्तं वा विन्यसेत् । उत्पत्तिन्यासं संहारन्यासं वा कुर्यादित्यर्थः ॥ ६ ॥

द्वादशाक्षरस्योद्धारः प्रणवादियकारान्तमिति । प्रणवसम्पुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यन्तमङ्गुलिषु परिशिष्टमक्षरचतुष्टयमङ्गुष्ठयोरायन्तपर्वसु न्यसेत् ॥ ७ ॥

मन्त्रान्तरन्यासमाह । न्यसेदिति । षकारणकारयोर्मध्ये षडक्षराणि हृदयादिषु न्यसेत् ॥ ८ ॥

मकारमभ्रुमुद्दिश्य ध्यात्वा ॥ ९ ॥

तन्मकाराख्यं मः अस्त्राय फडित्येवं दिग्बन्धे विनिर्दिशेत् ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वैष्णवीं विद्यां जिघृक्षुः पृच्छति राजा । ययेति द्वाभ्याम् । सहस्राक्षो यया वैष्णव्या विद्यया गुप्तः वाहनैः सहितान् रिपूणां सैनिकान् क्रीडन्निव विनिर्जित्य त्रिलोक्याः सम्बन्धिनीं श्रियं बुभुजे अनुबभूव ॥ १ ॥

तन्नारायणात्मकं नारायणरूपं मन्त्रदेवतयोरभेदाध्यवसायेन नारायणात्मकमित्युक्तम् । यद्वा । नारायण आत्मा प्रतिपाद्यो यस्य सः । अर्थो हि मन्त्रस्यात्मा मम मह्यं हे भगवन् ! आख्याहि उपदिश येन वर्मजापेन यथा आततायिनो जिघांसून् शत्रून्मृधे युद्धेऽजयदिन्द्रः ॥ २ ॥

एवमुक्तो मुनिर्वर्मोपदेष्टुमुपक्रमते । वृत इति । त्वाष्ट्रो विश्वरूपः पुरोहितत्वेन देवैर्वृतः अनुपृच्छते इन्द्राय यन्नारायणाख्यं वर्म नारायणवर्माख्यं मन्त्रमाह उपदिदेश तद्वर्मैकमनाः समाहितचित्तस्त्वं शृणु उपदिशाम्यहमिति शेषः ॥ ३ ॥

उपदेक्ष्यमाणमन्त्रजपस्याङ्गभूतशौचन्यासकथनपूर्वकं विश्वरूपोपदिष्टक्रमेण मन्त्रमुपदिशति । धौतेति । शुचिः कृतस्नानादिकः धौताङ्घ्रिपाणिः प्रक्षालितपादपाणिः पुमान् सलभ्यंपवित्रकर उदङ्मुख उपविश्याचम्य वाग्यतः नियमितवाक् मन्त्राभ्यां नारायणाष्टाक्षरवासुदेवद्वादशाक्षराभ्यां मन्त्राभ्यां कृतः स्वस्याङ्गन्यासः करन्यासश्च येन तादृशः मन्त्राङ्गत्यामिति विष्णुषडक्षरस्याप्युपलक्षणम् । तन्न्यासस्यापि वक्ष्यमाणत्वात् ॥ ४ ॥

दैवभूतात्मनां कर्मभ्य आधिदैविकाध्यात्मिकेभ्यो भये आगते सति स्वयं नारायणध्यानप्रचुरः नारायणमयं नारायणप्रतिपादनप्रचुरम् । यद्वा । नारायणादुपदेशक्रमेणागतं नारायणमयम् "तत आगत" इत्यधिकारे "मयट् च" इति मयट् । वर्म कवचं वर्मवद्रक्षकत्वाद्वर्मेत्युक्तम् । सन्नह्येदधीयाज्जपेदित्यर्थः । कृतस्वाङ्गकरन्यास इत्युक्ताङ्गन्यासकरन्यासावाह । पादयोरिति । यद्यप्यत्र ऋषिच्छन्दोदैवतबीजानि नोक्तानि तथाप्यस्य वर्मणो नारायणमन्त्रत्वादष्टाक्षरस्यान्यत्रोक्तान्येव तान्यूह्यानीति संप्रदायः ओमित्यादि योऽयं नारायणाष्टाक्षरो मन्त्रस्तस्योङ्कारादीन्यष्टाक्षराणि क्रमेण पादद्वयजानुद्वयोरुद्वयोदरहृदयोरःस्थमुखशिरःस्वष्टसु स्थानेषु सबिन्दुकानि प्रणवसम्पुटितानि नमोऽन्तानि विन्यसेत् अथापि वा । यद्वा विपर्ययं न्यसेच्छिरःप्रभृतिपादान्तेष्वष्टसु स्थानेषु क्रमेणोङ्कारादीन्यष्टौ न्यसेदित्यर्थः । यद्वा । अथापिवेति निपातसमुदायः पुनरर्थकः । प्रथमं यकारादीन्यष्टौ विसर्गान् पादादिशिरःपर्यन्तेषु स्थानेषु संहारक्रमेण विन्यस्य पुनः शिरःप्रभृतिषु पादान्तेष्वोङ्कारादीनि सृष्टिक्रमेण विन्यसेदित्यर्थः । एवमङ्गन्यासं विधाय ततः करन्यासं द्वादशाक्षरविद्यया कुर्यात् । द्वादशाक्षरस्य चतुर्थस्कन्धे उक्तत्वाद्द्वादशाक्षरस्वरूपानुक्तिः । कथं कुर्यात्करन्यासमित्यत्राह । प्रणवादीति । प्रणवादियकारान्तानि द्वादशाक्षराणि हस्तयोरङ्गुलिषु तर्जन्यादिषु चतुर्षु चतुर्षु अङ्गुष्ठयोर्द्वयोर्द्वयोः पर्वणोश्च न्यसेदित्यर्थः । तद्यथा ओं नमः तर्जन्यां दक्षिणाङ्गुष्ठप्रथमपर्वणि । ओं नं नमः तदङ्गुष्ठान्त्यपर्वणि । ओं मों नमः तदङ्गुष्ठेन तर्जनीमध्यमपर्वणि । मध्याक्षरमारभ्य तयोः पर्वणोस्तु प्रणवनमःपदैः एवमुत्तरत्रापि द्रष्टव्यम् । ओं भं नमः मध्यमाङ्गुलौ । ओं गं नमः अनामिकाङ्गुलौ । ओं वं नमः कनिष्ठिकाङ्गुलौ । ओं तें नमः वामाङ्गुष्ठाद्यपर्वणि तत्तर्जन्या । ओं वां नमः तदन्त्यपर्वणि । ओं सुं नमः तर्जन्यां तदङ्गुष्ठेन । ओं दें नमः तन्मध्यमायाम् ओं वां नमः तदनामिकायाम् । ओं यं नमः तत्कनिष्ठिकायामिति यथायथमूह्यम् ॥ ५—७ ॥

अथ विष्णुषडक्षरन्यासमाह । न्यसेदिति । प्रत्येकं वर्णन्यासकथनेनैव मन्त्रस्वरूपमप्युक्तप्रायमिति पृथक्तदनुक्तम् । षकारणकारयोर्मध्ये षडक्षराणि प्रणवादीनि मकारान्तानि तानि हृन्मूर्ध्नभ्रूमध्यशिखानेत्रसर्वसन्धिस्थानेषु षट्सु विन्यसेत् ततोऽवशिष्टं मकारं सविसर्गं फडन्तम् ओं नमः फडिति कृत्वा सर्वदिक्षु प्रागाद्यष्टसु दिक्षु ऊर्ध्वाधरयोश्च विनिर्दिशेत् तर्जन्यङ्गुष्ठयोश्छोटिकया दिक्षु न्यसेदित्यर्थः । एवंविधे न्यासे कृते सति बुधो मन्त्रजापकः मन्त्रमूर्तिर्मन्त्रावृत्तियोग्यदेहो भवतीत्यर्थः । यद्वा । मन्त्राश्रयमूर्तिर्भवेत् उक्तमन्त्रत्रयभावितान्तःकरणमूर्तिर्भवेदित्यर्थः ॥ ८ ॥ ९ ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"अकामः सर्वकामो वा मोक्षकामो यजेद्धरिम्" इत्युक्तं प्रपञ्चयत्यनेनाध्यायेन । तत्र राजातीताध्याये संक्षिप्य कथितं नारायणकवचनामस्तोत्रं लोकोपकाराय विस्तरतः श्रोतुं पृच्छति । ययेति । गुप्तो रक्षितः रिपुसैनिकान् शत्रुसेनानायकान् ॥ १ ॥

तदिदमुत्तरश्लोकानुसारेण यथाततायिनः इतीत्थं भावेन श्रोतुं पुनर्वचनम् । यथा येनेत्थंभावेन तमित्थंभावं त्वमाख्याहीति शेषः ॥ २ ॥ ३ ॥

धौतौ प्रक्षालितावङ्घ्री पाणी च यस्य स तथा धौतेत्यारभ्य ओं विष्णवे नम इत्यन्तेन ग्रन्थेन तद्वर्मधारणे इत्थंभावं वक्ति । कृतः स्वाङ्गे करयोश्च न्यासो येन स तथा ॥ ४ ॥

सन्नह्येद्वध्नीयात् दैवाद्भये अनावृष्ट्यादिलक्षणे भूतेभ्य उन्मादादिलक्षणे आत्मकर्मभ्यः कुष्ठभगन्दरादिलक्षणे ॥ ५ ॥

आनुपूर्व्यात्संप्रदायक्रमात् विपर्ययं शिरआदिर्वा करन्यासं संक्षिप्योक्तं विस्तारार्थमाह । करन्यासमिति । ओं नमो भगवते वासुदेवायेतीयं द्वादशाक्षरविद्या ॥ ६ ॥ ७ ॥

न्यसेद्धृदय इत्यादिना षडङ्गान्याह । न्यसेदिति । अत्र ओङ्कारन्यासानन्तरं प्रत्येकमोङ्कारमनुगतं कुर्वीत वा 'कमादीपरि वा तुना वर्णदेवतास्मरणं सूचयति । शिखया शिखायां मुकुटप्रदेशे ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्त्रमसुरनिरासमुद्दिश्य कुर्यादिति शेषः । मन्त्रमूर्तिः मन्त्र-देवतासन्निधानयुक्तदेह इति विसर्गेण सहितं फडित्यक्षरावसा-नमन्त्रम् अन्तं रक्षसां नाशकरं फडक्षरं वा तं मकारं स्वाहा-विसर्जनीयसहितं फडक्षरं चेति वा (१) वत्त्वयोरुक्त्या विष्णवे नम इत्यन्यथा प्रतीतिनिरासाय प्रतीकं पठति । ओं विष्णवे नम इतीति । अनन्तरं ध्येयदेवताप्रकारं निरूपयति । आत्मानमिति । परमा-त्मानं विप्रतिपत्तिनिरासायोक्तं ध्येयमिति । ऐश्वर्यादिषड्शक्तिभिः उत्साहप्रभुमन्त्रज्ञानक्रियेच्छाशक्तिभिर्वा तपो नाम शत्रुसन्तापनश-क्तिमन्तं वा इमं मन्त्रमिति वक्ष्यमाणमोमिति ॥ ६--११ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ययेति युग्मकम् । यया वर्मरूपया विद्यया यथा अजयत् तं प्रकारैश्चाचक्ष्वाहि ॥ १—१७ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नारायणात्मकं वर्म विश्वरूप उपादिशत् ।
शक्रं येनाजयद्दैत्यान् स इत्यष्टम उच्यते ॥
मन्त्राभ्यामष्टाक्षरद्वादशाक्षराभ्याम् ॥ १ ॥ ४ ॥

अत्राष्टाक्षरेण पादाद्यष्टाङ्गेषु न्यासमाह । पादयोरिति सार्द्धेन । प्रणवसंपुटितमोङ्काराद्येकैकाक्षरं विन्यसेत् । विपर्ययं यथा भव-त्येवं शिरआदिपादान्तं वा विन्यसेत् । प्रक्रमेण सृष्टिन्यासं व्युत्क्रमेण संहारन्यासं वा कुर्यादित्यर्थः ॥ ५—६ ॥

प्रणवादीति । प्रणवसंपुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यन्तमङ्गुलीषु परिशिष्टमक्षरचतुष्टयम् अङ्गुष्ठयो-राद्यन्तपर्वसु न्यसेत् ॥ ७ ॥

मन्त्रान्तरेणापि हृदयादिन्यासमाह । न्यसेदिति ॥ ८ ॥

मकारमस्त्रमुद्दिश्य ध्यात्वा तन्मकाराख्यं मः अस्त्राय फडिति एवं सर्वदिग्बन्धे विनिर्दिशेत् ॥ ९ ॥ १० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नारायणवर्म अष्टमेनाध्यायेन प्रकाश्यते । तत्र तावत् नारा-यणवर्म बुभुत्सुः पृच्छति । ययेति । यया नारायणवर्मरूपया विद्यया त्रिलोक्यां या श्रीः संपत्ताम् ॥ १ ॥

नारायणात्मकं नारायण आत्मा विषयो यस्य तत् । मम मह्यमाख्याहि कथय ॥ २ ॥

नारायणः आख्यायते कथ्यते येन तत् ॥ ३ ॥

शुचिः कृतस्नानः पुनर्धौताङ्घ्रिपाणिः उदङ्मुखः आसने उप-विष्ट इति शेषः । सपवित्रः गृहीतकुशः आचम्य विधिवत्कृता-चमनः मन्त्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां कृतः स्वीयेषु अङ्गेषु करयोश्च न्यासो येन सः । नारायणपरं नारायण एव परः साध्योऽर्थो यस्मान्नारायणज्ञापकमित्यर्थः । अनेनैतन्नारायणफलं नारायणप्राप्तिरिति गम्यते । वर्म कवचं संनह्येत् । फलान्तरं दर्शयति । भय आगते इति । अङ्गन्यासाक्षरेण न्यासं कुर्यादि-त्याह । पादयोरिति सार्द्धेन । प्रणवाद्येकैकमक्षरं पादयुग्मादिशि-रोऽन्तेष्वङ्गेषु अनुक्रमेण विन्यसेत् । विपर्ययं यथा भवति तथा शिरआदिपादयुग्मान्तं वा विन्यसेत् । अत्र केवलानामक्षराणां न्यास उक्तः । ऋष्यादिकं च नोक्तम् । यथोक्तस्यैव सर्वपुरुषार्थप्रदत्वात्तथापि यथारुचि यथाशास्त्रं सानुस्वारं प्रणवसम्पुटितं वा नमोऽन्तं वा एकैकमक्षरं तत्र विन्यसेत् । नारायणमन्त्रसम्बन्धि ऋष्यादिकं च ज्ञेयम् । मन्त्रमाह । ॐ नम इति ॥ ४—६ ॥

द्वादशाक्षरेण करयोर्न्यासं कुर्यादित्याह । करन्यासमिति । द्वादशाक्षरं मन्त्रमाद्यन्ताभ्यामक्षराभ्यां सूचयति । प्रणवादिय-कारान्तमिति । एकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनी-पर्यन्तमङ्गुलीषु परिशिष्टानि चतुरक्षराणि अङ्गुष्ठयोराद्यन्तेषु पर्वसु च विन्यसेत् ॥ ७ ॥

मन्त्रान्तरन्यासमाह । न्यसेदिति द्वाभ्याम् । षकारणकारयोर्वि-श्लेषेण न्यासमाह । षकारं भ्रुवोर्मध्ये णकारं शिखया शिखायां वेकारं नेत्रयोर्युञ्ज्यात् नकारं सर्वसन्धिषु करचरणसन्धिषु तदनन्तरं मः अस्त्राय फडित्येवं सविसर्गं मकारं फडन्त-मस्त्रमन्त्रमुद्दिश्य ध्यात्वा सर्वदिक्षु विनिर्दिशेत् तर्जन्यङ्गुष्ठाग्र-योगरूपया छोटिकमुद्रया दिग्बन्धनं कुर्यात् । एवं मन्त्रमूर्तिर्भवे-दित्यर्थः । मन्त्रमाह । ॐ विष्णवे नम इति ॥ ८—१० ॥

———

भाषा टीका ।

षष्ठस्कन्धके आठ वें अध्याय में श्रीनारायण कवच का कथन है तिस में बडे छन्दवाले मिलकर ४३ श्लोक हैं अनु ष्टुप ४८ श्लोक हैं महाराज श्रीपरीक्षितजी प्रश्न करतेहैं कि हेभगवन् शुकदेवजी ! जिस विद्या मन्त्र से रक्षित होने से इन्द्र ने शत्रुओं के सेनापतिओं को वाहनोंके सहित खेलते सरीके जीतकर तीनों लोकोंकी सम्पत्ति का भोग किया है जिससे रक्षित होकर युद्धमें शस्त्रधारि शत्रुओं को इन्द्र ने जीतलिया है उस नारायण कवचको मेरे से कथन करो ॥ १ ॥ २ ॥

श्रीशुकदेवजी बोले हे राजन् ! विश्वरूपको जब देवतों ने पुरोहितपनामें वरण किया तब इन्द्र के पूछने से इन्द्र के अर्थ विश्वरूप ने नारायण कवचका उपदेश किया है मेरे कहनेसे एकाग्रमनहोकर इहांपर तुम सुनो ॥ ३ ॥

विश्वरूपबोले जिस समय में मनुष्यको भयप्राप्तहो तिस समय में पुरुष स्नानादि नित्यकर्मों से पहिले निवृत्त होकरभी हाथ पैरों को धोवै फिर दहिने हाथकी अनामिका अंगुली में कुश या तामा आदि का पवित्र धारण करै फिर कुश मृगचर्मादि के आसनपर उत्तरको मुखकरके बैठे काम क्रोधादि वास-नाओं को छोडकर भीतरकी शुद्धि करै मौनव्रत धारण करै फिर अष्टाक्षर द्वादशाक्षर दोनों मन्त्रों से अङ्गन्यास कर-न्यास दोनों करै ॥ ४ ॥

(१) न्याससमये षकारणकारयोः पृथगुक्त्या ।

आत्मानं परमं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम् ।
विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥ ११ ॥
ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दरारिचर्मासिगदेषुचापपाशान् दधानोऽष्टगुणोऽष्टबाहुः ॥ १२ ॥
जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ।
स्थलेषु मायावटुवामनोऽव्यात्त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३ ॥
दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १४ ॥
रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ।
रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान् ॥ १५ ॥
मामुग्रधर्मादखिलात् प्रमादान्नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबन्धात् ॥ १६ ॥
सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ।
देवर्षिवर्यः पुरुषार्चनान्तरात् कूर्मो हरिर्मां निरयादशेषात् ॥ १७ ॥
धन्वन्तरिर्भगवान् पात्वपथ्याद्द्वन्द्वाद्भयादृषभो निर्जितात्मा ।
यज्ञश्च लोकादवताज्जनान्ताद्बलो गणात् क्रोधवशादहीन्द्रः ॥ १८ ॥
द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाखण्डगणात् प्रमादात् ।
कल्किः कलेः कालमलात् प्रपातु धर्मावनायोरुकृतावतारः ॥ १९ ॥
मां केशवो गदया प्रातरव्याद्गोविन्द आसङ्गवमात्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्तिर्मध्यन्दिने विष्णुररीन्द्रपाणिः ॥ २० ॥

भाषा टीका ।

फिर नारायणमय कवचको शरीर के अवयवों में धारण करै तिससे पहिले नारायण मन्त्रके ओंकारमादि अक्षरों को दोनो पांवों मे दोनो पीडियोमे दोनो जांघों मे उदर में हृदय में वक्षस्थल में न्यास करै ॥ ५ ॥

बाकी दो अक्षरों को मुखमे और मस्तक मे न्यास करै इन आठ स्थानों मे जिस मन्त्र के अक्षरों का न्यास करना है सो मन्त्र विपरीत ऐसा है "यणारानाभोनओम्" इस मन्त्र के अक्षरों का उलटे से अथवा सीधे से न्यास करै ॥ ६ ॥

तिसके पीछे द्वादशाक्षरवासुदेव मंत्र से छः के अक्षरों का अंगूठा तर्जनी मध्यमा अनामिका कनिष्ठा करतलकरपृष्ठ इनों मे न्यास करै फिर हृदय शिर शिखा कवच नेत्र अस्त्र इन स्थानों मे छै अक्षरों का न्यास करै ॥ ७ ॥

षडक्षर विष्णु मन्त्र के ओंकार को हृदय में विकार को मस्तक मे षकार को भौं के मध्यमें णकार को शिखा मे न्यास करै ॥ ८ ॥

वेकार को नेत्रों मे नकार को सर्व सन्धियों में न्यास करै मकार का अस्त्र उद्देश करके साधक पुरुष मन्त्र मूर्तिवाला होजावे ॥ ९ ॥

विसर्ग के सहित फट् इस अक्षर को सब दिशों में न्यास करै उस मन्त्र का स्वरूप "ॐ विष्णवे नमः" इस प्रकारका है ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ध्येयमीश्वररूपमात्मानं ध्यायेत् । षड्शक्तिभिरैश्वर्यादिभिर्भगशब्दवाच्याभिः । विद्या च तेजश्च तपश्च मूर्तिर्यस्य तम् । इमं वक्ष्यमाणं श्रीमन्नारायणकवचाख्यम् ॥ ११ ॥

अष्टगुणोऽणिमाद्यैश्वर्ययुक्तः ॥ १२ ॥

यादसां गणा एव वरुणस्य पाशास्तस्मात् ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अटवी आजिमुखं सङ्ग्रामोपक्रमश्च आदिर्येषां तेषु सङ्कटस्थानेषु ॥ १४ ॥

असौ प्रसिद्धो वराहो मामध्वनि रक्षतु । यज्ञैरवयवरूपैः कल्प्यते निरूप्यत इति तथा । उन्नीता उद्धृता धरा येन सः । अद्रिकूटेषु गिरिशिखरेषु रामो जामदग्न्यः ॥ १५ ॥

उग्रधर्मादभिचारादिलक्षणात् । हासाद्गर्वान्नरोऽवतु । दत्तो दत्तात्रेयः । अयोगाद्योगभ्रंशात् ॥ १६ ॥

पथि यद्देवानां हेलनं नमस्कारमकृत्वा गमनं तस्मात् । पुरुषार्चनस्यान्तराद्देवपूजाच्छिद्राद्द्वात्रिंशदपराधरूपान्नारदः ॥ १७ ॥

लोकाज्जनापवादाद्यः जननिमित्तो योऽन्य उपघातस्तस्माद्बलभद्रोऽवतात् । कृतान्तादिति पाठे कृतान्तात्कालाद्रक्षतु क्रोधवशात्सर्पाणां गणात् अहीन्द्रः शेषः ॥ १८ ॥

कालमलभूतात्कलेः कल्किः धर्मावनाय धर्मरक्षणायोरुर्महान् कृतोऽवतारो येन ॥ १९ ॥

दिनस्य षट्सु भागेषु क्रमेण प्रातरादिसंज्ञेषु रात्रेश्च प्रदोषादिसंज्ञेषु रक्षा प्रार्थनम् । मां केशव इति त्रिभिः । आसङ्गवं सङ्गवमभिव्याप्य ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं कृतस्वाङ्गकरन्यासः परमात्मानं ध्यायन् मन्त्रमावर्तयेदित्याह । आत्मानमिति । परमात्मानं ध्यायेत् कथम्भूतं ध्येयं ध्यातुं योग्यं षाड्गुण्यविग्रहविशिष्टस्य ध्यानेन मनः प्रसन्नं भवेत्तादृशमित्यर्थः । षड्शक्तिभिर्ज्ञानशक्तिबलैश्वर्यवीर्यतेजआत्मिकाभिः शक्तिभिरपृथक्सिद्धप्रकारभूताभिः कार्योपयोगिनीभिर्युतं यावत्स्वरूपं तं युक्तमेवंविधं परमात्मानं ध्यात्वा इमं वक्ष्यमाणं नारायणवर्माख्यं मन्त्रमुदाहरेत् पठेत् मन्त्रं विशिनष्टि । विद्यातेजस्तपोमूर्त्तिं विद्या ज्ञानं तेजः प्रभावस्तपः सत्कर्म विद्यादीनां मूर्त्तिराश्रयः तं विद्यादयो मूर्त्तिः शरीरं यस्येति वार्थः । सर्वज्ञानानां तेजसां तपसां चैतन्मन्त्राभ्यसनात्सर्वज्ञानादिसन्ततिरूपोऽयं मन्त्र इत्यर्थः ॥ ११ ॥

वर्माह । ओमिति । "अवस्यनोङ्कारं पूर्वम्" इति न्यायेन मन्त्रादावोङ्कारः । प्रथमं शरणागतगजेन्द्ररक्षणायावतीर्णं हर्यवताररूपं श्रीनारायणं गजेन्द्रवत्पीडितस्वरक्षणाय प्रार्थयते । हरिरिति । हरत्याश्रितानामार्त्तिमिति हरिः । मम सर्वतो रक्षां विदध्यात्कुर्यात् । मन्त्र एव स्वजापकपुरुषगतं प्रार्थयितृत्वं स्वस्मिन्नारोप्य प्रार्थयते । कथम्भूतः पतगेन्द्रस्य गरुत्मतः पृष्ठे न्यस्तं अङ्घ्रिपद्मं अङ्घ्री पद्मे इव अङ्घ्रिपद्मं येन सः । दरः शङ्खः अरि चक्रं चर्म खेटः असिः खड्गः इत्यादीन् दधानः बिभ्रत् अष्टौ गुणा अणिमादयो यस्य नित्याविर्भूतनिरुपाधिकापहतपाप्मत्वाद्यष्टगुणको वा अष्टौ बाहवो यस्य सः ॥ १२ ॥

एवं सामान्यतो रक्षाविधानं प्रार्थ्याथ जलस्थलादिप्रदेशभेदेन रक्षणोपयुक्तमत्स्यादिमूर्त्तिधरं श्रीमन्नारायणं प्रार्थयते । जलेष्विति । यादसां जलजन्तूनां गणात् एव वरुणस्य पाशस्तस्माज्जलचरदुष्टप्रतिभटः मत्स्यमूर्त्तिर्भगवान् जलेषु मां रक्षतु स्थलेषु निर्जलप्रदेशेषु मायावटुवामनः स्वसङ्कल्पोपात्तवटुवामनरूपः स्थलजदुष्कृतां शास्ता मामव्याद्रक्षतु योऽन्तरिक्षं त्रिविक्रमः त्रयो विक्रमाः पदविन्यासाः लोकत्रयसंग्राहका यस्यात एव विश्वरूपः कृत्स्नविश्वव्याप्तरूपः खसञ्चारिदुष्कृतां शास्ताऽवतु रक्षतु ॥ १३ ॥

अटव्यरण्यमाजिमुखं युद्धोपक्रमश्चादिर्येषां तेषु दुर्गेषु सङ्कटस्थानेषु प्रभुः समर्थोऽसुरसेनानायकानामरिर्नृसिंहः स्वभटप्रतिभटनिरसनशीलः पायात् रक्षतु । नृसिंहं विशिनष्टि । यस्य नृसिंहस्य महान्तमट्टहासं विमुञ्चतः सतः दिशो विनेदुः प्रतिदध्वनुः गर्भाश्च न्यपतन् सर्शसिरे ॥ १४ ॥

असौ प्रसिद्धो वराहमूर्त्तिः मार्गेऽभिमुखमागतदुष्कृद्धिरण्याक्षस्य हन्ता मामध्वनि रक्षतु । कथम्भूतः यज्ञकल्पः यज्ञैः कल्प्यत इति तथा यज्ञावयवकरणेनोपास्यः स्वदंष्ट्रया करणेन उन्नीतोद्धृता धरा भूमिर्येन अद्रिकूटेषु पर्वतशिखरेषु रामो जामदग्न्योऽद्रिकूटस्थदुष्कृतां हन्ता रक्षत्वित्यनुषङ्गः । विप्रवासे परदेशगमनदशायां सलक्ष्मणो भरताग्रजो दाशरथी रामः देशान्तरस्थरावणादीनां हन्ताऽव्यात् ॥ १५ ॥

उग्रधर्मादभिचारादेरविज्ञातप्रमादाच्च नारायणः अभिचारादिनिरसनक्षमनामवान्मूर्त्तिपुत्रः पातु हासाद्गर्वान्नरः गर्वप्रतिभटः मूर्त्तिपुत्रः पातु दत्तो दत्तात्रेयः योगविरोधिनिरसनक्षमो योगाद्योगविरोधिवर्गात्पातु । अयोगेति प्रार्थनानन्तरारम्भार्थकम् योगनाथः योगेश्वरो गणानां सिद्धगणानामीशः कपिलः ज्ञानप्रदानेन कर्मबन्धनिरासकः कर्मबन्धात् दुरितकर्मबन्धात्पायादव्यात् । गणेशभीनि गणाः प्रकृतिमहदहङ्कारादितत्त्वानां याथात्म्यविवेचनेन गणयितारस्ते सांख्यास्तेषामीश इति वार्थः ॥ १६ ॥

कामदेवान्मदनात्सनत्कुमारोऽस्पृष्टकामः अवतु पथि देवहेलनात् देवानां हेलनं परिहासस्तस्माद्धयशीर्षः वेदापहरणादिना चतुर्मुखादिदेवहेलनं कुर्वतां मधुकैटभादीनां हन्ता मामवतु पुरुषस्य भगवतोऽर्चनमाराधनं तस्यान्तरात् छिद्रात् देवर्षिवर्यः नारदः अविच्छिन्नभगवदाराधनपरः पातु । अशेषान्निरयान्नरकात्कूर्मो हरिराश्रितार्त्तिहा अधस्तान्मग्नानामुद्धारकः ॥ १७ ॥

अपथ्याद्धन्वन्तरिः भिषक्श्रेष्ठः पातु । द्वन्द्वाच्छीतोष्णादेः ऋषभः निर्जितः आत्मा मनो येन जितान्तर्बाह्येन्द्रियः शीतोष्णादिद्वन्द्वानां तत्सहिष्णुः पातु । लोकाज्जनापवादात् यज्ञः विष्णुः "यज्ञो वै विष्णुः" इति श्रुतेः । सर्वजनान्तरात्मा पातु । उत अपि तत्कृतान्तात् तेन जनेन कृतोऽन्तः उपघातस्तस्माद्बलो बलभद्रः दुर्जनकृतोपघातहा पातु । नः कृतान्तादिति पाठे तु कृतान्तान्मृत्योर्बलभद्रो मृत्युहा नः पात्वित्यर्थः । क्रोधवशात् सर्पाणां गणात् अहीन्द्रः शेषः पातु ॥ १८ ॥

अप्रबोधादज्ञानाद्भगवान् द्वैपायनः ज्ञानदः पातु । अत्र नरनारायणकुमारदेवर्षियज्ञहयग्रीवद्वैपायना अंशावताराः जामदग्न्यकपिलधन्वन्तर्यृषभमाद्यावेशावताराः इतरे पूर्णाः । अंशत्वेऽपि आविर्भाव आवेशः केचित्पूर्णाः साक्षादाविर्भावोऽशः प्रमादात् मोहजनकात्पाषण्डगणात् बुद्धः अन्यमोहपाषण्डगणहा । कालमलभूतात् कलेः कल्किः कालमलकलिहा प्रपातु । कल्किं विशिनष्टि । धर्मावनाय धर्मरक्षणाय उरुमहान् कृतः अवतारो येन सः ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ प्रातरादिकालेषु दिनस्य षट्सु भागेषु केशवादिमूर्तिभ्यो रक्षां प्रार्थयते । मामिति । केशवः गदया युक्त इति शेषः । प्रातर्मामव्यात् आत्तः धृतः वेणुर्येन स गोविन्दः आसङ्गवं सङ्गवकालमभिव्याप्य सङ्गव उदयानन्तरकालः उदात्ता उद्यता शक्तिरायुधविशेषो येन सः श्रीमन्नारायणः प्राह्णे पूर्वाह्णे अरीन्द्रपक्षकराजः स पाणौ यस्य सः विष्णुः मध्यन्दिने मध्याह्ने पातु रक्षतु ॥ २० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरिर्विदध्यादित्यादिना नारायणाख्यं कवचमुच्यते अणिमाद्यष्टगुणो वा व्याप्तगुणो वा अशूङ् व्याप्ताविति धातुः शुभलक्षणं गुणमेव भुङ्क्ते नत्वशुभलक्षणं दुःखमिति वाष्टगुणः अश् भोजन इति धातुः "शुभं पिबत्यसौ नित्यं नाशुभं स हरिः पिबेत्"इत्यादेः ॥ १२ ॥

"यादांसि जलजन्तवः" इत्यतो वरुणपाशस्य यादोगणान्तर्भूतत्वेऽपि तद्ग्रहणस्य मरणाविनाभूतत्वेन तत्परिहारार्थं पृथग्ग्रहणं मध्नाति हिंसतीति मदसुरस्तं स्यति नाशयतीति मत्स्यः "मथि" हिंसायां शिरो ममन्थ तरसेतिप्रयोगाच्च इतरस्तु मथित्वा विलोड्य सरतीति मत्स्यः "मन्थविलोडने" इति धातुः सुगमादित्यस्मात् क्यप्रत्ययः । मायया इच्छया गृहीतवटुवामननाममूर्तिर्विश्वरूपः स्थूलरूपः ॥ १३ ॥

अटवी च आजिश्च मुखश्चादिर्येषां तानि तथा तेषु गर्भो असुरस्त्रीणामिति शेषः ॥ १४ ॥

अध्वनि मा मां स्वदेहेन यज्ञं कल्पयतीति यज्ञकल्पः यज्ञो विष्णुस्तत्समः स एवेत्यतो वा रामः परशुरामः विविधप्रवासे भरताग्रजः दाशरथी रामः ॥ १५ ॥

छन्दःसाम्यद्योतनाय उन्मत्ता अखिलप्रमादादित्युक्तम् । नरनामा विष्णुः हासादुन्मादकृतहासात् प्रयोगान्नारायणस्मरणाद्युपायैकत्वात् ॥ १६ ॥

सनत्कुमारो ब्रह्मचारिवपुः ब्रह्मपुत्रसनत्कुमाराविष्टः ।

सनत्कुमारनामा तु ब्रह्मचर्यवपुर्हरिः ।
सनत्कुमारमपरं ब्रह्मपुत्रं विवेश यः ।
स मां योग्येतरात्कामात्पातु विश्वेश्वरः प्रभुः ।

इतिवाक्यमत्रमानं कामानयोग्यान् मद्यादिविषयान् देवयति गमयति आत्मनीति देवः तस्माद्देवर्षिवर्यः महिदासः पुरुषान्तरार्चनात् विष्णोः परिवारत्वमन्तरेण प्राधान्येनान्यदेवतार्चनादोषात् ।

महिदासस्तु देवर्षिः पातु मां विष्णुरव्ययः ।
तदनर्पितकर्मभ्यस्तदस्मरणातस्तथा इति ।

अनेन हर्यनर्पितार्चनालक्षणाकर्मणः तथा तदस्मरणपूर्वकार्चनाच्च "महिदासस्तु देवर्षिः पातु मां विष्णुरव्ययः । तदनर्पितकर्मभ्यस्तदस्मरणातस्तथेतिवाक्यद्योतनाय महिदासेति प्रसिद्धनाम मुक्त्वा देवर्षिवर्यं इत्यवादि अनेन वैष्णवानामेवात्राधिकारो नान्येषां तेषामेव विशेषस्मरणज्ञानपूर्वैरिति सूचितम् । कोऽपि पुरुषार्चनान्तरादित्यनूद्यान्तरायवाचित्वमन्तरशब्दस्योचुस्तदिन्त्यम् "अन्तरः परिधानीये बाह्ये स्वीयेऽन्तरात्मनि" इत्यादौ एवं प्रयोगात् ॥ १७ ॥

शरीररोगजनकादपथ्यद्रव्याज्जितात्मा वशीकृतेन्द्रियग्रामः तत्कृताद्यज्ञकर्मार्पादितादनित्यफलात्स्वर्गादेर्यज्ञनामा यज्ञप्रवर्तको विष्णुः । बलः बलभद्रः स एवाहीन्द्रशेषनामा "शेषदेवः सहस्राक्षः सहस्राङ्घ्रिशिरोभुजः" इत्यादेः "बलं शक्तौ बलो रामे बलिष्ठे च बलस्तथा,,इत्यभिधानात् बलिष्ठोऽहीन्द्र इति वा ॥ १८ ॥

धर्मावनाय धर्मपरिपालनाय उरु प्रपातु भूयो भूयो रक्षत्वित्यर्थः ॥ १९ ॥

प्रातरारभ्य पञ्चभिः पञ्चभिर्घटिकाभिः अहोरात्रविभागं कृत्वा तत्रैकैकां मूर्तिं सङ्कल्प्याह । मां केशव इति । गोष्ठेभ्यो निर्गत्य यदैकत्र गावः संयुज्यन्ते स काल आसङ्गवस्तस्मिन्काले ॥ २० ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यज्ञश्च लोकादित्यत्र बलदेवस्य शेषादन्यत्र कृतान्तादित्यधिकशक्तित्वं दर्शितम् । जनान्तादिति पाठे जनानामन्तान्नाशादिति स एवार्थः ॥ १८ ॥ १९ ॥

मां केशव इति सार्धकम् । अनेन मथुरावृन्दावननाथयोर्नित्यप्रकाशत्वं दर्शितम् । प्रातरादयः काला एवं युज्यन्ते । प्राह्णस्तावत् प्रथमभागः प्रातःसङ्गवौ तु तस्यैवांशौ मध्याह्नो मध्यभागः । तृतीयभागस्त्वपराह्णः सायंसन्ध्याभ्यामवान्तरभेदभेदभिन्नः रात्रौ च प्रदोषः प्रथमभागः मध्यभागो निशीथः अर्धरात्रस्तु तत्रापि मध्यमघटिकाद्वयम् । अपररात्रस्तु तृतीयो भागः । तस्यैवान्तिमांशद्वयं प्रत्यूषप्रभातसंज्ञम् । यथा सन्ध्याश्च तदवान्तरभेदा अपि पृथग्गण्यन्त इति । क्रमगणनायां तु मध्याह्नाद्यतिक्रमापत्तेः प्राह्णस्तु स्मृतौ न भिन्नत्वेन गण्यते । तथा हि "मुहूर्तत्रितयं प्रातस्तावानेव तु सङ्गवः । मध्याह्नस्त्रिमुहूर्तोऽथ अपराह्णोऽपि तादृशः । सायाह्नस्त्रिमुहूर्तः स्यात् सर्वकर्मसु गर्हित" इति ॥ २०—३० ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ध्येयमीश्वररूपमात्मानं ध्यायेदित्यन्यैरपृष्यत्व कामनया अहंग्रहोपासना । विद्या तेजस्तपांसि मूर्तिर्यस्य तमिमं मन्त्रं नारायणकवचाख्यम् ॥ ११ ॥

समुद्रेण सह नदीनदादिवत् ध्येयरूपेण सहैक्यं प्राप्तोऽपि पृथग्भूयापि तिष्ठन् स्वरक्षाप्रार्थनमन्त्रमुदाहरेदित्याह । हरिरिति । अष्टगुणः अणिमाद्यष्टैश्वर्ययुक्तः ॥ १२ ॥

सामान्येन सर्वतो रक्षां प्रार्थ्य देशविशेषेषु तत्तदधिष्ठातृस्वरूपेण भगवतो रक्षामन्त्रानाह । जलेष्विति त्रिभिः । यादसां गणा एव वरुणस्य पाशास्तस्मात् ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

आजिमुखं युद्धसम्मुखप्रदेशः ॥ १४ ॥

यज्ञकल्पः यज्ञस्वरूपः स्वार्थिकः कल्पप्। यद्वा। यज्ञाः कल्पाः समर्था यतः सः। रामो जामदग्न्यः ॥ १५ ॥

अपरोद्भवेभ्यः उपद्रवेभ्यः। रक्षामन्त्रानाह चतुर्भिः। उग्रधर्मोऽभिचारादेः। हासात् गर्वात्। अयोगात् योगभ्रंशात् ॥ १६ ॥

कामदेवात् कन्दर्पवेगात्। पथि यद्देवहेलनं नमस्कारमकृत्वैव गमनम्। पुरुषार्चनस्यान्तरात् देवपूजाच्छिद्रात् द्वात्रिंशदपराधरूपादित्यर्थः ॥ १७ ॥

लोकाज्जनापवादात् जनान्तात् जनहेतुकोऽन्त उपघातस्तस्मात् कृतान्तादिति च पाठः। क्रोधवशात् सर्पाणां गणात् महीन्द्रः शेषः ॥ १८ ॥

कालमलरूपात्। कल्केः कल्किः कीदृशः धर्मावनेत्यादि ॥१९॥

कालविशेषेषु तत्तदधिष्ठातृस्वरूपेण भगवतो रक्षामन्त्रानाह। मामिति त्रिभिः। केशवो मथुराधिपतिः। प्रातर्दिनस्य पञ्चमघटिकापर्यन्तम्। गोविन्दो वृन्दावनाधिपतिः। आसङ्गवं षष्ठघटिकामारभ्य दशमघटिकापर्यन्तम्। एकादशघटिकामारभ्य पञ्चदशघटिकापर्यन्तः प्राह्णस्तत्र। षोडशघटिकामारभ्य विंशतिघटिकापर्यन्तं मध्यन्दिनं तत्र। मधुरीन्द्रपाणिः चक्रहस्तः एकविंशतिघटिकामारभ्य पञ्चविंशतिघटिकापर्यन्तमपराह्णस्तत्र। षड्विंशतिघटिकामारभ्य त्रिंशद्घटिकापर्यन्तं सायं तत्र। अयः सच्चिदानन्दा धामानि यस्य सः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

आत्मानमंशभूतं परममंशिनं ध्यायेत्। अंशभूतोऽहमंशिपृथक्स्थितिप्रवृत्त्याद्यभावात्तदभिन्नोऽस्मीति चिन्तयेत्। परमं विशिनष्टि। ध्येयमुपास्यम्। षड्भिः।

> ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
> ज्ञानवैराग्ययोश्चापि षण्णां भग इतीङ्गना ॥

इति स्मृतिप्रोक्ताभिर्युक्तं विद्यादयो मूर्त्तयः शरीरवत् प्रिया यस्य। सः इमं श्रीनारायणकवचरूपं मन्त्रमुदाहरेदावर्त्तयेदित्यर्थः ॥११॥

अष्टौ अणिमादिरूपा गुणा यस्य सः। मम रक्षां विदध्यात् करोतु ॥ १२ ॥

एवमात्मनः सामान्यतो रक्षां प्रार्थ्य जलस्थलादिषु तत् प्रार्थ्यते। जलेष्वित्यादित्रिभिः। मायया भक्ताघविनाशिन्या कृपया बटुवामनः बालस्वरूपः ॥ १३ ॥

अटवीषु आजिमुखेषु युद्धाग्रभागेषु आदिना अन्यान्यापत्प्रदेशेषु ॥ १४ ॥

यज्ञाः कल्पाः फलदाने समर्थाः यस्मात्सः। यज्ञैः सादृश्येनोपासनार्थं कल्प्यते निरूप्यते इति वा यज्ञकल्पः ॥ १५ ॥

स्वापरहेतुकोपद्रवेभ्यो रक्षां प्रार्थयते। मामिति चतुर्भिः। उग्रधर्मादभिचारादिरूपात्। प्रमादात् अनवधानतः। हासात् गर्वात् अयोगात् योगविच्छेदात् ॥ १६—१८ ॥

प्रमादात् बुद्धिमोहाद् यः पाखण्डगणः प्रवर्त्तते तस्मात्। कालमलात् कल्केः ॥ १९ ॥

कालभेदेषु रक्षां प्रार्थयते। मां केशव इति त्रिभिः। तत्र दिनस्य षड् भागाः प्रातरादिशब्दार्थाः। तत्र प्रातः केशवः मधुरीन्द्रपाणिः चक्रपाणिः ॥ २० ॥

भाषाटीका

छै ऐश्वर्य वाली शक्तियों से सहित विद्या तेज तप इनों की मूर्तिवाले ध्यान के योग्य भगवान् का ध्यान करै फिर इस मन्त्र का उच्चारण करै ॥ ११ ॥

शङ्ख चक्र ढाल तरवार गदा बाण धनुष पाश इन आयुधों को धारण किये आठ भुजों के सहित अणिमादिक आठ ऐश्वर्यों के सहित भगवान् गरुडजी के पीठ पर चरण कमल को स्थापन किये हुये श्री हरि मेरी सब प्रकार से रक्षा करैं ॥ १२ ॥

जलों के मध्य में जलचर जन्तुओं से वरुण के पास से मत्स्यमूर्ति भगवान् मेरी रक्षा करैं स्थलों में माया से बटुवामन मेरी रक्षा करैं आकाश में विश्वरूप त्रिविक्रम रक्षा करैं ॥ १३ ॥

जिनके अट्टहास के छोडने से सब दिशा शब्दाय मान होगई और असुर स्त्रियों के गर्भ गिर पडे वे प्रभु असुरों के यूथ के पति हिरण्यकशिपु के विदारण करने वाले नृसिंह भगवान् पर्वतादि दुर्गम स्थानों में तथा युद्धों में मेरी रक्षा करैं ॥ १४ ॥

अपने डाढों पर पृथिवी को उठा लाने वाले यज्ञ मूर्ति ए भगवान् वाराहजी मार्ग में मेरी रक्षा करैं पर्वतों के शिखरों पर परशुरामजी रक्षा करैं परदेश में भरतजी के बड़े भ्राता श्री रामचन्द्रजी लक्ष्मणजी के सहित हमारी रक्षा करैं ॥१५॥

सम्पूर्ण मन्त्रादि द्वारा मारण करने से और सब प्रमादों से नारायण मेरी रक्षा करैं अभिमान के पाप से नर भगवान् रक्षा करैं योग के भ्रष्ट होने से योगनाथ दत्तात्रेयजी मेरी रक्षा करैं कर्म बन्ध से गुणों के ईश कपिल भगवान् रक्षा करैं ॥ १६ ॥

काम के वेग से सनत्कुमार मेरी रक्षा करैं भगवन्मन्दिर के सामने नमस्कार नहीं करके रस्ता में चलेजाने के पाप से हयग्रीव भगवान् रक्षा करैं नारायण के पूजन में अपराधों से नारद भगवान् रक्षा करैं सम्पूर्ण नरकों से कूर्म भगवान् मेरी रक्षा करैं ॥ १७ ॥

अपथ्य पदार्थों के भक्षण से धन्वन्तरि भगवान् मेरी रक्षा करैं शीतोष्णादि दुःखों से शरीर मन के जीतने वाले भगवान् ऋषभदेव जी रक्षा करैं लोकापवाद से यज्ञ भगवान् रक्षा करैं मनुष्यों के आघात से बलदेव भगवान् रक्षा करैं क्रोध वश सर्पादिकों के गण से शेष भगवान् रक्षा करैं॥१८॥

अज्ञान से व्यास भगवान् रक्षा करैं पाखण्ड बुद्धि से प्रमाद से बुद्ध भगवान् रक्षा करैं कालों से मलिन कलिके दोष से कल्कि भगवान् रक्षा करैं जिनोंने कि धर्म की रक्षा करने के निमित्त बहुत अवतार धारण किये हैं ॥ १९ ॥

देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ २१ ॥
श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ॥ २२ ॥
चक्रं युगान्तानलतिग्मनेमि भ्रमत् समन्ताद्भगवत्प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥ २३ ॥
गदेऽशनिस्पर्शनविस्फुलिङ्गे ! निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि ।
कूष्माण्डवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥ २४ ॥
त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ।
दरेन्द्र ! विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन् ॥ २५ ॥
त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिन्धि छिन्धि ।
चक्षूंषि चर्मन् ! शतचन्द्र ! छादय द्विषामघोनां हर पापचक्षुषाम् ॥ २६ ॥

यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च ।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा ॥ २७ ॥
सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ।
प्रयान्तु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः ॥ २८ ॥
गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः ।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ २९ ॥
सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ।
बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः ॥ ३० ॥

भाषा टीका ।

प्रातः काल में केशव भगवान् गदा से मेरी रक्षा करैं दूसरे आसंगव भाग मे वेणु धारण किये गोविन्द भगवान् मेरी रक्षा करैं तीसरे प्राह्ण काल में शक्ति को धारण किये नारायण मेरी रक्षा करैं दिन के मध्य भाग में चक्रधारी विष्णु भगवान् मेरी रक्षा करैं ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रिधामा ब्रह्मादित्रिमूर्तिः श्रीमाधवः । दोषे प्रदोषे । अर्धरात्रे अर्धरात्रिपर्यन्ते । काले निशीथे चैक एव पद्मनाभोऽवतु ॥ २१ ॥

अपररात्रे ईशः श्रीवत्सधामावतु । प्रत्यूष ईशः श्रीजनार्दनः । श्रीदामोदरः प्रभाते । श्रीविश्वेश्वरोऽनुसन्ध्यं प्रतिसन्ध्यम् ॥ २२ ॥

युगान्तानलवत्तिग्मा तीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सदरिसैन्यं दन्दग्धि दन्दग्धि अतिशयेन दहति । तस्यायं स्वभाव एव न तु तस्मात्प्रार्थनीयमित्यर्थः । यद्वा । दन्दग्धीति लोटमध्यमपुरुषः । अत्र त्वमेवंभूतं चक्रमिति स्वरूपमुक्त्वा सम्बोध्य प्रार्थ्यतेऽतिशयेन दहेति । कक्षं शुष्कतृणम् ॥ २३ ॥

अशनिवत्स्पर्शो येषां ते विस्फुलिङ्गा यस्यास्तस्याः सम्बोधनं हे गदे ! त्वमजितस्य प्रियासि । अहमच्युतस्य दासः । अतः कूष्माण्डादीन्निष्पिण्ढि निष्पिण्ढि सञ्चूर्णय सञ्चूर्णय । अरींश्च चूर्णय चूर्णय । सर्वत्र वीप्सातिशीघ्रत्वाय ॥ २४ ॥

हे दरेन्द्र पाञ्चजन्य ! त्वं यातुधानादीन्विद्रावय विप्रग्रहा ब्रह्मराक्षसा येऽन्ये च घोरदृष्टयस्तान् ॥ २५ ॥

तिग्मा धारा यस्य हे तिग्मधार असिवर खड्गश्रेष्ठ ! त्वं ममारिसैन्यं छिन्धि छिन्धि शतं चन्द्राकाराणि मण्डलानि यस्मिन् हे शतचन्द्र चर्मन् ! अघोनामघवतां द्विषां चक्षूंषि छादय पापचक्षुषां चोग्रदृष्टीनां चक्षूंषि हर ॥ २६ ॥

यत् । येभ्यो भयम् । अंहोभ्यः पापेभ्यः ॥ २७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रेयःप्रतीपका इष्टव्याघातकाः ॥ २८ ॥

स्तोत्राणि बृहद्रथन्तरादिसामानि तैः स्तोऽयते संस्तूयत इति स्तोत्रस्तोभः छन्दोमयो वेदमूर्तिः "सुपर्णोऽसि गरुत्मान्" इत्यादिश्रुतेः । एकैपद्यपाठे स्तोभा गीतिपूरकाक्षराणि स्तोत्रस्तोभेति पाठे सामाधारभूत ऋक् स्तोमः ॥ २९ ॥

नामानि च रूपाणि च यानानि च वाहनानि आयुधानि च नो बुद्ध्यादीन् पान्तु पार्षदभूषणाः पार्षदमुख्याश्च पान्तु ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उग्रं धनुर्यस्य स मधुहा मधुसूदनः स्वतेजसा दीप्यमानः अपराह्णे त्रीणि धामानि तेजांस्यभिव्यक्तिस्थानानि यस्य "नाग्निं ब्राह्मणं चैव त्रीणि तेजांसि न स्पृशेत्" इत्युक्तत्रीणि तेजांस्यत्र विवक्षितानि । यद्वा । वोनिहृदगर्भादिरूपाणि त्रीणि धामानि स्थानानि यस्य सः । माधवः सायङ्काले मामवतु । दोषे प्रदोषे हृषीकेशः । अर्धरात्रपर्यन्तकाले निशीथे एकः पद्मनाभोऽवतु ॥ २१ ॥

अपररात्रे श्रीवत्सचिन्हः ईशः श्रीधरः पातु प्रत्यूषे असिधरः खड्गधरो जनार्दनः पातु । अनुसन्ध्यं प्रतिसन्ध्यं दामोदरः पातु । प्रभाते भगवान् कालशरीरको विश्वात्मा पातु । अत्र केशवादिद्वादशमूर्तीनां मध्ये वामनत्रिविक्रमयोर्गोपालवामनोऽव्यात् त्रिविक्रमः खेऽवत्विति रक्षकत्वेन प्रार्थितत्वात्तयोरत्रानुक्तिः । नारायणमूर्तेरकरस्य युधविशेषविशिष्टस्यात्र रक्षितृत्वं प्रार्थ्यत इति न पौनरुक्त्यम् । क्रमस्त्वविवक्षितः । प्रातःप्रत्यूषप्रभातशब्दा भूतभविष्यद्वर्तमानदिनावयवप्रातःकालपराः ॥ २२ ॥

अथ भगवतोऽस्त्रायुधनिरासकत्वेन प्रार्थ्यते । चक्रमित्यादिना । युगान्तानलतिग्मनेमि यस्य तच्चक्रं भगवता प्रयुक्तं सदरीणां सैन्यं दन्दग्धि अतिशयेन दहति । अरिसैन्यदाहकत्वं तस्य स्वभाव एवेति न तत् प्रार्थनीयमिति प्रथमपुरुषनिर्देशः । दहने दृष्टान्तः । वायुसखोऽग्निः कक्षं शुष्कं तृणं यथेति ॥ २३ ॥

अशनिवत् स्पर्शो येषां ते विस्फुलिङ्गाः यस्यास्तस्याः सम्बोधनं हे गदे ! त्वमजितस्य भगवतः प्रियासि तस्य दासः । अतः कूष्माण्डादीन् निष्पिण्ढि निष्पिण्ढि आभीक्ष्ण्ये द्विर्वचनमतिशीघ्रत्वद्योतनाय वीप्सायां वा । पुनःपुनर्निरतरां पेषयेत्यर्थः । तथारीन् शत्रून् पुनः चूर्णय ॥ २४ ॥

हे दरेन्द्र ! शङ्खराज ! पाञ्चजन्य ! त्वं कृष्णेन भगवता पूरितः भीमः भयङ्करः स्वनो ध्वनिर्यस्य तादृशः शत्रोर्हृदयानि कम्पयन् यातुधानादीन् प्रहविशेषान् येऽन्ये च घोरदर्शनाः तान् विद्रावय पलायितान् कुरु ॥ २५ ॥

तिग्मा तीक्ष्णा धारा यस्य सखासाविवरश्च तस्य सम्बोधनं त्वम् ईशेन भगवता प्रयुक्तः ममारिसैन्यं छिन्धि छिन्धि शतचन्द्राश्चन्द्राकाराणि मण्डलानि यस्मिन् हे शतचन्द्र ! चर्मन् खेट ! अघवतां द्विषां चक्षूंषि छादय पापचक्षुषामुग्रदृष्टीनां चक्षूंषि हर ॥ २६ ॥

ग्रहादिभ्यो यद्भयं नोऽस्माकमभूत्तानि सर्वाणि भयानि भगवतो नामरूपायुधवाहनानि तेषां कीर्तनात् । यद्वा । कीर्तनं स्मरणस्याप्युपलक्षणम् । भगवतो नाम्नां कीर्तनाद्रूपाणां दिव्यमूर्तीनामस्त्राणां च स्मरणात् । संक्षयं नाशं सद्य एव यान्तु प्राप्नुवन्तु । तत्र केतवो धूमकेत्वादयः । नरश्चौरादयः सरीसृपाः सर्पाद्यभावाः दंष्ट्रिणः श्वापदादयः अघानि पापस्वभावानि भूतानि तथा येऽन्ये श्रेयस इष्टस्य प्रतीपकाः विघातकाः तेऽपि संक्षयं यान्तु ॥ २७ ॥ २८ ॥

स्तोत्राणि बृहद्रथन्तरसामादीनि तैः स्तोऽयते स्तोत्रावयवत्वेन स्तूयत इति तथा । छन्दोमयः छन्दःप्रचुरः प्रभुः समर्थो भगवान् गरुडः स्तोभस्तोत्रछन्दोमय इति पाठे स्तोभानि गीतपूरकाक्षराणि तदुक्तानि स्तोत्राणि छन्दांसि बृहदादीनि गीत्याधारभूतानि छन्दांसि तत्प्रचुरः तदवयवकत्वमाधुर्यानुसन्धेय इत्यर्थः । विष्वक्सेनोऽपि अशेषापद्भ्यो रक्षतु स्वनामभिर्विष्वक्सेनो रक्षतु ॥ २९ ॥

तथा हरेर्नामानि रूपाणि च यानानि वाहनानि च तथा पार्षदप्रवरा भूषणानि च मम बुद्ध्यादीन् पान्तु ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दोषे रात्रिभोजनकाले रात्रिसामान्यविवक्षायां दोषशब्दोऽव्ययवाची स्त्रीलिङ्गो वा रात्रिविशेषकालविवक्षायां पुंलिङ्गः । निशीथात्पूर्वयामोऽर्धरात्र उच्यते तस्मिन् काले निशीथे पञ्चदशघटिकात्मके एकः पद्मनाभ एवावतु ॥ २१ ॥

प्रत्यूषे अरुणोदयप्रारम्भे अनुसन्ध्यं सन्ध्यानिकटे प्रभाते सूर्योदयासन्नसमये ॥ २२ ॥

युगान्ताग्निरिव तिग्मा तीक्ष्णा नेमिर्यस्य तत्तथा । चक्रमुक्त्वा सम्बोधयति । दन्दग्धीति । हे सुदर्शन ! अरिसैन्यमाशु दन्दग्धि अतिशयेन दह अनेन ।

सुदर्शन ! महाज्वाल ! कोटिसूर्यसमप्रभ !

अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय । इति

मन्त्रोऽर्थत उक्तः ॥ २३ ॥

"स्पृश उपताते" इति धातोः स्पर्शनं तपनम् अशनिवद्धिर्घोषवत्स्पर्शनात्तापकरा विस्फुलिङ्गा अग्निकणा यस्याः सा तथा अशन्योर्वज्रयोः स्पर्शनेन सङ्घट्टनेन जाता ये विस्फुलिङ्गा यस्याः सा तथा इति वा सम्बन्धेन अशनिशब्देन मेघवह्निर्लक्ष्यते तस्य स्पर्शनवद्दुःसहा विस्फुलिङ्गा यस्याः सा इति वा तस्याः सम्बुद्धिः अशनिस्पर्शनविस्फुलिङ्गे हे गदे ! निष्पिण्ढि छिन्नं पिष्टं कुरु निष्पिण्ढीति पाठे "पिषि पेषणे" इत्यस्य रूपम् ॥ २४ ॥

दरेन्द्र शङ्खश्रेष्ठ ! यातुधानादिरिपुवत् (१) घोरा दृष्टिर्येषां ते तथा तान् अरीन् विद्रावयेत्यन्वयः अनेन ।

(१) प्रमथादिस्त्रीवत् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पाञ्चजन्य निजध्यानध्वस्तपातकसञ्चय !
पाहि मां पापिनं घोरं संसारार्णवपातिनम्

इत्ययं मन्त्रः सूचितः ॥ २५ ॥

मम छिन्धीति तुरागमां विकल्पेनेति वक्तव्यम् । द्विषां चक्षूंषि छादय नोऽस्माकमघं हरेत्यन्वयः । शतचन्द्रेति चर्मणो नाम ॥२६॥

एनोभ्य इत्यनेन उल्कापाता गृह्यन्ते एनोभ्यो इत्यनेन गतार्थत्वात् अंघोभ्यो व्यस्तनेभ्यः ॥ २७ ॥

श्रेयःप्रतीपकाः श्रेयोविरोधिनस्ते चासुराः ॥ २८ ॥

स्तोत्राणां स्तोमः समूहः स्तोत्रस्तोमः तल्लक्षणश्छन्दः सामवेदस्तन्मयस्तत्प्रधान इत्यर्थः । भगवान् पूज्यः विष्वक्सर्वत्र सेना यस्य स तथा । स्वस्य स्वामिनो नामभिः (१) । विष्वक्सेनश्च हरेर्निवेदिताशनः ॥ २९ ॥

यानं रथः पार्षदाश्च भूषणाश्च पार्षदभूषणाः भूषणाना-मपि ज्ञानाश्रयत्वज्ञापनाय पुल्लिङ्गप्रयोगः "तत्कण्ठगं कौस्तुभ-मास भाता" इत्यादेः ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षोढा विभक्तां दिवसरक्षामुक्त्वा पञ्चधा विभक्तरात्रिरक्षा-माह । दोषं रात्रेश्चतुर्थघटिकापर्यन्तं प्रदोषस्तत्र । पञ्च घटिकामा-रभ्य चतुर्दशघटिकापर्यन्तमर्धरात्रमन्तभागस्यार्धरात्रत्वात् तत्र । पञ्चदशषोडशघटिके निशीथस्तत्र ॥ २१ ॥

श्रीवत्सो धामनि शरीरे यस्य निशीथादूर्ध्वमरुणोदयात् प्राक् अपररात्रः । प्रत्यूषे रात्रिशेषघटिकाचतुष्टये । अनुसन्ध्यं दिन-रात्रिसन्ध्ययोः ॥ २२ ॥

भगवदस्त्रैश्च रक्षामन्त्रानाह । चक्रमिति चतुर्भिः । युगान्ता-नलवत् तिग्मा तीक्ष्णा नेमिर्यस्य तत् । हे समन्तात् भ्रमत् ! भ्रम-णशील ! त्वं चक्रं भगवत्प्रयुक्तं सत् अरिसैन्यं दन्दग्धि अतिश-येन दह । कक्षं शुष्कतृणम् ॥ २३ ॥

अशनिवत् स्पर्शनं येषां ते विस्फुलिङ्गाः यतः । हे गदे ! निष्पिण्ढि निष्पिण्ढि चूर्णय चूर्णय ॥ २४ ॥

दरेन्द्र ! हे पाञ्चजन्य ! ॥ २५ ॥

हे तिग्मधार ! हे असिवर ! हे खड्गश्रेष्ठ ! हे शतचन्द्र ! शतच-न्द्राकारयुक्त ! चक्षूंषि हर आच्छादय च ॥ २६ ॥ २७ ॥

श्रेयसः प्रतीपकाः प्रतिकूलाः ॥ २८ ॥

स्तोत्राणि बृहद्रथन्तराणि सामानि तैः स्तोभ्यते संस्तूयत इति स्तोत्रस्तोभः । ऐकपद्यपाठे स्तोभा गीतिपूरकाक्षराणि स्तोत्रस्तोमेति पाठे सामाधारभूतऋक्समुदायः स्तोमः ॥ २९ ॥

पार्षदभूषणाः पार्षदमुख्याः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीणि ऊर्ध्वाधो मध्यलोकाख्यानि धामानि यस्य सर्वलो-कस्य इत्यर्धरात्रश्च षड् भागाः दोषादिशब्दवाच्याः तत्र दोषे प्रदोषे हृषीकेशः निशीथे अर्धरात्रे चेति विभागद्वयेऽपि एकः पद्मनाभः ॥ २१ ॥

दामोदरः प्रभाते उत्क कालानामनुसन्ध्यं प्रतिसन्ध्यं च विश्वेश्वरः ॥ २२ ॥

एवं भगवन्तं रक्षार्थं प्रार्थ्य तदायुधानि रक्षार्थं प्रार्थयते । चक्रमिति चतुर्भिः । युगान्तानलवत्तिग्मा नेमिर्धारा यस्य तदी-दृक् चक्रं त्वं भगवत्प्रयुक्तं समन्तात् भ्रमत् सत् अरिसैन्यम-स्मच्छत्रुसमूहं दन्दग्धि द्विरुक्तिः शीघ्रत्वाय शीघ्रं दहेत्यर्थः । कक्षं शुष्कतृणम् ॥ २३ ॥

अशनिवत् तद्वत् स्पर्शो येषां ते विस्फुलिङ्गा यस्यास्तस्या सम्बुद्धौ हे अशनिविस्फुलिङ्गे ! हे गदे ! त्वमजितप्रियासि । अतो-ऽजितभजने विघ्नकरान् कूष्माण्डादीन् निष्पिण्ढि शीघ्रं पेषयेत्यर्थः ! ममारींश्चूर्णय चूर्णय ॥ २४ ॥

हे दरेन्द्र ! शङ्खराज ! विप्रग्रहा ब्रह्मराक्षसाः ॥ २५ ॥

हे तिग्मधार ! तीक्ष्णधार ! हे असिवर ! खड्गराज ! त्वमीशप्र-युक्तो ममारिसैन्यं छिन्धि छिन्धि शतचन्द्राकाराणि मण्डलानि यस्मिन् हे शतचन्द्र ! हे चर्मन् ! खेट अघोनामघवतां मम द्विषां चक्षूंषि छादय तत्र पापचक्षुषामतिक्रूरदृष्टीनां तु चक्षूंषि हर उत्पाटयेत्यर्थः ॥ २६ ॥

अंहोभ्यः पापेभ्यः ॥ २७ ॥

श्रेयसां पुरुषार्थानां प्रतीपकाः घातकाः ॥ २८ ॥

स्तोत्रैर्बृहद्रथन्तरादिसामभिः स्तोभ्यते इति स्तोत्रस्तोभः छन्दो-मयो वेदप्रचुरः । प्रभुः समर्थो भगवान् गरुडः विश्वक्सेनो हरिश्च स्वनामभिः अशेषकृच्छ्रेभ्यो रक्षतु ॥ २९ ॥

हरेर्नामादीनि पार्षदभूषणाः पार्षदश्रेष्ठाश्च सर्वोपद्रवः नोऽस्माकं बुद्ध्यादीन् पान्तु ॥ ३० ॥

उग्रधनुषवाले मधुसूदन देव अपराह्न कालमे मेरी रक्षा करें सायं काल मे ब्रह्मादि तीनों मूर्ति वाले माधव मेरी रक्षा करें प्रदोषकाल मे हृषीकेश रक्षा करें अर्धरात्र मे और निशीथ काल मे पद्म नाभ भगवान् रक्षा करें ॥ २१ ॥

पीछली रात में श्रीवत्स चिन्हवाले भगवान् मेरी रक्षा करें प्रत्यूष कालमे खड्गधारी जनार्दन भगवान् रक्षा करें प्रभात समय में दामोदर भगवान् रक्षा करें प्रातः सायं की सन्धियों में विश्वंभर भगवान् कालमूर्ति रक्षा करें ॥ २२ ॥

प्रलय काल के अग्नि सरीके तीक्ष्ण किनारों वाले भग-वान् के प्रयोग करने से चारों तरफ घूमते हुये श्रीसुदर्शन चक्र बड़ी शीघ्रता से जैसे वायुके साथमे अग्नि सूखे तृण को जलावै तैसे शत्रुओं के सैन्यको दहन करो ॥ २३ ॥

हे गदे वज्रके स्पर्शसरी के अग्निकण वाली आप हो अजित भगवान् की बड़ी प्रिया हो सो कूष्माण्ड विनायक

---

(२) अयं विष्वक्सेनः पार्षदः ।

यथा हि भगवानेव वस्तुतः सदसच्च यत् ।
सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥ ३१ ॥
यथैकात्म्यानुभावानां विकल्परहितः स्वयम् ।
भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥
तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥
विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान्नारसिंहः ।
प्रहापयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥ ३४ ॥
मघवन्निदमाख्यातं वर्म नारायणात्मकम् ।
विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान् ॥ ३५ ॥
एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा ।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते ॥ ३६ ॥
न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ।
राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥ ३७ ॥
इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः ।
योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥ ३८ ॥

भाषा टीका ।

बध राक्षस भूत ग्रहों को औ शत्रुओं को पीसो औ चूर्ण करो ॥ २४ ॥

हे पाञ्चजन्य शङ्ख ! आप कृष्ण भगवान् के मुख के वायु से पूर्ण होकर बड़े भयंकर शब्द से शत्रुओं के हृदय को कंपाते हुये यातुधान प्रमथ प्रेत मातृ पिशाच विप्रग्रह घोरदृष्टि वालों को दूर भगाओ ॥ २५ ॥

हे असिवर ! खड्गश्रेष्ठ आप तीक्ष्णधारा वाले हो सो भगवान् के प्रयोग करने से मेरे शत्रुओं के सैन्य को बारम्बार छेदन करो हे चर्मन् ! ढाल ! आप शतचन्द्र के तुल्य हो सो शत्रुओं के नेत्रों को ढांक देवो पाप दृष्टि वाले के शत्रुओं के नेत्रों को हरण करो ॥ २६ ॥

जो हम को ग्रहों से भय होवै जो भय उल्कापात से होवै जो भय दुष्ट मनुष्योंसे होवै जो सर्पादिकों से होवै जो भय दांत वाले व्याघ्रादिकों से होवै जो भय पापों से होवै ॥ २७ ॥

ए सब भय भयकारक जितने हमारे घातक हैं सो सब भगवान् के नाम रूप अस्त्र के कीर्तन करने से जल्दी नष्ट हो जावैं ॥ २८ ॥

बृहद्रथंतरादिक स्तोत्रों से स्तुति करने योग्य साक्षात् वेदमय प्रभु गरुड भगवान् हमको संपूर्ण कष्टों से रक्षित करैं और विष्वक्सेन भगवान् भी अपने नामों के ग्रहण करने से हमारी रक्षा करैं ॥ २९ ॥

श्रीहरि के नाम रूप वाहन आयुध तथा भगवान के श्रेष्ठ पार्षद हम लोगों के बुद्धि इंद्रिय मन प्राणों की रक्षा करैं ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सच्च असच्च मूर्तामूर्तं यतस्सर्वं जगत् ॥ ३१ ॥

ऐकात्म्यस्यानुभावोऽनुभवो येषां तेषाम् । विकल्पो भेद-स्तद्रहितोऽपि ॥ ३२ ॥

सत्यमानेन सत्यभूतेन प्रमाणेन ॥ ३३ ॥

पुनरपि श्रीनृसिंह एव प्रार्थ्यते । विदिक्ष्विति । पात्वित्यनुषङ्गः यद्वा । नारसिंहः प्रह्लादः स्वनेन श्रीनृसिंहनामगर्जनेन स्वतेजसा स्वप्रभावेण ग्रस्तानि समस्तानि दिग्गजविषधरज्वालामुख्या-दीनां तेजांसि प्रभावाः येन सः ॥ ३४ ॥

दंशितः कवचितः ॥ ३५ ॥

सोऽपि साध्वसाद्भयाद्विमुच्यते ॥ ३६ ॥

तस्य तु भयं न भवेदेव ॥ ३७ ॥

एतद्विद्याप्रभावमितिहासेनाह । इमामिति सार्धैस्त्रिभिः

श्रीधरस्वामिकृतभावार्थदीपिका ।

मरुधन्वनि निरुदके देशे । अनेन विद्यायाः क्षेत्रतीर्थानपेक्षत्वं दर्शितम् ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भगवन्नामरूपास्त्रभूषणपार्षदादीनिष्टप्रापकत्वेनानिष्टनिवर्तकत्वेन च सम्प्रार्थ्य तन्नामरूपादिवत्तद्विभूत्यादिषच तद्विषयकप्रार्थनायाः सत्यत्वं प्रतिजानीते । यथेति त्रिभिः । यथा च यत् सदसच्चिदचिदात्मकं जगद्वस्तुतो भगवानेव भगवदात्मकमेवात्र न तु विप्रतिपत्तिः "यस्य पृथिवी शरीरं यस्यात्मा शरीरं तदनुप्रविश्य सच्च त्यच्चाभवत्" इति श्रुतेरिति भावः । तथानेन सत्येन सत्यभूतेनाबाधितेन दृष्टान्तेन तद्विषयकप्रार्थनया नोऽस्माकमुपद्रवाः तस्य जगदात्मकत्ववत्तद्विषयप्रार्थनापि न मिथ्या भवितुमर्हतीति भावः ॥ ३१ ॥

यथा च भगवानैकात्म्यानुभावेन कृत्स्नचिदचिदात्मकजगदेकान्तरात्मत्वकृतभावेन विकल्परहितः । प्राकृतदेवमनुष्यादिनामरूपात्मकभेदरहितः स्वमायया स्वसङ्कल्पज्ञानेन स्वयमात्मनैव स्वेच्छया न तु जीववत्कर्मयोगेत्यर्थः । भूषणादीन् धत्ते बिभर्ति अत्र चिह्नानि दिव्यविग्रहा आख्याः रामकृष्णादीनि नामानि यथा भूषणादीनि सत्यान्येव बिभर्ति तथा त्वद्विषयामपि प्रार्थनां सत्यां कृत्वा तेनैव सत्यमानेन सत्यभूतेन मीयते प्रमीयतेऽनेनेति मानं दृष्टान्तस्तेन सर्वस्वरूपेणास्त्रपार्षदादिस्वरूपेण सर्वदा सर्वकालेषु सर्वत्र सर्वेषु देशेषु सदा सर्वावस्थासु च पातु ॥ ३२।३३ ॥

एवं प्रार्थनायाः सत्यतां प्रतिपाद्य पुनः सिंहावलोकनन्यायेन श्रीनृसिंहं त्रातारं प्रार्थयते । विदिक्ष्विति । विदिक्ष्वाग्नेय्यादिषु दिक्षु ऐन्द्र्यादिषु ऊर्ध्वायामधश्च दिशि शरीरस्यान्तर्बहिश्च भगवान्नारसिंहः पात्वित्यनुषङ्गः । तं विशिनष्टि । स्वनेन महाट्टहासेन ध्वनिना लोकस्य स्वभक्तलोकस्य भयं प्रहापयत्प्रणुदन् स्वतेजसा ग्रस्तान्याच्छादितानि समस्तानि तेजांसि सूर्यादितेजांसि येन सः "न तत्र सूर्यो भाति न चन्द्रतारकम्" इति श्रुत्यर्थोऽनेनाभिप्रेतः ॥ ३४ ॥

एवमिन्द्रायेदं नारायणवर्मोपदिश्यैतन्मन्त्रप्रभावेण शत्रून् विजेष्यसीति वदन्नन्यमपि तत्प्रभावमाह विश्वरूप इत्याह । मघवन्निति । हे मघवन् ! इदं नारायणात्मकं वर्म तुभ्यमाख्यातं मयेति शेषः । कथम्भूतं येन नारायणवर्मणा दंशितः कवचितः अञ्जसा सुखेनैवासुरयूथपान् शत्रून्विजेष्यसि ॥ ३५ ॥

एतद्वर्म धारयमाणः अनुसन्दधत्पुमान् यं यं भीतं क्रुद्धं चक्षुषा पश्यति पदा वा संस्पृशेत्स भीतः साध्वसात्भयाद्विमुच्यते ॥ ३६ ॥

विद्यां नारायणवर्मरूपमन्त्रविद्यां धारयतः पुंसः कुतश्चिदपि कर्हिचिदपि राजादिभ्यो व्याघ्रादिभ्यश्च भयं न विद्यते निर्भयो जायत इत्यर्थः ॥ ३७ ॥

एतद्विद्याप्रभावसूचकं कञ्चिदितिहासमाह । इमामिति सार्द्धैस्त्रिभिः । पूर्वस्मिन् काले कश्चित्कौशिकगोत्रजो द्विजः इमां विद्यामधारयत स च योगधारणया "स्वपार्ष्ण्यापीड्य गुदम्" इत्यादिना द्वितीयस्कन्धोक्तया स्वशरीरं मरुधन्वनि निरुदके देशे जहौ तत्याज ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"सर्वं खल्विदं ब्रह्म" इति श्रुतेः । भगवानेव यत्सदसद्वस्तु वस्तुतस्तन्नियामकतया तद्रूप उच्यत इति यथा सत्यम् "तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवत्" इति श्रुतिविहितत्वादव्यभिचरितेन सत्येन "द्रव्यं कर्म च कालश्च स्वभावो जीव एव च" इत्यादि वाक्यं चशब्दगृहीतम् । एवशब्देन "सत्येनानेन मां देवः पातु विष्णुश्चतुर्भुजः" इति स्मारयति ॥ ३१ ॥

भूषणादीनामचेतनत्वेन चेतनवत्प्रार्थितदातृत्वं कथमित्याशङ्क्य तेषु हरेस्तत्तत्कार्यक्षमशक्तिस्वरूपेणावस्थानं यथा सत्यं तेन सत्येन हरिः पात्वित्याह । यथेति । ऐकात्म्यानुभावेन तत्तद्वस्तुस्थितरूपाणामेकात्मत्वापरोक्षज्ञानेन विकल्परहितः स्वगतभेदवर्जितोऽपि स्वमायया स्वरूपसामर्थ्येन स्वयमेव भूषणादिसंज्ञाः (१) स्वाभीमतवाच्यशक्तिशब्दवाच्या धत्त इति यथा परसत्यं तेन सत्येन अनेन सत्याख्यप्रमाणेन यथार्थेन सर्वज्ञत्वमपि सत्यत्वे प्रमाणमिति द्योतनाय विशेषणीकृतम् ॥ ३२ ॥

न केवलमायुधादिष्वेव सन्निहितत्वं किन्तु सर्वत्रापीति भावेनाह । सर्वैरिति ।

> एक एव परो विष्णुर्भूषाहेतिध्वजेष्वजः ।
> तत्तच्छक्तिस्वरूपेण स्वयमेव व्यवस्थितः ॥
> सत्येनानेन मां देवः पातु सर्वेश्वरो हरिः इति ॥

अतो भूषणादिषु विशेषतः सन्निहितत्वादुच्यत इति ज्ञातव्यम् ॥ ३३ ॥

मूलरूपस्य सर्वगतत्वं नावतारस्येति शङ्कां परिहरन् सर्वगतत्वं यथा सत्यं तेन सत्येन तथा नारसिंहः पात्विति तात्पर्यान्निश्चिन्वाह । विदिक्ष्विति । प्रहापयन्निति स्वार्थे णिच् परिहरन्नित्यर्थः । स्वतेजसा ग्रस्तानि अभिभूतानि समस्तानि तेजांसि सूर्यादीनि येन स तथा ॥ ३४ ॥

मघवन् ! धनवन् ! दंशितः कवचितः ॥ ३५ ॥

साध्वसाद्भयात् ॥ ३६ ॥ ३७ ॥

कौशिकः । कुशिकगोत्रे विद्यमानः । योगधारणया योगाभ्यासेन । मरुधन्वनि निर्जलप्रदेशे ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथा येन प्रकारेण ॥ ३१ ॥

यथेति युग्मकम् । ऐकात्म्यानुभावानां केवलपरमस्वरूपरहितपराणां विकल्परहितः परमानन्दैकरसपरमस्वरूपतया स्फुरन्नपि यथा येन प्रकारेण स्वेषु स्वस्वामित्वा भजत्सु माया कृपा तया हेतुना स्वयं विचित्रशक्तिमयेन स्वस्वरूपेणैव

---

(१) भूषणास्त्रिनातच्छब्दवाच्याः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कार्यभूतेन भूषणाद्याख्याः शक्तीः शक्तिमयाविर्भावान् धत्ते गोचरयति । तेनैव विद्वदनुभवलक्षणेन सत्यप्रमाणेन तद्यदि सत्यं स्यात्तदेत्यर्थः । तैरेव भूषणादिलक्षणैः सर्वैः स्वरूपैर्विविध-लक्षणाविर्भावैः पातु अत एव विष्णुधर्मे चक्रिकृतचक्रस्तुतौ "यस्य रूपमनिर्देश्यमपि योगिभिरुत्तमैः" इत्याद्यनन्तरञ्च । प्रमत-स्तस्य चक्रस्य नाभिमध्ये महीपते । त्रैलोक्यमखिलं दैत्यो ददर्श भूर्भुवादिकम्" इति तदेवमेव नवमे श्रीमदम्बरीषेणापि चक्रमिदं स्तुतमस्ति चिह्नानि गरुडाकारध्वजादीनि अनेन यत् कश्चिदाक-स्तुतमस्ति किमर्थमिदं श्रूयते तदपि श्रीभगवदाविर्भावत्वज्ञेयम् । अत्र तृतीये "श्रेष्ठस्य तस्य मणिमस्य कण्ठे" इत्यपि सहायम् । अतो द्वादशेऽपि "कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः" इत्यादिकं चिह्नतत्त्वेनोपासनार्थमभेददृष्ट्या दर्शितमेव यथा-सम्भवं साक्षाद्विग्रहगतत्वेनाप्यनुसन्धेयम् । तथाहि श्रीविष्णु-पुराणे "आत्मानमस्य जगतो निर्लेपमगुणामलम् ।
बिभर्ति कौस्तुभमणिस्वरूपं भगवान् हरिः" इति ॥ १२—१६ ॥

तर्हि कथं विद्याधारिणः फलं नास्तीत्याशङ्क्याह । न कुतश्चि-दिति ॥ ३७—४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यत् सदसद्रूपं जगत् तद्वस्तुतो भगवानेव तस्यैव बहिरङ्ग-मायाशक्तिकार्यत्वात् । सत्येन शपथेनानेन इति यद्येवंभूतो भग-वान् सत्यः स्यात् तदास्माकमुपद्रवा नश्यन्तु । "यदि वेदाः प्रमा-णम्" इतिवत् ॥ ३१ ॥

ऐकात्म्यं चिन्मयत्वादेकस्वरूपत्वमनुभावो यथा यासां तासां भूषणादीनां शक्तीनां विकल्परहितः स्वस्य तासाञ्च चिद्रूपत्वात्तेभ्यो भेदरहितोऽपि भूषणायुधाद्याख्यास्ताः शक्तीः यथा धत्ते तथा तेनैव सत्यमानेन नः पारिवल्यन्वयः । तत्र भूष-णानि कौस्तुभादीनि आयुधानि चक्रादीनि चिह्नानि चतुर्भुज-त्वादीनि आख्या नामानि यासां ताः शक्तीः स्वरूपशक्तिवृत्ती-र्धत्ते । स्वमायया स्वरूपशक्त्या स्वरूपभूतया नित्यशक्त्या माया-ख्यया युतः "अतो मायामयं विष्णुं प्रवदन्ति मनीषिणः" इति माध्वभाष्यप्रमाणितश्रुतेः । तेनैव सत्यमानेन सत्यरूपप्रमाणेन भूषणायुधादीनि चतुर्भुजत्वादीनि च स्वरूपशक्तिमयत्वात् स्वेना-भिन्नान्येव भगवान् धत्त इति यदि सत्यं स्यात्तदा सर्वैः "हरिर्विद्-ध्यात्" इत्यादिमन्त्रोक्तैः स्वरूपैः सर्वत्र देशे काले च सर्वगः सन् पातु । सर्वज्ञ इत्यस्मिन् मनोगतमास्तिक्यं भगवानेव जानातीति शपथो ज्ञापितः ॥ ३२ ॥ ३३ ॥

एवं नानास्वरूपैः स्वरक्षां समाप्यापि पुनरपि सर्वेषां प्रति-कूलानां भीषणेनैकेनैव नृसिंहस्वरूपेण स्वरक्षामन्त्रमेकमाह । विदि-क्षिति । पात्वित्यनुषङ्गः । यद्वा । नारसिंहः नरसिंहभक्तः प्रह्लादः स्वेन श्रीनृसिंहनामगर्जनेन स्वतेजसा प्रस्तानि समस्तानां दिग्गजविपक्षासुरचक्रवर्त्यादीनां तेजांसि प्रभावा येन सः॥३४॥

दंशितः कवचितः ॥ ३५ ॥

सोऽपि साध्वसाद्विमुच्यते किमुत देहे तद्धारयमा-णाः ॥ ३६—३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्ते सदसच्च स्थूलं सूक्ष्मं च जडमजडं तत्सर्वं भगवानेव सर्वचेतनाचेतनस्य तदंशत्वादिना तत्पृथक्स्थितिप्रवृत्त्याद्यभा-वात् ॥ ३१ ॥

ऐकात्म्यं स्वस्य भगवदंशत्वेन तदनतिरिक्तत्वं तस्यानुभा-वोऽनुचिन्तनं येषां विकल्पो भेदः पृथगवस्थानं तद्रहितः सत्य एव यथा स्वयं च सर्वात्मा सत्य एव यथा भूषणानि कौस्तु-भादीनि आयुधानि सुदर्शनादीनि चिह्नानि नृसिंहादीनि आख्या ब्रह्मनारायणादीनि नामानि शक्तीः प्रकृतिकालाद्याः सत्या एव धत्ते यथा ॥ ३२ ॥

तथा तेनैव सत्यभूतेन मानेन प्रमाणेन सर्वैः स्वरूपैः स्वकी-येषु दासेषु या माया कृपा तया सोऽस्मान् पातु ॥ ३३ ॥

एकैकस्वरूपस्य नाममात्रं येन केनाप्युच्चारितं लोकस्य यस्य कस्यापि संसारभयं सदा सर्वत्र निराकरोतीति द्योतयितुं पुनरपि नृसिंहः प्रार्थ्यते । विदिक्ष्विति । विदिक्ष्वादिषु देशेषु समन्तात्कालयोगतः सर्वेषु कालेषु इत्यर्थः । अन्तः क्षुधिजन्मादौ बहिश्शुचिजन्मादौ च लोकस्य वर्णाश्रमादिनिरपेक्षस्य भयं भय-मात्रं सर्वभयगर्भं संसारभयं स्वेन हरिः इत्येवमात्मेन विन-स्यादिसम्बन्धवर्जितेनापि कुतश्चिन्निर्गतेनापि प्रभावयन् विराजते इति शेषः ॥ ३४ ॥

वर्म कवचं येन कवचेन दंशितः कवचितः ॥ ३५ ॥

साध्वसाद्भयात् ॥ ३६ ॥ ३७ ॥

मरुधन्वनि निरुदके देशे ॥ ३८ ॥

भाषा टीका ।

यथार्थ से सत् असत् जो कुछ है सो भगवान् ही जैसे हैं तिसी सत्य से सब उपद्रव नाश को प्राप्त होवें ॥ ३१ ॥

जैसे सब जगत् को ब्रह्म भावना करने वालों को लौकिक पदार्थों के भेद से रहित होने परभी स्वयं भूषण मूर्ति आयुध नाम की शक्तियों को अपनी स्वमाया से धारण करते हैं ॥ ३२ ॥

तिसी सत्य प्रमाण से सर्वज्ञ भगवान् हरि सर्वगामी सदा सर्वत्र अपने सब स्वरूपों से हमारी रक्षा करैं ॥ ३३ ॥

विदिशाओं में दिशाओं में ऊपर नीचे चारों ओर बाहर भीतर नारसिंह भगवान् अपने तेजसे सब के नेत्रों के प्रसन्न करने वाले शब्द से लोक भय को नाश करने वाले हैं सो हमारी रक्षा करैं ॥ ३४ ॥

हे इन्द्र ! यह नारायण स्वरूप कवच मैंने तुम्हारे आगे

तस्योपरि विमानेन गन्धर्वपतिरेकदा ।
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३९ ॥
गगनान्न्यपतत् सद्यः सविमानो ह्यवाक्शिराः ।
स बालखिल्यवचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ४० ॥

श्रीशुक उवाच ।

य इदं शृणुयात् काले यो धारयति चादृतः ।
तं[1] नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ ४१ ॥
एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां षष्ठस्कन्धे नारायणवर्म नामा-ऽष्टमोऽध्यायः ॥ ८ ॥

भाषा टीका ।

कहा है जिस को पहरकर तुम असुर यूथपतिओं को अनायास से जीतोगे ॥ ३५ ॥

इस कवच को धारण करके नेत्र से जिस जिस को देखे या जिस जिस को पाद से छूवै सो पुरुष शीघ्रही सब भयों से मुक्त होजाता है ॥ ३६ ॥

इस विद्यास्तोत्र को जो पुरुष धारण करे तिस से उस पुरुष को कहीं से भी राजा चोर ग्रहादि व्याघ्रादि इनों से कभी भी भय नहीं होता है ॥ ३७ ॥

पूर्व काल मे कोई कौशिक नामा ब्राह्मण इस विद्या को धारण करता था फिर योग धारणा से उसने निर्जल देश मे शरीर का त्याग किया ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्र द्विजस्य क्षयो देहत्यागस्तस्योपरि ॥ ३९ ॥
सद्यस्तत्क्षणादेव गगनान्न्यपतत् । पाठान्तरे अङ्गनाभिः सह । बालखिल्योपदेशात्तस्यास्थीनि प्रास्य प्रक्षिप्य विस्मितः सन् स्वं धाम गन्धर्वलोकं जगाम ॥ ४०—४१ ॥
अधिगतः प्राप्तः सन् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य त्यक्तस्य देहस्योपरिष्टाच्चित्ररथाख्यः कश्चिद्गन्धर्वाणां पतिः स्त्रीभिः परिवृतः विमानेन कदाचिद्ययौ यत्र द्विजस्य क्षयो देहत्यागस्तत्र चित्ररथो विमानसहितो गगनादवाक्शिरा अधोमुखः सद्यो न्यपतत् । पुनरुत्थाय बालखिल्यस्य ऋषेः वचनात्कौशिकस्यास्थीन्यादाय शल्यानि गृहीत्वा प्राचीसरस्वत्यां नद्यां प्रास्य प्रक्षिप्य स्नात्वा विस्मितः अहो एतद्विद्याप्रभाव ईदृश इति विस्मितः । स्वं धाम स्थानमन्वगादिति ॥ ३९ ॥ ४० ॥

एवंविधानेकप्रभावशालिनो वर्मणः श्रवणधारणाभ्यां न कुतश्चिद्भयं भवतीष्टप्राप्तिश्च भवतीत्याह मुनिः । य इति द्वाभ्याम् । यः पुमानिदं वर्म काले भयागमनकाले शृणुयाद्यश्चादृतः कर्तविकः आदरयुक्तः धारयति वा तं सर्वाणि भूतानि कूश्माण्डादीनि न पश्यन्ति सर्वतो भयान्मुच्यते ॥ ४१ ॥

शतक्रतुरिन्द्रो विश्वरूपादेतां विद्यामधिगतः प्राप्तः सन् मृधे युद्धेऽसुरान्दानवान् विजित्य निर्जित्य त्रैलोक्यलक्ष्मीं बुभुजे अनुबभूव ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् अष्टमोऽध्यायः ॥ ८

[1] न पश्यन्ति इति श्रीवीर० ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

द्विजस्य: द्विजमरणम् ॥ ३९ ॥

प्रास्य निरस्य ॥ ४०—४१ ॥

एतद्धारयमाणा इत्यादिना यत् फलमुच्यते तस्य कस्मादैलक्षण्यदर्शनमिति चेदुच्यते गुरुशिष्ययोर्मिथो योग्यतावैकल्यात् योग्यत्वेऽपि "नासम्वत्सरवासिने प्रब्रूयात्" इति विधेर्गुरुकुलवासापूर्त्या गुरुप्रसादाभावेन लोकोपकारादिना वा गुरोः प्राप्ता विद्या शिष्यस्य यथोक्तफलदा न स्यात् ।

गुरुशिष्ययोरयोग्यत्वाद्गुरुवृत्तेरपूर्तितः ।
अप्रसादाद्गुरोर्विद्या न यथोक्तफलप्रदा ॥

इत्युक्तेः । तर्हि गुरूपदेशमन्तरेण यथालिखितपाठादिना प्राप्ता फलदा स्यादिति चेन्न । गुरोः प्राप्ताया फलप्रदत्वात् "विद्या कर्माणि च सदा गुरोः प्राप्ताः फलप्रदाः । अन्यथा नैव फलदाः" इत्युक्तेः तस्मात्प्रसन्नगुरुदत्ता यथोक्तफलदा इति मन्तव्यम् "प्रसन्नोक्ताः फलप्रदाः" इति वचनात् । अत उक्तफलसाकल्यादृष्ट्या नाभंद्येयमिति भावः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

द्विजस्य त्वचो देहत्यागः ॥ ३९ ॥

प्राचीसरस्वत्यामिति' पुंवद्भावाभाव आर्षः । स्वं धाम सविमानोऽन्यथा गन्तुं नैवापारयिष्यदिति भावः ॥ ४०—४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठेऽयमष्टमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्विजस्य कौशिकस्य त्वचो देहत्यागः ॥ ३९ ॥

वालखिल्यस्य वचनादाज्ञातः प्रास्य प्रक्षिप्य स्वं धाम गन्धर्वलोकम् ॥ ४०—४२ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टमाध्यायार्थप्रकाशः ॥ ८ ॥

भाषा टीका ।

तिसी के ऊपर होकर एक समय पर चित्ररथ नामा गन्धर्वों का पति स्त्रियों के सहित विमान पर बैठकर जहां पर ब्राह्मण का शरीर नष्ट हुआथा उहां होकर गया ॥ ३९ ॥

तब वह गन्धर्व विमान सहित नीचे को मस्तक होकर तत्काल गिरपड़ा फिर वालखिल्य ऋषि के वचन से उस ब्राह्मण के अस्थियों को लेजाकर प्राची सरस्वती नदी में डाल कर स्नान किया तब विमान पर बैठ अपने लोक को गया ॥ ४० ॥

श्रीशुकदेवजी बोले किसी काल में भी इस स्तोत्रको जो सुनै और आदर से धारण करै उस पुरुष को सब भूत नमस्कार करते हैं सब भयों से वह मुक्त होजाता है ॥ ४१ ॥

इन्द्र ने विश्वरूप से इस विद्या को प्राप्त होकर युद्ध में असुरों को जीतकर तीनों लोककी लक्ष्मी का भोग किया ॥४२॥

इति श्रीभागवत षष्ठस्कन्ध आठमे अध्याय का
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे अष्टमोऽध्यायः समाप्तः ॥ ८ ॥

———○:*:○———

॥ नवमोऽध्यायः ॥

—०:*:०—

श्रीशुक उवाच ।

तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत ! ।
सोमपीथं सुरापीथमन्नादमिति शुश्रुम ॥ १ ॥
स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः ।
अवदद्यस्य पितरो देवाः सप्रश्रयं नृप ! ॥ २ ॥
स एव हि ददौ भागं परोक्षमसुरान् प्रति ।
यजमानोऽवहद्भागं मातृस्नेहवशानुगः ॥ ३ ॥
तद्देवहेलनं तस्य धर्मालीकं सुरेश्वरः ।
आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा ॥ ४ ॥
सोमपीथं तु यत्तस्य शिर आसीत् कपिञ्जलः ।
कलविङ्कः सुरापीथमन्नादं यत् स तित्तिरिः ॥ ५ ॥
ब्रह्महत्यामञ्जलिना जग्राह यदपीश्वरः ।
संवत्सरान्ते तदघं भूतानां स विशुद्धये ।
भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥ ६ ॥
भूमिस्तुरीयं जग्राह खातपूरवरेण वै ।
ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ॥ ७ ॥
तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः ।
तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ॥ ८ ॥
शश्वत् कामवरेणांहस्तुरीयं जगृहुः स्त्रियः ।
रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते ॥ ९ ॥
द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलम् ।
तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपन् ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवमे विश्वरूपे तु हते शक्रेण कोपनः ।
त्वष्ट्रा चोत्पादिते वृत्रे भीतैर्देवैर्हरेः स्तुतिः ॥ १ ॥

सोमस्य पीथं पानं यस्मिन् । एवं सुरापीथम् । अन्नमत्तीत्यन्नादम् । अत्र "विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत्" इत्यादिश्रुतिरनुसन्धेया ॥ १ ॥

तस्यासुरपक्षपातमाह । स वा इति द्वाभ्याम् । प्रत्यक्षं प्रकटं यथा भवति तथा सविनयं देवेभ्यो हविर्भागमिन्द्रायेदमग्नय इदमित्युच्चैरवदत् । अत्र हेतुः । यस्य पितरो देवाः सः ॥ २ ॥

असुरेभ्यस्तु परोक्षं गुप्तं भागं ददौ । तदेवाह । देवान् यजमानोऽसावसुरान् प्रति भागमवहत् केनाप्युपायेन प्रापयामास । यतो मातृस्नेहवशेनासुराननुगच्छति ॥ ३ ॥ ४ ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तां वारयितुं समर्थस्तथापि जग्राह । संवत्सरं तथैव स्थित्वा संवत्सरान्ते भूताक्रोशभीतः सन् भूतानां मध्ये विशुद्धये लोकापवादपरिहाराय स हरिरिन्द्रो भूम्यादिभ्यस्तदघं व्यभजत् विभज्य ददावित्यन्वयः ॥ ६ ॥

तुरीयं चतुर्थं भागम् । खातस्य गर्तस्य पूरः पूरणं तेन वरेण यदि खातपूरणं खत एव भविष्यति तर्हि ग्रहीष्यामीत्येवं भावाबन्धेन जग्राहेत्यर्थः ॥ ७ ॥

ईरिणमूषरम् । अत एवोषरेऽध्ययनादि निषिध्यते छेदे सति पुनर्विरोहः प्ररोहो भवत्विति वरेण । निर्यासरूपेण ब्रह्महत्याया दृष्टत्वान्निर्यासो न भक्ष्यः ॥ ८ ॥

शश्वत्कामवरेण यावत्प्रसवं गर्भानुपघातेनैव संभोगवरेण । रज इति । अत एव रजोदर्शने तत्सङ्गादि न कार्यम् ॥ ९ ॥

द्रव्यभूयोवरेण यस्मिन्द्रव्ये क्षीरादावापो मिश्रा भवेयुस्तस्य भूयस्त्वमाधिक्यं स्यादिति वरेण । यद्वा । स्वस्यैव निर्झरोद्गमादिना भूयस्त्ववरेण । द्रवभूय इति पाठेऽप्ययमेवार्थः । यद्वा । द्रवभूयस्त्वं सांसिद्धिकद्रवत्वं तेन वरेण । अस्य विभागस्य "विश्वरूपो वै त्वाष्ट्रः" इत्यस्यां श्रुतावुक्तेः । तद्विभागफलमाह । तत्पापं हरति निराकरोति कः । क्षिपन् । बुद्बुदादिजलाद्बहिः प्रक्षिपन्नित्यर्थः । यद्वा क्षिपन् । जलं पापं हरति आच्छादनाति गृह्णातीत्यर्थः । "अथं च तस्मादापां न परिचक्ष्याः" इत्यादिश्रुत्यर्थं उक्तः । पाठान्तरे हरिर्विकिल्बिषमिन्द्रपापम् ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं देवैः पुरोहितत्वेन वृतस्तत्प्रियं कुर्वन्नपि विश्वरूपोऽसुरपक्षपातं "यदि स्वमित्यवद्यमुताख्य कर्म" इति श्रुत्या सूचितमकरोदिति वक्तुमुपक्रमते मुनिः । तस्येति । तस्य विश्वरूपस्य हे भारत ! त्रीणि शिरांस्यासन् बभूवुः । तत्रैकं शिरः सोमपीथं सोमपीथाख्यं सोमस्य पीथः पानं यस्य सोमं पिबतीति वा सोमपीथमित्यन्वर्थं नाम । तथा सुरापीथमन्यच्छिरः । अन्नमत्तीत्यन्नादमिति तृतीयं शिर इति शुश्रुम । वेद इति शेषः । तथा च श्रुतिः "विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत्स्वस्त्रीयोऽसुराणां तस्य त्रीणि शीर्षाण्यासन् सोमपानं सुरापानमन्नादम्" इति ॥ १ ॥

स विश्वरूपो बर्हिषि यज्ञे प्रत्यक्षं प्रकटं यथा भवति तथा सविनयं देवेभ्यो हविर्भागमिन्द्रादिभ्यो ददामित्युच्चैरवदत् । तस्य हेतुः । यस्य विश्वरूपस्य पितरो देवाः ॥ २ ॥

स विश्वरूप एवासुरान्प्रति परोक्षं यथा तथा भागं ददौ । तदेवाह । देवान् यजमानोऽसौ विश्वरूपो मातृप्रयुक्तो यः स्नेहो मातुलेषु तद्वशं गतः असुरान्प्रति भागमवहत्प्रापयत् ॥ ३ ॥

तद्विश्वरूपस्य देववञ्चनात्मकमलीकं कपटं कर्माधस्य ज्ञात्वा सुरेश्वर इन्द्रस्तरसा आशु भीतस्तस्य विश्वरूपस्य शीर्षाणि शिरांसि क्रोधेनाच्छिनत्खड्गेन ॥ ४ ॥

तस्य यत्सोमपीथाख्यं छिन्नं शिरस्तत्कपिञ्जलः पक्षिविशेषः आसीत् । सुरापीथाख्यं तु कलविङ्काख्यः पक्षी आसीत् । यदन्नादाख्यं तत्तित्तिरिः पक्षी आसीत् ॥ ५ ॥

यद्यपि, यद्यपीश्वरः ब्रह्महत्यां वारयितुं समर्थोऽपि ब्रह्महत्यां तन्मूर्तिभूतं पापमञ्जलिना जग्राह । स हरिः इन्द्रः संवत्सरपर्यन्तं ब्रह्महास्मीति सर्वाश्रयनां भूतानां जनानां मध्ये आत्मनो विशुद्धये भूताक्रोशनिवृत्तये । भूतानांमाविशुद्धय इति पाठान्तरं तत्राप्ययमेवार्थः । भूम्यादिभ्यस्तत्पापं चतुर्धा व्यभजत् । चतुर्धा विभज्य भूम्यादिषु चतुर्ष्वेकैकं भागं निहितवानित्यर्थः ॥ ६ ॥

तत्र ब्रह्महत्यायास्तुरीयं चतुर्थं भागं भूमिः खातपूरवरेण जग्राह । खातस्य गर्तस्य पूरः पूरणं तेन वरेण । यदि मे खातः स्यात्तर्हि खत एव पूरणं भवत्विति एवं रूपेण वरप्रदानपूर्वकं जग्राहेत्यर्थः । भूम्या यद् ब्रह्महत्याया रूपं तदीरिणमूषरम् ऊषररूपेण दृश्यत इत्यर्थः ॥ ७ ॥

तथा ब्रह्महत्यायाश्चतुर्थमंशं द्रुमाश्छेदरोहेण वरेण जगृहुः । छिन्नप्रदेशस्य पुनः प्ररोहणरूपेण वरेणेत्यर्थः । तेषु द्रुमेषु निर्यासरूपेणापि ब्रह्महत्या प्रदृश्यते ॥ ८ ॥

स्त्रियो योषितः शश्वत्कामवरेण आप्रसवात्सङ्गयोग्यत्ववरेण अंहसः ब्रह्महत्यायाः तुरीयं चतुर्थं भागं जगृहुः । तासु स्त्रीषु रजोरूपेण रुधिररूपेणांहः पापं मासि मासि प्रदृश्यते ॥ ९ ॥

आप अम्बूनि द्रवभूयोवरेण द्रवाधिक्यरूपेण वरेण हत्यायास्तुरीयं मलं पापं जगृहुः । तास्वप्सु तद्धरेरिन्द्रस्य किल्बिषं बुद्बुदफेनाभ्यां बुद्बुदफेनरूपेण दृष्टं दृश्यत इत्यर्थः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्महत्यानामपरापरिहार्यं यत्तत्परिहर्तृत्वमहिमावगाहनम् हरावभिवृद्धनिशितभक्तिकुठारस्य योग्याधिकारिकरगतस्य संसारतरुनिर्मूलनपटुताभिप्रयतेऽस्मिन्नध्याये । तत्रादौ बीजदोषक्षमावान् दुःसह इति प्रकटयितुं विश्वरूपस्य विप्रत्वेऽपि रचनाजनितत्वेन दोषित्वेनासुरपक्षपातं तावदाह । तस्येति । सोमं सुरां पिबतीति सोमपीथं सुरापीथम् ॥ १ ॥

भागं हविर्भागम् । यस्य विश्वरूपस्य ॥ २ ॥

परोक्षमज्ञातपन्मातुः रचनायाः स्नेहस्य परः ॥ ३ ॥

धर्मालीकं धर्मबाधं धर्मकपटं वा भयमात्मानमपि हन्तीति भीतः ॥ ४ ॥ ५ ॥

यद्यपि यद्यपि इन्द्रो ब्रह्महत्यादोषनिवारणे ईश्वरः समर्थः । तथाप्यञ्जलिना ब्रह्महत्यां जग्राहेत्यन्वयः । भूतानांमाविशुद्धये लोकापवादपरिहाराय भूतहिंसापापशोधनार्थमिति वा । हरिरिन्द्रः तद्भर्ता विष्णुर्वा ॥ ६ ॥

खातस्य स्वत एव पूर्तिः स्यादिति खातपूरवरस्तेन हाटकेन ईरिणम् ऊषरं लवणाकरम् इत्यर्थः ॥ ७ ॥

छेदरोह पुनर्वर्धनं तेन वरेण ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शश्वत् कालेन निरन्तरविषयसेवाभिलाषलक्षणेन वरेण रजोरूपेण रागरूपेण ॥ ९ ॥

द्रव्याणां पञ्चानां भूतानां मध्ये स्वभूयस्त्वलक्षणेन वरेण "तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः" इत्युक्तः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्य शीर्षाण्यच्छिनदिति बृहस्पत्यतिक्रमेण देवगणद्रोहेण सर्वशक्तिहानात् ॥ १—४ ॥

कपिञ्जलश्चेति तित्तिरिः ॥ ५ ॥

ब्रह्महत्यामित्यर्थकम् । यद्यपीश्वरस्तथापि अञ्जलिना साक्षात् स्वापराधस्वीकारेण जग्राह । तादृशपापस्य तादृशेनाप्यपहर्तुमशक्यत्वात् । भूतानां विशुद्धय इत्यन्तस्तु सूक्ष्मरूपेण स्थितमेवेत्यर्थः । यदेतत् वृत्रहत्यामपि जनयिष्यतीति भावः ॥ ६ ॥

खातपूरवरेणेति यद्यपि तत् पूर्वमपि वृष्ट्यादिना मृत्तिकादिपातेन पूरणं सम्भवति तथापि वरेणानेन खतो द्रुतमपीति ज्ञेयम् ॥ ७—९ ॥

द्रव्यशब्देनात्र द्रव एवोच्यते भावे ल्यप्रयोगात् स्वार्थे तद्धितात् । टीकायां भिन्ना इति । इतः पूर्वं भिन्ना एव न भवेयुरिति गम्यम् । निर्झरोद्गमेति । इतः पूर्वं निर्झरोद्गमाधिकमेव नासीदिति गम्यम् । द्रवभूय इति पाठे सांसिद्धिकद्रवत्वमिति । इतः पूर्वं किञ्चिद्द्रवनमासीदिति लभ्यते ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विश्वरूपमहन् शक्रस्त्वष्ट्रा वृत्रमजीजनत् ।
देवैस्तुतो हरिर्भग्नमाप्तिं नवम ऊचिवान् ॥ ० ॥

सोमस्य पीथं पानं यस्मिन् तत् । अकममत्तीति अज्ञादम् । अत्र "विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत्" इति श्रुतिरनुसन्धेया ॥ १ ॥

तस्यासुरपक्षपातमाह । स वा इति द्वाभ्याम् । प्रत्यक्षं प्रकटं यथा भवति तेषां सविनयं हविर्भागं इन्द्रायेदमग्नये इदमिति उच्चैरवदत् । तत्र हेतुः । यस्य पितरो देवाः ॥ २ ॥

परोक्षं देवानां दृष्टिं वञ्चयित्वा छिद्रद्वारं नीचैरित्यर्थः । ददौ ददौ च भागमवहत् परोक्षमेव प्रापयामासेत्यर्थः । अत्र हेतुः । मातेति । यस्यासुरा मातामहा इत्यर्थः । भीतः असुरबलोद्ग्रं विभाव्येत्यर्थः ॥ ३—५ ॥

मार्कण्डेयकाभ्यां क्रोधभयाभ्यां तं हत्वैवाहो हन्त महापापं बुद्धिपूर्वकमेवाकरवं महानीचो न जाने कुत्र वा नरके पतिष्यामि तदेतत् समुचितं फलं शीघ्रमेव लभेयेत्यनुतापपुञ्जे निममज्जेत्याह । ब्रह्मेति । स्वतेजसा मां ज्वालयेति भावः । यद्यस्मात् अधि अधिकृतभक्तः ईश्वराधिभूतिरूपस्तस्मात् कथमेवं विकर्मणा अनुतापं न कुर्यादिति भावः । एवमनुतापेन क्षीणपापवेगः सम्वत्सरपर्यन्तं तथैव विगीत एव स्थित्वा तदन्ते भूतानां स्वदेहस्थभूतानां पृथिव्यप्तेजोवायूनां ब्रह्महत्ययैवापवित्रीकृतानां विशुद्धये तदघं चतुर्धा व्यजभत् । आकाशस्यापवित्र्यासम्भवात् चतुर्णामेव भूतानां शुद्धये चतुर्धेति न्यायः । तेनान्तःकरणगतमघन्तु सूक्ष्मरूपेण तस्थावेव । यदेव बीजं पुनरपि वृत्रवधेन ब्रह्महत्यां जनयिष्यतीति भावः ॥ ६ ॥

तुरीयं चतुर्थभागं खातस्य गर्तस्य पूरः पूरणं तेन वरेण यदि खातपूरणं खत एव भविष्यति तर्हि ग्रहीष्यामीत्येवं भावाबन्धेन जग्राहेत्यर्थः । ईरिणमूषरमत एवोषरे भक्ष्यमादि निषिध्यते ॥ ७ ॥

छेदे सति पुनर्विरोहः प्ररोहो भवत्विति वरेण । निर्यासेति अत एव निर्यासोऽभक्ष्यः ॥ ८ ॥

शश्वत्कामः प्रसुसम्भोगोऽव्यवस्वयुग्मभावः । गर्भवत्या अपि गर्भानपकारकसंभोगश्च स एव वरस्तेन । रज इति । अत एव रजस्वला भव्यवहार्या ॥ ९ ॥

द्रव्याणां क्षीरादीनां भूयः भूयस्त्वं तस्मात् सम्पर्केण बहुतरत्वमेवास्माकं वरस्तेन द्रवभूय इति पाठे द्रवभूयस्त्वं सांसिद्धिकद्रवत्वं तेन तास्वप्सु बुद्बुदफेनाभ्यां तन्मलं दृश्यम् । अत एव तत् बुद्बुदादिकं क्षिपन् दूरीकुर्वन् एव हरति अप आहरति । न तु बुद्बुदादियुक्ता इत्यर्थः । यदि च तद्युक्ता एव अपः कश्चिदाहरति तदा पापमेव हरतीति भावः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इन्द्रेण स्वहिताय पौरोहित्ये वृतस्य विश्वरूपस्य किञ्चिदहितकर्तृत्वेनधस्तद्वधमन्तरेण त्वष्ट्रा इन्द्रवधाय वृत्र उत्पादितस्तद्वधनिवृत्तये देवैर्विष्णुः प्रार्थित इति नवमेऽध्याये वर्ण्यते । तस्येति । सोमस्य पीथं पानं यस्मिन् तत् । अन्नमत्तीति तत् ॥ १ ॥

बर्हिषि यज्ञे देवेभ्यो हविर्भागं प्रत्यक्षं प्रकटमुच्चैरवदत् ॥ २ ॥

स एव हि असुरान् प्रति तु परोक्षमप्रकटं हविर्भागं ददौ तदेव हेतुप्रदर्शनपूर्वकमाह स्नेहवशानुगः यजमानश्च अतो भागमवहत् असुरानपि प्रापयामासेत्यर्थः ॥ ३ ॥

धर्मालीकं धर्मे कपटम् ॥ ४ ॥ ५ ॥

ईश्वरः समर्थोऽपि जग्राह समर्थेनापि ब्रह्मवधफलं भोक्तव्यमेवेत्यर्थः ॥ ६ ॥

खातस्य गर्तस्य पूरणं खतो भवत्विति वरेण तुरीयं चतुर्थं भागं जग्राह ॥ ७ ॥

छेदेऽपि पुनर्विरोहो भवत्विति वरेण ॥ ८ ॥

शश्वत् कामवरेण ऋतावपि भोगानुच्छेदवरेण अंहः पापम् ॥ ९ ॥

द्रवभूयोवरेण द्रवस्य शैत्येन शोषितस्य भूयः पुनर्भूयस्त्वं तद्वरेण तुरीयं भागमापः जगृहुः । तन्मलं तासु बुद्बुदफेनाभ्यां दृष्टं दृश्यते । अत एव तत् बुद्बुदादिकं ब्रह्महत्याविकृतत्वात् क्षिपन् अपसारयन् अपहरति गृह्णाति जलं जन इति शेषः १०॥

हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे ।
इन्द्रशत्रो ! विवर्धस्व मा चिरं जहि विद्विषम् ॥ ११ ॥
अथान्वाहार्यपचनादुत्थितो घोरदर्शनः ।
कृतान्त इव लोकानां युगान्तसमये यथा ॥ १२ ॥
विष्वग्विवर्धमानं तमिषुमात्रं दिने दिने ॥ १३ ॥
दग्धशैलप्रतीकाशं सन्ध्याभ्रानीकवर्चसम् ।
तप्ततामशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम् ॥ १४ ॥
देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी ।
नृत्यन्तमुन्नदन्तं च चालयन्तं पदा महीम् ॥ १५ ॥
दरीगम्भीरवक्त्रेण पिबता च नभस्तलम् ।
लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम् ॥ १६ ॥
महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः ।
वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥ १७ ॥
येनावृता इमे लोकास्तमसा त्वाष्ट्रमूर्तिना ।
स वै वृत्र इति प्रोक्तः पापः परमदारुणः ॥ १८ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले हे भारत परीक्षितजी ! उस विश्वरूप के तीन मस्तक थे एक सोमपीथ एक सुरापीथ एक अन्नाद ऐसा हमने सुना है ॥ १ ॥

हे नृप ! वह विश्वरूप यज्ञ करते समय में अपने पितर देवतों को ऊँचे स्वर से पुकार कर भाग निवेदन करता था और विनय करता था ॥ २ ॥

उसी ने माता के स्नेह के वश होकर देवतों के यजन करने के समय में भी छिपा कर धीरे से असुरों को भी भाग अर्पण करादिया ॥ ३ ॥

इन्द्र ने उस विश्वरूप के कपट सहित देवतों की अवज्ञा को जानकर असुरों के बढने से डर कर शीघ्र से क्रोध करके उस के मस्तकों को काटदिया ॥ ४ ॥

उस का जो सोमपीथ मस्तक है सो कपिञ्जल पक्षी होगया जो सुरापीथ सो कलविङ्क पक्षी होगया जो अन्नाद था सो तित्तिरि पक्षी होगया ॥ ५ ॥

यद्यपि इन्द्र सब समर्थ हैं तौभी ब्रह्महत्या का उन को अञ्जलि से ग्रहण करना पडा फिर एक वर्ष में शुद्धि होने के वास्ते उस पाप के चार भागकर के इन्द्र ने पृथिवी जल वृक्ष स्त्री इन को बांट दिया ॥ ६ ॥

जमीन के गढ्ढों के भरजाने के वर भाग कर पृथिवी ने पाप का चौथा हिस्सा लेलिया सोई पृथिवी के ऊपर भूमि मे ब्रह्महत्या का चिन्ह दीखता है ॥ ७ ॥

कटे घाव के भरजाने के वर से वृक्षों ने चौथा भाग लिया उस ब्रह्महत्या का रूप वृक्षों मे गोंद रूप से दीखता है ॥ ८ ॥

निरन्तर काम भोग की इच्छा के वर मांग कर चतुर्थ भाग को स्त्रियों ने ग्रहण किया सो स्त्रियों मे महिना महिना मे रज रूप से ब्रह्महत्या दीखती है ॥ ९ ॥

पदार्थ को बढा देने के वरसे चौथे भाग को जलों ने ग्रहण किया सो जल में फेन बबूला रूप से ब्रह्महत्या दीखती है ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इन्द्रायेन्द्रं हन्तुम् । शत्रवे शत्रूत्पत्त्यै । तदाह । इन्द्रशत्रो विवर्धस्वेति । अत्र इन्द्रशत्रुपदस्याद्युदात्तत्वात् "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति स्मृतेर्बहुव्रीहिलक्षणापत्त्या इन्द्र एव तस्य शत्रुरभूत् । तदुक्तं श्रुत्या । "यदब्रवीत्स्वाहेन्द्रशत्रुर्वर्धस्व इति तस्मादस्येन्द्रः शत्रुरभवत्" इति । तथा च शिक्षायाम् ।
मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥
इति ॥ ११ ॥

अन्वाहार्यपचनाद्दक्षिणाग्नेः तं वीक्ष्य वित्रस्ता लोका दश

तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः ।
स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः ॥ १९ ॥
ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः ।
प्रत्यञ्चमादिपुरुषमुपतस्थुः समाहिताः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

दिशो विदुद्रुवुरिति पञ्चमेनान्वयः ॥ १२ ॥

कथम्भूतम् । विष्वक्समन्तत इषुविक्षेपमात्रं प्रतिदिनं वर्धमानम् ॥ १३ ॥

दग्धशैलप्रतीकाशं कृष्णवर्णम् । सन्ध्याभ्रानीकवद्वर्चो दीप्तिर्यस्य तं तप्तताम्रवच्छिखाः श्मश्रूणि च यस्य । मध्याह्नार्कवदुग्रे लोचने यस्य ॥ १४ ॥

रोदसी आरोध्येवेत्यर्थः ॥ १५

दरीवद्गम्भीरेण वक्त्रेण मुहुर्मुहुर्जृम्भमाणमित्यन्वयः । कथम्भूतेन । नभस्तलं पिबता ऋक्षाणि जिह्वया लिहता भुवनत्रयं ग्रसता ॥ १६ ॥

महता विस्तीर्णेन रौद्रा दंष्ट्रा यस्मिन् ॥ १७ ॥

वृत्रनाम निर्वक्ति । येनावृता इति । त्वाष्ट्री मूर्तिर्यस्य तमसस्तेन तथा च श्रुतिः "स इमाँल्लोकानावृणोत्तद्वृत्रस्य वृत्रत्वम्" इति ॥ १८ ॥

अग्रसन्नग्रसितवान् ॥ १९ ॥

ग्रस्तं तेजो येषां प्रत्यञ्चमन्तर्यामिणं त्रिभुवनस्य तेन व्याप्तत्वात्क्वापि गमनासम्भवात्तत्रैव स्थित्वा तुष्टुवुरित्यर्थः ।

महाभये परित्राणमन्यतो न भवेदिति ।
हरिमेव प्रपद्यन्ते सुराः शरणमातुराः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ततस्त्वष्ट्रा इन्द्रेण हतः पुत्रो यस्य तादृशः इन्द्राय शत्रवे जुहाव इन्द्रायेति तादर्थ्ये चतुर्थी तदर्थश्चात्र तन्निवृत्तिरर्थशब्दस्य निवृत्तेरपि वाचकत्वात् । यथा मशकार्थो धूमः मशकेभ्यो धूम इति । इन्द्रविनाशार्थमजुहोदित्यर्थः । हुतेनैवं प्रार्थितवानित्याह । इन्द्र शत्रो इति । इन्द्रस्य शत्रो आचिरमाशु विवर्धस्व स्वविद्विषमिन्द्रं जहि विनाशयेति ॥ ११ ॥

अथ होमानन्तरमन्वाहार्यपचनाद्दक्षिणाग्नेर्घोरदर्शनोऽसुर उत्थितः उदितः तं विशिनष्टि । यः लोकानां युगान्तसमये प्रलये कृतान्तो मृत्युरिव स्थितः ॥ १२ ॥

तमसुरं दिने दिने प्रतिदिनमिषुमात्रम् इषुप्रमाणं विष्वक्समन्ततो विवर्धमानम् । दग्धः साङ्गारो यः शैलः पर्वतः तत्प्रतीकाशं तदुपमम् । सन्ध्याभ्राणामनीकस्य समूहस्येव वर्चो यस्य । तप्तताम्रवच्छिखाग्रभागो येषां तादृशानि श्मश्रूणि यस्य । मध्याह्ने योऽर्कः सूर्यः तद्वदुग्रे लोचने यस्य देदीप्यमानास्त्रिशिखाः शिखा यस्मिंस्तस्मिन् शूले रोदसी द्यावापृथिव्यौ तदन्तर्वर्तिपदार्थजातमित्यर्थः । आरोप्य नृत्यन्तम् उन्नदन्तमुच्चैर्नदन्तम् । पदा पादेन महीं चालयन्तं कम्पयन्तम् ॥ १३-१५ ॥

दरीवत्पर्वतद्रोणीवद्गम्भीरवक्त्रेण किम्भूतेन नभस्तलं पिबतेव स्थितेन किञ्च जिह्वया ऋक्षाणि नक्षत्राणि लिहता आस्वादनं कुर्वता भुवनत्रयं ग्रसता ॥ १६ ॥

रौद्रा भयङ्करा दंष्ट्राः यस्मिन्महता विपुलेनैवम्भूतेन वक्त्रेण मुहुर्मुहुर्जृम्भमाणं वीक्ष्य विशेषेण त्रस्ता भीताः सर्वे लोका दश दिशो दुद्रुवुः ॥ १७ ॥

त्वाष्ट्री मूर्तिर्यस्य तेन त्वाष्ट्रमूर्तिभूतेन तपसा । त्वष्टुस्तपसा येनेमे लोका आवृतास्तेन लोकावरणरूपप्रवृत्तिनिमित्तेन वृत्र इति प्रोक्तः । वृत्रशब्दवाच्यः सोऽभूदित्यर्थः । तथा च श्रुतिः "स इमाँल्लोकानावृणोत्तद्वृत्रस्य वृत्रत्वम्" इति वृत्रस्य वृत्रशब्दाभिधेयस्य वृत्रत्वं वृत्रशब्दप्रवृत्तिनिमित्तम् । तल्लोकावरणमेवेत्यर्थः । स च पापः धर्मप्रतिपक्षः । लोकपालविरोधित्वादिति भावः । परमदारुणः दुःसहः ॥ १८ ॥

तं वृत्रमभिद्रुत्याभिमुखमागत्य सगणाः ससैन्या विबुधर्षभा इन्द्रादयः स्वैः स्वैर्दिव्यानामस्त्राणां शस्त्राणां च ओघैः समूहैर्निजघ्नुः प्रजह्रुः । तानि दिव्यान्यस्त्रादीनि स वृत्रोऽग्रसीत ॥ १९ ॥

ततस्ते देवा विस्मिताः अहो एतस्य दुर्जेयत्वमिति विस्मिताः ग्रस्तं वृत्रेणापहृतं तेजो येषां ते । अत एव विषण्णाः खिन्नाः प्रत्यञ्चं प्रत्यगात्मशरीरकं प्रत्यग्दिग्गतं वा प्रतीच्यां दिश्याविर्भूतेति तत्रैवाविर्भावस्य वक्ष्यमाणत्वात् । आदिपुरुषं जगत्कारणभूतं परमात्मानं समाहितचित्ताः सन्तः उपतस्थुस्तुष्टुवुः । त्रिभुवनस्य तेन व्याप्यत्वादन्यत्र गमनाभावात्तत्रैव स्थित्वा स्वान्तरात्मानं तुष्टुवुरिति भावः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इन्द्रशत्रुश्च इत्यादिना "त्वष्टा हतपुत्रोऽपीन्द्रं सोममाहरत्" इत्यादिवेदवाक्यं सूचयति । इन्द्रः शत्रुर्यस्य वृत्रस्य स इन्द्रशत्रुः इन्द्र एव तस्य समृद्धिरिन्द्रशत्रो! इति अनेन यजमानस्यानभिप्रेतार्थोऽपि सूच्यत इति ज्ञातव्यम् ॥ ११ ॥

अन्वाहार्यपचनाद्दक्षिणाग्नेः लोकानां क्षयाय ॥ १२-१३ ॥

सन्ध्याकालाभ्रमालाधरकपिशं वासो यस्य स तथा तं तप्तताम्रवच्छिखा श्मश्रूणि च यस्य स तथा तम् ॥ १४ ॥

त्रिशाः शिखाः शिरांसि यस्य स तथा तस्मिन् ॥ १५ ॥

दरीगम्भीरवक्त्रेण गुहावद्गाधमुखेन ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रौद्ररूपे दंष्ट्रे यस्य तत्तथा तेन मुखेन जृम्भयन्तं व्याददानम् ॥ १७ ॥

निरुक्तिपूर्वकं नाम निर्दिशति । येनेति । त्वाष्ट्रलक्षणया मूर्तिर्यस्य तत्तथा तेन तमसा आवृता इति येन ततः सोऽसुरो वृत्र इति ख्यातः "वृत्रं जघन्वाँ अपतद्ववार" इति श्रुतेः "दैत्यभेदे चान्धकारे वृत्रशब्दः प्रयुज्यते" इत्यभिधानाच्च । पातीति पः पावः परमात्मा धर्मो वा तस्मादपगतः पापः एतदेव सूचयति । पदमदारुणा इति ॥ १८ ॥ १९ ॥

श्रीनारायणानुग्रहमन्तरेण वृत्रजयो दुःसाधन इति कृत्वा देवानां हरिशरणप्रकारं वक्ति । तत इति । प्रत्यञ्चं प्रत्यगात्मानमादिपुरुषं स्वेच्छया भक्तानुग्रहाय गृहीतपुरुषरूपम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इन्द्रशत्रो ! विवर्द्धस्वेति शत्रुः हन्ता तत्र तत्पुरुषे वृत्रस्य हन्तृत्वम् । बहुव्रीहौ सतीन्द्रस्य हन्तृत्वमायाति तत्र च तत्पुरुषत्वं "समासस्य" इत्यनेन समासान्तस्वरस्यान्तोदात्तविधिना व्यज्यते । बहुव्रीहित्वं तु तद्बाधकेन "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इत्यनेन पूर्वपदे स्वभावसिद्धाद्युदात्तस्थापकेन व्यज्यते । इन्द्रशब्दो ह्याद्युदात्तः "इदि परमैश्वर्ये" इत्यस्योदात्तगणपठितत्वात् । तदेवं दैवादाद्युदात्तपाठेन वैपरीत्यं जातमिति इन्द्र एव तस्य शत्रुरभूत् ॥ ११-१४॥

तत्र शूल आरोप्यैवेति द्यावापृथिवीस्थयोर्लोकयोरस्मिन् शूले स्वप्रथनाभिव्याप्तिमननात् ॥ १५--१७ ॥

येनेति तैः । त्वाष्ट्रमूर्त्तिनेति मूर्त्तिः स्वरूपं त्वाष्ट्रसम्बन्धेनैव तस्य स्वरूपं भासत इत्यर्थः ॥ १८——२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

संवत्सरान्ते तदघमिति पूर्वोक्ताश्विनमासारम्भे इन्द्रो यदैव ब्रह्महत्यातो विमुक्तो बभूव तदैव तपोवनादागत्य स्वीयमाश्विनमासं पालयितुं प्रवृत्तः । त्वष्टा स्वपुत्रवधं श्रुत्वा क्रोधशोकाभ्यामिन्द्रवधोपायं चकारेत्याह । हतपुत्र इति । इन्द्राय शत्रवे इन्द्ररूपं शत्रुं हन्तुं तत्र मन्त्रमाह । इन्द्रशत्रो ! विवर्द्धस्वेति । इन्द्रस्य शत्रुः सन् विवर्द्धस्वेति तत्पुरुषसमासस्य विवक्षितत्वेऽपि इन्द्र एव शत्रुर्यस्येति बहुव्रीह्यर्थ एव दैवादापतितः स्वरव्यतिक्रमात् । तथा हि "इदि परमैश्वर्ये,, इत्यस्योदात्तगणपठितत्वादिन्द्रशब्दो ह्याद्युदात्तः । तत्र "समासस्य,, इति सूत्रेण समासमात्र एवान्तोदात्तत्वविधानात्तत्पुरुषे शेषम् "अनुदात्तम्" इत्यनेन इन्द्रशत्रो इत्यस्याद्यानुदात्तत्वम् "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति तद्बाधकसूत्रेण पूर्वपदस्य स्वभावसिद्धस्वरस्थापनाद्बहुव्रीहाविन्द्रशत्रो इत्यस्याद्युदात्तत्वम् । त्वष्ट्रा तु दैवादाद्युदात्तस्वरतयैव पाठादिन्द्र एव तस्य शत्रुर्हन्ता अभूत् । तदुक्तं श्रुत्या "यदब्रवीत् स्वाहेन्द्रशत्रो ! विवर्द्धस्वेति तस्मादस्येन्द्रः शत्रुरभवत्" इति । तथा च शिक्षायाम् ।

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्

इति ॥ ११ ॥

अथ तदनन्तरमेव स्वीयपाठव्यतिक्रमेऽवगते सति अन्वाहार्यपचनात् स्वभावप्राप्ताद्युदात्तव्यञ्जितबहुव्रीहिपठनानन्तरं आहार्यतात्प्राप्ताद्यनुदात्तव्यञ्जित तत्पुरुषपाठाद्धेतोः स घोरदर्शन उत्थितः स्वाभाविकपाठादिन्द्रोऽस्य हन्ता भविष्यति पश्चादाहार्यपाठादिन्द्रोऽप्यनेन हतो भविष्यति सवाहमस्यापि तस्यानेन निगिलितत्वमात्रत्वादिति भावः । अन्वाहार्यशब्दस्य षाण्मासिकश्राद्धवाचित्वाद्व्याख्यान्तरं न घटते ॥ १२ ॥

तं वीक्ष्य वित्रस्ता लोका दश दिशो विदुद्रुवुरिति पञ्चमेनान्वयः । कीदृशं विष्वक्समन्ततः स्वस्य ऊर्ध्वाधो दशदिक्षु इषुविक्षेपमात्रं प्रतिदिनं वर्द्धमानम् । आरोप्य आरोप्यैवेत्यर्थः । पिबता पिबतेव ॥ १३—१७ ॥

त्वाष्ट्री त्वष्टृसम्बन्धिनी मूर्त्तिर्यस्य तेन वृत्रेण इमे लोका आवृता इत्यर्थः ॥ १८ ॥ १९ ॥

प्रत्यञ्चं प्रत्यग्भूतमन्तर्यामिणमित्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततस्तदनन्तरं हतः पुत्रो यस्य सः । इन्द्राय शत्रवे जुहाव "तादर्थ्ये चतुर्थी" मरुद्भ्यः भूम इतिवत् इन्द्ररूपशत्रुभावार्थं जुहावेत्यर्थः । तत्र मन्त्रमाह । इन्द्रशत्रो ! विवर्द्धस्वेति । अत्राद्युदात्तं पदं पठितं तेनानिष्टं जातम् । तथा हि तत्पुरुषविवक्षया पठितेऽपि तत्पुरुषे शेषम् "अनुदात्तम्" इत्यनेन आद्यानुदात्तत्वे प्राप्ते इन्द्रशत्रुपदस्याद्युदात्तत्वात् "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इत्यनेन बहुव्रीहिसम्बन्धापत्त्या इन्द्र एव तस्य शत्रुर्जातः । तथोक्तं शिक्षायाम् ।

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥

इति "यदब्रवीत्स्वाहेन्द्रशत्रो विवर्द्धस्वेति तस्मादस्येन्द्रः शत्रुरभवत्" इतिश्रुतिरप्यनेनोपबृंहिता ॥ ११ ॥

अथ होमानन्तरमन्वाहार्यपचनाद्दक्षिणाग्नेः ॥ १२ ॥

तं वीक्ष्य लोका वित्रस्ता दश दिशो दुद्रुवुरित्यनेन सम्बन्धः । विश्वक्सर्वदिक्षु इषुविक्षेपमात्रं दिने दिने विवर्द्धमानं दग्धशैलप्रतीकाशं कृष्णवर्णम् । सन्ध्याभ्रसमूहवद्बर्भ्रः कान्तिर्यस्य तं तप्तताम्रवर्णरूपा शिखा श्मश्रूणि च यस्य मध्याह्नार्कवदुग्रे दुर्दर्शे लोचने यस्य तम् ॥ १३ । १४ । १५ ॥

शूले रोदसी आरोप्येत्यनेन शूलस्यापि सम्बन्धं दृढत्वं सूच्यते दरीवद्गम्भीरेण वक्त्रेण मुहुर्मुहुः जृम्भमाणमित्यन्वयः । कथम्भूतेन नभस्तलं पिबता आनिविपुलेन जिह्वया ऋक्षाणि लिहता दीर्घजिह्वेन भुवनत्रयं ग्रसता दुष्पूरेणेत्यर्थः ॥ १६ ॥ १७ ॥

त्वाष्ट्रः त्वष्टुरपत्यभूतः अन्वाहार्यपचनादुत्थितो यः कृष्णवर्णः पुरुषः स एव मूर्तिर्यस्य तपसस्तेन पुरुषाकारेण त्वष्टुः तपसेत्यर्थः । इमे लोका आवृताः अतो वृत्र इति प्रोक्तः । अनेन "स इमाँल्लोकानावृणोत्तद्वृत्रस्य वृत्रत्वम्" इति श्रुतिरुपबृंहिता ॥ १८ ॥ १९ ॥

विषण्णाः खिन्नाः प्रत्यञ्चमन्तर्यामिणमुपतस्थुस्तुष्टुवुः ॥ २० ॥

॥ देवा ऊचुः ॥

वाय्वम्बराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजन्तः ।
हराम यस्मै बलिमन्तकोऽसौ बिभेति यस्मादरणं ततो नः ॥ २१ ॥
अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशान्तम् ।
विनोपसर्पत्यपरं हि बालिशः श्वलाङ्गुलेनातितितर्ति सिन्धुम् ॥ २२ ॥
यस्योरुशृङ्गे जगतीं स्वनावं मनुर्यथाबद्ध्य ततार दुर्गम् ।
स एव नस्त्वाष्ट्रभयाद्दुरन्तात्त्राताश्रितान् वारिचरोऽपि नूनम् ॥ २३ ॥
पुरा स्वयम्भूरपि संयमाम्भस्युदीर्णवातोर्मिरवैः कराले ।
एकोऽरविन्दात् पतितस्ततार तस्माद्भयाद्येन स नोऽस्तु पारः ॥२४॥
य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वम् ।
वयं न यस्यापि पुरः समीहतः पश्याम लिङ्गं पृथगीशमानिनः ॥ २५ ॥
यो नः सपत्नैर्भृशमर्द्यमानान् देवर्षितिर्यङ्नृषु नित्य एव ।
कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च ॥ २६ ॥
तमेव देवं वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यम् ।
व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा ॥ २७ ॥

श्रीशुक उवाच ।

इति तेषां महाराज ! सुराणामुपतिष्ठताम् ।
प्रतीच्यां दिश्यभूदाविः शङ्खचक्रगदाधरः ॥ २८ ॥

भाषा टीका ।

विश्वरूप पुत्र के मरजाने पर त्वष्टा ने शत्रु इन्द्र के मरने के वास्ते होम किया तिस होम में इस मन्त्र का उच्चारण किया कि इन्द्रशत्रु बढ देर मत कर शत्रुको जीत ॥ ११ ॥

इंद्रशत्रु शब्द में स्वरके फरक होजाने से इन्द्र जिसका शत्रु होवे ऐसे अर्थ होजाने से उस कुण्ड में से जो एक पुरुष उत्पन्न भया भो बडा भयङ्कर रूपवाला प्रलय काल में सब के नाश करने वाला काल सरीका मालूम पडा ॥ १२ ॥

वह पुरुष रोज रोज एक बाण के बरोबर बढने लगा जले पर्वत सरी का सन्ध्या काल की मेघमाला सरी का लाल तांबे सरीके जिसके केश और मूंछ हैं ॥ १३ ॥

मध्यान्ह काल के सूर्य सरी के उग्र उसके नेत्र हैं तीन शिखावाले प्रकाशमान त्रिशूल को उठाकर आकाश पाताल के मध्य में नाचता था और गर्जकर पृथिवी को कंपाता था ॥ १४ ॥ १५ ॥

बडे भारी गम्भीर कन्दरा सरीके मुख से आकाश पाताल को ग्रसता सा था जीभ से नक्षत्रों को चाटता सा था जैसे कि तीनों भुवनों को ग्रास करै ॥ १६ ॥

बडे भयङ्कर दांतों से बारम्बार जमुहाई लेता था तिससे उसको देखकर सब लोग दशों दिशाओं को भगने लगे ॥ १७ ॥

त्वष्टा के पुत्र उस स्वरूप अन्धकार मूर्ति से सब लोक व्याप्त होगये तिससे उस परम दारुण का नाम वृत्र रखा गया ॥ १८ ॥

अपने गणों के सहित देवता लोग उसके पास जा दौडकर मारने लगे अपने अपने जितने अस्त्र शस्त्रों से मार उन सब अस्त्रादिकों को उसने ग्रास कर लिया ॥ १९ ॥

तिसके अनन्तर सब देवता उसके तेज से ग्रसित होगये तब विषाद युक्त होकर विस्मित होकर अन्तर्यामि आदि पुरुष नारायण की स्तुति करने लगे ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वाय्वादीनि पञ्च महाभूतानि तैर्निर्मितास्त्रयो लोकास्तेषाम-धिपतयो ब्रह्मादयश्च ततोऽर्वाचीना वयं च सर्वे यस्मै अन्त-काय कालायोद्विजन्तः सन्तो बलिं हराम असावपि यस्मा-द्बिभेति ततः परमेश्वरादेव नोऽस्माकमरणं शरणं रक्षण-मस्तु ॥ २१ ॥

आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ ।
पर्युपासितमुन्निद्रशरदम्बुरुहेक्षणम् ॥ २९ ॥
दृष्ट्वा तमवनौ सर्व ईक्षणाह्लादविक्लवाः ।
दण्डवत् पतिता राजन् ! शनैरुत्थाय तुष्टुवुः ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत एवं स्वशरणे हेतुमाहुः । अविक्रियतं निरहङ्कारं कुतूहलशून्यं वा । कुतः । प्रशान्तं रागादिशून्यम् । तच्च कुतः । स्वेनैव लाभेन परिपूर्णकामम् । तच्च कुतः ।समुपाधिपरिच्छेदशून्यम् । एवंभूतं परमेश्वरं विना परं यः शरणार्थमुपसर्पति स बालिशोऽज्ञः यतोऽसौ शुनो लाङ्गूलेन पुच्छेन समुद्रमतितितर्ति अतितर्तुमिच्छतीत्यर्थः । यथा तेन समुद्रतरणं न भवति तथा निरीश्वराश्रयणेन व्यसनार्णवतरणं न भवतीति भावः ॥ २२ ॥

महाभये स एव रक्षक इति दृष्टान्तमाहुः । यस्येति द्वाभ्याम् । यस्य महाशृङ्गे जगतीं पृथ्वीमेव स्वनावं बद्ध्वा मनुः सत्यव्रतो यथावदुर्गं सङ्कटं ततार स एव वारिचरो मत्स्यमूर्तिर्नोऽस्मान् त्वाश्रितान् सतो नूनं त्राता रक्षिष्यति ॥ २३ ॥

स्वयम्भुवाम्भसि प्रलयोदके उदीर्णोरुतरैर्वातैर्ये ऊर्मयस्तेषां रवैः कराले भयङ्करे अरविन्दनाभिकमलात् पतितप्राय एकोऽसहाय एव तस्माद्भयाद्येन ततार स एव नः पारस्तारकोऽस्तु ॥ २४ ॥

किञ्च । वयं भगवतैव सृष्टाः पालिताश्च बहुशोऽतस्तमेव शरणं व्रजामेत्याहुः । य एक इति त्रिभिः । येनानुगृहीताः सन्तो विश्वं सृजामः । ननु यूयमेव सहायो मान्यो युष्माकमनुग्राहकोऽस्ति तस्यादर्शनात्तत्राहुः । अस्मत्तः पुरः पूर्वमेवान्तर्यामितया समीहमानस्यापि यस्य लिङ्गं रूपं न पश्यामः । तत्र हेतुः । पृथक् पृथगीशा इत्यभिमानिनः ॥ २५ ॥

देवादिपूर्वेन्द्रुपरशुराममत्स्यरामादितनुभिः कृतावतारः सन्नात्मसात्कृत्य पाति च ॥ २६ ॥

आत्मभूतं दैवतं कुतः विश्वं विश्वात्मकम् । तथापि विकारं धारयन्ति । अन्वयम् । विश्वात्मत्वे हेतुः । परं कारणम् । ननु प्रधानं पुरुषश्च विश्वस्य कारणं तत्राहुः । प्रधानं पुरुषं च तदात्मकोऽपि स एवेत्यर्थः । स एव नः शं विधास्यति ॥ २७ ॥

प्रतीच्यां दिशि हृदि प्रथममाविरभूत् ॥ २८ ॥

पुनश्च तं पुरो दृष्ट्वा ईक्षणाह्लादेन विवशा अवनौ दण्डवत्पतिताः सन्तः शनैरुत्थाय तुष्टुवुरित्यन्वयः । कथम्भूतम् । श्रीवत्सकौस्तुभौ विना स्वतुल्यैः षोडशभिः सुनन्दादिभिः परितः सेवितम् । उन्निद्रशरदम्बुरुहवदीक्षणे यस्य तम् ॥ २९—३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपसंहरतिमेवाह । वायुरित्यादिना । तावत् "भीषास्माद्वातः पवते एतस्य वा अक्षरस्य प्रशासने गार्गि ! द्यावापृथिव्यौ विधृते तिष्ठतः एतस्य वा अक्षरस्य प्रशासने गार्गि ! प्राच्यो नद्यः स्यन्दन्ते" इत्यादिश्रुत्युक्तरीत्या सर्वस्य प्रशासितुः परमात्मनः शासनानुवर्तिनामात्मनां तदनन्यशरणत्वं वदन्तः स्तुवन्ति । वायुरिति । वायुश्चाम्बरं चाग्निश्चापश्च क्षितिश्च तास्तथा त्रिलोकाः लोकत्रयान्तर्गता ब्रह्मादयश्चतुर्मुखप्रभृतयो ये च ते सर्वे वयमुद्विजन्तः बिभ्यतः सन्तो यस्मै परमपुरुषाय बलिं तच्छासनानुरूपमाराधनं वहामः प्रापयामः कुर्मः असौ प्रसिद्धोऽन्तको मृत्युरपि यस्माद्बिभेति तस्मात्परमपुरुषादन्यः कः अस्माकं शरणं रक्षकोऽस्माकम् ॥ २१ ॥

अथ शरण्यत्वौपयिकगुणपूर्णत्वात्तस्यैव शरण्यत्वं तदितरस्याशरण्यत्वं च वदन्तः शरणं ययुः । अविक्रियतमिति । अविक्रियतं स्वमहिम्नः स्वाभाविकत्वाद्विस्मयरहितं परिपूर्णकाममवाप्तसमस्तकामम् । लभ्यते इति लाभः स्वाभाविकेनैव लाभेन स्वानुभवानन्देन उपशान्तं समं रागादिरहितं प्रशान्तमूर्मिषट्करहितं एते हि शरण्यत्वोपयुक्ता गुणाः एतेन समस्तसोपाधिकमहिम्नोऽपरिपूर्णसमस्तकामस्यौपाधिकानन्दयुक्तस्य रागद्वेषादिप्राकृतगुणयुक्तस्योर्मिषट्कपीडितस्य शरणागततुल्यत्वेनाशरण्यत्वं सूचितम् । न हि श्वलाङ्गूलतस्तारणमन्यं शरणं व्रजति । एवमीश्वरं शरण्यं त्वां विना परमन्यं क्षुद्रं देवं यो बालिशोऽज्ञः सन्नुपसर्पत्यनुवर्तते सः श्वलाङ्गूलेन प्लवमानस्य शुनः पुच्छेन साधनेन सिन्धुं समुद्रमतितर्ति अतीव तरितुमिच्छति श्वलाङ्गूलेन सिन्धुं तितीर्षुरिव नेष्टं प्राप्नोति प्रत्युत विहतो भवति इत्यर्थः ॥ २२ ॥

यथा मनुचतुर्मुखादयः शरण्यमापन्नाः त्रातारं भक्तवत्सलं भगवन्तमाश्रित्यैवापदोऽत्यवर्तन्त तथा वयमपि तमेवापन्निवृत्तये शरणं व्रजाम इत्याहुः । यस्येति द्वाभ्याम् । यस्य महामत्स्यस्योरुशृङ्गे महाशृङ्गे जगतीं पृथ्वीमेव स्वां नावमाबध्य बद्ध्वा मनुः सत्यव्रताख्यो दुर्गं सङ्कटं ततार । अस्मत्कल्पेऽप्यभितिहासः स्फुटीभविष्यति स एव वारिचरो मत्स्यमूर्तिर्भगवानाश्रितान् शरणं गतानस्मान् दुरन्तादपारात्स्तुत्यस्य दुःखस्य भयान्नूनं त्राता रक्षिता भविष्यति अतस्तमेव शरणं व्रजाम इति भावः ॥ २३ ॥

तथा पुरा जगदादौ स्वयम्भूर्ब्रह्मापि स्वयमाम्भसि प्रलयसंबन्धिनि जले कथम्भूते उदीर्णाः प्रचण्डो यो वातः पवनस्तेन ये ऊर्मयस्तरङ्गास्तेषां रवैः ध्वनिभिः कराले भयङ्करे स्वयमाम्भस्यरविन्दनाभिकमलात् पतितः पतितप्रायः एकः असहायो येन भगवता साधनभूतेन तस्माद्भयात्ततार स एव नोऽस्माकं पारः पारयतीति पारः पालकोऽस्तु ॥ २४ ॥

किञ्च । वयं भगवता सृष्टाः पालिताश्च स इदानीमप्यस्मासूपेक्षिष्यत्यतस्तमेव शरणं व्रजाम इत्याहुः । य एक इति त्रिभिः । एकोऽ-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्वितीयः स्वसमाभ्यधिककारणान्तरानपेक्षो निजमायया आत्मीयसङ्कल्परूपज्ञानेन यः परमपुरुषो नोऽस्मान् ससर्ज येन भगवता अनुगृहीताः सन्तो वयं विश्वं व्यष्टिवर्गं सृजामः यच्छब्दानां तमेवेति तृतीये नान्वयः । यस्य च पुरः हृदयकुहरे समीहतः अन्तरात्मतया नियमयतः लिङ्गं विग्रहं न पश्यामः । तत्र हेतुः । पृथगीशमानिनः यतः पृथगीश्वरा इत्यभिमानिनो वयम् ॥ २५ ॥

यश्च सपत्नैः शत्रुभिः भृशं नितरामर्द्यमानान् पीडितान्नोऽस्मान् पाति अरक्षत् । कथम्भूतः । नित्य एव सदा अस्मानात्मसात्कृत्य स्वकीयत्वेन मन्यमानोऽस्मद्रक्षणाय युगे युगे प्रतियुगं स्वमायया स्वकीयसङ्कल्परूपज्ञानेनैव न तु कर्मयोनि भावः । तनुभिरुपेन्द्रपरशुराममत्स्यकूर्मवराहरामकृष्णादितनुभिर्देवादिषु कृतावतारः धृतावतारः सन् ॥ २६ ॥

तमेव भक्तवत्सलमात्मनामस्माकं दैवतं प्रधानं पुरुषं कारणावस्थाचिदचिच्छरीरकमन्यं चिदचिद्विलक्षणं परमुत्कृष्टमत एव शरण्यं शरणमर्हतीति शरण्यः तं सर्वे वयं देवाः शरणं व्रजाम रक्षकत्वेनाध्यवस्यामः । एतावदेवास्माकं कृत्यमिति भावः । तत्र शरणकृत्यं प्रकाशयन्तः शरणागतकृत्यमात्मनां महाविश्वासं दर्शयन्ति । स्वानामिति । स्वीयत्वेन परिगृहीतानां नोऽस्माकं शं सुखं शत्रुनिरसनद्वारकं नूनं धास्यति स तु महात्मा कृतज्ञभक्तरक्षणादीक्षः । एवं रक्षिष्यतीति विश्वासः प्रपत्त्यङ्गभूतो दर्शितः । स नोऽस्तु पार इत्यनेन गोप्तृत्ववरणम् । आत्मदैवतं प्रधानं पुरुषं विश्वं शरणं व्रजामेत्यनेन चिदचिच्छरीरकत्वकथनाच्छरीरस्य शरीरिशेषत्वैकस्वरूपत्वादात्मनः परमात्मैकशेषत्वानुसन्धानरूपात्मनिक्षेपः । न पश्यामः लिङ्गं सपत्नैर्भृशमर्द्यमानानित्यनेन च ज्ञानशक्तिबलाद्यभावरूपमात्मनां कार्पण्यमपि प्रदर्शितम् । तं विनोपसर्पत्यपरं हि बालिश इत्यनेनोपायान्तरनिष्ठत्वादिरूपप्रातिकूल्यवर्जनं प्रदर्शितम् । कृत्स्नचिदचिच्छरीरकत्वकथनेन "चराचराणि भूतानि सर्वाणि भगवद्वपुः । अतस्तदानुकूल्यं मे" इत्युक्तरीत्या भगवच्छरीरभूतसर्वभूतानुकूल्यमप्यात्मनां प्रदर्शितम् । न च सर्वभूतानुकूल्यस्याभिप्रेतत्वे शत्रुनिरसनप्रार्थनानुपपत्तिः । अस्याः प्रपत्तेर्मोक्षार्थत्वाभावात् तस्या एव हि सर्वभूतानुकूल्यरूपमङ्गमपेक्षितं अस्यास्तु शत्रुनिरसनार्थत्वात्तद्व्यतिरिक्तभूतानुकूल्यसङ्कल्पमात्रमेवापेक्षितमित्युपपादयन्तु विचक्षणाः ॥ २७ ॥

एवं सुरैः प्रपद्यमानो भगवानाविरभूदित्याह मुनिः । इतीति । हे महाराज ! इतीत्थं सुराणां देवानामुपतिष्ठतां प्रपदनपूर्वकं स्तुवतां सतां शङ्खचक्रगदाधरो भगवान् प्रतीच्यां प्रत्यगात्मसम्बन्धिन्यां दिशि हृदये "हृदि ह्ययमात्मा प्रतिष्ठितः" इति श्रुतेः प्रथमं हृद्याविरभूत्ततः पुरत आविरभूदित्यर्थः । यद्वा । प्रतीच्यां पश्चिमायां दिशि इत्यर्थः । देवानां पृष्ठत इति यावत् ॥ २८ ॥

तमाविर्भूतं भगवन्तं विशिनष्टि द्वाभ्याम् । श्रीवत्सकौस्तुभौ विना आत्मना सह तुल्यैः श्रीवत्सकौस्तुभमात्ररहितैरित्यर्थः । तयोः प्रधानपुरुषतत्त्वाभिमानित्वाज्जीवेनाधार्यत्वादिति भावः । षोडशभिः सुनन्दादिभिः पर्युपासितम् । यद्वा । भगवानाविरभूच्छङ्खचक्रगदाधरः तमाविर्भूतं प्रतीच्यां दिशि पृष्ठतः श्रीवत्सकौस्तुभमात्ररहितैरात्मतुल्यैः षोडशभिः पर्युपासितमित्यन्वयः । उन्निद्रे विकसिते शरदम्बुरुहे इवेक्षणे नेत्रे यस्य ॥ २९ ॥

तं दृष्ट्वा ईक्षणेन यः आह्लादस्तेन विक्लवाः ईषत्परवशाः सर्वे देवाः भूमौ दण्डवत्पतिताः प्रणेमुः । हे राजन् ! अनेकधा च तुष्टुवुः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वाय्वाद्यभिमानिनो ब्रह्मादयो ये त्रिलोकाः ते वयं यस्मै बलिं हराम त्रिलोकीबहिष्ठं लक्ष्मीतत्त्वं तदनियतं स्वतन्त्रमस्तीति शङ्का माभूदित्याह । अन्तक इति । असावन्तकः मूलप्रकृतिर्दुर्गादिनामभिर्भिन्ना यस्मान्महान्तकादरेर्बिभेति भीतेव तद्वशे वर्तते यतस्ततः स हरिर्नः अस्माकमरणं शरणमस्त्वित्यन्वयः । ननु ब्रह्मादयो वयं यस्मै बलिं हराम यस्माच्च असावन्तकोऽपि बिभेति ततस्तस्मात्परमेश्वराच्छरणं क्षेमो भवत्विति प्रतीतार्थः कस्मान्नोपपद्यत इति चेन्न ।

> कालोऽन्तकः प्रधानं च मृत्युरव्यक्तमित्यपि ।
> उच्यते प्रकृतिः सूक्ष्मा श्रीर्भूर्दुर्गेति नामभिः ॥
> सैव ब्रह्मादिभयदा विष्णोस्तु वशवर्तिनी ।
> अभयापि बिभेतीव तद्वशत्वानुवीर्यते ॥ ९

इति स्मृतिविरोधात् वायुश्च अम्बरं च अग्निश्च आपश्च क्षितिश्चेति वाय्वम्बराग्न्यप्क्षितयः ॥ २१ ॥

एवं स्थिते शिवाद्यन्यतमस्य शरणमिच्छन् बालिश इत्याह । अविस्मितमिति । यो ब्रह्माद्युपास्यपूजस्तं स्वेनैव लाभेन स्वरूपानन्दानुभवेनैव परिपूर्णकाममत एवाविस्मितं कुतूहलबुद्धिरहितं सममेकप्रकारं प्रशान्तं समुद्रवत् स्तिमितं विना योऽपरं रुद्राद्यन्यतममुपसर्पति श्वलाङ्गूलेन तरीस्थानेन सिन्धुं समुद्रमतिपिपर्ति पारमतिक्रामति तदुचितमित्याह । हीति । बालिशो हि यस्मात्तस्मादुचितमित्यर्थः ॥ २२ ॥

ननु यस्य कस्यचिच्छरणमुपगतस्यापदर्णवसन्तरणं दृष्टपूर्वं केवलमन्तरेणान्यं शरणं गच्छन् बालिशत्वेन श्वलाङ्गूलेनापारमकूपारं तितीर्षतीति परिहास्यः स्यात् तदेव कथमिति तत्राह । यस्येति । मनुर्यस्य हरेरुरुणि शृङ्गे जगतीं महीमयीं स्वनावं स्वस्य मनोरथेन क्लृप्तां तरीं यथा यथावद्दृढमाबध्य दुर्गमन्योपायेन तर्तुमशक्यं प्रलयार्णवलक्षणं क्लेशं ततार नूनमिदानीमपि स वारिचरो मत्स्यावतारो हरिरेवाश्रितानित्यसंवारतानां दुरन्तात्त्वाष्ट्रभयात्त्राताऽस्त्वित्यन्वयः । यथा ततार तथा तरणायाश्रितानिति वा ॥ २३ ॥

इतोऽपि श्रीहरिप्रसादादृते एतद्भयतरणं दुःसाधनमिति भावेन स्तुवन्तीत्याह । पुरेति । पुरादिसृष्टौ संयमाम्भसि प्रलयोदके स्थितादरविन्दात्प्रकृत्यात्मनः पश्चात्पतितः स्वयम्भूर्भयं ततार स हरिर्नस्त्वाष्ट्रभयार्णवस्य पारः पारप्रदर्शकोऽस्त्वित्यन्वयः । तत्रत्यो वायुरपि प्रकृत्यात्मा अन्यथा नेदृशं बलमन्यस्य स्यादित्यतः तल्लयजलं विशिनष्टि । उदीर्णेति । उदीर्णेन वातेन प्रकृत्यात्मना

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वायुनाऽमितानामूर्मीणां रवेः कराले भयङ्करे पद्मादीनां प्रकृत्यात्मत्वं कस्मान्निशिष्योऽयत इति शङ्का माभूत् यत्र वायूदपद्मादिरूपेण प्रकृतिः स्थिता ।

पैकस्तत्र बिभेदब्रह्मा विचार्य भयमत्यगात् ।
श्रीमन्नगो हरिस्तस्य ध्यातो भयमपानुदत् इत्युक्तेः ॥

भयनिमित्तमाह। एक इति। एकाकित्वात् द्वितीयवस्तुनोऽनुत्पन्नत्वात् "सोऽबिभेत्स द्वितीयमैच्छत्" इति श्रुतेः। ननु किमर्थं ब्रह्मणा भयमदर्शीयत उक्तमपीति स्वसृज्यजनानां भयादिस्वभावसम्भावनार्थम्। "अनिष्यतां जनानां तु स्वभावानां प्रसिद्धये" इत्युक्तेः। अपि सम्भावन इति च सम्भावनामन्तरेण स्वाभाविकं किं न स्यादित्यस्यापीदमुत्तरमपीति अज्ञानाद्धि भयमुत्पद्यते ब्रह्मणस्तु तत्नादित "ज्ञानादिगुणपूर्णस्य ब्रह्मणोऽपि" इत्युक्तेः। तर्हि कियन्तं कालमनुवर्तत इत्यस्यापीदमुत्तरं पूर्णज्ञानस्य चिरकालीनं भयादिकं गर्हितं "क्षणार्धगाः भयादिका भवन्तीव कथं तस्मिन् स्थिरालयाः" इत्युक्तेः। स्वसृज्यजनभयस्वभावप्रदर्शनमन्तरेणान्यत्किंप्रयोजनमित्यस्यापीदमेवोत्तरमपीति। भयप्रदर्शनेन भगवत्प्रीतिलक्षणमन्यदपि विद्यत इत्यर्थः। "भगवत्प्रीतये नित्यं ब्रह्मणो ये भयादयः। न वृथा तस्य भावः स्यात्क्वाप्यंशेऽपि क्षणार्धगाः" इत्युक्तेः। भयादिकमपि किमेकवारं बहुवारमुतेत्यस्यापीदमुत्तरं नैकवारं किन्तु बहुवारमस्तीत्यर्थः

अज्ञानं तु चतुर्वारं द्विवारं भयमेव च ।
शोकोऽपि तावान्नान्यत्र कदाचिद्ब्रह्मणो भवेत् इत्युक्तेः ॥

"इदमपि हरिप्रीतिजनकत्वेनोन्नतिकारणम्। तत्रापि भगवत्प्रीत्या उन्नत्यैवाह्वय तद्भवेत्" इत्युक्तेः ॥ २४ ॥

किञ्चास्माकं स्रष्टृत्वेन सम्बन्धत्वादपि निजस्वरूपं न बुद्ध्यामहे किन्तु लक्षणमेव पश्यामः अतो वयं तमेव शरणं याम इत्याहुः। य एक इति। एकः केवल ईशः ऐश्वर्यादिगुणपूर्णः यो निजमायया स्वाधीनया प्रकृत्या नः ससर्ज येन वयं प्रेरिताः विश्वमनुसृजाम यस्य पुरोऽग्रतः स्थिताः समेताः सङ्गता अपि वयं लिङ्गं लक्षणमेव पश्याम न तु स्वरूपं तत् स्रष्टृत्वेन तदनुगृहीतकर्तृत्वेन वाचिन्त्यवैभवमेव लक्षणं बुद्ध्यामहे न साक्षिदानन्दादिस्वरूपम्। अदर्शने कारणमाह। पृथगिति। पृथक् पृथगीशाभिमानित्वात्। अयं च कादाचित्क एव न तु सनातनः तदुक्तम्।

कदाचिदभिमानस्तु देवानामपि सन्निव प्रायः।
कालेषु नास्त्येव तारतम्येन सोऽपि तु इति ॥

अनेन पृथगित्यनेनाभिमानस्य तारतम्यं ध्वनयति। हे ईश ! अभिमानिनो वयं पृथक्तारतम्योपेता इति वार्थः सम्पद्यते ॥ २५ ॥

करचरणादिदेहवत्त्वेऽपि देवदत्तवदनित्यदेहो नास्ति अतः स्वाभिमतसिद्ध्यै संप्रार्थनीय इतिभावेनाहुः। यो न इति। तनुभिर्वैश्वर्यादिषु कृतावतारोऽपि नित्य एव निर्विकार एव न तु योनिकृतदुःखादिमान् न केवलमनुयुगं रक्षति हरिः किं तु अन्यदापीत्यर्थे चशब्दः ॥ २६ ॥

यस्त्वङ्घ्रिरेणोक्तानशिष्टगणैर्विशिष्य तं शरणं प्रार्थयन्ते। तमेवेति। अन्ययोगव्यवच्छेदार्थ एवशब्दः। देवा इत्यनेन देवाश्च शरणं हरिरेव नान्य इत्येवशब्दार्थो विवृतः। वयमित्यनेन हरेः स्वेषां च मिथो भेदाभिमानं ध्वनयति। न केवलमिष्टदेवतात्वेन शरणं यामः अपि तु सर्वोत्तमत्वादिगुणविशिष्टत्वाच्चेति भावेनाह। परं प्रधानमिति। प्रकृतिः किं नेत्याह। पुरुषमिति। तर्हि जीवः किं नेत्याह। विश्वमिति। न प्रपञ्च इत्याह। आद्यमिति। प्रपञ्चस्याविभूतम् "वासुदेवो वा इदमग्र आसीत्" इति श्रुतेः नृशंसस्वभावश्चेत्कथमयमिष्टः स्यादित्याहुः। शरण्यमिति। शरणप्राप्यस्याऽनृशंसो न भवतीत्यर्थः। नास्मिन्नस्मासु विप्रतिपत्तिरित्याह। स्वैः इति। शरणं प्राप्तावपि उदासीनो न भवति किं तु यदाभ्यर्थनीयं ददातीत्याहुः। स्वानामिति ॥ २७ ॥

स्तुतिफलमाह। इतीति ॥ २८ ॥

प्रत्यक्षीभूतं तं भगवन्तं संदृश्य देवाः किं चक्रुरिति तत्राह। आत्मतुल्यैरिति। अनेन दृश्यमावस्थायां किं गुणविशिष्ट इति शङ्कापर्यहारि आत्मतुल्यैः आत्मनो मूर्तेः अत एव आत्मतुल्यैः मूलभूतस्य हरेः सदृशैः सामर्थ्यादिगुणैरनूनैः षोडशभिर्वासुदेवादिदामोदरान्तैः पर्युपासितं तेषां मध्यस्थावृत्तिरूपेण स्थितं मूलरूपस्याप्राकृतत्वात्प्रादुर्भावानां शुक्रशोणितसम्पर्केण जातत्वात्कथमन्योऽन्यतुल्यत्वमिति तत्राह। विनेति। श्रीवत्सकौस्तुभौ विना प्रकृतिपुरुषाभ्यां विना प्रकृतिपुरुषातीतत्वेन तदनिर्मितशरीरैरित्यर्थः। अनेन सत्त्वदशरूपाण्यपि गुणक्रियादिना विशेषरहितानीत्युक्तं भवति। श्रीवत्सकौस्तुभरहितैरात्मतुल्यैः षोडशभिः पार्षदमुख्यैरुपासितमित्यङ्गीकारस्तु "श्रीवत्सः प्रकृतिर्ज्ञेया प्रधानाख्यः कौस्तुभः पुमान्। तदतीतैः षोडशभिः स्वरूपैरप्युपास्यते" इतिप्रमाणविरोधादप्रामाणिकः। तेषां तद्रूपत्वादन्यलक्षणातुल्यं चाप्रामाणिकम्। अतः प्रकृतिपुरुषानधीनत्वेनान्योऽन्यतुल्यत्वं वासुदेवादीनामेव। तदुक्तम्

अपुंप्रकृत्यधीनत्वाद्वासुदेवादिका हरेः।
तुल्याश्च केशवाद्याश्च न च भिन्नाः कथञ्चन। इति

अनेन मूलरूपस्यावताराणां मिथो भेदराहित्यमुक्तमिति ज्ञातव्यम्। हरेः प्रकृतिपुरुषराहित्यं च न कादाचित्कं किं तु सनातनम् "श्रीवत्सकौस्तुभाभ्यां तु विना भावं प्रदर्शयेत्। पुंप्रकृत्यात्मकाभ्यां स यत्ते नित्यं जनार्दनः" इतिवाक्यात्। प्रकृतिपुरुषराहित्यं च तदतीतत्वं तद्वशत्वं च। तदुक्तम् "यदस्याभ्यामतीतत्वं यद्वशो नानयोर्हरिः" इति "श्रीवत्सकौस्तुभाभ्यां तु विनाभावः स एव च" इति इयं चोपासिका भक्तानुकम्पित्वेन हरेः परं क्रीडैव "आत्मैव समदशधा स्वयं भूत्वा जनार्दनः। मध्यस्थावृत्तिरूपेण क्रीडते पुरुषोत्तमः" इत्युक्तेः संवीतश्चतुरात्मभिः स्वसदृशैः श्रीकेशवाद्यैरनश्वरैरचितैरधीश्वरमुख्यैर्घञादिभिस्तत्परम्। "संसेव्यं स्वयमन्तराम्बुजमहापीठे विराजन् हरिर्भूत्यै श्रीपुरुषोत्तमो भवतु वः श्रीवल्लभः सन्ततम्" इति तन्त्रान्तरोक्तमन्त्रानुसंधेयम् ॥ २९ ॥

पूर्वं हरेः प्रत्यक्षायाधुना स्वाभिप्रेतार्थसिद्ध्यर्थं स्तुतिरिति विशेषः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अविस्मितं ततोऽन्यस्यापूर्वस्य वस्तुनोऽसद्भावाद्विस्मयरहितं यतः स्वेनैव स्वीयेनैव स्वस्यैव कर्मभूतस्य क्रियाभूतेन लाभेन परिपूर्णकामं नान्यस्येत्यर्थः । अतः सर्वत्र समम् । अतः प्रशान्तं चित्तदोषरहितम् । तथोक्तम् "रजस्तमःप्रकृतयः समशीला भजन्ति वै" इत्यादि अत उक्तं श्रीसत्यव्रतेन"

न यत्प्रसादायुतभागलेशमन्ये न देवा गुरवो जनाः स्वयम् । कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये । श्रीमहाभारते च ।

यस्तु विष्णुं परित्यज्य मोहादन्यमुपासते ।
स हेमराशिमुत्सृज्य पांशुराशिं जिघृक्षति । इति

तदिदं भक्तिसन्दर्भे विशेषेण विवृतमस्ति ॥२२—२८॥

आत्मेति युग्मकम् । ईश्वरगाढाहेति वस्तुस्वाभाव्यात् स्वामीष्टसिद्धिनिश्चयाच्च ॥ २९—३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अस्माद्भूत्रजनिताद्भयात् परमेश्वरं विना न कोऽपि रक्षितुं प्रभविष्यतीति मत्वा तमेव शरणमाश्रयन्ते । चाक्षिति । वाच्याद्युपलक्षितानि त्रयोविंशतितत्त्वानि तथा वाच्यादिभिः निर्मितास्त्रिलोकास्तथा तेषामधिपतयो ब्रह्मादयस्तथा ततोऽर्वाचीना वयं च ये सर्वे यस्मान्मृत्योरुद्विजन्तो भीताः । असावन्तको मृत्युरपि यस्माद्बिभेति तनस्तस्मात् अरणं शरणं रक्षणमस्तु ॥ २१ ॥

तदन्यस्तु सुधिया नैवाश्रयणीय इत्याहुः । अविस्मितमिति । तं विना अपरं देवतान्तरं कर्मयोगं ज्ञानयोगमपरयोगं वा शरणार्थं बालिशो महामूर्खः एवोपसर्पति । ननु किमः यथा शुनः पुच्छेन सिन्धुमतितर्तुमिच्छति स श्वा एव सिन्धुं तर्तुं न शक्नोति किमुत तत्पुच्छग्राहिणं स श्वा एव दृष्ट्वा प्रथमं समुद्रमध्ये क्षिपति निमज्जतीति भावः । भगवदाश्रयी तु संसारसिन्धुं यत्तरति तत् किमपि नाद्भुतमित्याह । अविस्मितमिति । न विद्यते विस्मितं किमप्यद्भुतं यत्र तं विना दुर्लङ्घ्यस्यापि संसारसिन्धोस्तारणे अन्यत्रानिर्विघ्नगोऽपि तत्र न कोऽपि विस्मयः । सद्य एव तस्य गोष्पदीकरणसामर्थ्यादिति भावः । स्वेनैव स्वस्वरूपेणैव यो लाभः सौन्दर्यादिमाधुर्यमत्तकस्य प्राप्तिस्तेन सर्वं सह परिपूर्णाः कामाः स्वीयह्लादिनीशक्तिवृत्ता भोगा यस्य तम् । प्रशान्तमनुग्रं सेवापराधे जातेऽपि भक्तवात्सल्यत्वात् क्षन्तारम् ॥ २२ ॥

वयन्त्वतिनिकृष्टाः सकामा अप्यस्मिन्महाभय एव शरणं प्राप्तोऽपि तेन रक्षणीया एव यथापूर्वं इत्याहुः । यस्येति द्वाभ्याम् । यस्य मत्स्यरूपस्य जगतीं पृथ्वीं यथा ततारेति वयमपि तथा तरेमेति भावः । चारिचरोऽपि वारिपथेन चरन्नपि तत्रैव स्थितया जगतीस्थानस्मानीश्वरत्वाद्रक्षतु ॥ २३ ॥

संयमाम्भसि प्रलयजले अरविन्दात् नाभिकमलात् पतितः पतितप्रायः येन हेतुना सः ॥ २४ ॥

स खलु सर्वत्र च वर्त्तमानोऽप्यस्माकं बहिर्मुखेन्द्रियाणामदृश्योऽपि कृपयैव दृश्यो भूत्वा रक्षत्वित्याहुः । य इति त्रिभिः । पुरोऽस्माकमग्र एव स्वमहिमानस्य रामकृष्णादिरूपेण लीलां कुर्वतोऽपि तस्य लिङ्गं न पश्यामः । तत्र हेतुः । पृथगिति ॥ २५ ॥

तनुभिः उपेन्द्रपरशुरामादिस्वरूपैः स्वस्य मायया कृपया चिच्छक्त्या वा नोऽस्मानात्मसात्कृत्य पातीत्यत एव साम्प्रतं स्वरक्षणार्थं निवेदनेऽपि न सङ्कुचाम इति भावः । तमेवेति । विश्वं मायाशक्त्या विश्वरूपम् । स्वरूपशक्त्या अन्यं विश्वस्माद्भिन्नम् ॥ २६ ॥ २७ ॥

प्रतीच्यां दिशि पश्चिमसमुद्रकूले देशान्तरस्योरामस्य दैत्याक्रान्तत्वात् तत्र देवैः स्थातुमशक्यत्वात् । तत्रैव विविक्ते उपविश्य स्तुतत्वात् ॥ २८ ॥

श्रीवत्सकौस्तुभौ विना चतुर्भुजत्वादिसर्वचिह्नवत्त्वादात्मतुल्यैः सुनन्दादिभिः परित उपासितम् ॥ २९ ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्मै अन्तकाय वाच्याद्युपलक्षितानि लोककारणानि तत्त्वानि त्रिलोकाः ब्रह्मादयो लोकनाथाः ये वयं तत्प्रजाभूताः उद्विजन्तः सन्तो बलिं हरामः असावन्तकः कालोऽपि यस्माद्बिभेति ततो हेतोः सः नोऽस्माकमरणं शरणमस्तु भवत्विनान्वयः ॥ २१ ॥

अथ भगवतोऽविस्मितत्वपूर्णकामत्वादिगुणान् दर्शयन्तस्तदितरं जनं निन्दन्ति । अविस्मितमिति । उपसर्पति शरणं गच्छति यः स बालिशोऽज्ञः भवार्णवात्तरणोपायं न जानातीत्यर्थः । यथा श्वलाङ्गूलेन यः सिन्धुमतितितर्तिं तर्तुमिच्छति स बालिशो भवति तद्वत् ॥ २२ ॥

तस्य स्वभक्तरक्षकत्वं सुप्रसिद्धं सः अस्माकमप्यापद्भ्यस्तारकोऽस्त्वित्याहुः । यस्येति द्वाभ्याम् । यस्योरुशृङ्गे महच्छृङ्गे मनुः स्वनावं जगतीं यथावद्बद्ध्वा दुर्गं सङ्कटं ततार स एव अरिन्दमो मत्स्यमूर्तिः त्वाष्ट्रभयात् वृत्रभयात् नूनं निश्चितं त्राता रक्षिष्यति ॥ २३ ॥

पुरा लोकरचनातः प्राक् उदीर्णवातेन ये ऊर्मयस्तरङ्गास्तेषां रवैः कराले संयमाम्भसि प्रलयजले एक एव स्वयम्भूः अरविन्दात्पतितः पतितप्रायः येन भगवता तस्माद्भयात्ततार स नोऽस्माकं पारस्त्वाष्ट्रभयात्तारकोऽस्तु ॥ २४ ॥

येन वयं सृष्टा यश्च अस्माञ्ज्ञानावतारैः पाति स एवास्मान् सुखयिष्यतीत्याहुः । य इति त्रिभिः । निजमायया निजवयुनेन य एक ईशः सर्वेश्वरः नोऽस्मान् ससर्ज येन नियुक्ताः यस्य पुनः पूर्वमेवं समीहितः विश्वम् सृजतोऽपि तत्सृष्टमेव विश्वम् अनुपश्यन्तो जामः यस्य लिङ्गं भगवतैव वयं सृष्टाः तेनैव सृष्टं तन्नियुक्ताः किञ्चित्करवामेति तद्गुणज्ञापकम् चिह्नमपि न पश्यामः एवम्भूता अज्ञा वयमित्यर्थः । अत एवाज्ञानेन वयं पृथगीशमानिनः ॥ २५ ॥

यो नोऽस्मान् देवादिषु वामनजामदग्न्यमत्स्यदाशरथ्यादितनुभिः कृतावतारः सन् स्वमायया स्वकृपया आत्मसात्कृत्वा पाति च ॥ २६ ॥

प्रधानं प्रकृत्याख्यशक्तिरूपं पुरुषं जीवात्मकांशरूपं विश्वं तदुभयात्मकप्रपञ्चरूपं शक्तिमद्भूतोः अंशांशिनोश्च स्वाभाविकभेदाभेदसम्बन्धात् "उभयव्यपदेशात्त्वहिकुण्डलवत्" इति पारमर्षसूत्रात् । ननु तर्हि सर्वे दोषाः ब्रह्मणि प्रसज्जेरन्नाहुः । अन्यमिति सर्वदोषास्पृष्टस्वरूपम् । प्रकृतिपुरुषतदुभयात्मकजगद्विलक्षण-

देवा ऊचुः ।

नमस्ते यज्ञवीर्याय वयसे उत ते नमः ।
नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये ॥ ३१ ॥
यत्ते गतीनां तिसृणामीशितुः परमं पदम् ।
नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ॥ ३२ ॥

ओं नमस्तेऽस्तु भगवन्नारायण ! वासुदेवादिपुरुष ! महापुरुष ! महानुभाव ! परममङ्गल ! परमकल्याण ! परमकारुणिक ! केवल ! जगदाधार ! लोकैकनाथ ! सर्वेश्वर ! लक्ष्मीनाथ ! परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारे चित्तेऽपावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वरूप मित्यर्थः । यतः परं पूर्णं शरण्यं शरणागतहितकरं शरणं प्रजामः रक्षितारं आश्रीम इत्यर्थः । स एव नः शं सुखं धास्यति त्वाष्ट्रभयनिराकरणेनेति शेषः ॥ २७ ॥

प्रतीच्यां दिशि तथा सुखं भजनार्थमाश्रितायां पश्चिमाया-मुपतिष्ठतां स्तुवतामाविरभूत् ॥ २८ ॥

आत्मतुल्यैः साकल्यं प्राप्तैः पार्षदैः पर्युपासितं दृष्ट्वा अवनौ दण्डवत्पतिताः पुनः शनैरुत्थाय तुष्टुवुः स्तुतवन्त इति द्वयोरन्वयः ॥ २९—३० ॥

भाषा टीका ।

देवता बोले वायु आकाश अग्नि जल पृथिवी तीनों लोक ब्रह्मादिक हम सब लोग सदा उद्विग्न होकर जिस काल के वास्ते भेट पूजा देते हैं सो काल भी आप से डरता है तिन आप के हम शरण मे प्राप्त हैं ,सो आप हमारे रक्षक होवैं ॥ २१ ॥

आप अपने स्वरूपानन्द के लाभ से परिपूर्णकामना वाले हो अहङ्कार रहित हो शान्त स्वरूप हो ऐसे आपको छोड कर जो दूसरे के शरण जाता है सो मूर्ख कुत्ता की पूंछ को पकड कर समुद्र के पार जाना चाहता है ॥ २२ ॥

जैसे मत्स्यमूर्ति आप के बडे शृङ्ग में पृथिवी रूपी अपनी नौका को बांधकर सत्यव्रत मनु प्रलयकाल के महाभय को तरगये तैसेही सोइ जलचर रूपवाले आप शरणागत हम लोगों की रक्षा करोगे यह बात निश्चित है ॥ २३ ॥

पूर्व में सृष्टि के समय में अति प्रबल शब्दवाले पवनों से कराल प्रलय समुद्र मे ब्रह्माजी कमल के ऊपर से गिरने लगे तब जिन भगवान् के सहायता से ब्रह्माजी भयको तरगये सोइ भगवान् हमारे पार करने वाले होवैं ॥ २४ ॥

जिन एक ईश्वर ने अपनी माया से हम सबों को पैदा किया है जिन के अनुग्रह से हम लोग संसार को सृजते हैं पहिले सृष्टि करनेवाले जिन भगवान् के चिन्ह को हम अलग अपने को ईश्वर मानने वाले होने से नहीं जानते हैं तिन के हम शरण प्राप्त हैं ॥ २५ ॥

शत्रुओं से अत्यन्त पीडित हम लोगों को देवता ऋषि मनुष्यों मे अवतार लेकर दिव्यमूर्तियों के द्वारा अपनी कृपा से हम को अपना बनाकर जो भगवान् युग युग मे रक्षा करते हैं ॥ २६ ॥

कारण प्रधान पुरुष विश्वरूप देव आत्मदैवत तथा अन्य उन्हीं भगवान् के हम शरण जाते हैं सो महात्मा अपने भक्त हम लोगों के कल्याण को विधान करेंगे ॥ २७ ॥

श्रीशुकदेवजी बोले हे राजन् ! उन देवतों के इस प्रकार से स्तुति करने पर शङ्ख चक्र गदा पद्म धारण किये भगवान् पश्चिमदिशा मे प्रगट भये ॥ २८ ॥

श्रीवत्स तथा कौस्तुभ इन दोनों के बिना और सब प्रकार से अपने सदृश सुनन्दादिषोडश पार्षदों से भगवान् चारों ओर से सेवित हैं शरद् ऋतु के खिले कमल सरीके नेत्रों से सुशोभित हैं ॥ २९ ॥

हे राजन् इस प्रकार के भगवान् का दर्शन कर के सब देवता दर्शनके आनन्द के मारे विह्वल होगये फिर पृथिवी मे नमस्कार के वास्ते दण्डसरीके गिरपडे फिर धीरे से उठकर स्तुति करने लगे ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यज्ञो वीर्यं स्वर्गादिफलजननाय सामर्थ्यं यस्य तस्मै नमः । वयसे उत तत्फलपरिच्छेदककालात्मनेऽपि । तद्विघातकेषु हेत्य-स्तं प्रक्षिप्तं चक्रं येन । पवमभूतैः प्रभावैः सुपुरुहूतये शोभनबहुनाम्ने ॥ ३१ ॥

दुरवबोध इव तवायं विहारयोगो यदशरणोऽशरीर इदमनवेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु मम गुणातीतं रूपं विहाय गुणोपाधिकं यज्ञवीर्यत्वादि किमिति वर्ण्यते तत्राहुः । यत्तत्र गुणत्रयस्येशितुर्नियन्तुस्त्रिगुणात्मिकानां तिसृणां मतीनां परमं पदं निर्गुणस्वरूपं तद्विसर्गस्यार्वाचीन इदानीन्तनो हे धातर्वेदितुं नार्हति । अतः केवलं तस्मै ते नमोऽस्तु ॥ ३२ ॥

मितास्वराणि पद्यानि न मीयन्ते हरेर्गुणाः ।
इति पद्यैरतुष्यन्तः सद्यो गद्येन तुष्टुवुः ॥

भक्त्युद्रेकेण बहुधा सम्बोधयन्तो दुर्ज्ञेयत्वं प्रपञ्चयन्ति । भगवन्नित्यादिना । परमं मङ्गलं शुद्धो धर्मो यस्मिन् । आत्मयोगेनाष्टाङ्गेन यः समाधिस्तन्निमित्तकाग्र्यं तेन परिभावितः सुशीलितः परिस्फुटो यः पारमहंस्यधर्मो भगवद्भजनं तेनोद्घाटितं तमोरूपं कपाटं यस्मिंस्तस्मिन् द्वारभूते चित्ते अपावृते प्रकट आत्मलोके प्रत्यग्रूपे स्वयमेवोपलब्धमभिव्यक्तं निजसुखं तदनुभवरूपो भवान् ॥ ३३ ॥

ननु केवलानुभवरूपत्वे मम सृष्ट्यादिकर्तृत्वं कथं तत्राहुः । दुरवबोध इव तवायं विहारयोगो यद्यस्मादशरणो निराश्रयः । इदं विश्वम् । अनवेक्षितोऽस्माकं समवायो मेलनं साहाय्यं येन सः ॥ ३४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्तुतिमेवाह । नम इत्यादिना । तावत्सर्वस्य धातारमायुःप्रदं त्रातारं प्रणतरक्षणविलम्बासहिष्णुं नाममात्रस्मरणनिरस्तमहाभयं स्वर्गापवर्गादिप्रदं वाङ्मनसापरिच्छेद्यस्वभावं नमस्कुर्वन्तः स्तुवन्ति । नमस्त इत्यादिद्वाभ्याम् । यज्ञः वीर्यं सृष्टिहेतुः सामर्थ्यं यस्य "यज्ञाद्भवति पर्जन्यः" इत्युक्तप्रकारेण यज्ञमुखेन प्रजाः सृजन् इत्यर्थः । यद्वा । वीर्यशब्दोऽर्शआद्यजन्तः । यज्ञो वीर्यवान् यस्मात् यदाराधनरूपत्वे यज्ञस्य सारवत्ता अनन्तस्थिरफलसाधनता भवतीत्यर्थः । अन्यथाल्पास्थिरफलसाधनतेति भावः । वयसे आराधनभूतयज्ञाद्यनुष्ठानोपयुक्तायुःप्रदाय ऊनये यज्ञादिफलदानेनानिष्टनिवारणेन च रक्षाकराय .आत्तचक्राय प्रणतरक्षणविलम्बासहनेन सदा धृतसुदर्शनाय पुरुहूतये स्मरणमात्रनिरस्तमहद्भयोदारनाम्ने नमःपदावृत्तिर्गुणभेदाभिप्रायः ॥ ३१ ॥

त्रिगुणानां स्वर्गापवर्गनरकाणामीशितुः निर्वाहकस्य दातुस्ते तव परमं प्रकृतिपुरुषविलक्षणमुत्कृष्टं पदं स्वरूपं विसर्गस्यार्वाचीनः सृष्टेः पश्चात्यः कार्यभूतः स्वत्सृष्टस्तदधीनज्ञानशक्तिमांश्च यः पुमान् हे धातः ! वेदितुं ज्ञातुं नार्हति ॥ ३२ ॥

अथ पुरुहूतय इत्यनेनाभिप्रेतैर्भगवत्साधारणैर्नामभिस्त्वां सम्बोधयन्तो नार्वाचीनोऽर्हति वेदितुमित्युक्तदुर्ज्ञेयत्वनिमित्तानाभयवीर्यत्वाशङ्कां योगपारिशुद्ध्यमनोग्राह्यत्वकथनेन निराकुर्वन्तो यज्ञवीर्यायेत्यनेनोक्तजगद्व्यापारस्य मृत्कुलालादिव्यापारवैजात्यं लीलारूपतां चाभिदधतः कारणान्तरानपेक्षसृष्ट्याद्युपयुक्तगुणयोगित्वं च वदन्तस्तुवन्ति । ॐ नमः इत्यादिना । पासि हरसि इत्यन्तेन गद्येन ॐ इत्यसाधारणं भगवतो ब्रह्मणो नाम "ॐ तत्सदिति" निर्देशो ब्रह्मणस्त्रिविधः स्मृतः,, इति भगवद्गीतेः तथा भगवन्नारायणादयः शब्दा अपि भगवन्! षाड्गुण्यपूर्ण! नारायण ! नारं जीवसमूहस्तस्यायनं प्राप्यं प्रापक आधारश्च तस्य सम्बोधनं नारायणशब्दश्च योगरूढिभ्यां विष्णवसाधारणः न च केवलयोगेन रुद्रादिपरत्वमपि शङ्कितुं युक्तम् । रूढ्यभावेन "पूर्वपदात्संज्ञायामगः" इति णत्वाभावप्रसङ्गान्न च विष्णुपरत्वाङ्गीकारेण संज्ञापरत्वाभावादन्यस्मिन्नपि न णत्वमिति वाच्यम् "भृजोऽसंज्ञायाम्" इति सूत्रभाष्ये यदेतत्संज्ञया विधीयते तत्र न संज्ञायामभिधेयायामित्यर्थः । किं तर्हि तत्कार्यविशिष्टेन चेत्संज्ञा गम्यत इत्यर्थः । इत्युक्तमत एव रघुनाथरामानुजादिशब्देषु न णत्वं न हि तत्र कृतणत्वेन संज्ञावगतिः । किं तर्ह्यकृतणत्वेन "क्षुभ्नादिषु नियुक्तसंज्ञास्थलं तु यथाविनियुक्तानामेव साधुत्वम्" इति रघुनाथादौ णत्वाभावः अल्पपरिमाणसंज्ञाभूतगव्यूतिशब्दे च न ऽलोपः । अन्यथा संज्ञात्वभङ्गापत्तेरित्यन्यत्र विस्तरः । वासुदेव ! सर्वभूताधार ! आदिपुरुष ! जगत्कारणपुरुष ! महापुरुष ! पुरुषोत्तम ! महानुभाव ! अचिन्त्यप्रभाव ! परममङ्गल ! स्वयं मङ्गलरूप ! परमकल्याण ! अन्येषां मङ्गलावह ! परमकारुणिक ! स्वार्थनिरपेक्षपरदुःखासहिष्णो ! केवलजगदाधार । इतरानपेक्षजगदाधार ! स्वसमानरहितलोकनाथ ! सर्वेषां ब्रह्मादीनामपीश्वरनियन्तः लक्ष्मीनाथ ! श्रियःपते ! परमहंसाः ज्ञानिनः परिव्राजकाः संन्यासधर्मनिष्ठाः ज्ञानयोगकर्मयोगनिष्ठा इत्यर्थः । तैः परमेणोत्कृष्टेनात्मसमाधियोगेन परमात्मविषयकध्यानयोगेन परिभावितः संदीपितः अत एव परिस्फुटः प्रत्यक्षतापन्नो यः पारमहंस्यधर्मो भगवद्भक्तियोगरूपो धर्मः तेनोद्घाटितं निर्मूलितं तमःकपाटं तमः अनाद्यविद्यात्मकमज्ञानं तदेव कपाटं परमात्मदर्शनविरोधि यस्य तद्द्वारं परमात्मदर्शनसाधनं चित्तं यस्मिंस्तस्मिन्नात्मलोके आत्मैव लोकः लोकनीय इति लोकः परमात्मापृथक्सत्त्वेन जीवस्यापि लोकनीयत्वात्तस्मिन्नात्मलोकेऽपावृतः आवरणरहितः उपलब्ध इत्यर्थः । कथमपावृतः स्वयमुदयः स्वयमात्मनैव उदयः नित्योदितो यो निजसुखानुभवः निजानन्दरूपोऽनुभवो ज्ञानं तद्रूपः नित्यनिरुपाधिकाविर्भूतापरिच्छिन्नज्ञानानन्दानुभवरूपत्वेनापावृत इत्यर्थः । एवंभूतोऽसि । एवम्भूतस्य भगवान् तव विहारयोगः लीलारूपो योगः जगद्व्यापाररूपो योगः जगत्सङ्कल्पमात्रनिष्पाद्यत्वज्ञापनाय समाधिरूपसङ्कल्पापरपर्याययोगपदं प्रयुक्तम् । जगद्व्यापारस्याकर्मायत्तकेवललीलारूपत्वख्यापनाय विहारपदम् । स एव विहारयोगो दुःखबोध इव लोकस्य मृत्कुलालादिव्यापारजातीयत्वेन बोद्धुमशक्य इव वर्तते इवशब्देन सर्वज्ञस्य सर्वशक्तेस्तव उपपन्न एवेति सूच्यते । दुःखबोधकत्वमेव विशदयन्ति । यदशरणमिदं विश्वमशरणमनपेक्षितस्वव्यतिरिक्ताश्रयं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

सृजसि कुलालादेर्घटादीन् सृजतस्तु भूतलादिरूपः कश्चिदाधारोऽपेक्षित इति भावः। त्वं तु स्वस्मिन्नेवाधारभूते सृजसीति भावः। किञ्च। स्वतः त्वमनपेक्षिताऽन्यसमवायसहायः असहायः दण्डादिसहकारिसमुदायनिरपेक्षः। कुलालादिस्तु सहकारिसमवायसापेक्ष इति भावः। किञ्चागुणः गुणत्रयरहितः कुलालादिस्तु सत्त्वादिगुणयुक्त इति भावः। ननु विशिष्टस्य कारणत्वाङ्गीकारात्कथं कुलालादिवैलक्षण्यापादकमगुणत्वमुक्तम् इति चेन्न। विशिष्टस्य उपादानत्वाभ्युपगमेऽपि प्रकृतिपुरुषाभ्यामुत्कृष्टस्य विशेष्यस्य ब्रह्मणो निमित्तत्वाभ्युपगमाद्विशेष्यांशे च सत्त्वादिगुणत्रयाभावात्रैगुण्यं कुलालादिवैलक्षण्यापादनमेव। एवं कुलालादिनिमित्तकारणवैलक्षण्यमुक्तम्। अथ मृदाद्युपादानवैलक्षण्यमाहुः। आत्मनैवाविक्रियमाणेन सगुणमिति "तदात्मानं स्वयमकुरुत" इति श्रुत्यर्थोऽत्राभिप्रेतः। आत्मनेत्यनेन स्वयंशब्दार्थ उक्तः। सगुणमित्यनेनात्मानमित्यस्यार्थः। गुणशब्दश्चात्रापृथक्सिद्धविशेषणवाची तथाचापृथक्सिद्धविशेषणभूतचिदचिद्विशिष्टमात्मानं स्वेनैव सृजसि पासि हंसि हरसि च सूक्ष्मचिदचिद्विशिष्टमात्मानमेव स्थूलचिदचिद्विशिष्टावस्थानिभ्याकारेण परिणमयसीत्यर्थः। निर्विकारश्रुतिविरोधपरिहारायात्मानं विशिनष्टि। अविक्रियमाणेनेति विकाराणां विशेषणभूतचिदचिद्गतत्वादविक्रियमाणेनैवात्मना सृजसीत्यर्थः। मृत्पिण्डादिकं तु स्वाभिन्नेन कुलालादिना घटादिरूपेण सृज्यत इति ततो यस्य वैलक्षण्यसिद्धिः। आत्मनैवात्मानं सृजसीत्यनेन विशिष्टस्य विशेष्यस्याकाराभ्याम् उपादानत्वं निमित्तत्वं चैकस्यैवोक्तं भवति। अविक्रियमाण इति सप्तम्यन्तपाठे स्वस्मिन्विशेष्यभूतेऽविक्रियमाणे स्वरूपस्वभावाभ्यामविक्रियमाणे सत्येव विशिष्टमात्मानं स्वेनैव सृजसीत्यर्थः। नन्वेकस्यैव पदार्थस्य निमित्तत्वमुपादानत्वं च परस्परविरुद्धमिति चेन्नैकस्योभयविधकारणत्वप्रतिक्षेपकैरपि कैश्चित्तार्किकादिभिरेव तदुभयविधकारणत्वाभ्युपगमात् यथा स्वज्ञानचिकीर्षाप्रयत्नादिकं ज्ञानाऽऽत्मादिभिः स्वयमेव करोति जीवः तेन तत्र कर्तृत्वेन निमित्तकारणं भवति तथापि च स्वयमेव समवायिकारणं भवति ज्ञानादिं प्रति कार्यं यत्र समवैति तत्समवायिकारणम् इति समवायिकारणलक्षणस्य स्फुटोपलम्भात्। किञ्च। ईश्वरोऽपि सर्वव्यापकस्य स्वस्य सर्वैरपि परमाणुवादिभिः संयोगं स्वयमेव सृजति सर्वकार्यहेतुत्वात्तथा च तत्र कर्तृत्वेन निमित्तकारणं भवति समवायिकारणत्वमपि तत्प्रतीतस्य दृश्यते परमाण्वादिसंयोगस्येश्वरसंयोगापेक्षत्वात्तेन यथा कर्तृत्वं समवायिकारणत्वं चेश्वरनिष्ठमेव भवन्मते भवति। तथास्मत्सिद्धान्ते निमित्तत्वमुपादानत्वं चैकवस्तुनिष्ठमिति। नन्वेवमपि न विशिष्टस्योपादानत्वं क्वापि दृष्टमिति चेन्न ऊर्णनाभिप्रभृतीनामेव दृष्टान्तत्वात्। तन्तूनामूर्णनाभिदेहस्यैवावस्था प्राणिनोऽपि केवलात्मन्यपि तु देहविशिष्टात्मनीति लोकोपलम्भः। श्रुतिश्च "यथोर्णनाभिः सृजते गृह्णते च" इत्यूर्णनाभिदृष्टान्तत्वेन दर्शयति ॥ ३३ ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

स्तुतेः प्रतीकं गृह्णाति। नमस्त इति। बभ्रुस्य वीर्यं रेतः बभ्रुरित्यर्थः। तस्मै बभ्रो वीर्यं यस्य सः तथाभिव्यक्तय इति शेषः। तस्मै हे बभ्रो! वीरेषु स्थिरतया वीर्यवप्रदायेति वा। उत किन्तु वयसे बन्धकशक्त्या जीवानां संसारे बन्धकाय "वय बन्धने" इति धातोः "वयः सर्वस्य वयनाज्जगतां पुरुषोत्तमः" इति वचनात् वयशब्दोऽत्र बन्धवचनः "मा तन्तुश्छेदि वयतो धियं मे मामात्राशार्यपसः पुरा ऋतोः" इति श्रुतेश्च "अतो वयो विहङ्गो विहगो विहङ्गमः" इत्यभिधानेऽपि प्रकृतानुपयुक्तत्वान्न पक्षग्राह्यः श्रुतेरयमर्थः। देवे धियं वयतो बध्नतो मे तन्तुः सन्ततिर्मा च्छेदि उत्सन्नो माभूत्। ऋतोः पुरा ज्ञानोत्पत्तेः पूर्वं अपसः कर्मणः मात्रा मानं परिमाणं माशारि "शृ हिंसायाम्" इति धातोः फलदानेन नष्टं माभूत् "कर्मणा ज्ञानमाप्नोति" इति श्रुतेः ज्ञानमनुत्पाद्य न नश्यत्वित्यर्थः। अकृतं बन्धनं स्वयमेव हन्तुं शक्तो नान्य इति ज्ञापनाय सन्धिकायां भावः। बलाय पुनः सुदर्शनादिकर्म करोतीत्येकलक्षणं शब्दरूपम्। सर्वहन्त्रे चरमेऽभक्षणार्थं रूपं वा। सर्वविपत्परिहर्तृसुदर्शनाख्यावतारोय वा। अज्ञात्यसाध्यकरणशक्त्यादिमत्त्वप्रदर्शनाय कम्ब्वमायः। पुरवो बहवो हूतयो नामानि यस्य सः तथा तस्मै "नामानि सर्वाणि यमाविशन्ति" इति श्रुतेः "इन्द्रायाहि चित्रभानो" इत्यादिबहुवचनैर्हूतिर्यस्य सः तथा तस्मै वा "शुचिः शुचिमनाः शुचः पुरुहूः शुचिरुच्यते" इत्यभिधानात्। पुरुहूः शुचा ऊतिर्यस्य सः तथा तस्मै वा ॥ ३१ ॥

ईशितुस्ते तव यत्सृष्टानां गतीनां देवलोकपितृलोकनिरयसंज्ञानां सकाशात्परमुत्कृष्टं वैष्णवं पदं वैकुण्ठादिस्थानं तज्ज्ञानपूर्वकाणां विसर्गस्य विविधसृष्टेरर्वाचीनोऽनन्तरकालीन इदानीन्तनो मनुष्यो वेदितुं लब्धुं प्राप्तुं नार्हति न योग्यो विद्वानेव योग्य इत्यन्वयः।

> देवलोकात्पितृलोकान्निरयाच्चापि यत्परम्।
> निस्पृहः परमं स्थानं वैष्णवं विदुषां गतिः ॥

इति वचनात् "विद्लृ लाभे" इति धातुः "पद्लृ गतौ" इति च अनेन वैष्णवपदप्राप्तौ ज्ञानमेव प्रयोजकं न कर्मादिकमिति सूचयति ॥ ३२ ॥

हरेः प्रसन्नतायां गुणोत्कर्षप्रकाशिका स्तुतिरेव प्रयोजिकेति पर्यवसिताः कतिपयगुणा एव प्रकाशन्ते त इत्यतोऽवशिष्टानन्तगुणप्रकाशनार्थं गद्यैः स्तुवन्ति। नमस्त इति। भगवदादिशब्दैरधिकृतगतयं ते तुभ्यं नम इत्यन्वयः। परिव्राजकाश्चतुर्विधाः कुटीचकबहूदकहंसपरमहंसाख्या इति तेषां मध्ये परमहंसाख्यपरिव्राजकैः परमेणात्मसमाधियोगेन परमात्मध्यानेन यः समाधिर्मनैकाग्रता तेन परिभावितः प्रदर्शितः परिस्फुटितश्च प्रकाशितो यः पारमहंस्यनामा धर्मः ज्ञानाख्यः तेनोद्घाटितं तमःकपाटद्वारं अज्ञानाख्यकपाटद्वारं येन सः। तथा तेनापावृते प्रकाशिते आत्मलोके वैकुण्ठादिधाम्नि स्वयमुपलब्धः अप्रयत्नेन दृष्टः यो भगवान् स्वरूपसुखानुभवकस्य तव विहारयोगः जगज्जन्मलयादिहेतुभूतक्रीडोपायो दुरवबोध इव त्वदनुग्रहमन्तरेण दुर्बोध इत्यर्थः। कुतो दुर्बोध इति तत्राह। यदशरणा इति। अशरणोऽविद्यमानरक्षि-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तोऽशरीरो ज्ञानसाधनशरीररहितोऽप्राकृतत्वादनपेक्षितोऽस्मत्सम- वायः साहाय्यलक्षणो येन स तथा अगुणो निर्गुणः स्वयं स स्व- मविक्रियमाणेन स्वतः परतो वा विकाररहितेनात्मनैव स्वभावे- नैव भोगादिप्रयोजनमन्तरेणेदं जगत्सृजसि रक्षसि संहरसीति यद्यस्मात्तस्मात्कुलालादिविलक्षणत्वादिति भावः ॥ ३३ ॥ ३४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु प्रत्यक्षतोऽनुभूयमानमिदं मद्रूपं विहाय गुणोपाधिकं यज्ञवीर्यत्वादिकं किमिति वर्ण्यते तत्राहुः । यस्त इति ॥ ३२ ॥

आत्मलोके स्वस्वरूपे लोके वैकुण्ठाख्ये ॥ ३३ ॥

नन्वेवं वैकुण्ठविहारो दुर्दर्शोऽपि युक्तिसिद्ध एव गुणातीत- त्वादिना तव योग्यत्वात् । प्रपञ्चविहारस्तु युक्त्यतीतः । सगुण- त्वादिना वैपरीत्यादित्याहुः । दुरवबोध इति । कुलालादिर्हि सगुणः किञ्चित् स्थानं समवायान्तरं चावलम्ब्य स्वशरीरञ्च प्रवर्त्य मृदादिवस्त्वन्तरेण सगुणं घटादिकं करोति पाति हरति त्वं स्वगुणाभावविक्रिय एव च तत्तदवलम्बनादिकं विनैवेच्छामात्रेणा- त्मनैव च सगुणं प्रपञ्चमित्यर्थः । अशरण इत्यादिकं हि तदभिप्रा- येणैवोक्तम् । इत्येत्यचिन्त्यशक्तित्वादेव तदपि नातियुक्त्यगम्यमिति भावः ॥ ३४ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्वेषामीश्वरमन्यतामात्रं व्यञ्जयन्तो यज्ञैरस्मदाद्युपासकानां फलप्राप्तिविघातयोर्भवानेव हेतुरित्याहुः । नम इति । यज्ञस्य वीर्यं स्वर्गादिफलोत्पादनलक्षणः प्रभावो यस्मात्तस्मै स्वर्गादिफल- प्रापकायेति भावः । उत पुनः वयसे कालाय स्वर्गादिफलनाश- काय च तथा अस्मच्चक्राय असुरेषु चक्रं क्षिप्त्वा तेषां निग्राह- काय अस्माकं पालकाय च । एवं स्वर्गादिप्रापक इति स्वर्गादि- नाशक इति असुरसंहारक इति देवपालक इत्यादिनामभिः सुपुरुहूतिर्यस्य तस्मै ॥ ३१ ॥

ननु नश्वरतुच्छस्वर्गपदप्राप्त्यर्थमेव स्तुवध्वे न त्वनश्वर- नित्यसुखमयवैकुण्ठार्थमत्र को हेतुस्तत्राहुः । यस्त इति । तिसृणां देवमनुष्यतिर्यग्गतीनामीशितुः प्रापकस्य तव यत् परमं पदं वैकुण्ठधाम तत् निसर्गस्यार्वाचीनोऽस्मादृशो जनो वेदितुमनु- भवितुं नार्हति । न हि घासबुसादिकं विना पशुरन्यत् क्षीरा- दिकं वाञ्छति लभते वा कुतश्चिदिति भावः ॥ ३२ ॥

पुरुहूतय इत्युक्तमतो बहुभिर्नामभिः सम्बोध्य स्तुवते । नम इति । हे भगवन् ! षडैश्वर्यपरिपूर्ण ! परिपूर्णत्वमेवाहुः । हे नारायण ! त्वमेव स्वांशाधिकपक्रमेण व्यष्टिसमष्टिप्रकृत्यन्तर्यामित्वेन क्षीरोदगर्भोदकारणार्णवशायी भवसीत्यर्थः । ततोऽपि पूर्णत्वात् हे वासुदेव ! व्यूहानामादिभूत ! ततोऽपि परिपूर्णत्वात् हे आदि- पुरुष ! परमव्योमनाथ । ननु कथमेवमवगम्यते तत्राहुः । महापुरुषेषु तत्तत्स्वरूपेषु महान्तोऽनुभावा अनुरूपमहाप्रभावा एव यस्य सः । ननु महाप्रलये मङ्गलमङ्गलाममदाकाराणां का वार्ता तत्राहुः । मङ्गलानि प्राकृतानि परममङ्गलानि अप्राकृतमङ्गलवस्तूनि स्वाङ्गकधामादीनि तेषां परमकल्याणां कुशलित्वं यतः । तेषां कालनियम्यत्वाभावादिति भावः । किञ्च । अपारैश्वर्यमाधुर्यसिन्धो- स्तव करुणामेव बहिर्दर्शिनो वयं काङ्क्षमाणा आश्रयाम इत्याहुः । हे परमकारुणिक ! अन्तर्दर्शिभिस्तु भवानुपलब्धनिजसुखानुभव एव भवति । कदा । आत्मयोगैर्यमनियमादिभिर्यः समाधिश्चि- त्तैकाग्र्यं तेन परि सर्वतो भावेन भावितः । कुतः । परिस्फुटः पार- महंस्यधर्मो भक्तियोगस्तेन उद्घाटिततमःकपाटं द्वारं यस्य तथाभूते चित्ते चित्तमन्दिरे अपावृतः अपगतावरणः आत्म- लोके वैकुण्ठधामनि वर्तमानः । चिरस्यैतादृशत्वे सति तन्मध्ये एव सह वैकुण्ठलोको भवान् स्फुरतीति भावः ॥ ३३ ॥

किञ्च । स्वीयवैकुण्ठलोके सदा विहरन्नात्मारामो गुणाती- तोऽपि प्रपञ्चलोके अस्मदादिदुर्ज्ञेयप्रकारैः सृष्ट्यादिभिर्विह- रसीत्याहुः । दुरवबोध इति । विहारयोगः क्रीडायुक्तत्वं दुरवबोध इवेति स्वाङ्गकविघ्नैः सुबोधोऽप्यन्यैर्दुर्बोध इत्यर्थः । कुतः यदशरणो- निराश्रय एव अशरीरः शारीरचेष्टारहित एवेति । सृष्टिकर्ता हि साकार एव "सहस्रशीर्षा" इत्यादिश्रुतेः । न अपेक्षितम् अस्माकम् इन्द्रादीनां हस्ताद्यधिष्ठातॄणां समवायः साहाय्यं येन सः । आत्मनैव स्वेनैव आत्मन उपादानत्वेऽप्यविक्रियमाणेनैव विवर्तवादाङ्गीकारे- ऽप्यविक्रियमाणत्वं न चित्रं चित्रं खलु तदनङ्गीकार एव अत एव वक्ष्यते गजेन्द्रेण "नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुत- कारणाय" इति कारणस्याद्भुतत्वमुपादानत्वेऽपि निर्विकारत्वमे- वेति । अगुणः सन् सगुणं विश्वं सृजसि कुलालादिर्हि किञ्चित् स्थानमवलम्ब्य स्वशरीरं च प्रवर्त्य ससहायो मृदादिवस्त्वन्तरेण विक्रियमाणेनैव सगुण एव सगुणं घटं सृजतीति दृष्टमिति इदमेकं दुर्बोधत्वं सृष्टौ ॥ ३४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

साक्षाद्भगवन्तं सर्वकर्मफलदं सर्वशक्तिं सर्वनामानं दृष्ट्वा कर्मका- वादिकमीश्वरनैरपेक्ष्येण सुखादिहेतुं मन्यमाना वादा इति सूच- यन्तो भगवन्तं प्रणमन्ति । नम इति । यज्ञस्य वीर्यं फलदाने सामर्थ्यं यस्मात्तस्मै वयसे तत्फलाभिव्यञ्जककालशक्तये चक्रे तत्फले च प्रतीपेषु अस्तं क्षिप्तं चक्रं येन तस्मै सुपुरुहूतये शोभनबहुनाम्ने ॥ ३१ ॥

ननु यज्ञवीर्याय नम इत्यादिना यज्ञफलभूतस्वर्गार्थिनो वयमिति सूचितं ननु मुक्तगम्यं मम धाम भवद्भिर्मत्तः प्रार्थितमित्यत्राहुः । तिसृणां स्वर्गापवर्गनरकगतीनामीशितुः प्रापकस्यापि तव यत्परमं पदं मुक्तगम्यं स्थानं विसर्गस्य विशेषतः सृज्यते स्वपाद- मूलप्राप्तिकामेषु तुच्छीकृतैहिकामुष्मिकपदार्थेषु इति विसर्गः कृपा- वलोकः तस्य अर्वाचीनः पाश्चात्यः अविषयमादृशो बुभुक्षुरित्यर्थः हे धातः ! तत्प्रेप्सायास्तु का कथा वेदितुमपि नार्हतीत्यर्थः ॥ ३२ ॥

भगवल्लोकः भगवत्कृपावलोकाविषयैर्दुर्ज्ञेय इत्युक्तमथ विश्व- सृष्ट्यादिरूपा भगवल्लीलापि तैर्दुर्ज्ञेया भगवत्कृपावलोकाविषयैस्तु नित्यं हार्दि निजलोकसहितो भगवान् सुबोध एव विश्वसृष्ट्या- दिलीला च सुबोधेति वदन्तः नमः सुपुरुहूतये इत्यत्र सूचितानाम्

अथ तत्र भवान् किं देवदत्तवदिह गुणविसर्गपतितः पारतन्त्र्येण स्वकृतकुशलाकुशलं फलमुपाददात्याहोस्विदात्माराम उपशमशीलः समञ्जसदर्शन उदास्त इति ह वाव न विदामः ॥ ३५ ॥

न हि विरोध उभयं भगवत्यपरिमितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाश्रयदुरवग्रहवादिनां विवादानवसर उपरतसमस्तमायामये केवल एवात्ममायामन्तर्धाय को न्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ॥ ३६ ॥

समविषममतीनां मतमनुसरसि यथा रज्जुखण्डः सर्पादिधियाम् ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बहूनां नाम्नां मध्ये केश्चिन्नामभिः सम्बोध्य स्तुवन्ति । ॐ नमस्ते इत्यादिनां इरसीत्यन्तेन गद्येन । हे भगवन् ! ते तुभ्यं नमः कथम्भूताय ॐ सर्ववेदबीजभूतप्रणववाच्याय प्रणवस्य परब्रह्मवाचकत्वात् "ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति श्रीमुखवचनात् । नमो योगाचतुर्थ्यन्तोऽत्र प्रणवः अव्ययत्वाच्चतुर्थ्या लोपः भगवन्नित्यादीनि भगवन्नामानि स्पष्टार्थानि तत्र तत्र यथोपयोगं व्याख्यातानि च आत्मनः स्वस्य लोके "योऽस्याध्यक्षः स परमे व्योमन् । एको वै नित्यास्तात ! लोकस्य परमात्मनः" इत्यादिश्रुतिस्मृतिप्रसिद्धे अपावृते निरावरणे स्वयमुपलब्धः श्रुतः स चासौ निजसुखानुभवश्च स तथाभूतो यो भवान् स एव परमहंसपरिव्राजकैः परमहंसाः बहुजन्मकृतवर्णाश्रमोचितधर्मपूर्वकनामोक्षसाधनीभूतममतित्वेन भगवद्ध्यानसमुद्भाविमप्रतया विस्मृतताद्दितरकृत्याः परिव्राजकाः चतुर्थाश्रमिणो हरिभक्ताः परमहंसाश्च परिव्राजकाश्च तैश्चित्ते दृष्ट इति शेषः । कथम्भूते परमेणोत्कृष्टेन आत्मनि भगवति युज्यते इति योगः स चासौ समाधिश्चेतैकाग्र्यं च तेन परिभावितः स्वनुष्ठितः परिस्फुटः प्रशस्तः परमहंसानां योग्यः पारमहंस्यो धर्मः सर्वात्मना भगवत्प्रावण्यं तेनोद्घाटितं तमो मालिन्यरूपं कपाटं यस्य तदेव द्वारं भगवद्दर्शनकरणं तस्मिन् ॥ ३३ ॥

अथ "यतो वा इमानि भूतानि जायन्ते स ऐक्षत बहुस्यां तदात्मानं स्वयमकुरुत अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते" । प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् १।४।२४। इत्यादिश्रुतिस्मृतिसूत्रसिद्धं भगवतो जगदभिन्ननिमित्तोपादानकारणत्वमाहुः । दुरवबोध इति । तव अयं विहारयोगः विश्वसृष्ट्यादिलीलो योगः दुरवबोधः दुर्बोधः । स्वशब्देन भवत्प्रसादेन तु सुज्ञेय इति योत्यते । यथात्मनैव स्वेनैव स्वरूपेण अविक्रियमाणेन निर्विकारेण ऊर्णनाभिर्यथा निर्विकारेण स्वरूपेणैव तन्तुमयं स्वगृहं सृजति तद्वदिदं सगुणं विविधविचित्रगुणयुक्तं विश्वम् "देवात्मशक्तिं स्वगुणैर्निगूढां प्रधानक्षेत्रज्ञपतिर्गुणेशः" एवा परस्य शक्तिः "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्" इत्यादिश्रुतिस्मृतिप्रसिद्धाभ्यां प्रकृतिभ्यां सृजसि पासि हरसि कुलालकुविन्दादयो गृहादियुक्ताः कायिकव्यापारवन्तः अवेक्षितभार्यादिसमवायाः रजआदिगुणवन्तः अनात्मकेन मृत्पिण्डतन्त्वादिना घटपटादिकं सृजन्ति त्वं तु अकरणः आयतनानपेक्षः अशरीरः शारीरव्यापारानपेक्षः नावेक्षितोऽस्मत्समवायः साहचर्यं येन सः अगुणः रजआदिभिः त्रिविधैः प्राकृतैर्गुणैश्च रहितः ॥ ३४ ॥

भाषा टीका ।

देवता बोले बड़ फल के हेतु काल स्वरूप आपके अर्थ नमस्कार है दुष्टोंपर चक्र चलाने वाले अनेक नाम वाले आप के अर्थ नमस्कार है ॥ ३१ ॥

हे विधाता ! तीनों गुणों की गतियों के प्रेरक आप हो आपकी सृष्टि के पीछे पैदा होने वाला पुरुष हम सरीखा आप की गति को नहीं जान सकता है ॥ ३२ ॥

हे नारायण ! भगवन् वासुदेव आदिपुरुष महानुभाव परममङ्गल परमकल्याण परमकारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ, परमहंस परिव्राजक जन बड़े भारी आत्मसमाधियोगसे निर्मल किये हुये अन्तःकरण में प्रकाशमान जो पारमहंस्यधर्म तिस से हृदय मे अन्धकार रूपी जो कपाट द्वार हैं तिन को खोल कर आत्मा के देखने योग्य जो चित्त तिस मे स्वयं प्राप्त सुख स्वरूप आप का अनुभव करते हैं ॥ ३३ ॥

आपका यह क्रीडा का विहार बड़ा आश्चर्य जनाने वाला है जिस सें कि आप विना प्राकृत शरीर वाले हो विना आश्रय के हो इन्द्रियों के अधिष्ठाता हम देवतों के समूह को भी नहीं चाहते हो और किसी विकार को नहीं प्राप्त होकर भी स्वयं अपने स्वरूपही से प्राकृत गुण रहित होकर भी गुणमय संसार को सृजते हो पालते हो नाशकरते हो ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुर्बोधान्तरमाहुः । अथ तत्रेति । यथेह देवदत्तो गृहादि निर्माय तत्र स्वकृतशुभाशुभयोः फलमुपादत्ते एवं भवान् ब्रह्मस्वरूपो जीवरूपेण गुणविसर्गे पतितः सन्नुपादत्ते । यद्वा । समञ्जसमप्रच्युतं दर्शनं चिच्छक्तिर्यस्य स भवानुदास्ते उदासीनः साक्षितया वर्तत इति ॥ ३५ ॥

स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं विरोधेन दुर्बोधत्वमुक्त्वा तत्परिहारेण ज्ञानप्रकारमाहुः । न हीति । विरुध्यत इति विरोधः । उभयं न विरुद्धमित्यर्थः । न ह्यन्यदृष्टान्तेन त्वयि विकल्पो युज्यतेऽतर्क्यैश्वर्यत्वादित्याहुः । भगवतीति । अपरिमिता गुणगणा यस्य तस्मिन्नीश्वरे अतएवेऽनवगाह्यमतर्क्यं माहात्म्यं यस्य तस्मिन् । विकल्प एवं वा एवं वेति वितर्कः किमत्र युक्तमिति विचार इत्यमेवेति तत्र प्रमाणाभासास्तदनुग्राहकाः कुतर्कास्तदधीना वस्तुस्वरूपासंस्पर्शिनो ये विकल्पादयस्ते येषु शास्त्रेषु तैः कलिलं व्याकुलमन्तःकरणमाश्रयो यस्य दुरवग्रहस्य तेन वादिनां विवादस्यानवसरेऽगोचरे । ननु श्रद्धामात्रमेतत् । युक्तिरुच्यतां तत्राहुः । उपरतो मायामयः संसारो यस्मिंस्तस्मिन् केवलेऽत्यात्ममायां मध्ये निधाय को न्वर्थः कर्तृत्वादिर्न सम्भवति यदि वस्तुतः कर्तृत्वादि भवेत्तर्हि विरोधः स्यान्न तु तदस्तीत्याहुः । स्वरूपद्वयाभावादिति ॥ ३६ ॥

अनुग्रहनिग्रहादिकं तु तत्तन्मतिभेदेन त्वन्मायया त्वयि स्फुरतीत्याहुः । समा विषमा च मतिर्येषां तेषां मतमभिप्रायम् । सर्पादिविषया धीर्येषां तेषां यथा रज्जुखण्डस्तथा तथा भाति । यद्वा । तमेवाविरोधं पुरुषमतिभेदेन दर्शयन्ति । समविषमेति ॥ ३७ ॥

तदेवं विरोधं परिहृत्य निश्चितं परमार्थमाहुः । स एव हि नानारूपेषु प्रतीतः । वस्तुस्वरूपः सद्रूपः सर्वेषां गुणानां विषयाणामाभासैः प्रकाशैरुपलक्षितः । ननु तैर्जीव एवोपलक्ष्यते । न । सर्वप्रत्यगात्मत्वात्सर्वजीवान्तर्यामित्वात् । जडतादात्म्याध्यासेन जीवस्यापि जडप्रायत्वान्न तेन विना प्रकाश इति भावः । पर्यवशेषितो "नेति नेति„ इत्यादिश्रुतिभिः ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु सत्यमीश्वरः सृष्ट्यादिकर्तेत्युक्तं स किं कर्मनिष्ठचेतनो यथा कुशलाकुशलमिश्रकर्माणि कृत्वा तत्फलानि सुखदुःखमोहात्मकानि भुङ्क्ते तथा सृष्ट्यादिकर्माणि गुणत्रयप्रयुक्तानि कृत्वा तत्फलानि भुङ्क्ते । किं वा ज्ञाननिष्ठचेतनवदुदासीन एवास्ते । नाद्यः भोक्तृत्वेन संसारित्वापातात् । न द्वितीयः उदासीनस्य कर्तृत्वानुपपत्तेः । अथोदासीनत्वं कर्तृत्वं चोच्यत इति चेन्न । परस्परविरुद्धत्वादनयोरित्याशङ्कते । अथेत्यादिना उदास्त इत्यन्तेन गद्येन । अथ ननु तत्र जगत्सृष्ट्यादिकर्तृत्वे सति हे भगवन् ! किंशब्द आक्षेपद्योतकः । आहोस्विच्छब्दश्च प्रश्नस्वरूपपरमपि वाक्यद्वयमाक्षेपपरमेव । किं भवान् देवदत्तवत् कर्मनिष्ठसंसारिजीववदिह गुणविसर्गे त्रिगुणकार्यरूपे प्रपञ्चे पतितः स्वातन्त्र्येण कर्तृत्वेन हेतुना स्वेन कृतानि कुशलाकुशलानि सात्त्विकराजसादीनि कर्माणि तेषां फलमुपाददाति स्वीकरोति भुङ्क्त इति यावत् । आहोस्वित्किंवा आत्माराम इवात्मयाथात्म्यानुभवनिष्ठ इव उपशमस्वभावः निवृत्तान्तर्बाह्येन्द्रियव्यापारः । अत एव समञ्जसदर्शनः अबाधिततत्त्वद्वस्तुयाथात्म्यज्ञान उदास्त इति परिहारं प्रतिजानीते । इतीति । इतीत्थमिह त्वयीश्वरे न विद्मः न जानीमः कर्मनिष्ठचेतनतुल्यतां ज्ञाननिष्ठचेतनतुल्यतां च न विद्म इत्यर्थः । किन्तूदासितृत्वं कर्तृत्वञ्चोभयमपि त्वयि विद्म इति भावः ॥ ३५ ॥

ननु परस्परविरुद्धमुभयमेकस्मिन् कथमुपपद्यते इत्यत आहुः । न हि विरोध इति । न विरोधः अपि तूभयं भवति सम्भवति । कर्मभावनया ब्रह्मभावनया चान्वितानां सर्वेषां चेतनानामन्तरात्मभूते तद्विलक्षणे विविधविचित्रशक्तिमति त्वयि सर्वमविरुद्धमित्यभिप्रायः । अविरोधापादकगुणजातेन ते विशिंषन्तो वादिविप्रतिपत्त्यविषयतां च वदन्तोऽविरोधमुपपादयन्ति भगवतीत्यादिना । भगवतीत्यादिभिः सप्तम्यन्तैः पदैः कर्मब्रह्मोभयभावनान्वितचेतनेभ्यो वैलक्षण्यमुच्यते भगवति पूर्णषाड्गुण्येऽपरिगणिता असङ्ख्याता गुणानां कल्याणगुणानां गुणा यस्य ईश्वरे भावनाद्वयान्वितचेतनानामन्तरात्मन्यनवगाह्यो कर्मादिभावनान्वितचेतनसजातीयत्वेन दुर्बोधं माहात्म्यं यस्य अर्वाचीना इदानीन्तनाः विकल्पः संशयः तन्मूलको वितर्कः एवं वा एवं वेति वितर्कः तत्र यो विचारः किं युक्तमिति विचारः तदन्यतरपक्षसाधकाः ये प्रमाणाभासाः प्रमाणवदाभासमानाः तन्मूलकं कुवाचितर्कात्मकं शास्त्रं तदभ्यासेन कलिलं दूषितमन्तःकरणं तेनाधिकरोतीत्यधिकरणः नन्द्यादित्वात्कर्तरि ल्युः प्रारम्भणः उत्पन्न इति यावत् । स दुरवग्रहो दुराग्रहो येषां तेषां वादिनां विवादानवसरे विवादाविषयभूते उपरताः निरस्ताः समस्ता मायामयाः प्राकृतदोषा यस्मिन् । प्रलयदशायामुपसंहृतकार्यवर्गेऽत एव केवले एकरूपे मायां प्रति स्वयमन्तर्धाय तिरोभूय स्थिते कोऽन्वर्थो दुर्घट इव भवति कर्तृत्वकारयितृत्वसाक्षित्वानुमन्तृत्वफलित्वफलप्रदत्वोदासितृत्वादिरूपः कोऽप्यर्थो न दुर्घट इत्यर्थः । कुतः । स्वरूपद्वयाभावात् । स्वरूपे द्वयस्य विरुद्धाकारद्वयस्याभावात् कर्तृत्वोदासितृत्वयोः परमात्मस्वरूपे विरोधाभावादित्यर्थः । अयं भावः । तावज्जगत्सृष्ट्यादिव्यापारेषु स्वातन्त्र्यरूपं कर्तृत्वं प्रयोज्यकर्तुर्जीवस्य कारयितृत्वात्प्रेरकत्वरूपं प्रयोजककर्तृत्वं चेश्वरस्योपपन्नम् । न च कर्तृत्वसमनियतभोक्तृत्वापत्तिः तादृशकर्तृत्वस्य कर्मावश्यत्वात्प्रशासित्रन्तराभावाच्च सर्वस्य शासितुरीश्वरस्येश्वरान्तराभावेनानिष्टकर्तृत्वाभावाच्च स्वानिष्टापादकं कर्म स्वयमेव करोतीति वक्तुं युक्तमुद्भ्रान्तत्वापातात्तथा लोके यथा सर्वाङ्कुराणां साधारणकारणं सलिलं विशेषकारणं बीजं तथैव सर्वेष्वपि कार्येषु समानत्वादुदासीनः । ननूदासितृत्वं नाम न साधारणकारणत्वमपि तु कर्तृत्वाकर्तृत्वोभयपरिहारेणावस्थातृत्वमिति चेन्न । जगद्विषयकोदासितृत्वानभ्युपगमात् । तच्च कर्तृत्वमेव हि साक्षादभ्युपगतमस्माभिः । तर्हि यद्विषयकमुदासितृत्वमीश्वरेऽभ्युपगतमिति चेदुच्यते साक्षात्सुखदुःखादिसाधनभूत-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुण्यापुण्यकर्मस्वकर्तृत्वेन तत्कर्तृत्वपरिहारात् तथैव कर्मसु प्रवीणत्वासमानुसारेण जीवस्य कर्तृत्वेनाकर्तृत्वपरिहाराच्च तद्विधयकृत्प्राप्तित्वमिति । एवं सर्वावस्थायां सर्वस्य स्वप्रवृत्त्यात्मनो कर्मसु प्रवृत्तस्य जीवस्योत्तरोत्तरं प्रवर्तकत्वादनुमन्ता सर्वस्वामित्वेन समाश्रितसंरक्षणरूपफलस्यापि स्वफलत्वात्फलदा फलमत उपपत्तेः।३।२।३९। इति न्यायेन फलप्रद इति जीवस्तु क्लेशकर्मविपाकाशयसंस्पर्शाकरत्वात्कर्मवश्यत्वान्मायामोहितत्वादविद्यया तिरोहितस्वभावत्वाच्च कुशलाकुशलफलमुपादत्त इति ॥ ३६ ॥

ननु विवादानवसरत्वेनेदमीश्वरः तर्हि कथं विवादानामुपशमस्तत्राहुः। समेति। समा विषमा च मतिर्येषां तेषां मतमभिप्रायमनुसरन्ति वादिविप्रतिपत्तीरप्रतिषिध्य तूष्णीं भवन्तीत्यर्थः। अप्रतिषेधे दृष्टान्तमाहुः। यथेति। यथा सर्पादिधियां सर्पादिभ्रान्तिमतां मतं रज्जुखण्डोऽनुसरति न प्रतिषेधते एवं त्वं चापि नानाविधवादिविप्रतिपत्तिमात्रो तूष्णीमास्से इत्यर्थः ॥३७॥

एवं जगत्प्रवृत्त्यनुकूलरूपनिमित्तकारणांशे जीववत्संसारित्वादिशङ्का परिहृता अथोपादानकारणांशे स्वरूपे विकाराश्रयत्वशङ्कां परिजह्रुः। न एवेति। योऽयं निमित्तकारणभूतः स एव त्वं सकलजगदुपादानकारणभूतोऽपि सर्ववस्तुषु देवादिपदार्थेषु स्थितोऽपि वस्तुस्वरूपः निर्विकारस्वरूपः यथोक्तम् "वस्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै। परिणामादिसम्भूतां तद्वस्तु नृप ! तच्च किम्" इति कुतः सर्वप्रत्यगात्मत्वात्सर्वे प्रत्यगात्मानः शरीरं यस्य तस्य भावस्तत्त्वं तस्माच्चेतनाचेतनविशिष्टसर्वजीवशरीरकत्वाच्छरीरभूतचिदचिद्गतत्वाद्विकाराणां न स्वरूपे प्रसङ्ग इति भावः। अत एव सर्वगुणाभासः सर्वैश्चिदचित्कार्यादिभिरपृथक्सिद्धविशेषणैरवभासत इति सर्वगुणावभासः साक्षात्स्वरूपाश्रयचेतनाचेतनविशिष्टत्वेनोपलक्षित इति भावः। समस्तपाठे गुणैः सत्त्वादिभिरवभासन्त इति गुणावभासाः गुणकार्यदेहेन्द्रियादयः तैरुपलक्षितः तद्विशिष्टत्वेनोपलक्षितः इत्यर्थः। अतस्त्वमेक एव पर्यवशेषितः एक एव समाभ्यधिकरहितः पर्यवशेषितः एवंविधो नान्य इति निर्णीत इति भावः ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवत्स्वरूपनिर्धारणार्थं पूर्वपक्षयन्ति। अथेति। सृष्ट्यादिकर्मणि प्रवर्तमानो भगवान् अथेह गुणविसर्गपतितः संसारान्तःपाती देवदत्तवत्परवशतया स्वकृतपुण्यापुण्यफलमुपादत्ते किमथवोदास्ते नोपादत्ते किम् । कुतः। आत्मारामः स्वमहिम्नि स्थितः उपशमशीलः पूर्णानन्दानुभवः समञ्जसदर्शनः शुद्धज्ञानः एते प्रत्येकं हेतवोऽनुपादाने भवन्तीति न विद्मो ह वाव न बुध्यामहे ह वावेत्येतावप्यज्ञानिन एवं वदन्तीति सूचयन्ति न ज्ञानिन इति। कस्मिन् सति किं स्यादिति तत्राहुः। न हीति। कुशलाकुशलस्योपादानमनुपादानं चेत्युभयमितरत्र विरुद्धमत्र न हि विरोधः। कथं तत्राहुः। भगवतीति। भगवति को नु दुर्घट इव भवति सर्वः सुघट एवेत्यन्वयः। सौघट्यं बहुभिर्विशेषणैरुपपादयन्ति। अपारगणितेति। न परिगणिताः गुणानां गणा यस्य स तथा तस्मिन् कुत इत्यत्राहुः। ईश्वर इति। अघटितघटनाशक्तिमत्त्वादुक्तमित्यर्थः। इतोऽपि गुणानाम् अगाधितत्वं युक्तमित्याहुः। अनवगाह्येति। अपरिच्छेद्यमहिमत्वात् अयमीशः (१) स्वेतरसर्वासत्त्वानाक्रान्तपरिच्छिन्ननिष्ठाधिकरणं मेयत्वात् घटवदित्यादिमहाविद्याप्रयुक्तवितर्केण देवदत्तवदयं कुशलाकुशलभोक्ता न वेति विकल्पेन। अत्र कर्मणः पुरुषार्थहेतुत्वसमर्थनादस्ति शास्त्राधिसङ्गतिरित्यादिकक्षणामीमांसया यथाविषयम् गुरुमे ज्यायोऽश्वर्षीत्यादिविधमानेन प्रमाणपदवभासमानेन यदीशो दुर्गमशरीरे विषयेन्द्रियैर्हि देवदत्तवत्सुखदुःखभोगः प्रसज्येत इत्यादिकुतर्केण (२) चावगाह्यमाहात्म्यत्वादिति (३) तत्राहुः। सर्वागमेति। सर्वागमा व्याख्यादिरहिताः विकल्पाद्यां यत्तु तानि यथाकामं तैः शास्त्रैः वैशेषिकादिभिः कालेन व्याकुलितेनान्तःकरणेन मनसा दुरवग्राहा येषां ते तथा ते च वादिनस्तेषां विवादानवसरे विप्रतिपत्त्यगोचरे इतोऽपि विवादाविषय इत्याहुः। उपरतसमस्तेति। केवलात्ममायाम अद्वन्द्वरूपसामर्थ्यमन्तर्धायावपुषोपरतसमस्तमायामये प्राकृतस्वभाववर्जिते एवंविधेऽपि पुण्यापुण्यभोक्तृत्वं वयं न विद्महे। ये वदन्ति ते मूढाः असुरप्रकृतय इत्यभिप्रेत्य स्वयमेव समाधत्ते। स्वरूपेति। "एकमेवाद्वितीयं निरनिष्टो निरवद्यः" इत्यादिश्रुतेः। सुखी दुःखीत्यादिस्वरूपद्वयानुपपत्तेः न चायं संशयः सुराणां स्वतन्त्रः परतन्त्रो वाहो वा दुःखी सुखी नु किं इत्यादिसंशयः क स्याज्ज्ञानिनां पुरुषोत्तम इति निर्दोषात्तर्हि ज्ञानिनः कथं वदन्ति चेदुच्यते। अनन्तगुणत्वात्पूर्णशक्तित्वाच्च स्वातन्त्र्यादिकमेव जानन्ति। तदुक्तम्।

> तस्यानन्तगुणत्वाच्च पूर्णशक्तित्वतो हरेः ।
> स्वातन्त्र्यादिकमेवास्य विदो जानन्ति निश्चयात् ।

इति निरवद्यस्य जीवस्य पुण्यापुण्यभोक्तृत्वं युज्यते ।

> घटकत्वाद्दुर्घटस्य दुर्बलत्वाच्च सर्वशः ।
> तत्क्लेशैर्विदो जीवं परतन्त्रं वदन्त्यमुम् ।
> एवं दुर्घटया शक्त्या योऽज्ञानां परमेश्वरः ॥

इति वचनात्। यद्वा। पारतन्त्र्येण कुशलाकुशलादिकमनुभवति किम् उत स्वातन्त्र्येणोदास्ते इति संशयं न विद्मः। किं त्वनन्तशक्तेरनन्तगुणस्य हरेः पारतन्त्र्यादिकं कुतो घटत इति निश्चिनुमः अस्मिन्नर्थे च स्वतन्त्रः परतन्त्रो वाहो वा दुःखी सुखी नु किम् इत्यादिमानमनुसन्धेयमितोऽपि न घटत इत्याहुः। न हीति। विरोधो हि यस्मात्तस्मादुभयमेकस्य न युक्तमित्यर्थः। ननु निर्गुणस्य हरेः गुणित्वम् अकिञ्चनस्याधिपतित्वं

---

(१) अत्र साध्ये अपदद्वयं दुष्टत्वात्परमेव । परिच्छिन्ने निष्ठा आधेयता यस्येति व्युत्पत्त्या परिच्छिन्नत्वसमानाधिकरणेत्यर्थः। अनाक्रान्तेत्यन्तमस्य विशेषणं तथा च आत्मवृत्तित्वात्मेतरवृत्तित्वैतदुभयाभाववान् यः परिच्छिन्नत्वसमानाधिकरणो धर्मः तदधिकरणत्वं साध्यमिति दृष्टान्ते घटत्वादिधर्ममादाय साध्यसत्त्वनिर्वाहः । पक्षे आत्मत्वादिधर्ममादाय साध्यसिद्धावपि तस्य परिच्छिन्नत्वासिद्धेः तत्समानाधिकरणपदस्य निवेशः।

(२) परिच्छेद्यमाहात्म्यत्वात् ।

(३) तद्गुणानामपरिच्छिन्नत्वं कथमित्यपेक्षायाम् ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वव्यतिरिक्तरहितस्य माहात्म्यम् अवाङ्मनसगोचरस्य विचारविषयित्वम् अकर्तुः कर्तृत्वमित्यादिसर्वं दुर्घटमिति तत्राहुः । भगवतीति । तर्हि उपाधिभेदाद्दौर्घट्यपरिहारोऽस्त्विति तत्राहुः । स्वरूपेति । ननु "मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा" इत्यादि कथं सङ्गच्छत इति चेत्तत्राहुः । समेति । सममतीनामभग्नं सच्चिदानन्दलक्षणं ब्रह्मेति यथार्थबुद्ध्यानुसरसि तथात्वेन प्रकाशस इत्यर्थः । विषममतीनामसुरप्रकृतीनां मतमभूतिरित्यसुरा इति मिथ्याबुद्ध्या दुःखी छिन्नो विद्ध इत्याद्याकारेण दृश्यस इत्यर्थः । अत्र दृष्टान्तमाहुः । यथेति । यथा रज्जुखण्डः सर्पोऽयमिति मन्दान्धकारे मलिनेन्द्रियस्य ज्ञानं स एव पुनरालोकादिना वाञ्छिते स्थले निर्दुष्टेन्द्रियस्य रज्जुखण्ड एव इति तदुक्तम् ।

यथा रज्जुः सर्पधिया रज्जुबुद्ध्यावगम्यते ।
तथा यथार्थबुद्ध्या वा मिथ्याबुद्ध्यावगम्यते ॥
स्वेच्छयैव महाविष्णुः फलदश्चानुसारतः ।

इति तथा स एव पुनर्भगवान् सर्ववस्तुषु वस्तुस्वरूपोऽप्रतिहतस्वरूपः "वासनाद्वासयेद्वस्तु नित्याप्रतिहतत्वतः" इत्याद्यैः तादात्म्यं किं न स्यादत्राहुः । सर्वेश्वर इति । प्रत्यगात्मत्वेन सर्वेश्वरत्वं हरेरित्याहुः । सकलेति । ननु कुलालादिवद्ब्रह्मकारणत्वमस्तु नान्तः परिच्छिन्नत्वापत्तेः । तथा च सकलकारणकारणत्वमयुक्तमत्राहुः । सर्वप्रत्यगिति । सर्वेषामपि प्रत्यगात्मत्वेनान्तर्यामित्वेन तत्तद्वस्तुनस्तच्चेष्टादिकारणत्वेन अपरिच्छिन्नस्यापि आकाशवदुपपत्तेः तदन्तःस्थस्य तत्तद्दुष्प्राप्यसौभाग्यप्राप्तिः स्यादत्राहुः । सर्वेति । सर्वगुणानामाभासेन सम्यक्प्रकाशेनोपलक्षितो ज्ञानिभिः सत्यग्रहे इतरैरनुमीयत इत्यर्थः । न च स्थानभेदात्तस्य भेद इत्याहुः एक इति । "स वा एष आत्मा नेति नेति" इत्यादिपारिशेष्यलक्षणप्रमाणात् एक एवेति निश्चित इत्यर्थः । महतामनुभवापरपर्यायसाक्षिप्रत्यक्षं हरेरेकत्वे निर्दोषत्वे संसारनिवर्तकमहामहिमत्वे प्रमाणमाहुः । अथेति । विप्लुषा बिन्दुना असकृल्लीढया निरन्तरसेवितया नितरां स्यन्दमानेन निरवरतेन निरन्तरेण स्वरूपसुखेन हे मधुमथन ! यस्मात्त्वं सर्वोत्तमः सर्वगुणपूर्णः सर्वात्मना निर्दोषः सर्वान्तर्यामी अथ तस्मादेकान्तिनो हरावर्पितशरीरेन्द्रियप्राणमनस्काः भागवताः ये एते कथं त्वच्चरणाम्बुजसेवां विसृजन्ति एवेत्यन्वयः । ह वाव इत्येतैर्निपातैः "परमः परार्ध्यः" इति श्रुतेः महिम्नः परमपरार्ध्यत्वं सूच्यते सर्वभूतप्रियाः संन्यासिनोऽजातशत्रवस्तेषां सुहृत् सर्वभूतानां परेशाभीष्टकर्तृत्वात् प्रियश्च सुहृच्च परेयं प्रियनामेति वचनात् निरन्तरं सन्तुष्टमनसः अविसर्जने कारणमाहुः । स्वार्थेति । यत्र त्वच्चरणाब्जसेवायां परिवर्तैः परिभ्रमणं स्वाभिप्रायं विज्ञापयितुमुपोद्घातमाहुः । त्रिभुवनेति । त्रिभुवनमेवात्मभवनं यस्य स तथा त्रिभुवनस्य य उपद्रवः सोऽवश्यं परिहर्तव्य इति द्योतनार्थं विशेषणमिति ज्ञातव्यम् । एवमेवोत्तरविशेषणानि अभिप्रायगर्भाणि त्रीणि नयनानि यस्य स तथा नृसिंह इत्यर्थः "विष्णोर्नृसिंहनामानि त्रिनेत्रादिकानि तु" इति वचनात् नृसिंहसुदर्शनादयस्त्रिनेत्रादिनामानः त्रयो लोकास्त्रिलोकावयवाः ज्ञानलक्षणाः प्रकाशाः यस्य स तथा सर्वज्ञ इत्यर्थः । त्रिलोकस्य त्रिलोकनिवासिनो जनस्य मनोहरोऽनुभावो यस्य स तथेति वा "मायागुणव्यतिकराद्यदुरुर्विभासि" इति वचनाद्विभूतय इत्युच्यन्ते देवादयो न तु स्वरूपत्वात् अविशब्दान्मत्स्यादय एव साक्षाद्विभूतय एव गम्यन्ते "त्रिविधभावस्य पात्रत्वात्सर्वे विष्णोर्विभूतयः" इति च ये विभूतिशब्दवाच्या दितिजादयोऽभूवन् तेषामनुपक्रमसमयः अयमारम्भकालोऽयमिति मत्वा स्वात्ममायया स्वरूपभूतेच्छया स्वमहिम्ना शुक्रशोणितसम्बन्धमन्तरेण वा सुराद्याकृतिभिरवतीर्य यथापराधं त्रैलोक्यापहरणादिलक्षणापराधमनुसृत्य बल्यादीनां धृतवानसीत्यन्वयः । मिश्रिताकृतिभिर्नरसिंहादिभिः सुराद्याकृतिभिरित्यनेन विभूतित्वं निवृत्तमिति ज्ञातव्यम् । किं बहूक्तेनापेक्षितं वक्तव्यमिति तत्राहुः । एवमिति । यदि मन्यसे कर्तव्यं तर्हीति शेषः । किं चेदं कर्तव्यमिति प्रार्थयन्ते । अस्माकमिति । हृदयनिगडानां हृदयावयवशृङ्खलानां चक्रशङ्खादिलाञ्छनानां स्पष्टतया धारणात्मसात्कृतानां तद्भक्तानामनुकम्पया रञ्जितं स्निग्धं च विशदं निर्मलं च रुचिरं चारु च शिशिरं शीतलं च यत्स्मितं तेन युक्तेनावलोकनेन निरीक्षणेन विगलितं निर्गतं च मधुरं च मधुरितं मुखरितं मन्त्रं च यद्वचनेनामृतकलया युक्तेनेति शेषः । वचोलवणयामृतकलयेति वा बुभुक्षितबालवत्सर्वज्ञस्य तव हृदयमार्जारिकातुरकथितमिव वदिज्ञापनमस्मदीयं तदस्मदज्ञाननिमित्तमित्यभिप्रेत्याहुः । अथेति । दिव्यमायया स्वरूपेच्छया विनोदो लीला यस्य स तथा निकायानां राशीनां ब्रह्मस्वरूपेण बहिः प्रत्यगात्मस्वरूपेणान्तः यथा देशादिक्रियाविशेषणं तेषां देशकालादीनामुपादानोपलम्भकतया कारणत्वप्रापकत्वेनोपादानत्वेनोपालम्भकत्वेनेति वा सर्वमनुभवतः आकाशशरीरस्याकाशवत् सूक्ष्मरूपस्य "आकाशशरीरं ब्रह्म" इति श्रुतेः लिङ्गशरीरस्य व्यावृत्त्यर्थं परब्रह्मण इति मुक्तजीवस्य व्यावृत्त्यर्थं साक्षादिति । साक्षात्परब्रह्मत्वं चित्प्रकृतेरप्यस्तीत्यतः परमात्मन इति । हिरण्यरेतसोऽग्नेः महाप्रकाशस्य विस्फुलिङ्गादिभिरल्पप्रकाशैरग्निकणैः अणोतैश्च यतस्त्वमस्माकं सर्वापदां परिहर्तासि अतो वयं वस्कामेन स्वाष्टहननलक्षणवाञ्छया तव पादकमलच्छायामुपगताः तदुपसन्नानाम् "अधीहि भगवो ब्रह्म" इति समित्पाणिशिष्यवच्छरणागतानामस्माकं तत्कार्यमुपकल्पय समर्थस्त्वेत्यन्वयः । बहुप्रार्थनेनैव स्वाभीष्टफलप्राप्तिः स्यादिति दर्शयितुमेवं गद्येन विज्ञापितमेव पद्यप्रबन्धेन विज्ञापयन्ति । अथो इति । तेजांसि सामर्थ्यलक्षणानि ॥ ३५—४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

किञ्चिदिदं तु निर्णेतुं न शक्नुम इति बहिर्मुखानाक्षेप्तुं सोल्लुण्ठमाहुः । अथेति । तत्र मृण्मयादौ कर्मणि देवदत्तवत् संसारिजीवविशेषवदविद्यया गुणविसर्गपतितः सन् स्वकृतशुभाशुभयोः फलं देवतिर्यगाद्यन्तरारूपमुपादत्से । आहोस्वित् एवं तद्वदेवद्रूपत्वेऽपि विद्यात्मारामः साक्षित्यादि ॥ ३५ ॥

यत्र विद्या सम्भाव्यते तत्राविद्यापि सम्भाविता स्यादिति मायाशक्तिवृत्तिविद्याशक्तिमयेश्वरवादिनामुपहासार्थमिदमुक्तवन्तः । स्वमतं पुनः स्फूर्तिमभिनयन्त इवाहुः । न हीति । उभय-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अपीदं विरुद्धं भगवति नैव विद्यते। तत्र हेतुः। स्वरूपद्वयाभावात्। संसारिजीववद्बद्धत्वमुक्तत्वावस्थाविशेषाभावात्। बद्धत्वे हि मुक्तत्वं तथा द्विष्पातिद्विष्पतरावतारादिलक्षणोऽप्यर्थो दुर्घटो न भवति। यतः आत्ममायां निजेच्छाशक्तिमन्तर्नीय मध्ये निधाय तत्र तत्र सहायत्वेन सम्पाद्य तिष्ठति सतीत्यर्थः। उभयत्र हेतवो भगवतीत्यादयः ॥ ३६ ॥

तर्हि कथमन्यथा प्रतीतिर्बहिर्मुखानां तत्राहुः। समेति। अनिश्चितबुद्धीनामित्यर्थः। तदेव स्थापयितुं जीवन्मुक्तादिलक्षणयमाहुः। स एव हीति ॥ ३७ ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

शिष्टानां पालनं हि दुष्टानां संहारं विना न भवतीत्यन्तर्भूतसंहारस्य पालनस्यापि दुर्बोधत्वमाहुः। अथेति। देवदत्तः प्राकृतजीवो यथा गृहादिकं निर्माय तत्र मित्रशत्रूदासीनादिगहने संसारे प्रविश्य स्वकृतधर्माधर्मफलं सुखदुःखं भुङ्क्ते तथैव तत्र भवानित्यादरे त्वमपि गुणेभ्यः सत्त्वरजस्तमोभ्यो विविधः सर्गो येषां तेषु गुणविसर्गेषु देवासुरराक्षसादिषु परस्परविघातिषु मध्ये पतितः उपेन्द्रकृष्णरामाद्यवतारेषु शिष्टपालनदुष्टनिग्रहयोः प्रवृत्तः भोगैश्वर्यसुखं सङ्ग्रामादिश्रमदुःखञ्च यत् प्राप्नोषि तत् किं पारतन्त्र्येण कर्माधीनत्वेन स्वकृतयोः पुण्यपापयोः कुशलाकुशलं सुखदुःखमुपादत्से स्वीकरोति आहोस्वित् किं वा समञ्जसदर्शनः अप्रच्युतचिच्छक्तिकः उदासीनः साक्षित्वेन सुखं दुःखं स्वीकरोतीति न विद्मः तत्त्वं न विद्मः ॥ ३५ ॥

विरोधमुक्त्वा भक्तानां मते तस्य परिहारमाहुः। नहीति। विरुध्यतइति विरोधः। उभयम् आत्मारामत्वमप्राकृतसुखदुःखित्वं च त्वयि न विरुद्धमित्यर्थः। नह्यन्यदृष्टान्तेन त्वयि विकल्पो युज्यते अतर्क्यैश्वर्यत्वादित्यविरोधे हेतुनाहुः। भगवतीत्यादि। प्रथमं सुखदुःखित्वं भगवतीत्यादिपदद्वयेनाहुः। भगवतीति "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः" इति वैष्णवोक्तेरप्राकृतज्ञानादिषडैश्वर्यवत्त्वेन ज्ञानमूलकं सर्वमेव प्राकृतं सुखदुःखं त्वयि नास्तीत्यवगतम्। ननु तर्ह्यन्ये सुखदुःखे मयि कुतस्त्ये तत्राहुः। अपरिगणितगुणानां प्रेमवश्यत्वभक्तवात्सल्यादीनां गणा यस्मिन् तेन ह्यसुरराक्षसादिभ्यस्त्वद्भक्तानां प्रह्लादविभीषणादीनां पाण्डवयादवादीनां नित्यपार्षदानां साधकभक्तानामप्यनन्तानां भक्ताभासानामस्मदादिदेवानाञ्च कष्टे वृत्ते सति तद्दुष्टसंहारार्थं विविधप्रयासव्यापितस्य त्वदीयदुःखस्य तथा तेषामेव तद्विपदुद्धरणानामवग्रहजाज्वल्यमानसस्यानां कादम्बिनीवृष्यमाणामृतसिक्तानामिव लब्धभवद्दर्शनानां परमसुखे वृत्ते सत्युद्भूतस्य तव सुखस्य च भक्तवात्सल्यप्रेमवश्यत्वैकनिदानत्वादप्राकृते एव ते सुखदुःखे भवतः। किञ्च। सुखदुःखे अपि ते चिन्मयसुखरूपे एव प्रेमाख्यभक्तिशक्तिसारवृत्तित्वात्। किं पुनर्व्रजदेव्यादीनां वैदग्ध्याख्य सम्भोगविप्रलम्भजनिते सुखदुःखे ते तु प्रेमपरमकाष्ठामयत्वात् परमसुखरूपे एव स्तः। ततश्च चित्स्वरूपस्य तव चित्स्वरूपयोः सुखदुःखयोः रममाणस्यात्मारामत्वं सुखदुःखवत्त्वमेकत्वादविरुद्धमेव प्रतिपादितम्। नन्वेवं केऽपि दार्शनिका नाहं निरूप्ये तत्राहुः। ईश्वरे त्वयि ईशितव्यानां तेषां निरूपणायोग्यता युक्तैवेति भावः। यतोऽनवगाह्यम् "भक्त्याहमेकया ग्राह्यः" इति त्वद्वचनात्तेषां भक्तिहीनानामवगाहनानर्हं माहात्म्यं यस्मिन्। ननु युष्मत्प्रतिपादिते मत्षडैश्वर्याणां प्रेम्णश्च चिन्मयत्वे तैर्बहव एवानुपपत्तयः उद्भाव्यन्ते तत्राहुः। अर्वाचीना वस्तुस्वरूपासंस्पर्शिनो विकल्पादयो येषु शास्त्रेषु तैः कलिलं व्याकुलं यदन्तःकरणमाशयः तत्र आरोहितं सदैव शायित्वा तिष्ठन्ति ये दुरवग्रहाः दुराग्रहास्तैरेव वादिनां नानावादोद्भाव्यता विवादस्यानवसरे अगोचरं तत्र विकल्प एवं वा एवं वेत्याकारः वितर्कः किमत्र युक्तमित्यनिश्चयः विचार इत्थमेवेति निश्चयः। तत्र प्रमाणाभासाः कुत्सितास्तर्का इति। नन्वनुपपत्तौ सत्यां कुतो विवादाभावस्तत्राहुः। उपरताः समस्ता मायामयाः मायिकाः पदार्था यत्र तस्मिन्निति विवादादीनां मायाशक्तिकार्यत्वात् तव तु माया मायिकपदार्थातिरिक्तवस्तुत्वात् कुतो विवादप्रसक्तिसम्भावनापीत्यर्थः। ननु तदपि युष्मत्साहाय्यार्थं समुद्रमन्थनादौ पाण्डवसाहाय्यार्थं सारथ्यदूत्यादौ यादवपालनार्थं जरासन्धादियुद्धेऽध्यवसायनादौ कर्माणि प्रत्यक्षत एव सर्वैर्दृश्यमानं मदीयदुःखं कथं चिन्मयं सुखरूपं भवेदित्यत आहुः। केवल एवेत्यादि। त्वयि मायाशक्तिविनाभूते सत्येव या आत्ममाया अचिन्त्ययोगमाया तामन्तर्धाय मध्ये कृत्वा को न्वर्थो दुर्घट इति त्वदनुभवे सुखमये कः प्रवेष्टुं शक्नुयादिति नात्र प्रत्यक्षादिप्रमाणं प्रवर्तेत इति भावः। "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्" इति वचनात्। नन्वचिन्त्यशक्तिस्वीकारेण मम भगवत्स्वरूपेण भक्तवात्सल्योत्थसुखदुःखादिमत्त्वञ्च ब्रह्मस्वरूपेण सर्वत्र तटस्थ्यादात्मारामत्वमिति स्वरूपद्वयस्य क्रमेण धर्मद्वयमस्तु तत्राहुः। स्वरूपद्वयाभावादिति। एकस्यैव भगवतस्तव निर्विशेषज्ञानगम्यत्वमेव ब्रह्मत्वमलौकिकविशेषज्ञानगम्यत्वमेव भगवत्त्वमिति दूरवर्तिभिर्ज्ञानिभिरलौकिकविशेषग्रहणासमर्थैस्त्वमेव ब्रह्मसमीपवर्तिभिर्भक्तैरलौकिकविशेषग्रहणसमर्थैर्भगवानिति त्वमेवोच्यसे इत्यर्थः। तत्र रूपायाः परमाणुत्वपरममहत्त्वे एव दूरत्वसमीपत्वयोर्हेतू ज्ञेयौ ॥ ३६ ॥

किञ्च। तदपि संसारपरम्परासिद्ध्यर्थं तेषामभक्तानां मतं नैवोच्छिनत्सीकरोपीत्याहुः। समा ब्रह्मविषयत्वात् विषमा नरप्रतिकूलत्वाच्च मतिर्येषाम्। यद्वा। स्वरूपभूताभ्यां ब्रह्मत्वभगवत्त्वाभ्यां समोऽपि एकरूपोऽपि त्वयि विषमा मायातीतस्य ब्रह्मण एव मायाशबलत्वं सति भगवत्त्वमित्येवं वैषम्यवती मतिर्येषां तेषां मतमनुसरन्ति प्राप्नोपि मतमेवाहुः। अपरिविधयां रज्जुसर्प इव ब्रह्मण्यात्मारामत्वमेव सत्यं भक्तवात्सल्यादीनां तु मायाप्रत्यायितत्वात्तन्मूलकं सुखदुःखादिकमलौकिकमेवेति नैवास्ति विरोध इति ॥ ३७ ॥

यस्मादेवं तस्मात् सर्वज्ञमतमपहाय त्वद्भक्तमतमेव वयमनुसराम इत्याहुः। स एव पूर्वोक्तभगवत्त्वादिविशेषणविशिष्ट एव वस्तुस्वरूपः। वास्तववस्तुस्वरूपः सर्वेषां प्रत्यगात्मत्वात् इन्द्रियागोचरत्वादप्रत्यक्षोऽपि सर्वेषां गुणानां बुद्धीन्द्रियादीनामाभासैः प्रकाशैरेव आधिक्यं न क्वचित् ज्ञातः

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अनुमित इत्यर्थः। यदुक्तम् "गुणप्रकाशैरनुमीयते भवान्" इति। पर्यवशेषितः मायामायिकवस्तुमात्रनिषेधेन "नेति नेति" इत्यादिश्रुतिभिरिति भागवतामृतदृष्टाः "विना शारीरचेष्टत्वं विना भूम्यादिसंश्रयम्। विना सहायांस्ते कर्माविक्रियस्य सुदुर्गमम्" इत्याद्याः कारिकाः अनुसृत्य दुरवबोध इत्यादीनि गद्यानि व्याख्यातानि॥३८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवद्धामादिकं भगवत्कृपां विना न जानन्तीत्युक्तम्। अथ कुशास्त्रविमोहितजीवानुग्रहचिकीर्षया स्वोक्तविश्वहेतौ भगवति सर्वात्मनि स्वभावतोऽपास्तसमस्तदोषे केचिद्रासक्तमन्येऽनासक्तं पुरुषविशेषमीश्वरमपि बाह्या मन्यन्ते तन्मतद्वयविरोधमारोप्य निराकुर्वन्ति। अथेति। तत्र स्वकृते विश्वस्मिन् देवदत्तवत् यथा देवदत्तः पारतन्त्र्येण विषयपारवश्यतया गृहादिकं विधाय तत्र स्वकृतशुभाशुभं फलं भुङ्क्ते तद्वद्भवान् गुणैर्विविधतया सृज्यन्ते इति सर्गाः देवमनुष्यादिदेहास्तेषु पतितः प्रविष्टः स्वकृतकुशलफलमुपादत्ते तर्हि स्वतोऽवाप्तसमस्तकामत्वेन विभुते त्वयि इदं बुभुक्षुलक्षणं विरुद्धं स्यादिति भावः। आहो स्वित् देवदत्तवदित्यत्रापि योज्यम्। यथा देवदत्तः मुमुक्षुः सन् आत्मारामः स्वरूपानन्दतृप्तः उपशमशीलोऽन्तदर्शः समञ्जसदर्शनः उदास्ते भोगादुदासीनो भवति तद्वद्भवानपि तर्हि सर्वनियन्तृत्वसर्वात्मत्वमुक्तोपसृप्यत्वादिना विभुते त्वयि इदमात्मारामत्वोपशमशीलत्वादिकं मुमुक्षुलक्षणमपि विरुद्धं स्यादिति भावः इतिशब्दः पूर्वपरामर्शपरः इति पूर्वोक्तं विरोधद्वयं न विद्मः त्वयि न विद्मः॥३५॥

तदेवाहुः। नहीति। ईश्वरे बुभुक्षुमुमुक्षुसर्वजीवनियन्तरि स्वकृतकुशलभोक्तृत्वेन बुभुक्षुत्वम् आत्मारामत्वोपशमशीलत्वादिना मुमुक्षुत्वमित्युभयं नास्ति स्वरूपद्वयाभावात् स्वरूपे ईश्वरस्वरूपे तद्द्वयस्याभावात् ईश्वरांशभूतजीवधर्मत्वाद्बुभुक्षुत्वमुमुक्षुत्वद्वयस्येत्यर्थः। हि हेत्वर्थः। अतो हेतोर्न विरोधः इति नकारस्योभयत्र योगः। ईश्वरे बहुभिर्विशेषणैः बुभुक्षुत्वमुमुक्षुत्वाभावमेवोपपादयन्ति भगवति "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणैर्नृप" इति सच्छास्त्रोक्तेः। अपरिमिताः अनन्ताः स्वाभाविकाः गुणगणा यस्य तस्मिन् उप समीपे आधेयाधिनियन्तृत्वकार्यत्वादिना रताः स्वस्वावस्थां प्राप्ताः समस्ता मायामया तच्छक्तिमयाः महदादयः सृष्टिवेलायां यस्मात्तस्मिन् संहारवेलायां च आत्ममायां प्रकृतिमात्मशक्तिमन्तर्भाव्य आकृष्य केवले कारणे को न्वर्थो भोगमोक्षादिरूपो दुर्घटः न कोऽपीत्यर्थः। स्वतोऽवाप्तसमस्तकामत्वात् अथार्वाचीना आधुनिकाः विकल्पादयो येषु इदमेव मुख्यं प्रमाणमित्येवं प्रमाणतया भासमानेषु कुत्सिता वेदविरुद्धाः तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः विषया येषां तैः शास्त्रैः कलिलं मलिनं यदन्तःकरणं तदाश्रया ये दुरवग्रहाः दुराग्रहास्तैरेव वादिनां विवादस्य नास्त्यवसरोऽवकाशो यस्मिन् तत्र विकल्पः ईश्वरो नास्ति अस्ति नेति वितर्को वेदविरुद्धो विविधपदार्थवादः विचारो वेदविरुद्धस्वकल्पितपदार्थचिन्तनम्॥३६॥

सर्वप्रेरकोऽपि तान्सन्मार्गे न नियोजयसि प्रत्युत तदनुरूपं तानधोगतौ पातयितुं तन्मतमनुसरसीत्याहुः। समविषममतीनामिति। समे सर्वात्मनि सर्वकारणकारणे सर्वेश्वरे त्वस्मिन् विषममतीनां तेषामन्यथात्मनिष्ठानां मतं स्वपराक्रमत्वापादकं सिद्धान्तमनुसरसि "यमेभ्यो लोकेभ्य उन्निनीषति तं साधु कर्म कारयति यमेभ्यो लोकेभ्योऽधो निनीषति तमसाधु कर्म कारयति" इत्यादिवाक्यान्यत्रानुसन्धेयानि। तत्र दृष्टान्तमाहुः। यथा सर्पोऽयमिति धीर्येषां तेषां मतं सर्पतया भासमानो रज्जुखण्डः अनुसरति तद्वत्॥३७॥

एवमन्यशास्त्रविमोहितविवादाविषयत्वं भगवत उपपाद्य स्वतः प्रमाणभूतश्रुत्युक्तरीत्या भगवन्तं स्तुवन्ति। स एवेति। स एव सकलजगत्कारणभूतः सर्वस्मिन् वस्तुनि कार्यमात्रे वस्तुस्वरूपस्तत्तद्रूपाकारः सर्वेषां प्रत्यक्षानां जीवानां स्वांशानामात्मा आश्रयः स्थितिप्रवृत्तिप्रदस्तस्य भावस्तत्त्वं तस्मात्सर्वेश्वरः सर्वे सत्त्वादयो गुणा आभासन्ते प्रतीयन्ते येषु ब्रह्मादिमत्कुणान्तेषु तैर्धार्यत्वप्रेर्यत्वादिस्वासाधारणगुणयुक्तैः सर्वाधारत्वप्रेरकत्वादिस्वासाधारणगुणयुक्तः लक्षितः ज्ञापितः। एवं सकलजगत्कारणत्वात्सर्वचेतनाचेतनपदार्थगर्भोऽपि एकः सजातीयपदार्थान्तरशून्यः एवकारेण विजातीयपदार्थान्तरशून्यः पुनर्भूयो भूयः पर्यवशेषितः परितः सर्वश्रुतिसमन्वयेन सर्वविरोधपरिहारेण च अवशेषितः सर्वकारणत्वेन वर्णित इत्यर्थः॥३८॥

भाषा टीका।

और भी एक संदेह है किसी एक संसारी देवदत्त के तुल्य इस संसार मे पड के आप भी परतंत्र होकर अपने कर्मों के सुख दुःखों को भोगते हो अथवा आत्माराम शम दम शील स्वभाव वाले दिव्य ज्ञान वाले होकर संसार से उदासीन रहते हो इस बात को हम लोग नहीं जानते हैं॥३५॥

तथापि भगवान् आप में इन दोनों बातों के होने का विरोध नहीं है क्योंकि भगवान् तो असंख्यात गुण वाले हैं ईश्वर हैं उन के माहात्म्य को कोई नहीं जान सकता है तो नवीन नैयायिकादिकों के विकल्प वितर्क विचार दुष्प्रमाण कुतर्क शास्त्र आदिकों से जिन के अंतःकरण भ्रांत होगये हैं तिन आग्रह वालों के विवाद के अवसरसे दूर हैं समस्त माया प्रपंच से दूर हैं केवल स्वरूप हैं आत्ममाया को अपने में धारण किये हैं तिनको कौन सा अर्थ दुर्घट होसकता है क्योंकि आप तो कर्ता अकर्ता दोनों अभिमान स्वरूप से रहित हैं॥३६॥

ज्ञानी अज्ञानी दोनों को आप दोनों प्रकार दीखते हो जैसे कि रस्सी का टुकडा भ्रांत को सर्प सा दीखता है और कों रस्सी दीखता है॥३७॥

फिर विचार करने से वेही आप सब वस्तु में वस्तुस्वरूप हो सर्वेश्वर हो सब संसार के कारण के कारण हो सब जीवों के अंतर्यामी होने से सब बुद्धि आदि गुणों के प्रकाशक होने से जाने जाते हो एक आपही सब के शेषमें गिने जाते हो॥३८॥

अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरन्तरं निर्वृतमनसः कथमु ह वा एते मधुमथन ! पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपर्यावर्तः ॥ ३९ ॥

त्रिभुवनात्मभवन ! त्रिविक्रम ! त्रिनयन ! त्रिलोकमनोहरानुभाव ! तवैव विभूतयो दितिजदनुजादयश्चापि, तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दण्डं दण्डधर ! दधर्थ एवमेनमपि भगवन् ! जहि त्वाष्ट्रमुत यदि मन्यसे ॥ ४० ॥

अस्माकं तावकानां तव नतानां तत ! ततामह ! तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिङ्गविवरणेनात्मसात्कृतानामनुकम्पानुरञ्जितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया चान्तस्तापमनघार्हसि शमयितुम् ॥ ४१ ॥

अथ ह भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामन्तर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथादेशकालदेहावस्थानविशेषं तदुपादानोपलम्भकतयानुभवतः सर्वप्रत्ययसाक्षिण आकाशशरीरस्य साक्षात् परब्रह्मणः परमात्मनः कियानिह वा अर्थविशेषो विज्ञापनीयः स्याद्विस्फुलिङ्गादिभिरिव हिरण्यरेतसः ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतस्त्वद्भक्तिरेव परमपुरुषार्थ इत्याहुः । अथ हेत्यादिपर्यावर्त इत्यन्तेन । यस्मादेवम्भूतस्त्वं परमेश्वरः । अथ ह वाव अत एव हि । हे मधुमथन ! परमभागवता एते त्वत्पादाम्भोजानुसेवां कथं मुहुर्मुहुर्विसृजन्तीत्यन्वयः । हि यस्मात्स्वार्थे पुरुषार्थे कुशला निपुणाः । अत एव आत्मा त्वमेव प्रियः सुहृच्च येषां ते साधवो रागादिशून्याः । तत्र हेतुः । तव महिमैवामृतरससमुद्रस्तस्य विप्रुषा बिन्दुमात्रेण सकृदवलीढया आस्वादितया स्वमनसि निष्यन्दमानमतिशयेन स्रवदनिरन्तरं सुखं तेन विस्मारिता दृष्टश्रुतविषयाः सुखलेशाभासा येषां ते । अत एव भगवति त्वयि नितरां निरन्तरं निर्वृतं च मनो येषां ते । यत्र यस्यामनुसेवायां सत्याम् ॥ ३९ ॥

प्रस्तुतं विज्ञापयन्ति । त्रिभुवनेत्यादिना यावत्समाप्ति । त्रिभुवनमात्मा स्वरूपं भवनं च यस्य त्रिभुवनस्यात्मा भवनं चेति वा त्रयो विक्रमा यस्य त्रैलोक्याक्रमणेति तथा त्रयाणां लोकानां मनोहरोऽनुभावो यस्य । एवं चतुर्भिः सम्बोध्याहुः । तेषामनुपक्रमसमय उद्यमकालो न भवतीति मत्वा । हे दण्डधर ! पूर्वं यथा दण्डं दधर्थ धृतवानस्येवमेनं त्वाष्ट्रमपि जहि यदि मन्यसे हन्तुं यदीच्छसि ॥ ४० ॥

प्रथमं तावत्त्वदीयानामस्माकमन्तस्तापं शमयितुमर्हसि । तावकानामित्यत्र हेतुः । हे पितः ! हे पितामह ! तव चरणनलिनयुगलध्यानेनानुबद्धो हृदये निगडः शृङ्खला येषाम् । स्वलिङ्गविवरणेन निजमूर्तिप्रकटनेन स्वीकृतानाम् । केन । अनुकम्पयानुरञ्जितं सानुरागं च तद्विशदं रुचिरं शिशिरं च स्मितं तत्सहितेनावलोकेन तथानुकम्पयैव विगलितो मधुरो मुखरसः प्रियवाक् सैवामृतकला तया च ॥ ४१ ॥

किञ्च । अस्मदभिप्रायस्त्वया ज्ञायत एव किमत्रास्माभिर्विज्ञापनीयमित्याहुः । अथ हे भगवंस्तवास्माभिरिह कियानर्थविशेषो विज्ञापनीयः स्यादित्यन्वयः । यथा हिरण्यरेतसोऽग्नेस्तदंशभूतैर्विस्फुलिङ्गादिभिः प्रकाशो न क्रियते तथा त्वास्माभिः कार्यप्रकाशनं न कार्यमित्यर्थः । अत्र हेतुगर्भाणि विशेषणानि । अखिलजगतामुत्पत्त्यादिषु निमित्तायमानया दिव्यमायया विनोदो यस्य । अत एव सर्वजीवनिकायानामन्तर्हृदयेषु ब्रह्मस्वरूपेण प्रत्यगात्मान्तर्यामी तद्रूपेण च बहिरपि प्रधानरूपेण देशकालदेहावस्थानविशेषाननुलक्ष्यानुभवतः । कथम् । तेषामुपादानतयोपलम्भकतया च उपादानस्योपलम्भकतयेति वा । अत एव सर्वेषां प्रत्ययानां बुद्ध्यादीनामपि साक्षिणः । साक्षित्वे हेतुः । आकाशवन्निर्मलं शरीरं स्वरूपं यस्य । असङ्गत्वे हेतुद्वयम् । साक्षात्परब्रह्मणो निरुपाधेः परमात्मनः शुद्धसत्त्वमूर्तेश्च ॥ ४२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत एव भवाननिनन्माधारणोदारमहानियोगपरिशुद्धमनोग्राह्यो नित्यनिरुपाधिकापरिच्छिन्ननिजानन्दानुभवरूपो जगज्जन्मस्थितिसंहृतिलीलः सार्वज्ञ्यसत्यसङ्कल्पत्वाद्यपारमितगुणसागरोऽ-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निरतसाधारणविविधविचित्रशक्तिरशेषचिदचिच्छरीरकः सर्वेश्वरः सर्वसमाऽत एव त्वच्चरणारविन्दमधुरसास्वादनशीलास्त्वामविस्मरन्तोऽनन्तस्थिरफलरूपमुक्तिं प्राप्नुवन्तीत्याहुः । अथेत्यादिना पर्यावर्त्तत इत्यन्तेन गद्येन । अथ इवाव ननु भगवानत एव हीति वार्थः । हे मधुमथन ! परमभागवता एकान्तिनोऽनन्यप्रयोजनाः त्वत्पदाम्बुजसेवां कथमुद्धवा विसृजन्तीत्यन्वयः । हि यस्मात्ते स्वार्थकुशलाः पुरुषार्थनिष्कर्षकुशलाः अतः कथम्भूताः आत्मा त्वमेव प्रियः सुहृच्च येषां साधवः साध्नुवन्ति परेषामभीष्टमिति साधवः रागादिरहिताश्च । तत्र हेतुः । तव महिमैवामृतरससमुद्रस्तस्य विप्रुषा बिन्दुमात्रेण कथम्भूतया सकृदवलीढयास्वादितया स्वमनसि निष्यन्दमानमतिशयेन स्वविच्छिन्नं सन्ततं सुखं तेन विस्मारिताः दृष्टाः ऐहिकाः श्रुताः आमुष्मिकाश्च विषयाः सुखलेशाभासा येषां ते सर्वभूतानां प्रिये सुहृदि च सर्वान्तरात्मनि भगवति त्वयि निर्वृतं सुखितं मनो येषां ते चरणाम्बुजसेवां विसृजन्ति । यत्र त्वच्चरणाम्बुजसेवायां मुक्तिपर्यन्तायां सत्यां पुनरयं संसारो न पर्यावर्त्तते न परिवृत्तिं प्राप्नोति निवर्त्तत इत्यर्थः ॥ ३९ ॥

एवमभिष्टूयाथ प्रस्तुतं विज्ञापयन्ति । त्रिभुवनेत्यादिना । हे त्रिभुवनात्मभवन । त्रिभुवनस्यात्मान्तःप्रविश्य नियन्ता भवनमाश्रयश्च तस्य सम्बोधनम् । एवमग्रेऽपि । त्रयो विक्रमा यस्य सर्वान्तरात्मनस्तवाविदितमन्तरं नास्ति त्रिविक्रमस्य तवासाध्यमपि नास्तीति भावः । हे त्रिनयन ! त्रयश्चन्द्रसूर्याग्नयो नयनानि यस्य वाह्यमप्यविदितं नास्तीति भावः । त्रयाणां लोकानां मनोहरोऽनुभावो यस्यास्मदभिलषितमपि तव कर्त्तव्यमेवेति भावः । एवं सम्बोध्य विज्ञापयन्ति यद्यपि दितिजा दनुजाश्च तवैव विभूतयोऽतस्तेषां वधोपायचिन्तनमनुचितं तथापि तेषामनुपक्रमोऽयमित्यभ्युदयकालोऽयं न भवतीति मत्वा पूर्वं यथा स्वात्ममायया आत्मसङ्कल्पेनैव उपात्ताभिः सुरादिसंमिश्रितैर्जलचराकृतिभिः सुराद्यवतारैर्मत्स्यकूर्माद्यवतारैश्चेत्यर्थः । तत्र सुराकृतिरुपेन्द्रावतारः । नराकृतिः रामकृष्णादिः मृगाकृतिर्वराहादिः यथापराधमपराधानुसारेण दण्डं विरोधिनिरसनरूपं दमथं कृतवानसि । एवं हे भगवन् ! एनं त्वाष्ट्रं वृत्रमपि जहि यद्युपमन्यसे हन्तुं यदीच्छसि ॥ ४० ॥

एवं प्रस्तुतं विज्ञाप्य स्वानुग्राहकं तद्वाक्यं श्रोतुकामास्तं प्रार्थयन्ते । अस्माकमिति । हे तत ! रक्षक ! पितामहेति वार्थः । तावकानां त्वदीयानाम् । तत्र हेतुः । स्वलिङ्गविवरणेन आत्मीयविग्रहप्रकाशनेन आत्मसात्कृतानामात्मीयत्वेन परिगृहीतानां तव चरणयुगलध्यानेनैव अनुबद्धं वशीकृतं हृदयं तदेव निगलो येषां तेषां नः अनुकम्पात्मसाद्धियया कृपा तयानुरञ्जितं सानुरागं च ताद्विशदं रुचिरं च स्मितं तत्सहितेनावलोकनेन तथानुकम्पयैव निगलितो मधुरो मुखरसः प्रियवाक्सैवामृतकला तयान्तस्तापं शमयितुमर्हसि ॥ ४१ ॥

अपारमहिमशालिनस्तवास्माभिर्विज्ञाप्यमेतत्कियदित्याहुः । अथेत्यादिना हिरण्यरेतस इत्यन्तेन । अथ । ननु हे भगवन् ! अस्माभिर्विज्ञापनीयस्तव कियानर्थः प्रयोजनं स्यात् । तत्र दृष्टान्तः । विस्फुलिङ्गादिभिरिव हिरण्यरेतस इति । विस्फुलिङ्गादिभिरिवाग्नेः कार्यभूतैर्हिरण्यरेतसः कारणभूतस्याग्नेरिव त्वत्कार्यभूतैरस्माभिर्विज्ञापनीयः कारणभूतस्य तव कियानर्थ इत्यर्थः । कार्यकारणभावमात्रपरोऽयं दृष्टान्तः । उभयोरप्यचेतनत्वे विज्ञप्तितद्वक्तृत्वयोरसम्भवात् । यद्वा । अग्नेर्विस्फुलिङ्गादिभिः कियन्मात्रः प्रकाशः कियान् । तथास्माभिर्विज्ञाप्योऽर्थस्तव कियानित्यर्थः । यद्वास्माभिः कथम्भूतैरित्यत्र दृष्टान्तः । यथा विस्फुलिङ्गा अग्न्यायत्तसत्तास्थित्यादिमन्तस्तथा त्वदायत्तसत्तादिमद्भिरिति । कथम्भूतस्य । तवाखिलजगतामुत्पत्तिस्थितिलयेषु निमित्तायमाना विक्रयमाणा या दिव्या माया सैव विनोदः परिकरो यस्य सकलजीवसमूहानामन्तर्हृदये ब्रह्मप्रत्यगात्मस्वरूपेण प्रत्यग्जीव आत्मा शरीरं यस्य तत्स्वरूपेण ब्रह्मशब्दवाच्येन जीवशरीरकत्वेन स्वरूपेणेत्यर्थः । बहिः प्रधानं प्रकृतिः रूपं यस्य प्रधानशरीरकत्वेन "यस्यात्मा शरीरं यस्य पृथिवी शरीरम्" इति श्रुतेः । देशकालदेहावस्थानविशेषाननुलङ्घ्यानतिक्रम्यानुभवतः उपासकस्य । यद्वा । तेषामुपादानोपलम्भकतयानुभवत इत्यन्वयः । तेषां देशकालदेहादीनामुपादानं स्वीकारः एतस्मिन् देशे काले देहे एतत्सुखदुःखादिकमुपादेयमित्येवं रूपमुपादानं तस्योपलम्भकतया अभिज्ञापकतया निदानेन सह सर्वज्ञानजनकतयानुभवतः उपासकत इत्यर्थः । सर्वप्रत्ययसाक्षिणः सर्वजीवानां चित्तवृत्तिसाक्षिणः आकाशशरीरस्याकाशो दहराकाशः स एव शरीरं मूर्तिर्यस्य आसमन्तात्प्रकाशते प्रकाशयति वाकाशः स्वप्रकाशं सर्वस्य प्रकाशमपरिच्छिन्नं ज्ञानं तदेव शरीरमाकारो यस्येति साक्षात्परब्रह्मणः मुख्यवृत्त्या परब्रह्मशब्दवाच्यस्य परमात्मनः लोकत्रयमन्तःप्रविश्य धारकस्य ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं बहिर्मुखानाक्षिप्य तद्भक्तान् स्तुवन्ति । अथ हेति ॥ ३९-४१ ॥

अथ भगवन्निति सम्बोध्य ब्रह्मपरमात्मरूपत्वेऽपि भगवद्रूपत्वस्यैव श्रैष्ठ्यमभिप्रेतमतः प्रधानरूपेण चेति सर्वश्रेष्ठरूपेणेति भगवदाख्येन चेत्यर्थः । आकाशशरीरस्येति आ सर्वतः काशते विराजते यत्तत् परं ब्रह्मैव शरीरं यस्येत्यर्थः ॥ ४२ ॥ ४३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तदेवं बहिर्मुखानाक्षिप्य तद्भक्तान् स्तुवन्ति । अथ हेति । सकृदप्यवलीढया आस्वादितया जनितेन सुखेन प्रेमानन्देन एकान्तिनः त्वत्सेवैकतानमानसत्वात् देवर्ष्यादीन् अनुपासीनाः । तदपि देवर्ष्यादयस्तेषु बहुतरमेव प्रसीदन्तीत्याहुः । सर्वेषां भूतानां प्रिये सुहृदि सर्वेषामात्मनि चेति । त्वत्सेवायां सत्यां ते सर्वेऽपि सेविता एव बभूवुरिति भावः । स्वार्थकुशला इति । तेन त्वत्सेवात्यागिनः कुयोगिप्रभृतयः स्वार्थघातिन एवेति भावः ॥ ३९ ॥

त्वद्भक्तेषु मध्ये सकामत्वादयमेवातिनिकृष्टा इति द्योतयन्तः प्रस्तुतं विज्ञापयन्ति । त्रिभुवनमात्मभवनं यस्य त्वद्भक्ता देवमनुष्यादयो यत्र स्थित्वा त्वां सेवन्ते तदिदमसुराक्रान्तमभूदिति

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भावः । त्रिभिर्विक्रमैरुक्तैर्ल्लोकान् नयसीति । यद्वेव त्रिभुवनं वामनावतारे त्रिभिरेव पादैः प्रतिगृह्य बलेः सकाशाद्वामीयाद्यम्भूयं ददासीति भावः । त्रिलोकीत । सम्प्रत्यपि त्रिलोकस्या असत्वाद्युभावं पश्यन्तु । दैत्यं संहरति भावः । ननु परहिंसां समुद्दिश्य मां यजध्वे तत्राहुः । तथैव विसृजयो यद्यपि तदपि तेषामुपक्रमसमयो नायमिति ज्ञात्वा निवेदयाम इति भावः । तस्मात् हे दण्डधर ! पूर्वं यथा दण्डं दधर्थ एवमधुनापि उप समीपकाल एव ॥ ४० ॥

एवं स्तुत्वा कृपावलोकमधुरमाश्वासनवाग्मृतं प्रार्थयन्ते । अस्माकमिति । हे तत ! तात ! ततामह ! हे पितामह ! तव चरणनलिनयुगलमेव ध्यानानुबद्धहृदयस्य निगडः शृङ्खला येषां स्वचरणारविन्दात्मनोऽन्यमाकर्ष्टुं न शक्नुम इत्यर्थः । स्वलिङ्गविवरणेन निजमूर्त्तिप्रकटनेन विगलितः सुखसन्द्राक्तिःसृतः मधुरो मुखरसः प्रियवाक् स एवामृतकला तया च ॥ ४१ ॥

नन्व स्वयि क्रियानर्थविशेषो विज्ञापनीय इत्यन्वयः । प्रत्यगात्मा अन्तर्यामी तद्रूपेण बहिरपि विषयेषु प्रधानं माया इन्द्रियादिकं तद्रूपेण देशश्च कालश्च देहस्यावस्थानविशेषो बाल्यावयश्च तानतिक्रम्य अनुभवतः । तेषां देवादिजीवनिकायानाम् उपादानतया कारणत्वेन उपष्टम्भकतया प्रकाशकत्वेन च हृद्गतं विज्ञापनीयं जानत इत्यर्थः । आकाशवत्सूक्ष्मैर्वास्तं शरीरं यस्य हिरण्यरेतसो वह्नेर्विस्फुलिङ्गादिभिस्तत्कणभूतैरिवास्माभिः ॥ ४२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ "कारणं तु श्रेयम्" इति श्रुतिमुपबृंहयन्तः संसारनिवृत्तये त्वद्भजनमेव कर्त्तव्यमिति सूचयितुं विज्ञापनामाहुः । अथेति । हे मधुमथन ! तव महिमामृतरससमुद्रस्य विप्रुषा बिन्दुना सकृदवलीढया एकवारमप्यास्वादितया स्वमनसि नित्यस्यन्दमानेन प्रवहमानेन अनवरते न अज्ञानेन सुखेन विस्मृताः दृष्टश्रुता ऐहिकामुष्मिका विषयसुखलेशाभासा यैस्ते भगवति नितरां निरन्तरं निवृतं मनो येषां ते । अत एव स्वार्थकुशलाः आत्मा परमेश्वरो भवान् प्रियः सुहृच्च येषां ते । त्वच्चरणाम्बुजानुसेवां कथं विसृजन्ति नैव विसृजन्तीत्यर्थः । यत्र सेवायां सत्यामयं संसारपर्य्यावर्त्तः जन्ममरणप्रवाहः पुनर्न भवति ॥ ३९ ॥

वचनवोर्थ्यैनैव त्वद्भक्तेषु निकृष्टा इति सूचयन्तः प्रकृतं विज्ञापयन्ति । त्रिभुवनेत्यादिना हे त्रिभुवन ! विराड्रूप ! आत्मनैव स्रैव भवनं यस्य हे तथाभूत ! त्रिषु कालेषु विविधः क्रमः पराक्रमो यस्य हे तथाभूत ! कालानवच्छिन्नपराक्रमः त्रिषु कालेषु अनादरोऽनुभावो यस्य हे कालानवच्छिन्नानुभाव ! यद्यपि दितिजादयोऽपि तवैव विभूतयः तथापि यतस्तदुपक्रमस्य त्रैलोक्यराज्योद्यमस्यायं कालो नास्ति इति हेतोः । हे दण्डधर ! यथा स्वकीयेषु भक्तेषु या आत्मनस्तव माया कृपा सुरनराद्याकृतिभिर्यथापराधं दण्डं स्वभक्तप्रतिकूलेषु धृतवानसि एवमेनं त्वाष्ट्रमपि यदि उत मन्यसे हन्तुमिच्छसि तर्हि जहि ॥ ४० ॥

अतिदैन्ययुक्ताः शीघ्रं कृपां प्रार्थयन्ते । हे तत ! पितः ! हे ततामह ! तव चरणनलिनयुगलध्यानमेवानुबद्धो हृदये निगडो येषां तेषाम् । स्वलिङ्गविवरणेन स्वमङ्गलमूर्त्याविष्कारेण स्वचारुमसात्कृतानामनुकम्पया रञ्जितो विशदो विपुलो रुचिरो यः स्मितावलोकः तेन विगलितया मधुरया मुखामृतरसकलया चान्तस्तापं हे अनघ ! प्रत्युपकारादिवासनारूपाघशून्य ! शमयितुमर्हसि ॥ ४१ ॥

सर्वात्मनि सर्वज्ञे त्वयि अस्माभिः किं विज्ञापनीयमिति सदृष्टान्तमाहुः । अथेति । हे भगवन् ! यथा हिरण्यरेतसः अग्नेस्तदंशभूतैर्विस्फुलिङ्गादिभिः प्रकाशो न क्रियते तथास्माभिरंशभूतैरिह तव क्रियानर्थविशेषो विज्ञापनीय इत्यन्वयः । नत्र हेतुगर्भाणि विशेषणानि अखिलजगतामनन्तकोटिब्रह्माण्डानामुत्पत्त्यादिषु निमित्तमानया परमकारणेन त्वया महदादिभावं नीयमानया विश्वमायया विनोदो यस्य सकलाः सपरिकराः जीवनिकाया जीवसमूहा येषु तेषामखिलानां जगतामनन्तकोटिब्रह्माण्डानामन्तर्हृदयेषु बहिरपि ब्रह्मप्रत्यगात्मरूपेण ब्रह्म च तत्पदार्थलक्षणां प्रत्यगात्मस्वरूपं च पदार्थलक्षणं तयोः समाहारद्वन्द्वैक्यम् । ब्रह्मरूपेण स्वांशभूतजीवरूपेण स्वशक्तिरूपेण च तेषां सकलजीवनिकायानामुपादानतया उपलम्भकता प्रकाशकता तया च देशादिकमनतिक्रम्येति यथादेशकालदेहावस्थानविशेषमनुभवतः अतएव सर्वप्रत्ययसाक्षिणः आकाशशरीरमलमप्राकृतं यस्य शरीरं तस्य ॥ ४२ ॥

———

भाषा टीका

हे मधुमथन ! इसी हेतु से जो आपकी महिमा रूपी अमृत रस का समुद्र है उसके एक बिन्दु मात्र से एक बारभी आस्वादन करी भक्ति से हुआ जो अपने मन में अचल निरन्तर सुख तिस से देखे सुने सब विषय सुखों के लेशमात्र भूल जाते हैं जिन के ऐसे एकान्तिपरमभागवतजन सब भूतों के सुहृद सर्वात्मा भगवान् में अतिशय से निरन्तर लगे हुये मन में सुखी होकर यदि वे स्वार्थ में चतुर होवें तो अपने सुहृद आपकी चरण कमल की सेवा को क्यों छोड़ेंगे जिस से कि फिर वह संसार का भ्रमण नहीं होता है ॥ ३९ ॥

हे भगवन् ! तीनों भुवन आपके स्थान हैं तीनों लोक में आप काही प्रभाव है तीनों लोकों में आपकी लीला है दनुज दैत्य ए सब आप की ही विभूति हैं तथापि यह उनके उपक्रमका काल नहीं है इसलिये अपनी माया से देवता मनुष्य मृग नृसिंह हयग्रीव जलचर आकृतियों धारण करके अपराधके अनुरूप दण्ड देते हो तिसी प्रकार इस वृत्रासुर को भी मारो यदि आपकी इच्छा होतो कृपा कीजिये॥४०॥

हे तात ! हे पितामह ! हे अनघ ! हम आपके दास हैं आप के चरणोंमें नम्र हैं आपके चरण कमल युगल में ध्यान से हमारी शृङ्खला बंधी है आपने अपनी मूर्ति का दर्शन कराकर हम लोगों को अपना बनाया है सो आपके कृपा अनुराग युक्त अति निर्मल अति सुन्दर अति शीतल तारा युक्त नेत्रों के अवलोकन से तथा मन्दहास्य से तथा मुख से

अत एव स्वयं तदुपकल्पयास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिन-संसारपरिश्रमोपशमनीमुपसृतानां वयं यत्कामेनोपसादिताः ॥ ४३ ॥

अथो ईश ! जहि त्वाष्ट्रं ग्रसन्तं भुवनत्रयम् ।
ग्रस्तानि येन नः कृष्ण ! तेजांस्यस्त्रायुधानि च ॥ ४४ ॥

हंसाय दह्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय ।
सत्सङ्ग्रहाय भवपान्थनिजाश्रमाप्तावन्ते परीष्टगतये हरये नमस्ते ॥ ४५ ॥

श्रीशुक उवाच ।

अथैवमीडितो राजन् ! सादरं त्रिदशैर्हरिः ।
स्वमुपस्थानमाकर्ण्य प्राह तानभिनन्दितः ॥ ४६ ॥

श्रीभगवानुवाच ।

प्रीतोऽहं वः सुरश्रेष्ठाः ! मदुपस्थानविद्यया ।
आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ॥ ४७ ॥
किं दुरापं मयि प्रीते तथापि विबुधर्षभाः ! ।
मय्येकान्तमतिर्नान्यन्मत्तो वाञ्छति तत्त्ववित् ॥ ४८ ॥
न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् ।
तस्य तानिच्छतो यच्छेद्यदि सोऽपि तथाविधः ॥ ४९ ॥
स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि ।
न राति रोगिणोऽपथ्यं वाञ्छतो हि भिषक्तमः ॥ ५० ॥

भाषा टीका ।

।विगलित जो मधुर वचन अमृत तिसके लेश से हम लोगों के भीतर का जो वृत्रासुर के भयरूप ताप तिसको आप शान्त करने के योग्य हो ॥ ४१ ॥

अब, हम लोग आपको किसबात का विज्ञापन करसके हैं क्योंकि सम्पूर्ण संसार की उत्पत्ति स्थिति प्रलय की निमित्त जो दिव्यमाया सो आपका खेलमात्र है और आप सब जीवों के हृदय के भीतर ब्रह्म रूपसे अन्तर्यामी रूप से रहते हो बाहिर मे प्रधानरूप से रहते हो इसीसे देशकाल देह तिनके विशेषोंके उनके उपादान कारण होने उनके उपलम्भक होनेसे आप अनुभव करते हो। सबकी बुद्धिके साक्षी हो आकाशादि सब तत्त्व आपके शरीर हैं आप साक्षात् परब्रह्म हो परमात्मा हो सो जैसे अग्नि के आगे चिनगारी कुछ गिनतीमें नहीं आती हैं तैसे हम आपसे कुछ जना नहीं सकते हैं ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एव सर्वज्ञत्वादेव वयं यत्कामेन यस्य कार्यस्य कामेनोपसादिताः प्रापितास्तदस्माकं कार्यं स्वयमेवोपकल्प्य सम्पादयेति । चरणमेव शतपलाशं कमलं तस्य छायां विविधैर्वृजिनैर्यः संसारपरिश्रमस्तस्योपशमकरीमुपसृतानां प्राप्तानाम् ॥ ४३ ॥

पूर्वं भक्तेरुत्कर्षोक्त्या तत्कामशङ्का माभूदिति स्वकामं कथयन्ति । अथोऽनन्तरमेव ॥ ४४ ॥

शीघ्रं तद्वधाय पुनः प्रणमन्ति । हंसाय शुद्धाय । हरये आर्तिहराय ते नमः । शुद्धत्वे हेतवः । दह्रनिलयाय हृदयाकाशनिकेताय । निरीक्षकाय । बुद्ध्यादिसाक्षिणे । कृष्णाय सदानन्दरूपाय ।

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥

इति निरुक्तेः । आर्तिहरत्वे हेतवः । मृष्टं रुचिकरं यशो यस्य । निरुपक्रमाय आदिशून्याय । सद्भिः सङ्गृह्यत इति तथा तस्मै । भवपान्था भवरूपे पथि वर्तमानास्तस्य जनस्य निजाश्रमाप्तौ स्वशरणप्राप्तौ सत्यां संसारस्यान्ते परीष्टा सर्वतः पूजिता उत्तमा गतिः फलं यस्तस्मै ॥ ४५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अभिनन्दितः सन्तोषितः ॥ ४६ ॥

मदीयमुपस्थानं स्तोत्रं तस्माद्धितया विद्यया ज्ञानेन । आत्मन ऐश्वर्यमसंसारित्वं तस्य स्मृतिर्धैर्या । न हि विरोध उभयमित्यादिना । कर्तृत्वभोक्तृत्वादेर्मायिकत्वोक्तेः भक्तिश्च यथा भवति ॥४७॥

अथ ह भगवन्नित्यादिना भक्तेः सर्वोत्कर्षोक्तेर्भक्तमभिनन्दन्ति । किमिति ॥ ४८ ॥

यदुक्तं देवैः स्वयं तदुपकल्पयास्माकमित्यादि तत्सम्पादनं कृपालोर्ममानुचितमित्याशयेनाह । न वेदेति द्वाभ्याम् । गुणेषु विषयेषु तत्त्वदर्शी । तान् विषयान् । तथाविधोऽज्ञ एव ॥ ४९ ॥

कर्म न वक्ति । प्रवृत्तिमार्गं न वक्ति हि । अपथ्यं यथा न याति न ददाति भिषक्तमः सद्वैद्यः ॥ ५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत एवं वयमग्नेर्विस्फुलिङ्गा इव त्वदायत्तसत्तादिमन्तः अत एवास्माकं तदुपकल्पय तत्कार्यमुपकल्पय सम्पादय किन्तत् यत्कामेन यत्प्रयोजनकामेन वयमुपसन्ना इति । ननु दिविषदुत्तमानामपि महदायत्तसत्तादिमत्त्वात्किं विधेयं त्वत्कार्यं साधयेत्युच्यते इत्याशङ्कां निराकुर्वन्तः स्वात्मनो विशिंषन्ति । परमगुरुं भवतश्छायामेव शतपत्राशे कुशेशये तयोश्छायामुपसृतानामाश्रितानां प्रपन्नानामिति भावः । कथम्भूतां छायां विविधैर्वृजिनैः पापैः संसारस्य परिश्रमः तस्य उपशमनीम् उपशमयत्यपनयतीत्युपशमनी ताम् ॥४३॥

तदुपकल्पयेत्यनेनदेव विशदयन्ति । अथो इति । अतः हे ईश ! भुवनत्रयं ग्रसन्तं त्वाष्ट्रं वृत्रं जहि येन त्वाष्ट्रेण हे कृष्ण ! नोऽस्माकं तेजांस्यस्त्रायुधानि च ग्रस्तानि ॥ ४४ ॥

तद्वधाय पुनः प्रणमन्ति । हंसायेति । हंसाय निरस्तनिखिलदोषाय प्रणतार्तिहरणे वा दहं हृदयपुण्डरीकं तदेव निलयं यस्य तस्मै अस्मदीयदुःखाभिज्ञायेति भावः । निरीक्षकाय चित्तवृत्तिसाक्षिणे न कापट्यमस्माभिर्विज्ञापितमिति भावः । कृष्णाय भारापहरणेन भूमेः सुखकराय मृष्टयशसे विशुद्धकीर्तये प्रपन्नार्तिहरणेन न तवापकीर्तिरपि तु निष्कलङ्का कीर्तिरेवेति भावः । निरुपक्रमः विगतः उपक्रमः अस्मदुद्योगो यस्मात्तस्मै त्वत्प्रपत्तिव्यतिरेकेण नास्माकमुद्योगोऽस्तीति भावः । सतां त्वच्छासनानुवर्तिनां सङ्ग्रहाय स्वीयत्वेनानुग्राहकाय भवपान्थाः संसाराध्वगास्तेषां निजाश्रमाय स्वगृहभूताय यथा "पान्थः स्वशरण्यं यथा" इत्युक्तरीत्या स्वगृहं प्राप्य सुखयति तथा भवपान्थानां निजाश्रमाय न केवलमैहिकसुखप्रदाय अपि त्वामुष्मिकसुखप्रदाय चेति भावः । शश्वत्सदा गरिष्ठा गतिः फलं तद्रूपाय निरतिशयपुरुषार्थरूपाय इत्थं तुभ्यं नमः प्रपन्नानामाध्यात्मिकाधिदैविकाधिभौतिकादिदुःखहरणशीलाय तुभ्यं नमः ॥ ४५ ॥

एवं देवैः संस्तुतो विज्ञापितश्च भगवानुवाचेत्याह मुनिः । हे राजन् ! त्रिदशैर्देवैः सादरमेवमीडितः स्तुतो भगवान्स्वं स्वकीयमुपस्थानं स्तोत्रमाकर्ण्याभिनन्दितः तानुवाचेत्याह ॥ ४६ ॥

उक्तिमेवाह । प्रीत इत्यादिना यावदध्यायपरिसमाप्ति । हे सुरश्रेष्ठाः ! मदुपस्थानविद्यया स्तुत्यात्मिकया विद्ययाहं वो युष्मभ्यं प्रीतः विद्यां विशिनष्टि । यया अनया विद्यया पुंसां तावन्मद्भक्तिस्ततः आत्मैश्वर्यस्मृतिर्देहातिरिक्तात्मनोऽपहतपाप्मत्वादिगुणाष्टकरूपात्मैश्वर्यस्मृतिश्च भवति ॥ ४७ ॥

यद्यपि मयि प्रीते सति हे विबुधर्षभाः ! किं दुरापं किं दुर्लभं न किमपि सर्वमपि वाञ्छितं सुलभमेवेति भावः । तथापि मदेकान्तमतिरनन्यप्रयोजनधिषणा मतिर्यस्य । अत एव तत्त्वविन्मत्तोऽन्यत्किञ्चिदपि न वाञ्छति मां प्रसाद्य प्रतिपक्षजयकामा यूयमतद्विदो मन्दबुद्धय इति भावः ॥ ४८ ॥

एतदेवोपपादयति । नेति । गुणेषु शब्दादिविषयेषु वस्तुतः पुरुषार्थरहित एव कृपणाः इन्द्रियवश्याः पुमांसः आत्मनः स्वस्य श्रेयो निरतिशयपुरुषार्थरूपं न वेद एवं तान् शब्दादीनिच्छतः तस्य पुंसः तान् शब्दादीनीशोऽपि निरतिशयपुरुषार्थप्रदानसमर्थोऽपि यः पुमान् यच्छेद्दद्याद्यदि सोऽपि तादृश एव कृपणः कृपणेन श्रेयोऽनभिज्ञेन क्षुद्रं पुरुषार्थं प्रार्थितेऽपि स्वयं परमपुरुषार्थप्रदानसमर्थोऽपि क्षुद्रफलं प्रयच्छन्कृपण एवेति भावः ॥ ४९ ॥

एतदेव दृष्टान्तमुखेन विशदयति । स्वयमिति । निःश्रेयसं निरतिशयपुरुषार्थं तत्साधनं च विद्वान् स्वयमनभिज्ञाय परमपुरुषार्थतत्साधनज्ञानरहिताय केवलकर्मासक्तिदुःखिताय कर्मैव कुर्विति न वक्ति न बोधयति तथाहि भिषक्श्रेष्ठः वाञ्छतः कामयमानस्यापि रोगिणः अपथ्यं न दाति न ददाति ॥ ५०

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हंसवत्सारग्राहित्वे हंसनिलयाय हृदयाकाशनिवासाय "तद्यामेव सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम्" इति श्रुतेः निरीक्षकाय सकलकर्मसाक्षिणे कृष्णाय "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः" इत्यतः सन्ततपूर्णानन्दाय कृतौ पूर्णौ यशःश्लाघ्यौ यस्य स तथा तस्मै निरुपक्रमाय अनाजनकप्रयत्नस्वरेण जगत्कर्त्रे "निरुपक्रमो हरिर्नित्यमप्रयत्नो ह्युपक्रमेत्" इत्यतः सतां संग्रहो यस्य स तथा तस्मै भवपान्थाः संसारमार्गे वर्तमानाः तेषां निजाश्रयाय "निजमात्मीयनिश्रयः" इत्यभिधानं शश्वदेकप्रकारा वरिष्ठा धर्मादिरत्युत्तमा गतिर्मुक्तिलक्षणा यस्मात्स तथा तस्मै इत्थं आपत्परिहरणशीलाय ॥ ४५ ॥

स्वमुपस्थानं स्वाश्रयां स्तुतिम् ॥ ४६ ॥

मदुपस्थानलक्षणया विद्यया पुंसामात्मैश्वर्यस्मृतिर्मोहात्स्मृतिः मयि भक्तिश्च भवतीत्यन्वयः ॥ ४७ ॥

प्रीते प्रत्यक्षे तथापि फलप्राप्त्यन्तरायसेऽपि भक्तिज्ञानप्रसादेभ्योऽन्यत् । अत एतदुरारस्वविदिति । अनेनाधर्माधिकारिषु सुखाभिरूपप्राप्तिर्योग्य इति ज्ञायते ॥ ४८ ॥

तत्त्वविदन्यथाकामाभिलाषकस्य किं फलमिति तत्राह । नेति । यः कृपणः कामानभिलपन् स्वस्य गोप्तृणां श्रेयो न वेद । कुतः । गुणात्मनस्तस्य स्वर्गादिगुणानां शब्दादिविषयाणां वस्तुतः अप्रतिहतत्वदर्शी नित्यत्वज्ञानात्मनः । अद्वितीयेच्छोर्ज्ञानाज्ञकस्य तस्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तान् कामान् यच्छेद् दद्यां त्वां भजमानस्य तथाविधफलदातृत्वं तव कथं युक्तमिति तत्राह । यदीति । यदि स मां भजमानोऽपि तथाविधः नश्वरफलस्वीकारयोग्यः उत्तमाधिकारी न स्यात्तर्हि तस्मै ऐहिकान् कामान् दद्यां यश्च श्रेयोविद्योऽत्युत्तमो न स्यात् तस्मै स्वर्गादिकामान् दद्यामिति विशेषमभिप्रेत्याचार्यैरुत्तमो न भवति चेदिति व्याख्यातम् । यच्छेदिति पाठेऽयमर्थः । त्वद्भक्तादन्यः कथमिति तत्राह । नेति । गुणत्रयस्तुच्छ त्रिगुणाजन्यशरीरादेर्वस्तुत्वज्ञानी दीनोऽयं मुग्धः श्रेयो मोक्षाख्यं न वेद तद्विज्ञानवद्वाञ्छया तस्य सेवकस्य सेव्योऽपि तथाविधोऽप्युत्तमो न भवति चेत्तर्हि तादृशान् कामान् यच्छेद्दद्यात् मत्प्रेरित इति शेषः ॥ ४९ ॥

कथमत्युत्तमो न भवतीति तत्राह । स्वयमिति । विद्वांस्तत्वयोग्यमुक्तिविशेषं जानन्नत्युत्तमः स्वयमज्ञाय अज्ञानिने पुंसे कर्मभिर्निःश्रेयसं न वक्ति नोपदिशति किं तु "तमेवं विद्वान्"इति श्रुतेः । ज्ञानेनैव यथा पथ्यमेव अभिविश्वाति ददाति नापथ्यमित्यत्रापि भिषक् भिषगपि रोगं निरस्यति आप्याययति प्राणमिति वा वैद्यः पानीयं वाञ्छतो ज्वरादिरोगार्तस्यापथ्यं पानीयादिद्रव्यं न राति न ददाति तस्मादनीदृश उत्तमो न भवतीत्यर्थः । ननु कृपणाः कर्मणा सिद्धिकामित्वाद्धि नात्युत्तम इत्यभिप्रेतं तत्कथमुच्यते ॥

लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि ।
यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ॥

इत्यादौ भगवतैव कर्मविधानादत्राह । स्वयमिति । मादृशो विद्वान् स्वयं केवलैः कर्मभिरज्ञाय अज्ञानिने निःश्रेयसं न वदति किं तु ज्ञानद्वारा शुद्धान्तःकरणाय यथा भिषगपि केवलफलकामिन एव तादृशफलं दीयते अतः साकल्यफलस्वीकारयोग्य इति नियम्यते तर्हि किमर्थं तस्मै तादृशमपि दीयत इति चेन्न । युष्मद्भक्तत्वेन फलदानस्य युष्मादृष्टत्वात्तदेव मम प्रियं युष्मत्कामाभावे तत्फलं न दद्यां भवतां च मत्प्रियकामित्वादित्याचार्यैरुक्तम् । युष्मत्कामो मत्प्रिय एवान्यथा न दद्यामिति भावः ॥

विष्णोः प्रियं कामयन्ति देवा नैवाप्रियं क्वचित् ।
यद्यप्रियं कामयन्ति न रातीशो हितो यतः ।

इति । ननु यदि पुरुषेण निष्कामेण भवितव्यं तर्ह्यस्मत्कामो निष्फलो भवतोऽनिष्टत्वादिति शङ्का माभूत् त्वाष्ट्रहननस्य ममेष्टत्वान्मादृशमेव युष्माभिः कामितमस्यतो वाचार्यैः युष्मत्काम इत्याद्युक्तम् ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उत्कण्ठया पुनः स्फुटमेव निवेदयन्ति । अथो इति ॥४४-४६॥

आत्मा जीवश्च ईश्वरश्च आत्मेश्वरौ । तयोर्भावः आत्मैश्वर्यम् उभयपदवृद्धिः । तस्य स्मृतिर्विवेकः यस्याः अथ तत्र भवान् किं देववत्स्वदित्यादि ॥ ४७-४९ ॥

स्वयमिति । तस्मान्न बुद्धिभेदं जनयेदित्यादिकम् । अस्तनथोपदेष्टृत्वमयं क्रम ॥ ५० ॥ ५१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अत एव सर्वज्ञत्वादेव वयं यत्कामेन यस्य कामनया चरणपद्मच्छायामुपसादिताः स्वयं त्वयैव प्रापिताः । तत्कार्यं स्वयमेव उपकल्पय सम्पादय । छायां कीदृशीमुपसृतानां भक्तानां परिश्रमोपशमनीम् ॥ ४३ ॥

सर्वत्रैव स्तुतिषु शुद्धभक्तेरुत्कर्षकथनात् कदाचिद्भक्तिमेव ददाति भगवांस्तथा सति प्रेमाश्रुकम्पादिमन्तो वयं स्वर्गादिसुखेषु वैमुख्योदयात् पृथिव्यामेव पर्यटिष्यामोऽस्मद्वैरिणा एवामरावतीमध्यास्य विराजिष्यन्त इत्याशङ्कया गाम्भीर्याभावेन च स्पष्टमेव काममाहुः । अथो इति ॥ ४४ ॥

तव चरणयोः प्रणामः शीघ्रं जहीति वैकल्येन श्रीकृष्णरूपिणं तं सर्वेमेव स्वाभिलषितमभिव्यञ्जयन्तः प्रणमन्ति । हंसाय सारासारौ विमृश्य सारग्राहिणे । दहरनिलयाय अस्मद्धृदयसरोनिकेताय । निरीक्षकाय तत्रास्मद्धृदयेषु प्रस्तुतं काममपि निरीक्षमाणाय । ततश्च मृष्टयशसे । अस्मन्महाविपत्त्रायकत्वलक्षणम् यशस्ते लोका गायन्तीति भावः । निरुपक्रमाय अस्मन्निवेदितकृत्येपूपक्रमं विनैव तत्तत्सम्पादनसमर्थाय । किं तु सतां भक्तानामेव प्रयासेनापि सङ्ग्रहो न चान्यवस्तूनां यस्य तस्मै "नमोऽकिञ्चनवित्ताय"इतिवचनात् । किञ्च । भववर्त्मनि ये पान्थास्तेषामस्मदादिदुर्जीवानां शुद्धभक्तिरहितानामपि निजस्याश्रमस्य प्राप्तौ अविद्यां तीर्त्वा स्वानन्दाधिगमे मतीत्यर्थः । संसारस्य अन्ते परि सर्वतो भावेनेष्टा वाञ्छिता गतिः सायुज्यं सालोक्यं दास्यादिप्रेमा वा यतस्तस्मै ॥ ४५ ॥ ४६ ॥

ममोपस्थानं स्तोत्रमेव विधा तया । आत्मैश्वर्येति । ये मामनया स्तुवन्ति तेषां मदैश्वर्यस्मृतिर्भवेत् । आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि हरसि पासीत्यत्रैश्वर्योक्तेः ॥४७॥

अहो दौर्भाग्यं मूर्खता च युष्माकमनया विद्यया मां स्तुत्वापि भक्तिं न प्रार्थयध्वे इत्याह । किमिति ॥ ४८ ॥

यद्यपि यूयं मूर्खा विषयाभिलाषवन्तः स्वभद्राभद्रं न जानीथ तदप्यहन्तु विज्ञस्तान् कथं युष्मभ्यं ददामि । न हि माता सुतेभ्यः स्वहस्तेन विषं ददातीत्याह । नेति । गुणान् विषयानेव वस्तुपुरुषार्थं पश्यतीति सः । आत्मनः श्रेयो न वेद । तस्य तस्मै तानेव यो विज्ञोऽपि यच्छेत् सोऽपि अज्ञ एव ॥ ४९ ॥

कर्म न वक्ति । प्रवृत्तिमार्गं नोपदिशति अपथ्यं यथा न राति न ददाति भिषक्तमः सद्वैद्यः ॥ ५० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतो वयं यत्कामेन यस्य प्रयोजनस्य सङ्कल्पेन तव चरणशतपत्रपलाशच्छायामुपसादिताः प्रापिताः तदस्माकमुपसृतानां शरणागतानां स्वयमुपकल्पय सम्पादय विविधैर्वृजिनैर्यः संसारपरिश्रमस्तस्य शमनीमिति विशेषणेन विगस्माकं कर्म प्रति येन मुक्तिदां तव चरणकमलपत्रच्छायां तुच्छप्रयोजनकृते नीता वयमिति द्योत्यते ॥ ४३ ॥ ४४ ॥

दहो हृदयाकाशः निलयो यस्य तस्मै । हृदिस्थिताय निरीक्षकाय सर्वसाक्षिणे निर्गतः उपक्रम उत्पत्तिर्यस्मात्तस्मै । नित्यसिद्धाय

मघवन् ! यात भद्रं वो दध्यञ्चमृषिसत्तमम् ।
विद्याव्रततपःसारं गात्रं याचत मा चिरम् ॥ ५१ ॥
स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम् ।
यद्वा अश्वशिरो नाम तयोरमरतां व्यधात् ॥ ५२ ॥
(१) दध्यङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं मदात्मकम् ।
विश्वरूपाय यत् प्रादात्त्वष्टा यत्त्वमधास्ततः ॥ ५३ ॥
युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति ।
ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः ॥ ५४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सद्भिः साधुभिः ऋषिभिर्मन्त्रैर्वा सङ्कल्पते इति तथा तस्मै भवे जन्ममरणप्रवाहलक्षणे संसारे पथि वर्तमानो भवपान्थस्तस्य जन्ममरणप्रवाहपतितस्यान्ते संसारनिवृत्तिकाले निजाश्रमाणां निजधामप्राप्तौ परा इष्टा प्रीतिः इष्टा गम्यते अनया इति गतिस्तयैः स्वधामप्रापक इत्यर्थः तस्मै ॥ ४५ ॥

त्रिदशैः सादरमीडितः स्तुतः नन्दितः सम्भाषितश्च समुपस्थान स्तोत्रम् ॥ ४६ ॥

मदुपस्थानविद्यया मदीयस्तुतिरूपया आत्मैश्वर्यस्मृतिर्मदीयैश्वर्यज्ञानम् ॥ ४७ ॥

मयि प्रसन्ने कोऽपि पुरुषार्थो दुर्लभो नास्ति तथापि मद्भक्तेन भगवद्भजनमेव प्रार्थनीयमहमपि मद्भक्तेभ्यः प्राकृतान् विषयान् दातुं नोत्सहे तथापि भवद्भिः स्वेष्टसिद्धये इदमनुष्ठेयमित्याह । किं दुरापमिति चतुर्भिः ॥ ४८ ॥

गुणेषु वस्तुदृक् दृष्टिः तान् गुणानिच्छतः तानेव यच्छेत् यदि तर्हि सोऽपि गुणादानसमर्थोऽपि तथाविधोऽविवेकी ॥ ४९ ॥

निःश्रेयसम् । निवृत्तिमार्गम् । कर्म । प्रवृत्तिमार्गम् ॥ ५० ॥

भाषा टीका ।

इससे भगवान् परमगुरु आपके चरणकमलकी छाया जो कि नानाप्रकारके दुःख संसार परिभ्रमको नाशकरने वाली है तिसके हम शरण आये हैं सो जो हमारा मनोरथ है तिसको आप पूरा करो ॥ ४३ ॥

हे ईश्वर ! इससे आप इस वृत्रासुरको मारो जिसने कि तीनों भुवनको तथा हमारे तेजों को अस्त्र आयुधों को ग्रस-लिया है ॥ ४४ ॥

हंसस्वरूप श्रीहरि हृदयमे निवास करनेवाले बुद्ध्यादि के साक्षी निर्मल यशवाले श्रीकृष्ण आदिअन्तरहित सत्पुरुषों के सङ्ग्राहक हो तिन आपके अर्थ नमस्कार है ॥ ४५ ॥

श्रीशुकदेवजी बोले हे राजन् ! इस प्रकारसे जब देवतों ने भगवान्की स्तुति की तब अपनी स्तुतिको सुनकर हर्षित होकर उनसे बोले ॥ ४६ ॥

श्रीभगवान् बोले हे देवश्रेष्ठ हो ! मेरी स्तुतिरूपविद्यास से मै तुम पर प्रसन्न हुआ हूं जि स्तुति से कि मनुष्यों को हमारा ऐश्वर्य हमारी स्मृतिः अथावा मेरेमे भक्तिभी होती हैं ॥ ४७ ॥

हे देवता ! हो मेरे प्रसन्न होनेपर कोई पदार्थभी दुर्लभ नहीं है तो भी मेरेमे एकान्त भक्ति करने वाला पुरुष मेरे से और कुछ लेने नहीं चाहता है ॥ ४८ ॥

गुणोंमे यथार्थबुद्धि करने वाला पुरुष अपने कल्याण-को नहीं जानता है यदि जो वह चाहता है तिसीको यदि प्रभु देवे सो भी अज्ञानी ही होगा ॥ ४९ ॥

जो स्वामी स्वयं कल्याणमार्ग को जानता है सो अ-ज्ञानी सेवकको बन्ध कर्मको नहीं सिखावेगा जैसे कि उत्तम वैद्य रोगिके इच्छाकरने पर भी कुपथ्य पदार्थ नहीं देता है ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं तत्त्वकथनेनानौचित्यं परिहृत्य तदभिप्रायमनुसरन्नाह । मघवन्निति । विद्यया व्रतैस्तपसा च सारं दृढं गात्रं शरीरं याचत याचध्वम् ॥ ५१ ॥

तत्र तदीयविद्यातिशयमाह । स वा इति द्वाभ्याम् । एवं ह्यत्र प्रसिद्धा कथा ।

निशम्याथर्वणं दक्षं प्रवर्ग्यब्रह्मविद्ययोः ।
दध्यञ्चं समुपागम्य तमूचतुरथाश्विनौ ॥
भगवन् ! देहि नौ विद्यामिति श्रुत्वा स चाब्रवीत् ।
कर्मण्यवस्थितोऽद्याहं पश्चाद्वक्ष्यामि गच्छतम् ॥
तयोर्निर्गतयोरेत्य शक्र आगत्य तं मुनिम् ।
उवाच भिषजोर्विद्यां मा वादीरश्विनोर्मुने ! ॥
यदि मद्वाक्यमुल्लङ्घ्य ब्रवीषि सहसैव ते ।
शिरश्छिन्द्यां न सन्देह इत्युक्त्वा स ययौ हरिः ॥
इन्द्रे गते तथाऽभ्येत्य नासत्याविदमूचतुः ।
तन्मुखादिन्द्रगदितं श्रुत्वा तावूचतुः पुनः ॥

---

(१) कृत्स्नमाथर्वणमिति श्रीविजयध्वजतीर्थपाठः ।

येन वृत्रशिरो हर्ता मत्तेजउपबृंहितः ।
तस्मिन् विनिहते यूयं तेजोऽस्त्रायुधसम्पदः ।
भूयः प्राप्स्यथ भद्रं वो न हिंसन्ति च मत्परान् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां भगवदुपदेशोनाम
नवमोऽध्यायः ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आवां तव शिरश्छित्त्वा पूर्वमश्वस्य मस्तकम् ।
सन्धास्यावस्ततो ब्रूहि तेन विद्यां च नौ द्विज ! ॥
तस्मिंश्चेन्द्रेण संछिन्ने पुनः सन्धाय मस्तकम् ।
निजं ते दक्षिणां दत्त्वा गमिष्यावो यथागतम् ॥
एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः ।
प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतोऽसत्यशङ्कितः ॥

इति । तत्रायमर्थः । दध्यङ् निष्कलं शुद्धं ब्रह्माधिगतो ज्ञातवान् पाठान्तरे तु निष्कृतं नितरां कृतं भवति धनं येन तं प्रवर्ग्यं चाधिगतो ज्ञातवान् । ततोऽश्विभ्यां प्रादादित्युत्तरस्यानुषङ्गः । उपदिदेशेत्यर्थः । कथम्भूतं ब्रह्म । यद्वै अश्वशिरसा प्रोक्तत्वादश्वशिरोनाम प्रसिद्धम् । तयोरमरतां जीवन्मुक्तत्वं व्यधात् । तथा च श्रुतिः । "अश्वस्य शीर्ष्णा प्रयदीमुवाच" इति ॥ ५२ ॥

मदात्मकं वर्म श्रीनारायणकवचं चाधिगत इति पूर्वस्यानुषङ्गः । तत्र हेतुः । यस्मात्त्वष्ट्रे प्रादात् । किं तत् । यत्त्वष्टा विश्वरूपाय पुत्राय प्रादात् । कीदृशम् । यत्त्वं ततो विश्वरूपाद्धाः धृतवानसि । तदेवं विद्यया सारं गात्रं याचध्वमित्यर्थः ॥ ५३ ॥

ननु प्रेष्ठं देहं कथं दास्यति तत्राह । युष्मभ्यमङ्गान्यर्थीनि याचितः सन् दास्यति यतो धर्मज्ञः । विशेषतोऽश्विभ्यां शिष्यप्रीत्या दास्यति । अर्थीनीत्यनेन हेयत्वं दर्शितम् । तैरस्थिभिर्विश्वकर्मणा विनिर्मित आयुधश्रेष्ठो वज्रो भविष्यतीति शेषः ॥ ५४ ॥

येन भवान् वृत्रशिरो हर्ता हरिष्यति मम तेजसा उपबृंहितः सन् । तेजश्चास्त्राणि आयुधानि च सम्पदश्च भूयः प्राप्स्यथ । महाकायस्त्रिभुवनग्रासी स एवास्मान् हन्यादिति शङ्काकुलचित्तान् प्रत्याह । मत्परांश्च केऽपि न हिंसन्त्यतो युष्माकं भद्रमेवेति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
नवमोऽध्यायः ॥ ९ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्यप्येवं परिपाटिस्तथापि हे मघवन्निन्द्र ! ऋषिसत्तमं दध्यञ्चं प्रति यात गच्छत वो युष्माकं भद्रमभिलषितं भविष्यति कथमित्यत्राह । विद्यादिप्रभावेण प्रवर्ग्यकर्मणा युष्मदपेक्षितार्थदानशीलं गात्रं शरीरं याचत याचध्वं विलम्बं मा कुरुत ॥ ५१ ॥

दधीचो गात्रस्य सारत्वमेवाह । स वा इति । अत्रैषा प्रसिद्धा कथानुसन्धेया । अथर्वणो दध्यङ्नाम ऋषिः कश्चित्प्रवर्ग्याख्यकर्मनिष्ठाब्रह्मविद्याभ्यां समर्थोऽभूत्तं न विद्याभावशालिनं विद्यार्थिनावश्विनौ विद्याजिघृक्षया तमुपेत्योचतुः नौ विद्यामुपदिशेति तेन दधीचाधुना कर्मण्यासक्तोऽहं पश्चादुपदेक्ष्यामीत्युक्तावश्विनौ ययतुः । तत इन्द्र आगत्य न कस्मैचिदपीमां विद्यामुपदिश यद्युपदिशस्तव शिरः छिन्द्यामित्युक्त्वा ययौ ततः पुनरश्विनावागत्योचतुः उपदिशेति स च ताभ्यामिन्द्रोक्तमुक्तवान् ततोऽपि पूर्वमेव तव शिरश्छित्त्वाश्वशिरः सन्धास्यावः अतो नौ उपदिशेति स तथैव ताभ्यामभिसन्धितेनाश्वशिरसा विद्यामुपादिशदिति । तथा चोक्तम् ।

दध्यङ्ङाथर्वणो दक्षः प्रवर्ग्यब्रह्मविद्ययोः ।
इति ज्ञात्वाश्विनौ देवौ गत्वा तमिदमूचतुः ॥
ब्रह्मविद्यां प्रवर्ग्यं च वेद त्वं साम्प्रतं द्विज ! ।
तदावाभ्यां प्रवक्तव्यमागतौ त्वां तदर्थिनौ ॥
दध्यङ्ङपि तदा प्राह तौ पश्चात्तद्ब्रवीम्यहम् ।
कर्मण्यवस्थितोऽद्याहमधुना न तु साम्प्रतम् ॥
तच्छ्रुत्वा तौ तथेत्युक्त्वा जग्मतुः स्वालयं किल ।
एतस्मिन्नन्तरे शक्रो विद्यातिशयमात्मनः ॥
असहन् त्वरितो गत्वा दध्यञ्चमिदमब्रवीत् ।
प्रवर्ग्यं ब्रह्मविद्यां न कस्मैचिद्वक्तुमर्हसि ॥
शिरश्छिन्द्यां यदि ब्रूया रागलोभादिना तव ।
तथा बहुतिथे काले नासत्यावुपजग्मतुः ॥
ऊचतुश्चाप्यथर्वाणं ब्रूहि पूर्वोक्तमावयोः ।
इन्द्रेणाहं निषिद्धोऽस्मीत्याह वै द्विजसत्तमः ॥
यदि वक्ष्ये शिरश्छिन्द्यादिन्द्रो मे नात्र संशयः ।
पूर्वमेव शिरश्छित्त्वा तदश्वशिरसं तव ॥
सन्धास्यावस्त्वमधुना ब्रूहि तेन प्रवर्ग्यकम् ।
तच्चेदिन्द्रश्छिनत्त्याशु स्वकीयं शिरसं ततः ॥
सन्धाय दक्षिणां चैव दास्याव इति होचतुः ।
एवमुक्तोऽथ दध्यङ् तु तयोस्तदुभयं जगौ ॥

प्रवर्ग्यब्रह्मविद्याभ्यां स तदा वीर्यवान् यतः । इति स वा अधिगत इत्यादिना एषा कथा सूचिता । तत्रायमर्थः । स दध्यङ् ऋषिसत्तमः निष्कलं निर्गुणं ब्रह्म अधिगतः यथावज्ज्ञातवान् निष्कृतमिति पाठे तु नितरां कृतमनुष्ठितं प्रवर्ग्यं चाधिगतः यद्वावश्यं वक्ष्यामीत्यश्विभ्यां प्रतिज्ञातमित्यर्थः । नवेत्र निष्कृतं ब्रह्म विशिनष्टि । यद्वा । अश्वशिरोनामेति अश्वशिरसा प्रोक्तत्वादश्वशिर इति यत्प्रसिद्धं ब्रह्मेत्यर्थः । अश्विभ्यामित्यत्र ततोऽदादित्यस्यानुषङ्गः । ततोऽश्विभ्यामश्वशिरो 'ब्रह्म प्रवर्ग्यं चाददादुपादिदेश उपदिश्य तयोरमरतां मरणराहित्यं व्यधादकरोदित्यर्थः ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथाथर्वणो दध्यङ् मदात्मकं मद्देवताकमत एवाभेद्यं वर्म नारायणाख्यं स्वेनाधिगतं त्वष्ट्रेऽदादनेन च तद्गात्रस्य सारवत्त्वं तस्यापेक्षितप्रदत्वं च दर्शितम् । किं तद्वर्म यत्त्वष्टा स्वपुत्राय विश्वरूपायादात् यत्त्वं ततः विश्वरूपाद्धृतवानसि ॥ ५३ ॥

एवं दधीचो गात्रस्य सारवत्त्वमभिधायावश्यं याचितो गात्रं स्वीयं दध्यङ् दास्यतीत्याह । युष्मभ्यमिति । धर्मज्ञ इन्द्रादिदेवतास्वरूपधर्मज्ञः दध्यङ्याचितः सन् युष्मभ्यमवश्यमङ्गानि दास्यति । ददातु किं तैरस्माभिः कार्यं तत्राह । तत इति । तैर्दधीचाङ्गैः । विश्वकर्मणा विनिर्मित आयुधश्रेष्ठो भविष्यति ॥ ५४ ॥

येनायुधश्रेष्ठेन मत्तेजसोपबृंहितः आहितशक्तिरिन्द्रो वृत्रस्य शिरो हर्ता भविष्यति । तस्मिन्वृत्रे हते सति यूयं तेजांस्यस्त्राणि चायुधानि च पूर्ववद्भव: प्राप्स्यथ त्रिभुवनग्रासी स एवास्मान्हन्यादिति शङ्काकुलचित्तान् प्राह । मत्परांश्च न केऽपि बाधितुं क्षमन्ते वो युष्माकं भद्रमेव भविष्यति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्वीर-

राघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतत्कुत इत्याशङ्क्य त्वाष्ट्रहननोपायमाह । मघवन्निति । गानं ज्ञानं त्रायत इति गात्रं गतिसाधनत्वाद्वा ॥ ५१ ॥

जगतो धारकत्वाद्दधि ब्रह्म तदञ्चति गच्छतीति दध्यङ् सोऽधिगतोऽधिकज्ञानवानित्यर्थः प्रसिद्धः । "दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच" इति श्रुतिः एतदेवाह । अश्विभ्यामिति । यस्माद्दधीचोऽश्विनीदेवताभ्यां ब्रह्मविद्यालक्षणं नितरां कृतमापादितं स्वीकृतमिति वाऽश्नुत इति । यद्वा । निष्कृतं प्रवर्ग्याख्यं कर्म ब्रह्म चाश्विभ्यामुक्तवानिति शेषः । यद्वा । * ब्रह्माश्विनीदेवताभ्यामुक्तवान् । किमिति । निष्कृतं सत्यप्रतिपालननिमित्तं दधीचा ब्रह्म दास्यामीति प्रतिज्ञातत्वात् तदनुपदेशेऽनृतवादित्वं स्यात् तत्राह । अश्वशिर इति । यद्दधीचाश्विभ्यामुपदिष्टं यत्र तयोर्वैद्यावित्युक्त्वा देवैर्दुर्लभीकृतामृतयोरश्विनोरमरत्वं मरणराहित्यं प्राप्तवत् ब्रह्माश्वशिरं नाम । अत्रेति हासमाचक्षते । अथर्वणो दध्यङ् प्रवर्ग्यब्रह्मविद्ययोर्वेत्ता इति तं विज्ञायामरत्वं कामयमानावश्विनौ देवौ दधीचमुपागम्य त्वं प्रवर्ग्यब्रह्मविद्याविशारद त्वत्करुणालब्धाभ्यां तद्विद्याभ्यामावाभ्यां ते धन्यत्वं इति विज्ञापयाञ्चक्रतुः । कर्मकाण्डैककर्मणि प्रवृत्तेन मया तत्समाप्य कालान्तरे वक्ष्यते इति तेनोदितौ तौ निजगृहाय याजग्मतुः । एतस्मिन्नन्तरे आगतोऽन्यस्य विद्यानिशामनमसहमानः सुरपतिस्तमृषिमुपसृत्य त्वया प्रवर्ग्यब्रह्मविद्ये कस्मैचिन्न वक्तव्ये रागलोभादिना यद्युक्तस्तव शिरश्छिन्द्यामिति तमनुशशास एवं वहुतिथे कालेऽतिक्रान्ते नासत्याभ्यामागत्य पूर्वोक्तविद्ये वक्तव्ये इत्युक्तो मुनिरहमिन्द्रेण निषिद्धोऽस्मीत्यजीगदत् तदोपायमाकलय्य निजशिरश्छेदात्प्रागेव तव शिरश्छित्वान्यत्र निधाय कस्यचिदश्वस्य शिरश्छित्त्वा गले सन्धाय तेन ते विद्ये ब्रूहि यदीन्द्रस्तदश्वशिरश्छिनत्ति तर्हि स्वकीयशिरः पूर्ववद्गले संयोज्य तुभ्यं दक्षिणां च दास्यावः इति ताभ्यां देवचिकित्सकाभ्यामुक्तो दध्यङश्वशिरसा ते विद्ये तयोरुपदिदेश इत्यतोऽश्वशिरं नामेति प्रख्यानमभूदिति "आथर्वणायाश्विनौ दधीचेऽश्व्यं शिरः प्रत्यैरयतं स वां मधु प्रवोचदृतायन् त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वाम्" इति श्रुतिं चात्रोदाहरन्ति । हेऽश्विनावाथर्वणाय दधीचेऽश्वसम्बन्धि शिरः प्रत्यैरयतं प्रतिसंहितमकुरुतं स दध्यङ् वां मधु ब्रह्मविद्यालक्षणं प्रवोचत्प्रोक्तवान् हे दस्रौ ! त्वष्ट्रा विश्वरूपाय प्रोक्तं त्वाष्ट्रं कक्ष्यं नारायणकवचं च वामुवाच । कीदृशं ऋतायन् यथार्थं विद्यां जानन् विद्यां वक्ष्यामीति वचनं सत्यं सम्पादयन्निति वा ॥ ५२ ॥

किञ्च । नारायणकवचधारणाच्च दधीचोऽङ्गं दुर्भेद्यमित्यभिप्रेत्याह । कृत्स्नमिति । मदात्मकं वर्म नारायणकवचमाथर्वणमाथर्वणात् दधीचाधीतत्वात् कृत्स्नम् अङ्गोपाङ्गसहितं तेनानूनं त्वाष्ट्राय विश्वरूपाय प्रादात् यत् त्वं विश्वरूपादधाः ततस्तस्मात्त्वाष्ट्रं त्वत्पुत्रविश्वमानत्वात्तन्नामत्वात्तस्य विश्वरूपस्य विद्यमानत्वाच्च तथा ॥ ५३ ॥

युष्माकं याच्ञाभङ्गभयं माभूदित्याह । युष्मभ्यमिति । अङ्गानीत्यवयवसाहित्यविवक्षया बहुवचनं किञ्चिदपि नावद्यतीत्यर्थः । याचितोऽश्विभ्यामिति पाठे अश्विभ्यां याचितो यथा ताभ्यां विद्यां प्रादात्तथा युष्मभ्यमप्यङ्गानि ददातीत्यर्थः । तैरङ्गैर्विश्वकर्मणा निर्मित आयुधश्रेष्ठो भविष्यतीति शेषः । येनायुधश्रेष्ठेन मत्तेजसोपबृंहितो भवान् तेजोऽस्त्रायुधसम्पदः तेन प्रत्ता इति शेषः । मत्परांश्च हिंसन्ति केऽपीति शेषः । अत्र हयोः कारित्वेन मुक्त्याद्यिच्छया न देवानां सामर्थ्यन्यूनतेति शेषः "समर्था अपि यच्छन्ति देवा मुक्त्यादिकान् क्वचित् । आज्ञयैव हरेस्तेषां वशोऽर्थमपि नान्यथा" इति वचनात् ॥ ५४ ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

नवमोऽध्याय. ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निष्कलं मायातीतम् ॥ ५२- ५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तदपि यदि देहाभिमन्यादिक्रियया विना म्रियध्वे तर्हि मत्तो पायं शृणुतेत्याह । मघवन्निति । विद्यया व्रतेन तपसा च सारं दृढं गात्रं शरीरं याचत याचध्वम् ॥ ५१ ॥

तदीयं विद्यानिश्चयमाह । स वा इति द्वाभ्याम् । एवं भात प्रसिद्धकथा । निशम्याथर्वणं वक्तुं प्रवर्ग्यं ब्रह्मविद्ययोः । दध्यङ्ं समुपागतौ

---

(१) नियोजकत्वम् ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तमूचतुरश्विनौ । भगवन् ! देहि नौ विद्यामिति श्रुत्वा स चाब्रवीत् । कर्मण्यवरुद्धोऽद्याहं पश्चाद्वक्ष्यामि गच्छतम् । तयोर्निर्गतयोरेव शक्र आगत्य तं मुनिम् । उवाच भिषजोर्विद्यां मावादीरश्विनोर्मुने ! । यदि मद्वाक्यमुल्लङ्घ्य ब्रवीषि सहसैव ते । शिरश्छिन्द्यां न सन्देह इत्युक्त्वा स ययौ हरिः । इन्द्रे गते तथाऽभ्येत्य नासत्यावूचतुर्द्विजम् । तन्मुखादिन्द्रगदितं श्रुत्वा तावूचतुः पुनः । आवां तव शिरश्छित्त्वा पूर्वमश्वस्य मस्तकम् । सन्धास्यावस्ततो ब्रूहि तेन विद्यां च नौ द्विज ! तस्मिंश्छिन्द्रेण संछिन्ने पुनः सन्धाय मस्तकम् । निजं ते दक्षिणां दत्त्वा गमिष्यावो यथागतम् । एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः । प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतोऽसत्यशङ्कितः । इति । ततश्चायमर्थः । दध्यङ् निष्कलं शुद्धं ब्रह्म अभिगतः ज्ञातवान् । निष्कलमिति पाठे कृतादनित्यपदार्थान्निष्क्रान्तम् । ततोऽश्विभ्यां प्रादाविदुत्तरस्यानुषङ्गः । ब्रह्म कीदृशं यद्वै अश्वशिरसा प्रोक्तत्वादश्वशिरोनाम तयोरमरत्वं जीवन्मुक्तत्वं व्यधात् । तथा च श्रुतिः "अश्वस्य शीर्ष्णा प्रयतीमुवाच" इति ॥ ५२ ॥

मदात्मकं वर्म श्रीनारायणकवचं त्वष्ट्रे प्रादात् यत् कवचं त्वष्टा विश्वरूपाय स्वपुत्राय प्रादात् । ततो विश्वरूपात्त्वं यत् अधा धृतवानसि अत एव विद्यया सारं गात्रं याचध्वमित्यर्थः ॥ ५३ ॥
नन्वेवं को दाता यः स्वगात्रमपि दद्यात्तत्राह । युष्मभ्यमिति । विशेषतोऽश्विभ्यां शिष्यप्रीत्या दास्यति । अश्विभ्यां हेतुभ्यामिति वा तैरङ्गैरस्थिभिः भविष्यतीति शेषः ॥ ५४ ॥

ननु सर्वग्रासिना वृत्रेण सार्द्धं योद्धुं न शक्नुमस्तस्मात्तं हन्तुं कथमेव यतस्वेत्यत आह । न हिंसन्तीति । वृत्रस्तद्वशीभूता असुराश्च मत्परान् युष्मान् न घ्नन्ति वृत्रस्य परमभक्तत्वेन मदर्थे स्वदेहमपि जिहासोर्वस्तुतो युष्मासु द्वेषो नास्त्येव यथा युष्माकं तस्मिन्निति भावः ॥ ५५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्य नवमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे मघवन् ! ऋषिसत्तमं दध्यञ्चं प्रति यात गच्छत । वो भद्रं चाश्विन्नं भविष्यति । तत्र गात्रं याचत याचध्वम् ॥ ५१ ॥

ऋषेर्विद्यानत्स्वसत्यत्वनिज्ञत्वादीन् गुणानाह । स वा इति द्वाभ्याम् । इयं ग्रन्थान्तरे प्रसिद्धा कथा ।

निशाम्याथर्वणं दक्षं प्रवर्ग्यब्रह्मविद्ययोः ।
दध्यञ्चं समुपागम्य तमूचतुरथाश्विनौ ॥
भगवन् ! देहि नौ विद्यामिति श्रुत्वा स चाब्रवीत् ।
कर्मण्यवस्थितोऽद्याहं पश्चाद्वक्ष्यामि गच्छतम् ॥
तयोर्निर्गतयोरेव शक्र आगत्य तं मुनिम् ।
उवाच भिषजोर्विद्यां मावादीरश्विनोर्मुने ! ॥
यदि मद्वाक्यमुल्लङ्घ्य ब्रवीषि सहसैव ते ।
शिरश्छिन्द्यां न सन्देह इत्युक्त्वा स ययौ हरिः ॥
इन्द्रे गते तथाऽभ्येत्य नासत्यावूचतुर्द्विजम् ।
तन्मुखादिन्द्रगदितं श्रुत्वा तावूचतुः पुनः ॥
आवां तव शिरश्छित्त्वा पूर्वमश्वस्य मस्तकम् ।
सन्धास्यावस्ततो ब्रूहि तेन विद्यां च नौ द्विज ! ॥
तस्मिन्निन्द्रेण संछिन्ने पुनः सन्धाय मस्तकम् ।
निजं ते दक्षिणां दत्त्वा गमिष्यावो यथागतम् ॥
एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः ।
प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतोऽसत्यशङ्कितः ॥

इति । श्लोकान्वयस्तु स वै दध्यङ् यद्वै अश्वशिरसो यद्विद्यया अश्वशिरोनाम ब्रह्म निष्कलं नितरामनुग्रहं प्रवर्ग्याख्यं कर्म च ब्रह्मविद्यां प्रवर्ग्याख्यं कर्मविद्यां च अभिगतः ज्ञातवान् । ततः अश्विभ्यां प्रादादिति क्रियापदेनान्वयः । तथा च श्रुतिः "अश्वस्य शीर्ष्णा प्रयतीमुवाच" इति तया ब्रह्मविद्यया तयोरमरत्वं ब्रह्मता व्यधात् ॥ ५२ ॥

स एव दध्यङ् यन्मदात्मकं कवचं त्वष्ट्रे प्रादात् स च त्वष्टा विश्वरूपाय प्रादात् ततस्त्वष्टुः सकाशात् यत् त्वमधाः धृतवानसि ॥ ५३ ॥

युष्माभिः विशेषतोऽश्विभ्यां च याचितः धर्मज्ञः अङ्गानि अस्थीनि युष्मभ्यं दास्यति । तैः अस्थिभिः आयुधश्रेष्ठो वज्रो भविष्यति हर्ता हरिष्यति । तेन वृत्रशिरो हर्ता हरिष्यति मत्तेजसा उपबृंहितः सन् तस्मिन् वृत्रे विनिहते यूयं भूयस्तेजआदिकं प्राप्स्यथ । तदनन्तरं वो युष्माकं भद्रं मङ्गलमेव भविष्यति । ये तु विशेषतो मत्परास्तांस्तु सर्वदा केऽपि न हिंसन्तीत्याशयेनाह । नेति । अहं परः पूज्यो येषां तान् केऽपि न हिंसन्तीति योजना ॥ ५४ ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
नवमाध्यायार्थप्रकाशः ॥ ६ ॥

भाषा टीका ।

हे इन्द्र ! आपका भला होगा तुम लोग उत्तम ऋषि दधीच के पास जाओ फिर विद्या व्रत तपस्या से दृढ उनके शरीरको जल्दी मांगो ॥ ५१ ॥

वह दधीच मुनि निष्कल ब्रह्म को जानते हैं जिस ब्रह्म ज्ञान का अश्व शिर नाम है उस विद्या को अश्विनी कुमार को देकर उनने उन दोनों को अमर कर दिया है ॥ ५२ ॥

जिस दधीचने मेरा स्वरूप नारायण कवच को त्वष्टाके लिये

भाषा टीका ।

उपदेश किया है उस त्वष्टाने विश्वरूप को दिया है विश्वरूप ने तुमको दिया है ऐसी विद्या वाले दधीच हैं ॥ ५३ ॥

तुमारे साथ मे रहने वाले अश्विनीकुमार के मांगने से दधीच ऋषि अपने शरीरको देदेंगे तिससे विश्वकर्मा केबनानेसे हमारे तेजसे युक्त होनेसे विश्वकर्मा का बनाया वज्र आयुध वृत्रासुरके शिरको काटेगा तब तुम लोग आयुध सम्पत्तिसे युक्त होकर फिर अपने स्थान को प्राप्त होवोगे क्यों कि मेरे भक्तों को कोई नहीं मार सकता है ॥ ५४ ॥ ५५ ॥

इति श्रीभागवत षष्ठस्कन्ध के नवमें अध्यायका
भाषानुवाद ब्रह्मचार्याचार्यकृत
समाप्त ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे नवमोऽध्यायः समाप्तः ॥ ९ ॥



॥ दशमोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

इन्द्रमेवं समादिश्य भगवान् विश्वभावनः ।
पश्यतामनिमेषाणां तत्रैवान्तर्दधे हरिः ॥ १ ॥
तथाभियाचितो देवैर्ऋषिराथर्वणो महान् ।
मोदमान उवाचेदं प्रहसन्निव भारत ! ॥ २ ॥
अपि वृन्दारका ! यूयं न जानीथ शरीरिणाम् ।
संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥ ३ ॥
जिजीविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः ।
क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ॥ ४ ॥

॥ देवा ऊचुः ॥

किं नु तद्दुस्त्यजं ब्रह्मन् ! पुंसां भूतानुकम्पिनाम् ।
भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणाम् ॥ ५ ॥
ननु (१) स्वार्थपरो लोको न वेद परसङ्कटम् ।
यदि वेद न याचेत नेति नाह यदीश्वरः ॥ ६ ॥

॥ ऋषिरुवाच ॥

धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः ।
एष वः प्रियमात्मानं त्यजन्तं सन्त्यजाम्यहम् ॥ ७ ॥
योऽध्रुवेणात्मना नाथाः ! न धर्मं न यशः पुमान् ।
ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥ ८ ॥
एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः (२) ।
यो भूतशोकहर्षाभ्यामात्मा शोचति हृष्यति ॥ ९ ॥
अहो दैन्यमहो कष्टं पारक्यैः क्षणभङ्गुरैः ।
यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दशमे केशवादिष्टदध्यङ्ङस्थिजवज्रभृत् ।
इन्द्रोऽयुध्यत वृत्रेण सासुरेण स निर्जरः ॥ १ ॥ १ ॥

तथेति । मोदमान एव तन्मुखाद्धर्मं श्रोतुकामः प्रत्याचक्षाण इवोवाच अपीति द्वाभ्याम् । हे वृन्दारकाः ! अपि किं संस्थायां मृत्यौ योऽभिद्रोहो दुःखं तं न जानीथ ॥ २ ॥ ३ ॥

आत्मा देहः । वयं जानीम एव किं तु श्रीविष्णुरस्मन्मुखेन याचत इति चेत्तत्राह । याचते विष्णवेऽपि दातुं क उत्सहेत ॥ ४ ॥

---

(१) नूनमिति श्रीवीरराघवविजयध्वजचक्रवर्तिनां पाठः (२) उपाहित इति श्रीवीरराघवाचार्यपाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुण्यश्लोकैरीड्यानि कर्माणि येषाम् ॥ ५ ॥

याचको यदि वेद तर्हि न याचेत यदीश्वरो दानसमर्थ-स्तर्हि सोऽपि नेति नाह । अतो यथा तव सङ्कटं स्वार्थपरा वयं न जानीम एवं प्रत्याचक्षाणस्त्वमस्मत्सङ्कटं न जानासीति भावः ॥ ६ ॥

मे मया प्रत्युदाहृताः प्रत्युक्ताः । मां त्यजन्तं त्यक्त्वा यान्त-मात्मानं देहम् ॥ ७ ॥

अध्रुवेणात्मना देहेन हे नाथाः! ॥ ८ ॥

भूतानां शोकेन शोचति हर्षेण हृष्यति य आत्मा अयं तस्य यो धर्म एतावानेवाव्यय इत्यर्थः ॥ ९ ॥

पारक्यैः श्वसृगालादिभक्ष्यैः अस्वार्थैरात्मोपयोगशून्यैः स्वं वित्तम् । ज्ञातयः पुत्रादयः विग्रहो देहः । तैर्नोपकुर्यादिति यत् ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हरिरेवमादिश्यान्तर्दधावित्याह मुनिः । इन्द्रमिति । एवमित्थमिन्द्रं समादिश्याज्ञाप्य विश्वस्य सुखकरो भगवाननिमिषाणां देवानां पश्यतां सतां तत्रैवान्तर्धीयतान्तर्हितवान् ॥ १ ॥

हे भारत ! भगवदुक्तप्रकारेण देवैरभियाचितो दध्यङ्ङाथर्वणः अथर्वणः पुत्रः मुनिः परब्रह्ममननशीलः महान् "कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्" इत्युक्तविधगुणसम्पन्नः अत एव मोदमानः हृष्टचित्तः प्रहसन्निव परिहासं कुर्वन्निवेदं वक्ष्यमाणमुवाच ॥ २ ॥

उक्तिमेवाह । अपीत्यादिना विष्णाव इत्यन्तेन । तावत्तेषां विवक्षितं श्रोतुकामः प्रत्याचिख्यासुरिवाह दध्यङ् । अपीति । हे वृन्दारकाः ! शरीरिणां संस्थायामन्तकाले यो दुःसहः सोढुमशक्यश्चेतनापहः चैतन्यहरः अभिद्रोहः क्लेशस्तमपि किं न जानीथ ॥ ३ ॥

इह लोके जीवितुमिच्छूनां जीवानामात्मा देहः प्रेष्ठः प्रियतमः । अत एवेप्सितः इष्टस्तं प्रेष्ठं देहं भिक्षमाणाय विष्णवेऽपि दातुं को वा उत्सहेतोत्साहं कुर्यात् । न कोऽप्युत्सहेतेत्यर्थः । विष्णाव इत्यनेन "अभ्यागतः स्वयं विष्णुः" इति प्रकारेण विष्णुरूपाय याचमानायेत्यर्थ उक्तः ॥ ४ ॥

एवमुक्ता देवास्तमाहुः । किं न्विति । हे ब्रह्मन् ! पुण्यश्लोकेडीड्यानि कर्माणि चरित्राणि येषाम् । पुण्यश्लोकेति सम्बुद्ध्यन्तं वा अत एव महतां भूतान्यनुकम्पयन्तीति तथा तेषां भूतानुकम्पाशीलानां भवादृशानां पुंसां किं नु तद्दुस्त्यजमात्मपर्यन्तदातॄणां न किमपि दुस्त्यजमस्तीति भावः ॥ ५ ॥

यदुक्तमभिद्रोहं किं न जानीथ इति तत्राहुः । नूनमिति । स्वार्थपरः स्वप्रयोजनासक्तः पुमान् परस्य सङ्कटं नूनं न वेद यदि परसङ्कटं वेद तर्हि न याचेतेत यदि याच्यमान ईश्वरः दानसमर्थस्तर्हि नेति न दास्यामीति नाह न ब्रूते अतो यथा तव सङ्कटं वयं स्वार्थपराः न जानीमस्तथा प्रत्याचक्षाणस्त्वमप्यस्मत्सङ्कटं न जानासीति भावः ॥ ६ ॥

एवमुक्तो दध्यङ् स्वाभिप्रायमाह । धर्ममिति चतुर्भिः । वो युष्माकं धर्मं श्रोतुकामेन मया प्रकृतं प्रत्युदाहृताः प्रत्याख्याताः आत्मानं मां त्यजन्तं प्रारब्धभङ्गादवश्यमेव त्यजन्तं तमेतं वः युष्माकं प्रियं देहमहं सन्त्यजामि सम्यगहङ्कारापोहेन त्यजामि ॥ ७ ॥

हे नाथाः ! यः पुमानध्रुवेणात्मना देहेन धर्मं यशो वा भूतदयया नेहेत न साधयेत् स पुमान् स्थावरैरपि शोच्यः । स्थावरा अपि हि स्वविनाशेनापि परैरुपयुज्यन्ते । अतोऽनुपकारकस्तेभ्योऽपि निकृष्ट इत्यभिप्रायः ॥ ८ ॥

अव्ययोऽव्ययिष्णुः धर्मः पुण्यश्लोकैरेतावानेव उपासितः उपार्जितः कियान् । भूतानां शोकेन शोचति हर्षेण हृष्यति य आत्मा स्वयमिति यः एतावानेव ॥ ९ ॥

मर्त्यैः कर्तृभिः पारक्यैः श्वसृगालादिभक्ष्यैः क्षणभङ्गुरैरस्थिरैरस्वार्थैरात्मोपयोगशून्यैः स्वज्ञातिभिर्धनैर्देहैश्च साधनैर्नोपकुर्यादिति यदेतदहो कष्टमहो दैन्ये च ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शत्रुनिग्रहोऽपि भगवत्प्रीतिजनकत्वेन मुक्तिसाधनं स्यादित्यभिप्रेत्य कतिपयैरध्यायैर्वृत्रवासवयोर्युद्धं निरूप्यते । तत्रादौ सतामभीष्टमवश्यं कर्तव्यं पुरुषेणेति देवेभ्यो दधीचेः स्वाङ्गदानप्रकारं वक्तुमाह । इन्द्रमिति । "सुरमत्स्यावनिमिषौ" इत्यमरः ॥ १ ॥ २ ॥

संस्थायाम्(१) चेतनापहो बुद्धिभ्रंशकरो यो द्रोहः दुःखलक्षण उपद्रवः तं वृन्दारका देवा अपि यूयं न जानीथेत्यन्वयः । सर्वप्राणिनां बुद्धिवृत्तिसाक्षित्वाद्दवतामित्यर्थः । अभिद्रोहस्य सर्वविषयज्ञाननाशकत्वात् ॥ ३ ॥

"आत्मा देहे शरीरे च संसारिणि हरौ तथा" इत्यभिधानात् इह प्रियेषु वस्तुषु देहः प्रेष्ठः प्रियतमः ईप्सिततम इति । यस्मात् कः पुमान् भिक्षमाणायातिथिरूपेण याचमानाय विष्णवेऽपि तं देहं दातुमुत्सहेत प्रयतेत ॥ ४ ॥

पुण्यश्लोकैः पुरुषैरीड्यानि स्तुत्यानि कर्माणि देहदानादीनि येषां ते तथा तेषाम् ॥ ५ ॥

नूनं प्रायः परसङ्कटं परदुःखं दातुमशक्यं दातव्यं चेति वा परसङ्कटं वेद तर्हि न याचेत । सामान्यमुक्त्वा विशेषमाहुः । नेतीति । अशक्यमपि दातुं यदीश्वरः समर्थस्तर्हि याचितः सन् असौ दास्यामीति नेति नाह न वक्तव्यं ते जानन्तोऽपीदृशा याचनीय इति जानन्तो वयं दातुं समर्थं भवन्तं याचामहे इत्यभिप्रायः । न चात्र देवानां स्वात्मनो नीचमार्गवर्णा याचमानानामपि मानलक्षणतेजःक्षतिः शङ्कनीया । कार्यगौरवविषयत्वात् तदभावस्य प्रामाणिकत्वाच्छ्रयोज्ञाकारित्वाच्च ।

> आज्ञयैव महाविष्णोः कार्यार्थमपि च क्वचित् ।
> नीचानपि तु याचन्ते स्वात्मनो गुणाश्चराः ॥
> नीचयाच्यं यदेयुश्च सुरा नैतावता क्वचित् ।
> तेजःक्षतिर्भवेदेषां जनकस्य यथार्भकः ॥

इति वचनात् ॥ ६ ॥

---

(१) मरणे ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रत्युदाहृताः निराकृता इत्योक्ताः । त्यजन्तं त्यक्ष्यन्तम् ॥ ७ ॥
अध्रुवेणात्मना अनित्येन देहेन हे नाथाः ! स्थावरैः स्तब्धैर्विवेकशून्यैरित्यर्थः ॥ ८ ॥ ९ ॥

पारक्यैः परेषां श्वसृगालादीनां भक्ष्यभूतैः अस्वार्थैः परप्रयोजनैः स्वज्ञातिजनैः स्वविग्रहैः स्वदेहैश्च ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दशमाध्यायस्य क्रमसन्दर्भो नास्ति ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दधीचो याचितात् प्राप्तैरस्थिभिर्वज्रनिर्मितिः ।
दशमेऽभूज्जयश्चाजौ देवानामसुरैः सह ॥०॥
मोदमानोऽपि प्रहसन्निव याच्ञाप्रत्याख्यानेन तान् तिरस्कुर्वन्निव ॥ १ ॥ २ ॥
संस्थायां मृत्यौ ॥ ३ ॥

आत्मा देहः वयं जानीम एव किन्तु विष्णुरेवास्मन्मुखेन याचते इति चेत्तत्राह । विष्णवेऽपि दातुं क उत्सहेत ॥ ४ ॥ ५ ॥

ऋषिराह । नूनमित्यादि न याचेतेत्यन्तम् । देवाः प्रत्याहुः । नूनमित्यादिपद्यमेव न याचेतेति चतुरक्षरविवर्जितम् । ततश्चार्थान्तरन्यासस्यात्र विशेषतोऽसमर्थः । याचको लोकः नूनं स्वार्थपरः स्वर्गाद्यैश्वर्यभोगपरः । परस्य दातुः सङ्कटं स्वदेहास्थिप्रदाने पीडां न वेद । यदि देवत्वेन विवेकवत्त्वाद्वेद तर्हि न याचेतेति । तेन युष्माकं विवेकाभावान्न देवत्वं किन्तु व्याघ्रादिपशुतुल्यत्वमिति । ऋषिणोक्तं श्रुत्वा देवैः प्रत्युक्तं दाता लोकोऽपि नूनं स्वार्थपरः देहेन्द्रियादिषु ममत्वे चिरजीवित्वसुखपरः । परेषां याचकानां सङ्कटं घोरशत्रूपद्रवादिदुःखं न वेद । यदि ऋषित्वेन विज्ञानविवेकदयादिमत्त्वाद्वेद तर्हि नेति नाह न दास्यामीति न ब्रूयात् । यद्यस्मादीश्वरः तद्दानसमर्थः तेन तथापि विज्ञानाद्यभावान्न ऋषित्वम् । प्रत्युत शोकमोहादिसद्भावाद्व्याघ्रादिपशुतुल्यत्वमिति भावः ॥ ६ ॥

धर्मं वः श्रोतुकामेनेति । स धर्मो युष्मत्प्रत्युत्तरेणैव श्रुतः । यद्वा । वक्रनिरथं वक्रोक्त्यैव धर्मो न श्रुतः । किन्तु । वाक्चातुर्यं श्रुतम् । भवतु तावत् स्वाभिप्रायं ज्ञापय इत्यत्राह । एष इति । आत्मानं देहं त्यजन्तं सम्यक् त्यजामीति स देहो यावन्मां न त्यजति तावदहमेव तं त्यजामि युष्मभ्यं ददामीत्येतावद्भाग्यं मम भवत्विति भावः ॥ ७ ॥

हे नाथाः ! ॥ ८ ॥
आत्मा मनः ॥ ९ ॥

अदातारमाक्षिपति । अहो इति । पारक्यैः शृगालादिभिर्भक्ष्यैः स्वं वित्तं ज्ञातयः पुत्रादयः विग्रहा देहास्तैः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्थं लब्धवज्रस्य सदेवस्येन्द्रस्य सासुरेण वृत्रेण सह युद्धं वर्णयति । इन्द्रमिति दशमेन । अनिमेषाणां देवानाम् ॥ १ ॥

भगवता ममास्थीनि भिक्षितुमेते प्रेषिता इति कथञ्चिज्ज्ञात्वा मोदमानः धर्मं श्रोतुमिदमुवाच । स्वार्थपरा पूर्वविबुधेऽपि कर्माणि न सज्जन्ते इति तान् प्रति प्रहसन्निवोक्तवान् ॥ २ ॥

अहो हे वृन्दारकाः ! संस्थायां मरणे योऽभिद्रोहो दुःखं तमपि किं यूयं न जानीथ ॥ ३ ॥ ४ ॥

पुण्यश्लोकैः पवित्रकीर्तिभिरपि ईड्यानि कर्माणि येषां तेषाम् ॥ ५ ॥ ६ ॥

वो धर्मं श्रोतुकामेन मे मया प्रत्युदाहृताः प्रत्याख्याताः । मां त्यजन्तं प्रारब्धकर्मक्षयात् पतन्तं वो युष्माकं प्रियं वाञ्छितमात्मानं देहं त्यजामि ॥ ७ ॥

हे नाथाः ! देवाः ! आत्मना देहेन ॥ ८ ॥

यः आत्मा पुरुषः भूतानां शोकेन शोचति हर्षेण हृष्यति एत एतावानेव धर्मः अव्ययः मोक्षपर्यवसायी पुण्यश्लोकैरुपासित आदृतः ॥ ९ ॥

अस्वार्थैः आत्मोपयोगरहितैः क्षणभङ्गुरैरनित्यैः पारक्यैः मातृपितृनृपश्वाग्न्यादीनां ममतास्पदैः स्वज्ञातिविग्रहैः धनबन्धुशरीरैः यत्नोपकुर्यादिति यदेतदहो दैन्यमहो कष्टं च ॥ १० ॥

भाषा टीका ।

श्रीशुकदेवजी बोले हे भारत ! विश्वपालन करने वाले भगवान् इन्द्र को इस प्रकार आज्ञा देकर देवतों के देखतेही वहींपर अन्तर्धान होगये ॥ १ ॥

हे भारत ! देवतों के इस प्रकार मागने से महात्मा अथर्वण दधीच जी आनन्दित होकर हसते सरीके इस वचन को बोले ॥ २ ॥

यद्यपि आपलोग देवता हो तौ भी नहीं जानते हो कि देहधारियों को मरने में मूर्च्छा कर देने वाला जो दुःख होता है ॥ ३ ॥

जीनेकी इच्छावाले जीवों को इस संसार मे आत्मा बडा प्रिय है उस आत्मा को यदि विष्णु भी मांगे तो कौन देने को चाहेगा ॥ ४ ॥

देवता बोले हे ब्रह्मन् ! भूतों पर दया करने वाले सत्कीर्ति वालों से कीर्तन करने योग्य कीर्ति वाले आप सरीके महात्माओं को कौनसी बात नहीं त्यागने योग्य है ॥ ५ ॥

दधीच जी बोले यह लोक सब बडा स्वार्थ वाला है सो दूसरे के सङ्कट को नहीं जानता है यदि जानता होता तो नहीं मांगता देवता बोले यदि देनेवाला देने में समर्थ होवे तो मांगने पर निषेध नहीं करता है ॥ ६ ॥

ऋषिबोले आपसे धर्म सुननेकी इच्छा से मैने आपको

॥ श्रीशुक उवाच ॥

एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुम् ।
परे भगवति ब्रह्मण्यात्मानं संनयन् जहौ ॥ ११ ॥
यताक्षासुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबन्धनः ।
आस्थितः परमं योगं न देहं बुबुधे गतम् ॥ १२ ॥
अथेन्द्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा ।
मुनेः शुक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः ॥ १३ ॥
वृतो देवगणैः सर्वैर्गजेन्द्रोपर्यशोभत ।
स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥ १४ ॥
वृत्रमभ्यद्रवच्छत्रुमसुरानीकयूथपैः ।
पर्यस्तमोजसा राजन् ! क्रुद्धो रुद्र इवान्तकम् ॥ १५ ॥
ततः सुराणामसुरै रणः परमदारुणः ।
त्रेतामुखे नर्मदायामभवत् प्रथमे युगे ॥ १६ ॥
रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः ।
मरुद्भिर्ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिम् ॥ १७ ॥
दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वमायया ।
नामृष्यन्नसुरा राजन् ! मृधे वृत्रपुरःसराः ॥ १८ ॥
नमुचिः शम्बरोऽनर्वा द्विमूर्द्धा ऋषभोऽम्बरः ।
हयग्रीवः शङ्कुशिरा विप्रचित्तिरयोमुखः ॥ १९ ॥
पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः ।
(१) दैतेया दानवा यक्षा रक्षांसि च सहस्रशः ॥ २० ॥

भाषा टीका ।

प्रत्युत्तर दिया है यह देह यद्यपि प्रिय है तो भी कभी आत्मा को छोडनेही वाला है सो तिसको मैं आपके वास्ते छोडता हूं ॥ ७ ॥

हे नाथ हो ! जो पुरुष इस अनित्य शरीर से धर्म या यश को नहीं करता है और भूतों की दया नहीं करता है सो पुरुष सबके शोचने योग्य है उसका स्थावर जीवभी शोच करते हैं ॥ ८ ॥

उत्तम पुरुषों का अनुष्ठान किया इतनाहीं बडा धर्म है जो कि भूतों के सुख सें सुखपाना और भूतों के दुःखसे दुःखित होना ॥ ९ ॥

प्राणिमात्र को यही बडा कष्ट है यही बडा दैन्य है जो कि कुत्ता सृगालादिकों के भक्ष शरीर तथा धन बन्धु आदिकों से पराया उपकार नहीं करता है ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृतं व्यवसितं निश्चयो येन । आत्मानं जीवं संनयन्नेकी-कुर्वंस्तनुं जहौ ॥ ११ ॥

यता अक्षादयो येन । तत्त्वं पश्यतीति तथा । ध्वस्तानि बन्धनानि यस्य ॥ १२ ॥

अथेन्द्रोऽशोभतेत्युत्तरेणान्वयः । मुनेः शुक्तिभिरस्थिभिर्निर्मितम् । उत्सिक्त ऊर्जितः मुनेरस्थिभिरिति वा पाठः ॥ १३ ॥ १४ ॥

असुरानीकानां यूथपैः पर्यस्तं परिवृतम् ॥ १५ ॥

[१] व्योमकेशो विरूपाक्षः कपिलोऽथ विभावसुः अयमधिकपाठः श्रीविजयध्वजतीर्थमते ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

रणः संग्रामः । प्रथमे चतुर्युगे त्रेतायुगस्य मुखे आरम्भे ॥ १६ ॥ १७ ॥

नामृष्यन्नासहन्त ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं कृतनिश्चयो देहं तत्याज दध्यङ्ङित्याह मुनिः । एवमिति । एवम् इत्थं कृतव्यवसितः कृतव्यवसायः आथर्वणो दध्यङ् परब्रह्मण्यात्मानं प्रत्यगात्मानं सन्नयन् समर्पयंस्तनुं देहं जहौ तत्याज ॥ ११ ॥

कथम्भूतस्तत्याज यता नियता असवः इन्द्रियाणि येन । शोभनं विषयेभ्यः प्रत्याहृतं मनो बुद्धिश्च यस्य । तत्त्वं प्रत्यगात्मशरीरकपरब्रह्मयाथात्म्यं पश्यतीति तत्त्वदृक् । ध्वस्तानि बन्धनानि पुण्यपापात्मकानि यस्मात् । परमम् "आपार्ष्णिना पीड्य" इत्यादिना द्वितीयस्कन्धोक्तं देहोत्क्रमणयोगमाश्रितः जहाविति पूर्वेणान्वयः । ततो गतं देहं न बुबुधे ॥ १२ ॥

अथ मुनेर्दधीचोऽस्थिभिः शाश्वैर्विश्वकर्मणा विनिर्मितं वज्रमायुधमुपलभ्य उद्यम्य भगवत्तेजसाऽन्वितः अत एव उत्सिक्तः ऊर्जित इन्द्रः ॥ १३ ॥

सर्वैः देवगणैः परिवृतो गजेन्द्रस्य ऐरावतस्योपरि पर्यशोभत । ततो मुनिगणैः स्तूयमानो लोकत्रयं हर्षयन्निव शशी रहतरवाश्चर्येत्यिवेति इवशब्दः प्रयुक्तः ॥ १४ ॥

असुरसैन्यानां नायकैः पर्यस्तं परिवेष्टितं शत्रुं वृत्रमभ्यद्रवदभिमुखमगात् यथा प्रलयकाले क्रुद्धो रुद्रः अन्तकं प्रति अन्तमवसानं गच्छतीति अन्तगः अपपाठः तं प्रति । अन्तक इति पाठे अन्तं करोतीत्यन्तकः "अन्येभ्योऽपि दृश्यते" इति डः प्रत्ययः । जगद्विनाशकदित्यर्थः । अन्तकमिति द्वितीयान्तपाठे रुद्रस्तक्षं मृत्युं प्रति वेत्थभूतोपमेयम् ॥ १५ ॥

ततोऽसुरैः सह सुराणां परमदारुणो रणः सङ्ग्रामोऽभूत् । कदा क तत्राह । प्रथमे चतुर्युगे त्रेतामुखे त्रेतायुगारम्भे प्रथमेऽन्तरे इति पाठे प्रथमे कृतत्रेतयोरन्तरालकालेप्रथममन्वन्तरे वा । नर्मदायां नद्याम् ॥ १६ ॥

हे राजन् ! मृधे युद्धे रुद्रादिभिः परिवृतं वज्रायुधधरं स्वया प्रभया रोचमानं मरुत्पतिमिन्द्रं दृष्ट्वा वृत्रप्रभृतयोऽसुराः नामृष्यन्नासहन्त ॥ १७ ॥ १८ ॥

नमुच्यादयः ॥ १९ ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मानं मनो ब्रह्मणि सम्यक् नयन् आत्मानं देहम् ॥ ११ ॥

यता इन्द्रियप्राणमनोबुद्धयो येन स तथा हरेस्तत्त्वं रूपं पश्यन् योगम् (१) मूलाधारमारभ्य द्वादशान्तपर्यन्तं प्राणोन्नयनलक्षणम् ॥ १२ ॥

(१)नासाग्रमारभ्य द्वादशाङ्गुलान्तब्रह्मरन्ध्रलक्षणतुर्यस्थानपर्यन्तम्

उत्सिक्तः उन्नद्धः ॥ १३ ॥ १४ ॥

पर्यस्तं परिवृतम् ॥ १५ ॥

ननु कस्मिन् काले कस्मिन् देशे वृत्रवासवयोर्युद्धमभूदिति तत्राह । त्रेतामुख इति । अन्तरे अस्मिन्वर्त्तमाने वैवस्वताख्यमन्वन्तरे तत्रापि प्रथमे युगे प्रथमचतुर्युगे तत्रापि त्रेतामुखे त्रेतायुगस्यादौ नर्मदायां नर्मदातीरे गङ्गायां घोष इतिवत् तत्र तत्र वक्ष्यमाणकथा प्रथमरणस्तु नर्मदातीरे । द्वितीयरणस्तु मृतिकाले । समुद्रतीर इति विशेषो ग्रन्थान्तरेण च ज्ञातव्यः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ ० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आत्मानं मनः ॥ ११ ॥

योगं समाधिम् । गतं स्वस्माद्विच्युतम् ॥ १२ ॥

शुक्तिभिरस्थिभिः कलिभिरिति च पाठः ॥ १३ ॥ १४ ॥

पर्यस्तं परिवृतम् अन्तकमिवेति रुद्रो हि यममपि संहर्त्तुं शक्नोतीत्यभिप्रायेण । यद्वा । सिंहः सिंहमिवेतिवद्वयं दृष्टान्तः ॥ १५ ॥

त्रेतामुखे त्रेतारम्भे । प्रथमे युगे वैवस्वतमन्वन्तरस्य प्रथमे चतुर्युगे"स्यात् शतघ्नी चतुर्हस्ता लोहकण्टकसञ्चिता । भुशुण्डी सर्वतो लोहकण्टकानुक्रमोचिता" इत्यभिधानम् ॥ १६—२३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृतव्यवसितः कृतनिश्चयो ब्रह्मणि अंशिनि तत्पदार्थे आत्मानं तदंशभूतं त्वंपदार्थं सन्नयन् अर्पयन् तनुं जहौ तत्याज ॥ ११ ॥

यतान्यवशानीन्द्रियाणि असवः प्राणाः मनो बुद्धिश्च येन । तत्त्वे ब्रह्मणि आत्मार्पणस्थाने दृग् दृष्टिर्यस्य ध्वस्तानि बन्धनानि यस्य सः । परमं योगं ब्रह्मणि चित्तैकाग्र्यमास्थितः देहं गतं न बुबुधे न ज्ञातवान् ॥ १२ ॥

शुक्तिभिः अस्थिभिर्निर्मितमुद्यम्य उत्सिक्तः इन्द्रः अशोभतेत्युत्तरेण सम्बन्धः ॥ १३ ॥ १४ ॥

पर्यस्तं परिवृतं रुद्रः अन्तकं लोकनाशकं त्रिपुरमिव मृत्युमिवेति वा । आत्मारामत्वात् ॥ १५ ॥

एतन्मन्वन्तरस्य प्रथमे चतुर्युगे त्रेतायुगस्य मुखे उपक्रमे ॥ १६ ॥

रुद्रादिभिर्युतं मरुत्पतिम् ॥ १७—२३ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले दधीचजी ने इस प्रकार से विचार करके परब्रह्म भगवान् में मनको लगाकर अपने शरीर को त्यागदिया ॥ ११ ॥

इन्द्रिय मन बुद्धि इन सबों को रोककर तत्त्वदृष्टि से बन्धन में से छूटकर परमयोग को धारण किया तब उनने जाते हुये शरीर को नहीं जाना ॥ १२ ॥

(१) इल्वलो वल्वलश्चैव दन्दशूको वृषध्वजः ।
कालनाभो महानाभो भूतसन्तापनो वृकः ॥ १९ ॥
सुमालिमालिप्रमुखाः कार्त्तस्वरपरिच्छदाः ।
प्रतिषिध्येन्द्रसेनाग्रं मृत्योरपि दुरासदम् ॥२१॥
अभ्यर्दयन्नसम्भ्रान्ताः सिंहनादेन दुर्मदाः ।
गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः ॥ २२ ॥
शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुण्डिभिः ।
सर्वतोऽवाकिरञ्छस्त्रैरस्त्रैश्च विबुधर्षभान् ॥ २३ ॥
न ते ऽदृश्यन्त संछन्नाः शरजालैः समन्ततः ।
पुङ्खानुपुङ्खपतितैर्ज्योतींषीव नभोघनैः ॥ २४ ॥
न ते शस्त्रास्त्रवर्षौघा ह्यासेदुः सुरसैनिकान् ।
छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा ॥ २५ ॥
अथ क्षीणास्त्रशस्त्रौघा गिरिशृङ्गद्रुमोपलैः ।
अभ्यवर्षन् सुरबलं चिच्छिदुस्तांश्च पूर्ववत् ॥ २६ ॥
तानक्षतान् स्वस्तिमतो निशाम्य शस्त्रास्त्रपूगैरथ वृत्रनाथाः ।
द्रुमैर्दृषद्भिर्विविधाद्रिशृङ्गैरविक्षतांस्तत्रसुरिन्द्रसैनिकान् ॥ २७ ॥
सर्वे प्रयासा अभवन् विमोघाः कृताः कृता देवगणेषु दैत्यैः ।
कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः ॥ १८ ॥

भाषा टीका ।

इसके अनन्तर विश्वकर्मा के बनाये उस वज्रको हाथ में ग्रहण करके मुनि की अस्थि के वज्र से बलिष्ठ होकर भगवान् के तेज से भी इन्द्र युक्त होगये ॥ १३ ॥

इन्द्र सब देवतों के साथ युक्त होगये गजेन्द्र के ऊपर शोभित भये मुनिगण उनकी स्तुति करने लगे तीनों लोकों को हर्षातेसे इन्द्र दीखने लगे ॥ १४ ॥

हे राजन् ! इस प्रकार तेज से युक्त होकर यम को मारने को क्रुद्ध हुये रुद्र के तुल्य होकर असुरों के सेना पतियों से युक्त वृत्रासुर के मारने को उद्यत भये ॥ १५ ॥

तब सत्ययुग के अन्त त्रेता युगके आदि में नर्मदा के किनारे देवता असुरों के साथ में बड़ा भयङ्कर संग्राम भया ॥ १६ ॥

रुद्र वसु आदित्य अश्विनीकुमार पितर अग्नि उत्रास पवन ऋभु साध्य विश्वेदेवा इनों से संयुक्त वज्रधर अपनी माया से प्रकाश मान इन्द्र को युद्ध मे देखकर वृत्र आदिक असुर नहीं सह सके ॥ १७ ॥ १८ ॥

नमुचि शम्बर अनर्वा द्विमूर्धा ऋषभ असुर हयग्रीव शङ्कुशिरा विप्रचित्ति अयोमुख पुलोमा वृषपर्वा प्रहेति हेति उत्कल दैत्य दानव यक्ष राक्षस हजारों इल्वल वल्वल दन्दशूक वृषध्वज कालनाभ महानाभ भूतसन्ताप न वृक सुमाली माली आदिक सब दैत्यादि सुवर्णादि से भूषित होकर मृत्युसे भी अति भयङ्कर इन्द्र की सेनाको निषेधकरने लगे ॥ १९ २० ॥२१॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शतघ्नी च चतुर्हस्ता लोहकण्टकसञ्चिता ।
भुशुण्डी सर्वतो लोहकण्टकानुक्रमोन्नता ॥

इत्यभिधानम् ॥ २३ ॥

पुङ्खो मूलदेशः एकस्य मूलदेशमनु तत्संलग्नोऽपरस्य पुङ्खो यथा भवति तथा नभःस्थैर्घनैर्ज्योतींषीवेत्यनेन तेषां तद्व्याप्तिः सूचिता ॥ २४ ॥

तामेवाह । न त इति । शस्त्राणामस्त्राणां च यानि वर्षौघा तेषामोघाः नासेदुर्न प्रापुः सिद्धपथे आकाशे ॥ २५ ॥

क्षीणा अस्त्राणां शस्त्राणां च ओघा येषां गिरिशृङ्गैर्द्रुमैरुपलैश्च ॥ २६ ॥

[१] अयंपाठ तैलङ्गश्रीधरीये श्रीवीरराघवविजयध्वजीयादिपुस्तकेष्वदृश्यते ।

ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः।
पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः॥ २९॥
वृत्रोऽसुरांस्ताननुगान् मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत्।
पलायितं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः॥ ३०॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तानिन्द्रसैनिकान् शस्त्रास्त्रमस्त्राणां च पूगैः समूहैरक्षतान् स्वस्त्यान् स्वस्तिमतः सुखिनो द्रुमादिभिश्चाविक्षताभिशम्य दृष्ट्वा। वृत्रो नाथो येषां ते तत्रसुर्भीताः॥ २७॥

कृताः कृताः पुनः पुनः कृताः। कृष्णोऽनुकूलो येषां तेषु देवगणेषु। उशतीः उशन्त्यः। अकल्याण्यो रूक्षाः परुषा वाचो यथा महत्सु क्षोभकर्यो न भवन्ति तद्वत्॥ २८॥

हतो युद्धे दर्पो येषां ते। आत्तः परैर्गृहीतः सारो धैर्यं येषां ते अतिप्रसिद्धा अपि ते दैत्याः एवं ते इत्यस्यापौनरुक्त्यम्। आजिमुखे युद्धारम्भे पतिं विसृज्य पलायनाय मनो दधुः यतो हरावभक्ताः॥ २९॥

प्रधावतः पलायमानान् प्रेक्ष्य आदावेव तीव्रेण भयेन पलायितं भग्नं च तदनुबलं सैन्यं तत्र प्रेक्ष्य एतद्वक्ष्यमाणं बभाषे॥३०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तथा सुमालिप्रभृतयश्च सर्वे कार्तस्वरपरिच्छदाः सुवर्णमयाः परिच्छदाः परिकरा येषां ते मृत्योरपि दुरासदं दुष्प्रापमिन्द्रसेनाग्रमिन्द्रसेनाया अग्रं पुरोभागं प्रतिषिध्यावरुध्य॥ २१॥

असम्भ्रान्ता अपरवशाः सन्तः दुर्मदा सिंहनादेनाभ्यद्रवन् गदादिभिः शस्त्रैश्च विबुधर्षभान् सुरान् सर्वतोऽवाकिरन् तत्र शतघ्नी चतुर्हस्ता लोहकण्टकसंयुक्ता॥ २२॥ २३॥

पुङ्खो मूलदेशः एकस्य पुङ्खमनु तदनन्तरमपरस्य पुङ्खो यथा भवति तथा समन्तात्पतितैः शरजालैः संछन्नास्ते देवा न दृश्यन्त यथा नभोघनैर्नभःस्थैर्मेघैराच्छन्नानि ज्योतींषि इत्यनेन तेषां तद्व्याप्तिः सूचिता॥ २४॥

तामेवाह। नत इति। ते शस्त्रास्त्रमस्त्राणां च यानि वीर्याणि तेषामोघाः सङ्घाः सुरसैनिकांस्तान्न प्रापुः किन्तु। लघुहस्तैर्हस्तलाघवशालिभिस्तैर्देवैः सहस्रधा सिद्धपथे आकाशे छिन्ना बभूवुः॥ २५॥

अथ क्षीणाश्छिन्ना अस्त्रशस्त्राणामोघा येषां ते दानवा गिरिशृङ्गैर्द्रुमैरुपलैः पाषाणैश्च सुराणां बलमभ्यवर्षन् तान् गिरिशृङ्गादीन् पूर्ववद्बाणैश्छित्त्वा छित्त्वा ॥ २६॥

अथ वृत्रो नाथो येषां ते ऽसुराः सर्वे अस्त्रशस्त्राणां पूगैः समूहैरक्षतानताडितानत एव स्वस्तिमतः सुखिनः तथा द्रुमैर्दृषद्भिः पाषाणैर्विविधैरद्रीणां शृङ्गैश्चाक्षतानिन्द्रसैनिकानभिशम्य दृष्ट्वा सर्वेऽसुरास्तत्रसुः भीताः॥ २७॥

देवगणेषु दैत्यैर्ये कृताः प्रयासास्ते सर्वे विमोघा व्यर्था अभवन् तत्र हेतुं वदन् देवगणान्विशिनष्टि। कृष्णानुकूलेष्विति। कृष्णोऽनुकूलो येषां तेषु तत्र दृष्टान्तमाह। यथेति। क्षुद्रैः प्रयुक्ताः उशती उशत्योऽकल्याण्यः रूक्षाः परुषा वाचो यथा महत्सु विमोहकाः क्षोभका न भवन्ति तथेति॥ २८॥

हरौ भगवत्यभक्ताः अत एवान्तःसुरैर्गृहीतः सारो बलं येषाम् अत एव हतः युद्धे दर्पो गर्वो येषां तेऽसुरा वितथं व्यर्थं स्वप्रयासं निरीक्ष्य अधुनातनमाकं सर्वे प्रयासाः व्यर्थाः एवेत्यालोच्य ते ऽतिप्रसिद्धा अपि दैत्या एवं ते इत्यस्यापौनरुक्त्यमाजिमुखे युद्धारम्भे पतिं वृत्रं विसृज्य पलायनाय मनो दधुः चक्रुः॥ २९॥

अथ वीरो वृत्रः प्रधावतः तीव्रेण भयेन पलायमानांस्ताननुगान् भृत्यान् प्रेक्ष्य तथा किञ्चिद्भग्नमवशिष्टं पलायितं बलं च प्रेक्ष्य विहस्येदं वक्ष्यमाणं बभाषे॥ ३०॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कार्तस्वरपरिच्छदाः सुवर्णालङ्काराः॥ २१॥ २२॥

अवाकिरन् अवर्षन्॥ २३॥

प्रावृषि वर्षाकाले॥ २४॥

लघुहस्तैः शीघ्रवेधिभिः देवैः सिद्धपथे व्योम्नि स्वप्रासैः पूर्वं मध्यमार्गे एव छिन्नाः॥ २५॥ २६॥

वृत्रो नाथो येषां ते तथा दृषद्भिः पाषाणैः॥ २७॥

प्रयासाः प्रहारलक्षणाः प्रयत्नाः कृष्णोऽनुकूलोऽनुग्रहाऽभिमुखो येषां ते तथा तेषु उशतीः हिंसनाः "उशरिश हिंसायाम्" इति धातुः महत्सु दुर्वासः प्रभृतिषु यतिषु क्षुद्रैः हिंसडिम्भकादिजनकल्पैः॥ २८॥

पतिं वृत्रम् अस्तसाराः निरस्तबलाः॥ २९॥

मनस्वी प्रशस्तमनाः॥ ३०॥ ३१॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ते देवाः पुङ्खः शरस्य मूलदेशः एकस्य पुङ्खमनु पतितो यः शरस्तस्य पुङ्खमन्येवं पतितैः। नभःस्थैर्घनैर्ज्योतींषीत्यनेन तेषां तद्व्याप्तिः सूचिता॥ २४——२६॥

निशाम्य दृष्ट्वा तत्रसुर्भीताः॥ २७॥

कृताः कृताः पुनःपुनः कृताः यथा महत्सु वैष्णवेषु उशतीः

कालोपपन्नां रुचिरां मनस्विनामुवाच वाचं पुरुषप्रवीरः।
हे विप्रचित्ते! नमुचे! पुलोमन्!मयानर्वन्! शम्बर! मे शृणुध्वम् ॥ ३१ ॥
जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता।
लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तम् ॥ ३२ ॥
द्वौ सम्मताविह मृत्यू दुरापौ यद्ब्रह्मसन्धारणया जितासुः।
कलेवरं योगरतो विजह्याद्यदग्रणीर्वीरशयेऽनिवृत्तः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां षष्ठस्कन्धे वृत्रासुरयुद्धंनाम-
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

रुषत्यः यूयं शीघ्रं म्रियध्वमित्यकल्याणयः। रूक्षाः परुषा वाचः रे रे अधमा! इत्याद्याः ॥ २८—३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एकस्य वृक्षस्य मूलदेशमनुवर्तमान इतरवृक्षो यथा भवति तथा पतितैः नभोघवैः नभःस्थमेघैः यथा ज्योतींषि न दृश्यन्ते इत्यदर्शनमात्रे दृष्टान्तः ॥ २४ ॥

ते शस्त्रास्त्रवर्षौघाः यतो देवैः सिद्धपथे आकाशे संछिन्ना अतः सुरसैनिकान् आसेदुः प्रापुः ॥ २५ ॥

उपलैः पाषाणैः ॥ २६ ॥

तानिन्द्रसैनिकान् शस्त्रास्त्रपूगैरक्षतान् द्रुमादिभिश्चाविक्षतान् स्वस्तिमतो निशाम्य दृष्ट्वा वृत्रबान्धवाः अत्रसुः ॥ २७ ॥

कृताः कृताः भूयोभूयः कृताः प्रयासाः विशेषतः मोघाः निष्फला अभवन् रुषतीः रुषत्यः दीपवत्यः रूक्षवाचः रूक्षाः नीरसाः वाचः ॥ २८ ॥ २९ ॥ ३० ॥

भाषा टीका।

उन मद वाले असुरों ने सिंहनाद करके देवतों को गदाओंसे परिघों से बाणों से प्रास तोमर मुद्गरों से त्रिशूलों से फरसाओं से तरवारों से तोपों से भुशुण्डियों से चारों ओर से देवतों को अस्त्र शस्त्रों से प्रहार किया ॥ २२ ॥ २३ ॥

जैसे आकाश में मेघ में चन्द्रादि ज्योति ढकजाती हैं तैसे बाणों की वृष्टि से सब देवता ढक गये सो नहीं दीखे ॥ २४ ॥

असुरों के वे शस्त्र अस्त्रों के समूह देवतों के नहीं लगे देवतों ने बड़े सफाई के हाथ से जो शस्त्र चलाये तिनसे वे शस्त्र आकाश में कटगये ॥ २५ ॥

इसके अनन्तर असुरों के अस्त्र शस्त्र जब क्षीण होगये तब पर्वतों के शिखर पत्थर आदिकों से देवतों के सैन्य को मारने लगे तब देवतों ने पहिले सरी के सब शस्त्रादि काट दिये ॥ २६ ॥

फिर तो वृत्रासुर के संग वाले दैत्यो के जब पर्वतादिकों से भी देवतों को कुछ नहीं भया और बड़े शस्त्र अस्त्र पेड़ पत्थर भी व्यर्थ होगये तब इन्द्र सेनापतियों को देखकर असुर बड़े त्रास को प्राप्त भये ॥ २७ ॥

देवगणोंमें दैत्यों ने जो प्रयास किये सो सब व्यर्थ होगये जैसे श्रीकृष्ण भक्तों को क्षुद्र लोगों के परुष वचन कोई बाधा नहीं करते हैं ॥ २८ ॥

श्री हरि में अभक्त वे दैत्य अपने प्रयास को व्यर्थ देखकर युद्ध के गर्व के नष्ट होने से धैर्यसे छूट गये तब समर को छोड़कर भगने के वास्ते मन में निश्चय करते भये ॥ २९ ॥

अपने बलको भगते देखकर और भगते देखकर अपने अनुगामी भागते हुये असुरों को देखकर बड़ा उत्साही वृत्रासुर बोला ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

मदेव विशिनष्टि। कालोपपन्नामवसरोचितां मनस्विनां रुचिरां हे मय! हे अनर्वन्! मे वाचं शृणुत ॥ ३१ ॥

ततो मृत्योरिह यशो लोकः स्वर्गश्च यदि स्यात्। अत नहि अमुं मृत्युं युक्तं समीचीनं प्राप्तं वा ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ब्रह्मसन्धारणया कलेवरं जह्यादिति यत्स एको मृत्युः वीरशय्य रणभूमावनिवृत्तोऽपराङ्मुखः सन् जह्यादिति यत्स एकः । तौ द्वाविह शास्त्रे सम्मतौ मृत्यू । तथा च स्मृतिः

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।

परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ।

इति ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतद्भाव इत्येतदेव प्रपञ्चयति । पुरुषश्रेष्ठः मनस्वी प्रशस्तमनस्कः वृत्रः कालोचितां मनस्विनां रुचिरां च वाचमुवाच । उक्तमेवाह । हे विप्रचित्ते ! इत्यादिना यावदध्यायपरिसमाप्ति । हे नमुचे ! हेऽनर्वन् ! मे वाचं श्रृणुध्वम् ॥ ३१ ॥

सर्वतः सर्वस्य जातस्य जन्तोरेव मृत्युर्ध्रुवः निश्चितः मृत्युं विधिनापि । यस्य मृत्योरिह लोके प्रतिक्रिया प्रतीकारः न कृता नास्ति । किञ्च । शत्रुभ्यो मृत्युभयनिमित्तात्पलायनादयशस्करात्परलोकहानिकरात्तेभ्यो मृत्युरेव स्वर्गसंपादकः कीर्त्तिकरश्च श्रेयान् सङ्ग्रामे शत्रुभ्यो मृत्युर्दुर्लभश्चातस्तमेव वृणीतेत्याह । लोक इति द्वाभ्याम् । अथ हे दानवाः ! ततः सङ्ग्रामे मृत्योर्यदि लोकः वीरस्वर्गः यशश्च स्यात्तर्ह्यमुं मृत्युं युक्तं प्राप्तं को नाम न वृणोति किन्तु वृणुयादेव ॥ ३२ ॥

दुरापौ दुर्लभौ द्वौ मृत्यू इह लोके शास्त्रसम्मतौ कौ तौ तावज्जितासुर्जितान्तर्बाह्येन्द्रियप्राणो योगासक्तः ब्रह्मसन्धारणया ब्रह्मविषयकधारणायोगेन कलेवरं त्यजेदिति यत्स एकः तथा वीरशये रणभूमौ अनिवृत्तोऽपराङ्मुखः कलेवरं जह्यादिति यत् सोऽपरो मृत्युः तथा चोक्तम् ।

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।

परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ।

इति ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यस्य मृत्योः प्रतिक्रिया परिहारः अथ यदि (१) यस्माल्लोको यशश्च स्यातां ततस्तर्हि कः क्षत्रियादिकल्पः युद्धे युद्धमूर्ध्नि प्राप्तं मृत्युं न वृणीत नामेत्यन्वयः ॥ ३२ ॥

इतोऽपि युद्धमरणं प्रशस्तमित्याह । द्वाविति । योगरतो जितप्राणश्च यो ब्रह्मसन्धारणया ब्रह्मध्यानेन कलेवरं विजह्यादिति । यद्युद्धादनिवृत्तोऽग्रणीः । यो वीराणामग्रतो गत्वा वीरशये युद्धाङ्गणे शरीरं जहातीति । यच्च मरणम् । तयोर्द्वावेतौ मृत्यू दुष्प्रापौ सम्मतौ शास्त्रविहिताविरयन्वयः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततो मृत्योरिह यशः स्वर्गश्च यदि स्यात् अथ तर्हि अमुं मृत्युं युक्तं समुचितम् ॥ ३२ ॥

वीरशये सङ्ग्रामे अनिवृत्तः अभिमुखस्थः ॥ ३३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

षष्ठस्य दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कालोपपन्नां तत्कालोचिताम् ॥ ३१ ॥

जातस्योत्पन्नस्य मृत्युर्ध्रुवः आवश्यकः । यदि तत आवश्यकादपि इह यशः लोकः स्वर्गश्च स्यात् । अथ तर्हि अमुं मृत्युं युक्तं योग्यं को न वृणीत ॥ ३२ ॥

इह लोके द्वौ मृत्यू सम्मतौ योग्यौ तौ च दुरापौ दुर्लभौ । वशासुः वशा असवः प्राणा इन्द्रियाणि येन । योगरतो भगवज्ज्ञानभक्तिनिष्ठः स ब्रह्मसन्धारणया कलेवरं जह्यात् इत्येकः । यश्चाग्रणीः सन् वीरशये सङ्ग्रामे निवृत्तो मृत इति द्वितीयः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

दशमाध्यायार्थप्रकाशः ॥ १० ॥

भाषा टीका ।

उस काल के उचित और उत्साही पुरुषों को रुचिकर वचन को वह पुरुषों मे वीर वृत्रासुर बोला कि हे ! विप्र चित्ति ।

---

(१) मृत्योः ।

भाषाटीका।

हे नमुचि हे पुलोमन्‌! हे मय! हे अनर्वन्! हे शम्बर! आप लोग मेरे वचन को सुनो ॥ ३१ ॥

पैदा होने वाले का अवश्य सब प्रकार से मरण होना है जिस के •कि निवारण का कोई भी उपाय नहीं है तब तो युद्ध मे मरने वाले को ब्रह्म लोक और यश होता है तो ऐसे मृत्यु को कौन नहीं चाहेगा ॥ ३२ ॥


इस संसार मे दो मृत्यु बड़े दुर्लभ हैं जिस की सब शास्त्र प्रशंसा करते हैं एकतो पवन को जीत कर ब्रह्म धारणा से प्राण त्यागना दूसरा युद्ध मे नहीं हट कर सम्मुख मे मरजाना ॥ ३३ ॥

इति श्रीभागवत षष्ठस्कन्ध के दशमे अध्यायका

भाषानुवाद ब्रह्मण्याचार्यकृत

समाप्त ॥ १० ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे दशमोऽध्यायः समाप्तः ॥ १० ॥



॥ एकादशोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

त एवं शंसतो धर्मं वचः पत्युरचेतसः ।
नैवागृह्णन् भयत्रस्ताः पलायनपरा नृप ! ॥ १ ॥
विशीर्यमाणां पृतनामासुरीमसुरर्षभः ।
कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥ २ ॥
दृष्ट्वातप्यत संक्रुद्ध इन्द्रशत्रुरमर्षितः ।
तान्निवार्यौजसा राजन् ! निर्भर्त्स्येदमुवाच ह ॥ ३ ॥
किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः ।
न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ॥ ४ ॥
यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका ! हृदि ।
अग्रे तिष्ठत मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ॥ ५ ॥
एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ।
व्यनदत् सुमहाप्राणो येन लोका विचेतसः ॥ ६ ॥
तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ।
निपेतुर्मूर्छिता भूमौ यथैवाशनिना हताः ॥ ७ ॥
ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरङ्गदुर्मदः ।
गां कम्पयन्नुद्यतशूल ओजसा नालं वनं यूथपतिर्यथोन्मदः ॥ ८ ॥
विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदाम् ।
चिक्षेप तामापततीं सुदुःसहां जग्राह वामेन करेण लीलया ॥ ९ ॥
स इन्द्रशत्रुः कुपितो भृशं तया महेन्द्रवाहं गदयोरुविक्रमः ।
जघान कुम्भस्थल उन्नदन् मृधे तत्कर्म सर्वे समपूजयन्नृप ! ॥१०॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकादशे तु वृत्रस्य युध्यमानस्य वज्रिणा ।
भक्तिज्ञानबलोद्रेकाश्चित्रा वाचोऽनुवर्णिताः ॥ १ ॥

शंसतः कथयतः पत्युर्वचः ॥ १ ॥

कालानुकूलैः कालानुवर्तिभिः। काल्यमानां विद्राव्यमाणाम् ॥२॥

अमर्षितोऽसहमानस्तांस्त्रिदशान्निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणमुवाच ॥ ३ ॥

तदेवाह द्वाभ्याम् । मातुरुच्चरितैः पुरीषप्रायैः । प्रथमान्तपाठे देवानां सम्बोधनम् । पृष्ठतो हतैर्वस्तैः किञ्चित् न यशो नापि धर्मः । तदेवाह । नहीति ॥ ४ ॥

प्रधने सङ्ग्रामे । सारं धैर्यं हृदि चेत्तर्हि हे क्षुल्लकाः ! क्षुद्राः ! मात्रं क्षणमात्रमग्रे तिष्ठत । न चेदिह लोकभोगे स्पृहास्ति ॥ ५ ॥

सुरगणान् रिपून् । सुमहान् प्राणो बलं यस्य । येन विचेतसो बभूवुः ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृत्रस्य विस्फोटनेन नादेन ॥ ७ ॥

उद्यतं शूलं येन । नालं वनं नलानां वनम् उद्धतो मदो यस्य स यूथपतिर्गजो यथा मर्दयति ॥ ८ ॥ ९ ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं वृत्रेण प्रतिबोधितानपि पलायमानानसुरान् वीक्ष्य स वृत्रस्तानभिवाञ्छ युयुत्सुरिन्द्रं प्रत्युवाचेत्याह मुनिः । त इति । एवं हे नृप ! पत्युर्वृत्रस्य धर्म्यं धर्मादनपेतं वचः शंसतः कथयतः सतोऽपि भीताः । अत एव पलायमानासक्ताः अत एवाचेतसोऽतिभयेन युद्धानासक्तचित्तास्ते असुराः नैवागृह्णन् पत्युर्वचो नाऽपालयन् ॥ १ ॥

ततोऽसुरर्षभो वृत्रः कालोऽनुकूलो येषां तैरिन्द्रादिभिर्देवैर्विशीर्यमाणां विशेषेण पीड्यमानामत एवानाथवत् काल्यमानां विद्राव्यमाणामासुरीं पृतनाम् सेनाम् ॥ २ ॥

इन्द्रामर्षिणोऽसहमानः संक्रुद्धः नितरां क्रुद्धः हे राजन् ! तां पृतनामोजसा स्वबलेन निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणं देवान् प्रत्युवाच ॥ ३ ॥

तदेवाह द्वाभ्याम् । मातुः स्वस्य जनन्या उच्चरितैः पुरीषप्रायैरसुरैः प्रथमान्तपाठे देवानां सम्बोधनम् । धावद्भिः पलायमानैरपि पृष्ठतो हतैर्हन्यमानैरसुरैः किं प्रयोजनम् । न तद्वधेन यशो न स्वर्गश्चेति भावः । तदेवाह । न हीति । भीतस्य वधः शूरमात्मानं मन्यमानानां न हि श्लाघ्यः । नापि स्वर्ग्यः स्वर्गहेतुश्च ॥ ४ ॥

अतो हे क्षुल्लकाः ! अल्पबलाः ! वो युष्माकं हृदि प्रधने युद्धे श्रद्धा सारं बलं वा यद्यस्ति विषयभोगेच्छा नो चेत्तर्हि मात्रं क्षणमात्रं ममाग्रे तिष्ठत ॥ ५ ॥

एवं क्रुद्धो वृत्रः सुरगणान् रिपून् वपुषा देहेन भीषयन् महान् प्राणो बलं यस्य तादृशो व्यनदत् । नादं विशिनष्टि । येन नादेन लोका जनाः विचेतसः मूर्च्छिता बभूवुः ॥ ६ ॥

तेन वृत्रस्य विस्फोटनेन नादेन सर्वे देवगणाः मूर्च्छिताः सन्तो भूमौ निपेतुः पतितवन्तः यथाशनिना हताः जनाः पतन्ति निपतन्ति तद्वत् ॥ ७ ॥

आतुरं मूर्च्छितमत एव निमीलिताक्षं सुरसैन्यमोजसा बलेन पद्भ्यां ममर्द मर्दितवान् । यथोन्मदो यूथपतिर्गजः नालं नालानां सम्बन्धि वनं मर्दयति । कथम्भूतो ममर्द रणरङ्गे दुर्निवारो मदो यस्य । उद्यतं शूलं येन । क्ष्मां पृथिवीं कम्पयन् ॥ ८ ॥

एवं स्वसैन्यं मर्दयन्तं वृत्रं विलोक्य वज्रधर इन्द्रोऽत्यमर्षिणोऽभिमुखं द्रवते आगच्छते शत्रवे महतीं गदां चिक्षेप प्रयुक्तवान् । स च वृत्रस्तामापतन्तीं दुःसहां दुःखेनापि सोढुमशक्यां गदां वामेन करेण लीलया सुखेन जग्राह गृहीतवान् ॥ ९ ॥

तया च गृहीतया गदया भृशं नितरां क्रुद्ध इन्द्रशत्रुर्वृत्रः स्वलन्तीव नदन् उरवो विक्रमाः पादविन्यासाः यस्य तादृशो महेन्द्रवाहमैरावतं जघान । कमवधयं तत्राह । कुम्भस्थलम् मृधे युद्धे तस्य वृत्रस्य कर्म तद्गदया तद्वाहनताडनरूपं कर्म सर्वे द्युचाराः समपूजयन् बहुमन्यन्त ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अचेतसो बुद्धिमत्प्रवृत्तिस्मरणरहिताः ॥ १ ॥

काल्यमानां विद्राव्यमाणाम् ॥ २ ॥

ओजसा राजन् ईप्सन् स वृत्रः तां स्वपृतनां निवार्य द्रावयतो देवानभिर्भर्त्स्येदं वाक्यमब्रवीत् ह किल ॥ ३ ॥

हे देवाः ! यूयं मातुरविनेरुच्चारिताः अधमेहनवानिर्गताः किम् उभयेषामपि देहानिष्क्रान्तत्वाविशेषात् कुतोऽस्माकमत्राह । धावद्भिरिति । पृष्ठतो हतैर्धावद्भिः असुरनायकैः वः युष्माकं किं प्रयोजनम् अधर्मत्वात् अयमपि कुतोऽत्राह । नहीति । स्वर्ग्यः स्वर्गप्राप्तियोग्यः ॥ ४ ॥

हे क्षुल्लकाः ! अल्पाः ! देवाः ! युष्माकं हृदि सारं धैर्यं चास्ति मात्रं क्षणकालं ग्राम्यसुखे विषयभोगजनितानन्दे ॥ ५ ॥

विचेतसो मूर्च्छिताः ॥ ६ ॥

एतदेव स्पष्टयति । तेनेति । विस्फोटनं प्रकाण्डताडनम् ॥ ७ ॥

नालं नलसमुदायलक्षणं वनं यूथपतिर्गजः ॥ ८ ॥

अभिद्रवते अभ्यागच्छते ॥ ९ ॥

महेन्द्रवाहमैरावतम् ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अस्पृष्टवाहि समवन्तीति क्रोधेनैवासम्भवोक्तिः ॥ १—२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

> एकादशे तु संग्राममध्ये वृत्रस्य वर्णिताः ।
> शौर्यमय्यो गिरः काश्चित् प्रेममय्यश्च काश्चन ॥

अनाथवत् अनाथानिव नाशिवशान् ॥ १—३ ॥

प्रथमान्तपाठे सम्बोधनं हे मातुरुच्चारिताः ! पुरीषतुल्या देवाः ! पृष्ठतो हतैर्दैत्यैः किम् । न यशो नापि धर्मः । तृतीयान्तपाठे दैत्यानां विशेषणम् । भीतानां वधो न श्लाघ्यः । कर्तृकर्मणोरुभयोरपि यशोधर्माभावव्यञ्जकत्वात् जुगुप्सित इत्यर्थः ॥ ४ ॥

प्रधने युद्धे सारं धैर्यं हे क्षुल्लकाः ! क्षुद्राः ! ॥ ५ ॥ ६ ॥

कै इति स्वार्थं विस्फोटितम् ऊरुगण्डयोः करतलाघातस्वनेन च ॥ ७ ॥

आतुरत्वादेव मुद्रितनेत्रम् । नलानां वनं नालम् । यूथपतिर्हस्ती ॥ ८ ॥

अभिद्रवते सम्मुखमागच्छते ॥ ९ ॥ १० ॥

ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्रिः कुलिशाहतो यथा ।
अपासरद्भिन्नमुखः सहेन्द्रो मुञ्चन्नसृक् सप्तधनुर्भृशार्तः ॥ ११ ॥
न सन्नवाहाय विषण्णचेतसे प्रायुङ्क्त भूयः स गदां महात्मा ।
इन्द्रोऽमृतस्यन्दिकराभिमर्शवीतव्यथः क्षतवाहोऽवतस्थे ॥ १२ ॥
स तं नृपेन्द्राहवकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य ।
स्मरंश्च तत्कर्म नृशंसमंहः शोकेन मोहेन हसन् जगाद ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इन्द्रेण युध्यमानस्य वृत्रस्य पूर्वजन्मगतहरिभक्तत्वसूचकानि वाक्यानि वर्णयति । त एवमित्येकादशाध्यायेन । धर्मं युद्धधर्मं शंसतः कथयतः ॥ १ ॥

कालानुकूलैरसुरपराभवकालानुसारिभिः । अनाथवत्कालयमानां विद्राव्यमाणाम् ॥ २ ॥

अमर्षितः त्रिदशपराक्रममसहमानः तान् निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणं सुरान् प्रत्युवाच ॥ ३ ॥

वो युष्माकं मातुरुच्चरितैर्मलनिभैः देवैः पृष्ठतो हतैर्दैत्यैः किं न किमपि यशोधर्मविक्रमः । यतो भीतवधः शूरमानिनां श्लाघ्यो न भवति । हे क्षुल्लकाः ! क्षुद्राः ! यदि वः प्रधने युद्धे श्रद्धा हृदि सारं धैर्यं च ग्राम्यसुखे स्पृहा च न चेत्तर्हि मे अग्रे मात्रं क्षणमात्रं तिष्ठत । सुमहान् प्राणो बलं यस्य सः । येन नादेन लोकाः विचेतस आसन् ॥ ४ ॥ ५ ॥ ६ ॥

तेन नादेन विस्फोटनेन हस्ताभ्यामुरुप्रताडनेन च ॥ ७ ॥

भयान्निमीलिताक्षम् । नाळं नलवनम् । यूथपतिः गजराजः ॥ ८ ॥ ९ ॥ १० ॥

भाषा टीका ।

श्रीशुकदेव जी बोले हे नृप ! अपने मालिक वृत्रासुर के उसप्रकार कथन को भी वेहोस होकर भय से त्रस्त होकर भागने में तत्पर होकर उन असुरों ने नहीं ग्रहण किया ॥ १ ॥

अनाथ सरीकी भगाई बिखरती हुई अपनी सेना को देखकर काल के अनुकूल होने से देवतों के बल को देख कर वृत्रासुर बोला ॥ २ ॥

हे राजन् ! इन्द्र का शत्रु वृत्रासुर नहीं सह कर क्रोधित होकर दुर्वाद कह कर निवारण करके देवतों से यह वचन बोला ॥ ३ ॥

तुम लोग केवल माता के मलरूप हो दौडकर भगने वाले दैत्यों को मारते हो जो लोग अपने को शूर मानते हैं उनको तो भयभीत का मारना न यश कारक है न स्वर्ग दायक है ॥ ४ ॥

यदि तुम लोगों को युद्धमे श्रद्धा है हे क्षुद्र हो ! तुम्हारे हृदयमे यदि बल हो और यदि विषय भोगों में इच्छा न होवै तो मेरे आगे खडे मात्र रहो ॥ ५ ॥

इस प्रकार क्रोधित होकर शत्रु देवतों को डराता हुआ घोर शब्द को करने लगा जिस से तीनों लोक वेहोस होगये ॥ ६ ॥

तिस वृत्रासुर के शब्द मे सब देवता वज्र से मारे पर्वत सरीके मूर्छित होकर भूमि में गिरने लगे ॥ ७ ॥

तबतो युद्ध में बडा मदवाला वृत्रासुर आंख मीच कर बडे दुःखित देव सेना को दोनों पावों से मर्दन करने लगा पृथिवी को कपावने लगा अपने बल से त्रिशूल को उठा कर ऐसा मर्दन करने लगा जैसे मत वाला हस्ती नरसल के वन को टोड डाले ॥ ८ ॥

उस को देखकर वज्रधारी इन्द्र बडा क्रोधित भया दौडते हुये अपने शत्रु के अर्थ बडा गदा का प्रहार करता भया आती हुई उस गदा को वृत्रासुर ने सहज से बामे हाथ से बडी कठिन उस गदा को पकडलिया ॥ ९ ॥

बडे विक्रम वाले उस इन्द्र शत्रु वृत्रासुर ने कुपित होकर इन्द्र के वाहन ऐरावत के ऊपर उसी गदा को चलाया सो उस से ऐरावत के कुम्भस्थल को मारा उस कार्य को देखकर सबों ने बडा आश्चर्य माना और बल की प्रशंसा करी ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तधनुःप्रमाणं देशम् ॥ ११ ॥

सन्नोऽवसन्नो वाहो यस्य तस्मै न प्रायुङ्क्त । अमृतस्यन्दी अमृतस्रावी यः स्वकरस्तेनाभिमर्शः स्पर्शस्तेन वीतव्यथो गतदुःखः क्षतो वाहो यस्येन्द्रस्य स तथाभूतोऽवतस्थे ॥ १२ ॥

स वृत्रः हे नृपेन्द्र ! आहवकाम्यया युद्धेच्छयावस्थितम् । भ्रातृहणं भ्राता विश्वरूपस्तस्य हन्तारम् । नृशंसं क्रूरं तदेवांहः पापं तस्य कर्म स्मरन् ॥ १३ ॥

वृत्र उवाच

दिष्ट्या भवान् मे समवस्थितो रिपुर्यो ब्रह्महा गुरुहा भ्रातृहा च ।
दिष्ट्यानृणोऽद्याहमसत्तम ! त्वया मच्छूलनिर्भिन्नदृषद्धृदाचिरात् ॥ १४ ॥
यो नोऽग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य ।
विश्रभ्य खड्गेन शिरांस्यवृश्चत् पशोरिवाकरुणः स्वर्गकामः ॥ १५ ॥
ह्रीश्रीदयाकीर्तिभिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यम् ।
कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं समदन्ति गृध्राः ॥ १६ ॥
अन्येऽनु ये त्वेह नृशंसमज्ञा ये ह्युद्यतास्त्राः प्रहरन्ति मह्यम् ।
तैर्भूतनाथान् सगणान्निशातत्रिशूलनिर्भिन्नगलैर्यजामि ॥ १७ ॥
अथो हरे ! मे कुलिशेन वीर ! हर्ता प्रमथ्यैव शिरो यदीह ।
तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये ॥ १८ ॥
सुरेश ! कस्मान्न हिनोषि वज्रं पुरःस्थिते वैरिणि मय्यमोघम् ।
मा संशयिष्ठा न गदेव वज्रं स्यान्निष्फलं कृपणार्थेव याच्ञा ॥ १९ ॥
नन्वेष वज्रस्तव शक्र ! तेजसा हरेर्दधीचेस्तपसा च तेजितः ।
तेनैव शत्रुं जहि विष्णुयन्त्रितो यतो हरिर्विजयः श्रीर्गुणास्ततः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यो ब्रह्महा ब्राह्मणं हतवान् विशेषतः स्वगुरुं मम च भ्रातरं स भवानग्रतः समवस्थितः एतद्दिष्ट्या भद्रं जातम् । दिष्ट्येत्यव्ययमानन्दार्थे । हे असत्तम ! मम शूलेन निर्भिन्नं दृषत्तुल्यं हृत् हृदयं यस्य तेन त्वया निमित्तभूतेनाद्याचिरादेव भ्रातुरनृणोऽहं स्यामेतच्च दिष्ट्या ॥ १४ ॥

स्वर्गकामो यो भवानवृश्चत् स्वर्गकामो याज्ञिकः पशोरिवेति वा ॥ १५ ॥

तं त्वामस्पृष्टवह्निमदग्धदेहं समदन्ति । वर्तमानसामीप्ये वर्तमानवन्निर्देशः ॥ १६ ॥

अन्येऽपि ये अज्ञा इह त्वा त्वां नृशंसमनु मह्यमुद्यतास्त्राः सन्तो यदि प्रहरन्ति तैर्भूतनाथान् भैरवादीन् यक्ष्यामि । कथंभूतैः । निशातं तीक्ष्णीकृतं यन्मम त्रिशूलं तेन निर्भिन्ना गला येषां तैः ॥ १७ ॥

अथो अथवा । हरे ! भो इन्द्र ! यदि भवानेव मम शिरो हर्ता हरिष्यति तत्र तथा सत्यनृणो [illegible] सन् भूतेभ्यो बलिं देहेन विधाय मनस्विनां पादरजः प्रपत्स्ये धीराणां पदं प्राप्स्यामि ॥ १८ ॥

जीवितादपि मृत्युरेव ममाभिमत इत्याशयेनाह । सुरेशेति । न हिनोषि न क्षिपसि । गदेव विफलो यास्यतीति संशयं माकार्षीः । कृपणार्थः प्रयोजनं यस्याः सा याच्ञा यथा निष्फला तथा न स्यात् ॥ १९ ॥

अमोघत्वे हेतुं वदंस्तं प्रोत्साहयति । नन्विति । तेजितस्तीक्ष्णीकृतः । शत्रुं मां जहि । विष्णुना यन्त्रितः प्रेरितः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमैरावतो वृत्रस्य गदयातीव विह्वलस्ताडितो वज्रायुधाहतोऽद्रिरिव विघूर्णितो भ्राम्यमाणः भिन्नं मुखं यस्य सः । नितरामार्तः असृग्रक्तं मुञ्चन् सहेन्द्रः सप्तधनुःप्रमाणमपासरत्पश्चादगच्छत् ॥ ११ ॥

स वृत्रो महात्मा युद्धधर्माभिज्ञः । अत एव सन्नवाहाय सन्नः अवसन्नः दुःखितो वाहो यस्य तस्मै दुःखितचित्तायेन्द्राय पुनर्गदां न प्रायुङ्क्त । तत इन्द्रः अमृतस्राविस्वकराभिमर्शेन विगता व्यथा यस्य । तथात्वेन कृतो वाहो यस्य । तथामृतोऽभितष्ठौ धृत्वाह इति पाठे पूर्वं हतो वृत्रेण ताडितो यो वाहो गजः येनेन्द्रेणामृतस्यन्दिकराभिमर्शेन वीतव्यथः गतव्यथः अमृतस्यन्दिकराभिमर्शवीतव्यथः । कृतो वाहो यस्येत्यर्थः । अभितष्ठौ अभिमुखं स्थितः ॥ १२ ॥

हे नृपेन्द्र ! स वृत्रः आहवकाम्यया युद्धेच्छया अग्रस्थितं वज्रम् आयुधं यस्य तम् । भ्रातृहणं भ्रातरं विश्वरूपं हतवन्तं रिपुमिन्द्रं विलोक्य तस्येन्द्रस्य कर्म भ्रातृहननरूपं नृशंसं क्रूरमंहः पापं शोकेन हेतुना स्मरन्नप्यात्मोत्थेन हसन् जगादेन्द्रं प्रत्युवाच ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गदितमेवाह । दिष्ट्येत्यादिना यावदध्यायसमाप्ति । यो भवान् रिपुः दिष्ट्या दैववशान्ममाग्रतः समवस्थितः प्राप्तः कथंभूतः यस्त्वं ब्रह्महा :ब्राह्मणं हतवान् । तत्रापि स्वगुरुं मम च भ्रातरं हतवान् । हे असत्तम मच्छूलेन निर्भिन्नं दृषत्तुल्यं हृदयं यस्य तेन त्वया निमित्तभूतेनाद्याचिरान्मम भ्रातुर्विश्वरूपस्यानृणोऽहं दिष्ट्या भविष्यामि ॥ १४ ॥

करुणारहितः यो भवान्नोऽस्माकमग्रजस्य द्विजातेस्तत्रापि ब्रह्मविदः गुरोरपापस्य पुनर्दीक्षितस्य यज्ञियदीक्षायामवस्थितस्य विश्वास्य शिरांसि खड्गेनावृश्चिच्छेद यथा स्वर्गकामो याज्ञिकः पशोः शिरश्छिनत्ति तद्वत् । द्विजातित्यादीनि विशेषणान्यवध्यत्वसूचकानि ॥ १५ ॥

अतो ह्रिया लज्जया श्रिया सम्पदा दयया कीर्तिभिर्यशोभिश्चोज्झितं परित्यक्तं निकृष्टेन स्वकर्मणा पुरुषादैः पिशाचैरपि गर्ह्यं निन्द्यं त्वामद्य मच्छूलेन विभिन्नो देहो यस्य । अस्पृष्टवह्निमवग्धदेहमित्यर्थः । गृध्राः खन्यगदन्त्यत्स्यन्ति "वर्तमानसामीप्ये वर्तमानवद्वा" इति लट् ॥ १६ ॥

अन्ये अपि च नृशंसं त्वामनुसृत्य ये देवा भक्ताः मूढाः सन्तः इह युद्धे उद्यतास्त्राः मह्यं यदि प्रहरन्ति । तर्हि तैर्निशातेन तीक्ष्णेन त्रिशूलेन निर्भिन्ना गला: कण्ठा येषां तैः । सगणान् भूतनाथान् यजामि यक्ष्यामि ॥ १७ ॥

एवं स्वपौरुषानुरूपमुक्त्वाथ युद्धे स्वं देहं जिहासुर्मां जहीति शक्रं प्रार्थयते । अथो इति । अथवा हे हरे ! इन्द्र ! हे वीर ! भवानेव इह युद्धे कुलिशेन वज्रेण यदि मम शिरो हर्ता हरिष्यति तत्र तथा सति मद्देहेन भूतेभ्यो बलिं विधायानृणः विमुक्तकर्मबन्धस्सन् मनस्विनां पादरजः प्रपत्स्ये पादरजःसहचरितं मार्गं प्रपत्स्ये ज्ञानिनां गतिं प्राप्स्यामीत्यर्थः ॥ १८ ॥

हे सुरेश ! इन्द्र ! अग्रतः स्थिते वैरिणि तव शत्रौ मय्यमोघमप्रतिहतं वज्रं कस्मात्त्वमेनं हिनोषि न मुञ्चसि न प्रयुङ्क्षे इत्यर्थः । गदावन्निष्फलो भविष्यतीत्याशङ्कया न प्रहिणोमीत्यत्राह । गदेव गदावत्कृपणार्थां कृपणपुरुषादर्थः प्रयोजनं यस्याः सा याच्ञेव च वज्रो न निष्फलः स्यादतो मा संशयिष्ठाः संशयं मा कुरु किन्तु प्रहिणुवित्यर्थः ॥ १९ ॥

अनिष्फलत्वे हेतुं वदन् तं प्रोत्साहयति । ननु इति । हे शक्र ! तव वज्रः हरेर्भगवतस्तेजसा दधीचो मुनेस्तपसा च तेजितस्तीक्ष्णीकृतः । अतः कारणात्तेनैव वज्रेण विष्णुना यन्त्रित आदिष्टो मां शत्रुं जहि मारय । हरिर्भगवान् यतो यस्मिन् पक्षे ततस्तस्मिन् पक्षे श्रीः राज्यसम्पद्विजयः गुणाः प्रभुत्वादयो गुणाश्च भवन्ति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वृत्रगदाभिमृष्टोऽभिहतोऽपासरत् । तिर्यक् पृष्ठतो वा गतः ॥११॥

सत्वराहाय विह्वलितवाहनाय पुनः गदां न प्रायुङ्क्त अमृतस्राविणा करेण कृतेन अभिमर्शेन स्पर्शलक्षणेन वीतव्यथः वीता गता व्यथा यस्य सः । स्वनः वाहो यस्य स तथा ॥ १२ ॥

भ्रातृहणं विश्वरूपस्य हन्तारमंहः पापरूपं मोहेन भ्रमणेन ॥ १३ ॥

ब्रह्महत्यादिकमेकं विश्वरूपमपेक्ष्योच्यते । अनृणो भ्रातृमरणप्राप्तर्णेन हीनः दृषद्वृदा पाषाणवत्कठिनहृदयेन ॥ १४ ॥

स्वर्गकामो यजमानः छित्त्वा विश्वस्य ॥ १५ ॥

ह्रीश्रीदयाकीर्तिभिरुज्झितं रहितं खादन्तु भक्षयन्तु । अस्पृष्टवह्निमित्यनेन निःशेषनाशं सूचयति ॥ १६ ॥

त्वानु त्वामनु ॥ १७ ॥

हरे ! इन्द्र ! इह युद्धे तत्र नहि इहास्मिन् जन्मन्येव मनस्विनां पूर्वं वीरस्वर्गगतानां पादरजः प्रपत्स्ये तेषां लोकं गमिष्यामीत्यर्थः ॥ १८ ॥

हिनोषि मुञ्चसि मा संशयिष्ठाः संशयं माकार्षीः" । भगानां भाग्यानां सम्पदां देवनाथदातर्वा अहल्याजारेति निन्दां वा सूचयति । प्रयुक्तं वज्रं नितरां फलतीति निष्फलं प्रयोजनवत् स्यात् । किन्तु । कृपणार्था दरिद्रविषया याच्ञा व्यर्था भवति यथा तथा न स्यादित्यर्थः ॥ १९ ॥

हे शक्र ! य एष तव वज्रः हरेस्तेजसा दधीचेस्तपसा च तेजितो निशितः तेनैव शत्रुं मां जहीत्यन्वयः । विष्णुयन्त्रितो विष्णुवशो यतो यत्र हरिस्ततस्तत्रापि जयादिगुणाः स्युः ॥२०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भिन्नमुखः विदीर्णवक्त्रः सप्तधनुरष्टाविंशतिहस्तमात्रम् ॥११॥

सन्नोऽवसन्नो वाहो यस्य तस्मै । अमृतस्यन्दी अमृतस्रावी यः स्वकरस्तस्याभिमर्शेन स्पर्शेन गतव्यथः ॥ १२ ॥

नृशंसं क्रूरम् ॥ १३ ॥

मच्छूलेन निर्भिन्नं दृषत्तुल्यं हृदयस्य तथाभूतेन सता अद्याहमनृणोऽभूवम् ॥ १४ ॥

स्वर्गकामो याज्ञिको यथाश्च ॥ १५ ॥

खादन्तीति "वर्तमानसामीप्ये वर्तमानवत्" इति लट् ॥ १६ ॥

अन्ये ये त्वा त्वामनुगताः नैर्यजामि यक्ष्यामि । असुरद्वारैव तेन चासुरान् असुरेष्टदेवान् भूतनाथांश्च प्रीणयामीत्यर्थः ॥१७॥

अथो अथवा । भूतेभ्यः शृगालादिभ्यो बलिं स्वदेहेनातिस्थूलेन विधाय दत्त्वा अनृणः शोधितऋणः सन् मनस्विनां श्रीनारदादिभक्तानां पादरजः प्राप्स्यामि ॥ १८ ॥

त्वं यथा जीवित्वा स्वर्गीयविषयभोगमभिलषसि तथैवाहं मृत्वा वैकुण्ठे भगवतः साक्षाच्चरणसेवामभिलषामीति तव च मम चाभीष्टं सिध्यतु किमिति मद्वधे विलम्बसे इत्याह । सुरेशेति । वज्रक्षेपस्यैवम्भूतं लक्ष्यं कदा प्राप्स्यसीत्याह । पुर एव केवलं स्थिते न तु कमपि प्रतीकारं कुर्वतीत्यर्थः । ननु महासत्त्वे त्वयि कदाचिद्वज्रक्षेपो निष्फलः स्यादिति शङ्क्य तत्राह । अमोघमव्यर्थम् । ननु गदा यथा मदीयैव त्वत्पाणिगता मम पीडाकरी साक्षादेवाभूत्

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

।येव च यदि वज्रोऽपि स्यात्तदाहं किं करिष्यामीत्यत आह । मेति । दृपयाद्दर्थं प्रयोजनं यस्याः सा याच्ञा यथा निष्फला तथा वज्रं नष्फलं न स्यात् ॥ १९ ॥

अमोघत्वे हेतुं वदन् प्रोत्साहयति । नन्विति । हरेर्भगवत-तेजसा दधीचस्तपसा च तेजितस्तीक्ष्णीकृतः । विष्णुना यन्त्रितः ।रितः यतो यत्र पक्षे ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गदया अभिमृष्टः ताडितः भिन्नमुखो विदीर्णवक्त्रः सप्तधनुः परिमितं देशम् ॥ ११ ॥

स महात्मा महामनाः सक्तोऽवसक्तो वाहो यस्य तस्मै । विषण्णा-चेतसे भूयो गदां न प्रायुङ्क्त । अमृतस्यन्दी पीयूषस्रावी यः करस्ते-नाभिमर्शः स्पर्शस्तेन शान्ता व्यथा क्षतं च यस्य स वाहो यस्य सः इन्द्रः अवतस्थे ॥ १२ ॥

तस्येन्द्रस्य नृशंसं क्रूरं कर्म तदेवांहः पापम् ॥ १३ ॥

यो मे भ्रातृहा अतो रिपुः ब्रह्महा गुरुहा च अतः हे असत्तम ! भवान् दिष्ट्या मद्ग्रे समवस्थितः । दिष्ट्या अद्य मच्छूलेन भिन्नं दृषदा पाषाणेन सदृशं हृत् यस्य तेन त्वयाहमचिरा-दनृणः भविष्यामि भ्रातुरिति शेषः ॥ १४ ॥ १५ ॥

अस्पृष्टवह्निमलब्धदाहक्रियम् । समदन्तीति वर्तमानसामीप्ये वर्तमानवत् इति लट् ॥ १६

येऽन्ये अज्ञाः नृशंसं क्रूरं त्वामनु वधुद्यतास्त्वाः मह्यं मां प्रति प्रहरन्ति तदा तीक्ष्णीकृतेन त्रिशूलेन भिन्नो गलो येषां तैः । सगणान् भूतनाथान् यजामि ॥ १७ ॥

अथो अथवा । हे हरे ! इन्द्र ! यदि भवानिह कुलिशेन प्रमथ्य मे शिरो हर्ता हरिष्यति तत्र तदा अनृणः यदर्थमुत्पादितः पित्रा तत्कृते मृतस्य ऋणित्वाभावात् देहेन स्वकीयेन भूत-बलिं क्रव्यादानां भोजनं विधाय मनस्विनां पादरजस्तैः प्राप्तां गतिं प्रपत्स्ये प्राप्स्यामि ॥ १८ ॥

मा संशयिष्ठाः संशयं मा कार्षीः ॥ १९ ॥

दधीचस्तपसा हरेस्तेजसा च तेजितः तेन शत्रुं मां विष्णुना यन्त्रितः प्रवर्तितो जहि । यतो यस्मिन् पक्षे हरिस्त-तस्तस्मिन् पक्षे विजयः श्रीः गुणाः सर्वादरणीयत्वादयश्च स्युः ॥ २० ॥

भाषा टीका ।

वृत्रासुर के गदा लगने से ऐरावत अति दुःखित होकर घूमने लगा जैसे कि वज्र के मारने से पर्वत होवे तैसा मुख को मोड कर रक्त को गिराता हुआ इन्द्र के सहित अठाईस हाथ पीछे हट गया ॥ ११ ॥

उस महात्मा वृत्रासुर ने इन्द्र के वाहन ऐरावत के दुःखित होने से इन्द्र के चित्त मोहित होने के समय में धर्म युद्ध मान कर गदा नहीं चलाई थोड़ी देर में अपने हाथ के अमृत झरने से व्यथा के मिट जाने से इन्द्र उठ खडे भये ॥ १२ ॥

हे नृपेन्द्र ! युद्ध की इच्छा से वज्र को धारण कर के खडे हुये भ्राता के मारने वाले इन्द्र को देखकर वृत्रासुर ने इन्द्र के पाप को स्मरण करके शोक मोह से युक्त होकर यह वचन कहा ॥ १३ ॥

वृत्रासुर बोला आज ब्राह्मण के मारने वाला गुरु के मारने वाला भ्राता के मारने वाला तू शत्रु मेरे आगे खडा है सो अच्छा हुआ हे असत्तम ! मेरे त्रिशूल से पत्थर सरीके तेरे हृदय को भेदन कर के आज में अपने भाई के ऋण से जल्दी तर जाऊंगा ॥ १४ ॥

जिस प्रकार से स्वर्ग कामना वाला पुरुष निर्दयी होकर पशु के मस्तक को काटता है तैसे तैंने ब्राह्मण गुरु निष्पाप दीक्षित आत्मज्ञानी हमारे बडे भ्राता विश्वरूप के मस्तकों को विश्वास से काटा है ॥ १५ ॥

शोक लज्जा लक्ष्मी दया कीर्ति इनसे तू रहित है अपने कुकर्मों से राक्षसों के भी निन्दा के योग्य है मेरे त्रिशूल के लगने से बडे कष्ट से तू मरेगा तेरा अग्निसंस्कार भी नहीं होगा यहां पर गीध तेरे देह को खांयगे ॥ १६ ॥

तेरे से निर्दयी के साथ रहने वाले और जो ए सब अज्ञानी हैं शस्त्र लेकर मेरे को मारते हैं उनके गलाओं को तो तीक्ष्ण त्रिशूल से काटकर प्रेतादिगणों के सहित भैर-वादिकों को मैं पूजोंगा ॥ १७ ॥

हे वीर ! इन्द्र ! अथवा यदि जबरदस्ती से तू ही मेरे मस्तक को काटेगा तब तो मैं अपने शरीर से मांस भक्षक प्राणि-योंको बलि देकर भ्राताके ऋण से छूट कर महात्मा नारदादिकों के चरण रज को प्राप्त हूंगा ॥ १८ ॥

हे सुरेश ! मैं वैरी आगे खडा हूं तब मेरे पर वज्र क्यों नहीं छोडता है तु संशय मतकर जैसे कि लोभी से मांगना वृथा हो जाता है तैसे गदा सरीका यह तेरा वज्र व्यर्थ नहीं होगा यह वज्र तो सफल है ॥ १९ ॥

यह बात निश्चित है तेरा यह वज्र तो विष्णु के तेज से और दधीची के तपसे तेजयुक्त है सो विष्णु की आज्ञा को मानकर तिस वज्र से मो शत्रु को तू मार क्यों की जिधर श्रीहरि होंग उधर ही लक्ष्मी और सब गुण रहते हैं और वहांही विजय होती है ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गदितमेवाह । दिष्ट्येत्यादिना यावदध्यायसमाप्ति । यो भवान् रिपुः दिष्ट्या दैववशान्ममाग्रतः समवस्थितः प्राप्तः कथंभूतः यस्त्वं ब्रह्महा ब्राह्मणं हतवान् । तथापि स्वगुरुं मम च भ्रातरं हतवान् । हे असत्तम मच्छूलेन निर्भिन्नं दृषत्तुल्यं हृदयं यस्य तेन त्वया निमित्तभूतेनाद्याचिरान्मम भ्रातुर्विश्वरूपस्यानृणोऽहं दिष्ट्या भविष्यामि ॥ १४ ॥

करुणारहितः यो भवान्नोऽस्माकमग्रजस्य द्विजातेस्तत्रापि ब्रह्मविदः गुरोरपापस्य पुनर्दीक्षितस्य यज्ञीयदीक्षायामवस्थितस्य विश्वास्य शिरांसि खड्गेनावृश्चिच्छेद यथा स्वर्गकामो याज्ञिकः पशोः शिरश्छिनत्ति तद्वत् । द्विजातित्वादीनि विशेषणान्यवध्यत्वसूचकानि ॥ १५ ॥

अतो ह्रिया लज्जया श्रिया सम्पदा दयया कीर्तिभिर्यशोभिश्चोज्झितं परित्यक्तं निकृष्टेन स्वकर्मणा पुरुषादैः पिशाचैरपि गर्ह्यं निन्द्यं त्वामद्य मच्छूलेन विभिन्नो देहो यस्य । अस्पृष्टवह्निमदग्धदेहमित्यर्थः । गृध्राः सम्यगदन्त्वदन्त्यन्ति "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति वद् ॥ १६ ॥

अपि अपि च नृशंसं त्वामनुसृत्य ये देवा अज्ञाः मूढाः सन्तः इह युद्धे उद्यतास्त्राः मह्यं यदि प्रहरन्ति । तर्हि तैर्निशातेन तीक्ष्णेन त्रिशूलेन निर्भिन्ना गलाः कण्ठा येषां तैः । सगणान् भूतनाथान् यजामि यक्ष्यामि ॥ १७ ॥

एवं स्वपौरुषानुरूपमुक्त्वाथ युद्धे स्वं देहं जिहासुर्मां जहीति शक्रं प्रार्थयते । अथो इति । अथवा हे हरे ! इन्द्र ! हे वीर ! भवानेव इह युद्धे कुलिशेन वज्रेण यदि मम शिरो हर्ता हरिष्यति तत्र तथा सति मद्देहेन भूतेभ्यो बलिं विधायानृणः विमुक्तकर्मबन्धस्सन् मनस्विनां पादरजः प्रपत्स्ये पादरजःसहचरितं मार्गं प्रपत्स्ये ज्ञानिनां गतिं प्राप्स्यामीत्यर्थः ॥ १८ ॥

हे सुरेश ! इन्द्र ! अग्रतः स्थिते वैरिणि तव शत्रौ मय्यमोघमप्रतिहतं वज्रं कस्मात्कारणात् हिनोषि न मुञ्चसि न प्रयुङ्क्षे इत्यर्थः । गदावन्निष्फलो भविष्यतीत्याशङ्कया न प्रहिणोमीत्यत्राह । गदेव गदावत्कृपणार्था कृपणपुरुषार्थः प्रयोजनं यस्याः सा याच्ञेव च वज्रो न निष्फलः स्यादतो मा संशयिष्ठाः संशयं मा कुरु किन्तु प्रहिणवित्यर्थः ॥ १९ ॥

अनिष्फलत्वे हेतुं वदन् तं प्रोत्साहयति । ननु इति । हे शक्र ! तव वज्रः हरेर्भगवतस्तेजसा दधीचो मुनेस्तपसा च तेजितस्तीक्ष्णीकृतः । अतः कारणात्तेनैव वज्रेण विष्णुना यन्त्रित आदिष्टो मां शत्रुं जहि मारय । हरिर्भगवान् यतो यस्मिन् पक्षे ततस्तस्मिन् पक्षे श्रीः राज्यसम्पद्विजयः गुणाः प्रभुत्वादयो गुणाश्च भवन्ति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वृत्रगदाभिमुखोऽभिहतोऽपासरत् । तिर्यक् पृष्ठतो वा गतः ॥११॥

सत्रबाहाय विह्वलितवाहनाय पुनः गदां न प्रायुङ्क्त अमृतस्राविणा करेण कृतेन अभिमर्शेन स्पर्शलक्षणेन वीतव्यथः वीता गता व्यथा यस्य सः । व्रणः वाहो यस्य स तथा ॥ १२ ॥

भ्रातृहणं विश्वरूपस्य हन्तारमंहः पापरूपं मोहेन मज्जमेन ॥ १३ ॥

ब्रह्महत्यादिकमेकं विश्वरूपमपेक्ष्योच्यते । अनृणो भ्रातृमरणप्रापणेन हीनः दृषत्सदृशा पाषाणवत्कठिनहृदयेन ॥ १४ ॥

स्वर्गकामो यजमानः विश्रब्धस्य विश्वस्य ॥ १५ ॥

ह्रीश्रीदयाकीर्तिभिरुज्झितं रहितं समदन्तु भक्षयन्तु । अस्पृष्टवह्निमित्यनेन निःशेषनाशं सूचयति ॥ १६ ॥

त्वानु त्वामनु ॥ १७ ॥

हरे ! इन्द्र ! इह युद्धे तत्र तर्हि इहास्मिन् जन्मन्येव मनस्विनां पूर्वं वीरस्वर्गगतानां पादरजः प्रपत्स्ये तेषां लोकं गमिष्यामीत्यर्थः ॥ १८ ॥

हिनोषि मुञ्चसि मा संशयिष्ठाः संशयं माकार्षीः" । अगानां भाग्यानां सम्पदां देवनाथदातर्षो अहल्याजारेति निन्दां वा सूचयति । प्रयुक्तं वज्रं नितरां फलतीति निष्फलं प्रयोजनवत् स्यात् । किन्तु । कृपणार्था दरिद्रविषया याच्ञा व्यर्था भवति यथा तथा न स्यादित्यर्थः ॥ १९ ॥

हे शक्र ! य एष तव वज्रः हरेस्तेजसा दधीचेस्तपसा च तेजितो निशितः तेनैव शत्रुं मां जहीत्यन्वयः । विष्णुयन्त्रितो विष्णुवशो यतो यत्र हरिस्ततस्तत्रापि जयादिगुणाः स्युः ॥२०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भिन्नमुखः विदीर्णवक्त्रः सप्तधनुरष्टाविंशतिहस्तमात्रम् ॥११॥

सन्नोऽवसन्नो वाहो यस्य तस्मै । अमृतस्यन्दी अमृतस्रावी यः स्वकरस्तस्याभिमर्शेन स्पर्शेन गतव्यथः ॥ १२ ॥

नृशंसं क्रूरम् ॥ १३ ॥

मच्छूलेन निर्भिन्नं दृषत्तुल्यं हृदयस्य तथाभूतेन सता अद्याहमनृणोऽभूवम् ॥ १४ ॥

स्वर्गकामो याज्ञिको भवांश्च ॥ १५ ॥

समदन्तीति "वर्त्तमानसामीप्ये वर्त्तमानवत्" इति वद् ॥ १६ ॥

अन्ये ये त्वा त्वामनुगताः तैर्यजामि यक्ष्यामि । असुरद्वारैव तेन चासुरान् असुरेष्टदेवान् भूतनाथांश्च प्रीणयामीत्यर्थः ॥१७॥

अथो अथवा । भूतेभ्यः शृगालादिभ्यो बलिं स्वदेहेनातिस्थूलेन विधाय दत्त्वा अनृणः शोणितऋणाः सन् मनस्विनां श्रीनारदादिभक्तानां पादरजः प्राप्स्यामि ॥ १८ ॥

त्वं यथा जीवित्वा स्वर्गीयविषयभोगमभिलषसि तथैवाहं मृत्वा वैकुण्ठे भगवतः साक्षाच्चरणसेवामभिलषामीति तव च मम चाभीष्टं सिध्यतु किमिति मद्वधे विलम्बसे इत्याह । सुरेशेति । वज्रक्षेपस्यैवम्भूतं लक्ष्यं कदा प्राप्स्यसीत्याह । पुर एव केवलं स्थिते न तु कमपि प्रतीकारं कुर्वतीत्यर्थः । ननु महासत्त्वे त्वयि कदाचिद्वज्रक्षेपो निष्फलः स्यादिति शङ्कां तत्राह । अमोघमव्यर्थम् । ननु गदा यथा मदीयैव त्वत्पाणिगता मम पीडाकरी साक्षादेवाभूत्

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तथैव च यदि वज्रोऽपि स्वात्तदाहं किं करिष्यामीत्यत आह । मेति । कृपणार्थं प्रयोजनं यस्याः सा याच्ञा यथा निष्फला तथा वज्रं निष्फलं न स्यात् ॥ १९ ॥

अमोघत्वे हेतुं यद्यन् मांस्माद्यति । नन्विति । हरेर्भगवत-स्तेजसा दधीचस्तपसा च तेजितस्तीक्ष्णीकृतः । विष्णुना यन्त्रितः प्रेरितः यतो यत्र पक्षे ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गदया अभिमृष्टः ताडितः भिन्नमुखो विदीर्णवक्त्रः सप्तधनुः परिमितं देशम् ॥ ११ ॥

स महात्मा महामनाः सन्नोऽवसन्नो वाहो यस्य तस्मै । विषण्ण-चेतसे भूयो गदां न प्रायुङ्क्त । अमृतस्यन्दी पीयूषस्रावी यः करस्ते-नाभिमर्शः स्पर्शस्तेन वीता व्यथा क्षतं च यस्य स वाहो यस्य सः इन्द्रः अवतस्थे ॥ १२ ॥

तस्येन्द्रस्य नृशंसं क्रूरं कर्म तदेवांहः पापम् ॥ १३ ॥

यो मे भ्रातृहा अतो रिपुः ब्रह्महा गुरुहा च अतः हे असत्तम ! भवान् दिष्ट्या भद्रं समवस्थितः । दिष्ट्या अद्य मच्छूलेन भिन्नं दृषदा पाषाणेन सदृशं हृत् यस्य तेन त्वयाहमचिरा-दनृणः भविष्यामि भ्रातुरिति शेषः ॥ १४ ॥ १५ ॥

अस्पृष्टवह्निमलब्धदाहक्रियम् । समदन्तीति वर्तमानसामीप्ये वर्तमानवत् इति लट् ॥ १६

येऽन्ये खलाः नृशंसं क्रूरं त्वामनु अनुयाताः खला मां प्रति प्रहरन्ति तदा तीक्ष्णीकृतेन त्रिशूलेन भिन्नो गलो येषां तैः । सगणान् भूतनाथान् यजामि ॥ १७ ॥

अथो अथवा । हे हरे ! इन्द्र ! यदि भवानिह कुलिशेन प्रमथ्य मे शिरो हर्ता हरिष्यति तत्र तदा अनृणः यदर्थमुत्पादितः पित्रा तत्कृते मृतस्य ऋणित्वाभावात् देहेन स्वकीयेन भूत-बलिं क्रव्यादानां भोजनं विधाय मनस्विनां पादरजस्तैः प्राप्तां गतिं प्रपत्स्ये प्राप्स्यामि ॥ १८ ॥

मा संशयिष्ठाः संशयं मा कार्षीः ॥ १९ ॥

दधीचस्तपसा हरेस्तेजसा च तेजितः तेन शत्रुं मां विष्णुना यन्त्रितः प्रवर्तितो जहि । यतो यस्मिन् पक्षे हरिस्त-तस्तस्मिन् पक्षे विजयः श्रीः गुणाः सर्वादरणीयत्वादयश्च स्युः ॥ २० ॥

भाषा टीका ।

वृत्रासुर के गदा लगने से ऐरावत अति दुःखित होकर घूमने लगा जैसे कि वज्र के मारने से पर्वत होवे तैसा मुख को मोड कर रक्त को गिराता हुआ इन्द्र के सहित अठाईस हाथ पीछे हट गया ॥ ११ ॥

उस महात्मा वृत्रासुर ने इन्द्र के वाहन ऐरावत के दुःखित होने से इन्द्र के चित्त मोहित होने के समय में धर्म युद्ध मान कर गदा नहीं चलाई थोडी देर में अपने हाथ के अमृत झरने से व्यथा के मिट जाने से इन्द्र उठ खडे भये ॥ १२ ॥

हे नृपेन्द्र ! युद्ध की इच्छा से वज्र को धारण कर के खडे हुए भ्राता के मारने वाले इन्द्र को देखकर वृत्रासुर ने इन्द्र के पाप को स्मरण करके शोक मोह से युक्त होकर यह वचन कहा ॥ १३ ॥

वृत्रासुर बोला आज ब्राह्मण के मारने वाला गुरु के मारने वाला भ्राता के मारने वाला तू शत्रु मेरे आगे खडा है सो अच्छा हुआ हे असत्तम ! मेरे त्रिशूल से पत्थर सरीके तेरे हृदय को भेदन कर के आज मैं अपने भाई के ऋण से जल्दी तर जाऊंगा ॥ १४ ॥

जिस प्रकार से स्वर्ग कामना वाला पुरुष निर्दयी होकर पशु के मस्तक को काटता है तैसे तैने ब्राह्मण गुरु निष्पाप दीक्षित आत्मज्ञानी हमारे बडे भ्राता विश्वरूप के मस्तकों को विश्वास से काटा है ॥ १५ ॥

शोक लज्जा लक्ष्मी दया कीर्ति इनसे तू रहित है अपने कुकर्मों से राक्षसों के भी निन्दा के योग्य है मेरे त्रिशूल के लगने से बडे कष्ट से तू मरेगा तेरा अग्निसंस्कार भी नहीं होगा यहां पर गीध तेरे देह को खायगे ॥ १६ ॥

तेरे से निर्दयी के साथ रहने वाले और जो ए सब अज्ञानी हैं शस्त्र लेकर मेरे को मारते हैं उनके गलाओं को तो तीक्ष्ण त्रिशूल से काटकर प्रेतादिगणों के सहित भैर-वादिकों को मैं पूजोंगा ॥ १७ ॥

हे वीर ! इन्द्र ! अथवा यदि जबरदस्ती से तू ही मेरे मस्तक को काटेगा तब तो मैं अपने शरीर से मांस भक्षक प्राणि-योंको बलि देकर भ्राताके ऋण से छूट कर महात्मा नारदादिकों के चरण रज को प्राप्त हूंगा ॥ १८ ॥

हे सुरेश ! मैं वैरी आगे खडा हूं तब मेरे पर वज्र क्यों नहीं छोडता है तु संशय मतकर जैसे कि लोभी से मांगना वृथा हो जाता है तैसे गदा सरीका यह तेरा वज्र व्यर्थ नहीं होगा यह वज्र तो सफल है ॥ १९ ॥

यह बात निश्चित है तेरा यह वज्र तो विष्णु के तेज से और दधीची के तपसे तेजयुक्त है सो विष्णु की आज्ञा को मानकर तिस वज्र से मो शत्रु को तू मार क्यों की जिधर श्रीहरि होंग उधर ही लक्ष्मी और सब गुण रहते हैं और वहांही विजय होती है ॥ २० ॥

अहं समाधाय मनो यथाह सङ्कर्षणस्तच्चरणारविन्दे ।
त्वद्वज्ररंहोलुलितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलोकः ॥ २१ ॥
पुंसां किलैकान्तधियां स्वकानां याः सम्पदो दिवि भूमौ रसायाम् ।
न राति यद्द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं सम्प्रयासः ॥ २२ ॥
त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र ! ।
ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभो किञ्चनगोचरोऽन्यैः ॥ २३ ॥
अहं हरे ! तव पादैकमूलदासानुदासो भवितास्मि भूयः ।
मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक्कर्म करोतु कायः ॥ २४ ॥
न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा समञ्जस ! त्वा विरहय्य काङ्क्षे ॥ २५ ॥
अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ।
प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष ! दिदृक्षते त्वाम् ॥ २६ ॥
ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ।
त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ ! भूयात् ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कन्धे वृत्रवाक्ये
एकादशोऽध्यायः ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हननेन मम पीडा स्यादित्यपि मा संशयिष्ठा इत्याह । अहमिति । सङ्कर्षणो मत्पतिर्यथाह तथा तदीयचरणारविन्दे मनः समाधाय मुनेर्योगिनो गतिमहं यास्यामि तव वज्रस्य रंहसा लुलितश्छिन्नो ग्राम्यपाशो विषयभोगबन्धनो यस्य । अपविद्धलोकस्त्यक्तदेहः ॥ २१ ॥

तर्हि भगवान् सङ्कर्षणः स्वभृत्याय मह्यमेव स्वर्गादिसम्पदो दास्यतीत्यपि मा संशयिष्ठा इत्याह । पुंसामिति । स्वर्गे भूमौ रसातले च याः सम्पदस्ताः किल निश्चितं न राति न ददाति । तत्र हेतुः । यद्याश्यो द्वेषादयो भवन्ति ॥ २२ ॥

तर्हि स्वभक्तस्य किं विधत्ते तत्राह । त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते तत आयासोपरमादनुमेयो न त्वैश्वर्यादिना अतः सम्यग्भगवत्प्रसादाभावात्तव सम्पदो भविष्यन्तीति भावः ॥ २३ ॥

एवमिन्द्राय स्वाभिप्रायं निवेद्य भगवन्तं प्रार्थयते । अहमिति । तव पादावेव एकं मूलमाश्रयो येषां तेषां दासानामनुदासो भूयो भवितास्मि भविष्यामि भवेयमसुपतेः प्राणनाथस्य तव गुणान्मम मनः स्मरतु वागपि तानेव कीर्तयतु कायस्तवैव कर्म करोतु ॥ २४ ॥

ननु किं दास्येन तुभ्यं महाफलानि दास्यामि तत्राह । नाकपृष्ठं ध्रुवपदं ब्रह्मलोकादिकं च हे समञ्जस ! निखिलसौभाग्यनिधे ! त्वा त्वां विरहय्य पृथक्कृत्य न काङ्क्षे नेच्छामि ॥ २५ ॥

तर्हि किमिच्छसि तदाह । अजातपक्षाः खगा घूकादिभिः पीडिता यथा मातरं यथा च दाम्ना बद्धा बालवत्साः स्तन्यं यथा च व्युषितं दूरदेशगतं प्रियं कामेन विषण्णा प्रिया तथा मे मनस्तापत्रयपीडितं कर्मभिर्बद्धं च कामादिभिर्विषण्णं च त्वां दिदृक्षते द्रष्टुमिच्छतीत्यर्थः ॥ २६ ॥

उत्तमश्लोकस्य तव जनेषु भक्तेष्वेव सख्यं भूयात् त्वन्मायया देहादिष्वासक्तचित्तस्य भूयोऽपि तेष्वासक्तिर्न भूयात् ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम् ॥

इत्युक्तरीत्या नरकोदर्कस्त्वमरयाणां किं मां प्रार्थयसे तत्राह । अहमिति । अहमसुरोऽपि नरकं न यास्यामि किन्त्वहमहैवतं गुरुश्च सङ्कर्षणो भगवान्यथाह उपदिदेश । भवच्चरणारविन्दे मनो निधायं निधेयमिति । तथा तच्चरणारविन्दे मनो निधाय तव वज्रस्य वेगेन लुलितः छिन्नः ग्राम्येषु विषयेषु रागरूपः पाशो यस्य । देहवियोगद्वारा ग्राम्यपाशोऽपि लुलितो भवतीति भावः । अपविद्धः त्यक्तः लोकः स्वर्गादिलोको येन तादृशः मुनेर्गतिं मुनीनां गतिं मोक्षं यामि यास्यामि असुरोऽप्यहं भगवत्सङ्कर्षणोपदिष्टतत्त्वो मुक्तिमेव यास्यामि न त्वधोऽधोनलोकानिति भावः । यथाह सङ्कर्षण इत्यनेन वृत्रः सङ्कर्षणोपदिष्टतत्त्व इत्यवगम्यते ॥ २१ ॥

किञ्च भगवाननन्यभावेनात्मानं भजतां स्वीयामेव गतिं नूनं दास्यति नत्वधोऽधोनामित्याह । पुंसामिति सार्द्धेन । एकान्तधियां प्रयोजनान्तररहितमतीनामनन्यप्रयोजनानामित्यर्थः । स्वकानां स्वभक्तानां पुंसामस्मत्पतिर्भगवान् सङ्कर्षणः दिवि स्वर्गादौ भूमौ रसायामतलादिलोके च याः सम्पदो विभवाः ताः न ददाति । कुतः यतः तासु सम्पत्सु द्वेषः परस्परमसहिष्णुत्वम् उद्वेगो विनाशभयं तत्प्रयुक्त आधिर्मनःपीडा मदः विषयभोगनिमित्तो मदः तत्त्वज्ञानोदयप्रतिबन्धकः कलिः विषयभोगविरोधिभिः सह कलहः व्यसनमभिमतविषयालाभनिमित्तं दुःखं प्रयासः क्षुद्रसुखाय प्रकृष्टो यत्नश्चैव भवन्ति । यतः परमकृपालुर्भगवानात्मभक्तानां मुक्तिमेव दास्यतीत्यर्थः ॥ २२ ॥

तर्हि स्वकानां किं विधत्ते तत्राह । त्रैवर्गिकेति । हे शक्र ! त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते अल्पास्थिरत्रिवर्गकर्मायासपरिहारेणानन्तस्थिरफलरूपमुक्तिं दास्यतीत्यर्थः । ननु । प्रसन्नो भगवानस्माकमपि स्वकानां त्रैवर्गिकायासविघातमेव विधत्ते नेत्याह । तत इति । यो भगवत्प्रसादो यत अकिञ्चनगोचरः निष्कामस्वभक्तविषयः अकिञ्चनानामेव नितरां भगवान् प्रसन्नो भवतीत्यर्थः । ततोऽन्यैर्विषयभोगपरायणैस्तदर्थमेव भजद्भिर्भवादृशैः स भगवत्प्रसादोऽनुमेयः अभिलषितार्थविषयकत्वेनानुमेयः । यद्वा । योऽकिञ्चनगोचरो भगवत्प्रसादः सोऽन्यैर्भवादृशैस्ततोऽनन्यप्रयोजनभजनादनुमेयः । वयमप्यनन्यप्रयोजना यदि भजेम तर्ह्यकिञ्चनगोचरो भगवत्प्रसादोऽस्मद्विषयको भविष्यतीत्येवं भवादृशैरनुमेय एव न तु सिद्धः । इदानीं विषयभोगपरायणत्वादिति भावः । तथैव सूक्तं भगवता "मय्येकान्तमतिर्नान्यन्मत्तो वाञ्छति तत्त्ववित्" इत्यादिनेति चेतिभावः ॥ २३ ॥

अथ मनसानुसंहितं वज्राग्रे दृष्टं तदनु प्रविष्टं भगवन्तमभिमुखीकृत्याह । अहमिति । हे हरे ! भगवन् ! तव पादावेवैकं मूलमाश्रयो येषां दासानामनुदासोऽहं भूयो भवितास्मि । मदीयं मनोऽसुपतेर्मत्प्राणनाथस्य तव गुणानेवानुस्मरतु । वागपि तानेव गुणान् गृणातु कीर्तयतु । कायो देहस्त्वाराधनरूपं कर्मैव करोतु ॥ २४ ॥

ननु किं महात्म्येन तुभ्यं महदैश्वर्यमैहिकमामुष्मिकं च दास्यामीत्यत्र त्वद्दास्यं विनान्यत्न काङ्क्षामीत्याह । नेति द्वाभ्याम् । नाकपृष्ठं वैकुण्ठं न काङ्क्षे तथा पारमेष्ठ्यं चतुर्मुखैश्वर्यं न सार्वभौमं कृत्स्नभूम्याधिपत्यं न रसाधिपत्यं पातालादिलोकाधिपत्यं योगसिद्धीरणिमादीनपुनर्भवं कैवल्यं च न हि हे समञ्जस ! सकलसौभाग्यनिधे ! त्वां विरहय्य पृथक्कृत्य विनेत्यर्थः न काङ्क्षे न वाञ्छामि ॥ २५ ॥

किं तु हे अरविन्दाक्ष ! अजातपक्षाः खगाः पक्षिशावकाः मातरमिव क्षुधा आर्ताः पीडिताः वत्सतराः स्तन्यं दुग्धमिव व्युषिते विप्रोषितं दूरदेशगतं प्रियं विषण्णा दुःखिता प्रियेव मनस्त्वां दिदृक्षते द्रष्टुमिच्छति ॥ २६ ॥

अत एव मामनुगृहाणेत्याह । ममेति । उत्तमश्लोकस्य तव जनेषु दासेषु एव मम सख्यं भूयात् । त्वन्मायया आत्मादिष्वासक्तचित्तस्य स्वकर्मभिः संसारचक्रे भ्रमतो मम पुनः तेष्वात्मादिष्वासक्तिर्मे भूयादेवमनुगृहाणेति भावः । तत्रात्मा देहः ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वृत्रे सात्त्विकचेतनांशस्वभावं दर्शयितुमाह । अहमिति । सङ्कर्षणो भगवांस्तन्मनःसमाधानं यथाह । तथा मनस्तस्य सङ्कर्षणस्य चरणारविन्दे समाधाय तव वज्रवेगेन लुलितः छिन्नो ग्राम्यपाशो विषयभोगलक्षणः पाशो यस्य स तथा । अपविद्धः परित्यक्तो लोको देहो येन स तथा "अस्माल्लोकात्प्रेत्य" इति श्रुतेः परिप्रैतल्लोकस्थितिरिति वा अहं मुनेर्ज्ञानिनो गतिं लोकं वैकुण्ठादिलक्षणां यामीत्यन्वयः । संन्यासलक्षणां वा ॥ २१ ॥

ननु परत्र सुखं वा दुःखं वा न निश्चितम् । तवात्र चाक्षयदैश्वर्यं हरिर्हरते एतल्लोकत्यागे तदपि त्यक्तं स्यात्तस्मात्तव शोको न स्यात्किमित्याशङ्क्य सर्वस्यैश्वराधीनत्वेन तदस्मत्त्व स्थिरतरं स्यात्किमित्याशङ्क्य ... नान्यत् । किञ्च । स्वभक्तेभ्यः स्वर्गादिकमपि न ददाति किमुत ऐहिकम् अतो न शोको ममेत्याशयेनाह । पुंसामिति । स लोकनाथः स्वर्गादौ याः सम्पदः सन्ति ताः स्वकानां पुंसां न राति किञ्च तासां सकाशाद्व्याधिकमुत्पद्यत इति यस्मात्तस्मादिति शेषः ॥ २२ ॥

इतो नु हरेर्भक्तानुकम्पित्वं पर्यवस्यतीत्याशयेनाह । त्रैवर्गिकेति । अस्मत्पतिर्भगवान् पुरुषस्य भक्तस्य तेन धर्मार्थकामपरिश्रमनाशेन "यस्यानुग्रहमिच्छामि हरिष्ये तद्धनं शनैः" इत्यादेः ॥ २३ ॥

अधुना "अहं समाधाय मनः" इत्यत्र कथितमनःसमाधानप्रकारं निरूपयति । अहमिति । मनः आत्मपतेः आत्मपतिं स्मरेत् "अधीगर्थदयेशां कर्मणि" इति षष्ठी । नो वाक् तद्गुणान् गृणीत कायः कर्म प्रणामादि करोतु ॥ २४ ॥

मम वीरस्वर्गोऽपि वैकुण्ठादिरित्याशयेनाह । न नाकपृष्ठमिति । सार्वभौममित्यनेन भूमौ चक्रवर्तिपदमाह । योगसिद्धीः अणिमादि-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

लक्षणाः अपुनर्भवं पुनरुत्पत्तिमात्रशून्यत्वेन सुखपूर्त्यभावलक्षणं मोक्षं समंजसं वैषम्यनैर्घृण्यदुःखशून्यं विरहय्य विहाय ॥२५॥

स्तन्यं स्तनच्युतं पयः वत्सतराः अतिशयेन बालाः स्तनंधयाः प्रिया नवोढा भार्या अध्युषितं प्रोषितमन्यतः स्थितमित्यर्थः ॥ २६ ॥

श्रीहरिदर्शनसाधनमाह । ममेति । न भूयात्सख्यमिति शेषः ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सार्वभौमं श्रीप्रियव्रतादीनामिव महाराज्यम् । रसाधिपत्यं पातालादिस्वाम्यमपुनर्भवं मोक्षमपि अत्र नाकपृष्ठादिचतुष्टयस्यानुक्रमश्च न्यूनत्वविवक्षया । ततश्चोत्तरोत्तरं कैमुत्यमपि । ध्रुवपदस्य श्रेष्ठ्यं विष्णुपदसन्निहितत्वात् । योगसिद्ध्यादिद्वयं तु सार्वत्रिकमिति पश्चाद्विन्यस्तम् । अनयोस्तूत्तरश्रैष्ठ्यम् ॥ २५ ॥

अजातपक्षा इत्यनेनानन्याश्रयत्वं तदनुगमनासमर्थत्वं तथा तत्साहित्येन मातरमित्यनेनानन्यस्वाभाविकदयालुत्वं तदीयदयाधिक्यञ्च व्यञ्जितम् । तेन च मातरि तेषामपि प्रीत्यतिशयो दर्शितः । ततस्तत्साम्येऽपि तद्वदात्मनोऽपि भगवति प्रीत्याधिक्यहेतुका दिदृक्षा व्यञ्जिता । तथापि तन्मात्रा यद्यत्स्वन्तरमुपाह्रियते तदेव तेषामुपजीव्यमास्वाद्यं चेति केवलतादृशत्वाभावादपरितोषेण दृष्टान्तान्तरमाह । स्तन्यमिति । अत्र दिदृक्षायोजनार्थं मातरमित्येवानुवर्त्तयितव्ये स्तन्यमित्युक्तिस्तस्यास्तैस्तदंशप्राचुर्यभावनया वस्तुतस्तस्य तदीयशरीरांशतया च तदभेदविवक्षार्था ततः स्तन्यं स्तन्यरूपतदंशमयीं मातरमित्येव लब्धे तादृशी मातैव तैरुपजीव्यते आस्वाद्यते चेति पूर्वतः श्रैष्ठ्यं दर्शितम् । तथा वत्सतरा अत्यन्तबालवत्सास्तत एव स्वामिबद्धतया तदनुगतावसमर्था इति साधारण्येऽपि बहुसमयातिक्रमात् क्षुधार्त्ता इत्यनेन पूर्वतो वैशिष्ट्यम् । तथा गोजातेः स्नेहातिशयस्वाभाव्येन च तदनुसन्धेयम् । अथ तथाप्युत्तरदृष्टान्ते स्तन्यगवोः कार्यकारणभावेन भेदं वितर्क्य दृष्टान्तद्वयेऽप्यजातपक्षत्वादिविशेषणौदार्यत्वात् तादृशप्रीतेरस्थिरतां चालोक्य दृष्टान्तान्तरमाह । प्रियमिति । सत्स्वपि वाचकान्तरेषूभयोः प्रियशब्देनैव निर्देशात् स्वाभाविकाव्यभिचारिप्रीतिमन्तावेव तौ गृहीतौ । यत्र वार्द्धके बाल्येऽपि सह विहारादिकं दृश्यते तत्र स्नातृशी कापि प्रिया यथा तादृशं प्रियं व्युषितं विदूरप्रोषितं सन्तमनन्योपजीवित्वेन विषण्णा सती दिदृक्षते । लोचनद्वारा तदास्वादाय भृशमुत्कण्ठते तथा मम मनोऽपि त्वामित्यर्थः । अत्र दार्ष्टान्तिकेऽपि स्वकर्तृकत्वमनुक्त्वा मनःकर्तृकोल्लेखनादबुद्धिपूर्वकप्रवृत्तिप्राप्तौ प्रीतेः स्वाभाविकत्वेनाव्यभिचारित्वं व्यक्तम् ।

तथारविन्दाक्षेति मनसो भ्रमरतुल्यतासूचनेन भगवतः परममधुरिमोल्लेखेन च तस्यैवोपजीव्यत्वमास्वाद्यत्वञ्च दर्शितम् ॥२६॥

अथ तद्दर्शनभाग्यं स्वस्यासम्भावयन्निदमपि मम स्यादिति सबाष्पमाह । ममोत्तमेति । तदेतच्छुद्धप्रेमोद्गारमयत्वेनैव श्रीमद्वृत्रवधोऽसौ विलक्षणत्वाच्छ्रीमद्भागवतलक्षणेषु पुराणान्तरे गण्यते । "वृत्रासुरवधोपेतं तद्भागवतमिष्यते" इति ॥२७॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अयमेवं मां प्रलोभ्य पुनः पराक्रमाविष्कारेण वज्रञ्च निष्फलय्य पुनरपि मां हनिष्यतीति मा मंस्थाः । अहं यत् करोमि तदेकाग्रमनाः शृण्वित्याह । अहमिति । सङ्कर्षणो नोऽस्माकं प्रभुः यथा तथा तच्चरणारविन्दे मनः समाधाय मुनेर्योगिनो गतिमहं यास्यामि । त्वद्वज्रस्य रंहसा लुलितः खण्डितः ग्राम्यपाशाकार एतद्देहो यस्य सः । अपविद्धलोकः त्यक्तत्रिलोकैश्वर्यः ॥ २१ ॥

तर्हि त्वद्भक्तितोषितः सङ्कर्षणस्तुभ्यमेव स्वर्गाद्यैश्वर्यं दास्यतीति मा वादीः शृणु रे शक्र ! । मत्प्रभोस्त्वञ्च भक्तोऽहं च भक्तस्तत्र तुभ्यमेव भोगैश्वर्यं ददाति न तु मह्यमित्यत्र कारणं मत्प्रभोः स्वभावमेव शृण्वित्याह । पुंसामिति । याः सम्पदः ता एकान्तभक्तेभ्यः पुंभ्यो न राति न ददाति कुतः यतः सम्पद्भ्यो द्वेषादयो भक्तिसुखे विक्षेपका भवन्तीत्यतः ॥ २२ ॥

मां स्वपार्श्वे शीघ्रमेव नेतुं वज्रेण मद्वधोपायमुक्त्वा यत्तुभ्यं मत्प्रभुर्भोगसम्पदं ददाति एतेनैव त्वमात्मनि तस्यानुग्रहाभावं मन्यस्वेत्याह । त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते पुरुषस्य स्वान्तरङ्गभक्तस्य तत आयासोपरमादेव भगवत्प्रसादः अनुमेयः । नन्वेवमस्मदनुभवे तु न भाति तत्राह । स आकिञ्चनगोचर एव अन्यैर्युष्माभिस्तु दुर्लभो युष्मदगोचर एवेत्यतस्त्वयि तस्य सम्यक् प्रसादाभावात् तव सम्पदो भविष्यन्तीति विश्वस्तो भूत्वा शीघ्रं वज्रं निक्षिपेति भावः ॥ २३ ॥

तदपि वज्रमनिक्षिपन्तमिन्द्रं दृष्ट्वा हन्त हन्त वराकमिमं शक्रं बहिर्दर्शिनं किमिति ब्रवीमि स्वप्रभोश्चरणारविन्द एव किं न निवेदयामीति ध्यानाविर्भूतं भगवन्तमवलोक्याह । अहमिति । तव पादावेव एकं मूलमाश्रयो येषां तेषां दासानामनुदासो भूयः पुनरपि भवितास्मि भविष्यामि किं तत्र कियान् विलम्बो वर्त्तते तं कृपया कथय । उत्कण्ठया जर्जरीभूतोऽस्मीति भावः । नन्वविलम्बेनैव त्वामहमेष एवात्मसात् करोमि स्वाभीष्टान् वरान् वृणिष्वेत्यत आह मनो मम असुपतेः प्राणनाथस्य तव प्राणनाथं त्वां स्मरतु, वाक् गुणान् कीर्त्तयतु कायः कर्म त्वत्पादसम्वाहन व्यजनताम्बूलप्रदानादिकं करोत्विति कायवाङ्मनसां मे प्रार्थना ॥२४॥

ननु तुभ्यं स्वर्गापवर्गादीनि सर्वाण्येव फलानि ददामि गृहाणेति तत्र सशिरोधूननं न नेत्याह । नेति । नाकपृष्ठं स्वर्गपदं त्वा त्वां विरहय्य त्यक्त्वा त्वद्विरहेण मम प्राणा उद्वहन्ति । स्वर्गादयः

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

र्हि मे सुखयिष्यन्तीति ध्वनिः । त्वत्संयोगे मम पूर्वश्लोकोक्तं वरत्रयं भवेत्तदा तदेव मे स्वर्गापवर्गादिसर्वसुखतमम् । किमेतै-र्गृहीतैरित्यनुध्वनिः ॥ २५ ॥

किञ्च अत्युत्कण्ठावतोऽपि मम त्वत्प्राप्तिस्त्वदधीनैव । न च तत्र मे स्वतः कापि शक्तिरस्तीत्यत्र दृष्टान्तत्रयमाह । अजातपक्षाः खगाः खगबालकाः घूकादित्रस्ताः क्षुत्पीडिताश्च मातरं कदा प्राप्स्याम इति प्रतिक्षणं दिदृक्षमाणाः पत्रेऽपि संचलति आयाता मम मातेति बुद्ध्या कोमलं कलं कूजन्तश्चञ्चून् प्रसारयन्ति । ननु तर्हि तन्माता यथा आगत्य घूकादिभ्यो रक्षन्ती स्वतः पृथग्भूतै-रानीतैः क्षुद्रकीटैस्तच्चञ्चुमध्ये निहितैस्तेषां क्षुधामुपशम-यति तथैवाहमपि त्रिविधतापेभ्य इन्द्रादिशत्रुभ्यश्च त्वां रक्षन् स्वर्गपारमेष्ठ्यादिभोगैर्दत्तैस्त्वदभीष्टं पूरयामीति । तत्र त्वन्मा-धुर्यं विना मम नान्यत् किमप्यभीष्टमिति तथा त्वत्प्राप्तिप्रतिकूलं वृत्रावयवस्थूलसूक्ष्मदेहद्वयबन्धनं विना मम नान्यत् किमपि तापत्रयमित्यतो दृष्टान्तान्तरमाह । स्तन्यं वाञ्छन्तीति शेषः । वत्स-तरा अल्पवयस्का वत्सा गृहस्थगृहे दामबद्धाः क्षुधाया मातुरेव दुग्धपानैकतानमनस्कत्वादार्त्ताः । अत्रापि वत्सतरा मातु-र्दुग्धादेव स्वसुखमभिलषन्तोऽपि मातुः कामपि सेवां नाभिलषमाना इत्यपरितुष्य दृष्टान्तान्तरमाह । प्रियं प्रीतिमन्तं पतिं व्युषितं सुदूर-देशस्थं प्रिया प्रेमवती विषण्णा तद्विरहजर्जरिता दिदृक्षते सा यथा स्वीयसर्वेन्द्रियव्यापारैः सेवमाना प्रियं सुखयितुं प्रियस्यैव सौन्दर्यसौरस्यादिभिर्गुणलीलावैदग्ध्यादिभिश्च स्वसर्वेन्द्रियाणि सुखयितुमिच्छति तथैवाहमपि त्वां सेवेयेत्यत एव "मनः स्मरेता-सुपतेर्गुणानां गृणीत वाक् कर्म करोतु कायः" इति वरत्रयमवाञ्छ-मिति भावः । किन्तु सा दास्यसख्यशृङ्गारैः प्रियं सुखयेदहन्तु केवलेनैव दास्येन त्वां सुखयेयमित्येतावानेव भेदः ॥ २६ ॥

अथ तस्यैव एवातिदैन्यभावोदयेन हन्त हन्त ममाधमस्य कथमेतावत् सौभाग्यं सम्भवेदत एतदस्त्विति प्रार्थयते । मम उत्तमश्लोकजनेषु त्वद्भक्तेषु सख्यं भूयात् किन्तु त्वन्मायया आत्मात्मजादिष्वासक्तस्य जनस्य कस्यापि मयि सख्यं न भूयात् यथैतज्जन्मनि असुराणां मयि सख्यमभूत् मम च, त्वद्भक्तेषु सख्यं नाभूदित्यपारं दुःखमन्वभूवमिति भावः ॥ २७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

षष्ठे एकादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्वच्चरणद्वन्द्वमलुब्धितविश्वः प्राप्यपाशः भोगानुरागो यस्य सः । अपविद्धस्त्यक्तः लोको बद्धजीवलोको येन सः । मुनेः मननशीलस्य भगवद्ध्याननिष्ठस्य गतिं गम्यते इति गति-र्भगवांस्तम् ॥ २१ ॥

यथाऽर्थः द्वेषादयो जायन्ते ॥ २२ ॥

अस्मत्पतिर्भगवान् पुरुषस्य त्रैवर्गिकार्थे च आयासहत-विघातं विधत्ते ततो विघातात् अकिञ्चनगोचरः भगवद्भजन-विषयः अन्यैर्दुर्लभो भगवत्प्रसादोऽनुमेयः ॥ २३ ॥

इन्द्रं प्रति स्वहार्दमुक्त्वाथ भगवन्तं प्रार्थयते । अहमिति । हे हरे ! तव पादावेवैकं मुख्यं मूलमाश्रयो येषां तेषां दासानुदासः भविता भवेयम् । असवः प्राणाः इन्द्रियाणि तत्पतेः हृषीकेशस्य तव गुणान् मम मनः स्मरेत वागपि तान् गृणीत किं बहुना सकल-करणयुक्तः कायस्तत्करणानुरूपं कर्म पूजनादिकं करोतु ॥ २४ ॥

हे समञ्जस ! सर्वसौभाग्यसम्पन्न ! त्वा त्वां विरहय्य विहाय नाकपृष्ठं ध्रुवलोकं पारमेष्ठ्यं चतुराननलोकं सार्वभौमं सर्वभूमि-राज्यं रसाधिपत्यं बिलस्वर्गसुखं योगसिद्धीरणिमादिरूपाः अपुनर्भवं जीवस्वरूपप्राप्तिलक्षणां मोक्षं परवैकुण्ठप्राप्तिरूपां मुक्तिं वा न काङ्क्षे नेच्छामि ॥ २५ ॥

तर्हि किमिच्छसि तदाह । अजातपक्षा इति । स्तन्यं दुग्धम् । विषण्णा दुःखिता दिदृक्षते द्रष्टुमिच्छति ॥ २६ ॥

दर्शनाधिकारस्तु सत्सङ्गाद्भवति अतः सत्सङ्गं मम भूया-दित्याह । ममेति । उत्तमकीर्त्तेस्तव जनेषु दासेषु सख्यं भूयात् त्वन्मायया आसक्तचित्तस्य अत एव संसारचक्रं स्वकर्मभिः भ्रमतः आत्मा देहस्तदादिषु सख्यं न भूयात् ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

एकादशाध्यायार्थप्रकाशः ॥ ११ ॥

भाषा टीका ।

मैंतो सब स्वर्गादि लोकों की इच्छा को छोड़ कर स्थित हूं सो जिस प्रकार से सङ्कर्षणजीने मेरे को उपदेश किया है तैसे भगवान् के चरणारविन्द मे मन को लगाकर तुमारे वज्र से विषय पाशमे मुक्तहोकर मुनियों की गति को प्राप्त होजाऊंगा ॥ २१ ॥

एकान्तबुद्धिवाले अपने भक्तों को भगवान् स्वर्ग मर्त्य पाताल की सम्पत्तियों को नहीं देते हैं जिस से कि द्वेष उद्वेग आधि मद कलि दुःख प्रयास ये सब होते सम्पत्ति मे होते हैं ॥ २२ ॥

हे शक्र ! हमारे पति श्रीनारायण धर्म अर्थ काम इन्होंको नाश कर देते हैं जब ऐसा अपने भक्तको भगवान् करदेवें तब भगवान् की कृपा का अनुमान करना चाहिये जो प्रसाद अकिञ्चन पुरुषों को ज्ञात है अन्यलोग उस को नहीं जानते हैं ॥ २३ ॥

वृत्रासुर भगवान् से प्रार्थना करते हैं कि हे श्रीहरि मैं आप के चरणारविन्द के दासों का दास फिर भी होऊंगा मेरा मन प्राणनाथ आप के गुणों को स्मरण करै मेरी वाणी आप के गुणों का कथन करै मेरा शरीर आपकी सेवा को करै यह वर दीजिये ॥ २४ ॥

भाषा टीका ।

हे प्रभो ! हे सर्वगुणनिधे ! आप को छोड़ कर मैं न स्वर्ग को चाहता हूं न ब्रह्मपद को चाहता हूं न पृथिवी के चक्रवर्ति राज्य को चाहता हूं न पाताल के राज्य को चाहता हूं न योग सिद्धियों को चाहता हूं न मोक्ष को चाहता हूं ॥ २५ ॥

जैसे बिना पंखवाले चिड़िया के बच्चा अपनी माता को चाहते हैं जैसे बछरा क्षुधित होने से माता को चाहते हैं जैसे परदेश को गये हुये पति को प्यारी स्त्री चाहती है तैसे मेरा मन आप ही के दर्शन करने को चाहता है ॥ २६ ॥

हे नाथ ! मेरे को उत्तमश्लोक जनों के साथ सख्यभाव होवे अपने कर्मों के वश होकर संसार चक्र मे भ्रमने से आपकी माया से देह स्त्री पुत्र गृहादिकों मे आसक्ति मत होवे यही वर दीजिये ॥ २७ ॥

इति श्रीभागवत षष्ठस्कन्ध के ग्यारमें अध्यायका

भाषानुवाद ब्रह्मचार्यकृत

समाप्त ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे एकादशोऽध्यायः समाप्तः ॥ ११ ॥

॥ द्वादशोऽध्यायः ॥

ऋषिरुवाच।

एवं जिहासुर्नृप ! देहमाजौ मृत्युं वरं विजयान्मन्यमानः।
शूलं प्रगृह्याभ्यपतत् सुरेन्द्रं यथा महापुरुषं कैटभोऽप्सु ॥ १ ॥
ततो युगान्ताग्निकठोरजिह्वमाविध्य शूलं तरसासुरेन्द्रः।
क्षिप्त्वा महेन्द्राय विनद्य वीरो हतोऽसि पापेति रुषा जगाद ॥ २ ॥
ख आपतत्तद्विचलद्ग्रहोल्कवन्निरीक्ष्य दुष्प्रेक्ष्यमजातविक्लवः।
वज्रेण वज्री शतपर्वणाच्छिनद्भुजं च तस्योरगराजभोगम् ॥ ३ ॥
छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रम्।
हनौ तताडेन्द्रमथामरेभं वज्रं च हस्तान्न्यपतन्मघोनः ॥ ४ ॥
वृत्रस्य कर्मातिमहाद्भुतं तत् सुरासुराश्चारणसिद्धसङ्घाः।
अपूजयंस्तत् पुरुहूतसङ्कटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशम् ॥ ५ ॥
इन्द्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसन्निधौ पुनः।
तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ॥ ६ ॥
युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनाम्।
विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनम् ॥ ७ ॥
लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे।
द्विजा इव शिचा बद्धाः स काल इह कारणम् ॥ ८ ॥
ओजः सहो बलं प्राणममृतं मृत्युमेव च।
तमज्ञाय जनो हेतुमात्मानं मन्यते जडम् ॥ ९ ॥
यथा दारुमयी नारी यथा यन्त्रमयो मृगः।
एवं भूतानि मघवन्नीशतन्त्राणि विद्धि भोः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

द्वादशेऽस्मिन् विषयोन स्वयमुत्साहितेन तु।
महेन्द्रेण महायुद्धे वृत्रस्य वध ईर्यते ॥ १ ॥

महापुरुषं श्रीविष्णुम्। अप्सु प्रलयोदके ॥ १ ॥

युगान्ताग्निवत्कठोरा जिह्वा शिखा यस्य तत्। आविध्य भ्रामयित्वा ॥ २ ॥

तत् खे आपतदागच्छत्। विचलत्परिभ्रमत्। ग्रहश्चोल्का च ग्रहोल्कं तद्वद्दुष्प्रेक्ष्यम्। शतं पर्वाणि यस्य तेन। उरगराजो वासुकिस्तस्य भोगो देहस्तदाकारम् ॥ ३ ॥

हनौ कपोलप्रान्ते। अमरेभमैरावतं च ॥ ४ ॥ ५ ॥

पुनश्च तमाह वृत्रः। हे हरे ! इन्द्र ! ॥ ६ ॥

सदा जयो नैव किं तु कुत्रचिज्जय एकत्र कुत्रचिन्नैव। यद्वा कुत्रचिदपि युयुत्सतां सदा जयो नैव किं त्वेकत्रैव कदाचिदे-

श्रीधरस्वामिकृतभावार्थदीपिका ।

वेत्यर्थः । परो देह आत्मा येषां पराधीनात्मनामिति वा । आद्य-मनादिम् । सनातनं नित्यम् ॥ ७ ॥

पराधीनतामेवाह । लोका इति सप्तभिः । यस्य वशे स्थिताः स्वयं विवशाः सन्तः श्वसन्ति चेष्टन्ते । द्विजाः पक्षिणः । शिक्या जालेन कालः कलयतीति भगवान् इह जयादौ कारणम् ॥८॥

ओजआदिरूपं कालं तं हेतुमज्ञायाविज्ञाय जडं सन्त-मात्मानं देहं हेतुं मन्यते ॥ ९ ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमभिलषितभगवदेकदास्यो निरयोपमाभिमानविषयै-श्वर्यकैवल्यो जिहासितस्वकलेवरो वृत्रो युयुधे इत्याह मुनिः । एवमिति । हे नृप ! स्वकलेवरं हातुमिच्छुरत एवाजौ युद्धे जयान्मृत्युमेव वरं श्रेष्ठं मन्यमानः शूलं गृहीत्वा सुरेन्द्रं मघ-वन्तं प्रति अभ्यपतत्तदभिमुखमगात् । यथा महापुरुषं भगवन्तं प्रत्यप्सु प्रलयोदके कैटभाख्योऽसुरस्तद्वत् ॥ १ ॥

ततोऽसुरेन्द्रो वीरो वृत्रः प्रलयकालवह्निवत्कठोरा दुःसहा जिह्वा शिखा यस्य तच्छूलमाविध्य भ्रामयित्वा क्रोधेन महेन्द्राय क्षिप्त्वा विनद्य सिंहनादं कृत्वा हे पाप ! हतोऽसीति जगाद ॥ २ ॥

ततो वज्री इन्द्रः खे आकाशे आपतदागच्छद्विवलत्परिभ्र-मच्च ग्रहोल्कावत् दुष्प्रेक्ष्यं दुर्निरीक्ष्यं च तच्छूलं ग्रहश्च उल्का चेति द्वन्द्वार्थः । ग्रहः सूर्यः उल्का अङ्गारः तच्छूलं तथा तस्य वृत्रस्य उरगराजभोगं वासुकिदेहाकारं भुजं चाजातविक्लवः अनुद्गताभयः सन् शतं पर्वाणि यस्य तेन वज्रेणाच्छिनत् अद्भुतं यथा भवति तथेति क्रियाविशेषणं शूलविशेषणं भुजविशेषणं वा ॥ ३ ॥

ततो वृत्रः छिन्नः एकः बाहुर्यस्य सः अत एव संरब्धः नितरां क्रुद्धः गृहीतवज्रमिन्द्रमासाद्य समीपमागत्य परिघेणायुध-विशेषेण तताड । अथामरेभमैरावतं च तताड । एवं ताडितस्य तस्य मघोन इन्द्रस्य हस्ताद्वज्रमायुधं न्यपतद्विगलितमभूत् ॥ ४ ॥

तद्वृत्रस्य महदद्भुतं च कर्म निरीक्ष्य सर्वे सुरादयः अपूजयन् अहो एतस्य पराक्रम इति बहुमन्यन्त । तथा पुरुहूतस्येन्द्रस्य सङ्कटं निरीक्ष्य भृशं हाहेति विचुक्रुशुर्भृशमिति सङ्कटविशेषणं वा ॥ ५ ॥

तत इन्द्रः स्वहस्ताच्छत्रुसन्निधौ च्युतं वज्रायुधमत एव लज्जितो वज्रं पुनर्न जगृहे न गृहीतवान् । तमगृहीतवज्रमिन्द्रं वृत्र आह बभाषे । उक्तिमेवाह । हर इत्यादिना अमुष्य पराजय इत्यन्तेन । हे हरे ! इन्द्र ! पुनर्गृहीतवज्रस्त्वं स्वशत्रुं मां जहि । अयं विषादकालः शोककालो न भवति ॥ ६ ॥

ननु पराजये न लज्जितोऽहं योद्धुं नोत्सहे तत्राह । युयुत्सता-मिति । आततायिनां जिघांसतां योद्धुमिच्छूनां पुंसां सदा सर्वत्र च जयो न वै न भवति । किन्तु कुत्रचिदेव कस्मिंश्चि-द्देशे कालएव जयो भवतीत्यर्थः । तत्र हेतुं वदन् पुंसो विशिनष्टि । परात्मनामिति । परः परमपुरुष आत्मान्तः प्रविश्य तत्तत्कर्मानुसारेण नियन्ता येषां कर्मवश्यत्वात् परम-पुरुषनियाम्यत्वाच्च तत्तद्देशकालकर्मानुरूपसुखदुःखादिफलानुभ-वाय जयापजयावीश्वरकारिताविति न तत्र लज्जाशोकौ कर्तव्यौ इति भावः । सर्वस्य नियन्तुरकर्मवश्यस्य परमपुरुषस्य तु सर्वत्र सर्वदा जय एव भवतीत्याह । विनेति । एकं परमपुरुषं विनान्येषां पुंसां सर्वत्र सर्वदा जय एव न भवति परमपुरुषस्य तु भवती-त्यन्वयः । तत्र हेतुं वदस्तं विशिनष्टि । जगदुत्पत्तिस्थितिलयाना-मीश्वरं कर्तारं तदुपयुक्तो गुण उच्यते । सर्वज्ञमिति । अनेन कर्म-सङ्कुचितज्ञानजीवव्यावृत्तिः अनेनाकर्मवश्यत्वमप्युक्तं भवति । तत्त-ज्जीवकर्मानुसारेणोत्पत्त्यादिकर्त्रन्तरविरहादकर्मवश्यत्वाच्च तस्य देशकालनिमित्तकर्मायत्तकर्त्रन्तरप्रयुक्तजयापजयौ न स्तः । किन्तु सर्वदा सर्वत्र जय एवेति भावः । यदि जगदुत्पत्त्यादिकर्ता परम-पुरुषस्तर्हि किमुपादानकारणं जगतस्तत्राह । आद्यमिति । आदौ भवमाद्यं कारणत्वेनावस्थितमुपादानकारणमपि स एवेति भावः । लोके पटाद्युपादानकारणस्य तन्त्वादेरपि कारणान्तरदर्श-नात्कारणस्यापि तस्य कारणान्तरं सम्भाव्यमित्याशङ्कां निराकुर्वन् विशिनष्टि । सनातनमिति । नित्यमित्यर्थः । कार्यं ह्यनित्यं स तु नित्यः कारणान्तररहित इत्यर्थः ॥ ७ ॥

तस्याकर्मवश्यत्वेन स्वातन्त्र्यमुक्तं तदेवोदाहरणमुखेन प्रपञ्चयति । लोका इति । सपालाः पालकैर्ब्रह्मादिभिः सहिताः सर्वे लोकाः विवशाः परमपुरुषवशं गता यस्य परमपुरुषस्य वशे वश इच्छा "वश कान्तौ" इति धातुपाठात् वशे इच्छायां निमित्तभू-तायां श्वसन्ति स्वतन्त्रतत्तदिच्छानिमित्तजीवना इत्यर्थः । तथा च श्रुतिः "को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इति यथा शिक्या पाशेन बद्धा द्विजाः पक्षिणः बन्धयितुर्वशे श्वसन्ति तद्वत्स एव कालरूप ईश्वरः इह जयापजयादिषु कारणं हेतुभूतः ॥ ८ ॥

न केवलं जयापजययोरेव हेतुरपि त्वोजआदीनामपि निर्वाहक इत्याह । ओज इति । ओजः प्रवृत्तिसामर्थ्यं सहो वेगः बलं धारणसा-मर्थ्यं प्राणो जीवनममृतं मोक्षं मृत्युः संसारः ओजआदीन्प्रति तं परमात्मानं हेतुमज्ञायाविज्ञाय आर्षत्वात्प्रयोगस्यानञ्पूर्वं इति न प्रतिषेधः अतोऽल्यप् । परमात्मानमेव ओजआदीनां कारणमज्ञात्वा ओजः केवलं परमात्मा स्वात्मानमेव कारणं मन्यतेऽतो यं अज्ञः अज्ञो जन इत्यर्थः । जडमिति पाठे जडमज्ञः स्वात्मानम् एव कारणं मन्यतेऽयं जन इत्यर्थः ॥ ९ ॥

एवं परमात्मनो जयापजयाद्यभावे हेतुतया सर्वस्य वशित्वं कारणत्वम् ईशितृत्वं चोक्तमथ जीवस्य तद्विपर्ययमाह । यथेति सार्धद्वयेन । हे मघवन्प्रभो ! इन्द्र ! विभो ! परमात्मस्वरूपं सम्बोधनं दारुमयी दारुणो विकारभूता नारी यन्त्रमयः यन्त्रबलादागतः यन्त्रेण गृहीतो मृग इत्यर्थः । यथा पुरुषतन्त्रः आद्यमप्राणिदृष्टान्ताभिप्रायकम् । द्वितीयं तु प्राणिदृष्टान्ताभि-प्रायकमिति वेदितव्यम् । एवं सर्वाणि भूतानीश्वरतन्त्राणीश्व-रतन्त्राण्येवेश्वरवश्यान्येवेत्यर्थः । वाद्यन्वयो गणितकारकार्थक-त्वादेराकृतिगणत्वात् । एवं जीवस्य पारतन्त्र्यमुक्तम् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

वृत्रवासवसंवादच्छलेन हरेर्जीवेनाभेदज्ञानं तमःसाधनमित्येतन्निरूप्यतेऽस्मिन्नध्याये तत्रादौ वृत्रवासवयोर्युद्धशेषं वक्ति एवं जिहासुरिति विजयं विजयात्मकं परं मुख्यं मन्यमानः ॥ १ ॥ २ ॥

भोगवत् भोगः पुष्टिर्यस्य स तथा तं "भोगः सुखे स्त्र्यादिभृतौ पीनसर्पशरीरयोः" इत्यभिधानात्। भोगो विषयमेवाबामहिश्वर्यापि पालने। वर्तुले स्थूलतायाञ्च जन्मन्याक्राहने तथेति वररुचिः ॥ ३ ॥

इन इन्द्रः परिवृढः पतिरध्यक्षबहुभावित्यतः स्वामिमात्रेपीन्द्रशब्दप्रयोगात्ततो विशिष्योक्तममरेशामिति ॥ ४ ॥ ५ ॥

हरे! स्मरानुं मामिति शेषः ॥ ६ ॥

ननु इनने तव पराजय इत्याशङ्क्य पराजयापराजयौ न नियतौ किन्तु दैवकृताविन्याह - युयुत्सतामिति। युयुत्सतां युद्धशीलानां मध्ये कुत्रचिद्युद्धे देवप्रकृतेरेकस्य सदा जय इतरस्य सदा पराजय इति तत्राभिमानिनस्तत्र स्थितावपि देहवियोगलक्षणो जयः प्रतिक्षणमस्तीति दर्शयितुम् उत्पत्त्यनन्तरं जयपदोपादानम् ॥ ७ ॥

हरेरेव सदा जय इत्ययं नियमः कुत इति तत्राह। लोका इति। यस्य वशे स्थिताः श्वसन्ति श्वसप्राणन इति धातुः सत्तापि तदधीनेति निगद्यते शिखा जालबन्धया तन्त्या द्विजाः पक्षिणः खगा इत्युक्तिं विना विदुषामपि वाक्तन्त्या नियतत्वमस्तीति द्योतनाय द्विजा इत्युक्तम् इह जीवराशौ जितयोर्जयपराजययोः कारणम् ॥ ८ ॥

ओज आद्याधिक्यानाधिक्ये (१)उभयोर्हेतुत्वेन सिद्धे हरेरधीनत्वं कुतः सङ्गच्छत इति तत्राह। ओज इति। जडो जनः ओजस्त्वादिगुणमूर्तिमन्तं भगवन्तमज्ञात्वा (२) तयोर्हेतुमात्मानं स्वं मन्यत इत्यन्वयः स वै बलं बलिनां चापरेषामिति श्लोकैः ओज आदिषु स्थित्वौजस्त्वादिगुणप्रवर्तकोऽयमित्यजानन् जनो जड इत्युच्यते ओजस्त्वादि हेतुमिति वा ॥ ९ ॥ १० ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

यत् शौर्येण गतोत्साहः शत्रोर्मुखेन बोधितः तं संस्तूय महायुद्धेऽहमिति द्वादशो कथा मामयमितिकर्त्तव्यमूढो नहन्ति तदहं गवच्छौर्य दर्शयितुमुत्साहयानि कोपयानि च यतोमामयं शीघ्रं निहन्यादित्याशयेन पुनर्योद्धुं प्रवृत्त इत्याह। शूलमिति। अच्युपलयोर्वके ॥ १ ॥

जिह्वा शिखा आविध्य भ्रमयित्वा ॥ २ ॥

आपतत् आगच्छत् ॥ ३ ॥

हनौ कपोलप्रान्ते ॥ ४ ॥

पुरुहूत इन्द्रः ॥ ५ ॥ ६ ॥

आततायिनां शस्त्रवतां कुत्रचित् शत्रुषु सदा जयः एकत्र शत्रौ न जयश्च। यथा युष्माकं मदसुरेषु सदा जयः। मयि तु न जय इत्यर्थः। यतः परः अनात्मात्मीयः अस्वाधीन आत्मा परमेश्वरो येषां परमेश्वरस्य तु सदैव जय इत्याह। विनैकमिति। तेन स्वाधीनीकृतपरमेश्वराणामर्जुनादीनामिव न युष्माकं सदा जय इति भावः ॥ ७ ॥

तस्मात् युष्माकं कर्माधीनानां तु शुभाशुभादृष्टानुकूलः काल एव जयपराजययोः कारणमित्याह। लोका इति। यस्य वशे स्थिताः श्वसन्ति चेष्टन्ते द्विजाः पक्षिणः शिखा जालेन ॥ ८ ॥

ओज आदि रूपं तं कालं हेतुमज्ञात्वा अविज्ञाय जडं सन्तमात्मानं देहं हेतुं मन्यते ॥ ९ ॥

किञ्च तस्य कालस्यापि वशयिता यः पुरुषः सोपि यस्य वशे स स्वयं भगवानेव सर्वकारणकारणमिति सदृष्टान्तमाह। यथेति द्वाभ्यां। ईशतन्त्राणि तदेवेश्वरस्याधीनानि ॥ १० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

इन्द्रः वृत्रभयात्प्रथमं गतोत्साहः पुनर्वृत्रेणोत्साहितस्तं वृत्रं संस्तुत्य युद्धे हतवानिति द्वादशेनाध्यायेन वर्णयति। एवमिति। आजौ रणे देहं जिहासुः विजये विष्णुप्राप्तौ विजयोमेवदनन्तरमाम्मुख्यं वरं श्रेष्ठं मन्यमानः अप्सु प्रलयोदकेषु कैटभो महापुरुषं विष्णुमिव ॥ १ ॥

तदनन्तरं युगान्ताग्निवत् कठोरो जिह्वाप्रमाणो यस्य तत् आविध्य भ्रामयित्वा महेन्द्राय क्षिप्त्वा विनद हे पाप! गुरुघ्न! हतोसीति जगाद ॥ २ ॥

तच्छूलं ग्रहश्चोल्का च यथोल्कं तद्वद्विचरत परिभ्रमत् खे आपतत् आगच्छत् दुःसहं दुर्निरीक्ष्यमपि निरीक्ष्य शतं पर्वाणि यस्य तेन वज्रेणाऽऽच्छिनत् उरगराजभोगं वासुकिदेहसदृशं भुजञ्च चिच्छेद ॥ ३ ॥

संरब्धः क्रुद्धः हनौ कपोलप्रान्ते ॥ ४ ॥

पुरुहूतस्येन्द्रस्य सङ्कटं निरीक्ष्य भूतानामत्यर्थं हा हेति विचुक्रुशुः ॥ ५ ॥

हरे! हे इन्द्र! रिपोर्हन्यस्य शोकस्यार्थं कालो नास्ति ॥ ६ ॥

आततायिनां शस्त्रपाणीनां परात्मना परे उत्कृष्टे परार्थे आत्मा मनो येषाम् अत एव तदर्थं युयुत्सतां सदा जयः कुत्रचिदपि न भवति किन्तु एकत्र कदाचिदेव आद्यं विश्वबीजं विना तत्र हेतुगर्भं विशेषणमिदं स्वसदृशमात्मतत्त्वशून्यं सनातनं नित्यम् ॥ ७ ॥

स एवैकः अन्येषां जयपराजययोर्हेतुरित्याह। लोका इति। शिखा जालेन कालः सर्वेषामहेतुर्भगवान् "कः कालकालः" इति श्रुतेः। इह जयादौ ॥ ८ ॥

ओजआदिकस्य स एवैक इत्याह। ओज इति। जडतासमर्थम् आत्मानं हेतुं जयादि हेतुं मन्यते जानाति ॥ ९ ॥ १० ॥

———

(१) जीवेश्वरयोः। (२) आधिक्यानाधिक्ययोः।

पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेन्द्रियाशयाः ।
शक्नुवन्त्यस्य सर्गादौ न विना यदनुग्रहात् ॥ ११ ॥
अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम् ।
भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयम् ॥ १२ ॥
आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः ।
भवन्त्येव हि तत्काले यथाऽनिच्छोर्विपर्ययाः ॥ १३ ॥
तस्मादकीर्तियशसोर्जयापजययोरपि ।
समः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा ॥ १४ ॥
सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ।
तत्र साक्षिणमात्मानं यो वेद न स बध्यते ॥ १५ ॥
पश्य मां निर्जितं शक्र ! वृक्णायुधभुजं मृधे ।
घटमानं यथाशक्ति तव प्राणजिहीर्षया ॥ १६ ॥

भाषा टीका ।

ऋषि रुवाच । हे नृप ! ऐसे कहकर संग्राम में देह त्यागने की इच्छा करता असुरेन्द्र विजय से मृत्यु को उत्तम मानता शूल लेकर सुरेन्द्र पर दौड़ा जैसे प्रलयकाल के जल में कैटभ दैत्य महापुरुष भगवान् पर दौड़ा था ॥ १ ॥

तदनन्तर असुरेन्द्र ने प्रलयकाल की अग्नि के समान कठोर जिह्वा (अणी) वाला शूल हाथ में उभोलन कर बड़े वेग से महेन्द्र पर चलाया और चलाकर उस वीरने गर्जकर बड़े क्रोधसे यह कहा हे पाप ! तू मरा ॥ २ ॥

वज्रधारी इन्द्र ने चलते हुए ग्रह और उल्का के समान दुर्निरीक्ष्य और आकाश में चले आते उस शूल को शत पर्व वज्र से मध्य ही में काटदिया और अविक्लव होकर सर्पराज के अंगके समान वृत्रासुर की भुजा को भी छेदन करदिया ॥ ३ ॥

क्रोधी वृत्रासुर ने एक बाहु कटजाने पर भी निकट आकर वज्रधारी इन्द्र को परिघ से हनू (कपोलके पास) में ताडन किया और ऐरावत को भी ताडन किया । तब मघवा इन्द्र के हाथ से वज्र छूटकर गिरपड़ा ॥ ४ ॥

वृत्रासुर के इस महा अद्भुतकर्म को सुर, असुर, चारण, सिद्ध आदिक सब प्रशंसा करने लगे और पुरुहूत [इन्द्र] के इस सङ्कट को देखकर सब हा ? हा ?? करते आक्रोश करने लगे ॥ ५ ॥

अरिकी सन्निधी में अपने हाथ से गिरे वज्र को विलज्जित इन्द्र फिर नहीं ग्रहण करना चाहता था तब वृत्रासुरने कहा हे हरे ! वज्र ग्रहण करो और अपने शत्रु को (मुझे) विनाश करो यह काल विषाद करने का नहीं है ॥ ६ ॥

क्योंकि युद्ध करने वाले आतती (शस्त्रधारी) पुरुषों में सदा ही का जय हो वह नहीं है यह सब जीव परतन्त्र हैं । इस जगत् की उत्पत्ति लय और स्थिति के ईश्वर सर्वज्ञ, सनातन, आदिपुरुष का ही जय निश्चय है उनके बिना औरों का कहीं जय भी होता है कहीं पराजय भी होता है ॥ ७ ॥

लोकपालों के सहित ये समस्त लोक विवश होकर जिसके वश में शिखा (जाल) बद्ध पक्षियों के समान परतन्त्र होकर जीवित हैं वही काल रूप भगवान् जय पराजय का कारण है ॥ ८ ॥

ओज (इन्द्रिय शक्ति) सह (मनःशक्ति) बल (शरीरशक्ति) प्राण अमृत और मृत्यु स्वरूप कालको न जानकर यह जन जड़ देहको जय पराजय का हेतु मानता है ॥ ९ ॥

हे मघवन् ! जैसे काठ की नारी (पुतली) और यन्त्रमय (कलका) मृग पराई इच्छा से क्रिया करते हैं ऐसे ही इन सब भूतों को ईश्वर परतन्त्र जानो ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु आरम्भकप्रधानपुरुषादितन्त्राणीति युक्तं तत्राह–पुरुष इति । व्यक्तं महत्तत्त्वम् आत्माऽहङ्कारः ॥ ११ ॥

ननु स्वकर्मद्वारा जीव एव सृष्ट्यादिहेतुरितिमीमांसका मन्यंते तत्राह एवमविद्वाननीशमेवात्मानमीश्वरं स्वतन्त्रं मन्यते ननु पित्रादयः स्रष्टारो दृश्यन्ते व्याघ्रादयः [ ] हन्तारस्तत्राह भूतैरिति स्वयमीश्वरः ॥ १२ ॥

ननु त्वया पराजितस्य मम जयादिशङ्कैव नास्ति किमिति मां वृथा युद्धे प्रवर्तयसि तत्राह । आयुरिति । तत्काले जयादिकाले विपर्ययाः अकीर्त्यादयः ॥ १३ ॥

प्राणग्लहोऽयं समर इष्वक्षो वाहनासनः ।
अत्र न ज्ञायतेऽमुष्य जयोऽमुष्य पराजयः ॥ १७ ॥

॥ श्रीशुक उवाच ॥

इन्द्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत् ।
गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः ॥ १८ ॥

॥ इन्द्र उवाच ॥

अहो दानव ! सिद्धोऽसि यस्य ते मतिरीदृशी ।
भक्तः सर्वात्मनात्मानं सुहृदं जग[1]दीश्वरम् ॥ १९ ॥
भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम् ।
यद्विहायासुरं भावं महापुरुषतां गतः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्मादेवं सर्वमीश्वराधीनं तस्मात्समः स्याद्धर्षविषादहीनो भवेत् ॥ १४ ॥

समदृशामुपायमाह । सत्त्वमिति । हर्षादिभिर्न बध्यते ॥ १५ ॥

हर्षविषादनिवृत्तये तवाहमेव गुरुरित्याह । पश्येति । वृक्णमायुधं भुजश्च यस्य ॥ १६ ॥

अनियततत्त्वं द्यूतरूपकेणोपसंहरति प्राणा एव ग्लहः पणो यस्मिन् इषव एवाक्षाः पाशका यस्मिन् वाहनान्येवेतस्ततश्चाल्यमानान्यासनानि फलकानि यस्मिन् ॥ १७ ॥

गतालीकं निष्कपटम् ॥ १८ ॥

भक्तः सेवितवानसि ॥ १९ ॥ २० ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुरुषः जीवः प्रकृतिः प्रधानं चित्समष्टि संसृष्टमचेतनं व्यक्तं महत्तत्त्वमात्माऽहङ्कारः भूतान्याकाशादीनि इन्द्रियाणि ज्ञानकर्मोभयात्मकानि दर्शादीन्द्रियापर्यायोऽन्तःकरणम् एते यस्य भगवतोऽनुग्रहाद्विना तदनुप्रवेशरूपानुग्रहमन्तरेणास्य विश्वस्य सर्गादौ उत्पत्तिस्थितिलयेषु न शक्नुवन्ति न प्रभवन्ति एषां परमपुरुषकार्यत्वादिति भावः । प्रकृत्यादिग्रहणं दृष्टान्तार्थं यथा प्रकृत्यादयोऽस्य सर्गादौ न शक्नुवन्ति तथा पुरुषश्चतुर्मुखादिजीवोपि तदनुग्रहं विनास्यसर्गादौ न शक्नोति तत्कार्यत्वादित्यर्थः ॥ ११ ॥

एवं कार्यत्वमुक्तमथानीशत्वमाह । अविद्वानिति । इमं परमपुरुषायत्तोत्पत्त्यादिमन्तं तत्परतन्त्रमत एवानीश्वरमात्मानमविद्वानज्ञोऽनीश्वरं मन्यते स्वात्मानमीश्वरं मन्यते जन इति शेषः "पुरुषः प्रकृतिर्व्यक्तम्" इति श्लोकद्वयेन परमपुरुषस्य प्रयोजकत्वं प्रकृत्यादीनां तत्कार्याणां प्रयोज्यकर्तृत्वं चोक्तं तदेव प्रपञ्चयति। भूतैरित्यर्द्धेन । स्वयमात्मना प्रयोजककर्त्रा स्वेनेत्यर्थः भूतैः पृथिव्यादिभिः स्वानुग्रहीतैः भूतगृहीतैः भूतग्रहणं प्रकृत्यादीनामप्युपलक्षणं प्रकृत्यादिभिः स्वानुप्रवेशाहितशक्तिभिः भूतानि देवमनुष्यादिरूपाणि भूतानि सृजति तथा तैरेव भूतानि ग्रसते च श्लोकद्वये सहारकत्वकथनेन समष्टिसृष्टेरद्वारकतेति सूचितम् "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति श्रुत्यर्थोऽत्रानुसन्धेयः ॥ १२ ॥

अस्त्वेवं तथापि पराजितोऽहं पुनरात्मनो न जयं सम्भावयामीत्यत्राह । आयुरिति । हि यस्मादीश्वरायत्ता कर्मानुगुणाः देवमनुष्यादिदेहास्तस्मादायुरादयोऽपि तदायत्तानि यतः देशकालपरिणामकर्मानुगुणाः पुरुषस्य वा आशिषस्ताः सर्वास्तत्काले उचितकाले तत्तत्कर्मफलानुभवदशायामित्यर्थः भवन्त्येव तत्र दृष्टान्तः । यथेति यथाऽनिच्छोः मरणादारिद्र्यादिकमनिच्छोरपि पुंसः तद्विपर्ययाः आयुरादिविपर्ययाः मरणदारिद्र्यापकीर्तिप्रभृतयोऽपि भवन्ति तथा आयुरादयोऽपीत्यर्थः तत्रायुर्जीवनं श्रीः सम्पत् ऐश्वर्यं प्रभुत्वं यद्वैश्वर्यं सम्पत् श्रीस्तेजः भगवत्सहायस्य तेऽधुना आयुरादयो भवेयुरेवेति भावः ॥ १३ ॥

यत एवं सर्वमीश्वरायत्तं कर्मानुगुणं चात एव न विक्रियेत विवेकीत्याह । तस्मादिति । यस्मादेवमायुरादिकमीश्वरायत्तं कर्मानुगुणं विपर्ययश्चेश्वरायत्तं तस्माद्विवेकी कीर्त्यकीर्त्योर्जयपराजययोस्तथा मरणजीवनयोश्च निमित्तयोर्ये सुखदुःखे ताभ्यां कीर्त्यादिनिमित्तसुखादिना विकारं न प्राप्नुयादित्यर्थः ॥ १४ ॥

किञ्च भगवदनुकरीत्या मदनुकरीत्या च मुक्तेरेव निरतिशयपुरुषार्थत्वादनभिसंहितफलस्य सङ्गकर्तृकस्य युद्धादि कर्मणा आयुराद्यानुषङ्गिकफलानामग्रहणात् तत्साधनत्वाभावाच्चायुरादिकर्म कुर्वन्देहावसाने मुक्तोऽपि भवतीत्याह । सत्त्वमिति । सत्त्वादयो गुणाः नात्मनः जीवस्य किन्तु प्रकृतेरेव गुणा इति निश्चित्य तत्र सत्त्वादिगुणपरिणामरूपे देहे स्थितमात्मानं यः पुमान्साक्षिणं द्रष्टारं मन्यते तत्कर्तृत्वं वेद न तु आत्मानं कर्तारं मन्यते इत्यर्थः स तु न बध्यते किन्तु संसारबन्धान्मुच्यत इति भावः ॥ १५ ॥

अस्मिन्नर्थं मामेव दृष्टान्तभूतं पश्येत्याह । पश्येति ।

(१) हरिमिति वी० पाठान्तरम् ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे शक्र! मृधे युधे वृक्णं छिन्नमायुधं त्रिशूलं भुजश्च यस्य तं निर्जितं पराजितमपि पुनस्तव प्राणान्हर्तुमिच्छया यथाशक्ति घटमानं यतमानं युयुत्सुं मां पश्य ॥ १६ ॥

यदि नूनं मम जयो भवेत्तर्हि योत्स्यामीत्याशङ्कमानं प्रत्यन्दन्समरं द्यूतत्वेन रूपयति । प्राणग्लह इति । गृह्यत इति ग्लहः जितेन गृह्यमाणाः पणाः प्राणा एव ग्लहो यस्मिन् वाहनानि हस्त्यश्वरथादीन्येवासनानि अस्यन्ते क्षिप्यन्ते इतस्ततश्चाल्यंत इत्यसनानि फलका यस्मिंश्चिदवः शरा एवाक्षाः देवनाख्या यस्मिंस्तोयं द्यूतसदृशः संग्रामः अत्र द्यूततुल्ये संग्रामे कस्य जयः कस्य वा पराजय इति न ज्ञायते द्यूत इव जयपराजयौ तावदुर्ज्ञेयौ इत्यर्थः इत्थं तु लोकदृष्ट्योक्तं मया नूनं भगवत्सहायस्य तव जय एव निश्चित इति भावः ॥ १७ ॥

एवं तस्य कथनेन युद्धाय प्रोत्साहितः उपात्तवज्रः शक्रः तमाहेत्याह मुनिः । इन्द्र इति । गताळीकं निष्कपटं अत्रस्य वचः श्रुत्वाऽपूजयद्बहुमन्यत स्वीकृतवज्रायुधः शक्रो विगतस्मयः स्मितेनामियं भीतिरित्याश्चर्यरहितः प्रहसन् सावधानं स्ववचः समाकर्णनाय प्रहसंस्तं वृत्रमुवाच ॥ १८ ॥

उक्तमेवाह । अहो इत्यादिना आतकोदक इत्यंतेन । हे दानव, त्वं सिद्धोसि कृतकृत्योसि सिद्धोऽहं इति कथं त्वया ज्ञातस्तत्राह । यस्य ते तव ईदृशी मतिर्वर्तते किञ्च सिद्धत्वापादिकानन्या भगवद्भक्तिरेव सा च तवास्तीत्याह । भक्त । इति त्वं सर्वात्मनोपायोपेयाद्विभावेन जगदीश्वरमन्तरात्मानमत एव सुहृदं निरतिशयप्रियं भगवन्तं भक्त आर्तत्वात्कर्तरिक्तः सेवितवान् ॥ १९ ॥

किञ्च जनान्मोहयतीति तथा तां वैष्णवीं मायां भवानत्यगाः कुतः यद्यस्मान्निर्यानासुरं भावं तामसत्वं विहाय महापुरुषतां श्रेष्ठपुरुषतां सत्त्वोत्तरपुरुषतां इति यावत् गतः प्राप्तवानसि ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हिरण्यगर्भादिनामोऽथ आदिगुणात्प्रेरितृत्वेन सत्त्वाज्जयपराजययोरपि तन्निबन्धत्वमपि किमपराधमिति तत्राह—पुरुष इति । "हिरण्यगर्भः पुरुष आत्मा वायुरुदाहृतः शेषोऽव्यक्तस्तथैवेन्द्र आशयः समुदाहृतः" इत्यतः पुरुषादिशब्देन न संसार्यादिनामान्यानि वस्तूनि गृह्यन्ते किन्तु विशिष्ट एव चेतन इत्येवं शास्त्रनिर्णये सति हिरण्यगर्भाद्यो यदनुग्रहं विनाऽस्य जगतः सर्गादौ न शक्नुवन्ति तमात्मानमन्तःस्थितं दानादिकर्तारं श्रीहरिमनीशं जीवं मन्यते व्याहतमिदमित्याह - ईश्वरमिति । कोऽसाविति तत्राह अगिरानेकेति । अज्ञानादेवं मन्यमानस्य निरय एवावस्थानं नान्यत्रेत्यस्मिन्नर्थे एव वाक्यः॥

"अनीशं जीवरूपेण परमात्मानमीश्वरम् ।
ये मन्यंते तान्समीक्ष्य कोऽहमिरयगाम्भवेत्" इति ॥

वचनात् ॥ ११ ॥

ननु तस्यावृत्ते ब्रह्मा स्रष्टेत्यादिरूढिः कथमिति । तत्राह - भूतैरिति ॥ १२ ॥

दैवं विनसृष्टिसंहारावपि तदधीनावित्याह । आयुरिति । पुरुषस्योत्कर्षस्य या आयुरादयाशिषो भवन्ति ते भावाः काले कालात्मनो हरेराराधनोपयोगाय भवन्ति हि यस्मात्तस्मादकीर्त्यादेः समः स्यादित्यन्वयः यथा दुःखाद्यनुभवेच्छारहितस्यापि विपर्यय दुःखादिलक्षणा दृश्यंते तथेति शेषः अनेन सर्वे भावनारायणाधीना इति निरणायि ॥ १३—१४ ॥

दुःखागमे प्रकृतिपुरुषविवेकाज्ञानं कारणमित्याह । सत्त्वमिति । आत्मनो जीवस्यात्मानं परमात्मानम् ॥ १५ ॥

श्रीहर्यधीनत्वेन जयादिकं तथापि प्रत्यक्षमित्याह । पश्येति ॥ १६ ॥

प्राणा एव ग्लहः पणो यस्य स तथा इषवः शरा एव अक्षा यस्य स तथा हस्त्यादिवाहनान्यासनं फलकलक्षणं यस्य स तथा द्यूतकल्पः संग्रामः अत्र द्यूतलक्षणे समरे ॥ १७ ॥

गताळीकं निर्व्याजम् ॥ १८ ॥

सिद्धः जीवन्मुक्तः "जीवन्मुक्ते जातिभेदे सिद्धः स्यात्साधितेपि च" इति आत्मानं श्रीहरिं भक्तः भजमानः ॥ १९ ॥

प्रामं गत इतिवत् महापुरुषतां प्रति गतः । भक्तिज्ञानादिगुणसंपन्नत्वेन महत्त्वम् ॥ २०॥२१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वाहनानि हस्त्यादीन्येव आसनानि सारि स्थानीयनां योधृणामाधारभूताः फलका यस्मिन् ॥ १५ ॥

गतविस्मयः प्राप्तविस्मयः ॥ १९—३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पुरुषो महत्स्रष्टा स्वांशोपि किमुत प्रकृत्यादय इत्यर्थः । अव्यक्तं महत्तत्त्वमात्मा अहङ्कारः । एते यस्यानुग्रहाद्विना सर्गादौ न शक्नुवन्ति । न च पुरुषस्य स एव कथं तदनुग्राह्य इति वाच्यं । परब्रह्मणोपि तदनुग्राह्यत्व श्रवणात् यथा "मदीयं महिमानञ्च परब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि" इति ॥ ११ ॥

ननु स्वकर्मद्वारा जीव एव सृष्ट्यादि हेतुरिति मीमांसका मन्यन्ते तत्राह एवमविद्वान् । अनीशमेवात्मानं जीवं ईशं मन्यते । ननु सिंहादयः स्रष्टारो दृश्यन्तें व्याघ्रादयस्तु हन्तारस्तत्राह भूतैरिति ॥ १२ ॥

ननु त्वया पराजितस्य मम जयादि शंकैव नास्ति किमिति यत्मान्मां युद्धे प्रवर्त्तयसीति तत्राह-आयुरिति । तत्काले अयुरादयनुकूले काले अतस्तवापि जयकालस्त्वं जेष्यसीति भावः विपर्ययाः मृत्युदारिद्र्यादयः ॥ १३ ॥

समः समभावनावान् स्यात् सुखदुःखयोः ॥ १४ ॥

जयपराजयाद्याः गुणकार्याण्येव आत्मा तु गुणव्यतिरिक्त एवेति विवेकेन हर्षविषादौ न कर्त्तव्यावित्याह । सत्त्वमिति । न बध्यते संसारबन्धं न प्राप्नोति ॥ १५ ॥

अत्रार्थे अहमेव ते गुरुरित्याह । पश्येति ॥ १६ ॥

युद्धमिदं द्यूत क्रीडनमेव । दोषबुद्ध्याऽरागिभिरपि स्वकर्तुमशक्यमित्याह प्राणा एव ग्लहः पणो यत्र । इषव एवाक्षाः पाशका यस्मिन् । वाहनानि हस्त्यश्वादीन्येव आसनानि फलका यस्मिन् ॥ १७ ॥

गतविस्मय इति हन्त हन्त कथमसुरस्याप्येतावन्ति भक्तिज्ञानवैराग्यादीनीति प्रथमम् विस्मितो हास्यरहित एवाऽऽसीत् ततः प्रह्लाद बलिप्रभृतिस्मृत्या भक्तिरस्मादप्येश्वर्योऽपि कोटिगुणिता

खल्विदं महदाश्चर्यं यद्रजःप्रकृतेस्तव ।
वासुदेवे भगवति सत्त्वात्मनि दृढा मतिः ॥ २१ ॥
यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ।
विक्रीडतोऽमृताम्भोधौ किं क्षुद्रैः खातकोदकैः ॥ २२ ॥
श्रीशुक उवाच ।
इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप ! ।
युयुधाते महावीर्याविन्द्रवृत्रौ युधाम्पती ॥ २३ ॥
आविद्ध्य परिघं वृत्रः कार्ष्णायसमरिन्दमः ।
इन्द्राय प्राहिणोद्घोरं वामहस्तेन मारिष ! ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

असुरेष्वपि संभवेदेवेति विस्मयापाये तस्य प्रहर्षहेतुको हास आभूदित्यर्थः ॥ १८ ॥

भक्तः सेवितवानसि ॥ १९ ॥ २० ॥

महदाश्चर्यमिति । पुनरपि विस्मयोदयः । रजःस्वभावस्य तव कथं दृढा भक्तिः प्रह्लादादौ तु नारदादिमहदनुग्रहेणैव रजःस्वभावापगमस्तैर्भक्तिरिति भावः । सत्त्वात्मनि शुद्धसत्त्व मूर्त्तौ ॥ २१ ॥

तव स्वर्गादिभोगापेक्षा युक्तैवेत्याह-यस्येति । खातकोदकैः गर्त्तादिजलोपमैः स्वर्गादिभिः किम् अस्माकन्तु मरणभावादेतैरेव निर्वृतिरिति भावः ॥ २२ ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुरुषो जीवः अव्यक्तं महत्तत्त्वं आत्माहङ्कारः भूतानि च इन्द्रियाणि आशयोऽन्तःकरणञ्च ते तथा यदनुग्रहाद्विना सर्गादौ न शक्नुवन्ति यत्प्रवेशरूपमनुग्रहं विना सर्गादिकं कर्त्तुं न प्रभवन्तीत्यर्थः ॥ ११ ॥

अनीशं स्वातन्त्र्येण किमपि कर्त्तुमसमर्थमीश्वरमिदं मयैव कृतमिति समर्थं मन्यते यतो यः स्वयं भूतैर्भूतानि सृजति तैस्तानि संहरति च ॥ १२ ॥

यथा पुरुषस्यानिच्छोरेव विपर्य्ययाः आयुरादयभावाः भवन्त्येव तथा आयुरादयोऽपि भवन्त्येव ॥ १३ ॥

सुखदुःखाभ्यां सुखदुःखयोश्च समः स्यात् ॥ १४ ॥

समत्वसाधनं गुणसाक्षिभूतात्मज्ञानमित्याह - सत्त्वमिति ॥१५॥

वृक्णां छिन्नमायुधं भुजश्च यस्य तम् ॥ १६ ॥

• जयपराजययोरनियतत्वं द्यूतरूपकेण दर्शयति-अयं समरः प्राणाः ग्लहः पणो यस्मिन् तथाभूतः द्यूत एव इषूपलक्षितान्यायुधान्येव अक्षाः पाशाः यस्मिन् वाहनानि आस्यन्ते क्षिप्यन्ते इत्यास्यानि फलका यस्मिन् ॥ १७ ॥

गतमलीकं मिथ्याभाषणं यस्मात्तद्वचः श्रुत्वा ॥ १८ ॥

आत्मानं परमात्मानं प्रति भक्तोऽसि ॥ १९ ॥

महापुरुषाः भागवतास्तत्ताम् ॥ २० ॥ २१ ॥

भाषाटीका ।

पुरुष, प्रकृति, (व्यक्त) महत्तत्त्व पञ्चभूत इन्द्रिय और अन्तःकरण ये सब जिसके अनुग्रह के बिना सृष्ट्यादिक में समर्थ नहीं होसके हैं ॥ ११ ॥

ऐसे ईश्वर परमात्माको अविद्वान पुरुष अनीश असमर्थ मानता है, वह तो भूतों के द्वारा भूतों को रचकर उनहीं के द्वारा उन भूतों को आप ग्रसता है ॥ १२ ॥

पुरुष इच्छा न करे तो भी उस समय पर जैसे आयु श्री, कीर्त्ति, और आशिष ये सबही विपरीत हो जाते हैं ॥ १३ ॥

तिसीसे अयश और यश, जय और पराजय तथा मरण और जीवन में भी सुख दुःख समान माने ॥ १४ ॥

सत्व, रज, तम ये तीनों प्रकृति के गुण हैं आत्मा के नहीं । तिनमें जो आत्मा को साक्षी जानता है सो बन्धको नहीं प्राप्त होता ॥ १५ ॥

हे इन्द्र ! मोकूं तूने जीत भी लिया और मेरा आयुध तथा हाथभी कट गया है तोभी उत्साह से तेरे प्राण हरने की चेष्टा करताहूं तू देख ॥ १६ ॥

ये समर नहीं एक जुआ है इसमें बाण ही फेंकने के पाशे और वाहन ही खेलने का घर है और प्राणों की बाजी लगती है । इसमें किसकी जीत किसकी हार यह नहीं जाना जाता ॥ १७ ॥

श्री शुकदेवजी बोले ॥ इन्द्रने वृत्रासुर का सत्यवचन सुनकर वहीं आदर की इन्द्रभी विस्मयको छोड़ वज्र हाथ में ले हँसकर बोला ॥ १८ ॥

इन्द्रबोले, । हे दानव ! तुम सिद्ध हो जो तुमारी ऐसी मति है सर्व के सुहृद और आत्मा जगदीश्वर के तुम सर्व प्रकार से भक्त हो ॥ १९ ॥

तुम जनों के मोहने वाली वैष्णवी माया को तर गये और तुम आसुरभावको छोड़कर महापुरुष के भाव को प्राप्त भये हो ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य तव खातकोदकैर्गर्त्तादिजलोपमैः स्वर्गादिभिः किम् ॥२२॥

युधां संग्रामाणां पती मुख्यौ ॥ २३ ॥

स तु वृत्रस्य परिघं करं च करभोपमम् ।
चिच्छेद युगपद्देवो वज्रेण शतपर्वणा ॥ २५ ॥
दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोऽसुरः ।
छिन्नपक्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः ॥ २६ ॥
कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुम् ।
नभोगंभीरवक्त्रेण लेलिह्वो(१) ल्बणजिह्वया ॥ २७ ॥
दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयम् ।
अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन् ॥ २८ ॥
गिरिराट्पादचारीव पद्भ्यां(२) निर्जरयन्महीम् ।
जग्रास स समासाद्य वज्रिणं सह वाहनम् ॥ २९ ॥
महाप्राणो महावीर्यो महासर्प इव द्विपम् ।
वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे मारिष श्रेष्ठ राजन् ! ॥ २४ ॥

उत्कृत्तं मूलं ययोस्ताभ्यां रक्तं स्रवतीति तथा गोत्रः पर्वतः ॥ २५ ॥

कृत्वाधरामित्यादेर्जग्रासेति तृतीयेनान्वयः नभोवद्गम्भीरेण वक्त्रेण लेलिहः सर्पस्तद्वदुल्बणया जिह्वया ॥ २७ ॥

कालकल्पाभिः कालतुल्याभिर्दंष्ट्राभिर्ग्रसन्निव आक्षिपन् चालयन् ॥ २८ ॥

निर्जरयन् चूर्णयन् ॥ २९ ॥

महाप्राणो महाबलः महावीर्यो महाप्रभावः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्चेदं महदाश्चर्यं खलु किं तत् यद्रजःप्रकृतेः राजसस्वभावस्य तव सर्वात्मनि षाड्गुण्यपूर्णे वासुदेवे निश्चयमतिरवस्थितेति यत् ॥ २१ ॥

अत एव न तवैश्वर्यकैवल्यादिषु गतिरित्याह—यस्येति । निःश्रेयसेश्वरे मोक्षाधिपतौ आश्रितानां संसृतिबन्धहारिणि भगवति यस्य पुंसो भक्तिस्तस्य अमृताम्भोधौ महानन्दसमुद्रे विक्रीडतः विहरतः पुंसः क्षुद्रैरल्पैः खातकोदकैर्गर्तोदकतुल्यैरैश्वर्यकैवल्यादिसुखैः किं तानि तव तुच्छानीति भावः ॥ २२ ॥

एवं परस्परं ब्रुवाणौ इन्द्रवृत्रौ युयुधातेइत्याह मुनिः-इतीति । इतीत्थं धर्मजिज्ञासया भगवद्धर्मविचारेण तत्पूर्वमित्यर्थः एवं ब्रुवाणौ भाषमाणौ युधां योधानां पती मुख्यौ अपारवीर्यौ इन्द्रवृत्रौ हे नृप ! युयुधाते युद्धं कृतवन्तौ ॥ २३ ॥

तदेवाह-आविध्येति । अरिन्दमो वृत्रः कार्ष्णायसं कृष्णलोहमयं घोरं परिघं वामहस्तेनाविध्य भ्रामयित्वा इन्द्राय प्राहिणोत् प्रचिक्षेप हे मारिष श्रेष्ठराजन् ! ॥ २४ ॥

स देवः इन्द्रस्तु वृत्रस्य परिघं करभोपमं दिग्गजशुण्डातुल्यं करं वामहस्तं च युगपदेव शतपर्वणा वज्रेण चिच्छेद छिन्नवान् ॥ २५ ॥

उत्कृत्तं छिन्नं मूलं ययोस्ताभ्यां बाहुभ्यां रक्तं स्रवतीति रक्तस्रवोऽसुरो वृत्रः बभौ रराज यथा गोत्रो गिरिर्वज्रिणेन्द्रेण छिन्नौ पक्षौ यस्य तादृशः खादाकाशाद्भ्रष्टो गलितो हतस्सन् भाति तद्वत् ॥ २६ ॥

स दैत्यो वृत्रः अधरां हनुं भूमौ उत्तरां हनुं दिवि कृत्वा निधाय नभोवद्गम्भीरेण वक्त्रेण लेलिहस्सर्पः पुनः पुनरतिशयेन वा लेढि लेलिहः यङ्लुगन्तात्पचाद्यच् तद्वदुल्बणया क्रूरया जिह्वया सवाहनमैरावतसहितं वज्रिणं इन्द्रमासाद्य प्राप्य जग्रास निगीर्णवान् कथंभूतस्सन् कालकल्पाभिर्मृत्युतुल्याभिर्दंष्ट्राभिर्जगत्त्रयं ग्रसन्निवातिमात्रोच्छ्रितो महादेहो यस्मात एव तरसा बलेन गिरीनाक्षिपन् इतस्ततश्चालयन् पादचारी पर्वतराडिव पद्भ्यां महीं निर्जरयंश्चूर्णयन् पद्भ्यां गिरीनाक्षिपन्महीं निर्जरयंश्चेति वान्वयः महाप्राणो महाबलः महावीर्योतिप्रभावस्सर्पो द्विपं गजमिव जग्रासेति दृष्टान्तीभूतः ॥ २७ ॥ २८ ॥ २९ ॥

वृत्रेण ग्रस्तं तमिन्द्रमालक्ष्य दृष्ट्वा ब्रह्मादिभिर्महर्षिभिश्च सहिताः सर्वे सुराः हा अद्येन्द्रस्य कष्टं प्राप्तं इति निर्विण्णाश्चिन्ताक्रान्ताश्चुक्रुशुः असुरेन्द्रेण वृत्रेण निगीर्णोपीन्द्रो न ममार न मृतः किन्तूदरं प्रविष्टो महापुरुषेण भगवता सन्नद्धो रक्षितः महापुरुषेण नारायणकवचात्मकेन सन्नद्धो दंशितो वा भगवन्मायाबलेन योगमायाबलोपबृंहितेनेत्यर्थः ॥ ३० ॥ ३१ ॥

(१) लिलेहेति विजयध्वज सम्मतः पाठः । (२) निर्दरयन् । इति वी० पाठान्तरम् ।

हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः।
निगीर्णोऽप्यसुरेन्द्रेण न ममारोदरं गतः।
महापुरुषसन्नद्धो योगमायाबलेन च ॥ ३१ ॥
भित्त्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद्विभुः।
उच्चकर्त्त शिरः शत्रोर्गिरिशृङ्गमिवौजसा ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

स्नानकोदकैः कूपतटाकादिजलैः तत्प्रायैः स्वर्गादिभिः ॥ २२ ॥

धर्मजिज्ञासया धर्मविचारेण युक्तौ युध्यतीति युधो योधाः तयोः पती युधसंप्रहार इति धातुः अनपुंसकाद्युपपदे क्विप् प्रत्ययः पुंशब्दवत् ॥ २३ ॥ २४ ॥

"करिशिशुकाद्यः करभः करिपोतोऽपि तत्कर" इत्यभिधानात् अत्र करभशब्दस्य युक्तोऽर्थो ग्राह्यः ॥ २५ ॥

भृशं भ्रंशितः ॥ २६ ॥

लिलेह नभ इति शेषः ॥ २७ ॥

कालकल्पाभिः यमसदृशीभिः ॥ २८ ॥ २९ ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

आविध्य भ्रामयित्वा मारिष हे मान्य ! ॥ २४—२५ ॥

गोत्रः पर्वतः ॥ २६ ॥

नभोवद्गम्भीरेण वक्त्रेण लेलिहः सर्पस्तद्वत्तुल्यया या जिह्वया निर्जरयन् जीर्णीकुर्वन् तरसा जग्रासेत्यन्वयः ॥ २७—२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यस्य निःश्रेयसेश्वरे मुक्तिप्रदे हरौ भक्तिः स्यात्तस्य क्षुद्रैः स्वर्गादिसुखैः किं प्रयोजनम् यथाऽमृताम्भोधौ क्रीडतो विक्रीडतः खातकोदकैः किम् ॥ २२ ॥ २३ ॥

हे मारिष श्रेष्ठ ! ॥ २४ ॥ २५ ॥

यथा वज्रिणा हतः स्वाङ्गपतितच्छिन्नपक्षो गोत्रो गिरिः स्यात् । असुरः उत्कृत्तं मूलं ययोस्ताभ्यां रक्तं स्रवतीति तथा बभौ ॥ २६ ॥

दैत्यः दैत्यपक्षपातित्वात् न तु दित्यपत्यत्वात् । अधरां हनुं भूमावुत्तरां हनुं दिवि च कृत्वा नभ इव गंभीरवक्त्रेण उल्बणजिह्वया च लेलिहत्सर्प इव प्रतीयमानः । वज्रिणं जग्रासेति तृतीयेनान्वयः ॥ २७ ॥

कालकल्पाभिः कालतुल्याभिः जगत्त्रयं ग्रसन्निव अतिमात्रः अतिप्रमाणः महान्कायो यस्य स तरसा वेगेन गिरीन् आक्षिपन् अर्दयन् ॥ २८ ॥

निर्जरयन् जर्जरीकुर्वन् ॥ २९ ॥

महाप्राणो विपुलबलः महावीर्यो विपुलपराक्रमः सर्पो द्विपं गजमिव ॥ ३० ॥

भाषाटीका।

यह बड़ा आश्चर्य है जो रजोगुण की प्रकृति वाले तुम्हारी शुद्धसत्वस्वरूप भगवान् वासुदेव में दृढ़ मति भई ॥ २१ ॥

जिस की मोक्ष के भी ईश्वर, हरि, भगवान् में भक्ति है । उस अमृतसमुद्रके गोता लगाने वाले को खोदके निकाले हुए कूपादि के पानी से क्या प्रयोजन है ॥ २२ ॥

श्रीशुकदेवजी बोले ! हे राजन् ! संग्रामके पती धर्मकी जिज्ञासा से परस्पर यों बोलते हुए बड़े बली इन्द्र और वृत्रासुर दोनों युद्ध करने लगे ॥ २३ ॥

हे राजन् ! शत्रु के दमन करने वाले वृत्रासुरने फटकारके लोहेका एक घोर परिघ बायें हाथ से चलाया ॥ २४ ॥

इन्द्रनेभी उस परिघ और वृत्रासुर के हाथको (शतपर्व) वज्रसे एकही बार काट दिया ॥ २५ ॥

मूलसे कटे हुये हाथों से रक्त बहाता हुआ वृत्रासुर ऐसा मालूम पड़ा कि जैसे इन्द्रके वज्र से कटे पक्षवाला आकाश से गिरा हुआ पर्वत हो ॥ २६ ॥

वृत्रासुर नीचे का होंठ पृथ्वी में ऊपरका होंठ आकाश में करके आकाश के सदृश गंभीर मुखसे सर्प के नांई उल्बण जिह्वा से और काल के सदृश डाढ़ों से तीनों जगत्को ग्रसतासा बहुत ही भारी शरीर वाले वेग से पर्वतों को चलाता हुआ पांवसे चलने वाले बड़े पर्वत सरी का पृथ्वी को चूर्ण करता हुआ इन्द्र के पास पहुंच कर वाहन सहित इन्द्र को ग्रस लिया ॥२७॥२८॥२९॥

महाबल महाप्रभाव वाला सर्प हाथी को जैसे ग्रस ले । वैसे, वृत्रासुर के ग्रसे हुए इन्द्र को देख देव, प्रजापति और महर्षि, ये सब ही अहो ? बड़ा कष्ट हुआ यों दुःखितहो कर आक्रोश करते हुए । इन्द्र को तो वृत्रासुर ने निगल लिया तौ भी वह नारायण कवच रूप महापुरुष से कवचित होने के कारण और योग माया बल के कारण उदर में जाकर भी मरा नहीं ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

महापुरुषेण कवचरूपेण श्रीनारायणेन सन्नद्धो दंशितः योगबलेन मायाबलेन च ॥ ३१ ॥

वज्रस्तु तत्कन्धरमाशुवेगः कृन्तन्समन्तात्परिवर्तमानः ।
न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ॥ ३३ ॥
तदा च खे दुन्दुभयो विनेदुर्गन्धर्वसिद्धाः समहर्षिसङ्घाः ।
वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना मन्त्रैर्मुदा कुसुमैरभ्यवर्षन् ॥ ३४ ॥
वृत्रस्य देहान्निष्क्रान्तमात्मज्योतिररिन्दम ! ॥
पश्यतां सर्वलोकानामलोकं समपद्यत ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां वृत्रवधोनाम
द्वादशोऽध्यायः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वज्रभिदिन्द्रः उत्कर्त्तं चिच्छेद ॥ ३२ ॥

तस्य कन्धरं कन्धराम् आशुवेगोऽतिवेगवान् ज्योतिषां सूर्यादीनाम् अयनं दक्षिणोत्तरगतिरूपे संवत्सरे योऽहर्गणः षष्ठ्युत्तरशतत्रयात्मकस्तावताऽहर्गणेन वार्त्रहत्ये वृत्रहत्यायोग्ये काले न्यपातयत् यद्वा स्वार्थे तद्धितः वृत्रहत्यायां वृत्रहननार्थं परिवर्तमान इत्यर्थः ॥ ३३ ॥

वार्त्रघ्नलिंगैर्वृत्रहन्तुर्वीर्यप्रकाशकैः "वार्त्रहत्याय शवसेपृतनाषाह्याय च" इत्याद्यैस्तमिन्द्रमभिष्टुवाना अभिष्टुवन्तः ॥ ३४ ॥

अलोकं लोकातीतं भगवन्तम् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वज्रेण तस्य वृत्रस्य कुक्षिं भित्वा विभुः वलभिदिन्द्रः कुक्षेः बहिर्निर्गत्य शत्रोर्वृत्रस्य शिरः पर्वतस्य शृङ्गमिव उत्कर्तं चिच्छेद ॥ ३२ ॥

अति विपुलां वृत्रस्य कन्धरां कियता कालेन चिच्छेदेत्यत्राह-वज्रस्त्विति आशुवेगस्तीक्ष्णधारो वज्रो वज्रायुधं तस्य वृत्रस्य कन्धरं कण्ठं पुंस्त्वमार्षं समन्तात्कन्धरायाः अभितः परिवर्तमानः कृन्तन् छिन्दन् वार्त्रहत्ये वृत्रहत्यासम्बन्धिनि ज्योतिषामयने संवत्सरे योऽन्हां षष्ठ्युत्तरत्रिशतसंख्याकानां गणः तेन तावता कालेनेत्यर्थः न्यपातयच्छिरो भूमौ पातितवानित्यर्थः ज्योतिषां सूर्यादीनामयनं दक्षिणोत्तरगतिः तदात्मके संवत्सर इत्यर्थः वार्त्रहत्ये इत्यनेन तादर्थ्येन संवत्सरसम्बन्धित्वं वृत्रहत्यायाः सूचितम् ॥ ३३ ॥

तदा वृत्रशिरश्छेदनानन्तरं खे दिवि देवदुन्दुभयो दध्वनुः महर्षीणां सङ्घैः सहिता गन्धर्वादिसिद्धाश्च वार्त्रघ्नलिङ्गैः वृत्रहंतुरिन्द्रस्य प्रकाशकैर्मन्त्रैस्तं इन्द्रमभिष्टुवन्तः मुदा हर्षेण कुसुमैरभ्यवर्षन् ॥ ३४ ॥

हेऽरिन्दम ! वृत्रस्य देहान्निर्गतमात्मज्योतिःज्योतिरूपःस्वप्रकाशरूप आत्मा सर्वलोकानां पश्यतां सतां अलोकं प्राकृतलोकविलक्षणं श्रीवैकुण्ठं समपद्यत स्वं लोकमिति पाठे मुक्तानां स्वतः प्राप्तं स्थानमित्यर्थः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

महापुरुषेण भगवता सन्नद्धः सहितो रक्षित इति यावत् नारायणकवचाख्यविद्यया समुद्धतो वा योगमायाबलेन अणिमादिमहिमबलेन उपायलक्षणमायाबलेन वा ॥ ३१ ॥ ३२ ॥

अकृत्रिमो योगो यस्य स तथा योऽयमहर्गण आदित्यादिज्योतिषामयने दक्षिणोत्तरायणसंज्ञे संवत्सरे संभवति तावताहर्गणेन षष्ठ्युत्तरशतत्रयलक्षणेन वार्त्रहत्यं वृत्रहननसम्बन्धिनि समरे काले वा तावत्कालं समन्तात्कृन्तन् परिवर्तमानो वज्रस्तं न्यपातयदित्यन्वयः । अत्रेतिहासं पठंति । प्रथमं युद्धं नर्मदातीरे द्वितीयं तु समुद्रतीरे तत्र वृत्रेण केनचित्संकेतेन संधित इन्द्रः सख्यंप्राप्तस्य तस्य स्निग्धतया करं प्रगृह्य फेनेनास्य वधं कर्तुं विचरन्फेनेन मां जहीति विनोदवचनं वृत्रेण वादयित्वा तेन पादस्पर्शलक्षणं ताडनं कृत्वा युद्धाय सन्नद्धः एकसंवत्सरकालं युद्धं कृत्वा विष्णुशक्तियुक्तं वज्रं फेने निवेश्य तस्मै विसृज्य श्रीनारायणं ध्यायतस्तस्य शिरः प्रजहार "सन्धितः समयेनेन्द्रो वृत्रेणाथो करग्रहः । समुद्रतीरे विचरन् फेनेन वधमस्य तु । नर्मदा जहि फेनेन वाचयित्वा सुरेश्वरः पादस्पर्शं विवादं च कृत्वा युद्धाय दंशितः । फेने वज्रं समावेश्य विष्णुयुक्तं व्यसर्जयत् । अपानुदच्छिरस्तस्य ध्यायतो वत्सरेण सः" इतिवाक्यमत्रमानं करं गृह्णातीति करग्रहः" ३३ ॥

वृत्रघ्नस्येन्द्रस्य संबंधीनि लिङ्गानि लक्षणानि स्तम्भितजलनिर्गमनादीनि तानि येषु मन्त्रेषूच्यन्ते ते वार्त्रघ्नलिङ्गास्तैर्मन्त्रैः "दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः अपां बिलमपिहितं यदासीद्वृत्रं जघन्वान् । अपतद्ववार" इत्यादिलक्षणैः ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मज्योतिर्जीवाख्यं तेजः अलोकं स्वेनाधिकृतं विद्यादलोकम् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

न ममारेत्यत्र हेतुमाह-महापुरुषेण विश्वरूपोपदिष्टनारायणवर्मणा सन्नद्धः । ननु गुरुत्वेऽपि सा विद्याऽस्फुरदिति शास्त्रविरामस्मतं तत्राह- योगेति । स्वप्रतिलब्धेन भगवच्छक्तिबलेनेत्यर्थः । चकारात्तद्वलेन पूर्वशक्तेरप्युद्भवो गमितः ॥ ३१—३४ ॥

वृत्रस्येति आत्मज्योतिराविर्भूतपार्षददेहात्मकम् । अलोकं भगवल्लोकम् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भस्य
द्वादशोऽध्यायः समाप्तः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

महापुरुषेण श्रीनारायणकवचेन सन्नद्धो दंशितः योगबलेन स्वमायाबलेन च तत्र योगोऽष्टाङ्गः । माया अन्तर्धाय पवनादिरूपेण स्थितिः ॥ ३१ ॥

उत्कर्तं छिन्दन् ॥ ३२ ॥

आशुवेगोपि समन्तात् परिवर्तमानः कन्धरायाः सर्वतो दिक्षु भ्रमन्नेव कृन्तन् न त्वेकतो दिशः । कन्धराया महासारत्वादिति भावः । तावता अहर्गणेन कर्तित्वा भूमौ न्यपातयत् योऽहर्गणः ज्योतिषां सूर्यादीनां सम्बन्धिनी अयने द्वे दक्षिणोत्तरे अभिव्याप्य भवेदित्यर्थः । अयने कीदृशे वार्त्रहत्ये वृत्रहत्यायोग्ये दण्डादिभ्यस्त्यप्रत्ययान्तात् स्वार्थिके नाना तत्र भावार्थे नाना वा रूपम् ॥ ३३ ॥

वार्त्रघ्नलिङ्गैः "वार्त्रहत्याय शवसे पृतनासाह्याय च" इत्याद्यैर्मन्त्रैस्तमिन्द्रमभिष्टुवानाः ॥ ३४ ॥

अत्र यद्येव वृत्रः सत्राहमिन्द्रं जघान तदैव मम हन्ता अन्यः कोपि नास्तीति निश्चित्य योगबलेनैव देहं त्यक्त्वा कथं न शीघ्रं भगवत्पार्श्वं यामीति विभाव्य समाधिश्चकार तदैवेन्द्रोऽचेतनस्य वृत्रदेहस्य कुक्षिं विदार्य निःसृत्य शिरश्छेदे प्रवृत्त इति गिरिशृङ्गमिव चकर्तेति दृष्टान्तात् ज्ञेयम् । आत्मज्योतिः पार्षददेहात्मकः प्रकाशः वृत्रदेहात् पृथग्भूतः । अलोकं लोकातीतं श्रीसङ्कर्षणवैकुण्ठम् ॥ ३५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्य द्वादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महापुरुषेण वर्मरूपेण श्रीनारायणेन सन्नद्धः दंशितः इन्द्ररक्षार्थं भगवत्प्रयुक्तमायाबलेन च न ममार ॥ ३१ ॥

बलभिदिन्द्रः तस्य कुक्षिं भित्त्वा विदार्य ततो निष्क्रम्य निर्गत्य शत्रोः वृत्रस्य शिरः उत्कर्तं अच्छिनत् ॥ ३२ ॥

आशुवेगः शीघ्रगतिर्वज्रः कन्धरायास्समन्तात् । परिवर्तमानः परिभ्रममाणः तस्य कन्धरं पुंस्त्वमापि कन्धरां कृन्तन् छिन्दन् वार्त्रहत्ये वृत्रहत्यायोग्ये ज्योतिषां सूर्यादीनामयनं दक्षिणोत्तरगतिस्तदात्मके संवत्सरे योऽहर्गणः षष्ठ्यधिकशतत्रयदिवससमूहस्तावता अहर्गणेन न्यपातयत् ॥ ३३ ॥

वार्त्रघ्नलिङ्गैः वृत्रहन्तुरिन्द्रस्य वीर्यप्रकाशकैः । "वार्त्रहत्याय शवसे पृतनासाह्याय च इन्द्र त्वावर्तयामसि" इत्याद्यैर्मन्त्रैः । तामिन्द्रमभिष्टुवानाः । कुसुमैरभ्यवर्षन् ॥ ३४ ॥

आत्मज्योतिः जीवाख्यज्योतिः । अलोकं अकारार्थस्य वासुदेवस्य लोकं वैकुण्ठं समपद्यत ॥ ३५ ॥

इतिश्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वादशोऽध्यायः ॥ १२ ॥

भाषाटीका ।

इन्द्रने भी वज्र से वृत्रासुर की कुक्षि को फाड़कर बाहर निकल के पराक्रमसे गिरिशिखर के सदृश शत्रु के शिर को काट दिया ॥ ३१ ॥ ३२ ॥

इन्द्र का वज्र भी वृत्रासुर के मारने के लिये अति वेग से चारों तरफ भ्रमता हुआ उतने दिनों में वृत्रासुर के कंधर को गिरासका कि जितने में सूर्यादिक फिरते हैं अर्थात् एक वर्ष में गिराया ॥ ३३ ॥

उस समय आकाश में दुन्दुभि बाजने लगी गन्धर्व, सिद्ध और महर्षियों के समूह वृत्रासुरके मारने वाले इन्द्र के वीर्य को प्रकाश करने वाले मंत्रों से इन्द्र की स्तुति करते हुए कुसुमों की वर्षा करते भये ॥ ३४ ॥

हे राजन्! वृत्रासुर के देह से निकली ज्योति सबों के देखते २ साक्षात् भगवान को प्राप्त होगई ॥ ३५ ॥

इति श्रीमद् भागवत महापुराण षष्ठस्कन्ध
की भाषा टीका में द्वादश अध्याय समाप्त ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे द्वादशोऽध्यायः समाप्तः ॥ १२ ॥



॥ त्रयोदशोऽध्यायः ॥

श्रीशुक उवाच।

वृत्रे हते त्रयो लोका विना शक्रेण भूरिद!।
सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेन्द्रियाः॥ १ ॥
देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयम्।
प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेन्द्रादयस्ततः॥ २ ॥

राजोवाच।

इन्द्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने!।
येनासन्सुखिनो देवा हरेर्दुःखं कुतोऽभवत्॥ ३ ॥

श्रीशुक उवाच।

वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः।
तद्वधायार्थयन्निन्द्रं नैच्छद्भीतो बृहद्वधात्॥ ४ ॥

इन्द्र उवाच।

स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवम्।
विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व माज्म्र्यहम्॥ ५ ॥

श्रीशुक उवाच।

ऋषयस्तदुपाकर्ण्य महेन्द्रमिदमब्रुवन्।
याजयिष्याम भद्रं ते हयमेधेन मा स्मभैः॥ ६ ॥
हयमेधेन पुरुषं परमात्मानमीश्वरम्।
इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात्॥ ७ ॥
ब्रह्महा पितृहा गोघ्नो मातृहाऽऽचार्यहाऽघवान्।
श्वादः पुल्कसको वाऽपि शुद्ध्येरन्यस्य कीर्त्तनात्॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

त्रयोदशे तु वृत्रस्य ब्रह्महत्यामहाभयात्।
चिरं गतोऽवितः शक्रो विष्णुनेति निरूप्यते॥ १ ॥
अनिर्वृतं शक्रमपृष्ट्वा स्वधामेव प्रतिजग्मुः॥ २ ॥
हरेरिन्द्रस्य॥ ३ ॥

तस्य दुःखहेतुं वक्तुं प्रस्तावकथामाह-वृत्रविक्रमेत्यादिना
आर्थयन् प्रार्थयन् बृहद्वधात् ब्रह्मवधाद्भीतः सन्॥ ४ ॥
एनः पापं विभक्तं विभज्य गृहीतं मार्ज्मि शोधयामि
॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं वृत्रवधेन सर्वे निवृत्तास्स्वस्वलोकान् जग्मुरित्याह मुनिः वृत्र इति द्वाभ्यां । हे भूरिद ! एवं वृत्रे हते सति शक्रं विना सर्वे लोकपालैः सहिताः लोकाः सद्य एव विज्वराः विगतभयाः अत एव निर्वृतानि सुखितानि इन्द्रियाणि अन्तर्बाह्यानि येषां तादृशाः अभवन् बभूवुः ॥ १ ॥

ततो देवाश्च ऋषयश्च पितरश्च भूतानि च तथा दैत्याः देवाश्च तदनुगाश्च तथा ब्रह्मा चतुर्मुखश्च ईशो रुद्रश्च इन्द्रश्च आदिशब्दादन्ये च स्वस्वधिष्ण्यानि प्रति स्वयं जग्मुः ॥ २ ॥

यदुक्तं यच्छक्रेण विना सर्वे लोका विज्वरा निर्वृतेन्द्रियाः आसन्निति तत्रेन्द्रस्यानिर्वृतौ देवानां निर्वृतौ च कारणं पृच्छति राजा-इन्द्रस्येति । हे महामुने ! इन्द्रस्यानिर्वृतौ हेतुं कारणं श्रोतुमिच्छामि वृत्रवध एवेति चेत्तर्हि तेनैव देवानामप्यनिर्वृतिर्भवेदिदं तु कुतः देवानां निर्वृतिरिन्द्रस्य दुःखमिति पृच्छति-येनेति । येन वृत्रवधरूपेण हेतुना देवाः सुखिनः आसन् तस्मादेव हेतोरिन्द्रेणापि सुखिना भवितव्यं कुतः कस्माद्धेतोर्हरेरिन्द्रस्य दुःखमभूदित्यर्थः ॥ ३ ॥

एवं पृष्टो मुनिरिन्द्रस्यानिर्वृतौ देवानां निर्वृतौ च हेतुं वक्तुं तावद्वृत्रवधोद्योगकालिकं देवानां वृत्तान्तमाह मुनिः । वृत्रेत्यादिना यावदध्यायसमाप्ति । वृत्रस्य पराक्रमेण भीताः सर्वे देवा ऋषिभिस्सह वृत्रवधार्थम् इन्द्रमार्थयन् प्रार्थयन्त परस्मैपदमार्षम् एवं प्रार्थितोऽपीन्द्रो ब्रह्महत्याद्ब्रह्मवधात्पूर्वं कृताद्विश्वरूपवधात्करिष्यमाणाद्वृत्रवधाद्भीतः सन्नैच्छत् ॥ ४ ॥

एतदिन्द्रोक्तिमुखेन विशदयति-स्त्रीति । विश्वरूपवधोद्भवमेनः पापं मामनुगृह्णद्भिः स्त्रीभूमिजलद्रुमैश्चतुर्भिर्विभक्तं विभज्य गृहीतमधुना वृत्रहत्यां क्व कुत्र मार्ज्मि संशोधयेयं वृत्रहत्योद्भवं पापं क्वाप्यस्याहं शुद्धो भवेयं न क्वाप्यतस्तं न हन्यामित्यर्थः ॥ ५ ॥

एवमिन्द्रेणोक्ता ऋषयस्तं प्रत्यूचुरित्याह मुनिः । तदिन्द्रस्य वच उपाकर्ण्य ऋषयो महेन्द्रं प्रतीदं वक्ष्यमाणं वाक्यमब्रुवन् ऋषीणामुक्तिमेवाह-याजयिष्याम इत्यादिना अजातिप्रदेशान्तेन । हयमेधेनाश्वमेधेन यागेन करणेन त्वया कर्त्रा वयं याजयिष्यामः भगवन्तमिति शेषः । त्वं मास्मभैर्भयं माकार्षीः ते तव भद्रमस्तु भविष्यति ॥ ६ ॥

नन्वश्वमेधमात्रेण तत्पापं कथं निवर्तिष्यत इति शङ्कमानं प्रत्याहुः-हयमेधेनेति । परमात्मानं लोकत्रयमन्तः प्रविश्य शरीरमीश्वरं सर्वस्य प्रशासितारं स्वतेजसा दीप्यमानं परमपुरुषं नारायणं हयमेधेनेष्ट्वा आराध्य कृत्स्नजगद्वधनिमित्तादपि पापान्मोक्ष्यसे किमुत वृत्रवधनिमित्तात्पापान्मोक्ष्यस इत्यर्थः:

"नाम्नोऽस्य यावती शक्तिः पापनिर्हरणे हरेः ।
तावत्कर्तुं न शक्नोति पातकं पातकी नरः" ॥

इत्युक्तरीत्या स्मरणमात्रमहापातकनिवर्तनशीलत्वादिरूपमहामहिमशालिनमनन्तनाम्नो भगवतः साक्षादाराधनेन धर्मप्रतिपक्षवृत्रवधमात्रनिमित्तं पापं न निवर्तेत किमित्यभिप्रायेण पुरुषं परमात्मानमित्याद्यनेकनाम्नामुपादानम् ॥ ७ ॥

एतदेव विशदमाहुः । ब्रह्महेति द्वाभ्यां । यस्य भगवतो नाम्नः कीर्तनादेव ब्रह्महन्त्रादयः शुध्येरन् श्वादः श्वपाकः पुल्कसः पापजातिः ॥८॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अश्वमेधादिकर्मज्ञानप्रतिबन्धदुष्कर्मपरिहारत्वेन तत्साधनमित्येतदस्मिन्नध्याये प्रतिपाद्यते । भूरिद बहुप्रद ! स्वर्णप्रदेति वा "स्वर्णं भूरिहिरण्यञ्च पुरटं निष्कहेमनी" इत्यभिधानाद्धिरण्यवाचिद्रव्यप्रद ॥ १ ॥

ततः समुद्रतीरात् ॥ २ ॥

हरेरिन्द्रस्य "अर्काग्नीन्द्रमण्डूकविष्णुवासवमारुताः तुरङ्गसिंहशीतांशुयमाश्च हरयो हरौ" इत्यभिधानम् ॥ ३ ॥

अर्थयमानेत्युभयपदी अर्थशब्दात्प्रातिपदिकात् कृदन्तात्तत्करोतीति णिचि कृते रूपं साधु बृहद्भयात् ब्राह्मणवधात् ॥ ४ ॥

एनो ब्रह्महत्यापापं मार्ज्मि संशोध्य परिहरामि ॥ ५ ॥

मास्म भैः भयं माकार्षीः स्म ॥ ६ ॥ ७ ॥

यन्नामसङ्कीर्तनादेते शुद्धा भवन्ति किं वक्तव्यं तद्यजनेनेति भावेनाह-ब्रह्महेति ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वृत्रविक्रमेत्यादि वृत्रनाशकथनानन्तरमेव ज्ञेयम् ॥१॥२॥३॥४॥

अथ यथा बृहस्पत्यवज्ञात्मकं पापं विश्वरूपवधात्मकपापान्तरजनकं जातं । तथाच तच्च लोकमात्रदृष्ट्या विभक्तमपि वृत्रवधात्मकपापान्तरजनकत्वेनावशिष्टमेव दृष्ट्वा इन्द्रः क्वापि तदवशेषमनुभूयान्तर्भीत एव वर्तितवान् प्रत्याचक्षाणस्तमपि पूर्ववल्लोकसंग्रहार्थमपलपति-स्त्रीति ॥ ५ ॥

ऋषयस्तु जगत्स्वास्थ्याय तस्याप्यासुरभावनाशाय श्रीभगवदाराधनेन संप्रयोजितवन्त इत्यभिप्रेत्याह—ऋषय इति ॥ ६ ॥

अतो दोषाभासत्वात् प्रायश्चित्ताभासमप्युक्त्वाज्ञापयन्ति-हयेति । तत्र वीर्यातिशयाज्ञानवतामर्थमाहुः । नारायणमिष्ट्वेति । कैमुत्यार्थमाह ब्रह्महेति । आचार्यो वेदगुरुः । कीर्तनमात्रात् । किं पुनरसकृत्साक्षात्तदाराधनमयतद्यजनादित्यर्थः ॥ तत्र स्वप्रभावमपि दर्शयन्ति अस्मानिति । तत्र भगवतश्च स्वाभिप्रायमपि व्यञ्जयन्ति सर्वेति जगतघ्नस्यापि तद्भावाभाव एव इति ॥ ५—९ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ब्रह्मेशेन्द्रादय इति इन्द्रस्य स्वधिष्ण्यगमनं नोपपद्यते वृत्रवधक्षण एव ब्रह्महत्योपद्रवप्राप्तेः । तस्मादत्र इत्यनेन मानससरोवरादागत्य प्रवर्तिताश्वमेधात् परत इति व्याख्येयम् ॥१॥२॥

हरेरिन्द्रस्य ॥ ३ ॥

तस्य वृत्रस्य वधाय आर्थयन् प्रार्थयन्त स चेन्द्रो हन्तुं नैच्छत् ।
बृहद्भयात् ब्राह्मणवधभीतः सन् ॥ ४ ॥

एनः पापं मार्ज्मि शोधयामि ॥ ५ ॥

मास्मभैः माभैषीः ॥ ६—९ ॥

तमश्वमेधेन महामखेन श्रद्धाऽन्वितोऽस्माभिरनुष्ठितेन ।
हत्वा हि सब्रह्मचराचरं त्वं न लिप्यसे किं खलनिग्रहेण ॥ ९ ॥

॥ श्रीशुक उवाच ॥

एवं (१) सञ्चोदितो विप्रैर्मरुत्वानहनद्रिपुम् ।
ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥ १० ॥
तयेन्द्रः स्मासहत्तापं निर्वृत्तिर्नामुमाविशत् ।
ह्रीमन्तं वाच्यतां प्राप्तं सुखयन्त्यपि नो गुणाः ॥ ११ ॥
तां ददर्शानुधावन्तीं चाण्डालीमिव रूपिणीम् ।
जरया वेपमानाङ्गीं यक्ष्मग्रस्तामसृक्पटाम् ॥ १२ ॥
विकीर्य पलितान्केशांस्तिष्ठ तिष्ठेति भाषिणीम् ।
मीनगन्ध्यसुगन्धेन कुर्वतीं मार्गदूषणाम् ॥ १३ ॥
नभो गतो दिशः सर्वाः सहस्राक्षो विशाम्पते ! ।
प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप! मानसम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वृत्रहत्याभिभूतस्येन्द्रस्य विष्णुना रक्षा कृतेतिप्रबोधयितुमाख्यानेन वर्णयति-वृत्रे हत इति ॥ १ ॥

स्वर्यमिति तमिन्द्रमपृष्ट्वैव देवादयः स्वयं स्वधिष्ण्यानि प्रति जग्मुः ॥ २ ॥

येन वृत्रवधेन देवाः सुखित आसन् हरेरिन्द्रस्य दुःखं कुतोऽभूत् ॥ ३ ॥

तस्य वृत्रस्य वधायार्थमृषिभिः प्रार्थितवन्तः प्रार्थितोपि सः वृत्रवधाद्ब्रह्महत्याभयाद्भीतः सन् नैच्छत् ॥ ४ ॥

विश्वरूपवधोद्भवमेनः पापं स्त्र्यादिभिरनुगृह्णद्भिर्विभक्तं विभज्य स्वीकृतम् वृत्रहत्यां क मार्जिम प्रक्षालये ॥ ५ ॥

मास्म भैः भयं मा कुरु ॥ ६ ॥

जगद्वधादपि विमोक्ष्यसे किं पुनः वृत्रवधात् ॥ ७ ॥

यत्र नारायणस्य ॥ ८ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले । हे बड़े दानी हे राजन् ! वृत्रासुरके मरने पर इन्द्र के बिना लोकपालों सहित तीनों लोक तत्काल ज्वर रहित और सुखितइन्द्रियोंवाले होगये ॥ १ ॥

देवता ऋषि पितृ भूत दैत्योंके पीछे जाने वाले दैत्य और ब्रह्मा महादेव इन्द्रादिक सब अपने २ गृहको जाते भये ॥ २ ॥

राजाबोले । हे मुने ! इन्द्रकी (अनिर्वृति) अर्थात् असुख के हेतुको मैं श्रवण करनेकी इच्छा करता हूं । जिससे सब देवता सुखी होगये इन्द्रको दुःख क्यों भया ॥ ३ ॥

श्रीशुकदेवजीबोले । वृत्रासुर के विक्रमसे उद्विग्न ऋषियों सहित सब देवता उसके वधार्थ इन्द्रसे याचना किये पर ब्राह्मण के वधसे भयभीत होकर इन्द्रने इच्छा नहीं की ॥ ४ ॥

इन्द्रबोले । विश्वरूपके वधसे भया जो पाप उसको अनुग्रह करके स्त्री भूमि जल और वृक्षोंने बांटलिया वृत्रकी हत्याको कहां शुद्ध करूंगा ॥ ५ ॥

श्रीशुकदेवजी बोले । ऋषियों ने ऐसा सुन महेन्द्रसे कहा कि तुम मत डरो तुमारा मंगल होय हम तुमको अश्वमेध यज्ञ से यजन करावेंगे ॥ ६ ॥

अश्वमेध से परमपुरुष, परमात्मा, नारायण, देव का यजन करके जगत के वध से भी विमुक्त होसके हो ॥ ७ ॥

जिन हरिके कीर्तन से ब्रह्महत्या वाला, पितृघाती, गोघ्न, मातृहन्ता, गुरुहत्यारा, पापी, श्वभक्षी, या पुल्कस जाती, वे भी सब शुद्ध हो जाते हैं ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वृषाकपिमिन्द्रम् ॥ १० ॥

तया देवादिभिः कारितया स्वैरधव्यापारको इन्द्र एव ताप सहत् साम्यः अमुमिन्द्रं निर्वृतिर्नाविशत् ननु, धैर्यादिगुणयुक्त कुतोऽनिर्वृतिस्तत्राह-ह्रीमन्तं लज्जावन्तं वाच्यतां निन्दितां ॥ ११

यक्ष्मग्रस्तां क्षयरोगव्याप्ताम् ॥ १२ ॥

मीनस्येव गंधो यस्य स मीनगन्धिः सचासावसुगन्धः वायुस्तस्य गन्धेन ॥ १३ ॥

प्रागुदीचीं दिशं गतः संस्तूर्णं मानसं सरः ॥ १४ ॥

(१) सम्बोधित इति पाठान्तरम् ॥ वी०

स आवसत्पुष्करनालतन्तूनलब्धभो[1]गो यदि ह्यग्निदूतः ।
वर्षाणि साहस्रमलक्षितोऽन्तः स चिन्तयन्ब्रह्मवधाद्विमोक्षम् ॥ १५ ॥
तावत्त्रिणाकं नहुषः शशास विद्यातपोयोगबलानुभावः ।
स सम्पदैश्वर्यमदान्धबुद्धिर्नीतस्तिरश्चाङ्गतिमिन्द्रपत्न्या ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स इन्द्रः सहस्रं वर्षाणि पुष्करनालस्य तन्तूनावसत् कथंभूतः न लब्धो भोगो येन सः कुतः यद्यस्मादिह जले वसन्नग्निदूतश्च स्वयम् अग्नेश्च स्वदूतस्य हविर्भागाधिनुर्जलप्रवेशासम्भवादलब्धभोग इत्यर्थः अलब्धभाग इति पाठान्तरं न लब्धो यज्ञभागो येन सः ॥ १५ ॥

त्रिणाकं न अकं दुःखं यस्मिन्निति नाकः पुण्यलोकः तृतीयं नाकं स्वर्गं । ननु, मनुष्यस्य कुतः स्वर्गराज्यं तत्राह विद्यादिभिरनुभावः स्वर्गपालनसामर्थ्यं यस्य सः तर्हि तस्मिन्सति कथमिन्द्रस्य पुनः स्वर्गप्राप्तिस्तत्राह स नहुषः सम्पदैश्वर्याभ्यां यो मदस्तेनान्धा बुद्धिर्यस्य स इन्द्रपत्न्या शच्या तिरश्चाङ्गतिं सर्पयोनिं नीत उपायेन प्रापितः एवं ह्याख्यायते नहुषः किल कदाचिदिन्द्राणीमुवाच इन्द्रस्तावदहमतस्त्वं मां भजेति तया चावेदितवृत्तान्तो बृहस्पतिस्तामुवाच ब्राह्मणवाह्यशिबिकायामारुह्यागतं त्वां भजिष्यामीति ब्रूहि ततोऽसौ ब्रह्मशापात्पतिष्यतीति तया च तथोक्तो नहुषोऽगस्त्यादीन् शिबिकां वाहयामास तदा शीघ्रं सर्पसर्पेत्यगस्त्यं पदा पस्पर्श तेन कुपितेन "सर्पो भवे"ति शप्तो महासर्पोऽजगरोऽभूदिति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तं महामहिमशालिनंतमात्मानं भगवन्तमस्माभिरनुष्ठितेनानुष्ठापितेन अश्वमेधाख्यमहायागेनाराध्याकथमाविर्भसंप्रयुक्तस्त्वं ब्रह्मणः शरीरभूतं चराचरात्मकं जगद्धत्वापि पापेन न लिप्यसे किं वक्तव्य दुरात्मनो वृत्रस्य निग्रहेण वधप्रयुक्तेन पापेन लिप्यसे किं न लिप्यस एवेत्यर्थः ॥ ९ ॥

एवं विप्रैः सञ्चोदितः शक्रस्ततो वृत्रं जघान स च तद्वधनिमित्तेन पापेन दुःखितश्चाभूदित्याह मुनिः—एवमिति । एवं विप्रैः ऋषिभिः सञ्चोदितः प्रेरितः सम्बोधित इति पाठे सम्यग्बोधितः मरुत्वानिन्द्रो रिपुं वृत्रमहनहतवान् तस्मिन्वृत्रे हते सति ब्रह्महत्या वृत्रस्य ब्राह्मणत्वाद्ब्रह्महत्येत्युक्तं वृषाकपिमिन्द्रमाससाद अन्ववर्तत ॥ १० ॥

* तथा देवादिभिः चारितया ब्रह्महत्यया स्वेच्छयचारयो इन्द्र एव तापमसहत सहन मान्यस्तत अमुं इन्द्रं निर्वृतिः सुखं नाविशदिन्द्रः सुखी नाभूत्किन्तु दुःखमेव प्रापेत्यर्थः ननु, धैर्यादिगुणयुक्तस्य कुतो न निर्वृतिस्तत्राह—ह्रीमन्तं वाच्यतां निन्दां प्राप्तं गुणा धैर्यादयो न सुखयन्ति हि हि शब्देन लोकपरिपाटिः प्रदर्श्यते ॥ ११ ॥

एवमिन्द्रस्यानिर्वृतिकारणमभिधायाथ तत्पापनिस्तारप्रकारं वक्ष्यमाणस्तत्पापनिमित्तदुःखानुभवप्रकारमाह - तामिति । ततस्तां हत्यां इन्द्रो ददर्श कथंभूतामनुसृत्य पृष्ठतो धावन्तीं चाण्डालीमिव तद्वद्वर्णितां रूपिणीम् मूर्तिभूतां जरया वेपमानानि कम्पमानानि शिरःपादयाद्यङ्गानि यस्यास्तां यक्ष्मग्रस्तां क्षयरोगव्याप्तामशुचवटां रक्तवस्त्राम् ॥ १२ ॥

पलितान्केशान्विकीर्य क्व गच्छसि तिष्ठ तिष्ठेति भाषमाणां मीनस्य मत्स्यस्येव गन्धो यस्य स मीनगन्धिः सचासावसुश्च प्राणवायुः तस्य गन्धेन मार्गदूषणं कुर्वन्तीम् ॥ १३ ॥

ततः सहस्राक्षः इन्द्रः नभः सर्वा दिशश्च गतः भ्रमन् क्वापि विश्रान्तिमलभमान इत्यर्थः प्रागुदीचीम् ऐशानीं दिशं प्राप्य तत्रापि मानसं सरः प्रविष्टः ॥ १४ ॥

स इन्द्रः पुष्करनालतन्तुमानससरोवरस्थकमलनालतन्तुमात्रसूक्ष्मरूपेणाभिव्याप्यावासेत्यर्थः कथम्भूतः अलब्धोभागो यज्ञियभागो येन तादृशः कुतः यद्यस्मात्स्वयमग्निदूत अग्निरेव दूतः हविर्भागप्रापको यस्य तादृशः अग्निदूतस्याग्नेर्हविर्भागप्रापकस्य जले प्रवेशाभावादलब्धभाग इत्यर्थः अन्तः पद्मनालस्यान्तः अलक्षितः ब्रह्महत्ययाऽलक्षित अदृष्टः ब्रह्मवधनिमित्तात्पापान्मोक्षं मोचनोपायं विचिन्तयन् सहस्रं वर्षाण्यवसदित्यन्वयः ॥ १५ ॥

यावदिन्द्रः पद्मनालतन्तुनाऽवसत्तावन्नहुषो राजा विद्यातपोयोगैर्महाननुभावः इन्द्राधिपत्यप्रापकं सामर्थ्यं यस्य तादृशस्त्रिणाकं स्वर्गं शशासेन्द्रपदाधिपत्यं कृतवानित्यर्थः अकं दुःखं न विद्यते यस्मिन्स नाकः भोगदेशाः भौमपातालाम्बरविलभेदेन त्रिविधाः सुखानुभवदेशाः तत्र तृतीयो नाकः स्वर्लोकः तर्हि तस्मिन्सति कथमिन्द्रस्य पुनः स्वर्गप्राप्तिस्तत्राह - स नहुषः सम्पदैश्वर्याभ्यां भोग्यभोगोपकरणादिसमृद्धीन्द्राधिपत्याभ्यां यो मदस्तेनान्धा विवेकशून्या बुद्धिर्मतिर्यस्य तादृशः इन्द्रपत्न्या शच्या हेतुभूतया तिरश्चाङ्गतिं सर्पयोनिं नीतः प्रापितः अत्रेदमाख्यानमवगन्तव्यं स्वर्गाधिपत्यं कुर्वन्नहुषः कदाचिदिन्द्राणीमुवाच इन्द्रस्तावदहमतस्त्वं मां भजेति । ततस्तयावेदितवृत्तान्तो बृहस्पतिस्तामुवाच इन्द्रवरविप्रवाह्यशिबिकामारुह्य मद्गृहानागच्छसि चेत्तर्हि त्वां भजिष्यामीति ब्रूहि ततोऽसौ ब्रह्मशापात्पतिष्यतीति । ततः सा तं तथैवोवाच ततः स नहुषोऽगस्त्यादिमहर्षीन् वाहयित्वा स्वेनारूढां शिबिकां तैर्वाहयामास तदा स शीघ्रं सर्पसर्पेत्यगस्त्यं पदा पस्पर्श तेन च सर्पो भवेति शप्तो नहुषो महासर्पोऽजगरोऽभूदिति ॥ १६ ॥

---

(१) भाग इति पाठः वीर० ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

समग्नेति चराचरात्पृथग्ग्रहणं ब्रह्महननदोषाधिक्यसूचनाय ॥ ९ ॥

वृषाकपिरिन्द्रः "वृषाकपिर्हरे शक्रे हरितकपौ जनार्दने" इत्यभिधानम् ॥ १० ॥

इमेहत्येनो ब्रह्मवधस्य लोके जुगुप्सितत्वेनस्मृतावपि नात्र तथा इतीममर्थं सूचयतः सर्वस्य सुखस्य हेतुत्वात् तर्हि किमर्थमस्य निर्वृतिर्नाभूत् सुखहेतूनां शौर्यादिगुणानामुन्मीलितत्वाच्छत्रुहननेनेति तत्राह—ह्रीमन्तमिति । यद्यपि शत्रुवधसूचकशौर्यादिगुणाः सुखहेतवस्तथापि ते ब्रह्महत्यया ततस्य नो सुखयन्ति कुतः लज्जाकरत्वात् इन्द्रादिदेवानां तदानीन्तनं कर्म प्रारब्धकर्मणा प्राप्तदुःखस्य सूचकम् "प्रारब्धकर्मणैवैषांफलं न्त दुःखस्यसूचकम् । तदानीन्तनकर्मत्वाद् ब्रह्महेतुर्यथा रमाः ॥ देवादीनां स्थितब्रह्मभावान्नैवान्यथा भवेत् । प्रारब्धमपि तु क्वापि किञ्चिद्विघटितं भवेत्" इति ॥ ११ ॥

असृक्पटां रक्तरञ्जितपटां रजस्वलामिव ॥ १२ ॥

मीनगन्धिमः शीर्णमीनधारिण्यश्चण्डाला दाशादयो ये तेषां यो दुर्गन्धः तादृशेनासुगन्धेनासुरभिणा ॥ १३ ॥

ततः सहस्राक्षस्तां परिहर्तुं सर्वा दिशो गत्वा विहायसा नभो गतः समर्थ्येक्षया प्रागुदीचीं दिशं दृष्ट्वा तां प्रविष्टो मानसं नाम सरः प्राविशदन्वयः ॥ १४ ॥

तन्तूनाथसंस्थित्युपान्वध्याकुलरहनि सप्तम्यर्थे द्वितीया अग्निर्दूतो यस्य सोऽग्निदूतः यावदिन्द्रः सरसि पुष्करनालतन्तुष्ववसत्तावन्नहुषहरिणां नाकं स्वर्गं भूरन्तरिक्षं स्वर्गस्थानं वा शशासेत्यन्वयः अत एव त्रैलोक्यपालनलब्धसर्वैश्वर्यभोगरहितः ब्रह्मवधादुत्पन्नदोषमोक्षं तावच्च नाकमिति केचित्पठन्ति अत्र चशब्द एवार्थे नहुष इत्यनेन सम्बध्यते अन्ययोगव्यवच्छेदार्थः तिरश्चाकृतिम् आजगरीं स्थितिम् ॥ १५ ॥ १६ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

एवं तस्यात्मनि पापस्य नात्युपपत्तावपि साभिमाना तदधिष्ठात्री तु तमभिभवितुमुद्यतेत्याह—ब्रह्महत्येति ॥ १० ॥

ततश्च तया सन्निहितया हेतुभूतया यस्तापस्तदपीन्द्रोऽसहत् तेन पराभवं न प्राप्तवान् । तदेवमपि निर्वृतिस्त्वमुं नाविशत् । तत्र हेतुः ह्रीमन्तमिति ॥ ११—१३ ॥

ततस्तत् सङ्कटाशाय नभ आकाशं गतः । सर्वाश्च दिशोगतः । तूर्णीं तदनुद्रव विदूरं यथास्यात् ॥ १४ ॥

अग्निदूतस्तत् सहायोऽयं । तस्मात् जले न तिष्ठेदित्यवधारितस्तया सर्वैरन्यैश्च अगन्तव्यस्तित्वासम्भावनया तमुद्दिश्य हविर्भागादानादलब्धभोगश्चेन्द्रयं: ब्रह्मवधात्तदधिष्ठात्र्यास्तस्याः सकाशाद्विमोक्षं तदुपायं श्रीभगवन्तमित्यर्थः । ध्यातध्यानेति वक्ष्यमाणात् ॥ १५ ॥

नहुषः शशासेति वृत्रवधवृत्तं सप्तममन्वन्तरगतमिति लक्ष्यते । तथापि षष्ठमन्वन्तरस्थतानां नमुच्यादीनां कीर्तनं तत्पार्ताननिधिरूपत्वेन तदाज्ञा केषाञ्चिदपेक्षयेति ज्ञेयम् ॥ १६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्मिन् वृत्रे हते सति वृषाकपिमिन्द्रम् । अत्र प्रायश्चित्तबलेन पापाचरणात् पूर्वतोऽपीयमतिप्रबला दुःखभोगेन विना केवलेन प्रायश्चित्तेन न शाम्येदित्यत एव ते तदानीमश्वमेधेन तं नैव याजयामासुरिति ज्ञेयम् । तं ऋष्यादयोऽपि प्रायश्चित्तबलेन पापप्रवर्तनाज्जन्यस्यापराधस्य फलं चिरकालव्यापिनीं दुरवस्थामिन्द्रपदारूढेन नहुषेण तदानीमेव प्रापिता इति च ज्ञेयम् ॥ १० ॥

असहत् असहत निर्वृतिरानन्दः अमुं इन्द्रं । ननु, शौर्यादिगुणयुक्तस्य तस्य कुतोऽनिर्वृतिस्तत्राह—ह्रीमन्तं जनं वाच्यतां । ब्रह्मघातीति प्रवादम् ॥ ११ ॥

यक्ष्मा महारोगः ॥ १२ ॥

मीनस्येव गन्धो यस्य स मीनगन्धिः स चासावसुः श्वासवायुस्तस्य गन्धेन ॥ १३ ॥

प्रथमं नभ आकाशं गतः तत्रापि तामनुधावन्तीं दृष्ट्वा सर्वा दिशो गतः । तत्र तत्रापि तथा दृष्ट्वा प्रागुदीचीम् ऐशानीं गतः सन् तत्र तूर्णं मानसं सरः प्रविष्टः ॥ १४ ॥

पुष्करस्य कमलस्य नाले ये तन्तवः तत्र अत्यवस्थितमिन्द्रं: अलब्धभोगः यद्यतोऽग्निदूतः अग्नेः स्वदूतस्य हविर्भागानेतुं जले प्रवेशासम्भवादिति भावः । यद्यप्यग्निना जलं न दुष्प्रवेशं तदन्तः स्थिताय वरुणायापि हविर्वहनात् तदपि तदीयं जलं दुष्प्रवेशमेव रुद्रानुचरै रक्ष्यमाणत्वात् अत एव सर्वत्राभिगामिनी ब्रह्महत्यापि तत्र गन्तुं न शशाकेति ज्ञेयं । सहस्रं सहस्रवर्षाणि व्याप्य अलक्षितः सर्वैरदृष्टः ॥ १५ ॥

त्रिनाकं तृतीयं नाकं स्वर्गं । ननु, मनुष्यस्य कुतः स्वर्गराज्यं तत्राह — विद्यादिभिरनुभावः सर्वतेजोहरणसामर्थ्यं स्वर्गपालनसामर्थ्यञ्च यस्य सः तस्मिन् सति पुनरिन्द्रस्य कुतः स्वर्गप्राप्तिस्तत्राह—स नहुषः सम्पदैश्वर्याभ्यां यो मदस्तेनान्धा बुद्धिर्यस्य स इन्द्रपत्न्या तिरश्चाकृतिं सर्पयोनिं नीतः उपायेन प्रापितः । एवं श्रूयते नहुषः कदाचिदिन्द्राणीमुवाच इन्द्रस्त्वावदहमतस्त्वं मां भजेति । तया चावेदितवृत्तान्तो बृहस्पतिस्तामुवाच ब्राह्मणवाह्यशिबिकामारुह्यागतं त्वामहं भजिष्यामीति ब्रूहि । ततोऽसौ ब्रह्मशापात्पतिष्यतीति । तयाच तथैवोक्तः नहुषः अगस्त्यादीन् शिबिकां वाहयामास तदा च शीघ्रं सर्पसर्पेत्यगस्त्यं पदा पस्पर्श । तेन च कुपितेन शप्तोऽजगरो बभूवेति ॥ १६ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तं नारायणम् ॥ ९ ॥

तस्मिन् वृत्रे हते वाजपेयादिभिर्यज्ञैरपावितः तस्य वृत्रस्य ब्राह्मणत्वात्तद्वधजा ब्रह्महत्या वृषाकपिमिन्द्रमाससाद समीपवर्तते ॥ १० ॥

इन्द्रस्तया ब्रह्महत्यया तापमसहत् अतोऽमुमिन्द्रं निर्वृतिर्नाविशत् स सुखितो नैवाभूत् । ननु, बहुगुणयुक्त एवेन्द्रो वेदे कुतः सुखितोनाऽभूत्तत्राह—ह्रीमन्तं वाच्यतां निन्दतां प्राप्तं गुणाः न सुखयन्ति ॥ ११ ॥

ततो गतो ब्रह्मगिरोपहूत ऋतम्भरध्याननिवारिताघः ।
पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या ॥ १७ ॥
तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत ! ।
यथावद्दीक्षयाञ्चक्रुः पुरुषाराधनेन ह ॥ १८ ॥
अथेज्यमाने पुरुषे सर्व (१) देवमयात्मनि ।
अश्वमेधे महेन्द्रेण वितते ब्रह्मवादिभिः ॥ १९ ॥
स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप ! ।
नीतस्तेनैव शून्याय नीहार इव भानुना ॥ २० ॥
स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः ।
इष्ट्वाऽधियज्ञं पुरुषं पुराणमिन्द्रो महानास विधूतपापः ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वहमया क्षयरोगेण ग्रस्ताम् अमृक्पटां रक्तवसनाम् १२॥

पलितान् शुक्लान् मीनस्येव गन्धो यस्य स मीनगन्धिः सवासावसुर्निश्वासवातश्च तस्य गन्धेन मार्गदूषणां कुर्वन्तीम् ॥१३॥

तद्दर्शनानन्तरं नभः सर्वा दिशाश्च गतः प्रागुदीचीं गतस्तत्रापि मानसं सरः प्रविष्टः ॥ १४ ॥

तत्र तु स इन्द्रः पुष्करनालतन्तून् सहस्रमेव साहस्रं वर्षाणि यावसत् सूक्ष्मरूपेण तत्तन्तून् आभिरवोवास कथम्भूतः अलब्धिनः अग्निदूतः-अग्निसहायस्तथापि अलब्धभोगः विष्णुध्यानोपयोगितपोनिष्ठत्वात्स्वकभोग इत्यर्थः वधतो ब्रह्मवधान्मोक्षं स्यात्सम्भूतम्भरश्च चिन्तयन् ध्यायन् ॥ १५ ॥

यावदिन्द्रः कं सुखं तद्विपरीतमकं दुःखं नास्त्यकमस्मेति नाकः तस्माद्दाविवसर्वापाभावस्तृतीयो नाकस्त्रिनाकस्तं त्रिनाकं नाघभत् । तावद्विद्यादिभिरनुभावः स्वर्गपालनसामर्थ्यं यस्य स नहुषः शशास तदा सम्पदैश्वर्याभ्यां यो मद अहमेवेन्द्र इति गर्वस्तेनान्धा लुप्तविवेका इन्द्राणी मां भजतु इत्येवं दोषवती बुद्धिर्यस्य स इन्द्रपत्न्या तत्राशोपायश्रयाऽऽगस्त्यशापद्वारा तिरश्चाकृति सर्पभावं नीतः ॥ १६ ॥

भाषाटीका ।

उस परमात्माको हमलोगों से अनुष्ठित महामख अश्वमेधसे यजन करके ब्राह्मणों सहित चराचर जगत कोभी मार कर पापसे लिप्त न होगे, फिर खलके निग्रहसे तो कहना क्या ॥ ९ ॥

श्रीशुकदेवजी बोले ॥ इस प्रकार ब्राह्मणों के प्रेरणासे इन्द्रने वृत्रको मारा ॥ वृत्रके मरते ही ब्रह्महत्या भी इन्द्रको प्राप्त भई ॥ १० ॥

उस हत्यासे इन्द्रने ताप सहा सुख इन्द्रको नहीं प्राप्त भया क्योंकि लज्जावान जो निन्दता को प्राप्त हो जाय तो उसके गुण भी उसको सुख नहीं देते ॥ ११ ॥

जरावस्थासे कम्पित गात्र वाली, क्षयरोगसे ग्रस्त, रुधिर लिप्त वस्त्रवाली, सफेद केशोंको छोडकर रूपवती चाण्डालिनी के सदृश इन्द्रके पीछे दौडती हुई ठहारह २ ऐसे कहने वाली, मीनके गंध सदृश दुर्गन्धसे मार्गका दूषण करने वाली, उस हत्याको इन्द्रने देखा ॥ १२ ॥ १३ ॥

फिर इन्द्र आकाश और सर्व दिशाओं में प्राप्तहोकर अतिशीघ्र (प्रागुदीची) पूर्वोत्तर दिशामें जाकर मानससरमें प्रविष्ट हुआ ॥ १४ ॥

वह इन्द्र सहस्र वर्ष तक कमल की नाली के भीतर तन्तुनमें वास करता भया वहां इन्द्रको अपना भाग नहीं मिलता रहा क्योंकि इनका भाग लेजाने वाला दूत तो अग्नि है उसका जलमें प्रवेश कहां ? इसप्रकार अलक्षित हो कर रहा और सदा यही चिन्ता रही कि इस ब्रह्म वधसे कैसे छूटेंगे ॥ १५ ॥

तब तक अपने विद्या तप योग बलके प्रभावसे नहुष राजाने स्वर्ग का राज्य किया । राजा जब सम्पत ऐश्वर्य से मदान्ध बुद्धि हो गया तब इन्द्रकी पत्नीने तिर्यग गति को अर्थात् सर्पपना को प्राप्त किया ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत इन्द्रः स्वर्गं गतः प्राप्तः कथम्भूतः ब्रह्मगिरा ब्राह्मणवाक्येनोपहूतः सन् ऋतम्भरः सत्यपालको हरिस्तस्य ध्यानेन निवारितमघं येन प्रागपि तु पापो ब्रह्मवधस्तमिन्द्रं नाभ्यभूत्स्वाभिभवं नाकरोत् कुतः दिग्देवतया प्रागुदीच्यां दिशि स्थितया श्रीरुद्रेण अवितं रक्षितं सन्तम् ॥ १७ ॥

पुरुषस्य हरेराराधनं यस्मिन्स्तेन ॥ १८ ॥

सर्वेदेवमयात्मनीति वा पाठः ब्रह्मवादिभिर्विततेऽनुष्ठितेऽश्वमेधे महेन्द्रेणेज्यमाने पुरुषे सति ॥ १९ ॥

तेनैव पुरुषेणैव शून्याय नीतः नाशित इत्यर्थः ॥ २० ॥

(१) भूत इति, विजय० पाठान्तरम् । देव इति व० श्रीधर पाठान्तरम् ।

इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनम् ।
भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेन्द्रमोक्षं विजयं मरुत्वतः ॥ २२ ॥
पठेयुराख्यानमिदं सदा बुधाः शृण्वन्त्यथो पर्वणि पर्वणीन्द्रियम् ।
धन्यं यशस्यं निखिलाघमोचनं रिपुञ्जयं स्वस्त्ययनं तथाऽऽयुषम् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां इन्द्रविजयोनाम
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अधिकृता यज्ञा येन तम् ॥ २१ ॥

पाठादिविधानुमाख्यानं स्तौति–इदमिति । प्रक्षाल्यतेऽनेनेति प्रक्षालनं तीर्थपदस्यानुकीर्तनं यस्मिन् भक्तेरुच्छ्रयो यस्मिन् भक्तजनानामनुवर्णनं यस्मिन् महेन्द्रस्य मोक्षो यस्मिन् मरुत्वतो विशेषेण जयो यस्मिन् ॥ २२ ॥

इन्द्रियं तत्पाटवकरम् इन्द्रसम्बन्धीति वा आयुषमायुष्यम् ॥२३॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत इन्द्रः स्वर्गं गतः प्राप्तः कथम्भूतः ब्रह्मगिरा ब्राह्मणवाक्येन उपहूतः सन् ऋतम्भरः सत्यस्य भर्ता श्रीमन्नारायणः तस्य ध्यानेन निर्वारितमघं ब्रह्महत्यारूपं यस्य तादृशः तमागच्छन्तं दिग्देवतया प्रागुदक्स्थितमानससरोवरस्थपद्मस्थया देवतया विष्णुपत्न्या श्रीमहालक्ष्म्याभिरक्षितं पद्मतन्तुषु वसन्तं इन्द्रमत एव हतमोजो यस्य तादृशः पापो ब्रह्मवधः नाऽभ्यभूत्पन्नत्या लक्ष्मीभगवद्ध्यानपरत्वादिन्द्रं पापाद्ररक्षेत्यर्थः ॥ १७ ॥

अथ हत्यानिस्तारप्रकारमाह-तमित्यादिनाविधुतपाप इत्यन्तेन। तमागतम् इन्द्रमृषयोऽभ्येत्यागत्य हे भारत ! पुरुषाराधानेन परमपुरुषाराधनरूपेण हयमेधेन यथाविधि दीक्षयाञ्चक्रुः हयमेधं कर्तुं दीक्षितं कृतवन्त इत्यर्थः हेतिहर्षेणादेवाहो इन्द्रस्यैवंविधावस्थेति ॥ १८ ॥

अथ ब्रह्मवादिभिर्वेदवादिभि ऋषिभिरार्त्विज्यकृतैर्विततेविस्तृते यथावत् क्रियमाणोऽश्वमेधे इन्द्रेण यजमानेन सर्वदेवतानामन्तरात्मभूते सर्वस्यप्रशासितरि परमपुरुषे इज्यमाने आराध्यमाने सति ॥ १९ ॥

भूयानपि स त्वाष्ट्रवधः वृत्रवधनिमित्तः पापः हे परन्तप ! तेनैवाश्वमेधेन शून्याय नीतः प्रापितः शून्यतां प्राप्त इत्यर्थः यथा भानुना सूर्येण नीहारः शून्यतां प्राप्यते तद्वत् ॥२०॥

मरीचिमिश्रैः मरीचिसहितैः तत्प्रभृतिभिरित्यर्थः विताय मानेन अनुष्ठीयमानेन यथोक्तेन हयमेधेनाऽधियज्ञं यज्ञेषु प्रधानतया वर्तमानं पुराणं पुरुषं इष्ट्वाराध्य स वै इन्द्रः विधूतं निरस्तं वृत्रहत्या रूपं येन तादृशः महाविश्रुतिपक्षः अबाप्तराज्यसम्पन्नासीत् ॥ २१ ॥

एवं वृत्रवधाख्यानपठनश्रवणादिफलं वदन् तद्विशिनष्टि–इदमिति द्वाभ्यां । महेन्द्रस्य मोक्षः ब्रह्मवधनिमित्तात्पापान्मोक्षप्रतिपादनं यस्मिन्मरुत्वत इन्द्रस्य विशेषेण जयः तत्प्रतिपादनं यस्मिन् तादृशं तदिदं महाख्यानं गुरुवर्णितं तदेवाह अशेषाणां पापानां प्रक्षालनं शोधकं निवर्तकं तत्र हेतुस्तीर्थपदस्यानुकीर्तनं यस्मिन्स्तादृशं किञ्च भक्त्युच्छ्रयं भगवद्भक्तेरुच्छ्रयोऽभिवृद्धिर्यस्मात्तथाभूतं तत्र हेतुः भक्तजनानां भगवद्भक्तजनानामनुवर्णनं यस्मिन् तत् ॥ २२ ॥

किञ्चेन्द्रियं इन्द्रस्य लिङ्गमिन्द्रियम् इन्द्रः प्रत्यगात्मा तस्य लिङ्गं ज्ञापकं तद्याथात्म्यप्रतिपादनयुक्तत्वादस्येति भावः यद्वा इन्द्रस्येदमिन्द्रियं इन्द्रियमिन्द्रलिङ्गमिति सूत्रे इति करणादर्थान्तरेऽपि तन्निपातनाभ्युपगमात् यद्वा इन्द्रियशब्दस्तद्बलसम्पादके उपचारादुच्यते इन्द्रियवृद्धिकरमित्यर्थः यद्वा इन्द्रः परमेश्वरः इदि परमैश्वर्ये इति धातुपाठात् तेन जुष्टं प्रीतिविषयत्वेन परिगृहीतं श्रवणादिद्वारा भगवत्प्रीत्यापादकमित्यर्थः धन्यं धनप्राप्तिसाधनं यशस्करं निखिलानामघानां मोचनं यस्मात्तथाऽशेषपाप्मनां प्रक्षालन मित्यनेन पापविनाशकत्वमुक्तम् अखिलाघमोचनमित्यनेन तु पापाश्लेषकरत्वमुक्तमित्यतो न पौनरुक्त्यं स्वस्त्ययनं मङ्गलावहं तथा आयुष्करं सर्वाण्येतानि फलानि अस्याख्यानस्य श्रवणपठनादिना भवन्ति न स्वरूपेणेत्यतोऽस्यमुक्तिफलार्थिभिरेतदाख्यानपठनादिकं कार्यमित्युक्तं पठेयुरित्यर्थेन यत इदमुक्तफलमथोऽतो बुधाः सदा पठेयुः पर्वणि पर्वणि प्रतिपर्व शृण्वन्तु शृणुयुरित्यर्थः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपहूत ऋतम्भरेति ब्रह्मगिरा विरिञ्चिवाक्येनोपहूतः बृहस्पतिवाक्येन वा अग्न्याद्यद्भुतमुखेनेत्यर्थः ततः मानससरसः ऋतम्भरस्य सत्यपालकस्य नृसिंहस्य ध्यानेन निवारितमंहो येन स तथा सर्वगतः श्रीनारायण इति प्रह्लादोक्तवचनं सत्यं कर्तुं स्तम्भाद्याविरभूदिति यद्वतो हरिऋतम्भर इति वेदवादिभिरुपहूतत्वादृतेत्याम नन्विदानीमृतम्भरध्यानेन निरस्तं गच्छेत् पूर्वं तेनाभिभूत इन्द्रः किं तत्राह—पापश्चेति । पापो ब्रह्महत्यालक्षणो जीवभ्र तमिन्द्रं नाऽभूदभिभूतं नाकरोदित्यन्वयः अत्र हेतुगर्भविशेषणमाह—दिग्देवतयेति । इन्द्रहितकारिण्या दिग्देवतया हृतमोजो बलं यस्य इन्द्रमन्विष्य सर्वदिक्षु भ्रमतः स तथा कस्मात् गङ्गाजलपरिप्लुतमानससरसि प्रविष्टत्वेन विष्णुपत्न्याऽवितं रक्षितं तस्माच्चेति ॥ १७ ॥

ऋतम्भरध्यानादिनाभिभवाभावे तदभिभवः स्यात्स्वरूपतो नाशाभावादिति तत्राह—तमिति । भगवद्विषयेणाश्वमेधेन स्वरूपनाशश्च कथं स्यादित्यत उक्तं पुरुषेति । अत्र पुरुषशब्देन विष्णुरुच्यते "सहस्रशीर्षा पुरुष" इति श्रुतेः- हेत्यनेन श्रीहरिमाहात्म्यज्ञानपूर्वकं तत्करणाभावेन तत्फलं स्यादिति विपक्षे बाधकं सूचयति "अहं हि सर्वयज्ञानां भोक्ता च" इति स्मृतेः ॥ १८ ॥

यत एवं साङ्गो यज्ञः अथ तस्मान्महानपि त्वाष्ट्रवधस्तेन यज्ञेन शून्याह्व नीत एव सर्वात्मना नष्टोभूत्क्रियाया विशिष्टत्वादित्यन्वयः कथं विशिष्टत्वमित्यतस्तात्पर्योक्तमेव विशिनष्टि—इज्यमान इति । ब्रह्मवादिभिर्वितते विस्तृते अश्वमेधे यज्ञे इन्द्रेण सर्वभूतानां प्रधानाश्चान्तर्यामी च सर्वभूतमयात्मा तस्मिन्यज्ञपुरुषे इज्यमाने । सर्वदेवमयात्मनीति पाठे स एवार्थः वा इत्यनेन "ज्ञानाग्निः सर्वकर्माणि" इति वचनाद्भगवतः ज्ञानेन सर्वात्मना पापस्य नाशेऽप्यश्वमेधेनेन्द्रस्य महत्त्वातिशयो भवतीति सूचयति ॥ १९—२० ॥

तत्कुतोऽवगम्यत इत्यत्राह—स वाजीति । मरीचिमिश्रैर्मरीचिमुख्यैः । ज्ञानाग्निधूतपापोपि इष्ट्वा महानासेत्यर्थः ॥ २१ ॥

नेदमिन्द्रेण स्वार्थतयाऽनुष्ठितं किं तु लोकोपकारकत्वेन । यतोस्येन्द्रस्य पापं नष्टं तच्चरितस्य श्रवणादिना सर्वाभीष्टानि सिद्ध्यन्तीति । तत्स्तौति—इदमिति । तीर्थपदस्य हरेरनुकीर्तनं यस्मिंस्तत्तथा भक्तेरुच्छ्रयो यस्मात्तत्तथा भक्तजनस्यानुवर्णनं यस्मिन् तत्तथा महेन्द्रस्य पापमोक्षो यत्र तत्तथा मरुत्वतो विशिष्टजयो यस्मिंस्तत्तथा ॥ २२ ॥

इन्द्रियमिन्द्रियाणां शक्तिप्रदं किं विषयमाख्यानमित्यतो इन्द्रियं इन्द्रसम्बन्धि वेत्युक्तम् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पापस्तद्विशिष्टस्तद्रूपस्तु तद्दिग्देवताहतौजाः न पुनस्तद्ग्रहणा समर्थो बभूव । तत्र हेतुः । विष्णुः पतिरस्तीशदेवो यस्या ईशानरूपायास्तादृश्येति । कृत भगवदाश्रयोऽयं कथमनेनाभिभाव्येतेतिभावः ॥ १७ ॥

ततो लोकापवादादवशेषो यस्तत्पाप प्रचारः सोऽपिब्रह्मर्षिभिर्नाशित इत्याह ते चेति त्रिभिः ॥ १८ ॥

तत्र यथेति युग्मकम् ॥ १९—२३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भस्य
त्रयोदशोऽध्याय ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ब्रह्मणो ब्राह्मणानाञ्चगिरा त्वामश्वमेधेन याजयिष्याम इति वाक्येनोपहूतः सन् ततोमानसात् सरसः सकाशात् स्वर्गे गतः ऋतम्भरः सत्यपालको विष्णुः । अघं प्रायश्चित्तबलेन पापान्तरणलक्षणोऽपराधः । पापः ब्रह्महत्या लक्षणं पापं पुंस्त्वमार्षं ईशानदिग्देवतया श्रीरुद्रेण विष्णुपत्न्या मानस सरसः कमलवनस्थितया लक्ष्म्या ॥ १७—२१ ॥

भक्त्युच्छ्रयं भक्त्युत्कर्षयुक्तं । मरुत्वत इन्द्रस्य विशेषेण जयो यत्र तत् इन्द्रियं इन्द्रियपाटवकरं आयुष्यमायुष्करम् ॥ २२—२३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठे त्रयोदशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्णुपत्न्या दिग्देवतया विष्णुभक्तेन दिक्पालेन श्रीरुद्रेणावितं तमिन्द्रं हृतौजाः सन् पापो नाऽभ्यभूत् ध्यानादहं न कृतवान् ततस्तदनन्तरम् ऋतम्भरस्य विष्णोर्ध्यानेन निवारितमघं ब्रह्मवधरूपं पापं येन सः ब्रह्मगिरा ब्राह्मणवाक्येन अभिप्रापितेनोपहूतो नमः स्वर्गं प्राप्तः ॥ १७ ॥

एवं विष्णुध्यानेन निष्पापोपीन्द्रः कर्मानुष्ठानेन प्रत्यक्षप्रायश्चित्तेन लोकसंग्रहार्थं मुनिभिर्निष्पापः कृत इत्याशयेनाह—तमित्यादि । पुरुषस्य विष्णोराराधनं यस्मिन् तेन ॥ १८ ॥

सर्वदेवमय आत्मा यस्य तस्मिन् सर्वदेवान्तर्यामिनीत्यर्थः ॥ १९ ॥

त्वाष्ट्रवधः अपि अन्योपि भूयान् पापचयः तेनैव पुरुषयज्ञेन शून्याय नीतः ॥ २० ॥

अधियज्ञं यज्ञेषु भोक्तृतया वरदत्वेन च वर्तमानम् ॥ २१ ॥

प्रख्यायतेऽनेनेति प्रख्यानं तीर्थपदस्य हरेरनुकीर्तनं यस्मिन् भक्तेरुच्छ्रयो यस्मिन् भक्तजनानामनुवर्णनं यस्मिन् महेन्द्रस्य मोक्षो यस्मिन् मरुत्वतो विशेषेण जयो यस्मिन् एवं भूतमिदं महाख्यानम् ॥ २२ ॥

बुधाः सदा पठेयुः शृण्वन्ति शृण्वन्तु अथो नित्यमवकाशाभावे पर्वणि पर्वणि पठेयुः शृण्वन्तु च कथंभूतमिन्द्रियमिन्द्रसम्बन्धि, इन्द्रपोषणविषयमित्यर्थः आयुष्यमायुष्यम् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोदशोऽध्यायार्थप्रकाशः ॥ १३ ॥

भाषा टीका ।

पश्चात् हरि ध्यान से निवृत्त पापवाला इन्द्र ब्राह्मणा वाक्यसे स्वर्गको गया । ब्रह्मवध का पाप तो श्रीरुद्रकी कृपा से नष्ट पराक्रम वाला रहा । इन्द्रका पराभव न करसका क्योंकि इन्द्रकी रक्षा श्रीलक्ष्मीजीने करी रही ॥ १७ ॥

हे भारत ! ब्रह्मर्षि लोग इन्द्रके पास आकर इन्द्रको भग वदाराधन रूप अश्वमेधकी दीक्षा कराते भये ॥ १८ ॥

तदनन्तर ब्रह्मवादियों ने अश्वमेधका विस्तार किया । इन्द्रको सर्वदेवमय परम पुरुष श्रीनारायणका यजन करने से हे राजन् ! वह वृत्र का वध बड़ा भारी पाप का ढेर भी रहा तौभी उसी यजनसे जैसे सूर्यसे कुहर नष्ट होजावे तैसे नष्ट होगया ॥ १६ ॥ २० ॥

इस प्रकार मरीचि आदि महर्षियोंके कराये हुये अश्व-मेध यज्ञसे आदिवस्त पुराण पुरुष श्रीनारायणका यजन करके इन्द्र विगत पाप वाला होगया ॥ २१ ॥

यह महाख्यान संपूर्ण पापों का प्रक्षालन करने वाला है इसमें तीर्थपाद श्रीहरिका कीर्तन है भक्तिका उल्लास है भक्तजनों का वर्णन है इन्द्रके दुःख का मोक्ष तथा इन्द्रका विजय है ॥ २२ ॥

जो बुधजन इस आख्यान को सदा पर्व२ में पढ़ेंगे सुनेंगे उनको धन यश स्वस्ति आयुका देने वाला है तथा उनके पापों को हटाने वाला है और शत्रुओं को जिताने वाला है ॥ २३ ॥

इति श्रीमद्भागवत षष्ठस्कन्ध

की भाषाटीकामें त्रयोदश अध्याय

समाप्त ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे त्रयोदशोऽध्यायः समाप्तः ॥ १३ ॥



॥ चतुर्दशोऽध्यायः ॥

———○:*:○———

परीक्षिदुवाच ।

रजस्तमःस्वभावस्य ब्रह्मन्वृत्रस्य पाप्मनः ।
नारायणे भगवति कथमासीद्दृढा (१) मतिः ॥ १ ॥
देवानां शुद्धसत्त्वानामृषीणां चामलात्मनाम् ।
भक्तिर्मुकुन्दचरणे न प्रायेणोपजायते ॥ २ ॥
रजोभिः समसङ्ख्याताः पार्थिवैरिह जन्तवः ।
तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः ॥ ३ ॥
प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तमाः ।
मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ॥ ४ ॥
मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ! ॥ ५ ॥
वृत्रस्तु स कथं पापः सर्वलोकोपतापनः ।
इत्थं दृढमतिः कृष्ण आसीत्सङ्ग्रामे उल्बणे ॥ ६ ॥
अत्र नः संशयो भूयान् श्रोतुं कौतूहलं प्रभो ! ।
यः पौरुषेण समरे सहस्राक्षमतोषयत् ॥ ७ ॥

सूत उवाच ।

परीक्षितोऽथ संप्रश्नं भगवान्बादरायणिः ।
निशम्य श्रद्दधानस्य प्रतिनन्द्य वचोऽब्रवीत् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृत्रस्य ज्ञानमत्यादि श्रुत्वा पृष्टः परीक्षिता ।
हेतुमाह चतुर्भिस्तत्प्राग्जन्मचरितोक्तिभिः ॥ १ ॥
चतुर्दशे तु सहसा कृत्कृत्ये सुते मृते ।
चित्रकेतोरतिशोकाद्दलितशोको निरूप्यते ॥ २ ॥

रजश्च तमश्च स्वभावो यस्य ॥ १ ॥ २ ॥

भक्तेर्दुर्लभत्वं प्रपञ्चयति-रजोभिरिति त्रिभिः । पार्थिवै रजोभिः परमाणुभिः तुल्याः सङ्ख्याताः अनन्ता इत्यर्थः जन्तवो जीवाः तेषां मध्ये ये केचन कतिपये श्रेयो धर्ममीहन्ते कुर्वन्ति ॥ ३ ॥

मुच्येत गृहादिसङ्गाद्विमुच्यते सिध्यति तत्त्वं जानाति ॥ ४ ॥ ५ ॥ ६ ॥

न चेन्द्रभिया कृष्णं शरणं गत इत्याह—यः पौरुषेणेति ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"अहं समाधाय मनो यथाह सङ्कर्षणस्तच्चरणारविन्दे" इत्यनेन वृत्रवाक्येन तस्य सङ्कर्षणोपदेशावगतस्वात्मपरमात्मादियाथात्म्यवत्त्वमुक्तं तदेव विस्तरेण बुभुत्सुः पृच्छति राजा—रज-

---

(१) दृढिरिति पाठान्तरम् ॥ विज०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्यादिना सहस्राक्षमतोषयदित्यन्तेन । हे ब्रह्मन् ! रजस्तमश्च स्वभावो यस्य तस्य पापात्मनः पापकारिणः आसुरत्वादिति भावः भगवति नारायणे दृढा निश्चला सिद्धिपर्यन्ता मतिर्भक्तिः हे महामुने ! कथमासीत्तदुपदेशेऽप्यासुरस्वभावस्य सिद्धिपर्यन्ता भगवद्भक्तिर्दुर्लभेति भावः ॥ १ ॥

भक्तेर्दौर्लभ्यमेव प्रपञ्चयति—शुद्धसत्त्वानां केवलसत्त्वप्रचुराणां देवानां तादृशाममलचित्तानामृषीणामेव प्रायशो मुकुन्दचरणे भक्तिर्न जायते तेषामपि दुर्लभा कथमस्य सञ्जातेति भावः ॥२॥

"मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः" ॥

इत्युक्तरीत्या तावत्पृथिव्या रजोभीरेणुभिः सह समसंख्याकाः जन्तवः तद्वदसंख्याकाः जन्तवः तेषां जन्तूनां ये केचन मनुष्यादय एव शास्त्रोक्तधर्माधिकारिणस्तावन्मनुष्यादिजन्म दुर्लभमेवेति भावः ॥ ३ ॥

तेषामपि केचिच्छ्रायश्चत्रिवर्गरूपश्रेयःप्रवणाः मुक्तये न यतन्ते तावन्मुमुक्षुरेव दुर्लभेति भावः देवान्मुमुक्षतां केषांचित्सहस्रेषु कश्चिन्मुच्येत रागादिदोषैर्मुच्येत सिध्यति सम्यग्योगो भवति ॥४॥

मुक्तानामपि सिद्धानां कोटिष्वपि हे महामुने ! नारायणपरायणः प्रशान्तात्मा रागाद्यकलुषितचित्तः सुतरां दुर्लभः ॥५॥

प्रश्नार्थमुपसंहरन् तस्योत्तरदानाय मुनिं प्रेरयति—वृत्रस्त्विति द्वाभ्यां । तु शब्देनोक्तविपरीतमसत्त्वप्रधानत्वं द्योत्यते रजस्तमःप्रचुरो वृत्रः सर्वलोकोपतापनः सर्वलोकदुःखकारी अत एव पापः इत्थमुक्तप्रकारेण कृष्णे भगवति दृढा मतिर्यस्य तादृशः कथमासीत्कथं वा उल्बणे दुःसहे प्राम्ये शब्दादिविषये दृढमतिः नासीदिति यत् ॥ ६ ॥

अस्मिन्नर्थे नोऽस्माकं भूयान्संशयो वर्त्तते भो मुने, संशयं विशिनष्टि—हि यस्मात्संशयाच्छ्रोतुम् उत्तरं श्रोतुं कौतूहलमस्माकं अस्ति नान्यैन्द्रभयाद्वृत्रः कृष्णं शरणागत इत्यत्राह—यः पौरुषेणात्यर्थेन । यो वृत्रः पौरुषेण सहस्राक्षमिन्द्रमतोषयत्तस्य इन्द्राद्भयमस्तीति भावः ॥ ७ ॥

एवं राज्ञा पृष्टो मुनिरित्याहेत्याहसूतः - परीक्षित इति । अथ राज्ञः प्रश्नानन्तरम् अथ ननु हे शौनकादयः ! इति वार्थः परीक्षितः समीचीनं प्रश्नमाकर्ण्य प्रतिनन्द्याहो साधुपृष्टमित्यभिनन्द्य कथं भूतस्य परीक्षितः श्रद्दधानस्य उत्तरश्रवणाधिकयकस्वरायुक्तस्य उत्तरं विश्रम्भयुक्तस्य वा इदं वक्ष्यमाणमब्रवीत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र चित्रकेतुविपर्ययेतिहासभवणाद्भिन्ना संसारविरक्तिभूयिष्ठतया श्रीनारायणचरणारविन्दे भक्तिर्जायत इति तदर्थं परीक्षित्प्रश्नपूर्वकं पूर्वकथाशेषत्वेन निरूपयितुमाह—रज इति । दृढा रतिर्नैरन्तर्यभक्तिरित्यर्थः ॥ १ ॥

देवानामपि श्रीकान्तपदाम्बुजभक्तिर्दुर्लभा किमुतासुरप्रकृतेरिति भावेन वक्ति—देवानामिति । शुद्धसत्त्वगुणनिर्मितशरीरत्वेन शुद्धान्तःकरणानाम् अमलात्मनां तपोभिर्निर्धूतमलानां च प्रायेणोपजायत इत्यस्यायमर्थः निरन्तरभक्तिकरणयोग्यैरसुरादेशास्त्रियमायास्य द्वेषस्य कादाचित्कत्वेनावश्यंभावि महत्त्वोपचारोऽन्यथा शुद्धसत्त्वानामित्यादिविशेषणविशिष्टानां देवानां गुणविशिष्टानाम् इत्यादिनोच्यमानमात्यन्तिकभक्तिबलमयुक्तं स्यादतः प्रायशब्दस्य बाहुल्यार्थत्वेऽप्यत्रापि प्रयोगिकत्वेऽपि प्रकृतप्रमाणानुरोधाद्भक्तिकरणं दुर्लभमित्यतो वा तथोक्तं न तु तेषां तदभावात् । भक्तबाहुल्यस्याहृष्टत्वात् भक्तेस्तारतम्यप्रदर्शनाय वा ॥ २ ॥

एतदेवाह । रजोभिरिति । इह कर्मभूमौ जन्तवः पार्थिवैः रजोभिः समसंख्याता यावन्ति भूमेः रजांसि सन्ति तावन्तः शरीरिणो जीवाः सन्ति अन्येऽपि निःशरीरा अनन्ताः सन्ति "परमाणुप्रदेशेऽपि ह्यनन्ताः प्राणराशय" इति श्रुतेः । न तेषामिहमानं क्रियते किन्तु गृहीतदेहानामेव तेषां मध्ये ये केचन मनुजादयः श्रेयः स्वर्गाधिकारणमुद्दिश्य प्रवर्तन्ते वा इत्यनेन मनुष्याणां सहस्रेष्वित्यादिवाक्यं सूचयति ईहमानेष्वपि विशेषं वा ॥ ३ ॥

स्वर्गादीनां क्षयभङ्गुरसुखपरत्वं सम्विद्य चेष्टमानानां मध्ये केचिदेव मुमुक्षवः मोक्षेच्छवः तेषां मुमुक्षूणां मध्ये केचिदेव प्रयतन्ते तेषु प्रयतमानेषु सहस्रेषु कश्चिदधिकारिरासीयु मुच्येत संसारान्मुक्तो भवति तत्रापि संसारान्मुच्येष्वपि संसारप्राप्तिज्ञानादिपूर्तिशून्यमुक्तराशौ कश्चिदेव पूर्णज्ञानी सिद्धो वि ज्ञानन्दादिपूर्णो भवति ॥ ४ ॥

सिद्धानामानन्दादिपूर्णानां मुक्तानां मध्ये नारायणायणो दुर्लभः नारायणायनानां कोटिष्वपि प्रशान्तात्मा प्रकृष्टमभिप्रायुक्तमनाः प्रकृष्टानन्दरूपो वा नारायणपरायणः सुदुर्लभः ब्रह्माणमेकमन्तरेणारायन्तदुर्लभ इत्यर्थः अधिकारिणां तारतम्यविवक्षयैतद्वचनम् ॥ ५ ॥

ततः किं प्रकृतमिति तत्राह - वृत्रस्त्विति । तु शब्देनास्यास्यानुपपत्तिं सूचयति ॥ ६ ॥

पौरुषेण परमात्मविषयस्नेहेन महो दानवसिद्धोऽसीत्युक्तत्वात् ॥ ७—१० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देवानामित्यादि यद्यपि "सत्त्वात् सञ्जायते ज्ञानम्" इत्यादिना "कैवल्यं सात्त्विकं ज्ञानम्" इत्यादिना "सत्त्वं यद्ब्रह्मदर्शनम्" इत्यादिना च सत्त्वस्य ज्ञानकारणत्वमुक्तं तथापि देवानां शुद्धसत्त्वानामित्युक्त्वा मुक्तानामपि सिद्धानामित्युक्त्वा सञ्जातेऽपि अस्य बजुज्ञानस्याप्यभावात् । रजस्तमः स्वभावस्येत्यायुक्त्या तदभावेऽपि सद्भावात् न सत्त्वस्यात्र कारणत्वं । किंतु तदुत्तरत्वेन तत् पूर्वजन्मनि श्रीनारदादिसङ्गवर्णनया "नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः । महीयसां पादरजोऽभिषेकं निष्किञ्चनानां न वृणीत यावत्" इत्युक्त्या च भगवत्कृपापरिमलसूतस्य श्रीमतो महतः सङ्ग एव कारणं । तत्सङ्गमात्रेण तुलयाम नापि न स्वर्गं नापुनर्भवम् भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

इत्युक्तवा निर्गुणावस्थातोऽप्यधिकत्वात् । परमनिर्गुणा एव सतमे च । समः प्रियः सुहृद्ब्रह्मन्नित्यादौ सगुणे देवादौ तत्कृपा तामसी न भवति । किन्तु श्रीमत्प्रह्लादादिष्वेवेति प्रतिपादनाम्महतां निर्गुणत्वाभिव्यक्त्या तत्सङ्गस्यापि निर्गुणत्वं व्यक्तम् ॥ १ ॥ २ ॥ ३ ॥

मुच्येत जीवन्मुक्तो भवेत् ततश्च सिद्ध्यति "येऽन्येऽरविन्दाक्ष विमुक्तमानिन." इत्यादि व्याख्यानरीत्या जीवन्मुक्तानामपि पात श्रवणात् । तत्रापि कश्चिदेव निर्विघ्नतां प्राप्नोतीत्यर्थः । मुक्तानां प्राकृतशरीरत्वेऽपि तदेभिमानशून्यानां सिद्धानां प्राप्तसालोक्यादीनाञ्च कोटिष्वपि मध्ये नारायणसेवामात्रकाङ्क्षी सुदुर्लभः प्रशान्तात्मा सर्वोपद्रवरहितः ॥ ४—२० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

> चतुर्दशे चित्रकेतोर्विविक्ते कृपया सताम् ।
> सुखञ्च दुःखञ्च सुतस्योत्पत्त्या मृत्युनाभवत् ॥

शुद्धसत्त्वानां शुद्धान्तःकरणानां प्रायेणेति अन्तःकरणशुद्धौ ज्ञानं यथा खलु स्यात्तथा न भक्तिः तस्याः साधुसङ्गाविनाभावित्वात् ॥ १ ॥ २ ॥

तेषां मध्ये ये केचनैव मनुजदेवगन्धर्वादयो भवन्ति न तु सर्वे । तेषामपि मध्ये ये केचनैव श्रेयो धर्म्मादि ॥ ३ ॥

मुच्येत जीवन्मुक्तो भवेत् ॥ ४ ॥

मुक्तानामपि मध्ये कश्चिदेवसिद्ध्यतीति—तदेतदुक्तं भवति मोक्षसाधनवन्तोऽपि बहवो मुक्ता न भवन्ति किन्तु केचिदेव । मुक्ता अपि सर्वे सिद्धा न भवन्ति किन्तु कश्चिदेव । "जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति कर्म्मभिः । यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिनः" इत्याद्युक्तेः ते च सिद्धाः भक्तिहितसायुज्या एवोच्यन्ते तेषां मध्ये नारायणपरायणा इति निर्द्धारणानुपपत्तेः षष्ठीयं पञ्चम्यर्थे एव ततश्च मुक्तेभ्यः सिद्धेभ्यश्च सकाशात् नारायणपरायणः श्रेष्ठत्वात् सुदुर्लभः । ...द्धा प्रथमञ्च विवेकः ज्ञानं हि द्विविधं केवलं भक्तिसहितञ्च ...त्र केवलज्ञानेन स्थूलतुषावघातिन इव मुमुक्षवोऽपि न मुच्यन्ते । भक्तिसहितं ज्ञानञ्च द्विविधं भगवदाकारे मायाबुद्ध्या ...नादरेऽपि तद्भक्तिसहितन्तथा विनैव तदादरे सति तद्भक्ति सहितञ्च । तत्राद्ये खलु मुक्ता न भवन्ति किन्तु मुक्ताभिमानिन एव । तादृश्या भक्त्या अविद्यां सम्यङ्निरस्य विद्योदयश्च सम्यक् सम्पाद्य सद्य एवान्तर्द्धानाद् तया विनाच तत्पदार्थज्ञानाभावाच्च ब्रह्मणि लीयन्ते । तत्र येऽन्येऽरविन्दाक्षेत्यादौ अनादृतयुष्मदङ्घ्रय इति प्रमाणं भगवद्गीता च "अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् । मोघाशा मोघकर्म्माणो मोघज्ञाना विचेतसः राक्षसीमासुरीञ्चैव प्रकृतिं मोहिनीं श्रिताः" अनयोरर्थः । मानुषीं तनुमाश्रितं मां मूढा अवजानन्ति सार्वज्ञिक्या मानुष्याकारोऽपि चिदानन्दैकरूपत्वेनाज्ञानात् अविद्यया अपि मानुष्याकारस्यावज्ञेयत्वात्— स्वकल्पनमेव ममावज्ञा मम मानुषीं तनुं कीदृशीं परं भावं श्रेष्ठं सत्त्वं विशुद्धं सत्त्वमित्यर्थः । कीदृशं भूतमहेश्वरं । भूतानां ब्रह्मादितृणान्तजीवानां महेश्वरं परमकारणं मम मानुषी तनुरेव स्वीकृता प्राकृतसर्वंवस्तुकारणमित्यर्थः । मोघाशा इति यदि तेऽमङ्गलाः स्युस्तदा ते मोघाशा भक्त्याशा तेषां स्वर्गो स्यात् यदि ते कर्मिणस्तदा ते मोघकर्म्माणःस्युस्तेषां स्वर्गो न स्यात् । यदि ते ज्ञानिनस्तदा मोघज्ञानास्तेषां मोक्षो न स्यात् । तर्हि तेषां किं स्यादित्यत आह—राक्षसीमिति राक्षस्यादियोनौ जन्म स्यादित्यर्थः । द्वितीये तु अविद्याविद्ययोरुपरमेऽप्यनुपरतया ज्ञानशावकवहरितया भक्त्या तत् पदार्थं ज्ञात्वा ब्रह्मसायुज्यं प्राप्नुवन्ति । यदुक्तं "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् । भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" इति । किञ्च तेषां सिद्धानां मध्ये कोऽपि भक्त्या तत्पदार्थानुभवारम्भसमये यदि कस्यचिच्छुद्धभक्तस्य कृपया पूर्णां शुद्धां भक्तिं प्राप्नोति तदा तन्माधुर्यलाभात् सायुज्यमरोचयित्वा नारायणपरायणः स्यादिति निर्द्धारणपक्षेऽपि व्याख्येया । तत्रानुग्राहकभक्तस्य शान्तत्वे शान्तभक्त इति दास्यादित्वे दास्यादिरिति । अत्यातिवेरलत्वेन दौर्लभ्यात् प्रक्रान्तसहस्रशब्दमप्रयुज्य कोटिष्वपीत्याह स्म ॥ ५ ॥

एवं परमदुर्लभा त्रिगुणातीता, भक्तिस्त्रिगुणान्धे असुरे वृत्रे कथमवर्त्ततेति पृच्छति—वृत्रस्येति ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवमिन्द्रपोषणानुकथाय नारदादिमूर्तिभिर्भगवता यथा चित्रकेतुपोषणं कृतं तदुच्यते—चतुर्भिरध्यायैः । तत्र वृत्रस्य पूर्वजन्मनि चित्रकेतुरूपस्य पुत्रार्थं क्लिश्यतः सुतप्राप्तिस्तस्मिन्पुत्रे मृते सति शोकञ्च वर्ण्यते—रजस्तम इति चतुर्दशेऽध्यायेन । वृत्रस्य भगवद्भक्तिः केन हेतुनासीदिति पृच्छति—रज इति । पाप्मनः देवद्रोहरूपपापयुक्तस्य रजस्तमश्च स्वभावो यस्य तस्य ॥ १ ॥

भक्तेर्दुर्लभत्वं संस्मृत्य दर्शयति—देवानामिति चतुर्भिः ॥ २ ॥

जन्तवो जीवाः पार्थिवैः रजोभिः समसंख्याताः असंख्येया इत्यर्थः तेषां मध्ये ये केचनैव श्रेयो धर्मादित्रिवर्गं ईहन्ते कुर्वन्ति ॥ ३ ॥

मुमुक्षवः अर्वाचीनाः तेषां सहस्रेषु कश्चिदेव मुच्येत मुमुक्षात्मकात् गृहादिसङ्गात् तेषां गृहादिसङ्गान्मुक्तानामपि मध्ये कश्चिदेव सिद्ध्यति आत्मानात्मपरमात्मविवेकरूपां सिद्धिं प्राप्नोति ॥ ४ ॥

मुक्तानां मध्ये ये सिद्धास्तेषां कोटिषु नारायणः प्रपञ्चमात्रयो भजनीयो यस्य सः ॥ ५ ॥ ६ ॥ ७ ॥

यत्रोऽप्यपीड्डुदमन्नीव ॥ ८ ॥

श्रीशुक उवाच ।

शृणुष्वावहितो राजन्नितिहासमिमं यथा ।
श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि ॥ ९ ॥
आसीद्राजा सार्वभौमः शूरसेनेषु वै नृप ! ।
चित्रकेतुरिति ख्यातो यस्यासीत्कामधुङ्महीं ॥ १० ॥
तस्य भार्यासहस्राणां सहस्राणि दशाभवन् ।
सान्तानिकश्चापि नृपो न लेभे तासु सन्ततिम् ॥ ११ ॥
रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः ।
सम्पन्नस्य गुणैः सर्वैश्चिन्ता वन्ध्यापतेरभूत् ॥ १२ ॥
न तस्य सम्पदः सर्वा महिष्यो वामलोचनाः ।
सार्वभौमस्य भूश्चेयमभवन्प्रीतिहेतवः ॥ १३ ॥
तस्यैकदा तु भवनमङ्गिरा भगवानृषिः ।
लोकाननुचरन्नेतानुपागच्छद्यदृच्छया ॥ १४ ॥
तं पूजयित्वा विधिवत्प्रत्युत्थानार्हणादिभिः ।
कृतातिथ्यमुपासीदत्सुखासीनं समाहितः ॥ १५ ॥
महर्षिस्तमुपासीनं प्रश्रयावनतं क्षितौ ।
प्रतिपूज्य महाराज ! समाभाष्येदमब्रवीत् ॥ १६ ॥

भाषाटीका ।

श्रियैनमः ॥ परीक्षित उवाच ॥ हे ब्रह्मन् ! रज तम स्वभाव वाले पापी वृत्रासुर की षड्गुण युक्त श्रीमन्नारायण में कैसे दृढ मति हुई ॥ १ ॥

प्रायः करके मुकुन्द के चरणारविन्दमें शुद्ध सत्वगुणी देवताओं की तथा निर्मलान्तःकरण वाले ऋषियों की भी भक्ति नहीं होती है ॥ २ ॥

इस संसार में पृथिवी के रज के कणों के तरह जीवभी अनन्त हैं । उनमें से कोई मनुष्यादिक अपने श्रेय की चेष्टा करते हैं ॥ ३ ॥

हे द्विजोत्तम ! उनमें भी कोईक मुमुक्षु होते हैं । हजारों मुमुक्षुओं में भी कोई एक मुहादिक सङ्गसे छूटकर तत्वको जानता है ॥ ४ ॥

हे महामुने ! उन तत्वज्ञानी मुक्तजन और सिद्धजनों में भी शान्त स्वभाववाले नारायण परायण तो कोटानकोट जनो में भी अत्यन्त दुर्लभ है ॥ ५ ॥

फिर सर्व लोक को ताप देने वाला पापी जो वृत्रासुर उसकी घोर संग्राम के बीचमें कृष्णमें पक्की दृढ मति कैसे हो गई ? ॥ ६ ॥

हे प्रभो ! इस विषय में हमको बड़ा संशय है । और श्रवण करने का भी बड़ा कुतूहल है । क्योंकि जिसने रण में इन्द्र को सन्तुष्ट करदिया ॥ ७ ॥

॥ सूत उवाच ॥

तदनन्तर श्रद्धालु परीक्षित के प्रश्न को सुनकर अभिनन्दन करके व्यास नन्दन भगवान् श्रीशुकदेवजी बोले ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथा यथावत् शृणु ॥ ९ ॥ १० ॥

भार्यासहस्राणां दश सहस्राणि कोटिरित्यर्थः सान्तानिकः स्वयं सन्तानार्होऽपि पुत्रोत्पादनसमर्थोऽपि तासु सन्ततिं न लेभे सर्वास्ता वन्ध्या एव दैवयोगेन मिलिता इति भावः ॥ ११ ॥

तदेवाह-वन्ध्यापतेरिति ॥ १२ ॥ १३ ॥ १४ ॥

उपासीदत्तस्य समीपमुपविवेश समाहितः संयतः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह मुनिः-शृणुष्वेत्यादिनाऽध्यायशेषेण । तावदृवृत्रस्य भगवद्भक्तिर्न तज्जन्मना लब्धा किन्तु पूर्वजन्मनैवेति वक्तुं तावत् तस्य पूर्वजन्मवृत्तान्तं वदन् तच्छ्रवणाय राजानमाज्ञापयति-शृणुष्वेति ! हे राजन् ! इमं वक्ष्यमाणमितिहासं अवहितस्समाहितचित्तो यथा यथावच्छृणु कथंभूतं द्वैपायनमुखाद्स्मत्पितुस्सकाशान्नारदाद्देवलाच्च श्रुतं मयेति शेषः यथा द्वैपायनादिभ्यः श्रुतं तथा कथयतो मत्तः शृणुष्वेति वाक्यवः श्रुतं द्वैपायनादित्यादिनाऽस्येतिहासस्याप्तप्रणीतत्वसूचनात्केवलमस्मद्बुद्धिपरिकल्पितत्वशंकामूलकोऽस्मिन्ननादरः कार्य इत्युक्तं भवति ॥ ९ ॥

तदेवेतिहासमाह-आसीदित्यादिना । हे नृप ! इन्द्रेण हतो यो वृत्रः स पूर्वस्मिन् जन्मनि चित्रकेतुरिति प्रसिद्धः सार्वभौमः कृत्स्नभूमेरधिपतिः शूरसेनेषु जनपदेष्वासीत् तं विशिनष्टि - यस्य चित्रकेतोरियं मही कामधुक् काम्यन्त इति कामा इष्टार्थास्तान् दोग्धि प्रपूरयतीति तथासीत् ॥ १० ॥

तस्य चित्रकेतोर्भार्यासहस्राणां दश सहस्राण्ययमभवन् कोटिसंख्याका भार्या अभवन्नित्यर्थः स च नृपश्चित्रकेतुः सान्तानिकः सन्तानार्थ्यपि तासु भार्यासु सन्ततिं प्रजां न लेभे न प्राप्तवान् यद्वा सान्तानिकः स्वयं सन्तानार्होऽपि पुत्रोत्पादनशक्तिमानपि तासु सन्ततिं न लेभे सर्वास्ता वन्ध्या एव दैवयोगेनोत्पादिता इति भावः ॥ ११ ॥

रूपेति । रूपादिभिः सर्वैर्गुणैरेतैर्मैः संपन्नस्य युक्तस्यापि तस्य वन्ध्यानां सन्तानरहितानां भार्याणां पत्युरत एव चिन्ता पुत्राकामप्रयुक्ता अभूत् तत्र रूपं लावण्यमौदार्यं सत्पात्रे द्रव्यविनियोगशीलत्वं वयो यौवनं जन्म सत्कुलप्रसूतत्वं विद्या शास्त्रजन्यं ज्ञानं ऐश्वर्यं सार्वभौमत्वं श्रीर्भोग्यभोगोपकरणादिसम्पत् एते चिन्तारहितप्रीतिहेतवः अथाप्यपुत्रत्वमेकं सदा चिन्ताहेतुरासीदिति भावः ॥ १२ ॥

तदेवाह-नेति । तस्यापुत्रत्वप्रयुक्तचिन्ताक्रान्तस्य सार्वभौमस्य चित्रकेतोः सर्वाः सम्पदः वामलोचनाः सुन्दरलोचनाः यौवनप्रदत्तमन्येषामन्यपथानामप्युपलक्षणं महिष्यश्चेयं कृत्स्ना भूमिश्च प्रीतिहेतवो नाभवन् ॥ १३ ॥

एवं सर्वसम्पत्सु प्रीतिरहितस्य केवलं पुत्रार्थमेव चिन्तयतस्तस्य चित्रकेतोर्भवनं गृहं प्रति भगवानङ्गिरा ऋषिः सिद्धः शानकाष्ठां प्राप्तः अत एव यदृच्छया लोकाननुचरन् कदाचिदुपागतः प्राप्तः ॥ १४ ॥

तमागतमङ्गिरसं यथाविधि प्रत्युत्थानार्घ्यपाद्यादिभिः संपूज्याऽतिथ्यं कृत्वा भोजनादिभिः सत्कृत्येत्यर्थः सुखासनोपविष्टमङ्गिरसमुपासित तस्य समीप उपविष्टवान् कथंभूतस्सन् समाहितः संयतचित्तः सन् ॥ १५ ॥

उपासीनमुपविष्टं स्थितो प्रश्रयेणावनतं नम्रं तं चित्रकेतुं प्रतिपूज्य अहो तव विनयादिसम्पत्तिरिति बहुसंमान्य समाभाष्य प्रभावनाभिमुखं कृत्वा महर्षिरङ्गिरा इदं वक्ष्यमाणमब्रवीत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सान्तानिकः सन्तानार्थी । कल्याणमपीति शेषः ॥ ११—१५ ॥

स्थितावुपासीनम ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भार्यासहस्राणां दश सहस्राणि कोटिरित्यर्थः । सान्तानिकः सन्तानप्रयोजनकः न केवलं विषयभोगार्थमेव तावत्यो भार्या इति भावः ॥ ११ ॥

वन्ध्यापतेरिति सर्वास्ता वन्ध्या एव दैवयोगेन मिलिता इति भावः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मया यथा द्वैपायनादिभ्यः श्रुतं तथा मत्तस्त्वं शृणुष्व ॥ ९ ॥

सार्वभौमः सर्वभूमिपतिः कामधुक् सर्वकामदा ॥ १० ॥

तस्य चित्रकेतोः भार्यासहस्राणां दश सहस्राणि अभवन् कोटिसङ्ख्याकाः भार्या आसन्नित्यर्थः स नृपः सान्तानिकः सन्तानोत्पादनार्होऽपि सन्ततिं न लेभे ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

तं पूजयित्वा समाहितः संयतः उपासीदत् उपविवेश ॥ १५ ॥

स्थितो उपासीनम ॥ १६ ॥

भाषाटीका ।

॥ श्रीशुक उवाच ॥

हे राजन् ! सावधान होकर इस इतिहास को सुनो । जैसे हमने (द्वैपायन) व्यासजीके मुखसे तथा नारद और देवल महर्षिसे भी सुना है ॥ ९ ॥

हे नृप ! शूरसेन देश में चित्रकेतु नामसे ख्यात सार्वभौम राजा रहे जिनकी सब कामों को परिपूरण करने वाली भूमि रही ॥ १० ॥

उन चित्रकेतु महाराजके एक (कोटि) किरोड़ रानी रहीं । राजा सन्तान के योग्यभी रहा तौभी उन रानियों में से राजाको सन्तान की प्राप्ति न भई ॥ ११ ॥

रूप, उदारता, अवस्था, कुल, विद्या, ऐश्वर्य, इत्यादि गुणों से सम्पन्न भी रहे तौभी उन बांझों के पति महाराज चित्रकेतु को बड़ी चिन्ता भई ॥ १२ ॥

उन राजाके सर्व सम्पत् तथा मनोहर नेत्रवाली रानीं तथा सर्व भूमिका राज्य यह सबही कुछप्रीतिके कारक नहीं भये ॥ १३ ॥

एक समय इच्छा से इन लोकों में विचरते भये भगवान अंगिरा ऋषि उन चित्रकेतु महाराज के भवन में आये ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

प्रपञ्चोऽपि आत्मनस्तव प्रीतये स्यादित्यन्वयः । प्रस्त्वेनमिदं सर्वं भवन्मनसि किं प्रतीयत इति तत्राह - परत इति । अहं त्वां स्वतः परतो वाऽलब्धकाममप्राप्तकामं त्वां लक्षये पश्यामि केन विद्धेनेत्यत उक्तं चिन्तयेति छायकमलयाम् ॥ २१ ॥

एवं विकल्पितः सन्ततिनिमित्तं दुःखं विबुधा प्रश्रयवश्यगुणोनावनतः प्रह्वः ॥ २२—२३ ॥

आत्मनि मनसि ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

मनस्तव मुखं चिन्तया छायकं लक्ष्यते ॥ २१ ॥

विकल्पितो विविधकर्मणा विषयीकृतः ॥ २२—२३ ॥

यतश्चोदितो नोदितस्ततस्त्वदनुज्ञया ब्रूयाम् ॥ २४—२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अपि किमनामयमारोग्यं स्वस्ति शुभं प्रकृतीनाममात्यादीनां राज्ञः सुखममात्यादिसुखाधीनमेव अमात्यादिसुखमपि राजसुखाधीनमिति सदृष्टान्तमाह-यथा महदादिभिः प्रकृतिभिः सप्तभिः पुमान् जीवो नित्यं गुप्तो भवति न तु तद्व्यतिरेकेण स्वयमपि तिष्ठति तथा राजापि सप्तभिः स्वाम्यमात्यसुहृत् कोशराष्ट्रदुर्गबलैः स्वाम्यत्र गुप्तः ॥ १७ ॥

राजा आत्मानं स्वप्रकृतिषु निधाय आत्मसर्वस्वं भावं निक्षिप्य इत्यर्थः । श्रेयः राज्यसुखम् नरदेवे राजन्येव आहितः अर्पितः आधिः धनतुरगहस्त्यादितृष्णामूला मनःपीडा येस्ते राज्ञा गुप्ता आहताधय इति पाठे नरदेवेन नाशितमनोदुःखाः श्रेय आप्नुयुः ॥ १८ ॥

किञ्च राज्ञोपि यद्याज्ञाकारिणः सर्वजनाः स्युस्तदैव सुखमित्याह-अपीति । अथयस्तैलिकताम्बूलिकादयः ॥ १९ ॥

तव मनः स्ववशं न वेत्यर्थात् पृच्छति-यस्येति । अनुवशः अनुवर्ती अधीनः ॥ २० ॥

तदप्यशुधायां राजानं पुनराह-तव आत्मनो देहस्यात्मा स्वतः परतो वा परत पत्र हेतोर्वा न प्रीयते सुखमेवास्मीति चेत्तद्धीत्याह-लक्षय इति ॥ २१ ॥

विकल्पितः विविधविकल्पविषयीकृतः विबुधा सर्वज्ञेनापि तन्मुखादेव तद्दुःखं श्रोतुमिति भावः ॥ २२ ॥

शारीरिणस्मात्प्रभेषु ॥ २३ ॥

पृच्छतो भगवतोऽहमाज्ञाकारीत्यर्थः । आत्मनि मनसि चिन्तितं चिन्ताम् ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अपि किं तवात्मनः प्रकृतीनां चानामयमारोग्यमस्ति यथा पुमान् जीवः महदहङ्कारतन्मात्ररूपाभिः देहादिरूपेण परिणताभिः सप्तभिः प्रकृतिभिर्गुप्तः स्वस्ति सुखं प्राप्नोतीति शेषः तथा राजा च "स्वाम्यमात्यौ जनपदा दुर्गद्रविणसञ्चयाः । दण्डो मित्रं च तस्येमाः सप्त प्रकृतयो मताः" इति सप्तप्रकृतिभिर्गुप्तः स्वस्ति प्राप्नोतीत्यन्वयः ॥ १७ ॥

आत्मानं प्रकृतिषु भक्त्या स्वाज्ञानिधाय श्रेयः राज्यसुखादिकं स्वेष्टमाप्नुयात् तथा प्रकृतयोपि राज्ञा आहताधयो बाधितमनोव्यथास्सत्यः श्रेयः प्राप्नुवन्ति ॥ १८ ॥

अपि किं दारादयो वशवर्तिनस्तवेति शेषः ॥ १९ ॥

यस्य आत्मा मनोऽनुवशोऽनुगच्छेत्स्यात् तस्य सर्वे इमे पूर्वोक्ता वशगा भवन्ति सपालाः लोकास्तस्मै बलिं यच्छन्ति भवदीयं मनो वशे वर्तते न वेति भावः ॥ २० ॥

आत्मनस्तव आत्मा चित्तं यत्र प्रीयते न तुष्यति तत्किं स्वतः परतो वा यतस्त्वाम् अलब्धकाममप्राप्तमनोरथं लक्षये तत्र हेतुः तव मुखं छायकं निष्प्रभमस्ति ॥ २१ ॥

विबुधा तद्वृत्तज्ञेनापि एवं विकल्पितः तन्मुखेन तद्वृत्तोद्घाटनार्थम् प्रजाकामः पुत्रकामः ॥ २२ ॥

चक्रवर्तिनां बहिरन्तस्तद्योगिनां भवतां किं न विदितं सर्वं विदितमेवेत्यर्थः ॥ २३ ॥

आत्मनि मनसि ॥ २४ ॥

भाषाटीका ।

अंगिरा उवाच ॥

हे राजन् ! तुम और तुमारी प्रजा का आरोग्य और मंगल तो है, जैसे जीव महदादिक सप्त प्रकृति से रक्षित रहता है ऐसे ही राजा भी अमात्यादि सात प्रकृति से रक्षित रहते हैं ॥ १७ ॥

राजा अपने को प्रकृति के अनुकूल करदे तो (श्रेय) को प्राप्त होता है ॥ हे नरदेव ! ऐसे ही (प्रकृति) प्रजा राजा के अनुकूल होने से सुख को प्राप्त होवे हैं ॥ १८ ॥

हे राजन् ! जिसका मन स्वाधीन है, उसके दारा, प्रजा दीवान, सिपाही, धनीलोग, मंत्री, पुरवासी, देश वासी पुत्रादिक सबही वश में रहते हैं और लोकपाल भी होकर उसको (बलि) भेट देते हैं ॥ १९ । २० ॥

राजन् ! तुम अपने से प्रसन्न नहीं हो। आप से और से तुमको मनोरथ नहीं प्राप्त हुआ ऐसा जान पड़ता है, क्योंकि ? तुमारा मुख चिन्ता व्याप्त है ॥ २१ ॥

श्री शुकदेव जी बोले। कि हे राजन् ! विद्वान् मुनि अंगिरा जी ने राजा से जब ऐसे पूछा तब राजा (प्रजा संतान की कामना करके विनय से नम्र होकर मुनि बोला ॥ २२ ॥

लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसम्पदः ।
न नन्दयन्त्यप्रजं मां क्षुत्तृट्काममिवाऽपरे ॥ २५ ॥
ततः पाहि महाभाग ! पूर्वैः सह गतं तमः ।
यथा तरेम दुस्तारं प्रजया तद्विधेहि नः ॥ २६ ॥

श्रीशुक उवाच ।

इत्यर्थितः स भगवान् कृपालुर्ब्रह्मणः सुतः ।
श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः ॥ २७ ॥
ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत ! ।
नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद्द्विजः ॥ २८ ॥
अथाऽऽह नृपतिं राजन् ! भवितैकस्तवाऽऽत्मजः ।
हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ ॥ २९ ॥
साऽपि तत्प्राशनादेव चित्रकेतोरधारयत् ।
गर्भं कृतद्युतिर्देवी कृत्तिकाऽग्नेरिवात्मजम् ॥ ३० ॥
तस्या अनुदिनं गर्भः शुक्लपक्ष इवोडुपः ।
ववृधे शूरसेनेशतेजसा शनकैर्नृप ! ॥ ३१ ॥
अथ काल उपावृत्ते कुमारः समजायत ।
जनयन् शूरसेनानां शृण्वतां परमां मुदम् ॥ ३२ ॥

भाषा टीका ।

चित्रकेतुरुवाच ॥

हे भगवन् ! तप ज्ञान समाधि से नष्ट पाप वाले मुनियों को जीवों के बाहर और भीतर का कौनसा समाचार नहीं विदित है ॥ २३ ॥

हे ब्रह्मन् ! आप जानते हो तो भी आपके पूंछने से जो मेरे मन में चिंता है सो आपकी आज्ञा से प्रेरित होकर कहता हूं ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अप्रजमपुत्रं क्षुत्तृड्भ्यामन्नपानकाममपरे स्रक्चन्दनादयो यथा न सुखयन्ति ॥ २५ ॥

पूर्वैः पित्रादिभिः सह गतं प्राप्तं तमो नरकं प्रजया यथा तरेम तथा विधेहि ॥ २६ ॥ २७ ॥

यज्ञोच्छिष्टं यज्ञशेषम् ॥ २८ ॥

जन्मना हर्षं मरणेन च शोकं प्रदास्यतीति तथा इत्येवमुक्त्वा ययौ ॥ २९ ॥ ३० ॥

शूरसेनानामीशस्य तेजसा वीर्येण यो गर्भः स ववृधे ॥ ३१ ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावत् अस्य पुत्राभावप्रयुक्तायाश्चिन्ताया नितरामभिवृद्धिहेतुत्वं यदभिप्रेतमाह—लोकपालैरिति । लोकपालैरपि प्रार्थ्यास्तेषामपि दुर्लभा इति भावः साम्राज्यं सार्वभौमत्वं तद्रूपं यदैश्वर्यं तत्प्रयुक्ताः सम्पदः भोग्यभोगोपकरणादिसमृद्धयः अप्रजमपुत्रं मां न नन्दयन्ति न सुखयन्ति यथा क्षुत्तृड्भ्यामन्नपानादिकं कामयमानमितरे स्रक्चन्दनवनितादयो न सुखयन्ति तद्वत् ॥ २५ ॥

ततस्तस्मात् हे महाभाग ! पूर्वैरस्मत्पित्रादिभिः सह मया गतं प्राप्तं दुस्तारं तमो नरकं यथा प्रजया पुत्रेण हेतुना वयं तरेम तथा विधेहि तथाऽनुगृहाणेत्यर्थः “अपुत्रस्य गतिर्नास्ति” इति किंवदन्तीमनुसृत्य पूर्वैः सह गतं तम इत्युक्तं “प्रजया

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विषदानबुद्धिमती कृतद्युतिः हे भद्रे ! मे पुत्रमानयेति धात्रीं स्तन्यदायिनीमचोदयत् ॥ ४५ ॥

सा धात्री शयानं सुप्तं तम् उपव्रज्य कुमारसमीपङ्गत्वा उत्तारे उद्वृत्ते तारके कनीनिके पर्यस्ते लोचने यस्य तादृशं प्राणेरिन्द्रियैरात्मना जीवेन च त्यक्तं दृष्ट्वा हा हतास्मीति क्रोशन्ती भुव्यपतत् ॥ ४६ ॥

कराभ्यामुच्चैरतितरां उरो घ्नन्त्यास्ताडयन्त्यास्तस्या धात्र्याः नितरामातुरं दुःखयुक्तं दीनं स्वरमाकर्ण्य राज्ञी कृतद्युतिः त्वरया आत्मजस्यान्तिकं प्रविश्य सहसा सर्वथा मृतमेव बालं सुतं ददर्श ॥ ४७ ॥

ततः भूमौ पपात तथा परिवृद्धया एधमानया शुचा शोकेन मुमोह विचित्ताऽभूत् । मोहमेव दर्शयितुं तां विशिनष्टि—विभ्रष्टशिरोरुहाम्बरा विभ्रष्टाः विलुलिताः शिरोरुहाः केशा अंबरे च यस्याः सा ॥ ४८ ॥

ततः नृपस्यान्तःपुरवासिनो जनाः हे नृपेति सम्बोधनं वा जनानेवाह—नरानार्यश्चेति । नरा नार्यश्च सर्वे जना रोदनमाकर्ण्य कुमारसमीपमागत्य राज्ञा सह तुल्यदुःखाःसुदुःखिता बभूवुः । तदा कृतागसः गरदानेन कृतापराधा अपि ताः सपत्न्यः समागत्य व्यलीकं निष्कपटमिव यद्वा सकपटं यथा तथा मिथ्या वा रुरुदुः स्वाऽपराधं प्रच्छादयितुमिति भावः ॥ ४९ ॥

न लक्षितः मृत्युहेतुर्यस्य तं मृतं सुतं श्रुत्वा स चित्रकेतुः दुःखितोऽभूदिति शेषः । तदेवाह—विनष्टदृष्टिरिति पुत्रे स्नेहानुबन्धः तेनानुबन्धस्तेन हेतुना एधितया वर्द्धितया शुचा शोकेनातीव पीडितः अत एव विनष्टदृष्टिः विनष्टा दृष्टिर्यस्या ऽत एव पथि क्वचित्प्रपतन् क्वचिच्च स्खलन् क्वचिद्विमूर्छितः स राजराजः चित्रकेतुरनुसृत्य गच्छद्भिः प्रकृतिभिरमात्यादिभिः द्विजैश्च परिवृतः ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वामिनः स्नेहाभावे दासीत्वमप्रयोजकमित्याह । दासीनामिति ॥ ४१—४२ ॥

गूरं विषं ॥ ४३—४४

धात्रीं स्तनदात्रीम् ॥ ४५ ॥

उत्तारलोचनम् उन्नततारायुक्तनेत्रम् ॥ ४६—४९ ॥

अनुप्रकृतिः सप्रकृतिजनः ॥ ५०—५२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दास्या दासीव कस्याश्चिद्दुर्भगाया दास्या इव वयं दुर्भगा इत्यर्थः ॥ ४१ ॥

राज्ञोऽसम्मता हृतिश्चरितं वासाम ॥ ४२ ॥

दुर्मर्षा असहमानाः ॥ ४३—४६ ॥

बालमेव सुतं तं मृतं ददर्शेत्यन्वयः ॥ ४७ ॥ ॥ ४८ ॥

ताश्च सपत्न्योऽपि ॥ ४९ ॥

अलक्षितोऽन्तको मृत्युर्यस्य तम् अनुप्रकृतिः अनुगतप्रकृतिः अमात्यसुहृदादिकः द्विजैर्वृतः पपातेति अमात्यादयो ब्राह्मणादयश्च पेतुरित्यर्थः ॥ ५० ॥ ५१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दास्या दासीव दुर्भगा वयमिति शेषः ॥ ४१ ॥

राज्ञो न सम्मता वृत्तिर्जीवनं यासाम् ॥ ४२ ॥

विद्वेषेण नष्टा मतिर्यासां ताः नृपतिं प्रति दुर्मर्षा क्रुद्धाः॥४३॥

महदघं विषदानरूपं पापम् ॥ ४४ ॥

धात्रीं स्तनदायनीमचोदयत् ॥ ४५ ॥

उद्वृत्ते तारे कनीनिके यथोक्ते लोचने यस्य तम् प्राणेन इन्द्रियैः आत्मना जीवेन च त्यक्तं मृतं दृष्ट्वा ॥ ४६ ॥

कराभ्यामुच्चकैरुरः घ्नन्त्या भृशातुरं स्वरमाकर्ण्य सहसा बालमेव सुतं मृतं ददर्श ॥ ४७ ॥

विभ्रष्टाः शिरोरुहाः अंबरे च यस्याः सा पपात मुमोह च ॥ ४८ ॥

तदनन्तरं नृपान्तःपुरवर्तिनो जनाः तुल्यव्यसनाः अत एव सुदुःखिताः रुरुदुः ताश्च कृतागसः सपत्न्यो व्यलीकं मृषैव रुरुदुः ॥ ४९ ॥

न लक्षितोऽन्तको मृत्युहेतुर्यस्य तम् मृतं श्रुत्वा विनष्टा दृष्टिर्यस्य स स्नेहानुबन्धेनैधितया वर्द्धितया शुचा शोकेन भृशं विमूर्च्छितः अनु अनुगताः प्रकृतयोऽमात्यादयो यस्य सः ॥ ५० ॥

भाषा टीका ।

दासियों को क्या दुःख है क्योंकि उनको तो स्वामी की सेवा से सदां मान ही मिलता है भाग्यहीन स्त्री तो दासियों की भी दासी के सदृश हैं ॥ ४१ ॥

इस प्रकार सपत्नी की पुत्ररूप सम्पत् से जलने वाली और राजाके असम्मत वृत्ति वाली उन रानियो को बलवान् विद्वेष पैदा हुआ ॥ ४२ ॥

एक तो जात की स्त्री आप ही दारुण चित्तवाली दूसरे विद्वेष से उनकी मति नष्ट होगई तब राजा के ऊपर अमर्ष करके पुत्रको विष दे दिया ॥ ४३ ॥

रानी कृतद्युति सपत्नियों के भारी कपट को न जान कर, सोता है ऐसे विचार कर देखकर के भी घर में विचरती रहा ॥ ४४ ॥

पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहाम्बरः।
दीर्घं श्वसन्बाष्पकलोपरोधतो निरुद्धकण्ठो न शशाक भाषितुम् ॥ ५१ ॥
पतिं निरीक्ष्योरुशुचाऽर्पितं तदा मृतं च बालं सुतमेकसन्ततिम्।
जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा ॥ ५२ ॥
स्तनद्वयं कुङ्कुमगन्धमण्डितं निषिञ्चती साञ्जनबाष्पबिन्दुभिः।
विकीर्य केशान्विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरम् ॥ ५३ ॥
अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे।
परेऽनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः परः ॥ ५४ ॥
न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदाऽऽत्मकर्मभिः।
यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ॥ ५५ ॥
त्वं तात! नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तम्।
अञ्जस्तरेम भवताऽप्रजदुस्तरं यद्ध्वान्तं नयाह्यकरुणेन यमेन दूरम् ॥ ५६ ॥
उत्तिष्ठ तात! त इमे शिशवो वयस्यास्त्वामाह्वयन्ति नृपनन्दन! संविहर्तुम्।
सुप्तश्चिरं ह्यशनया च भवान्परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानाम् ॥ ५७ ॥
नाहं तनूज! ददृशे हतमङ्गला ते मुग्धस्मितं (१) मुदितवीक्षणमाननाब्जम्।
किं वा गतोऽस्यपुनरन्वयमन्यलोकं नीतोऽघृणेन न शृणोमि कला गिरस्ते ॥ ५८ ॥

भाषाटीका।

बुद्धिमती कृतद्युति ने बहुत काल से पुत्रको सोया समझकर धाय से कहा कि हे भद्रे! मेरे पुत्रको ले आ ॥ ४५ ॥

वह धाय सोते हुए बालक के निकट जाकर हाय? मर गई ऐसे कह कर धरती पर गिरपड़ी ॥ ४६ ॥

उससमय दोनों हाथों से छाती कूटने वाली उस धाय के, ऊंचे स्वर को सुन कर बड़ी जल्दी रानीने पुत्रके समीप जाकर एका एकी मरे हुये बालक को देखा ॥ ४७ ॥

बस उस बढे हुये शोक के मारे रानी भी धरती पर गिर पड़ी और केश और वस्त्र खुल गये और मूर्च्छा को प्राप्त होगई ॥ ४८ ॥

तब तो राजा की रनिवास के नर और नारी सबही परिजन रोना सुन कर जल्दी आकर तुल्य दुःख वाले थे तो भी और अति दुःखित होकर रोने लगे। और जिनोंने विषदिया था वो भी सब आकर मिथ्या रोने लगी ॥ ४९ ॥

राजा भी बिनाकारण मालूम भये पुत्र को मराहुआ सुन कर अन्धा सा होगया और मार्ग में गिरते पड़ते स्नेहानुबंध से अति मात्र बढे हुये शोक के मारे मूर्च्छितहोता हुआ अमात्य ब्राह्मणादि कों सहित बालक के पास जाकर मरे भये बालक के पायन में पड़गया। उस वखत केश और वस्त्र सब खुल गये बड़ी २ श्वास लेता था और आंसुओं के मारे कंठ रुक गया और कुछ भी बोलने को समर्थ न हुआ ॥ ५०—५१ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका।

बाष्पकलाभिरश्रुबिन्दुभिरुपरोधतः संवृतत्वेन निरुद्धः कण्ठो यस्य ॥ ५१ ॥

उरुशुचार्पितं बहुशोकेन व्याप्तम् एकमेव सन्ततिरूपम् ॥ ५२ ॥

विगलन्त्यः स्रजो येभ्यस्तान् केशान् ॥ ५३ ॥

आत्मसृष्टेरप्रतिरूपमननुरूपं चेष्टसे तदेवाह—नु अहो परे वृद्धे जीवत्यपरस्य बालस्य या मृतिस्तत् तदा हि वृद्धस्य सृष्टिसामर्थ्याभावे बाले च मृते सति तव सृष्टिर्नष्टा स्यादित्यर्थः। ननु, साम्प्रतं त्वमृत्योर्विपरीतोऽस्मीति चेत्तत्राह—विपर्ययो विपरीतोऽसि चेत्तर्हि त्वं प्राणिनामतिदुःखकारित्वात् ध्रुवो निश्चितः परः शत्रुरसि न तु कृपालुरित्यर्थः ॥ ५४ ॥

ननु, जीवकर्मानुसारेण जन्मादि कुर्वतो मम कोऽपराधस्त-

(१) मुदितवीक्षणमिति पाठान्तरम्। वीर०

श्रीधरस्वामिकृतभावार्थदीपिका ।

आह—नहीति । पुत्रे जीवत्येव पिता म्रियते पितरि जीवत्येव पुत्रो जायत इति क्रमो नास्ति कर्माधीनत्वादिति चेत्तर्हि आत्मकर्मभिरेव तज्जन्मादिकमस्तु किं त्वया कृत्यं ? ननु, मयेश्वरेण विना जडैः कर्मभिरिदं कथं सिध्येत् ? भवतु नाम तथाऽपि निजसर्गवृद्धये ते त्वया यः स्नेहपाशः कृतस्तमिमं स्वयमेव विवृश्चसि छिनत्सीत्यादिक्रोशति न ह्येवं विधं दुःखं दृष्ट्वा कश्चिदपि पुत्रादिषु स्नेहं करिष्यतीति भावः ॥ ५५ ॥

अप्रजदुस्तरमप्रजानां दुस्तरम् अकरुणेन सह ॥ ५६ ॥

अशनया क्षुधा ॥ ५७ ॥

तनूज हे पुत्र ! नाहं प्रथमं त्वत्पार्श्वमागता सती तव मुग्धस्मितं वक्त्रं ददर्श दृष्टवत्यस्मि इदानीमपि गिरो न शृणोमि तर्हि किमपुनरन्वयं पुनरागमनं यथा न भविष्यति तथा गतोऽसि ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मृतस्य बालस्य पादमूले पपात कथम्भूतः विस्रस्ताः शिरोरुहा अंबरे च यस्य दीर्घं यथा तथा श्वसन् श्वासं मुञ्चन् बाष्पकलाभिरश्रुबिन्दुभिरुपरोधतः सम्भूतस्तेन निरुद्धः कण्ठो यस्य तादृशः भाषितुं किञ्चिदपि वक्तुं न शशाक नाशक्नोत् ॥ ५१ ॥

तद्दृष्ट्वा महता शोकेनार्पितं व्याप्तं पतिं तथैकमेव सन्ततिरूपं मृतं बालं पुत्रं च निरीक्ष्य जनस्य राज्ञः प्रकृतेरमात्यादेश्च हृद्रुजम् मनःपीडां दधाना पुष्यन्ती सती कृतद्युतिः राज्ञीति पाठे सती राज्ञी जनस्य प्रकृतेश्च हृद्रुजं दधाना सती चित्रधाऽनेक प्रकारं विललाप ॥ ५२ ॥

चित्रधा विलापमेव प्रपञ्चयति--स्तनद्वयमित्यादिना, कचागिरस्त इत्यन्तेन ताम्रकुंकुमगंधेन कुङ्कुमसिश्रहरिचन्दनेन मण्डितं भूषितं स्तनद्वयमञ्जनयुक्तैर्बाष्पार्विदुभिरश्रुबिन्दुभिर्निषिञ्चन्ती विगलन्ती स्रक् येभ्यस्तान्केशान्विकीर्य कुररीव पुत्रंप्रति सुस्वरं चित्रंयथा तथा शुशोच ॥ ५३ ॥

हे विधातस्त्वमहो बालिशः मूर्खः निष्कृपो वा कुतः यत्त्वमात्मसृष्टेः स्वकर्तृकसृष्टेः पित्रादिक्रमनिवर्त्तकाया अप्रतिरूपम् अननुरूपम् ईहसे चेष्टसे तदेवाह—परे प्राक्कालजाते पित्रादौ अनुजीवति सत्यपरस्य पश्चात्कालजातस्य पुत्रादेर्या मृतिमरणमिति तदेतदप्रतिरूपमित्यर्थः विपर्ययश्चेद्युक्तविपर्ययएवस्यात्पुत्रादौ जीवति पित्रादेरेव मृतिः स्यादित्यर्थः तर्हित्वं ध्रुवं नूनं परः सर्वोत्कृष्टो भवेः नियमेन तदभावात्त्वं बालिश एवेति भावः । यद्वा ननु सृष्टिस्तु पित्रादिक्रमेणैव मृतिस्त्वनियतेति [illegible] त्वं ध्रुवं नूनं परः सर्वोत्कृष्टोऽसीत्यधिक्षेपः ध्रुव इति [illegible]पाठे तु त्वं नित्यः शत्रुरसीत्यर्थः ॥ ५४ ॥

ननु, [illegible]कर्मानुसारेण उत्पत्तिमरणे इतः न चात्र क्रमोऽस्ति न वा ममापराधोऽस्तीत्यत्राह— न हीति । इह प्रकृतिमत्सु शरीरिणां मृत्युजन्मनो उत्पत्तिमरणयोः क्रमो नास्ति चेत् पश्चाज्जाते पुत्रे जीवत्येव पिता पूर्वं जातो म्रियत इत्येवंविधक्रमो नास्ति चेदित्यर्थः उत्पत्तिक्रमेणैव मृतिक्रमो नास्ति चेत्यर्थः जन्मग्रहणं दृष्टान्तार्थम् यथा जन्मनि क्रमोऽस्ति तथा मृतौ क्रमो नास्तीति चेत्तर्ह्यात्मकर्मभिः स्वस्वकर्मभिरेव तत्तदुत्पत्तिमृत्यादिकं सर्वमस्तु किमीश्वरेण त्वया कृत्यमस्ति ? कर्मानुसारेण फलप्रापकोऽहमिति चेत्तत्राह—य इति निजसर्गवृद्धये ते त्वया यः स्नेहपाशः पुत्रादिषु स्नेहरूपः पाशः कृतस्तमिमं स्वयमेव विवृश्चसि भावत्वात्प्रार्थनायां लट् छिन्धीत्यर्थः ॥ ५५ ॥

एवं दैवं प्रत्याक्रुश्याथ मृतं बालकं प्रति विललाप-त्वमिति । हे तात पुत्र ! मामनाथामेतद्दुःखसागरात्तारकरहितां दीनां दुःखितां त्यक्तुं त्वं नार्हसि तव शोकेन तप्तं पितरं विलोकय विचक्ष्व पश्य यद्यस्मात्त्वत्कर्तृकाद्वलोकनाद्प्रजदुस्तरमपत्यप्रयुक्तादपि क्लेशात् दुस्तरम् अप्रजत्वक्लेशस्तु यथाकथञ्चित्सोढुं शक्यः अयं तु नितरां सोढुमशक्य इति भावः त्वत्त्वं शोकं तरेम यदि न पश्यसि तर्ह्यकरुणेन निर्घृणेन यमेन करुणाभूतेन मामपि दूरं नय मामपि यमसमीपं नयेत्यर्थः ॥ ५६ ॥

हे तात पुत्र ! त्वमुत्तिष्ठ इमे वयस्यास्त्वत्समानवयसः शिशवो बालाः हे नृपनन्दन ! त्वया सह संविहर्तुं त्वामाह्वयन्ति किञ्च त्वाञ्चिरं सुप्तः अशनया क्षुधा च परीतो व्याप्तः अतः स्तन्यं दुग्धं पिब स्वकानां नोऽस्माकं शुचो हरापनुद ॥ ५७ ॥

हे तनूज पुत्रक ! ते [illegible] मुखकमलमहं न पश्यामि न दृष्टवती कथम्भूतं मुग्धं [illegible] स्मितं यस्मिन् मुदितवीक्षणं मुदिते चञ्चलपक्ष्मणी नेत्रे यस्मिन् तादृशं अत एव [illegible] मङ्गला हतं मङ्गलं यस्याः साऽहमिदानीमपि तव कलामधुरा गिरः न शृणोमि नाश्रौषं तर्हि किमपुनरन्वयं पुनरागमनरहितमन्यलोकं लोकान्तरं प्रत्यघृणेन निष्करुणेन दैवेन नीतः प्रापितः गतोऽसि किं चेत्यर्थः ॥ ५८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रोनृणां चित्रधाश्चा वदन्ती शुशोचेति ॥ ५२ ॥ ५३ ॥

शोकलक्षणं वाक्यं दर्शयति—अहो इति । अतीव बालिश जडाज्जडः कथं मम जाड्यमापाद्यत इति तत्राह—यस्त्वमिति यत्त्वमात्मसृष्टेरप्रतिरूपं प्रतिकूलं विरुद्धमीहसे तु यत "कुर्वन्नेवेह कर्माणि" इत्यभिधानात् कथमिदं विरुद्धं चेत्तत्राह-परे [illegible] परे पूर्वतने पितरि मातरि वा जीवत्यपरस्य पश्चादुत्पन्नस्य पुत्रस्य या मृतिः सा त्वयाऽऽपाद्यते यस्मात्तस्मादिति शेषः यद्यपि [illegible] रेऽयं क्रमस्तथापि लितावनुपपन्नोऽयमिति सूचयति तुनेति [illegible] कथं तर्हि जाड्यपरिहार इति तत्राह—विपर्यय इति । [illegible] पर्ययोऽन्यथा पूर्वतनस्य पूर्वं मृतिः पश्चात्तनस्य पश्चान्मृतिर्यदि तर्हि ध्रुवं निश्चितं त्वं परोऽसि अतोऽस्य प्राप्नोषि [illegible] हानुसारित्वेनेत्यादिरर्थः ॥ ५४ ॥

सन्तापकोपयोगादिग्रन्थपर्यवसायः कथिदितिवचनात्सन्तापे [illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृतमिति तमित्याह—नहीति । शरीरिणां मृत्युजन्मनोः क्रमो नास्ति चेत्तदा तर्हि आत्मकर्मभिः स्वकर्मानुकूल्येनास्तु ते त्वया स्वयं निजसर्गवृद्धये यः स्नेहपाशो मोहपाशो मम पुत्रोऽयमिति स्नेहानुबन्धः कृतस्तमिमं स्नेहपाशं विवृश्चसि भिनत्सीति न सम्यक्करोषि ॥ ५५ ॥

त्वमकरुणेन यमेन दूरं न याहीत्यन्वयः इदं क्रोधं कटाक्षो-क्त्योक्तमिति ज्ञातव्यम् ॥ ५६ ॥

अशनयाऽशनेच्छया भवानित्यनर्थकवचः स्पष्टं प्रती-यते ॥ ५७ ॥

इदमपि रागनिमित्तमितिभावेनाह—नाहमिति मुदिते प्रसन्ने वीक्षणे यस्य तत्तथोक्तं क्रोधं स्वनयन्ती शोचति । किंवेति अपुनरन्वयं पुनः सम्बन्धशून्यं अघृणेन यमेनेति शेषः ॥ ५८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एकश्चासौ सन्ततिर्वंशरूपश्च तं हृद्रुजं दधाना पुष्यन्ती सती ॥ ५२ ॥ ५३ ॥

अस्माकमेतादृशस्य दुःखस्य कारणं विधातैव । तस्यैव कारणत्वं तदीयमूर्खत्वादेवेति निश्चित्य स न पुनरेवं क्वापि करोत्विति हितपरत्वेन तमेव प्रबोधयन्त्याह—अहो इति । बालि-श्यमेवाह यस्त्वम् आत्मनः [illegible] अप्रतिरूपं असदृशमनुचितं यथास्यात्तथा ईहसे इत्यर्थः । ननु, [illegible]चितं तत्राह परे वृद्धे जीवति अपरस्य बालस्य [illegible]तिस्तदा हि वृद्धस्य सृष्टिसाम-र्थ्याभावे बालेषु मृते सति तव सृष्टिलोप एव स्यादित्यर्थः विपर्ययश्चेत् संप्रति स्वसृष्टेर्विपरीतोऽस्मीति मन्यसे चेदित्यर्थः । तर्हि त्वमेवास्माकं परः शत्रुर्ध्रुवो निश्चित एव । स्वस्यापकारमपि कृत्वा अस्मान् दुःखयन् शत्रुत्वमेव स्वीकरोषीत्यर्थः ॥ ५४ ॥

ननु जीवस्य कर्मानुसारेण जन्मादिकुर्वतो मम कोऽप-राधस्तत्राह—नहीति । पुत्रे जीवत्येव पिता म्रियते पितरि मृते एव पुत्रो म्रियते इति क्रमो नास्ति कर्माधीनत्वादिति चेत् तर्हि आत्मकर्मभिरेव तज्जन्मादिकमस्तु किं त्वया कृत्यं ननु मदीश्वरेण विना जडैः कर्मभिरिदं कथं सिद्ध्येत् सत्यं त्वयैव सिद्ध्यतु तदपि निजसर्गवृद्धये यः स्नेहपाशस्ते त्वया स्वयमेव कृतस्तमिमं विवृश्चसि छिनत्सि स्नेहे एतादृशं दुःखं दृष्ट्वा पुत्रादिषु कोपि स्नेहं न करिष्यति स्नेहाकारणे पुत्रादयः कथं जीविष्यन्तीति सृष्टिलोपात् त्वं मूर्ख एवेति भावः यद्वा कोऽर्थं यद् छिन्धीत्यर्थः । स्नेह एव सुखदुःखयोर्हेतुः । स्नेहाभावे पुत्रो-ऽन्ये जीवन्तां म्रियन्तां वा नैव स्यातां सुख दुःखे इति भावः ॥ ५५ ॥

वार्द्धिकेन [illegible] सह किमित्यहं संकल्पामि स्वपुत्रमेव हितकार्ये किमिति नापयापयामीति विमृश्याह त्वामिति हे तात ! भवता पुत्रेण अप्रजानामपुत्राणां दुस्तरं यद् ध्वान्तं नरकं तत्तरेम । ननु यमो मां स्वपुरं नयति अहं किं करोमि तत्राह—नयाहि अकरुणेन सह ॥ ५६ ॥

पुत्रं सुप्तं मत्वाह—उत्तिष्ठेति । अशनया क्षुधा ॥ ५७ ॥

हे तनूज ! तव मुग्धस्मितं मुखपद्मं नाहं द्रक्ष्ये न द्रष्टवत्यस्मि यस्त्वं न जानासि तेन किंवा अमङ्गलोकं परलोकं गतोऽसि । अपुनरन्वयं पुनरागमनशून्यं तव को दोषः यतो-ऽघृणेन निष्करुणेन यमेन नीतः । अत एव कथा मधुरा स्फुटा गिरस्ते न शृणोमि ॥ ५८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मृतस्य बालस्य पादमूले पपात बाष्पकलाभिरश्रुबिन्दुभिर्य उपरोधस्तेन निरुद्धः कण्ठो यस्य सः भाषितुं न शशाक ॥ ५१ ॥

बालमेकं सुतं मृतं निरीक्ष्य एकां सन्ततिं च निरीक्ष्य जनस्य प्रकृतेश्च हृद्रुजं दधाना सती राज्ञी चित्रभा विल-लाप ॥ ५२ ॥

विगलन्त्यः स्रजो येभ्यस्तान् केशान् विकिरन्ती सुतं प्रति सुस्वरं यथा स्यात्तथा शुशोच ॥ ५३ ॥

अहो विधातस्त्वं नु निश्चितं अतीव बालिशोऽसि कुतः आत्मनः सृष्टेः मृत्युत इति सृष्टिः अस्मदादिजनता तस्याः अप्रतिरूपमननुरूपमीहसे स्वयं जनतां सृष्ट्वा तद्विनाशं करोषि । ननु, विनाशाभावे जनताया नित्यं वर्द्धमानायाः क स्थितिरित्या-शङ्क्याह - परे पितरि मातरि च जीवति अपरस्यापत्यस्य या मृतिः सा तद्वालिशत्वसूचिकेति भावः । ननु, बालिशः इमां विचित्रां सृष्टिं कथं कुर्य्यादतो नास्मि बालिश इत्यत्राह— विपर्ययश्चेद् बालिशो नास्ति किन्तु विचक्षणश्चेत् तर्हि त्वं ध्रुवो निश्चितः परः शत्रुरेवासि अयमर्थः बाल्यादप्रियं कुर्वन् अबन्धुः परो न भवति ज्ञानवान् अप्रियं कुर्वन् तु सर्वथा शत्रुरेवेति ॥ ५४ ॥

किञ्च अपत्ये जीवत्येव पिता म्रियते पितरि जीवत्येवापत्यं जायत इति शरीरिणां मृत्युजन्मनोः क्रमः ईश्वरसद्भावे न हि चेत् तर्हि आत्मनो जीवस्य कर्मभिरेव तज्जन्मादिकमस्तु किमीश्वरप्रयोजनम् ? ननु, सर्वथास्वतन्त्रस्य जीवस्य कर्मानुष्ठाने तत्फलभोगादौ च स्वातन्त्र्येण प्रवृत्तिर्निवृत्तिश्च नैव जायतेऽतो मयैव तत्तत्कर्मानुसारेण तत्तज्जन्मादिकमनादितः प्रवर्तितं । नैव पितृपुत्रादिसम्बन्धो नित्यः किन्तु सृष्टिवृद्ध्यर्थकमत्कृत[illegible]-निबद्धा जना विमुह्यन्तीत्यत्राह—य इति विवृश्चसि छिन-त्सीत्यर्थः ॥ ५५ ॥

अप्रजानां दुस्तरं यत् ध्वान्तं तमस्तत्कृतता वयमञ्जोऽना-यासेन तरेमाघृणोऽकरुणेन यमेन सह दूरं न याहि ॥ ५६ ॥

अशनया क्षुधा परीतः अभिभूतः ॥ ५७ ॥

हे तनूज पुत्र, अहं हतास्मि मन्दभाग्यास्मि यस्याः सा प्रथमं त्वत्समीपमागता सती तव मुग्धस्मितं मुदितवीक्षणमाननाब्जं न दृष्टवत्यस्मि अधुना च ते कला मधुरा गिरं न शृणोमि अपुनरन्वयं पुनरागमनं यथा न भवति तथा अघृणेन निर्दयेन

श्रीशुक उवाच ।

विलपन्त्या मृतं पुत्रमिति चित्रविलापनैः ।
चित्रकेतुर्भृशं तप्तो मुक्तकण्ठो रुरोद ह ॥ ५९ ॥
तयोर्विलपतोः सर्वे दम्पत्योस्तदनुव्रताः ।
रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनम् ॥ ६० ॥
एवं कश्मलमापन्नं नष्टसंज्ञमनायकम् ।
ज्ञात्वाङ्गिरानाम मुनिराजगाम सनारदः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां संहितायां वैयासिक्यां चित्रकेतूपाख्याने चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यमेन अत्र विशेषणेन विशेष्याध्याहारः एवं तृणावृतमहाघनेतिवत् महाशनशब्देन कथमघासुरशब्दाध्याहार इति शङ्का निरस्ता नीतः अन्यलोकं गतोसि ॥ ५८ ॥ ५९ ॥

भाषाटीका ।

रानी भी उस समय पति को भारी शोक में डूबा हुआ देखकर और एकही संतान ऐसे उन मरे भये बाल पुत्रको देखकर रनिवास और प्रजा के दुःख को धारकर बहुत प्रकार विलाप करती हुई ॥ ५२ ॥

कुंकुम चंदन से लिप्त दोनो स्तनों को कजरारे आंसुओं से अत्यन्त सींचती हुई । पुष्पों की माला जिन से गिर गई ऐसे केशों को बिखेरकर कुररी पक्षी के तरह पुत्रका बहुत ही शोक करती हुई ॥ ५३ ॥

हे विधता ! तू बड़ाही मूर्ख है जो तू अपनी सृष्टि के भी प्रतिकूल चेष्टा करे है । बूढ़ों के जीवते बालक की जो मृत्यु होवे है ऐसे विपरीत करने वाला जो तू है तो अवश्य तूं सदां का वैरी है ॥ ५४ ॥

यदि इस संसार में प्राणियों का जन्म और मरण यदि क्रमसे न होता होवे तो अपने कर्म से होता होगा परंतु अपनी सृष्टि के बढ़ने को जो तूंने स्नेह रूप फांसी बनाई फिर उस को आपही क्यों काटता है ॥ ५५ ॥

हे पुत्र ! मैं बड़ी दीन और अनाथ हूं तू मोकूं छोड़नेके योग्य नहीं है शोक तज अपने पिता को तो देख निपुत्रियो से दुस्तर जो नर्क है सो तेरे सों हम सब बिना श्रम बातमें तरजांयगे तुम निर्दय यमराज के द्वारा दूरमतजाओ ॥ ५६ ॥

हे तात ! तुम उठो ये सब बालक तुमारे सखा हैं हे नृपनन्दन ! ये खेलने को तुमको बुलाते हैं बहुत देर के तुम सोये हो भोजन करो स्तनपान करो हमारे शोक को हरो ॥ ५७ ॥

हे पुत्र ! नष्ट मङ्गल [illegible] मैंने तुमारो भोरो मुसकयातो प्रसन्न दृष्टि वारो मुख [illegible] नहीं देखैं पायो क्या तुम निर्दयने जहां से फिर न लौटे ऐसे लोक को पहुंचादिये हो क्योंकि तुमारी वाणी नहीं सुन पड़ती ॥ ५८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दम्पत्योरन्येषु च भृशं शोकाविष्टेषु सनारदः पुनरङ्गिरास्तत्रायया इत्याह मुनिः—विलपन्त्या इति । मृतं पुत्रं प्रति चित्रविलापनैः प्रलपन्त्यास्तस्याश्चित्रकेतुरपि नितरां शोकेन तप्तोऽत एव मुक्त उच्चैः प्रयुक्तकण्ठो रुरोद हेति ॥ ५९ ॥

तयोर्दम्पत्योरेवं विलपतोस्सतोस्तदनुव्रताः सर्वे नरा नार्यश्च रुरुदुः इतरत्सर्वं जनजातमचेतनप्रायमासीच्चित्रप्रतिमा इव बभूवुरित्यर्थः ॥ ६० ॥

एवं कश्मलं महद्दुःखमापन्नमत एव नष्टसंज्ञं विवेकरहितम्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनायकं तत्त्वोपदेष्टृरहितं समुदायं ज्ञात्वा श्रीनारदेन देवर्षि-सहितोऽङ्गिरानाममुनिराजगामागतवान् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

इयमेकैव विलपन्त्यभूत्राज्य इत्यतः पूर्वोक्तविलापं स्पष्टयति—विलपन्त्यामिति ॥ ५९ ॥

अचेतनं बुद्धिशून्यं अहमवत्प्रवृत्तिशून्यं पुरं वा ॥ ६० ॥

अनायकं बोधकरहितं अस्मिन्नवसरे सुहृदाङ्गिरस आगमि बक्ति—आरवेति । अनेन ऋषित्रिकालदर्शीति द्योतितम् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अनायकं शोकनिवर्तकशून्यं राजानमिति शेषः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भस्य
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विलपन्त्या सह ॥ ५९ ॥ ६० ॥

एवं सर्वनगरम् अचेतनमेव नष्टसंज्ञं ज्ञात्वा चित्रकेतोश्च मृततुल्यत्वादनायकम् ॥ ६१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठे चतुर्दशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वं तत्रत्यप्राणिजातम् अचेतनं नष्टसंज्ञम् ॥ ६० ॥

सनारदः नारमज्ञानं द्यति खण्डयतीति नारं ज्ञानं वा ददातीति नारदस्तेन सह ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्दशाऽध्यायार्थप्रकाशः ॥ १४ ॥

भाषा टीका ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले कि रानी मृत पुत्र को ऐसे विचित्र तरह विलाप करती रही और अत्यन्त तप्त चित्रकेतु राजा भी कण्ठ खोल कर रोने लगा ॥ ५९ ॥

इन दोनों के विलाप करने में उनके पीछे और भी सब नर और नारी रोने लगे सर्व अचेतन प्राय होगया ॥ ६० ॥

एसे दुःख को प्राप्त और नष्ट संज्ञा वाले राजा को असहाय जानकर नारद जी को साथ लेकर अंगिरा नाम के ऋषि राजा के समीप आये ॥ ६१ ॥

इति श्रीमत् भागवत महापुराण षष्ठस्कन्ध
कीभाषा टीका में चतुर्दश अध्याय
समाप्त ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे चतुर्दशोऽध्यायः समाप्तः ॥ १४ ॥

॥ पञ्चदशोऽध्यायः ॥

——○:*:○——

श्रीशुक उवाच ।

ऊचतुर्मृतकोपान्ते पतितं मृतकोपमम् ।
शोकाभिभूतं राजानं बोधयन्तौ सदुक्तिभिः ॥ १ ॥
कोऽयं स्यात्तव राजेन्द्र ! भवान्यमनुशोचति ।
त्वं चास्य कतमः सृष्टौ पुरेदानीमतःपरम् ॥ २ ॥
यथा प्रयान्ति संयान्ति स्रोतोवेगेन वालुकाः ।
संयुज्यन्ते वियुज्यन्ते तथा कालेन देहिनः ॥ ३ ॥
यथा धानासु वै धाना भवन्ति न भवन्ति च ।
एवं भूतेषु भूतानि चोदितानीशमायया ॥ ४ ॥
वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः ।
जन्ममृत्योर्यथा पश्चात्प्रागेवमधुनाऽपि भोः ॥ ५ ॥
भूतैर्भूतानि भूतेशः सृजत्यवति हन्त्यजः ।
आत्मसृष्टैरस्वतन्त्रैरनपेक्षोऽपि बालवत् ॥ ६ ॥
देहेन देहिनो राजन् ! देहाद्देहोऽभिजायते ।
बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः ॥ ७ ॥
देहदेहिविभागोऽयमविवेककृतः पुरा ।
जातिव्यक्तिविभागोऽयं यथा वस्तुनि कल्पितः ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ततः पञ्चदशे चित्रकेतोः शोकापनोदनम् ।
कृतं तत्त्वोपदेशेन नारदेनाङ्गिरोयुजा ॥ १ ॥

मृतकोपान्ते शवसमीपे ॥ १ ॥

त्वं चास्य बन्धूनां मध्ये कतमः सृष्टौ प्रजारूपायां अयं पुत्रोऽहं चास्य पितेति चेत्तत्राऽऽहतुः—पुरेति । ये पूर्वजन्मनि पित्रादिरूपेण संयुक्ता आसन् त एव मरणेन वियुक्ताः सन्तो वर्तमानजन्मनि कदाचित्तस्यैवान्यस्य वा पुत्रादयो भवन्ति ते जन्मान्तरे तस्यैवान्यस्य वा कलत्रादयः शत्रुमित्रादयो वा भवन्त्यतो नायं नियम इति भावः ॥ २ ॥

तमेवाभिप्रायं प्रकटयति—यथेति । स्रोतसः प्रवाहस्य वेगेन यथा प्रयान्ति वियुज्यन्ते संयान्ति संयुज्यन्ते तथा कालवेगेन देहिनो जीवा अपि ॥ ३ ॥

तथाप्येतावन्तं कालं मम पुत्रो नाभूद्वार्धके जातो मृत इति दुःखमितिचेत्तत्राहतुः—यथा धानासु बीजेषु धाना बीजान्तराणि भवन्ति कासुचित्कदाचिन्न भवन्ति नोत्पद्यन्ते नश्यन्ति च न तु भवन्त्येव तिष्ठन्त्येवेति वा नियमः एवमेव भूतानि पुत्रादिरूपाणि भूतेषु पित्रादिषु । अतो धानानां अन्यजनकत्वेऽपि यथा पितृपुत्रादिभावो नास्त्येवमत्रापीति न शोकः कार्य इति भावः ईशमायाप्रेरितानामेव भवनमभवनं न वस्तुतः ॥ ४ ॥

तस्य च सर्वसाधारणत्वान्न पुत्र एव शोचनीय इत्याहतुः—

श्रीधरस्वामिकृत भावार्थदीपिका ।

वयञ्चेति । तुल्यकालाः वर्तमानकालीनाः जन्मनः प्राङ्मृत्योः पश्चाच्च यथा न सन्त्येवमधुनापि न सन्ति भो राजन्, प्रागूर्ध्वयोरसत्त्वात्स्वप्नवदित्यर्थः ॥ ५ ॥

असत्त्वे, कथं प्रतीतिः कथं चाहमस्य जनक इत्याद्यभिमानस्तत्राहतुः—भूतैरिति । ईश्वरेण मायया सृष्टत्वात्प्रतीतिर्निमित्तमात्रत्वेनैव च भूतानामयमभिमान इति भावः ननीश्वरस्य सृष्ट्यादिभिः साध्यमस्ति चेत्तर्ह्यपूर्णकामता प्राप्ता नास्ति चेत्कुतः प्रवृत्तिस्तत्राहतुः—अनपेक्षोऽपि बालवत् लीलया करोतीति ॥ ६ ॥

अयञ्च जन्मादिव्यवहारो देहानामेव नत्वात्मन इत्याहतुः देहिनः पितुर्देहात् देहिनः पुत्रस्य देहो मातुर्देहतो देहाद्भिजायते यथा बीजादेव बीजं जायते देही तु शाश्वत एव अर्थो भूम्यादिर्यथा तद्वत् ॥ ७ ॥

ननु नश्वरदेहप्रतियोगित्वाद्देह्यपि न शाश्वतः स्यात्तत्राऽऽहतुः-देहदेहिनोरयं परस्परप्रतियोगिविभागः पुराऽनादिरविवेककृतोऽज्ञानकल्पितः जातिः सामान्यं व्यक्तिर्विशेषस्तयोर्विभागो यथा वस्तुनि सन्मात्रे कल्पितः परस्परापेक्षसिद्धत्वेनानिरूप्यत्वात्तद्वदिति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तत्रागतावङ्गिरोनारदौ शोकापनयनाय तमूचतुरित्याह मुनिः—ऊचतुरिति । मृतकोपान्ते शवसमीपे पतितं मृतकोपमं शवसदृशं तत्र हेतुः शोकेनाभिभूतं तिरस्कृतविवेकं राजानं चित्रकेतुं सदुक्तिभिः प्रकृतिपुरुषेश्वरयाथात्म्यवेदिनीभिरुक्तिभिर्बोधयन्तौ विवेकमुत्पादयन्तावूचतुः ॥ १ ॥

सदुक्तिभिर्बोधनप्रकारमेवाह—क इत्यादिना, वस्तुनि कल्पित इत्यन्तेन । तावज्जीवानां परस्परं निरुपाधिकसम्बन्धाभावादौपाधिकसम्बन्धप्रयुक्तशोकमोहभयादेर्निमित्तसम्बन्धस्यैव निवृत्तेर्न शोकहेतुरस्तीत्यूचतुः—कोऽयमिति—हे राजेन्द्र, यं प्रति भवाननुशोचति सोऽयं प्रवाहरूपायां सृष्टौ पुरा भूतकाले इदानीं वर्तमानकाले इतःपरं भविष्यत्काले वा तव कः स्यात् त्वमप्यस्य शोच्यमानस्य कतमः ? यदि जीवात्मानं प्रति शोचसि तर्हि शोच्यस्य जीवस्य तव च कस्सम्बन्धः ? कालत्रयेपि नानेन तव सम्बन्ध इत्यर्थः ॥ २ ॥

देहद्वारकपितृपुत्रसम्बन्धेनानुशोचामीत्यत्रोचतुः—यथेति । स्रोतोवेगेन प्रवाहवेगेन यथा वालुकाः सिकताः कदाचित्संयान्ति संयुक्ता भवन्ति कदाचिच्च प्रयान्ति विप्रयुक्ताश्च भवन्ति तथा कालेन निमित्तेन देहिनोऽप्यन्यैर्देहिभिः सह संयुज्यन्ते वियुज्यते च देहिनां परस्परं कालकर्मायत्तदेहद्वारकसम्बन्धस्यौपाधिकत्वादुपाधिविलये तत्प्रयुक्तसम्बन्धस्यापि विलयाद्विलीनसम्बन्धप्रयुक्तः शोको न कार्य इति भावः ॥ ३ ॥

ननु, पितृपुत्रत्वादि सम्बन्धो न केवलमात्मगतः नापि देहमात्रगतः अपि तु विशिष्टगतः अतो विशिष्टं प्रत्येवाहं विशिष्टरूपः शोचामीति चेत्तत्रापि न शोकः कार्य इत्याहतुः—यथेति । यथा धानासु बीजेषु जातिगुणादिविशेषणविशिष्टेषु तादृशधाना बीजान्तराणि ईश्वरसङ्कल्पेन भवन्त्युत्पद्यन्ते अपादानस्यैवाधिकरणात्वविवक्षया सप्तमी न भवन्ति नश्यन्ति च तथा भूतेभ्यः भूतान्तराणीश्वरमाययोत्पद्यन्ते नश्यन्ति च । अप्राणिभ्योऽप्राणिनामिव प्राणिभ्यः प्राणिनामप्युत्पत्तेरीश्वरसङ्कल्पायत्तत्वात्तद्वत्प्राणिनिरपीश्वरमायाधीनमवगन्तव्यमङ्कुरस्तृणादिव स्थेयं न तु शोकः कार्यः किञ्च विशिष्टे विशेष्यांशस्य जीवस्य नित्यत्वाच्च न शोकः कार्य इति भावः ॥ ४ ॥

ननु, गच्छतु विशेष्यांशो जीवः साक्षात्सम्बन्धापादकमवस्थितं देहं प्रत्यनुशोचामीत्यत्राहतुः वयञ्चेति । वयं त्वं चान्ये इमे चराचराश्च सर्वे तुल्यकालाः वर्तमानकालीना यथा जन्ममृत्योः प्राक्पश्चाच्च न सन्ति जन्मनः प्राक् नासन्मृत्योः पश्चाच्च भविष्यन्ति भो राजन्, अधुनाऽयमप्येवमेवमास्ति विशरणात्मत्वमिमं देहमप्यसन्तं पश्येत्यर्थः ॥ ५ ॥

यदीशमायया भूतेभ्यो भूतानि भवन्ति न भवन्ति तर्हि तस्य स्वातन्त्र्यरूपमीश्वरत्वमेव न स्यात्तज्जीवविशेषापेक्षया सुखदुःखप्रदत्वेन वैषम्यनैर्घृण्यप्रसक्तात्तयोश्च कर्मवश्यजीवधर्मत्वाज्जीववत्कर्मवश्यत्वप्रसङ्गादित्यत्रोचतुः—भूतैरिति । भूतेशः समष्टिव्यष्ट्यात्मनावस्थितानां सर्वेषां भूतानामीशः अन्तःप्रविश्य तत्तज्जीवकर्मानुसारेण प्रशास्ता आत्मना स्वेन सृष्टैरत एवास्वतन्त्रैः सृजतीत्यनेन तस्य सृष्ट्यन्तरविलक्षणत्वं, सर्वार्थशक्तियुक्तत्वम्, अज इत्यनेन कर्मफलानुभवाय तदायत्तोत्पत्त्यादिराहित्योक्त्याऽवाप्तसमस्तकामत्वमप्युक्तं भवति । नन्वेवंभूतः सृजन्नपि जगत्सृष्ट्यादेः केनचित्प्रयोजनेन भवितव्यं निष्प्रयोजनस्य प्रवृत्त्यसम्भवात् तत्र बुद्धिपूर्वकारिणामारम्भे हि द्विविधं प्रयोजनं स्वार्थः परार्थो वा ? न हि परस्य ब्रह्मणः स्वप्रयोजनं स्वार्थः परार्थो वा ? न हि परस्य ब्रह्मणः स्वभावत एवावाप्तसमस्तकामस्य जगत्सर्गेण किञ्चन प्रयोजनमवाप्तमवाप्यते, नापि परार्थः । अवाप्तसमस्तकामस्य परार्थता हि परानुग्रहेण भवति नचेदृशगर्भजन्मजरामरणनरकादिनानाविधानन्तदुःखबहुलं जगत्करुणावान् सृजतीत्याशङ्कमानं प्रत्याहतुः—निरपेक्षोऽपि बालवदिति । प्रयोजननिरपेक्षोऽपि बालवत्सृजतीत्यर्थः दृष्टान्तस्वारस्येन जगत्सृष्ट्यादेस्तल्लीलैकप्रयोजनत्वमुक्तं निरपेक्षोपीत्यनेन लीलाव्यतिरिक्तप्रयोजनान्तरनिरपेक्षत्वमुक्तम् अतोऽवाप्तकामत्वभङ्गः नापि प्रवृत्त्यसम्भवः केवललीलैकप्रयोजनानां कन्दुकाद्यारम्भाणां बालमहाराजादिषु दर्शनात् नन्वेवमपीश्वरस्य देवतिर्यङ्मनुष्यस्थावरात्मनोत्कृष्टमध्यमापकृष्टसृष्ट्या पक्षपातः प्रसज्येत अतिघोरदुःखयोगकरणान्नैर्घृण्यं चावर्जनीयमिति शङ्कमानं प्रत्युक्तं भूतैश इति. अयं भावः एवं सृष्टेपि न वैषम्यादिदोषप्रसक्तिः सर्वभूतानां तत्तत्कर्मानुसारेण नियन्तृत्वात्तद्विषमसृष्टेः सुखदुःखादेश्च देवादिकर्मकर्मसापेक्षत्वादिति भावः तथा च श्रुतिः "साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन कर्मणा" इति तथाचोक्तं भगवता पराशरेणापि देवादिवै-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विश्लेषे हेतुः सृज्यानां क्षेत्रज्ञानां प्राचीनकर्मशक्तिरेवेति—

"निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि ।
प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥
निमित्तमात्रमुक्त्वैव नान्यत्किञ्चिदपेक्षते ।
नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तुवस्तुताम्" इति ॥

स्वशक्त्या स्वकर्मणैव वस्तु क्षेत्रज्ञवस्तु वस्तुतां देवादिवस्तुतां प्राप्यत इत्यर्थः ॥ ६ ॥

किञ्च देहस्य जन्ममरणादिस्वभावत्वादपुरुषार्थस्वरूपत्वादात्मनस्तु तद्विपरीतस्वभावत्वाच्च न देहसम्बन्धप्रयुक्तशोकः कार्य इत्याहतुः—देहिन इति । हे राजन् ! देहिनो जीवस्य देहः देहेन पितृशरीरेण देहान्मातृशरीरादभिजायते यथा बीजादेव भूमौ निहिताद्बीजान्तरं जायते तद्वत् 'दिह उपचये' इति धातुपाठादुपचयार्थकाद्दिहधातोर्निष्पन्नो देहशब्द उपचयापचयादिषड्भावविकारवद्वाचकः प्रयुक्तः तस्य तत्स्वाभाव्यसूचनाय एवं चाग्नेरौष्ण्यं प्रतीव जलस्य शैत्यमिव देहस्य मृतिं प्रति शोको मुधेति भावः आत्मनो देहविपरीताकारत्वमुक्तं देह्यर्थ इव शाश्वत इति देही जीवः शाश्वतः नित्यः सततैकरूपश्चात एवार्थः पुरुषार्थरूपः आनन्दरूपः आनन्दो हि पुरुषार्थः । इति शब्द एवकारार्थः निपातानामनेकार्थत्वात् पुरुषार्थरूप एवेत्यर्थः नित्यत्वसततैकरूपत्वानन्दरूपत्वादिस्वभावात्मानुदर्शनं विहाय तद्विपरीतं देहं प्रत्यनुशोको व्यर्थ इति भावः ॥ ७ ॥

देहिनो देहो जायते देहार्थः इव शाश्वत इति च नित्यसम्बन्धार्थकमत्वर्थनित्ययागेन जीवो निर्दिष्टः तत्र यद्यनन्तदुःखाकरदेहसम्बन्धो जीवस्य नित्यश्चेदपुरुषार्थनित्यसम्बन्धितोऽप्यपुरुषार्थरूपतैव स्यान्न तु पुरुषार्थरूपत्वमितिशङ्कां निराकुर्वन्नाहतुः—देहीति । पुरा योऽयमविवेकः अनादिसिद्धो देहात्मभ्रमस्वतन्त्रात्मभ्रमरूपः परमार्थकर्ममूलकत्वेन कृतो देहदेहिविभागः न स्वरूपतः अयं देहोऽयं देहीति विभागरहिते आत्मनि देवमनुष्यादिदेहं प्रति सम्बन्ध्यमानतया तदात्मप्रतिसम्बन्ध्यं देह इति विभागः केवलदेहात्मादिभ्रममूलकः सञ्जात इत्यर्थः यथाऽवस्तुनि रजतत्वजात्याश्रयरजतव्यक्तिभिन्ने शुक्त्यादिवस्तुनि इदं रजतमिति रजतत्वतदाश्रयव्यक्त्योर्विभागः परमार्थसादृश्यादिदोषमूलकेन भ्रमेण कल्पितस्तद्वत् यद्यपि दृष्टान्ते रजतत्वतदाश्रयरूपजातिव्यक्त्युभयभिन्ने शुक्त्यादौ जातिव्यक्तिविभागः कल्पितः स च विभागः प्रतीतिमात्रविषयः न तु प्रमितिविषयः अत एव नेदं रजतमिति तत्र बाधप्रवृत्तिः दार्ष्टान्तिके तु देहं प्रत्याश्रयभूत एवात्मरूपे वस्तुनि देहदेहिविभागः स च प्रमितिविषयश्च अत एव हि तत्र नायं देहः नायं देहीति पाश्चात्यबाधितादर्शनं चेति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं तथाप्युभयत्र जातिव्यक्तिविभागदेहदेहिविभागयोर्भ्रममूलकत्वस्य भ्रमकारणयोः सादृश्यकर्मणोः पारमार्थिकत्वस्य च साम्याद्दृष्टान्तदार्ष्टान्तिकभाव उपपन्नः न हि दृष्टान्तदार्ष्टान्तिकभावे सर्वसाधर्म्यमपेक्षितम् अन्यथा तयोस्तादात्म्यापत्त्या दृष्टान्तदार्ष्टान्तिकभावस्यैव कार्त्स्न्यसङ्कुचितत्वापत्तेः अविवेककृत इत्यनेनाविवेकं प्रति निमित्तभूते पुण्यपापात्मके कर्मणि परमात्मोपासनेन निःशेषं निरस्ते सति तन्निमित्तदेहात्मभ्रमादेरपि निवृत्तावपुरुषार्थसम्बन्ध्यात्मस्वरूपमनुभूतं भवतीति सूचितं यथा दृष्टान्ते सादृश्यस्य दोषत्वनिश्चयेन निवृत्ते भ्रमे जातिव्यक्तिविभागानर्हशुक्त्यादियाथात्म्यमनुभूतं भवति तद्वत् देहीति इति प्रत्ययो न प्रत्ययोगेऽपि तु सम्बन्धमात्र इति भावः ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र संसारो नित्यस्तनुच्छेदो ज्ञानेनैव तदपि निरंतरोपासितश्रीनारायणानुग्रहादुत्पद्यत इति एतत्सर्वं निरूप्यतेऽस्मिन्नध्याये तत्राङ्गिरोनारदावागत्य किं चक्रतुरित्याशङ्कायामाह श्रीशुक इति । मृतकोपान्ते शवसमीपे ॥ १ ॥

यमनु शोचति अयं तव कः स्यात्कीदृशो बन्धुः स्यादिदानीं पुत्र इति भ्रान्तिश्चेत्तर्हि विरिञ्चिसृष्टौ पुराऽतीतकाले त्वमस्य बन्धूनां मध्ये कतमो बन्धुः पिता मातुलो वा सहोदरो वा अतः परं एष्यति काले च कतमो बन्धुरिति शेषः अयञ्च पूर्वापरकालयोस्तव कतम इति योज्यं यथा पूर्वोत्तरकाले युवयोर्न कोऽपि सम्बन्धस्तथेदानीमपि भ्रान्तिमन्तरेणोऽस्त्यतः शोको न कार्य इति भावः ॥ २ ॥

ननु, तर्हीदं सर्वं मायाकल्पितमस्त्विति तत्राह—यथेति । यथा वालुकाः सिकताः स्रोतोवेगेन नदीप्रवाहवेगेन प्रयान्ति संयान्त्येकत्र संयुज्य राशीभवन्ति तथा 'कल शाने' इति धातोः कालेन ज्ञानमूर्तिना देहिनः संयुज्यन्ते सम्बद्ध्यन्ते 'कल प्रापणे' इति धातोः कालेन संहारमूर्तिना वियुज्यन्ते ॥ ३ ॥

ननु, त्यक्तदेहाः पुनर्देहान्तरमाप्नुवन्ति उत शून्यतां आहोस्विदनिवृत्तिलक्षणामवस्थामिति तत्राह—यथेति । धानासु बीजेषु अङ्कुरादिसमृद्ध्या परिपक्वेषु सत्सु ततो धानान्तराणि बीजानि कश्चित् भवन्ति कश्चित् प्रतिबन्धान्न भवन्ति यथा, तथाभूतेष्वपि, ईशमायया नारायणेच्छया चोदितानि प्रेरितानि पुनर्देहसम्बन्धयोग्यतयोत्पद्यन्ते । कश्चिद्भर्जनादिवत्पुण्यकर्मप्रतिबन्धानि बीजानि अङ्कुरादिकार्यं न जनयन्ति यथा, तथा ज्ञानाग्निभर्जितसंसारबीजानि भूतानि पुनरावृत्तिशून्यावस्थां मुक्तिलक्षणामाप्तानि नोत्पद्यन्त इतीमं विशेषं वा इत्यनेन दर्शयति ॥ ४ ॥

इतोऽपि पुत्राद्यात्मना सम्बन्धः एवमित्याह—वयमिति अस्मिन् सखा एव तुल्यकालत्वम् अन्ययोः वयसोः यथा नास्ति । देहनाशात् । तथा प्रकृतेरपीति भावः । ननु, देहनाशनाशाभ्यां सदा तुल्यकालत्वाभावश्चेत्तर्हि सर्वदा तुल्यकालत्वं करोतीति तत्राह - जन्ममृत्योरिति । जन्ममृत्योः पूर्वापरकालयोर्यथा सृष्ट्यादिकं करोति तथाऽधुनाप्येवमेवेति, अनेन ईरितेन देहेन सदातनत्वमुपपादितम् अस्य चैतन्यसद्भावस्तथापि देहस्य नास्तीति विशेष इत्यभिप्रायः "देहस्य सर्वथा नाशाद्गुणात्मकत्वात्तनस्य तु" इति स्मृतेः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

केनोद्धृतैर्भूतैरिति तत्राह—आत्मेति । भूतानि स्वयमेव सृजन्तीति किं न स्यादिति तत्राह - अस्वतन्त्रैरिति. न चार्थार्थी सृजत्ययम् अनपेक्ष इति. अथास्मात्सर्जनात्प्रयोजनापेक्षा न स्यात्कथं तर्हीदं सर्जनं प्रयोजनमन्तरेण प्रवृत्त्यदर्शनादित्यत्राह—बालवदिति. यथा बालः क्रीडनं क्रीडति तथा "लोकवत्तु लीला कैवल्यम्" इति सूत्रात् ॥ ६ ॥

भूतैरुपकरणैरीश्वरः कथं सृजतीत्यतस्तं प्रकारं दर्शयति—देहेनेति । पितुर्देहेन संयुक्तान्मातुर्देहाद्देहिन उत्पद्यमानस्य पुत्रलक्षणजीवस्य देहोऽभिजायते न तु चेतनः तस्य नित्यत्वात्. 'दिह उपचये' इति धातोः देहशब्दोपलक्षितपूर्वकर्मणा फलदानायेश्वरप्रेरितेन देहिनः पितृमातृशब्दवाच्यस्य देहादुपादानभूताद्देहः पुत्रस्येति शेष इति वा अभीत्युपसर्गेणानेकमुखपरम्परासृष्टिमुपलक्षयति अत्र दृष्टान्तमाह—बीजादिति, बीजात्पनसादिलक्षणाज्जलतेजआदिसाधनसामग्रीसंभृतादङ्कुराख्यं वृक्षजीवशरीरं तेन सह जायते तस्माद्युक्तजलाद्यात्तसारात्पनसादेर्बीजान्तरमुत्पद्यते तस्माच्चेति यथा कार्यपरम्परा नचैवमनवस्था मूलकार्यस्य प्रकृत्यात्मकत्वात् तथा पितृमातृविकारशुक्रशोणितसम्बन्धात्कलिलादिलक्षणं कार्यमभिमानि जीवेन सह जायते तस्मात्परिणतावयवात्स्त्रीपुरुषभूतात्तेन आदिक्रमेण कार्यान्तरं जायत इत्यनेन क्रमेण भगवान् भूतैः सृष्टिं करोतीति स्थितिसंहारयोरप्यूह्यं तद्दृष्टेश्वरेच्छावशादिति प्राह "अथातो रेतसस्सृष्टिः" इति श्रुतेः तस्मात्सर्वाणि कार्याणि कानि चिदाहत्यात्मना नारायणायनानि कानिचित्परम्परया तदधीनानि तत्रापि विशेषस्तु प्रमाणादवगन्तव्यः तदुक्तञ्च—

"नारायणायना देवा ऋष्याद्यास्तत्परायणाः ।
ब्रह्माद्याः केचनैवं स्युः सिद्धो योग्यं सुखं लभेत्" ॥

अत्रापि कियन्त इतीयमाशङ्का च ।

"नव कोट्यस्तु देवानामृषीणां शतकोटयः ॥
नारायणायनाः सर्वे येकेचित्तत्परायणाः" इति ॥

एतद्वाक्यद्वयं सर्वस्य नारायणाश्रयेण वक्तव्यत्वात् "मुक्तानामपि सिद्धानां नारायणपरायणः" (१) इत्यादौ नोदाहृतं उभयत्रापीदमेव प्रमाणमिति सन्तोष्टव्यं । ननु, देहनाशवद्देहिनाशे पुरुषार्थानुपपत्तिरत्राह—देहीति, देहदेहिनोर्मध्ये देही शाश्वतः अभिमानमन्तरेण जन्मनाशरहितस्तथा कालत्रयेप्येकप्रकारः कथमिव अर्थ इव मोक्षलक्षणपुरुषार्थ इव शब्दार्थ इव वा तर्हि ब्रह्मसाम्यमायातमित्यस्याप्येतदेवोत्तरं देहार्थः जीवाख्यः पदार्थः शाश्वत इव नित्य इव "द्रव्यं कर्म च कालश्च" इत्यादेः जीवनित्यत्वस्य श्रीनारायणाधीनत्वेनोपचरितत्वाद्ब्रह्मणेरेव निरुपचरितनित्यत्वमतस्तयोर्न साम्यमित्यर्थः केचिदेवं व्याचक्षते अर्थः नरत्वादिजातिमात्रमिव यथा जातेर्नित्यत्वं तथा जीवस्यापीत्येतच्चिन्त्यं "कुतो भस्मत्वमासस्य नरत्वं पुनरिष्यते" इति वचनात् तत्तन्नरत्वादेस्तत्तन्नाशेन नाशसम्भवान्नित्यत्वानुपपत्तेः ॥ ७ ॥

कृशोऽहं स्थूलोऽहमित्यभेदानुभवाद्देहिनो नित्यत्वं देहस्यानित्यत्वमित्ययं विशेषः कथं घटत इति तत्राह—देहेति । अविवेककृतोऽज्ञाननिर्मितः नचायमाधुनिकः शुक्तिरजतवदित्यत उक्तं पुरेति पुरा पुरातनः अनादिमानित्यर्थः अनेन ज्ञानेनाज्ञाने नष्टे उक्तविशेषो घटत इत्युक्तं भवति अत्र दृष्टान्तमाह—जातीति, यथा गवादिवस्तुनि गोत्वगवादिपिण्डानां विभागो भेदः कणादादीनामज्ञानेन कल्पितः न तु वास्तवः अज्ञानकृतत्वमात्रे दृष्टान्तोयं तस्माज्जात्यभेदत्वे अप्रयोजकं इति कणादादीनामपि तमोयोग्यत्वप्रकटनाय तन्मतोदाहरणं वस्तुनि हरौ गोपालत्वादिजातिव्यक्तिविभागो यथा कल्पितः आरोपितस्तथेति वा ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

शुद्धात्मनो वस्तुतो देहित्वं नास्ति ततो नच तस्य देह इत्येवम् । तत्र दृष्टान्तः यथा न वस्तुनि सर्वकारणे परमात्मनि जातिव्यक्तिविभाग इति ॥ १—९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथ पञ्चदशे भूपमुद्धर्तुं मुनिद्वयम् ।
शोकान्मन्त्रमनूपदेष्टुं नारदः किञ्चिदब्रवीत् ॥ १ ॥

अयं तव को भवेत् पुत्र इति चेत् सत्यं त्वमस्य जनकः पितेति चेत् तत्राह, पुरा पूर्वे पूर्वजन्मनि किंवा इदानीं किंवा अतःपरं भाविनि जन्मनीत्यर्थः ये पूर्वजन्मनि पुत्रादिरूपेण संयुक्ता आसन् त एव मरणे तेन वियुक्ताः सन्तः वर्त्तमानजन्मनि कदाचित् तस्यैवान्यस्य वा पुत्रादयो भवन्ति ते जन्मान्तरे तस्यैवान्यस्य वा कलत्रादयः शत्रुमित्रादयो वा भवन्तीति भावः ॥ २ ॥

तमेवार्थं प्रकटयति—यथेति । स्रोतसः प्रवाहस्य वेगेन वालुका यथा प्रयान्ति वियुज्यन्ते संयान्ति संयुज्यन्ते तथा कालवेगेन देहिनो जीवा अपि ॥ ३ ॥

नन्वहमस्य पिता वा पुत्रो वा एतस्मिन् जन्मनि अन्यस्मिन् जन्मनि भवामि न भवामि वेत्यादि जिज्ञासया सम्प्रत्यलमेव किन्त्वस्य परमप्रेमास्पदस्य विच्छेददुःखमहं केनापराधेनानुभवामि तद्ब्रूतामिति चेत्तत्र कोऽप्यपराधः किन्त्वत्र काल एव कारणमित्याहतुः यथेति, तदप्येतावन्तं कालं मम पुत्रोऽभूत् बालके जातो मृत इति महद्दुःखमिति चेत्तत्राहतुः धानासु यवेषु धाना यवान्तराणि भवन्ति कदाचिन्न भवन्ति नश्यन्ति च एवम्भूतानि पुत्रादीनि भूतेषु पित्रादिषु । अतो धानानां जन्य जनकत्वेऽपि यथा पितृपुत्रादिभावो नास्ति एवमत्रापि न शोकः कार्य्य इति भावः 'धाना भ्रष्टयवे स्त्रियः' इत्यभिधानात् । श्लेषेण यथा धानासु भ्रष्टयवेषु धाना न भवन्ति, एवम्भूतेषु ईश्वरेषु भवद्विधेषु अपत्यजनकाहङ्काररहितेषु भूतानि अपत्यानि न भवन्ति किन्तु हे ईश !

(१) एतत्स्कन्धीयचतुर्दशाध्यायस्य पञ्चमश्लोकोयम् ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

राजन् ! मायया प्रेरितानि भवन्ति चेत्यहमङ्गिरा एव त्वत्प्रबोधार्थं मायया त्वत्पुत्रोऽभूवमिति भावः ॥ ४ ॥

शोचनीयश्चेत् न केवलं मृतः पुत्र एव अपि तु दारामात्यस्वजनादयः सर्वे वर्त्तमाना अपि शोच्या एवेत्याहतुः—वयञ्चेति । तुल्यकाला एककालस्थिता जन्मनः प्राक् मृत्योः पश्चाच्च यथा न सन्ति एवमधुनापि न सन्ति न ह्यत्रैककालिकं वस्तु वास्तवमुच्यते नश्वरवास्तवं वस्तु भव्यैर्गणनायामुपादीयते इत्यतस्तत् सत्यमप्यसत्यायमानमेवेति भावः ॥ ५ ॥

नच मयायं पुत्रो जनितः केनाप्यलक्षितेन कारणेनायं नाशित इति स्वस्मिन् जनकत्वलक्षणो गुणः परस्मिंस्तु नाशकत्वलक्षणो दोषप्रसञ्जनीय इत्याहतुः । भूतैः पित्रादिभिः सृजति—राजादिभिरवति, सर्पादिभिर्हन्ति आत्मसृष्टैरिति पित्रादीनामीश्वरसृष्टत्वादीश्वराधीनत्वाच्चेत्यर्थः । ननु, पूर्णकामस्येश्वरस्य किं सृष्ट्यादिभिस्तत्राह—अनपेक्षोऽपि बालवल्लीलया करोतीति ॥ ६ ॥

सत्यमुक्तमीश्वरसृष्टेन पित्रा मया जनितः पुत्रोऽयं मृत इत्यतः शोचामीति तत्राहतुः—देहेन पितुर्देहेन देहिनः पुत्रस्य देहो मातुर्देहादभिजायते यथा बीजादेव बीजं जायते अतस्त्वया जनितस्य पुत्रदेहस्य तथात्र एव वर्त्तमानत्वात् त्वं कथमधुना शोचसीति भावः । नन्वत्र संप्रति देहि जीवात्मा नास्तीति शोचामीति तत्राहतुः, देही जीवोनाम अर्थस्तु शाश्वत एव न स त्वया जनित इति तेन सह न कोपि ते सम्बन्धोऽस्तीति भावः ॥ ७ ॥

ननु, नश्वरदेहप्रतियोगित्वात् देह्यपि न शाश्वतः स्यात्तत्राहतुः । देहदेहिनोरयं परस्पर प्रतियोगि विभागः पुरा अनादिः अविवेककृतः अज्ञानकल्पितः जातिः सामान्यं व्यक्तिर्विशेषः तयोर्विभागो यथा वस्तुनि सन्मात्रे कल्पितः परस्परापेक्षसिद्धित्वेनानिरूप्यत्वात् ॥ ८ ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीनारदाङ्गिरोभ्यां यथोपदेशो राजानं प्रतिकृतस्तथोच्यते—ऊचतुरिति पञ्चदशेन ॥ १ ॥

भवान् यमनुशोचति सोयम् पुरा सृष्टौ पूर्वजन्मनि इदानीं वर्त्तमाने जन्मनि अतःपरं भविष्ये जन्मनि च तव कः स्यात्त्वञ्चास्य कतमः नायं तव कोपि न त्वं चास्य कतमो पीत्यर्थः पितृपुत्रादिसम्बन्धस्यानियतत्वादस्थिरत्वाच्च ॥ २ ॥

यथा स्रोतसः प्रवाहस्य वेगेन बालुकाः पृथगस्मिन् वियुज्यन्ते ते संयान्ति संयुज्यन्ते तथा देहिनः पितृपुत्रादयः कालेन कर्मफलदभगवच्छक्तिभूतकालवेगेन वियुज्यन्ते संयुज्यन्ते च ॥ ३ ॥

धानासूपादानभूतेष्वन्नबीजेषु यथा तत्तज्जातिगुणादियुक्ता धाना अन्नानि भवन्ति च तथेशस्य मायया वयुनेन सङ्कल्पेन तत्तज्जीवकर्मानुसारिणा भवेय पित्रादिष भवान्यपत्यानि भवन्ति न भवन्ति च पितृपुत्रादिसम्बन्धो नित्यो नास्त्यतो मम पुत्रो मृत इति शोकोऽनुक्त इति भावः ॥ ४ ॥

किञ्च सर्वभूतेषु शरीरस्यानित्यत्वेपि प्रकृतिरूपेणानित्यत्वं जीवस्य तु सर्वथा नित्यत्वमेवेति वस्तुनाशाभावाच्छोकोऽनुक्त इत्याहतुः वयं च त्वं चेमे तुल्यकालाश्चराचराः सर्वे यथा अधुना सद्रूपाः भवन्ति एवं जन्मनः प्राक् नासन् अपि तु आसन्नेव मृत्योः पश्चाच्च भविष्यन्त्यपि तु भविष्यन्त्येवेत्यन्वयः "सदेव सौम्येदमग्र आसीत्"।

> नत्वेवाहं जातु नासं न त्वं मेने जनाधिपाः ।
> नचैव न भविष्यामः सर्वे वयमतः परम्" ॥

इत्यादि श्रुतिस्मृतयोप्यत्रानुसन्धेयाः ॥ ५ ॥

पाञ्चभौतिकेभ्यो भूतेभ्यो चराचरेभ्यो भूतानि चराचराणि भगवान् सृजति अवति हन्ति च बालवत् निरहङ्कारः ॥ ६ ॥

देहिनः पुत्रदेहगतस्य जीवस्य देहेन पितृदेहेन देहान्मातृदेहात् देह एव जायते देही जीवस्तु शाश्वतो ध्रुवः अर्थ इव सर्वशास्त्रार्थभूतपरमात्मैव ॥ ७ ॥

नन्वेवं भूतो देहिदेहविभागबोधः "तरति शोकमात्मवित्" इत्यादि श्रुतिप्रामाण्यात् शोकसागरनिस्तारको मम कुतो न प्रागासीदित्राहतुः—पुरा उपदेशाभावात् देहिदेहविभागबोधात् पूर्वमयं देहिदेहविभागः अविवेकेनाऽबोधेन कृतः छिन्नः 'कृतिश्छेदने' यथा वस्तुनि पदार्थे मनुष्यादौ कल्पितः प्रजापतिना रचितः सत्योरपि जातिव्यक्तः मनुष्यत्वतदाश्रयव्यक्त्योर्विभागोयं पुरा मनुष्यत्वतदाश्रयव्यक्त्योर्बोधात्पूर्वं अविवेकेनाबोधेन छिन्नो भवति तद्वदित्यर्थः ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणो जयति ॥

श्री शुकउवाच ॥

अंगिरा और नारद यह दोनों ऋषि शोक से व्याप्त और उस मृतक बालक के समीप पड़े हुये राजा को श्रेष्ठ वाणी से बोध कराने लगे ॥ १ ॥

हे राजेन्द्र ! जिसका तुम शोच करते हो इस सृष्टि में यह पूर्व में तथा इस समय में और इस से आगे तुमारा कौन होता है, और तुम इसके कौन होते हो ॥ २ ॥

जैसे प्रवाह के वेग से बालू मिलती है और अलग होजाती है, उसी प्रकार काल के वेग से जीव भी संयोग और वियोग को प्राप्त हुआ करते हैं ॥ ३ ॥

जैसे अन्नादिक बीज से बीज होताहै किसी समय नहीं भी होता, ऐसे ही ईश्वर की माया से प्रेरित प्राणियों के पुत्रादि रूप प्राणी होते है, कभी नहीं भी होते ॥ ४ ॥

इस समय और वर्त्तमान समय में जो चराचर प्राणि हैं

श्रीशुक उवाच ।

एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः ।
प्रमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ॥ ९ ॥

राजोवाच ।

कौ युवां ज्ञानसम्पन्नौ महिष्ठौ च महीयसाम् ।
अवधूतेन वेषेण गूढाविह समागतौ ॥ १० ॥
चरन्ति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः ।
मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिङ्गिनः ॥ ११ ॥
कुमारो नारद ऋभुरङ्गिरा देवलोऽसितः ।
अपान्तरतमो व्यासो मार्कण्डेयोऽथ गौतमः ॥ १२ ॥
वसिष्ठो भगवान् रामः कपिलो बादरायणिः ।
दुर्वासा याज्ञवल्क्यश्च जातूकर्ण्यस्तथाऽरुणिः ॥ १३ ॥
रोमशश्च्यवनो दत्त आसुरिः स पतञ्जलिः ।
ऋषिर्वेदशिरा बोध्यो मुनिः पञ्चशिरास्तथा ॥ १४ ॥
हिरण्यनाभः कौसल्यः श्रुतदेव ऋतध्वजः ।
एते परे च सिद्धेशाश्चरन्ति ज्ञानहेतवः ॥ १५ ॥
तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू ।
अन्धे तमसि मग्नस्य ज्ञानदीप उदीर्यताम् ॥ १६ ॥

भाषा टीका ।

ये जन्म और मरण के पहिले और पीछे जैसे न रहे इस समय में भी वैसेही जानों ॥ ५ ॥

ईश्वर निरपेक्ष भी होकर बालक के तरह अपनें सृजे हुये अस्वतंत्र प्राणियों के द्वारा प्राणियों को सृजता है पालन करता है और संहार करता है ॥ ६ ॥

हे राजन्! देही (पिता) के देह से माता के देह में यह पुत्र का देह उत्पन्न होता है, जैसे बीज से बीज उत्पन्न होता है। तिसमें भी देही (जीव) तो शाश्वत (नित्य) है ॥ ७ ॥

यह देह है और यह देही है इस प्रकार का विभाग (भेद) प्रथम अविवेक से है जैसे घट पटादि वस्तुओं में जाति व्यक्ति का विभाग कल्पित है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आधिम्लानं वक्त्रम् ॥ ९ ॥ १० ॥

उन्मत्तस्येव लिङ्गं येषां ते ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

मम प्रभू रक्षकौ बोधे समर्थाविति वा अतो युवाभ्यां ज्ञानदीपः प्रवर्त्यताम् ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमृषिभ्यां बोधितश्चित्रकेतुर्ज्ञातविवेकः स्तावुवाचेत्याह मुनिः। एवमिति । द्विजयोरङ्गिरोनारदयोरुक्तिभिरेवमाश्वासितः परिसान्त्वितो राजा चित्रकेतुराधिना पुत्रशोकेन म्लानं ग्लानं वक्त्रं पाणिना प्रमृज्य विशोकतामापन्नोवाच ॥ ९ ॥

तदेवाह—कौ इत्यादिना, ज्ञानदीप उदीर्यतामित्यन्तेन । तावद्दृष्टपूर्ववेषौ तौ युवां कौ इति पृच्छति—काविति, ज्ञानसम्पन्नौ अत एव पूज्यानामपि पूज्यौ युवां तावत्कौ ? पश्यन्नपि किं पृच्छसीत्यत्राह-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अवधूतेन क्षुद्रेण वेषेण गूढौ तिरोधापितस्वरूपौ इह समागतौ युवामन्यथा क्षुद्रस्यैतादृशज्ञानसम्पत्तिर्दुर्लभेति भावः ॥१०॥

"विष्णोर्भूतानि लोकानां मङ्गलाय चरन्ति हि" इत्युक्तरीत्या लोकानुग्रहार्थमेवमेवावधूतवेषा ज्ञानिनश्चरन्तीत्याह — चरन्तीति । ब्राह्मणा भगवद्भक्ता उन्मत्तस्येव लिङ्गं येषां तादृशाः सन्तो ग्राम्यबुद्धीनां विषयासक्तानां संसारिणां मादृशानां बोधाय ज्ञानोत्पादनायावनौ भूमौ कामं यथेच्छं चरन्ति हि यस्माद्भगवत्प्रिया उन्मत्तलिङ्गेन एव मादृशां बोधाय चरन्त्यतो युवां कौ इति वान्वयः ॥११॥

ब्राह्मणान् भगवत्प्रियानुन्मत्तलिङ्गेन चरत एव दर्शयति—कुमार इति चतुर्भिः । कुमारः सनत्कुमारः ॥ १२ ॥

रामो भार्गवः ॥ १३ ॥

दत्तो दत्तात्रेयः स प्रसिद्धः पतञ्जलिर्महामुनिर्भरद्वाजः मुनिरुच्यथ्यः वेदशिरोबध्य इत्यत्र सन्धिरार्षः वेदशिरो बौध्य इति पाठे बोधस्य गोत्रापत्यं बौध्यः आङ्गिरसः "कपिबोधादाङ्गिरसे" इति यञ् ॥ १४ ॥

एते कुमारादयः तथा ऽपरे च ज्ञानमेव सम्पदेषां ते सिद्धेशाश्चरन्ति ॥ १५ ॥

युवां यौ कौचिद्वा भवेतं तावद्यस्माद्युवां प्रभू मादृशस्य बोधोत्पादने दक्षौ तस्माद्युवाभ्यां मम ज्ञानमेव दीपः स उदीर्यतां दीयतामित्यर्थः कथम्भूतः अन्धे तमस्यज्ञानरूपे मग्नस्यात एव मूर्खधियः अत एव ग्राम्यपशोः ग्रामे भवो ग्राम्यो नरः स एव पशुस्तस्य ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देहदेहिविभागप्रतीतेरनुभवात्कथं नानात्वादिप्रतीतिर्भ्रान्तिरित्यत आह—नानात्वमिति । अनद्धर्माः यो जीवस्तस्माद्भिन्नस्य देहस्य धर्माः सुरो नरो हमित्यादिनानात्वादयो द्रष्टुर्जीवस्य विद्यमाना इति भ्रान्तिः क्रियाफलमिति हेतुगर्भविशेषणं कर्मफलत्वात् अग्निना दाह्यस्येन्धनस्य विक्रियाः वृद्धिक्षयादिविकारा अग्नेरिति भ्रान्तिः भ्रान्तेरिन्धनसमृद्धौ समृद्धोऽग्निस्तद्ध्रासे क्षीण इत्यादयो द्रष्टुर्ज्ञानिनो हरेरतद्धर्मा इत्येव भान्ति "नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति श्रुतेर्नेदन्दर्शनम्भ्रान्तमतो न देहिदेहभेदे प्रमाणमुक्तं भवतीति वा ॥ ९ ॥

इदमेव विवृणोति । त इम इति । ये "ये प्रत्यक्षादिप्रमाणसिद्धा जन्मनाशादयस्त इमे जीवस्य देहसंयोगादात्मनि जीवे मनसि वा भान्ति कुतोऽसदहमिदंहमित्यभिमानात् अत्रोदाहरणमाह—स्वप्न इति जाग्रद्दृष्टसर्पव्याघ्रादिसंस्कारवशात्स्वप्नेपि यथा तद्दर्शनात्सर्पं भयमित्याद्यनर्थजातं भवति तथाऽनादिकालीनामिथ्याभिमानादनर्थकरः संसारः स्यादिति यद्यस्मात्तन्निवृत्त्युपायमाह—नान्यादिति, अन्यद्दनर्थकरणं न ध्यायेदित्यन्वयः ननु, शुक्तिकाधिष्ठाने रजतं यथा प्रतीयते तथा जन्मादिकं किमधिष्ठानमित्येतां मन्दाशङ्कां वा परिहरति—त इति आत्माधिष्ठानं शुक्तिरजतवज्जन्मादिकं मिथ्याभूतं भवेदित्यतः स्वप्नपदार्थानामर्थक्रियाकारित्वाद्यथा सत्यत्वमंगीकर्तव्यं तथा जन्मादीनामित्यभिप्रेत्याह—स्वप्न इति, अन्यद्देहात्मत्वम् ॥ १० ॥

अनन्यध्यानफलं सदृष्टान्तमुपपादयति—प्रसुप्तेति । प्रकर्षेण सुप्तस्य प्रकर्षेण सुप्तेर्मरणापरपर्यायत्वात्तन्निवृत्त्यर्थं जीवतोपीति भूतप्रायस्यापि ज्ञानपूर्वं बाह्यप्रवृत्तिशून्यस्य पुरुषस्यानहम्मानाद्देहात्मत्वादिभ्रान्तिज्ञानराहित्याद्यथा घोरा संसृतिर्न भाति तद्वत्तथा विमुक्तस्य सा न भाति । कुतः ? विमुक्ताहम्भावबुद्धित्वादनेनानन्यध्यानेन कैवल्यप्राप्तिः सूचिता भवतीति ॥ ११ ॥

फलितमाह—तस्मादिति । यतोऽनहम्मानिनो घोरसंसारहानिरस्यस्य तद्भावश्च तस्मादन्यत्पुत्रादिकं मनोमात्रं मनोगतरागद्वेषजनितपुण्यपापनिमित्तम् एतदुक्तं भवति अहम्मानेन मनसो रागद्वेषौ स्यातां तयोः पुण्यपापे भवतः ताभ्यां च पुत्रादिकमुत्पद्यते "मनसो द्वेषरागाभ्यां पुण्यपापसमुद्भवः । पुत्रादिपुण्यपापाभ्यां तस्मात्सर्वंमनो भवम्" इति वचनात् अनेन पुत्रादिर्दीर्घायुष्यादिकं पुण्यपापनिमित्तं भवतीति सूचितमिति ननु, तदस्तु ततः किं प्रकृत इति तत्राह—अहीति । तद्धननोपायमाह—वासुदेव इति आत्मनि विम्बभूते देहान्तरत्वेपि तद्देहगतदुःखास्पर्शे समर्थ इति द्योतनायेश्वर इति मनोधारणयोत्पन्नतत्प्रसादोद्भूतज्ञानासिना तमोऽहम्ममताख्यं निर्मूलयेदित्यर्थः ॥१२॥

आधिना ज्ञानम् ॥ १३ ॥

अवधूतेन वेषेण धूलिरूपिताकारेण ॥ १४ ॥

उन्मत्तस्य लिङ्गमेषामस्तीति तथा ॥ १५ ॥

मार्कण्डेयगौतमयोर्मध्येऽन्यो नास्तीति द्योतनायाथशब्दः ॥१६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अवधूतेन वेषेणेति निजाच्छादनार्थं तदाकृतत्वात् ॥ १० ॥

भगवतो विशेषतो भक्तवत्सलस्य सामान्यतोपि ब्रह्मण्यदेवस्य प्रियाः ॥ ११ ॥

कुमार इति चतुष्कं । व्यासबादरायणपदीनां तदानीमनाविर्भूतानामपि गणना शास्त्रदृष्टैयत्रेति ॥ १२—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अवधूतेन वेषेणेति स्वगोपनार्थं ताभ्यां तथा कृतत्वात् ॥ १०—१७ ॥

(नानात्वजन्मनाशश्च क्षयो वृद्धिः क्रियाफलम् ।
ब्रह्मश्च भात्यतद्धर्मा यथाग्नेर्दाह्यविक्रिया: ॥ ० ॥
तद्वमेदेहसंयोगादात्मन्याभात्यसद्ग्रहात् ।
स्वप्ने यथा तथानान्यद्ध्यायेत्सर्वम्भयञ्चयत् ॥ ० ॥
प्रसुप्तस्यानहम्मानान्नाघोरा भाति संसृतिः ।
जीवतोपियथातद्वद्विमुक्तस्यानहम्मतः ॥ ० ॥
तस्मादन्यन्ममोमात्रज्ञह्यहम्ममतातमः ।
वासुदेवे भगवति मनो धेह्यात्मनीश्वरे ॥ ० ॥)

अङ्गिरा उवाच ।

अहं ते पुत्रकामस्य पुत्रदोऽस्म्यङ्गिरा नृप ! ।
एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः ॥ १७ ॥
इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे ।
अतदर्हमनुस्मृत्य महापुरुषगोचरम् ॥ १८ ॥
अनुग्रहाय भवतः प्राप्तावावामिह प्रभो ! ।
ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आश्वासितः प्रतिबोधितः आधिम्लानं वक्त्रं पाणिना प्रमृज्याभाषत ॥ ९ ॥

महिष्ठावतिमहान्तौ ॥ १० ॥

उन्मत्तवदेव लिङ्गं भाषयाचिन्हं येषां ते कामं चरेयम ॥ ११ ॥ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

मम प्रभू ज्ञानोपदेशेन संसाराद्रक्षकौ अतो युवाभ्यां ज्ञानमेव दीपः अज्ञाननाशक उद्दीर्यतामुद्दीप्यताम् ॥ १६ ॥ १७ ॥

भाषाटीका ।

श्रीशुकउवाच ॥

राजा चित्रकेतु इस प्रकार के ब्राह्मणों के वचनों से आश्वासन को प्राप्त होकर मनकी व्यथा से मलिन मुख को हाथ से पोंछ कर बोला ॥ ९ ॥

राजोवाच ॥

ज्ञान से पूर्ण और बड़ों में बड़े आप दोनों अवधूत के वेश में छिपे हुए कौन यहाँ आये हैं ॥ १० ॥

हमारे सदृश ग्राम्य बुद्धियों को ज्ञान देने के लिये उन्मत्त के चिन्ह को धारण कर भगवत्प्रिय ब्राह्मण लोग पृथिवी में विचरतेही रहते हैं ॥ ११ ॥

सनत्कुमार नारद ऋभु अंगिरा देवल असित अपान्तरतम व्यास मार्कण्डेय और गौतम ॥ १२ ॥

वसिष्ठ भगवान् परशुरामजी कपिलदेव शुकदेव जी दुर्वासा याज्ञवल्क्य जातूकर्ण्य और आरुणि ॥ १३ ॥

रोमश च्यवन दत्तात्रेय आसुरि पतंजलि और वेदशिरा ऋषि तथा पञ्चशिरा मुनि ॥ १४ ॥

हिरण्यनाभ कौशल्य श्रुतदेव ऋतुध्वज ये सब और भी बहुत से ज्ञान के हेतु (देनेवाले) सिद्धेश्वर विचरतेहैं ॥ १५ ॥

तिसी से आप दोनो समर्थ हो अज्ञान रूप अन्धकार में डूबा हुआ मूढबुद्धि ग्राम्य पशु ऐसे मुझको ज्ञान रूप दीपक का प्रकाश कीजिये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महापुरुषगोचरं हरिभक्तं त्वाम् ॥ १८ ॥ १९ ॥

* एते चत्वारःश्लोका विजयध्वजटीका अधिकतया विद्यन्ते एतेषां व्याख्याः २४४ पृष्ठे नवाधिकद्वादशाङ्कान्तं द्रष्टव्याः ।

तदैव ते परं ज्ञानं ददामि गृहमागतः।
ज्ञात्वान्याभिनिवेशं ते पुत्रमेव ददावहम् ॥ २० ॥
अधुना पुत्रिणां तापो भवतैवानुभूयते।
एवं दारा गृहा रायो विविधैश्वर्यसम्पदः ॥ २१ ॥
शब्दादयश्च विषयाश्चला राज्यविभूतयः।
मही राज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः ॥ २२ ॥
सर्वेऽपि शूरसेनेमे शोकमोहभयार्तिदाः।
गन्धर्वनगरप्रख्याः स्वप्नमायामनोरथाः ॥ २३ ॥
दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः।
कर्मभिर्ध्यायतो नानाकर्माणि मनसोऽभवन् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तदैव यदा पूर्वमागतोऽस्मि ॥ २० ॥

रायः अर्थाः ॥ २१ ॥

चला अनित्याः किञ्च महीति ॥ २२ ॥

हे शूरसेन, इमे सर्वेऽपि शोकादिप्रदाः किञ्च आगमापायित्वेन गन्धर्वनगरतुल्याः गन्धर्वनगरं ह्यकस्मादेव क्वचिद्दृश्यते अपयाति चेति प्रसिद्धं तदेवमनित्यत्वं शोकादिहेतुत्वञ्चागमापायित्वञ्चोक्तं मिथ्यात्वमप्याह—स्वप्नश्च माया च मनोरथश्च यथा, तद्वत् ॥ २३ ॥

एते मनोभवाः मनोमात्रविजृम्भिताः अत्र हेतुः अर्थेन तात्त्विकस्वरूपेण विनैव दृश्यमानाः, तत्कुतः? यस्मात्क्षणान्तरे न दृश्यन्ते तात्त्विकत्वे हि क्षणान्तरे बाधो न स्यात् अतो मनोमात्रविजृम्भितत्वेन स्वप्नादिवन्मिथ्याभूता इत्यर्थः। नन्वेते पुण्यापुण्यकृत इति मीमांसकाः प्राहुस्तत्कुतो मनोभवत्वं? तत्राह कर्मभिः कर्मवासनाभिरर्थान् ध्यायतः पुंसो मनस एव निमित्तात्कर्माण्यभवन् पाठान्तरे कर्म ईप्सिततममभिध्यायत इत्यर्थः कर्मणोऽपि मनोभवत्वात्तत्साध्या अर्था अपि मनोभवा एवेति भावः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवमुभावपि पृष्टौ तत्र तावदङ्गिरा आत्मानौ स्वागमनप्रयोजनञ्च वदंश्चित्रकेतोर्वैराग्यमुत्पादयति—अहन्त इत्यादिनोपशाममाविशेत्यन्तेन। हे नृप! पूर्वं पुत्रं कामयमानस्य तव पुत्रदो योऽङ्गिराः सोऽहमस्मि एष द्वितीयस्त्वयं साक्षाद्ब्रह्मणः सुतो भगवान्नारद ऋषिः ॥ १७ ॥

किमर्थमागतावित्यत्राह—इत्थमिति। पुत्रशोकेनेत्थं दुस्तरे तमस्यज्ञाने मग्नमतदर्हं शोकानर्हं महापुरुषगोचरं उत्कृष्टपुरुषैरनुग्राह्यं त्वामनुस्मृत्य प्रसादाभिव्यक्त्याय भवतोऽनुग्रहाय भवन्तमनुगृहीतुमिह आवां प्राप्तौ हे प्रभो! ब्रह्मण्यः ब्रह्मणि ब्रह्मकुले साधुर्ब्रह्मण्यः तत्रापि भगवद्भक्तः त्वादृशोऽवसीदितुं दुःखितुं नार्हति ॥ १८ ॥ १९ ॥

यथा पूर्वमागतस्तथा त्वद्गृहं प्रत्यागतोऽहं ते तुभ्यं परं ज्ञानं ददामि भगवद्भक्तः इत्यत्रादिकर्मणि क्तः आरब्धभगवद्भक्तियोगः भक्तियोगारम्भभूतायाः सत्सङ्गतेः कृतत्वादिति भावः। तर्हि पूर्वमेव ज्ञानं किं नाददास्तत्राह—ज्ञात्वेति, अन्याभिनिवेशं पुत्राभिलाषं ज्ञात्वा ते तुभ्यं पुत्रमेवाहं ददौ दत्तवानासम् ॥ २० ॥

ननु, ममान्याभिनिवेशे सत्यपि तस्य दुःखोदर्कतां ज्ञापयित्वा ज्ञानमेव किं न दत्तवानित्यपेक्षायामभिलषितपुत्रप्रदानमन्तरेण दत्तमपि ज्ञानं न सुप्रतिष्ठितं भवति पुत्रोत्पत्तिविपत्तिभ्यामनुभूतसुखदुःखस्य तद्दृष्टान्तेनेतरेषामपि वैषयिकसुखानां दुःखोदर्कतामनुमन्यमानस्य। सञ्जातवैराग्यस्य तु दत्तं ज्ञानं सुप्रतिष्ठितं भवतीत्यालोच्य न दत्तवानस्मीत्यभिप्रायतः। पुत्रदृष्टान्तेनेतरेषामप्यन्ततो दुःखहेतुतामिदर्शयति - अधुनेति। यथैव भवता पुत्रिणां तापोऽधुनानुभूयते एवं दारादयोऽपि सर्वे. हे शूरसेन! शोकमोहभयार्तिदास्सन्त एवानुभाविष्यन्ते भवतैव भवतैवेति पाठे अधुना भवतेव त्वयेव सर्वेषामेव पुत्रिणां तापोऽनुभूयते सर्वैरपि पुत्रिभिस्तापोऽनुभूयत इत्यर्थः यथा पुत्रः शोकमोहादिप्रदः तथा दारादयोऽपीत्यन्वयः तत्र आरामा विहारवनानि विविधा ऐश्वर्यसम्पदः प्रशस्तत्वप्रयुक्ताभोगोपकरणादिसमृद्धयः ॥ २१ ॥

तथा हे राजन्, भोगाः शब्दादयो विषयाश्च विभूतयोऽणिमादयः मही राज्यं राज्ञः कर्मभावो वा राज्यं [illegible] महाराज्यं महाराज्यं सार्वभौमत्वमित्यर्थः बलं चतुरङ्गयुक्तं कोशो धनसञ्चयः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सर्वे चैते गन्धर्वनगरप्रख्याः गन्धर्वनगरेण तुल्यं प्रख्यायन्ते प्रसिध्यन्ते इति तथा गन्धर्वनगरोपमत्वेन प्रसिद्धाः गन्धर्वाणां हि नगरमावासस्थानं न नियतं तद्वदेतेऽप्यनियताश्चञ्चलाः अनित्या इति यावत् प्रसिद्धं दृष्टान्तान्तरमाह—स्वप्नमायामनोरथा इति, स्वप्ने ये मायामनोरथाः मायाशब्द आश्चर्यवाची, आश्चर्यरूपा मनोरथाः सङ्कल्पविकल्पात्मकमनोविषयाः देशान्तरगमनराज्याभिषेकशिरश्छेदादयः तेचाश्चर्यभूता एव तत्तत्पुरुषानुभाव्यत्वेन चाल्पकालानुभाव्यपुण्यपापात्मककर्मफलत्वेन चेश्वरसृष्टानां जागृदवस्थानुभाव्यपदार्थेभ्यो विलक्षणत्वात्स्वप्नमायामनोरथवदनित्या इत्यर्थः इयांस्तु विशेषः स्वप्नमायामनोरथाः तत्कालमात्रावस्थायिनः एते तु तदपेक्षया किञ्चिच्चिरकालावस्थायिन इत्यनित्यत्वं तत्त्वं तत्तज्जीवकर्मानुसारेण सृष्टत्वं मनःप्रभवत्वं सुखमात्राहेतुत्वं चोभयत्राप्यविशिष्टम् ॥ २३ ॥

तदेवाह—दृश्यमाना इति । अर्थेन परमपुरुषार्थेन निरतिशयानन्देन विना दृश्यमानाः न दृश्यन्ते कालान्तरेऽपि न दृश्यन्ते जाग्रत्स्वप्नावस्थाद्वयानुभाव्याः पदार्थाः मनोभवाश्च ननु, स्वप्नपदार्था मनोभवा इति तु युक्तं तेषां यथाकर्म स्वप्नद्रष्टुः कर्मानुसारेण मनःसङ्कल्पविकल्पौ करोति तदनुसारेणेश्वरसृष्टत्वेन मनोनिमित्तकत्वाज्जाग्रदवस्थानुभाव्यानां तु पुत्रदारादीनां कथं मनःप्रभवत्वं ? तत्राह—कर्मभिरिति कर्मभिरनादिवासनारूपैः कर्मभिरर्थान्विषयान्मनसा ध्यायतः पुंसस्तावत्कर्माणि मनसा अभवन् अनादिकर्मवासनावासितमनस्संयुक्तैरिन्द्रियैर्विषयान् ध्यायंस्तावत्कर्माणि करोतीत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दुर्वासयाज्ञवल्क्ययोर्विशेषद्योतकश्च शब्दः ॥ १६ ॥ क ॥

यो महाभाष्यकर्ता स पतंजलिनाम्ना बोध्यः ॥ १६ ॥ ख ॥

ज्ञानहेतवो लोकानामिति शेषः "ब्राह्मणा भगवत्प्रियाः" । "सिद्धेशा ज्ञानहेतवः" इत्येतैर्विशेषणैर्विशिष्टत्वस्य प्रतिपाद्यमानत्वाच्चैतेषां सर्वेषां साम्यं "नारायणपरा देवा मनुष्यास्तत्परायणाः" इत्यादिस्मृत्या अवान्तरविशेषस्य ज्ञायमानत्वात् । नारायणपरा देवा इत्यादिवाक्यं मुक्तानामपि सिद्धानां नारायणपरायणा इत्यत्र ब्राह्मणा भगवत्प्रिया इत्यत्र च प्रमाणार्थमादिमस्याध्याये उदाहृतं ॥ ब्रह्म अर्थाति अर्थते आश्रयंते ब्रह्मणैवेति ब्राह्मणाः इति व्युत्पत्त्या देवद्वारा नारायणायनत्वं लब्धं, योग्यसुखत्वश्रेष्ठुभयं सिद्धं, ते च कियंत इत्याशंक्याऽयवकोट्यस्तु देवानां ऋषयः शतकोट्यः, इत्यादिकया परिहर्तव्या ॥ ॥ १६ ॥ ग. घ. ॥

युवां युवाभ्याम् ॥ १७ ॥

महापुरुषगोचरं भक्तिस्मरणादिमत्त्वेन श्रीविष्णुविषयम् ॥ १८ ॥

नाऽर्हसिवक्तुमर्हसीति पुत्रनिमित्तशोकेन नष्टो माभूरिति ॥ १९ ॥

तर्हि तदानीं पुत्रः किमिति दत्त इति तत्राह—तदेति । तदा पूर्वागमनकाले ज्ञानमेव ददामीति गृहमागतोऽहं तदाऽन्याभिनिवेशं पुत्रविषयाग्रहं ज्ञात्वा ते पुत्रं तुभ्यं पुत्रमेवा ददामिदानीं ज्ञानं ददामीति शेषः ॥ २० ॥

इदानीं दानुमवसर इत्याह—अधुनेति । न केवलं पुत्रवतामेव तापः किन्तु दारादिमतामप्यविद्याधुनोयमित्याह—एवमिति ॥ ॥ २१ ॥ ॥ २२ ॥

स्वप्नमायामनोरथवदनित्यत्वेन दृश्यमानाः प्रतीयमानाः अर्थेन पुरुषार्थाख्यप्रयोजनेन विना दृश्यन्त इति यो नियमः स नास्तीत्यध्याहृत्यान्वेतव्यं तथाहि, योग्यतानुसारेण कदाचित्पुरुषार्थहेतुत्वेन दृष्टत्वात्कदाचिदिति नियमात्कुतो मनोभवाः मनसो भव उत्पत्तिर्येषां ते तथा तेन कल्पितत्वात्. एतदेव विवृणोति कर्मेति. निरन्तरं कर्म चिन्तयतः पुंसो मनसो मनःसाभावनाकर्माणि निरयमानुषस्वर्गमुक्तियोग्यानि कर्माण्यभवन् भवन्तीति यस्मात्तस्मात्तदनुसारेण दारादिसंभवात्सदा पुरुषार्थहेतुत्वादिनियमो नास्तीति भावः ॥ २३ ॥ ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इत्थमिति युग्मकं । महापुरुषो गोचरोऽनुभव विषयो यस्य तम् । भगवद्भक्त इति पुर्वमेव तत्सङ्गप्रभावेन भक्तिबीजोदयात् ॥ १८ ॥ १९ ॥

ददामि अदाष्यमित्यर्थः । पुनश्च ददामि अददामित्यर्थः तिङ्तिङो भवन्तीति छान्दसोऽत्र लट् ॥ २०—२६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

महापुरुषाः परमर्षयो भगवद्भक्ताश्च गोचराः मनोनेत्रादिविषयाः यस्य तं अत एव ब्राह्मणार्थेष्वावेशित्वाद्ब्राह्मणो भगवद्भक्तश्चोक्तः न तु वस्तुतस्तद्भक्त इत्यर्थः ॥ १८—१९ ॥

ददामि अदाष्यं पुनश्च ददामीत्यस्य अददामित्यर्थः । तिङां तिङो भवन्ति इति सूत्रेण ॥ २०—२२ ॥

तदेवं दारादीनामनित्यत्वमघास्तवत्वत्तुल्यं शोकादिहेतुत्वमागमापायित्वञ्चोक्तं । यत्तु दारादिभ्यः अन्येऽपि ह्यात्माद्भयादयः अर्थाः स्वप्नादितुल्यास्तेनु मिथ्याभूता एवेत्याह । गन्धर्वेति स्वप्नश्च मायाया इन्द्रजालं च मनोरथश्च ते तत्तुल्याः पदार्थाः ॥ २३ ॥

अर्थेन व्याप्तसर्पादिना विनैव दृश्यमानाः स्वप्नादिभङ्गे माति न दृश्यन्ते तद्वदेवं दारादयोऽवास्तवस्वस्तुभूताः स्वप्नादयो ऽवस्तुभूताश्च सर्वे मनोभवाः मनोवासना जन्यत्वान्मनोभवाः मनोभवत्वमेवाह कर्मभिः, कर्मवासनाभिरर्थान् ध्यायतः पुंसो मनस एव निमित्तत्वात् कर्माण्यभवन् कर्मभिर्ध्यायत इति पाठे कर्म इच्छितममभिध्यायत इत्यर्थः । कर्माण्यपि मनोभवत्वात्तत्साध्या अर्था अपि मनोभवा एवेति भावः ॥ २४ ॥

अयं हि देहिनो देहो द्रव्यज्ञान क्रियात्मकः ।
देहिनो विविधक्लेशसन्तापकृदुदाहृतः ॥ २५ ॥
तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः ।
द्वैते ध्रुवार्थविश्रम्भं त्यजोपशममाविश ॥ २६ ॥
(भोजोनामनृपः स्वप्ने शत्रुग्रस्तान्नभोजनः ।
दुःखन्दुर्विषहंप्राप्तः शोकमोहभयार्तिदम् ॥ ० ॥
केचिद्विलुलुपुर्भोगानपरेऽवाधिषुःश्रितान् ।
पूर्ववैरग्रहैर्जाया अन्य आत्मशिरोहरन् ॥ ० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतद्ददं शोकानर्हम् महापुरुषगोचरं विष्णुकृपादृष्टिविषयं पात्रमित्यर्थः ॥ १८ ॥ १९ ॥

पूर्वमपि ज्ञानमेव दातुमागतस्तत्र निर्बन्धं दृष्ट्वा पुत्रं दत्तवानित्याह–तदैवेति । परं ज्ञानं ददामि अदात्वयम् पुत्रं ददामि दत्तवान् ॥ २० ॥ २१ ॥ २२

हे शूरसेन ! इमे सर्वेऽपि शोकादिप्रदा गन्धर्वनगरप्रख्याः गन्धर्वनगरवत् प्रख्यायन्ते इति तथा गन्धर्वनगरं गन्धर्वेच्छयैव काचिदायाति अपयाति च न दृष्टजनेच्छामनुसरति तद्वदिमे ईश्वरेच्छामनुसरन्ति न दृष्टजनेच्छामित्यर्थः किञ्च स्वप्ने या मायाः सूक्ष्मरूपाः विभूतयः मनोरथाश्च कर्मविशेषफलप्रदानाय भगवतैव सृष्टाः शोकादिप्रदाः गन्धर्वनगरप्रख्याश्चेत्यन्वयः ॥ २३ ॥

किञ्च जागरेऽपि मनोभवाः पुत्रकलत्रादिपदार्थाः अकस्मादेव मनसि हर्षकाले शोकदाः रोदितव्यं हर्षदाः प्रसिद्धपुत्रकलत्रादिविलक्षणाः स्वप्नमायामनोरथविलक्षणाश्चेश्वरेण प्रवर्तिताः ते च केचिदनिष्टा अर्थेन प्रयोजनेन विनैव दृश्यमानाः मनसि प्रस्फुरमाणाः केचिदिष्टाः नैव दृश्यन्ते अतस्तेऽपि शोकादिप्रदाः गन्धर्वनगरप्रख्याश्चेति पूर्वेणान्वयः किञ्च मनसा कर्माभिध्यायतः एवं स्वहितमेव करिष्यामीति चिन्तयतः नानाहितानि अहितानि मिश्राणि च कर्माण्यभवन् तान्यपि शोकादिप्रदान्येव जानामीत्यर्थः मनसा इति पाठे मनसो निमित्तभूतानि अभवन्नित्यन्वयः ॥ २४ ॥

भाषा टीका ।

॥ अङ्गिरा उवाच ॥

हे नृप ! पुत्र कामना वाले तेरे पुत्र का देने वाला मैं अङ्गिरा ऋषिहूँ । और ये दूसरे साक्षात् ब्रह्मा के पुत्र भगवान नारद ऋषि हैं ॥ १७ ॥

हे प्रभो ! इस प्रकार पुत्र के शोक से दुस्तर अन्धकार मे डूबेहुये और इस दुःख के अयोग्य एसे हरि भक्त तुमको जानकर तुमारे ऊपर अनुग्रह करनेके लिये हम दोनों यहां प्राप्त हुये हैं क्योंकि ब्रह्मण्य भगवद्भक्त दुःख पानेके योग्य नहीं होते हैं ॥ १८—१६ ॥

जब हम पहिले तुमारे गृह आये रहे तब ज्ञान ही देने को आये रहे परञ्च तुमारी अन्य में आसक्ति देख कर उस समय हमने तुमको पुत्र ही दिया ॥ २० ॥

इस समय पुत्र वालों को जो दुःख होता है सो तुमही जानते हो । एसेही स्त्री गृह द्रव्य और नाना प्रकार के ऐश्वर्य और सम्पद्, और शब्दादिक विषय, राज्य की विभूति, पृथिवी राज्य सेना कोश (खजाना) नोकर मंत्री और सुहृद्जन, हे शूरसेन ! ये सबही शोक मोह और भयके देने वाले हैं और गन्धर्व नगर के तुल्य, स्वप्न, माया और मनोरथ के तुल्य चल (अनित्य] और आगमापायी अर्थात् मिलने बिछुरने वाले हैं ॥ २१—२३ ॥

और ये सब बिना अर्थ के देख पडते है और कालांतर में नहीं देख पडते हैं क्योंकि ये सब मनके संकल्प से, हुये हैं । और कर्म की वासना से ध्यान करने वाले पुरुष के मनही से कर्म भी हुये हैं ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तदेवं ममतास्पदानां पुत्रादीनां दुःखादिहेतुत्वमुक्तं तत्र देहसम्बन्धो मूलमित्याह—अयं हीति । हीत्यवधारणे अयं द्रव्यज्ञानक्रियात्मकः अधिभूताधिदैवाध्यात्मरूपो देह एव देहिनो देहोऽहमिति मन्यमानस्य देहिनो जीवस्य विविधान् क्लेशान्सन्तापांश्च करोतीति तथा ॥ २५ ॥

स्वस्थेनाव्यग्रेण गतिं तत्त्वं ध्रुवोऽयमर्थ इति विश्रम्भं विश्वासं अयथार्थं मा त्यज ततश्चोपशममाविश आश्रय ॥ २६ ॥

इत्यन्दुरन्तदुःखौघादुत्थितस्तदनुस्मरन् ।
तावद्भृशं मुनिर्विण्णो निर्जगाम ततो गृहात् ॥ ० ॥
दर्शयन्नात्मनात्मानं निःसङ्गः शान्तविग्रहः ।
प्रविष्टो ब्रह्मनिर्वाणं कुलायन्नाविदच्युतम् ॥ ० ॥)

नारद उवाच ।

एतां मन्त्रोपनिषदं प्रतीच्छ प्रयतो मम ।
यां धारयन्सप्तरात्रात् द्रष्टा सङ्कर्षणं प्रभुम् ॥ २७ ॥

यत्पादमूलमुपसृत्य नरेन्द्र ! पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य ।
सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्याम्
संहितायां वैयासिक्यां चित्रकेतूपाख्याने
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

अङ्गिरसोपदिष्टं तत्त्वं परमेश्वरप्रसादं विना न प्राप्यत इति तत्प्रसादाय मन्त्रविद्यां नारद उपदिशति—एतामिति । उपनिषदं परं श्रेयोऽस्यामित्युपनिषत् मन्त्र एवोपनिषत्तां प्रतीच्छ गृहाण द्रष्टा द्रक्ष्यति भवान् ॥ २७ ॥

अतुलं च तदनधिकं च समानाधिकशून्यं परं महिमानं प्रापुः उपैत्युपैष्यति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्तत्कर्मफलानुभवायास्य देहिनः द्रव्यज्ञानक्रियात्मकः द्रव्यं भूतपञ्चकं ज्ञानानि ज्ञानेन्द्रियाणि क्रियाः कर्मेन्द्रियाणि एतदात्मकः एतत्सङ्घातरूपः अयं देहोऽस्य देहिनः विविधक्लेशरूपसन्तापं करोतीति तथा क्लेशसन्तापशब्दौ वैषयिकसुखदुःखपरौ वा वैषयिकसुखस्यान्ततः क्लेशात्मकत्वाच्चो करोतीति विविधक्लेशसन्तापकृदुदाहृतः प्राप्त इति कथित इत्यर्थः प्रथममनादिवासनावासितेन मनसा विषयचिन्तना तयाच विषयलाभोपयुक्तानि पुण्यपापात्मकानि कर्माणि कर्मभ्यः क्लेशसंतापकृद्देहः तेन च पूर्वजन्मकृतकर्मफलशब्दादिविषयमनुभवतः पुनर्विषयचिन्तना पुनस्तया कर्माणीत्येवमियं परिवृत्तिः वासनावासितमनोमूलिकेति सर्वे मनःप्रभवा इति भावः ॥ २५ ॥

तस्मात्पुत्रदारादीनां सर्वेषां स्वाप्नकल्पत्वात्स्वस्थेन विक्षेपरहितेन मनसा आत्मनः प्रत्यगात्मनो गतिं स्वरूपं विमृश्य बुद्धीन्द्रियमनःप्राणादिभिन्नत्वेन ज्ञानानन्दादिस्वरूपस्वभावत्वेन परमात्मशरीरत्वेन च विमृश्य ध्रुवे उक्तविधप्रत्यगात्मगतदेवमनुष्यादिभेदाभेदेऽस्थिरे शरीरे ध्रुवार्थविभ्रमं ध्रुवार्थे आत्मा तद्विभ्रममात्माभिमानं त्यज उपशमं वैराग्यमाश्रित्य विरक्तो भवेत्यर्थः ॥ २६ ॥

एवमङ्गिरसोत्पादितविवेकाय चित्रकेतवे भगवान्नारदो मन्त्रविद्यामुपदिदिक्षुस्तावत् तत् प्रभावमाह—एतामिति । एतामुपदेक्ष्यमाणां मन्त्रोपनिषदं मन्त्ररूपामुपनिषदं प्रयतः समाहितचित्तस्त्वं मम उपदेक्ष्यतो मत्तः प्रतीच्छ स्वीकुरु यां मन्त्रोपनिषदं धारयमाणो भवान् सप्तरात्रादूर्ध्वं भगवन्तं सङ्कर्षणं द्रष्टा द्रक्ष्यति ॥ २७ ॥

सङ्कर्षणं विशिंषन्तस्य तत्साक्षात्कारफलमाह—यदिति । हे नरेन्द्र ! यस्य भगवतः सङ्कर्षणस्य पादमूलमुपसृत्याश्रित्य पूर्वे रुद्रादयः द्वितयं द्रावयन्तौ यस्य द्वितयं द्विद्वात्मकं भ्रममाद्यात्मकत्वस्यतन्त्रात्मकत्वरूपद्वययात्मकं भ्रमं विसृज्यातुलानधिकं निःसमाभ्यधिकं तदीयं सङ्कर्षणसम्बन्धिमहत्वं माहात्म्यं प्रापुः तथा भवानप्यचिराद्वाशु परं महामाहात्म्यमुपैष्यति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

देहादेरर्थक्रियाकारित्वान्न मिथ्यात्वं वक्तुमुचितं गन्धर्वनगरादिवदसौ नश्वरस्त्वेव दृष्टान्त इत्यभिप्रेत्याह—अयं हीति । देहिनोऽयं देहो देहिनः जीवस्य विविधक्लेशसंतापकृदुदाहृत इत्यन्वयः हिशब्दो हेतौ अभिमानायतनस्य सुखादिभोगः न तु देहस्येति द्योतनाय देहिन इति पुनर्वचनम् अयमित्युक्त्या स्थूलदेहसिद्धावपि स्पष्टत्वायाह—द्रव्येति. द्रव्यात्मकः पञ्चभूतात्मकः स्थूलदेहः गण्डशैलादीनां स्थूलत्वेऽपि भोगायतनत्वाभावात्कथमेतदिति तत्राह - ज्ञानेति. ज्ञानेत्यनेन श्रोत्रादिपञ्चकम् एवं मनश्च गृह्यते क्रियापदेनापि वागादिपञ्चकं कर्म च लक्ष्यते ज्ञानेन्द्रियकर्मेन्द्रियमनआत्मकत्वेन वैलक्षण्याद्भोगायतनत्वमुपपद्यते इन्द्रियकार्यज्ञानक्रियाशब्दाभ्याम् इन्द्रियोक्तिः कार्यकारणयोरेकशब्दव्यवहृतिर्भवेदित्यतो युज्यते "असन्नपि क्लेशद आस देह" इत्यादौ सिद्धत्वादुदाहृत इत्युक्तम् अनेनासदुपासनं क्लेशकरं देहवदित्ययमर्थोऽपि ध्वनित इति ज्ञातव्यम् ॥ २५ ॥

यत एवं नानाक्लेशदो देहस्तर्हि कथंकारं तं निवर्तत इति तत्राह—तस्मादिति । तस्माद्देहस्य क्लेशकरत्वात् द्वैते देहे ध्रुवार्थविस्रम्भं त्यजेत्यन्वयः अन्यापेक्षारहितत्वाद्धरिरद्वैतम् अदृष्टाद्यपेक्षाप्राप्तत्वात् द्वैतं देहादि तत्रैव पदार्थो ध्रुवत्वान्नित्य इति विश्वासं त्यज "अनन्यापेक्षनस्त्वेको हरिरद्वयं स्मृतम् । अन्यापेक्षत्वतस्तेन प्राप्तत्वाद्द्वैतमुच्यते" इतिवचनात् देहिनो यत्किञ्चिद्भोगसाधने द्वितीयत्वेन प्राप्तत्वाद्द्वैतशब्दवाच्यो देह इत्यर्थः । नैनाधुना पूर्यत इत्याह—उपशममिति, अहंकर्तेत्यभिमानोपशममाविशेत्यन्वयः किं च हरौ निरन्तरनिष्ठालक्षणामुपशमं उक्तार्थदार्ढ्यायाह विमृश्येति आत्मनो हरेर्गतिं स्वातन्त्र्यादिलक्षणामात्मनो जीवस्याज्ञानाद्यादिलक्षणां गतिं । केनेत्यत उक्तं मनसेति । तस्य प्रागपि सद्भावात् कुत ईदृशविचाराभाव इति तत्राह—स्वप्नेनेति ॥ २६ ॥

शास्त्रश्रवणमननशाणोल्लीढेन भक्त्यादिसाधनसामग्रीसम्पादनेन गृहादिसङ्गत्यागः प्रथमसाधनमित्यत्रेतिहासमाह— भोजो नामेति । शत्रुणा ग्रस्तं कथञ्चिन्न यत्रैव तदेव भोजनं यस्य स तथा शत्रोश्छिद्राग्रभक्षणा इत्यर्थः ॥ ० ॥

पूर्वं पुरातनं वैरं गृह्णातीति पूर्ववैरग्रहास्तैः कर्मभिः पूर्ववैराग्रहैः ॥ ० ॥

दुरन्तदुःखानामोघो यस्मिन्स तथा तस्मात्स्वप्राप्तत्स्वप्रानुभूतं तावत्तदानीमेव ॥ ० ॥

आत्मानं उन्मत्तादिवद्दर्शयन्नात्मना मनसा आत्मानं दर्शयन्नालोचयन्निति वा निर्वाणं अशरीरिणाजन्यानन्दपूर्णं ब्रह्म श्रीनारायणाख्यं प्रविष्टो मनस्येति शेषः यस्मिन्कुलाये देहे स्थितः तं कुलायं नाविदन्न बुबुधे च शब्दो हेत्वर्थः असंप्रज्ञातसमाधिस्थत्वाद्वा ॥ ० ॥

मयाप्येवंविधोपायात्स्वामाप्तुं क उपाय इति तत्राह—इमामिति । मन्त्रावधारणानिर्वाचिरकालेन साध्यसाधिका च तामिमनयेत्यश्रद्धां माकार्षीरित्याह—यामिति, "रुद्राद्याः शेषदेहस्थं विष्णुं संकर्षणाभिधम् । शेषान्तर्यामिणं ज्ञात्वा स्वपदं प्रापुरञ्जसा" इति वचनाच्च शेषः संकर्षणोऽत्र गृह्यते किन्तु तदन्तर्यामी द्वितीयमूर्तिरन्यस्य वर्णानमूलनादिसामर्थ्याभावात् इति ॥ २७ ॥

संकर्षणं शेषस्यान्तर्भावितैर्विशिनष्टि—यत्पादेति । पूर्वे शर्वादयो यत्पादमूलमुपसृत्योपास्य महित्वं प्रापुरित्यन्वयः महित्वं नाम कीदृशं ? येन हरिप्रसादप्राप्तं स्यादित्यत उक्तं अतुलेति- अतुलं च तदनधिकं चेति तथोक्तं साम्याधिक्यवर्जितमित्यर्थः ननु, तर्हीदं भगवन्माहात्म्यविनाभूतं स्यादिति तत्राह—तदीयमिति, तेषां रुद्रादीनां योग्यं ननु, स्वकीयप्राप्तौ क्लेशसाध्यायाः किमन्योपासनायाः प्रयोजनं ? अतः सिद्धत्वात्तस्येत्यस्याप्येतदेवोत्तरं तत्प्रसादलभ्यत्वात्तदीयमिति । तदीयं तस्य हरेरधीनं । तदुक्तं । "तेषां तेषां पदान्येव वैष्णवानि पदानि तु । तेषां महित्वं च तथा हरेस्तद्वशगं यतः" इति । भगवन्महित्वादन्यमहित्वस्य साम्याधिक्यस्य वर्जनं कथं घटत ? इत्यस्यापीदमुत्तरं तस्मादिन्द्रादिपदाद्रुद्रादिप्राप्यशेषादिपदस्य साम्याधिक्यवर्जनं युक्तं किञ्च शेषादिप्राप्यशेषादिपदस्य मौक्तिकस्य संसारे शेषादिपदमपेक्ष्यातुल्यानाधिक्यं च युक्तिमत् "अतुल्यानधिकं चैव तस्य तस्यैव मुक्तिगम् । तस्यैव पूर्वमाहात्म्यमपेक्ष्य" इति वचनात् ननु "परमं साम्यमुपैति" इति श्रुतेः हरेरेवातुल्यानधिकमहित्वं प्रापुरित्यर्थः किं न स्यादित्यत्रापीदमेव प्रतिवचनं तस्य विद्यमानं पदमापुर्हरेर्विद्यमानं निजमहित्वं तदुक्तञ्च । "न हरेः कश्चित् माहात्म्यमन्यप्राप्यं स्यान्न वै विष्णोः" इति श्रुतेरिति । रुद्रादिप्राप्यं न चेत् ब्रह्मादिप्राप्यं किं न स्यादितिचेन्न "ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते तद्यत्स्वभावः कैवल्यं स भवान्केवलो हरिः" इति प्रमाणविरोधात् । अत्रोपास्तावित्थंभावमाह - भ्रममिति इदं देहाद्यहंममाभिमानलक्षणं भ्रमं विहाय आचार्यैरप्येतदुक्तम् 'देहाद्यावहंममाभिमानो भ्रमः', इति बन्धस्य त्यागमन्तरेण तत्प्राप्तिः कथं युक्तिमती तत्राह—तद्द्वितीयमिति, कार्यकारणयोरेकशब्दव्यवहृतिर्भवेदिति न्यायात्कारणेन कार्यं लक्ष्यते द्वितीयेनान्यथाज्ञानेन निर्मितं बन्धं पुत्रादिस्नेहलक्षणं विसृज्य सम्यक् त्यक्त्वा तदुक्तम् "द्वैतेन बन्धसंत्यागाद्द्वैतत्यागी भवत्युत" इति द्वैतेनोत्पन्नबन्धसंत्यागादित्यर्थः । अनेन मुक्तावपि शेषादिप्राप्यं पदमिति ध्वनितमिति ज्ञातव्यं साधनसामग्र्यां कालक्षेपो नास्तीत्याह—सद्य इति, 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्यत' इति श्रुतेः । अनेन चित्रकेतोः किमागतं तत्राह—भवानपीति भवानपि तमनन्तमुपास्य दृष्ट्वा तत्प्रसादेन नचिरात्स्वकर्मनिर्मितचरमशरीरपातानन्तरं तत्प्रसादलभ्यत्वात्तदीयमपि तेन पूर्वमहिम्ना तुल्यमनधिकं च परमन्यद्रुद्रादिमहित्वविलक्षणं निर्दुःखानन्दानुभवलक्षणं स्वयोग्यमाहात्म्यमुपैतीत्यन्वयः

"यद्यपो परतादेवामाया वैशारदी मतिः ।
सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते" ॥

इति स्मृति वचनात् ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं यदङ्गिरसोपदिष्टं तत्रापरितुष्टः श्रीनारद उवाच । सप्तरात्रमतिक्रम्य दिनकतिपयानन्तरमित्यर्थः ॥ २७ ॥
प्रयोपदेशे वैशिष्ट्यमाह यदिति ॥ २८ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य ।
पञ्चदशोऽध्यायः समाप्तः ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तदेवं ममतास्पदानां दुःखहेतुत्वमुक्त्वा अहन्तास्पदस्यापि देहस्याह अयमिति । द्रव्यज्ञानक्रियात्मकः अधिभूताधिदैवाध्यात्मिकः देहिनः देहोहमिति मन्यमानस्य जीवस्य ॥ २५ ॥

स्वस्थेनाऽव्यग्रेण गतिं तत्त्वं । इते अहंतास्पदममतास्पदवस्तुजे द्वन्द्वास्पदे जगति ध्रुवो वास्तववस्तुभूतोऽयमयं इति विस्रम्भं विश्वासं प्रणयं वा त्यज तस्य वस्तववस्तुमयत्वात् "शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः" इत्यमरः । ततश्चोपशममाविश आश्रय ॥ २६ ॥

ननु, तर्हि ध्रुवोऽर्थ एव कः? तमेव महां कृपया कथयेत्यपेक्षायामङ्गिरसा प्रेरितो महाभागवतत्वान्नारद एवाह--एतामिति । मन्त्ररूपाम् उपनिषदं प्रतीच्छ गृहाण ॥ २७ ॥
भ्रमयति भवन्तमिति भ्रमन्तं द्वितयं द्वैतं उपैति उपैष्यति ॥ २८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठे पञ्चदशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

किञ्च द्रव्यज्ञानक्रियात्मकः भूतोभयेन्द्रियादिरूपो देहोऽपि विविधक्लेशसन्तापकृदुदाहृतः न तु केवलसुखकृदुदाहृतः ॥ २५ ॥
यस्मादेवं तस्मात् स्वस्थेन निश्चलेन मनसा आत्मनो जीवस्य गतिं भगवत्पादपद्मं विमृश्य इते पूर्वोक्ते पुत्रकलत्रादौ वैहिके देहे च ध्रुवार्थविस्रम्भम् एते देहदैहिकाः अर्थाः ध्रुवा नित्या इति विश्वासं त्यज उपशममाविश आश्रय ॥ २६ ॥

एतां वक्ष्यमाणां मन्त्ररूपामुपनिषदं मम मत्तः प्रतीच्छ स्वीकुरु ॥ २७ ॥

यस्य सङ्कर्षणस्य पादमूलमुपसृत्याश्रित्य पूर्वं शर्वादयः शिवादयः द्वितयं देहदैहिकादिद्वैतं तत्र भ्रमं ध्रुवत्वभ्रान्तिम् देहे अहमिति दैहिकेषु ममैवेत इति च भ्रान्तिं विसृज्य सद्यस्तदीयं महित्वं तत्साधर्म्यमवापुः भवानपि परं तत्साधर्म्यमुपैत्यपैष्यति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे पञ्चस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
पञ्चदशाऽध्यायार्थप्रकाशः ॥ १५ ॥

भाषाटीका ।

यह पुरुष का द्रव्यज्ञान क्रियात्मक जो देह है सो जीव के नाना प्रकार के क्लेश और संताप करने वाला कहा गया है ॥ २५ ॥

तस्मात् स्वस्थमन से आत्मा की गति को विचार कर यह सांसारिक अर्थ नित्य हैं ऐसा विश्वास छोड़ कर शांति का आश्रय लो ॥ २६ ॥

नारद उवाच ॥

हे राजन्! तुम सावधान होकर इस मंत्र रूप उपनिषद् [वेदभाग] को हम से ग्रहण करो। जिसके धारण करने से सप्त रात्रि में संकर्षण भगवान के दर्शन करोगे ॥ २७ ॥

जिनके चरणारविन्द के शरण जाकर पहिले शिव ब्रह्मादिक इस अहंता ममता के भ्रमको छोड़कर तत्काल भगवान की असमाऽत्यधिक महिमा को प्राप्त हो गये। तुमभी उसी महिमा को थोड़े काल में प्राप्त होगे ॥ २८ ॥

इति श्रीमत् भागवत महापुराण पञ्चस्कन्ध
कीभाषा टीका में चतुर्दश अध्याय
समाप्त ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चस्कन्धे पञ्चदशोऽध्यायः समाप्तः ॥ १५ ॥

॥ षोडशोऽध्यायः ॥

——○:※:○——

श्रीशुक उवाच ।

अथ देवऋषी राजन् ! सम्परेतं नृपात्मजम् ।
दर्शयित्वेति होवाच ज्ञातीनामनुशोचताम् ॥ १ ॥

नारद उवाच ।

जीवात्मन् ! पश्य भद्रं ते मातरं पितरं च ते ।
सुहृदो बान्धवांस्तप्ताञ्शुचा त्वत्कृतया भृशम् ॥ २ ॥
कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः ।
भुङ्क्ष्व भोगान् पितृप्रत्तानधितिष्ठ नृपासनम् ॥ ३ ॥

जीव उवाच ।

कस्मिञ्जन्मन्यमी मह्यं पितरो मातरोऽभवन् ।
कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ॥ ४ ॥
बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ।
सर्व एव हि सर्वेषां भवन्ति क्रमशो मिथः ॥ ५ ॥
यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः ।
पर्यटन्ति नरेष्वेवं जीवो योनिषु कर्तृषु ॥ ६ ॥
नित्यस्यार्थस्य सम्बन्धो ह्यनित्यो दृश्यते नृषु ।
यावद्यस्य हि सम्बन्धो ममत्वं तावदेव हि ॥ ७ ॥
एवं योनिगतो जीवः स नित्यो निरहङ्कृतः ।
यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षोडशे तत्सुतोक्त्यैव विशोकीकृत्य तं नृपम् ।
आदिदेश महाविद्यां नारदः शेषतोषणीम् ॥ १ ॥

आदौ तावत् तत्पुत्रमुखेनैव पितृपुत्रादिसम्बन्धो मिथ्येति दर्शयितुं योगबलेन तमेव ज्ञातीनां दर्शयित्वा जीवात्मन्नि-त्याद्युवाच ॥ १ ॥ २ ॥

शेषमवशिष्टमायुरस्ति अपमृत्युना मृतत्वादित्यर्थः ॥ ३ ॥

तदेव कलेवरं प्रविश्योत्थितो जीव उवाच यद्वा अन्तरात्मैव प्रेतशरीरे स्थित्वेति ज्ञेयम् ॥ ४ ॥

मयि मृते पुत्रदृष्ट्या शोकश्चेत् शत्रुदृष्ट्या हर्षः किं न क्रियते? इत्याशयेन सम्बन्धस्यानियतत्वमाह-बन्धवो विवाहादिभि-स्सम्बन्धिनः ज्ञातयः सपिण्डाः अरयो घातकाः मित्राणि रक्षकाः मध्यस्था उभयव्यतिरिक्ताः साधारणाः विद्विषो द्रव्यादिनिमित्तेन द्वेषिणः उदासीनास्तद्व्यतिरिक्ता इति भेदः ॥५॥

कर्मभिर्भ्राम्यमाणत्वे दृष्टान्तः यथा पण्यानि क्रयविक्र-

श्रीधरस्वामिकृतभावार्थदीपिका ।

यावद्गिरा कर्तृषु व्यवहर्तृषु परिभ्रमन्ति एवं जीवोऽपि योनिषु जनकेषु ॥ ६ ॥

एकस्मिन्नपि जन्मनि सम्बन्धस्यानियतत्वं सदृष्टान्तमाह द्वाभ्यां, नित्यस्य जीवतोऽपि अर्थस्य पश्वादेः अनित्यः अनियतः विक्रयादिना सम्बन्धनिवृत्तेः ॥ ७ ॥

एवं योनिगतः पित्रादिसम्बन्धं प्राप्तोऽपि स जीवो नित्यः देहजन्मादिना तस्य जन्माद्यभावात् अत एव वस्तुतो निरहङ्कृतः अहमस्य पुत्र इत्यभिमानशून्यः यत्र पित्रादौ सम्बन्धीनि यावदुपलभ्येत कर्मवशेन सन्ति तावदेव तस्य पित्रादेस्तस्मिन् स्वत्वं न तु विक्रयाद्युत्तरकालमपि अयमेवं सम्बन्धः यदुक्तं कलेवरम् स्वमाविश्यति तत्र तस्मिन् कलेवरे ममेदानीं स्वत्वं निवृत्तमिति सदृष्टान्तमाह, नित्यस्य चिरकालावस्थायिनः सुवर्णादेः योनिगतो देहम्प्रविष्टः यत्र देहे तस्य जीवस्य तस्मिन् देहे स्वत्वम् न तु मरणोत्तरकालमपीत्यर्थः शेषं समानम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुपदेश्यमानमन्त्रोपनिषद्ग्रहणे तस्य दत्तमुक्ताद्याङ्गिरसोपदिष्टेषु वैराग्यापादकेष्वर्थेषु चित्रकेतुप्रभृतीनां विश्वासम्पादनाय मृतके पुनर्जीवं स्वयोगमाहात्म्याऽऽवेद्य तन्मुखेनाङ्गिरसोपदिष्टानर्थानभीष्टवरदानगमनारद इत्याह मुनिः—अथेति । हे राजन्, स देवर्षिर्नारदः सङ्गतै मृतं नृपात्मजमनुशोचतां ज्ञातीनां चित्रकेत्वादीनां दर्शयित्वा योगप्रभावेनाविष्टजीवं प्रदर्श्य इति सम्पन्नमागाम उवाच इत्याश्चर्ये अहो भगवतो नारदस्य प्रभावो यन्मृतमपि पुनरजीवयदिति ॥ १ ॥

उक्तमेवाह —जीवात्मन्निति द्वाभ्यां । हे जीवात्मन् ! भद्रं प्रविष्टशरीरस्य ते तव मातरं पितरं सुहृदो बान्धवांश्च त्वत्कृतया शुचा भृशं तप्यमानान्पश्य बान्धवास्तथा इति प्रथमान्तपाठे मातरं पितरं च पश्य बान्धवाः सुहृदश्च त्वत्कृतया शुचा भृशं तप्ताः अतस्तानपि पश्येत्यन्वयः ॥ २ ॥

शेषमवशिष्टमायुर्जीवनं यस्य तत्कलेवरं समाविश्य, अपमृत्युना मृतत्वाच्छेषमायुरित्युक्तं सुहृद्भिः परिवृतस्त्वं नृपासनमधितिष्ठन् पितृप्रत्तान् पित्रादत्तान् भोगान् भुङ्क्ष्व ॥ ३ ॥

भुङ्क्ष्वेत्युक्तो जीवस्तत्कलेवरमाविश्यावददित्याह-कस्मिन्नित्यादिना हरीश्वरस्येत्यन्तेन, तावत्पितृपुत्रत्वादिसम्बन्धस्यानियतत्वमाह—कस्मिन्निति । देवतिर्यङ्मनुष्ययोनिषु कर्मभिः पुण्यपापरूपैः भ्राम्यमाणस्य जायमानस्य अत एव तत्र तत्र तत्तत्पुरुषविशेषान्प्रति तत्तन्निरूपितबन्ध्वादिभावं प्राप्तस्य मह्यं मम निर्भक्तिकस्यास्य भावः अमी चित्रकेत्वादयः कस्मिन् जन्मनि पितरः मातरश्चाभवन् ? न सर्वेषु जन्मस्वभवन्, किन्त्वेतस्मिन्नेव, अतः पितृपुत्रत्वादिसम्बन्धो न नियत इति भावः यद्वा कस्मिन् जन्मन्यमी पितरो मातरश्चाऽभवन् ॥ ४ ॥

ननु, सर्वेष्वपि जन्मस्वभवन्नित्यत्राह—बन्ध्विति । सर्वे जीवाः सर्वेषां जीवानां क्रमशः जन्मपरम्पराभिः मिथ अन्योन्यं बन्ध्वादयो भवन्तीत्यन्वयः तत्र बन्धवो विवाहादिभिः सम्बन्धिनः ज्ञातयः सपिण्डाः अरयो घातुकाः मित्राणि रक्षकाः मध्यस्थाः उभयव्यतिरिक्ताः विद्विषो द्वेषादिनिमित्तेन द्वेषिणः उदासीनास्तद्व्यतिरिक्ता इति भेदः ॥ ५ ॥

कर्मभिर्भ्राम्यमाणत्वे दृष्टान्तमाह—यथेति । यथा पण्यानि क्रयाद्यर्हाणि हेमादीनि हेमविकाररूपाणीनि कटकाङ्गुलीयकादीनि वस्तूनि कर्तृषु व्यवहर्तृषु नरेष्वितस्ततः पर्यटन्ति एवं जीवा अपि देवतिर्यङ्मनुष्ययोनिषु भ्रमन्ति संसरन्ति ॥ ६ ॥

एकस्मिन्नपि जन्मनि सम्बन्धस्यानियतत्वं सदृष्टान्तमाह—नित्यस्येति द्वाभ्यां । नित्यस्याविलुप्तस्य जीवत इति यावत् तस्य पश्वादेरर्थस्य अनित्यः अनियतः सम्बन्धो नृषु दृष्टः विक्रयादिना पूर्वस्वामिसम्बन्धस्य निवृत्तेरुत्तरस्वामिसम्बन्धदर्शनादेकस्मिन्नपि जन्मनि सम्बन्धो न नियत इति भावः तदेवोपपादयति - यावदिति. यस्य पुंसो येन पश्वादिना यावत्सम्बन्धः क्रयादिनिमित्तसम्बन्धोऽस्ति तस्य ममत्वं स्वामित्वादिसम्बन्धस्तावदेव हीत्यनेन लोकप्रसिद्धिं द्योतयति ॥ ७ ॥

एवं दृष्टान्ते उपपादितमर्थं दार्ष्टान्तिके दर्शयति - एवमिति । स प्रसिद्धो निरहङ्कृतिः नम्रता देहात्माभिमानरहितोऽपि जीवः कर्मणा योनिगतदेवादिशरीरेष्वनुप्रविष्टः सन्यत्र देवादिशरीरे नित्योऽपरित्यक्तदेहो यावदुपलभ्यते तावदेव तस्य स्वत्वं जीवत्वं, तावदेव हि तस्य पित्रादयः सम्बन्धिनः, तावदेव तत्सम्बन्धः पितृपुत्रत्वादिसम्बन्ध इति यावत् तत्तस्मात्तत्रोपलभ्यमानत्वादित्यर्थः यद्वा यत्र शरीरे यावदुपलभ्येत तस्य शरीरस्य तावन्तं कालं जीवात्मानंप्रति स्वत्वं तत्तस्मात्तेषूपलभ्यमानत्वाच्छरीरनिरूपितस्वत्वस्यैव शरीरेऽभावादित्यर्थः अनुपलम्भे तु आत्मनिरूपितस्वत्वस्यैव शरीरनिरूपितपितृपुत्रत्वादिसम्बन्धो दूरापेत इति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

संसारस्य पुत्रमित्रादिलक्षणानियतत्वं संसारिचेतनस्य हरिनियतनित्यत्वं परमचेतनस्य परानित्यत्वं तज्ज्ञानमेव पुरुषार्थसाधनमित्यादिकर्मास्मिन्नध्याये निरूप्यते, अत्र नारदो योगमाहात्म्यं विद्योतयन् राजकुमारमुत्थाप्येदं वक्तीत्याह—अथेति

॥ १ ॥ २ ॥ ३ ॥

एवं जीवात्मना किमवादि ? इत्यत्राह, कस्मिन्निति ॥ ४ ॥ ५ ॥

पण्यानि विक्रेयाणि नरेषु विक्रेतृषु रेतस्सेककर्तृषु पित्रादिषु योनिषु मातृषु कर्तृष्विति वा ॥ ६ ॥

ननु, तर्हि हाटकादिवदनित्यत्वमापतितं जीवस्येत्याशङ्क्य सम्बन्धस्यैवानित्यत्वं न तु जीवात्मन इत्याह—नित्यस्येति, यथा सम्बन्धस्यानित्यत्वं तथा ममपुत्रोऽयमिति ममत्वमप्यनित्यमित्याह यावदिति, हि शब्दाभ्यां प्रत्यक्षादिप्रमाणसिद्धत्वं दर्शयति, एव शब्देनायोगव्यवच्छेदं करोति ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निरहंकृत इति स्वभावाख्यानं यत्र योनिषु स्वत्वं स्वकीयत्वम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

संपरेतमतिवाहिकदेहं प्राप्तं । दर्शयित्वा योगबलेनाविर्भाव्य ॥ १ ॥ २ ॥

टीकायामपमृत्युनेति तत्कारणकोचितपापविशेषो भवति । यत एव पूर्णमायुर्भोक्ष्यतीति ॥ कलेवरं स्वमाविश्येति विरोधात् पक्षान्तरमाह यद्वेति ॥ ३ । ४ ॥

मध्यस्थाः तस्मिन् तादृशेच मिलन्तः । उदासीना तयोरपि न मिलन्तः ॥ टीकायामथ चैवंसम्बन्ध इत्यत्र श्लोकद्वयस्येति शेषः ॥ ५—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षोडशे मृतपुत्रोक्त्या प्रबुद्धो नारदान्मनुम् ।
प्राप्य संस्तूय शेषन्तम्मुखाज्ज्ञानं नृपोऽध्यगात् ॥ १ ॥

ज्ञातीनामिति द्वितीयार्थे षष्ठी ॥ १ ॥

तदपि शोकमोहयोः शेषं दुर्वारमभिलक्ष्य मृतपुत्रमुखेनैव तं प्रबोधयितुमाह--जीवेति शुचा शोकेन ॥ २ ॥

शेषमवशिष्टमायुर्यदवेत्यपमृत्युना मरणं राजानमूहयति. । वस्तुतस्तु तस्य नास्त्येवायुर्मायिकत्वात् पितृप्रत्तान् पित्रा दत्तान् ॥ ३ ॥

जीव उवाचेति तदेव कलेवरं प्रविष्टो ऋषिर्जीवमिव जीव इत्यर्थः मह्यं मम ॥ ४ ॥

मयि मृते पुत्रदृष्ट्या शोकश्चेत् क्रियते, शत्रुदृष्ट्या हर्षः किं न क्रियते ? इत्याशयेन सम्बन्धस्यानियतत्वमाह—बन्धवो विवाहादिसम्बन्धिनः ज्ञातयः सपिण्डा अरयो घातकाः मित्राणि हितैषिणः, मध्यस्थाः बहिरन्तर्मैत्रीवैरवन्तः । उदासीना मैत्रीवैरशून्याः । विद्विष उत्कर्षासहिनः । क्रमश इति जन्मान्तरे शत्रुरप्यस्मिन् जन्मनि पुत्रोभवतीत्यर्थः । यस्तु पुत्रः सद्गुणोभूत्वा म्रियते स तु दुःखाधिक्यप्रदत्वाच्छत्रुरेवेति लोकोक्तिः ॥ ५ ॥

ननु. यदि शत्रुरपि पुत्रः स्यात्तर्हि तत्रात्मीयत्वेन स्नेहः कथं ? स्यात्तत्र दृष्टान्तेन समादधाति यथेति । पण्यानि क्रयविक्रयार्हाणि हेमादीनि हेममुद्रिकादीनि येव हेममुद्रा शत्रुगृहस्थिता स्वबध प्रयोजिका सैव दैवाद्वात्मगृहमागता प्रेमास्पदीभूता भोगप्रयोजिकाच भवति । एवमेव जीवयोनिषु मनुष्यगोगर्दभादिषु ये कर्तार उत्पादकाः पितरो मातरश्च तेषु प्रविशन्ति ॥ ६ ॥

मम जीवस्य चित्रकेतुपुत्रत्वमेतावन्तं कालमासीत्तावदसौ स्नेहमकरोदेव अतः परमन्यपुत्रत्वं प्राप्स्यामि स एव स्नेहं करिष्यतीत्यर्थान्तरन्यासेनाह नित्यस्यार्थस्य स्वर्णमुद्राया एकस्या अपि क्रयविक्रयादिव्यवहारेणैकस्मिन्नपि दिने अन्य जनहस्तगताया ममेयं ममेयं नान्यस्येति सम्बन्धो ह्यनित्यः तत्र च यावदितिस्पष्टम् ॥ ७ ॥

वस्तुतो निरहङ्कृत एव यत्र पित्रादौ तस्य पुत्रादेः । यद्वा निरहङ्कृत एव जीवो यावद्यत्र देहे उपलभ्येत तावदेव तस्य तस्मिन् जीवस्य देहे स्वत्वं नान्यदा अतोऽस्मिन् देहे सम्प्रति मम स्वत्वाभावात् कथमत्राहङ्कारं करोमीति तस्मात् कलेवरं समाविश्येति त्वत्प्रार्थितं न घटत एवेति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मंत्रोपनिषदि अत्यन्ततो विशोकस्याधिकारस्तदर्थमुक्तोपदेशेन विशोकस्यापि राज्ञः पुनरत्यन्ततो विशोकत्वासिद्धये तत्पुत्रमुखेनापि पितृपुत्रादिसम्बन्धस्यानित्यता तदनन्तरं मन्त्रोपनिषच्च वर्ण्यते—षोडशेनाध्यायेन अथेति सम्परेतं नृपात्मजं योगबलेन ज्ञातीनां दर्शयित्वा जीवात्मन्नित्याद्युवाच ॥ १ ॥

हे जीवात्मन् ! ते भद्रं भवतु ते मातरं पितरं तथा त्वत्कृतया त्वदर्थकृतया शुचा शोकेन भृशं तप्तान् सुहृदो बान्धवांश्च पश्य ॥ २ ॥

ते शेषमवशिष्टमायुरस्ति अपमृत्युना मृतत्वात् अतः कलेवरमाविश्य नृपासनमधितिष्ठ पितृप्रत्तान् पित्रा दत्तान् भोगान् भुङ्क्ष्व ॥ ३ ॥

अमी चित्रकेत्वादयः पितरो ममैव नियमेन कस्मिन् जन्मनि अभवन् पितृपुत्रादि सम्बन्धोऽनित्य इत्यर्थः ॥ ४ ॥

तदनित्यतामेवाह—बन्धवेति । सर्वे एव सर्वेषां क्रमशो बन्ध्वादयो भवन्ति ॥ ५ ॥

पण्यानि क्रयविक्रयार्हाणि हेमादीनि यथा कर्तृषु व्यवहर्तृषु इतस्ततः पर्यटन्ति एवं जीवो योनिषु देवमनुष्यादिषु पर्यटति ॥ ६ ॥

नित्यस्य प्रत्यहं व्यवहारार्हस्य ग्रामभृत्यादेरेकस्य नृषु एकस्मिन् दिने यद्वतस्य भृत्यस्तेनैवाज्ञाविना क्रीतत्वात् एवमन्यस्मिन्नन्यस्यापरस्मिन्नपरस्येति अनित्यः सम्बन्धो दृश्यते यस्य यावत्सम्बन्धः, स्वामित्वं तावदेव तस्य ममत्वं मदीयोयं भृत्यादिरितिधीः ॥ ७ ॥

एवं यो नित्यः शाश्वतो निरहंकृतः जाते जाने पुत्रत्वाद्यहंकाररहितोपि यद्वा पितृपुत्रादिसम्बन्धानुपलंभे अहं पितायंपुत्र इत्याद्यहंकाररहितोपि सः योनिगतः पुनः पुनर्जन्मजालगतः संसारे प्रविष्ट इत्यर्थः यावत् यत्र पित्रादौ पुत्रादिरूपेण उपलभ्येत तावदेव तत् तस्मिन् पुत्रादौ तस्य पित्रादेः स्वत्वं स्वकीयत्वम् ॥ ८ ॥

एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक् ।
आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ॥ ९ ॥
न ह्यस्यातिप्रियः कश्चिन्नाऽप्रियः स्वः परोपि वा ।
एकः सर्वधियां द्रष्टा कर्तृणां गुणदोषयोः ॥ १० ॥
नादत्त आत्मा हि गुणं न दोषं न क्रियाफलम् ।
उदासीनवदासीनः परावरदृगीश्वरः ॥ ११ ॥

श्रीशुक उवाच ।

इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा ।
विस्मिता मुमुचुः शोकं छित्त्वाऽऽत्मस्नेहशृङ्खलाम् ॥ १२ ॥
निर्हृत्य ज्ञातयो देहं तथा कृत्वोचिताः क्रियाः ।
तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदम् ॥ १३ ॥
बालघ्न्यो व्रीडितास्तत्र बालहत्या हतप्रभाः ।
बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितम् ।
यमुनायां महाराज ! स्मरन्त्यो द्विजभाषितम् ॥ १४ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणाय नमः ।

श्रीशुकउवाच ।

अनन्तर हे राजन् ! देवऋषी (नारद) जी मरे भये राज पुत्र को शोक करने वाले ज्ञातियों के आगे बोले ॥ १ ॥

नारद उवाच ।

हे जीवात्मन् तुमारा मंगल हो तुम अपने माता और पिता को देखो । और तुमारे शोके से अति तप्त, तुमारे सुहृद और बन्धुओं को देखो ॥ २ ॥

अपने कलेवर में प्रवेश करके और शेष जो आयु है उसमें पिता के दिये हुए भोगों को भोगो और राज्यसिंहासन् का अधिकार लो ॥ ३ ॥

जीव उवाच ॥

जीव बोलाकि देव तिर्यक और मनुष्ययोनि में कर्मों से भ्रमते हुए मेरे कौन जन्म में ये माता पिता हुए हैं ॥ ४ ॥

बन्धु, ज्ञातिवाले, बैरी, बीच के, मित्र उदासीन, और कारण से द्वेष करने वाले, ये सब ही के सब कोई परस्पर क्रम हुआ करते हैं ॥ ५ ॥

जैसे क्रय विक्रय के योग्य सुवर्णादि वस्तु अलग २ मनुष्योंके समीप भ्रमती है इसी प्रकार जीव भी अनेक योनियों में भ्रमता रहता है ॥ ६ ॥

मनुष्यों में विद्यमान वस्तु का भी सम्बन्ध अनित्य देख पड़ता है । जब तक जिस वस्तु में जिसका सम्बन्ध है तबही तक उस में उसका ममत्व रहता है ॥ ७ ॥

एसे ही नित्य निरभिमानी जीव भी जब तक जिस योनि में देख पड़ता है तब तक ही उस में उसयोनि के माता पिताओं का सत्व रहता हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

जीवस्य नित्यत्वं साधयति, एष नित्यः तत्र हेतुः अव्ययः अपक्षयशून्यः तत्कुतः ? सूक्ष्मः जन्मादिशून्यः तच्च कुतः ? सर्वाश्रयः जन्मादिमतो देहादेराश्रयः न तु देहादिरूपः यतः स्वदृक् स्वप्रकाशः सर्वाश्रयत्वमुपपादयति आत्मनो मायाख्यैः गुणैरात्मानमेव विश्वं विश्वात्मकं सृजति "तदात्मानं स्वयमकुरुत" इति श्रुतेः उपादानकारणत्वात्सर्वाश्रय इत्यर्थः जीवस्य वस्तुतो ब्रह्मत्वात् ब्रह्मण एव विश्वोत्पत्तिविषयकर्तृत्वेन सृष्टत्वाज्जीवः सृजतीति वाचोयुक्तिः । यद्वा स्वकर्मद्वारा सृष्टिनिमित्तत्वेन भोक्तृत्वं भोग्यस्य च सर्वस्य भोक्त्राश्रयत्वात्सर्वाश्रयत्वं बोध्यमिति द्रष्टव्यम् ॥ ९ ॥

यदुक्तं सुहृदन इति सुहृदो बान्धवांस्तप्तानिति, च तद्दूषयति न ह्यस्येति तत्र हेतुः एकः सुहृदादिसङ्गरहितः तत्कुतः गुणदोषयोर्हिताहितयोः कर्तृणां मित्रादीनां याः सर्वाधियो: विचित्रा वृत्तयः तासां द्रष्टा साक्षी ॥ १० ॥

स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः ।
गृहान्धकूपान्निष्क्रान्तः सरःपङ्कादिव द्विपः ॥ १५ ॥
कालिन्द्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः ।
मौनेन संयतप्राणो ब्रह्मपुत्राववन्दत ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यथोक्तं भुंक्ष्व भोगानित्यादि तत्राप्याह--नादत्त । इति गुणं सुखं दोषं दुःखं क्रियाफलं च राज्यादिकम् उदासीनत्वे हेतुः परावरदृक् कारणस्य कार्यस्य च साक्षी न तु भोक्ता यत ईश्वरः देहादिपारतन्त्र्यशून्यः अत एवम्भूतस्य मम च युष्माकं च सम्बन्धाभावाच्छोकं मा कुरुतेति वाक्यार्थः ॥ ११ ॥ १२ ॥ १३ ॥

द्विजभाषितमङ्गिरसा प्रोक्तं पुत्रादीनां दुःखहेतुत्वं स्मरन्त्यः पुत्रकामनाशून्या निर्मत्सराः सत्य इति भावः ॥ १४ ॥

निबिडपङ्कतुल्यं गृहं विहाय निष्क्रमणमतिधीरस्य तस्यैव योग्यं नान्यस्येति सदृष्टान्तमाह स इत्थमिति सरसः पङ्कात् द्विपो गज इव ॥ १५ ॥

कृताः पुण्यजलक्रियाः पितृतर्पणाद्या येन संयतप्राणो नियतेन्द्रियः ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तर्हि कीदृशं तस्य स्वरूपं? यत्स्वरूपगतो न भवत्यनियतः पितृपुत्रत्वादिसम्बन्ध इत्यत्राह-एष इति । एष जीवो नित्यः आद्यन्तरहितः कुतः ? अव्ययः नाशरहितः तत्कुतः ? सूक्ष्मः निरतिशयसूक्ष्मः विनाशकैरव्याप्यः निरतिशयसूक्ष्मत्वात् विनाशका हि जलाग्निविषशस्त्रादयो विनाश्यं व्याप्य विनाशयन्ति अस्य तु निरतिशयसूक्ष्मतया सर्वान्तःप्रवेशनस्वभावत्वेनाव्याप्यत्वादव्ययः एकः ज्ञानैकाकारः "एको व्रीहिः सुसम्पन्नः" इतिवज्जात्यभिप्रायकत्वकथनं न तु जीवस्वरूपैकत्वाभिप्रायकं तत्स्वरूपनानात्वस्य बहुप्रमाणप्रतिपन्नत्वात् सर्वाश्रयः सर्वेषां बुद्धीन्द्रियमनःप्राणादीनामाश्रयो धारकः स्वमात्मानं पश्यतीति स्वदृक् प्रत्यग्रूपः यद्वा स्वेनैव दृश्यत इति स्वदृक् स्वयंप्रकाशः अस्त्वीदृशं तस्य स्वरूपं किमयं स्वानर्थावहं देवमनुष्यादिशरीरं स्वयमेव सृष्ट्वा तत्र प्रविष्टोऽनर्थमनुभवति उत स्वकीयकर्मणा सृष्टं प्रविष्टोऽनुभवतीत्यत्राह--आत्मेति, न स्वानर्थावहं शरीरं स्वयं सृजति नापि केवलं कर्म, अपि तु परः परमपुरुषः आत्मनः स्वस्य मायया तस्य गुणैः सत्त्वादिभिरात्मानं प्रत्यगात्मानं विश्वं देवमनुष्यादिविश्वाकारं सृजति ॥ ९ ॥

ननु, कोऽसौ परः पुरुषः यदि कश्चित्सिध्यति तर्हि सोपीन्द्रादेरिवादिविषमसृष्टिं गर्भजन्मजरामरणाद्यनन्तदुःखगर्भां कुर्वन्वैषम्यनैर्घृण्ययुक्तः संसृष्टजीवान्नातिरिच्येत ? तत्राह - नहीति । अस्य परमपुरुषस्य कश्चिदतीव प्रीतिविषयः कश्चिदप्रियः स्वीयः परकीयो वा नास्ति किंतु सर्वेषु समदृष्टिरिति भावः तर्हि कथं विषमं सृजति ? तत्राह एक इति, गुणदोषयोः पुण्यपापयोः कर्तॄणां जीवानां सर्वबुद्धिवृत्तीनां एक एव सन् द्रष्टा भवति । तस्य सामान्येन स्रष्टृत्वेपि देवादिवैषम्यतत्तज्जीवसम्बन्धिपुण्यपापमूलकत्वान्न तस्य वैषम्यादिदोषप्रसक्तिरिति भावः सर्वधियां द्रष्टेत्यनेन तस्य सर्वज्ञत्वं पुण्यपापकर्तृत्वं, तत्फलभोक्तृत्वं चाभिप्रेतम् ॥ १० ॥

तदेवाह--नादत्त इति । आत्मा परमपुरुषो गुणदोषौ नादत्ते न स्वीकरोति गुणदोषकर्तृत्वमात्मनि न मन्यते अत एव क्रियाफलं सुखदुःखादिकम् नादत्ते किन्तूदासीनवदासीनः उदासीनवज्जीवान्तरात्मतया स्थितः यस्करोत्यत्यन्तोदासीनत्वमपि नास्तीत्यावेदितं गुणदोषयोस्तस्य प्रयोजककर्तृत्वात्साक्षात्कर्तृत्वाभावादुदासीनत्वं तत्तत्पूर्वं पूर्वं कर्मवासनानुसारेण प्रयोजयितृत्वाच्चानुदासितृत्वमपि विषयभेदादुभयोरेकस्मिन्न विरोध इति भावः । ननु, जीवस्यापि न गुणदोषयोः साक्षात्कर्तृत्वं तस्य निष्क्रियत्वाद्देहस्यैव साक्षात्कर्तृत्वात् किन्तु देहेन्द्रियादिनियमनरूपमेव तस्य कर्तृत्वम् एवञ्च प्रयोजयितृत्वं जीवपरयोरुभयोरप्यविशिष्टमिति कथमन्यतरस्य क्रियाफलोपादानमन्यतरस्य नेति विभागस्तत्राह—परावरदृगीश्वर इति, स्वयमीश्वरो जीवप्रभृतिदेहेन्द्रियमनःप्राणपर्यन्तानां नियन्ता सन् परावरदृक् परं प्रकृतिपुरुषाभ्यां विलक्षणं स्वस्वरूपमपरं जीवस्वरूपं प्रकृतिस्वरूपं च एतत्त्रितयं यथावत्पश्यतीति परावरदृक् जीवस्तु कर्मणा तिरोहितस्वभावः प्रकृतिमेवात्मानं मत्वा तद्गतं कर्तृत्वं साक्षात्स्वस्मिन्मनुत इति स क्रियाफलभोक्ता भवति परमात्मा तु नित्यासङ्कुचितापरिच्छिन्नानुभूत्या स्वपरयाथात्म्यावेदित्वाद्देहात्मभ्रमाभावेन क्रियाफलभोक्तेति भावः नहीत्यादिश्लोकद्वयं जीवपरतयापि यथायितुं शक्यं तथा हि, पूर्वप्रस्तुतं जीवस्वरूपमेव विशोधयति--नहीति, अस्य जीवस्य स्वतः प्रियाप्रियो न भवतः अपि तु कर्मकृताविस्यर्थः तथा स्वपरविभागोपि न. एकः एकरूपः ज्ञानैकाकारः देहगतविकारैरस्पृष्टत्वेन सदैकरूप इति वा गुणदोषयोः कर्तॄणां हेतुभूतानां सर्वधियां द्रष्टा आश्रयः नादत्त इति विवेकज्ञानवान् आत्मा गुणदोषान्वयं नाभिमन्यते इत्यर्थः ईश्वरः देहादिनियमनपरः परावरदृक् स्वस्वरूपप्रकृतिस्वरूपयोर्द्रष्टेत्युक्तवाणाविष्टो जीवः ॥ ११ ॥

तत उपरितनं वृत्तान्तमाह मुनिः—इतीति । इतीत्थमुदीर्योक्त्वा पुनर्जीवः कलेवराद्विनिष्क्रम्य गतः तदा मृतस्य ये ज्ञातयः ते तथा विस्मृतास्सन्तः आत्मनां स्नेहं यः पुत्रादि

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विषयकः स्नेहः स एव शृङ्खला तां छित्त्वाऽपोह्य शोकं मुमुचुः ॥ १२ ॥

ततो ज्ञातयः तं शवमग्नौ निर्हृत्य दग्ध्वा उचिताः मृतोद्देशेन कर्तव्याः क्रियाः कृत्वा शोकमोहादिप्रदं दुस्त्यजं स्नेहमनुरागं तत्यजुः ॥ १३ ॥

ततो बालघ्न्यः याः गरदानेन बालं हतवत्यः नास्सर्वाः द्विजेनाङ्गिरसा भाषितं स्मरन्त्यो व्रीडिताः लज्जिताः बालहत्यया-हताः प्रभाः यासां ताः यदूयाबहत्याव्रतं बालहत्यापनोदकं व्रतं ब्राह्मणैर्निरूपितं कर्तव्यत्वेन चोदितं तद्यमुनायां हे महाराज, चेरुरनुष्ठितवत्यः ॥ १४ ॥

ततः स चित्रकेतुः इत्थं द्विजोक्तिभिराङ्गिरस उक्तिभिः जीवेन संवादिताभिर्नारदोक्तिभिश्च प्रतिबुद्धः उदितः आत्मविवेको यस्य तादृशः सरसः पङ्काद्गज इव गृहमेवान्धकूपस्तस्माद्विनिष्क्रान्तः निर्गतः ॥ १५ ॥

कालिन्द्यां यमुनायां विध्युक्तप्रकारेण स्नात्वा कृताः पुण्याः जलक्रियाः पितृतर्पणादयो येन तादृशः मौनेन परमात्मस्वरूपसंदर्शनेन हेत्वर्थे तृतीया मौनार्थं संयतप्राणः नियमितान्तर्बाह्येन्द्रियः इतरैः सम्भाषणराहित्यरूपेण मौनेन वा; ब्रह्मपुत्रौ नारदाङ्गिरसौ अवन्दत ववन्दे नाम ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, तर्हि केन सहास्य नित्यसम्बन्धः ? इति तत्राह - एष इति । यः आत्ममायागुणैः स्वाधीनप्रकृतिगुणैर्विश्वं परावरं जगत्सृजति, आत्मानं चावताररूपेण व्यनक्ति स एव सर्वाश्रयः सर्वैर्नित्यसम्बद्ध इत्यन्वयः । अनित्यत्वात्कथं घटत इत्यत उक्तं नित्य इति, कोऽर्थ इत्यतो ऽव्यय इति अनेन नित्यशब्दो व्याख्यातः अनुपलब्धौ हेतुमाह--सूक्ष्म इति, न चायं जीववद्बहुत्वसंख्योपेत इत्याह-एक इति मुख्यत एकत्वसंख्याविशिष्ट इत्यर्थः सृष्टौ प्रवर्तमानस्य गुणसम्बन्धेन ज्ञानलोपो नास्तीत्याह - स्वदृगिति, स्वरूपभूतज्ञानस्यापि प्रबलप्रतिबन्धकेनाभिभवः किं न स्यादित्यत आह-प्रभुरिति, अनेन हरिणा नित्यसम्बन्धः पित्रादिभिरनित्य इति ज्ञापितम् "अनित्यसम्बन्धयुताः पित्राद्या नित्ययुग्घरिः" इति वचनात् ॥ ६ ॥

एवंविधस्य हरेर्योग्यतातिरेकेण न क्वापि प्रियाप्रियौ न इत्याह-नहीति । कुतोऽतिप्रियाद्यभावः ? इति तत्राह सर्वेति, गुणदोषयोः कर्तॄणां पुरुषाणां स्त्रीणाञ्च सर्वासां धियां कुशलाकुशलसाक्षित्वेन तदनुसारेण फलदातृत्वादतिप्रियाद्यभाव इत्यर्थः द्वितीयसद्भावे तद्वशात्कस्मिंश्चिदतिप्रियत्वादि संभवति न हि हरेस्तादृशोऽस्तीत्यभिप्रेत्याह एक इति ॥ १० ॥

साक्षित्वं स्पष्टयति-मेति । आत्मा परमात्मा कथं गुणानादानं हरेः "चातुर्गिकं जिघ्रति षड्गुणेश" इत्युक्तेरत उक्तं हीति हि शब्दो हेतौ गुणोपभोगेन लोकवद्वृद्ध्यभावो गुणानादानस्यार्थो न तु सर्वात्मनाऽभोक्तृत्वं तथात्वे "भोक्ता सद्गुणभोक्तृत्वाच्च भोक्ता तद्वृद्धितः । अचिन्त्यशक्तितस्तच्च युज्यते परमेशितुः" इति स्मृतिविरोधः स्फुटः उदासीन इव सर्वस्मादुत्तमत्वेन स्थित, एवं भोक्तृत्वाभोक्तृत्वे लोकविरुद्धे हरेः कथं घटेते इत्यत उक्तमीश्वर इति पराधरकत्वमृणां गामव्यस्तीत्यत उक्तमुदासीन इति तद्वत्तनुषु चाण्डाऽपन्तरदूरत्या तिष्ठतीव पराधरदर्शित्यर्थः ॥ ११ ॥

ज्ञातयस्तस्मिन् जन्मनि सपिण्डाः आत्मनां स्वेषां तस्मिन्पुत्रे स्नेहाख्यशृंखलां छित्त्वा ॥ १२ ॥

ज्ञातेः सपिण्डस्य तस्य देहं निर्हृत्य दग्ध्वोचिताः क्रियाः श्राद्धादिलक्षणाः ॥ १३—१४ ॥

तत्र चित्रकेतुः किं चकारेति तत्राह । स इत्यामिति ॥ १५ ॥

कृताः पुण्यजलैः क्रियास्तर्पणादिलक्षणाः येन स तथा ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं जीवस्य पारतन्त्र्यमुक्त्वा तत्सिद्ध्यर्थं परमपि दर्शयति - एष इति त्रिभिः, एष प्रत्यक्ष एव श्रुतियुक्तिभिश्च परमेश्वरः पुनरुक्तिर्निर्धारणार्था सूक्ष्मो दुर्ज्ञेयः ॥ ९ । १० ॥

आत्मा परमात्मा ॥ ११—१३ ॥

बालघ्नय इति सार्द्धकम् ॥ १४—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवं जीवस्य पारतन्त्र्यादनैश्वर्याच्च ततोऽन्यः कश्चित् स्वतन्त्रः ईश्वरोऽस्तीति प्रतीयते स एव कीदृश इत्यपेक्षायामाह—एष इति । जीवस्य मायया आवरणाद्परोक्षस्यापि परोक्षायमाणत्वात् तत्कृतदुर्वाच्यत्वमुक्तम् । ईश्वरस्य मायया अनावरणात् प्रचेतस्वङ्गिरसोपि जीवन्मुक्तत्वेनाविद्यावरणराहित्यादपरोक्षत्वेनैव-दुर्ज्ञेयत्वाच्यत्वमुच्यते एव इति, तत्र नित्यत्वादव्ययत्वं सूक्ष्मत्वमिति साधारणधर्मत्रयमीश्वरस्य, पारतन्त्र्यमनैश्वर्यमपि त्वसाधारणधर्मद्वयं जीवस्य पूर्वमेव व्यञ्जितम् ईश्वरस्याप्यसाधारणान् सर्वाश्रयत्वादीन् धर्मान् वक्तुं पुनरप्येनच्छब्दमुपन्यस्यति एष इति । आत्मशक्तिमयत्वादात्मामयम् ॥ ९ ॥

जीवस्य बन्धुत्वारिमध्यस्थत्वादयः अज्ञाननिबन्धा, नत्वीश्वरस्येत्याह नह्यस्येति । यत्तु भक्तोऽतिप्रियः स्वभक्तद्वेषी चाप्रियः परः शत्रुश्च इति तच्च "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्" इति । "तानहं द्विषतः क्रूरान् संसारेषु नराधमान्" इति गीतोक्तेर्भक्तवत्सलस्य भूषणमेव न तु दूषणं किञ्च जीवा बहवः ईश्वरस्त्वेक एव गुणदोषयोर्हिताहितयोः कर्तॄणां मित्रादीनां याः सर्वाधियः विविधा बुद्धयस्तासां द्रष्टा साक्षी ॥ १० ॥

जीवो हि मित्रामित्रयोर्गुणदोषौ गृह्णाति यतः क्रियाफलं

अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने ।
भगवान्नारदः प्रीतो विद्यामेतामुवाच ह ॥ १७ ॥
ॐनमस्तुभ्यं भगवते वासुदेवाय धीमहि ।
प्रद्युम्नायाऽनिरुद्धाय नमः सङ्कर्षणाय च ॥ १८ ॥
नमो विज्ञानमात्राय परमानन्दमूर्त्तये ।
आत्मारामाय शान्ताय निवृत्तद्वैतदृष्टये ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सुखं दुःखञ्च भुङ्क्ते ईश्वरस्तु नैवेत्याह—नाद्रत इति । अत एव उदासीनवत् सर्वान्तर्यामित्वेनासीनः परावरं भद्राभद्रं साक्षित्वेन पश्यतीति सः उदासीन इवेत्यरिमित्रादिप्रतियोग्युदासीनस्तु नैवेत्यर्थः अत ईश्वरमायानियतज्ञानामेषां चित्रकेत्वादीनां महदनुग्रहमूलामीश्वरप्रपत्तिं विना शोकमोहादिमयोऽयं संसारो दुस्तर एवेति किं मया बहुवक्तव्यमिति प्रकरणार्थः ॥ ११ ॥ १२ ॥ १३ ॥

बालहत्याहतप्रभा इति हतप्रभत्वेनैव लक्षणेन बालघ्न्यः एता एवेति यदा सर्वे विदितवत्यस्तदा व्रीडितास्ताः स्वयं गयमेव पापमयी बालमहन्मेति वचसा निष्कपटीभूयाङ्गिरःप्रभृति ब्राह्मणोपदिष्टं प्रायश्चित्तमाचेरुः ॥ १४ ॥ १५ ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, योनिशब्दनिर्दिष्टः संसारः केन सृष्टः यत्र प्रविष्टो जीवः पर्यटन् पुनःपुनः पारवश्यं प्राप्नोतीत्यत्र परमात्मानमाह—एष इति त्रिभिः, सर्वाश्रितनपदार्थाश्रयः आत्ममायागुणैः स्वप्रकृतिगुणैः आत्मानमेव आत्मशक्तिपरिणामात् विश्वं सृजति "तदात्मानं स्वयमकुरुत" इतिश्रुतेः ॥ ९ ॥

सर्वेषां ब्रह्मादिमत्कुणान्तानां जीवानां धियां गुणदोषयोश्च द्रष्टा ॥ १०—११ ॥

विस्मिताः सन्तः आत्मनः स्नेहशृंखलां छित्वा शोकं मुमुचुः ॥ १२ ॥

दुस्त्यजमपि स्नेहं तत्यजुः ॥ १३ ॥

द्विजगादितं पुत्रादीनां दुःखहेतुत्वमङ्गिरसा प्रोक्तं स्मरन्त्यः व्रीडितास्सत्यः यमुनायां यमुनातीरे बालहत्यायाः व्रतं प्रायश्चित्तं चेरुः इति सार्द्धश्लोकान्वयः ॥ १४ ॥

सरःपंकात्सरसः कर्दमात् द्विपो गज इव ॥ १५ ॥

कृताः पुण्यजले पुण्यप्रदे कालिन्दीजले क्रिया आचमनतर्पणाद्या येन सः संयता वशीकृताः प्राणा इन्द्रियाणि येन सः ॥ १६ ॥

———

भाषाटीका ।

यह आत्मा नित्य अव्यय और सूक्ष्म है । और यह सर्व देव मनुष्यादि देह के आश्रय और स्वयं प्रकाश है । और आत्ममाया गुणों से विश्वात्मक अपने को स्वयं समर्थ होकर सृजता है ॥ ९ ॥

न इसका कोई प्रिय न अप्रिय न कोई अपना न पराया यह एक ही गुण दोष की करने वाली सर्व बुद्धियों का द्रष्टा [देखने वाला] है ॥ १० ॥

यह आत्मा किसी के गुण दोष को नहीं ग्रहण करता और परावर (कार्य कारण) का देखने वाला और ईश्वर (समर्थ) है ॥ ११ ॥

श्रीशुक उवाच ॥

ऐसे कहकर जीव तो चला गया उस समय उसके सब ज्ञाति लोगों ने विस्मित होकर अपनी स्नेह रूप सांकर को तोड़कर शोक छोड़दिया ॥ १२ ॥

ज्ञाति लोगों ने भी उस देह को ले जाकर अन्त समय के उचित संस्कार करके, शोक मोह भय और आर्ति (दुःख) के देने वाला जो दुस्त्यज स्नेह रहा उसे छोड़ दिया ॥ १३ ॥

हे राजन् ! बालहत्या से नष्टकान्तिवाली बालहत्यारी, अन्य रानियों ने भी वहां लज्जित होकर, जो ब्राह्मणों ने बतलाया उस बाल हत्या के व्रत को अङ्गिरा के वाक्य का स्मरण कर के यमुनाजी तीर में किया ॥ १४ ॥

इस प्रकार ब्राह्मणों की उक्ति से बोधको प्राप्त होकर वह चित्रकेतु तलाव के पंक से जैसे हस्ती, इस प्रकार गृह रूप अन्धकूप से निकलकर । कालिन्दी में विधिवत् स्नान कर जलाञ्जलिदेकर । मौन हो श्वास रोककर दोनों ब्रह्म पुत्रों (अङ्गिरा नारद) को प्रणाम करता हुआ ॥ १५ ॥ १६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

नमो धीमहि ध्यायेम मनसा नमस्याम इत्यर्थः ॥ १८ ॥
निवृत्ता द्वैतदृष्टिर्यस्मात् ॥ १९ ॥

आत्मानन्दानुभूत्यैव न्यस्तशक्त्यूर्मये नमः ।
हृषीकेशाय महते नमस्ते विश्वमूर्त्तये ॥ २० ॥
वचस्युपरते प्राप्य य एको मनसा सह ।
अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः ॥ २१ ॥
यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ।
मृण्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥ २२ ॥
यन्न स्पृशन्ति न विदुर्मनोबुद्धीन्द्रियासवः ।
अन्तर्बहिश्च विततं व्योमवत्तं नतोऽस्म्यहम् ॥ २३ ॥
देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु ।
नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्टृपदेशमेति ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

न्यस्ता निरस्ताः शक्त्युर्मयो मायानिमित्ता रागद्वेषादयो येन ॥ २० ॥

मनसा सह वचस्यप्राप्योपरते सति य एक एव प्रकाशते वचसीति सर्वेन्द्रियोपलक्षणम् सोऽस्मानव्यात्सदसत्परः कार्यकारणयोः कारणम् ॥ २१ ॥

तदेवाह—यस्मिन्निति । यस्मिन्निदं कार्यकारणं तिष्ठति अप्येति, च यतः यतश्च जायते मृण्मयेषु घटादिषु मृज्जातिर्मृण्मात्रमिव सर्वानुस्यूतं यत् तस्मै ॥ २२ ॥

ननु, सर्वानुस्यूतं चेन्मृज्जातिवत्प्रतीयेत तत्कथं मनोवचसोरप्राप्तिस्तत्राह । यद्ब्रह्म व्योमवद्वितत्नमपि असवः प्राणाः क्रियाशक्त्या न स्पृशन्ति मन आदीनि च ज्ञानशक्त्या न विदुः तद्ब्रह्म नतोऽस्मि ॥ २३ ॥

तेषां तदज्ञाने हेतुमाह—देहेन्द्रियादयोऽमी यदंशविद्धा यच्चैतन्यांशेनाविष्टाः सन्तः कर्मसु स्वस्वविषयेषु प्रचरन्ति जाग्रत्स्वप्नयोः अन्यदा सुषुप्तिमूर्च्छादौ नैव प्रचरन्ति यथा अप्रतप्तं लोहं न दहति अतो यथा लोहमग्निशक्त्यैव दाहकं सदग्निं विना न दहति एवं ब्रह्मगतज्ञानक्रियाशक्तिभ्यां प्रवर्तमाना देहादयस्तत्र स्पृशन्ति न विदुश्चेति भावः जीवस्तर्हि द्रष्टृत्वात् जानातु नेत्याह स्थानेषु जाग्रदादिषु द्रष्टृपदेशं द्रष्टृसंज्ञां तदेवैति प्राप्नोति 'नान्यो जीवो नामास्ति 'नान्योऽतोऽस्ति द्रष्टा' इत्यादि श्रुतेः यद्वा द्रष्टृपदेशं द्रष्टृसंज्ञं जीवमपि तदेव एति जानाति न तु जीवस्तज्जानातीत्यर्थः तदुक्तं हंसगुह्यस्तोत्रे 'देहोऽसवोऽक्षाः' इत्यादि ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्तस्मै प्रपन्नाय यथाविधि गुरूपसत्तिं कृत्वा स्थिताय भक्ताय गुरुभक्तियुक्ताय प्रयतात्मने शमदमादिगुणकप्रयतमनस्काय भगवान्नारदः प्रीतः शिष्यलक्षणैर्हर्षितः एतां वक्ष्यमाणां विद्यां मन्त्रोपनिषद्गुह्यां चोपदिदेश ॥ १७ ॥

नारदेनोपदिष्टां विद्यामेवाह—नम इत्यादिना, परमहंसमक्त इत्यन्तेन । नायस्मकर्तरांत्रलक्षणं परमात्मानं विशेष्य प्रणमति वासुदेवादिचतुर्व्यूहात्मनावस्थिताय तस्मै तुभ्यं भगवते नमः एवंभूतं त्वां धीमहि ध्यायेमहि ॥ १८ ॥

विज्ञानमात्राय कर्मात्मनोऽपि जाड्यरहिताय निरतिशयानन्दस्वरूपाय आत्मारामाय आत्मनैव रममाणाय सुखान्तरनिरपेक्षायेत्यर्थः शान्ताय रागादिरहिताय निवृत्तद्वैतदृष्टये दृष्टिर्दृक् निवृत्ता द्वैतदृष्टिः आत्यादिकल्पना यस्य तस्मै आत्यादिकल्पनारहितायेत्यर्थः निवृत्तद्वैतदृष्ट्ये इति पाठे निवृत्ता द्वैतदृष्टिः स्थूलत्वाणुत्वादिभेददर्शनं यस्मिन् तथा च श्रूयते "अस्थूलमनण्वह्रस्वमदीर्घमगोत्रमचक्षुःश्रोत्रं तदपाणिपादम्" इत्यादि एवं भूताय भगवते षड्गुणपूर्णाय नम इत्यर्थः ॥ १९ ॥

स्वात्मानन्दानुभवेनैव न्यस्ताः निरस्ताः शक्त्या स्वयमेव ऊर्मयः अशनायापिपासाशोकमोहजरामरणरूपाः षडूर्मयो यस्य तस्मै हृषीकाणामिन्द्रियाणां तदधिपतेश्च ईशाय नियन्त्रे करणाधिपायेत्यर्थः महते स्वरूपेण गुणैश्च निरतिशयबृहते विविधविचित्रानन्तशक्तये तुभ्यं नमः ॥ २० ॥

एवं नमनं विधायाथ तस्मात्स्वरक्षां प्रार्थयते—वचसीति । मनसा सह वचसि उपरते निवृत्ते सत्यपरभावाद्वाङ्मनसयोर्निवृत्तयोस्सतोः यः प्राप्यः अपरिच्छिन्नतया अनुसन्धेयः अत एवैकः निःसमाभ्यधिकः प्राप्यस्यविभक्तिकपाठे अप्राप्येति छेदः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदा मनसा सहाप्राप्यावधि वचस्युपरते भाति यः अपरिच्छिन्नानन्दरूप इति शेषः वाङ्मनसापरिच्छेद्यापरिच्छिन्नानन्दरूप इत्यर्थः चिन्मात्रः ज्ञानैकाकारः अत एवैकः निःसमाभ्यधिकः कर्मकृतनामरूपरहितः सदसत्परः चेतनाचेतनाभ्यां विलक्षणः सः प्रसिद्धः भगवान्सोऽस्मान् रक्षतु. अत्र प्रतिपदमुपनिषदर्थाः अभिप्रेताः विज्ञानमात्राय परमानन्दमूर्त्तये इत्यनेन "विज्ञानमानन्दं ब्रह्म" इति श्रुत्यर्थः आत्मारामायेत्यनेन "सर्वैश्वर्यसम्पन्नः शम्भुराकाशमध्यगः" इति निवृत्तद्वैतदृष्टये इत्यनेन अनामरूपत्वेनेत्यनेन च "अस्थूलमनणु" इति आत्मानन्देत्यादिना "योऽशनाया पिपासे शोकमोहौ जरामृत्यू अत्येति" इति हृषीकेशायेत्यनेन "स कारणं करणाधिपाधिपः" इति महत इत्यनेन "सत्यं ज्ञानमनन्तं ब्रह्म" इति अनन्तशक्तय इत्यनेन "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति वचस्युपरत इत्यादिना "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणः" इति एक इत्यनेन "न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते" इति सदसत्परइत्यनेन "भोक्ता भोग्यं प्रेरितारं च मत्वा, क्षरात्मा नावीशते देव एकः, योऽव्यक्तमन्तरे सञ्चरन्यस्याव्यक्तं शरीरं, योऽक्षरमन्तरे सञ्चरन्यस्याक्षरं शरीरम्" इतिश्रुत्यर्था अभिप्रेताः ॥ २१ ॥

एवं सकलेतरविलक्षणमौपनिषदं ब्रह्म विशोध्य प्रणम्य ततः स्वानिष्टनिवृत्तिं प्रार्थ्य अथ तदेव ब्रह्म जगज्जन्मादिकारणत्वेनोपलक्ष्य प्रणमति यस्मिन्निति । सदसत्पर इत्यस्योदाहृतश्रुत्यर्थप्रत्यभिज्ञापकतया उक्तविभवस्वरूपस्य परस्य ब्रह्मणश्चिदचिच्छरीरकत्वप्रत्यभिज्ञापितोपनिषद्भिरेव प्रतिपन्नमित्यभिप्रेत्य चिदचिद्विशिष्टस्य जगत्कारणत्वलक्षणमत्रोच्यते, इदं स्थूलचिदचिदात्मकं जगत् यतः सूक्ष्मचिदचिद्विशिष्टाद्ब्रह्मणो जायते यस्मिन्नप्येति लीयते यस्मिन्नुक्तविधे ब्रह्मस्वरूपे तिष्ठति आधेयतया वर्तते " ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः" इति श्रुत्युक्तरीत्या आधारोऽपि ब्रह्मैवेति भावः तत्र दृष्टान्तः मृण्मयेष्विव मृज्जातिरिति मृज्जातिशब्दो मृज्जातीयपरः यथा मृण्मयेषु मृज्जातीयघटशरावादिकारणभूतेषु मृद्विकाररूपमृत्पिण्डेषु मृज्जातीयो घटादिर्जायते अपादानस्याधिकरणत्वविवक्षया सप्तमी मृण्मयेभ्यो यथा मृज्जातिर्जायत इत्यर्थः यद्वा मृण्मयेष्विति निमित्तसप्तमी निमित्तमत्रोपादानकारणं तथा च मृण्मयेभ्यो मृत्पिण्डेभ्य उपादानभूतेभ्यो मृज्जातीयो घटादिर्जायत इत्यर्थः, अथवा मृण्मयेष्विति पदमेव मृद्विकारघटादिपरं मृज्जातिर्मृत्पिण्डः मृण्मयेषु घटादिषु कारणतयाऽनुस्यूतः अथवा यस्मिन्नभिनिष्ठतीत्यत्रैव दृष्टान्तः मृण्मयेषु घटादिषु मृज्जातिर्मृत्त्वमभिनिष्ठति अपृथक्सिद्धप्रकारतया वर्तते तद्वदिदं विश्वं चिदचिदात्मकमपृथक्सिद्धप्रकारतया यस्मिन्वर्तते तस्मै ब्रह्मणे नमः अत्रापि "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्ति" इत्यादि श्रुत्यर्थोऽनुसन्धेयः ॥ २२ ॥

एवं प्रतिपन्नमौपनिषदं प्रत्यभिज्ञापनेन उपनिषदेकगम्यं परं ब्रह्मेति सूचितं तदेव दृढीकर्तुं तदितरप्रमाणाविषयत्वं वदन्प्रणमति-यमिति । "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुत्युक्तरीत्या कृत्स्नं जगदन्तर्बहिश्च विततं, व्याप्य स्थितमपि व्योम व्योमशरीरकम् "आकाशशरीरं ब्रह्म" इति श्रुतेः यं मनोबुद्धीन्द्रियासवो न स्पृशन्ति न विदुः तत्र कर्मेन्द्रियाण्यसवः प्राणाश्च क्रियाशक्तिप्रधाना न स्पृशन्ति न विषयीकुर्वन्ति मनश्च बुद्धिश्च चक्षुरादीनि ज्ञानेन्द्रियाणि च यं न विदुरित्यन्वयः बुद्धीन्द्रियाद्यविषयत्वेन तन्मूलकप्रत्यक्षादिप्रमाणाविषयमिति भावः अतीन्द्रियत्वे हेतुः व्योमेति व्योमशरीरकत्वेन तदन्तप्रवेशयोग्यतया ततोऽपि सूक्ष्मत्वादिन्द्रियाविषयमिति भावः तद्ब्रह्म त्वामहं नतोऽस्मि ॥ २३ ॥

किञ्च मन आदयः तदाहितज्ञानक्रियादिशक्तिमत्त्वेन तं न विषयीकुर्वन्तीति सदृष्टान्तमाह—देहेति । अमी देहेन्द्रियादयः यदंशविद्धाः यस्य "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इत्युक्तज्ञानक्रियादिशक्तिमतो ब्रह्मणोंऽशेन ज्ञानक्रियादिशक्तिलेशेन अनुविद्धाः व्याप्ताः कर्मसु स्वस्वव्यापारेषु प्रचरन्ति प्रवर्तन्ते अन्यथा यदंशेनाननुविद्धास्तु न प्रचरन्ति तेषामचेतनपरिणामरूपत्वेन वस्तुतो ज्ञानशक्तिविरहादिति, भावः तत्र दृष्टान्तः लोहमिति यथा प्रतप्तं लोहं दहति दाहकशक्तिनाग्निनानुविद्धमेव लोहमितरद्दहत्यग्निं न दहति अग्निनाननुविद्धन्तु इतरदपि न दहति तद्वत्परमात्मनिवाहितज्ञानक्रियाशक्तयो देहेन्द्रियादयः स्वस्वविषयेषु प्रचरन्ति न परमात्मनि अनाहितशक्तयस्तु स्वस्वकर्मस्वपि न प्रचरन्तीत्यर्थः तन्निवेन्द्रियाणि स्वतो ज्ञानशक्तिविरहात्तं मा विषयीकुर्वन्तु जीवस्तु स्वभावतो ज्ञानशक्तिमत्त्वात्तं विद्यादित्यत्राह स्थानेष्विति, तर्हि जीवोऽपि स्थानेषु द्रष्टृव्यपदेशमेति दृष्टृत्वव्यपदेशमेति गच्छति ईश्वरसङ्कल्पादेव जीवस्य ज्ञानविकास इत्यर्थः ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ तयोर्ब्रह्मपुत्रयोर्मध्ये नारदः इत्यनेनाधिकारगुणसम्पन्नस्य विद्योक्तफलं साकल्येन फलतीति ध्वनयति ॥ १७ ॥

चित्तसन्निहितं सम्बोध्य तुभ्यं नम इति वक्ति भगवन् इत्यादिविशेषणानि गुणसामग्रीद्योतकानि यथा सम्भवमूह्यानि ॥ १८ ॥

नित्यं निवृत्ता द्वैतदृष्टिः स्वावतारादौ भेददर्शनं येन स तथा तस्मै निवृत्तद्वैतदृष्टये इति पाठे निवृत्तेन द्वैतेनान्यथाज्ञानेन वृत्तिर्वर्तनं यस्य स तथा, तस्मै नित्यनिवृत्तदेहाद्यहंममाभिमानायेत्यर्थः ॥ १९ ॥

सम्यक् त्यक्ताः षडूर्मयो यस्येति तस्मै । यद्वा अशनायादिषड्भिर्विहीनाय "योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति" इति श्रुतेः ॥ २० ॥

मन्त्रमुपदिशन्ध्यानप्रकारमाह । वचसीति वाग्मनसा सह वचस्युपरते नष्टे चिन्मात्रमनसा सह प्राप्यः सदसत्परः स्थूलसूक्ष्मप्रपञ्चविलक्षणः ॥ २१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अलौकिकवस्तुनो लक्षणमन्तरेण तज्ज्ञानं दुःसाध्यमिति तल्लक्षणमाह—यस्मिन्निति । इदं जगद्यस्मिंस्तिष्ठत्यप्येति च यतश्च जायते अत्र दृष्टान्तमाह—मृण्मयेष्विति "जातिः सामान्यजन्मनोः" इत्यभिधानात् । मृदोजातिर्जन्म वृक्षादेः स तथा यथा वृक्षादिराशिर्मृण्मयेषु मृद्विकारेषु पृथिवीपर्वतादिषु तिष्ठत्यप्येति तेभ्यो जायते च तथा मृज्जातिर्मृत्त्वं मृण्मयेषु घटादिष्विवानुगतमित्यर्थो ब्रह्मणो बहुत्वाभावात् "एकमेवाद्वितीयम्" इति श्रुतेः

"पृथिवी पर्वताश्चैव मृण्मयाः समुदीरिताः ।
तेषु मृज्जातयः सर्वे जायन्ते स्थावरादयः" ॥

इत्यनेन विरुद्धव्याख्यानुपपन्नः ॥ २२ ॥

मनोबुद्धीन्द्रियासवः मनआदिव्यञ्जकत्वाच्चाः रुद्रादयो देवाः॥२३॥

भगवदनुग्रहभावाभावौ तद्विषयकज्ञानाज्ञानकारणमित्युक्तं तत्स्वरूपमाह - देहेति । यस्य हरेरंशैर्विद्धाः प्रेरिता देहेन्द्रियाद्यभिमानिनो देवा ज्ञानादिकर्मसु प्रचरन्ति प्रवर्तन्ते अन्यदा यदंशप्रेरणाभावे नैव प्रवर्तन्त इत्यन्वयः कथमिवं प्रतप्तमन्तर्निहितवह्निसामर्थ्याल्लोहं दाहकार्यं प्रवर्तते अप्रतप्तं न हि अहं तद्ब्रह्म शरणमेमि. कीदृशं ? देहेन्द्रियादिस्थानेषु स्थितं द्रष्टृपदेशं साक्षिणाम ॥ २४—२८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र श्रीभगवत्त्वेन नमस्यति—भगवत इति । तद्व्यूहत्वेन वासुदेवायेति संकर्षणस्यान्ते पाठः स्वोपास्यत्वेन तत्रैव विश्रान्तेः ॥ १८ ॥

ब्रह्मत्वेन नमस्यति—विज्ञानमात्रायेति । अत्र मूर्तिः स्वरूपं निवृत्तद्वैतदृष्टय इति यस्मिन् दृष्टे अन्यत्र दृष्टिर्नभवतीत्यर्थः। तच्चाद्वैतवादतो विशिष्य दर्शयति, आत्मानन्देति । स्वरूपानन्दस्यानुभवेन न्यस्ताः मानुसंहिताः शक्त्यन्तरपरम्परा येन तस्मै अनुभवस्य स्वरूपाभिन्नत्वेपि तृतीयार्थाधिक्यात् स्वरूपशक्तिरेव सिध्यति. परमात्मत्वेन नमस्यति-हृषीकेशायेति, विश्वकारणत्वेन, महत इति, विश्वत्वेनानन्तमूर्तय इति ॥ १९ । २० ॥

पुनर्भगवन्तं ब्रह्मस्वरूपत्वेन विशेषतःस्तौति—यत्रेति द्वाभ्याम् ॥ २१ ॥ २२ ॥

परमात्मत्वेन स्तौति--देहेति द्वाभ्याम् ॥ २३ ॥

देहेन्द्रिय इति । अत्राद्वैतशारीरकेऽपि सांख्यमाक्षिप्योक्तं यथा, अथ पुनः साक्षिनिमित्तमीक्षितृत्वं प्रधानस्य कल्पेत यथाग्निनिमित्तमयःपिण्डादेर्दग्धृत्वं, तथा सति यन्निमित्तमीक्षितृत्वं प्रधानस्य तदेव सर्वज्ञं मुख्यं जगतः कारणमिति । श्रुतिश्चात्र "तदेव भान्तमनुभाति सर्वं । कोह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् । चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" इत्याद्या इति । टीकोत्थापितश्रुतीच, जीवोनामतो नान्यः स्वयं सिद्धो नास्ति परन्तु तदात्मक एवेत्यर्थः । तथातोऽन्यो द्रष्टा नास्ति सर्वद्रष्टुस्तस्यापरो द्रष्टा नास्तीत्यर्थः इति व्याख्येयम् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एनां तु नमस्तुभ्यमित्यादि परमपरमेष्ठिकृतमस्त इत्यन्तां । तुभ्यं धीमहि त्वां प्रसादयितुं ध्यायेम ॥ १७ ॥ १८ ॥

परमात्मत्वेन जीववैलक्षण्यमाह—नवभिर्विशेषणैः । विज्ञानं चिच्छक्तिरेव मात्रापरिच्छदो यस्य तस्मै जीवस्त्वविद्यापरिच्छद इत्यर्थः । "मात्रा कर्णविभूषायां वित्ते माने परिच्छदे" इति मेदिनी परमानन्दमयी मूर्तिर्यस्य जीवस्तु पाञ्चभौतिकमूर्तिः । आत्मानन्द एव रममाणाय. जीवस्तु विषयानन्दे रमते । निवृत्तद्वैते मायिकप्रपञ्चे दृष्टिरासक्तिमयी यस्य जीवस्तु मायिकप्रपञ्चे आसज्जते ॥ १९ ॥

न्यस्ताः नितरामस्ताः शक्त्यूर्मयो मायानिमित्ता रागद्वेषादयो यत्र जीवस्तु प्राप्तरागद्वेषादितरङ्गः । हृषीकेशाय सर्वेन्द्रियनियन्त्रे जीवस्तु इन्द्रियनियम्यः महते जीवस्तु क्षुद्रः अनन्ता अविनाश्या मूर्तयो यस्य जीवस्तु विनाश्यशरीरः ॥ २० ॥

निर्विशेषब्रह्मत्वेन प्रणमति—वचसीति ॥ २१ ॥

जगत्कारणत्वेन यस्मिन्निदं जगत्तिष्ठति यतो जायते यस्मिन्नप्येति लीयते । मृण्मयेषु घटादिषु मृज्जातिः यथा कारणमित्यर्थः ॥ २२ ॥

इन्द्रियाद्यगम्यत्वेन प्रणमति-यदिति । क्रियाशक्त्या न स्पृशन्ति ज्ञानशक्त्या न विदुः । तस्य विदूरवर्तित्वादिति चेत्तत्राह, अन्तर्देहादीनामन्तरपि बहिरपि च ॥ २३ ॥

तेषां तदज्ञाने हेतुमाह—देहेन्द्रियेति । यदंशाविद्धाः यच्चैतन्यांशेनाविद्धाः सन्तः कर्मसु स्वस्वविषयेषु चरन्ति जाग्रत्स्वप्नयोः अन्यदा सुषुप्तिः मूर्च्छादौ नैव प्रचरन्ति - यथा अप्रितप्तं लोहं न दहति अतो यथा लोहमग्निशक्त्यैव दाहकं सदग्निं न दहति । एवमेव ब्रह्मशक्त्यैव स्वस्वविषयेषु प्रवर्त्तमाना देहादयो ब्रह्म न स्पृशन्ति नापि जानन्तीति भावः जीवस्तर्हि द्रष्टृत्वाज्जानातु तत्राह - स्थानेषु, जाग्रदादिषु द्रष्टृपदेशं द्रष्टृसंज्ञं जीवस्य द्रष्टृत्वसिद्ध्यर्थं जीवः किञ्चिच्चैतन्यप्रापणेन स्वयमेव तं प्राप्नोतीत्यर्थः । मम आद्य इव जीवा अपि जरा इति च केच्चाचक्षते । यद्वा तदंशेन तं पति जानाति न तु जीवो ब्रह्म जानातीत्यर्थः वक्ष्यते हंसगुह्यस्तवे "देहोऽसवोक्षाः" इत्यादि ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रवतः एकाग्रतां नीत आत्मा मनो येन तस्मै ॥ १७ ॥

ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतपरिवृढनिकरकरकमलकुड्मलोपलालितचरणारविन्दयुगल परम परमेष्ठिन्नमस्ते ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवते तुभ्यं नमो धीमहि मनसा नमस्कुर्मः वासुदेवादिमूर्तिभेदाय च ते तुभ्यं नमः ॥ १८ ॥

"विज्ञानं यज्ञं तनुते" इत्यादिश्रुतिप्रसिद्धो विज्ञानपदवाच्यो जीवो मात्रांशो यस्य तस्मै यद्वा विज्ञानमात्राय विशिष्टं ज्ञानमेव विज्ञानमात्रं ब्रह्म तस्मै मयूरव्यंसकादित्वात्समासः विज्ञानैकस्वरूपाय परमानन्दमूर्तये परमानन्दविग्रहाय निवृत्ता द्वैतदृष्टिः अतदात्मकपदार्थदृष्टिर्यस्मात्तस्मै सर्वात्मने नमः ॥ १९ ॥

आत्मानन्दस्य परमात्मानन्दस्यानुभूत्या न्यस्ताः नितरामस्ताः शक्त्यूर्मयः शक्तिभूतस्योपासकस्य जन्ममृत्युशोकमोहक्षुत्तृलक्षणा ऊर्मयो यस्मात्तस्मै ॥ २० ॥

इयत्तानवच्छिन्नत्वं प्राकृतनामरूपशून्यत्वञ्च भगवतो वदन् भगवान् अस्मान् अव्यादिति प्रार्थयते—वचसीति। मनसा सह वचसि अप्राप्य यस्य स्वरूपगुणादीयत्तामलब्ध्वा उपरते यः एक एव निःसमातिशयः ध्यातृहृदि प्रकाशते इति शेषः स नः अव्यात् कथंभूतः स्तनामरूपः। 'नामरूपे व्याकरवाणि' इति स्वविरचिते प्राकृते नामरूपे न विद्येते यस्य सः चिच्चेतना जीवः मात्रा अंशो यस्य सचिन्मात्रश्चेतनस्वरूपमात्रो वा न तु तार्किकाद्यभिमतजडस्वरूप इत्यर्थः सदसत्परः स्थूलसूक्ष्माख्यां देहदेहिस्वरूपाख्यां परः "विलक्षणः "यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः। अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" इति श्रीमुखगानात् ॥ २१ ॥

विश्वाधारत्वादिभगवद्गुणवर्णनपूर्वकं प्रणमति-यस्मिन्निति। यस्मिन्सर्वाधारे इदं विश्वं तिष्ठति यतोऽनन्तशक्तिमतः सर्वोपादानरूपात् इदं जायते। यस्मिंल्लयेति लीयते एवं सर्वेषु मृण्मयेषु घटादिषु आधारतयाऽपादानतया प्रवेशस्थानतया मृज्जातिर्भूमिरिव यद्व्याप्तिस्तस्मै ते ब्रह्मणे नमः ॥ २२ ॥

सर्वाधारत्वाद्विमत्वेपि सर्वदोषास्पृष्टं ब्रह्मेति वदन् प्रणमति—यन्न स्पृशन्तीति ॥ २३ ॥

ननु, सर्व्यां प्राप्तौ निषेधो भवत्यतोऽचेतनान् मनआदीन् प्रति न विदुरिति निषेधः कथं संगच्छते इत्यत्र जीवज्ञानसंसर्गान्मनआद्यचेतनगणः द्रष्टृपदेशमेतीत्याह—देहेन्द्रियेति। अमी देहादयः यस्य ब्रह्मणः अंशेन एव परस्यांशः "ममैवांशो जीवलोके जीवभूतः सनातनः" इतिश्रुतिस्मृतिप्रसिद्धेन जीवेन विद्धाः आविष्टास्तंतः कर्मसु स्वविषयेषु प्रचरन्ति चेष्टां कुर्वन्ति अन्यदा जीवसंसर्गाभावे तु न प्रचरन्ति तं नतोस्मीति पूर्वेणान्वयः तत्र दृष्टान्तः यथा लोहमप्यतप्तमग्निसंसर्गरहितं न दहति तद्वत् एवं हि तदचेतनं मनआदिकं वस्तुस्थानेषु विषयेषु, द्रष्टृपदेशमेति प्राप्नोति एवं प्राप्तौ सत्यां न विदुरिति निषेधः सङ्गच्छते मनआदयस्स्वं स्वं विषयं जानन्ति भगवन्तं तु तत्कृपां विना न जानन्तीति भावः ॥ २४ ॥

भाषाटीका।

अनन्तर जितांतः करण शरणागत उस भक्तचित्रकेतु को भगवान् नारद ने प्रसन्न होकर इस आगे कही हुई विद्या का उपदेश किया ॥ १७ ॥

भगवान्, वासुदेव संकर्षण प्रद्युम्न और अनिरुद्ध रूप जो आप, तिनको मैं नमस्कार करता हूँ और मन से ध्यान करता हूँ ॥ १८ ॥

निवृत्त द्वैत दृष्टि वाले शांत आत्माराम परमानन्द मूर्ति विज्ञान मात्र आपको नमस्कार हो ॥ १९ ॥

अपने ज्ञान और आनन्द से निरस्त किये है मायाकृत रागद्वेषादिक जिसने ऐसे हृषीकेश महान् विश्वमूर्ति भगवान् को नमस्कार हो ॥ २० ॥

मनके सहित न प्राप्त होकर वाणी के उपराम होने से जो एक प्रकाशित होता है, प्राकृत नाम रूपसे रहित चेतनस्वरूप कार्य कारण से परे वह ईश्वर हमारीरक्षा करे ॥ २१ ॥

मृत्तिकाके घटादि कार्य जैसे मृत्तिका से उत्पन्न, और मृत्तिका में स्थित, और लीन, होते हैं ऐसे ही यह जगत जिससे उत्पन्न, और जिसमें स्थित, और जिस में लीन होता है, तिस ब्रह्म को नमस्कार है ॥ २२ ॥

आकाश की तरह अन्तर बाहर व्याप्त, जिस ब्रह्म को मन बुद्धि इन्द्रिय प्राण न स्पर्श कर सके और न जान सके है तिस ब्रह्म को मैं नमस्कार करता हूं ॥ २३ ॥

देह इन्द्रिय प्राण मन बुद्धि ये सब जिसके चेतन्यांश से व्याप्त होकर अपने२ विषयों को जाग्रत् स्वप्नावस्था में ग्रहण करते हैं और सुषुप्ति मूर्छा समय में नहीं, जैसे लोहा जब अग्निमे तप्त होता है तब ही दहन करता है अतप्त नहीं, ऐसे ही परमात्मा जीव को जानता है जीव परमात्मा को नहीं जान सक्ता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

सकला ये सात्वतपरिवृढाः तेषां निकरः समूहस्तस्य करकमलानां कुड्मलैर्मुकुलैरुपलालिते चरणारविन्दयुगलं यस्य तस्यसम्बोधनम् परम उत्कृष्ट परमेष्ठिन् सर्वेश्वर, ॥ २५ ॥

श्रीशुक उवाच।

भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः।
ययावङ्गिरसा साकं धाम स्वायम्भुवं प्रभो ! ॥ २६ ॥
चित्रकेतुस्तु विद्यां तां यथा नारदभाषिताम्।
धारयामास सप्ताहमब्भक्षः सुसमाहितः ॥ २७ ॥
ततश्च सप्तरात्रान्ते विद्यया धार्यमाणया।
विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृप ! ॥ २८ ॥
ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः।
जगाम देवदेवस्य शेषस्य चरणान्तिकम् ॥ २९ ॥
मृणालगौरं शितिवाससं स्फुरत्किरीटकेयूरकटित्रकङ्कणम्।
प्रसन्नवक्त्रारुणलोचनं वृतं ददर्श सिद्धेश्वरमण्डलैः प्रभुम् ॥ ३० ॥
तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छामलान्तःकरणोऽभ्ययान्मुनिः।
प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमाऽऽनमदादिपूरुषम् ॥ ३१ ॥
स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः।
प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरम् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

पूर्वं स नारदोऽङ्गिरा आजगामेत्यङ्गिराः प्राधान्येनोक्तः चित्रकेतोः पुत्रप्रदत्वेन तस्य पूर्वमुक्तत्वात् इह तु नारदोऽङ्गिरसा साकं ययाविति नारदस्य प्राधान्यनिर्देशः तदुपदेशेन तस्य वैराग्योत्पत्तेः प्रभो हे समर्थ, ॥ २६ ॥

यथा यथावद्धारयामास ॥ २७ ॥

विद्याधराधिपत्यं चावान्तरफलं लेभे अप्रतिहतमस्खलितम् ॥ २८ ॥

कतिपयैरहोभिः विद्यया इद्धेन दीप्तेन मनसा गतिर्यस्य ॥२९॥

मृणालवत् गौरं शितिवाससं नीलाम्बरं स्फुरन्ति किरीटादीनि यस्य कटित्रं कटिसूत्रं प्रसन्नानि वक्त्राणि यस्य अरुणानि लोचनानि यस्य तथा तम् ॥ ३० ॥

दृष्ट्वा च तमादिपुरुषमभ्ययाच्छरणागतः अनमन्ननाम कथम्भूतः तस्य दर्शनेन ध्वस्तं समस्तं किल्बिषं यस्य स्वच्छममलमन्तःकरणं यस्य प्रणयेनाश्रुयुक्ते लोचने यस्य प्रहृष्टानि रोमाणि यस्य सः ॥ ३१ ॥

तं प्रसमीडितुं स्तोतुं चिरं नैवाशकत् न शशाक तत्र हेतुः उत्तमश्लोकस्य पादाब्जयोर्विष्टरमासनम् उपमेहयन् अभिषिञ्चन् प्रेम्णा उपरुद्धः अखिलानां वर्णानां निर्गम उच्चारणं यस्य सः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

भगवते पूर्णषाड्गुण्याय पुरुषाय पुरुषसूक्तप्रतिपाद्यमहापुरुषाय अत एव महानुभावाय महाविभूत्योर्नित्यलीलाविभूत्योरधिपतये तुभ्यं नमः सकलाः ये सात्वतपरिवृढा भागवतश्रेष्ठास्तेषां समूहस्तेषां करकमलानां कुड्मलैर्मुकुलैरुपलालितं चरणारविन्दयुगलं यस्य तस्य सम्बोधनं परम निःसमाभ्यधिक, परमेष्ठिन् परमे स्थाने स्थित, ते तुभ्यं नमः ॥ २५ ॥

हे प्रभो राजन्, भक्ताय प्रपन्नाय चित्रकेतवे एवमेतां विद्यामुपदिश्याङ्गिरसा सह नारदः स्वायम्भुवं धाम सत्यलोकं ययौ पूर्वं नारदेन सहाङ्गिरा आजगामेति प्राधान्येनोक्तोऽङ्गिराः चित्रकेतोः पुत्रदत्वेन तस्य प्रथमं वैराग्यजननद्वारोपकारकत्वादिह नारदोऽङ्गिरसा साकं ययौ इति नारदः प्राधान्येन निर्दिष्टः विद्योपदेशेन तस्य महोपकारकत्वात् ॥ २६ ॥

एवमुपदिष्टश्चित्रकेतुस्तां नारदेन भाषितां उपदिष्टां विद्यां यथाविधि सुसमाहितचित्तोऽप एव भक्षयन् सप्त दिवसान् धारयामास जजाप ॥ २७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः सप्तरात्रान्ते धार्यमाणया विद्यया तत्प्रभावेनेत्यर्थः नृपश्चित्रकेतुः अविभक्तिकपाठे हे नृप ! विद्याधराणामाधिपत्यञ्च लेभे चशब्दोऽन्वाचयपरः आनुषङ्गिकं विद्याधराधिपत्यं फलं लब्धवानित्यर्थः ॥ २८ ॥

प्रधानं फलमाह—तत इति ततः कतिपयैरहोभिर्विद्यया इद्धेन दीप्तेन मनसा गतिर्यस्य विद्याप्रभावेन यथेष्टगतिरित्यर्थः देवदेवस्य शेषस्य सङ्कर्षणस्य चरणसमीपं जगाम पातालं लोकादधः स्थितसङ्कर्षणसमीपं गतवानित्यर्थः ॥ २९ ॥

सङ्कर्षणं वर्णयन् तं ददर्शेत्याह—मृणालेति । मृणालवत्पद्मतन्तुवद्गौरं शुभ्रं शितिवाससं नीलाम्बरं स्फुरन्ति किरीटादीनि यस्य कटित्रं कटिसूत्रं प्रसन्नानि वक्त्राणि यस्य अरुणानि लोचनानि यस्य तं सिद्धेश्वराणां समूहैर्वृतं परिवेष्टितं विभुं सङ्कर्षणं ददर्श ॥३०॥

ततस्तस्य सङ्कर्षणस्य दर्शनेन ध्वस्तं किल्बिषं यस्य अत एव स्वच्छमन्तःकरणं यस्यात एव प्रवृद्धया भक्त्या प्रणयाश्रु आनन्दबाष्पं लोचनयोर्यस्य प्रहृष्टान्युदञ्चितानि रोमाणि च यस्य तादृशः आदिपुरुषं पुराणपुरुषं सङ्कर्षणमभ्ययादभिमुखं जगाम आनमत्प्रणतवान् ॥ ३१ ॥

ततः स चित्रकेतुरुत्तमश्लोकस्य सङ्कर्षणस्य पदाब्जविष्टरं पादपीठं प्रेमाश्रुलेशैरानन्दबाष्पकणैः मुहुर्मुहुरुपसेचयन्प्रेमोद्गत प्रेम्णा उपरुद्धः अखिलानां वर्णानामक्षराणां निर्गमम् उच्चारणं यस्या त एव भगवन्तं तं प्रसमीडितुं चिरं नैवाशकत् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, विष्णूपासनया शेषसमीपगमनं कथं सङ्गच्छते ? इति चेदुच्यते तत्तद्देवान्तर्यामिविष्णुविषयोपासनया तत्तद्देवसमीपप्राप्त्युपपत्तेः—

"अन्यान्तर्यामिणं विष्णुमुपास्यान्यसमीपगः ।
भवेद्योग्यतया तस्य पदं वा चाप्नुयान्नरः" ॥

इत्युक्तेः अनेन तत्तत्पदप्राप्तियोग्यश्चेत्सुतरां तत्तद्देवसमीपं गत इत्युक्तं भवति तस्मादत्र चित्रकेतोरनेन प्रत्यक्षविधामेन मुहुर्मुहुः शेषस्य सकाशमभ्ययादिति युज्यते चित्रकेतुना शेषान्तर्यामिविष्णुरुपासित इति कुत इति चेत्—

"शेषान्तर्यामिणं विष्णुं चित्रकेतुरुपास्य तु ।
शेषाद्विष्टहरेश्चापि वरान् प्राप्यापतद्गतिम्" ॥

इति वचनबलात् ॥ २९ ॥

शितिवाससं नीलवस्त्रं कटित्रं काञ्चीगुणं "कटिसूत्रं सारसनं कटित्रं कटिभूषणम्" इत्यभिधानम् ॥ ३० ॥

मनस्य वायोर्धृतिः कारणं पुरुषं पौरुषं यस्मिन्स तथा तम् ॥३१॥

उत्तमश्लोकस्य शेषान्तर्यामिणो हरेः पादपद्मयोर्विष्टरं पीठं उपरुद्धोऽखिलानां वर्णानां शब्दोपलक्षणानां निर्गमो द्वारं यस्य सः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

साक्षाद्भगवत्त्वेन स्तौति ॐ नम इति । तदेवं सङ्कर्षणोपासनापि द्वारमेव । तस्य सात्वत शास्त्रविग्रहत्वेन वक्ष्यमाणत्वात् परमं फलन्तु श्रीभगवानित्यभिप्रेतम् ॥ २५—३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

महामन्त्रस्य ज्ञानप्रकाशकत्वमुक्त्वा भक्तिरसपरिपूर्णत्वमाह—ओमिति । सकलसात्वतपरिवृढाः सर्वभक्तश्रेष्ठास्तेषां निकरस्य करकमलानां कुड्मलेन उपलालितं लघुसंवाहनवैलक्षण्या प्रीणितं चरणारविन्दयुगलं यस्य हे तथा भूतेति मामपि त्वत्पादसंवाहनसेवायां स्थापयेत्यभिलाषो ध्वनितः ननु, त्वामतिनिकृष्टं तस्यामत्युत्कृष्टसेवायां कथं नियुञ्जे इत्यत आह हे परमपरमेष्ठिन् परमपरमेश्वरः कर्तुमकर्तुमन्यथा कर्तुञ्च समर्थः ॥ २५ ॥

एतामित्यनेकवाक्यगर्भामेकामेव विद्यां महतीं अत्र चित्रकेतवे पुत्रप्रदत्त्वेनाङ्गिरसः प्राधान्यं मन्त्रप्रदत्त्वेन न तु नारदस्य अत एव पूर्वमङ्गिराः सनारद आजगामेत्युक्तं सम्प्रति यथाङ्गिरसा नारद इत्युच्यते हे प्रभो ! एतदाद्यभिप्रायज्ञाने परम समर्थः ॥ २६ ॥ २७ ॥

प्रथममवान्तरफलमाह—विद्याधराधिपत्यमिति ॥ २८॥

मुख्यं फलमाह—जगामेति ॥ २९ ॥

सितिवाससं नीलाम्बरं कटित्रं कटिभूषम् ॥ ३० ॥

तद्दर्शनेति । किल्बिषमत्र भगवत्प्राप्त्यसम्भावनामयं दुःखं ज्ञेयं दृष्ट्वा च अभ्ययात् अभिमुखोगच्छत् । अभ्येत्य चाऽऽनमत्॥३१॥

नत्वा च तुष्टावेत्याह—स इति । विष्टरमासनम् उपसिञ्चन् अभिषिञ्चन् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सकलसात्वतानां ये परिवृढाः श्रेष्ठास्तेषां निकरस्य समूहस्य कमलानां कुड्मलैर्मुकुलैरुपलालितं प्रीणितं चरणारविन्दयुगलं यस्य हे तथाभूतपरा मा यस्य हे परम, हे परमेष्ठिन् परमधामवासिन् महाविभूत्योः नित्यविभूतिलीलाविभूत्योः पतये ते नमो नमः ॥ २५ ॥

प्रभो हे उपदिष्टार्थधारणसमर्थ, ॥ २६ ॥

यथा यथावद्धारयामास ॥ २७ ॥

विद्याधराधिपत्यमवान्तरफलम् ॥ २८ ॥

ततः समाधाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ ।
नियम्य सर्वेन्द्रियबाह्यवर्त्तनं जगद्गुरुं सात्वतशास्त्रविग्रहम् ॥ ३३ ॥

चित्रकेतुरुवाच ।

अजित ! जितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता ।
विजितास्तेऽपि च भजतामकामात्मनां य आत्मदोऽतिकरुणः ॥ ३४ ॥
तव विभवः खलु भगवन् ! जगदुदयस्थितिलयादीनि ।
विश्वसृजस्तेंऽशांशास्तत्र मृषा स्पर्द्धन्ते पृथगभिमत्या ॥ ३५ ॥
परमाणुपरममहतोस्त्वमाद्यन्तान्तरवर्ती त्रयविधुरः ।
आदावन्तेऽपि च सत्वानां यद्ध्रुवं तदेवान्तरालेऽपि ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मुख्यं फलञ्च लब्धवानित्याह--ततः कतिपयाहोभिरिति । विद्यया इद्धा दीप्ता मनोभिलषिता गतिर्यस्य सः शेषस्य चरणान्तिकं जगाम ॥ २९ ॥

मृणालधवलपद्मतन्तुवद्गौरं शितिवाससं नीलवसनं स्फुरन्ति किरीटादीनि यस्य कटित्रं कटिसूत्रं सिद्धेश्वराणां मण्डलैर्वृतं ददर्श ॥ ३० ॥

तस्य दर्शनेन ध्वस्तं समस्तं किल्बिषं यस्य स्वच्छमुज्वलममलं निर्मलं चान्तःकरणं यस्य मुनिर्मननशीलः प्रवृद्धया भक्त्या प्रणयाश्रुपूर्णे लोचनयोर्यस्य प्रहृष्टरोमा आदिपुरुषमनमत् ननाम अभ्यगच्छत् शरणागतः ॥ ३१ ॥

स चित्रकेतुः उत्तमश्लोकस्य पवित्रकीर्तेः पदाब्जयोर्विष्टरमासनं प्रेमाश्रूणां लेशैर्बिन्दुभिरुपमेहयन् सिञ्चन् प्रेम्णोपरुद्धः अक्षिवर्णनिर्गममार्गः कण्ठो यस्य सः चिरं समीडितुं नैवाशकत् ॥ ३२ ॥

भाषा टीका ।

सकल पञ्चरात्रनिष्ठभक्तजनों के करकमलके कलियों से उपलालन कियेगये चरणारविन्द दोनों जिनके ऐसे, हे परमेश्वर ! हे परमेष्ठिन् ! आपको नमस्कार हो, आप षडैश्वर्य सम्पन्न महापुरुष हो और महा प्रभाव वाले, महाविभूति के पति हो आप को नमस्कार है ॥ २५ ॥

श्रीशुक उवाच ॥

हे प्रभो ! श्रीनारदजी शरणागत भक्त चित्र केतु को इस विद्या का उपदेश करके अङ्गिरा महर्षि के साथ ब्रह्मा के धाम को चले गये ॥ २६ ॥

चित्र केतु भी नारद की कही हुई उस विद्या को सावधान होकर सप्त दिवस तक केवल जल भक्षण करके धारण करता हुआ ॥ २७ ॥

हे राजन् ! तदनन्तर सप्तदिवस के पश्चात् धारण की हुई उस विद्या से बीच में अवान्तर फल अस्खलित विद्याधरोंके आधिपत्य को चित्र केतु प्राप्त हुआ ॥ २८ ॥

तदनन्तर कितने एक दिनों में विद्या से दीप्त मन की गति होने से, देवों के देव श्री शेषजी के चरणों के समीप में पहुंच गया ॥ २९ ॥

वहांपर कमल नाल सदृश गौर, नील वस्त्र को धारण किये, स्फुरायमाण किरीट केयूर (बाजूबन्द) काञ्चीगुण (कोंधनी) कंकणों को धारण किये, प्रसन्न मुखारविन्द और अरुण नेत्र वाले सिद्धेश्वर मण्डलों से उपासित प्रभु को देखा ॥ ३० ॥

उन शेषजीके दर्शन से नष्ट हुए समग्रपाप जिसके अतएव निर्मल अन्तः करणवाला और मनन शील होकर समीपगया। बढी हुई भक्ति से प्रेमाश्रु और रोमाञ्च वाला आदि पुरुष को नमस्कार करता हुआ ॥ ३१ ॥

वह चित्रकेतु प्रभु के चरणार विन्द के पीठ को बारम्बार प्रेमाश्रुओंसे अभिषेक करता हुआ, प्रेम से बहुत काल तक रुद्ध कंठ होकर भगवान् की स्तुति करने को समर्थ न हुआ ॥ ३२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

मनीषया बुद्ध्या मनःसमाधायैतद्वक्ष्यमाणं बभाषे प्रतिलब्धा वाग्येन सात्वतशास्त्रोक्तो विग्रहो यस्य तम् ॥ ३३ ॥

अन्योऽन्यप्रेमजानन्दनिभृतान्स्वामिसेवकान् ।
अभिनन्दन्मुदा स्तौति दशभिः पद्यभिर्विभुम् ॥

हे अजित ! अन्यैरजितोऽपि भवान्साधुभिर्भक्तैर्जितः स्वाधीन एव कृतः यतो भवानतिकरुणः तेऽपि च निष्कामाः अपि भवता विजिताः यो भवान् कामात्मनामात्मानमेव ददाति ॥ ३४ ॥

क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैराण्डकोशः ।
यत्र पतत्यणुकल्पः सहाण्डकोटिकोटिभिस्तदनन्तः ॥ ३७ ॥
विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम् ।
तेषामाशिष ईश ! तदनु विनश्यन्ति यथा राजकुलम् ॥ ३८ ॥
कामधियस्त्वयि रचिता न परम ! रोहन्ति यथा करम्भबीजानि ।
ज्ञानात्मन्यगुणमये गुणगणतोऽस्य द्वन्द्वजालानि ॥ ३९ ॥
जितमजित ! तदा भवता यदाह भागवतं धर्ममनवद्यम् ।
निष्किञ्चना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु भक्तैरेव जित इति कथं ? स्पर्धमानैरपि सृष्ट्यादिकर्तृभिरन्यैरीश्वरैर्जयस्यासम्भवात्तत्राह—तवेति । जगत उद्भवादीनि तवैव विभवा विभवनं महिमा लीलेति यावत् आदिशब्देन प्रवेशनियमादीनि विश्वसृजस्तु ब्रह्मादयो नेश्वराः किं तु ते तवांशो यः पुरुषस्तस्यांशाः तत्र एवं स्थितेऽपि पृथक्पृथगीश्वरा वयमित्यभिमानेन वृथैव स्पर्धन्ते ॥ ३५ ॥

त्वमेव सृष्ट्यादिकर्तेत्येतदुपपादयति—परमाणुः सूक्ष्ममूलकारणं परममहदन्तिमं कार्यं तयोस्त्वमेवाद्यन्तान्तरवर्ती आद्यन्ते चान्तरे मध्ये च वर्तितुं शीलं यस्य सः अत एव त्रयविधुर आद्यन्तमध्यशून्यो ध्रुवः ते च त्वया सृज्यन्ते न तु ध्रुवाः कुत इत्यत आह—सत्त्वानां सत्त्वेन प्रतीतानां कार्याणामाद्यन्तेऽपि अन्तरालेऽपि च तदेव ध्रुवं सुवर्णादिवत् ॥ ३६ ॥

एवं ध्रुवत्वेन कालतः परिच्छेदो नास्तीत्युक्तं देशतोऽप्यपरिच्छेदमाह—क्षित्यादिभिरिति । पूर्वस्मात्पूर्वस्माद्दशगुणमुत्तरोत्तरैरभिरावृतः यत्र त्वय्यणुकल्पोऽणुतुल्यः पतति परिभ्रमति तत्तस्मादनन्तस्त्वम् ॥ ३७ ॥

यस्मादेवं परमेश्वरस्त्वमेवान्ये देवास्तव विभूतयोऽतस्त्वां विहाय विषयकामनयाऽन्योपासका अतिमन्दा इत्याह—विषयेषु तृट् तृष्णा येषां ते नराकाराः पशवः कुतः ये विभूतीरिन्द्राद्या उपासते न तु परं त्वां ततः किं तत्राह—तेषामिति तदनु उपास्यनाशानन्तरं यथा राजकुलमनु राजकुलनाशानन्तरं तत्सेवकानामाशिषो नश्यन्ति तद्वत् अयञ्च परमोऽत्रभिर्मध्येऽपि नश्यन्त्येव ॥ ३८ ॥

विषयकामेनापि कृता त्वत्सेवा मोक्षफलैवेत्याह—कामधियो विषयकामना अपि हे परम ! त्वयि रचिताः कृताश्चेत् न रोहन्ति देहान्तरोत्पत्तये न भवन्ति करम्भबीजानि भर्जितबीजानि यथा यतोऽस्य जीवस्य गुणगणादेव द्वन्द्वसमूहा भवन्ति अतः कामेनापि निर्गुणस्य तव भजनाज्जीवनैर्गुण्यं भवतीत्यर्थः ॥ ३९ ॥

फलकामनयापि त्वदाराधनं यदा मोक्षहेतुस्तदा किं वक्तव्यं भगवद्धर्ममाहात्म्यमिति वक्तुं तत्सम्प्रदायप्रवर्तकत्वेन च भगवन्तं स्तौति—जितमिति । यदा भवान्भागवतं धर्ममाह तदा हे भगवन्, त्वया जितं सर्वोत्कर्षेण स्थितं तत्र हेतुः ये निष्किञ्चनाः सनत्कुमारादयो मुनयस्ते यं भगवन्तमपवर्गाय सेवन्ते तेन भवता जितम् यं धर्ममिति वा ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो मनीषया बुद्ध्या मनः समाधाय स्ववशीकृत्य प्रतिलब्धवाग्येनासौ चित्रकेतुः प्रतिलब्धवाक्स इति पाठान्तरं तत्र प्रतिलब्धवागभूत् सर्वेन्द्रियाणां बाह्यवर्तनं बाह्यव्यापारं नियम्य अपोह्येत्यर्थः सात्वतशास्त्रं पञ्चरात्रशास्त्रं (१) तत्प्रतिपाद्यो विग्रहो यस्य तं जगद्गुरुं सात्वततन्त्रोपदेष्टारं सङ्कर्षणं प्रतिलक्ष्यमाणं बभाषे वक्ष्यमाणां स्तुतिमकरोदित्यर्थः ॥ ३३ ॥

तामेवाह—अजितेत्यादिना, सहस्रमूर्ध्ने इत्यन्तेन, तावदाश्रयणसौकर्यापादकसौलभ्यवात्सल्यमहौदार्यगुणविशिष्टं स्तौति—अजितेति । हे अजित ! इतरैः स्वाधीनं कर्तुमशक्य हे दुर्लभेत्यर्थः । तथापि साधुभिर्जितः भवान् सुलभ इत्यर्थः कथम्भूतैः साधुभिर्विजितः आत्मा मनो यैस्सममतिभिः कृत्स्नं जगद्ब्रह्मात्मकत्वेन पश्यद्भिः कथमेतत्साधुभिर्विजितोऽहमिति तत्राह—यो भवान् भजतामकामात्मनाम् अनन्यप्रयोजनेन भजतामात्मानं स्वं स्वरूपं ददातीत्यात्मदः स्वपर्यन्तदातेत्यर्थः एवं सौलभ्यमुक्तम् आत्मद इत्यनेन महौदार्यञ्च; अथ वात्सल्यमाह—भवता त्वया ते साधवो विजिताः कुतः ? यतस्त्वमतिकरुणा आश्रितवात्सल्यविवशः अत्यन्तवात्सल्येन त्वया साधवोऽपि वशीकृता इत्यर्थः ॥ ३४ ॥

ननु, परत्वे सत्युक्तं गुणत्रयमाश्रयणसौकर्यापादकमन्यथा तृणस्येव सौलभ्यं दरिद्रस्येवौदार्यं पित्रादेरिव कारुण्यमकिञ्चित्करं स्यादित्यत्र परत्वविशिष्टं स्तौति—तवेति । हे भगवन् ! जगतः उत्पत्तिस्थितिलयादीनि आदिशब्देन महानन्दरूपमोक्षान्तर्नियमनादिर्विवक्षितः तव विभवः ऐश्वर्यम् [illegible] परो-

(१) तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यत इति प्रथमस्कन्धोक्तेः ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न्नास्तीत्यर्थः एवं परत्वं तत एव निरुपाधिकस्वामित्वञ्चोक्तं ननु, जगदुत्पत्त्यादीनि ब्रह्मरुद्रादीनां विभवो न ममेत्यत्राह—विश्वसृज इति । विश्वसृजो ब्रह्मादयः ते तवांशांशाः अग्नेर्विस्फुलिङ्गा इव स्वदंशांशभूतत्वात्तेषां विभवो जगदुत्पत्त्यादिरित्यर्थः त्वन्नियोगेन ते जगदुत्पत्त्यादिकर्त्तार इति भावः ननु, तेऽपि वयं विश्वस्य सृष्ट्यादिकर्त्तार इति स्पर्द्धन्ते तत्राह—तत्रेति । तत्र तेषां त्वदंशांशत्वे सति तावन्मात्रेणैव वयमपि पृथगीश्वरा इत्यभिमानेन भवतामीशितृत्वं परमपुरुषायत्तम् इत्यज्ञात्वा मुधा व्यर्थमेव स्पर्द्धन्ते तेषां स्पर्द्धामात्रमवशिष्यते नत्वीशत्वं सिद्ध्यतीति भावः ॥ ३५ ॥

जगदुत्पत्त्यादेस्तदेकविभवत्वं दृष्टान्तमुखेन विशदयन् स्तौति—परमाण्विति । परमाणुपरममहतोरल्पीयसो विपुलस्य च वस्तुनो याऽन्याद्यन्तान्तराणि सृष्टिसंहारस्थित्यवस्था इत्यर्थः तेषु वर्त्तत इतिवर्त्ती अन्तरात्मतया व्याप्य स्थितः त्रयविधुरः आद्यन्तमध्यरहितः त्वमेव कार्यस्य वस्तुनः कारणात्मतया यदादावपि तिष्ठतेऽन्ते च यदवशिष्यते तद्विभवत्वमेव हि कार्यस्य वस्तुनो दृष्टं यथा मृत्सुवर्णात्मकघटकटकादाविति दृष्टान्तोऽभिप्रेतः एवं समष्टिव्यष्ट्यात्मकस्य कृत्स्नस्य कार्यजातस्यादौ कारणत्वेनावस्थानादन्ते चावशेषात्त्वद्विभव एव जगदुत्पत्त्यादिः न तु मध्यस्थचतुर्मुखादेरिति भावः कार्यं वस्तु मध्यस्थस्य विभवो नेति किं वक्तव्यमित्याह—आदाविति । सत्त्वानां कार्यत्वेनावस्थितानां पदार्थानामादावन्ते च यत् ध्रुवं स्थिरम् आदौ कार्यत्वेनावस्थितम् अन्ते चावशिष्टमित्यर्थः अन्तरालेऽपि तदेव अन्तरालावस्था तद्विभव एव आद्यन्तयोर्यदस्ति तस्य मध्यस्थविभवत्वं किं पुनर्न्यायसिद्धमिति भावः एवं कालत्रयवर्त्ती त्वमेवेति भावः अनेन कालतोऽपरिच्छिन्नत्वमप्युक्तम् अथ सर्वदा सर्वत्रान्तरात्मतया व्याप्य स्थितिकथनेन सर्ववस्तुसामानाधिकरण्यरूपवस्त्वपरिच्छेदोऽप्युक्तः सर्ववस्तुसामानाधिकरण्येनैव हि वस्त्वपरिच्छेदः यद्वा स्वापेक्षयोत्कृष्टगुणवस्त्वन्तरराहित्यं वस्त्वपरिच्छेदः स हि जगत्कारणत्वतदुपयुक्तसार्वज्ञ्यसत्यसङ्कल्पत्वाद्यखिलगुणजातस्य कथनेनाभिहितप्राय एव ॥ ३६ ॥

एवं द्विविधपरिच्छेदराहित्यमुक्त्वाथ देशपरिच्छेदरहितत्वं वदन्नेतत्त्रिविधपरिच्छेदराहित्यमेव त्वय्यनन्तशब्दस्य प्रवृत्तौ निमित्तमित्याह—क्षित्यादिभिरिति । पूर्वस्मात्पूर्वस्माद्दशगुणमुत्तरैरधिकैः क्षित्यादिभिः पृथिव्यप्तेजोवाय्वाकाशाहङ्कारमहद्भिः सप्तभिरावृतः एषः; परिदृश्यमानोऽण्डकोशः ईदृशीभिरण्डकोटिभिः सह सहितो यतस्त्वं ततोऽनन्त! विभुत्वानन्त्यादनन्तत्वात्त्वमनन्तशब्दवाच्य इत्यर्थः एतमण्डकोशं विशिनष्टि यत्र एतस्मिन्नण्डकोशेऽणुकल्पः जीवः पतति संसरति यद्वा यस्मादीदृशीभिरण्डकोटिभिः सह एषोऽण्डकोशः यत्र यस्मिन् त्वयि अणुकल्पः पतति परिभ्रमति ततस्त्वमनन्तः सर्वस्य चेतनाचेतनात्मकाण्डकोशरूपदेशस्य त्वद्व्याप्यत्वादिदमनन्तलीलं रूपदेशपरिच्छेदरहितत्वमिति देशापरिच्छेद उक्तः एतत्त्रिविधपरिच्छेदराहित्यमपि परत्वापादकं भवतीत्यर्थः ॥ ३७ ॥

एवं तस्य समाश्रयणीयोपयुक्तगुणवत्त्वाद्देवतान्तरस्य तदभावं वदन् तमेव स्तौति—विषयतृष इति, ये विषयेषु शब्दादिषु तृट् तृष्णाऽभिलाषो येषां ते फलकामा नरा एव पशवः ते विभूतीः त्वद्विभूतिभूतान् रुद्रादीनुपासते न तु परं सर्वोत्कृष्टं विभूतिपतिमुपासते हे ईश ! तेषां विषयतृषां विभूतीरुपासीनानामाशिषस्त्वद्विभूतिभिर्दत्ता अर्वाचीनाः स्वर्गादिफलरूपाः पुरुषार्थाः तदनु विभूतिविनाशमनु नश्यन्ति यथा राजकुलं यथा राजकुलविनाशमनु तत्सेवकानामाशिषो नश्यन्ति तद्वत् उक्तं च त्वयैव । "यो यो यां यां तनुं भक्तः' इत्यारभ्य 'लभते च ततः कामान्मयैव विहितान् हि तान् । अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्" इत्यन्तेनेति भावः त्वद्विभूतीनां परत्वादिगुणपूर्त्यभावादिति तात्पर्यम् ॥ ३८ ॥

त्वदेकप्रयोजनत्वेनकृतात्त्वत्सेवात्तु निरतिशयनित्यफलजनकत्वान्न नश्यन्तीत्याह—कामधिय इति । त्वयि विषयभूते रचिताः कृताः याः कामधियः त्वदेकप्रयोजनास्त्वद्विषया उपासनाः हे परम, पुनर्न रोहन्ति न बन्धाय भवन्ति नित्यनिरतिशयत्वदनुभवरूपानन्दापादका एव भवन्ति न पुनर्जन्ममरणादिरूपबन्धाय भवन्तीत्यर्थः पुनररोहे दृष्टान्तः यथा करम्भबीजानीति यथा भर्जितबीजानि पुनर्न रोहन्ति नाङ्कुरीभवन्ति तद्वत् पुनररोहे हेतुं वदंस्तं विशिनष्टि—ज्ञानात्मनीति, गुणमयः सत्त्वादिप्रकृतिगुणविकारः स न विद्यते यस्य सोऽगुणमयस्तथाभूते नित्यासंकुचितापरिच्छिन्नज्ञानस्वरूपे त्वयि गुणमूलककर्माद्यधीनत्वासन्मूलकसंकुचितज्ञानत्वाकर्मसाध्यमोक्षाधिपत्वप्रपन्नजनानिष्टपरिहारकत्वेष्टप्रापणसमर्थत्वादिगुणयुक्ते त्वय्यर्थाय रचिताः कामधियो न पुनरनर्थरूपबन्धाय भवन्ति देवतान्तराणां तूक्तविपरीतगुणत्वात्तेषु रचिताः स्वर्गादिकामधियो नश्यन्तीति भावः तदेवाह—गुणगणात इति, अस्य विरिञ्चप्रभृत्याकीटपर्यन्तस्य जीववर्गस्य गुणानां सत्त्वादिप्रकृतिगुणानां ये गणा विकाररूपाः स्तब्धाः तेभ्यः गुणगणतः द्वन्द्वजातानि सुखदुःखादीनि द्वन्द्वजातानि भवन्ति उपास्यदेवतान्तरस्यापि उपासकवत्कर्मवश्यत्वादियुक्तत्वात्तत्सेवाशक्तचित्तस्य पुंसस्तादृशसेवावदनिष्टपरिहारेष्टप्रापणक्षमा न भवतीति भावः एवं समाश्रयणानन्तर्याद्यभिमतकार्योपपादकगुणपूर्त्तिरप्युक्ता. एवं समाश्रयणीयत्वोपयुक्तपरत्वादिगुणपूर्त्यभावेन देवतान्तरेभ्यो वैलक्षण्यं तस्यैव समाश्रयणीयत्वं चोक्तं भवति ॥ ३९ ॥

अथ यत एव भवानिदम्भवः परः अत एव त्वदाराधनात्मकस्त्वदभिहितो धर्मः तदनुष्ठातारश्चानवद्यत्वादिरूपधर्मान्तरानुष्ठातृभ्यो विलक्षणा इत्याह—जितमिति त्रिभिः, हे अजित, अजितशब्दप्रवृत्तिनिमित्तमाह, भवता यथा जितं सर्वं स्ववशीकृत्य तस्मात्परत्वेनावस्थितम् एतदेवाजितशब्दप्रवृत्तिनिमित्तमित्यपि सूचितं तथा धर्मेणेति शेषः त्वदाराधनभूतधर्मेणापि जितमित्यर्थः सोऽपि सर्वोत्कृष्ट इत्यर्थः कोऽसौ धर्मः ? तत्राह—यं भागवतं भगवतस्तवाराधनरूपमनवद्यं निर्दुष्टं धर्मं भवानाह पञ्चरात्रगीतादिमुखेनोक्तवान् यत्र धर्मे निष्किञ्चनाः अनन्यप्रयोजनाः आत्मारामाः ब्रह्मगुणा-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वभक्तपरा ये मुनयः अपवर्गाय मुक्तये उपासतेऽनुतिष्ठन्ति ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मनीषया श्रुतिरूपया प्रज्ञया प्रतिलब्धः सम्यक्प्राप्तो वाग्रसो वचनवीर्यं येन स तथा सात्वतानां शास्ता विग्रहस्तस्योपदेशाविशेषो यस्य स तथा तं सर्वेन्द्रियाणां बाह्येषु विषयेषु वर्तमानं व्यापारम् ॥ ३३ ॥

हे अजित ! अतिकरुणो यस्त्वमकामानां भजतां साधूनामात्मदो यस्मात्तस्ते साधवोऽपि भवता विजिताः किञ्च जितमनस्कैः समबुद्धिभिः साधुभिर्भवानपि जितो वशीकृतः चशब्दो नियतत्वं सूचयति ॥ ३४ ॥

तत्सत्त्वे प्रमाणमाह–नवेति । जगदुत्पत्त्यादीनि तव विभवः स्वरूपलक्षणानि खलु यस्मात्तस्तत्र तस्यामवस्थायां शास्त्रेण स्थितायां ते भिन्नांशाः विश्वसृजोऽहं जगदीश्वरो जगत्स्रष्टेति पृथक् जगदीश्वरत्वाभिमानेन मृषा निष्प्रयोजनं स्पर्धन्तीति व्यत्यासेन हरेर्माहात्म्यस्यानन्तत्वं दर्शयति ॥ ३५ ॥

तवविभव इत्यादिना गुणानन्त्यमुक्तमधुनाकालदेशानन्त्ये आह—परमाणिवति । त्वं त्रयाविधुरः अणुमहन्मध्यपरिमाणरहितोऽपि स्वतः प्राकृतपरिमाणाभावात् परमाणुपरममहतोराद्यावन्तेऽन्तरे च वर्तितुं शीलमस्यास्तीति आद्यन्तान्तरवर्ती परमाणुलक्षणकालावयवस्य परममहत्कालावयवस्य च मध्यकालावयवस्य च वर्तते इति सत्त्वानामित्युपलक्षणं घटादीनामप्याद्युत्पत्तेः पूर्वमन्ते प्रध्वंसादूर्ध्वं यत्ते स्वरूपं ध्रुवम् अव्यभिचारि तदन्तरकाले मध्यकालेऽपि वर्तत इति शेषः ॥ ३६ ॥

य आण्डकोशो दशगुणोत्तरैः सप्तभिः क्षित्यादिभिरावृतः स एषोऽण्डकोटिभिः सह यत्र भगवति अणुभ्योऽणुकल्पः सूक्ष्मात्सूक्ष्मतरो वर्तते तद्धरेः स्वरूपमनन्तमिति हेतुगर्भविशेषणम् अपरिच्छिन्नत्वादुचितमिति भावः ॥ ३७ ॥

एवं स्वरूपमुक्त्वाऽन्वयव्यतिरेकाभ्यां तज्ज्ञानफलमाह—विषयेति । विषयतृषः शब्दादिविषयतृष्णावन्तः अत एव नरपशवः विभूतीर्ब्रह्मादिशब्दवाच्याः परं तेषां पातारं ज्ञानादिपूर्तिप्रदातारं तेऽर्थ्येत्युत्तमं तदनु प्राप्तिसमनन्तरं किञ्चित्कालं फलानुभवानन्तरं वा "तद्यथास्यां ततः क्षीयत एव" इति श्रुतेः अराजकुलं पालकेन राज्ञा शून्यां जनसमुदायो धर्मविरुद्धानां राज्ञां कुलं वा ॥ ३८ ॥

कामधियः शब्दादिगुणविषयज्ञाना अगुणमये प्रकृतिगुणविकृतदेहादिशून्ये ज्ञानात्मनि रचिताः यदिस्युस्तर्हि पुनर्नारोहन्ति नोत्पद्यन्ते करम्भबीजानि भर्जितधानाः गुणगणाता विषयसमूहादस्य जगतो द्वन्द्वजालानि सुखदुःखादीनि भवन्तीति शेषः ॥ ३९ ॥

दुःखात्मकसंसारनिवृत्तिः केन स्यादित्याशङ्क्य भागवतधर्मोऽनुष्ठानेन तन्निवृत्तिः स्यादित्याशयवानाह—जितमिति । हे अजित, भवान्यदापवर्गाय मुनयो यं धर्ममुपासते तं भागवतधर्ममाह । तदा भवता संसारस्वरूपं जितं भागवतधर्मकथनेन भक्तानां संसारजयोपायो दर्शित इत्यर्थः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विश्वसृजः ब्रह्मरुद्रेन्द्राद्याः अंशांशाः अत्यल्पांशा इत्यर्थः ॥ ३५ ॥ ३६ ॥

दशगुणा उत्तरोत्तरा येषां तैरित्यर्थः ॥ ३७—३९ ॥

जितमिति निजोत्कर्षं आविष्कृतः । भगवन्निति पाठः स्वामिसम्मतः भवतेति तु प्रायः सर्वत्र ॥ ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रतिलब्धवाक् तत्कृपयैवेत्यर्थः । सात्वतशास्त्रोक्तः सच्चिदानन्दमयो विग्रहो देहो यस्येत्यनेन ज्ञानशास्त्रोक्तस्य मायामयविग्रहत्वस्य प्रामाण्यं वारितम् ॥ ३३ ॥

परस्पर वशीभावलक्ष्यानन्दरसाम्बुधौ । मज्जेतां भगवद्भक्तौ भक्त्यैवेत्याह - संस्तुवन् । हे अजित ! ज्ञानियोगिप्रभृतिभिस्त्वमजित एव साधुभिर्भक्तैस्तु भवान् जितः अधीनीकृतः सममतिभिः स्वकीयपरकीयसुखदुःखसमबुद्धिभिर्जितात्मभिर्जितमनस्कत्वेन मनोधर्मस्यकामस्यापि जितत्वात् निष्कामैः तेषां तदुपासने निष्कामत्वमेव त्वज्जये कारणमिति भावः । ते साधवोऽपि भवता विजिताः यतो भजतामकामात्मनां भजद्भ्यो निष्कामेभ्यः यो भवानात्मदः आत्मानमेव ददाति । यदि यूयं मां परिचर्य किमप्यपवर्गादिकमपि मत्तोनैव वृणुध्वे तर्हि यथेष्टं रात्रिदिनं मामेव परिचरथ मां ऋणीकुरुध्वेत्यात्मानं तेभ्योऽददेव बलादात्मनः सौन्दर्यं सौस्वर्यं सौरभ्यादीनि तच्चक्षुःश्रवणादीन्द्रियभोगार्थमर्पयतीत्यर्थः तेन तद्विजये भवतोऽप्यात्मदत्वमेव कारणमिति भावः । अत्र साधुभिरिति ज्ञानिभिरपीति न व्याख्येयम् । उत्तरार्द्धे भजतामकामात्मनामिति विशेषणद्वयस्य तद्व्यावर्त्तकत्वात् ज्ञानिनां भजनन्तु मोक्षसिद्ध्यर्थं साधनदशायामेव । अत्र तु भजतामिति वर्त्तमाननिर्देशः । निष्कामत्वं त्वात्यन्तिकदुःखनिवृत्तिकामत्वात्तेषां नास्त्येव ॥ ३४ ॥

एवं प्रभुभक्तयोः परस्परवशीभावमाख्याय, प्रभोः प्रभावमाह—नवेति त्रिभिः विभवो महिमा ननु ब्रह्मादयो जगदुदयादि हेतवो दृश्यन्ते तत्राह—विश्वेति । ननु, ब्रह्मरुद्रादिभक्ताः स्वस्वसेव्यानामेव जगदीश्वरत्वं प्रतिपादयन्तो मिथः स्पर्द्धन्ते इत्यत आह--तत्र मृषेति पृथगभिमत्या वयं हैरण्यगर्भाः शैवाः सौरा इत्याद्यभिमानवन्तः ॥ ३५ ॥

त्वमेव सृष्ट्यादि कर्ता वास्तव वस्तुरूप इत्युपपादयति परमाणुः सूक्ष्म मूलकारणं परममहत् अन्तिमं कार्यं तयोस्त्वमेवाद्यन्तान्तरवर्ती आद्यावन्ते अन्तरे मध्ये च वर्तितुं शीलं यस्य सः

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अत एव त्रयविधुर आद्यन्तमध्यशून्यो नित्यः यतः सत्त्वानां कार्यवस्तूनाम् आदौ अन्ते च यत् ध्रुवं कारणत्वेन स्थिरं तदेव अन्तरालेऽपि सुवर्णादिवत्. अतस्त्वमेव सर्वकारणं वास्तवं वस्तु अन्यत् सर्वं कार्यजातमवास्तवं वास्तिवत्यर्थः ॥ ३६ ॥

एवं कालतः परिच्छेदाभावमुक्त्वा देशतोऽप्यपरिच्छेदमाह क्षित्यादिभिः क्षितिजलतेजआकाशाहङ्कारमहत्तत्त्वप्रकृतिभिः सप्तभिः पूर्वस्मात् पूर्वस्मात् दशगुणाधिकैरावृतः यत्र त्वयि अणुकल्पः पतति परिभ्रमति तत्तस्मादनन्तस्त्वम् ॥ ३७ ॥

एवं प्रभोः सर्वोत्कर्षमाख्याय भक्तस्यापि तमभक्तनिन्दया प्रथमं व्यतिरेकेणाह–विषयेति । विभूतीरिन्द्राद्याः न तु त्वां तदनु उपास्य नाशानन्तरम्. यथा राजकुलनाशानन्तरं तत्सेवकानामाशिषो नश्यन्ति ॥ ३८ ॥

भक्तस्योत्कर्षं कैमुतिकन्यायेनान्वयेनाह–कामा राज्याद्यास्तदर्थं धियो मतयस्त्वयि रचिताः कृताश्चेत् न रोहन्ति देहान्तरोत्पत्तये न भवन्ति, यथा, करम्भबीजानि भ्रष्टयवबीजानि तथैव. यद्यपि कामधियोऽन्यत्र रोहन्त्यो दृष्टाः. भ्रष्टबीजतुल्या न भवन्ति तदपि विषयसाङ्कर्यादङ्कुरन्तीत्याह, ज्ञानात्मनि चिन्मये अगुणमये गुणमयात् पदार्थाद्भिन्ने अतो रसकूपपतितं वस्तु यथा रस एव भवेदेवं त्वयि प्रविष्टाः कामधियोऽपि चिन्मय्यो भवन्तीति कथं तासां संसारहेतुत्वं स्यादित्यर्थः यतो गुणगणात एव द्वन्द्व जालानि संसारकारणानि भवन्ति ॥ ३९ ॥

यद्येवं स्वमहिम्ना सकामाया अपि भक्तेः श्रैष्ठ्यं तदा किमुत निष्कामायाः किञ्च भक्तेर्निष्कामत्वञ्च त्वत्प्रवर्तितमतो निष्कामभक्तेर्यश्च श्रेयः पूर्वं प्रतिपादितस्तत्रापि परमकृपालुः स्वभक्तवशीभावेच्छुस्त्वमेव कारणम्. इत्यतो वस्तुतस्तवैव विशेषतो जय इत्याह–जितमिति । हे अजित, भागवतं धर्मं अनवद्यं निष्कामं यदैव भवानाह तदैव जितं भवतैव भक्ता ऋणीकृताः येनैव निष्कामभक्तियोगेन भक्तैर्भवान् जीयते तस्य त्वयैवोक्तत्वात्तद्गुणं त्वमेव स्वभक्ताधीनत्वाभिलाषसाधकं कृपाविशेषमास्वादयन्तः प्रत्युतत एव भक्ता स्वयमेव ऋणीभूय स्थिताः भवन्तीति भावः । ये निष्किञ्चना प्रथमत एव शुद्धभक्ताःतथा तत्सङ्गतस्त्यक्तनिष्ठा मुनयस्तापसा आत्मारामाः जीवन्मुक्ताश्च, कथन यमेव धर्ममुपासते, यद्वा, निष्किञ्चना इत्यस्यैव विशेषणद्वयं मुनयस्त्वन्मननशीला आत्मारामास्त्वय्येव रममाणा इत्यर्थः अपवर्गाय अपकृष्टा वर्गाश्चत्वारोऽपि यतस्तस्मै प्रेम्णे अपवर्गश्च भवति । योसावित्यादि पञ्चमस्कन्धीयगद्योक्तलक्षणाय भक्तियोगायेति वा ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सात्वतशास्त्रे प्रतिपाद्यतया विग्रहोऽप्राकृतो देही यस्य तं यद्वा सात्वतगुणं विग्रहवन्तमिवं यस्य तम् ॥ ३३ ॥

जितः आत्मा मनो यैस्तैः अकामः ऐहिकामुष्मिकभोगवासनाशून्यः आत्मा मनो येषां तेषाम् ॥ ३४ ॥

जगदुदयादीनि तवैव विभवः ऐश्वर्यं विश्वसृजो ब्रह्मरुद्रेन्द्रादयः तवांशांशाः पृथगभिमत्या पृथक् पृथक् ईश्वरत्वबुद्ध्या तत्र जगदुदयादिषु मृषा स्पर्धन्ति त्वां सर्वात्मानं सर्वकर्तारं विस्मृत्येति शेषः ॥ ३५ ॥

परमाणुः अतिसूक्ष्मः परममहान्समष्टिकार्यरूपः पदार्थः तयोरादौ स्रष्टृतया अन्ते संहर्तृतया अन्तरं मध्ये नियन्तृतया वर्तमानस्त्वमसि अयं तु त्वं त्र्यर्यविधुरः स्रष्टृसंहर्तृनियन्तृरहितः अत एव सत्त्वानां ब्रह्मादिस्तम्बपर्यन्तानामाद्यन्तेऽपि यद्ध्रुवं तदेवान्तरालेऽपि यद्ध्रुवं तत्त्वमेवासि सर्वरूपोऽसीत्यर्थः ॥ ३६ ॥

दशगुणोत्तरैः पूर्वस्मात्पूर्वस्माद्दशगुणमुत्तरैरधिकैः क्षित्यादिभिः सप्तभिरेव किलावृतोऽण्डकोशः सहाण्डकोटिभिर्यत्राणुकल्प अणुतुल्यः पतति भ्रमत्यतः स त्वमनन्तोऽसि ॥ ३७ ॥

एवंभूतं परं पूर्णं त्वां मुक्तिदं ये नोपासते ते नरपशवः नराकारपशवः यतो विषयतृषो विषयेषु इन्द्रियार्थेषु तृट् येषां ते इन्द्रियार्थप्राप्तये विभूतीः भवद्विभूतिभूतान् इन्द्रादीन् उपासते तेषां नरपशूनां आशिषः इन्द्रादिदत्ताः सम्पदः तदनु इन्द्रादिनाशानन्तरं यथा राजकुलमनु राजकुलनाशानन्तरं तद्दत्ताः तत्सेवकाशिषो विनश्यन्ति तद्वद्विनश्यन्ति. अन्यदेवभक्ता अकृतार्था एवेति भावः ॥ ३८ ॥

त्वद्भक्तेषु तु ये सकामत्वेन निकृष्टाः तेऽपि कृतार्था भवन्तीत्याह—कामधिय इति । गुणाः विषयाश्रयाः गणतः बुद्धिस्थाविद्यावासनासमूहतः अस्य जीवस्य द्वन्द्वानां जन्ममरणादीनां जालानि भवन्ति एवंभूता ये जन्ममरणजालकसंसारप्रापकाः काम्यन्त इति कामाः, विषयगणास्तदर्थधियः बुद्धयः हे परम सर्वोत्तम, ज्ञानानां जीवानामात्मनि आश्रये प्रिये च गुणमयः संसारस्तद्भिन्ने मुक्तिप्रदे मुक्तौ प्राप्ये च त्वयि रचिताः कृताः न रोहन्ति जन्ममरणफलगा न भवन्ति किन्तु ध्रुवादीनामिव कामान् दत्वा मुक्तिप्रापका भवन्तीत्यर्थः ॥ ३९ ॥

सकामा अपि भगवद्भक्ता मुक्ता भवन्तीति भगवद्भजनमाहात्म्यमुक्त्वाऽथ निष्कामानां भगवद्भक्तानां श्रैष्ठ्यं निष्कामभजनस्य च भगवत्प्रोक्तत्वेन सर्वभूतहितत्वादिना च परमं श्रैष्ठ्यं मध्ये काम्यकर्मणोः दुष्टत्वञ्च वर्णयन् भगवन्तं स्तौति–जितमिति चतुर्भिः । हे अजित हे भगवन्, त्वया तदैव जितं सर्वोत्कर्षेण स्थितं यदा ये निष्किञ्चना मुनयः त्वन्मननशीलाः आत्मनि त्वय्येवारामो येषां ते मुमुक्षवः अपवर्गाय यमुपासते तमनवद्यं निष्कामं भागवतं धर्ममाह ॥ ४० ॥

भाषा टीका ।

तदनन्तर बुद्धि से मन का समाधान कर वाणी को प्राप्त होकर सर्व इन्द्रियों की बाह्य वृत्तियों रोककर ब्रह्मरूप ज्ञानात्मक विग्रह वाले, जगद्गुरु श्री शेषजी की इस प्रकार स्तुति करने लगा ॥ ३३ ॥

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र ।
विषमधिया रचितो यः सह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥ ४१ ॥
कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण ।
स्वद्रोहात्तव कोपः परसम्पीडया च तथाऽधर्मः ॥ ४२ ॥
न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः ।
स्थिरचरसत्त्वकदम्बेष्वपृथग्धियो यमुपासते त्वार्याः ॥ ४३ ॥
न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः ।
यन्नामसकृच्छ्रवणात्पुल्कसकोऽपि विमुच्यते संसारात् ॥ ४४ ॥
अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः ।
सुरऋषिणा यदुदितं तावकेन कथमन्यथा भवति ॥ ४५ ॥
विदितमनन्त समस्तं तव जगदात्मनो जनैरिहाचरितम् ।
विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ॥ ४६ ॥
नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय ।
दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ॥ ४७ ॥
यं वै श्वसन्तमनु विश्वसृजः श्वसन्ति यं चेकितानमनु चित्तय उच्चकन्ति ।
भूमण्डलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने ॥ ४८ ॥

भाषा टीका ।

चित्रकेतु रुवाच ।

चित्र केतु बोला कि हे अजित ! सममति और रजितमन बलि साधुओं ने आप को जीतलिये और उनको भी आपने जीता है क्योंकि निष्काम भजन करने वालों को आप अपने को भी दे देते हो ऐसे अति करुणा वाले आप हैं ॥ ३४ ॥

हे भगवन् ! की उत्पत्ति पालन और संहारादिक ये आपका वैभव है । और विश्व सृष्टि करने वाले ब्रह्मादिक आप के अंशके अंश हैं । तो हम ईश्वर है, इस प्रकार पृथक् अभिमान से मिथ्या ही स्पर्धा करते हैं ॥ ३५ ॥

परमाणु और परम महान् (बड़े से बड़ा) इन के आप आदि मध्य और अन्त में वर्तने वाले हैं अत एव आदि मध्य अन्त शून्य है । प्राणियों के आदि और अन्त में जो है नित्य है मध्य में भी वही है ॥ ३६ ॥

पूर्व २ से दश २ गुने अधिक ऐसे पृथिवी आदिक सप्त आवरणों से आवृत (ढका हुआ) ऐसा यह ब्रह्मांड और कोटि २ ब्रह्मांडों सहित जिस आप में अणु के सदृश भ्रमता है तिसी से आप अनंत हो ॥ ३७ ॥

विषय तृष्णा वाले जो नर पशु आपकी विभूति इन्द्र रुद्रादिकों की उपासना करते हैं और उनसे पर जो आप हैं तिनको नहीं उपासते हैं । उनके बड़े २ वैभव भी देवताओं के नाश होनेपर नाश होजाते हैं जैसे राज्य नाश होनेपर राजानुचर यह तो परम अवधि है बीच में भी नष्ट होता हैं ॥ ३८ ॥

हे परम ! ज्ञानात्मा, अगुणमय आपके विषय मे कामना करके भी बुद्धि लगावे तो भी फिर जन्म मरण रूप संसार का अंकुर नहीं जामते, ये ढंढजावतौ जीव के गुणों से है ॥ ३९ ॥

हे अजित ! जो आपने अनवद्य भागवत धर्म कथन किये हैं इसलिये आप सर्वोपरिस्थित हो जिन धर्मों को आत्मा रागतिटकअन मुनिजन अपवर्ग के लिये उपासना करते हैं ॥ ४० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अनवद्यतामेवाह—विषममतिर्यत्र यस्मिन्भागवते धर्मे नास्ति यद्न्यत्र यथान्यस्मिन्काम्ये धर्मे; ननु, सोऽपि वेदोक्तत्वादनवद्य एव तत्राह, विषमधिया शत्रुमरणादिकामनया रचितो विहितो

श्रीधरस्वामिकृतभावार्थदीपिका।

यः संसारविशुद्धः रागद्वेषादिमत्त्वात् क्षयिष्णुश्च नश्वरफलत्वात् अधर्मबहुलश्च हिंसादिबाहुल्यात् तदुक्तं शबरस्वामिभिः 'उभयमिह चोदनायां लक्ष्यतेऽर्थोऽनर्थश्च' इत्यादि ॥ ४१ ॥

एतत्प्रपञ्चयति–कः क्षेमः किं कुशलं न किञ्चित् निजपरयोः स्वस्य परस्य च स्वपरध्रुहा स्वस्मै परस्मै च द्रुह्यतीति स्वपरध्रुक् तेन यतः स्वद्रोहादत्यन्तकायक्लेशात्तव कोपः पीडा सम्भवात् तदुक्तं गीतासु "कर्षयन्तः शरीरस्थं भूतग्राममचेतसः। मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान्" इति तथा परस्यपीडयाऽधर्मः च शब्दात्तव कोपश्च, अतस्त्वया रागान्धमपि कथञ्चिद्वेदमार्गे प्रवर्तयितुं काम्यधर्मोऽभिहितो न तत्त्वदृष्ट्या ॥ ४२ ॥

भागवतधर्मेण तु न द्रोह इत्याह—नेति। न व्यभिचरति न परमार्थे जहाति तव ईक्षा दृष्टिः, अव्यभिचारे हेतुः—स्थिरेति, स्थावरजङ्गमप्राणिसमूहेषु समदृशयो भागवता यं धर्मं सेवन्ते ॥ ४३ ॥

एवम्भूतस्य भागवतधर्मप्रवर्तकस्य तव दर्शनात्सर्वपापक्षयो भवतीति किं चित्रमित्याह–न हीति ॥ ४४ ॥

अतोऽहं कृतार्थोऽस्मीत्याह–अथेति। अथ अतो हेतोः तवावलोकनेन परिमृष्टाः निरस्ताः आशये चित्ते मला येषां ते त्वद्दर्शनञ्च मम नारदोपदेशेन जातमित्याह—सुरर्षिणेति ॥ ४५॥

यथा चाहं पूर्वमतिमूढ आसं यथा च नारदेनानुगृहीतोऽस्मि तत्सर्वान्तर्यामिणस्तव मया किं प्रकाशनीयमित्याह, विदितमिति. विशेषेण ज्ञातं प्रकाशनीयं कियदिव न किमपीत्यर्थः सवितुर्यथा खद्योतैः प्रकाशनीयं नास्ति तद्वत् ॥ ४६ ॥

उक्तलक्षणं भगवन्तं प्रणमति–नम इति द्वाभ्याम्। सकलस्य जगतः स्थित्यादीनामीशाय समर्थाय दुरवसिता अविज्ञाता आत्मगतिर्निजतत्त्वं यस्य तस्मै केषां कुयोगिनां केन भिदाभेददृष्ट्या ॥ ४७ ॥

स्वसन्ति चेष्टन्ते यं किनानं पश्यन्तमनु चित्तयो ज्ञानेन्द्रियाण्युपलभन्ते स्वारूढं पश्यन्ति ॥ ४८ ॥ ४९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

यत्र च धर्मे त्वमहं तव ममेति च या नृणामन्यत्रान्यस्मिन् धर्मे विषमा मतिः अहङ्कारममकाररूपा सा नास्ति स इत्यर्थः सर्वज्ञेन भ्रमविप्रलिप्सादिदोषरहितेन परमकारुणिकेन भगवताऽभिहितत्वादहङ्कारममकारप्रयुक्तहिंसादिगर्भत्वाभावात्सर्वस्य ब्रह्मात्मकत्वानुसन्धानगर्भत्वान्निरतिशयानन्दहेतुत्वाच्च त्वदाराधनरूपो धर्मः सर्वोत्कृष्टः तथा तदनुष्ठातारोऽपि शब्दादिविषयसुखार्थं दम्भमात्सर्यहिंसादिस्वभावत्वाभावात्सर्वभूतसुहृत्त्वादि गुणयुक्तत्वाच्च उत्कृष्टाः इतरधर्मतदनुष्ठातारस्तूक्तविपरीता इति भावः तदेवाह—विषमधियेति, अहं ममेत्याद्यहंममाभिमानेन रचितो यो देवतान्तराराधनरूपः स च अविशुद्धः रागद्वेषादिगर्भत्वा-

धर्मप्रचुरः शत्रुमरणादिकामनागर्भत्वात् क्षयिष्णुरास्थिरफलश्च ॥ ४१ ॥

विषमधिया रचितं धर्ममेव निन्दति–क इति। स्वपरध्रुहो स्वं कर्तारं परञ्च द्रुह्यतीति स्वपरध्रुक् अत्यन्तशरीरायासकारित्वादनन्ततः संसृतिरूपानर्थहेतुत्वाच्च स्वध्रुक् शत्रुहिंसादिकामनागर्भत्वात्परध्रुक्तेन धर्मेण देवतान्तराराधनरूपेण निजपरयोः कः क्षेमः किं सुखं न किञ्चिदपीत्यर्थः परग्रहणं दृष्टान्तार्थं यथाऽभिचारादिकर्मणा मुमूर्षोर्न क्षेमस्तथा तत्कर्तुरपीत्यर्थः अस्तु वा कर्तुस्तादात्विकः कश्चित्क्षेमस्तथापि स कियानर्थः पुरुषार्थः अतितुच्छ इत्यर्थः क्षयिष्णुत्वादिति भावः एवं पुरुषार्थहेतुर्भवतीत्युक्तं प्रत्युतानर्थहेतुश्चेत्याह—स्वद्रोहादिति, स्वद्रोहात्स्वस्यैवाहितकरणात्तेऽन्तर्यामिभूतस्य कोपः निग्रहः स्यादयं स्वस्यैवाहितमाचरति किमुत परस्येत्यतोऽयमतीव निग्राह्य इत्येवं तव कोपः स्यात्—

"आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥
अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥
तानहं द्विषतः क्रूरान्संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" ॥

इत्यादिना प्रतिज्ञातो निग्रहः स्यादिति भावः तवकोपः स्याच्च या अवश्यं परस्यपीडया परस्य द्रोहादनेनाधर्मस्तथा स्यादेव स्वकृतेन धर्मेण परस्य यादृशी पीडा भवेत्तादृशी पीडा हेतुरधर्मोऽपि स्वानुष्ठितधर्ममनु स्यादित्यर्थः ॥ ४२ ॥

एवं धर्मान्तरस्य न केवलमपुरुषार्थहेतुत्वं प्रत्युतानर्थहेतुत्वञ्चोक्तं त्वदाराधनरूपधर्मस्य त्वनिष्टपरिहारेष्टप्राप्तिहेतुत्वमव्यभिचरितमित्याह—नेति। तव "सत्यकामः सत्यसङ्कल्पः", इति श्रुत्युक्तसत्यसङ्कल्पस्य तवेक्षा—

"ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्" ॥

इति कृतः सङ्कल्प इत्यर्थः न व्यभिचरत्ययथार्थो न भवति यथा हेतुभूतया त्वया भागवतस्तव सम्बन्धी त्वदाराधनरूपो धर्मोऽभिहितः प्रोक्तः पञ्चरात्रादिमुखेनेति शेषः भागवतधर्माभिधाने उक्तविधे ईक्षैव हेतुरन्यथा स्वधर्मानभिज्ञतया केचिदविश्वासके सति सर्वस्मिन् लोके समुद्धर्तव्याभावाद्वाक्षा निर्विषयास्यादिति भावः एवञ्चेक्षायाः सत्यत्वात्तद्विषयस्यापादकभागवतधर्मोऽप्यनिष्टपरिहारेष्टप्राप्तिहेतुत्वं न व्यभिचरतीति तात्पर्यं यत एवमत एव आर्याः त्वदीक्षाविषयास्तद्विषयापादकया चराचरात्मकभूतसमूहेष्वपृथग्धिया त्वदात्मकबुद्ध्याऽमृतत्वाय मुक्तये उपासते धर्ममितिविभक्तिपरिणामेनानुषङ्गः अनुतिष्ठन्तीत्यर्थः स्यामिति वा शेषः ॥ ४३ ॥

एवं समाश्रयणोपयुक्तसमाश्रितकार्यापादकगुणपूर्तिकथनमुखेन तदाराधनरूपधर्मस्यैव निरतिशयश्रेयःसाधनमुक्तम् इदानीं

श्रीशुक उवाच ।

संस्तुतो भगवानेवमनन्तस्तमभाषत ।
विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह ! ॥ ४९ ॥

श्रीभगवानुवाच ।

यन्नारदाङ्गिरोभ्यां ते व्याहृतं मेऽनुशासनम् ।
संसिद्धोऽसि तया राजन् ! विद्यया दर्शनाच्च मे ॥ ५० ॥
अहं वै सर्वभूतानि भूतात्मा भूतभावनः ।
शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ॥ ५१ ॥
लोके विततमात्मानं लोकं चात्मनि सन्ततम् ।
उभयं च मया व्याप्तं मयि चैवोभयं कृतम् ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जगत्कारणवादे योगोऽभिनिवेशोऽस्ति येषां तेषां सांख्यतार्किकादीनां भिदा केवलेन जगदीश्वरभेदेन दुरवसिता दुर्गमा आत्मगतिः स्वरूपज्ञानमार्गो यस्य तस्मै परमहंसाय अत्यन्तशुद्धाय ॥ ४७ ॥

यं त्वां श्वसन्तं चेष्टन्तं विश्वसृजः ब्रह्मादयः श्वसन्ति चेष्टां कुर्वन्ति "सृजामि तन्नियुक्तोऽयं हरो हरति तद्वशः" इति ब्रह्मोक्तेः यं चेकितानं पश्यन्तम् भान्तम् चित्तयः चित्तिशक्तिं तदुपलक्षिताः सर्वाः चेतनाचेतनात्मिकाः प्रजाः अनु उच्चकन्ति अनुपश्यन्ति अनुभान्ति "तमेव भान्तमनुभाति सर्वम्" इति श्रुतेः ॥ ४८ ॥ ४९ ॥

भाषा टीका ।

जिस भागवत धर्म में हम तुम हमारा तुमारा ऐसी विषम मति नहीं है अन्य धर्म में है । क्योंकि वह विषम बुद्धि से रचागया है अत एव वह अविशुद्ध क्षयिष्णु (नाश वान) और अधर्म बहुत है ॥ ४१ ॥

अपने पराये द्रोह करने वाले धर्म से, अपना पराया क्या क्षेम, और कितना प्रयोजन है स्वद्रोह अर्थात् अधिक काय क्लेश से आप अन्तर्यामी को कोप दूसरे को पीडा देने से अधर्म ॥ ४२ ॥

जिस दृष्टि से भागवत धर्म कथन किया वह आपकी दृष्टि कभी अन्यथा नहीं होती ॥ स्थावर जंगम, प्राणियों के समूह में अपृथक् धर्म वाले जो आर्य लोग हैं वोही उस धर्म की उपासना करते हैं ॥ ४३ ॥

हे भगवन् ! आपके दर्शन से जीवों का पाप नाश होना यह असंभव नहीं है क्योंकि जिन तुम्हारा एकवार श्रवण से चंडाल भी संसार से मुक्त होता है ॥ ४४ ॥

हे भगवन् ! आपके दर्शन से हमारा अन्तःकरण निर्मल हुआ क्योंकि नारद का कहा हुआ झूठ कैसे होय ॥ ४५ ॥

हे अनन्त ! जगत् के अन्तर्यामी आपको लोकों का सब चरित्र ज्ञात ही है अतः परमगुरु आपको क्या जनाना है जैसे कि खद्योत सूर्य को क्या प्रकाश करसका है ॥ ४६ ॥

जगत् की उत्पत्ति स्थिति नाश के करने वाले आपको नमः होय क्योंकि आप परम हंस है और पाखंडी भेद दृष्टि से आपके तत्व को नहीं जानते हैं ॥ ४७ ॥

जिसकी सत्ता से ब्रह्मादि देवता श्वास लेते है कर्मेन्द्रिय ज्ञानेन्द्रिय अपने २ विषय को ग्रहण करते हैं और जिसके शिरपर पृथिवी मंडल सर्षप वत् प्रतीत होता है उस भगवान शेष जी के प्रणाम होय ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मेऽनुशासनं मद्विषय उपदेशः तेन तया च विद्यया ऽस्माच्च दर्शनात्संसिद्धोऽसि ॥ ५० ॥

तद्बोधदार्ढ्याय स्वयमप्युपदिशति—अहमित्यादिना । सर्वभूतान्यहमेव भूतानामात्मा भोक्ताप्यहमेव भोक्तृभोग्यात्मकं विश्वं मद्व्यतिरिक्तं नास्तीत्यर्थः यतोऽहं भूतभावनः भूतानां प्रकाशकः कारणं च. ननु, शब्दब्रह्मप्रकाशकं परं ब्रह्म कारणं च प्रकाशकं च सत्यम् ते उभे ममैव रूपे इत्याह शब्दब्रह्मेति शाश्वती शाश्वत्यौ ॥ ५१ ॥

अतस्त्वमेवं पश्येत्याह—लोके भोग्यप्रपंचे भोक्तृत्वेन विततमनुगतमात्मानं लोकं चात्मनि भोग्यत्वेन सन्ततं व्याप्तं तदुभयं च मया कारणात्मना व्याप्तम् मयि चैवोभयं कृतं प्रकल्पितं इत्यंरेदिति तृतीयेनान्वयः पश्येदित्यध्याहारो वा ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चित्रकेतुनेत्थं स्तुतो भगवाननन्तस्तमभाषतेत्याह—मुनिः, संस्तुत इति । इत्थमनन्तगुणमहात्म्येन स्तुतो भगवाननन्तः प्रीतः सन् हे कुरूद्वह, तं विद्याधराणां पतिं चित्रकेतुमभाषत ॥ ४९ ॥

तदेवाह—यदित्यादिना सिद्धोसीत्यन्तेन । नारदाङ्गिरोभ्यां ते तुभ्यं यद्व्याहृतमुक्तं तदनुशासनं प्रकृतिपुरुषेश्वरस्वरूपविषयकं विविच्य ज्ञापनरूपं वचः मे ममैव मत्सम्बन्धेनैवान्तरात्मभूतमत्सङ्कल्पादेव ताभ्यां ते व्याहृतम्—

"ईश्वरस्य च सौहार्दं यदृच्छा सुकृतं तथा ।
विष्णोः कटाक्षमद्वेष आनुकूल्यं च सात्त्विकैः ॥
सम्भाषणं षडेतानि ह्याचार्यप्राप्तिहेतवः"

इत्युक्तरीत्या मदनुग्रहमन्तरेण सदाचार्यप्राप्तेर्दुर्लभत्वादिति भावः अतो हे राजन्, तया नारदोपदिष्टया मन्त्रविद्यया मम दर्शनाच्च संसिद्धोसि ॥ ॥ ५० ॥

ननु, मौनमुपदिशतामिति न तौ प्रतिस्वमुक्तवानतः कथं तद्व्याहृतं त्वदनुशासनमेवेति जानीयां किञ्च तयोरेव वचोऽहमश्रौषं न तु तवेत्यत्राह—अहं हीति । तावत्सर्वाणि भूतान्यहमेव सर्वाण्यपि भूतानि मदभिन्नान्येव, किमुत "आचार्यं मां विजानीयात्" "ज्ञानी त्वात्मैव मे मतम्" इत्युक्तात्माभिन्नाभिमानविषयावङ्गिरोनारदौ मदभिन्नाविति भावः अतस्तद्व्याहृतं मदनुशासनमेवेति तात्पर्य. ननु, सर्वभूतान्यहमेवेत्युक्तोऽभेदः किं मृदात्मको घट इति वत्स्वरूपाभेदरूपस्तथात्वे सर्वविकाराश्रयत्वापत्तिस्तत्राह—भूतात्मा सर्वभूतानामन्तरात्मा आत्मा देवो जात इत्यादिवच्छरीरात्मभावप्रयुक्तः सर्वभूतैः सह ममाभेदः विकाराणां शरीरगतानां जीवे बाल्यादीनामिव न मयि प्रसक्तिरिति तात्पर्यं । शरीरात्मभावनिबन्धनोऽभेदव्यपदेशो बहुशो दृष्टः ब्राह्मणोऽहं कृशोऽहं स्थूलोऽहमित्यादिः न चैवं रजनमिति तद्बाधितोयं व्यपदेशः नीलो घट इत्याद्यभेदव्यपदेशस्यापि शाब्दत्वापत्तेः अथ जातिगुणादीनां व्यक्तिगुण्यपृथक्सिद्धप्रकारतया तद्बुद्धिशब्दयोर्व्यक्तिगुणिपर्यन्तत्वान्न बाधस्तर्हि शरीरस्याप्यात्मा पृथक्सिद्धप्रकारत्वेन तद्बुद्धिशब्दयोरपि तात्पर्यन्तत्वादबाधित एव, ननु, जात्यादेर्व्यक्त्यादीन् प्रति अपृथक्सिद्धप्रकारत्वं प्रत्यक्षगम्यं जातिव्यक्त्योरुभयोरपि प्रत्यक्षविषयत्वात् आत्मनस्तु तदविषयत्वात्कथं शरीरस्यात्मा पृथक्सिद्धविशेषणत्वमिति चेत् मास्तु जातिव्यक्त्योरिव शरीरात्मनोरेकप्रमाणविषयत्वम् अथाप्यात्मा पृथक्सिद्धप्रकारत्वं शरीरस्याहतमेव न हि भिन्नसामग्रीवेद्यत्वमात्रेण तद्व्याहतं शक्यम् अन्यथा चक्षुर्घ्राणेन्द्रियविषययोः पृथ्वीगन्धयोरपि नियतप्रकारप्रकारिभावानुपपत्तेरित्यन्यत्र विस्तरः न केवलं शरीरात्मभावनिबन्धन एव भूतैर्ममाभेदः, अपि तु कार्यकारणभावनिबन्धन इत्याह—भूतभावन इति, भूतानि चिदचिदात्मकानि देवमनुष्यादीनि भावयत्युत्पादयति अस्मादेवोपादानभूतादिति भूतभावनः कार्यकारणयोरभेदस्त्वारम्भणाधिकर[illegible]भाष्ये बहूपपत्तिभिर्निरूपितः दा शङ्कितं तयोरेवाऽवचो श्रुणवं न तु तवेति तत्राह—शब्देति । शब्दात्मकं यद्ब्रह्म परं शब्देन वाच्यमर्थात्मकत्वं च यद्ब्रह्म मे ब्रह्मणी मम शाश्वती त[illegible]सततमपृथक्सिद्धे मम शरीरभूते इत्यर्थः अभिमन्मुख्यवृत्तो ब्रह्मशब्दः शब्दार्थात्मकयोः प्रपञ्चद्वयोः स्वशरीरत्वादुपचरितः परब्रह्मणः स्वतनुत्वकथनं दृष्टान्तार्थं यथा परब्रह्मान्तर्गतनारदाङ्गिरसोर्मच्छरीरत्वम् एवं शब्दब्रह्मान्तर्गततद्वचसोऽपि मत्तनुत्वमित्यर्थः यद्यपि स्वस्य सर्वभूतात्मकत्वकथनेनैव सर्वभूतवचसां स्ववचस्त्वमपि कथितप्रायं तथापि नामरूपयोरुभयोरपि स्वशरीरकत्वज्ञापनाय पृथगुक्तमित्यवगन्तव्यम् ॥ ५१ ॥

ननु, सर्वेषां भूतशब्दवाच्यानां देवादिशरीराणामात्मा जीवः स एव किं भवानित्याह—लोक इति । लोकं परिदृश्यमानं प्रपञ्चं देवादिशरीररूपं विततं व्याप्तं अन्तःप्रविश्य धारकतया व्याप्तं प्रत्यगात्मानं द्वितीयान्तानां पदानां व्याहृतेनान्वयः तथा आत्मनि प्रत्यगात्मनि सन्ततं प्रोतं धार्यत्वेनाश्रितं लोकं चैतत्तदुभयं मया परमात्मनाऽन्तःप्रविश्य भर्त्रा व्याप्तम् उक्तमुभयं मयि कृतं च मदाधेयं कृतमित्यर्थः लोके विततमात्मानमित्यनेन चेतनं जीवस्य व्याप्तिरुक्ता, लोकं चात्मनीत्यनेनाचेतनस्य जीवधार्यत्वमुक्तम्. उभयमित्यनेन चेतनाचेतनयोरीश्वरधार्यत्वं व्याप्यत्वमीश्वरस्य स्वस्य धारकत्वं व्यापकत्वञ्चोक्तम् अतो नाहं जीवः भूतात्मेत्यत्र भूतशब्दोऽचेतनविशिष्टचेतनपरः इति भावः आत्मानमित्येकवचनं जात्यभिप्रायकं यद्वा एकमेव जीवव्यक्तिमुपादाय क्रमप्राप्तेषु देवादिशरीरेषु व्याप्तिरुच्यते, अतोऽत्र जीवैक्यवादभ्रमो न कर्तव्यः ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनन्तनामप्रवृत्तिनिमित्तमनन्तत्वादनन्तः श्रीहरिः । हरिगुणान्तकथनदर्शनासमर्थत्वादनन्त इत्यर्थः ॥ ४९ ॥

नारदाङ्गिरोभ्यां यन्मम शासनं तव व्याहृतं तत्करणेन या च मम विद्याऽभ्यस्ता तया यच्च मम दर्शनं तस्माच्च संसिद्धोऽसि प्राप्तापेक्षिताशेषपुरुषार्थोऽसीत्यर्थः ॥ ५० ॥

अधुनाऽहं पूर्वोक्तार्थस्थिरीकरणाय किञ्चिद्विशेषज्ञानाय वा किञ्चिदुपदिशामीत्याह—अहमिति । सर्वभूतान्यहमित्यन्वयः वा इत्यनेन "सर्वं खल्विदं ब्रह्म" इति श्रुतिं सूचयति अभेदोपदेशस्य कोऽभिप्राय इति तत्राह—भूतात्मेति । भूतानामन्तःस्थित्वा सृष्ट्यादिकर्तृत्वात्तद्व्यपदेशः "हरिस्तु सर्वभूतानि तदन्तर्याम्यपेक्षया" इति स्मृतेः सत्ताप्रदत्वाच्च तद्व्यपदेश इति भावेनाह—भूतभावन इति. भूतानि भावयति सत्तागतानि करोतीति अनेन "अहमस्मि" इत्यादिश्रुतिगतानि पदान्यन्तर्यामिणि मुख्यवृत्त्या प्रवर्तन्त इत्युक्तं तथा चोक्तं "तिङ्पदानि च सर्वाणि सुप्पदानि तथैव च । तस्मिन्नेव प्रवर्तन्ते मुख्यवृत्त्या विशेषतः" इति इदञ्च स्ववाचकत्वं ज्ञातव्यमित्याह—शब्देति । वेदादिशब्दराशिलक्षणं शब्दब्रह्म स्वविद्यानन्दलक्षणं परं ब्रह्मोभयमुभे "द्वे अपि ब्रह्मणी मम शाश्वती तनू प्रतिमास्वरूपभेदेन यावद्ब्रह्म विष्ठितं तावती वाक्" इति श्रुतेः "एष नित्योऽव्ययः सूक्ष्मः" इति पूर्वोक्तम् ॥ ५१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

आत्मानं जीवं लोके भुवने अवितनमध्याप्तं जानीहि लोकं चात्मनि जीवे वासनारूपेण मनसि सन्ततं निर्व्यूढं विद्धि विपुलस्य लोकस्यात्मनश्चैकदेशमन्तरेण बाहुल्यायोगात् लोक आत्मेत्युभयं मया ब्रह्मरूपेण व्याप्तं. तर्हि, जीवलोकयोराधारः कः? इति तत्राह–मयीति। उभयञ्च मयि समाश्रितमेव. कुतः? 'अहमेवोभयाधारः' इति समाधत्स्व ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अहमिति अत्र शब्दब्रह्मणः साहचर्यात् परब्रह्मणोऽप्यैश्वर्यमायाति ॥ ५१ ॥

तथैवानुभावयति लोक इति। आत्मानं परब्रह्म स्वरूपं–विततमाश्रयत्वेन वर्त्तमानम् आत्मनि तस्मिन् सन्ततमाश्रितं पश्य मया भगवद्रूपेण परब्रह्मणोऽपि मदीयनिर्विशेषाविर्भावरूपत्वात्. अत एवोभयञ्च मयिकृतं मज्ज्ञाननिमित्तमेव निरूपितमित्यर्थः ॥ ५२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मेऽनुशासनं श्रवणकीर्त्तनादिभजनं तेन तया विद्यया नारदोपदिष्टमहाग्नेणेण च तस्माध्यान्मम दर्शनाच्च ॥ ५० ॥

किञ्च भक्तितत्त्वं तया ज्ञानमेव तत्राजितजितेत्यादिस्तुतिरेव प्रमाणं जिज्ञासानिरपेक्ष्यार्थं ज्ञानतत्त्वमहमेवोपदिशामि स्फुटमित्याह–अहं वै इति। अत्रेदं विवेचनीयं वस्तु तावत् द्विविधं, वास्तवमवास्तवञ्च. ब्रह्म परमात्मा भगवान् सपरिकर इत्येतत् त्रितयमेव वास्तवं वस्तु. मायिकप्रपञ्चजातमिदमवास्तवं वस्तु. अवस्तु च द्विविधं, कार्यमकार्यञ्च. कार्यस्वप्ने न्द्रजालादिगतं। अकार्यं खपुष्पशशशृङ्गादि. एवां मध्ये विद्यं वास्तवमत्र वस्त्विति प्रथमोक्तेर्वास्तवं वस्तु न एवोपादेयत्वं वक्तुं प्रथममवास्तववस्त्वाह–सर्वभूतानि भोक्तृभोग्यात्मकानि जगन्ति अहमेव मदीयजीवशक्तिमयत्वादिति भावः अत्र जीवानामवास्तववस्तुत्वमविद्यावृतत्वादेवोक्तं। वास्तवं वस्त्वाह भूतानां सर्वाधिष्ठानामात्मा अन्तर्यामीति द्वितीयः। तृतीयश्च पुरुषोऽहं तथाभूतानि तानि भावयत्युत्पादयतीति प्रधानः पुरुषश्चाहं तथाभूतानि दास्यसख्यादिभाववन्ति करोतीति भूतभावनः कृष्णो रामश्च सम्प्रति त्वयादृश्यश्चाहं किञ्च मन्निश्वासरूपं यत् शब्दब्रह्म वेदः तथामन्निर्विशेषाकारत्वेन ज्ञानिषु प्रतिपाद्यमानं यत् परं ब्रह्म ते ऽउभे ममैव तनू रूपे, वेदस्य शब्दरूपत्वादाकाशगुणत्वेनानित्यत्वशङ्कावारणात्तथा परब्रह्मणश्चानिर्देश्यत्वेनावस्तुत्वशङ्काया वारणायाह शाश्वती शाश्वत्यौ नित्यसत्ये एव ॥ ५१ ॥

ननु त्वं मम चेत् सर्वं भवसि तर्हि किं सर्वभूताऽऽप्येयोपास्यत्वेन ध्येयानि भक्तानामुतान्तर्याम्यादिरूपाणीति तत्राह—लोके भोग्यप्रपञ्चे भोक्तृत्वेन विततमनुगतमात्मानं जीवं तथा लोकञ्चात्मनि भोग्यत्वेन सन्ततं सविस्तरमुपस्थितं तदुभयं मया कारणात्मना व्याप्तं मयि चाधिष्ठानकारणे उभयं कृतं कार्यरूपं स्मरेदिति तृतीयेनान्वयः तेन सर्वभूतानि मच्छक्तिकार्य्याण्येवनित्यान्यस्वरूपभूतानि नोपास्यत्वेन ध्येयानीति भावः ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ते तुभ्यं मेऽनुशासनं मद्विषयकं शास्त्रं मन्त्रोपनिषदित्यर्थः तया मन्त्रोपनिषद्रूपया विद्यया मे दर्शनाच्च संसिद्धोऽसि मदीयतां प्राप्तोऽसि यः भगवदीयत्वं न प्राप्तः स रागाद्यभिभूतस्त्वदादिव एवेत्यस्मिन्पुराणे एवोक्तं, 'तावद्रागादयस्तेन तावत्कारागृहं तथा तावन्मोहोऽङ्घ्रिनिगडो यावत्कृष्ण न ते जनाः' इति ॥ ५० ॥

एवं सिद्धपदवीं प्राप्तो भवद्विधो जीवः सर्वात्मानं सर्वकारणमद्भूयात्पदद्वितीयपराहित्येन ध्यायेदित्याह अहमितिचतुर्भिः। सर्वभूतानि चेतनाचेतनानि अहं यतः भूतानामात्मा "एष ते आत्मान्तर्यामि"इतिश्रुतेः। "अन्तरात्मा नियंताहं नियम्यनियंत्रोः। स्वाभाविको भेदाभेदः, इन्द्रियगणप्राणयोः न वै वाचो न चक्षूंषि न मन इत्याचक्षते प्राणा इत्येवाचक्षते" इति छांदोग्ये प्रसिद्धः। अतः भूतभावनः भूतानि भावयत्युत्पादयतीति स "तथा कार्यकारणयोः" स्वाभाविकोभेदाभेदः सर्वं खल्विदं ब्रह्म, तज्जलानितीत्यनेन वाक्येन दर्शितः आत्मनि प्रमाणाम् आत्मनः स्वरूपं चाह, शब्दब्रह्म परं ब्रह्मचेत्युभे मम शाश्वती शाश्वत्यौ नित्ये तनू वेदप्रमाणकपरब्रह्माभिन्नोस्मीत्यर्थः एवं भूतेन मयोभयं ततमित्यवेहीत्यध्याहृतेन द्वयोरन्वयः ॥ ५१ ॥

लोके भोग्ये पदार्थे आत्मानं भोक्तृत्वेनान्वितम् आत्मनि भोक्तरि लोकं च भोग्यतया संसक्तम् उभयं च मया नियंत्रा व्याप्तं यस्मिन्नपि सर्वशक्तौ तदुभयं कृतं गुणिनि गुणवद् निहितम् "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्" इति सनातनीश्रुत्या प्रतिपादितमित्यर्थः ॥ ५२ ॥

भाषाटीका।

श्री शुक उवाच ॥

हे राजन्! अनन्त भगवान् ऐसे स्तुति से प्रसन्न होकर विद्याधरोंके स्वामि चित्रकेतु से बोले ॥ ४९ ॥

श्री भगवानुवाच ॥

हे राजन्! नारद और अङ्गिरा मुनिने जो मेरा स्तोत्र कहा उसविद्या से और मेरे दर्शन से तुम सिद्ध हुवे ॥ ५० ॥

सब लोकों का पालन करनेवाला सर्व भूतस्वरूप सब का अन्तर्यामी मैं हूं वेद और परब्रह्म [illegible] मेरे नित्यशरीर हैं ॥ ५१ ॥

यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ।
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥ ५३ ॥
एवं जागरणादीनि जीवस्थानानि चात्मनः ।
मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ ५४ ॥
येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा ।
सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि माम् ॥ ५५ ॥
उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः ।
अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परम् ॥ ५६ ॥

भाषा टीका ।

संसार मे भोक्तृत्व रूप से आत्मा व्याप्त है भोग्यस्वरूप से आत्मा मे जगत् व्याप्त है आत्मा और जगत् यह दोनो मुझ से व्याप्त हैं और मुझ में स्थित है ॥ ५२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ननु, जाग्रदाद्यवस्थाभेदेन भोक्तृभोग्यात्मकं विश्वं स्फुटं प्रतीयमानं कथं कल्पितं स्यादित्याशङ्क्य स्वप्नगतजाग्रदादिदृष्टान्तेन संभावयन्नाह—यथेति द्वाभ्यां । यथा स्वप्ने सुप्तो विश्वं गिरिवनादिरूपं देशान्तरस्थमात्मन्येव पश्यति स्वप्नमध्ये सुषुप्तिं स्वप्नं च पश्यतीत्यर्थः तथा स्वप्न एवोत्थितः सन्नात्मानमेकदेशस्थं शयनदेशे स्थितं मन्यते जाग्रदवस्थामनुभवति ॥ ५३ ॥

एवं प्रसिद्धान्यपि जागरादीनि जीवस्थानानि जीवोपाधेर्बुद्धेरवस्थाभूतान्यात्मनो मायामात्राणीत्येवं विज्ञाय तेषां द्रष्टारमत एव परं तदवस्थारहितमात्मानं स्मरेत् ॥ ५४ ॥

ननु, तेषां द्रष्टारमिति कथमुच्यते? स्वापे दृश्याभावेन द्रष्टृत्वाभावात्तत्राह—येनेति । प्रसुप्तः पुरुषो जीवो येन रूपेण तदा स्वापकाले आत्मनः स्वापं निर्गुणमतीन्द्रियं सुखं च वेद तमात्मानं ब्रह्म मामवेहि तदा स्वापसुखयोरसंवेदने सुखमहमस्वाप्समिति स्मृतेरसम्भवात् ॥ ५५ ॥

ननु, स्वापसाक्षिणा दृष्टं कथं जाग्रदवस्थः स्मरेत्? नह्यन्येन दृष्टमन्यः स्मरति तत्राह उभयं प्रस्वापं प्रतिबोधं च स्मरतोऽनुसन्दधतः तयोः प्रस्वापप्रतिबोधयोः प्रकाशकत्वेन यदन्वेति ताभ्यां व्यतिरिच्येत यत् एकैकापायेऽप्यनपायात् तज्ज्ञानं परं ब्रह्म तदेव न तु भिन्नमित्यर्थः अतो बाल्ये दृष्टस्य यौवने स्मृतिवदवस्थान्तरत्वेऽपि सा[illegible]न्वयोः स्मरणं घटत इति भावः तदेवं मतं ब्रह्मात्मानमवेहीत्युपक्रमः ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, कथमेतद्विमर्शनीयं सर्वाण्यचेतनानि प्रत्यगात्माभिव्याप्तानि उभयं तु त्वया व्याप्तमित्यपेक्षायां बुद्धिवैपुण्यर्थमेतत्सदृष्टान्तमाह—यथेत्यादिचतुर्भिः । तावज्जीवस्वरूपविमर्शनाय दृष्टान्तं शिक्षयति यथेति, यथा सुषुप्तः स्वप्नद्रष्टा पुरुषः सुषुप्त इति न सुषुप्त्यवस्थो जीव उच्यते स्वप्न उत्थितः इत्यनन्तरोक्तत्वात् सुषुप्तौ विश्वदर्शनानुपपत्तेश्च स्वप्ने स्वप्नावस्थायामेकस्मिन्नेव स्वप्नद्रष्टर्यात्मनि विश्वं पश्यति गजस्कन्धारोहणादेशान्तरगमनराज्याभिषेकशिरश्छेदनादि शरीरजातं पश्यति प्रकृत्युपाधिकं पश्यतीत्यर्थः दृष्टान्ते मायामात्राणीति वक्ष्यमाणत्वात् उत्थितो जाग्रदवस्थां प्राप्तः स्वात्मानमेकदेशस्थं क्वचिदपवरकादिशयानशरीरमात्रवर्तिनं मन्यते स्वप्नावस्था न स्वप्नद्रष्टृस्वरूपप्रयुक्ता अपि तु स्वप्नजाग्रदवस्थाद्वयान्वितप्रकृत्युपाधिकस्वप्नदृष्टृकजीवकर्मानुगुणामीश्वरसृष्टगजादिपदार्थानुप्रवेशपूर्वकतत्तद्दर्शनरूपेति दृष्टान्ते विवक्षितोऽर्थः ॥ ५३ ॥

इममर्थं दार्ष्टान्तिके दर्शयति—एवमिति । एवं स्वप्नावस्थावज्जागरणादीनि च जीवस्थानानि एकस्य जीवस्य स्थानान्यवस्थानानि अवस्था इत्यर्थः स्वप्नावस्थावज्जागराद्यन्ययोरपि नात्मस्वरूपप्रयुक्तः अपि तु प्रकृत्युपाधिकः स्वरूपप्रयुक्तत्वे तस्य सर्वावस्थानुगतत्वेन तत्प्रयुक्ताः पूर्वपूर्वावस्थाः उत्तरोत्तरावस्थासूपक्रमेत न च प्रकृत्यवस्थतद्रूपभेदउपपादयितुं शक्यः कर्मानुस्मृतिशब्दविध्यनुपपत्तेः । कर्मतावत्सुषुप्तेन पूर्वकृतं पुण्यपापरूपं तस्यैवानात्माकैनैव भोक्तव्यं अनुस्मृतिरपि च एवाहं सुप्तः स एव प्रतिबुद्धोऽस्मीति शब्दः श्रुतिरपि सुप्तं प्रबुद्धं स एवेति दर्शयति "त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तथा भवन्ति" इति. विधयश्च मोक्षार्थाः सुप्तस्य पुनरनुत्थितौ अनर्थकाः स्युः अस्त्वेवं स्वप्नावस्थावज्जागरादयो न जीवस्वरूपप्रयुक्ताः अपि तु प्रकृत्युपाधिका इति. तथापि जीवस्वरूपविमर्शने किमायातं? तत्राह—आत्मन इति । जागरादीन्यवस्थानान्यात्मनो मायामात्राणि परमात्मसम्बन्धिप्रकृत्युपाधिकानि न स्वरूपप्रयुक्तानीति ज्ञात्वा आत्मनो मायामात्राणीत्यनेन जीवस्य स्वप्नावस्था पर-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मात्मायत्तेति दर्शितं तद्द्रष्टारं तत्तदवस्थासाक्षिणं परं प्रकृतिविलक्षणं जीवात्मानं स्मरेत् अचेतनस्य तत्तदवस्थाद्रष्टृत्वानुपपत्तेः कर्मानुस्मृत्याद्यनुपपत्तेश्च एकैकं शरीरमेकैकेन जीवेन व्याप्यं तत्स्वरूपञ्च तत्तदवस्थाद्रष्टृत्वपूर्वपूर्वावस्थानुस्मर्तृत्वाहं प्रत्ययगोचरत्वादिभिर्धर्मैर्निपुणतरविवेकेनावगन्तव्यमिति भावः ॥ ५४ ॥

एवं परमात्मस्वरूपविमर्शनप्रकारमाह—येनेति । येन हेतुभूतेन परमात्मना प्रसुप्तः सुषुप्त्यवस्थां प्राप्तः पुरुषो जीवः जीवस्य प्रसुप्तौ परमात्मनो हेतुत्वाद्येनेति हेत्वर्थकतृतीयान्तेन निर्देशः तथा हि 'स्वप्नान्तं मे सौम्य विजानीहि' इत्युपक्रम्य 'यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपीति इत्याचक्षते स्वमपीतो भवति' इति छान्दोग्ये श्रुतं स्वप्नान्तं सुषुप्तिः सता ब्रह्मणा सम्पन्नो भवति जीवः सता साकं सम्पत्तिर्नाम शरीरेन्द्रियाधिष्ठातृत्वादिव्यापारान्तरराहित्येन ब्रह्मणि स्थितिमात्रं सैव सुषुप्तिः स्वं स्वशरीरकं परमात्मानं प्रत्यपीतो भवति लीनो भवति उक्तविधा सम्पत्तिरेव च लयः कारण एव हि कार्यस्य लयः एवं सुषुप्त्याधारत्वात्तत्कारणत्वाच्च येनेति तच्छब्दानुबन्धेन निर्दिष्टः एवं येन सुषुप्तः पुरुष आत्मनः स्वस्य स्वापं वेदानुभवतीत्यर्थः तथाच सुखं वेद सुखमहमस्वाप्समिति परामर्शानुगुणं सुखञ्च यत्सम्पत्तिकृतं वेद तं निर्गुणं हेयगुणरहितं ब्रह्मशब्दवाच्यं परमात्मानं मामवेहि जानीहीत्यर्थः सुषुप्त्याधारत्वतत्कारणत्वसौषुप्तिकसुखहेतुत्वादिभिर्धर्मैः परमात्मस्वरूपं विमर्शनीयमिति भावः निर्गुणमिति सुखविशेषणं वा निर्गुणं प्रबोधसमयेऽनुसन्धीयमानस्यात्मनो या वर्णाश्रमादिविशिष्टता तादृशगुणरहितं प्रबोधादहमिन्येकाकारेण प्रतीयमानं सुखरूपमात्मानं तमोगुणाभिभवात्तागर्भानुभवाभावात्त्वविविक्तस्फुटप्रभासं वेदेत्यर्थः सुप्तोत्थितस्य परामर्शानुगुणमेव हि सौषुप्तिकं सुखं वर्णनीयं तत्परामर्शश्चैवंविधः सुखमहमस्वाप्सं नाहं किञ्चिदवेदिषमिति तथाहमस्वाप्सामित्यनेनात्मनोऽनुवृत्तिर्दर्शिता, सुखमित्यनेन तस्य सुखरूपता, नाहं किञ्चिदवेदिषमित्यनेन तस्य बाह्यज्ञानाभावात्कात्स्न्यं च दर्शितम् एवंविधत्वात्सुखमिति विशेषणं परामर्शाभावादस्फुटत्वं च ॥ ५५ ॥

इदं सुषुप्तौ परमात्मस्वरूपविमर्शनप्रकारकथनमुखेन जीवस्वरूपमुभयोरन्वयादिना विमृश्यानूद्य ब्रह्म तत्परमित्यनेन ब्रह्मात्मकत्वं निगमयति—उभयमिति । उभयं स्वापं प्रतिबोधं चेत्युभयं स्मरतः पुंसो जीवस्य तज्ज्ञानं स्वापप्रतिबोधयोरन्वयेन व्यतिरिक्तमेव तत्तदवस्थाश्रयेऽनुवर्तते तद्रूपात्मकमिमं तत्तदवस्थाभिर्व्यतिरिक्तश्चावस्थाश्रयत्वानाश्रयं स्यात् यद्वा उत्तरोत्तरावस्थासु पूर्वपूर्वावस्थाव्यतिरिक्तं स्यात्तस्माज्ज्ञानस्वरूपाज्जीवात्परं विलक्षणं तदात्मभूतं ब्रह्मेत्यर्थः यद्वा उभयं इत्यादिदृष्टान्तार्थे यथा यज्जीवस्वरूपात्मकं ज्ञानं सर्वावस्थानुवर्ति तद्दृष्टृ उत्तरोत्तरावस्थासु पूर्वपूर्वावस्थाव्यतिरिक्तञ्च तथा तस्मात्परं विलक्षणं सर्वावस्थासु जीवस्वरूपनियन्तृतयानुवृत्तं द्रष्टृ तत्तदवस्थासम्बन्धिसुखदुःखाद्यनन्वयितया व्यतिरिक्तञ्च ब्रह्मेत्यर्थः, यथा सर्वावस्थानुवर्तित्वतद्द्रष्टृत्वज्ञानानन्दादिस्वरूपत्वस्वभावतस्तत्तदवस्थानन्वयित्वाहं प्रत्ययगोचरत्वादिभिर्धर्मैः जीवस्वरूपं विशोध्यं तथा ब्रह्मशरीरत्वेनापि तद्विशोध्यमित्यभिप्रायः एवं ब्रह्मशरीरत्वेन तदायत्तसत्तास्थितिप्रवृत्तिकत्वरूपपारतन्त्र्यमप्यनुसन्धेयमित्युक्तम् ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, "व्यासाद्यात्मानश्चेतना निर्गुणाश्च" इति श्रुतेः लोके चित्तमात्मानमित्यस्य प्रतीतार्थ एव किं न स्यादित्याशङ्क्य स्वांतानुगुणयार्थकथयत इत्यभिप्रेत्याह—यथेति । यथा सुषुप्तः सन् स्वप्नमनुभवन् पुरुषः विश्वं वासनारूपेणात्मनि स्फुरितं च शब्दादिकं पश्यति स्वप्ने आत्मानमेकदेशस्थं मन्यते न तु व्याप्तं स्वप्नादुत्थितः प्रबुद्धोऽपि खट्वादिशयने स्वं मन्यते श्रुतिगतिस्तु परमात्मविषयत्वेन जीवचिद्गुणविषयत्वेन वा कल्प्यते ॥ ५३ ॥

यथा स्वप्नावस्थायां भगवत्कर्तृकत्वप्रमाणकं "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" इतिसूत्रात्तथा जाग्रत्प्रभृत्यवस्थाश्च अतः प्रबोधोऽस्मादित्यभिप्रेत्याह—एवमिति, यथा स्वप्नावस्था प्रकृतिशब्दवाच्येश्वरेच्छा निर्मिता तथा जीवस्य सुखोपभोगस्थानानि जागरणादीनि मायामात्राणि भगवदिच्छालक्षणप्रकृतिनिर्मितानि विज्ञाय तासामवस्थानां मध्ये निषण्णस्य जीवस्य सुखोपभोगस्य द्रष्टारं साक्षिणं परं ततो भिन्नं स्मरेदित्यन्वयः "अनश्नन्नन्यो अभिचाकशीति" इति श्रुतेः ॥ ५४ ॥

तद्द्रष्टारमित्यत्र जीवात्मनः परमात्मा सम्यग्विविच्य न प्रतीत इति तद्विवक्षार्थमाह—येनेति । येन प्रसुप्तः प्रस्वापं प्रापितः सन् पुरुषो जीवात्मा तदा सुषुप्त्यवस्थायामात्मनः स्वापम् इयन्तं कालं किञ्चन नावेदिषमिति स्वापशब्दोक्तमेव ज्ञानं सुखमहमस्वाप्समित्यनुभूतं सुखं च सुखिनं स्वात्मानं च वेद नान्यत्किञ्चिद्वेद तमात्मानं निर्गुणं ब्रह्म ज्ञानादिगुणपूर्णं मामवेहीत्यन्वयः ॥ ५५ ॥

इतोऽपि जाग्रदाद्यवस्थानुभविनो जीवाद्भिन्नं ब्रह्मेत्याह—उभयमिति । जाग्रत् सुषुप्तिश्चेत्युभयं स्मरतोऽनुभवतः पुंसः जीवस्य प्रस्वापप्रतिबोधयोस्तत्तद्वस्तुपरिज्ञानलक्षणो जाग्रति यज्ज्योतिरनुवर्तते अयमपि प्रतिबुद्धः सुप्तावस्वपनात्तत्तद्वस्तुपरिज्ञानलक्षणसुप्तौ यद्व्यतिरिक्तं स्यात् सर्वज्ञानसम्भवात् "प्रस्वापः स्वपनं स्वप्नम्" इत्यभिधानात्, अथाज्ञानलक्षणप्रस्वापपदोक्तेऽस्मिन्नपि व्यतिरिक्तं वर्तते तत्परं "ब्रह्मविदाप्नोति परं" इति श्रुतेः 'तत्तस्यात्तज्ज्ञानं' "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः अनेन सुषुप्त्यवस्थानुवर्ती जीवोऽननुभूय यथा न तिष्ठन् परमात्मा ततो भिन्न इति ज्ञातव्यं यद्वा जीवस्याज्ञानसम्भवादस्य तदभावाज्जीवस्याल्पगुणत्वादस्यानन्तगुणत्वाज्जीवस्य परिच्छिन्नत्वादस्यापरिच्छिन्नत्वात् "तदेव ज्ञानं तदेव ब्रह्म तदेव परं तदेवतं सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्" इति श्रुतेः ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

ननु, यावद्विश्वस्मादनासक्तो न स्यात्तावत् कथं तज्ज्ञानं स्यादित्येवमाशङ्क्य शुद्धजीवस्वरूपज्ञानपूर्वकं तज्ज्ञानमुपदिशति। यथेति युग्मकेन। अयमर्थः। यथा स्वप्न मध्य एव सुप्तः कश्चित् पुरुषः पुनः स्वप्नं पश्यन् भ्रमविशेषेण विश्वं गिरिवनादिकमात्मनि पश्यति स्वस्मिन्नेवारोपयति पुनस्तस्मिन्नेव स्वप्ने उत्थितोऽल्पजागर इव सन् आत्मानमेकदेशस्थं तत्र शयनैकदेशं पश्यन् तद्गिरिवनादिकं भिन्नमेव पश्यति तानि जागरादीनि यथा आत्मनः परमात्मनो मम मायामात्राणि सन्ति जीवस्थानानि जीवोपाधेर्बुद्धेरेवावस्था भवन्ति। एवं गुणवान्त्यपि जागरादीनि विज्ञाय विज्ञातस्य पुरुषस्य शुद्धजीवस्यापि द्रष्टारं मामेव परं स्मरेदिति॥ ५३॥ ५४॥

तमेव स्पष्टयति—येनेति। मायिकाहङ्काराख्ये जीवादिगतमहाविच्छिन्नत्वांशेन तत्त्वविशेषेण हेतुना स्वापः तत्र निर्गुणसुखञ्च वेद तद्ब्रह्मावेहि आत्मानं परमात्मानं मां भगवद्रूपञ्चावेहि। वदन्ति तत्तत्त्वविद इत्यादेः॥ ५५॥

अतएव जीवज्ञानस्यापि ब्रह्मणि तात्पर्यमित्याह—उभयमिति। तज्ज्ञानं शुद्धजीव स्वरूपं तच्च ब्रह्मणि तत्परमिति॥ ५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

प्रस्तुत तान्यवास्तववस्तूनि स्वल्पस्तूर्णीव त्यक्त्वा ममान्तर्याम्यादि रूपमेवोपासीतेत्याह—यथेति द्वाभ्यां। स्वप्ने स्वप्नमध्य एव सुषुप्तः सुष्ठु सुप्तः पुरुषः स्वप्नं पश्यन् भ्रमविशेषेण विश्वं गिरिवनादिकमात्मनि पश्यति स्वस्मिन्नेवारोपयति पुनस्तस्मिन्नेव स्वप्ने उत्थितो अल्पजागरस्सन्नात्मानमेकदेशस्थं तत्र शयनप्रदेशस्थं मन्यते जाग्रदवस्थामनुभवन् तद्गिरिवनादिकं भिन्नमेव मन्यते इत्यर्थः तदेवमवस्तुभूतः स्वाप्निको जागरो यथा तथैव प्रसिद्धो वस्तुभूतोऽपि जागरो ज्ञेयो नश्वरत्वादित्याह—एवमिति। जीवस्थानानि जीवोपाधेर्बुद्धेरेवाऽवस्थाश्च आत्मनः परमेश्वरस्य मायाशक्तिकार्यत्वान्मायामात्राणि ज्ञात्वा तेषां द्रष्टारं परं श्रेष्ठमन्तर्यामिणमिति जीवात्मा स्मरेत्। अत्र स्वाप्निकयो जागरस्वप्नसुषुप्त्यवस्था कल्पितया जीवेन स्वज्ञत्वादविद्यामाऽयोऽवस्तुभूता एव प्रसिद्धा जागराद्यवस्थास्तु मायाशक्त्या भगवता सृष्टा मायामाऽयः सत्यवस्तुभूता एव तथापि स्वाप्निकं गिरिवनसर्पव्याघ्रहस्त्यश्वादि नश्वरत्वाविद्यया जीवेन स्वल्पमस्त्वेवेति विवेचनीयम्॥ ५३॥ ५४॥

ननु, तं द्रष्टारमन्तर्यामिणं कथमहं जानामीत्यत आह—येनेति। प्रसुप्तः पुरुषो जीवो यदा स्वापं वेद तदैव सुषुप्तावात्मनः स्वस्य निर्गुणं निर्विषयं सुखञ्च येनैव हेतुना वेद तं आत्मानं अन्तर्यामिणम् अवेहि यएव गुणैरेववद्धमावृतज्ञानानन्दमपि जीवं कृपया सुषुप्तौ नियमेन गुणान् प्रविश्याप्य निर्गुणं तदीयं सुखं तमनुभावयति स एवान्तर्यामी स्पष्टमेवावगम्यतां न हि तं विना स्वतन्त्रो जीवः स्वयमेव स्वबन्धनं विमोच्य स्वीयसुखं द्रष्टुं शक्नुयादिति भावः। तमन्तर्यामिणमेव निर्विशेषत्वेन प्रतीतं ब्रह्म अवेहि ब्रह्मैव सविशेषं मां भगवन्तमेवेहि। एक एवाहं ब्रह्म परमात्मा भगवानिति त्रिरूपो भवामि न तु मत्स्वरूपस्य द्वित्वं त्रित्वं वा यदुक्तं देवैः स्वरूपद्वयाभावादिति॥ ५५॥

ननु, स्वापप्रतिबोधयोः द्रष्टृ जाग्रदवस्थः कथं सुखमहमस्वाप्समिति स्मरेत्? नहान्येन दृष्टमन्यः स्मरति तत्राह—उभयं प्रस्वापं प्रतिबोधं च स्मरतः अनुसन्दधतः पुंसस्तयोः प्रस्वापप्रतिबोधयोर्यदन्वेति ताभ्यां व्यतिरिच्यते। एककालावच्छेदेनपायात् तदेव ज्ञानं जीव इत्यर्थः अतो बाल्ये दृष्टस्य यौवने स्मृतिवदवस्थान्तरवत्त्वेऽपि स्वापानन्दयोः स्मरणं घटत इति भावः तत् परं ततो जीवात् परं ब्रह्म न तु स एव ब्रह्मेत्यर्थः जीवस्य तटस्थशक्तित्वेऽपि तद्रूपत्वेऽपि तस्य स्वरूपशक्तित्वाभावात् अतो भिन्नमेव ब्रह्मेत्यर्थः॥ ५६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यस्य संकल्पमात्रेण स्वप्नसृष्टिः जाग्रत्सृष्टिश्चास्ति तं मां ध्यायेदित्याह - यथेतिद्वाभ्याम। यथा सुषुप्तोऽत्र सुप्तः पुरुषः विश्वं जीवेन स्रष्टुमशक्यं रथाश्वादिकं मम संकल्पनिष्पन्नमेव आत्मनि मनसि पश्यति ततउत्थितः आत्मानं स्वप्नपदार्थद्रष्टारं केवलं न तु स्वाप्नं रथादिकं दृश्यं मन्यते जानाति एकदेशस्थं स्वप्नदृष्टपदार्थस्य गन्धोऽपि नास्ति तत्र जाग्रत्सृष्ट्येकदेशस्थं न तु निखिलकोकस्थमित्यर्थः तन्निर्माणस्य तु का कथा परनिर्मितं तथा भूतं पदार्थं द्रष्टुमपि न क्षमो भवतीत्यर्थः। अनेन स्वप्नसृष्टिर्जीवकृता इति मायावादिनां पक्षो दूरतस्त्याज्यः॥ ५३॥

एवं जागरणादीनि जीवस्थानानि जीवस्य भोक्तुः जागरणाद्या अवस्थास्तत्र भोग्याः पदार्थाश्च यस्मात्मनः मम मायामात्राणि वयुनात्मकसंकल्पकृतानि तत्सर्वाः परं कारणं द्रष्टारं साक्षिणं च तं मां भवाब्धिभः स्मरेत् ध्यायेत् कारणं तु ध्येयमिति श्रुतेः॥ ५४॥

एवं प्रतिबोधकाले स्मरणीयं जगत्कारणमात्मानं विशदयितुं प्रत्युपादिश्य सर्वे यद्रूपं सुषुप्तौ प्राप्यते तद्रूपमुपदिशति "सता सोम्य तदा संपन्नो भवति" इत्येवं सुषुप्तौ प्रसिद्धेन यदा सुषुप्तः पुरुषः आत्मनः स्वापं सुखं सुषुप्तिगतमानन्दं वेद तं निर्गुणं ब्रह्म बृहत्स्वरूपगुणमात्मानं "एष त आत्मान्तर्यामी" इति श्रुतिप्रसिद्धमन्तर्यामिणं मामवेहि॥ ५५॥

ध्यानफलमाह प्रस्वापप्रतिबोधयोः शयनकाले प्रबोधकाले च तत् परं ब्रह्म स्मरतो ध्यायतः पुंसः उभयं जन्ममरणयुग्मं व्यतिरिच्येत तदेव ज्ञानं परं ब्रह्म अन्वेति च पुरुषमिति शेषः परमपुरुषमापाप्तिलक्षणमोक्षं प्राप्नोतीत्यर्थः॥ ५६॥

भाषा टीका।

स्वप्ने में सोया हुआ पुरुष अपने में संसार को देखता है और जागकर अपने आत्मा को एक देश में स्थित देखता है॥५३॥

यदेतद्विस्मृतं पुंसो मद्भावं भिन्नमात्मनः ।
ततः संसार एतस्य देहाद्देहो मृते मृतिः ॥ ५७ ॥
लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसम्भवाम् ।
आत्मानं यो न बुद्ध्येत न क्वचित्क्षममाप्नुयात् ॥ ५८ ॥
स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम् ।
अभयं चाप्यनीहायां सङ्कल्पाद्विरमेत्कविः ॥ ५९ ॥
सुखाय दुःखमोक्षाय कुर्वाते दम्पती क्रियाः ।
ततोऽनिवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥ ६० ॥

भाषा टीका ।

ऐसे जीवात्माके जाग्रत आदि अवस्थाओं को माया रूप जानकर इन अवस्थाओं के द्रष्टा परमात्मा का स्मरण करो ॥ ५४ ॥

सोया हुआ पुरुष जिससे अपनी सुषुप्ति अवस्था के अतीन्द्रिय सुख को जानता है वही ब्रह्म रूप परमात्मा मुझ को जान ॥ ५५ ॥

सुषुप्ति और जाग्रत् को स्मरण करते हुए पुरुष को जो ज्ञान प्राप्त होता है उन दोनों अवस्थाओं से भिन्न भी होता है वह ब्रह्म रूप मुझे जानो ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विपक्षे दोषमाह यद्यपि एतन्मद्भावं मत्स्वरूपं ब्रह्म विस्मृतं तदात्मनः सकाशाद्भिन्नं भवति तत एतस्य पुंसः संसारो भवति संसारस्वरूपमाह देहाद्देहो जन्मानन्तरं पुनर्जन्म मृते मृतेनंतरं मृतिश्चेति ॥ ५७ ॥

योन्यन्तरेपि भोगादिसम्पादनं शक्यं ज्ञानार्थं त्वत्रैव यतितव्यमित्याह—लब्ध्वेति । ज्ञानं शास्त्रोक्तम् विज्ञानमपरोक्षं तयोः सम्भवो यस्यां ताम् ॥ ५८ ॥

वैराग्यार्थमाह—ईहायां प्रवृत्तिमार्गे तत ईहतः अनीहायां निवृत्तिमार्गे त्वभयं मोक्षो भवतीति च स्मृत्वा फलसंकल्पाद्विरमेत् पाठान्तरे नोभयं परिक्लेशः फलविपर्ययश्च नास्तीत्येवं स्मृत्वा ॥ ५९ ॥

एतद्विवृणोति सुखायेतित्रिभिः । दुःखस्यानिवृत्तिः सुखस्याप्राप्तिः ॥ ६० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमननुसन्धानेऽनर्थमाह—यदेति । यदेतत्पुंसो देहिन आत्मनः स्वस्य मद्भावं भावः प्रकारः शरीरत्वमात्मनो मत्प्रकारत्वं विस्मृतं सत् भिन्नं भावप्रधानो भिन्नशब्दः भिन्नत्वं पृथक्सिद्धत्वरूपस्वातन्त्र्यं स्यादित्यर्थः भिन्नत्वेनानुसंहितं स्यादिति भावः ततो हेतोरस्य जीवस्य संसारो भवति. संसारस्वरूपमाह—देहाद्देहः जन्मान्तरं मृतेरनन्तरं पुनर्मृतिश्चेति ॥ ५७ ॥

एवं ब्रह्मात्मकत्वाननुसन्धानेऽनर्थहेतुसंसृतिरूप उक्तः अयञ्च मनुष्यजन्मनैव परिहार्यो न तिर्यगादि जन्मनेत्याह—लब्ध्वेति । एष जीवः ज्ञानं शास्त्रजन्यं विज्ञानं विमोकादिसाधनसप्तकजमुपासनात्मकं तयोः सम्भवो यस्यास्तां मानुषीं योनिं लब्ध्वा मानुष्यं जन्म प्राप्यापीत्यर्थः आत्मानमुक्तविधमात्मस्वरूपं यो न बुध्येत स पुमान्कश्चिदपि क्षेमं नाप्नुयात् तिर्यगादियोनिषु ज्ञानविज्ञानयोग्यतैव नास्ति "तद्योग्यां दुर्लभां मानुषीं योनिं प्राप्यापि ब्रह्मात्मकमात्मानं स्वशरीरकं ब्रह्म यो नोपासीत" स पुनः पुनः संसरेदेवेति भावः ॥ ५८ ॥

मानुषीं योनिं लब्धवतोपि विषयासक्तस्य कथं ज्ञानादिकं प्रतिष्ठितं भवेत्? तत्राह—स्मृत्वेति । ईहायां विषयसुखार्थायां चेष्टायां प्रवृत्तिधर्मे परिक्लेशमत्यन्तशरीरायासादिरूपं तत ईहातः फलविपर्ययं फलविपर्यासं सुखार्थचेष्टातो दुःखप्राप्तिश्च स्मृत्वा स्वस्वात्मावलोकनीहायां निवृत्तिधर्मेऽभयमल्पत्वास्थिरत्वदुःखोदर्कत्वादिदोषभिन्नभयरहितममृतत्वं च पश्यन् मुनिः स्वात्मपरमात्मयाथात्म्यमननशीलः तत ईहातः शनैर्विरमेत् उक्तविधालोचनेन शनैर्वैराग्यमुत्पादयेदित्यर्थः ततो ज्ञानविज्ञाने प्रतिष्ठिते भवत इति भावः ॥ ५९ ॥

ईहायां परिक्लेशफलविपर्ययावेव स्पष्टयति—सुखायेति । सुखाप्तये दुःखनिवृत्तये च क्रियाः तदुपयुक्तान्व्यापारान् दम्पती यद्यपि कुर्वाते तथापि ततस्तत्क्रियाभ्यः दुःखस्यानिवृत्तिः सुखस्याप्राप्तिश्च दुःखस्य निवृत्तिः सुखस्य प्राप्तिश्च न भवति प्रत्युत विपरीतमेव भवतीति भावः ॥ ६० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विपक्षे बाधकमुपपादयति—यदीति। यदि पुंस आत्मनो जीवात् भिन्न एष मद्भाव उक्तो मम स्थितिप्रकारो विस्मृतस्तर्हि ततस्तयोः सयुजोः सख्योः जीवात्मपरमात्मनोः एकस्य सर्वभिन्नपरमात्मानं विस्मरतो जीवस्य संसारः स्यात् किं लक्षणक इति तत्राह—देहादिति। देहयोगवियोगलक्षणो देहाद्देहः समुक्तम्। "सर्वभिन्नं परात्मानं विस्मरन्संसरेदिह" इति सर्वभिन्न इति विशेषणं विस्मृतस्तर्हि तस्य जीवस्य मृतेर्मृतिः नित्यदुःखात्मकं तम एव प्राप्यते एतदप्युक्तं "अभिन्नसंस्मरन्याति तमो नास्त्यत्र संशयः" इति ॥ ५७ ॥

मद्भावः मदेकपक्षणः स्वस्मादभिन्न इत्यर्थाङ्गीकार उत्तरश्लोकेन विकल्पयत इत्यभिप्रेत्याह—लब्ध्वेति । ज्ञानविज्ञानयोः संभवो यस्याः सा तथा ताम् इह जंबूद्वीपे तत्रापि भारतखण्डे त्रिवर्णलक्षणाम् मानुषीम् आत्मानं जीवात्मानं परमात्मानं च निर्विशेषवादिना ज्ञाने सामान्यविशेषानङ्गीकारात् व्यावहारिकत्वाप्रामाणिकत्वाच्चेति ज्ञानं शास्त्रार्थविषयं विज्ञानम् अनुभवजमित्ययं भेदोपि गतार्थ इति ॥ ५८ ॥

ननु, ज्ञानेन मोक्षो माभूद्यज्ञादिकर्मणा स्यादिति तत्राह—स्मृत्वेति । ईहायां यज्ञादिकर्मकरणे परितः क्लेशं स्मृत्वा ततः कर्मणः फलविपर्ययं निरतिशयसुखाप्राप्तिं दुःखापरिहारं च पश्यननीहायां पूर्वकर्माणि हरौ संन्यस्य ज्ञानमार्गप्रवृत्तौ पश्यन्निरतिशयसुखप्राप्तिं दुःखपरिहारं तयोरभिन्नत्वं वा ज्ञात्वा तन्निमित्तं तत्साध्यं कर्म विरमेत्न कुर्यादित्यर्थः ॥ ५९ ॥

अग्निहोत्रादिक्रियाकरणयोग्यौ दंपती ततः क्रियातः दुःखस्य अनिवृत्तिः सुखस्य चाप्राप्तिः ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदज्ञाने दोषमाह—यदस्माद्यद्विस्मृतं। अनाद्यज्ञानेनानुसंहितं। ततस्तस्मादेव एतस्य जीवस्य संसारः तत्राभिप्रायविशेषेण जीवाद्भिन्नत्वेन स्वस्माद्भिन्नत्वेन दर्शयति, आत्मनोभिन्नं, मम भावः सत्ता यत्र तदिति "भयं द्वितीयाऽभिनिवेशतः स्यात्" इत्यादियुक्तमेव तदज्ञाने संसार इति ॥ ५७—६० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अतो ब्रह्मजीवयोः स्वरूपैक्यभावनमेवापराधोऽनर्थहेतुरित्याह—यदेतदिति । आत्मनो जीवात् सकाशात् मद्भावं मत्स्वरूपं भिन्नमेव जीवत्वमार्ध्य यद्ययदि विस्मृतं स्यादभिन्नमेव स्यात् अतो हेतोरेतस्याभिन्नदर्शिनः पुंसः संसारः स्यात् संसारमेवाह—देहादिति। अत एव "तत्त्वमसि" इत्यादौ जीवस्य तदीयतटस्थशक्तित्वेन ताद्रूप्यादेव सूर्यतत्किरणयोरिवैक्यं भावनीयमिति भावः यद्वैवमवास्तववस्तुनो विश्वस्य तच्छक्तिकार्यत्वेनाभिन्नत्वात्स्याद्रूप्यं । ताद्रूप्येति तात्कल्पमायाशक्तिमेव मध्यात्वप्रयोजकं शुद्धजीवस्य स्वतन्त्रत्वाद्वास्तववस्त्वन्तःपातित्वेपि तटस्थशक्तित्वात्ताद्रूप्यमेव. न तु तात्स्वरूप्यं ब्रह्मपरपरमात्मभगवतां तु वास्तववस्तुत्वं स्वरूपैक्यादैक्यञ्च । भगवन्नित्यप्रेयसी पार्षदभाज्ञां चिच्छक्तिविलासत्वात् केषाञ्चिन्नित्यसिद्धत्वादपि वास्तववस्तुत्वं तात्स्वरूप्यञ्च । केषाञ्चिन्नित्यमुक्तभक्तत्वेन, केषाञ्चिल्लब्धभक्तिकैवल्यत्वेन, सिद्धानां दास्यादिवासनावतां जीवानां तु नित्यदासाद्यन्तःपातित्वेन स्वरूपशक्त्याविष्टत्वादेव तात्स्वरूप्यं, लब्धभक्तिप्रधान्येन सिद्धानां जीवानां शान्तभक्तत्वात् दासादिगणान्तःपातित्वाभावेन स्वरूपशक्त्यानाविष्टत्वात्ताद्रूप्यं वास्तववस्तुत्वञ्चेति भगवतोऽनेकशक्तिमत्त्वेनाद्वैतं फलितमिति प्रसङ्गात् वैष्णवसिद्धान्तो दर्शितः ॥ ५७ ॥

उक्तलक्षणज्ञानार्थमवश्यमेव यतितव्यमित्याह — लब्ध्वेति । ज्ञानं शास्त्रोत्थं विज्ञानमपरोक्षं तयोः सम्भवो यस्यां तां । आत्मानं जीवं परमेश्वरञ्च ॥ ५८ ॥

एतज्ज्ञानेच्छुर्नातरष्टादृष्टकर्मफलकः कर्मनिष्ठां त्यजेदित्याह—ईहायां सकामत्वे तत ईहात अनीहायां निष्कामत्वे अभयं सर्वत एव भयाभावः । नोभयमिति पाठे क्लेशविपर्ययौ न स्यातामिति स्मृत्वा ॥ ५९ ॥

एतद्विवृणोति—सुखायेति त्रिभिः। दुःखस्यानिवृत्तिः सुखस्याप्राप्तिः ॥ ६० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भजनाभावे मुक्त्यभाव इत्याह—यदिति यदेतत्। स्मरणादिमद्भावं मद्भजनं पुंसो भिन्नं सत्संगाद्यभावेन दूरीभूतं सत् विस्मृतं भवति ततो हेतोः एतस्यात्मनो जीवस्य देहाद्देहो मृतेर्मृतिः एवंभूतः जन्ममरणप्रवाहलक्षणः संसार एव स्यात् ॥५७॥

ज्ञानविज्ञानयोः सम्भवो यस्यां ताम् आत्मानं यद्विज्ञानेन सर्वं विज्ञातं स्यात्तं भगवन्तम् ॥ ५८ ॥

ईहायां प्रवृत्तौ परिक्लेशम् । तथेहितार्थलाभः अनीहितार्थलाभश्चेति. फलविपर्ययञ्च स्मृत्वा अनीहायां निवृत्तौ च अभयं स्मृत्वा ततो हेतोः संकल्पात्प्रवृत्तिमार्गसंकल्पात् ॥ ५९ ॥

फलविपर्ययं स्पष्टयति——सुखायेति ॥ ६० ॥

भाषाटीका।

जब यह ब्रह्म विस्मरण हुआ जीवात्मा से भिन्न हो जाता है तब इस अज्ञानि जीव को बारम्बार जन्म मरण होते हैं ॥ ५७ ॥

इस संसार में ज्ञान विज्ञान की देने वाली मनुष्य योनि को पाकर जिसने आत्माके स्वरूप को नहीं जाना उसको फिर और किसी योनि में शान्ति नहीं प्राप्त होती है ॥ ५८ ॥

एवं विपर्ययं बुद्ध्वा नृणां विज्ञाभिमानिनाम् ।
आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणाम् ॥ ६१ ॥
दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा ।
ज्ञानविज्ञानसन्तुष्टो मद्भक्तः पुरुषो भवेत् ॥ ६२ ॥
एतावानेव मनुजैर्योगनैपुणबुद्धिभिः ।
स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनम् ॥ ६३ ॥
त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम ।
ज्ञानविज्ञानसम्पन्नो धारयन्नाशु सिध्यसि ॥ ६४ ॥

श्रीशुक उवाच ।

आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः ।
पश्यतस्तस्य विश्वात्मा ततश्चान्तर्दधे हरिः ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्याम्
संहितायां वैयासिक्यां चित्रकेतूपाख्याने
षोडशोऽध्यायः ॥ १६ ॥

भाषा टीका ।

प्रवृत्ति मार्ग में बहुत क्लेश और विपरीत फल देखकर तथा निवृत्ति मार्ग में मोक्ष जानकर बुद्धिमान् सङ्कल्पों से विराम को प्राप्त होजाय ॥ ५९॥

स्त्री पुरुष, सुखप्राप्ति और दुःख दूर होने के लिये कर्म करते है, परन्तु उस कर्म से दुःखकी निवृत्ति और सुख की प्राप्ति नहीं होती ॥ ६० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विज्ञाः उद्यमे प्रवीणा वयमित्यभिमानवतां स्थानत्रयविलक्षणां तुरीयां बुद्ध्वा ॥ ६१ ॥

दृष्टश्रुताभिर्मात्राभिरैहिकामुष्मिकैर्विषयैः स्वेन तेजसा विवेकबलेन ॥ ६२ ॥

नचातः परः पुरुषार्थोऽस्तीत्याह—एतावानिति । योगे नैपुणं यस्यां सा बुद्धिर्येषां परस्यात्मन एकं दर्शनमिति यदेतावानेव ॥ ६३ ॥ ६४ ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनीहायामुभयं स्पष्टयति—एवमिति । विज्ञाभिमानिनां वयमीहायां कुशला इत्यभिमानवतां नृणां ईहायामेवमुक्तप्रकारेण विपर्ययं बुध्वा आलोच्य स्थानत्रयविलक्षणां जाग्रत्स्वप्नसुषुप्त्यतीतां केवलविषयासक्तैर्दुर्ज्ञेयामात्मनः प्रत्यगात्मनो गतिं ब्रह्मात्मकत्वाद्याकारं बुध्वा ॥ ६१ ॥

दृष्टश्रुताभिरैहिकामुष्मिकीभिः मात्राभिः विषयसुखलेशैः स्वेन तेजसा स्वविवेकबलेन निर्मुक्तः मात्रासु जातविराग इत्यर्थः ज्ञानविज्ञानाभ्यां पूर्वोक्ताभ्यां सन्तुष्टः ज्ञानसहकृतभगवदनुभवरूपविज्ञानमात्रसन्तुष्टः मद्भक्तः मम निरतिशयप्रियः पुरुषो भवेत् एवञ्चोभयं तस्य ब्रह्मात्मकत्वमनुसन्दधतः करस्थमिति भावः ॥ ६२ ॥

तत्राह—एतावानिति । योगे नैपुणं यस्याः सा बुद्धिर्येषां तैर्मनुजैः सर्वात्मना सर्वप्रकारेण ज्ञेयः स्वार्थोऽनिष्टपरिहारेष्टप्रापणसमर्थं पुरुषेण प्रार्थनीयं वस्तु एतावानेव, एव एवेत्यर्थ स्वार्थवानिः यद्वा एतावानेतत्परिमित एव. कोऽसौ ? तत्राह—यत्परात्मैकदर्शनमिति, परस्य परमात्मनः आत्मनः स्वस्य च ऐक्यदर्शनमपृथक्सिद्धसम्बन्धदर्शनमिति यदेतावानेवेत्यर्थः यद्वा परात्मनः, परमात्मन ऐक्यदर्शनमेकत्वेन प्रकारित्वेनैकेनैवाकारेण च दर्शनं यद्वा परस्य परमात्मनः आत्मनः स्वस्य च ऐक्यदर्शनं परमात्मनः प्रकारित्वेनैकेनाकारेण स्वस्य च तत्प्रका

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वरूपेणैकेनाकारेण दर्शनं परमात्मैकाद्दर्शनमितियदेतावा-नित्यर्थः ॥ ६३ ॥

एवं परात्मैक्यद्रष्टा चेत्त्वमप्याशु मुक्तो भविष्यसीत्याह—त्वामिति । हे राजन् चित्रकेतो, त्वमप्रमत्तः समाहितचित्तः श्रद्धया ज्ञानविज्ञानसम्पन्नं सम्पत्तिः सम्पन्नं 'भावेक्तः' ज्ञान-विज्ञानयोः सम्पत्तिर्यस्मात्सन्मम वचः धारयन् स्थानिष्ठं कुर्वन् ज्ञानविज्ञानसम्पादकं मदुक्तार्थमनुतिष्ठन्नित्यर्थः ब्रह्मात्मकत्वा-नुसन्धानेन ज्ञानविज्ञाने प्रतिष्ठिते भवत इति भावः ज्ञान-विज्ञानसम्पन्न इति प्रथमान्तपाठे स्पष्टार्थः आशु सिध्यसि मुक्तो भविष्यसि ॥ ६४ ॥

एवमुपादिश्य भगवानन्तर्दधौ इत्याह—मुनिः, आश्वास्येति । विश्वात्मा जगद्गुरुर्भगवान्हरिः सङ्कर्षणश्चित्रकेतुमित्थमा-श्वास्य नारदाङ्गिरउक्तिसम्भावितस्वचसा विश्वास्य तस्य चित्र-केतोः पश्यतः सतस्तत्रैव पातालादधस्तात्कस्यांश्चिद्दिशि अन्तर्हितवान् ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कर्मविषयविद्याभासे इत्थमिदेत्यभिमानिनां आत्मनो जीवस्य परमात्मनश्च वैकुण्ठादिस्थानतया दत्तानिभूताप्रतिमभूतिमत्तया विलक्षणां जाग्रदादिस्थानत्रयातीतां च ॥ ६१ ॥

मात्राभिः शब्दादिभिः स्वेन तेजसा विशुद्धबुद्धिसामर्थ्याति-शयेनैव ज्ञात्वा पुरुषो भवेन्मुक्त इति शेषः ॥ ६२ ॥

उक्तज्ञानमन्वयोगाद्यवच्छिनत्ति—एतावानेवेति । किं तदित्यत उक्तं यदिति । परात्मन एकत्वस्य साङ्ख्याधिकपरादिलक्षणस्य दर्शनम् ॥ ६३ ॥

तत्र योग्यश्चैतदेव नान्यदित्याह—त्वमेतदिति ॥ ६४ ॥

चिरकिंपतत्वेन पुनरपि प्रश्नः स्यादित्येतस्य हरेरन्तर्धानमाह । आश्वास्येति ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वानुरूपमेवोपसंहरति—एतावानिति युग्मकेन । "आत्मारामाश्च मुनयः" इत्यादेः ॥ ६१ ॥ ६२ ॥

तदेव प्रशंसति—एतावानिति । परमात्मनो भगवत एवैकं केवलं दर्शनं अनुभव इति यत् ॥ ६३ ॥

त्वमसिद्धोऽसीति । यत् पूर्वमुक्तम् अधुना च सिध्यसीति तद्ध-यमपि वर्तमानसामीप्येनैव ज्ञेयं तत्राप्यप्रमत्तः सन् मम वचो-धारयन्निति भाविविघ्नो हेतुरप्युद्दिष्टः ॥ ६४ ॥ ६५ ॥

इतिश्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
षोडशोऽध्यायः समाप्तः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्थानत्रयविलक्षणां तुरीयां मात्राभिर्विषयैः स्वतेजसा स्वीय-साधनप्रभावेन ॥ ६१ ॥ ६२ ॥

परस्य श्रेष्ठात्मनः परमात्मन एव एकं दर्शनं न तु विष-यस्य ॥ ६३-६५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठेऽयं षोडशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विद्याभिमानिना इहितार्थनिष्पादनबुद्धिविगतानां कर्मिणां स्थानत्रयविलक्षणां स्वर्गनरकभूसम्बन्धवर्जितां वैकुण्ठसम्बन्धिनीम-र्चिरादिरूपां च बुध्वा ॥ ६१ ॥

तेजसा हेयोपादेयविवेकेन मात्राभिर्विषयैर्निर्मुक्तः ज्ञानं चिद-चिद्ब्रह्मस्वरूपगुणादियाथात्म्यबोधः विज्ञानं सर्वं ब्रह्मात्मकमिति बोधः ताभ्यां संतृप्तः मद्भक्तो भवेत् ॥ ६२ ॥

योगे ज्ञानभक्त्यादिसाधनयोगे नैपुण्यं यस्याः सा बुद्धिर्येषां तैः परात्मनोर्ब्रह्मजीवयोः अद्वयोर्दयोर्वैदर्शनं गुणागुणिनोर्जाति-व्यक्त्योः प्रमाप्रमात्रोः कार्यकारणयोश्च यथा अनेकयोरप्येक-दर्शनं तद्वत् एतावानेव सर्वार्थना साकल्येन स्वार्थो ज्ञेयः "तत्त्व-मसि" इति श्रुतिरप्यत्रानुसन्धेया ॥ ६३ ॥ ६४ ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षोडशोऽध्यायार्थप्रकाशः ॥ १६ ॥

भाषा टीका ।

पवित्रमंमभ्य पुरुषों का इस प्रकार का विपर्यय जानकर, आत्माकी सूक्ष्म चतुर्थगति समझकर पुरुष ज्ञान विज्ञान में सन्तुष्ट होकर हमारा भक्त हो जावे ॥ ६१ ॥ ६२ ॥

भाषाटीका ।

योग में निपुण बुद्धि वाले मनुष्योंको सर्व प्रकार इतना ही स्वार्थ मानना चाहिये कि जो परमात्मा का एक दर्शन हो जावे ॥ ६३ ॥

हे राजन् ! तुम श्रद्धा से अप्रमत्त होकर इस हमारे वाक्य को धारण करते हुए, विज्ञान सम्पन्न होकर शीघ्र ही सिद्ध हो जावेंगे ॥ ६४ ॥

श्री शुक उवाच ॥

जगद्गुरु भगवान् श्री शेषजी इस प्रकार चित्रकेतु को आश्वासन करके चित्रकेतु के देखते २ विश्वात्मा हरि श्री-सङ्कर्षणजी अन्तर्ध्यान होगये ॥ ६५ ॥

इति श्रीमद्भागवतमहापुराण षष्ठस्कन्ध षोडशाध्यायकी भाषा टीका समाप्त ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे षोडशोऽध्यायः समाप्तः ॥ १६ ॥

॥ सप्तदशोऽध्यायः ॥

——:*:——

श्रीशुक उवाच ।

यतश्चान्तर्हितोऽनन्तस्तस्यै कृत्वा दिशे नमः ।
विद्याधरश्चित्रकेतुश्चचार गगनेचरः ॥ १ ॥
स लक्षं वर्षलक्षाणामव्याहतबलेन्द्रियः ।
स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः ॥ २ ॥
कुलाचलेन्द्रद्रोणीषु नानासङ्कल्पसिद्धिषु ।
रेमे विद्याधरस्त्रीभिर्गापयन्हरिमीश्वरम् ॥ ३ ॥
एकदा स विमानेन विष्णुदत्तेन भास्वता ।
गिरिशं ददृशे गच्छन्परीतं सिद्धचारणैः ॥ ४ ॥
आलिङ्ग्याङ्कीकृतां देवीं बाहुना मुनिसंसदि ।
उवाच देव्याः शृण्वत्या जहासोच्चैस्तदन्तिके ॥ ५ ॥

चित्रकेतुरुवाच ।

एष लोकगुरुः साक्षाद्धर्मं वक्ता शरीरिणाम् ।
आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ॥ ६ ॥
जटाधरस्तीव्रतपा ब्रह्मवादी सभापतिः ।
अङ्कीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ॥ ७ ॥
प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति ।
अयं महाव्रतधरो बिभर्ति सदसि स्त्रियम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः स्वप्नदृष्टोऽमोघमहर्द्धिं प्राप्य खे चरन् ।
विहस्य गिरिशं शापादुमाया वृत्रतां गतः ॥ १ ॥

यतो यस्यां तस्यै दिशे नमः प्रणामं कृत्वा ॥ १ ॥

स चित्रकेतुर्विद्याधरस्त्रीभिर्हरिं गापयन् रेम इति द्वयोरन्वयः प्रत्याहतं बलमिन्द्रियपाटवं च यस्य ॥ २ ॥

नानाविधाः सङ्कल्पेनैव सिद्धयो यासु तासु ॥ ३ ॥

अकस्माद्द्रुतैश्वर्यगर्वात्प्राचीनकर्मतः ।
आसुरीं योनिमापन्नो भवानीशापतः स तु ॥

तदाह—एकदेत्यादिना ॥ ४ ॥

अङ्कीकृतामुत्सङ्गेनैकीकृत्य देवीं बाहुनाऽऽलिङ्ग्य स्थितञ्च उवाच जहास च तस्या अन्तिके स्थितः सन् ॥ ५ ॥

धर्मं वक्ता वदति शरीरिणां मध्ये मुख्यश्च भार्यया मिथुनीभूय चाऽऽस्ते ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत उपरितनं चित्रकेतोर्वृत्तान्तमाह—मुनिः, यत इति । यतः यस्यां दिशि सङ्कर्षणोऽन्तर्हितवान् तस्यै दिशे नमस्कृत्वा स विद्या-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चार: विद्याधरत्वं प्राप्त: विद्याधरैरिति पाठे तै: सह चित्रकेतुर्गगनचारीभूत्वा तत्रतत्र चचार ॥ १ ॥

तदेवाह–स इति । महायोगी भगवान्स चित्रकेतुरव्याहतं बलं येषां तानीन्द्रियाणि यस्य तादृशो लक्षवर्षाणां लक्षं बहुकालमित्यर्थ: मुनिभि: सिद्धैश्चारणैश्च स्तूयमान: ॥ २ ॥

नानाविधा: स्वसङ्कल्पानुसारिण्य: सिद्धय: भोग्यभोगोपकरणादिसिद्धयो यासु कुलाचलेन्द्रस्य मेरोर्द्रोणीषु विद्याधरस्त्रीभिरीश्वरं हरिं गापयन् गानं कारयन् रेमे ॥ ३ ॥

स चित्रकेतुरेकदा कदाचिद्विष्णुदत्तेन यथासङ्कल्पं भगवता दत्तेन भास्वता प्रकाशमानेन विमानेन तत्रतत्र गच्छन् सञ्चरमाणः सिद्धैर्योगिभिश्च परीतं परिवृतं गिरिशं रुद्रं ददर्श ॥ ४ ॥

कथंभूतं रुद्रम् अङ्के उत्सङ्गे कृतां निधापितां देवीमम्बिकां बाहुना आलिङ्ग्य मुनीनां मननशीलानां संसदि सभायां स्थितमिति शेष: ततो देव्यां शृण्वन्त्यां सख्यां उवाच जहास च हसितवांश्च ॥ ५ ॥

तदेवाह–एष इति त्रिभि: । एष रुद्र: साक्षाल्लोकानां गुरुर्हितोपदेष्टा किञ्च शरीरिणां धर्मं वक्ता मुख्य: प्रधान: स्वधर्मोपदेष्टा सन् सभायां भार्यया सह मिथुनीभूयाऽऽस्ते ॥ ६ ॥

किञ्च जटा: बिभर्तीति तथा तीव्रमुग्रं मितान्तं वा तपो यस्य स ब्रह्मवादी ब्रह्मज्ञानोपदेष्टाऽस्य च सभाया: पति: प्रधान: एवंभूतोऽपि लज्जाहीन: अङ्के स्त्रियं कृत्वा निधाप्याऽऽस्ते उपविष्टवान् यथा प्राकृत: अत्यन्तमूढस्तद्वत् ॥ ७ ॥

किञ्च प्राकृता अपि बहुशो रहस्येव स्त्रीयमङ्के बिभ्रति निधापयन्ति अयं तु महाव्रतधरोऽपि सदसि सभायामेव स्त्रियमङ्के बिभर्ति अयं महान् व्यत्यास इति भाव: ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथाशास्त्रार्थतत्त्वेन ज्ञात: श्रीनारायणो मुक्तिं ददाति, नान्यथा. यथाशास्त्रार्थतत्त्वं योग्यानामेव ज्ञातुं सुशकं, नायोग्यानां "परोक्षप्रिया इव हि देवा:" इति श्रुते: दुरवगाहं शास्त्रार्थतत्त्वं हरे: प्रीतिजनकं तथा प्रतिपादनमित्ययं प्रकार: कथ्यते अस्मिन्नध्याये, तत्र चित्रकेतो: रुद्राच्छापप्राप्तिप्रकारं वक्तुं तावदाह—यतश्चेति ॥ १ ॥ २ ॥

कुलाचलेन्द्रस्य द्रोणीषु निम्नतटीष्वत एव स्त्रीणां पुरुषाणां च नानासङ्कल्पसिद्धिषु ॥ ३ ॥

ततश्च किं प्रवृत्ते तत्राह–एकदेति ॥ ४ ॥

दृष्ट्वापि किमभूत्तत्राह—उवाचेति ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भ: ।

सखद्वमिति युग्मकम् ॥ १—३ ॥

तत्रापि प्राचीनमहदपराधान्तरस्य दुष्फलमाह–एकदेति ॥ ४–८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

चित्रकेतु: सप्तदशे विद्याधरपतिर्भवत् ।
विहस्य शङ्करं देव्या: शापतो वृत्रतामगात् ॥ ० ॥

यत: यस्यां दिशि ॥ १—२ ॥

नानासङ्कल्पसिद्धिष्वपि सङ्कल्पान् विहाय हरिं गापयन्नेव रेमे हरेर्गुणश्रवणकीर्तनयोरेव रतोऽभूदित्यर्थ: ॥ ३—६ ॥

"भक्तिं भूमिं हरिर्दत्त्वा स्वविच्छेदानुभूतये ।
देव्या: शापेन वृत्रत्वं नीत्वा तं स्वान्तिकेऽनयत्"

अङ्गीकृतां स्वदेहार्धीकृतां प्राकृतो यथेति न तु प्राकृत: साक्षादीश्वरत्वादिति । वस्तुतस्त्वयं शिवनिन्दकोऽपराधी ज्ञेय इति भाव: ॥ ७ ॥

महाव्रतधरो नैष्ठिकब्रह्मचारी स्त्रियं बिभर्तीत्यत्यन्तमेवाश्चर्यमिति भाव: ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीप: ।

यथा चित्रकेतुर्वृत्रोऽभूत्तत्सप्तदशे कथ्यते—यत इति । यतो यस्यां दिशि अन्तर्हितस्तस्यै नमो नमनं कृत्वा गगनचारीभूत्वा तत्र चचार ॥ १ ॥

वर्षलक्षाणां लक्षं बहुकालं अव्याहतं न विहतं बलमिन्द्रियपाटवं यस्य स: ॥ २ ॥

नाना अनेकप्रकारा: संकल्पेनैव सिद्धयो यासु तास्वपि विद्याधरस्त्रीभिर्हरिं गापयन् एव रेमे न तु काम्यशक्तोऽभूदिति भाव: ॥ ३ ॥

"भुक्तान्तराय भूतप्रारब्धकर्मणस्तस्य तावदेव चिरं यावन्न विमोक्ष्ये"

इतिश्रुतिप्रसिद्धस्य फलभोगाय भवानीशापद्वारा वृत्ररूपेण प्रवृत्तोऽभूदित्याह–एकदेत्यादिना । मुनिसभायाम् अङ्गीकृत्वा उत्सङ्गे आरोपितो बाहुना आलिङ्ग्य स्थितं प्रति तदन्तिके उच्चैर्जहास देव्या: शृण्वन्त्या उवाच च ॥ ४ ॥ ५ ॥

शरीरिणां मध्ये मुख्योऽत एव लोकानां गुरुरत एव साक्षात् धर्मं भगवद्भक्तिलक्षणं वक्ता वदति सभायां भार्यया मिथुनीभूय आस्ते ॥ ६ ॥ ७ ॥ ८ ॥

भाषा टीका ।

श्री शुक उवाच ॥

जिस दिशा में अनन्त भगवान् अन्तर्धान हुए विद्याधर

श्रीशुक उवाच ।

भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप ! ।
तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ॥ ९ ॥
इत्यतद्वीर्यविदुषि ब्रुवाणे बह्वशोभनम् ।
रुषाऽऽह देवी धृष्टाय निर्जितात्माभिमानिने ॥ १० ॥

पार्वत्युवाच ।

अयं किमधुना लोके शास्ता दण्डधरः प्रभुः ।
अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत् ॥ ११ ॥
न वेद धर्मं किलपद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः ।
न वै कुमारः कपिलो मनुश्च ये नो निषेधन्त्यतिवर्तिनं हरम् ॥ १२ ॥
एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मङ्गलमङ्गलं स्वयम् ।
यः क्षत्रबन्धुः परिभूय सूरीन्प्रशास्ति धृष्टस्तदयं हि दण्ड्यः ॥ १३ ॥
नायमर्हति वैकुण्ठपादमूलोपसर्पणम् ।
सम्भावितमतिः स्तब्धः साधुभिः पर्युपासितम् ॥ १४ ॥
अतः पापीयसीं योनिमासुरीं याहि दुर्मते ! ।
यथेह भूयो महतां न कर्ता पुत्र ! किल्बिषम् ॥ १५ ॥

श्रीशुक उवाच ।

एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः ।
प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत ! ॥ १६ ॥

भाषा टीका ।

चित्र केतु भी उसी दिशा को प्रणाम कर आकाश मार्ग से विचर ने लगा ॥ १ ॥

मुनि सिद्ध चारणों से स्तूयमान अव्याहत इन्द्रियवाला महायोगी वह चित्रकेतु नाना प्रकार सङ्कल्प से सिद्धियों को प्राप्त करने वाला कुलाचल पर्वत की गुहाओं मे विद्याधरों की स्त्रियों से भगवान् का यश गान कराता हुआ रमता भया ॥ २ ॥ ३ ॥

एक समय विष्णु के दिये हुए भास्वर विमान मे बैठा हुआ जाता था उसी समय सिद्ध चारणों से व्याप्त महादेव को चित्रकेतु ने देखा कि मुनि लोगों की सभा में श्री पार्वतीजी को बाहू से आलिङ्गन करके अङ्क में बैठाये हैं । तब तो पार्वतीजी के सुनते २ हसकर उनके समीप में आकर बोला ॥ ४ ॥ ५ ॥

चित्रकेतु उवाच ॥

यह साक्षात् लोक गुरु है और जीवों के मध्य में साक्षात् धर्म का वक्ता है तो भी सभा में भार्या के साथ जोड़ा जोड़ कर बैठा है ॥ ६ ॥

जटा को धारण किये, ब्रह्मचारी, तीव्र तप वाला, सभापति होकर, जैसे प्राकृत मनुष्य, इस प्रकार निर्लज्ज होकर स्त्री को गोद मे लेकर बैठा है ॥ ७ ॥

प्राय करके प्राकृत मनुष्य भी एकान्त मे स्त्री को गोद में धारण करते हैं वह महाव्रत के धारण करने वाला सभा में स्त्री को धारण किया है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अगाधा गम्भीरा धीर्यस्य सः ॥ ९ ॥

न तस्य वीर्यं प्रभावं विद्वानतद्वीर्यविद्वांस्तस्मिन् निर्ज-

श्रीधरस्वामिकृतभावार्थदीपिका ।

तात्माभिमानिने जितेन्द्रियोऽहमित्यभिमानवते इति रुषा क्रोधेनाह ॥ १० ॥

विरुद्धं प्रकर्षेण करोतीति विप्रकृत् ॥ ११ ॥

अतिवर्तिनं शास्त्रमतिक्रम्य वर्तनशीलं ये नो निषेधन्ति न निवारयन्ति ॥ १२ ॥

एषां ब्रह्मादीनामनुध्येयं पदाब्जयुग्मं यस्य तम् मङ्गलमङ्गलं परमधर्ममूर्तिम् सूरीन् परिभूयाऽवज्ञां कृत्वा जगद्गुरुं यः प्रशास्ति तत्तस्मात् ॥ १३ ॥

ननु, हरिभक्तोऽयं न दण्डार्ह इति चेत्तत्राह—नायं साधुभिः परिसेवितं वैकुंठस्य पादमूलोपसर्पणमर्हति यतः संभाविता अहमधिक इति कृता मतिर्येन अत एव स्तब्धोऽनम्रः ॥ १४ ॥

तदेवं स्वयं दंड्यत्वं निश्चित्य तं प्राह—अत इति । हे पुत्र ! यथा भूयो महतां किल्बिषमपराधं न कर्ता न करिष्यसि तथा याहीत्यर्थः ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्तच्चित्रकेतोर्वचः श्रुत्वाऽपि भगवान् रुद्रः अगाधा गम्भीरा धीर्यस्य तादृशोऽत एव प्रहस्य तूष्णीं बभूव, हे नृप, तथा तं रुद्रमनुव्रतास्तदनुव्रताः सभ्याश्च तूष्णीं बभूवुः ॥ ९ ॥

अतद्वीर्यविदुषि न तस्य रुद्रस्य वीर्यं प्रभावं 'तेजीयसां न दोषाय' इति न्यायेन तेजोविशेषं विद्वांस्तस्मिन् अतद्वीर्यविदुषि चित्रकेतौ इति इत्थं ब्रह्म ब्रह्मात्मकं शोभनं शिवंप्रति ब्रुवाणे सति देव्यंबिका निर्जितात्माभिमानिने जितेन्द्रियत्वाभिमानवतेऽत एव दुष्टाय चित्रकेतवे रुषा क्रोधेनोवाच ननु, तदनुव्रताः सभ्यास्तूष्णीं बभूवुः कथं सा तमनुव्रता भवेदित्युक्त्वा तदनुव्रता देवी चित्रकेतुं शशापेत्याशंक्य रुषेत्युक्तम् ॥ १० ॥

तदेवाह–अयमित्यादिना, किल्बिषमित्यन्तेन । तावत्तमुपालभते अयमिति द्वाभ्यां । अयमधुना किमर्थमागत इति शेषः अहोऽस्मान्दण्डयितुमधुनायमागत इत्युपालंभः तदेवाह, अहो निर्लज्जानामस्मद्विधानां दुष्टानामयं शास्ता हिताहितयोर्विविच्य ज्ञापकः, शासनातिवर्तित्वे दण्डधरः दण्डयिता प्रभुर्दण्डने समर्थश्चात एव विप्रकृत् दमनकारी ॥ ११ ॥

अहो पद्मयोन्यादयो धर्मं न विदन्ति यतस्तेऽतिवर्तिनं मर्यादातिवर्तिनं हरं रुद्रं नो निषेधन्ति न निषेधन्ति अयं त्वधुना निषेधति इत्युपालम्भः तत्र पद्मयोनिर्ब्रह्मा कुमारः सनत्कुमारः मनुः स्वायंभुवः ॥ १२ ॥

तमेवमुपालभ्यानन्तरमयं निग्राह्य इत्याह—एषामिति द्वाभ्यां । नावत्पतिपारम्पर्येण्या रुद्रं विशिनष्टि, एषां पद्मयोन्यादीनामनुध्येयं ध्यातुं योग्यं पदाब्जयुग्मं यस्य जगद्गुरुं जगद्धितोपदेष्टारं स्वयं साक्षान्मङ्गलानामपि मङ्गलं ईदृशं हरं सूरीनृषीश्चायं क्षत्रियाधमः परिभूय यद्यस्मात्प्रशास्ति तत्तस्मादयं दुष्टो दुरात्मा दण्ड्य एव सूरीन्परिभूय जगद्गुरुं गिरिशं प्रशास्तीति वान्वयः ॥ १३ ॥

ननु, भगवद्भक्तोऽयं न दण्ड्य इत्यत्राह–नायमिति । साधुभिः परिसेवितं सत्कृतं यद्वैकुण्ठस्य भगवतः पादमूलस्य उपसर्पणमनुसरणं सेवेति यावत् तत्प्रति अयं क्षत्रबन्धुर्नार्हति, कुतः ? यतोऽयं सम्भावितात्माऽहमधिक इत्यभिमानवती मतिर्यस्य सः अत एव स्तब्धः निश्चल इव स्थितः ॥ १४ ॥

एवं दण्ड्यतामभिधायाथ शपति—अत इति । अतः भगवत्सेवानर्हत्वात् हे दुर्मते ! त्वमासुरीं पापीयसीं योनिं याहि हे पुत्र, यथा भूयो महतां किल्बिषमपराधं न कर्ता न करिष्यसि तथा याहीति ॥ १५ ॥

हे भारत ! एवम् इत्थं शप्तः स चित्रकेतुर्विमानादवरुह्य सती मम्बिकां नम्रेण मूर्ध्ना प्रसादयामास प्रसन्नामकरोत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदं हीश्वरस्येश्वरत्वं यदन्यैरसत्कारैः निर्विकारत्वमित्याशयेन गिरिशस्य क्षमाप्रकारं वक्ति–भगवानपीति । अगाधधीरन्यैरज्ञातेयत्ता बुद्धिः ॥ ९ ॥

स्त्रीनिमित्ताऽसत्कारपरिहारः स्त्रियैव कार्य इति परमेश्वराभिसन्धिं जानती प्रावर्ती प्रतिवक्ति–इतीति । दुष्टाय प्रगल्भाय निर्जित आत्माभिमानः आत्मदर्पो येन स तथा आत्मविज्ञानं वा येन स तथा तस्मै "अभिमानस्तु विज्ञाने प्रणये दर्पहिंसयोः" इति यादवः ॥ १० ॥ ११ ॥

अयं शापयोग्यापराध इति ज्ञापयितुमित्यभिप्रेत्याह—न वेदेति । अतिवर्तिनमसम्प्रज्ञातसमाधित्वेन वर्तमानम् ॥ १२ ॥

अनिषेधे कारणमाह—एषामिति । एषां ब्रह्मादीनां पक्षे स्वावराणामिन्द्रादीनामनुध्येयं पदाब्जयुग्मं कृद्योगे षष्ठीयं नित्यसम्बन्धद्योतनाय वा तदवराणामित्याचार्यैर्व्याख्यातं अत्र किमवलंब्योच्यत इति चेत्—

> "विष्णुब्रह्मप्राणवीन्द्रास्तद्दाराभ्यधृते हरः ।
> ध्येयो हरेः पार्षदाद्यैर्ध्येयन्हरिश्चतुर्मुखौ ॥
> प्राणमेषां तथा दाराश्च स्वसंमतया क्वचित्" इति

वचनवशाश्रयणात्. न तु ब्रह्मादीनामनुध्येयपदाब्जयुग्ममिति बहुप्रमाणविरोधात् अत एवास्माभिः शास्त्रार्थोऽसौ परोक्षत्वेन देवर्षिवत्वाद्गुरवणाह इत्यभिहितं यस्मादयमपराधी तत्तस्माद्दण्ड्यः ॥ १३ ॥

किं दण्डमर्हतीति तत्राह—नायमिति । अनर्हत्वे कारणमाह—सम्भावितात्मेति ॥ १४ ॥

तदर्थं क उपाय इति तत्राह—अत इति । इह अमुत्र स्थितानां ॥ १५ ॥

शप्तस्य सज्जनस्य तदुपसत्तिप्रकारमाह—एवमिति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदनुव्रता इति । अतस्तदभिप्रायानुसारेणैव ते च तूष्णीं बभूवुरित्यर्थः ॥ ९ ॥

देवी तु न क्षन्तुं शक्तवतीत्याह—इतीति । वीर्यमनसा तादृश लौकिकव्यवहाराच्छादितं मन्महाभागवतत्वं तदेव तथैवोक्तमगाधधीरिति ॥ १०—१२ ॥

एषामित्यस्य टीकायां अवज्ञां कुर्वतेति पाठे तेषामिति शेषः अज्ञान् कृत्वेति अज्ञान् मत्वेत्यर्थः ॥ १३—१४ ॥

ततश्च तं भीतं मत्वा सकृपमाह—यथेति । एतदपराधबीजेन पुनस्तु पूर्ववन्महदपराधो न जनयिष्यत इत्यर्थः ॥ १५ ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रहस्येति मामपि सदाचारे स्थापयितुमिच्छतीति भावः, सहसैव चित्रकेतोरभिप्रायज्ञानादगाधा सर्वज्ञत्वेन धीर्यस्य सः चित्रकेतोरभिप्रायश्चायं जगदीश्वर एव नास्य दुराचारत्वेऽपि क्षतिः । यः कश्चनभिज्ञः इमं निन्दिष्यति तस्यापराधात् सर्वनाशो भविष्यति यथा इत्यर्थोऽत इममाचारस्यापि यदि सदाचारे स्थापयितुमहं शक्नुयां तदा लोकानां भद्रं स्यात् । तथा विष्णुः परमेश्वरो भद्र एव सुचरितत्वात् रुद्रस्त्वभद्रो दुराचारत्वादित्यप्रतिष्ठाप्यस्य न भवेदिति । तदस्मै हितैषिणा कठोरभाषिणाऽपि हरिभक्ताय नाहं कुप्यामीति भगवतः शम्भोरभिप्रायानुसारिण्यः सभ्याश्च तूष्णीं बभूवुरेव न तु चुक्रुधुः । श्रीशिवनिन्दनस्य तदभिमतत्वे त सभ्याः सद्य एव कर्णौ पिधाय ततो निरवाक्ष्यन्निति ज्ञेयं । यदुक्तं "भगवन्निन्दनं श्रुत्वा तत्परस्य जनस्य वा" इत्यादि ॥ ९ ॥

न तस्य वीर्यं प्रभावं वेत्तीति तस्मिन् न हि स्वतन्त्र ईश्वरः कस्यचिदपि शिक्षया किमपि करोतीति भावः । अद्योमन्नं शुचायो इति जगदीश्वरे नीतिशिक्षयाऽनौचित्यात् धृष्टाय निःशङ्कभाषित्वादतिप्रगल्भाय निःशेषेण जितो मया प्रेमवशीकृतः आत्मा परमात्मा सङ्कर्षणोऽपीत्यभिमानवते । कथंति चित्रकेतुमहादेवयोरभिप्रायस्याऽज्ञानादेव रुष्टेयमिति न व्याख्येया किन्तु बहुश्रुवाया इति हितमप्येतदस्मदनुपादेयमिति मत्वा नैकहान् वारान् वापि निवतुरान् किन्तु बहुनेव वारान् ब्रूते इति क्रोधे कारणं ज्ञेयम् ॥ १० ॥

विशेषेण प्रकर्षं करोतीति विप्रकृत शासनेन हितकृदित्यर्थः ॥ ११ ॥ १२ ॥

परिभूय मुहुरपि कठोरोक्त्या तिरस्कृत्य सूरीन् एतत्सभास्थानोऽस्मदभिप्रायाद ज्ञात्वा परिभूय जगद्गुरुं प्रशास्ति ॥१३॥

सम्भाविता अहं महाभक्त इत्यभिमानवती मतिर्यस्य सः ॥१४॥

अभिशापानन्तरमेव अहो किं कृतं निरपराधो हरिभक्तः शप्त इति पश्चात्तापवती प्राह—हे पुत्रेति । माता यथा दुर्मदं पुत्रं स्वहस्तेन प्रहरति प्रहृत्यैव पुनः शिक्षति तथैव त्वामहं दण्डयामीति भावः । अत एव मातृसमुचितमेवाह—भूय इति । बाल्यक्रीडाचापल्येन परगृहादिप्रियकारिणं शिशुं प्रहृत्य माता यथा ब्रूते हे अदान्त ! पुनरेवं न करिष्यसीति तद्वदेवेत्यर्थः अत एव भवान्याः सोऽभिशापश्चित्रकेतुं नापचकार प्रत्युत वृत्रजन्मनि प्रेमवृद्धिमेव प्राप. सत्यां प्रेमसम्पत्तौ भक्तानां पार्षदतनुत्वदैत्यतनुत्वयोरविशेषमननात् ॥१५॥ ॥१६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदनुव्रताः सभ्याश्च तूष्णीं बभूवुः ॥ ९ ॥

अतद्वीर्यविदुषि अन्ये जनादौ मदनभयात्प्रविश्य तपोजपादिकं कुर्वाणाः मदनवश्या भवन्ति, शिवस्तु स्त्रियमुत्सङ्गे विधायापि मदनवश्यो न भवतीत्यादि शिवप्रभावानभिज्ञे ॥ १० ॥

विरुद्धं प्रकर्षेण करोति तथा ॥ ११ ॥

पद्मयोन्यादयो धर्मं न जानन्ति प्रतिवर्तिनं धर्ममुल्लङ्घ्य वर्तमानं नोनिषेधन्ति न वारयन्ति अयं तेभ्योऽपि वृद्धः यतो हरं दुराचाराद्वारयतीति भावः ॥ १२ ॥

एषामित्यनेनास्मिन्नेव पुराणे शिवस्य पितृत्वेन वर्णितत्वाद्ब्रह्मणो व्यतिरिक्तानां प्रहणाम् एषां भृग्वादीनाम् अनुध्येयपदाब्जयुग्मं सूरीनभिभूय प्रशास्ति अतो धृष्टः अतो दण्ड्यः ॥ १३ ॥

सम्भावितमतिः गर्वितबुद्धिः वैकुण्ठस्य हरेः पादमूलोपसर्पणं नार्हति ॥ १४ ॥

किल्बिषमपराधम् ॥ १५ ॥ १६ ॥

भाषा टीका ।

श्री शुक उवाच ॥

अगाध बुद्धि भगवान श्री शङ्कर और उस सभा जो सभ्य थे वे सब ही इस बात को सुनकर हसकर चुप होगये ॥ ९ ॥

श्री शङ्कर के प्रभाव को नहीं जानने वाले को सभा में ऐसे अयुक्त बोलने पर जितेन्द्रियाभिमानी उस ढीठ से पार्वतीजी क्रोधकर ऐसे बोली ॥ १० ॥

पार्वत्युवाच ॥

पार्वतीजी बोली कि आज काल लोक में क्या यह, हमारे सदृश दुष्ट निर्लज्जों का दण्ड देने वाला नियामक स्वामी है ॥ ११ ॥

पद्म योनि (ब्रह्माजी) धर्म नहीं जानते और ब्रह्मा के पुत्र भृगु नारदादिक तथा सनत्कुमार कपिल मनु ये सब भी धर्म नहीं जानते हैं क्योंकि शास्त्र का अति-क्रमण करके वर्तने वाले श्री महादेव जी को ये लोग निषेध नहीं करते हैं ॥ १२ ॥

चित्रकेतुरुवाच ।

प्रतिगृह्णामि ते शापमात्मनोऽञ्जलिनाऽम्बिके ! ।
देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत् ॥ १७ ॥
संसारचक्र एतस्मिन् जन्तुरज्ञानमोहितः ।
भ्राम्यन्सुखं च दुःखं च भुंक्ते सर्वत्र सर्वदा ॥ १८ ॥
नैवात्मा न परश्चापि कर्ता स्यात्सुखदुःखयोः ।
कर्तारं मन्यते प्राज्ञ आत्मानं परमेव च ॥ १९ ॥
गुणप्रवाह एतस्मिन्कः शापः कोन्वनुग्रहः ।
कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा ॥ २० ॥
एकः सृजति भूतानि भगवानात्ममायया ।
(१) एषां बन्धं च मोक्षं च सुखं दुःखं च निष्कलः ॥ २१ ॥
न (२) तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबन्धुर्न परो न च स्वः ।
समस्य सर्वत्र निरञ्जनस्य सुखे न रागः कुत एव रोषः ॥ २२ ॥
तथापि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय ।
बन्धाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतयेऽवकल्पते ॥ २३ ॥
अथ प्रसादये न त्वां शापमोक्षाय भामिनि ! ।
यन्मन्यसे असाधूक्तं मम तत्क्षम्यतां सति ॥ २४ ॥

भाषाटीका ।

इन सबों के ध्यान करने योग्य युगल चरण कमल जिनका ऐसे जगद्गुरु स्वयं मंगल मूर्त्ति श्रीशंकर को ज्ञानियों का तिरस्कार करके, यह ढीठ प्रशासन (शिक्षा) करता है तस्मात् यह दण्ड योग्य है ॥ १३ ॥

यह साधुओं से उपासित श्री गोविन्द के चरण की शरण गति के योग्य नहीं है क्योंकि यह अपने को बड़ा मानने वाला और अनम्र ॥ १४ ॥

इसीलिये हे दुर्मते ! अति पाप प्रचुर आसुरी योनी को तू प्राप्त हो हे पुत्र ! जिससे फिर तू फिर ऐसे महत्पुरुषों का अपराध न करे ॥ १५ ॥

श्रीशुक उवाच ॥

श्रीशुकदेव जी बोले कि ऐसे जब चित्र केतु शाप को प्राप्त हुआ तब हे भारत ! विमान से उतर कर नत मस्तक से श्री सतीजी को प्रसन्न करता हुआ ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पूर्वदिष्टं प्राचीनकर्म प्राप्तमेव ॥ १७ ॥

अयं च संसारचक्रस्वभाव एव न चित्रमित्याह—संसारचक्र इति ॥ १८ ॥

अत एवात्र मम च तव च न कोऽपि दोष इत्याह—नैवेति ॥ १९ ॥

एवं तावत्सुखदुःखादिकमङ्गीकृत्योक्तमिदानीं तदपि वस्तुतो नास्तीत्याह—गुणानां मायामयानां प्रवाहे संसारे ॥ २० ॥

ननु, मायागुणानामेवायं प्रवाहस्तर्हि तेषां जडत्वाद्बन्धमोक्षाद्यनुभवो न स्यात्तत्राह—एकः परमेश्वरो मायया निमित्तभूतया भूतानि प्राणिनः सृजति एषां बन्धादिकं च सृजति निष्कलः स्वयं बन्धादिशून्यः ॥ २१ ॥

ननु,एवंभूतविषमसृष्टौ तस्य किं कारणं ? प्रियाद्विषयत्वाभावादित्याशंक्य, यद्यपि प्रियादयो न सन्ति तथापि तत्तत्कर्मवशात्सर्वं घटत इत्याह—न तस्येति द्वाभ्याम् । प्रतीपोऽप्रियः न ज्ञातिर्बन्धुश्चेत्यर्थः तत्र हेतुः सर्वत्र समस्य तत्कुतः निरञ्जनस्य निःसङ्गस्य अत एव तन्निमित्ते सुखे रागो नास्ति रागानुबन्धो रोषः कुतः स्यात् ॥ २२ ॥

(१) येषां बन्धश्च मोक्षश्च, इति पाठान्तरम्--वीर० (२) ने कस्यचित् पाठान्तरम्--वीर०

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यप्येवं तथाऽपि तस्य शक्त्या मायया यो विसर्गः पुण्यपापादिलक्षणं कर्म एषां शरीरिणां सुखाद्यर्थमवकल्पते समर्थो भवति यथोक्तं गीतासु "भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः" इति ॥ २३ ॥

अथ तस्मात्प्रसादयामि हे कोपने ! त्वां केवलं प्रसादयामि न तु शापमोक्षाय. तर्हि किं प्रसादनेनात आह यमोक्तमुक्ति साध्वसाध्विव मन्यसे तत्त्वया क्षम्यताम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह—प्रतिगृह्णामीत्यादिना, क्षम्यतां सतीत्यन्तेन । तावत्तेव मम दोषो नास्तीति सूचयन् शापं स्वीकरोमीत्याह—प्रतिगृह्णामीति । हे अम्बिके ! ते त्वया दत्तं शापमात्मनोऽञ्जलिना प्रतिगृह्णामि अञ्जलिबन्धपूर्वकं स्वीकरोमि मयि महाननुग्रहस्त्वया कृतो न तु निग्रह इति भावः । तदेव स्पष्टयति—देवैरिति. देवैर्यन्मर्त्याय प्रोक्तं निग्रहरूपमनुग्रहरूपं वा तत्सर्वं मेऽपि प्रोक्तं, कुतः ? हि यस्मात्तद्देवैः प्रोक्तं तस्य निग्राह्यस्यानुग्राह्यस्य वा जन्तोः पूर्वदिष्टं प्राचीनकर्मप्रयुक्तं मोक्षविरोधिप्राचीनकर्मणा एवं भ्राम्यतो नितरां मुमुक्षोर्ममाशु तद्विरोधिप्राचीनकर्मफलरूपत्वाच्छापानुभवेन निःशेषनिरस्तकर्मबन्धस्य भगवत्प्राप्त्या नित्यनिरतिशयानन्दरूपमहाभ्युदयलाभात्त्वयानुग्रह एव कृत इति भावः ॥ १७ ॥

एतदेव स्फुटयितुं तावज्जन्तूनां कर्मभिर्भ्रमणमाह—संसारचक्र इति । एतस्मिन्नक्रवत्परिवृत्तिशीले गर्भजन्मजरामरणादिरूपे संसारे अज्ञानेन ज्ञानेतरेणानादिपुण्यपापात्मकेन कर्मणा मोहितः आत्मपरमात्मयाथात्म्यज्ञानरहितः केवलदेहात्माभिमानी जन्तुर्भ्राम्यन्पुनःपुनः पूर्वपूर्ववासनानुरूपाण्युत्तरोत्तरसुखदुःखादिहेतुभूतानि कर्माणि कुर्वन् तत्फलं सुखं दुःखञ्च भुङ्क्ते एतच्च केवलमन्येषामेव जन्तूनां, किन्तु तवापीत्याशयेनाह—सर्वस्य सर्वदेति । सर्वस्यान्यस्य तव मम च सर्वदा यावन्मुक्ति एतत्समानमिति भावः, अन्यथा मत्कृतहेलनादत्वामादिकर्मप्रयुक्तदेहात्माभिमानमूलकः क्रोध एव न स्यादिति तात्पर्यम् ॥ १८ ॥

अत एव सत्कारन्यक्कारसुखदुःखादिकं सर्वमनादिकर्मनिमित्तमत एव त्वच्छिरस्कर्तुर्मम मां शापन्त्यास्तव च न दोष इत्याह—नैवेति । सुखदुःखयोः कर्ता कारकः सुखदुःखापादक इत्यर्थः आत्मा स्वयं परोऽन्यश्च न स्यान्नभवति. किन्तु तयोः कर्मैव निमित्तमिति भावः, कर्मणः क्षणिकत्वाज्जडत्वाच्च कथं तत्कालान्तरभावि सुखदुःखनिमित्तं ? तत्राह—कर्तारमिति । अज्ञाः पुण्यपापयोस्तत्फलयोः परमात्मानं परमपुरुषमेव सुखदुःखयोः कर्तारं मन्यते. अयं भावः, पुण्यपापे हि परमात्मनो निग्रहानुग्रहरूपे, तत्र श्रुतिस्मृत्याद्यात्मकशास्त्रार्थानुवर्तिष्वनुग्रहः परमपुरुषस्य, स एव हि पुण्यं नाम. अननुवर्तिनि तु निग्रहः, स एव हि पापं." एवञ्च परमपुरुष एव शास्त्रानुवर्तनाननुवर्तिनिमित्तानुग्रहनिग्रहरूपपुण्यपापफलभूतयोः सुखदुःखयोः कर्तेति ॥ १९ ॥

एवं वैषयिकसुखदुःखयोः पुरुषार्थत्वापुरुषार्थत्वाऽभ्युपगमेन कर्मानुसारेणेश्वरस्तत्कर्तेत्युक्तम्. इदानीं वैषयिकसुखं विषमिश्रक्षीरवदन्ततो दुःखहेतुत्वादपुरुषार्थरूपमेवेत्याह—गुणप्रवाह इति । गुणानां प्रकृतेर्गुणानां सत्त्वरजस्तमसां प्रवाहरूपे परिणामरूपे एतस्मिन् प्रकृतिमयप्रवाहे जन्तूनां, कः शापः ? को वानुग्रहः ? उभयोर्वैलक्षण्यमेव दुर्वचमेवेति भावः; ननु, न दुर्वचस्तयोः स्वरूपं स्वर्गहेतुरनुग्रहः नरकहेतुर्निग्रह इति सुवचमेवेत्यत्राह—कः स्वर्गो नरकः को वेति स्वर्गनरकयोरपि स्वरूपं दुर्वचमेवेति भावः । ननु, स्वर्गः सुखं, दुःखं नरकमिति सुवचमित्यत्राह—किं सुखं दुःखमेव वेति. तदप्यव्यवस्थितमित्यर्थः स्वर्गस्य सुखरूपत्वे तस्य दुःखगर्भत्वं न स्यात् नरकस्य दुःखरूपत्वे वा तस्य सुखगर्भता न स्यात् स्वर्गोऽप्यन्ततो दुःखहेतुः नरकोऽप्यन्ततः किञ्चित्सुखहेतुरेव अत उभयोरुभयगर्भत्वात् न परस्परस्य व्यवस्थितिरिति भावः । शापनरकदुःखानि दृष्टान्तार्थतया उपात्तानि यथा, तेषु पुरुषार्थत्वं तद्धेतुत्वञ्च नास्ति तथानुग्रहः स्वर्गसुखान्यपीत्यर्थः ॥ २० ॥

नन्वेवंविधसुखदुःखभाञ्जि भूतानि किमकस्मात्स्वयमेवोत्पद्यन्ते ? नेत्याह—एक इति । भगवानिरस्तनिखिलदोषः षाड्गुण्यपूर्णः परमपुरुषः आत्मनः स्वस्य मायया स्वयमेकः निरस्तसमाभ्यधिकः स्वसमाभ्यधिककर्मान्तरोपकरणान्तरनिरपेक्ष एव भूतानि देवमनुष्यादीनि चिदचिदात्मकानि आब्रह्मस्तम्बपर्यन्तानि सृजति. न तु तान्यकस्मादुत्पद्यन्त इति भावः, तर्हि किं कुलालादिवत्कर्मायत्तदेही भगवान् ? नेत्याह—निष्कलः कर्मायत्तपाणिपादाद्यवयवात्मकदेहरहितः, तस्य वैषम्यनैर्घृण्यादिदोषपरिहाराय भूतानि विशिनष्टि—येषामिति, येषां भूतानां स्वस्वकर्मानुगुणबन्धमोक्षादिकं भवति तानि सृजतीत्यन्वयः, बन्धमोक्षमिति द्वितीयान्तपाठे येषां भूतानां तत्तत्कर्मानुसारेण बन्धादिकञ्च सृजति, स एव तानि भूतान्यपि सृजति. न ततोऽस्य वैषम्यादिदोष इत्यर्थः एषामितीदंशब्दपाठे बन्धमित्यादीनाञ्च द्वितीयान्तपाठे तु सृष्टानामेतेषां भूतानां तत्तत्कर्मानुसारेण बन्धादिकमपि सृजतीत्यर्थः एवं बन्धादिकं देवमनुष्यादिवैचित्र्यञ्च तत्तज्जीवकर्मानुसारेण तेषां तेषामीश्वरकृतमौपाधिकं न स्वरूपप्रयुक्तमित्युक्तं भवतीत्यर्थः ॥ २१ ॥

कीदृशं तर्हि ईश्वरस्य स्वरूपं ? कुतस्तस्य फलं ? यतो देवादिवैचित्र्यं बन्धादिकं चेत्यपेक्षायामाह—न कस्येति । वस्तुतः कश्चिदपि ईश्वरस्य कश्चिदपि दयिताहितोऽहित, कुतः ? सर्वत्र देवादिशरीरेषु समस्य सर्वत्र वर्तमानस्य ज्ञानैकाकारतया ज्ञानानन्दस्वरूपत्वेन चावस्थितस्येत्यर्थः परस्परतारतम्यं हि प्रियाप्रियादिविभागः सर्वेषामात्मनामेकरूपत्वात् स्वरूपकृतः प्रियाप्रियादिविभाग इति भावः । ननु, देवादिरूपेण वैचित्र्यात्कथं समत्वं ? तत्राह—निरञ्जनस्येति । अञ्जनं कर्मान्तरोपाधिः तद्रहितस्य देवादिवैचित्र्यस्य प्रकृतिमत्त्वार्जावस्वरूपगतत्वाभावात्स सर्वत्र सम इति भावः; अत एव समो निरञ्जनश्च, अत एव तस्य वैषयिकसुखे न रागः मोक्षैकसुखैकतानस्वरूपत्वेन वैषयिकसुखलेशो न तस्य राग इति भावः अत एव सुखे न तस्य रागः कुतस्तरां ? तस्य वैषयिकसुख-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

शापप्रतिबन्धकविषयो रोषः इत्यादिस्त्यर्थः तत्र दयितः प्रीतिविषयः अनुकूल इति यावत् प्रतीपः प्रतिकूलः ज्ञातिः सपिण्डः बन्धुर्वैवाहिकादिसम्बन्धवान् परोऽन्यद्वीयः स्वः स्वकीयः ॥ २२ ॥

एवं प्रकृतिविलक्षणं स्वाभाविकं जीवस्वरूपमुक्तमथैवंभूतस्य वैधाविवैचित्र्यं बन्धादिकं चोपपादयति-तथापीति । यद्यप्येवंभूता जीवाः तथाप्येषां शरीरिणां जीवानां तच्छक्तिविसर्ग एव तस्य तज्जीवसम्बन्धिकर्मणां वा शक्तिर्वासनारूपा शक्तिः तस्या विसर्गः सृष्टिरुत्तरोत्तरकर्मैव सुखादिरूपसंसृतये मोक्षाय चावकल्पते समर्थं भवति तन्निमित्तमित्यर्थः, अयं भावः, स्वभावतः पूर्वोक्तविधानामपि बीजाङ्कुरन्यायेनानादिकर्मवासनामात्रावशेषितानां कल्पान्ते परमात्मन्युपसंहृतानां पुनः कल्पादौ परमकारुणिकेनेश्वरेण स्वाराधनेनैते निस्तरेयुरित्यनुजिघृक्षया प्रदत्तकरणकलेवरधर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनबोधिवेदाख्यशास्त्राणामप्यनादिवासनया "अन्नं भोज्यं मनुष्याणां, श्वपशूविट्तृणाहारो" इत्याद्युक्तरीत्या ईहमानानां पुण्यपापरूपकर्मोपनिपातात्तत्फलानुभवपुनस्तद्र्थकर्मोपनिपाततत्फलानुभवादि-परंपरया सर्वमुपपन्नमिति, तत्र हिताहिताय सुखदुःखहेतुभूतधर्माधर्माय मृत्युजन्मनोः जन्ममरणाभ्यामित्यर्थः तादर्थ्यस्य बन्धसामान्यत्वेन विवक्षया षष्ठी प्रयुक्ता मोक्षाय च तच्छक्तिविसर्ग एवावकल्पत इत्यनेन भगवत्प्रसादहेतुः कश्चिदाकस्मिकानुषङ्गिकप्रासंगिकाद्यन्यतमः पुण्यपापकर्मविशेष एव मोक्षोपायोपसंहारहेतुरिति सूचितम् ॥ २३ ॥

एवं वस्तुस्थितिमभिधाय स्वेच्छयैवाऽनुग्रह एवेति वदन् स्वापराधं प्रतिक्षमापयति-अत इति । अतः वस्तुस्थितेरेवंविधत्वात्, हे भामिनि, शापमिहेराणाय त्वां न प्रसादये न प्रार्थये, किन्तु हे सति, मम मया यदुक्तमसाधु यथातथा मन्यसे तत् क्षम्यतामिति त्वां प्रसादये ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पूर्वदिष्टं पूर्वजन्मनि यत्पुण्यपापलक्षणं कर्म देवैर्मनुष्याय परमोद्दिष्टं विहितं तस्य मर्त्यस्य तत्कर्म ह्येव सुखदुःखयोः कारणमिति शेषः ॥ १७ ॥

तदेव विशिनष्टि—संसार इति । सर्वत्र जन्मसु ॥ १८ ॥

ननु, सुखदुःखोत्पत्तौ किं भोक्ता कारणमुतेतर इत्याशंक्य यद्भगवता क्लृप्तं तदेव नियतं कर्म कारणं ज्ञानी मन्यते तत्राज्ञानी स्वमन्यं वा मन्यत इत्याह-नैवेति । आत्मा स्वयं परः स्वस्मादितरः अं हरिं जानातीत्यज्ञः श्रीहरिस्तरः परमात्मानमेव मन्यत इति च योजनाऽवगन्तव्या "यत्सद्भगवता क्लृप्तं तदेव नियतं भवेत्" इति वचनात् ॥ १९ ॥

यत एवं श्रीहरिणा क्लृप्तमायातीत्यतः शापादिप्राप्तौ दुःखादिकं न कार्यमित्याह—गुणेति । गुणप्रवाहे संसारे शापादेः श्रीहरीच्छाधीनप्राचीनसुकृतदुष्कृतयोः कारणत्वात्स्वर्गरव चाभिलाषयसुखत्वाभावस्य किंचिदुक्त्वा सुपर्याप्तसंभवात् सुखादेश्चाल्पत्वादनित्यत्वाच्च. तदुक्तम्—

"अतोऽन्येषां वरः शापो गुणदोषः प्रकल्पिता ।
स्वतः प्राप्ता भेदकृतिर्वासनारूपिणां यथा ॥
विद्यमानस्य मनसि पुनः स्वप्नेपि दर्शनम् ।
भगवद्दत्ता यस्मात्सर्वेषां ज्ञेयमेव तत्" इति ॥

स्वतः स्वतन्त्राद्धरेः प्राप्ताकरणो भेदकृतिर्दत्त इति शेषः अनेनैतदुक्तं भवति, मनसि विद्यमानस्य वासनारूपिणो वस्तुनः स्वप्ने यथा दर्शनं तथा पराद्यनित्यसुखादिदर्शनं स्यात् न चैतत्सर्वं स्वाधीनं किं तु हरीच्छाधीनमिति ॥ २० ॥

ननु, हरीच्छादिनियतत्वं शापादेः कस्मात्कल्प्यत इति तत्राह-एक इति । कर्मादिसत्तापीशेच्छाधीनेति सूचनायैक इति आत्मनामयैवत्वेनात्मन्यनियत इति सूचितम् ॥ २१ ॥

हरेः समत्वं च स्वभक्तसेवानतिरेकेण फलदातृत्वं शापोरवपराधानतिरेकेण दण्डकरणत्वं सेवा योग्यातिरेकेण आमामपि न दास्यति "अपराधातिरेकेण नान्यस्यातः क्षमो हरिः" इति वचनात् ॥ २२ ॥

यद्यपि विशेषतोऽनुरागादिकं नास्ति तथापि तस्य हरेः शक्तेर्विसर्गो विशिष्टस्य भाव एषां जीवानां सुखाद्यर्थं कल्पत इत्यन्वयः यद्यपि भगवानेव मुख्य कर्ता तथापि तेषां पूर्वकर्मणा शक्तीनां विविधसर्गः समूहो येषां शरीरिणामिति वा ॥ २३ ॥

अथ तस्मादीश्वराधीनत्वात् तर्हि किमाकाङ्क्षसीति तत्राह-यदिति ॥ २४—२६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वदिष्टं हीति पूर्वादिष्टेनैव हि ममैषा बुद्धिर्जातेति । ननु, केवलगुणहेतुत्वे चेतनं कर्तारं विना बन्धमोक्षादिकं जीवानां न स्यात्. तत्राह—एक इति ॥ १७—२३ ॥

यदि मन्यसे अनुगृह्णासि तर्हि मम यत्साधूक्तं क्षम्यताम् ॥ २४—२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रतिगृह्णामीति ममानेन शापेन कापि क्षतिर्न भविष्यति महादेवे त्वदपराधकृतापराधत्वादिति भावः, निरागस्काय मह्यं शप्तवत्यास्तवापि भाव कोपि दोष इत्याह देवैरिति पूर्वदिष्टं प्राचीनकर्म प्राप्तमिति भक्तस्य तस्य स्वाभिमतस्तथा भावनादैन्येन समुचितैव वस्तुतस्तु आत्मप्रेमास्तव पुनः कर्मसम्बन्धोऽपि प्रेम पूर्ववदशाबामेव "जीवन्तेभ्यस्व कस्योपि मपि हृदेऽखिलात्मनि" इत्यादिना सर्वं कर्मबन्धोक्तेः । हरेर्भक्तवत्सलप्रसिद्धिर्भक्तानां कर्माधीनत्वे सति न सिध्येत् यदि आर्

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

कर्माधीनो भगवन्तमधीनमायं वशीकुर्यादिति, ततश्च तस्य शापानुग्रहस्वर्गापवर्गनरकादिसमदर्शित्वमहावैभवख्यापनार्थं चित्राधराधिपत्यकुपथ्यदूरीकरणार्थं स्वविरहोत्थया प्रेमभक्त्युद्रेकवर्द्धनार्थं स्वीयवैकुण्ठगतस्वचरणसाक्षात्सेवामहामाधुर्यभोगप्रदानार्थं च स्वेनैवान्तःप्रेरितया देव्याऽभिशापः श्रीसङ्कर्षणदेवेनैव भगवता स्नेहवता पित्रेव कारित इति तत्त्वं तत्तत्फलदर्शनादवगतम् ॥१७॥

अयञ्च संसारचक्रस्वभाव एव न चित्रम् इत्याह—संसारेति ॥ १८ ॥

अप्राज्ञोऽप्यविवेकी ॥ १९ ॥

एवं तावत् सुखदुःखादिकमङ्गीकृत्योक्तम् । इदानीन्तु लवणाकरे पतितः सर्वो लवणरस इव संसारे सर्व एव पदार्थः संसार इति सुखदुःखादिभेदावगमो नोपपद्यत इत्याह—गुणप्रवाह इति । न ह्यनलस्पर्शप्रवाहमध्ये पतितस्य यावत्तटावाप्तिः तावत् किमपि वस्तुनः सुखायेत्यतः शापानुग्रहादिकं सर्वमपि दुःखमेवेति भावः ॥ २० ॥

ननु, तर्ह्यत्र गुणप्रवाहे को वा पातयिता ? को वास्माद्धर्ता? इति चेद्भगवानेवेत्याह—एक इति । आत्ममायया रजसा सृजति, सत्त्वेन पालयति, तमसा संहरति. एवं बन्धञ्चाविद्यया सृजति, विद्यया मोक्षञ्च, सत्त्वेन सुखं, तमसा दुःखञ्च. निष्कलः कला माया तद्रहितः ॥ २१ ॥

ननु, तस्य कश्चित् प्रियोऽप्रियश्च जीवोऽवश्यं वर्त्तत एव यतः कमपि बध्नाति कमपि मोचयति कमपि दुःखयति कमपि सुखयतीत्यत आह—नेति । न ह्यतिनिर्बन्धुः तत्र हेतुः सर्वत्र समस्य समत्वे हेतुः निरञ्जनस्य अञ्जनं माया तद्रहितस्य अतएव सुखे विषयसुखे राग आसक्तिर्नास्ति विषयसुखप्रातिकूल्ये रोषो द्वेषः कुतः स्यात् यदुक्तम् "इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ" इति अतएव रागद्वेषमूलकौ दयितप्रतीपौ तस्य न स्त इति भावः ॥ २२ ॥

एवं तस्य साम्यञ्चेत्तर्हि कथं कमपि स सुखयति कमपि दुःखयति ? इत्यत आह—अथापीति । यद्यपि स सर्वत्र समस्तदपि तस्य शक्त्या मायया यो विसर्गः अनादिपुण्यपापादिलक्षणकर्मपरम्परा स एव सुखाद्यर्थमवकल्पते । अयमर्थः यद्यपि मायायास्तच्छक्तित्वात् स एव सुखदुःखादिकं सृजतीति तस्य वैषम्यमेव, तदपि मायायाः स्वरूपशक्तित्वाभावात् स न सुखदुःखादि सृजतीति, वस्तुतस्तस्य साम्यमेव. यथा मायिकस्थितस्य भगवद्रूपत्वेऽपि न भगवत्स्वरूपभूतत्वमिति यथा सूर्यसम्बन्धिन आतपस्य घूककुमुदादीनां दुःखदत्वेन चक्रवाककमलादीनां सुखदत्वेन वैषम्येऽपि सूर्यस्य तेषु वैषम्यं कोऽपि न वर्णयति तद्वदिति भावः ॥ २३ ॥

अथ अहं त्वां केवलं प्रसादयामि न तु शापमोक्षाय. हे मानिनि, अविचारेण कोपने ! ननु, तर्हि किं प्रसादनेन तत्राह—मयोक्तं साध्वपि यदसाधु मन्यसे तदसाध्वेवास्तु त्वया क्षम्यतां मम तु शापे शापान्ते वा दुःखसुखयोरभावस्ततः प्रसन्नापि शापान्तं माकार्षीरिति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूर्वदिष्टं पूर्वेण भगवतैव प्रारब्धकर्मानुसारिणा दिष्टम् आदिष्टम् ॥ १७ ॥

सर्वत्र सर्वेषु लोकेषु सर्वदा सर्वेषु भूतेषु पूर्वदिष्टमित्यनुषङ्गः ॥ १८ ॥

तमेवं भगवन्तं सुखदुःखयोर्हेतुं मन्यमानः आत्मनः परस्य च तद्धेतुतां निराकरोति—नैवेति । सुखदुःखयोरात्मा स्वयं कर्ता न स्यात् परोऽन्यश्चापि नैव स्यात् अप्राज्ञस्तु आत्मानं परञ्च कर्तारं सुखदुःखहेतुं मन्यते प्राज्ञस्तु परमात्मानमेव कर्तारं हेतुं मन्यत इति भावः——

"सुखं दुःखं भवो भावो भयं चाभयमेव च ।
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ॥
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः" ॥

इतिश्रीमुखोक्तेः ॥ १९ ॥

अत्र प्रविष्टस्यैव संसारे पतितस्य पुनः कः शापादिरिति वैराग्यार्थमाह—गुणप्रवाह इति । गुणप्रवाहे भगवन्मायागुणप्रवाहे संसारे ॥ २० ॥

एवम्भूते संसारे प्रविष्टस्य जीवस्य जन्मबन्धमोक्षादिषु भगवानेव हेतुरित्याह—एक इति । मायया सत्त्वादित्रिगुणया भूतानि देवतिर्यगादीनि सुखदुःखादिभाजनानि सृजति ॥ २१ ॥

सर्वत्र समस्यापि भगवतो विषमसुखदुःखादिदातृत्वे तत्तत्कर्मैव कारणमित्याह—न तस्येति द्वाभ्याम् । प्रतीपः प्रतिकूलः निरञ्जनस्य भजनं इत्यञ्जनं प्राकृतदेहेन्द्रियसम्बन्धस्तद्रहितस्य अत एव तन्निमित्तं सुखे रागो न भवति रागनिमित्तो रोषः कुतो भवति ॥ २२ ॥

तथापि तस्य भगवतः शक्त्या सत्त्वादित्रिगुणया यो विसर्गः सात्त्विकादिलक्षणं कर्म, एषां देवादीनां सुखाद्यर्थं कल्पते समर्थो भवति तत्तत्कर्मनिमित्तीकृत्य भगवान् सुखादिकं देवादिभ्यो ददातीति फलितोऽर्थः ॥ २३ ॥

अथ अतो हेतोः हे मानिनि ! त्वां शापमोक्षाय न प्रार्थये किन्तु मयोक्तं साध्वपि यदसाधु मन्यसे तत् हे सति, क्षम्यताम् इति त्वां प्रसादयामि ॥ २४ ॥

भाषाटीका ।

चित्रकेतुरुवाच ॥

हे अंबिके ! आपकी शाप को अपनी अंजलि से प्रति ग्रहण करता हूं । क्योंकि देवताओं ने मनुष्य को जो कुछ कहा वह उसकी पूर्वकी प्रारब्ध है ॥ १७ ॥

श्रीशुक उवाच ।

इति प्रसाद्य गिरिशौ चित्रकेतुररिन्दम ! ।
जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः ॥ २५ ॥
ततस्तु भगवान् रुद्रो रुद्राणीमिदमब्रवीत् ।
देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वताम् ॥ २६ ॥

श्रीरुद्र उवाच ।

दृष्टवत्यसि सुश्रोणि ! हरेरद्भुतकर्मणः ।
माहात्म्यं भृत्यभृत्यानां निःस्पृहाणां महात्मनाम् ॥ २७ ॥
नारायणपराः सर्वे न कुतश्चन बिभ्यति ।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ २८ ॥
देहिनां देहसंयोगाद् द्वन्द्वानीश्वरलीलया ।
सुखं दुःखं मृतिर्जन्म शापोऽनुग्रह एव च ॥ २९ ॥
अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि ।
गुणदोषविकल्पश्च भिदेव स्रजिवत्कृतः ॥ ३० ॥
वासुदेवे भगवति भक्तिमुद्वहतां नृणाम् ।
ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ॥ ३१ ॥
नाहं विरिञ्चो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः ।
विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ॥ ३२ ॥

भाषा टीका ।

इस संसार चक्र मे अज्ञान मोहित जंतू भटकता हुआ सदा सब जगे सुख और दुःख भोगता है ॥ १८ ॥

सुख दुःख का कर्ता न आप है न पर है । प्राकृत पुरुष परमात्मा ही को कर्ता मानता है ॥ १९ ॥

दुःखों के प्रवाह वाले इस संसार में शाप और अनुग्रह क्या ? एवं स्वर्ग और नरक तथा सुख और दुःख क्या हैं ॥ २० ॥

एक भगवान अपनी माया से प्राणियों को सृजता है । और इनके बंध मोक्ष और सुख दुःख को भी सृजता है, और आप स्वयं निर्लेप है ॥ २१ ॥

न उस परमात्मा का कोई प्रिय न कोई विरुद्ध, न ज्ञाति न बंधु न अपना न पराया क्योंकि वह सर्वत्र सम है और निःसंग है उसका सुख में भी राग नहीं तो फिर द्वेष कहां से होगा ॥ २२ ॥

तथापि उसको मायाशक्ति की रचना जो है वही इन-जन्तुओं के सुखदुःख, हित अहित, बन्धमोक्ष, इत्यादि रूप-संसार के लिये समर्थ होती है ॥ २३ ॥

हे भामिनि ! (कोपस्वभावशालि) अब मैं आप को शाप छुड़ाने के लिये नहीं प्रसन्न करता हूं । हे सति मेरे कथन को जो आपने अयुक्त समझा है, उसकी माफ क्षमा कीजिये ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गिरिशौ भवानीशङ्करौ प्रसाद्य स्मयतोर्विस्मयङ्कुर्वतोः सतोः ॥ २५ ॥ २६ ॥ २७ ॥

स्वर्गादावेव तुल्योऽर्थः प्रयोजनमिति द्रष्टुं शीलं येषां ते तथा ॥ २८ ॥

तत्र तदुक्तमेव हेतुमाह—द्वाभ्याम् । देहिनां सुख दुःखमित्यादि द्वन्द्वानीश्वरस्य लीलया मायया भवन्ति तेषु च गुणदोष-विकल्पश्चेत्यन्वयः ॥ २९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

देहानेवमेव इयमः स्फुरति न आत्मनस्त्वयमेवः सुखादिभेदः पुंसः स्वप्ने यथा अविवेककृतो भवति स्रजिसर्पमालादिभिर- न्यथा॰ तथैव कृत इत्यर्थः । आर्यादिति पक्तव्य आजवादित्यादि पाठान्तरे तु सुगमम् ॥ ३० ॥

अतो भागवतानां निःस्पृहत्वमुचितमेवेत्याह—वासुदेव इति । ज्ञानवैराग्ययोर्वीर्यं बलं येषां तेषां व्यपाश्रयो विशेषबुद्ध्या आश्रयणीय अर्थो नास्ति ॥ ३१ ॥

अतश्च हरिदासत्वेन तत्स्वभावत्वाच्छिवादिभिरपि वक्तुं हरेर्माहात्म्यमाह—नाहमिति चतुर्भिः । ईहितमभिप्रायं लीलां वा यदा वयं न विद्मस्तदा तस्य स्वरूपमंशकांशका अपि सन्तः पृथगीशमानिनो न विदुरेव ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीत्थं गिरिजां पार्वतीं प्रशाम्य तत्स्वर्धां कृत्वा चित्रकेतुः हे अरिन्दम, स्वयोः आत्मनोः तयोर्भगवत्योः पश्यतो- स्तयोः विमानेन गगनमार्गेण ययौ ॥ २५ ॥

ततश्चित्रकेतोर्गमनानन्तरं रुद्रः रुद्राणीमित्रमाणीति इदं वक्ष्यमाणं देवर्षिप्रभृतीनां दैत्यदानवाद्यैः शृण्वतां सतां सम- भ्रवीत् ॥ २६ ॥

तदेवाह—दृष्टवतीत्यादिना, स्वमद्दीर्घिमानेन । हे सुभ्रोणि ! अद्भुतकर्मणः विविधैश्चित्रकर्माणः अक्लिष्टकर्मणो भृत्यवर्गाणां माहात्म्यं दृष्टवत्यसि तत्तद्भूतानां निःस्पृहाणां वैषयिकं सुखमभिलक्ष्य महात्मनाम् अपवर्गैकनिष्ठत्वदुःखिनां सुखदुःखयोः समदृष्टीनामितरेषाम् ॥ २७ ॥

एतद्दृष्टान्तेन अन्यानपि एतादृशान् महानुभावोऽसौ इत्याह— नारायणपरा इति । सर्वे नारायणपरायणाः परमार्थं येषां ते कुतश्च न अर्वाचीनस्य निसर्गं बिभ्यति नरकं न पूर्वेऽपि, कुतः ? सर्वत्र स्वर्गादिष्वपि तुल्यार्थदर्शिनः तुल्यभोगत्वदर्शिनः विषया- र्थदर्शनमेव भयहेतुरिति भावः । स्वर्गादिस्तु कृत्स्न मोक्षस्य भग- वदनुग्रहरूपत्वेन तेषां तस्य स्वर्गादि, भगवदनुग्रहैः यद्वा अपवर्गो मुक्तिरेव भगवद्दास्यव्यवधानतया येषां न प्रयोजनं किं पुनस्स्वर्गादिस्तेषां न प्रयोजनमिति । स्वर्गार्थे नरकशब्दः प्रयुक्तः स्वर्गस्यापि नरकतुल्यत्वाद्धानत्वात् नरकशब्दः, यथा नरकस्तथा स्वर्गोऽपीत्यर्थः, तथा चोक्तम्—

"एते वै निरयास्तात स्थानस्य परमात्मनः" इति ।

"वासुदेवे मनो यस्य जपहोमार्चनादिषु ।

तस्यान्तरायो मैत्रेय ! देवेन्द्रत्वादिकं फलम् ॥ "

इति च स्वर्गादिषु तुल्यार्थदर्शिन इत्यनेन विषमदर्शनं भयहेतुरिति सूचितम् ॥ २८ ॥

तत्र समस्तयोगनिमित्तं वक्तुं नास्वच्छिवपदवीनिमित्तमाह—देहिना- मिति द्वाभ्यां । तावद्देहिनां जीवानाम् ईश्वरलीलया हेतुभूतया ईश्वरस्य लीलात्मिकया जगत्सृष्ट्या यो देहसम्बन्धः तस्मादेव सुखदुःखादीनि द्वन्द्वानि भवन्ति, न तु स्वरूपत इति निर्णयार्थं, देहसंयोगमात्र एवेश्वरलीलाहेतुभूता, न तु द्वन्द्वेषु वा देहयोगवै- चित्र्ये वा हेतुरिति तात्पर्यम् ॥ २९ ॥

तर्हि तत्र को हेतुः ? तत्राह—अविवेककृत इति । आत्मनि ज्ञानै- काकारे जीवे अयं भेद इव देवमनुष्यत्वादिभेद इव गुणदोष- विकल्पः गुणाः सुखजन्मानुभवाः दोषाः दुःखभूतिशापाः एषां विकल्पः भेदः अविवेककृतः अनादिकर्मनिमित्तो यो देहात्म- भ्रान्तिस्वतन्त्रात्मभ्रान्तिरूपोऽविवेकः तेन कृतः तन्निमित्त- इत्यर्थः । अयं भेदस्याविवेककृतत्वमुक्तं तस्य कारणं सदृष्टान्तेन उभ- यमप्यविवेककृतमिति तात्पर्यम्, अत एवार्थभेदस्याविवेककृतत्वं देहात्मभ्रान्तिमतां पुरुषाणामात्मभ्रमाणीति, तस्य दृष्टान्तेनास्य स्व- र्गादिश्रीपतेः अयं भेदः दृष्टान्तेनाह—स्वप्नस्रक्सर्पकाष्ठवेति । यथा स्वप्नकाले स्रजि भेदः अविवेककृतः तथा गुणदोष- विकल्पोऽप्यविवेककृत इत्यर्थः यथाऽत्र स्रक्स्वपि सायानस्य एतस्य पुरुषस्य स्वप्नकृतः स्वाभाविकत्वेऽविद्यमान एव न तु स्वनादिभावेऽयं नाम विवेकाविवेकशब्दाद्धेहदेहमे- कत्वमायामात्रं सः अन्यकालमात्रावभासी च तत्कर्मनिमि- त्तदेहात्मप्रत्ययेनानुभूयमानेश्वरकालिकोऽविवेककृतः तथा जाग्र- द्दशायामपि अनुभूयमानानि देहादिगोचराणि च तत्तत्कर्मसम्भूतकर्तृत्वाभिमानादिदुःखमीश्वरकृतान्यविवेक- मूलकानीति भावः ॥ ३० ॥

एवं भगवति निमित्ते विषमदर्शनेऽविवेक एव हेतुरित्युक्तम् अथ नारायणपरायणान् शीलादीन् विवेकिनश्चापि कृपया तान् — स्वामित्वादिषु ज्ञानमात्रस्य तद्भावेन तदर्चार्थ- स्वरूपविस्मरणेऽनुकूलं ज्ञाने नास्तीत्याह—वासुदेव इति । ज्ञानं शास्त्रजन्यं ज्ञानं तत्त्वार्थरूपं तत्पूर्वकं वैराग्यं शब्दादिविषयेभ्यो विरक्तिरूपं येषां तेषां वासुदेवे भगवति निरतिशयानन्दरूपे भक्तानां कुर्वतां नृणां दुर्लभत्वात् एतेऽपि व्यपाश्रयः व्यापक आश्रयः एतस्मात्कृपया- श्रयस्य निरतिशयानन्दरूपस्य परमात्मनः व्यपगतो भयानि विषमदर्शनं नास्तीत्यर्थः निरन्तरं प्रकृतिपूर्वकं भगवदनुभवादिरूपं भक्तानां विरक्तानामेव दृढत्वानुभवत्वात् कृपया निवृत्तानामित्र- कारान्तरं भजताम् नारायणपरायणानां तेषां तद्विषये विषमदर्शनमेव नास्ति, कुतः, तन्नि- मित्तं भयमिति भावः ॥ ३१ ॥

एवं स्वकार्यार्थे नारायणपरायणानां माहात्म्यवर्णनमस्य तत्प्र- दर्शितं कद्रेण, अथ स्त्रीस्वभावत्वात्पार्वत्यं सर्वकार्ये त्वयि स्वकृतेषु वा स्वतन्त्रयत्नप्रतिपादनात्तस्य तत्कृतानां वा समुद्रे विप्रुडिव किमन्यन्तरात्मनो विज्ञानमात्रं प्रत्याह —नाह- मिति । अहं रुद्रः अहमपि वयं यस्य नारायणस्य ईहितं 'माकेकः'

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ईहां चेष्टां तत्स्वरूपञ्च न विदामः न जानीमः ईहा च जगद्व्यापाररूपा चेष्टा. अज्ञाने हेतुः, अंशांशकाः तदाहितभज्ञा-नशक्तिलेशयुक्ताः तस्मात्तेनैव वयमपि पृथगीश्वरा इत्यभिमान-युक्ताः, अनेन स्वस्मिन् सर्वेश्वरत्वशङ्का निवारिता. ईहितं न विदामेत्यनेन कारणत्वशङ्कापि, सृष्ट्यादिव्यापारस्य तत्कर्तृकत्व-कथनात्. स्वरूपं न विदामेत्यनेन तत्स्वरूपस्यानन्तमहिम-शालित्वमपरिच्छिन्नत्वञ्चोक्तं. तत्र विरिञ्चो ब्रह्मा कुमारः सन-त्कुमारः ब्रह्मपुत्राः मरीच्यादयः मुनयः तद्व्यतिरिक्ता अन्ये मुनयः सुरेशाः इन्द्रादयः ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेर्भृत्यभृत्यानां माहात्म्यं देहवियोगलक्षणावस्थाप्राप्तावप्य-नासक्तत्वगाम ॥ २७ ॥

अस्यैव नैतादृशमाहात्म्यं किमन्येषामप्यस्तीत्यभिप्रेत्याह—नारायणेति । कुतो न बिभ्यतीति तत्राह—स्वर्गेति ॥ २८ ॥

द्वन्द्वानीत्युक्तविवरणं सुखमित्यादि ईश्वरलीलया देहसंयोगात् द्वन्द्वानि भवन्तीतिशेषः ॥ २९ ॥

ननु, देहसम्बन्धाद्द्वन्द्वादीनि भवन्त्वस्य श्वशृगालाद्याकारेण भेदः किं कृतः? इति तत्राह—अविवेककृत इति । इहात्मनि जीवे श्वायं शृगालोऽयमित्याद्याकारनिमित्तव्यवहारभेदः पुंसोऽविवेकेन हरेः स्वस्य च स्वरूपविषयज्ञानाभावेन कृतो यस्मात्तस्मादियमनर्थपरम्परा किञ्चात्मन्ययं गुणोऽस्त्वयं दोषोऽस्तीति विकल्पश्चाविवेकेन कृतः कथमिव स्वप्ने कल्पिता वासनोपादानकृता गजादिलक्षणा भिदेव अनित्यत्वादेवैतत्साम्यं न तु मिथ्यात्वात् अन्यथार्थान्तरायोग इति ॥ ३० ॥

तर्हि अस्यानर्थस्य निवृत्तौ किं साधनमिति तत्राह—वासुदेव इति । अन्यः कश्चिद्विशिष्टाश्रयो नास्ति भक्तिज्ञाने एवेति शेषः ॥ ३१ ॥

देवदत्तज्ञानवद्देवस्य ज्ञानं न सुसाध्यमित्याह—नाहमिति ॥ ३२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दृष्टवत्यसि भवच्छापेऽपि भयाभावेन तर्कितवत्यसि किम् ॥२७॥

श्रीनारायणं विनान्यत्र क्वापि भयाभावाद्विद्वेषराहित्याच्चापवर्ग इव स्वर्ग इव नरकेऽपि तुल्यमेकमेवार्थं नारायणरूपपुरुषार्थं द्रष्टुमनु-भवितुं शीलं येषां ते तुल्यशब्दस्यैकार्थवाचित्वम् "एषोऽस्यां नाथाः समानपदे" इतिवत् ॥ २८—२९ ॥

अविवेकेत्यस्य टीकायां तेतु चेत्यध्याहृतं । इहात्मनीति गुण दोष विकल्पस्य व्याख्यानं भिदा यथेत्यत्र भिदाचेति ज्ञेयं अका-राभावास्तत्कृत इति पाठान्तरम् ॥ ३० ॥ ३१ ॥

पृथगीशमानिनश्चेत्तर्हि वयमंशकांशका अपि यस्येहितं स्वरू-पञ्च न विदाम । किन्तु भक्ताश्चेत्तर्हि सर्वेऽपि विदुरित्यर्थः ॥ ३२ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्मयतोः विस्मयवतोः सतोः ॥ २५ ॥ २६ ॥

हे सुश्रोणि ! इति त्वं सौन्दर्यगुणैरेवाधिकमाहात्म्यासि न तु भक्तिज्ञानवैराग्यादिभिरिति परिहासो ध्वनितः । अद्भुत-कर्मणा इति, हरेरिदमद्भुतं कर्म मया दृष्टं यत्त्वया शापं दापयित्वा तवापकर्ष एव तेन कृतः स्वभक्तस्य प्रेमसम्पत्ति-र्यद्यपि न्यूनतामप्राप्तस्यागणितदेवीशापत्वरूपप्रभाववत्या-पत्तया परमोत्कर्ष एव कृतः । महात्मनामिति त्वया कोप-भरितयापि दत्तोऽभिशापस्तस्मै यदि स्वल्पीयदपि दुःखं दातु-मपारयिष्यत्तदापि ते शापः सफलोऽभविष्यत् हन्त हन्त व्यर्थ एवायमभूदित्यतो महात्मसु प्रेमिभक्तेषु त्वयाद्यारभ्य नैवं व्यव-हर्त्तव्यमिति शिक्षा ध्वनिता ॥ २७ ॥

नन्वेवं माहात्म्यवत्त्वे भक्तानां को हेतुस्तत्र नारायणैकनिष्ठ-त्वमेव नान्य इत्याह—नारायणेति । न केवलमेते चित्रकेतुप्रभृ-तयः एवमपि तु सर्व एव स्वर्गेति अथायामेव भक्तिसुख-राहित्येनारोचकत्वाविशेषादिति भावः ॥ २८ ॥

नारायणनिष्ठत्वाभावे त्वेवं भवेदित्याह—देहिनामिति । ईश्वर-लीलयेति तदीक्षणलीलावलम्बनया माययेत्यर्थः ॥ २९ ॥

तस्मान्मायिकमवास्तवं वस्तु सुखदुःखादिकमस्थिरत्वादव-स्त्विव जानीयादित्याह—अविवेकेति । पुंसः स्वप्ने आत्मनि अर्थ-भेदः क्षीरभोजनपुत्रमरणादिरिव जागरेऽपि गुणदोषविकल्प-सुखदुःखादिभेदः कृतो ज्ञेयः । तत्र दृष्टान्तः । स्रजि मालायां भित् रज्जुरियमिति सर्पोऽयमिति भेद एव वत् यथेत्यर्थः "इव वद्वाति सादृश्ये" इत्यभिधानात्. स्रजि तदिति पाठे स्रजि मालायां तस्मतो द्वयोर्भिदा भेद इव प्रथमे पाठे भित् क्विबन्तः द्वितीये भिदा टाबन्तः ॥ ३० ॥

तदेवं ज्ञानिनां द्वन्द्वेषु ज्ञानाभ्यासेनाप्यवस्तुबुद्धिर्दुष्करा भक्तानान्तु ज्ञानवैराग्ययोर्भक्त्यनुभावरूपत्वात् विनापि ज्ञानाभ्या-सेन तेष्वनुसन्धानमपि न भवतीत्याह—वासुदेव इति । इह संसारे कश्चिदप्यर्थो विशेषस्यापकर्षस्य चाश्रयो नास्ति भक्त्यनुसन्धानादेव मायिकवस्तूनामुत्कर्षापकर्षानुसन्धानं नैव जायत इति भक्तानां तत्त्वमवधारयेति भावः ॥ ३१ ॥

अस्मदादीनामपि तत्त्वं दुर्ज्ञेयमित्याह—नाहमिति । ईहितम-भिप्रायं लीलां वा न विदाम यतः पृथगीशमानिनः ॥ ३२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गिरिशौ सतीभवौ स्मयतोः आश्चर्यं प्राप्तयोः सतोः ॥ २५ ॥ २६ ॥ २७ ॥

न ह्यस्याहित प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ।
आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ॥ ३३ ॥
तस्य चायं महाभागश्चित्रकेतुः प्रियोऽनुगः ।
सर्वत्र समदृक्शान्तो ह्यहं चैवाऽच्युतप्रियः ॥ ३४ ॥
तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु ।
महापुरुषभक्तेषु शान्तेषु समदर्शिषु ॥ ३५ ॥

श्रीशुक उवाच ।

इति श्रुत्वा भागवतः शिवस्योमाऽभिभाषितम् ।
बभूव शान्तधी राजन्देवी विगतविस्मया ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वर्गादिषु आधारत्वेन अन्तःप्रविष्टत्वेन वस्तुत्वः समर्थो भगवान् तद्दर्शिनः ॥ २८ ॥

ईश्वरस्य सर्वेश्वरस्य लीलया तत्तत्कर्मानुरूपफलदानुरूपया ॥ २९ ॥

ननु, किं मूलस्तर्हीश्वरनैरपेक्ष्येणाहं समर्थत्वात्सुखी असौ असमर्थत्वात् दुःखीति गुणदोषविकल्प इत्यत्राज्ञानमूल इत्याह-आत्मनि अर्थभेद इव आत्मख्याते स्थूलोऽहं कृशोऽहमिति अर्थभेदोऽर्थान्तरभूतोऽनात्मा देहो यथाऽविवेककृतः अज्ञाननिर्मितः अथवा अनात्मनो देहस्यार्थत्वेन भेदो मतभेदः बाह्यपञ्चरूपो विभागोद्गमः पुंसः गुणदोषविकल्पः अविवेककृत एव अयं समर्थत्वेन गुणवान्सुखित्वात् असौ असमर्थत्वेन दोषवान् दुःखित्वात् इति गुणदोषभेदः सर्वमूलभूतभगवदनवबोधकृतः—

"ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ।
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया" इति ॥

*मायेति व्याख्येक इत्यर्थः दृष्टान्तान्तरम् । स्रजि भिन्नवत् मायायां सर्पोऽयमिति भेद इव च गुणदोषविकल्पोऽविवेककृत एव "इव वद्भ्यति सादृश्ये" इत्यभिधानात् वदऽव्ययं सादृश्यवाचकं पृथगेव अतः स्रजि यद्वत्सर्पमित्युक्तिरयुक्ता ॥ ३० ॥

उक्तप्रकारेण भगवानेव सुखादिप्रदः अतो भगवति भक्तिमुद्वहतां कश्चिद्भगवदितरः अपाश्रयः सुखादिप्राप्तये सुखादिनिराकृतौ विशिष्टबुद्ध्या आश्रयो नास्ति ॥ ३१ ॥

एवंविधस्य श्रीहरेः यथाहमनुगस्तथा चित्रकेतुरपीत्याह-नाहमिति त्रिभिः । अंशकः पुरुषावतारस्तदंशकाः ईहितं स्वरूपं वेदतावच्छिन्नतया न विद्मः ॥ ३२ ॥ ३३ ॥

भाषा टीका ।

श्रीशुक उवाच ॥

हे अरिंदम ! (शत्रुओं के दमन करने वाले) चित्रकेतु इस प्रकार भवानी और शङ्कर दोनों को प्रसन्न कर, मुसकाते हुए उन दोनों के देखते २ विमान पर बैठ कर चल दिया ॥ २५ ॥

तदनन्तर भगवान् श्रीशङ्कर, देव ऋषि दैत्य सिद्ध और पार्षदों के सुनते २ श्रीपार्वतीजी से ऐसे बोले ॥ २६ ॥

श्री रुद्र उवाच ॥

हे सुश्रोणि ! (सुन्दरनितम्ब वाली) अद्भुत कर्मा हरि के निस्पृह दासानुदास ऐसे महात्माओं का माहात्म्य तुमने देखा ? ॥ २७ ॥

सबही नारायण परायण किसी से भय नहीं करते क्योंकि वे लोग स्वर्ग नरक और अपवर्ग में भी एकार्थ दर्शी होते हैं ॥ २८ ॥

जीवों के देह के संयोग होने से ईश्वर की माया से सुखदुःख जन्म मरण शाप अनुग्रह रूप द्वंद्व होते हैं ॥ २९ ॥

घटपटादर्थ भेद के तरह आत्मा में देव मनुष्यादि भेद अविवेक कृत हैं गुण दोष विकल्प भी इसी प्रकार माला में सर्पादि भेद के तरह किया गया है ॥ ३० ॥

वासुदेव भगवान् में भक्ति करनेवाले और ज्ञान वैराग्य रूप वीर्यवाले भक्तों को इस संसार में विशेष आश्रयणीय कुछ भी नहीं है ॥ ३१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एव हरिरपि सर्वेषां भूतानां प्रियः ॥ ३३ ॥

अहञ्चैवाच्युतस्य प्रियः तस्मान्ममास्मिन् क्रोधो माभूदिति भावः ॥ ३४ ॥ ३५ ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्ययं सर्वेश्वरः सर्वकारणभूतः तर्ह्यस्य प्राकृतस्येवाश्रितेष्वेव विशिष्योक्तविधमाहात्म्यापादकः किमयं पक्षपातः तत्राह—न हीति । अस्य नारायणस्यातीव प्रियादिः कश्चिन्नास्ति, तत्र हेतुः, आत्मत्वात्सर्वभूतानां ब्रह्मादिस्तम्बपर्यन्तानां चिदचिदात्मकानां भूतानामात्मत्वादन्तरात्मत्वात् न ह्यात्मनः एकं शरीरं प्रियमेकमप्रियं भवतीति भावः, यत एवात्मा सर्वभूतानामतस्तेषामाश्रयः धारकः अन्तःप्रविश्य भर्तेत्यर्थः । सर्वभूताश्रय इत्यनेन शरीराणां सर्वभूतानाम् आत्मभूतपरमात्मानुवर्तनं युक्तमेवेति सूचितम्. न हि शरीरमात्मानमननुवृत्त्यावतिष्ठते शरीरस्यात्मानुवर्तनस्वभावत्वात्. हरिरित्यनेन स्वानुवर्त्यार्तिहरत्वं सूचितम्. एवञ्च ये स्वाभाविकं जीवपरमात्मनोः शरीरात्मभावं जानन्तस्तमनुवर्तन्ते तेषु तस्यानुग्रहः इतरेषु तदभाव इति तात्पर्यम् अत एव तस्य वैषम्यमित्यपि सूचितं. न ह्यननुवर्तिष्वननुग्रहमात्रेण तस्य वैषम्यं. न ह्याश्रिताभीष्टप्रदस्य सुरद्रुमस्यानाश्रिताभीष्टाप्रदानमात्रेण तस्य वैषम्यमापादयितुं शक्यम् ॥ ३३ ॥

यत एवायमात्मा भूतानामाश्रितानामभीष्टार्थदो ऽविषमश्चात एव चित्रकेतुवदहमपि तमेवोपासे इत्याह—तस्येति । यथा महाभागः विवेकी सर्वत्र समदृक् शान्तश्च चित्रकेतुस्तस्य नारायणस्यानुगः भृत्यः भक्तः अत एव प्रियः निरतिशयप्रीतिविषयः तथा अहमप्यच्युतस्य प्रियः तन्निमित्तभक्तिमांश्च ॥ ३४ ॥

तस्मान्नारायणप्रियमाहात्म्ये न विस्मयः कार्य इति वदन्नुपसंहरति—तस्मादिति । यस्मान्नारायणास्तद्भक्ताश्च अस्मदादिभ्यो विलक्षणप्रभावाः तस्मान्महापुरुषस्य भगवतः भक्तेषु महात्मसु प्रकृतिपुरुषेश्वरयाथात्म्यावमर्शनप्रवणचित्तत्वात एव समदर्शिषु शान्तेषु विरक्तेषु पुरुषेषु न विस्मयः कार्यः ॥ ३५ ॥

भगवतः शिवस्येत्थम् एवमभिभाषितं वचः श्रुत्वा गौरी देवी विगतविस्मया विस्मयरहिता शान्तधीः क्रोधरहिता च बभूव ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मत्वात्स्वामित्वात् न हि सर्वभूतस्वामिनः स्वपरभेदकल्पना युक्ता इत्यन्तरमाह—सर्वभूतेति ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भक्तमाहात्म्यमेव चित्रकेतुदृष्टान्तेन स्पष्टयति—न ह्यस्येति द्वाभ्याम् । प्रियाप्रिययोः स्वपरयोश्च भेदो नास्तीत्यर्थः । तत्र हेतुः, आत्मत्वादिति, आत्मत्वेन साम्यादनपेक्षणीयत्वाच्चेत्यर्थः । आत्मत्वादेव हेतोः सर्वभूतानान्तु प्रियः निरुपाधिकप्रीतिविषयः ॥ ३३॥३४ ॥

विरुद्धं । अत एवाग्रे वक्ष्यते । 'इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः' इति ॥ ३५-३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हरेश्च तत्त्वं शृणु—नहीति । स तु हरिः सर्वभूतानां प्रिय एव तदपि यत् स केषाञ्चित् प्रियो भवति केषाञ्चिद्द्वेष्यश्च भवति तत्र तारतम्येन मायैव कारणमिति तन्मायायाश्च तत्त्वं ज्ञापितम् ॥ ३३ ॥

तस्य च तथाभूतस्यापीत्यर्थः प्रियत्वे हेतुः सर्वत्र समदृक् स्वर्गापवर्गादौ तुल्यार्थदर्शी अत एव शान्तः । उच्चनीचबुद्धिरहितः एतादृशगुणकत्वेन तत्प्रियत्वे दृष्टान्तं दर्शयति—अहं चैवेति, अहञ्च समदृक् शान्तश्च सदाच्युतस्य प्रियः अतो ममानासक्तत्वाल्लौकिकलज्जाद्यनादरत्वाच्च सभादौ भवदाद्यालिङ्गनमपि न सङ्कोचहेतुरिति भावः । तस्मादच्युतस्याश्रयत्वात् ॥ ३४ ॥

पूर्वं धृष्टायेत्यादिना निन्दितं सम्प्रति त्वेतावत् साधुलक्षणमिति स्तुतं तत्त्वञ्च तस्य व्यवहृतासाधुत्वमबलम्ब्योक्तत्वात् किन्त्वस्य चित्रकेतोर्मम च तत्त्वं शृणु इत्याह—तस्य सर्वत्र समस्यापि ।

"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति च मां भक्त्या मयि ते तेषु चाप्यहम्"

इति तद्वाक्यादेवायमनुगश्चित्रकेतुः प्रियः । ममापि भक्तत्वादहञ्च प्रियः तस्मादावयोरसङ्कर्षणभक्तयोः परस्परसख्येनान्तःस्नेहवत्त्वात् कठोरोक्त्यादिकमपि सख्यसुखपोषकमेव, त्वन्तु वृथैव कोपिन्यभूः । किञ्च सत्यमहमीदृशी एव त्वन्त्वात्मानं निष्किञ्चनमैकान्तिकभक्तत्वेन सर्वत्र दर्शयसि अथ च रहसि विद्याधरीसहस्रेण सह रमसे तस्मात्त्वं कपटी अहन्त्वात्मानं स्त्रीकापट्यमयं दोषं दर्शयन्निष्कपट एवास्मि. किञ्च त्वं भक्तिं दर्शयसि विषयभोगं गोपयसि अहन्तु तद्विपरीत एव वर्ते इत्यावयोः अन्तरमेवेत्थया एव साक्षित्वेनावत्नन्तामित्यादि नर्मगोष्ठीरसास्वादोऽप्ययाऽभविष्यदेव यदि त्वमन्तरा अन्तरायं नाकरिष्य इति त्वत्कोपवैरस्यादेव स नाभूदित्युपालम्भो ध्वनितः । हन्त हन्त त्वत्रयन्धुरन्धर्याधीनेष्वधुनेन भक्तिमार्गमारूढेषु तवेश्वरस्यानादिमहाभक्तस्याप्येतादृशोऽभ्यप्येतावान् भावो नमस्तुभ्यं तदिति विस्मयस्त्वां तस्यां सत्यमेतावानेव भाव इत्याह—तस्मादिति ॥३५॥

शान्तधीरिति । स्त्रीयपुंस्वभावस्मृत्या लज्जया पटाञ्चलेन मुखमाच्छादयामासेति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अच्युतप्रियोऽहं तस्यानुग एक अयं चित्रकेतुश्च तस्य प्रियोऽनुगः ममास्मिन् क्रोधो नास्ति त्वया तु बाह्याच्छापोऽनियोजित इति भावः ॥ ३४ ॥

विशेषतो स्मयो वयमुत्तमा इति गर्वः ॥ ३५ ॥

विगतविस्मया .विनष्टगर्वा ॥ ३६ ॥

इति भागवतो देव्याः प्रतिशप्तुमलन्तमः ।
मूर्ध्ना सञ्जगृहे शापमेतावत्साधुलक्षणम् ॥ ३७ ॥
जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः ।
वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ॥ ३८ ॥
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
वृत्रस्यासुरजातेश्च कारणं (१) भगवन्मतेः ॥ ३९ ॥
इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः ।
माहात्म्यं विष्णुभक्तानां श्रुत्वा बन्धाद्विमुच्यते ॥ ४० ॥
य इमंप्रातरुत्थाय श्रद्धावान् वाग्यतः पठेत् ।
इतिहासं हरिं स्मृत्वा स याति परमां गतिम् ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां चित्रकेतूपाख्यानं नाम
सप्तदशोऽध्यायः ॥ १७ ॥

भाषा टीका ।

पृथक् ईश्वराभिमानी मैं ब्रह्मा सनत्कुमार नारद, ब्रह्मा के पुत्र मुनिलोग जिनके अंश के अंश है और जिसकी चेष्टा को और स्वरूप को नहीं जानते हैं ॥ ३२ ॥

न इस परमात्मा का कोई प्रिय न कोई अप्रिय, न कोई अपना न पराया, क्योंकि वह हरि सर्व प्राणियों का आत्मा है इसीसे सर्वभूतप्रिय हैं ॥ ३३ ॥

तिन हरि का यह महाभाग चित्रकेतु प्रिय अनुचर है। जैसा यह सर्वत्र सम दृष्टि वाला और शान्त हरि प्रिय, है ऐसे मैं भी अच्युत भगवान का प्रिय हूं ॥ ३४ ॥

तस्मात् महापुरुष के भक्त शांत समदर्शी महात्माओं के विषे कुछ विस्मय करने के योग्य नहीं है ॥ ३५ ॥

हे राजन् ! इस प्रकार भगवान् श्रीशिवजी का भाषण सुनकर श्रीपार्वतीजीने भी शांतबुद्धि होकर विस्मय का त्याग किया ॥ ३६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रतिशापं दातुमलन्तमः समर्थतमोऽपि ॥ ३७ ॥ ३८ ॥
असुरजातेरसुरभावेनोत्पत्तेः भगवति मतेश्च ॥ ३९ ॥ ४० ॥
एतद्वेतम् ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तदशोऽध्यायः ॥ १७ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो भागवतश्चित्रकेतुर्देव्याः प्रतिशप्तुं प्रतिशापं कर्तुं अलन्तमः समर्थोऽपि तस्याः शापं मूर्ध्ना सञ्जगृहे शिरसावाह साधूनां लक्षणमेतावदेवहि, अपकर्तृष्वप्युपकर्तृत्वबुद्धिमत्त्वमेव हि साधूनां लक्षणमित्यर्थः ॥ ३७ ॥

यत्पृष्टं राज्ञा वृत्रस्यासुरस्वभावस्य " नारायणे भगवति कथमासीद्दृढामतिः " इति तस्योत्तरं सङ्क्रमयति--जज्ञ इति । योऽयमुक्तविधश्चित्रकेतुः स एव त्वष्टुः संकल्पाद्दक्षिणाग्नौ जज्ञे जातः स एवासुरीं योनिमासुरं भावमाश्रितः वृत्र इत्यभितः विख्यातः प्रसिद्धः स पूर्वजन्मसिद्धभगवद्भक्त्याऽस्मिन्नपि जन्मनि ज्ञानविज्ञानाभ्यां युक्तः ॥ ३८ ॥

एवं त्वत्प्रश्नोत्तरमुक्तमित्याह--एतदिति । यत्त्वमसुरजातेर्वृत्रस्य भगवति स्मृतेर्भक्तेः कारणं परिपृच्छसि पर्यपृच्छः तस्योत्तरमेतत्सर्वं सप्रपञ्चं ते तुभ्यं मया आख्यातं कथितम् ॥ ३९ ॥

(१) भगवत्स्मृतः इति पाठान्तरम्. वीर०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अस्य चित्रकेतोरितिहासस्य श्रवणादिफलमाह—इतिहास-मिति । महात्मनश्चित्रकेतोः सम्बन्धिनं पुण्यमिममितिहासं विष्णुभक्तानां माहात्म्यसूचकं श्रुत्वा बन्धात्संसारबन्धाद्विमुच्यते मुक्तो भवेत् ॥ ४० ॥

यः पुमान् प्रातरुत्थाय श्रद्धावान् वाग्यतः नियमितवाक् हरिं स्मृत्वा एतमितिहासं पठेत् । स परमां गतिं सर्वोत्कृष्टं भगवत्सायुज्यं प्राप्नुयात् श्रवणपठनाभ्यां शनैः परिनिष्पन्नभक्तियोगो मुक्तो भवेदिति भावः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ प्रसादये न त्वां शापमोक्षायेत्यस्यार्थमतुष्टो सन्माऽयते शापोऽभिमत इति कृत्वा, तन्मोक्षायाऽप्रसादनम् अनिष्टोत्पत्तर्कित्वेन प्राप्तोभिमत इति कृत्वा वा, तदभिभवशक्तं इति कृत्वेति, आहोस्वित् प्रतिशापदानसमर्थ इति कृत्वेति, कोऽयमर्थोऽनेनाङ्गीकृत इति तत्राह—प्रतिशप्तुमिति, मूर्ध्ना सञ्जगृह इत्यनेन द्वितीयोभिमत इति ज्ञायते प्रश्नयस्य साधुलक्षणत्वात् अस्य च साधुत्वेकत्वाच्चतुर्थपक्षस्योर्धरितत्वेनाङ्गीकारो न भवति "देवा एव तदन्येभ्यः शक्ता मात्स्यत्र संशयः" इति वचनात् अत्र चः कश्चिद्विशेषोस्तीति मतम्—

"अशक्ता अपि शक्तानां शक्ताः शापादिषु स्फुटम् ।
तथाप्यशक्तैर्विहिताः शापाद्याः शक्तिमत्सु च ॥
अत्यल्पा अल्पकाश्च न सम्यक् प्रभवन्ति च ।
वस्तेनापोदितुं शक्त्या उत्तमेस्तु न संशयः ॥
उत्तमेषु कृताः शापाः कर्तृणां ज्ञानपुण्ययोः
निःशेषेण निहन्तारः" इत्यादि ॥ ३७ ॥

कुत्रास्य जन्माभूत्त्राह—जज्ञ इति ॥ ३८ ॥

परमप्रमेयमुपसंहरति—एतदिति । वृत्रस्य यच्चरितं मां परिपृच्छसि किञ्च सर्वमेतत्सर्वं किञ्च तस्यासुरजातेरासुरवंशे जननस्य यत्कारणं चैतच्च कथितमिति शेषः ॥ ३९ ॥

फलमाह—इतिहासमिति ॥ ४० ॥

भगवद्भक्तादिबन्धमोक्षोपि बन्धमोक्षः स्यात् न तु संसारबन्धमोक्षेण वैकुण्ठलोकप्राप्तिरस्मादवगतेति शङ्कितावकाशविशेष इतिकर्तव्येन सा स्यादित्याह—य एतदिति ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे, षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

असुरजातेः कारणं महदपराधः भगवन्मतेः कारणं महदनुग्रहः ॥ ३८—४१ ॥

इतिश्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
सप्तदशोऽध्यायः समाप्तः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

चित्रकेतुरर्वाचीनत्वादल्पप्रभाव इति माऽवमंस्था इत्याह—इतीति । देव्याः देव्यै अथंतमः अतिसमर्थोपि ॥ ३७ ॥
योनिं जातिम् ॥ ३८—४१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठे सप्तदशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्येवं स भागवतः प्रतिशप्तुं प्रतिशापं दातुमलमत्यन्तमोऽतिसमर्थोपि देव्याः शापं मूर्ध्ना जगृहे एतावदेव साधूनां लक्षणम् ॥ ३७ ॥

स एव वृत्र इति विख्यातः जज्ञे जातः ॥ ३८ ॥

वृत्रस्यासुरजातेः असुरभावेनोत्पत्तेः भगवन्मतेः भगवद्भक्तेश्च कारणमित्येतत्सर्वं ते तुभ्यमाख्यातम् ॥ ३९ ॥

इतीतिहासश्रवणादिफलमाह—इतिहासमितिद्वाभ्याम् ॥ ४० ॥

एतदिममितिहासं यः प्रातरुत्थाय पठेत्स हरिं स्मृत्वा परमां गतिं याति ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तदशाध्यायार्थप्रकाशः ॥ १७ ॥

भाषाटीका।

हे राजन् ! वह परम भागवत चित्रकेतु पार्वती के प्रति शाप देने को भली तरह समर्थ रहा तौभी पार्वतीजी के शाप को शिर से ग्रहण किया इतनाही तो साधु का लक्षण है ॥ ३७ ॥

फिर वही दानवी योनि का आश्रय लेकर त्वष्टा की दक्षिणाग्नि में वृत्रासुर इस नाम से विख्यात होकर उत्पन्न हुआ तब भी ज्ञान विज्ञान से संयुक्त ही हुआ ॥ ३८ ॥

जो तुमने हमसे पूछा यह आख्यान हमने सब कथन किया जो कि भगवद्भक्त वृत्रासुर का असुर जाति का कारण रहा ॥ ३९ ॥

यह महात्मा चित्रकेतु का पुण्य रूप इतिहास है और विष्णु भक्तों का माहात्म्य है इसको सुनकर मनुष्य संसार के बन्ध से छूट जाता है ॥ ४० ॥

जो इस इतिहास को प्रातःकाल उठकर श्रद्धापूर्वक वाक् संयम करके पठन करे और स्मरण करे वह परमगति को जाता है ॥ ४१ ॥

इति श्रीमद्भागवतमहापुराण षष्ठस्कन्ध सप्तदशअध्यायकी भाषा टीका समाप्त ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे सप्तदशोऽध्यायः समाप्तः ॥ १७ ॥

॥ अष्टादशोऽध्यायः ॥

——○:*:○——

श्रीशुक उवाच ।

पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतीं त्रयीम् ।
अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् ॥ १ ॥
सिद्धिर्भगस्य भार्याङ्ग महिमानं विभुं प्रभुम् ।
आशिषं च वरारोहां कन्यां प्रासूत सुव्रताम् ॥ २ ॥
धातुः कुहूः सिनीवाली राका चानुमतिस्तथा ।
सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥ ३ ॥
अग्नीन्पुरीष्यानाधत्त क्रियायां समनन्तरः ।
चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः ॥ ४ ॥
वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ।
अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोर्ऋषी ॥ ५ ॥
रेतः सिषिचतुः कुम्भे उर्वश्याः सन्निधौ द्रुतम् ।
रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥ ६ ॥
पौलोम्यामिन्द्र आधत्त त्रीन्पुत्रानिति नः श्रुतम् ।
जयन्तमृषभं तात ! तृतीयं मीढुषं प्रभुः ॥ ७ ॥
उरुक्रमस्य देवस्य मायावामनरूपिणः ।
कीर्तौ पत्न्यां बृहच्छ्लोकस्तस्यासन्सौभगादयः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आदित्यानां चतुर्थस्य त्वष्टुर्वंशप्रसङ्गतः ।
प्रोक्तमिन्द्रकृतं विश्वरूपवृत्रवधादिकम् ॥ १ ॥
अदितेः पञ्चमादीनां पुत्राणामन्वयोक्तिभिः ।
अष्टादशे दितेर्गर्भे शक्रेण मरुतां भिदा ॥ २ ॥
त्वष्टुर्वंशमनुक्रम्य सप्रसङ्गं यथाक्रमम् ।
आदित्यानामथान्येषां वंशानाह मुनीश्वरः ॥ ३ ॥

दक्षकन्यान्वयानुकथने अदित्याः द्वादश पुत्राः प्रोक्ताः ।
"विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः ।
धाता विधाता वरुणो मित्रः शक्र उरुक्रमः" ।
इति तत्र षष्ठाध्यायान्तमारभ्य विश्वरूपवृत्रचित्रकेतूपाख्यानैस्त्वष्टुर्वंशमनुवर्ण्येदानीं सवितुर्वंशमाह—पृश्निस्त्विति । सावित्रीमित्यादिषु प्रासूतेत्युत्तरस्यानुषङ्गः पशुं पशुयागम् महामखान् पञ्च यज्ञान् ॥ १ ॥ २ ॥

धातुर्भार्या कुहूः सायं पुत्रं प्रासूत एवं सिनीवाली दर्शमित्यनुक्रमात् ॥ ३ ॥

समनन्तरो विधाता क्रियायां भार्यायां पुरीष्यानग्नीन् पञ्च चितान् "पुरीष्यासो अग्नय इति पञ्च वा एतेऽग्नयो यच्चितयः" इति श्रुतेः । चर्षणी वरुणस्य भार्यासीत् पूर्वं ब्रह्मणः पुत्रो भृगुर्यस्यां पुनर्जातः ॥ ४ ॥

वाल्मीकिश्च वरुणस्यैव पुत्रोऽभवत् एतौ वरुणस्यासाधारणौ पुत्रौ तयोरुत्सर्गाद्ययोरपि मित्रस्यासाधारण्याः तयोरेव साधारणौ द्वौ पुत्रावाह अगस्त्यश्च वसिष्ठश्च ऋषी मित्रावरुणयोरभवतामिति ।

श्रीश्रीधरस्वामिकृतभावार्थदीपिका।

यत उभावपि कुम्भे रेतः सिषिचतुः "सत्रेह जाता निषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम्" इतिश्रुतेः सूतं स्कन्नम् ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं दाक्षायणीनां कश्यपस्य भार्याणां अदितेर्वंशमुपक्रम्य विवस्वद्वंश्यपर्यन्तं तत्पुत्राणां वंशमभिधाय तमस्तत्पूर्वं शब्दतनु प्रयुक्तत्वाभिहितम् अथ सवित्रादीनां वंशमुपक्रमते मुनिः—पृश्निरित्यादिना। सवितुः पत्नी पृश्निः सावित्र्याद्यभिमानिदेवताः प्रासूतेत्युत्तरस्यानुषङ्गः पशु पशुयागं तदभिमानिदेवताविशेषमिति एवमुत्तरत्रापि महामखान् पञ्च महायज्ञान् ॥ १ ॥

एवं भगस्य भार्या सिद्धिरिति प्रसिद्धा महिमविभुप्रभूनत्र पुत्रान् सुव्रतां सुशीलां वरारोहामत्यन्तसुन्दरीमाशीर्नाम्नीं कन्यां च प्रासूत ॥ २ ॥

धातुः पत्न्यः कुहूप्रभृतयश्चतस्रः अनुक्रमात् सायादीन् चतुरः पुत्रान् ॥ ३ ॥

तथा धातुः समनन्तरो विधाता क्रियायां पत्न्यामग्नीन्पुरीष्यसंज्ञकान् निष्कासितप्राणान् पञ्च जनयामास ॥ ४ ॥

वरुणस्य चर्षणीति प्रसिद्धा भार्या आसीत् भृगुः पूर्वं ब्रह्मणः पुत्रो यस्यां चर्षण्यां पुनर्जातः तथा वरुणस्यैव पुत्रो वाल्मीकिर्महायोगी वल्मीकादभवत् एतौ वरुणस्यासाधारणौ पुत्रौ ॥ ५ ॥

तथा रेवत्यां भार्यायां मित्रवरुणयोस्सर्गाद्योऽसाधारणाः सुताः उभयोस्साधारणौ सुतौ अगस्त्यवसिष्ठौ ऋषी, कथमेकैकस्योभयसुतत्वम्? तत्राह—रेत इति। कदाचिन्मित्रावरुणौ ऊर्वश्या अप्सरसः सन्निधौ स्रुतं स्कन्नं रेतः कुम्भे घटे सिषिचतुः सिक्तवन्तौ तत्र कुम्भे वसिष्ठागस्त्यौ जातौ इति भावः रेवत्यामित्यर्थं स्यात्प्रायं उपधात् जनयामासेत्यर्थः ॥ ६ ॥

हे तात, प्रभुर्मित्रः पौलोम्यां शच्यां पत्न्यां जयन्तमृषभं तृतीयं मीढुषम् इति त्रीन्पुत्रान् जनयदिति सोऽस्माभिः श्रुतम् ॥ ७ ॥

तथोरुक्रमस्य त्रिभिः पादक्रमैः लोकत्रयमाक्रान्तवतो मायया आत्मीयरक्षणपर वामनरूपेणावतीर्णस्य कीर्त्याख्यायां भार्यायां बृहच्छ्लोकः पुत्र आसीत् तस्य बृहच्छ्लोकस्य सौभगादयः पुत्रा आसन् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अस्मिन्नध्याये पूर्वोक्तं सृष्टिशेषं निरूपयति—पृश्निरिति। तुष्ट्यादपूर्वस्मात्कथाविशेषमाह—सावित्री गायत्र्यभिमानिनीत्युत्तरत्रापेक्षमनुसन्धेयम् ॥ १ ॥ २ ॥

"अग्ने इदं सिनीवाली चन्द्रे नयकलो कुहू." धातुः(१) क्रिया नाम भार्याः याः कुहूसिनीवाल्याद्याः ताः अभवन् ॥ ३ ॥

समनन्तरो विधाता च क्रियायां भार्यायां पुरीष्याख्यानग्नीनाधत्त वरुणनाम्नः सूर्यस्य चर्षणी नाम भार्या पूर्वं ब्रह्मणो जातत्वात्पुनरित्युक्तम् ॥ ४ ॥

वाल्मीकिश्च वरुणवीर्याद्वल्मीकादभूत् ब्रह्मजो वसिष्ठश्च पुलस्त्यजोऽगस्त्यश्च द्वौ ऋषी पुनर्मित्रावरुणयोर्जातौ ॥ ५ ॥

तयोर्जन्मप्रकारमाह—रेत इति। उर्वश्या दर्शनात्तत्सन्निधौ स्रुतं स्कन्नं रेतस्तदनन्तरं मित्रावरुणौ कुम्भे सिषिचतुः तस्मात् तावुभावपि कुम्भसम्भवाविति प्रसिद्धिः ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पृश्निस्त्वित्ति त्रिकम् ॥ १ ॥ २ ॥ ३ ॥

अग्नीनित्यर्द्धकम् ॥ ४—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अष्टादशे हतसुता दितिः कृत्वा व्रतं दधौ।
यं तस्माच्छक्रसंछिन्न'गर्भाज्जज्ञे मरुद्गणाः ॥
तुर्यस्यादिति पुत्राणां त्वष्टुस्त्वद्यकीर्त्तने।
प्रसक्तः सर्गगतां विश्वरूपवधादिकाम् ॥
चित्रकेत्वभिशापान्तां समाप्यैव कथासुधाम्।
अदितेः पञ्चमादीनां सुतानां वंश उच्यते ॥

पशुं पशुयागं महामखान् पञ्चयज्ञान् प्रासूतेत्युत्तरस्यानुषङ्गः ॥ १—३ ॥

समनन्तरो विधाता क्रियायां भार्यायां पुरीष्यान् पुरीष्यसंज्ञान् अग्नीन् पञ्चाग्नीन्: "पुरीष्यासोऽग्नय:" इति श्रुतेः। चर्षणी वरुणस्य भार्या आसीत् पुनरिति प्राग्ब्रह्मपुत्रोऽपि पुनर्वरुणपुत्रोऽभूत्। भृगुवाल्मीकी वरुणस्यासाधारणौ पुत्रौ ॥ ४ ॥

तयोस्सर्गाद्यो मित्रस्यासाधारणाः पुत्राः वक्ष्यन्ते। मित्रावरुणयोः साधारणौ द्वौ पुत्रौ चाह—अगस्त्यश्च वसिष्ठश्चेतौ ऋषी मित्रावरुणयोरभवताम् ॥ ५ ॥

यतो रेत इत्यादि "कुम्भे रेतः सिषिचतुः समानम्" इति श्रुतेः स्रुतं स्कन्नम् ॥ ६ ॥ ७ ॥

मायया स्वरूपभक्त्या वामनं रूपवतः—

"स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः।
अतो मायामयं विष्णुं प्रवदन्ति मनीषिणः" ॥

इति माध्वभाष्यप्रमाणितश्रुतेः ॥ ८ ॥

---

(१) कर्मनामविशिष्टभार्याः।

तत्कर्मगुणवीर्याणि कश्यपस्य महात्मनः ।
पश्चाद्वक्ष्यामहेऽदित्यां यथैवावततार ह ॥ ९ ॥
अथ कश्यपदायादान्दैतेयान्कीर्त्तयामि ते ।
यत्र भागवतः श्रीमान् प्रह्लादो बलिरेव च ॥ १० ॥
दितेर्द्वावेव दायादौ दैत्यदानववन्दितौ ।
हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ ॥ ११ ॥
हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी ।
जम्भस्य तनया दत्ता सुषुवे चतुरः सुतान् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दक्षकन्यायाः अदित्याः—

"विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः ।
धाता विधाता वरुणो मित्रः शक्र उरुक्रमः" इति ।

द्वादशात्मजाः प्रोक्तास्तेषां मध्ये पूषानपत्य इत्युक्तं त्रयाणां विवस्वदर्यमत्वष्टॄणां सन्ततयश्चोक्ताः त्वष्टुः पुत्रो विश्वरूपो देवैः पौरोहित्ये वृत इति चोक्तं षष्ठाध्यायान्ते तदनन्तरमेकादशाभिरध्यायैस्त्वष्टृपुत्रविश्वरूपस्य देवपौरोहित्यप्रसक्तो नानाःकथाः कथिताः अथ सवित्रादीनामदितिपुत्राणां वंशं दितिसन्ततिश्च वर्णयन् दितिकोपादिन्द्ररक्षणमिन्द्रकोपाद्दितिपुत्ररक्षणं सर्वरक्षणकर्तुर्भगवतः सर्वजनरक्षणार्थमाराधनञ्च वर्णयति—पृश्निस्त्वित्याद्यध्यायद्वयेन । सवितुः पत्नी पृश्निस्तु सावित्र्यादिकन्याः अग्निहोत्रादीन् सुतांश्च प्रासूतेत्युत्तरस्यानुषङ्गः तत्र पशुं पशुयागं सोमं सोमयागं महामखान् पञ्च यज्ञान् ॥ १ ॥

हे अङ्ग ! भगस्य भार्या सिद्धिः महिमादिपुत्रत्रयम् आशिषं कन्यां च प्रासूत ॥ २ ॥

धातुः पत्नी कुहूः सायम् सिनीवाली दर्शम् राका प्रातः अनुमतिः पूर्णमासञ्चेति अनुक्रमात् प्रासूत ॥ ३ ॥

तदनन्तरो विधाता क्रियायां पत्न्यां पुरीष्यान् अग्नीन् पञ्च चितीन् आधत्त जनयामास "पुरीष्यासो अग्नय इति पञ्च वा एते अग्नयो यच्चितयः" इति श्रुतेः ॥ ४ ॥

वरुणस्य भार्या चर्षणी आसीत् यस्यां भृगुर्ब्रह्मजोपि पुनर्जातः वाल्मीकिश्च वरुणस्यैव पुत्रो वल्मीकादभवत् एतौ वरुणस्यासाधारणौ पुत्रौ ॥ ५ ॥

मित्रावरुणयोरसाधारणौ पुत्रावाह—अगस्त्यश्च वसिष्ठश्चेति द्वौ ऋषी ब्रह्मपुत्रौ पुनर्मित्रावरुणयोरभवताम्. यतस्तौ मित्रावरुणौ उर्वश्याः सन्निधौ कुम्भे रेतो वीर्यं च्युतं स्कन्नं सिषिचतुः ॥ ६ ॥

मित्रस्यासाधारणान्पुत्रानाह–रेवत्यामिति । इन्द्रात् जनयामास पौलोम्यां पुलोम्नः कन्यायाम् ॥ ७ ॥

मायावामनरूपिणः स्वसङ्कल्पेन वामनरूपिणः कीर्त्तौ बृहच्छ्लोक आसीत् तस्य सौभगादयः आसन् ॥ ८ ॥

भाषाटीका ।

श्रीरुक्मिणीरमणो जयति ।

श्रीशुक उवाच ।

सविता की पृश्नी नामक भार्या, सावित्री व्याहृति त्रयी अग्नि होत्र पशुयाग सोमयाग चातुर्मास्य और पंच महायज्ञों को पैदा करती हुई ॥ १ ॥

भग नामक सूर्य की भार्या ने महिमा विभु प्रभु को पैदा किया, तथा एक सुव्रता वरारोहा आशिष नामवाली कन्या को पैदा किया ॥ २ ॥

धाता नामक सूर्य की, कुहू सिनीवाली राका और अनुमति इन चारों पत्नियों ने क्रमसे, सायं दर्श प्रातः और पूर्णमास इन चारों को उत्पन्न किया ॥ ३ ॥

विधाता ने क्रिया नामक भार्या में पुरीष्य अग्नियों को पैदा किया । वरुण की चर्षणी भार्या हुई जिस में फिर से भृगुने जन्म लिया ॥ ४ ॥

और दूसरे वरुण के पुत्र वल्मीक से महायोगी वाल्मीकि हुए तथा मित्र और वरुण इन दोनों के साधारण पुत्र अगस्त्य और वशिष्ठ हुए ॥ क्योंकि उर्वशी के सन्निधि में मित्र और वरुण दोनों ने कुंभ में वीर्य का सेचन किया इसी से दोनों के पुत्र हुए ॥ मित्रने रेवती के विषे उत्सर्ग अरिष्ट पिप्पल इन को उत्पन्न किया ॥ ५ ॥ ६ ॥

इन्द्रने पौलोमी में जयन्त ऋषभ और मीढुष इन तीन पुत्रों को उत्पन्न किया ऐसा हमने सुना है ॥ ७ ॥

माया से वामन रूप लेनेवाले उरुक्रमदेवने कीर्ति नामक भार्या में बृहच्छ्लोक पुत्र उत्पन्न किया जिस बृहच्छ्लोक के सौभागादिक पुत्र हुये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पश्चाद्दशमस्कन्धे ॥ ९ ॥

अथेति कश्यपस्यादितेः पुत्राणां द्वादशादित्यानां जन्मविस्तरस्या दितेः पुत्रान्कथयामीत्यर्थः ॥ १० ॥

संह्रादं प्रागनुह्रादं ह्रादं प्रह्रादमेव च। (१)
तत्स्वसा सिंहिका नाम राहुं विप्रचितोऽग्रहीत् ॥ १३ ॥
शिरोऽहरद्यस्य हरिश्चक्रेण पिबतोऽमृतम्।
संह्रादस्य कृतिर्भार्याऽसूत पञ्चजनं ततः ॥ १४ ॥
ह्रादस्य धमनिर्भार्याऽसूत वातापिमिल्वलम्।
योऽगस्त्याय त्वतिथये पेचे वातापिमिल्वलम् (२) ॥ १५ ॥
अनुह्रादस्य सूर्म्यायां बाष्कलो महिषस्तथा।
विरोचनस्तु प्राह्रादिर्देव्यास्तस्याभवद्बलिः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

हिरण्यकशिपुर्हिरण्याक्षश्चेति प्रथमं द्वावेव तौ च कीर्तितौ तृतीयस्कन्धे ॥ ११ ॥ १२ ॥

विप्रचितो दानवाद्भर्तुः सकाशाद्राहुं पुत्रमग्रहीत् ॥ १३ ॥

ततः संह्रादादसूत ॥ १४ ॥

यो मेषरूपं वातापिं पेचे तमिल्वलम् यं पेचे तं च वातापिं चासूतेत्यन्वयः ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

काश्यपस्य कश्यपपुत्रस्य महात्मनः उरुक्रमस्य तानि प्रसिद्धानि कर्माणि पदत्रयेण लोकत्रयव्याक्रमणादीनि गुणाः स्वभक्तविषयकानुग्रहादयः सर्वशक्त्यादयश्च वीर्याणि उत्कृष्टगुणेभ्योऽपि उत्कर्षो हि वीर्यं तद्रूपाणि वीर्याणि च पश्चादष्टमस्कन्धे वक्ष्यामहे तथा अदित्यां यथा येन प्रकारेण अवततारं अवतीर्णवान् तत्र प्रकारं तत्रैव वक्ष्यामहइत्यर्थः ॥ ९ ॥

एवं साकल्येनादितेर्वंशमनुक्रम्याथ दितेर्वंशस्यानुक्रमं प्रतिजानीते—अथेति। काश्यपादीनां विवस्वदादीनामादितेयानां दायादान् सपिण्डान् शत्रून्वा दैतेयान् दितेः पुत्रान् ते तुभ्यं कीर्तयामि कथयामि तद्वंशे भागवतानाममावास्तच्छ्रवणं ममापेक्षितमिति राज्ञोऽभिप्रायमालोच्याह—यत्रेति। यत्र दितेर्वंशे श्रीमान् भगवता तुल्यं कल्याणगुणसंयुक्तः महाभागवतः प्रह्लादः बलिश्च बभूवतुः ॥ १० ॥

तर्हि कथयेत्याह—दितेरिति। दितेश्चैव दायादौ काश्यपानां देवानां शत्रू महतामवाप्यादरस्य वक्ष्यमाणत्वाद्वैरेण युक्तं पुत्रौ दैत्येस्तत्पुत्रपौत्रादिभिर्दानवैश्च वन्दितौ बभूवतुः तौ च हिरण्यकशिपुर्हिरण्याक्षश्चेति कीर्तितौ प्रख्यातौ ॥ ११ ॥

तत्र हिरण्यकशिपोर्भार्या जम्भस्य दुहिता दानवी दनुवंशोद्भवा कयाधुरिति प्रसिद्धा सा कयाधुः प्रह्लादादीन् चतुरः सुतान् सुषुवे ॥ १२ ॥

प्राक् प्रथमं प्रह्लादं ततः क्रमेणानुह्लादसंह्लादह्लादान् सुषुवे इत्यर्थः तत्स्वसा तेषां प्रह्लादादीनां चतुर्णां स्वसा भगिनी सिंहिकेति प्रसिद्धा बभूव सा विप्रचितः विप्रचितेर्भर्तुर्दानवात्सकाशाद्राहुं पुत्रमग्रहीत् सुषुव इत्यर्थः ॥ १३ ॥

राहुं विशिनष्टि—शिर इति। यस्य राहोरमृतं पिबतः शिरश्चक्रेण चिच्छेद संह्लादस्य हिरण्यकशिपोस्सुतस्य भार्या कृतिर्नाम भार्या पञ्चजनाख्यं सुतमसूत सुषुवे ॥ १४ ॥

तथा ह्लादस्य भार्या धमनीति प्रसिद्धा वातापिमिल्वलञ्चासूत, इल्वलं विशिनष्टि—य इति, अतिथये आतिथ्यार्थं निमन्त्रितायातिथये अगस्त्याय इल्वलो मेषरूपं वातापिं पेचे पपाच तमिल्वलमित्यन्वयः। वातापिमिल्वल इति प्रथमान्तपाठस्तु सुगमः ॥ १५ ॥

तथा अनुह्लादस्य सूर्म्यायां भार्यायां बाष्कलो महिष इति द्वौ पुत्रौ बभूवतुः तथा धुर्यां प्रह्लादस्य भार्यायां विरोचनः प्राह्लादिः प्रह्लादस्यापत्यं पुमान् बभूव, तस्य विरोचनस्य पुत्रो बलिरभवत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

महात्मनः कश्यपस्य पत्न्यामदित्यां यथाऽसावुरुक्रमोऽवततार तत्कर्मादीनि पश्चादष्टमस्कन्धे वक्ष्याम इत्यन्वयः ॥ ९ ॥

अथ मङ्गलमस्तु ननु, दैत्यवंशवर्णनं किमर्थं क्रियते? तत्कथनस्य श्रेयःसाधनत्वानुपयोगित्वादिति तत्राह—यत्रेति। यत्र दितिसन्ताने प्रह्लादबलिचरितकीर्तनश्रवणाभ्यां श्रेयःसाधनत्वसम्भवादित्यर्थः ॥ १० ॥ ११ ॥

विप्रचितः विप्रचितेः सकाशाद्राहुं सुतम् ॥ १२ । १३ । १४ । १५ ॥

तस्य विरोचनस्य ॥ १६ ॥

(१) प्रह्लादं प्रागनुह्लादं ह्लादं संह्लादमेव च। इति पाठान्तरम् वीर०। (२) इल्वलः इति पाठान्तरम्–वीर०

बाणज्येष्ठं पुत्रशतमशनायां ततोऽभवत् ।
तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते ॥ १७ ॥
बाण आराध्य गिरिशं लेभे तद्गणमुख्यताम् ।
यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः ॥ १८ ॥
मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः ।
त आसन्नप्रजाः सर्वे नीता इन्द्रेण सात्मताम् ॥ १९ ॥

राजोवाच ।

कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो ! ।
इन्द्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः ॥ २० ॥
इमे श्रद्दधते ब्रह्मन्नृषयो हि मया सह ।
परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

पश्चादष्टमस्कन्धे ॥ ९ ॥

अथेति । कथान्तरारम्भे, दायादान् पुत्रान् दैतेयान् दित्यां जातान् ॥ १० ॥ ११ ॥ १२ ॥

विप्रचित्तो दानवात् पत्युः सकाशात् राहुं पुत्रमगृहीत् प्राप ॥ १३ ॥ १४ ॥

य इल्वलः अगस्त्याय अगस्त्यं भोजयितुं वातापिं मेषरूपं पेचे ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यथा अवतार तत्प्रकारः तस्यावतीर्णस्य कर्मादीनि च पश्चादष्टमस्कन्धे वक्ष्याम हे राजन् ॥ ९ ॥

यत्र येषु भागवतः प्रह्लादो बलिश्च ॥ १० ॥

कीर्तितौ वर्णितौ तृतीयस्कन्धे ॥ ११ ॥

जम्भस्य तनया तेन दत्ता ॥ १२ ॥

तेषां स्वसा भगिनी सिंहिकानाम प्रसिद्धा सापि विप्रचित्तो दानवाद्भर्तुः सकाशात् राहुं पुत्रमगृहीत् ॥ १३ ॥

यस्य राहोः शिरो हरिश्चिच्छेद संह्लादस्य भार्या कृतिस्ततः संह्लादात्पञ्चजनमसूत ॥ १४ ॥

ह्लादस्य भार्या धमनिर्वातापिमिल्वलञ्चासूत य इल्वलः वातापिमगस्त्यायातिथये पेचे पपाच ॥ १५ ॥

प्राह्लादिः प्रह्लादपुत्रः तस्य विरोचनस्य देव्यां भार्यायां बलिरभवत् ॥ १६ ॥

भाषा टीका ।

कश्यपके पुत्र श्रीवामनजी के गुण कर्म वीर्य आगे [अष्टमस्कन्धमें] कहेंगे । जैसे अदितिमें प्रकट हुये ॥ ९ ॥

अब कश्यपके पुत्र दैत्योंको कहता हूं जिनमें महा भागवत श्रीप्रह्लाद और बलि हुये ॥ १० ॥

दैत्य दानवोंसे वन्दित बडे प्रसिद्ध हिरण्यकशिपु और हिरण्याक्ष ये दो पुत्र दितिके हुए ॥ ११ ॥

जम्भकी पुत्री दानवी हिरण्यकशिपुकी भार्याने चार पुत्र उत्पन्न किये ॥ १२ ॥

वे चार ये हैं संह्लाद, अनुह्लाद, ह्लाद, प्रह्लाद । और इनकी बहिन सिंहिका ने विप्रचित्तिसे राहु को पैदा किया । अमृत को पान करते हुए जिसके शिरको हरिने चक्रसे काटा । संह्लादकी कृति नामक भार्याने पतिसे पञ्चजन नामक पुत्रको उत्पन्न किया ॥ १३ ॥ १४ ॥

जिस इल्वलने अगस्त्यरूप अतिथिके लिये वातापी को पकाया उस इल्वल, और जिसको पकाया उस वातापी को अर्थात् इल्वल और वातापी इन दोनों को ह्लाद की धमनी नामक भार्याने उत्पन्न किया ॥ १५ ॥

अनुह्लाद की सूर्म्या भार्याने बाष्कल और महिष इनको उत्पन्न किया । प्रह्लादके विरोचन पुत्र हुआ जिस विरोचनकी भार्या से बलि उत्पन्न हुआ ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततो बलेः सकाशादभवत् तस्य बलेरनुभावः सुश्लोक्यः पुण्यकीर्तिभिः यद्वा अनुभाव्यते सद्भिः स्तूयत इत्यनुभावश्च सुश्लोक्यः पद्य इति शेषः ॥ १७ ॥

सूत उवाच ।

तद्विष्णुरातस्य स बादरायणिर्वचो निशम्यादृतमल्पमर्थवत् ।
सभाजयन् (१)सन्निभृतेन चेतसा जगाद सत्रायण ! सर्वदर्शनः ॥ २२ ॥

श्रीशुक उवाच ।

हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना ।
मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत् ॥ २३ ॥
कदा नु भ्रातृहन्तारमिन्द्रियाराममुल्बणम् ।
अक्लिन्नहृदयं पापं घातयित्वा शये सुखम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य गणेषु सुभगतां प्राधान्यम् ॥ १८ ॥

सात्मतां समानरूपताम् ॥ १९ ॥

सारूप्यं देवत्वं प्रापिताः ॥ २० ॥ २१ ॥

आदृतं सादरं अल्पं मिताक्षरं अर्थवत् बह्वर्थयुक्तं सत्रमयन-माश्रयो यस्य हे सत्रायण शौनक ॥ २२ ॥

शक्रस्य पार्ष्णिग्राहेण पृष्ठतः सहायेन ॥ २३ ॥

भ्रातृहन्तारमिन्द्रं मारयित्वा सुखिनी कदा स्यामिति चिन्तयामास दितिः उल्बणं क्रूरं अक्लिन्नहृदयं काठिन्यचित्तम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो बलेः अशनायां भार्यायां बाणः ज्येष्ठो यस्य तत्पुत्राणां शतमभवत् तस्य बाणस्य महादेवस्य शिवस्य अनुगाव प्रभावः सुश्लोक्यः अतीव वर्णनीयः स पश्चादेव स्वतन्त्रे स्थले वा अभिधास्यते कथयिष्यते ॥ १७ ॥

बाणस्तु गिरिशं रुद्रमाराध्य तत्प्रसादेन गणानां मुख्यत्वं लेभे तदेव स्पष्टयन् बाणं विशिनष्टि, यस्य बाणस्य पार्श्वे अद्यापि पुरपालकः स भगवान् गिरिश आस्ते ॥ १८ ॥

अन्यानपि दितेः पुत्रानाह— मरुतश्चेति । चकारो हिरण्यकशिपुहिरण्याक्षयोस्समुच्चयार्थः मरुतो महात्मानः चत्वारिंशत्संख्याकाः एकोनपञ्चाशत्संख्याकाः दितेः पुत्रा एव ते सर्वे मरुतः अप्रजाः अपुत्राः आसन् ते चेन्द्रेण सात्मतां समानरूपत्वं देवत्वमिति यावत् नीताः प्रापिताः अतो न तेषामां दायादा इति भावः ॥ १९ ॥

एतदेव शुश्रूषुः पृच्छति राजा—कथमिति द्वाभ्यां. हे गुरो ! मुने, ते मरुतः कर्मौत्पत्तिकं जन्मसिद्धमासुरभावमपोह्य स्वकृता इन्द्रेण सात्म्यं देवत्वं प्रापिताः देवत्वप्राप्तौ तैर्मरुद्भिः किं तदर्थमस्य साधु हितं कृतम् ॥ २० ॥

न केवलमिदमहमेव शुश्रूषुरपि तु हे ब्रह्मन्, इमे ऋषयोऽपि परिज्ञानाय वेदितुं श्रद्धते श्रद्धां कुर्वन्ति. अतो हे भगवन्, सोऽस्मद्यं व्याख्यातुं कथयितुमर्हसि ॥ २१ ॥

एवमापृष्टो मुनिः प्रहृष्टमभिनन्दयन् यथावदाचख्यो इत्याह सूतः—तदिति । बादरायणव्यासापत्यं पुमान् । विष्णुरातः श्रीशुकः अल्पं मिताक्षरमर्थवद्बह्वाशयगर्भं तस्य राज्ञस्तदृतः आदृतं सादरं यथा भवति तथा निशम्य निभृतेन चेतसा पूर्णोन्मान्तः करणेन तं राजानं संभावयन् सम्मानयन् सर्वज्ञो मुनिः हे सत्रायण, सत्रं यज्ञसत्रम् अयनमाश्रयो यस्य सः यज्ञमन्तेषु दीक्षित इत्यर्थः तस्य सम्बोधनं हे शौनक, जगाद ॥ २२ ॥

तदेवाह—हतपुत्रेति । शक्रपार्ष्णिग्राहेण शक्रमिन्द्रं पार्ष्णिग्रहणं स्वीयत्वेन गृहीतवता विष्णुना हतौ पुत्रौ हिरण्याक्षहिरण्यकशिपू यस्याः सा दितिः अत एव शोकेन दीप्तो यो मन्युः क्रोधस्तेन ज्वलन्ती परितपन्ती पर्यचिन्तयत् परितश्चिन्तामकरोत् ॥ २३ ॥

चिन्तामेव वर्णयति—कदेति । भ्रात्रोर्हिरण्यकशिपुहिरण्याक्षयोः हन्तारं विष्णुद्वारा हन्तारं, तत्र हेतुः इन्द्रियारामं केवलमैषयिकसुखासक्तम् उल्बणं क्रूरं अक्लिन्नहृदयम् अनार्द्रचित्तम् अत एव पापं पापात्मानं इन्द्रं घातयित्वा कदाहं सुखं यथा तथा शये अज्ञातनिद्रा भवेयम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततो बलेस्तस्यानुभावः पश्चादष्टमस्कन्धे अनुभावमिति पाठेऽभिधास्यते वर्णयिष्यति व्यास इति शेषः । अयं जन इति वा ॥ १७ ॥

यस्य बाणस्य पार्श्वे ॥ १८ ॥

सात्मतां समानजातितां सोदरत्वम् ॥ १९ ॥

(१) सन्निभृतेनेति पाठान्तरम्—विजय० ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

साधु पुण्यम् ॥ २० ॥ २१ ॥

तद्वचः तन्निभृतेन तस्मिन् स्निग्धेन सत्रायणाः सत्रे प्रधानाः सर्वदर्शनः सर्वज्ञः ॥ २२ ॥

पक्षपाततया कर्मकरः पार्ष्णिग्राहस्तेन शोकमनुदर्शितेन ॥ २३ ॥

अक्लिन्नहृदयं अनार्द्रहृदयं स्वपे निद्रां कुर्याम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अपोह्य त्याजयित्वा ॥ २० ॥

ननु कथं भवानिमां बहिरङ्गां कथां शुश्रूषते तत्राह—इमे श्रद्दधत इति। मया सहेति स्वस्य गौणत्वं बोधयंस्तत्रैव व्यञ्जितवान् ॥ २१ ॥

अत एव श्लाघते-भद्रिति। आदृतम् ऋषीणामादरेण सहितम् अर्थवत् एतच्च भगवदाराधनविशेषसम्बन्धेनैव भवेदिति स्वाभीष्टयुक्तं सन्निभृतेन श्रीभगवत्सुखपूर्वेण अतस्तदपि भगवत्सम्बन्धं बोजयिष्यतीति भावः। टीकायां बह्वर्थमिति श्रुत्यभिप्रेतश्रीशुकाभिप्रेतसिद्धियुक्तम् ॥ २२—२५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तस्य बलेः अनुभावमित्यपि बाह्यकर्मसम्बन्धेन वा ॥ १७ ॥ १८ ॥

सात्मतां समानस्वभावतां देवत्वं प्रापिता इत्यर्थः ॥ १९ ॥ २० ॥

इमे मुनयः श्रद्दधते इति स्वस्यैव श्रद्धां मुनिष्वारोपयति रहस्यमर्थं तान् ज्ञापयितुम् ॥ २१ ॥

अर्थवत् अनेकार्थयुक्तं तत्रैको जिज्ञासितोऽर्थोऽस्मात्पाख्यानाल्लभ्यते. यथा, परहिंसामभिसन्धायापि तामसीं भगवद्भक्तिं कुर्वन्नशुद्धचित्तोऽपि निश्चलाभतामसीं भक्तिमानुषङ्गिकीं संसारान्मुक्तिं चित्तशुद्धिप्राप्त्या परजिघांसानिवृत्तिञ्च लभत इत्यत्र दितिरेव प्रमाणम्. तथा. कुटिलचित्ताः विवेकिनोऽपि यान् दोषान् परेषां पश्यन्ति तानेव दोषान् स्वस्मिन् स्थितानपि न पश्यन्ति इत्यत्र क्रूमिविडित्यादिकवचनात् दितिरेव प्रमाणमिति द्वितीयः। स्त्रीमायया महाविज्ञोऽपि प्रतार्यो भवतीत्यत्र कश्यप एव प्रमाणमिति तृतीयः। अल्पं मिताक्षरं सन्निभृतेन सम्पूर्णेन एकाग्रीकृतेनेत्यर्थः। हे सत्रायणा शौनक ! ॥ २२ ॥

शक्रस्य पार्ष्णिग्राहेण पृष्ठतः सहायेन परोक्षसाहाय्य कर्त्रेत्यर्थः ॥ २३ ॥

उल्बणां क्रूरम्। सुखं शये सुखेन निद्रामीत्यर्थः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ततो बलेः सकाशादशनायां भार्यायां बाणो ज्येष्ठो यस्मिन् तत् पुत्रशतमभवत, तस्य बलेरनुभावः सुश्लोक्यः कविभिः शोभनैः श्लोकैर्वर्णनार्हः पश्चादष्टमे स्कन्धेऽभिधास्यते ॥ १७ ॥

तस्य गणेषु मुख्यतां प्राधान्यम्। भगवान् मृडः पुरपालकः सन् अद्यापि यस्य पार्श्वे आस्ते ॥ १८ ॥

इन्द्रेण सात्मतां देवत्वं नीताः ॥ १९ ॥

हे गुरो ! इन्द्रेण औत्पत्तिकं सहजं तदीयमासुरं भावमपोह्य ते सात्म्यं देवत्वं कथं प्रापिताः ? तैस्तस्य किं साधुकृतम् ? ॥ २० ॥ २१ ॥

सत्रमयनमाश्रयो यस्य सम्बोधने हे सत्रायण ! शौनक स प्रसिद्धः सर्वदर्शनो बादरायणिः शुकः विष्णुरातस्य तत्प्रश्नरूपं आदृतं आदरान्वितं अल्पं मितवर्णं अर्थवत् बह्वर्थयुक्तम् वचो निशम्य निभृतेनानन्दपूर्णेन चेतसा समाजयन् प्रशंसयन् जगाद ॥ २२ ॥

शक्रस्य पार्ष्णिग्राहेण सहायेन ॥ २३ ॥

उल्बणां क्रूरम् अक्लिन्नहृदयमनार्द्रचित्तम् पापं पापात्मानम् घातयित्वा कथमहं सुखं यथा तथा शये ॥ २४ ॥

भाषाटीका।

उस बली की अशना नामक भार्या में सौ पुत्र उत्पन्न हुये जिनमें बाणासुर जेष्ठ था। उस बलीके पवित्र प्रभाव को आगे 'अष्टमस्कन्धमें' कहेंगे ॥ १७ ॥

बाणासुर महादेव का आराधन करके उनके गणों में मुख्य होगया। जिसके समीप में अबतक भी पुरपालक होकर भगवान् शंकर रहते हैं ॥ १८ ॥

और भी दिति के ऊनपञ्चासत ४९ मरुत नामक पुत्र हुए वे सबही अप्रज नाम बिना सन्तान के हुए और इन्द्रने उनको अपने भाई बना लिये ॥ १९ ॥

राजो वाच ॥

हे गुरो उन सबोंको, उनके स्वाभाविक असुरपने को दूर कर किस प्रकार? इन्द्रने अपने बराबर के किये, ऐसा उन्हों ने क्या पुण्य किया था। हे ब्रह्मन् हे भगवन् ! मेरे सहित ये सब ऋषि लोग इस वृत्तान्त के सुनने की श्रद्धा करते हैं तस्मात् आप कहने योग्य हैं ॥ २० ॥ २१ ॥

सूत उवाच ॥

हे शौनक ! सर्वज्ञ श्री शुकदेवजी राजा परीक्षित के सार्थक और थोड़े से मधुर वचन को सुनकर आनन्दित चित्त से श्लाघाकर बोले ॥ २२ ॥

श्री शुक उवाच ॥

इन्द्र के सहायक विष्णुने जब दिति के दोनों पुत्रों

क्रिमिविड्भस्मसंज्ञाऽऽसीद्यस्येशाभिहितस्य च ।
भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥ २५ ॥
आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः ।
मदशोषक इन्द्रस्य भूयाद्येन सुतो हि मे ॥ २६ ॥
इति भावेन सा भर्तुराचचाराऽसकृत्प्रियम् ।
शुश्रूषयाऽनुरागेण प्रश्रयेण दमेन च ॥ २७ ॥
भक्त्या परमया राजन् ! मनोज्ञैर्वल्गुभाषितैः ।
मनो जग्राह भावज्ञा सुस्मिताऽपाङ्गवीक्षणैः ॥ २८ ॥
एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया ।
बाढमित्याह विवशो न तच्चित्रं हि योषिति ॥ २९ ॥
विलोक्यैकान्तभूतानि भूतान्यादौ प्रजापतिः ।
स्त्रियं चक्रे स्वदेहार्द्धं यया पुंसां मतिर्हृता ॥ ३० ॥
एवं शुश्रूषितस्तात ! भगवान्कश्यपः स्त्रिया ।
प्रहस्य परमप्रीतो दितिमाहाभिनन्द्य च ॥ ३१ ॥

कश्यप उवाच ।

वरं वरय वामोरु ! प्रीतस्तेऽहमनिन्दिते ! ।
स्त्रिया भर्त्तरि सुप्रीते कः काम इह चागमः ॥ ३२ ॥

भाषा टीका ।

मारदिये तब शोक से दीप्त हुआ जो क्रोध तिससे जलती हुई दिति चिन्ता करने लगी ॥ २३ ॥

कि भाइयों के मारने वाला विधर्मी, स्वभाव से क्रूर कठिन हृदय, पापी इन्द्रको मरवाकर, कब सुख से सोउंगी ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, राजा स्वदेहरक्षार्थमन्येषां घातं करोत्येव किमत्र चित्रं ? तत्राह–क्रमीति । ईशः प्रभुरित्यभिहितस्यापि यस्य पूर्वेषां राज्ञां देहस्य मरणानन्तरं छिद्रविनावस्थितस्य क्रमय इति, श्वादिभिर्भक्षितस्य तु विष्ठेति, दग्धस्य भस्मेति संज्ञा आसीत्तत्कृते तस्य देहस्यार्थे यो भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद ? न वेदैव. तत्र हेतुः, यतो भूतद्रोहान्निरयो भवति ॥ २५ ॥

इदं देहादिकं ध्रुवं नित्यमाशासानस्य मन्यमानस्यात उन्नमुन्नद्धमुत्कृष्टं चेतो यस्य तस्येन्द्रस्य यो मदस्तस्य शोषकः पुत्रो मे येन भेतना भूयाद्भवेत् ॥ २६ ॥

भर्तुः प्रियाचरणमेवेति भावेन सा भर्तुः प्रियमसकृदाचचार ॥ २७ ॥ २८ ॥

विवशः स्त्रीपरतन्त्रस्सन् बाढं तव मनोरथं पूरयिष्यामीति यदाह तन्न चित्रम् ॥ २९ ॥

तत्र हेतुमाह–विलोक्येति । एकान्तभूतानि निःसङ्गानि मैथुनेन सृष्टिवृद्ध्यर्थं स्वदेहार्धमेव स्त्रियं चक्रे ॥ ३० ॥

एवं स्त्रिया शुश्रूषितः सन् ॥ ३१ ॥

इह चकारात्परत्र च आगमोऽप्राप्यः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, सर्वोऽपि लोकः स्वसुखाय परस्याहितमाचरति, किमनेनाक्रोशेन ? तत्राह–क्रमीति । ईशाभिहितस्य "ईश्वरोऽहमहं भोगी" इत्युक्तरीत्या स्वेनैवेशत्वेनाभिहितस्य ईशं मन्यमानस्यापि यस्य पुंसः मरणानन्तरं देहस्य दाहाभावे क्रमिरिति, तत्समये श्वादिभिर्भक्षितस्य विष्ठेति, दग्धस्य तु भस्मेति, संज्ञा आसीत् तत्कृते तादृशदेहसुखार्थं भूतध्रुक् भूतहिंसाकारी स किं स्वार्थं पुरुषार्थं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वेद न वेदेत्यर्थः । कुतः ? यतो भूतद्रोहाच्युतोऽस्तस्यां ततो निरयो नरक एव अतो भूतधुक् स्वार्थमपि न जानात्येवेति भावः ॥ २५ ॥

इदं शरीरमेवाशासानस्यमात्मानं मन्यमानस्य उत्सन्नमुच्छ्रुङ्खलं चेतो यस्य तस्येन्द्रस्य यो मदस्तस्य शोषकृत्पुत्रो मम केन कारणेन ध्रुवं नूनं भूयात् ॥ २६ ॥

हे राजन्, इत्थं भावेनाभिप्रायेण सा दितिर्भर्तुः कश्यपस्य शुश्रूषादिभिरसकृत्प्रियं हितम् आचचार आचरितवतीत्यर्थः तत्र शुश्रूषा सेवा परिचर्येति यावत् अनुरागः स्नेहः प्रश्रयो विनयः दमः इन्द्रियनिग्रहः ॥ २७ ॥

भावज्ञा दितिर्वल्गुभाषितैः मधुरालापैः सस्मितैः मन्दहाससहितैः अपाङ्गवीक्षणैः कश्यपस्य मनो जग्राह स्ववशीकृतवती बभूव ॥ २८ ॥

कथं जितेन्द्रियस्य तस्य विदुषः स्त्रीवश्यता ? तत्राह—एवमिति । विद्वानपि विदग्धया पुरुषवञ्चननैपुणययुक्तया स्त्रिया दित्या जडीभूतः मोहं प्रापितः अत एव विनम्रः परवशः बाढमित्याह सम्भोगार्थमङ्गीकृतवानित्यर्थः । योषिति स्वयङ्कामयमानायां स्त्रियां पुरुषस्य तद्बाढमितिवचो न चित्रं हीति लोकचरित्रप्रदर्शनम् ॥ २९ ॥

प्रजापतिः कश्यपः आदौ प्रथमं भूतानि स्त्रीपुंसरूपाणि भूतानि एकान्तभूतानि एकान्तरूपाणि । एकान्तान्येकदेश इवाविभागेन स्वस्थमानानि एकान्तभूतानि विलोक्य परस्परमेकशरीरत्वनिर्मिलितानि भवन्तीत्यालोच्येत्यर्थः स्वयमपि स्त्रियं स्वदेहस्यार्धम् अर्धाङ्गं मिथुनीभूतो बभूवेत्यर्थः एवं करणे हेतु यदत् सामान्यतः स्त्रियं निशिनष्टि—यया स्त्रिया पुंसां मतिर्हृता भवतीति लोकरीत्युक्तिः ॥ ३० ॥

भगवान् कश्यपः स्त्रिया दित्या एवं सम्भोगेन शुश्रूषितः परिचरितः अत एव नितरां प्रीतः अभिनन्द्य तस्याः सम्भोगकौशलमभिनन्द्य प्रहस्य दितिंप्रति इदं वक्ष्यमाणमाह ॥ ३१ ॥

तदेवाह—वरमिति । हे वामोरु ! हे अनिन्दिते ! वरमभीष्टं वरय कामयस्व भर्तरि स्त्रियाः नितरां प्रीते सति इह लोके चकारात्परत्र च लोके को वा ऽप्राप्यः कामः को वा ? न कोऽप्यस्तीत्यर्थः स्त्रिया ऽप्राप्य इति वान्वयः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नाशब्दोऽत्र शब्दार्थः इत्याभिहितस्य ईशोऽहं राजाहमित्यादिशब्दवाच्यस्यापि यस्य देहस्यान्ते मरणोत्तरकाले कृमिविड्भस्मसंज्ञा भवेच्चिरकालावस्थाने कृमि रेति संज्ञा, श्वादिभिर्भक्षिते विट्संज्ञा, वह्निदाहे भस्मसंज्ञा: तत्कृते तस्य देहस्यार्थे भूतध्रुक् सर्वप्राणिहिंसकः स्वार्थं स्वप्रयोजनं किं वेद ? न किमपि वेदेत्यन्वयः । यः स्वार्थं कुरुते स वेद किं ? ज्ञानवान् किं न भवतीत्यर्थ इति वा । कुत इति तत्राह—निरय इति । निर्गतम् अयमिष्टप्रदं दैवं यस्मात्

स तथा तादृशो भवतीति यतस्तस्माद्यतः स्वरूपाज्ञानाद्वा भूतद्रोहाद्वा ॥ २५ ॥

इदं जगत् ध्रुवमित्याशासानस्य वाञ्छतः उन्नतबुद्धेरिन्द्रस्य मदशोषणं येन सुतेन स्यात् स सुतो मे स्यात् ॥ २६ ॥

इतिभावेनाभिप्रायेण ॥ २७ ॥ २८ ॥ २९ ॥

जगदादौ प्रजापतिर्ब्रह्मा भूतान्येकान्तभूतानि परस्परस्नेहरहितानि केवलं मृत्युभूतानि विलोक्य मिथःस्नेहबन्धार्थं स्वशरीरार्धां स्त्रियं चक्रे ससर्जेत्यन्वयः ॥ ३० ॥ ३१ ॥

भर्तरि स्त्रीणामर्थे सुप्रीते सति किं कामः पुरुषार्थोऽगमः प्राप्तुमशक्य इत्यन्वयः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आशासानस्येति येन भवेत् तत्तु भर्तृप्रियाचरणमेवेति भावेनेत्यर्थः ॥ २६—४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ईशाभिहितस्य ईशो राजेत्यभिहितस्यापि देहस्य मरणानन्तरं क्रिमिविनावस्थितत्वे कृमय इति, श्वादिभिर्भक्षितत्वे विष्ठेति, पुत्रादिभिर्दग्धत्वे भस्मेति, संज्ञा आसीत् । पूर्वपूर्वनृपाणामपि तथा दृष्टत्वादिति भूतनिर्देशः तस्य देहस्य कृते यो भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद ? नैव वेद. यतः स्वस्यैव निरयो भवति तस्मादिन्द्र एव विवेकशून्य इति व्यञ्जयति. अथ च स्वयमेव विवेक शून्या. यत इन्द्रजिघांसुः स्वयमपीन्द्रमेव भूतद्रुहं स्वयमभक्तिरहृदयापीन्द्रमेवाभक्तिमहृदयं स्वयं स्वार्थानभिज्ञापि इन्द्रमेव स्वार्थानभिज्ञं मन्यत इत्यतो विवेकोऽप्यविवेकिनामविवेकमेव द्रढयतीति दर्शितम् ॥ २५ ॥

येनैव तेन दुर्बोधितेन हेतुनैव तस्य मदशोषकः सुतो मे भूयादिति प्रार्थनेत्यर्थः । तस्य कथम्भूतस्य इदं देहादिकं ध्रुवं नित्यं आशासानस्य मन्यमानस्य उच्छृङ्खलचेतसः भर्तरि तुष्यति स्त्रीणां मनोरथः सिध्यति । तस्मादहं परिचर्यया पतिं तोषयामीति भावेन ॥ २६ ॥ २८ ॥

बाढं तव मनोरथं पूरयिष्यामीति यदाह तन्न चित्रम् ॥ २९ ॥

एकान्तभूतानि निस्सङ्गानि मतिर्हृता अत एव संसारप्रवाहोऽविच्छिन्नोऽभूदिति भावः ॥ ३० ॥

अगमः अप्राप्यः ॥ ३१ ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, स्वदेहस्वार्थं राजाभ्यघातं करोत्येवेत्यत आह—कृमीति । पूर्वेषां राज्ञामीशाभिहितस्य इंद्यः समर्थः इत्येवं प्रोक्तस्यापि

पतिरेव हि नारीणां दैवतं परमं स्मृतम् ।
मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ॥ ३३ ॥
स एव देवतालिङ्गैर्नामरूपविकल्पितैः ।
इज्यते भगवान्पुम्भिः स्त्रीभिश्च पतिरूपधृक् ॥ ३४ ॥
तस्मात्पतिव्रता नार्यः श्रेयस्कामाः सुमध्यमे !
यजन्तेऽनन्यभावेन पतिमात्मानमीश्वरम् ॥ ३५ ॥
सोऽहं त्वयार्चितो भद्रे ! ईदृग्भावेन भक्तितः ।
तत्ते सम्पादये काममसतीनां सुदुर्लभम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

देहस्य मरणानन्तरं क्रिमिर्विद्मावस्थितस्य कृमय इति, श्वादिभिर्भक्षितस्य विडिति, दग्धस्य भस्मेति च, संज्ञा आसीत्. तत्कृते तदर्थे यो भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद ? नैव वेदेत्यर्थः । अपि तु यतो भूतद्रोहान्निरयो भवति ॥ २५ ॥

इदं देहादिकं ध्रुवं नित्यमाशासानस्य मन्यमानस्य उरुक्रमुच्छृङ्खलं चेतो यस्य तस्येन्द्रस्य मदशोषको गर्वघ्नो येनोपायेन मे मम सुतो भूयात्तदनुभजनं करिष्यामीति शेषः ॥ २६ ॥

इति भावेन इत्यभिप्रायेण सा भर्तुः शुश्रूषादिनाऽप्रकृत प्रियमाचचार ॥ २७ ॥

भावज्ञा अभिप्रायज्ञा ॥ २८ ॥

विदग्धयां भर्तुर्मनःप्रहणे निपुणाया एवं भजनेन विद्वानपि जडीकृतो मोहितः अत एव विवशः स्त्रीपरतन्त्रः बाढमित्याह, त्वत्कामं सम्पादये इति स्वीकृतवानित्यर्थः । तन्त्र्याचरितैः पुरुषविमोहनं योषिति चित्रमद्भुतं न भवति ॥ २९ ॥

एवंविधा स्त्री प्रजापतिनैव सृष्टेत्याह—विलोक्येति । प्रजापतिर्ब्रह्मा आदौ एकान्तभूतानि निःसङ्गानि विलोक्य स्वदेहार्द्धं स्त्रियं चक्रे यया पुंसां मतिर्हृता दारापत्यगृहादावभिनिविष्टा कृता ॥ ३० ॥

बाढमित्याहविवश इति यदुक्तं तत्प्रपञ्चयति—एवमित्यादिना । भगवान् बहुज्ञोऽपि स्त्रिया एवं कपटेन शुश्रूषितः सन् प्रहस्य परमप्रीतः दितिमभिनन्द्याह ॥ ३१ ॥

हे वामोरु ! मनोहरोरु, हे अनिन्दिते ! वरं वरय भर्तरि प्रीते इह चात्परत्र च कः कामः मनोरथः अगमोऽप्राप्यः ॥ ३२ ॥

भाषाटीका ।

जिस शरीर की राजा संज्ञा है अन्त में वही कृमि विष्ठा और भस्म संज्ञा वाला होता है उस शरीर के लिये प्राणियों से द्रोह करने वाला पुरुष क्या अपने यथार्थ स्वार्थ को जानता है ? नहि, क्योंकि उससे नरक होता है ॥ २५ ॥

देहादि को नित्य मानने वाले, और स्वतंत्र चित्त वाले, उस इन्द्र के मद का नाशक पुत्र जिस प्रकार हो इस अभिप्राय से वह अदिति सेवा अनुराग नम्रता आदि से अपने पति श्री कश्यपजी का सदा प्रिय करने लगी ॥ २६ ॥ २७ ॥

हे राजन् ! कश्यप के अभिप्राय को जानने वाली दिति ने परम भक्ति और मनोहर प्रिय वचन, तथा सहास कटाक्ष पूर्वक देखना, इन से पति के मनको वश करलिया ॥ २८ ॥

इस प्रकार विद्वान भी श्रीकश्यपजी चतुर स्त्री के जडकी तरह वश होकर उसकी प्रार्थना को स्वीकार करते हुये । यह स्वीकार करना स्त्री के वश होकर कुछ आश्चर्य नहीं ॥ २९ ॥

क्योंकि सृष्टि के पूर्व में ब्रह्माने लोगों को संसार से विमुख देखकर अपने देह के अर्द्ध भाग को स्त्री करदिया जिससे पुरुषों की मति हरण हुई ॥ ३० ॥

हे तात (प्रिय) श्री भगवान् कश्यपजी ऐसे दिति की शुश्रूषा से परम प्रसन्न हुए । और हँसकर दिति की स्तुति करके बोले ॥ ३१ ॥

कश्यप उवाच ॥

हे अनिन्दिते ! (निन्दा के अयोग्य) हे वामोरु ! (सुन्दर ऊरु वाली) हम तुम पर प्रसन्न हुये तुम वर मांगो क्योंकि स्वामी के प्रसन्न होने पर ऐसा कौन मनोरथ है कि जो सिद्ध न हो ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, परमेश्वरे सुप्रीते सर्वकामप्राप्तिरिति प्रसिद्धं तत्राह—पतिरेवेति । ननु, मनसि स्थितः श्रीवासुदेव एव लक्ष्मीपतिः परं दैवतमिति प्रसिद्धं सत्यं स एव अधिकारेण रूपभेदैः पूज्यत इत्याह—मानस इति सार्द्धेन ॥ ३३ ॥

दितिरुवाच ।

वरदो यदि मे ब्रह्मन् ! पुत्रमिन्द्रहणं वृणे ।
अमृत्युं मृतपुत्राहं येन मे घातितौ सुतौ ॥ ३७ ॥
निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत ।
अहो अधर्मः सुमहानद्य मे समुपस्थितः ॥ ३८ ॥
अहो अर्थेन्द्रियारामो योषिन्मय्येह मायया ।
गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवम् ॥ ३९ ॥
कोऽतिक्रमोऽनुवर्तन्त्याः स्वभावमिह योषितः ।
धिङ्मां बताबुधं स्वार्थे यदहन्त्वजितेन्द्रियः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

देवतालिङ्गैर्मूर्तिभिरुपलक्षितः तान्येवाह—नाम इन्द्रादि, रूपं वज्रहस्तत्वादि, ताभ्यां विविधकल्पितैः ॥ ३४—३६ ॥

इन्द्रहणं इन्द्रहन्तारम् अमृत्युं मृत्युशून्यं येनेन्द्रेण विष्णुना सहायेन घातितौ ॥ ३७—३९ ॥

स्वभावमनुवर्तमानाया योषितः कोऽतिक्रमोऽपराधः ॥४०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, कर्मवश्ये ऽनीश्वरे भर्तरि प्रीते सति कथं सर्वत्र सर्वकामसौलभ्यम् ? तत्राह-पतिरिति । नारीणां पतिरेव हि सर्वोत्कृष्टं दैवतम् अतः परमदैवप्रीणनेन सर्वकामसौलभ्यमितिभावः। ननु, "तं देवतानां परमञ्च दैवतम्" इति श्रुत्युक्तरीत्या श्रियःपतिर्हि परमं दैवतं, न भर्ता, तत्राह-मानस इति, यः सर्वभूतानां मानसः मनसःसाक्षी वासुदेवः सर्वान्तरात्मा श्रियः पतिः ॥ ३३ ॥

स एव भगवान्नामरूपाभ्यां विकल्पितैः विभिन्नैर्देवतालिङ्गैः अग्नीन्द्रादिदेवतारूपैः शरीरैरिज्यते इदं दृष्टान्तार्थं "तदेवाग्निस्तद्वायुस्तत्सूर्यः" इत्यादिश्रुत्युक्तरीत्या पुंभिर्यष्टृभिरग्न्यादिशरीरैरात्मभूतैर्यथा तदन्तरात्मा भगवानिज्यते यागादिभिराराध्यते तथा स्त्रीभिरपि पतिरूपधृक् पतिशरीरकः परमात्मैव नानोपचारैरुपास्यत इत्यर्थः भगवति तुष्टे सति सर्वे कामाः सुलभाः इति भावः ॥ ३४ ॥

यत एवं तस्मात् हे सुमध्यमे ! अपरकामाः पतिव्रता नार्यः अनन्यभावेन अनन्याहंशेषत्वेन ईश्वरात्मकं पतिमेवाराधयन्ति॥३५॥

हे भद्रे ! यतोऽहमीदृशभावेन अनन्यभावेन भक्तितश्च त्वया अर्चितः ततस्तस्मात् तव काममिष्टं सम्पादये सिद्धवत्करोमि कथंभूतमसतीनामपतिव्रतानां सुतरां दुर्लभं लब्धुमशक्यम् ॥ ३६ ॥

एवं वराय चोदिता दितिराह—वरद इति । हे ब्रह्मन् ! मम यदि त्वं वरदः वरं दद्यास्तर्ह्यमर्त्यैर्देवैः हतौ पुत्रौ यस्याः सा अहम् इन्द्रस्य हन्तारं पुत्रं वृणे येनेन्द्रेण प्रयोजकेन भगवता प्रयोज्यकर्त्रा मे सुतौ हिरण्याक्षहिरण्यकशिपू घातितौ मारितौ ॥ ३७ ॥

एवं तस्याः दितेः वचो निशम्य विप्रः कश्यपः विमनाः खिन्नः पर्यतप्यत परितापञ्चकार, तमेव परितापप्रकारमाह—अहो इति अद्य महानधर्मो मम प्राप्तः अहो इति खेदे ॥ ३८ ॥

अहो अस्मादधर्मादहं नरके ध्रुवं नूनं पतिष्ये कथम्भूत इन्द्रियारामः अत एव योषिद्रूपया भगवन्मायया गृहीतं चेतः यस्य स अत एव कृपणः दीनः ॥ ३९ ॥

स्वभावं स्त्रीस्वभावमनुवर्तमानायाः योषितः कोऽतिक्रमः न कश्चिद्दोषः, अपि तु मामेव स्वार्थमप्यजानन्तं धिक् अहमेव स्वमप्यजानन्निन्द्य इत्यर्थः । कुतः ? यद्यस्मादहं लालितानीन्द्रियाणि येन तादृशः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु "तदेतत्प्रेत्य" इति श्रुतेरविगानेन सर्वजनस्य परमेष्टदेवः श्रीधर इति, यतः कथं पतिरेव नारीणामिष्टदेवतेति विशेष्यते ? इति तत्राह—मानस इति । वासुदेवः मानसः सर्वभूतमानसो मनसि स्थितस्सन् मनसा पूज्यः, को वासुदेवः ? तत्राह-श्रिय इति ॥ ३३ ॥

एतदेव विशदयति—स इति । वासुदेव एव नामरूपविविधत्वेन कल्पितैर्देवतालिङ्गैः देवताविग्रहैः विशेषतः सर्वात्मत्वेन स्त्रीभिः पुम्भिश्चेज्यते तत्र स्त्रीभिः पतिसहितत्वेन तदर्थं पतिरूपधृगिति, पुरुषैस्तु देवतालिङ्गनामरूपत्वेनेति, यक्ष्यमाणो विग्रहश्चोच्यते ॥ ३४ ॥

यस्मात्पतावाहित ईशस्तस्मात्पतिपूजनेन भगवानेवेज्यादित्युपसंहरति-तस्मादिति । पतिं पतिरूपम् ॥ ३५ ॥

शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतम् ।
हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम् ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ईदृग्भावेन पतिस्थितः परमात्मा मह्यं प्रसीदत्विति बुद्ध्या ॥ ३६ ॥

अमृत्युममरम् ॥ ३७ ॥ ३८ ॥ ३९ ॥

स्वभावं गुणवैषम्यभावमनुवर्तमानाया अतिक्रमोऽन्यायः स्वभावं सौशील्यमनुवर्तन्त्या इति वा ॥ ४० ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पतिः खल्वत्र जीव एव स कथं परं दैवतमीश्वरः स्यात्तत्राह—मानसः मनसश्चित्तस्याधिष्ठाता यो वासुदेवः स एव भगवान् दैवतानां लिङ्गैश्चिह्नैरिज्यते कीदृशैर्नाम इन्द्रादि, रूपं वज्रहस्तत्वादि, ताभ्यां विविधं कल्पितैः इन्द्राय स्वाहा अग्नये स्वाहा इत्यादिभिर्नामरूपभेदेन पुम्भिः कर्मिलोकैर्भगवानेव इज्यते यथा, तथा स्त्रीभिः पतिरूपेणेत्यर्थः ॥ ३४–३६ ॥

इन्द्रहणं इन्द्रहन्तारं हन्तेर्गत्यर्थत्वात् पक्षे इन्द्रानुगम् अमृत्युं सर्वैरवध्यं पक्षे देवत्वादमरम्. ऊनपञ्चाशन्मरुत्सु एक एव देवो मारुत इत्येकवचनम्. विमना इति दितेरीप्सितोऽर्थस्तु इन्द्रमरणं विना न सम्भवेदिति भावः ॥ ३७—३९ ॥

अतिक्रमोऽपराधः क्रौर्यं हि स्त्रीजातेः स्वभाव एव तमनुवर्तन्त्याः अनुवर्तमानायाः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, जीवे पत्यादिरूपे प्रीते कुतो मनोरथसिद्धिरित्यत आह—वासुदेवः प्रियःपतिः स्त्रीणां पतिरेव वासुदेवरूपतया सेवितः पतिर्मनोरथप्रदो भवतीत्यर्थः । किञ्च सर्वभूतानां मानसो हृदयान्तःस्थः परमं दैवतं स्मृतम् "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति" इति स्मृत्या वर्णितं तद्रूपतया पूजितानि सर्वाणि भूतान्यपि मनोरथप्रदानि भवन्ति न पतिरेवेत्यर्थः ॥ ३३ ॥

अत एव पुम्भिर्वैदिकैः स एव वासुदेवः सर्वहृत्प्रविष्टः देवतालिङ्गैः इन्द्रादिदेवमूर्तिभिरधिष्ठानभूतैर्निमित्तैः नाम्नेन्द्रादिना रूपेण वज्रहस्तत्वादिना विकल्पितैर्विशेषतया समर्पितैः इज्यते तथा स्त्रीभिश्च पतिरूपधृक् पतिरूपेण धृष्णोति अनन्यभक्त्येति भजन्ते इति पतिरूपधृक् ॥ ३४ ॥

यस्मादेवं तस्मात् पतिव्रताः ईश्वरं सर्वनियन्तारम् आत्मानं सर्वान्तर्यामिनं वासुदेवं पतिं पत्याभिन्नं भजन्ते ॥ ३५ ॥

कामं वाञ्छितार्थम् ॥ ३६ ॥

यदि वरदस्तर्हि इन्द्रहन्तारं पुत्रं वृणे ॥ ३७ ॥ ३८ ॥

अथेदानीमिन्द्रियारामोऽहं ध्रुवं निश्चितं नरके पतिष्ये यतः योषिन्मय्या मायया गृहीतं चेतो यस्य सः अपुत्रनाशो तथा प्रवर्तिताः इति यावत् ॥ ३९ ॥

स्वभावमनुवर्तिन्याः योषितः अतिक्रमः अपराधः कः ? न कोऽपि, यतोऽहमविजितेन्द्रियः अतः स्वार्थेऽबुधं मां धिक् ॥४०॥

भाषा टीका ।

पति ही स्त्रियों का परम दैवत प्रसिद्ध है सम्पूर्ण प्राणियों के हृदय में रहने वाले भी पति वासुदेव ही परम देवत प्रसिद्ध है ॥ वही वासुदेव भगवान् नाना प्रकार के नाम रूपादि से विकल्पित अनेक देवादि मूर्तियों से उपलक्षित होकर पुरुषों से पूजित होते हैं. और स्त्रियों से पति स्वरूप पूजित होते हैं ॥ ३३ ॥ ३४ ॥

हे सुमध्यमे ! इसीसे कल्याण की इच्छा वाली पतिव्रता स्त्रियें अनन्य भावसे पति रूप परमात्मा का पूजन करती है ॥३५॥

हे भद्रे ! ऐसी भक्ति से जो तुमने हमारा पूजन किया इसी से असति स्त्रियों को दुर्लभ भी तुमारे मनोरथ को हम पूरा करेंगे ॥ ३६ ॥

दितिरुवाच ॥

हे ब्रह्मन् ! आप यदि मुझे वर देने को प्रसन्न हो और जिस इन्द्र ने विष्णु के द्वारा मेरे पुत्रों को मरवाया है उस इन्द्र के मारने वाले और मृत्यु रहित पुत्र को आप से मह पुत्र वाली मैं मांगती हूं ॥ ३७ ॥

कश्यपजी भी दिति का वचन सुनकर बड़े उदास होकर ताप को प्राप्त हुये। और बोले कि अहो आज मुझे बड़ा आश्चर्य प्राप्त हुआ ॥ ३८ ॥

अहो इन्द्रियारामी दीन मैं स्त्रीमयी माया के वश होकर अब निश्चय नरक में पहुंचा ॥ ३९ ॥

अपने स्वभाव में चलने वाली स्त्री का यह क्या दोष है क्योंकि मैंही अजितेन्द्रिय हूं अपने स्वार्थ न जानने वाला ऐसे मुझको धिक्कार है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वभावमेवाह—द्वाभ्याम् । शरत्पद्मस्येवोत्सवो विकासो यस्मिन् श्रवणे भृती तयोरमृतं क्षुरधारोपमाशयम् ॥ ४१ ॥

न हि कश्चित्प्रियः स्त्रीणामञ्जसा स्वाशिषात्मनाम् ।
पतिं पुत्रं भ्रातरं वा घ्नन्त्यर्थे घातयन्ति च ॥ ४२ ॥
प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् ।
वधं नार्हति चेन्द्रोऽपि तत्रेदमुपकल्पते ॥ ४३ ॥
इति सञ्चिन्त्य भगवान्मारीचः कुरुनन्दन ! ।
उवाच किञ्चित्कुपित आत्मानं च विगर्हयन् ॥ ४४ ॥

कश्यप उवाच ।

पुत्रस्ते भविता भद्रे ! इन्द्रहा देवबान्धवः ।
संवत्सरं व्रतमिदं यद्यञ्जो धारयिष्यसि ॥ ४५ ॥

दितिरुवाच ।

धारयिष्ये व्रतं ब्रह्मन् ! ब्रूहि कार्याणि यानि मे ।
यानि चेह निषिद्धानि न व्रतं घ्नन्ति यानि तु ॥ ४६ ॥

कश्यप उवाच ।

न हिंस्याद्भूतजातानि न शपेन्नानृतं वदेत् ।
न छिन्द्यान्नखरोमाणि न स्पृशेद्यदमङ्गलम् ॥ ४७ ॥
नाप्सु स्नायान्न कुप्येत न संभाषेत दुर्जनैः ।
न वसीताधौतवासः स्रजं च विधृतां क्वचित् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वाशिषात्मनां स्वार्थकामनयात्मवत्प्रेष्ठत्वेन प्रतीयमानानाम् ॥४२॥

तत्रेदमुपकल्पते योग्यं भवति. अयं भावः । वैष्णवं व्रतं तावदुपदेक्ष्यामि तेनैवास्याः शुद्धचित्तायाः इन्द्रं प्रति क्रोधो निवर्तिष्यते पुत्रस्त्वमर्त्यो भविष्यति दीर्घकालत्वं च व्रतस्य कथंचिद्वैगुण्ये सतीन्द्रस्य वधोऽपि न भविष्यतीति ॥ ४३ ॥ ४४ ॥

हे भद्रे ! अञ्जः यथावद्यदि धारयिष्यसि तर्हीन्द्रहा भविष्यति! वैगुण्ये तु देवबान्धवो भविष्यति वैष्णवत्वाद्व्रतस्य कथंचिद्वैगुण्येऽपि सति सर्वथा नैष्फल्याभावात् ॥ ४५ ॥

कार्याण्यवश्यकानि व्रतं यानि न घ्नन्ति अवश्यकानि न च निषिद्धानि किन्त्वप्यनुज्ञातानि तानि सर्वाण्यपि ब्रूहि ॥ ४६ ॥

तत्रैकादशनिषेधानाह—न हिंस्यादिति पञ्चभिः । न शपेन्नाक्रोशेत् यदमङ्गलं कपालास्थ्यादिकं तच्च स्पृशेत् ॥ ४७ ॥

नाप्सु प्रविश्य स्नायात् पूर्वविधृतां स्रजं पुनर्न धारयेत् ॥४८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्त्रीणां स्वभावं प्रकाशयन्परितप्यते—शरदिति । अहो स्त्रीणां वक्त्रं मुखं शरच्चन्द्रतुल्यं तथा वचश्च श्रवणयोः कर्णयोरमृततुल्यं हृदयं तु क्षुरस्य धारासदृशम्. अतस्तासां चेष्टितं को वेद ? न कोपीत्यर्थः ॥ ४१ ॥

न हि स्त्रीणां अञ्जसा सम्यक्कश्चिदपि पुमान् प्रियोऽस्ति. तत्र हेतुः, स्वाशिषात्मनां स्वाशिषि स्वापेक्षित एवार्थे आत्मा चित्तं यासां तासां स्वाशिषात्मत्वादिति भावः, अत एवार्थे स्वापेक्षितार्थनिमित्तं पतिं पुत्रं भ्रातरं वा घ्नन्ति मारयन्ति ॥ ४२ ॥

इदं महत्सङ्कटमित्याह—ददामीति । यत्प्रतिश्रुतं प्रतिज्ञारूपं मम वचः न मृषा भवेत् मिथ्या भवितुं नार्हति वचनमनृतत्वभयेन दास्यामि चेदिन्द्रो हन्येत इन्द्रोऽपि वधमपि नार्हति अत इदं महत्सङ्कटमिति भावः । तत्रैतस्मिन् सङ्कटे इदं वक्ष्यमाणम् एतत्सङ्कटनिवृत्तये उपकल्पते योग्यं भवति ॥ ४३ ॥

हे कुरुनन्दन ! भगवान्मारीचः कश्यपः इति सञ्चिन्त्य किञ्चित्कुपितः मनसैवात्मानं गर्हयन्नुवाच ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह—पुत्र इति । हे भद्रे ! इदं मयोच्यमानं व्रतमङ्गःसम्यक् संवत्सरपर्यन्तं यदि त्वं धारयिष्यसि करिष्यसि तर्हीन्द्रस्य हन्ता पुत्रस्तव भविष्यति नोचेद्देवानां बान्धवो भविष्यतीति ॥ ४५ ॥

तद्वचः श्रुत्वाह दितिः—धारयिष्य इति । हे ब्रह्मन् ! व्रतमहं धारयिष्ये मे कार्याणि मया कर्तव्यानि यानि प्रवृत्तिनिवृत्तिरूपाणि यानि च कर्माणि व्रतं न घ्नन्ति न मारयन्ति वृनघ्नानि न भवन्ति वृतघ्नानि निवृत्ति रूपाणि च कार्याणि मे ब्रूहि ॥ ४६ ॥

एवमुक्तस्तावद्वृताकृतांनिवृत्तिरूपान् नियमानाह कश्यपः—नेति । भूतजातानि प्राणिसमूहान्नाहिंस्यात् न हन्यात् कञ्चन न शपेत् नाक्रोशेत् तथा अनृतमसत्यं न वदेत् वदमङ्गलं केश-कपालास्थितुषभस्मादि, तन्न स्पृशेत् ॥ ४७ ॥

अप्सु जलेषु प्रविश्य न स्नायात् कस्मैचिदपि न कुप्येत् दुर्जनैर्न सम्भाषेत. अधौतमक्षालितं वासः वस्त्रं न वसीत नाच्छादयेत् न विभृयाच्च पूर्वं विधृतां त्यक्तां स्रजं च न पुनर्धा-रयेत् ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वार्थे आशीष्षु आत्मा यासां तास्तथा तासां स्वाशिषमि-च्छन्तीनामित्यर्थः ॥ ४२ ॥ ४३ ॥ ४४ ॥

देवानां बन्धुभूतः ॥ ४५ ॥ ४६ ॥ ४७ ॥

अधौतवासः अनिर्णिक्तवस्त्रं न वसीत नाच्छादयेत् विधृता-मन्योपभुक्ताम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुत्रस्त इति । यदि व्रतं धारयिष्यसि तदा इन्द्रहा तथैव देवानामसुराणाञ्च बान्धवो भविता । अन्यथातु इन्द्रहा न भविता देवानामेव बान्धवश्च भवितेत्यर्थः ॥ ४५—५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्वभावमेवाह—शरदिति ॥ ४१ ॥

स्वस्य आशिषा काममयैव आत्मा यस्मो यासां न तु पत्यादि-सुखापेक्षयेति भावः । अलुक्समास आशिषा शब्दश्चावन्तो वा ॥ ४२ ॥

..तत्रैवमुपकल्पते योग्यं भवति. अयं भावः, वैष्णवं व्रतं तावदुपदेक्ष्यामि तेनैवास्याश्चित्तशुद्धौ सत्यामिन्द्रे क्रोधो निव-र्तिष्यते ततश्चेन्द्रवधमनाकाङ्क्षन्त्यानया विहितस्य वैष्णवव्रतस्य [illegible]भिमतफलदानानर्हत्वाचेन्द्रघाती भविष्यति किन्तु नरप्रार्थन-[illegible]नवाक्ययोर्हन्तिधातुप्रयोगाद्धन्तेश्च गत्यर्थत्वादिन्द्रानुगोऽमरः प्रविष्यामि [illegible] वैगुण्यं च किञ्चिद्भविष्यतीति तेनैवास्या अविज्ञायाः मनःसमाधानञ्च भविष्यति. वस्तुतस्तु वैष्णवव्रतस्य वैगुण्येऽपि फलसिद्धिर-वश्यं भाविनीत्यस्याः श्रमश्च सफल एव भविष्यतीति ॥४३-४४॥

इन्द्रहा इन्द्रघाती अदेवानामसुराणां बान्धव इति दितिबोधयि-तुमिष्टोऽर्थः । इन्द्रहा इन्द्रानुगो देवानां बान्धव इति स्वाभीष्टोऽर्थः ४५—४६ ॥

न हिंस्यादिति प्रथमत एवेन्द्रवधाशङ्का निषिद्धा ॥ ४७ ॥

अप्सु प्रविश्य न स्नायात्. अधौतं वासः न वसीत न परिदध्यात्. विधृतां पूर्वधृतां स्रजं पुनर्न धारयेत् ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

योषित्स्वभावं वर्णयति—शरदिति द्वाभ्याम् । यासां वक्त्रं शार-त्पद्मादिवोत्सवो दर्शनीलुत्सो यस्मात्तत् वचः श्रवणयोः कर्णं-योरमृतममृततुल्यम् क्षुरधाराया आभा उपमा यस्य तद्धृदयञ्च, तासां स्त्रीणां चेष्टितं को वेद ? न कोपि. यद्वा को ब्रह्मैव तासां कर्तां वेद नान्य इत्यर्थः ॥ ४१ ॥

स्वकीये आशिषि सुखे आत्मा मनो यासां तासाम् अञ्जसा शुद्धभावेन कश्चिदप्रियो न अर्थे स्वार्थसिद्ध्यर्थे पत्यादीन् घ्नन्ति घातयन्ति च ॥ ४२ ॥

वदामीति यत्प्रतिश्रुतं प्रतिज्ञावाक्यरूपं वचस्तत्त मृषा भवेत् इन्द्रोपि न वधमर्हति तत्र कार्यद्वयसिद्धौ इदमुपदिश्यमानं वैष्णवव्रतमुपकल्पते योग्यं भवति. अयंभावः, उपदिश्यमानवै-ष्णवव्रतप्रभावादस्याः एकस्य तु का कथा बहवः पुत्रा भ-विष्यन्ति बन्धुश्च परकीयो भवति इन्द्रस्तु परकीयभावं हित्वा अस्या दासस्तथा गर्भे प्रविश्य पुत्रश्च भविष्यति अयमेव पर-कीयभावत्यागलक्षणम् इन्द्रस्य वधो भविष्यति न तु दैहिकवध इति ॥ ४३ ॥ ४४ ॥

हे भद्रे कल्याणि ! यदीदं व्रतं सांवत्सरमङ्गः यथोपदिष्टं धारयिष्यसि तदा इन्द्रहा भविता भविष्यति वैगुण्ये तु देव-बान्धव इन्द्राविरोधी भविष्यति व्रतस्य वैष्णवत्वात् सर्वेषां सुखं भविष्यतीति भावः ॥ ४५ ॥

हे ब्रह्मन्, व्रतं धारयिष्यं यानि प्राधान्येन देवत्वेन न घ्नन्ति. तान्येव विभज्याह, यानि कार्याणि यानि च इह व्रते निषिद्धानि तानि मे मह्यं ब्रूहि कथय ॥ ४६ ॥

तत्र पञ्चभिर्निषिद्धानि वर्णयति—नेति । यदमङ्गलमपवित्रं तन्न स्पृशेत् ॥ ४७ ॥

अप्सु प्रविश्य न स्नायात् स्रजं पुष्पमालां विधृतां पुनर्न धारयेत् ॥ ४८ ॥

भाषाटीका ।

शरत्काल के कमल सदृश जिनका मुख और कानों में अमृत

नोच्छिष्टं चण्डिकान्नं च सामिषं वृषलाहृतम् ।
भुञ्जीतोदक्यया दृष्टं पिबेदञ्जलिना त्वपः ॥ ४९ ॥
नोच्छिष्टाऽस्पृष्टसलिला सन्ध्यायां मुक्तमूर्धजा ।
अनर्चिताऽसंयतवाङ्गासंवीता बहिश्चरेत् ॥ ५० ॥
नाधौतपादा प्रयता नार्द्रपान्नो उदक्शिराः ।
शयीत नापराङ्नान्यैर्न नग्ना न च सन्ध्ययोः ॥ ५१ ॥
धौतवासा शुचिर्नित्यं सर्वमङ्गलसंयुता ।
पूजयेत्प्रातराशात्प्राग्गोविप्रांच्छ्रियमच्युतम् ॥ ५२ ॥
स्त्रियो [1] वीरवतीश्चार्चेत्स्रग्गन्धबलिमण्डनैः ।
पतिं चार्च्योपतिष्ठेत ध्यायेत्कोष्ठगतं च तम् ॥ ५३ ॥
सांवत्सरं पुंसवनं व्रतमेतदविप्लुतम् ।
धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ॥ ५४ ॥
बाढमित्यभिप्रेत्याथ दिती राजन्महामनाः ।
काश्यपं गर्भमाधत्त व्रतं चाञ्जो दधार सा ॥ ५५ ॥
मातृष्वसुरभिप्रायमिन्द्र आज्ञाय मानद ! ।
शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः ॥ ५६ ॥

भाषा टीका ।

मधुर जिनके वचन है और हृदय जिनका छुरा की धार सदृश है ऐसी स्त्रियों के चेष्टित को जान सका है ॥ ४१ ॥

अपने स्वार्थ के लिये आत्मा के सदृश प्रिय मालूम होने वाली स्त्रियों का कोई प्रिय नहीं। क्योंकि वे अपने प्रयोजन के लिये पति पुत्र वा भ्राता को आप मारडालें और अन्य से मरवाडालें ॥ ४२ ॥

जो हम कहचुके कि वर देंगे यह वाक्य भी मिथ्या नहो। और इन्द्र भी न माराजाय यहां यही योग्य है ॥ ४३ ॥

हे कुरुनन्दन ! मरीचिपुत्र भगवान् कश्यपजी ने ऐसे विचार कर अपने को भी निन्दित समुझते हुये किंचित् कुपित होकर बोले ॥ ४४ ॥

कश्यप उवाच ।

हे भद्रे ! तेरे इन्द्र के मारने वाला और देवताओं का बन्धु ऐसा पुत्रहोगा। यदि व्रत को एक वर्ष तक ठीक धारण करेगी तो ॥ ४५ ॥

दितिरुवाच ।

हे ब्रह्मन् ! मैं व्रत धारण करूंगी आप कहिये जो २ व्रत में कार्य है और जो इस व्रत में निषिद्ध है और जिनसे व्रत खण्डित होता हो सो भी कहिये ॥ ४६ ॥

कश्यप उवाच ।

प्राणिमात्र की हिंसा न करे न आक्रोश करे न झूठ बोले नख और रोम का छेदन न करे और अमङ्गल वस्तु का स्पर्श न करे ॥ ४७ ॥

जल में घुसकर स्नान न करे न कोप करे तथा दुर्जन के साथ भाषण न करे और बिना धोये वस्त्र को न धारण करे तथा धारण की हुई माला को फिर न धारण करे ॥ ४८

श्रीधरस्वामिकृतभावार्थदीपिका ।

भोजने पञ्च निषेधानाह—नोच्छिष्टमिति । चण्डिकान्नं भा कालये निवेदितं पिपीलिकादिदूषितं वा अञ्जलिना त्वपो पिबेत् ॥ ४९ ॥

गृहाद्बहिर्निर्गमे सप्त निषेधानाह—नोच्छिष्टेति । अनर्चिता मण्डनहीना असंवीताऽप्रावृता ॥ ५० ॥

शयने अष्टौ निषेधानाह—नाधौतपादेति । नापराक्पश्चिमशिराः ॥ ५१ ॥

---

(१) वरवतीरिति पाठान्तरम् । विज०

श्रीधरस्वामिकृतभावार्थदीपिका ।

कार्याण्याह—धौतवासा इति द्वाभ्याम् । प्रातराशात्प्रथमभोजनात् ॥ ५२ ॥

वीरवतीर्जीवद्भर्तृकाः भाव्यं सम्पूज्य कोष्ठगतं कुक्ष्यन्तरगतम् ॥ ५३ ॥

पुंसवनं पुत्रोत्पत्तिकरं तुभ्यं तव ॥ ५४—५७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भोजने पञ्च निषिद्धान्याह—उच्छिष्टं चण्डिकान्नं भद्रकाल्यै निवेदितं सामिषं पिपीलिकादिदूषितं वृषलाहृतं शूद्रानीतं उदक्यया रजस्वलया दृष्टञ्चान्नं न भुञ्जीत अञ्जलिना अपः जलं न पिबेत् ॥ ४९ ॥

उच्छिष्टा चेत् अस्पृष्टसलिला न भवेत् किन्तु जलं स्पृशेदित्यर्थः सन्ध्ययोः सायंप्रातः मुक्ताः मूर्द्धजाः केशाः यया तादृशी तथा अनर्चिता अनलङ्कृता च न भवेत् न संयता वाक् यया सा न भवेत् असंवीता अप्रावृता बहिर्न चरेत् ॥ ५० ॥

अधौता पादौ यया सा अप्रयता असमाहितचित्ता न शयीत तथा आर्द्रौ पादौ यस्याः उदक् उत्तरदिशि शिरो यस्याः अपरा पश्चिमशिराश्च न शयीत तथाऽन्यैस्सह नग्ना विवसना च तथा सन्ध्ययोरपि न शयीत ॥ ५१ ॥

धौतं वासो यस्याः सा नित्यं सदा शुचिः सर्वैर्मङ्गलैर्हरिद्राचन्दनादिभिर्मङ्गलद्रव्यैः संयुता, प्रातराशात् प्रातर्भोजनात्प्रागेव गाः विप्रान् श्रियं महालक्ष्मीमच्युतञ्च पूजयेत् ॥ ५२ ॥

तथा वीरवतीः पुत्रवतीः जीवद्भर्तृकाः नारीश्च स्रगादिभिरर्चयेत्, बलिरुपायनं मण्डनमलङ्कारः तथा पतिञ्चार्च्य संपूज्य उपसमीपे तिष्ठन्तं तं पतिं कोष्ठगतं ध्यायेत् स्वपतिमेव स्वोदरगतं ध्यायेत् ॥ ५३ ॥

एतद्व्रतकलापेन युक्तं पुंसवनाख्यम् इदं सांवत्सरं संवत्सरपर्यन्तं कार्यं व्रतम् अविप्लुतमविकलं यथा तथा धारयिष्यसि चेदिन्द्रस्य हन्ता पुत्रस्तव भविष्यति ॥ ५४ ॥

इत्येवमुक्ता दितिः, हे राजन् ! बाढमित्यङ्गीकृत्य अथ महामनाः उत्कृष्टमतासक्तमनाः सती कश्यपाद्गर्भमाधत्त दधार तथा अञ्जः सम्यग्व्रतञ्च दधार ॥ ५५ ॥

तत इन्द्रः कविः विद्वान् अत एव मातृभगिन्याः दितेः अभिप्रायं ज्ञात्वा, हे मानद ! आश्रमस्थां व्रतस्थां कश्यपस्याश्रमस्थां वा दितिं शुश्रूषणेन पर्यचरत् ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चण्डिकान्नं सप्तमातृभ्योऽर्पितमन्नं पिपीलिकामूषिकाभोज्यं [illegible] रजस्वलया ॥ ४९ ॥

अनर्चिता अलङ्कारैरहिता असंवीता प्रावरणविरहिता अपराक् पश्चिमशिरा न शयीत ॥ ५१ ॥

प्रातराशात् प्रातःकालभोजनात्पूर्वम् ॥ ५२ ॥

वरवतीः भर्तृसहिताः पतिमभ्यर्च्योपतिष्ठेत [illegible] तिष्ठितं परमात्मानं कोष्ठगतं हृदिगतं ध्यायेत [illegible] वा नाम्ना पुंसवनं ॥ ५३ ॥ ५४ ॥ ५५ ॥

मातृष्वसुः मातुरदित्याः स्वसुर्दित्याः ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अपरां पश्चिमदिशमञ्चति शिरसा प्राप्नोति अपरा तादृशी यथा स्यात्तथेति क्रियाविशेषणमपि [illegible] तत्र [illegible] पश्चिमशिरा इत्येवार्थः [illegible] ततो 'उप [illegible] प्रत्ययः तस्य चाञ्चतेर्लुगिति लुक् [illegible] प्रत्ययस्य लुक् ततो अपराञ्चमिति स्थितं प्रतीचीम [illegible] पूर्वाङ्गसातकल्पेति तथैवार्थः ५१—६२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भोजने पञ्च निषेधानाह—नोच्छिष्टमिति । चण्डिकान्नं भूतानयदिते पिपीलिकास्पृष्टञ्च "चण्डिका स्यात् पिपीलिका" इत्यभिधानात् । उदक्यया रजस्वलया ॥ ४९ ॥

गृहाद्बहिर्निर्गमे सप्त निषेधानाह—नोच्छिष्टेति । अस्पृष्टसलिला अनाचान्ता अनर्चिता निर्भूषणा असंवीता अप्रावृतसर्वाङ्गा ॥ ५० ॥

शयने अष्टौ निषेधानाह—नाधौतपादेति । अप्रयता अपवित्रा "पवित्रः प्रयतः पूतः" इत्यमरः । न अपराक् पश्चिमशिराः ॥ ५१ ॥

कर्तव्यानाह—प्रातराशाद्भोजनात् प्राक् प्रातः पूजयेत् ॥ ५२ ॥

वीरवतीः जीवद्भर्तृकाः कोष्ठगतं कुक्ष्यन्तरगतम् ॥ ५३ ॥

पुंसवनं पुत्रोत्पत्तिकरम् ॥ ५४ ॥ ५५ ॥

मातृष्वसुर्दितेः ॥ ५६—५८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भोजने पञ्च निषेधानाह—नोच्छिष्टमिति । चण्डिकान्नं भद्रकाल्यै निवेदितम् "चण्डिका स्यात्पिपीलिका" इत्यभिधानात्, पिपीलिकादूषितञ्च सामिषं सूक्ष्मकृमिनिराकरणाभावेनाशोधितमित्यर्थः वृषलाहृतं शूद्रानीतम् उदक्यया रजस्वलया दृष्टं च न भुञ्जीत अञ्जलिना अपो न पिबेत् ॥ ४९ ॥

गृहान्निर्गमे सप्त निषेधानाह—नोच्छिष्टेति । उच्छिष्टा अकृता-

नित्यं वनात्सुमनसः फलमूलसमित्कुशान् ।
(१) पत्राङ्कुरमृदोऽपश्च कालेकाल उपाहरत् ॥ ५७ ॥
एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ! ।
प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥ ५८ ॥
नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ महीपते ! ।
चिन्तां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ॥ ५९ ॥
एकदा सा तु सन्ध्यायामुच्छिष्टा व्रतकर्शिता ।
अस्पृष्टवार्यधौताङ्घ्रिः सुष्वाप विधिमोहिता ॥ ६० ॥
लब्ध्वा तदन्तरं शक्रो निद्रापहृतचेतसः ।
दितेः प्रविष्ट उदरं योगेशो योगमायया ॥ ६१ ॥
चकर्त सप्तधा गर्भं वज्रेण कनकप्रभम् ।
रुदन्तं सप्तधैकैकं मा रोदीरिति तान्पुनः ॥ ६२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अमता अस्पृष्टसलिला असलिला अस्नाता अनर्चिता अभूषिता असमर्थ्यता अनावृतसर्वाङ्गा ॥ ५० ॥

शयनेऽष्टौ निषेधानाह—नाधौतपादेति । अप्रयता अपवित्रा पवित्रः कृतद्रवात् किन्नाङ्घ्रिः अपराक् पश्चिमशिरा ॥ ५१ ॥

कार्याण्याह—धौतवासा इति त्र्यध्यायेन । प्रातराशात् प्रथमभोजनात् प्राक् गवादीन् पूजयेत् ॥ ५२ ॥

वीरस्त्रीः जीवद्भर्तृकाः स्रग्भिर्गन्धैः बलिभिरुपायनैः मण्डनैः अलङ्कारैश्चार्चेत् पतिश्चार्च्य संपूज्योपतिष्ठेत तत्स्तुतिपरा समीपे स्थिता भवेत् कोष्ठगतमुदरगतं ध्यायेत् ॥ ५३ ॥

सांवत्सरं संवत्सरानुष्ठेयं पुंसवनं पुत्रदम् तुभ्यं तव ॥ ५४ ॥

बाढमित्यभ्युपेत्य अङ्गीकृत्य ॥ ५५ ॥

कविः स्वार्थवित् ॥ ५६ ॥ ५७ ॥

भाषाटीका ।

जूठा, काकीका भोग लगा हुआ, सामिष । शूद्रका लाया हुआ, और पिपीलिकादि दूषित रजस्वला से देखे गये अन्न को भक्षण न करे और अञ्जलि से जलपान न करे ॥ ४९ ॥

जूठे मुख, बिनाआचमन किये, संध्यासमय केश खोलकर, असंयिडत होकर वाणी को न रोककर तथा शरीर उघाड कर, बाहर न निकले ॥ ५० ॥

बिना पगधोंये, बिना प्रयत्न से आर्द्रपग से, उत्तर को शिर कर, पश्चिम को शिर कर, और किसी के साथ,नग्न होकर तथा दोनों संध्याओं में शयन न करे ॥ ५१ ॥

नित्य ही वस्त्र धोकर शुचि होकर सर्व मङ्गल संयुक्त होकर प्रातःकालभोजन से पहिले, गौ ब्राह्मण लक्ष्मी औ अच्युत (श्रीकृष्ण) की पूजा करे ॥ ५२ ॥

और जीवते पति वाली स्त्रियों की, माला चन्दन भे अलङ्कार आदि से पूजा करे । और पति का पूजन कर उपस्थान करे अर्थात् हाथ जोडकर खडी होवे । और अ मी कुक्षि में पति के प्राप्त होने का ध्यान करे ॥ ५३ ॥

एक वर्षतक इस पुंसवन व्रतको यदि तुम अखण्डि धारण करोगी तौ तुमारे इन्द्र के मारने वाला पुत्र होगा ॥ ५

हे राजन् ! बडे उत्साह वाली दिती भी बहुत भला है अभिप्राय कर कश्यपके गर्भ को और इस व्रत को वि श्रम से धारण करती हुई ॥ ५५ ॥

हे मानद ! इन्द्र भी मासी के अभिप्राय को जानकर । एक बटुके रूपके रूपको धारणकर, आश्रमस्था दिति की शुश्रू करके आप ही परिचर्या करने लगा क्योंकि वह तौ ब ही चतुर है ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हरिरिन्द्रो व्रतस्य छिद्रं प्रेप्सुः प्राप्तुमिच्छुः जिह्मः कु साधुवेषः मृगहा लुब्धको यथा मृगवञ्चनाय मृगवेषो भ तद्वत् ॥ ५८ ॥

(१) पत्राङ्कुरमृदापश्चेति पाठान्तरम—वीर० ।

ते तमूचुः पाट्यमानाः सर्वे प्राञ्जलयो नृप ! ।
नो जिघांससि किं इन्द्र ! भ्रातरो मरुतस्तव ॥ ६३ ॥
माभैष्ट भ्रातरो ! मह्यं यूयमित्याह कौशिकः ।
अनन्यभावान्पार्षदानात्मनो मरुतां गणान् ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

केन मे शिवं स्यादिति चिन्तां प्राप्तः ॥ ५९ ॥

अस्पृष्टवारिः अधौतपादा अधौताङ्घ्रिश्च ॥ ६० ॥

निद्रयाऽपहृतं चेतो यस्याः ॥ ६१ ॥

मा रोदीरित्युपलालयन्निव तान्पुनः सप्तधा चकर्त चिच्छेद ॥ ६२ ॥ ६३ ॥

कौशिकः इन्द्रः गणान् सप्त "सप्त गणा वै मरुतः" इति श्रुतेः ॥ ६४—६६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह—नित्यमहरहः सुमनसः पुष्पाणि फलानि च मूलानि च समिधश्च कुशाश्च तान् पत्राणि किसलयानि च दूर्वाङ्कुराश्च मृदः मृत्स्नाश्च आपश्च ताः कालेकाले उचितकाले उपाहरत् आनीय समर्पितवान् ॥ ५७ ॥

एवं तस्यां दितौ व्रतस्थायां सत्यां हे नृप ! हरिरिन्द्रः व्रतस्य छिद्रं वैकल्यं प्रेप्सुः कामयमानः अत एव जिह्मः कुटिलचित्तः पर्यचरत्. यथा, मृगरूपेणाकृतिर्यस्य सः मृगाणां हन्ता मृगाननुवर्तते तथा ॥ ५८ ॥

हे महीपते ! तत्परः व्रतच्छिद्रपर्यालोचनपरोपि व्रतच्छिद्रं नाध्यगच्छत् नापश्यत् अथ नितरां चिन्तां प्राप्तः केन हेतुना मम शिवं भद्रं स्यादिति तीव्रां चिन्तां प्राप्तः ॥ ५९ ॥

एकदा सा दितिः व्रतकर्शिता अत एवाशक्त्या न स्पृष्टं वारि जलं यया सा अधौतावप्रक्षालितावङ्घ्री यया सा तादृशी अत एव उच्छिष्टा सन्ध्यायां सायंकाले विधिना दैवेन मोहिता सती सुष्वाप ॥ ६० ॥

तदा तदन्तरं व्रतच्छिद्रं लब्ध्वा शक्रो निद्रया अपहृतं चेतो यस्यास्तस्याः दितेरुदरं प्रविष्टः, कथं परकायप्रवेशसामर्थ्यं तस्य ? इत्यत्राह—योगेशः परकायप्रवेशसामर्थ्यापादकयोगयुक्तः अत एव योगमायया विचित्रयोगसामर्थ्येनोदरं प्रविष्ट इत्यर्थः ॥ ६१ ॥

उदरे प्रविष्टः शक्रो वज्रायुधेन तं कनकप्रभं गर्भं सप्तधा चिच्छेद. रुदन्तमेकैकं गर्भस्य भागं मारोदीरिति वदन् तान् भयङ्कान् पुनः सप्तधा एकैकं चिच्छेद. ततो मारोदीरिति तान् चिच्छेद, अत एव निमित्तान्मरुच्छब्दस्य तेषु प्रवृत्तिः आर्षत्वान्माशब्दस्य ह्रस्वः । "रुदेर्माङ्क्विप्" मा न विद्यते इन्द्रवाक्यात् रुद रोदनं येषां ते मरुतः ॥ ६२ ॥

हे नृप ! ते छिद्यमानाः सर्वे गर्भस्य भागाः भक्त्यापि शोकाद्भयवशाद्वा प्राञ्जलयस्सन्तः तमिन्द्रमूचुः किमिति, हे इन्द्र ! तव भ्रातरो मरुतः मरुत्संज्ञकाः किमर्थं जिघांससि हन्तुमिच्छसि ॥ ६३ ॥

इति तैरुक्तः कौशिकः शक्रो यदि यूयं तर्हि मा भैष्ट भयं माकुरुतेत्याह, तत अनन्यभावान् पार्षदत्वं प्राप्तानन्यभावान् आत्मनः मरुतां गणानाहेति पूर्वेणान्वयः ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

योगमायया योगसामर्थ्येन ॥ ६१ ॥ ६२ ॥

जिघांससि हन्तुमिच्छसि ॥ ६३ ॥

माभैष्ट भयं मा कुरुध्वं कौशिक इन्द्रः मरुतां गणानाह ॥ ६४ ॥ ६५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ते तमूचुरिति । अत एकस्यैव जीवस्य नानाकायव्यासः । यद्वा, पूर्वमेकस्मिन् देहे बहूनां जीवानामध्यासवत् देहविभागप्राप्तेरिति ज्ञेयम् ॥ ६३—६६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हरिरिन्द्रो व्रतस्य छिद्रं प्राप्तुमिच्छुरिमीन्द्रस्याप्यविश्वस्यमेव. यतो विष्णोः स्मरणेन कीर्तनेन वा मच्छिद्रमपि निश्छिद्रं स्यात् तस्य विष्णोरिदं व्रतं छिद्रेऽप्यच्छिद्रमेव भवेत् । यदुक्तं "यस्य स्मृत्या च नामोक्त्या" इति "मन्त्रतस्तन्त्रतश्छिद्रम्" इत्यादि च, किञ्चोपरिष्टादिन्द्रेणापि व्रतस्य निश्छिद्रतामनुभविष्यता यस्य "महापुरुषसेवायाः सिद्धिः काप्यनुपश्यती" इति जिह्मः कुटिलः मृगहा लुब्धको मृगवञ्चनाय यथा मृगाकृतिर्भवति तद्वत् तस्य रिक्षारकलाकृतिः ॥ ५९ ॥

अस्पृष्टवारिः अधौताङ्घ्रिश्च ॥ ६० ॥

योगस्य परकायप्रवेशसाधकस्य सिद्धयां वा माया तया ॥ ६१ ॥

मारोदीरित्युपलालयन्निव तान् पुनः सप्तधा चकर्त

न ममार दितेर्गर्भः श्रीनिवासानुकम्पया ।
बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान् ॥ ६५ ॥
सकृदिष्ट्वाऽऽदिपुरुषं पुरुषो याति साम्यताम् ।
संवत्सरं किञ्चिदूनं दित्या यद्धरिरर्चितः ॥ ६६ ॥
सजूरिन्द्रेण पञ्चाशद्देवास्ते मरुतोऽभवन् ।
व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ॥ ६७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चिच्छेद ॥ अनादिकाल एव बहुपुण्यपापभोजिनो जीवस्य योगिनो वा कायव्यूह इवैकस्यैव जीवस्योनपञ्चाशत्का-यव्यापकत्वमिति केचित् भाविरहस्या प्रथममेवैकस्मिन् देहे प्रविष्टानामेकोनपञ्चाशज्जीवानामिन्द्रकृतविभागेनैकैकदेहप्राप्ति-रित्यपरे. इन्द्रकृतखण्डेष्वन्येषामप्यष्टचत्वारिंशज्जीवानां तत्क्ष-ण एव प्रवेशो यथा, लतागुल्मानां केषाञ्चित् खण्डं खण्डीकृ-त्यैव भूमावारोपितानां पृथक् पृथक् प्ररोहोद्गमात् पृथक् पृथक् जीवस्य प्रवेशोऽनुमीयते इत्यन्ये च प्राहुः ॥ ६२ ॥ ६३ ॥

मर्षि मम कौशिकः इन्द्रः गणान् "सप्त गणा वै मरुतः" इति श्रुतेः ॥ ६४ ॥ ६५ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मृगयुर्यथा मृगवञ्चनाय मृगाकृतिर्भवति तथा हरिरिन्द्रः तस्याः व्रतच्छिद्रं प्रेप्सुः प्राप्तुमिच्छुः जिह्मः कुटिलः भूत्वाकृति-हसन् पर्यचरत् ॥ ५८ ॥

मे केनोपायेन शिवं स्यादिति तीव्रां चिन्तां गतः प्राप्तः ॥ ५९ ॥

सन्ध्यायां शयनायोग्यकाले अस्पृष्टवारिश्चासावधौताङ्घ्रिश्च सुष्वाप विधिना इन्द्रकर्मफलदेनेश्वरेण मोहिता ॥ ६० ॥

तदन्तरं तच्छिद्रं निद्रयाऽपहृतं चेतो यस्याः योगस्य तपो-व्रतादिरूपस्य माया परकायप्रवेशरूपा शक्तिस्तया ॥ ६१ ॥

कनकप्रभं तस्याः गर्भं वज्रेण सप्तधा चकर्त चिच्छेद पुनश्च तानेकैकं रुदन्तं मारोदीरिति वदन् सप्तधा चकर्त । ननु, "अणुरेष आत्मा चेतसा वेदितव्यः" इत्यादिश्रुतिप्रसिद्धस्य जी-वस्यैकस्य बहुषु देहेषु युगपत् प्रवेशाद्यसम्भवात् कथं घटेत तानेकैकं रुदन्तमिति ? अत्रोच्यते, दैवात् प्रथमत एवैकस्मिन् देहे प्रविष्टानामेकोनपञ्चाशज्जीवानामिन्द्रकृतविभागेनैकैकदेहप्राप्ति-रिति. अत एव एकस्मिन् गर्भे दैवात्प्रविष्टाः एकाधिकशतसङ्ख्या-का जीवाः श्रीव्यासाज्ञया गान्धार्या तद्गर्भखण्डाः पृथक् पृथक् कुम्भेषु निहिताः दुर्योधनादयः शतसङ्ख्याकाः पुत्राः जाताः कन्या चैकोत्पन्नेति. सौभर्यादयस्तु स्वकर्मजन्यदेहमाश्रित्य योगब-लेन पृथक् पृथक् जीवयुक्तान् बहून् देहान् सृजन्ति चेति दिक् ॥ ६२ ॥ ६३ ॥

कश्चित्कुशिकान्वये जातत्वात्कौशिकः इन्द्रः गणान् "सप्त गणा वै मरुतः" इति श्रुतेः ॥ ६४ ॥ ६५ ॥

———

भाषा टीका ।

प्रति दिन यथोचित समय मे वन से पुष्प फल मूल समिध कुश पत्र अंकुर (दूर्वादि) मृद जल इन सबका उप हार करताथा ॥ ५७ ॥

हे नृप ! जैसे वधिक मृग वञ्चनार्थ स्वयं मृग रूप धा-रणाता है वैसे कुटिल वेषधारी इन्द्र पूर्वोक्त व्रत में स्थित-दिति के व्रत छिद्र को देख हुआ सेवा मे रहताथा ॥ ५८ ॥

हे महीपते ! सदा छिद्रान्वेषण में तत्पर रहा परन्तु जब छिद्र नहीं मिला तब इन्द्र को बडी चिन्ता हुई अब मेरा-कल्याण किस प्रकार से होगा ॥ ५९ ॥

एक समय व्रत से कर्शित वह दिति सन्ध्या के समय जूंठे मुख विना आचमन किये विना पग धोये दैव से मोहित होकर सोगई ॥ ६० ॥

इन्द्रने भी उस अन्तर को पाकर अपनी योग माया से निद्रा मे सोई हुई दिति के उदर मे प्रवेश किया ॥ ६१ ॥

इन्द्रने गर्भ के वज्र से सात टुकडे करदिये । जब वो गर्भ रोने लगा तब रोते हुए को, 'मतरो' एसा कह फिर एक २ के सात २ टुकडे करडाले ॥ ६२ ॥

हे नृप वे सब ही फाटते हुए हाथजोडकर इन्द्रसे ऐसे बोले कि, हे इन्द्र हम तेरे मरुतनामक भ्राता हैं हम को मारने की इच्छा क्यों करता है ॥ ६३ ॥

इन्द्र भी अनन्य भाववाले, अपने पार्षद मरुद्गणों से ऐसे बोला कि जब तुम मेरे भ्राता हो तो मतडरो ॥ ६४ ॥

———

श्रीवल्लभाचार्यकृतभावार्थदीपिका ।

सजूः सह ॥ ६७—७० ॥

दितिरुत्थाय ददृशे कुमाराननलप्रभान् ।
इन्द्रेण सहितान्देवी पर्यतुष्यदनिन्दिता ॥ ६८ ॥
अथेन्द्रमाह ताताहमादित्यानां भयावहम् ।
अपत्यमिच्छन्त्यचरं व्रतमेतत्सुदुष्करम् ॥ ६९ ॥
एकः सङ्कल्पितः पुत्रः सप्तसप्ताभवन्कथम् ।
यदि ते विदितं पुत्र ! सत्यं कथय मा मृषा ॥ ७० ॥

इन्द्र उवाच ।

अम्ब ! तेऽहं व्यवसितमुपधार्यागतोऽन्तिकम् ।
लब्ध्वान्तरोऽच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ॥ ७१ ॥
कृत्तो मे सप्तधा गर्भ आसन्सप्त कुमारकाः ।
ते पिचैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दित्या निष्कपटमुक्ते सतीन्द्रोऽपि निष्कपटमेवाह-अम्बेति । लब्धमन्तरं येन अर्थे एव बुद्धिर्यस्य ॥ ७१—७२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो दितेर्गर्भः कुलिशेन वज्रेण बहुधा छिन्नोऽपि श्रीनिवासस्य भगवतोऽनुकम्पया अनुकंपापूर्वकानुग्रहविशेषेण न ममार न मृतः यथा भवान्परीक्षित् अश्वत्थाम्नोऽस्त्रेण दग्धदेहोऽपि भगवता रक्षितस्तद्वत् ॥ ६५ ॥

अस्मिन्नर्थे उपपत्तिमाह—सकृदिति । पुमान्सकृदप्याद्यपुरुषं भगवन्तमिष्ट्वा आराध्य तन्माहात्म्येन शनैः सात्मतां समानरूपतां याति किं पुनरसकृदिष्ट्वेति भावः । यतः किञ्चिन्न्यूनं संवत्सरमेवं दित्या आराधितः इन्द्रेण सह जुषते सेवत इति सजूः इन्द्रेण सह वर्तमान इत्यर्थः । हरिर्भगवानुपेन्द्रः अभ्ययात् आगत्य गर्भस्य खण्डानजीवयदित्यर्थः । ततः ते पञ्चाशत् एकोनपञ्चाशत् अन्यथा "मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः । चकर्त सप्तधा गर्भम्" पुनरेकैकं सप्तधा चकर्तेति पूर्वोक्तसंख्याविरोधापत्तेः मरुतो मरुत्संज्ञकाः मातुर्दोषमाच्छुरत्वापादेयं त्यक्त्वा देवा अभवन् ते च हरिणा इन्द्रेण भगवता वा सोमपाः सोमं पिबन्तीति तथा क्रियमाणाः कृता इत्यर्थः ॥ ६६ ॥ ६७ ॥

ततो दितिरुत्थाय कुमारानग्नितुल्यप्रकाशानिन्द्रेण सहितान् ददर्श दृष्ट्वा च देवी दितिरनिन्दिता वस्तुतः शुद्धभावा पर्यतुष्यत् ॥ ६८ ॥

अथानन्तरं इन्द्रमुवाच, तदेवाह—हे तात इन्द्र ! आदित्यानामदितेरपत्यानां युष्माकं भयावहमेकमपत्यमहम् इच्छन्ती सुदुष्करमचरं ... ॥ ६९ ॥

मया त्वेकः पुत्रः सङ्कल्पितः कथं [illegible] अभवन् हे पुत्र, एतद्यदि तव विदितं तर्हि [illegible] मिथ्या मा कथय ॥ ७० ॥

एवमुक्तः शक्रस्तामाह—हे अम्ब, ते [illegible] प्रेतम् उपधार्य ज्ञात्वाऽहं तवान्तिकं समीपं गतः [illegible] न्तरं अनच्छिदं येन तादृशोऽहं गर्भमच्छिनं [illegible] इमर्थे वैषयिकपुरुषार्थ एव बुद्धिर्यस्य न धर्मवित् ॥ ७१ ॥

यतोऽहमीदृशस्ततो मे मया तावत्सप्तधा ग[illegible] इति पाठे वज्रेणेति शेषः एवं सप्तधा कृ[illegible] सप्तकुमारा आसन् ते पि पुनरेकैकशो वृक्ण[illegible] [illegible] बभूवुः नापि मम्रिरे न मृताश्च ॥ ७२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सात्मतां समानरूपतां हरिः श्रीनारायणो दित्या किञ्चिन्न्यून संवत्सरमर्चितो यतः सात्मतां यातीति [illegible] सकृदप्यपूज्य सात्मतां याति तस्मात् ॥ ६६ ॥

इन्द्रेण सजूः सह अभिरूपानुपमा सजू[illegible] हरिणेन्द्रेण सोमपाः सोमं पिबन्तः ॥ ६७ ॥

पर्यतुष्यत्सचेतनत्वात् ॥ ६८ ॥

आदित्यानां अदितिपुत्राणाम् ॥ ६९—७२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हरिणा इन्द्रेण श्रीविष्णुनेति वा ॥ ६७—७१ ॥

ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसितं मया।
महापुरुषपूजायाः सिद्धिः काप्यनुषङ्गिणी ॥ ७३ ॥
आराधनं भगवत ईहमाना निराशिषः।
ये तु नेच्छन्त्यपि परं ते स्वार्थकुशलाः स्मृताः ॥ ७४ ॥
आराध्याऽऽत्मप्रदं देवं स्वात्मानं जगदीश्वरम्।
को वृणीत गुणस्पर्शं बुधः स्यान्नरकेऽपि यत् ॥ ७५ ॥
तदिदं मम दौर्जन्यं बालिशस्य महीयसि !।
क्षन्तुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ॥ ७६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

मे मया ॥ ७२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सात्म्यं पुरुषसमानाकारत्वम् ॥ ६६ ॥

सजूः सह ॥ ६७-७० ॥

दित्या निष्कपटमुक्ते सति इन्द्रोऽपि निष्कपटमेवाह--अम्बेति। लब्धान्तरः प्राप्तच्छिद्रः व्यवसितं, निश्चितं तदेवाह-महेति। काप्यन्यैव काऽपि सिद्धिर्मुक्तिरपि आनुषङ्गिकी ॥७१-७३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यास्तु भानुकम्पायां हेतुं संस्मारयति। आदिपुरुषं हरिं पुरुषः सकृदिष्ट्वा सात्मतां आत्मना हरिणा सह वर्तमानः सात्मा हरिसदृशो मुक्तस्तस्य भावः सात्मता तां याति दित्या तु सम्वत्सरं सह हरिरर्चितः ॥ ६६ ॥

अत एव इन्द्रेण सजूः सह पञ्चाशदभवन् सङ्कल्पितस्त्वेकः देवाः अभवन् सङ्कल्पितस्तु देवाहितः अलब्धं हृदयेऽर्चनमाहात्म्यमिति भावः ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

लब्धान्तरः प्राप्तच्छिद्रः अर्थे बुद्धिर्यस्य सः ॥ ७१ ॥
कर्णाः कनिष्ठाः ॥ ७२ ॥ ७३ ॥

भाषाटीका।

: जैसे अश्वत्थामाके गर्भ से तुम ऐसे ही वज्र से बहुत ही काटापरन्तु दिति का वह गर्भ श्रीनिवास की कृपा से नहीं मरा ॥ ६५ ॥

आदि पुरुष को एकबार भी पूजकर पुरुष उनकी समताको प्राप्त होता है। फिर दितिने तो कुछ कम एक वर्ष हरि का पूजन कियाथा ॥ ६६ ॥

वे इन्द्र के साथी पचास मरुत देव हुए। इन्द्रने भी के दोष को मानकर सोमपान करने वाले कर लिये ॥ ६७ ॥

दिति उठकर अग्नि सदृशप्रभावाले कुमारों को इन्द्र सहित देखकर संतुष्ट हुई ॥ ६८ ॥

अनन्तर इन्द्रसे बोली हे तात ! मैंने अदिति के पुत्रों को भय प्राप्त करने वाले पुत्र की इच्छा करके यह अति दुष्कर व्रत का आचरण किया ॥ ६९ ॥

एक पुत्र का सङ्कल्प किया था परन्तु यह (सप्त सप्त) सात सात गुने अर्थात् उनचास कैसे हुए पुत्र ! यदि तुम को मालुम होवतो सत्य कहना, झूठ न कहना ॥ ७० ॥

इन्द्र उवाच ॥

हे अम्ब मैंने तुमारा व्यवसाय सुन तुमारे समीप आय और अन्तर पाकर गर्भ का छेदन करदिया क्योंकि मैं प्रयोजन में बुद्धि रखकर धर्म को नहीं जाना ॥ ७१ ॥

मैं सात प्रकार गर्भ को काटा तब सात पुत्र होगये उनसबको भी एक२ को सात२ तरह से छेदन किया तब उनचास होगये पर मरे नहीं ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अपि परं मोक्षमपि ॥ ७४ ॥

गुणस्पर्शी विषयभोगं बुधः को वृणीते यद्यस्मात्तत्तु विषयभोगः स्यात् ॥ ७५ ॥

महीयसि हे महत्तमे ! मृतः सन्नुत्थितः ॥ ७६--७८ ॥

श्रीशुक उवाच ।

इन्द्रस्तयाऽभ्यनुज्ञातः शुद्धभावेन तुष्टया ।
मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥ ७७ ॥
एवं ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
मङ्गलं मरुतां जन्म किम्भूयः कथयामि ते ॥ ७८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कन्धे मरुज्जन्मकथनं नाम
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततोऽनन्तरमिदं महदाश्चर्यं विलोक्य मया निश्चितं अध्यवसितं, अभिमतमाह—महापुरुषस्य भगवतः पूजायाः कार्यं पूजकाभिलषितं प्रयोजनं तदानुषङ्गिकमप्रधानं फलं यस्याः सा तक उपसर्जनत्वेपि कीदृशः सिद्धिर्मुक्तिरेवर्तते असमामाया अपि महापुरुषपूजायाः पूजकाभिलषितप्रयोजनासहस्वानुनावकांक्षयामुक्त्यर्थत्वे-पि कृतायाश्चानपूजयाः परिपूर्णायाः मुक्तिरेव प्रधानं फलं, पूजकाभिलषितं तु आनुषङ्गिकमिति मया निश्चितमित्यर्थः । यद्वा, महापुरुषस्य पूजायाः सकामपूजायाः सिद्धिः परिसमाप्तिरेव कार्यानुषङ्गिकीकार्येण प्रयोजनेनानुरज्यते अनुबध्यते पूजकाभिलषितप्रयोजनावहा भवति न स्वपरिपूर्णा, सा तु विपरीतफलदैवेति मया निश्चितमित्यर्थः ॥ ७३ ॥

अत एव ये पुरुषाः निराशिषो निष्कामाः भगवत आराधनं कुर्वाणाः परं मोक्षमपि नेच्छन्ति न एव स्वार्थे स्वस्य निरतिशयपुरुषार्थे कुशलाः स्वस्य निरतिशयपुरुषार्थप्रसाधनकुशलाः स्मृताः ॥ ७४ ॥

एवमनभिसंहितफलं भगवदाराधनं प्रस्तुत्याभिसंहितफलं निन्दति—आराध्येति । आत्मप्रदं निरतिशयपुरुषार्थरूपमात्मानं निरतिशयप्रदमीश्वरं देवं भगवन्तं तमाराध्य बुधो विवेकी सन् कः पुमान् गुणस्पर्शो शब्दादिविषयानुभवं कः पुमान् वृणीत कामयेत. गुणस्पर्शो विशिनष्टि—स्यादिति, यत् गुणस्पर्शनं नरकेपि स्यात्सम्भवेत् ॥ ७५

स्वापराधक्षमार्थं, तां प्रार्थयते—तदिति । हे महीयसि पूज्ये ! अविद्यस्य मूर्खस्य मम तदिदं गर्भच्छेदनादिरूपं दौर्जन्यं दुर्जनस्य कर्म हे मातः ! त्वं क्षन्तुमर्हसि मातुः ... त्यभिप्रायेण मातरिति सम्बोधनं दिष्ट्या दैवेन ... पुनरुत्थितो जीवितः ॥ ७६ ॥

एवमुक्तया विशुद्धभावेन निष्कपटभावेन तुष्टया अभ्यनुज्ञातः तां नत्वा मरुद्भिस्सह प्रभुरिन्द्रः जगाम ॥ ७७ ॥

एवं यत्पृष्टं "कथं त आसुरं भावम्" इत्यादि ... मुक्तमित्याह—एवमिति । यन्मरुतां जन्म त्वं मां परि... पृच्छः तत्कृपवतां मङ्गलावहं सर्वं सप्रपञ्चं यथातथा ... आख्यातं कथितम्भूयः किंकथयामि यदि ... तर्हि तत्कथयामीति प्रश्नप्रोत्साहः ॥ ७८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कार्यानुषङ्गिणी कार्यानुकूल्यं सङ्गमयन्ती
फलकामक्रियायोगभाविन्यर्थोऽन्यथा सिद्धिरभूत् ...
संस्थेनेति भावेनाह—आराधनामिति ॥ ७५ ॥

गुणस्पर्शो विषयसुखम् ॥ ७५—७८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ततस्तदिति । व्यवसितं विचारितम् । तदेवाह—महेति ॥ ७३ ॥
७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

परं म[illegible]मपि स्वार्थकुशला इति तेन येस्माराधनेन मोक्ष-
मिच्छन्ति [illegible] वर्त्तमानमहानिधिर्विनिमयेन तृणार्थिनः स्वार्थान-
भिज्ञाः किन्तु विषयवाञ्छुगुणयास्तेऽपि कृतार्था एवेत्यर्थः । यदुक्तम्
"सत्यं दिश[illegible]यर्थितमर्थितो नृणाम्" इति ॥ ७४ ॥
देवं क[illegible]ापरं स्वात्मानं सुन्दरविग्रहम् ॥ ७५—७८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठे अष्टादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

परं [illegible]ोक्षम् ॥ ७४ ॥
स्व[illegible] अंशभूतस्य आत्मानमर्थिनं गुणस्पर्शी विषयभोगं
बुधः को वृणीत ? यद्यस्मात् विषयभोगो नरकेऽपि स्यात् ॥ ७५ ॥
हे महीयसि महत्तमे ! बालिशस्य मूढस्य मम यद्दौर्जन्यं तत्
क्षन्तुमर्हसि दिष्ट्या भद्रं गर्भो मृतस्समुत्थितः ॥ ७६ ॥
मरुद्भिः सह दिवं जगाम ॥ ७७ ॥ ७८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टादशाऽध्यायार्थप्रकाशः ॥ १८ ॥

भाषा टीका ।

तिससे उस परमाश्चर्य को देखकर मैंने यह निश्चय किया कि यह कोई महा पुरुष की पूजा सम्बन्धिनी सिद्ध है ॥ ७३ ॥

जो निष्काम होकर भगवान के आराधन की चेष्टा करते हैं और मोक्ष पर्यन्त की भी चाहना नहीं करते वे लोग ही स्वार्थ में कुशल समझे गये हैं ॥ ७४ ॥

आत्मा को देने वाले अपने अन्तर्यामी जगदीश्वर का आराधन करके कौन बुद्धिमान विषय भोगों को मांगेगा, जो नरक में भी हैं ॥ ७५ ॥

हे महीयसि ! (अति बड़प्पन वाली) हे मातः ! मेरी इस दुर्जनता को क्षमा करने योग्य है और यह भला हुआ जो मृत गर्भ भी फिर उठ खड़ा हुआ ॥ ७६ ॥

श्री शुक उवाच ॥

इन्द्र के शुद्धभाव सन्तुष्ट होकर दिति ने इन्द्र को आज्ञा दी तब इन्द्र भी मरुद्गणों के सहित दिति को नमस्कार करके स्वर्गको गया ॥ ७७ ॥

हे राजन् ! जो तुमने हमसे पूछा सो हमने सब तुम से मङ्गल रूप मरुद्गणों का जन्म तुम से कथन किया अब और तुम से क्या कथन करें ॥ ७८ ॥

इति श्रीमत्भागवत महापुराण षष्ठस्कन्ध
की भाषाटीका में अष्टादश अध्याय
समाप्त ॥ १८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे अष्टादशोऽध्यायः समाप्तः ॥ १८ ॥



॥ एकोनविंशोऽध्यायः ॥

——:o:——

राजोवाच ।

व्रतं पुंसवनं ब्रह्मन् भवता यदुदीरितम् ।
तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥ १ ॥

श्रीशुक उवाच ।

शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया ।
आरभेत व्रतमिदं सार्वकामिकमादितः ॥ २ ॥
निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च ।
स्नात्वा शुक्लदती शुक्ले वसीतालङ्कृताम्बरे ।
पूजयेत्प्रातराशात्प्राग्भगवन्तं श्रिया सह ॥ ३ ॥
अलं ते निरपेक्षाय पूर्णकाम ! नमोऽस्तु ते ।
महाविभूतिपतये नमः सकलसिद्धये ॥ ४ ॥
यथा त्वं कृपया भूत्या तेजसा महिमौजसा ।
जुष्ट ईश गुणैः सर्वैस्ततोऽसि भगवान्प्रभुः ॥ ५ ॥
विष्णुपत्नि महामाये ! महापुरुषलक्षणे !।
(१) प्रीयेथा मे महाभागे ! लोकमातर्नमोऽस्तु ! ते ॥ ६ ।

ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलिमुप[illegible]मीति ।
अनेनाहरहर्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगन्धपुष्पधूपदीपो-पहाराद्युपचारांश्च समाहित उपाहरेत् ॥ ७ ॥

हविःशेषन्तु जुहुयादनले द्वादशाहुतीः ।
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऊनविंशे तु यत्प्रोक्तं कश्यपेन दितेर्व्रतम् ।
[illegible] विवृतं लोकहिताय हरितोषणम् ॥ १ ॥

[illegible]याद्युपर्श [illegible]
[illegible]विशिनष्टि [illegible]दमिति शेषः ॥ १ ॥

[illegible] [illegible] मासे ,शुक्लपक्षे आदितः प्रतिपदि ॥ २ ॥

अनुमन्त्र्य पृष्ट्वा शुक्लाः दन्ताः यस्याः सा शु[illegible] दन्ता अलंकृता सती पूजयेत् ॥ ३ ॥

आदौ तावन्नमस्कारमन्त्रानाह त्रिभिः—ते तुभ्यम[illegible] सर्वं न किञ्चिदन्यैः कृत्यमस्त्यतः केवलं ते तु[illegible] पर्याप्तो हेतवः, निरपेक्षाय हे पूर्णकाम ! महाविभू[illegible] हमीपतये सकलाः सिद्धयोऽणिमाद्या यस्मिन् तस्मै ॥ ४ ॥

[illegible]विशस्य [illegible] मासे इति पाठान्तरम् । वीर०

श्रीधरस्वामिकृतभावार्थदीपिका ।

ओं ईश ! यथा यथावत् त्वं कृपादिभिर्जुष्टः अन्यैश्च सत्यसङ्कल्पत्वादिभिः सर्वगुणैः ततस्तस्मात् ॥ ५ ॥

महापुरुषस्य परमेश्वरस्यैव लक्षणानि निरपेक्षत्वादीनि यस्याः तस्याः संबोधनम् ॥ ६ ॥

पूजामन्त्रमाह—ओं नम इति ॥ ७ ॥

होमशेषमुपहारावशिष्टं होममन्त्रं दर्शयति—ओमिति ॥ ८ ॥

श्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं भूयः कथयामीति प्रश्नार्थं चोदितः पृच्छति राजा—व्रतमिति । हे ब्रह्मन् ! भवता यदुदीरितं पुंसवनाख्यं व्रतं तस्य पुंसवनस्य व्रतं प्रपञ्चमितिशेषः ज्ञातुमिच्छामि येन पुंसवनेन तच्छ्रवणेन भगवान् प्रसीदति ॥ १ ॥

एवमापृष्टः सप्रपञ्चं व्रतमाह मुनिः—शुक्ल इत्यादिना । मार्गशिरे मासि शुक्ले पक्षे कस्यांचिच्छुभतिथौ भर्तुरनुज्ञया योषिदिदं व्रतमारभेत सार्वकामिकम् अभिलषितसर्वपुरुषार्थसाधनं पुंसवनाख्यं व्रतमारभेत ॥ २ ॥

तथादिः प्रथमं मरुतां जन्म उत्पत्तिं श्रुत्वा ब्राह्मणाननुमान्याऽऽनुज्ञाप्य तैरनुज्ञातेत्यर्थः । स्नात्वा शुक्ला धौता दन्ता यस्याः सा धौतदन्तेत्यर्थः अहते नूतने शुक्ले च अंबरे वसित्वा प्रातराशात्प्रागेव भगवन्तं श्रिया लक्ष्म्या सह सधर्मी पूजयेत् ॥ ३ ॥

तां नमस्कारमन्त्रानाह त्रिभिः—ते तुभ्यं अलं पर्याप्तमेव न किञ्चिदन्यैः कृत्यमस्ति. तत्र हेतुः, हे पूर्णकाम अवाप्तसमस्तकाम ! अत एव निरपेक्षाय ते तुभ्यं नमः । पूर्णकामत्वमेव विशदयति विभिनष्टि—महाविभूत्योर्लक्ष्मीलीलाविभूत्योरधिपतये अत एव सकलाविभूतयः अभिलषितानि यस्मात्तस्मै ॥ ४ ॥

हे ईश ! यथा यतः त्वं कृपादिभिः सर्वैर्गुणगणैर्जुष्टः युक्तः तस्मात् भगवान् प्रभुरसि तत्र कृपा स्वार्थानपेक्षपरदुःखनिराचिकीर्षा भूतिरैश्वर्यं तेजः पराभिभवनसामर्थ्यं महिमा लोकोत्तरप्रभावः ओजो बलं सर्वैरित्यनेनान्ये सर्वज्ञत्वसर्वशक्तित्वादयो गुणाः अभिप्रेताः ॥ ५ ॥

हे विष्णुपत्नि ! हे महामाये महाश्चर्यशक्तियुक्ते ! लक्षणेऽनपेतलक्षणा महापुरुषचिह्नभूतेत्यर्थः तथा महापुरुषस्य प्रिये, हे श्रीमि, सर्वलोकसम्पदाश्रयभूते, हे लोकानां मातः, ते तुभ्यं नमः ॥ ६ ॥

पूजामन्त्रमाह—ओं नम इति । भगवते पूर्णषाड्गुण्याय निरस्तनिखिलदोषाय महापुरुषाय पुरुषसूक्तप्रतिपाद्यमाहात्म्ययुक्ताय महानुभावाय लोकविलक्षणप्रभावाय महाविभूतेः महालक्ष्म्याः पतये विभूतिभिःसह सपार्षदायेत्यर्थः, तुभ्यं बलिमर्घ्यादिकम् उपहरामि समर्पयामीत्यनेन मन्त्रेण अहरहः विष्णोरावाहनाद्युपचाराननुवर्तयेत्. तत्रोपस्पर्शनमाचमनं उपहारो नैवेद्यं हविः आदिशब्देन [illegible] शिष्टं भगवते निवेदितं हविरनले आहुतीः जुहुयात् ॥ ७ ॥

तत्र मन्त्रमाह— ओंनम इति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र निष्कामत्वेन क्रियमाणं पुंसवनं नाम व्रतं श्रीनारायणानुग्रहजनकं ज्ञानजनकत्वेन पुरुषार्थसाधनं भवतीत्यभिप्रायेण प्रश्नोत्तरपूर्वकमेतद्व्रतं निरूप्यते पुंसवनस्य विधानम् ॥ १ ॥

मार्गशिरे मासि शुक्लपक्षे सार्वकामिकं मोक्षादिसर्वपुरुषार्थसाधनम् आदितः शुक्लपक्षमारभ्य आदितो मरुतां जन्मेति वा ॥ २ ॥

शुक्ले अम्बरे च ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ते तुभ्यमलं त्वदर्थं नान्येन प्रयोजनमस्तीत्यर्थः ॥ १ ॥ २ ॥ ॥ ३ ॥ ४ ॥ ५ ॥

विष्णुपत्नीति । महामाये पराख्यशक्तिरूपे ! अत एव महापुरुषलक्षणे तदेकस्वरूपे ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विष्णुप्रसादनं चेतःकौर्थ्यविध्वंसनं व्रतम् ।
नृपेण पृष्टोऽब्रवीत्पुंसवनाख्यं मुनिः पुनः ॥ ० ॥

तस्य विधिमिति शेषः ॥ १ ॥

मार्गशिरे मार्गशीर्षे मासि आदितः प्रतिपदि ॥ २ ॥ ३ ॥

अलमतिशयेन तुभ्यं नम एवास्तु । देवान्तरो यथा निजैश्वर्यसिद्ध्यर्थं सेवकान् अपेक्षते तथा न त्वमित्याह-निरपेक्षाय आत्मविकासहेतुऐश्वर्यत्वादित्यर्थः । एवं पूर्णकामाय ते केन नैवेद्यादिना प्रीणयामि । महाविभूतिपतये तुभ्यं केगृहोद्यानरथगजदासीभृत्यगीतदुन्दुभिघोषाद्यैः एवं सकलसिद्धये स्वर्गापवर्गप्रेमादिसिद्धिदात्रे तुभ्यं कर्मज्ञानयोगभक्त्यादिसाधनापेक्षैः का प्रीणयामीति भावः ॥ ४ ॥

तदपि त्वत्कृपया सर्वं घटत इत्याह—यथा त्वं कृपया जुष्टस्तथैव भूत्यादिभिश्च ततो हेतोस्त्वमेव भगवानसीत्यन्वयः अयमर्थः, कृपया शक्त्या जुष्टः सेवितस्सन् भक्तदत्ततुलसीपत्रमात्रमप्यपेक्षमाणः अहमद्य क्षुधार्तोऽस्मि किञ्चिद्देहीति भक्तान् याचमानोऽपूर्णकामोऽपि भवसि मम गृहोद्यानादिकं सम्प्रति जीर्णं विलासमीत्यादि स्वप्नान्तरं ब्रुवन् विभूतिशून्योऽपि भवान् अणिमादिसिद्धियुक्तोऽपि भक्तप्रेमरज्ज्वा बद्धः क्वापि गन्तुमपि न शक्नोषि तथैव भूत्या महालक्ष्म्या शक्त्या तेजसा सर्वान्तर्नतया शक्त्या महिम्ना विभूत्या शक्त्या च ओजसा बलेन सर्वैरन्यैः सत्यसङ्कल्पत्वादिभिश्च सर्वत्र जगति निरपेक्षत्वपूर्णकामत्वादिमांश्च भवसीति त्वमेव भगवान् त्वमेव प्रभुर्भजनीय इति भावः ॥ ५ ॥

इत्थं भगवन्तं प्रणम्य लक्ष्मीं प्रणमेदित्याह-विष्णुपत्नीति महामाये, मायाः [illegible]

श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ ।
भक्त्या सम्पूजयेन्नित्यं यदीच्छेत्सर्वसम्पदः ॥ ९ ॥
प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा ।
दशवारं जपेन्मन्त्रं ततस्तोत्रमुदीरयेत् ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एव महापुरुषस्य विष्णोरिव लक्षणानि निरपेक्षत्वादीनि यस्याः ॥ ६ ॥

पूजामन्त्रमाह—ओं नम इति ॥ ७ ॥

हविः शेषमुपहारावशिष्टम् ॥ ८ ॥ ९ ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुत्रदस्य व्रतस्य विष्णुप्रसादकरं विधिं पृच्छति—व्रतमिति-कोनविंशे । पुंसवनं पुत्रदं यद्व्रतं भवतोदीरितं तच्च येन विष्णुः प्रसीदति प्रसन्नो भवति तं विधिमिति शेषः वेदितुमिच्छामि ॥ १ ॥

मार्गशिरे तत्रापि शुक्ले पक्षे तत्रापि आदितः प्रतिपदि ॥२॥

ब्राह्मणान् अनुमन्त्र्य पृष्ट्वा मरुतां जन्म निशम्य एकः पुत्रः सङ्कल्पितः व्रतप्रभावादेकोनपञ्चाशत्पुत्रा जाता इति व्रतमहात्म्यसूचकं मरुतां जन्म ब्राह्मणेभ्यः श्रुत्वेत्यर्थः तदनन्तरं ब्राह्मणाननुमन्त्र्य इदं करिष्ये इति पृष्ट्वा च स्नात्वा शुक्ले अलङ्कृताम्बरे मङ्गलद्रव्यैः संस्कृते वस्त्रे वसीतेत्यन्वयः ॥ ३ ॥

प्रथमं नमस्कारमन्त्रानाह—अलमितित्रिभिः । ते तुभ्यमलं पर्याप्तमेव सर्वं न किंचिदन्यैः कृत्यमस्ति अतो निरपेक्षायापि केवलं ते तुभ्यं नमोस्तु पर्याप्तौ हेतुदर्शनार्थं सम्बोधनं हे पूर्णकाम ! अनःपूर्णकाम, सकामैरस्मदादिभिः सिद्धिकामैश्च सेव्योसीति विशेषणाभ्यां सूचयति महत्यो विभूतयो यस्याः सकाशात्पुष्पकानां मा महाविभूतिः श्रीः तस्याः पतये सकलाः सिद्धयो यस्मात्तस्मै ॥ ४ ॥

हे ईश ! त्वं कृपादिभिः सर्वैर्गुणैरैश्वर्यादिभिश्च यथा यथावद्युक्तोसि अतो भगवानसि ॥ ५ ॥

महती माया कृपा यस्याः सा महामाया महती चासौ मायाशक्तिर्महामायेति वा तस्याः सम्बोधनम् महापुरुषस्य विष्णोरिव लक्षणानि सौंदर्यादीनि यस्यास्तस्याः सम्बोधनम् हे लोकमातः ! ते तुभ्यं नमः प्रीयेथा प्रसन्ना भव ॥ ६ ॥

पूजामन्त्रमाह—ॐ नम इति ॥ ७ ॥

हविःशेषमुपहारावशिष्टं होममन्त्रमाह ॐ नम इति ॥ ८ ॥

भाषा टीका ।

राजो उवाच ।

हे ब्रह्मन् पुंसवन नामक व्रत आपने जो कहा [illegible] उसको मैं जानने की इच्छा करता हूं । [illegible] भगवान् प्रसन्न होते हैं ॥ १ ॥

श्री शुक उवाच ।

मार्गशीर्ष मास के शुक्ल पक्ष में [illegible] आज्ञा लेकर आदि से इस सर्व [illegible] रम्भ करे ॥ २ ॥

मरुद्गणों का जन्म सुनकर ब्राह्मणों [illegible] दांतोंको मञ्जन करके शुक्लवस्त्र [illegible] लंकृत शुक्लवस्त्रों को धारण [illegible] से लक्ष्मी सहित भगवान् का पूजन क[illegible]

हे पूर्णकाम निरपेक्ष आप को अन्य [illegible] नहीं आप को नमस्कार हो । महाविभूति [illegible] नमस्कार हो सकलसिद्धिप्रद आपको नमस्कार [illegible]

जिस कारण आप कृपा भूति (संपद्) [illegible] पराक्रम इत्यादि संपूर्ण ईश गुणों से [illegible] वान हैं ॥ ५ ॥

हे विष्णु पत्नि ! हे महामाये ! हे म[illegible] वाली हे महा भागे मेरे ऊपर प्रसन्न हूजिये [illegible] आपको नमस्कार हो ॥ ६ ॥

प्रणव रूप भगवान महापुरुष महानुभाव [illegible] ऐसे आपको नमस्कार हो । महा विभूतिप [illegible] उपहार करता हूं इस मंत्र से श्री विष्णु [illegible] आवाहन अर्घ्य पाद्य आचमन स्नान वस्त्र [illegible] चन्दन पुष्प धूप दीप उपहार (भेंट) आदिक उप[illegible] हित होकर समर्पण करे ॥ ७ ॥

उपहार से अवशिष्ट हवि को अग्नि में "ॐ [illegible] महापुरुषाय महाविभूतिपतये स्वाहा" इस मंत्र [illegible] आहुति हवन करे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रकर्षेण नमस्काराभ्यामिति प्रभवौ ॥ ९ ॥

युवान्तु विश्वस्य विभू जगतःकारणं परम् ।
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया ॥ ११ ॥
तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः ।
त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् ॥ १२ ॥
गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग्भवान् ।
त्वं हि सर्वशरीर्यात्मा श्रीःशरीरेन्द्रियाशया ।
नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः ॥ १३ ॥
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ ।
तथा म उत्तमश्लोक सन्तु सत्या महाशिषः ।
इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह ॥ १४ ॥
तन्निःसार्योपहरणं दत्त्वाऽऽचमनमर्चयेत् ॥ १५ ॥
ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा ।
यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इज्या यज्ञाभिनिवर्तकः पुरुषव्यापारो भावनाख्यः क्रिया लौकिकी ॥ १२ ॥

प्रत्ययो नामरूपयोः प्रकाशकः अपाश्रयस्तयोराधारः ॥१३-१६॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदि सर्वसम्पदः इच्छेत्कामयेचेदेवं श्रियं लक्ष्मीं विष्णुं च आशिषां प्रभवौ प्रभवस्थानभूतावित्यर्थः उभौ भक्त्या सम्यक् पूजयेत् ॥ ९ ॥

भक्त्या प्रह्वेण नम्रेण शिरसेति शेषः चेतसा च दण्डवद्भूमौ प्रणमेत्. ततो मन्त्रम्. ओंनमो भगवते महानुभावाय महाविभूतिपतये इति मन्त्रं दशवारं जपेत् ततो वक्ष्यमाणं स्तोत्रमुदीरयेत् पठेत् ॥ १० ॥

तमेवाह--युवामिति । युवां विश्वस्य विभू विभुश्च विभ्वी चविभू पुमान् स्त्रियेत्येकशेषः जगतः परं कारणं स्वयं कारणान्तररहितकारणभूतावित्यर्थः इयं लक्ष्मीः प्रकृतिः "स्त्रीनाम्नी लक्ष्मीमैत्रेय" इत्युपक्रम्योक्तप्रकारेण प्रकृत्यादिस्त्रीनामकपदार्थविभूतिमत्त्वात् प्रकृतिरित्युच्यते प्रकृतिपुरुषादिपदार्थानां स्त्रीपुंसात्मकानां तयोर्विभूतित्ववर्णनात्मकमिदं स्तोत्रं विभूतिभूतां प्रकृतिं विशिनष्टि. सूक्ष्मा कारणावस्थायां निरतिशयसूक्ष्मा दुरवबोधस्वरूपा वा माया आश्चर्यरूपा शक्तिः कार्योपयुक्ता भगवदपृथक्सिद्धविशेषणभूता दुरत्यया भगवत्प्रपत्तेरनितिलङ्घ्या, कथं भगवद्विभूतिभूतायाः प्रकृतेर्लक्ष्मीविभूतित्वमिति नाशङ्कनीयं कृत्स्नस्य कार्यकारणात्मकस्य जगत उभयोरपि विशेषणत्वात्॥११॥

तस्याः प्रकृतेरधीश्वरस्त्वमेव. हे पुरुषोत्तम ! त्वमेव सर्वयज्ञः इज्या त्वियं लक्ष्मीः तत्र यज्ञः प्रधानयागः इज्यात्वङ्गभूता दीक्षणीयेष्ट्यादिका तथा स्मार्तक्रिया च इयं लक्ष्मीरेव तादात्म्यमत्र तत्फलप्रदातृत्वेन तदाराध्यत्वेन च तद्विभूतित्वप्रयुक्तं. तदेवाह—फलभुगिति, त्वम् इयं लक्ष्मीश्च यज्ञियं यत्फलं चरुपुरोडाशादिकं तद्भुक्ते इति तथा. यद्वा, क्रियेयं लक्ष्मीः फलभुक् क्रियाफलभोक्तातु त्वमितीवान्वयःक्रिया लक्ष्म्याः विभूतिः कर्त्ता तु त्वद्विभूतिरित्यर्थः ॥ १२ ॥

तथा गुणव्यक्तिरियं देवी लक्ष्मीः या सर्ववस्तुगता गुणाभिव्यक्तिः सा लक्ष्मीः तद्विभूतिरित्यर्थः भोग्यत्वभोगोपकरणत्वादिगुणानां सर्ववस्तुगतानामभिव्यञ्जकस्तु भवान् त्वद्विभूतिरित्यर्थः तथा गुणभुग्भावान् भुक्तिस्त्वियं देवीत्यपि बोध्यं त्वं सर्वशरीरिणाम् आत्मा शरीरं यस्य तादृशः सर्वशरीरिणो जीवास्त्वद्विभूतिभूताः श्रीर्लक्ष्मीः सर्वेन्द्रियबुद्धिरूपा तद्विभूतिमतीत्यर्थः तथा नामरूपे भगवती लक्ष्मीः प्रत्ययः नामरूपविषयकः प्रकाशः अपाश्रयः आधारः नामरूपयोर्निर्वोढा च त्वमित्यर्थः॥१३ ॥

एवं तौ स्तुत्वा तयोरुक्तधर्मवैशिष्ट्यवत्प्रार्थनाया अपि सत्यत्वं प्रतिजानीते-यथेति । युवां यथात्रिलोकस्य वरदौ परमेष्ठिनौ च यथेदमसत्यं न भवतीतिभावः हे उत्तम श्लोक ! तथा ममाशिषः त्वद्विषयप्रार्थनाः सर्वाः सत्यास्सन्तु श्रिया लक्ष्म्या सह सहितं श्रीनिवासं वरप्रदं इत्थमभिष्टूय तत् आवाहितभगवत्सकाशादुपहरणमविशिष्टं पूजाद्रव्यं निःसार्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपनीय भगवते आचमनं समर्प्य सम्यक् पुनरर्चयेत्॥ १४ ॥१५॥

ततः पुनः स्तोत्रेण स्तुवानाः स्तोत्रं कुर्वाणाः भक्तिकृत-प्रह्वीभावेन चेतसा यज्ञोच्छिष्टमाघ्राय पुनरपि हरिमर्चयेत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रभवौ जनकौ ॥ ६ ॥

दशवारं दशसङ्ख्यया तदूर्ध्वं यथाशक्ति तावती सर्वथा-ऽपेक्षिता ॥ १० ॥

सर्वयज्ञः सर्वान्तर्यामी इयं लक्ष्मीः इज्यान्तर्यामिणी क्रियान्त-र्यामिणी—"अन्तर्यामी तु यज्ञादेर्विष्णुरित्यादिना रमा ।
तत्तच्छब्दैस्ततोवाच्यैव तु मर्वेशरूपतः ॥
अन्तर्यामी श्रियश्चापि विष्णुरेव न संशयः ।
नान्तर्यामी कश्चिदस्ति विष्णोः क्वापि कुतश्चन" ॥

इतिवचनात् फलभुक् यज्ञफलभोक्तरि यजमाने स्थित्वा तत्फलस्य भोजकः ॥ ११ ॥ १२ ॥

सत्त्वादिगुणानां व्यक्तेः कार्यं फलव्यञ्जकः गुणभोक्तरि जीवे स्थित्वा तद्भोजकः शरीरेन्द्रियाणामभिमानिदेवता नामरूपयोर्गुणहेतुत्वात् श्रियश्च गुणाभिमानित्वाच्चात्मरूपे श्रीरि-त्युच्यते प्रत्ययो निश्चयज्ञानं स्वप्रसादजनकत्वम् ॥ १३ ॥ १४ ॥

उपहरणं नैवेद्यं निःसार्य मोचयित्वा ॥ १५ ॥

स्तुवाना स्तुतिं कुर्वाणा यज्ञोच्छिष्टं पूजाशेषं महापुरुषो विष्णुरस्मिन्संस्थित इति बुद्ध्या ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गुणमिति सार्द्धकं परात्परयोरपि तयोर्जगत्कारणत्वे हे-तुमाह----इयं हीति । प्रकृतिर्निजांशाभासेनेति भावः ॥ ११ ॥
तस्या इति । "विष्णोस्तु त्रीणि रूपाणि" इत्यादेः ॥ १२ ॥

तथैवाह----त्वमित्यादि ॥ १३—२३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

इज्या यज्ञाभिनिवर्त्तकः पुरुषव्यापारो भावनाख्यः । क्रिया लौकिकी ॥ १२ ॥

प्रत्ययो नामरूपयोः प्रकाशकः अपाश्रयस्तयोराधारः परमे-ष्ठिनौ परमेश्वरौ । तन्निस्सार्य निर्मल्यापसारणं कृत्वा ॥ १३--१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रकर्षेण सर्वस्याऽप्ययमिति प्रभवौ ॥ ६ ॥

भक्तिप्रह्वेन भक्त्या नम्रेण ॥ १० ॥

युवां [redacted] परं कारणमे-कमस्ति कथमावयोः परं कारणत्वमत आह—इयं या श्रीः रूपा शक्तिः सा प्रपञ्चरहो रेमयात्मशक्येति तृतीय[illegible] प्रकृतिरनादिसिद्धा सूक्ष्मा सर्वैः प्राकृतैर्दोषैरस्पृष्टा प्रकृतिकालकर्मादिभिरुल्लंकृत्वा नत्वात्स्वगर्भाश्वरः स्वामी च्छकितया स्वपरमीत्वेन स्वदन्तर्गतत्वादियं सुतरां कारणमित्यर्थः ॥ ११ ॥

श्रियः भगवदनपायनीत्वं प्रतिपादयति--त्वं सर्वयज्ञ[illegible] इज्या व्यापाररूपा क्रिया फलभोगानुकूलो भोक्तृव्या[illegible] गुणव्यक्तिः भवान् गुणव्यञ्जको गुणभुक् च प्रत्ययो[illegible] प्रकाशकः अपाश्रयोऽन्यनिरपेक्ष आधारश्च त्वम् ॥ १[illegible]

परमेष्ठिनौ परमस्थानवासिनौ ॥ १४ ॥

तदुपहरणं तन्नैवेद्यं निःसार्य आचमनं दत्त्वा [illegible] अत्यादिनाऽर्चयेत् ॥ १५ ॥ १६ ॥

भाषाटीका ।

कामनाओं को पूर्ण करने वाले श्री लक्ष्मी [illegible] भक्ति से नित्य पूजन करें । जो सर्व [illegible] करे ॥ ६ ॥

भक्तिनम्र चित्त से भूमि में दंडवत [illegible] मंत्र जपे पश्चात् इस प्रकार स्तुति करे ॥ १[illegible]

आप दोनों समर्थ हो जगत् के [illegible] जो श्री हैं सोई सूक्ष्म प्रकृति हैं [illegible] शक्ति हैं ॥ ११ ॥

जिस कारण आप इन [श्री लक्ष्मी] [illegible] हैं इसी से आप साक्षात् परमपुरुष हैं [illegible] हैं, ये इज्या हैं, ये क्रियारूप हैं, आप [illegible]

गुणों की व्यक्ति ये श्रीदेवी हैं, [illegible] आप ही । आप सब जीवों के आत्मा [illegible] इन्द्रिय अन्तःकरण रूप हैं, नाम और रूप [illegible] के प्रकाशक और आधार आप हैं ॥ १३ ॥

जैसे आप दोनों लोक के वर देने [illegible] हैं । हे उत्तमश्लोक ! तैसे ही हमारी सब [illegible] हो ॥ १४ ॥

इस प्रकार श्रीदेवी सहित श्रीनिवास [illegible] स्तुति करके जो उपहार समर्पण किया है उसको [illegible] आचमन देकर फिर पूजा करे ॥ १५ ॥

भक्ति नम्रचित्त से फिर स्तुति करे, [illegible] आघ्राण कर फिर हरिका अर्चन करे ॥ [illegible]

पतिं च परया भक्त्या महापुरुषचेतसा ।
प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं पतिः ।
बिभृयात्सर्वकर्माणि पत्न्या उच्चावचानि च ॥ १७ ॥
कृतमेकतरेणापि दम्पत्योरुभयोरपि ।
विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथञ्चन ॥ १८ ॥
विप्रान्स्त्रियो वीरवतीः स्रग्गन्धबलिमण्डनैः ।
अर्चेदहरहर्भक्त्या देवं नियममास्थितः ॥ १९ ॥
उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः ।
अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धये तथा ॥ २० ॥
एतेन पूजाविधिना मासान्द्वादश हायनम् ।
नीत्वाऽथोपचरेत्साध्वी कार्तिके चरमेऽहनि ॥ २१ ॥
श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् ।
पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा ।
पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥ २२ ॥
([१] ब्राह्मणान् भोजयेद्भक्त्या साध्वन्नैर्द्वादशात्मवित् ।
तेभ्यो दद्यात्तिलान् राजन् सोदपात्रान् * गुडान्वितान् ॥ ० ॥)
आशिषःशिरसाऽऽदाय द्विजैः प्रीतैः समीरिताः ।
प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥ २३ ॥
आचार्यमग्रतःकृत्वा वाग्यतः सह बन्धुभिः ।
दद्यात्पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महापुरुषचेतसा ईश्वरबुद्ध्योपनमेद्भजेत् पतिश्च स्वयं प्रेमशीलः सन् पत्न्याः कर्माणि बिभृयात् तदनुकूलो भवेदित्यर्थः ॥१७॥

यतो दम्पत्योर्मध्ये एकतरेण कृतमुभयोरपि भवति ॥ १८ ॥

न विहन्यान्न विच्छिन्द्यात् ॥ १९ ॥ २० ॥

द्वादश मासानित्युक्ते कदाचित्तन्मध्ये मलमासे सति तेन सह त्रयोदशसंख्यायां सत्यां शुद्धस्यैकस्य त्यागः स्यात् हायनमित्युक्ते तन्मध्यपतितस्य तस्याऽपि प्रसङ्गः स्यात् तदुभयं वारयितुमुभयमुक्तम् उपचरेदुपवसेत् ॥ २१ ॥

श्वोभूते प्रभाते सति पयसि शृतेन पक्केन पाकयज्ञविधानेन पार्वणस्थालीपाकविधानेन ॥ २२ ॥ २३ ॥

सुप्रजस्त्वं सत्पुत्रत्वमित्यर्थः वाग्यतस्सन् शेषम् ॥ २४ ॥ २५ ॥

...ध्यवत्प्रार्थनायि...

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

महापुरुषचेतसा ईश्वर... तमाव: हे ... भिश्च पतिमुपनमेत् ... सर्वाः सत्या... वातचन्द्रचन्द्रिका ... वासं वरप्रदं इत्थ ... वरया भ...त्या तैस्तै ... पतिरपि भार्यायां स्वयं ...

(१) श्लोकोऽयमधिकः पठ्यते ॥ वीर०

* इडान्वितान् (पाठान्तरमविशिष्टं ...

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पत्न्याः कर्माणि सर्वाणि बिभृयात् पोषयेत् उक्तधर्मानुकूलो भवेदित्यर्थः ॥ १७ ॥

एवमन्योन्यानुकूल्ये कारणमाह—कृतमिति । दम्पत्योरन्यतरेणापि कृतं कर्म उभयोरपि फलदं भवति यतस्ततोऽन्योन्यानुकूल्येन भाव्यमिति भावः ॥ १८ ॥

अत एव पत्न्यामनर्हायाम अशक्तायां सत्यां पतिरेव एतद्व्रतं समाहितः समाहितचित्तस्सन् कुर्यात् पत्न्यशक्तावेत कर्तुं भर्ता कुर्यादित्यर्थः । विष्णोरिदं व्रतं बिभ्रत् केनापि हेतुना न विहन्यात् अन्तरितं न कुर्यात् विप्रान् वीरवतीः पुत्रवतीः जीवद्भर्तृकाश्च स्त्रियः स्रगादिभिः अहरहः एवं व्रतमास्थितः पुमानभ्यर्चयेत् ॥ १९ ॥

ततो देवं भगवन्तं स्वे धाम्नि स्वस्थाने हृदयादावित्यर्थः । उद्वास्य अग्रतः तस्मै भगवते निवेदितं हविः आत्मनो विशुद्ध्यर्थं सर्वकामप्राप्त्यर्थं च अद्यात् अश्नीयात् ॥ २० ॥

अनेन उक्तेन पूजाविधानेन द्वादशमासान् हायनं वत्सरं नीत्वा कार्तिके मासि चरमे अहनि उपचरेत् व्रतोद्यापनाङ्गमुपचारं कुर्यात् द्वादशमासानित्युक्ते कदाचित्तन्मध्ये मलमासे सति तेन सह द्वादशसङ्ख्यायां सत्यां शुद्धस्यैकस्य त्यागस्स्यात् हायनमित्युक्ते तन्मध्यपातिनस्तस्यापि प्रसक्तिः स्यात् तदुभयं वारयितुं द्वादशमासान् सम्वत्सरमित्युभयोर्ग्रहणम् ॥ २१ ॥

उपचारमेवाह—श्वोभूत इति । श्वोभूते प्रातः अप उपस्पृश्य स्नात्वा पूर्ववद्भगवन्तमभ्यर्च्य पयःशृतेन पयसि क्षीरे पक्वेन चरुणा "शृतं पाकः" इतिनिपातितः शृतशब्दः सहसर्पिषा सर्पिस्सहितेन पाकयज्ञविधिना द्वादशैवाहुतीः पतिर्जुहुयात् ॥ २२ ॥

ततो द्वादश ब्राह्मणान् साध्वन्नैः समीचीनान्नैः भक्त्या भोजयेत् आत्मवित् ब्राह्मणान् परमात्मरूपत्वेन पश्यन्नित्यर्थः तेभ्यो ब्राह्मणेभ्यः पूर्णोदकपात्रैस्सहितान् गुडान्वितान् तिलान् वाजांश्च दद्यात् ॥ ० ॥

द्विजैस्समीरिताः प्रयुक्ताः आशिषः शिरसा धारयन् तेभ्यः प्रणम्य ततस्तदनुज्ञया स्वयं भुञ्जीत ॥ २३ ॥

ततो बन्धुभिस्सह आचार्यमग्रतः पुरः कृत्वा उपवेश्य सुप्रजस्त्वसौभगत्वफलकं चरोर्हविःशेषं पत्न्यै दद्यात् ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पतिः स्वयं यदि पत्न्यां प्रेमशीलस्तर्हि पत्न्यै पत्न्यर्थं, तथा-चरणानि सर्वकर्माणि पतिर्बिभृयात् तर्हि तत्पत्नीकृतं न स्यादिति शङ्का मासूत् उभयोर्दम्पत्योरेकतरेण कृतमिदं पत्न्या कृतं भवति ॥ १७ ॥

ईशोदर्शनादिनाऽनर्हायां पत्न्यां कथमेतदनुष्ठानमन्तरितं घटत इति तत्राह—पत्न्यामिति ॥ १८ ॥ १९ ॥ २० ॥

द्वादश मासान् तदात्मकं हायनं "सम्वत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः" इत्यभिधानात् वर्षं नीत्वा कार्तिके मासि चरमेऽहनि [illegible] र्चनविधिना ॥ २१ ॥

पयःशृतेन क्षीरपक्वेन पाकयज्ञविधानेन स्मार्तसूत्रोक्त[illegible] होममन्त्रस्तूक्त एव ॥ २२ ॥ २३ ॥

द्वादशात्मविरिञ्चेशवादिद्वादशमूर्तिलक्षणवेत्ता, ब्राह्मणा[illegible] दश तत्प्रीतये भोजयेदित्यर्थः । सोदपात्रानुदपात्रसहितान् [illegible] तान् भूमिसहितान् तिलान् भूमितिलसहितगुडशब्द[illegible] सार्धभिकान्नयुक्तानिति वा शोभनं प्रजात्वं येन स तथा [illegible]

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अग्रत इति तदग्रिमदेशं त्यक्त्वा तदग्रे [illegible]

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थ[illegible]

दम्पत्योर्मध्ये एकतरेण कृतमुभयोरपि [illegible]

न विहन्यात् न विच्छिन्द्यात् ॥ १९ ॥

अग्रत इति ल्यब्लोपे पञ्चमी अग्रभागं यथो[illegible]

चरमेऽहनि पौर्णमास्याम् ॥ २१ ॥

श्वोभूते प्रभाते सति पयसि शृतेन पक्वे[illegible]

पार्वणस्थालीपाकविधानेन ॥ २२ ॥ २३ ॥

शेषं सुप्रजास्त्वं सुप्रजस्त्वकरं सुसौभ[illegible]

बद्धा, ततस्तस्य सुप्रजास्त्वं स्यादिति वाक[illegible]

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महापुरुषचेतसा विष्णुबुद्ध्या पतिश्चोपनमेद्भजे[illegible]

सर्वकर्माणि विभृयादित्युत्तरेणान्वयः ॥ १७ ॥

यत एकतरेण कृतमुभयोर्दम्पत्योर्भवति अन[illegible] रेव कुर्यात् न विहन्यात् न छिन्द्यात् अग्रतः [illegible] किकस्त्रीः श्रेष्ठगुर्वतिथ्यादिभिः सह अद्यात् ॥ [illegible]

श्रीनिम्बार्काय नमः । एतेन पूजाविधिना द्वादश[illegible] द्वादशमासयुक्तं हायनं मलमासयुक्तहायनव्यतिरिक्त[illegible] उपचरेदेवं पूजयेत् कार्तिके चरमेऽहनि अमाया[illegible] अमावास्यतः कार्तिकोऽत्र ज्ञेयः "शुक्ले मार्गशिरे [illegible] दनुज्ञया आरभेत व्रतमिदं सार्वकामिकमादितः" [illegible] नुसारात् ॥ २१ ॥

तत्र विधिमाह–श्वोभूतेत्यादिना । श्वोभूते प्र[illegible] उपस्पृश्य स्नानादिकं विधाय पूर्ववत् कृष्णमभ्य[illegible] पयसि पक्वेन पाकयज्ञविधानेन पार्वणस्थालीपाकवि[illegible]

तदनुज्ञया ब्राह्मणानुज्ञया ॥ २३ ॥

सुप्रजस्त्वं सुप्रजस्त्वकरं सुसौभगं सुसौभगकरम्

एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह ।
स्त्रीत्वेतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहम् ॥ २५ ॥
कन्या च विन्देत समग्रलक्षणं पतिं त्ववीरा हतकिल्बिषा गतिम् ।
मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यम् ॥ २६ ॥
विन्देद्विरूपा विरुजा विमुच्यते य आमयावीन्द्रियकल्पदेहम् ।
एतत्पठन्नभ्युदये च कर्मण्यनन्ततृप्तिः पितृदेवतानाम् ॥ २७ ॥
तुष्टाः प्रयच्छन्ति समस्तकामान्होमावसाने हुतभुक् श्रीहरिश्च ।
राजन्महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे अष्टादशसहस्रिकायां पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कन्धे पुंसवनव्रतकथनं नाम
एकोनविंशोऽध्यायः ॥ १९ ॥

समाप्तश्चायं षष्ठस्कन्धः ॥ ६ ॥

हरिः ॐ तत्सत्

भाषाटीका ।

पति को परम भक्ति से और परमात्मा की बुद्धि से तिन २ प्रिय पदार्थों को समर्पण करे और पति भी स्वयं प्रेम शील होकर पत्नी के ऊंचे नीचे सब कामों का भार आप लेले॥१७॥

स्त्री पुरुष दोनों में एक कोई करे तो फल दोनों को होगा यदि किसी कारण पत्नी व्रत के अयोग्य होजाय तो समाहित होकर पति ही व्रत करे ॥ १८ ॥

इस विष्णु के व्रतको धारण कर किसी प्रकार व्रत भंग न करे । नियम में स्थित होकर भक्ति से प्रति दिन परमात्मा की पूजा करे, तथा ब्राह्मण और पतिमती स्त्रियों का माला चंदन बलि अलंकार से पूजन करे ॥ १९ ॥

पश्चात् परमात्मा को वैकुंठ धाम में उद्वासन (विसर्जन) करके उनके आगे जो समर्पण किया है उसको आत्मा की शुद्धि के लिये तथा सर्व समृद्धि के लिये भक्षण करे ॥ २० ॥

ऐसे पूजा विधि से द्वादश मास अर्थात् एक वर्ष व्यतीत कर कार्तिक मास के अंतिम दिवस में सम्यक् उपवास करे ॥ २१ ॥

दूसरे प्रातःकाल स्नान करके पूर्ववत् श्रीकृष्ण की पूजा करके घृत सहित, पाक यज्ञ विधान से दुग्ध पक्व चरु सिद्ध कर उस चरु से पति द्वादश १२ आहुती हवन करे ॥ २२ ॥

प्रसन्न हुए ब्राह्मणों से कथित आशीर्वाद को शिरसे ग्रहण कर, शिर से भक्ति पूर्वक उनको प्रणाम कर, उनकी आज्ञा से भोजन करे ॥ २३ ॥

आचार्य को आगे करके, यतवाक् होकर, सुन्दर प्रजा, ऐश्वर्य, देनेवाले, उस चरुशेष को पत्नी को देवे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अवीरा विधवा धनेश्वरी सत्यपि या सुदुर्भगा सा सुभगा भवति ॥ २६ ॥

य आमयावी रोगी स विरुजा विशिष्टया रुजा विमुच्यते इन्द्रियैः सहितं कल्पं देहं च विन्देदिति शेषः पठन्यो वर्तेत तस्य पितृणां देवतानां चानन्ता तृप्तिर्भवतीत्यर्थः ॥ २७ ॥

उपसंहरति-राजन्निति । महत्पुण्यं जन्म महद् व्रतञ्च ॥ २८ ॥

षष्ठस्कन्धनिगूढार्थपदभावार्थदीपिका ।
सद्भिरासेव्यतामेषा यतिश्रीधरनिर्मिता ॥ १ ॥

इतिश्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीधरस्वामि-
विरचितायाम्भावार्थदीपिकायामेकोनविंशोऽध्यायः ॥ १९ ॥
समाप्तोऽयं षष्ठस्कन्धः ॥ ६ ॥

इति षष्ठ

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सविस्तरं व्रतमुपवर्ण्य तदनुष्ठानफलमाह--एतदिति । एतद्विभोः परमात्मनः व्रतं यथाविधि कृत्वा पुमानिह लोके अभीप्सितार्थं लभते स्त्री तु तद्व्रतमनुष्ठाय सौभाग्यसम्पत्पुत्रपतिदीर्घजीवनकीर्तिगृहान् लभते ॥ २५ ॥

अवीरा अलब्धभर्तृका कन्या तु एतद्व्रतमास्थाय सम्प्राप्ति सल्लक्षणानि यस्य तं पतिं विन्देत लभेत यद्वा अवीरा विधवा तु हतं किल्बिषं यस्याः तां गतिं सद्गतिं लभते मृता प्रजा पुत्रो यस्यास्सा जीवः सुतो यस्याः सा भवेत्तथा दुर्भगा सौभाग्यरहिता सुभगा भवेत् ॥ २६ ॥

विरूपाऽन्यं श्रेष्ठं रूपं विन्देत यः पुमानामयावी रोगी स एतद्व्रतं कृत्वा विरुजः नानाविधरोगाद्विमुच्यते इन्द्रियकल्यदेहं पटुतरेन्द्रियदेहं विन्देत एवमेतद्व्रतकल्पमभ्युदये कर्मणि पठन्यो वर्तते तस्य पितॄणां देवानाञ्चानन्ततृप्तिर्भवति ॥ २७ ॥

ते च पितरो देवाश्च तस्मै पठते सर्वान्कामान्प्रयच्छन्ति पितृदैवतयोर्होमयोरवसाने साक्षाद्धरिः श्रीश्च तुतुष्टे भवेत् तावपि प्रसन्नौ भवेतामित्यर्थः उक्तमुपसंहरति--राजन्निति. हे राजन्, मरुतां महत्पुण्यं जन्म तथा महत्पुण्यं दितेर्व्रतं पुंसवनं च ते तुभ्यं मया अभिहितम् ॥ २८ ॥

इति श्रीवत्साम्बयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसक्ततत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवेष्णववदासेन श्रीवारस्य श्रीवीरराघवाविदुषा विरचितायां श्रीमद्भागवतचन्द्रचन्द्रिकायां श्रीमद्भागवतव्याख्यायां षष्ठस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥

समाप्तोऽयं षष्ठस्कन्धः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जीवपतिमायुष्मन्तं पतिं गृहान् गृहाणि शोभनं सौभाग्यं येन स तथा तम् एतच्चरुशेषविशेषणम् ॥ २५ ॥

कन्या समग्रलक्षणं पतिं विन्देत अवीरा पतिरहिता मृतप्रजा तु जीवत्सुतान्विन्देत ॥ २६ ॥

विरूपा दर्शविरुद्धस्वरूपा अग्र्यं रूपं विन्देत इन्द्रियदेहवाक्रिरहिता वा सा विरुजो विविधरोगान्मुच्यते अभ्युदयं कर्मणि मङ्गलकर्मणि पितृदेवतानां अनन्ततृप्तिमुपैतीति शेषः ॥ २७ ॥ २८ ॥

भक्तिप्रह्वश्रीवासकमतिसमुचितः सुरराशिमिभिः श्रितश्रीब्रह्मप्रायोऽप्रमुखविबुधमुकुटतटीघट्टितपदपीठकं वन्दे ॥ अस्मिकान्तं पनरसर्गविस्तारकपसरोरुहलोचनं सजलजानामम्बाकारं मुदितसुजन समुदायं मर्दितासुरसम्पदम् ॥ १ ॥

सुधा ।

कृता ॥ २ ॥

इति श्रीमन्महेन्द्रपूज्यस्य पादशिष्यस्य विजयध्वजपदरत्नावल्यां श्रीभागवतेविजयध्वजटीकायां एकोनविंशोऽध्यायः ॥ १९ ॥

अनुकूलं यदाविष्टमभूद्वाराधयास्य [illegible] प्रसादतो लब्धमिदं तदा पुण्यदमस्तु [illegible]

समाप्तोऽयं षष्ठस्कन्धः ॥ ६

श्रीमज्जीवगोस्वामिकृतक्रमसन्द[illegible]

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे [illegible] क्रमसन्दर्भे एकोनविंशोऽध्यायः [illegible]

समाप्तोऽयं षष्ठस्कन्धः [illegible]

श्रीमद्विश्वनाथचक्रवर्तिकृत[illegible]

जीवतीतिजीवः सचासौपतिश्च [illegible]

अवीरा पतिपुत्रशून्या वा मृतप्र[illegible] भवति । य आमयावी स विधि[illegible] सह कल्यं समर्थं देहञ्च विन्देत [illegible]

अभ्युदये अभ्युदयिकश्राद्धे [illegible] २७ ॥ २८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां [illegible] षष्ठ एकोनविंशोऽयं सङ्गतः सङ्गतः [illegible]

समाप्तोऽयं षष्ठस्कन्धः ॥[illegible]

श्रीमच्छुकदेवकृतसिद्धान्तप्र[illegible]

फलमाह—एतदित्यादिना अवीरा पतिपु[illegible] षड्रूपाम् ॥ २६ ॥

विरूपा विन्देत आमयावी विरुजा विधि[illegible] इन्द्रियैः कल्यं देहं च विन्देत अभ्युदयं [illegible] वर्तेत तस्य पितॄणां देवतानां च अनन्त[illegible] रति—राजन्निति, हे राजन् मरुतां महत्पुण्यं व्रतं च मया तेऽभिहितम् ॥ २७ ॥ २८ ॥

इतिश्रीमद्भागवतनिंबार्कचरणचिन्तन[illegible] सुधीप्रणीते श्रीमद्भागवतसिद्धा[illegible] एकोनविंशाध्यायार्थप्रकाश [illegible]

संख्या ॥ २६७५ ॥

समाप्तोऽयं षष्ठस्कन्धः ॥ ६

भाषा टीका ।

समर्थ हरि के इस व्रत को करके पुरुष इस संसार में इच्छित अर्थ को प्राप्त होता है । स्त्री होकर इस व्रत को करे तो सुभगा श्री सन्तान पति यश और गृह को प्राप्त हो ॥ २५ ॥

कन्या समग्र लक्षण वाले वर को प्राप्त हो विधवा निष्पाप होकर गति को प्राप्त हो । मृत पुत्रवाली पुत्रको और धनी होकर जो दुर्भागिनी है वह सुभागिनी हो । कुरूपा सुन्दररूप को प्राप्त हो और रोगी वह विशेष रोग से छूटे और इन्द्रियों सहित समर्थ देह को प्राप्त होय ॥ और अभ्युदय वाले कर्म में इसे पढ़े, तो पितृ देवताओं को अनन्त तृप्ति हो ॥ २६ ॥ २७ ॥

हवन किये पीछे अग्नि लक्ष्मीनारायण सन्तुष्ट हो कर समग्र कामनाओं को देते हैं । हे राजन् ! मरुत देवोंका जन्म और बड़ा पुण्य दिति का व्रत मैंने तुम्हारे आगे वर्णन किया ॥ २८ ॥

श्रीमद्भागवते षष्ठस्कन्धभावार्थबोधिनी ।
भाषा भागवताचार्यकृता पूर्ति समन्वगात् ॥

इतिश्रीमद्भागवत महापुराण षष्ठस्कन्ध एकोनविंश अध्यायकी भाषाटीका समाप्त ॥ १९ ॥

श्रीरुक्मिणीरमणायनमः ॥

षष्ठस्कन्धकी भाषाटीका समाप्त हुई ॥ ६ ॥

हरि ओम् तत्सत् ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे एकोनविंशोऽध्यायः समाप्तः ॥ १९ ॥

समाप्तश्चायं षष्ठस्कन्धः ॥ ६ ॥

॥ हरिः ओम् तत्सत् ॥

श्रीकृष्णार्पणमस्तु ।

श्री १०८ श्रीराधारमणो जयति ।

महर्षिप्रवरश्रीकृष्णद्वैपायनप्रणीतम्

श्रीमद्भागवतम् ।

श्रीश्रीपादश्रीधरस्वामिकृतभावार्थदीपिका, श्रीराधारमणदासगोस्वामिभिर्विरचितदीपिन्याख्य
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका, श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली, श्री
चार्य्यकृतसुबोधिनी, श्रीगौडीयवैष्णवाचार्य्यप्रवरश्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भाख्यटी
श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी, श्रीनिम्बार्कसम्प्रदायिश्रीमच्छुकदेवकृतसिद्धा
प्रदीपाख्यटीका इत्यष्टभिर्व्याख्याभिर्भाषानुवादेन च समलङ्कृतम् ।

इदम्

परमहंसपरिव्राजकाचार्य्यश्रीमत्स्वामिप्रकाशानन्दसरस्वतीपूज्यपादशिष्य

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम् ;

वङ्गदेशान्तर्गत ताड़ास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि

श्रीवनमालिराय बहादुरस्य

सर्व्वपूर्णसाहाय्येन

प्रकाशितञ्च ।

तच्च

काश्मीरमण्डलान्तर्वर्ति 'कान्नूर' पं० श्रीरङ्गाचार्यद्वारा संशोध्य,

श्रीवृन्दावनधामनि

स्वकीये "श्रीदेवकीनन्दन" यन्त्रालये

मुद्रितम् ।

सम्वत् १९६१

सप्तमस्कन्धः

श्रीलक्ष्मीनृसिंहाय नमः ।

श्रीमद्भागवतम् ।

सप्तमस्कन्धः ।

प्रथमोऽध्यायः ।

॥ ॐ नमो भगवते वासुदेवाय ॥

राजोवाच ।

समः प्रियः सुहृद्ब्रह्मन् भूतानां भगवान् स्वयम् ।
इन्द्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा ॥ १ ॥
न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः ।
नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ॥ २ ॥
इति नः सुमहाभाग ! नारायणगुणान्प्रति ।
संशयः सुमहान्जातस्तद्भवांश्छेत्तुमर्हति ॥ ३ ॥

श्रीशुक उवाच ।

साधुपृष्टं महाराज ! हरेश्चरितमद्भुतम् ।
यद्भागवतमाहात्म्यं भगवद्भक्तिवर्धनम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीगणेशाय नमः ॥

स्वभक्तपक्षपातेन तद्विपक्षविदारणम् ।
नृसिंहमद्भुतं वन्दे परमानन्दविग्रहम् ॥ १ ॥
ऊतिः पञ्चदशाध्यायैः सप्तमे वर्ण्यतेऽधुना ।
ऊतिश्च वासनाप्रोक्ता सत्कर्मानुसारिणी ॥ १ ॥
अशुभा च शुभा चेति द्विधा सा हेतुभेदतः ।
अशुभा महतां कोपाच्छुभा सदनुग्रहात ॥ ३
हरेर्द्वारपयोर्वैकुण्ठे वसतोरपि ।
चतुःसनकधा विष्णुद्वेषायशुभवासना
यथा च दैत्यगर्भेऽपि प्रह्लादस्य सतः शि
नारदानुग्रहाद्वास विष्णौ सद्भक्तिवास

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वभक्तं च सदा विष्णुर्द्विषन्तमपि रक्षति ।
तृतीयेऽथ भवे ह्याख्यावकरोदात्मसात्पुनः ॥ ६ ॥
अतोऽमर्गाधियाः यत्नः कार्योमहदनुग्रहे ।
इत्येतदर्थमूर्तीनामत्र व्याख्यामुच्यते ॥ ७ ॥
तत्रादौ दशभिर्दैत्यतत्पुत्रमतिभेदतः ।
महत्कोपानुकम्पोत्थवासनाभेद उच्यते ॥ ८ ॥
वासनाच युज्येत कर्मभिः शुद्धचेतसः ।
हेतु पञ्चभिस्तस्मात्निरूपते धर्मनिर्णयः ॥ ९ ॥
तत्र प्रथमेऽध्याये हिरण्यकशिपोः सुते ।
विष्णुभक्ते विरोधस्तु विप्रशापजईर्यते ॥ १० ॥

यदुक्तम् पूर्वस्कन्धान्ते "हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना । मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत्" इति । तच्छ्रुत्वा विस्मितः परीक्षित्पृच्छति—समइति त्रिभिः । न हि समस्य सुहृदश्च वैषम्यं नामास्ति नच प्रियस्य प्रीतिकर्तृषु वैषम्यं युक्तमित्यर्थः ॥ १ ॥

किञ्च यस्य वैः प्रयोजनं सिध्यति स तत्पक्षपाती भवति देवयोनिभिर्निर्मित्तैर्षिणा हन्ति ननु तदत्रास्तीत्याह—नहीति । निःश्रेयसं परमानन्दएव आत्मा स्वरूपं यस्य असुरेभ्योऽपि भयं नास्ति अतोविद्वेषोपि नास्त्येव. तत्र हेतुः, अगुणस्ये गुणाधीनौ प्रीतिद्वेषाविस्यर्थः ॥ २ ॥

श्रीनारायणस्य गुणाननुग्रहनिग्रहादीन् प्रति तत्त्वं संशयम् ॥ ३ ॥

भागवतस्य प्रह्लादस्य माहात्म्यं गीयत इतिसम्बन्धः ॥ ४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

॥ श्रीमते रामानुजाय नमः ॥

पूर्वस्मिन् स्कन्धे अष्टादशेऽध्याये "हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना" इति विष्णोरिन्द्रस्य पक्षपातित्वमुक्तम् तत्र सर्वान्तरात्मनः सर्वभूतसुहृदो निरतिशयप्रियरूपस्यावाप्तकामस्य निरस्ताखिलदोषस्य परमकारुणिकस्य श्रीभगवतः कथं प्राकृतवदैवषम्यनैर्घृण्यादिकम् ? इति पृच्छति राजा—सम इत्यादिना त्रिभिः श्लोकैः । यद्यपि तत्तज्जीवकर्मगुणानुगुणयेनान्तरात्मतया नियन्तुर्न वैषम्यादिदोषप्रसक्तिरिति तत्रतत्र बहुवारमुक्तमिति न शङ्कावकाशः, तथापि तत्रतत्रप्रसङ्गादुक्तमेव तद्दृढयितुं किं गुणानां कर्मणां च प्रत्येकं सुखदुःखादिनिमित्तत्वम् उत समुच्चितानाम्, अथवा कर्मणामेवनिमित्तत्वं, गुणानां तु तदुपयुक्त गुणानामेव तन्निमित्तत्वं कर्मणां तु गुणोपन्नयापचयादिनिमित्तत्वमित्यादिशङ्का परिहाराय श्रोतुं च प्रश्नः, सम इति हे ब्रह्मन् ! भगवान् पूर्णषाड्गुण्यो निरस्तनिखिलदोषश्च अवाप्तकामत्वं सूचितम् तत एव स्वप्रयोजननिरपेक्षत्वञ्च सः निरस्तनिखिलदोषत्वादेव द्वेष्यप्रियविभागरहितः स हि रागद्वेषादिमूलकः तदभावात्सम इति भावः । किञ्च सर्वभूतानां देवादीनां असुरादीनां च सुहृद्धितैषी आत्मत्वादितिभावः महात्मनः किञ्चिच्छरीरं हितमन्यदहितमात्मत्वादेव च निरतिशयप्रियः एवम्भूतः स्वयं साक्षादेवेन्द्रस्यार्थे प्रयोजनार्थं कथं दैत्यानवधीत्कृतवान्, यथा विषमो रागद्वेषादिप्राकृतगुणयुक्तस्तद्वत् ॥ १ ॥

साक्षान्निःश्रेयसात्मनः पुरुषार्थस्वरूपस्य निरतिशयानन्दरूपस्येत्यर्थः अस्य भगवतः सुरगणैरिन्द्रादिभिर्नेष्टार्थः तदनुगृहीतेन्द्रादिभिः साध्यः कश्चित्पुरुषार्थो न तस्यास्ति स्वयमेव साक्षान्निःश्रेयसात्मत्वादिति भावः तथा असुरेभ्य उद्वेगो भयं तेषु विद्वेषश्च नास्त्येव तत्र हेतुं वदन् तं विशिनष्टि, अगुणस्येति. हि यस्मादगुणस्य सत्त्वादिगुणतन्मूलकरागद्वेषभयरहितस्य ॥ २ ॥

इत्येत्थं हे महाभाग ! निर्गुणस्य श्रीनारायणस्य गुणान्प्रति गुणविषयकोमहान् संशयो जातो वर्तते तद्गुणास्तु समत्वादयश्चेदात्, गुणाननुगुणोत्येतत्संशयात्मकमज्ञानं छेत्तुमपोहितुं भवानेवार्हति नान्य इत्यर्थः ॥ ३ ॥

एवमापृष्टो मुनिस्तावद्राज्ञः प्रश्नमभिनन्दति—साध्विति । हे महाराज ! अद्भुतं प्राकृतचेष्टासजातीयत्वेन चिन्तयितुमशक्यं हरेश्चरितंप्रति साधु पृष्टं हरिचरित्रविषयकसंशयोद्घाटकरूपत्वात्प्रश्नः साधीयानित्यर्थः । साधुत्वमेव प्रश्नस्य स्पष्टयितुं चरितं विशिनष्टि—यदिति. यत्र हरेश्चरितं भागवतानां माहात्म्यं यत्र तादृशं अस्त्येवं ततः किं तत्राह, भगवद्भक्तिं वर्धयतीति, भगवद्भक्तिवर्धनं भगवद्भक्तेर्वर्धनं वृद्धिर्यस्मादिति वा भागवतमाहात्म्येन भगवद्भक्तिवर्धकेन युक्तत्वाद्भगवच्चरित्रस्य तद्विषयकः प्रश्नः साधुरिति भावः ॥ ४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

॥ श्रीवायुपुत्रायनमः ॥

षष्ठस्कन्धाभिधे तीर्थे स्नातः सप्तमनामनि ।
श्रीमद्भागवते स्नातुं प्रयते तत्त्वसन्निधेः ॥ १ ॥
सेवा येषामपवर्गगतिर्जगतामवहारते—
श्रीमद्विष्णुपदाम्बुजसरोरुहयुगले भ्रमन्तः ।
सन्तः कुर्वन्तु दयां मयि विजयध्वजतीर्थे—
नित्यानित्याश्रयस्तावितिजाङ्घ्रिमनुनखतीर्थसुतीर्थे ॥

सन्ततवेदान्तपारनिष्ठितानामपि श्रीनारायणपरमप्रसादमन्तरेणामायादितसमीचीनज्ञानामृतकलानां कचित्कचिदसुरजनमोहाय प्रदर्शितसुकर्मोपितसपक्षादिभिरिव भगवतः प्रादुर्भावैस्तत्त्वे संशयालूनां सतां विसंशयार्थं श्रीनृसिंहावतारस्तत्प्रसक्तये नानाविधवर्णाश्रमाचारभेदविचारस्तत्पूजाप्रकारश्च निरूप्यते अस्मिन्स्कन्धे. तदर्थं परीक्षित्प्रश्नपूर्वकमुपोद्घातं रचयति—सम इति । यो भगवान् भूतानां योग्यतातारतम्येन पक्षपरिग्रहशून्यः आत्मादेः प्रियश्च "तदेतत्प्रेयः" इति श्रुतेः सत्तादिप्रदत्वात्सर्वजीवसमर्पणादिसुकृतस्य सुखलक्षणफलदातृत्वेनोपकर्तृत्वाच्च सुहृत् किमत इति तत्राह, स्वयमिति. स स्वयं विषम इवेन्द्रस्यार्थे स्वप्रयोजनमन्तरेण परप्रयोजनार्थं दैत्यानवधीदित्यन्वयः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, सुरगणैः क्रियमाणस्य अप्रयोजनस्य सम्भवादवर्धीरिति किं न स्यादिति तत्राह—न हीति । हि शब्दो हेत्वर्थः कुतो नास्तीत्यत आह—निःश्रेयसात्मन इति, नित्यनिर्दुःखानन्दस्वरूपस्य तादृशत्वं मुक्तस्याप्यस्तीति तत्राह--साक्षादिति, नित्यनिर्दुःखानन्दानुभवस्वरूपस्य परप्राप्यप्रयोजनाभावान्मुक्तस्य तदभावात्. भगवत्सुरप्रद्वेषात्सुरहितं क्रियत इति तत्राह--नैवेति, विद्वेषश्च तत्तत्स्वरूपद्योतनायासुरेभ्य इति पञ्चमी 'वृक्षात्पर्णं पतति' इतिवत्कादाचित्कत्वाभावान्नित्ये द्वेषं वधानुपपत्तिरन्यथा वधस्यापि सन्ततानुवृत्तिः स्यादतो नोपपत्तिः स्यादिति भावः स्वाभिभववक्षणाभयात्तद्वध इति तत्राह—नेति, उद्वेगो भयलक्षणं कुत इत्यत उक्तम् अगुणस्येति "प्राकृतगुणसम्बन्धस्य तादृक्स्वभावत्वाद्धरेस्तदभावान्निर्गुणश्च" इतिश्रुतेः अनेन निःश्रेयसात्मनोऽपि गुणसम्बन्धेन जीववत्तथात्वं स्यादिति शङ्कापि निरस्तेति ज्ञायते ॥ २ ॥ ३ ॥

प्रामाणिकत्वद्योतनाय प्रश्नं स्तौति—साध्विति । तत्र हरिचरिते भागवतानां माहात्म्यं भगवद्भक्तिवर्द्धनमित्यनेन तन्माहात्म्यं भगवन्माहात्म्याविनाभूतमित्यवगन्तव्यम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ श्रीश्रीकृष्णोजयति ॥

अथ सप्तमस्कन्धस्यक्रमसन्दर्भः ।

सप्तमक्रमसन्दर्भे सन्दर्भाणां ममाहृतिः ।
क्रियते यत्निदेशेन स मे ऽनन्यगतेर्गतिः ॥

परमात्मत्वेन समः सुहृद्धितकारी प्रियः प्रीतिविषयो भगवान् एवं सति साम्येनैवोपकर्तव्यत्वेन प्रीतिविषयत्वेन च सर्वेष्वेवप्राप्तेषु कथं विषमइव दैत्यानवधीत् विषमत्वमुपलक्षणाम् । असुहृदिवाप्रिय इव चेति ॥ १ ॥ २ ॥ ३ ॥

साधु पृष्टमिति सार्द्धमेवान्वितम् । हे महाराज ! इदं यत् पृष्टं तत् साधु सुविचारितमेव. किन्तु हरेश्चरितमद्भुतमपूर्वम् अवैषम्येऽपि विषमतया प्रतीयमानत्वेन विचारातीतत्वात्. यत् अत्र हरेश्चरितं भगवद्भक्तिवर्द्धनं भागवतमाहात्म्यं भागवतानां श्रीप्रह्लादोपवर्णितभक्तवृन्दानां माहात्म्यं वर्ण्यते । अनेन भागवतार्थमेव सर्वं करोति भगवान् भक्तार्थमित्यस्यैवार्थस्य पर्यवसानं भविष्यतीति व्यञ्जितं । टीकाच स्वभक्तपक्षपातेनेत्यादिना । अतः गीयतइति । परमं पुण्यं यथास्यात्तथा या गीयते तां कथामिति वंशादेरध्याहारेणान्वयः । अत्र च तैर्गीयमानत्वेन भक्तैकसुखप्रयोजनत्वमेव व्यञ्जितम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

॥ श्रीकृष्णाय नमः ॥

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् ।

[illegible]

गोपरामाजनप्राणप्रेयसेतिप्रभूष्णवे ।
तदीयप्रियदास्याय मां मदीयमहं ददे ॥

ऊतिः स्याद्वासना सात्र सप्तमे कथ्यते त्रिधा[illegible]
अशुभाच शुभाचापि कोपतोऽनुग्रहात् स[illegible]
सन्तश्च त्रिविधाः शुद्धभक्ता ज्ञानादिमिश्रि[illegible]
भक्तिदृष्टानास्तन्निभज्ञानवन्तश्च कीर्तिता[illegible]
हिरण्यकशिपोः स्वाभाविकीया वासनाऽ[illegible]
तत्र हेतुः सनन्दादिकोपः प्राचीनएव स[illegible]
तस्यापि पुत्रो यस्तस्य प्रह्लादस्य शुभा[illegible]
शुद्धभक्तौ वासना श्रीनारदानुग्रहकृपा[illegible]
तत् संश्रय समागमः कुञ्जरात् तस्य[illegible]
दीनता मानदत्वादि[illegible]
भक्तिवल्ली नृभिः पाल्या श्रवणाद्या[illegible]
एवं कथादशाध्यायां भक्तेः केवलयमि[illegible]
पञ्चाध्यायां कथाभक्तेः प्राधान्यं गुणा[illegible]
तादृग्भक्तगुरोर्वैभवं दर्शयेत्तादृगास्य[illegible] ॥
इत्युक्तिषु क्रमतः प्रेमशान्तभक्तत्वमुक्ता[illegible] ।
एवं पञ्चदशाध्यायकमप्तमः साधु[illegible]
तत्रतु प्रथमे विष्णोर्वैषम्यं वार[illegible]
तस्य पार्षदयोराह सङ्क्षेपात्[illegible]

पूर्वस्कन्धान्ते "हतपुत्रा दितिः शक्रपा[illegible] मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत्" [illegible] विष्णोर्वैषम्यमसहमान इव स्वयमवगतसि[illegible] मुखादपि समाधानामृतमास्वादयितुमाह--सम[illegible] कथं वैषम्यं ! प्रियस्य कथमसुरेषु प्रीत्यभावः ! [illegible] सौहार्दम् ? ॥ १ ॥

न चेन्द्रादिभिस्तस्य सुखं सिद्ध्यतीत्यतस्तत्[illegible] मित्याह--नेति । निःश्रेयसं परमानन्दएव आत्मा [illegible] नहिसुखस्वरूपस्य कश्चिदन्यः सुखमाधयेदिति[illegible] निरुद्वजकेस्तस्य दुःखं भवेद्यतस्तेषु निग्रह इत्या[illegible] उद्वेगो नास्त्यतो न विद्वेषस्तत्र हेतुः अगुण[illegible]
गुणान् अनुग्रहनिग्रहादीनूप्रति ॥ ३ ॥
यद्यतः प्रश्नात् हरेश्चरितं तदुत्तरत्वेनावदय[illegible]

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

॥ श्रीकृष्णाय नमः ॥

श्रीकृष्णं नियतानन्दं प्रणम्येह सुखप्र[illegible]
सिद्धान्तद्योतको दीपः सप्तमेऽथ वितन्य[illegible]
धिविधावासनास्त्वत्र कामद्वेषादिकारिताः ।
कृष्णे कृष्णापदाः प्रोक्ता अन्येष्वन्यप्रदा[illegible]
हरेर्जानं च भक्तिश्च तथा वर्णाश्रमक्रि[illegible]
अन्तःकरणशुद्ध्यर्थो वर्ण्यते परमादरात् ।

अतिक्रान्तस्कन्धस्याष्टादशाध्याये "हतपुत्रा दि[illegible] प्राहृता विष्णुना । मन्युना शोकदीप्तेन ज्वलन्ती पर्य[illegible] विष्णोरिन्द्रपक्षपातित्वं श्रुत्वा पृच्छति-सम इति [illegible]

गीयते परमं पुण्यमृषिभिर्नारदादिभिः ।
नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ॥ ५ ॥
(१) (जिह्वां लब्ध्वापि यो विष्णुं कीर्त्तनीयं न कीर्त्तयेत् ।
लब्ध्वापि मोक्षनिःश्रेणीं स नारोहति दुर्मतिः ॥ ० ॥
तस्माद्गोविन्दमाहात्म्यमानन्दरससुन्दरम् ।
शृणुयात्कीर्त्तयेन्नित्यं स कृतार्थो न संशयः ॥ ० ॥
तस्मादिमां कथां पुण्यां गोविन्दचरणाश्रिताम् ।
महापुण्यप्रदां यस्माच्छृणुष्व नृपसत्तम ! ॥ ० ॥)
निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ।
स्वमायागुणमाविश्य बाध्यबाधकतां मतः ॥ ६ ॥
सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ।
न तेषां युगपद्राजन् ! ह्रास (२) उल्लास एव वा ॥ ७॥
जयकाले तु सत्त्वस्य देवर्षीन् रजसोऽसुरान् ।
तमसोयक्षरक्षांसि तत्कालानुगुणोऽभजत् ।
ज्योतिरादिरिवाभाति सङ्घातान्न विविच्यते ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

…उद्वेगादिकारिणीभूततमोरज आदिगुणरहितस्य ॥२॥

…स्य गुणान् निग्रहानुग्रहरूपान् प्रति सुमहान् संशयो-…न् छेत्तुमर्हति ॥ ३ ॥

…ष्टोमुनिः राजप्रश्नाभिनन्दनपूर्वकम् नहि भगवति …वगन्धवातस्पर्शोपि प्रकृतिगुणविमोहितजीवकर्मानुरूपं जीवोपकारार्थं स्वकृतधर्मसेतुरक्षार्थं सर्वकर्त्ता सर्वात्मा सर्वेश्वरोभगवान् करोतीत्युत्तरमाह-साधु-…रिदमिः श्लोकैः । अद्भुतं सर्वपुरुषार्थप्रदत्वेनाश्च-…रितं मां प्रति त्वया साधु पृष्टम्. यच्चरेश्चरितं …त्म्यं भागवतानां माहात्म्यं यस्मिन् तथाभूतं भगव-…यतीति तथा ॥ ४ ॥

भाषाटीका ।

॥ श्रीरुक्मिणी रमणो जयति ॥

श्री…पफणामाणिक्यरञ्जितश्रीपदाम्बुजाय नमः ॥
नत्वा श्रीरुक्मिणीकान्तं ध्यात्वा रामानुजं हृदि ॥
…मोऽज्ञवान् गुलमवताद्वान् प्रणम्य च ॥ १ ॥
…कन्धभावार्थबोधिनी भक्तसम्मता ॥

भाषा भागवतार्थेण क्रियते साभिवर्द्धताम् ॥ २ ॥

राजो वाच ॥

हे ब्रह्मन् ! भगवान् स्वयं प्राणियों का सम और प्रिय है । फिर इन्द्र के लिये विषम के तरह दैत्यों को क्यों मारा ? ॥ १ ॥

साक्षात् परमानन्द स्वरूप इस भगवान का देवताओं से कुछ प्रयोजन नहीं तथा असुर लोगों से कुछ द्वेष नहीं, तथा प्राकृत गुण शून्य के कुछ उद्वेग नहीं ॥ २ ॥

हे महा भाग ! इस प्रकार श्री नारायण के निग्रह अनुग्रहादि रूप गुणो का मुझ को बडा संशय उत्पन्न हुआ है इस संशय के छेदन करने को आपही योग्य हैं ॥ ३ ॥

श्रीशुक उवाच ॥

हे बड भागी हे राजन् ! आपने हरिका अद्भुत चरित्र भला पूंछा । क्योंकि जिसमें भगवद्भक्ति के बढाने वाला भागवत (भक्त) का माहात्म्य है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णाय व्यासाय कृष्णं मुनिं नत्वेत्यर्थः ॥ ५ ॥

---

(१) व्याख्यानमन्तरा एते श्लोकाः अधिकाः दृश्यन्ते—वीर० (क) पुस्तके । (२) …

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्मात्प्रकृतेः परः अतो निर्गुणः अतएवाजः अतएवाऽव्यक्तो रागद्वेषादिनिमित्तभूतदेहेन्द्रियादिरहितः सोऽपि स्वमायागुणं सत्त्वादिकमाविश्याधिष्ठाय बाध्यान्प्रति यद्वा देवासुराणां परस्परं या बाध्यबाधकता तां गतः प्राप्तः तत्र हेतुर्जात इत्यर्थः ॥ ६ ॥

तत्र गुणानां क्षीयत्वे सति प्राकृतपुरुषवद्विषमः स्यात्तु नास्तीत्याह—सत्त्वमिति । ननु, स्वेच्छया गुणाधिष्ठानेनापि पक्षपातवैषम्यं स्यादेव न तस्य कालकृतत्वादित्याह—न तेषामिति सार्धेन । उल्लासो वृद्धिः ॥ ७ ॥

सत्त्वस्य जयकाले देवादीनृषींश्चाभजत् तत्रस्थं प्रविश्य वर्धयतीत्यर्थः रजसो जयकाले यक्षरक्षांसि तस्य कालस्यानुगुणस्तत् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतस्तत्परमं पुण्यमतीवपुण्यतमं चरित्रं नारदादिभिः ऋषिभिर्गीयते यतस्त्वत्प्रश्नः साधुस्ततोऽहं कृष्णाय व्यासाय मुनये नत्वा हरेः कथां कथयिष्ये हरिगुणविषयकसंशयरूपत्वात्प्रश्नस्य तद्गुणवर्णनरूपकथाकथनेनैवोत्तरयामीत्यभिप्रायेण कथां कथयिष्ये इत्युक्तम् ॥ ५ ॥

एवं कथाकथनं प्रतिज्ञायाथ सत्त्वादिगुणोद्भवाभिभवाविना देवादीनां जयपराजयौ सत्त्वादिगुणाश्च तत्तज्जीवकर्मावशोद्भवाभिभववन्तः प्रसिद्धाः "कर्मवश्या गुणा ह्येते सत्त्वाद्याः पृथिवीपते" इत्यादिभिः, अतः सत्त्वान्तरात्मतया अवस्थाय तत्तज्जीवकर्मानुगुणं गुणान्प्रेरयतः ईश्वरस्य न वैषम्यादिकमिति परिहरति—निर्गुणोपीति । निर्गुणः हेयगुणरहितः रागद्वेषादिरहित इत्यर्थः अव्यक्तः प्रमाणान्तराणामगोचरः अनेन प्रत्यक्षादिप्रमाणगोचररागद्वेषादिहेयगुणयुक्तप्राकृतवैलक्षण्यमुक्तम्, अत एव अजः कर्मायत्तोत्पत्त्यादिरहितः भगवान्पूर्णषाड्गुण्यः प्रकृतेः परः"भूमिरापोऽनलो वायुः" "अपरेयमितस्त्वन्याम्" इत्युक्तचिदचिदात्मकप्रकृतिद्वयाद्विलक्षणः अपिशब्देनैवंविधस्य वैषम्याद्यनर्हता सूच्यते. यद्यप्येवंविधः तथापि स्वमायागुणमाविश्य स्वांशभूतां गुणविशिष्टां प्रकृतिमाविश्येत्यर्थः, आवेशश्चात्र प्रेरणपर्यन्तः "अन्तः प्रविष्टः शास्ता जनानाम्" इति श्रुतेः । ईयतीति वक्ष्यमाणत्वाच्च बाध्यबाधकतां गतः बाध्यबाधकदेवासुरवर्गयोरन्तरात्मतया तत्तच्छरीरकत्वेनावस्थित इत्यर्थः गुणकर्मानुगुणप्रेरणमात्रशरीरभूतदेवासुरवर्गगतो बाध्यबाधकभावः, न प्रकृतिद्वयविलक्षणतदात्मभूतपरमात्मगतः । यथा, देहादिगतावस्थाः नात्मगता इत्यपि भावः ॥ ६ ॥

एतदेव प्रपञ्चयितुं तावद्गुणानां प्रकृतेरेव सम्बन्धित्वं तेषां तत्तज्जीवकर्मानुसारेण परिणामस्वभावत्वञ्चाह-सत्त्वमिति । सत्त्वादयः प्रकृतेरेव गुणाः, न त्वात्मनः; परमात्मनः परमात्मशरीर-
[illegible]

सत्त्वादीनां सर्वेषां ह्रासोऽभिभवः उल्लास उद्भवश्च भवति किन्तु तत्तत्कर्मपरिपाककालानुगुणं कदाचित् ह्रासः कदाचिदुल्लासश्च भवतीत्यर्थः ॥ ७ ॥

ततः कथं वैषम्यपरिहारः ? इत्यत आह—जयकाले [illegible] सत्त्वस्य जयकाले उत्कर्षकाले कर्मायत्तसत्त्वगुणोपर्व [illegible] इत्यर्थः देवानृषींश्चाभजत्तदनुग्राहको भवति रजसः [illegible] इत्यनुषङ्गः असुरानभजत् तमसो जयकाले तु यक्षान् [illegible] तत्कालानुगुणस्तत्तत्कर्मविपाककालानुगुणोऽभजत्. [illegible]

"गुणप्रवाहपतितो भूतवर्गोऽपि यात्ययम्
कर्मवश्या गुणा ह्येते सत्त्वाद्याः पृथिवीप [illegible]"

इति भगवत्पराशरवचनात्. सत्त्वादिगुणानां तत् [illegible] कालानुगुणह्रासोल्लासरूपपरिणामप्राचुर्यञ्च [illegible] [illegible]न सत्त्वेन दिवं देवाः प्रपेदिरे । धरां रजः स्वभा[illegible] रीत्या देवादीनां स्वस्वकर्मायत्तसत्त्वादिगुण[illegible] सत्त्वादिगुणानामुल्लासः सुखदुःखमोहाद्यापादक [illegible] गीतम्—

"ज्ञानं यदा तदा विद्याद्विवृद्धं [illegible]
लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृ[illegible]
रजस्येतानि जायन्ते विवृद्धे कु[illegible] ।
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह [illegible] ॥
तमस्येतानि जायन्ते विवृद्धे कुरुनन्द[illegible] ॥"

ईश्वरस्य तु सर्वान्तरात्मत्वं बहुप्रमाण[illegible] सत्यमुक्तं भवति. सर्वान्तरात्मतयावस्थित ईश्वरः [illegible] चिदेव विजयं कस्यचित्सर्वदा पराजयं [illegible] शति. अपि तु तत्तद्देवादिकर्मपरिपाककालानु[illegible] [illegible]कालेषु देवादीनां विजयं प्रतिदिशति अन्येष[illegible] गुणोद्भवाभिभवयोश्च कर्माधीनत्वात्तदनुरूपप्रवृत्ति[illegible] ष्यामिति. ननु, कर्मपरिपाककालानुगुणोल्लास[illegible] चयदशायां तद्गुणप्रचुराणां देवादीनां जयमा[illegible] इत्यत्रयुक्तं, रजस्तमसोरुपचयदशायामसुरराक्षसा[illegible] तदुपचयस्य दुःखमोहादिफलकत्वेन पराजया[illegible] रजस्तमसोरुल्लासकालेऽसुरादीन् भजतीत्यस्य तेषां [illegible] तीत्यर्थः अपि तु रजस्तमसोरुल्लासफलभूतदुःखमो[illegible] पराजयादिकमावहतीत्यर्थश्च यद्देवासुरादीनामपि [illegible] परिपाकानुगुणं सत्त्वोल्लासस्तदा जयं प्रदिश[illegible] पराजयम्. एवं देवादीनामपि कर्मविशेषपरिपाकानु[illegible] द्रेकदशायां जयं, तेषामेव पुनः कर्मविशेषपरिपाकानुग[illegible] सत्त्वोल्लासे सति दुःखादिकरं पराजयादिकमिति. विशेषः, देवादीनां पुण्यकर्मणां सत्त्वप्रचुरत्वात्प्राय सत्त्वोल्लासात्प्रायशो विजयः, कादाचित्कः पराजयः; [illegible] स्वपुण्येन रजस्तमःप्रचुरत्वात्तयोरेव प्रायशः उ[illegible] पराजयः कादाचित्को विजय इति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रश्नप्रतिवचनं भगवदनुग्रहमन्तरेण सुवचं न स्यादिति प्रकटनाद् भगवन्तं प्रसाद्य वक्तव्यार्थं प्रतिजानीते नत्वेति ॥ ५ ॥

देहस्तृतत्वधर्मो न घटत इति वदन् लोकव्यवहारवानुत तद्विषयापरपवादिति वादर्दायि समत्वादिधर्मोपन्यासानुपपत्तेः प्रथमः अघटितघटकशक्तिमत्त्वेन सर्वस्योपपत्तेर्द्वितीयो युक्त एवेति भावेनाह—निर्गुण इति. अयं भावः । भगवान् स्वमायागुणां स्वेच्छागुणानुसृत्य स्वाधीनप्रकृतिगुणनिर्मितदेवासुरदेहं वाविश्य तत्र स्थित्वा बहिश्च नृसिंहादिप्रादुर्भावरूपेणासुरादिबाधकतामसुरादिबाध्यवस्तुषु नियामकत्वेन स्थित्वा बाध्यतां गतो भवति किमत्र मानमितीयं शङ्का बाध्यादिस्थो हरिर्नित्यं बाध्यतादिगतेस्यापि गीयते । ननु, बाध्यत्वादिदोषयुक्तत्वत इति भविष्यत्पर्ववचनेन परिहर्तव्येति, हि शब्देन "लोकवत्तु लीलाकैवल्यम्" इति सूत्रालीलां प्रयोजयति निर्गुणत्वादिकं वैलक्षण्ये लिङ्गमिति ज्ञापनाय प्रयुक्तंपुरुषाणां दोषानुसारेण रक्षाद्यभावेन समत्वादिकर्मापि न युज्यत इति प्रदर्शनायापिशब्दः तर्हि कुतो विविच्य न ज्ञायत इत्यतोऽप्यकइति—

"अभिव्यक्तवत्काष्ठे वह्निवच्च जनार्दनः ।
इन्द्रियासु जीवेभ्यो विविच्य ज्ञायते ननु ॥

इति । अतो विविच्या ज्ञानं युक्तम् ॥ ६ ॥

स्वमायागुणमाविश्येत्युक्तं विवृणोति—सत्त्वमित्यादिना । प्रकृतेः स्वरूपभूता आत्मनः परमात्मनो ज्ञानादिवत्स्वरूपभूताः किन्त्वधीनाः जीवस्याप्यभिमानादेव गुणानां भिन्नस्वभावत्वाद्युगपत्प्रवृत्त्यनुपपत्तेरित्यतः शक्तिप्रकटनप्रकारं दर्शयति गतेपामिति—ह्रासोऽनुद्भूतत्वमुत्साहउद्भूतत्वं च्चयवृद्धिक्रमेणेति परिहारः ॥ ७ ॥

तं क्रमं विविनक्ति—जयति । सत्त्वस्य जयकाले उत्साहविषये देवर्षीन् भजमानोऽभूदित्यन्वयः रजसउत्साहविषये असुरान्वर्द्धयन् तमस उत्साहविषये यक्षादीन्वर्द्धयन्नेवं गुणानां शक्ति जृम्भयतीत्यर्थः । तत्रापीत्थं भावोऽस्तीत्याह—तत्कालेति, तत्तत्कालगुणाननुसृत्य वर्तमानः ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नैतद्व्याख्यकम् ॥ ५ ॥

तत्र तावत्तद्वचनार्थानुरूपमेव प्रश्नोत्तरमाह—निर्गुणोऽपीति ।

निर्गुणः प्राकृतगुणरहितः अत एवाजो नित्यसिद्धः अत एव व्याप[illegible]ः । प्राकृतदेहेन्द्रियादिरहितत्वाज्ज्ञानेन व्यज्यत इति व्यय प्रकृ[illegible]देहादिरित्यर्थः । ततश्च प्रकृतिगुणेषु रागद्वेषादिरहितश्चेति भाव । एवमेवम्भूतोऽपि स्वेषु भक्तेषु या माया कृपा तत्राश्रितो यो गुणो लीलाकौतुकमदविशुद्धोऽर्जितसत्त्वाख्यस्तमाविश्य आलम्ब्य भगवान् नित्यमेव भक्तार्थं तदनुगुणैश्वर्यसन् एतदप्युपलक्षणं कदाचिददितिजाद्यै जातः संलोकेन्द्रियेषु व्यक्तोऽपि सन् बाध्यबाधकतां गतः, कदाचिदसुरैर्योधनतां पराजयं कदाचित्तु तेषां बाधकतां गतवान् इत्यर्थः । अत्र स अप्यर्थान्तरे भागवतानुग्रहप्रयोजनत्वेन-

त्वोपक्रान्तत्वादुपसंहरिष्यमाणत्वादूगति तामात्मयाऽऽच्छन्नमदमायया तत्कर्तृत्वेऽप्यधिकदोषपाताच्च तन्नापेक्ष्यते. तस्माद्भक्तविनोदैकप्रयोजनकस्वैरलीलाकैवल्येनान्यत्र रागद्वेषाभावाच्चात्र वैषम्यमिति भावः । अत एव बाध्यतामपि यातीति बाधकतथा सहैवोक्तम्, तथा निजस्वरूपशक्तिविलासलक्षणलीलाविष्कारेण सर्वेषामेव हितं पर्यवस्यतीति सुहृत्त्वादिकञ्च नापयातीति ध्वनितम् ॥ ६

अथ तस्य बाध्यबाधकताव्यवस्थां स्थापयति द्वाभ्याम्—तत्र ये तु सत्त्वादयो गुणास्तेषु न तदीयत्वं न तदावेशो न च सदैकावस्थात्वं यतः पूर्वत्र पद्ये तस्य गुणस्यान्यतमत्वदर्शनाय स्वेति आविश्येति च विशिष्य स्वमायागुणमाविश्येत्युक्तम्. न तु मायागुणमुपधायेत्याह—सत्त्वमित्यर्द्धकेन ; सत्त्वादयो गुणाः प्रकृतेरेव नात्मनः परमेश्वरस्य तु ये सर्वेऽपि नित्यमेवोल्लासिनो गुणास्ते तु ते न भवन्तीत्यर्थः । तदुक्तम्

"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः ।
स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु इति ॥
ह्लादिनी सन्धिनी संवित्त्वय्येका सर्वसंस्थितौ ।
ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते" ॥

इत्यादिवचनानि भगवत्सन्दर्भे दर्शितानि न तेषामिति सार्द्धकम् । यस्मान्नात्मनस्ते तस्मादेव युगपद्ध्रास एव उल्लास एव वा नास्ति । किन्तु विकारित्वेन परस्परमुपमर्द्योपमर्दकत्वात् कस्यचित् कदाचिद्ध्रासः कस्यचित् कदाचिदुल्लासो भवतीत्यर्थः । ततश्च देवादीनां तत्साहाय्ये असुरादीनां तद्युद्धे योग्यतां दर्शयति तथा सत्त्वाद्युल्लासकाले तल्लीलायास्तदधीनत्वमेव यत् प्रतीयते न तदनुवदन् परिहरति सत्त्वस्य जयकाले देवादीनृषींश्चाभजत् भजति भगवांस्तद्देहेषु सत्त्वोपाधिकं निजं तेजः सञ्चारयति येन च तान् सहायमानान् करोतीत्यर्थः । एवं रजसो जयकाले असुरेषु रज उपाधिकं तमसो जयकाले यक्षरक्षस्सु तमउपाधिकमिति योजनीयम् । ततश्च येन तान् यक्षादीन् प्रतियोद्धृन् भगवान् कुर्वन् देवादीन् पराजितान् करोति स्वमपि तथा दर्शयतीत्यर्थः । तदेवं भक्तरसपोषकलीलावैचित्र्याय बाध्यबाधकतां यातीति दर्शितं यच्च क्षीरोदमथने श्रूयते । "तथासुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् ॥ उद्दीपयन् देवगणांश्च विष्णुर्दैवेन नागेन्द्रमबोधरूप." इति । अत्रापि तद्वैचित्र्यार्थमेव तथा तत्तदावेशस्तस्येति लभ्येत नन्वायाता तस्य तत्तद्गुणोद्बोधककालपारवश्येन स्वैरलीलाहानिः । ततश्च गुणसम्बन्धातिशये वैषम्यादिकञ्च स्पष्टमेवेत्याशङ्क्याह—तत्कालानुगुण इति । तेषां सत्त्वादीनां काल एवानुगुणो यस्य सः भगवच्चरण इतिवत्. समासः स्वैरमेव क्रीडति तस्मिन् नित्यमेव तदनुगतिकया मायया यया तदनुसारेणैवानादिसिद्धप्रवाहं तं तं जगत्कर्मसमुदायं प्रेर्य, स्ववृत्तिविशेषरूपत्वेन प्रवर्त्यमानः सत्त्वादिगुणानां काल एव तदधीनो भवतीत्यर्थः । कालस्य मायावृत्तित्वमुदाहृतं कालो दैवमित्यादौ त्वन्मायैवेति । यद्वा तेषां कालोऽपि सदानुगतो भक्तानुग्रहमात्रार्थस्वैरचेष्टात्मकप्रभावलक्षणो [illegible] इत्यर्थः ।

ततोऽपि तच्चेष्टानुसा[illegible]

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

क्रम ।"योऽयं कालस्तस्य तेऽव्यक्तबन्धोश्चेष्टामाहुश्चेष्टते येन विश्वम्" इति । तथा चोभयथापि न पारवश्यमित्यायातम्. इत्यमेव श्री-कपिलदेवेनापि "यः कालः पञ्चविंशकः" इति । "प्रभावं पौरुषं प्राहुः कालमेके यतो भयम्" इति च तत्र मायाऽवच्छिन्नपरमपुरुष-गुणत्वलक्षणीमत्युद्वमुपन्यस्तवान् । अत्र चास्य चेष्टा प्रभा-वस्य भक्तिविनोदायैव मुख्यावृत्तिः गुणोदूर्योधादिकार्यन्तु तत्र स्वत एव भवतीति तत्र प्रवृत्याभास एव ततश्च पूर्वांशः स्वय-मेवेति स्वरूपशक्तेरेव विलासः । परस्तु तदाभासरूप एवे-त्याभासशक्तेर्मायाया एवान्तर्गतः । योऽयं काल इत्यादौ निमि-त्ताविरित्युक्तिस्तु द्वयोरभेदविवक्षयैवेति ज्ञेयम् । अत एवं ऽव्याख्येयं यथा भृत्यस्यानुगतो भृत्यः अनुभृत्यः तथा तत्र तत्प्रभावल-क्षणस्य गुणस्याऽनुगत आभासरूपो गुणः अनुगुणः तथा च तेषां कालोऽपि अनुगुणो न तु साक्षादूगुणोऽपि यस्येति ॥ ७ ॥ ८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कृष्णाय व्यासाय ॥ ५ ॥

स्वमायागुणं सत्त्वादिं प्रविश्य अधिष्ठाय बाध्यत्वं बाधकत्वञ्च गतः प्राप्तः गुणानां परस्परबाध्यत्वबाधकत्वलक्षणं वैषम्यगुणाधि-ष्ठातरि भगवत्यारोपितमित्यर्थः ॥ ६ ॥

स्वरूपतस्तु भगवान् सर्वत्र सम एवेत्याह-सत्त्वमिति । प्रकृतेरेव गुणाः न स्वात्मनो भगवतः प्रकृतेःस्वशक्तित्वेऽपि स्वरूपभूतत्वा-भावादिति भावः तस्मात् सर्वत्र दृश्यमानं भगवतो वैषम्यं गुण-वैषम्यमूलकमेव तच्च गुणवैषम्यं गुणानां ह्रासाधिक्यरूपं तच्च ह्रासाधिक्यं न यौगपद्येन भवति किन्तु क्रमेणैवेत्याह--न तेषामिति। ह्रासो बाध्यत्वहेतुः उल्लास आधिक्यं बाधकत्वहेतुः । तेच सत्त्वा-दीनां ह्रासाधिक्ये तदुद्भवानां देवासुररक्षसां ह्रासाधिक्याभ्यामनु-मेये ॥ ७ ॥

नत्र गुणानांस्वतो जाड्यादेव ह्रासाधिक्ययोरप्यकिञ्चित्क-रत्वात्तत्र तत्राधिष्ठातृत्वेन भगवत्प्रवेशमाह–जयेति । सत्त्वस्य जयकाले आधिक्यसमये देवानृषींश्च अभजत् । तदा सत्त्वं यथा अधिकमभूत्तथा तत्राधिष्ठातारमपि तस्याधिकमभूदिति स तत्सदेहं प्रविश्य तत्तदूबलमधिकयन् असुरराक्षसादीन् बाधत इत्यर्थः । एवं रजसो जयकाले असुरान् तमसो जयकाले यक्षरक्षांसि तस्य कालस्य अनुगुणः अनुरूपः सन्निति गुणाधिक्यस्यापि कारणं काल एव न तु स इत्यर्थः ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नारदादिभिर्गीयते यतः परमम् पुण्यम् यतोहरेश्चरितम् प्रति पृष्टः कुतोऽसस्तत्प्रत्युत्तरदानार्थं हरेः कथां कथयिष्यन् कृष्णाय मुनये कृष्णद्वैपायने तत्त्वावगन्तारं तथा ॥ ५ ॥

एवाऽजः प्राकृतगुणहेतुकजन्मरहितः अतएव अव्यक्तः व्यक्तश्चि दचिदात्मकं विश्वं तद्भिन्नः सर्वदोषास्पृष्ट इत्यर्थः भगवान् स्वाभाविकैश्वर्यादिषड्गुणयुक्तः प्रकृतेरिति पदं सामान्यतया परा-परशब्दवाच्यप्रकृतिद्वयपरम् ।

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्" ॥

इति प्रकृतिद्वयात्परस्तदाश्रय इत्यर्थः अत एव स्वमायागुणं स्वमायागुणपरिणामं जीवविशिष्टं देहेन्द्रियसंघातमाविश्य अन्तर्या-मितया प्रविश्य बाध्यबाधकतां जीवानां देवासुरादीनां परस्परं या कर्मयोगाद्बाध्यबाधकता तां हेतुतया गतोभवति तत्तत्कर्मानु-सारेण तां तां बाधकतां च देहिभ्यो ददाति स्वयं तु समएवे-त्यर्थः ॥ ६ ॥

स्वमायागुणमाविश्येत्युक्त्या शक्तिगुणाः कार्यकारणरूपाः शक्तिमन्तं सर्वात्मानं न विमोहयन्ति तदात्मकत्वात् जीवात्मानं तु ह्रासवृद्ध्यादिरूपैर्विमोहयित्वा शुभाशुभानि कर्माणि तेन कारयन्ति अतदात्मकत्वादित्याह सत्त्वमित्यादिना सत्त्वंरजस्तमइति गुणाः प्रकृतेः भगवच्छक्तेः, अतोभगवति न प्रभावं कुर्वन्तीतिभावः आत्मनोजीवस्य तु न तदात्मका न भवन्ति तस्य सर्वात्म-त्वाभावात् अतस्ते न साधु असाधु च कर्म कारयन्तीतिभावः गुणास्ततज्जीवकर्मपरिपाककालानुसारेण विषमाभवन्ति न तु युगपदित्याह न तेषामिति ॥ ७ ॥

सत्त्वस्य जयकाले देवादिकर्तृकमाश्रितककर्मपरिपाककाले भग-वान् तत्कालानुगुणः सन् देवादीन् अभजत् तद्धितहेतुर्भवति रजसोजयकालेऽसुरान् तमसो जयकाले यक्षरक्षआदीन् अभजदि-त्यन्वयः ॥ ८ ॥

———

भाषाटीका ।

जो परम पुण्य माहात्म्य नारदादि
जाता है । अब मैं श्रीकृष्ण मुनि (
नमस्कार करके हरि कथा को कहता हूं
जो पुरुष जिह्वा को पाकर श्री
कीर्तन नहीं करता है वह दुर्मति मोक्ष
होकर भी आरोहण नहीं करता है ॥ ० ॥
तस्मात् आनन्द रत्न सुन्दर श्रीगोविंद
नित्य जो श्रवण करते हैं कीर्तन करते
हैं इस में संशय नहीं ॥ ० ॥
तिसी से गोविंद चरणाश्रित महापुण्य
को हे नृपसत्तम ! आप श्रवण करो ॥ ० ॥
प्रकृति से पर अज अव्यक्त भगवान् नि
अपने माया के गुणों में। प्रविष्ट होकर, बा
को प्राप्त हुए हैं ॥ ६ ॥
सत्त्व रज और तम ये तीनों प्रकृति के
के नहीं। हे राजन् ! उन गुणों का ह्रास वा

विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः ॥ ९ ॥

यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया ।
सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ ॥ १० ॥
कालं चरन्तं सृजतीश आश्रयं प्रधानपुम्भ्यां नरदेव ! सत्यकृत् ।
(१) (सतत्रतत्रोभयसिद्धिमाप्नुयाल्लिङ्गात्मनोलिङ्गगुणाश्च सन्ति ॥ ० ॥)
य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः ।
तत्प्रत्यनीकानसुरान्सुरप्रियो रजस्तमस्कान्प्रमिणात्युरुश्रवाः ॥ ११ ॥
(स वा पुनः स्वसृष्टस्य स्थितिरक्षानुवृत्तये ।
सत्त्वं सुरगणान्विष्णुरुपवृंहयते मुहुः ॥ ० ॥)
अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा ।
प्रीत्या महाक्रतौ राजन् ! पृच्छतेऽजातशत्रवे ॥ १२ ॥

भाषाटीका

सत्व गुण के वृद्धिकाल में ईश्वर देव और ऋषियों के शरीर में प्रविष्ट होकर, और रजो गुण के वृद्धिकाल में असुरों के देह में प्रविष्ट होकर, तथा तमो गुण के वृद्धि काल में यक्ष राक्षसों के देह में प्रविष्ट होकर, तिस २ काल के अनुगुण उनकी वृद्धि करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

समस्यापि निमित्तभेदेन वैषम्ये दृष्टान्तः ज्योतिरादिरिव ज्योतिरग्निर्यथाकाष्ठादिषु जलं यथा पात्रेषु आकाशो यथा घटादिषु तथा भगवान्नानारूपत्वाभाति. ननु, तर्हि तद्वदेव विवेकेन किं न प्रतीयते तत्राह, संघातात्सुरादिदेहात विविच्यते न पृथक् प्रतीयते तर्हि तान्भजतीति कुतोऽवगम्यते तत्राह, विदन्तीति, आत्मस्थं परमात्मानं कवयोनिपुणाः मथित्वा कार्यदर्शनलिङ्गेन विचार्य जानन्ति अन्ततःस्वभावकालकर्मादिवादनिषेधेन विदन्तीति पाठे यद्वापि ज्ञानमेव प्रमाणे ज्योतिरादिरित्यतिदृष्टव्यं यथा सूर्यकान्तादौ दाहदर्शनाज्ज्योतिर्ज्ञायते यथा च गन्धदर्शनाद्वायुरित्यादि ॥ ९ ॥

तदेवं मायागुणाश्रयेणैवतद्वैषम्यं न स्वाभाविकमित्युक्तम, तर्हि गुणानां तत्कार्याणां च कदोद्भवः कदाऽभिभव इत्यपेक्षायामाह—यदा आत्मनोजीवस्य भोगाय पुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदा स्वायत्त स्थितं रजः पृथक् सृजति विचित्रासु तासु पूर्षु रिरंसुः क्रीडितुमिच्छुर्यदा तदा सत्त्वं पृथक् सृजति शयिष्यमाणः संहरिष्यन्यदा तदा तमः पृथगीरयति प्रेरयति आधिक्यं नयतीत्यर्थः ॥ १० ॥

यदासिसृक्षुरित्यादिनिर्देशात्प्रतीतं कालपारतन्त्र्यं वारयन्प्रधानपुरुषपारतन्त्र्यमपिवारयति-कालमिति । हे नरदेव ! प्रधानपुम्भ्यां निमित्तभूताभ्यां सत्यकृदमोघकर्ता ईशस्तयोः सहकारित्वेनाऽऽश्रयभूतं चरन्तं वर्तमानं कालं स्वयमेव सृजति स्वेच्छारूपत्वात्कालस्य न तत्पारतन्त्र्यमित्यर्थः । तथाऽपि प्रस्तुते किमायातं तत्राह यएषकालः सत्त्वमेधयति वर्धयत्यतोहेतोरीशिताऽपीश्वरोऽपि सत्त्वप्रधानं सुरानीकं देवसमूहमेधयतीव तत्प्रत्यनीकानसुरान्सुरप्रतिपक्षान्प्रमिणोति हिनस्ति चेत्यन्वयः उरु प्रभूतं श्रवः कीर्तिर्यस्य सः कालशक्तिक्षुभितगुणगतवैषम्यमिह सन्निधिमात्रेणतदधिष्ठातरि स्फुरतीति प्रकरणार्थः ॥ ११ ॥

तदानीं तयोर्न सुरपक्षपातेन वधः किन्तु ब्रह्मशापेनासुरीं योनिं प्राप्तयोरनुग्रहार्थं एवेति वक्तुमितिहासमुपक्षिपति—अत्रेति । अत्र द्वेषादिरहितस्यापि दैत्यवधे नारदेनेतिहासः प्रस्तावितः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"स्वमायागुणमाविश्य बाध्यबाधकतां गतः" इत्यनेन तत्तद्बाध्यबाधकेषु देवासुरादिवर्गेषु ईश्वरस्यानुप्रवेश उक्तः कथमनुप्रविष्टो विज्ञायत इत्यपेक्षायां तत्तदनुप्रवेशो अनुप्रविश्यैव विविच्य द्रष्टुमशक्यत्वे सत्युपायेन विवेचनीयत्वे च दृष्टान्तमाह–ज्योतिरिति । काष्ठादिषु ज्योतिःप्रभृतिवस्तुवत् अनुप्रविष्टोऽप्याभाति तद्रतदोषास्पृष्टः प्रकाशते. "अनश्नन्नन्यो अभिचाकशीति" इतिश्रुतेरिति भावः सङ्घातात्काष्ठादिसङ्घातादिव देहेन्द्रियभोक्तृवर्गरूप-

(१) इदमधिकमनेन पठ्यते--विजय० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सङ्घाताच्च विविच्यते प्रकृतिपुरुषेश्वरतत्त्वयाथात्म्यविद्भिः प्रकृतिपुरुषाभ्यां विलक्षणत्वेन न ज्ञायते इत्यर्थः कवयस्तत्त्वयाथात्म्यविदस्त्वात्मकत्वं जीवात्मनि स्थितम् "य आत्मनि तिष्ठन्, यो विज्ञाने तिष्ठन्" इति श्रुतेः आत्मानं परमात्मानं मथित्वा विवेकपूर्वकं भक्तियोगमभ्यस्येत्यर्थः अन्ततोऽनेकजन्मावसाने विदन्ति साक्षात्कुर्वन्ति स्वमायागुणमाविर्दर्शयत्यनेन प्रेरणपर्यन्तानुप्रवेशोऽभिसंहितः ॥ ९ ॥

तद्देवगुणप्रेरकत्वं विवृणोति—यदेति । एषः परः पुरुषो भगवान्यदा स्वमायया स्वसङ्कल्परूपज्ञानेन प्रकृत्या च आत्मनो जीवस्य, आत्मेत्यभिप्रायमेकवचनम् आत्मनामित्यर्थः । पुरः शरीराणि सिसृक्षुः स्रष्टुमिच्छुस्तदा रजः सृजति प्रेरयतीत्यर्थः तम ईरयतीत्यनेनैकार्थ्यात् यदा सृष्ट्यनन्तरं विचित्रासु पूर्षु देहेषु रिरंसुः रन्तुमिच्छुः रिरक्षिषुरित्यर्थः । तदा सत्त्वं सृजति. यदा त्वीश्वरः शयिष्यमाणः उपसंजिहीर्षुस्तदासौ परमपुरुषस्तम ईरयति ॥ १० ॥

अथ तदा तत्कालानुगुणोऽभजदिति सूचितं कालप्रेरकत्वं विवृणोति—कालमिति । हे नरदेव ! ईशः परमात्मा चरमं प्रत्संमानमाश्रयं स्वव्याप्यतया शरीरभूतं कालं सृजति निमेषकाष्ठाद्यवस्थं करोति एवं कालं सृष्ट्वा प्रधानपुरुषाभ्यां चिदचित्समष्टिभ्यां सत्यकृत् सत् चिद्व्यष्टिः त्यत् अचिद्व्यष्टिः तदुभयं करोतीति तथा सत्यच्छब्दयोश्चिदचिद्व्यष्ट्योः प्रयोगः "तदनुप्रविश्य सच्च त्यच्चाभवत्" इत्यादि श्रुतौ प्रसिद्धस्तथा सत्यच्छब्दयोस्तापन्ये श्रुतिः । "अथ यदन्नेभ्यः प्राणेभ्यश्च तत्सत्, अथ यद्देवाः प्राणाश्च तत्तं तदेकया वाचा समभिव्याह्रियते सत्यमिति" इति. देवाः देवाधिष्ठितानीन्द्रियाणि तेभ्यः परः तत्संसृष्टस्तेनसः सत् देवाद्यचिद्व्यष्टिस्तु त्यं तदेतदुभयं सत्यमित्येकया वाचा एकशब्देन समभिव्याह्रियते बोध्यते इति तदर्थः । एतमीश्वरस्य तत्तज्जीवकर्मपरिपाकानुगुणकालप्रेरकत्वमुक्तं तच्चात्मत्वेन तदनुप्रवेशपूर्वकमिति च, ईश्वराधीनः कालो देवादीनां तत्तत्कर्मपरिपाकानुगुणसत्त्वादिगुणवृद्धिहेतुरिति वदन् सर्वान्तरात्मतया देवादिकर्मानुगुणं गुणान् प्रेरयतो नेश्वरस्य वैषम्यमित्युक्तमुपसंहरति--यदेति । हे राजन् ! ततः कर्मानुगुण्येनेश्वरस्य गुणकालप्रेरकत्वात् य एषः गुणप्रेरकः कालः कालशरीरकः तत्प्रेरकश्चेशिता ईश्वरः सत्त्वं कर्मपरिपाकायत्तकालकृतगुणोन्मेषसत्त्वगुणप्रचुरं सुरानीकमिव सुरानीकमेव 'इवशब्दोऽवधारणे' वर्धयति तदेव अवभावहतीत्यर्थः तद्वृद्धेस्तत्प्रतिपक्षक्षपणपूर्वकत्वात्सुराणां प्रियकृत् तत्प्रत्यनीकान् सुरानीकप्रतिपक्षरूपान् रजस्तम[illegible]असुरान् अभिहन्ति विनाशयति उरुश्रवाः विपुलकीर्तिः [illegible]सुरानीकविनाशनेन वैषम्यादिसम्भावनया नापकीर्तिमानी[illegible], किन्तु विपुलतमकीर्तिमान् इत्यर्थः ॥ ११ ॥

[illegible] सर्वभूतसुहृदः समस्येश्वरस्य देवासुरादिजयापजयहेतु[illegible]पि कर्मानुगुण्याद्वैषम्याभाव उक्तः इदानीं तस्य सर्वभूतसुहृत्त्वे इतिहासं दर्शयति—अत्रेति । अत्रैव तस्य सर्वभूतसुहृत्त्व एव हे राजन् ! महाक्रतौ राजसूये प्रीत्या त्वत्यादरेण पृच्छते अजातशत्रवे युधिष्ठिराय सुरर्षिणा नारदेनेतिहास उदाहृतः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इममर्थमानुमानिकं करोति—ज्योतिरादिरिति । अयमर्थः ज्योतिरादीस्युत्तरावस्थादिकार्यादिगुणः केषाञ्चित्फलानामुत्कर्षं केषाञ्चिन्ह्रासं कुर्वन् यथा सत्त्वादिजयादिविषये उष्णाद्यादिकालमनुवर्तमानो भाति तथेतिकथमव्यक्तत्वं हरेरिति तत्राह—संघातादिति, देहेन्द्रियादिकार्यकारणसंघाताच्च विविच्यते पृथग्भूतो न ज्ञायते अत्रापीदमेवोदाहरणं ज्योतिरादि घृतादि द्रव्यं दध्यादिभ्यो मथनात्पूर्वं न विविच्यते पृथग्भूतं न ज्ञायते न प्रतीयते तथात्मापीतिभावः "तेजोऽसितंमेधाविर्धीयते" इतिश्रुतेः । घृतस्य ज्योतिःशब्दाभिधेयत्वं प्रामाणिकं "दधिस्थघृतवत्काष्ठे वह्निवज्जनार्दनः" इत्यादेश्च. ननु, यदि केनचिद्देहादिव्यतिरिक्तत्वेनायं ज्ञायते तर्हि दधिस्थघृतवदित्यादिनिदर्शयितुं शक्यं, तदेव कुत इत्याह—विदन्तीति । कवयः ब्रह्मादयः शास्त्रेण मथित्वा ततो निर्णीयात्मत्वं देहादिस्थमात्मानं विदन्ति जानन्ति किञ्चान्ततश्चरमनाशे विदन्ति लभन्ते "लभनिष्पत्तौ" इतिधातोः नितरां प्राप्नुवन्तीत्यर्थः अनेन कवीनां ज्ञानमस्मिन्नर्थे प्रमाणमुक्तं भवति ॥ ९ ॥

देहादेर्विविक्तत्वेन ज्ञानं कस्माज्जोत्पद्यत इति आशङ्क्य सृष्टिशरीरेषु जीववत्प्रतिष्ठत्वाच्च तद्विषयं ज्ञानमित्यभिप्रेत्याह—यदा सिसृक्षुरिति । यदा परमात्मात्मनां जीवानां निवासाय पुरः शरीराणि सिसृक्षुः स्रष्टुमिच्छति तदा गुणवैषम्याद्येन स्वेच्छया नियतो रजोगुणमुपादाय महदहंकारपञ्चमहाभूतानि सृष्ट्वा तैः पृथक् तत्तद्योग्यतानुसारेण शरीराणि सृजति । यदा चेश्वरस्तासु विचित्रासु सुरनरतिर्यक्संज्ञितासु पुरीषु रिरंसुः जीवगतस्वाभाविकयोग्यतामनुसृत्य सुखादिकमुत्पाद्य तत्साक्षित्वेन क्रीडितुमिच्छति तदा स्थितिहेतुत्वात्सत्त्वगुणमुपादत्ते यदा शयिष्यमाणो योगनिद्रां चिकीर्षति तदाऽसौ तमोगुणमीरयति तच्छक्तिमुज्जृम्भयति ॥ १० ॥

किञ्च चरंतमतीतानागतवर्तमानभेदेन वर्तमानं कालं सृजतीत्यर्थः ईश माश्रय इत्येताभ्यां पदाभ्यां सर्वज्ञत्व [illegible]
अत्र प्रमाणमाह—सत्यकृदिति, सत्यं मीमांसा [illegible]
इदानीं स्वसृष्टानामन्तःशयनप्रकारमाह—स तत्र [illegible]
स्थितम् उभयसिद्धं महति वस्तुनि महत्परिमाण [illegible]
महत्प्रकटनमणुपरिमाणमणुसामर्थ्यं चाप्नुयात् [illegible]
महतोमहीयान्" इतिश्रुतेः अत्रेदं लिङ्गात्मनो लिङ्ग [illegible]
निदर्शनं चशब्द एवार्थे यथा लिङ्गं शरीरप्रधान [illegible]
व्याप्य तिष्ठत्यग्निर्लिङ्गात्मेत्युच्यते तस्याग्निलिङ्गत्व [illegible]
महत्त्वाणुत्वलक्षणाः सन्ति महति काष्ठे महान् [illegible]
ग्निरिति "लिङ्गं शरीरे चिह्ने च साधने शेफतस्मात्" [illegible]
सृष्टौ प्रवर्तमानेश्वरस्य निरपेक्षत्वात्स्वातन्त्र्येण [illegible]
वासम्भवः तदनपेक्षत्वे मृद्दण्डादिरिव साक्षान्मात्रेण कार्य [illegible]
इति तत्राह—लिङ्गात्मनः प्रधानादेः कारणस्य [illegible]
कार्यजनकशक्तिलक्षणाः सन्ति ते च लिङ्गात्मनः [illegible]
हरेः सन्ति विद्यमानास्तदधीनत्वादिति लिङ्गा [illegible]
"द्रव्यं कर्म च कालश्च" इत्यादेः यद्वा लिङ्गस्य [illegible]
कार्योत्पादनशक्तिलक्षणाः लिङ्गात्मनः पूर्ववाग्नि [illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेः सन्ति तेषां स्वरूपाभिन्नत्वद्योतनाय चशब्दः ऊर्णनाभिस्तुरीवेमादिविना स्वरूपभूतशक्त्यैव यथा जालं करोति तथायमित्यर्थपरो वा प्रधानसृष्टिर्ब्रह्मणोऽस्तु अनान्तरसृष्टिरवान्तरकारणात्स्यात् कुलालादेर्घटस्येवेत्यतोवाह—स इति, तत्रतत्र कार्यकारणेषु प्रागिन्द्रिकेषु स्थित्वोभयसिद्धिं जगत्कारणस्य जनकत्वलक्षणं कार्यस्य जन्यत्वफलं प्रापयति उभयोः शक्त्योरेतदधीनत्वादित्याह--लिङ्गात्मन इति, लिङ्गात्मनो मृदादेर्लिङ्गगुणाः कार्यजननशक्तयः सन्ति ते चानेन नियता इति शेषः, लिङ्गात्मनः कार्यस्य ये लिङ्गगुणा पृथुबुध्नोदराकारादिलक्षणाः सन्ति ते च "तत्रतत्रान्वितो विष्णुस्तत्तच्छक्तिप्रबोधकः" इत्यादेः अनेन बाध्यबाधकताकृत इत्येतत्स्पष्टीकृतं तथाहि तत्रतत्र देवासुरेषु उभयसिद्धिं जयपराजयलक्षणां कार्यसिद्धिं प्राप्नोति शिरस्त्राणवर्मादिलक्षणां वहतो भटस्य ये लिङ्गगुणाः शौर्यादिलक्षणाजयापजयौ वा ते च हर्यधीनाः "न वै बलं बलिनां चापरेषाम्" इत्यादेः। अत्र सर्वस्य हर्यधीनत्वदर्शनाय प्रधानपुंभ्यां कार्यकारणाभ्यां कालः सृजतीत्यङ्गीकारे प्रधानपुरुषावन्तरेण कालसृष्ट्यशक्तिर्हरेः प्रकटिता स्यादित्यन्यथा प्रतीतिनिरासायाचार्यैस्ताभ्यां सहेति व्याख्यातम् ॥ ० ॥

नन्वत्र साम्यगुणाधिकरणस्य हरेर्वैषम्याधिकरणत्वं कथमित्यस्य प्रश्नस्य परिहारः कथं स्फुटमायात इत्याशंक्य स्वतो देवप्रियत्वमसुराप्रियत्वं मनुष्याणामुभयत्वमेव समत्वं तत्तद्योग्यतावतां तेषामन्यथा तदतिलंघने त्वदभिमतवैषम्यप्राप्तिसाम्यहानी स्यातामित्याशयवानाह--य एष इति। य एष हरिः काले कालविषयेऽपि ईशिता कालस्यापि प्रवर्त्तनसमर्थः प्रधानपुरुषयोरीशितृत्वं किं वक्तव्यमित्यपिपदं स विष्णुः सुरानीकमिवास्थितं सत्त्वमेधयति सत्त्वस्य देहादिकारणत्वात्सत्त्वगुणप्रधानान् देवान् सम्भयतीत्यर्थः रजस्तमस्कान् रजस्तमःस्वभावान् तत्प्रत्यनीकान् तेषां सुराणां शत्रुभूतान् असुरान् प्रमिणोति निहन्ति 'मिञ् हिंसायाम्' इति धातुः सुरप्रिय इत्यनेनासुराणामप्रियो मनुष्याणामुभयात्मकः स्वभावत इति ध्वनितं तदुक्तं—

"स्वभावतः प्रियत्वात्तु सदा देवप्रियो हरिः।
अप्रियश्चासुराणां स स्वभावात्तूभयं नृणाम्" इति।

सत्त्वमेधयति इत्यनेन या सुखयोग्यता रजस्तमस्कानित्यनेन या वधयोग्यता ये च देहेन्द्रियादेः कारणभूतास्त्रयो गुणाः यश्च गुणानामुत्साहकरः कालः यच्च तेषां त्रयाणां गुणानां पुण्यपापोभयलक्षणं कर्म यच्च मूलकारणभूतं प्रकृतिपुरुषस्वरूपं यच्च भक्त्यादिकमेतत्सर्वमपेक्ष्य देवानां भक्त्यादिगुणानितरेषां द्वेषादिदोषान्मनुष्याणामुभयात्मकमुत्पाद्य सुखासुखजयापजयजननमरणादिफलदातृत्वेन समत्वमुक्तं। तदुक्तं—

"देशकालौ गुणांश्चैव भक्त्यादीनप्यवेक्ष्य तु।
योग्यतां च तथा कर्म सम इत्यभिधीयते॥
अतः प्रियोऽपि देवानामुत्पाद्यैव गुणानिमान्।
इतरेषां तथा दोषान्सुखदुःखे ददात्यजः॥
उभयं तु मनुष्याणामतः सम इतीरितः" ॥ इति

ननु सुरादिषु स्थितानां गुणदोषाणां तत्तत्कालीनत्वेनोत्तरकाले नाशसंभवेनानित्यत्वे नियमो न स्यादित्याशंक्य शास्त्रविहितत्वान्नियमोऽस्त्येवेत्याशयवानाह--उरुश्रवा इति, उरु बहु श्रूयत इत्युरुश्रवाः शास्त्रं नियमप्रतिपादकं यस्यास्स तथा तदप्युक्तम्—

"अनादिनियताश्चैव गुणदोषाः सुरादिषु।
यथाक्रमं पुनश्चैव नियमाद्वर्द्धितास्तथा॥

"विष्णुनैव ततो नित्यं विषमश्च जनार्दनः" इति नियमाद्वर्धितास्त्वेत्येतत्कुत्रप्रमाणीक्रियते इत्यस्य उरुश्रवाइत्यत्रेति वक्तव्यम्. उरुवर्द्धनलक्षणं श्रवो यस्य स तथेत्यर्थः। ननु, वैषम्यं तदवस्थमेवाभूदिति चेन्न योग्यतानिमित्तत्वात्तदुक्तम् "नविष्णोर्विषमत्वं तु योग्यतापेक्षया क्वचित्" इति हरेर्योग्यतानियत्यायत्त आगच्छद्वैषम्यलक्षणमुरुश्रवस्तदा तदस्तु विहितत्वादतउक्तं उरुश्रवा इति तदप्युक्तं "योग्यतायास्तन्नियत्या विषमत्वं भवेदिति" नन्वेवं तर्हि क्वापि वैषम्यं नेत्यापन्नमिति चेदुच्यते शुभाशुभयोर्विपर्यये शुभवतामशुभकर्म अशुभवतामसुराणां शुभकर्मानुसृतफलदानेऽसति विषमत्वं विष्णोर्दोषाय स्यादिति यदतस्तत्तद्योग्यतावशविहितशुभाशुभोभयकर्मानुसारेण तत्तत्फलस्य विकर्मेन्द्रियादेरशुभकर्मदैत्यवलक्षणस्य दानेनेश्वरवैषम्यमित्यत उरुश्रवा इति जयस्तम्भकल्पनाम हरेर्युक्तं "इन्द्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा" इत्यादि प्रश्नपरिहार इति सिद्धं "विषमत्वन्तु दोषाय शुभाशुभविपर्यये। अतस्तादृशवैषम्यम् ब्रह्मसूत्रे निराकृतम्॥ शुभाशुभनियन्तृत्वं न दोषो गुण एव सः। अतस्तीविद्धं कृष्णस्य ब्रह्मसूत्रकृतो विभोः" इतिवचनात् ॥ ११ ॥

सुरप्रिय इत्येतद्विवृणोति-सखा इति। अयमर्थः सत्त्वं सत्त्वगुणसम्पन्नान् मुहुरनुयुगमुपबृंहयन् सम्यक् वर्द्धयति किं कारणमाह--पुनरिति। स्वेन सृष्टस्य जगतः पुनःपुनः स्थितिरक्षानुवृत्तं स्थितिपालनयोः प्रवर्तनार्थं वा इत्यनेन सृष्ट्यादिष्वष्टकमपि हरेरेवेति दर्शयति-यदा सिसृक्षुरित्यनेन, यः प्रस्तुतस्तं स इति तच्छब्देः परामृशति तत्रापीश्वरशब्देन रुद्र उपक्रान्त इति भ्रान्तिनिवारणाय विष्णुरिति यद्वा यत्र क्वापि रुद्रादुत्सर्जनादिकं प्रतीयते तदपि तत्स्थहरिणेति प्रकटनाय विष्णुरिति० ॥

सुरप्रिय इत्येतदितिहासेन दर्शयति-अत्रेति। सुरप्रिय एव नासुरप्रियो हरिरिति अन्ययोगव्यवच्छेदार्थ एव शब्दः ॥ १२--१४

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, तेषुतेषु तेनाविश्यमानं तेजः कथं न लक्ष्यते? तत्राह ज्योतिरिति। यद्यपि तेषुतेषु निजतेजोंशेनाविष्टोऽसौ सङ्कुलतासंमिश्रत्वात् न विविच्यते लोकैर्विवक्तुं न शक्यते तथापि कवयः विवेकनिपुणा अन्तर्मथित्वा तस्यापि साहाय्यं तेनापि युक्ति त्यादिकासम्भावनानिषेधेन विविच्य तदंशमात्मस्थं तत्तदात्मप्रविष्टं आत्मानमीश्वरं विदन्ति तत्र हेतुगर्भो दृष्टान्तः, अस्मात्तेजो ज्योतिरादिवदार्थे इवाभाति हृदिष्विति शेषः। अयमर्थः यथा नेदं मणेस्तेजः पूर्वमदर्शनात्। किन्तु तदातपसंयोगेन सौरं तेजः पश्चात्प्रविष्टमिति सूर्यकान्तादौ तूलादिदाहेन तदनुमन्विषु तदामौ

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथाच पूर्ववदेव वायावयं गन्धः पार्थिवएव प्रविष्ट इति तेष्वागाति तथात्रापीति अथवा नन्वेवं तत्रतत्रावेशनैः स्वतेजोभिरेव क्रीडती त्यागुणं कथं नहितैरपि क्रीडतीति दृश्यते तत्राह—ज्योतिरिति । यथा चक्षुरादिज्योतिर्भिः स्वांशे रूपमात्रे प्रकाश्यमाने गन्धादि गुणप-श्चका मृदेवासौ प्रकाशत इति प्रतीयते यथा कर्णादिनभसा स्वांशे शब्दमात्रेऽपि गृह्यमाणे दुन्दुभिरेवासावित्ति प्रतीयते । तच्च तत्तद्गुणानां संमिश्रत्वादेव भवति न वस्तुतः । तथाकथय आत्मानम् ईश्वरं तत्तत्संघातस्थत्वेनान्येरजानन्ति विविक्तमपि आत्मस्थं स्वांश ज्योतिर्भिरेव क्रीडन्तं जानन्तीत्यर्थः ॥ ६ ॥

तदेवं युद्धादिनिजलीलाभिर्भक्तविनोदनमेव प्रयोजनं विश्वपावनन्तु स्वत एव ततः सिद्ध्यतीत्युक्त्वा सृष्टिप्रलययोः प्रकृतीक्षणादावपि सर्वशङ्कानिरासार्थमिति दिशम् विश्वचर्याविशे-षमाह—यदेति । यदा यत्र स्वचेष्टालक्षणे काले एव परः परमेश्वरः स्वमायया भक्तकृपया आत्मनः पुरः प्राचीनसृष्टिगत-साधकभक्तरूपाणि स्वस्वाधिष्ठानानि सिसृक्षुर्भवति । प्रकृत्या सह तेषु लीनेषु आविर्भावनार्थमीक्षां करोति । तदा पृथक् स्वरूपशक्तेरितरा असौ जीवमायाख्या शक्तिः पूर्ववत्तच्चेष्टात्मक-प्रभावाभासोद्दीप्ता रजः सृजति स्वांशभूताद्गुणत्रयसाम्या-द्व्यक्तात्तद्विक्षिपति उद्बोधयतीति वा । यथा वा पृथङ्मायानु-गत एव काल एव सृजति तथाऽसौ पदेन च काल एवोच्यते अथ विचित्रासु नानागुणवैचित्र्यवतीषु तत्तद्भक्तासु पूर्षु यदा रन्तुमिच्छुर्भवति तदा सत्त्वं सृजति । यदा पुनस्ताभिरेवाभिलिप्सा शयिष्यमाणः शयितुमिच्छुर्भवतीत्यर्थः । तदासौ तमः सृजतीति । ततो भक्तनिमित्तमेव सर्वा एव सृष्ट्यादिक्रियाः प्रवर्त्तन्त इति भावः । यथाङ्गीकृतमेकादशस्य तृतीये टीकाकृद्भिरपि किमर्थं ससर्ज । स्वमात्रात्मप्रसिद्ध्यर्थं । स्वं मिमीते प्रमिमीते य उपास्ते स स्वमाता । तस्यात्मनो जीवस्य प्रकृष्टायै सिद्ध्य इति । शयनमत्र पुरुषावतारस्य कदाचित् प्रलयोदधौ योग-निद्रा कदाचिद्भगवत्प्रवेशो वा यद्यपि सर्वेष्वपि जीवेषु अ-न्तर्यामितया परमेश्वरस्तिष्ठति तथापि तत्रासंसक्तत्वादस्थित एव भवति । स्वभक्तेषु तु समासक्तत्वात्स तथेति । न च तद्-भक्ताद्यो तदयेतद्गति यथोक्तव्याख्यानमेव वक्ष्यत् । तथा च श्रीगीतासु "मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः । न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्" इति "ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्" इति च । उक्तञ्च भक्तिसुधो-दये । "भक्तानां हृदयं शान्तं सन्निधो मे प्रियं गृहम् । वसामि तत्र शोभैव वैकुण्ठाख्यादिवर्णाना" इति ॥ १०

ततो य एव चेष्टारूपः कालः स सत्त्वम । सत्त्वप्रधानं सुरानीकमेधयतीव तत एव तत्प्रत्यनीकान् रजस्तमःप्र-धानानसुरान् प्रमिणोतीव हिनस्तीव । ये तु देवेषु भक्ता अ-सुरेषु भक्तद्विषश्च तान् स्वयं पालयति हिनस्ति चेवेति पूर्वमेवोक्तम् । तस्मात्तच्चेष्टालक्षणस्य कालस्यैवं वार्त्ता तस्मा-दीशितापि एधयतीव प्रमिणोतीव चेति । हे राजन्निति पूर्वा-भिप्रायमेव । ननु यदि चेष्टितुः प्रयोजनं न भवति तर्हि कथं कदाप्यसुरानपि सपक्षान् विधाय देवैः युज्यतीति तत्राह-

सुरप्रियः सुरेषु वर्त्तमानाः प्रिया भक्ता यस्य सः । सत्त्व-प्रधानेषु सुरेषु प्रायशस्तेषां सर्वेषामनुगमनेनैव तस्यानुगमनम । कदाचिद्वृत्रवृषपर्वादिषु महत्स्वपरार्धे तेषामभिलाषेण सुर-त्वाच्छादनात्तेषां तस्य तेष्वनुगमनं न स्यादिति अयकाले तु सत्त्वत्वस्यानुवृत्तिमिति भावः । ननु कथं तेऽपि तान्नानुगच्छन्ति तत्राह—रजस्तमस्कानिति । अत्यन्तभगवद्बहिर्मुखताकर्या-स्तयोर्गुणयोरोचकत्वादेवेति भावः । तदसौ सर्वेषामसुराणां निग्रहमेव करोतीत्यथापवसामअत्रयमेत्याकृष्याह उरुश्रवाः वैरेण यं नृपतय इत्यादि । महाविकीर्णमित्यादिभिः उरु सर्वतो विस्तृतं महत्तमं वा श्रवः कीर्तिर्यस्य सः । तेषामप्य-नुग्रहं करोतीति भावः ॥ ११ ॥

तदेवं सिद्धान्तं प्रदर्श्य तत्र स्वभक्तानुग्रहमात्रप्रयोजन-त्वस्य तत्करोति परेश इति प्रतिज्ञातार्थोदाहरणाय प्रह्लाद-जयविजयादिकृपामूलकर्माणि हासविशेषमाह—अत्रैवेति । अत्र विद्वेषादिराहित्येन भक्तानन्दनार्थं संरम्भमात्रत्वं असु-राणामपि परमहितपर्य्यवसायकस्वभावत्वेन । एवकारेण सिद्धान्तान्तरं व्यावर्त्यते ॥ १२ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सत्त्वादीनामाधिक्यन्यूनताभ्यामेव तदधिष्ठानस्याप्याधिक्य-न्यूनते इत्यत्र दृष्टान्तमाह—ज्योतिर्यथा—काष्ठेषु जलं—यथा—पात्रेषु आकाशं यथा घटेषु अधिकेष्वधिकरूपं न्यूनेषु न्यूनरूपं तिष्ठदपि न विषममुच्यते । तथैव देवनिष्ठसत्त्वेऽधिके सति सोऽपि देवेष्वधिकरूपः तद्वदासुरनिष्ठे रजसि न्यूने तत्र न्यून-रूप इत्यसुराणां देवबाध्यत्वे देवानामसुरबाधकत्वे सति सोऽपि देवपक्षपाती असुरबाधक इत्युच्यते । एवमसुरनिष्ठरज-स्यधिके सोऽप्यसुरपक्षपाती देवबाधक इति लोकप्रतीत्या विष-मोऽप्यविषम एवेत्यर्थः । जयकाले तु सत्त्वस्य देवनिष्ठस्याधि-क्याधिकभजनमेव तत्र निर्णीतं तदेव देवपक्षपातित्वस्य ज्ञा-पकम् । तत्र जयकाले केवलमभजनमेवेति ज्ञेयम् । ननु काष्ठादिषु ज्योतिरादिर्यथाऽस्मन् काष्ठेऽयं वह्निरित्येवं विवेकेन प्रतीयते तथा देवादिदेहेऽपि भगवान् किं न प्रतीयते तत्राह सङ्घा-तात् देवादिदेहात् न निष्कृष्यते सत्यन्य इव न पृथक् प्रत्यक्षीभवतीत्यर्थः । तर्हि स तान् भजतीति कुतो ज्ञायते तत्राह—विदन्तीति । आत्मस्थं देहस्थं परमात्मानं कवयो निपुणा मथित्वा कार्यदर्शनाल्लिङ्गानुमानाज्जानन्ति । अन्ततः स्वभावकर्मादिवादनिर्णयेन विन्दन्तीति पाठेऽपि जानन्ति जानन्तीत्येवार्थः । नन्विन्द्रादिपक्षपाती भगवान् कदाचित् सर्वैः प्रत्यक्षीभूत एवासुरान् हन्ति । तथैव रजस्तमसोरपि वृद्धौ सत्यां कदाचिदसुरादीनामपि [illegible] भवन् देवादीन् हिनस्तु तदेवोक्तयुक्त्या तस्य [illegible] दिश्यत आह—ज्योतिरादिरिवेति तमेव श्लोकं [illegible] राभिधायकं ज्योतिरादिरिव ज्योतिरादिगतं [illegible] यथा सङ्गते तद्वति वस्तुनि भासानि स्पष्टतया [illegible] तथा किञ्चित् सङ्घातात्तस्मात् [illegible]विच्यते न पृथक्

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भातीव किन्तु तदन्तर्गततयैव भाति एवमेव जगत्यस्मिन् देवासुरादिषु मध्ये भगवान् कश्चित् स्पष्टं भासते। कांश्चित्तदन्तर्गतश्च तिष्ठतीत्यर्थः। तत्र ज्योतिषः सत्त्वप्राधान्यादनावरकत्वात् तद्गतं रूपं यथा किञ्चिद्दूरेऽपि शुक्लमिदं क्षीरमिति सुदूरे वस्त्रद्वयेऽपि अन्धोऽयं शुक्ल इति तत्र तत्र नयनेन्द्रियेण गृहीतं स्पष्टमाभाति तथैव देवादेः सत्त्वप्राधान्यात् सत्त्वेनानावरणात्तद्गतो भगवांस्तत्पक्षपाती स्पष्टमेवापेन्द्रादिरूप आभाति यथा च जलादेस्तमोरजःप्राधान्यात्तेनावरणात्तद्गतं शब्दरसगन्धस्पर्शा न स्पष्टमाभाति किन्तु तद्गतः पदार्थस्य योग एवेन्द्रियगोचरेषु तमोरजसोरपि किञ्चित् सत्त्वमत्त्वात् सर्वथा आवरणाभावादेव तथाहि रसनायां रसवतो योग एव रसः। श्रोत्रे शब्दवत् आकाशस्य योगे सत्येव शब्दः। त्वचि शैत्यादिमद्वस्तुयोग एव स्पर्शः। नासायां गन्धवतो वायोर्योग एव गन्ध इति तथैवासुरराक्षसादेः रजस्तमःप्राधान्यात्तेनावरणात्तद्गतो भगवांस्तत्पक्षपाती न स्पष्टमाभाति 'अभ्र मेघातपाभ्यामावरणानावरणे सूर्यस्य यथा तथैव तमःसत्त्वाभ्यां भगवतो ज्ञेये। ननु तर्हि स्पष्टभानाभावे असुरादिपक्षपातित्वं तस्य कथं प्रतीमस्तत्राह—विदन्तीति। देवपराभवादिकार्यदर्शनलिङ्गेन जानन्तीत्यर्थः॥ ९॥

नचैवं गुणानामतन्त्र्येण तत्तदधिष्ठातृत्वेनाप्यतन्त्र्यलक्षणायन्त्रणेन गुणाधीनत्वमाशङ्क्यं किन्तु गुणानामपि सृष्टत्वस्य तत्तत् सर्वस्वैरलीलामयमेवेत्याह--यदा आत्मनो जीवस्य भोगाय पुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदा साम्येन स्थितं रजः पृथक् सृजति। विचित्रासु तासु पूर्षु रिरंसुः शिष्टपालनलक्षणां रमणां चिकीर्षुः सत्त्वं पृथक् सृजति शयिष्यमाणः संहरिष्यन् तमः पृथगीरयति प्रेरयति॥ १०॥

यदा सिसृक्षुरित्यादिनिर्देशात् प्रतीतं कालपारतन्त्र्यमपि वारयति—कालमिति। हे नरदेव! सहकारित्वेनाश्रयभूतं चरन्तं वर्त्तमानं स्वयमेव सृजति कालस्य तदिच्छारूपत्वात्। अयमर्थः। जगत् सृष्ट्यादिकं हि तस्य लीलयैव, सा च स्वेच्छाधीनैव तत्र यदा सिसृक्षा भवति तदा रजोवृद्धिसृष्टिकालो जायते यदा पिपालयिषा तदा सत्त्ववृद्धिपालनकालः। यदा संजिहीर्षा तदा तमोवृद्धिनाशकाल इति कालविशेषस्तेनैव सृष्टो तत्र यदा सृष्ट्यादिकालस्तदैव सिसृक्षादिकं स्यादिति यदा शब्दवाच्यः कालविशेष एव स तु सृज्य एव इति. जयकाले तु सत्त्वस्येत्यादिनापि प्रतीतं कालपारतन्त्र्यं वारितमिति-प्रधानेन मायाशक्त्या पुरुषेण अंशेन च सह वर्त्तमानः एवं स सर्वकारणत्वात् तस्यैव स्वातन्त्र्यं तत्कार्यस्याजगतस्तदधीनत्वं। ननु, तत् कार्यं जगदवस्त्वेव अवस्तुनः किमधीनत्वानधीनत्वविचारेणेति केचिदाहुस्तत्राह सत्यकृत् भगवत्कृतिकार्यस्य विश्वस्य मिथ्यात्वानर्हत्वात्। कार्यमात्रस्यैव मिथ्यात्वे तद्बुद्धेः भगवत्यपि प्रमाणाभावः प्रसज्जेदिति भावः "स्वयं सेवेदं विश्वमसृजते"ति माध्वभाष्य प्रमाणिता श्रुतिश्च अतः कालस्य तत्कार्यत्वात्कालधर्मः कारणेष्वुपचरित इत्याह--य एव इति। अतएवेशः परमेश्वरोऽपि स्वयं सत्त्वप्रधानं सुरानीकमेधयतीत्यर्थः तत्प्रत्यनीकान् सुरप्रतिपक्षान् प्रमिणोति हिनस्तीत्यर्थः। तदेवं वैषम्यं गुणस्यैव नान्यस्य तत्र काल एव निमित्तं यथा पुरुष सृज्यत्वाधीनत्वाधिष्ठातृत्वेऽपि गृहाणामुष्णत्व शैत्यादिकं गृहाणामेव न पुरुषस्य तथा, किञ्च सुरप्रिय इति अथवा सुराणां भक्तत्वाद्वैषम्यमपि भूषणमेव न तु दूषणमेवेति पृथगेव सिद्धान्तः यदुक्तम् "समोऽहं सर्वभूतेषु" इति। कदाचित् सुराणामसुरपराभूतत्वन्तु हितैषिणा भगवतैव तन्मत्तानिवारणार्थं क्रियत इति ज्ञेयं। ननु, तस्य सर्वप्रियत्वं सर्वसुहृत्त्वञ्च कथमित्यत आह—उरुश्रवाः "अहो बकीयं स्तनकालकूटम्" इत्यादि वाक्यप्रकाशितानि महायशांसि पूतनादिगतिप्रदत्वलक्षणानि यशांस्येव सर्वप्रियत्वं सर्वसुहृत्त्वञ्च विख्यापयन्तीति भावः॥ ११॥

उक्तमेवार्थं। स्पष्टमेव बोधयितुमितिहासमुपाक्षिपति अत्रैव साम्य सौहार्दप्रियत्वेष्वर्थेषु॥ १२—१४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

स्वमायागुणमाविश्येत्युक्तं तत्र प्रविष्टस्तद्दोषाऽस्पृष्ट एव भगवान् वर्त्तते अतैर्बुधैरपि तत्त्वज्ञायते इत्याह—ज्योतिरादिरिवेति। काष्ठादिषु ज्योतिरिव घनादिषु वायुरिव जलादिषु खमिव सज्जातेषु मायागुणकार्येषु देहेन्द्रियादिसंघातेषु तद्दोषास्पृष्ट एव भगवान् आभाति प्रकाशते तथापि संघातात् न विविच्यते भोक्तृभोग्यदेहविलक्षणतया भोक्तृभोग्यनियन्तृपदार्थानभिज्ञैर्न ज्ञायते कवयः क्रान्तदर्शिनो भोक्तृभोग्यनियन्तृस्वरूपयाथात्म्यज्ञाः आत्मस्थं देहेन्द्रियादिसहिते आत्मनि "य आत्मनि तिष्ठन्" इत्यादिश्रुतिप्रसिद्धे जीवे प्रेरकतया स्थितम् आत्मानं परमेश्वरम् मथित्वा अन्नमयादिभ्यो चेतनेभ्यो भोग्यभूतेभ्यः भोक्तृविज्ञानमयोऽन्ये वर्णितस्तदन्ते नियन्तानन्दमय इत्येवं मथनं कृत्वा चतुर्भ्यः कोशेभ्योऽन्ते वर्त्तमानं विदन्ति जानन्ति साक्षात्कुर्वन्तीत्यर्थः॥ ९॥

किञ्च जीवहितायैव सृष्ट्यादि कालानुसारेण गुणानपि वैषम्यादिदोषास्पृष्टो भगवानेव प्रेरयतीत्याह यदेति एषः परः परमात्मा आत्मनः समष्टिव्यष्टिजीवानां ज्ञातापेक्षचेतनः नित्यो नित्यानां चेतनश्चेतनानामेको बहूनामिति श्रुतौ जीवानां बहुत्वात् पुरः सिसृक्षुः समष्टिशरीराणि सिसृक्षुर्भवति यदा तदा स्वमायया स्वकीयया प्रकृत्याख्यया शक्त्या हेतुभूतया पृथक् रजः सृजति प्रवर्त्तयति विचित्रासु तासु पूर्षु रिरंसुः पालनार्थं यथा क्रीडितुमिच्छुः सत्त्वमीरयति प्रेरयति शयिष्यमाणः संहरिष्यन् पृथक् पृथक् तम ईरयति॥ १०॥

कालमपि स्वशक्तिभूतं भगवानेव परमाणवादिरूपेण सृजति नतु तावतापि विषमो भवतीत्याह—कालमिति। चरन्तमित्युपलक्षणं जङ्गमं स्थावरं च प्रति आश्रयं तेषामुत्पत्तिस्थित्यादिनिमित्तं परमाणवादिद्विपरार्द्धान्तरूपं सृजति किंबहुना विविधविश्वकर्तृत्वेपि भगवतो वैषम्यादिदोषलेशवातगन्धस्पर्शित्वं नास्ति स्वाभावेनाह हे नरदेव! प्रधानपुंभ्यां स्वप्रकृतिभ्यां सत्यमेव विश्वं करोतीति सत्यकृत् अथैनमाहुः सत्यकर्मेति सत्यं ह्येवेदमसौ सृज

दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ ।
वासुदेवे भगवति सायुज्यं चेदिभूभुजः ॥ १३ ॥
तत्रासीनं सुरऋषिं राजा पाण्डुसुतः क्रतौ ।
पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदम् ॥ १४ ॥

युधिष्ठिर उवाच ।

अहो अत्यद्भुतं ह्येतद्दुर्लभैकान्तिनामपि ।
वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः ॥ १५ ॥
एतद्वेदितुमिच्छामः सर्व एव वयं मुने ! ।
भगवन्निन्दया वेनो द्विजैस्तमसि पातितः ॥ १६ ॥
दमघोषसुतः पाप आरभ्य कलभाषणात् ।
सम्प्रत्यमर्षी गोविन्दे दन्तवक्रश्च दुर्मतिः ॥ १७ ॥
शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययम् ।
श्वित्रो न जातो जिह्वायां नान्धं विविशतुस्तमः ॥ १८ ॥
कथं तस्मिन् भगवति (१) दुरवग्राह्यधामनि ।
पश्यतां सर्वलोकानां लयमीयतुरञ्जसा ॥ १९ ॥
एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ।
ब्रूह्येतदद्भुततमं (२) भगवांस्तत्र कारणम् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इतिश्रुतेः । उक्तार्थमुपसंहरति, हेराजन् ! एष भगवान् यत ईशिता तत्तत्कर्मफलदानादिना सर्वभोक्तृभोग्यवस्तुनियन्ता अतः काले असुरक्षयस्य सुरवृद्धेश्च काले सत्त्वं सत्त्वप्रधानं सुरानीकम् । एधयत्येव इत्यन्वयः एवकारार्थे तत्प्रत्यनीकान् सुरानीकविरोधिनोऽसुरान् प्रहिणोति हिनस्ति ॥ ११ ॥

एवं सामान्यतः तत्तज्जीवकर्मानुसारेणानुग्रहादिकं भगवान् करोति न तु वैषम्यादिदोषवान् भवतीत्युक्तम् । अथेन्द्रार्थं दैत्ययोर्वधं तु तयोरनुग्रहायैव कृतवानित्याह—अत्रैवेति । अत्र इन्द्रार्थदैत्यवधे इतिहासः सुरर्षिणा नारदेन अजातशत्रवे युधिष्ठिराय उदाहृतस्तं शृण्विति शेषः ॥ १२ ॥

भाषा टीका ।

जैसे तेज (अग्नि) आदि पदार्थ काष्ठादि में नाना प्रकार प्रतीत होता है वैसेही परमात्मा भी नाना देहों में प्रकाशित होता है । और देह से भिन्न नहीं प्रतीत होता । निपुणजन अन्त मे आत्मा में अन्तर्यामि रूप से स्थित परमात्मा को जानते है ॥ ९ ॥

जिस समय परमात्मा जीवों के सुखादि भोग के लिये सृष्टि की इच्छा करता है तब समता से स्थित रजोगुण को पृथक् प्रकट करता है । ऐसे ही उन विचित्र शरीरों में रमण की इच्छा वाला सत्त्व गुण को तथा शयन की इच्छा वाला तमो गुण को प्रकट करता है ॥ १० ॥

हे राजन् ! यह कालस्वरूप ईश्वर सत्त्व की वृद्धि करते हैं तब सत्त्व प्रधान देव समूह को भी बढाते हैं और सुरप्रिय श्री हरि, उन देवताओं के वैरी रजोगुण तमोगुण वाले जो असुर हैं उनका नाश करते हैं ॥ ११ ॥

हे राजन् ! इस विषय में देवर्षि [श्रीनारदजी] ने राजसूय यज्ञ में पूर्वकाल में राजा युधिष्ठिर के पूंछने से यह इतिहास कहा था ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चेदिभूभुजः शिशुपालस्य ॥ १३ ॥ १४ ॥

---

(१) दुरवग्राह्य धामनि-इति पाठान्तरम्. विज० वीर० शुक० । (२) भगवन्नत्र कारणम्. इति पाठान्तरम्. वीर०

श्रीधरस्वामिकृतभावार्थदीपिका।

एकान्तभक्तानामपि दुर्लभा प्राप्तिर्विद्विषो जातेत्येतदत्यद्भुतं हि ॥ १५ ॥

तस्य तु वेनवन्नरकपात एवोचित इत्याह—भगवन्निन्दयेति। तमसि नरके ॥ १६ ॥

दमघोषस्य सुतः शिशुपालः कलभाषणाद् बाल्ये कोमलभाषणमारभ्य सम्प्रत्यधुनाऽप्यमर्षी क्रोधी मत्सरी वा ॥ १७ ॥

श्वित्रः श्वेतकुष्ठम् ॥ १८ ॥

दुरवग्राह्यं दुष्प्रापं धाम स्वरूपं यस्य तस्मिन् कथं सायुज्यमीयतुर्जग्मतुः अभूतस्यापि दन्तवक्रवधस्य तज्जातप्रमाणेन सिद्धवन्निर्देशः ॥ १९ ॥

एतदद्भुततममत एतत्प्रति मे धीर्भ्राम्यति भगवान् सर्वज्ञस्त्वं ब्रूहि ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

प्रश्नं तन्निमित्तञ्च विवृणोति—दृष्ट्वेति। राजसूयाख्ये महाक्रतौ चेदिभूभुजः शिशुपालस्य भगवता छिन्नशिरसः वासुदेवे भगवति श्रीकृष्णे सायुज्यं संश्लेषं महाद्भुतं दृष्ट्वा विस्मितचित्तः पाण्डुसुतो राजा युधिष्ठिरः तत्र क्रतौ यज्ञसभायामासीनम् उपविष्टं देवर्षिं नारदं मुनीनां शृण्वतां सतामिदं वक्ष्यमाणं पप्रच्छ पृष्टवान् ॥ १३ ॥ १४ ॥

तदेवाह—अहो इति षड्भिः. अहो एतदद्भुतं तदद्भुतत्वे हेतुः, एकान्तिनामनन्यप्रयोजनेन भगवन्तं भजतामपि दुर्लभम्. किं तत्? परे तत्त्वे प्रकृतिपुरुषविलक्षणेश्वरतत्त्वरूपे श्रीकृष्णे विद्विषः चैद्यस्य प्राप्तिरित्येतत् ॥ १५ ॥

मुने नारद! एतत्सर्वं वयं वेदितुमिच्छामः केनापि भावेन भगवन्तं स्मरतां तत्प्राप्तिर्भवत्येव किमत्र चित्रं, तत्राह—भगवन्निन्दयेति। वेनः पृथोः पिता भगवन्निन्दयैव निन्दामात्रेण हेतुना तमसि नरके द्विजैः ऋषिभिः पातितः ॥ १६ ॥

दमघोषसुतश्चैद्यस्तु कलभाषणात् बाल्यमधुरभाषणादारभ्य बाल्यादारभ्येत्यर्थः सम्प्रति एतत्कालपर्यन्तं गोविन्दे श्रीकृष्णे अमर्षी क्रोधी अतोऽयं नितरां पापात्मा तथा दन्तवक्रोऽपि दुरात्मा ॥ १७ ॥

अनयोः परब्रह्मभूतं निर्विकारं श्रीकृष्णमसकृज्जपतोः शिशुपालदन्तवक्रयोः जिह्वायां श्वित्रः श्वेतकुष्ठरोगो वापि न जातः नाप्येतावन्धं तमो नरकमपि विविशतुः किन्तु भगवन्तमेव विविशतुः ॥ १८ ॥

अतः सर्वलोकानां पश्यतां सतां दुरवगाह्यधामनि दुरवगम्यज्योतिर्मयस्वरूपे भगवत्यञ्जसा अनायासेन तत्प्राप्तिसाधनानुष्ठानमन्तरेणेत्यर्थः कथं लयमीयतुः? भगवत्सायुज्यं कथं प्रापतुरित्यर्थः ॥ १९ ॥

इतीत्थं वायुना दीपशिखेव मम बुद्धिर्भ्राम्यति. हे भगवन्! एतन्महदद्भुतमतोऽत्र कारणं ब्रूहीति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

एक एवान्तो निर्णयः येषामस्तीति भक्तिरेव पुरुषार्थसाधनं नान्यत्कर्मादिकमिति निर्णयवतां विष्णुरेव मुमुक्षुभिर्निषेव्य इति निश्चयवतां वा ॥ १५ ॥

श्रीहरिनिन्दनं सतां कर्णशूलायमानमप्येतच्छ्रोतुं तन्निर्णिमित्ताशयवानाह—भगवन्निन्दयेति ॥ १६ ॥ १७ ॥

श्वित्रः श्वेतकुष्ठम् ॥ १८ ॥

दुरवग्राह्यं दुर्ज्ञेयं धाम स्वरूपं यस्य स तथा तस्मिन् कथं सायुज्यलक्षणाम; ननु,"अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते" इति वचनात् श्वित्रो न जात इत्यादिवाक्यं कथं संगच्छते? भगवद्द्वेषिणोऽपि बहुविधाः, तत्र केचिन्मरणानन्तरं पापफलं भुञ्जते, केचिदत्रैव. तत्कुतः? इति चेन्न ॥

"नियमाद्भुज्यते पुंभिर्धर्माधर्मफलं मृतौ।

कैश्चिदत्रापि भुज्येत तस्मान्नाधर्ममाचरेत्" ॥

इतिवचनात् अनेन धर्मिणोऽपि व्याख्याताः धर्मी स्वर्गं विधर्मी निरयमितिवत् अत्र कश्चिद्विशेषोऽस्ति जयविजययोः सात्त्विकत्वेन भक्तत्वे न हरेरतिप्रियत्वात्सनकादिशापादसुरजन्मन्यपि कश्चिद्भक्तिलोपात् द्वेषफलभोक्तृत्वात्त्वाच्च द्वेषस्य पापिष्ठासुरत्वादनयोरुपचरितत्वाच्च अनेन स्वापराधनाशलक्षणानुग्रहपात्रत्वेन प्रतिज्ञातदृढपथत्वेन च हरेः सुरप्रियत्वं च विशदमभूदिति रहस्यम् ॥ १९ ॥ २० ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

दृष्ट्वेति युग्मकम् ॥ १३ ॥ १४ ॥

एकां नितरां परमज्ञानिनां "एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते" इति पाद्म इत्यादिना तद्रूपेण भिन्नमञ्च तदौपाधिकानुकरणमात्रमवलम्ब्येति ज्ञेयं। दन्तवक्रस्यापि भूतत्वेन निर्देशः मुनिगणवचनेन निश्चितत्वात् ॥ १५—२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

एकान्तिनां निष्परिग्रहाणामपि ॥ १५—१६ ॥

कलभाषणात् बाल्यकोमलभाषणमारभ्य यत् परं तं विष्णुं कृष्णम् ॥ १७—१८ ॥

प्रत्युत कथं तात्कालिकलोकप्रतीत्या सायुज्यं किञ्चित्कालमेव सहयोगं सह युज्यत इति सयुक् तस्य भावः सायुज्यं ततः परं सारूप्यमीयतुः भाविनमपि दन्तवक्रलयं भा

श्रीशुक उवाच ।

राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः ।
तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः ॥ २१ ॥

नारद उवाच ।

निन्दनस्तवसत्कारन्यक्कारार्थं कलेवरम् ।
प्रधानपरयोराजन्नविवेकेन कल्पितम् ॥ २२ ॥
हिंसा तदभिमानेन दण्डपारुष्ययोर्यथा ।
वैषम्यमिति भूतानां ममाहमिति पार्थिव ! ॥ २३ ॥
यन्निबन्धोऽभिमानोऽयं तद्वधात् प्राणिनां वधः ।
तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः ।
परस्य दमकर्तुर्हि हिंसा केनास्य कल्प्यते ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मुखादेव श्रुत्वा तस्य जातप्रायत्वमननात् भूतानि हिंसाः । पश्यता-मित्यसम्भवे वस्तुनि प्रामाण्यसिद्ध्यर्थमित्यर्थः ॥ १९ ॥

एतत् फलं प्रति भ्राम्यति अत एतदद्भुततमं ब्रूहि यतो भगवान् सर्वज्ञः नन्वेतत्पद्यवाक्यमेव, किं तत्राह तत्र वयं कारणम् ॥ २० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वैरीणां वेषविशेषाणां भूभुजः शिशुपालस्य भूपतेः ॥ १३ ॥ १४ ॥

परे तत्त्वे वासुदेवे श्रीकृष्णे एकान्तिनामपि दुर्लभा प्राप्तिः शिद्विषो जातेत्यद्भुतमत्याश्चर्यम् ॥ १५ ॥ १६ ॥

कलं मधुरं भाषणं यस्मिन् तस्माद् बाल्याद् आरभ्य सम्प्रति अद्यापि गोविन्दे अमर्षी विद्वेषी ॥ १७ ॥

अव्ययं नित्यशरीरिणां परं ब्रह्म यत् ययोः शपतोः जिह्वायां श्वित्रः कुष्ठं न जातः अन्धन्तमो नरकं न विविशतुः ॥ १८ ॥

दुरवग्राह्यं दुर्ज्ञेयं धाम स्वरूपं यस्य तस्मिन् ॥ १९ ॥ २० ॥

———

भाषा टीका ।

महा यज्ञ राजसूय में युधिष्ठिर महाराज ने श्रीवासुदेव भगवान् के विषे परमाद्भुत शिशुपाल का सायुज्य देखकर वहां बैठे हुए नारदजीसे सब मुनि लोगों के सुनतेर यह प्रश्न किया ॥ १३ ॥ १४ ॥

युधिष्ठिरजी बोले, कि अहो यह अति अद्भुत है परमैकान्ति लोगों को भी दुर्लभ परतत्त्व श्रीवासुदेव की प्राप्ति द्वेषी शिशुपाल को कैसे हुई ॥ १५ ॥

हे मुने ! यद्यपि हम सब लोग जानने की इच्छा करते हैं क्यों कि भगवान् की निन्दा करने से वेनराजा को ब्राह्मणों ने नरक में गिराया था ॥ १६ ॥

यह पापी दमघोष का पुत्र शिशुपाल तो बोलना सीखा तब से लेकर अबतक गोविन्द के विषय द्वेष करनेवाला और दुर्मति दन्तवक्र भी ऐसाही था ॥ १७ ॥

ये साक्षात् परब्रह्म अव्यय विष्णु को कुवाक्य कहने वाले इनदोनों के जिह्वा में कुष्ठ न हुआ और दोनों को नरक न हुआ ॥ १८ ॥

दुःख से ग्रहण हो तेज जिनका ऐसे भगवान् में सब लोकों के देखते २ ये दोनों कैसे लीन होगये ॥ १९ ॥

वायु से दीपकी जोत के सदृश मेरी बुद्धि भ्रमको प्राप्त होती है यह अति आश्चर्य बात का उत्तर आप दीजिये । इस में भगवान् ही कारण हैं ॥ २० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

आभाष्य सम्बोध्य सीदन्ति निषीदन्त्यस्यामिति सत् [illegible] तस्याः सदः सदसः शृण्वत्याः सत्याः कथाः प्राह [illegible] ॥

अहोभगवन्निन्दकस्य नरकपातेन [illegible] कोऽभिप्रायः भगवत्पीडाकरत्वेन वा तदभावेऽ[illegible] विद्वन्निन्दाचरणाद्वा तत्र तावद्देहाभिमानकृतां च पीडादीनां भगवतश्च तदभावाच्च पीडाद्युक्तास्तौ

श्रीधरस्वामिकृतभावार्थदीपिका ।

सार्द्धैस्त्रिभिः । निन्दनं दोषकीर्तनम् न्यक्कारस्तिरस्कारः निन्दास्तुत्यादिज्ञानार्थं प्रधानपुरुषयोरविवेकेन कलेवरं कल्पितं दर्शितम् ॥ २२ ॥

तदभिमानेन भूतानां यथा ममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति तथा न यस्येत्युत्तरेणान्वयः दण्डस्ताडनं पारुष्यं निन्दा तयोर्हेतुभूतयोर्हिंसा पीडा च भवति ॥ २३ ॥

यन्निमित्तबन्धोऽयमभिमानस्तस्य देहस्य वधाद्वधश्च यथा तथा यस्याभिमानो नास्ति अतोऽस्य परमेश्वरस्य हिंसा केन हेतुना कल्प्यते न केनापीति अभिमानाभावे हेतुः कैवल्याद्द्वितीयत्वेनाभिमन्तव्याभावात् वैषम्याभावे हेतुः अखिलात्मनः सर्वात्मन इति तर्हि किमिति हन्ति दैत्यांस्तत्राह—परस्य दमकर्तुः हितार्थं दण्डं करोतीत्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थमापृष्टो नारदः प्राहेत्याह मुनिः—राज्ञ इति । राज्ञो युधिष्ठिरस्य तत्प्रश्नरूपं वचः श्रुत्वा भगवान्नारदस्तुष्टः समीचीनप्रश्नेन हृष्टः सदसः सभायाः शृण्वन्त्याः सत्यास्तं युधिष्ठिरमाभाष्य स्ववचःश्रवणाभिमुखं कृत्वा प्रश्नपरिहाररूपां कथां प्राह ॥ २१ ॥

तामेवाह—निन्दनमित्यादिना दशभिरध्यायैः । अस्य प्रश्नस्य मुख्यमुत्तरं वक्तुं तावत्संसारिचेतनानामिवेश्वरस्य देहात्माभिमानप्रयुक्तस्तुतिनिन्दाद्यभिमानित्वं नास्तीति चैद्यस्य मुक्ति ददाविति कश्चित्परिहारमाह—निन्दनेति. हे राजन् ! निन्दनं दोषकथनं स्तवो गुणकथनं सत्कारश्चन्दनलेपादिः न्यक्कारः पांसुक्षेपणादिरेषामर्थो विषयः कलेवरं प्रधानशब्दो देहावस्थप्रधानवचनः परशब्दो देहात्परजीववचनः तयोरविवेकेन परस्परविलक्षणत्वविषयकज्ञानाभावेन देहात्माभिमानेनेति यावत् तेनाविवेकेन हेतुना कल्पितं कलेवरस्य निन्दनादिविषयत्वमविवेककृतं, न तु स्वतो जडत्वात्. न हि काष्ठं चन्दनलेपादिरूपसत्कारादिकं मन्यते इति तावन्निर्विवादमित्यर्थः ॥ २२ ॥

एवं स्थिते हे पार्थिव ! यथेह संसारे भूतानां देहात्माभिमानिनां देवमनुष्यादीनां ममाहमिति वैषम्यं ममेयं निन्दा निन्दितोऽहमित्यभिमानरूपवैषम्यं तदभिमानेन ममेयं निन्देत्यभिमानेन दण्डपारुष्ययोर्निमित्तयोर्हिंसा च स्यात् दण्डः ताडनं पारुष्यं निन्दनं परेषां दण्डपारुष्ययोः कृतयोः सतोस्तत्प्रयुक्तो ममेयं निन्दा निन्दितोऽहं ममायं दण्डो दण्डितोऽहमित्येवंरूपो नानाविधोऽभिमानस्तत्प्रयुक्तं परेषु निन्दादिकारिषु हिंसाचरणं च यथा लोकानां दृश्यते न तथा यस्येत्युत्तरेणान्वयः देहविषयमपि दण्डपारुष्यादिकं परकृतं देहात्माभिमानेनात्मगतं मत्वा तदभिमानेन परेषु हिंसाद्यस्यादित्यनेन यथा हिंसाकारिषु दण्डपारुष्यादिकं देहगतमेव नत्वात्मगतम्. देहात्मनोरविवेकेन स्वात्मगतं न मन्यते तथा हिंस्यमानेष्वपि हिंसा च देहगतैव नत्वात्मगता. देहात्माभिमानात्तु हिंसितोऽहमित्यभिमान इति सूचितम् ॥ २३ ॥

तदेव स्पष्टमाह—यन्निबन्ध इति । अयमभिमानो दण्डितानां च लोकानां यथा दण्डितोऽहं निन्दितोऽहमित्यभिमानः यन्निबन्धो यद्धेतुको देहहेतुक इत्यर्थः देहात्माभिमानस्य देहहेतुकत्वाद्देहात्माभिमानहेतुको दण्डितोऽहमित्यभिमानो देहहेतुक एवेत्यभिप्रायेण यन्निबन्धोऽभिमानोऽयमित्युक्तम्. एवं तद्वधाद्वध्यमानेषु तस्य देहस्य वधाद्वध प्राणिनां देहात्माभिमानिनां वधः देहगत एव वधः नत्वात्मगतो देहात्माभिमानात्तु हतोऽहमित्यभिमान इत्यर्थः । एवं संसारिणां निन्दनादिकं सर्वं देहात्माभिमानकृतमित्युक्तम् अथार्थकार्थविषयमीश्वरे दर्शयति—तथेति । यथा संसारिणां देहात्माभिमानस्तन्मूलको निन्दितोऽहमित्याद्यभिमानश्च यस्येश्वरस्य नास्ति तस्यास्य अभिमानप्रयुक्ता परेषु हिंसा केन हेतुना कल्प्यते इत्यन्वयः, अभिमानाभावे हेतुः—अखिलात्मन इति, सकलजगदात्मत्वादभिमानो नास्तीत्यर्थः । नन्वात्मत्वेऽपि तस्य जीववदभिमानः स्यादेव तत्राह—कैवल्यादिति । निरस्तनिखिलदोषत्वादित्यर्थः “अनृतेन हि प्रत्यूढा” इति श्रुत्युक्तरीत्या जीवानामनादिपुण्यपापात्मककर्ममूलको हि देहात्माभिमानः तस्य तु परमपुरुषस्य सर्वान्तरात्मनो निरस्तनिखिलकर्मवश्यत्वादिदोषत्वादभिमानाभाव इति भावः । निन्दितोऽहमित्याद्यभिमान एव नास्ति किं पुनस्तत्प्रयुक्तं परेषु निन्दकेषु हिंसादिकरणं नास्तीत्याह—हिंसेति, अस्य निन्दनादिना प्रयुक्ताभिमानरहितस्य हिंसा निन्दककर्मिका केन हेतुना कल्प्यते हिंसाहेतोरभिमानस्याभावाद्धेत्वन्तरस्यादर्शनात्सा नास्त्येवेत्यर्थः । ननु, कथमुच्यतेऽभिमानस्तत्प्रयुक्ता हिंसा च तस्य नास्तीति, अतोऽस्मदादिसमक्षमेव निन्दकं चैद्यं हतवानित्याशङ्कां निराकुर्वन्नीश्वरं विशिनष्टि—परस्य दमकर्तुरिति । परस्य निन्दकादेर्दमकर्तुः शिक्षाकर्तुः परस्य हितार्थमेव दण्डं कुर्वत इत्यर्थः शिक्षया परस्मै हिताचरणं च चैद्यस्य निहीनामासुरीं योनिं परिहाप्य निरतिशयपुरुषार्थरूपस्वप्रापणेनेदानीमेवास्मदादिभिरपरोक्षं दृष्टमिति भावः एवं देहात्माभिमानाभावात्परमपुरुषस्य संसारिणामिव स्तुतिनिन्दाद्यभिमानित्वराहित्यमुक्तम्. एवञ्च निरभिमानित्वाच्चैद्यस्य मुक्तिं ददौ इति कश्चित्परिहारः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देहाद्यभिमानवतः स्तवनिन्दनादिना मनःखेदहर्षादिसम्भवेन क्रोधादिकं स्यादुरेस्तदभावान्निन्दनादिनावद्येषानुदयात् ... नित्यतृप्तत्वेन परप्राप्यप्रयोजनाभवात् तत्तद्योग्यतानुसारेण तत्तत्फलदातृत्वं युक्तमित्यादिकं वक्तुमुपक्रमते—निन्दनेति । निन्दनं दोषसंकीर्तनं स्तवः स्तुतिर्गुणकथनं सत्कारः कायिकपूजा न्यक्कारः कायिकावज्ञा तेषां निन्दनादीनामर्थं विषयभूतं कलेवरं प्रधानपरयोः प्रधानाद्देहेन्द्रियाद्यात्मकात्परस्य जीवस्य विवेकेनाभेदेन कल्पितं सतश्चिदानन्दस्य प्रकृतेश्चात्मनो भेद... प्रधानादिदं जडशरीरं क्लृप्तमित्यर्थः ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ततः किं फलतीति तत्राह—हिंसेति। तदभिमानेन देहाभिमानेन भूतानामविवेकज्ञानिना ममाहमितीह देहे हिंसा ताडनादिलक्षणा दण्डपारुष्ययोर्निमित्तयोर्वैषम्यं विषमावस्था फलतीत्यर्थः॥ २३॥

ततश्च किं तत्राह—यन्निबन्धइति। ममाहमित्यभिमानो यन्निबन्धः यस्मिन् देहे निबद्धः तद्वधात्तस्य देहस्य वधाद्धिंसादिकृतवधात् प्राणिनां चेतनानां वध इत्युपचारः इति यस्तस्मान्निन्दनादिकं देहस्यैव फलति, नात्मनः; तस्य निष्फलमित्याशयः तथा, जीवस्य ममाहमिति देहाभिमानादनर्थपरम्परा तथा हरेरपि देहस्यत्वाविशेषात्स्यादपार्थिकनेत्याह—तथेति, अखिलात्मनोऽखण्डज्ञानिनो यस्य न तथा जीववद्देहाभिमानो ऽस्ति. कुतः? कैवल्यात् देहाद्यभावादेव. ननु, प्रकृत्यात्मकस्य देहस्याभावो हेतुः क्रियते सच्चिदानन्दात्मकदेहस्य चेत्येतयोरिद्मुत्तरं प्रकृत्यात्मकदेहादेरभावात्प्रकृतिप्राकृतवैकृतामिश्रविरहितसच्चिदानन्दात्मकदेहसद्भावात् स देहः सुखमन्यश्चेत्यादेः॥ अस्य सर्वात्मनः इयमेषा हिंसा केन निमित्तेनास्तीति कल्प्यते निमित्ताभावान्नैमित्तिकाभाव इत्यर्थः। अन्यस्मिन् हिंसादिकर्तरि सति हरेर्हिंसादिकमस्तीति कल्पयितुं शक्यते स च नास्तीत्याशयेनोक्तम् अकर्तुरिति, तस्यान्यः कर्ता न विद्यत इत्यकर्ता तस्य हिंशब्देन यदस्यायुधादिना प्रहर्ता इष्यते तत्फलं वादिकमस्तीत्याह“अच्छेद्योयमदाह्योयम”इत्यादेः। तत्सर्वं कथमस्यत उक्तं परस्येति, लोकविलक्षणस्य तदीयं शून्यकल्पस्यापीदमुत्तरं परस्य ब्रह्मणः “ब्रह्मविदाप्नोतिपरम” इतिश्रुतेः। इदं हिंसेति विकृष्टपरत्वयो हिंसायाः कुत्सितत्वद्योतनाय “ऽवद्यऽपोऽतिशयकुत्सनभेदेषु” इतिसूत्राज्ज्ञायते हरौ हिंसाशङ्का कुत्सितेत्यर्थः “नास्य जरयैतज्जीर्यते न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपरम हन्यते हन्यमाने शरीरे” इत्यादेश्च॥ २४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तत्रोत्तरं श्रीनारद उवाच—निन्दन इति। तत्र निमूढैर्जनैर्निन्दादिकं प्राकृतान् तमआदिगुणानुद्दिश्यैव प्रवर्त्यते। ततः प्रकृतिपर्यन्ताश्रयस्य तत्कृतनिन्दादेः अप्राकृतगुणविग्रहादौ तस्मिन् प्रवृत्तिर्नास्त्येव न च जीववत् प्रकृतिपर्यन्ते वस्तुजाते भगवदभिमानोऽस्ति। ततश्च तेन तस्य पीडा नास्त्येवेति भगवतस्तन्निन्दाद्यस्पर्शतया सिद्धान्तश्च पूर्ववत्॥ २२॥

ततश्च हिंसेति सार्द्धयुग्मकम्। इह प्राकृते लोके यथा तत्कलेवराभिमानेन न तथेति कैवल्यात् “देहेन्द्रियासु हीनानां वैकुण्ठपुरवासिनाम्” इति कैवल्यादिप्राप्तशुद्धत्वात् तादृशानिन्दाद्यनन्यशुद्धसच्चिदानन्दविग्रहादित्यर्थः तस्य तदगम्यत्वञ्च। “नाहं प्रकाशः सर्वस्य योगमायासमावृतः” इति श्रीभगवद्गीतादिभ्यः तादृशवैलक्षण्ये हेतुः, अखिलानामात्मभूतस्य, तत्र हेतुः परस्य प्रकृतिवैभवासङ्गरहितस्य। हिंसायाम अभि-

वयस्ते हेत्वन्तरम्। दमकर्त्तुः परमाश्चर्यानन्तशक्तित्वात् सर्वेषामेव शिक्षाकर्त्तुरिति॥ २३—२४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सीदन्ति निषीदन्त्युपविशन्त्यस्यामिति सत् सभा तस्याः शृण्वन्त्याः तस्यां कथाः शृण्वन्त्यामित्यर्थः। आभाष्य हे राजन्! अवधेहीति सम्बोध्य॥ २१॥

शिशुपालकृतनिन्दादिकं न भगवत्पीडाकरमिति वक्तुं प्रथमं निन्दास्तुत्यादिकं ज्ञानिनां न दुःखसुखदं किन्तु देहाभिमानिनामेवेत्याह—निन्दनस्तवौ वाचिकौ दोषगुणौ सत्कारन्यक्कारौ कायिकौ मानसौ च सम्मानासम्मानने तदर्थं तत्सृष्ट्यर्थं प्रकृतिपुरुषयोरविवेकेन आत्मानात्मविवेकाभावेन कल्पितं विरचितम्॥ २२॥

तदभिमानेन देहाभिमानेन मामयं निन्दति स्तौतीत्यादिभिर्यथा दुःखसुखे भवतस्तथैव मामयं हिनस्तीति हिंसापि भवति कस्मिन् सति दण्डस्ताडनं पारुष्यं त्वामहञ्जानियिष्यामीति तर्जनं तयोः सतोः एवञ्च भूतानामिह संसारे वैषम्यं सिद्धं ममैते शत्रवो ममैते बान्धवाश्च अहमेतान् हन्मि एतान् पालयामि चेति प्रकारकम्॥ २३॥

यस्मिन्निबद्धोऽयमभिमानस्तस्य देहस्य वधाद्वधश्च यथा अज्ञानिनां तथा यस्य कृष्णस्याभिमानः प्राकृतो नास्ति अस्य परमेश्वरस्य हिंसा केन कल्पते न केनापीत्यर्थः। अभिमानाभावे हेतुः, कैवल्यात् केवलपरमात्मत्वात्. अयं भावः। यथा सर्वजीवानां अनात्मा देह आत्मा जीवश्चेत्युभयं वर्त्तते। तथा यदि कृष्णस्याप्यवस्थास्यत् तदा कृष्णस्यापि जीवानामिव आनित्यकोऽभिमानोऽभविष्यदेव। कृष्णस्य तु देहस्तदभिन्नः परमात्मैव तस्मिन् स्वरूपभूते कृष्णोऽहमित्यभिमानोऽपि तन्मय एव अखिलात्मन इति तदंशस्यान्तर्यामिणोऽप्यस्वरूपभूते जीवे जीवदेहे वाभिमानो नास्तीति भावः। अत एव परस्य मायामायिकवस्तुजीवेभ्यो भिन्नस्याऽनन्तेष्वस्वरूपभूतेष्वभिमानाभावात् कस्तस्य द्वेष्यः को वा द्वेष्टा परमात्मभूते देहे यस्तस्याभिमानः परमात्मैवाहमित्यात्मकस्तेन स कं वा द्वेष्टु परमात्मानं जानन् तं वा को द्वेष्टु। तर्हि किमिति स्वद्वेषिणः शिशुपालादीन् हिनस्ति तत्राह—दमकर्त्तुस्तेषां हितार्थमेव दण्डं कुर्वतः तस्य सर्वसुहृत्त्वादिति भावः॥ २४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

राज्ञः तद्वचः प्रश्नरूपं वचः आकर्ण्य सीदन्ति निषीदन्त्युपविशन्ति यस्यामिति सा सत्सभा तस्याः शृण्वन्त्याः हे युधिष्ठिर! इति आभाष्य सम्बोध्य कथाः प्राह॥ २१॥

निन्दनादिना देहात्मबुद्धेर्जीवस्य पीडा भवति न तु तत्त्वविदः भगवतस्तु सुतरां न भवति किन्तु निन्दनादिनापि भग-

तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा ।
स्नेहात्कामेन वा युञ्ज्यात् कथञ्चिन्नेक्षते पृथक् ॥ २५ ॥
यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात् ।
न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ २६ ॥
कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन् ।
संरम्भभययोगेन विन्दते तत्सरूपताम् ॥ २७ ॥
एवं कृष्णे भगवति मायामनुजईश्वरे ।
वैरेण पूतपाप्मानस्तमीयुरनुचिन्तया ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

थाति मनोनिवेशनं मोक्षहेतुरित्याह—निन्दनमित्यादिना । न्यक्कार-स्तिरस्कारः निन्दनाद्यर्थं कलेवरं प्रधानपरयोर्मायाजीवयोर-विवेकेनाबाधेन कल्पितम् आत्मतयारोपितमित्यर्थः ॥ २२ ॥

तदभिमानेन कलेवरं आत्मस्वाभिमानेन यथा ममाहमिति वैषम्यं भवति तथा दण्डपारुष्ययोः दण्डे ताडने सति पारुष्ये निन्दायां च सत्यां हिंसा पीडा भवति ॥ २३ ॥

तथा यस्मिन् कलेवरेऽयमभिमानो निबद्धस्तस्य वधात् प्राणिनां वधो लोके प्रसिद्धः स अभिमानः यस्य कैवल्यात् देहेन्द्रि-यमनोबुद्धिप्राणादिविलक्षणक्षेत्रज्ञस्वरूपज्ञानात् नास्ति तस्य हिंसा केन कथ्यते अस्य प्रकृतस्य परस्य सर्वचेतनविलक्षणस्य अखिलात्मनः अत एव दमकर्तुः हितार्थं तदनुरूपं दमं दण्डं कुर्वाणस्य केन हिंसा कथ्यते इत्यन्वयः ॥ २४ ॥

भाषाटीका

श्रीशुक उवाच ।

भगवान् नारद महर्षिभी राजा युधिष्ठिर का वचन सुन कर हुंतुष्ट हो राजा को संबोधन देकर सभा के सुनते २ कथा कहने लगे ॥ २१ ॥

नारद उवाच ।

निंदा स्तुति सत्कार और तिरस्कार इत्यादि के ज्ञानार्थ यह कलेवर प्रकृति पुरुष के अविवेक से रचा गया है ॥ २२ ॥

उस देह में अभिमानहोने से मैं मेरा इस प्रकार की विष-मता है और उसी विषमता में निन्दा ताडनादि हेतुक हिंसा अर्थात् पीड़ा और जिस देह में यह अभिमान बँधा है उस देह के वध से प्राणियों का वध जैसे है। ऐसा अखिलात्मा परमेश्वर को अभिमान नहीं तब हितार्थ दूसरे को दंड देने वाले परमात्माकों शत्रुहिंसा किस प्रकार कल्पन की जाय ॥ २३—२४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्माद्भगवतोनिन्दादिकृतं वैषम्यं नास्ति तस्माद्येन केना· प्युपायेन ध्यायतस्तेनैव ध्यानेन निन्दादिकृतपापस्यापि नाशा· त्सायुज्यं युक्तमित्याशयेनाह—तस्मादिति सप्तभिः । निर्वैरेण नास्ति वैरं केनापि यस्मिंस्तेन भक्तियोगेनेत्यर्थः युञ्ज्यान्मन· इति शेषः यस्मादेतैरुपायैः पृथङ्नेक्षते ॥ २५ ॥

तेष्वपि वैरानुबन्धः श्रेष्ठइत्याह—यथेति । न तथा भक्तियो गेनापि ॥ २६ ॥

अत्र दृष्टान्तः, कीटः पेशस्कृता भ्रमरेण संरम्भोद्वेषोभयं च सएव योगस्तेन ॥ २७ ॥

वैरेण यानुचिन्ता चिन्तनं तयैव पूतः पाप्मा येषां ते त प्रापुः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नन्वेवं भगवन्निन्दासु कस्यचिदपि पापं न स्यान्न च निन्द प्रयुक्ताभिमानरहितनिन्दया नितरां पापित्वप्रसक्त इति वाच तादृशस्यापि चैद्यस्य परमपुरुषप्राप्तिदर्शनेन निन्दाया अपाप रूपत्वादन्यथा तादृशे निरतिशयमुक्तिप्रतिबन्धे पापे सा तस्य मुक्त्यसम्भवात् किञ्चैवं भगवत्स्तोत्रादिषु पुण्यमपि न स्य त्तथा च सर्वशास्त्रार्थविरोधप्रसक्तः । किञ्च—

" मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ॥
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु " ॥

इति भगवद्वचनाविरोधश्च स्यात्. भगवतः स्तुतिनिन्दाभिमा

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वाभावकथनाद्वैरचैद्ययोर्वैषम्यं च न सिध्यति अतो वेनचैद्ययोर्वैषम्यप्रश्नस्य किमुत्तरमित्यपेक्षायां साक्षात्परिहारमाह—तस्मादिति । निन्दादिभिर्विसंसारितुल्यत्वदोषप्रसक्तिनिराकरणार्थं संसारित्वतमानामिव देहस्तुतिनिन्दाद्यभिमानत्व भगवतो नास्तीति तद्वैलक्षण्यमभिमुक्त "निन्दनस्तवसत्कार" इत्यादिभिः श्लोकैरितां वक्ष्यमाण एव साक्षात्परिहारो वेदितव्यः तस्मादीश्वरस्यैवंविधस्वभावत्वाद्वैरानुबन्धानिर्वैरभयस्नेहकामानां पञ्चानामन्यतमेन केनापि युञ्ज्यात् भगवति मनोयुञ्ज्यादित्यर्थः "यथा भक्त्येश्वर मनआवेश्य" इत्युत्तरग्रन्थैकार्थ्यात् वैरानुबन्धो वैराविच्छेदः निर्वैरयोगेति न वैराभावो विवक्षितः अपि तु भक्तिर्विवक्षिता उत्तरग्रन्थं परिगणितेष्वेतेषु पञ्चसु भक्तरुक्तत्वात् स्नेहः सौहार्दं वात्सल्यादाररूपेनतत्पर्यन्तमविच्छिन्नवैरेण भगवति मनो युञ्जतश्चैद्यस्य भगवत्प्राप्तिः, वेनस्य तूक्तानामन्यतमेनापि भगवत्ययुक्तमनसो न मुक्तिः प्रत्युत निरयप्राप्तिरिति वैषम्यमिति भावः । मनोयोजनस्य काष्ठामाह—कथंचिदिति पृथगिति । पृथग्भगवतोऽन्यद्वस्तु किञ्चिदपि केनापि प्रकारेण नेक्षते न विषयीकरोति मनस्तथा तद्युञ्जीत विजातीयप्रत्ययान्तराव्यवहितावस्थितिसंततया तथेत्यर्थः ॥ २५ ॥

वस्तुतः प्रीतिपूर्वकानुध्यानात्मकभक्तियोगादपि वैरानुबन्धानुध्यानमेव श्रेयः इति मया निश्चितमित्याह—यथेति । मर्त्यः संसारी जीवः भगवति यथा वैरानुबन्धेन आशु तन्मयताम् इयात् प्राप्नुयात् तथा भक्तियोगेन आशु नेयादिति मे मया मतिर्बुद्धिर्निश्चिता. ममैव बुद्धिनिश्चय इत्यर्थः । तन्मयतां तच्चिन्तनप्रचुरतामित्यर्थः । विकारावयवार्थासंभवात् प्राचुर्यमेवात्र मयडर्थः । पूर्वपूर्वचिन्तनावृत्तरोत्तरचिन्तनस्य प्राप्त्यर्थं तच्च प्रत्ययान्तराव्यवहितत्वरूपम्. यद्वा तन्मयतां तद्धर्मप्राचुर्यं प्राप्नुयादित्यर्थः मुक्तानां प्राचुर्येण भगवद्धर्मसाम्यश्रवणात् ॥ २६ ॥

यथा वैरानुबन्धयोगः श्रेयानेवं भययोगोऽपि भक्तियोगाच्छ्रेयानिति वदन्वैरानुबन्धभययोगयोर्भगवद्विषयकचिन्तासन्तानात्मकयोस्तत्साम्यापत्तिहेतौ दृष्टान्तमाह—कीट इति । पेशस्कृता भ्रमरेण कुड्यायां निरुद्धः कीटो यथा तमेव पेशस्कृतं संरम्भभययोगेन वैरानुबन्धभययोगाभ्याम् अनुस्मरन् तत्स्वरूपतां पेशस्कृता साम्यं विन्दते तथा संरम्भभययोगिनो भगवत्स्वरूपतां विन्दते इत्यर्थः । तत्त्वेव स्वरूपं तत्त्व न स्वरूपस्तस्य भावस्तत्स्वरूपता तां तुल्यरूपतां नत्वैक्यमित्यर्थः न हि पेशस्कृता कृतः कीटस्तेनैकी भवति उभयोरप्युपलभ्यमानत्वात् अतः साम्यमेव दृष्टान्तात्सिध्यति ॥ २७ ॥

उक्तार्थं दार्ष्टान्तिके दर्शयति—एवमिति । भगवति पूर्णषाड्गुण्ये मायामानुषं स्वसंकल्पोपात्तमनुजाकृतौ साक्षादीश्वरे श्रीकृष्णे विषये वैरेणानुचिन्तया वैरपूर्वकानुध्यानेन पूयमानाः निरस्तवैरादिदोषाः तं कृष्णमापुः प्रापुः पूयमाना इत्यत्रायमभिप्रायः । यद्यपि "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति श्रुत्यक्तरीत्या निरतिशयप्रीतिरूपया अविच्छिन्नस्मृतिसन्ततिरूपया भगवद्भक्त्यैव तत्प्राप्तिहेतुत्वम्. तथा चोक्तम् भगवता—

> "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
> भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ! ॥
> ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ! ।
> तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ॥
> ददामि बुद्धियोगं तं येन मामुपयान्ति ते" ॥ इति.

श्रुतिश्च "तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते" इत्यादिका. भक्तिश्च प्रीतिपूर्वकमविच्छिन्नमनुध्यानम् "प्रीतिपूर्वमनुध्यानं भक्तिरित्यभिधीयते" इति भक्तिलक्षणात्. संरम्भभययोगयोस्तु प्रीतिरूपत्वाभावात्प्रत्युत तद्विपरीतरूपत्वाच्च न भगवत्प्राप्तिहेतुत्वं तथाप्यत्यन्तसंरम्भकृतभावनाप्रकर्षेण स्वहेतुभूतसंरम्भभययोरपि विस्मरणाज्ज्ञानमायाश्च निरतिशयानन्दावहशुभाश्रयविषयत्वेन प्रीतिरूपापन्नत्वात्तयोरपि भगवत्प्राप्तिसाधनत्वमिति. एवञ्च येषां भावनाप्रकर्षेण स्वहेतुभूतवैरादिविस्मरणादिभावो वेनादीनां तेषां भगवन्निन्दादिप्रयुक्तभगवद्विषयकभावनाप्रकर्षाभावेन तन्मूलकनिन्दादिदोषानिवृत्तेर्भगवत्प्राप्त्यभावः. प्रत्युत तन्निन्दादिदोषेण निरयप्राप्तिश्चेति वेनचैद्ययोर्वैषम्यमुक्तं भवति, अत एव न स्तुतिनिन्दयोः पुण्यापुण्यत्वप्रतिपादकशास्त्रविरोधोऽपि भावनाप्रकर्षेणाविस्मृतवैरादिदोषवत्पुरुषविषयत्वात्पुण्यापुण्यप्रतिपादकशास्त्राणाम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्रैवं हरिस्वरूपे स्थिते स्वगोचरानन्दाविर्भावलक्षणमोक्षसाधनक्षमा क्षीणा भक्तिरेव द्वेषादिकमपवादलक्षणं तत्साम्यज्ञापनार्थमुच्यत इत्याशयेनाह—तस्मादिति । यस्माज्जडशरीरेन्द्रियाद्यभावेन हरेरहं ममाभिमाननिमित्तोपद्रवो दूरं निवारितः तस्माद्वैरानुबन्धादिना यो हरौ मनो युञ्ज्यात्प्रयुञ्जीत स कथञ्चित्पृथक्त्वं तु न मनस्तत्राभिनिवेशेन हरेरन्यं न चिन्तयति तमेवानुस्मरतीत्यन्वयः अनेन वैरादीनामेकत्वेनापि हरौ मनो युञ्जानो वैरादिमानेव भवतीति तत्तत्स्वरूपाभावस्तदेकपत इति ज्ञातव्यं तदुदितमाचार्यैः "कर्माभ्यासेन पृथक् तत्रमनसोऽभिनिवेशेन तद्व्यं नेक्षते वैरादीनामेकत्वेनापि यो मनो युञ्ज्यात्स तदन्यं नेक्षत" इति स्वभावकथनम्. तत्रैव संयुञ्ज्यादित्यस्य प्रथमप्राप्तं विशेषार्थव्याख्यानार्थं कल्पनायामश्रुतकल्पनाख्यादिनिषेधश्च "भक्त्या त्वनन्यया शक्यः" अहमेवंविधोऽर्जुन" "यमेवैष वृणुते तेन लभ्यः" "प्रियोऽहि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इत्यादिना भक्तेरेव भगवत्प्रीतिजनकत्वोक्तेः "अनन्याश्चिन्तयन्तो माम्" इत्यादिवचनेभ्यः अतो न विध्यर्थोऽत्रोक्तिकार्योऽयः तदप्युक्तं न विधिरिति न केवलं द्विषः स्वस्यैवानर्थोऽपि तु तत्पितृगणानामपि तदुक्तम्—

> कर्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययम् ।
> मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः" ॥ इति.

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वेकदा कृतद्वेषप्रापनरकोपभोगेन क्षीणदोषस्य पुनः शुद्धान्तः-करणतया भक्तिकरणयोग्ययोनिप्राप्तिः स्यादिति तत्राह—

"तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम्" ॥ इति.

कीदृशो द्वेष इति तत्राह—

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परम्भावमजानन्तो मम भूतमहेश्वरम्" ॥ इति.

'स्वर्गकामोयजेत' इत्यादेः सत्कर्मणा तेषां सद्गतिः स्यात्किमे-त्याह—

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः" ॥ इति

ननु तर्हि हिरण्यकशिप्वादेर्दुरन्तापापस्थितिः कथमभूदिति तत्राह—

"यदनिन्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् ।
तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघात् ।
हिरण्यकशिपुश्चापि भगवन्निन्दया तमः ।
विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः" ॥ इति

इति नन्वेवं तर्हि भक्तद्वेषिणोः शापवराभ्यां विपर्ययः स्यात्किमेत्याह—

"वरतोऽपि न मुच्यन्ते द्वेषिणः शापतोऽपि तु ।
भक्ता नैव निपात्यन्ते धर्माधर्मैस्तथेतरैः ॥

इति योग्यताया बलवत्त्वादिति शेषः । नन्वेवं चेत्पुनश्चानर्थं आपन्न इति तत्राह—"अन्यावेशकृतं यत्तु तद्वराद्यैरपोह्यते । तद्विरुद्धस्वभावानामन्यथा नकथञ्चन" इत्यादि हिरण्यकशिप्वाद्यधिष्ठासु कृतपापं प्रह्लादादिभिः परिहृतं न तु स्वतो सुरस्येत्यर्थः ॥ २५ ॥

कुतः स्वतो सुरस्यपापं नपरिहृयत ? इत्याशङ्क्य द्वेषाभिनिविष्टमनस्कत्वेन तद्योग्यत्वेन भगवत्प्रेरितत्वेनाभीष्टनिवृत्तित्वेन तदात्मकत्वादित्याशयेनाह—यथेति । मर्त्यस्तमोयोग्यो वैरानुबन्धेन निरन्तरं वैरस्मरणेन तन्मयतां तत्तद्रूपविषयवस्तुनि यथा मनसोऽभिनिवेशम् इयात् प्राप्नोति तथा भक्तिलक्षणोपायेन भक्तिविषये वस्तुनि मनोभिनिवेशं न करोति अत्र किं प्रमाणमिति तत्राह—इतीति । निश्चिता मतिरित्यनेन साक्षिलक्षणा मतिर्गृह्यते भक्तियोगेन इति इत्यत्र सन्धिकार्याभावो द्वेषाभिनिवेशिनां बाहुल्यं भक्त्यभिनिवेशिनां कनीयस्त्वं च दर्शयितुं कुतः एतदवगतमितिचेन्न यथा वैराभिनिवेशेन इत्याद्याचार्योक्तेः वैरिणां बाहुल्यं अन्येषामल्पसङ्ख्यात्वं कथमिति चेन्न हरिणा भक्तानां बाहुल्याकरणात् एतदप्युक्तं कथमन्यथेत्यादि ततः कनीयांस एव देवाः ज्यायांसः असुरास्तत इति च भक्त्याऽभिनिवेशिष्वपि कश्चिद्विशेषोऽस्तीति ज्ञापनाय वा सन्ध्यभावः "ऋते प्रणामव्ययम्" इत्युक्तेः असुराणां नित्यद्वेषाप्रहित्वप्रकटनायानुबन्धेनेति "मागधाद्या यथा नित्यं द्वेषादाग्रहिणो हरौ । न तथाग्रहिणो भक्ता ऋते प्रणाममव्ययम्" इत्युक्तेः ॥ २६ ॥

ननु तन्मयतामित्यस्य तादात्म्यार्थः किं न स्यादिति तत्राह—कीट इति । द्वेषेण निन्दतश्चैद्यस्य कृष्णेन सायुज्यं कथमभूदिति प्रश्नस्य परिहारः कथमागत इत्यतो वाह,कीट इति यथा पेशस्कृता भृङ्गेण कुड्ये भित्तिसुषिरे रुद्धः कीटः इयामनामा कृमिः तस्यभृङ्गस्य सरूपतां समानाकारतां विन्दते न तु तादात्म्यं ततो भिन्नत्वेन दृश्यमानत्वात् कीदृशः यान्तं उपर्यागत्य गभीरं नदन्तं भृङ्गं सरम्भमयशोगेन ईषत्कोपभययुक्तस्नेहेनायं सन्दशतीति स्नेहेन आत्मानमाकृष्य द्विभातीति कोपयुक्तभयेन चानुस्मरन् अत्र स्नेहस्यैव प्राधान्यं प्राणधारणपोषणयोः सन्ततमिष्टत्वात् कोपभययोस्तात्कालिकत्वादप्राधान्यमित्यतो योगस्य संरंभभययोर्विशेषणतयोक्तेः योगस्य स्नेहार्थत्वम् ।

"प्रीतिस्नेहस्तथा योग प्रेमबन्धः इतीर्यते" । इति शब्दनिर्णये सिद्धम् ॥ २७ ॥

कृष्णे भगवत्येवं वैरेण युक्तया अनुचिन्तया भक्तिपूर्वं स्मृत्या धूतपाप्मानश्चैद्यादयः तं कृष्णमापुरित्यन्वयः अत्र सज्जीवानां शापाद्विनासुराविष्टानामेव मुक्तिः न केवलानां तस्मात्तदाविष्टासुरा वैरेण प्राप्तपाप्मानः "असुर्यानामतेलोकाः" इति श्रुतेः तं लोकसमुदायं प्रापुः सन्तो जयादयो अनुचिन्तया तं कृष्णमवापुरित्ययं विशेषो वैरयुक्तया अनुचिन्तयेत्याचार्योऽपि शब्देन गर्हाभिधायिना ज्ञातव्यः "अनुचिन्तेति तां प्राहुर्भक्तिपूर्वां तु या स्मृतिः" इति वचनात् भक्तिपूर्वैवानुचिन्ताऽत्राभिप्रेतेति ज्ञातव्यम् अतोऽत्र चैद्यादीनां भक्तियुतत्वं प्रतिपाद्यत इत्युपगन्तव्यम् अन्यथा कीटोदाहरणं निरन्वितं स्यात उदाहरणस्यापि भक्त्यर्थत्वं कुत इति चेन्न ।

स्नेहाद्दंशं ददातीति स्वाकर्षणभयेऽपि वा ।
विद्यमानेऽप्यल्पकोपे सङ्गतिस्नेहतस्तथा ॥
पेशस्कृद्रूपतां कीटो यथा याति तथैव तत् ।
चैद्यादयोऽसुरावेशाद्बहिर्द्वेषयुता अपि ॥
निजस्वभावया भक्त्या जाता हरिसरूपताम् ।
तथापि करुणो विष्णुरन्यावेशाद्यदि द्विषन् ॥
हीयते किं ममानेन नित्यानन्दस्वरूपिणः ।
देहबन्धयुतानां हि द्वेषिणाऽपकृतं भवेत् ॥
ममकोऽपराध्येत निर्दोषसुखरूपिणः ।
अतो मय्यपराधस्तु ह्यस्मिन्नेव न मे भवेत् ॥
अतो ह्यसुरावेशात्कृतमेतेन दुष्कृतम् ।
अनादिभक्तो यस्मान्मे मोचयिष्ये ततस्त्वहम् ॥
इति मत्वा मोचयति चैद्यादीनपि केशवः ।

इति वचनात् किं च निर्वैरेणेत्याद्युक्तमत्रानुसन्धेयं तेन स्नेहायतनस्य देहस्य नाशाद्विना कीटस्योपद्रवाभावाद्वैरेऽप्युपद्रवाभावोऽनुमीयते "तथापि करुणो विष्णुरन्यावेशाद्यदि द्विषन् हीयते किं ममानेन नित्यानन्दस्वरूपिणः" इत्यादिना च ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं "सकृद्यदङ्गप्रतिमान्तराहिता" इत्यादिवत् तदाभासमपि ध्यायतस्तदावेशात् तत्र वैरेणापि ध्यायतस्तदावेशेनैव निन्दादिकृतपापस्यापि नाशात्, तत्सायुज्यादिकं युक्तमित्यभिप्रायेणाह—तस्मादित्यादिभिः, युञ्ज्यादिति । स्नेहकामादीनां विधातुमशक्यत्वात् सम्भावनायामेव लिङ् । वैरानुबन्धादीनामेकतरेणापि युञ्ज्यात् ध्यायेत् चेत् तदा भगवतः पृथङ् नेक्षते तदाविष्टो भवतीत्यर्थः । वैरानुबन्धो वैरभावाविच्छेदः निर्वैरं वैराभावमात्रम् औदासीन्यमुच्यते तेन कामादिराहित्यमप्यायाति वैरादिभावराहित्यमित्यर्थः । तेन वा वैरादिभावराहित्येन युञ्ज्यात् । विहितत्वमात्रबुद्ध्या ध्यायेत्, ध्यानोपलक्षितं भक्तियोगं कुर्वीतेत्यर्थः । स्नेहः कामातिरिक्तः परस्परमकृत्रिमः प्रेमविशेषः स तु तेषु साधकेषु तदभिरुचिरेव ॥ २५ ॥

तदेवं सर्वेषां तदावेश एव फलमिति स्थिते झटिति तदावेशसिद्धये तेषु भावमयमार्गेषु निन्दितेनापि वैरानुबन्धेन विधिमयस्य भक्तेर्न साम्यमित्याह—यथेति । वैरानुबन्धेनेति भयस्याप्युपलक्षणं यथा येन प्रकारेण तन्मयतां तदाविष्टतां भक्तियोगेन विहितत्वमात्रबुद्ध्या क्रियमाणेन तु न तथा ॥ २६ ॥

अस्तां तावद्वस्तुशक्तियुक्तस्य तेषु प्रकाशमानस्य भगवद्विग्रहाभासस्य वार्त्ता प्राकृतेऽपि तद्भावमात्रस्य भावनावेशफलं महद्दृश्यते इति सदृष्टान्तं तदेव प्रतिपादयति—कीट इति । संरम्भो द्वेषो भयञ्च ताभ्यां योगस्तदावेशस्तेन तत्स्वरूपतां तस्य स्वम् आत्मीयं रूपं आकृतिर्यत्र तत् तां तत्सारूप्यमित्यर्थः ॥ २७ ॥

एवमिति । एवमपीत्यर्थः । नराकृतिपरब्रह्मत्वान्माययैव प्राकृतमनुजतया प्रतीयमाने. ननु, कीटस्य पेशस्कृत् द्वेषे पापं न भवति अत्र तु तत्स्यादित्याशङ्क्याह, वैरेण वानुचिन्ता तदावेशः तवैव पूतपाप्मानः तद्ध्यानावेशस्य तादृक् शक्तित्वादिति भावः ॥ २८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु, मास्तु निन्दादेर्भगवत्पीडाकरत्वं निन्दकस्य दुरदृष्टजनकत्वन्तु स्यादेव. यदुक्तं कैमुत्येनापि "निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा । ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः" ॥ इति सत्यम्. निन्दादि द्विविधा. आनुकूल्यमयी प्रातिकूल्यमयी च तत्र प्रथमा प्रेमविलासरूपैव "मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् । बलिमपि बलिमत्त्वावेष्टयद्ध्वाङ्क्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः" । इति वा सा तु पुरुषार्थचूडामणिमरीचिमञ्जरीव व्रजदेवी तां विना नर्के रपि कस्या. द्वितीया द्विविधा. भगवदभिनिवेशोत्था भगवदनभिनिवेशोत्था च, तत्र प्रथमया शिशुपालादिकृतनिन्दया अन्यासामेव दुरदृष्टं तत्कारणेनैव भगवत्यभिनिवेशेन सद्य एव विनष्टीकृत्य भक्तियोगेनापि समफलतां प्राप्य, विधियोग्यत्वमपि प्राप्यत इत्याह—तस्मादिति सप्तभिः । यस्मान्निन्दाया भगवत्पीडाकरत्वं नास्ति, निन्दकस्य च पापक्षयः सम्भवेत् तस्मादभिनिवेशाद्वैरानुबन्धादिना युञ्ज्यात् भगवति मन इति शेषः । निर्वैरेण नास्ति वैरं केनापि यस्मिन् तेन भक्तियोगेनेत्यर्थः; यद्वा, वैरं प्रतिपक्षत्वं निर्वैरं तत्प्रतियोगिस्वपक्षत्वं पुत्रादिभावः, यः अग्रिमश्लोके सम्बन्धशब्दवाच्यत्वेन स्पष्टीभविष्यति तेन स्नेहाद्भयः कामस्तेन प्रीतिजन्येन कामेनेत्येव व्याख्येयम्. न तु स्नेहस्य पृथक्साधनत्वं तृतीयान्तत्वप्रक्रमभङ्गापत्तेः फलमाह—कथञ्चिदपि तं भगवन्तं पृथक् नेक्षते. किन्तु स्वीयभावानुरूपमेव तं साक्षात् पश्यतीत्यर्थः । भववैरभाववन्तावधिकारिणौ प्रति तु पृथक् नेक्षते किन्तु सायुज्यप्राप्त्या तं स्वाभिन्नमेवेक्षते इत्यर्थः एकस्यापि वाक्यस्य पात्रभेदादर्थभेदः श्वेतो धावतीतिवदिति न्यायात् अत्र युञ्ज्यादिति लिङा वैरानुबन्धादिना भगवति मनोऽभिनिवेशं कुर्यादिति विधिरवगम्यते स च शिशुपालादिषु न सम्भवति तेषां रागप्राप्तत्वात् शिशुपालादिदृष्ट्या अन्येष्वेव विधिरित्यपि न शक्यते व्याख्यातुम् भगवत्प्रातिकूल्यस्य विधानानर्हत्वात्. यदुक्तम् "आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्" इति. न च शिशुपालादिभ्यो ऽन्येषु जनेषु विहितोऽपि वैरानुबन्धो भगवदभिनिवेशं जनयति "तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" ॥ इत्यादि परस्परविरोधात् नच रागप्राप्त एव वैरानुबन्धो नरकं जनयेन्न तु विहित इति वाच्यं शिशुपालादिषु व्यभिचारात्. न च शिशुपालादिभिन्नेष्वेव व्यवस्थेति वाच्यं विधिदृष्ट्या वैरानुबन्धस्य विध्यनुष्ठानादर्शनात् तस्यैव वैरानुबन्धो भगवदभिनिवेशं जनयति यस्य हन्तृत्वेनाभिज्ञातः श्रुतो दृष्टो वा भगवान् सम्भावितो भवति यथा कंसादेः स्वहन्तृत्वेन निर्द्धारितेष्वेव वैरिव्याघ्रसर्पादिषु भीतस्य चित्ताभिनिवेशो नान्येष्विति तस्मादेतत् पद्यमेवं व्याख्येयं यस्मात् सवैरभाववतामपि हितं करोति तस्मात्तत्र वैरस्यानौचित्यात् वैरभावव्यतिरिक्तेनैव भावेन मनोऽभिनिवेशयेदित्याह— तस्मादिति । निःशब्दस्य नञर्थत्वान्निर्वैरेण वैरभावभिन्नेन बन्धुमित्रपुत्रादिभावेन मनो युञ्ज्यात् कीदृशेन वैरानुबन्धेन वैरे इव अनुबन्धश्चित्ताभिनिवेशो यत्र तेन यो यस्मिन् अनुबन्धः स तस्मिन्नभिनिविष्ट एवेति तादृक्स्वभावो वा तेनः तथा स्नेहात् कामेन स्नेहैकहेतुको यः कामस्तेन कीदृशेन स्वजनार्यपथत्यागोत्थभयवता व्रजयुवतिकानुगामिना कामेनेत्यर्थः भयेन वैरिणा शब्दात् निर्भयेन कामेन च रुक्मिण्यादिकामानुगामिना कामेनेत्यर्थः औपपत्यं दाम्पत्यञ्चोभयोरप्यस्ति प्रमाणम्. तथाहि "जारभावेन सुस्नेहं सुदृढं सर्वतोऽधिकम्" इति ब्रह्मवामनम् "अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारं च जगद्योनिं वासुदेवमजं विभुम्" इति कूर्मपुराणम् ॥ २५ ॥

परमनिन्द्यस्यापि वैरभावस्य चित्ताभिनिवेशकारित्वेनैव महिमा अपार एवेत्याह—यथेति । वैरे वैरभावे योऽनुबन्धः सातत्यं तेन मर्त्यः पूर्वोक्तयुक्तेः स्वस्य भगवद्ध्यानव्यापारविरोधाद् एव भाग्यः । न तथेति कामुकदम्पत्योरेकाभिनिवेशार्थं न तथेति तन्मयतां स्त्रीमयः सर्वदेतिशेषः निश्चिता मतिरिति ममायं निश्चय एव कुतः इत्यतोऽत्र प्रमाणं न प्रष्टव्यं यद्भक्तियोगादपि वैरभावो मनो-

कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥ २९ ॥
गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ! ॥ ३० ॥
कतमोऽपि न वेनः स्यात्पञ्चानां पुरुषं प्रति ।
तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥ ३१ ॥
मातृष्वस्रेयो वश्चैद्यो दन्तवक्रश्च पाण्डव ! ।
पार्षदप्रवरौ विष्णोर्विप्रशापात्पदाच्च्युतौ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भिनिवेशकत्वांशेनाधिकस्तदा किमुत वक्तव्यं तादृशाभिनिवेशवान् स भक्तियोग इति भावः । तेन श्विस्रो न जातः जिह्वायां नान्धं विधिशतुस्तम इति त्वया शिशुपालादीनाम् निष्टसाधनत्वबुध्या वैरानुबन्धो निन्द्यते मयातिदृष्टसाधनीशरम-शोर्भक्तियोगादपि स्तूयते इति, कुतः शिशुपालादीनां दुर्गतिसंभावनापीति ध्वनिः तेन भावमार्गेष्वतिनिन्द्योपि वैरभावो भगवदभिनिवेशशीघ्रसम्पादकत्वांशेनैव भक्तियोगात् शुद्धात् यदि स्तूयते तदा भावमार्गेष्वतिवंद्यो वसुदेवादीनां वात्सल्यसख्यादिः किमुततरां नन्दादीनामात्यन्तिकतदभिनिवेशं प्रतिक्षणातिभूमस्पारकः स्म इत्यनुध्वनिः तेनार्थाधीनानामपि श्रीनन्दादिभावानुसारेण वात्सल्यादिभावेप्सूनां रागानुगा भक्तिर्वैधभक्तेः सकाशादुत्कर्षवतीति पर्यनुध्वनिः ॥ २६ ॥

तत्र वैरभाववतां मध्ये केचित् शिशुपालादयः सारूप्यमापुरिति सदृष्टान्तमाह—कीटइति द्वाभ्याम् । पेशस्कृता भ्रमरविशेषेण संरंभेण भयेन च तयोर्योगेन ॥ २७ ॥

माया कृपा सदुक्तिप्रापणी मनुजेषु स्वविग्रहेष्वपि यस्य तस्मिन् यद्वा मायया स्वरूपशक्त्या "मनुजं स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः" इति श्रुतेः । वैरेण वैरजनितध्यानावेशेन पूतानष्टपाप्मा तच्छिन्दनतिरस्कारादिर्येषां ते ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्माद्गणशो निन्दादिना पीडा न भवति प्रत्युत तत्पादपद्मप्राप्तिसाधनं स्मरणं भवति तस्माद्धेतोः वैरानुबन्धेन निर्वैरेण सर्वात्मभावेन भक्तियोगेनेत्यर्थः । युञ्ज्यात् भगवति मनो योजयेत् पृथक् भगवदन्यत् वस्तु कथञ्चिदपि नेक्षते नेक्षेत. किन्तु, भगवति सर्वात्मभावेन मनो युञ्ज्यादित्यर्थः ॥ २५ ॥ २६ ॥

पेशस्कृता भ्रमरेण कुड्यायां रुद्धः कीटः संरम्भो द्वेषो भयञ्च ताभ्यां योगो न स पकाम्यं तेनानुस्मरन् तस्य पेशस्कृतः सरूपतां विन्दते ॥ २७ ॥

मायया कृपया भक्तवात्सल्येनेत्यर्थः । मनुजे मनुवंशे आविर्भूते चन्द्रवंशस्यापीक्ष्वाकुद्वारा मनुवंशत्वात् वैरेण वानुचिन्ताऽनुध्यानं तेन पूतपाप्मानस्तमापुः ॥ २८ ॥

भाषाटीका ।

तस्मात् वैर के संबंध से भक्ति से भय से स्नेह से अथवा काम से कृष्ण भगवान् में मन लगावे वे किसी प्रकार पृथक् नहीं देखते हैं ॥ २५ ॥

राजन् ! हमारा तो निश्चय ऐसा है कि मनुष्य, जैसे वैर से तन्मयता को प्राप्त होता है वैसा भक्ति योग से नहीं ॥ २६ ॥

जैसे भीत में भ्रमर का रोका हुआ कीट (कीड़ा) संरंभ (द्वेष) और भय के योग से उसका स्मरण करते २ भ्रमर स्वरूप हो जाता है ॥ २७ ॥

ऐसेही कृपा से मनुष्य रूप को धारण करने वाले साक्षात् ईश्वर ऐसे श्रीकृष्ण भगवान से वैर से पवित्र होकर सदा उन के चिन्तन करने से कृष्ण ही को प्राप्त हो गये ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदघं कामादिनिमित्तं पापं हित्वा ॥ २९ ॥

तानाह—गोप्यइति ॥ ३० ॥

तर्हि वेनः किमिति नरके पातितः ? तीव्रध्यानाभावात्पापमेव तस्य फलितमित्याह—कतमोऽपीति । पुरुषं श्रीहरिंप्रति पुरुषे पुरुषस्य कामासम्भवाद्भयादिभिश्चिन्तयतां पञ्चानां मध्ये वेनो न कतमोऽपीत्युक्तम् ॥ ३१ ॥

तदेवमितिहासप्रस्तावकथामुक्त्वा श्रीकृष्णे शिशुपालस

युधिष्ठिर उवाच।

कीदृशः कस्य वा शापो हरिदासाभिमर्शिनः।
अश्रद्धेय इवाभाति हरेरेकान्तिनां भवः ॥ ३३ ॥
देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम्।
देहसम्बन्धसम्बद्धमेतदाख्यातुमर्हसि ॥ ३४ ॥

नारद उवाच।

एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया।
सनन्दनादयो जग्मुश्चरन्तो भुवनत्रयम् ॥ ३५ ॥
पञ्चषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः।
दिग्वाससः शिशून्मत्वा द्वास्स्थौ तान्प्रत्यषेधताम् ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

वैरानुबन्धे कोऽहेतुरित्यपेक्षायां तमेवेतिहासं वक्तुमाह—मातृष्वस्रेय इति। पदाद्वैकुण्ठाच्च्युतौ ॥ ३२ ॥

हरिदासानभिमृशत्यभिभवतीति तथा कस्य शापः कीदृशो वा अश्रद्धेयोऽनादरणीय इव असम्भवात् भवो जन्म ॥ ३३ ॥

असम्भवमेवाह—जन्महेतुभूतैः प्राकृतैर्देहेन्द्रियासुभिर्हीनानां शुद्धसत्त्वमयदेहानामित्यर्थः। प्राकृतदेहसम्बन्धेन सम्बद्धमेतदाख्यानमाख्यातुमर्हसि ॥ ३४ ॥ ३५ ॥

कथम्भूताः पञ्च वा षड्वा हायनानि वर्षाणि येषां ते अर्भा बालास्तद्वदाभा येषां ते पूर्वेषां मरीच्यादीनामपि पूर्वजास्तेभ्यः प्रथमं जाताः दिग्वाससो दिगम्बराः अतः शिशून् मत्वा ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवमुक्तार्थे दार्ष्टान्तिके निदर्शनं कंसादिकमित्याह—कामादिति। यथा भक्तियोगेनेश्वरे मन आवेश्य भगवतो गतिं जग्मुस्तथा कामादिभिरपि तस्मिन् मन आवेश्य तदघं मनस आवेशननिमित्तं कामादिरूपमघं हित्वा अत्यन्तभावनाप्रकर्षेण कामादिकं विस्मृत्येत्यर्थः बहवस्तद्गतिं प्राप्ताः ॥ २९ ॥

एतदेवोदाहरणविशेषेषु दर्शयति—गोप्य इति। भगवति कामाद्गोप्यस्तद्गतिं गता इत्यनुषङ्गः भयात्कंसस्तद्गतिं गतः इति विभक्तिविपरिणामः। यद्वा, गोप्यादयः सर्वे प्रतिनियतकामादिभिरुपायैस्तद्गतिं गता इति योगवशेनान्वयः। सम्बन्धाद्वृष्णयः स्नेहाद्यूयमिति वृष्णयो यूयञ्च देहसम्बन्धकृतस्नेहादित्यर्थः। अन्यथा पञ्चप्रकारान्तर्भावाभावात् भक्त्या वयं नारदादयस्तत्र स्नेहस्तुल्यसन्निकृष्टविषयः प्रेमा भक्तिरुत्कृष्टविषयेति भेदः ॥ ३० ॥

एवमुक्तेनार्थेन सिद्धं वेनस्यैवाभीष्टत्वमाह—कतमोऽपीति। उक्तानां पञ्चानां कामुकद्वेषिबिभ्यत्स्नेहवद्भक्तरूपाणां पञ्चानां मध्ये वेनस्त्वीश्वरं परमपुरुषं प्रति कोऽपि न भवति कामाद्यन्यतमो न भवत्यतस्तन्निन्दया निरयप्राप्तिरिति भावः। तस्मादुक्तानां पञ्चानां मध्ये केनाप्यन्यतमेनोपायेन भगवति श्रीकृष्णे मनो निवेशयेत् निवेशिते च मनसि मनोनिवेशनानिमित्तं कामादिकमपि विस्मृत्य तं प्राप्नोतीति भावः, अत एव हि श्रीविष्णुपुराणे "अपगतद्वेषानुबन्धो भगवन्तमवाप" इति सूक्तम्. ननु, संरम्भभययोगादीनामपि भक्तियोगवद्भगवत्प्राप्तिसाधनत्वे यथा प्रारब्धविच्छिन्नभगवद्भक्तियोगः पुनर्जन्मान्तरे "पूर्वाभ्यासेन कौन्तेय" इत्यादिभगवदुक्तरीत्या पूर्वाभ्यासेनोपचितसम्पूर्णभगवद्भक्तियोगो भगवन्तं प्राप्नोति एवमारब्धविच्छिन्नसंरम्भभयादियोगोऽपि जन्मान्तरे पूर्वाभ्यासेन परिपूर्णतद्योगो भगवन्तं प्राप्नुयात् नचैवं युक्तम्, अन्यथा विष्णुद्वेषिणां सर्वेषामपि मुक्तिप्रसङ्गः। एवञ्च "यः पुत्रः पितरं द्वेष्टि तं विद्यादन्यरेतसम्। यो विष्णुं सततं द्वेष्टि तं विद्यादन्त्यरेतसम्" ॥ इत्यादिविष्णुद्वेषकनिन्दावचनानामनवकाशप्रसङ्गः। उच्यते, संरम्भभयादीनां तस्मिन्नेव जन्मनि स्वविषयावारकभावनाप्रकर्षेण तदानीमेव मुक्तिहेतुत्वं न तु विच्छिन्नानां जन्मान्तरसम्पादितानां; प्रत्युत तेषां निरयहेतुत्वमेव. भक्तियोगस्य तु विच्छिन्नस्यापि पुनर्जन्मान्तरे भावनाप्रकर्षावहत्वद्वारा मुक्तिसाधनत्वमस्ति, नचात्र नाशाभावः धर्मिग्राहकमानस्य सत्त्वात् "पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते" इत्यारभ्य "तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्। यतते च ततो भूयः संसिद्धौ कुरुनन्दन। पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः" इत्येतेन भगवतैवारब्धस्यापि भक्तियोगस्य पुनः कालान्तरे फलसाधनत्वकथनात् नत्वेवं संरम्भभयादीनां मध्ये त्वारब्धानां पुनर्जन्मान्तरे भगवत्प्राप्तिसाधनत्वप्रमापकं किञ्चिद्वचनं विद्यते प्रत्युत "द्विषन्तम्" इत्यादिनिन्दा

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

वचनान्येव सन्ति यदि भगवन्निन्दादिकारिणामपि सर्वेषां द्वेषादिविस्मारकभावनाप्रकर्षः स्यात्तर्हि स्यादेव तेषां मुक्तिरिति न कोपि विरोधः ॥ ३१ ॥

एवं संरम्भयोगादीनामपि भगवत्प्राप्तिसाधनत्वेन चैद्यदन्तवक्रयोर्न मुक्तौ विस्मयः कार्यं इत्यभिधाय न केवलं तयोर्भगवद्विषयकभावनाप्रकर्षे तद्विषयकसम्बन्ध एव हेतुरपि तु पूर्वसिद्धं भगवदानुकूल्यञ्चेति वक्तुमितिहासं प्रतुष्टुवुः प्रश्नावसरप्रदानाय तयोस्तावद्विष्णुपार्षदत्वं विप्रशापाद्भ्रंशञ्चाह–मातृष्वसेय इति । मातुः स्वसा भगिनी तस्या अपत्यं पुमान् मातृष्वसेयः हे पाण्डव युधिष्ठिर ! यो भवतो मातृष्वसेयः चैद्यो दन्तवक्रश्च द्वाविमौ पूर्वं विष्णोः पार्षदप्रवरौ द्वारस्थितौ विप्रशापाद्धेतोः पदात्स्वस्थानाच्च्युतौ भ्रंशौ एवञ्च तयोः पाश्चात्यद्वेषातिशयात्प्राक्तनात्यन्तभगवदानुकूल्याच्च शापान्ते भावनाप्रकर्षसिद्ध्या मुक्तिरिति भावः । अण्डान्तर्वर्तिन्युपेन्द्रादिविष्णुलोके कस्मिंश्चित् "तदुपर्यपि बादरायणः सम्भवात्" इति न्यायेनोपेन्द्राद्युपासनया तद्वारपत्याधिकारं गतौ कौचिज्जीवौ स्थितौ पश्चाद्विप्रशापात्पदच्च्युताविति नारदस्याशयः ॥ ३२ ॥

इममाशयमजानन्नेवं प्रश्नावसरे दत्ते पृच्छति युधिष्ठिरः—कीदृशादतिद्वाभ्याम् । कीदृशः शाप इति शापप्रकारप्रश्नः कस्य वेति तत्कर्तृप्रश्नः, तस्य विशेषणं हरिदासाभिमर्शिन इति हरिदासानभिमृशति पराभवतीति हरिदासाभिमर्शी तस्य अनेन तस्यानौचित्यं सूचितम्. हरेरेकान्तभक्तानां निकटवर्तिनां भवो जन्म अश्रद्धेय इव अनादर्तव्य इवाभाति प्रतीयते. अयं भावः "एतं देवयानं पन्थानमापद्य न च पुनरावर्तते न च पुनरावर्तते" इति श्रुत्युक्तरीत्या मुक्तानामेव पुनरावृत्तिर्न विद्यते किम्पुनर्नित्यसिद्धानां भगवत्पार्षदानां भगवत्स्थानाद्भ्रंशाभाव इह जन्माभवश्चेति अत इदं भगवत्पार्षदयोः तत्पदाद्भ्रष्टयोरूच्यमानमिह जन्मानादर्तव्यम् तज्जन्मप्रतिपादकं वाक्यम् "अरत्नगवः कम्बलपादुकाभ्याम्" इत्यादिवाक्यवदसङ्गतार्थमिति ॥ ३३ ॥

तयोर्जन्मासम्भवमेव विवृण्वन्पृच्छति—देहेन्द्रियासु हीनानामिति । कर्मायत्तप्राकृतदेहेन्द्रियप्राणरहितानां वैकुण्ठपुरवासिनां नित्यसिद्धानामित्यर्थः । अनेन पूर्वमप्यसम्भावितप्राकृतदेहेन्द्रियप्राणसम्बन्धानामित्युक्तम् एवंविधानां देहसम्बन्धः प्राकृतदेहसम्बन्धस्तदनुबन्धिरागद्वेषादिसम्बन्धश्च तयोः समाहारः तदेतदघटमानं मह्यमाख्यातुं कथयितुमर्हसि ॥ ३४ ॥

एवमापृष्टो भगवान्नारदः प्रश्नस्योत्तररूपमितिहासं वक्तुमुपक्रमते-एकदेत्यादिना । ब्रह्मणश्चतुर्मुखस्य पुत्राः सनन्दनादयः आदिशब्देन सनत्कुमारसनत्सुजाता विवक्षिताः एते भुवनत्रयं चरन्तः कदाचिद्यदृच्छया विष्णोर्लोकं जग्मुर्ययुः अयं विष्णुलोकशब्दो ब्रह्माण्डान्तर्गतविष्णुलोकविषयः न तु मुक्तप्राप्यपरमव्योमविषयः "वैकुण्ठः कल्पितो येन लोकोलोकनमस्कृतः" इति वक्ष्यमाणत्वात् मुक्तप्राप्ये अर्चिरादिमार्गेणैव गम्ये परमव्योम्नि योगिनामपि सनकादिकानां गमनासम्भवान्नित्यसिद्धानामिहोत्पत्त्यसंभवाच्च ॥ ३५

सनन्दनादीन् विशिषन्नाह–पञ्चेति । पञ्च षड् वा हायना वत्सरा येषां ते अर्भा अर्भकास्तदाभासास्तद्वदवस्थिताः तान्, अर्भशब्दाभिप्रेतं विवृणोति पूर्वेषां रुद्रादीनामपि पूर्वं जातान् दिग्वाससो दिगम्बरानेवंभूतांस्तान्सनन्दनादीन् शिशून् शिशुत्वेनावस्थ विष्णोर्द्वारस्थौ द्वारि स्थितौ द्वारपौ प्रत्यषेधतां न्यवारयताम् ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोपि भक्तिगर्भकामादिनैव भगवत्प्राप्तिरित्याह—कामादिति । तृतीयार्थे पञ्चमी कामादिभिरपि यथा ययावत् भक्त्या सहैव कृष्णे मन आवेश्य द्वेषादिना यदघमापादितं तदघं हित्वा तस्य कृष्णस्य गतिं लोकं गता इत्यन्वयः प्रथमनः कामादियुक्तया भक्त्या हरौ मनः आवेश्य पश्चात्तथाभूतया भक्त्याऽघं हित्वेत्यर्थः ॥ २९ ॥

बहव इत्युक्तस्य विषयविभागमाह—गोप्य इति । कामात्कामयुक्तया भक्त्या कंसः कंसाविष्टो भृगुः भययुक्तया भक्त्या चैद्यादयः चैद्यादिस्ताजयादयः द्वेषयुक्तया वृष्णयः सम्बन्धो बन्धुना तन्निमित्तया यूयं पाण्डवाः समनुचितबहुमानयुक्तया वयं शुकादिशब्दवाच्याः केवलया भक्त्या अत्र कश्चन विशेषः—

"गोप्यः कामयुताभक्ताः कंसाविष्टः स्वयं भृगुः ।
द्वेषां भययुतो भक्तश्चैद्याद्विष्टा जयादयः ॥
विद्वेषसंयुता भक्ता वृष्णयो बन्धु (१) संयुताः ।
बहुमानस्नेहसाम्याद्वा भक्ताः प्रकीर्तिताः ॥
स्नेहोपसर्जनादेव बहुमानान्मुनीश्वराः ।
बहुमानोपि देवानां ऋषिभ्योप्यधिको मतः ॥
ब्रह्मवीन्द्रेन्द्रकामादेरितरेषां यथाक्रमम्" ॥

इति वचनादवगन्तव्यः ॥ ३० ॥

भक्त्यैव पुरुषार्थो न केवलद्वेषेणेत्याशयवानाह—कतम इति कामाद्युपसर्जनभक्तियोगानां पञ्चानां मध्ये कतमोपि भक्तियोगेनस्य नास्ति असौ (२) कश्चन द्वेषात्मक एव यस्माद्भक्तियोगमन्तरेण पुरुषार्थो नास्ति तस्मात्केनापि प्रकारेणापादितेनोपायेन भक्तिलक्षणेन कृष्णे मनो निवेशयेत द्वेषादि "उपायो भक्तिरुद्दिष्टो द्वेषाद्या अनुपायकः" इत्यभिधानात् उपायो भक्तिरेव अतो भक्तिमन्तरेणोपायो नास्तीत्यर्थः ॥ ३१

पैशस्कृता कथ इत्यत्र चैद्यादयः स्वतो भक्ता असुरावेशाद्द्वेषिण इत्युक्तं तत्र हेतुमाह—मातृष्वस्रेय इति । पार्षदप्रवरत्वं स्वतो भक्तत्वे विप्रशापादसुराविष्टत्वं द्वेषित्वे हेतुः ॥ ३२

हरिदासान् हरिभक्तान् अभिमृशति स्पृशतीति हरिदासाभिमर्शनः हरेरेकान्तिनां नियतभक्तानां भव उत्पत्तिः शरीरयोगलक्षणः स्वपदभ्रंशलक्षणः शापः अश्रद्धेय इवाभाति सयुक्तिकं निरूपयितुं न क्षममिति प्रतीयते ॥ ३३ ॥

तत्र कारणमाह-देहेति । देहाद्यभावश्च कुत्रत्यानामिति तत्रा

---

(१) भावप्रधानोनिर्देशः (२) येनः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वैकुण्ठेऽपि, तेषां प्राकृतदेहाद्यभावेन जन्मादिकं कथं घटत इति शङ्कयत इत्यर्थः । देहसम्बन्धः देहयोगः तस्य सम्बन्धः निमित्तभूतः शाप एतच्छापनिमित्तं अनेन देहयोगं तन्निमित्तशापं तन्निमित्तं च व्याख्यातुमर्हसीत्यर्थसमुदायो वक्ष्यत इत्यर्थः ॥ ३४ ॥

तदर्थजातं कुतोऽवगम्यत इतिपरिहारवचनादित्यत आदित वक्ति एकेनेति ॥ ३५ ॥

पञ्चषड्ढायनार्भाभाः पञ्चवर्षाः षड्वर्षाः अर्भाः अर्भका बालास्तद्वदाभा दीप्तिर्येषां ते तथा तत्समाना इत्यर्थः । शिशून्मत्वा पुरप्रवेशकारणाय वेषान्तरमापन्नानित्याशङ्कयेत्यर्थः द्वाःस्थौ द्वारि स्थौ जयविजयौ तान् सनन्दनादीन् प्रत्यषेधतां वेत्रविधानेन न्यवारयतामित्यन्वयः द्वाःस्थावित्युक्त्या जयविजययोः अधिकारस्थत्वं सूचयति तेन वैकुण्ठे अधिकारस्थिता मुक्ताश्चेति द्विविधा जनाः सन्ति । तत्राधिकारस्था देहादियोगित्वाद्वरशापयोग्याः पश्चान्नयोग्या इति ज्ञायते तदुक्तम् "अधिकारस्थिताश्चैव विमुक्ताश्च द्विधा जनाः । विष्णुलोकस्थितास्तेषां वरशापादियोगिनः । अधिकारस्थिता मुक्तिं नियतं प्राप्नुवन्ति च । विमुक्त्यनन्तरं तेषां वरशापादयो न तु । देहेन्द्रियासुयुक्ताश्च पूर्वं पश्चान्नतैर्युताः ॥ अव्यमीमांसिभिस्तेषां देवैः स्वात्मोत्तमैर्युताः" ॥ इति अनेन वैकुण्ठे मुक्तामुक्तस्थानद्वयमस्तीति ज्ञायते ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नच शास्त्रविहितेनैव भगवद्धर्मेण सिद्धिः स्यात् न तदविहितेन कामादिनेति वाच्यम्. यतः कामाद्द्वेषादिति । यथा विहितया भक्त्या ईश्वरे मन आवेश्य तद्गतिं गच्छन्ति तथैवाविहितेनापि कामादिना बहवो गता इत्यर्थः । तदघं तेषु कामादिषु मध्ये यद्वैरभययोरघं भवति तद्धित्वैव भयस्यापि द्वेषसम्मिलितत्वादघोत्पादकत्वं ज्ञेयम्. अत्र केचित् कामस्याघं मन्यन्ते । तत्रेदं विचार्यते भगवति काम एव केवलः पापावहः किं वा पतिभावयुक्तः अथवा उपपतिभावयुक्त इति. स एव केवल इति चेत् स किं द्वेषादिगणपातित्वात् तद्वत् स्वरूपेणैव वा, परम शुद्धे भगवति यदधरपानादिकं यच्च कामुकत्वाद्यारोपणं तेनातिक्रमेण वा, पापश्रवणेन वा ? नाद्येन. "उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथागतः । द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः" ; इत्यादौ द्वेषादेर्न्यक्कृतत्वात्. तस्य तु स्तुतत्वात्. अतस्तत्र प्रिया इति स्नेहवत् कामस्यापि प्रीत्यात्मकत्वेन तद्वदेव न दोषः । तादृशीनां कामो हि प्रेमैकरूपः. "यत्ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु । तेनाटवीमटसि तद्व्यथते न किं स्वित् कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः" इत्यादावार्तिकस्यापि स्वसुखं तदानुकूल्य एव तात्पर्यदर्शनात्. सैरन्ध्र्यास्तु भावो-रिरंसाप्रायत्वेन श्रीगोपीनामिव च केवलं तत्तास्पदत्वाभावात्-दर्पेणैव लिप्यते नतु स्वरूपतः "सानङ्गतप्तकुचयोः" इत्यादौ "अनन्तचरणेन रुजो मृजन्ती" इति "परिरभ्य कान्तमानन्दमूर्तिम्" इति कार्यद्वारा तत्स्तुतेः तत्रापि "सहोष्यतामिह प्रेष्ठ ! दिनानि कतिचिन्मया" इत्यत्र प्रीत्यभिव्यक्तेश्च । तदेवं तस्य कामस्य द्वेषादिगणान्तःपातित्वं परिहृत्य तेन पापावहत्वं परिहृतम् अथ कामुकत्वाद्यारोपणाधरपानादिरूपस्तत्र व्यवहारोऽपि नातिक्रमहेतुः यतो "लोकवत्तु लीलाकैवल्यम्" इति न्यायेन लीला तत्र स्वभावत एव सिद्धा. तत्र च श्रीभूलीलादिभिस्तस्य तादृशलीलायाः श्रीवैकुण्ठादिषु नित्यसिद्धत्वेन स्वतन्त्रलीलाविनोदस्य तस्याभिरुचितत्वावगमात्. तादृशलीलारसमोहस्वाभाविकं भगवत्याद्यनुसन्धानमपि तत्कामुकत्वादिमननमपि च तदभिरुचितत्वेनैवावगम्येत. तथा तत्प्रेयसीजनानामपि तत्स्वरूपशक्तिविग्रहत्वेन परमशुद्धरूपत्वात् ततो न्यूनत्वाभावाच्च तदधरपानादिकमपि नाननुरूपम् । पूर्वयुक्त्या तदभिरुचितमेव । तासां तत्स्वरूपशक्तिविग्रहत्वं श्रीकृष्णसन्दर्भे दर्शितमस्ति दर्शयिष्यते च श्रीदशमे, नच प्राकृतरमाजने दोषः प्रसज्जनीयः तद्योग्यं तादृशं साध्यं स्वरूपशक्तिविग्रहत्वं प्रायेण तदिच्छयैव तत्प्राप्तेः । अथ पापश्रवणेन च न पापावहोऽसौ कामः तत्कृपया-देव. अतः पतिभावयुक्ते च तत्र सुतरां न दोषः प्रत्युत स्तुतिः श्रूयते "याः सम्पर्यचरन् प्रेम्णा पादसंवाहनादिभिः । जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः" इति महानुभावतानामपि यथा श्रीमध्वाचार्यधृतं महाकौर्मवचनं "अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारञ्च जगद्योनिं वासुदेवमजं विभुम्" इति अत एव वन्दितम् "पतिपुत्रसुहृद्भ्रातृपितृवन्मातृवद्धरिम् । ये ध्यायन्ति सदोद्युक्तास्तेभ्योऽपीह नमो नमः" इत्यनेन अथोपपतिभावेन च न पापावहोऽसौ "यत्पत्य-नाः" इत्यादिना तासामभिलषितत्वात् "गोपीनां तत्पतीनाञ्च" इत्यादिना, श्रीशुकदेवेन "न पारयेऽहं निरवद्यसंयुजाम्" इत्यनेन स्वयं श्रीभगवता तादृशीनामप्येतासामपि तच्छ्लाघा-द्वहने यथोदाहरिष्यते श्रीदशमे "पुरा महर्षयः सर्वे दण्डकारण्यवासिनः" इत्यादि । अतः पुरुषेऽपि स्त्रीभावेनाङ्ग-भावात् भगवद्विषयत्वात् न प्राकृतकामवत्तोषावहोऽसौ प्राकृतकामोऽसौ किन्तु "साक्षान्मन्मथमन्मथः" इति श्रवणात् आगमादौ तस्य कामत्वेनोपासनाच्च भगवदेकोद्गामिनोऽप्राकृत एवासौ काम इति ज्ञेयम् अत एव मुमुक्षुमुक्तान्यपापस्थानामपि वाञ्छनीयोऽसाविति दर्शितम् श्रीदशमे "एताः परं तनुभृतः" इत्यादिना. यतः श्रुतयोऽपि "नित्यसिद्धगोपिकाभावाभिभूताः" इत्यादिना. तादृशाः सत्यं तदुपरिष्टाच्च तदङ्गनान्तःपातित्वं वयमपि" इति "निभृतमरुन्मनोऽक्ष" इत्यादि श्रुतिस्तवे दर्शयिष्यते । तदेवं साधु व्याख्यातं कामादित्यादौ द्वेषभयपौर्वापर्याद् इत्यादि ॥ २९ ॥

अथ 'बहवस्तद्गतिं गताः' इत्यत्र निदर्शनमाह—गोप्य इति सार्द्धकेन । गोप्य इति साधकचरीणां गोपीविशेषाणां पूर्वव्याख्यान-लब्धयोऽस्यते, वयमिति. यथा श्रीनारदस्य "प्रयुञ्जमाने मयि तां शुद्धां भागवतीं तनुम्" इत्याद्युक्तरीत्या पार्षददेहत्वं सिद्धं तेन स्वयं वयमिति निजपूर्वावस्थामवलम्ब्योच्यते । तत्रैव वैधी भक्तिः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अधुना लब्धरागस्य तस्य "नमस्येकान्तभक्तानां गुणदोषोद्भवा गुणाः । गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः" इति न्यायेन विध्यनधीना रागात्मिकैव विराजत इति. अत एव तद्गतिं गता इति तेषां फलप्राप्तेरप्यतीतत्वनिर्देशः एवमेव वक्ष्यते स्वयं भगवता "केवलेन हि भावेन गोप्यः" इत्यादि । "मत्कामा रमणम्" इत्यादौ "सङ्गाच्छतसहस्रशः" इति च अत्र ता गोप्य इवाधुनिकयश्च तद्भावादिभवयोनैव तद्भावा भवेयुः यथोक्तम्. "श्रुतमात्रोऽपि यः स्त्रीणां प्रसह्याकर्षते मनः । उरुगायोरुगीतो वा पश्यन्तीनां कुतः पुनः" इति । अथ पार्षदचरस्यापि चैद्यस्यागन्तुकोपद्रवाभासदर्शनेनैव साधकत्वनिर्देशः । सम्बन्धाद्यः स्नेहो रागस्तस्माद्वृष्णयो यूयं चेत्युक्तम्. 'तस्माद्वैरानुबन्धेन' इत्यादौ कामादित्यादौ चोक्तस्यैवा-र्थस्योदाहरणवाक्येऽस्मिन् नदैकार्थ्यावश्यकत्वात् पञ्चानामित्यनुरोधात् उभयत्रापि सम्बन्धस्नेहयोर्द्वयोरपि विद्यमानत्वाच्च । सम्बन्ध ग्रहणं रागस्यैव विशेषज्ञापनार्थं गोपीष्वत्रापि सम्बन्धे स्नेहे च वृष्णिविशेषाः पाण्डवसम्बन्धिविशेषाश्च पूर्वावस्थामवलम्ब्य साधकत्वेन निर्दिष्टाः । अतः सम्बन्धे स्नेहोऽपि तदभिरुचिमात्रं ज्ञेयम्. 'भक्त्या विहितया' अस्या एव प्रतिलब्धत्वेन भावमार्गं निर्देष्टुमुपक्रान्तत्वात् ॥ ३० ॥

यदि द्वेषेणापि सिद्धिस्तर्हि वेनः किमिति नरके पातित इत्याशङ्क्याह—कतम इति । पुरुषं भगवन्तं लक्षीकृत्य पञ्चानां वैरानुबन्धादीनां मध्ये वेनः कतमोऽपि न स्यात् तस्य तं प्रति प्रासङ्गिकनिन्दामात्रात्मकं वैरं. न तु वैरानुबन्धः ततस्तीव्रध्यानाभावात् पापमेव तत्र प्रतिफलितमिति भावः । ततोऽसुर तुल्यस्वभावैरपि तस्मिन् स्वगोत्रार्थं वैरानुष्ठानसाहसं न कर्तव्यमित्यभिप्रेतम् अत एव "ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये" इत्यादावपि तेषु व्यतिव्याप्तिर्या हन्यते अनभिप्रेतत्वेनाप्रोक्तत्वात् यस्मादेवं तस्मादिति अत्रापि पूर्ववन्निवेशयेदिति सम्मतिमात्रं न विधिः केनापि तेष्वप्युपायेषु युक्ततमेनैकेनेत्यर्थः । अहो यस्तादृशमहाप्रयत्नसाध्यशक्तिमार्गेण चिरात् साध्यते स एव चिरादुभावविशेषमात्रेण तत्र च द्वेषादीनामपि तस्मादेवम्भूते परमसद्गुणसद्भावे तस्मिन् दूरेऽस्तु पामरजनसाध्यस्य वैरमेव वार्ता को वाधमः औदास्यमवलम्ब्य प्रीतिमपि न कुर्यादिति रागानुगायामेव तत्र युक्ततमत्वमङ्गीकृतं भवति ॥ ३१ ॥

चैद्यदन्तवक्त्रौ तु नासुरौ किन्तु हरेः स्वभक्तिप्रवर्त्तक-विप्रकुलदाक्षिण्यमयस्वैरलीलेच्छया तदनुकारिणावेवेत्यभिप्रायं प्रदर्शनार्थं दर्शयितुमाह—मातृष्वस्रेय इति । तत्र तयोरन्यथाभावः सर्वथा न सम्भवत्येवेति प्रश्नस्यार्थः "न च पुनरावर्त्तते" इति श्रुतेः । "अनावृत्तिः शब्दात्" इति न्यायात् "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" इति श्रीगीताभ्यः । सत्यायश्चैवासौ सिद्धान्तस्तु तत्रेतिहासमात्रम् तच्च पूर्वयुक्त्यैव सम्भवतीति तदभिप्रायः वक्ष्यते च स्वयम् 'विष्णुचक्रहतांहसौ' इति व्याख्यास्यते च तैः तयोः पापमेव हतं न तु ताविति ॥ ३२—३४ ॥

एकदेति युग्मकम् । यदृच्छया केनापि भाग्योदयेन विष्णु-लोकं जग्मुः ॥ ३५ ॥ ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भक्ताभक्तभाववन्तः सर्व एव तं प्राप्नुवन्ति साधनतारतम्या-फलतारतम्यन्तु युक्त्या स्वयं विवेचनीयमित्याह—कामादिति तदेवं द्वेषजन्यमघं हित्वा द्वेषजन्येनैवावेशेन विनष्टीकृत्येत्यर्थः । चात्र कामेऽप्यघं व्याख्येयम् "द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः" इति तद्गतीनां प्रियात्वेनाख्यास्यमानत्वात् तद्गतिं तदीयां गतिं प्रेमाख्यां मोक्षञ्च ॥ २९ ॥

भावानामास्पदानि नामग्राहमाह—गोप्यः कामात् पूर्वं व्याख्या युक्त्यैव स्नेहोऽत्रापि च नतु सामान्यतः तादृगभिप्रायवत्-कुब्जाद्या इति प्रयुज्येत भयात् स्वस्य कृष्णवध्यत्वज्ञानतः उक्ततः वृष्णयो यादवाः यूयं पाण्डवाश्च सम्बन्धात् पुत्रभ्रात्रादिभावात् मातुलेयभ्रातृस्वस्रेयादिभावाच्च, कीदृशात् स्नेहात् स्नेहमयादिति सत्राजित्प्रसेनशतधन्वकर्णदुर्योधनादयो व्यावृत्ताः न चात्र स्नेहस्य पृथक् तत्प्राप्तिसाधनत्वं व्याख्येयम्, उत्तरवाक्ये पञ्चसंख्यत्वेनैव भावानां निरूपणात् वयं नारदादयो भक्त्या तद्गतिं गता इति पूर्वस्यैवानुषंगः तत्र गोप्यः प्रेमवत् प्रेयसीभावं कंसः सायुज्यं चैद्यदन्तवक्त्रपौण्ड्रकाः सारूप्यं अन्येऽप्यन्यो यथायोग्यं सायुज्यसालोक्यादिकं वृष्णयः पाण्डवाश्च सख्यादिभाववत्पार्षदत्वं नारदादय ऐश्वर्यज्ञानवत् पार्षदत्वमित्येवं यथा साधन-तत्तत्प्राकरणिकवाक्यदृष्ट्या निर्धारितां गतिं तदीयां गताः अत्र "यादवानां हितार्थाय धृतो गोवर्द्धनो मया" इति हरिवंशवाक्यात् नन्दादिगोपानामपि वृष्णिवंशत्वादैश्वर्यज्ञानशून्यत्वेन स्नेहवत्त्वाधिक्यात् पुत्रादिसम्बन्धस्यातिदार्ढ्यमेषामेव प्राधान्यद्योतकं ज्ञेयम् । ननु, तर्हि शिशुपालवदङ्गवनिन्दान्यक्कारादिकर्त्ता वेनः किमिति नरके पतितस्तत्राह—पुरुषं भगवन्तं प्रति पञ्चानां पूर्वश्लोकोक्तानां भावानां मध्ये कस्याप्यनाश्रयत्वात् कतमोऽपि न भवति नतावद्गोपीव स्नेहवत्कामवान् न च कंसवद्दीनः नच मां हनिष्यतीति बुद्ध्या भगवद्व्यन्तावेशमय्या शिशुपालवत् द्वेषमापि वृष्ण्यादिरिव तत्र कमपि सम्बन्धं दधानो नापि नारदादिरिव भक्त इत्यर्थः तेन शिशुपालादिभिन्नः प्रतिकूलभावादिधीर्दुर्वेन इव नरकं यातीति भावः । यस्मादेवं तस्मात् केनाप्युपायेन प्रतिकूलेनैव उपायेन कृष्णे मनो निवेशयेदिति विधेस्तस्माद्वैरानुबन्धेनेति श्लोकोक्तविधिना सहैकार्थ्यं ज्ञेयम् ॥ ३०—३१ ॥

तदेवं शिशुपालप्रस्तावादायातं भावमार्गसिद्धान्तं तं समाप्य श्रीकृष्णे शिशुपालस्य वैरानुबन्धे को हेतुरित्यपेक्षायामाह—मातृष्वस्रेय इति । पदाद्वैकुण्ठात् च्युतौ ॥ ३२ ॥

हरिदासावप्यभिमृशति स्पृशति अभद्रेयः शापवाक्ये विश्वासो नोत्पद्यते असम्भवादिति भावः ॥ ३३ ॥

असम्भवमेवाह—देह इति । जन्म हेतुभूतैः प्राकृतैर्देहेन्द्रियप्राणैर्हीनानां शुद्धसत्त्वमयदेहानामित्यर्थः प्राकृतदेहसम्बन्धो

अशपन्कुपिता एवं युवां वासं न चार्हथः।
रजस्तमोभ्यां रहिते पादमूले मधुद्विषः।
पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः॥ ३७॥
एवं शप्तौ स्वभवनात्पतन्तौ तैः कृपालुभिः।
प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पताम्॥ ३८॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

सम्बन्धम् एतदाख्यानमाख्यातुमर्हसीति श्रीस्वामिचरणानां व्याख्या॥ ३४॥ ३५॥

पञ्च वा षड्वा हायनानि येषां ते अर्भा बालास्तद्वदाभा येषान्ते च पूर्वेषां मरीच्यादीनामपि दिग्वाससः शिशून् मत्वा पुंवद्भाव-आर्षः॥ ३६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यथा भक्त्या तथैव कामादिना ईश्वरे मन आवेश्य तदघं भगवत्पदप्राप्तिप्रतिबन्धकं स्वपापं हित्वा तद्गतिं भगवत्पदं गताः प्राप्ताः॥ २९॥

तत्प्रकारमेवमकान् वर्णयति—गोप्य इति। वृष्णीनां युष्माकं च यः कृष्णे सम्बन्धस्तस्माद्यः स्नेहस्तस्मात् वृष्णायो यूयं च तद्गतिं गता इति योजना भक्त्या यथोक्तेन भजनेन॥ ३०॥

कामादिभिरेव भगवच्चिन्तनपराणां मुक्तिरित्यपि नियमो नास्तीत्याह—कतम इति। पुरुषं भगवन्तंप्रति कामादिभिश्चि-न्तयतां पञ्चानां मध्ये वेनः कतमोपि न. स हि "भगवन्निन्दया वेनो द्विजैस्तमसि पातितः" इति वाक्यात्, द्विजैस्तमसि पातितोऽपि भगवता पुत्रीभूतेन तमसः पुनरुद्धृतः "पुत्त्रोत्पन्नरतमः" इति वच-नात्. अतोभगवन्निन्दया भगवति मनोनिवेशनेन तत्कृपापात्रतां प्राप्त उक्तेभ्यः पञ्चभ्योऽन्यः तस्मात्केनाप्युपायेन कामादिपञ्चप्रकार-स्वेकतमेन निन्दयाच साङ्केत्यनामग्राहित्वादिना वा आर्त्तजिज्ञासुरर्थार्थित्वाद्यन्यतमेन वा मनः श्रीकृष्णे निवेशयेत् इति सिद्धान्तः॥ ३१॥

शिशुपालो दन्तवक्त्रश्चेति द्वौ न कर्मवशौ जीवौ किन्तु भगव-त्पार्षदप्रवरौ भगवदिच्छया भगवदवतारभूतसनत्कुमारशापव्याजेन वैकुण्ठादागतौ, पुनर्वैकुण्ठं गतौ इत्याह—मातृष्वस्रेय इत्यादिना: पदाद्वैकुण्ठात्॥ ३२॥

हरिदासौ अभिमृशति विपर्यासकरोतीति तथा किञ्च हरेः एकान्तिनां भवो जन्म च अश्रद्धेय इवाभाति॥ ३३॥

प्राकृतदेहादिहीनानाम् अप्राकृतदेहादिमतामित्यर्थः। देहसम्ब-न्धेन जन्ममरणादौप्राकृतदेहसम्बन्धेन सम्बन्धमेतदाख्यानमा-ख्यातुं वर्णयितुमर्हसि॥ ३४॥ ३५॥

पञ्च वा षड्वा हायनानि संवत्सराः यस्य तथाभूतो योऽर्भो-बालस्तद्वदाभा येषां ते पूर्वेषां मर्यादीनामपि पूर्वजाः॥ ३६॥

भाषा टीका।

बहुत जन काम द्वेष भय स्नेह और भक्ति से ईश्वर में मन लगा कर कामादि से होने वाले पाप को त्याग कर पर-मात्मा की गति को प्राप्त हुए॥ २९॥

काम से गोपी, भय से कंस, द्वेष से शिशुपालादि राजा लोग, संबंध से यादव लोग, स्नेह से तुमलोग हे राजन्! तथा भक्ति से हम लोग गोविन्द को प्राप्त हुए॥ ३०॥

इन पाचों में से राजा वेन तो भगवान के प्रति कोई भी नहीं हो सका है इसलिये वह नरक में गिराया गया तस्मात् किसी न किसी प्रकार से श्रीकृष्ण में मन लगाना चाहिये॥ ३१॥

हे युधिष्ठिर! तुमारी मौसी का पुत्र शिशुपाल और दंतवक्त्र ये दोनों विष्णु के पार्षदों में श्रेष्ठ थे, ब्राह्मणों के शाप से अपने पद से च्युत हो गये॥ ३२॥

युधिष्ठिर उवाच।

युधिष्ठिरजी बोले, कि हरिदासों को स्पर्श करने वाला कैसा शाप और किस हेतु से शाप हुआ, भगवान के एकही भक्तों का इस संसार में जन्म लेना तो कुछ ठीक नहीं मालूम पड़ता॥ ३३॥

क्योंकि प्राकृत देह इन्द्रिय प्राणों से हीन ऐसे वैकुण्ठ को इस प्राकृत देह के संबंध से होने वाले इस आख्या न को आप कहने योग्य हैं॥ ३४॥

नारद उवाच।

नारदजी बोले, कि। एक समय ब्रह्मा के पुत्र सनंदनादि कों ने विष्णु के लोक की जाने की इच्छा की, और तीनों भुव नों में विचरते २ वैकुण्ठ लोक में पहुंचे॥ ३५॥

देखने में पांच छः वर्ष के बालक से जाने जाने परंच अवस्था में तो पूर्व (मरीच्यादि) लोगों के भी पहिले उत्पन्न हुए हैं दोनों द्वारपालों ने इन को नग्नदेखकर बालक जान भीतर जाने को रोक दिये॥ ३६॥

श्रीधरस्वामिकृतभावार्थदीपिका।

वासमपि नार्हथः कुतः पुनरनन्तमेत्यामिति चकारार्थः हे बालिशौ! अतो हेतोराशु यातम्॥ ३७॥

जज्ञाते तौ दितेः पुत्रौ दैत्यदानववन्दितौ ।
हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ॥ ३९ ॥

हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा ।
हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः ॥ ४० ॥

हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् ।
जिघांसुरकरोन्नाना यातना मृत्युहेतवे ॥ ४१ ॥

सर्वभूतात्मभूतं तं प्रशान्तं समदर्शनम् ।
भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः ॥ ४२ ॥

ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवस्सुतौ ।
रावणः कुम्भकर्णश्च सर्वलोकोपतापनौ ॥ ४३ ॥

तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये ।
रामवीर्यं श्रोष्यसि त्वं मार्कण्डेयमुखात्प्रभो ! ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वां युवयोस्त्रिभिर्जन्मभिः लोकाय स्वस्थानप्राप्तये कल्पतां तावताऽयं शापः समाप्यतामिति पुनः प्रोक्तावित्यर्थः ॥ ३८ ॥ ३९ ॥

धरोद्धारे निमित्ते तत्प्रतिघाती हतः ॥ ४० ॥

हिरण्यकशिपोर्वधे कारणं सूचयति--हिरण्यकशिपुः पुत्र-मिति ॥ ४१ ॥

सर्वभूतानामात्मभूतं कुतः सर्वं ब्रह्मैव पश्यतीति तथा ततः प्रशान्तं द्वेषादिरहितं अत एव भगवत्तेजसा स्पृष्टं व्याप्तम् उद्यमैः शस्त्रास्त्रप्रहारादिभिः ॥ ४२ ॥

विश्रवसः सुतौ ॥ ४३ ॥

न्यहनत् हतवानित्यर्थः । तर्हि तदेव कथनीयमित्युत्सुकं प्रत्याह—रामवीर्यमिति ॥ ४४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ताभ्यां प्रतिषिद्धास्ते कुपिताः सन्तः एवं वक्ष्यमाणरीत्या अशपन्. शापप्रकारमेवाह—युवामित्यादिना । रागद्वेषादिरहिते भगवतः पादमूले वासं कर्त्तुं युवां नार्हथः अप्राकृतं भगवत्पादारविन्दमूलमुपाश्रित्यात्र स्थातुं प्राकृतरागद्वेषादियुक्तौ युवां नार्हथः इत्यर्थः किन्तु बालिशौ मूर्खौ युवामतो भगवत्स्थानादाशु शीघ्रं पापिष्ठां रागद्वेषादिबहुलामासुरीं योनिमासुरजन्मेत्यर्थः यातं प्राप्नुतम् ॥ ३७ ॥

एवमित्थं शप्तौ तौ पार्षदौ स्वस्थानात्पतन्तौ कृपालुभिस्तैः सन कादिभिः प्रोक्तौ. तदेवाह—पुनरिति । पुनर्वां युवयोस्त्रिभिर्जन्मभि र्लोकाय पुनरेतल्लोकप्राप्त्यै कल्पतां शापमोक्ष इति शेषः तावत कालेन शापः समाप्यतामित्यर्थः ॥ ३८ ॥

तावेव पार्षदौ विप्रैः शप्तौ इह लोके दितेः पुत्रौ जज्ञा जातौ बभूवतुः तत्र हिरण्यकशिपुर्ज्येष्ठस्ततो हिरण्याक्षस्त स्यानुजः ॥ ३९ ॥

तत्र ज्येष्ठो हिरण्यकशिपुर्नृसिंहरूपिणा भगवता हतः हि रण्याक्षस्तु धरोद्धारे भूम्युद्धारे निमित्ते सौकरं वाराहं वपुर्बिभ्र भगवता हतः ॥ ४० ॥

हिरण्यकशिपुवृत्तान्तप्रश्नावतरणाय तद्वृत्तान्तं संग्रहेण हिरण्यकशिपुरिति । स केशवस्य भगवतो निरतिशयप्रियं प्रह्ला पुत्रं जिघांसुर्हन्तुमिच्छुः पुत्रमरणनिमित्तं नानाविधा यातन अकरोत् ॥ ४१ ॥

यातनाः कुर्वाणोपि हिरण्यकशिपुस्तं पुत्रं हन्तुमुद्यमैः सर्व पायैरपि नाशक्नोत्. तत्र हेतुं वदंस्तं विशिनष्टि—भगवतस्तेज स्पृष्टं व्याप्तं, तत्र हेतुः, प्रशान्तमशनायापिपासादिरहितं प्रशान् स्त्वेव भगवत्तेजस्पर्शादितिभावः । यद्वा, अत एव प्रशान्तं तत्र हेतुः सम र्शनं सुखदुःखादिषु द्वन्द्वेषु समदृष्टिर्यस्समः स एव प्रशा इति भावः । यद्वा, अत एव समदर्शनं सर्वभूतानामात्मा ईश्वरस्त द्भूतं तत्प्रकारकतया तदात्मतामापन्नम् "शास्त्रदृष्ट्यातूपदेशो वामदे वत्" इत्युक्तरीत्या यथा "वामदेवस्तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिप अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्रः" इति सर्वभूतात्म त्मानं भगवन्तं स्वशरीरकं धीसात्कृत्य सर्वप्रकारतया स एवाय इति प्रकारभेदेऽपि प्रकार्यैक्याद्वदभिप्रायेण वामदेवो मन्वादि

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

महात्मनो ऽभेदमनुसंहितवानेवं प्रह्लादोऽपि " अहं हरिः सर्वमिदं जनार्दनः" इति प्रकारैकयाधिशिष्टवस्त्वेकदेशत्वात्स्वस्मिन्नखिलस्वाभावमावश्यमहमेव सर्वभूतान्तरात्मा भगवानित्यनुसंहितवानित्याशयेन तस्य विशेषणं सर्वभूतात्मभूतमित्युक्तम् ॥ ४२ ॥

ततस्तावेव हिरण्यकशिपुहिरण्याक्षौ द्वितीये जन्मनि केकस्यां भार्यायां विश्रवस्सुतौ जातौ तत्र ज्येष्ठो रावणोऽनुजस्तु कुम्भकर्णस्तावुभौ सर्वलोकानुपतापयतः लोकयत इति सर्वलोकोपतापनौ ॥ ४३ ॥

तत्रापि जन्मनि भगवान् राघवो भूत्वा शापमुक्तये तयोः शापोत्तारणाय न्यहनत्. अनेन हितकारित्वं भगवतः सूचितम् कोऽसौ राघवः? कीदृशं तद्वीर्यम्? कथं वा हतवान्? इत्यत्राह—रामवीर्यमिति । वीर्यग्रहणं तज्जन्मादीनामप्युपलक्षणं तदवतारतद्वीर्यादिकं सर्वं, हे प्रभो ! मार्कण्डेयमुखाच्छ्रोष्यसि अतो नात्र तन्मया वितन्यत इति भावः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नानायातनाः बहुविधतीव्रवेदनाकारणानि ॥ ४१ ॥

सर्वभूतात्मनि चराचरान्तर्यामिणि हरावेव भूतं स्थितम् ॥ ४२ ॥

नन्वासुरीं योनिं यातम् इत्ययं शापः आसुरयोनिप्राप्तिहेतुः तत्र जयविजययोः दित्यां जन्म तदनन्तरं केशिन्यादिजन्म कथं युज्यते ? " राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः " इति भिन्नयोनित्वादितीमां मन्दाशङ्काम्—

" हिरण्यकशिपुर्भूतममन्यत मृतौ हरिम् ।
अतो भयानको जातस्तत्र राजानमेव च ॥
मत्वा राजैव सञ्जातः कृष्णं चक्रादिलक्षणैः ।
मृतिकाले हरिश्चैव मत्वा भक्त्यैव केवलम् ।
द्वास्स्थत्वं हरिमाविश्य प्रापैवमनुजोऽपि तु " ॥

इत्यनेन परिहर्तव्यम्. " यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय!" इत्यादेः सुरविरुद्धत्वमुभयोः सर्भमित्यतो हरिद्वेषश्च सम इति भावः ॥ ४३—४५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अशपदिति सार्द्धकम् । रजस्तमोभ्यां रहिते प्राकृतसत्त्वादिराहित्येऽपि तन्मात्रराहित्यस्य विवक्षितत्वात्. प्राकृतसात्त्विकत्वेनैतादृशो दोषः सम्भवतीति ॥ ३७—४१ ॥

तमिति । यस्माद्भगवत्तेजसा स्पृष्टं नित्यतदाविष्टत्वात् तस्मात् सर्वेषां भूतानामात्मभूतं परमप्रेमास्पदं तस्मादेव प्रशान्तं विक्षेपरहितम् अन्यत्र समदर्शनं रागद्वेषरहितञ्च तस्मादेव च नाशकमोदिति ॥ ४२—४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वां युवयोस्त्रिभिर्जन्मभिर्वां युवां लोकाय वैकुण्ठं प्रापयितुं कल्पतां समर्थो भवतु शाप इति शेषः ॥ ३७—३८—३९ ॥

धरोद्धारे कर्तव्ये सति ॥ ४०—४१ ॥

सर्वेषां भूतानामात्मभूतम् आत्मवत्प्रेष्ठं स्वपुत्रेऽपि पितरि द्वेषाभावात् प्रशान्ते स्वपरदुःखादीनां तुल्यदर्शनात्समदर्शनम् ॥ ४२-४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रजस्तमोभ्यां रहिते रजस्तमोपलक्षितकार्यकारणप्रकृतिविलक्षणे इत्यर्थः मधुद्विषः पादौ मूलमाश्रयो यस्य तस्मिन् वैकुण्ठे वासं युवां नार्हथ एवं ते कुपिता अशपन् ॥ ३७ ॥

बालिशौ मूढौ अतः आशु शीघ्रमासुरीं योनिं यातम् एवं शप्तौ पतन्तौ तैः कृपालुभिस्त्रिभिर्जन्मभिः पुनर्लोकाय वैकुण्ठाय कल्पतां प्राप्यताम् ॥ ३८ ॥

जज्ञाते जातौ ॥ ३९ ॥

धराया उद्धारे कर्तव्ये सति ॥ ४० ॥

यातनास्तीव्रवेदनाः ॥ ४१ ॥

सर्वेषां भूतानामात्मा भगवान् स भूतोऽनुभूतः साक्षात्प्रेमेण तम् अतएव भगवत्तेजसा स्पृष्टं श्यामम् अतएव उद्यमहन्तुं नाशक्नोत् ॥ ४२ ॥

विश्रवस्सुतौ विश्रवः पुत्रौ ॥ ४३ ॥ ४४ ॥

भाषा टीका ।

तब उन्होंने कुपित होकर शाप दिया कि तुम दोनों रज तम से रहित इस भगवान के लोक में वास के योग्य नहीं हो। इस लिये हे मूर्ख हो तुम दोनों शीघ्र पापिष्ठ आसुरी योनि को प्राप्त हो ॥ ३७ ॥

ऐसे शाप देने पर जब अपने स्थान से पतन होने लगे तब कृपालु मुनिलोगों ने कहा कि तुम फिर तीन जन्म में इस लोक को प्राप्त हो जावोगे ॥ ३८ ॥

वोही दोनों वैकुण्ठवासियों से वंदित ऐसे दिति के पुत्र उत्पन्न हुए उनमें ज्येष्ठ हिरण्यकशिपु और छोटा हिरण्याक्ष हुआ ॥ ३९ ॥

हिरण्यकशिपुको हरिने सिंहरूप धारण कर मारा, और हिरण्याक्ष को पृथिवी के उद्धार करने के समय (सूकर रूप) वराहावतार धर कर मारा ॥ ४० ॥

गोविन्द के प्रिय और अपने पुत्र ऐसे प्रल्हाद को मारने की इच्छावाला हिरण्यकशिपु पुत्र को मारने के लिये नाना प्रकार की यातना (त्रास) देने लगा ॥ ४१ ॥

तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव ।
अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ॥ ४५ ॥
वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम् ।
नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥ ४६ ॥

युधिष्ठिर उवाच ।

विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि ।
ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां सप्तमस्कन्धे युधिष्ठिरनारदसम्वादे
प्रथमोऽध्यायः ॥ १ ॥

भाषा टीका ।

परंच सर्व प्राणियों का आत्मभूत प्रशांत और समदर्शी तथा भगवत्तेज से रक्षित ऐसे प्रह्लाद को हिरण्यकशिपु बहुत यत्नों से भी न मार सका ॥ ४२ ॥

फिर दूसरे जन्म में वे दोनों पार्षद विश्रवा ऋषि की पत्नी में सर्व लोकों को दुःख देने वाले रावण और कुंभकर्ण पैदा हुए ॥ ४३ ॥

उस जन्म में भी भगवान ने श्रीराघव होकर उनके शाप दूर करने के लिये उनको मारा. हे राजन् ! श्रीरामचरित्र तुम मार्कण्डेय जी के मुख से सुनोगे ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णचक्रेण हतमंहो ययोस्तौ तयोः पापमेव हतं न तु ताविस्यर्थः ॥ ४५ ॥ ४६ ॥

येन कारणेन प्रह्लादस्याच्युतात्मता अच्युतैकचित्तत्वं तदपि ब्रूहीति शेषः ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावेव रावणकुम्भकर्णावेवाद्य अधुना तृतीये जन्मनि तव मातृष्वस्रात्मजौ क्षत्रियौ शिशुपालदन्तवक्रौ आतावच शापेन निर्मुक्तौ श्रीकृष्णचक्रेण हतमंहः पापमूलकं शरीरं ययोस्तौ ॥ ४५ ॥

वैरानुबन्धेन तीव्रमुत्कटं यद्ध्यानं भगवद्विषयकं तेनाच्युतस्य भगवतः सात्मतामात्मनो भावः प्रकारः आत्मता समाना आत्मता सात्मता तां साधर्म्यमित्यर्थः नीतौ प्रापितौ पुनर्विष्णुपार्षदौ भूत्वा हरेः पार्श्वं जग्मतुः ॥ ४६ ॥

यदुक्तं "हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् । जिघांसुः इत्यादिना प्रह्लादस्य केशवप्रियत्वं हिरण्यकशिपोः प्रह्लादे म रणोद्योगपर्यन्तो द्वेषश्चेति तद्विस्तरेण बुभुत्सुः पृच्छति युधिष्ठिरः—विद्वेष इति । दयिते नितरां प्रीतिविषये तत्रापि महात्मनि मद्गुणाश्रये हिरण्यकशिपोर्विद्वेषः कथमासीत्केन हेतुना आसीदित्यर्थः तदेतत् या च येन कारणेन प्रह्लादस्याच्युतात्मता अच्यु भगवति आत्मा मतिर्यस्य सोऽच्युतात्मा तस्य भावस्तत्ता ता हे भगवन्, मे मह्यं ब्रूहि ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वैरानुबन्धेन वैरयुक्तभक्त्या तीव्रेणात्युत्कटेनाच्युतसात्म श्रीकृष्णस्वरूपप्रवेशलक्षणां हरेर्वैकुण्ठगमनानन्तरं पार्षदौ ज विजयावयमूलरूपेणैकीभूय हरेः पार्श्वं जग्मतुरित्यन्वयः "अनु बन्धस्तु भक्तिस्यादनुबन्धःस्नेह उदाहृतः" इत्यभिधानादनुबन्ध शब्दस्य नैरन्तर्यार्थोऽनुपपन्न इति ॥ ४६ ॥

दयितत्वं महात्मत्वञ्च प्रश्नस्य कारणं येन केन नि तेन अच्युते आत्मा मनो यस्य स तथा तस्मिन् ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वैरानुबन्धेति । तदेवं ब्रह्मशापवर्णनेन ब्राह्मणबाधित्वं मुहुर्मुहुर्वर्णनेन युद्धेच्छां च कारणत्वेनोपन्यस्तवान् युद्धेच्छैव तु मुख्या ज्ञेया यथा पार्षदयोः मुनीनामपि मतिर्विपरीता जाता यथोक्तं तृतीये श्रीभगवतैव 'मतस्तु मे' इति । तथाप्यत्यन्तशापासम्भवात्तदाभास एव तत्कार्यत्वेन दर्शितः विष्णुचक्रहतां हसाविव्यनेन पूर्वोक्तसिद्धान्त एव विवेचनीयः ॥ ४६—४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीयस्य श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विष्णुचक्रेण हतमंहो ययोस्तौ तयोरपराध एव बहिः शिशुपालदन्तवक्त्राकारतया परिणतो हतो न तु तावित्यर्थः इति स्वामिचरणाः यथा वह्निना कनकस्य मालिन्यमेव दह्यते न तु कनकं तथैव जयविजययोर्ब्रह्मविनाशरूपयोर्मलयोर्हतयोः जयविजयावेव तेजः—पुञ्जाकारौ श्रीकृष्णं प्रविष्टौ अनेनैवावित भावः ॥ ४५ ॥

अच्युतेनन्सहस्थितौ आत्मानौ आकारौ ययोस्तस्य भावस्तत्ता तां ध्यानेनैव नीतौ पुनर्मौषलीलान्ते हरेर्नारायणस्य पार्श्वं जग्मतुरिति मौषलीलातः पूर्वं श्रीकृष्णशरीर एव नारायणस्यापि प्रविष्टत्वात् पार्षदौ जयविजयावपि तत्रैव प्रविष्टयोरिपता विलिनत्वं शिशुपालदन्तवक्रौ कृष्णे सायुज्यं प्रापतुरिति तु लौकिकप्रतीतिः ॥ ४६ ॥

अच्युतात्मतामच्युतैकचित्तत्वं येन तदपि ब्रूहीति शेषः ॥ ४७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

सप्तमे प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृष्णचक्रेण हतमंहः पापं ययोस्तौ ध्यानेन अच्युतसाम्यतां नीताविस्युत्तरेणान्वयः । अत्रेदं बोध्यम्, विष्णुपार्षदानां पापासम्भवात् देहपातासम्भवात् वैकुण्ठात्पुनरावृत्त्यसम्भवाच्च भगवतो बहुभिरवतारैर्विहर्तुमिच्छोरिच्छयैव मुनिशापेन राक्षसादिदेहयोगं प्राप्य बहुकालमासुरेण भावेन भगवन्तमाराध्य पुनर्भगवदिच्छयैव निर्मित इत्युक्तेर्भगवत्कारिताच्छापाद्विमुक्तौ आविष्कृतपार्षददेहौ वैकुण्ठं गताविति ॥ ४५ ॥ ४७— ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे प्रथमाध्यायार्थप्रकाशः ॥ १ ॥

भाषा टीका ।

वेही दोनों तुम्हारी माता की बहिन के पुत्र क्षत्रिय हुये अब शाप से छूट कर श्रीकृष्ण के चक्र से नष्ट हुआ पाप जिन्हों का ऐसे वेही दोनो विष्णु पार्षद, तीव्र वैर के संबन्ध से उत्पन्न हुए ध्यान से कृष्ण की समता को प्राप्त होकर फिर भगवान के समीप पहुंच गये ॥ ४५ ॥ ४६ ॥

युधिष्ठिर बोले, कि—महात्मा प्रिय पुत्र मे हिरण्यकशिपु का विद्वेष क्यों भया हे भगवन् ! जिस कारण प्रह्लाद की भगवान में प्रीति हुई सो आप मुझ से कहो ॥ ४७ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध प्रथम अध्याय की भाषाटीका समाप्त ॥ १ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

———०:*:०———

॥ द्वितीयोऽध्यायः ॥

नारद उवाच ।

भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना ।
हिरण्यकशिपू राजन्पर्यतप्यद्रुषा शुचा ॥ १ ॥

आह चेदं रुषा घूर्णः सन्दष्टदशनच्छदः ।
कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन्धूम्रमम्बरम् ॥ २ ॥

करालदंष्ट्रोग्रदृष्ट्या दुष्प्रेक्ष्यभ्रुकुटीमुखः ।
शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ॥ ३ ॥

भो भो दानवदैतेयास्त्रिमूर्धंस्त्र्यक्ष शम्बर ।
शतबाहो हयग्रीव नमुचे पाक इल्वल ॥ ४ ॥

विप्रचित्ते मम वचः पुलोमन् शकुनादयः ।
शृणुतानन्तरं सर्वे क्रियतामाशु मा चिरम् ॥ ५ ॥

सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् ।
पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ॥ ६ ॥

तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः ।
भजन्तं भजमानस्य बालस्येवास्थिरात्मनः ॥ ७ ॥

मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै ।
रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वितीये विष्णुरोषेण लोकं विद्राव्य दानवैः ।
तद्धतभ्रातृपुत्रादीनितिहासैरसान्त्वयत् ॥ १ ॥

भगवद्द्वेषपक्ष तद्द्वेषेपि कारणमित्याशयेनाह—भ्रातरीत्यादिना । एवं द्वेषपक्षपातेन ॥ १ ॥

कोपेन उत् अतिशयेन उज्ज्वलद्भ्यां कोपाग्निधूमेनैव धूम्रमम्बरं निरीक्षमाणः ॥ २ ॥

करालदंष्ट्राभिर्युक्तयोग्रया दृष्ट्या दुष्प्रेक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सः ॥ ३ ॥ ४ ॥ ५ ॥

समेनाप्युपधावनैर्भजनैर्निमित्तभूतैः पार्ष्णिग्राहेण सता ॥ ६ ॥

एवं त्यक्तः स्वभावः समत्वं येन तस्य घृणेः शुद्धतेजोमयस्यापि मायया वनौकसो वराहरूपस्य सतः अस्थिरात्मनोऽनवस्थितचित्तस्य कुतः यो यो भजति तं तं भजमानस्यानुसरतः ॥ ७ ॥

तस्य रुधिरेण यावत्तर्पयिष्यामि तावदहं भुक्तं वातेति तृतीयेनान्वयः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तयोः केशवात्मत्वाविशेषविस्तरबुभुत्सुना पृष्टो भगवान्नारद आह—भ्रातरीति । एवं देवपक्षपातिना क्रोडमूर्तिना वराहरूपिणा भगवता भ्रातरि हिरण्याक्षे विनिहते सति, हे राजन्! रोषेण शुचा शोकेन चार्पितो व्याप्तः पर्यतप्यत परितापञ्चकार ॥ १ ॥

इदं वक्ष्यमाणमाह च कथंभूत आह तत्राह, रुषा पूर्णो अत एव सन्दष्टः दशनच्छदः अधरो येन कोपेन उदतिशयेन उज्ज्वलद्भ्यां चक्षुर्भ्यां धूम्रमम्बरमाकाशं कोपाग्निधूमेनेव धूम्रमम्बरं निरीक्षमाणः ॥ २ ॥

करालदंष्ट्राभिर्भयङ्करदंष्ट्राभिर्युक्तया उग्रया दृष्ट्या दुष्प्रेक्ष्यं दुर्निरीक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सदसि सभायां शूलमुद्यम्य उद्धृत्य अनेन स्वसामर्थ्यं सूचितम् दानवान्प्रति इदमुवाच ॥ ३ ॥

तदेवाह—भोभो इति । सामान्येन तावत्सम्बोधनं भोभो दानवा दैतेयाश्चेति विशेषतः सम्बोधनं द्विमूर्धन्नित्यादिना ॥ ४ ॥

एते सर्वे यूयं प्रथमं मम वचः शृणुत ततः श्रवणानन्तरमेव मदुक्तमाशु युष्माभिः क्रियतां चिरं विलम्बं मा कुरुत ॥ ५ ॥

किं तत्तत्राह—सपत्नैरिति । समेन देवासुरवर्गयोः समेनापि उपधावनैरनुवर्तनैः पार्ष्णिग्राहेण पृष्ठोपोद्बलकेन देवानां सहायभूतेनेत्यर्थः । हरिणा प्रयोजककर्त्रा मत्सपत्नैः प्रयोजककर्तृभिः क्षुद्रैरल्पबलैर्देवैः प्रियः सुहृच्च मे भ्राता हिरण्याक्षो घातितः ॥ ६ ॥

तस्य हरेः कथंभूतस्य घृणः सूर्यवत्तेजोमयविग्रहस्यापि मायावनौकसः मायोपात्तवराहरूपस्य अत एव त्यक्तः स्वभावो येन तस्य, देवतारूपत्यागादिति भावः । भजन्तं स्वमनुवर्तमानं भजमानस्यानुवर्त्तमानस्य बालस्येवास्थिरात्मनः अव्यवस्थितचित्तस्य ॥ ७ ॥

एवंभूतस्य हरेर्मम शूलेन भिन्ना ग्रीवा यस्य तस्य भूरिणा रुधिरेण रुधिरप्रियं मम भ्रातरं गतव्यथोऽहं यावत्तर्पयिष्ये तावद्यूयं भुवं यातेत्यन्वयः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हिरण्यकशिपुः अतो विष्णुभक्तोऽसुरावेशात्तद्द्वेषीत्ययं विवेकः तद्वचनेन ज्ञातुं शक्य इत्येतदर्थमस्याध्यायस्य प्रारम्भः । तत्र प्रह्लादनाम्नि पुत्रे द्वेषः कथं पितुरभूदित्यस्य प्रश्नस्य परिहारं वक्तुमारभते—भ्रातरीति ॥ १ ॥

हरिविषयरुषा भ्रातृविषयशुचा दशनच्छदः ओष्ठः चक्षुषोः रोचिषा यथा धूम्रं भवति तथा पश्यन् ॥ २ ॥

भ्रुकुट्या नीलाधिरया युक्तमुखः ॥ ३ ॥

[illegible]पाक ॥ ४ ॥ ५ ॥

क्षुद्रैरल्पैः कपटिभिर्वा पार्ष्णिग्राहेण पृष्ठावेक्षकेण चाक्षकेन "देवानां दानवानां च सामान्यमधिदैवतम्" इत्यतः समेनाप्युपधावनैः सेवनैः विष्णुना ॥ ६ ॥

त्यक्तस्वभावस्य त्यक्तसाम्यावस्थस्य तत एवास्माभिः घृणेः शोचनस्य "घृणिर्विभावसौ सूर्ये रश्मौ शोके विमर्दने" इत्यभिधानम्. भजन्तं आत्मानं सेवमानं भजमानस्य प्रत्युपकारं कुर्वतः ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवं पर्यतप्यतेति सम्बन्धः । मूर्त्तिमत्त्वत्र रूपिणेति क्वचित् ॥ १—२ ॥

आह चेदमिति यदुक्तं तदेव विशिनष्टि—करालेति । भो भो इति युग्मकम् ॥ ३—६ ॥

तस्येति युग्मकम् । वास्तवोऽयंस्तत्वयं त्यक्तः भक्तेऽपो दत्तः स्वभावः साम्यादिकं येन 'घृणिग्रहणा' इत्युक्तात् घृणः । कृपया स्वीकृतः मायां कृपा मायेति क्रान्वमतृतीया लुक् ततः सर्वत्रान्वयः कृपयैव वनौकसः नर्लीलाविस्तारयितुः कृपयैव बालस्येवास्थिरात्मनः भक्तभावानुरूपनानाभावाविष्कारयितुः मच्छूलाहता तद्गोत्वरभूता ग्रीवा तत्तद्घातनो विग्रहो यस्य तस्य मे रुधिरेण श्रीनृसिंहतयाविर्भावे तत्समापनमदीयरुधिरेण रुधिरप्रियं भ्रातरं तर्पयिष्ये 'यथा तरोर्मूलनिषेचनेन' इत्यादेः ॥ ७—९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

द्वितीये भ्रातृशोकेन धर्मनाशाय दानवान् ।
नियोज्य ज्ञातीन् दासैर्मित्रादीन् सहासान्त्वयत् ॥

भगवद्द्वेष एव प्रह्लादद्वेषे कारणमभूदिति वक्तुं प्रथमतो भगवद्द्वेषमेव सहेतुक माह—भ्रातर्येवमित्यादिना ॥ १ ॥

अम्बरं निरीक्षन्निति हरेर्निवासं वैकुण्ठं हरिञ्च अहमत्रैव ध्वंसयिष्यामीति भावः । धूम्रामिति चक्षुरग्नेर्धूमैर्व्याप्तत्वादिति भावः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

समेनापीति यद्यपि स हरिः सर्वत्र समस्तदपि उपधावनैरुपासनैर्निमित्तभूतैः पार्ष्णिग्राहेण लोभवशाद्देवपक्षपाती संवृत्त इत्यर्थः ॥ ६ ॥

वयमप्युपधावाम इति चेन्मैवं ब्रूथ यूयं तावन्मन्नियुक्ते कर्मणि तिष्ठत अहमेक एव तं हनिष्यामीत्याह—तस्येति द्वाभ्याम् । ननु, हरिर्हि परमात्मोच्यते शास्त्रैस्ततस्तं कथं हनिष्यसि ? तत्राह, त्यक्तस्वभावस्य सर्वत्रोदासीन्यरूपः स्वभावो हि परमात्मनः प्रसिद्धः स यदि तेन त्यक्तस्तदा कुतस्तस्य सम्प्रति परमात्मत्वमितिभावः । प्रत्युत स परमात्मत्वं त्यक्त्वा पशुरभूदित्याह

तस्मिन्कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ ।
विटपा इव शुष्यन्ति विष्णुप्राणा दिवौकसः ॥ ९ ॥
तावद्यात भुवं यूयं विप्रक्षत्रसमेधिताम् ।
सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः ॥ १० ॥
विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् ।
देवर्षिपितृभूतानां धर्मस्य च परायणम् ॥ ११ ॥
यत्र यत्र द्विजा गावो वेदा वर्णाश्रमाः क्रियाः ।
तं तं जनपदं यात सन्दीपयत वृश्चत ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

घृणेः पूर्वं शुद्धतेजोमयस्यापि सम्प्रति मायापारतन्त्र्याद्वनौकसः मत्स्यकच्छपादिरूपस्य च किञ्च भजन्तञ्जनमात्रमेव भजमानस्य बालस्येव एकेनैव खण्डलड्डुकेन वशीकृतस्येत्यर्थः । वस्तुतस्तु तस्य भक्तवात्सल्यादेव त्वंक्त्वादिविशेषणपञ्चकम्भवाति तच्च तस्य भूषणमेव न तु दूषणमिति भावः । घृणेः शुद्धतेजोमयस्यापि मायया कृपया इत्यादि योज्यम् । भल्लुकादिरूपा पृथग्भूता ग्रीवा यस्येति प्राकृतस्य भल्लूकस्य तत्र प्रवेशोऽपि न सम्भवेदिति भावः "कुङ्कुमं रुधिरं प्रोक्तम्" इत्यभिधानात् रुधिरेण मद्भ्रातृगकुङ्कुमेन रुधिरप्रियं तन्निर्भात्वकुङ्कुमांकं मद्भ्रातुरंकत्वादितिभावः ॥ ७ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्णुना हिरण्याक्षे हते सति क्रुद्धो हिरण्यकशिपुर्दानवदैतेयैर्लोकं विप्लाव्य भ्रातृपुत्रान्निनिदासैत्स्वान्त्ववर्हिति भ्रातर्वंवमिति द्वितीयाध्यायेन वर्णयति—क्रोडमूर्तिना वराहरूपेण ॥ १ ॥

संदष्टौ दशनच्छदावोष्ठौ येन सः कोपेन उत् वत्पतन्तः ज्वलद्भ्यां चक्षुर्भ्यां धूम्रमम्बरं निरीक्षयन्निदमाह ॥ २ ॥

करालदंष्ट्राभिर्भयजनकदंष्ट्राभिर्युक्तया उग्रदृष्टया दुष्प्रेक्ष्यं दुर्निरीक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सः ॥ ३—५ ॥

समेनापि उपधावनैराराधनैः पार्ष्णिग्राहेण सहायेन हरिणा ॥ ६ ॥

घृणेस्तेजोमयविग्रहस्येश्वरस्यापि भजन्तं भजमानस्य अत एव त्यक्तः स्वभावः समत्वरूप ईश्वरस्वभावो येन तस्य अत एवास्थिरात्मनश्चञ्चलचित्तस्य मायया छद्मेन कापट्येन वनौकसः वराहरूपस्य ॥ ७—८ ॥

भाषाटीका ।

श्रीराधिकारमणो जयति ॥

नारदजी बोले, कि हे राजन्! वाराह रूपधारी हरिने इ प्रकार भ्राता के मारने पर हिरण्यकशिपु रोष और शोक बहुत ही तप्त हुआ ॥ १ ॥

और क्रोध से प्रज्वलित होकर दांतों से होठ काट क कोप से जलते हुए नेत्रों से धुआँधार आकाश को देखता हु बोला ॥ २ ॥

कराल डाढें और उग्र दृष्टि से न देखी जाय मुख भ भृकुटि जिसकी ऐसा हिरण्यकशिपु सभा में दानवों यह वाक्य बोला ॥ ३ ॥

हे २ दैत्य दानवो! हे द्विमूर्द्धन्! हेऽयक्ष! हे शम्ब हे शतबाहो! हे हयग्रीव! हे नमुचे! हे पाक! हे इल्वल! ॥ ४

हे विप्रचित्त! हे पुलोमन्! हे शकुनादिको! तुम सब मेरा वचन सुनो और पश्चात् जल्दी करो देर न करो ॥ ५

यद्यपि विष्णु सबों को सम था; तौभी क्षुद्र वैरी देवता ने उसके पीछे पड सहाय बनाकर उसी हरि के द्वारा प्रिय सुहृत् भ्राता को मरवा डाला ॥ ६ ॥

अब अपने समत्वरूप स्वभाव को छोडने वाले, और भ सेवक को भजने वाले, बालक के तरह अस्थिरमन वाले विष्णु के गले को अपने शूल से काट कर उसके बहुत रुधिर से रुधिरप्रिय अपने भ्राता का तर्पण करूंगा तब व्यथा दूर होगी ॥ ७—८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, देवैस्तद्वधः कारितोऽतस्ते किं न हन्यन्ते? तत्रा तस्मिन्हरौ कूटे कपटे अहिते प्रतिपक्षे कूटमीहितं यस्येति नष्टेऽद्दष्टे सति देवाः शुष्यन्ति स्वयमेव नाशं यास्यन्ति, कृ

इति ते भर्तृनिर्देशमादाय शिरसाऽऽदृताः ।
तथा प्रजानां कदनं विदधुः कदनप्रियाः ॥ १३ ॥
पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् ।
खेटखर्वटघोषांश्च ददहुः पत्तनानि च ॥ १४ ॥
केचित्खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् ।
आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः ।
प्रादहञ्छरणान्यन्ये प्रजानां ज्वलितोल्मुकैः ॥ १५ ॥
एवं विप्रकृते लोके दैत्येन्द्रानुचरैर्मुहुः ।
दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विष्णुरेव प्राणो येषां ते यथा छिन्नमूले वृक्षे शाखाः स्वयं शुष्यन्ति तद्वत् ॥ ९ ॥

तपोयज्ञादियुक्तान्सूदयध्वं घातयत ॥ १० ॥

ननु, तैः किमपराद्धम् ? तत्राह—विष्णुरिति । द्विजानां क्रिया अनुष्ठानं मूलं यस्य सः यतोऽसौ यज्ञो धर्ममयश्च देवादीनां परायणं परम आश्रयः अतो यज्ञरूपस्य विष्णोर्मूलत्वात्तन्नाशाद्दैत्य तदाश्रयत्वाच्च ते वध्या इति भावः ॥ ११ ॥

तस्मात्परं मन्त्रं शृणुतेत्याह—यत्रयत्रेति । सन्दीपयत दहत वृश्चत आजीव्यानां वृक्षाणां छेदं कुरुत ॥ १२ ॥ १३ ॥

पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजो गवां वासः उद्यानं कृत्रिमं वनं क्षेत्रं व्रीह्यादेः आरामाऽऽश्रमं वनम् आश्रमः ऋषीणां स्थानम् आकरो रत्नादीनां खेटः कर्षकजनानां वासः खर्वटो गिरिद्रोणयाश्रयो ग्रामः घोष आभीराणां वासः पत्तनं राजधानी ॥ १४ ॥

खनित्रैः खननसाधनैः आजीव्यानुपजीव्यान् जम्बाम्रकपित्थादीन् शरणानि गृहान् ॥ १५ ॥

विप्रकृते उपद्रुते यज्ञभागानामभावाद्दिवं परित्यज्यालक्षिताः सन्तो भुवि चेरुः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, दैत्यैस्तद्वधः कारितः अतस्ते किं न हन्यन्ते ? तत्राह—तस्मिन्निति । अस्माकमहिते शत्रौ कूटे देवानामाश्रये तस्मिन् विष्णौ नष्टे सति यथा वनस्पतौ छिन्नं मूलं यस्य तस्मिन् सति शाखाः शुष्यन्ति, तद्वद्विष्णुरेव प्राणो जीवनहेतुर्येषां ते दिवौकसः देवाः स्वयमेव नङ्क्ष्यन्ति अतः तन्नाशाय न पृथग्यत्नः कार्य इति भावः ॥ ९ ॥

यावत्पर्यन्तं तावद्यूयं ब्रह्मक्षत्रकुलाऽन्यां समेधितां ब्रह्मक्षत्रबहुलामित्यर्थः । भुवं पृथ्वीं यात, गत्वा किं कर्तव्यम् ? तत्राह—सूदयध्वमिति, तप आदीनां द्वन्द्वः ततो मत्वर्थीयइनिः । तप आदिभिर्युक्तान् सूदयध्वं घातयत ॥ १० ॥

ननु, तैः किमपराद्धम् ? तत्राह—विष्णुरिति । द्विजानां क्रियामूलो यो यज्ञः स एव धर्मस्तन्मयस्तदाकृतिः पुमान् विष्णुर्द्विजक्रियामूल इति भिन्नपदं वा द्विजानां क्रिया स्मार्ती मूलं यस्य श्रौतयज्ञरूपधर्ममयश्चेत्यर्थः । पुमान् श्रौतस्मार्तधर्मप्रवर्तक इत्यर्थः । तथा देवर्षिपितृभूतानां धर्मः देवाद्युद्देश्यको यो धर्मस्तस्य च परायणं परम आश्रयः निर्वाहकः देवाद्युद्देश्यको यो धर्मस्तदाश्रय इत्यर्थः । द्विजेषु तत्कर्तृकयज्ञादिधर्मेषु च विनाशितेषु शरीरविनाशेन विष्णुरपि विनाशितो भवति तद्विनाशे तदाश्रयविनाशाद्वाश्रिते धर्मे विनष्टे सति यज्ञधर्मोपचरणरूपाशाद्यश्च तन्मांगादिरूपजीविकाया अभावाद्देवादयोऽपि स्वयमेव विनष्टा भवन्तीति भावः ॥ ११ ॥

तस्माद्यत्रयत्र देशे ब्राह्मणादयो वर्तन्ते तं तं जनपदं देशं यात गच्छत सन्दीपयत दहत वृश्चत लुनीत ॥ १२ ॥

इतीत्थं भर्तुर्हिरण्यकशिपोर्निर्देशमाज्ञाम् आदृता आदरयुक्ताः शिरसा आदाय स्वीकृत्य कदनप्रियाः कदनं भृत्यस्य दुःखं वा सह एव प्रियं येषां ते दानवा दैत्याश्च प्रजानां कदनं चक्रुः ॥ १३ ॥

कदनक्रियामेव प्रपञ्चयति-पुरेति । तत्र पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजो गवां वासः उद्यानं कृत्रिमं वनम् क्षेत्रं व्रीह्यादेः आरामः शाद्वलं वनम् आश्रमं ऋषीणां स्थानम् आकरो रत्नानां वासः खेटः कर्षकग्रामः खर्वटो गिरिद्रोणयाश्रयो ग्रामः घोष आभीराणां वासः पत्तनं राजधानी एतानि केचिद्ददहुः अग्निप्रक्षेपेण भस्मीचक्रुः ॥ १४ ॥

केचित्खनित्रैः खननसाधनैः सेतून् प्राकारान् गोपुरांश्च मार्गादीन् च बिभिदुः तत्र सेतवो जलबन्धार्थं निर्मितास्तटाकादयः केचिच्च परशुः पाणौ येषां ते आजीव्यानुपजीव्यान् फलितचूतादिवृक्षांश्च चिच्छिदुः अन्ये च शरणान् गृहान् प्रादहन् प्रदग्धवन्तः ज्वलितोल्मुकैः साङ्गारकाष्ठैः प्रजान् जनान् जज्वलुः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैत्येन्द्रस्य हिरण्यकशिपोरनुचरैर्मुहुर्मुहुर्लोके विप्रकृते उपद्रुते सति सर्वे देवाः स्वर्गं परित्यज्य असुरैरलक्षितास्तत्र-तत्र भुविप्रदेशे विचेरुर्जग्मुः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अन्तर्दुष्टं दृश्यमानरमणीयं कूटम् अस्थिरात्मनः कूटत्वाभि-भाववचनं मोहनार्थमासुरमतमुद्दीरितमिति ज्ञातव्यं, तदुक्तम्—

"विष्णुभक्तेश्च तज्ज्ञानादन्यतो मुक्तिबाधकाः ।
विष्णोर्गुणागमनाच्च: श्रीब्रह्मादेस्तथा क्रमात् ॥
विष्णवादिद्वेषिणश्चैव सुखबाधस्तथा खिलाः ।
मोहनार्थाः समुद्दिष्टास्तथार्थद्योतकास्तथा" इति ॥ ९ ॥ १० ॥

द्विजक्रियामूलः द्विजाश्च यज्ञादिक्रियाश्च मूलं यस्य स तथा भक्तिज्ञानादिमन्तरेण केवलं यागादिक्रियया प्रसन्नो भवतीति एतदासुरं मतम् "विष्णुभक्तेश्च तज्ज्ञानादन्यतो मुक्तिबाधकाः" इत्येतदत्रापि प्रमाणम्, द्विजैः क्रियमाणां यागादिक्रियां मूलयति प्रतिष्ठापयति इति द्विजक्रियामूल इत्येतद्द्वयमतम् 'मूलप्रतिष्ठायाम्" इतिधातुः इज्यत इति यज्ञः धर्ममयः धर्मप्रधानः दानादिधर्मेण प्रसीदतीत्येतदप्यासुरमतम् "यथार्थद्योतकः" इति वचनाद्धारकतम इत्यन्योऽर्थः । परायणमुत्तमाश्रयमित्येतद्द्वयमतम् ॥ ११ ॥

सन्दीपयत दहत वृश्चत छिन्त ॥ १२ ॥

कदनं कर्दहिंसायाम् ॥ १३ ॥

गवामावासस्थानं व्रजः गोपालवसतिर्वा आश्रमो मुनिनिवासः आकरो रत्नाद्युत्पत्तिस्थानं खेटः मात्स्यस्थानं खर्वटो वसनविक्रयस्य स्थानं घोष आभीरपल्लिः वणिग्भिरधिष्ठितं पत्तनम् ॥ १४ ॥

आजीव्यान् वृक्षान् नारिकेलक्रमुकाम्रपनसादीन् ॥ १५ ॥

विप्रकृते विपरीतमापादिते विनाशिते ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यतस्तस्मिन्निति । यद्वा ननु, तस्य तन्नस्तमरणाद्दिष्टा गतिर्जातैवास्ति किं नस्तत्प्रयोजन तत्राह—तस्मिन्निति । कूटे कूटस्थे एकरूपतया सर्वकालव्यापिनि हिते भक्तसुहृदि नष्टे अदर्शनं गते सति सर्वेऽपि प्राकृताप्राकृतादिवौकसस्तदेकप्राणत्वाच्छुष्यन्ति सुखदनानासम्पद्यपि शोषं प्राप्नुवन्ति तस्मात्तदाराधनमेव कार्यमिति भावः । ततश्च यदि युष्माकमिच्छा तर्हि यावत्तद्दर्शनं तावदेव यातेति ॥ १०—१४ ॥

प्रादहन्नित्यर्थकम् ॥ १५ ॥

दिवं विमानवर्गं भुवं यातेति हिरण्यकशिपुना पूर्वमुक्तत्वात् तस्य सुमेरुस्थितिप्राप्तेः ॥ १६—१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कूटहिते कपटचेष्टिते वस्तुतस्तु कूटेषु कपटिष्वपि माद्रिधेषु हितं शुद्धचेष्टा यस्य तस्मिन्नित्यहो मम भाग्यमिति भावः । देवानां तु सौभाग्यं किंवद्वर्णनीयं ते तु तदेकप्राणा एवेत्या तस्मिन्नष्टे दैवात् कदाचिदृष्टे सति मद्वोरदर्शनार्थत्वात् छिन्नमूले वनस्पतौ यथा विटपाः शुष्यन्ति तथा शुष्यन्ति ते विष्णुरेव प्राणा येषां ते किं वा विष्णोरपि प्राणतुल्यास्ते परमधन्या एवेति भावः ॥ ९ ॥

ब्रह्मक्षत्राभ्यां तपोबलप्रभावाभ्यां सम्यगेधितां वर्द्धित भुवं यात किमर्थं सूदयध्वं घातयध्वम् ॥ १० ॥

यतस्तेषां नाशे सति विष्णुः स्वयमेव नङ्क्ष्यतीत्याह विष्णुरिति । द्विजानां नाशे सति तत्क्रियालोपात् विष्णोर्मुखो स्वातः यज्ञस्य धर्मस्य च नाशात् तत्स्वरूपस्य नाशो भावी किञ्च देवर्ष्यादीनां परायणं परम आश्रय इति देवर्ष्यादीनां वधे तच्छोकादपि स मरिष्यतीति भावः ॥ ११ ॥

सन्दीपयत दहतेति जनपदस्य दाहे तद्वासिनान्तेषां क्षतएव वा सिद्धे: वृश्चत तदुपजीव्यवृक्षाणां छेदं कुरुत ॥ १२ ॥

कदनं कष्टम् ॥ १३ ॥

पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजोगवांवासः उद्यानं पुष्प प्रधानं वनं क्षेत्रं व्रीह्यादेः आरामः फलप्रधानं वनम् आश्रमः ऋषी णां स्थानं आकरो रत्नादीनां खेटः कृषीवलानां वासः खर्वटो गि रिद्रोणयाश्रयो ग्रामः घोषः आभीराणां वासः पत्तनं रा धानी ॥ १४ ॥ १५ ॥

विप्रकृते उपद्रुते यज्ञभागानामभावात् दिवं परित्यज्य ॥ १६

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कूटे कपटे ॥ ९ ॥

तप आदीनि सन्ति येषां तान् सूदयध्वं घातयध्वम् ॥ १०

तप आदिनाशे विष्णुरपि न भविष्यतीत्याशयेनाह—विष्णु रिति । द्विजाः तत्कर्तृकाः क्रियाश्च तप आद्या मूलं यस्य स किञ्च यतोऽसौ यज्ञः धर्ममयश्च देवादीनां परायणं पर आश्रयः ॥ ११ ॥

सन्दीपयत अग्निना दहत वृश्चत आयुधैः छेदयत ॥ १२ ।

आहताः भर्त्रा मानिताः कदनं कष्टम् ॥ १३ ॥

पुरादीन् ददहुः तत्र पुरं हट्टादियुक्तम् ग्रामस्तद्रहि व्रजो गवामालयः उद्यानं कृत्रिमं वनम् क्षेत्रं नीह्यादेः आराम कृत्रिमं वनम् आश्रमः ऋषीणां स्थानम् आकरो रत्नादेः खे कृषीवलवासः खर्वटो गिरिद्रोणयाश्रयो ग्राम

पत्तनं राजधानी ॥ १४ ॥

हिरण्यकशिपुर्भ्रातुः सम्परेतस्य दुःखितः ।
कृत्वा (१) कटोदकादीनि भ्रातृपुत्रानसान्त्वयत् ॥ १७ ॥
शकुनिं शम्बरं धृष्टं भूतसन्तापनं वृकम् ।
कालनाभं महानाभं हरिश्मश्रुमथोत्कचम् ॥ १८ ॥
तन्मातरं रुषाभानुं दितिं च जननीं गिरा ।
श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर ! ॥ १९ ॥

हिरण्यकशिपुरुवाच ।

अम्बाम्ब हे वधूः पुत्रा वीरं माऽर्हथ शोचितुम् ।
रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः ॥ २० ॥
भूतानामिह सम्वासः प्रपायामिव सुव्रते ! ।
दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः ॥ २१ ॥
नित्य आत्माऽव्ययः शुद्धः सर्वगः सर्ववित्परः ।
धत्तेऽसावात्मनो लिङ्गं मायया विसृजन्गुणान् ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

खनित्रैः खननसाधनैः आजीव्यान् जीवनहेतून् शस्यानि गृहान् ॥ १५ ॥

विप्रकृते पीडिते यज्ञभागानामप्राप्तौ दिवं त्यक्त्वा अलक्षिताः दानवदैतेयाद्यज्ञाताः भुवि चेरुः ॥ १६ ॥

भाषाटीका।

उस कपटी शत्रु विष्णु के नष्ट हुए पर, वृक्ष की जड़ उखाडने से जैसे शाखायें आपही सूख जाती हैं इसी प्रकार विष्णु जिनके प्राण है वो देवता लोग भी आप से नष्ट होजाँयगे ॥ ९ ॥

अच्छा तो अब तुम सब लोग ब्राह्मण और क्षत्रियों से पूरित पृथिवी पर जाओ और तप, यज्ञ, स्वाध्याय, व्रत, और दान करने वालों को मार डालो ॥ १० ॥

क्योंकि ? यज्ञ स्वरूप विष्णु का मूल ब्राह्मणों की क्रिया ये हैं और विष्णु धर्म मय पुरुष है, देव ऋषि पितर भूत [प्राणि] और धर्म का वही परायण [उत्कृष्ट आश्रय] है ॥ ११ ॥

इससे जहां २ ब्राह्मण गायें वेद वर्ण आश्रम और वैदिक क्रिया होती हैं उसी २ देश को जाकर अग्नि से जलादो [illegible]काट डालो ॥ १२ ॥

कदन (नाश) करने में प्रीति वाले वे दैत्य लोग भी बड़े आदर से अपने भर्त्ता की इस तरह की आज्ञा को शिर से ग्रहण कर प्रजा का नाश करने लगे ॥ १३ ॥

और पुर, ग्राम, व्रज, उद्यान क्षेत्र, वाटिका आश्रम खान किसानों के निवास, पर्वतों के समीप के ग्राम, घोष और राजधानी इत्यादि को जलाने लगे ॥ १४ ॥

कितने एक दैत्य कुदालों से सेतु प्राकार गोपुर द्वारों को और जीविका के वृक्षों को परसाओं से काटने लगे अन्य दैत्य प्रजा ओं के निवास स्थानों को जलाने लगे ॥ १५ ॥

जब हिरण्यकशिपु के अनुचरों ने ऐसा लोक का बहुत विप्रिय किया तब देवता लोग भी स्वर्ग को छोड अलक्षित होकर पृथिवी पर विचरने लगे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं प्रजानां कदनं दानवेषु कुर्वत्सु स्वयं स्वर्गराज्यादि साधयितुं तपस्तप्तुकामः प्रथमं वरकृतवांस्तदाह—हिरण्यकशिपुरित्यादिना । कटोदकं प्रेताय प्रदेयमुदकम् आदिशब्दात्प्रेतश्राद्धादिकम् ॥ १७ ॥ १८ ॥ १९ ॥

हे वधूरिति भ्रातुर्भार्यां सम्बोधयति ॥ २० ॥

भवतुनाम तस्य श्लाघ्यो वधः तथाप्यस्माकं तावद्बन्धुर्गत एवेति चेत्तत्राह—भूतानामिति । दैवेन प्राचीनकर्मणा एकत्र नीतानां संयोजितानां पुनश्च स्वैः कर्मभिः उन्नीतानां वियोजितानाम् ॥ २१ ॥

(१) कटोदकादीनि. इति [illegible]

यथाऽम्भसा प्रचलता तरवोऽपि चला इव ।
चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः ॥ २३ ॥
एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान् ।
याति तत्साम्यतां भद्रे ! ह्यलिङ्गो लिङ्गवानिव ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं लोकदृष्ट्या शोकं निवार्य तत्त्वदृष्ट्या वारयति—नित्य इति । नित्यः मृत्युशून्यः अव्ययः अपक्षयशून्यः शुद्धः निर्मलः सर्वगतः सर्ववित् सर्वज्ञः, सर्वत्र हेतुः, परो देहादिव्यतिरिक्तः अतो मृत इति कृश इति मलिन इति वियुक्त इति अज्ञ इति च मत्वा शोको न कार्य इत्यर्थः । कथं तर्हि तस्य संसारः ? तत्राह—धत्ते इति । आत्मनो मायया स्वाविद्यया लिङ्गं मूर्तिं धत्ते गुणान् उच्चावचान् देहान् सुखदुःखादीन् वा विशेषेण सृजन् स्वीकुर्वन् लिङ्गशरीरोपाधिः संसार इत्यर्थः ॥ ॥ २२ ॥

एतत्सदृष्टान्तं प्रपञ्चयति—यथेति चतुर्भिः । तरवः प्रतिबिम्बिताः उपाधिधर्मा उपहिते भवन्तीति दृष्टान्तमुक्त्वा ग्राहकधर्मा ग्राह्ये भवन्तीति दृष्टान्तमाह, चक्षुषेति ॥ २३ ॥

अविकलः परिपूर्णोऽपि तत्साम्यताम् मनःसमतामित्यर्थः ॥२४॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो दुःखितो हिरण्यकशिपुः संपरेतस्य मृतस्य भ्रातुः हिरण्याक्षस्य करोदकादीनि प्रेतोद्देशेन करेण हस्तेन देयं सलिलं अर्थं करोदकं तत्प्रभृतीनि प्रेतोद्देशेन कर्तव्यानि कृत्वा भ्रातुः हिरण्याक्षस्य पुत्रान् असान्त्वयत् ॥ १७ ॥

भ्रातुः पुत्राननुदिशति—शकुनिमिति ॥ १८ ॥

तथा देशकालाभिज्ञो ऽसुरेश्वरो हिरण्यकशिपुस्तेषां शकुन्यादीनां मातरं रुषाभानुं स्वमातरं दितिञ्च श्लक्ष्णया मृद्व्या निपुणया च गिरा इदं वक्ष्यमाणमाह ॥ १९ ॥

तदेवाह—अम्बांबेत्यादिना, यावदध्यायसमाप्ति । अम्बाम्बेति दितेः सम्बोधनम्, हे वधूरिति भ्रातुर्भार्यायाः, हे पुत्रा इति तत्पुत्राणाम्. वीरं हिरण्याक्षंप्रति शोचितुं यूयं नार्हथ कुतो यतो रिपोरभिमुखे शूराणां वधः श्लाघ्यः प्रशस्तः ईप्सितः प्रशस्तत्वेनाभिमत इत्यर्थः ॥ २० ॥

भवतुनाम तस्य वधः श्लाघ्यस्तथाप्यस्माकं तावद्बन्धुर्गत एवेत्यत्राह—भूतानामिति । इह संसारे भूतानां संवासः सहावस्थानं प्रपायामिव प्रतिपत्तव्यमिति प्रपा पान्थानां पिपासूनां जलादिदानेन विश्रान्त्यर्थं धार्मिकैर्निर्मिता शाला तस्यां यथा पान्थानां सहावस्थानमस्थिरं तद्वदिह भूतानामपीत्यर्थः । अस्थिरत्वे हेतुं वदन् भूतानि विशिनष्टि, स्वकर्मभिर्हेतुभिर्दैवेन तत्तज्जीवकर्मानुगुणं प्रवृत्तेनेश्वरेणेत्यर्थः । एकत्र नीतानां संयोजितानां पुनरन्यत्रोपनीतानां वियोजितानाम् ॥ २१ ॥

ननु, जीवतामेव संयोगवियोगौ प्रपादिषु दृष्टौ, कथं पुन[...]
रजीवतोऽत्रैव दग्धस्य तत्रतत्र संयोगवियोगौ ? इत्यत्राह—नि[...]
इति । देहस्यास्थिरत्वेऽप्यात्मनः स्थिरत्वात् तत्तत्कर्मार्जितशरीरस्व[...]
गोपादानार्थं तैस्तैः संयोगवियोगौ उपपन्नाविति भावः । त[...]
तदुपपाद्यते, आत्मा अनित्यस्तत्र हेतुरव्ययः विनाशादिषड्भावरहित[...]
तत्कुतः ? शुद्धः प्रकृतिपरिणामानाश्रयस्वरूपः प्रकृतिपरिणामो [...]
प्रकृतिगतः तत्कुतः परदेहाद्भिन्नत्वात् तत्कुतः सर्वविद्देहेन्द्रियमन[...]
प्राणादीनां चित् अजडत्वेन देहाद्भिन्नस्वरूप इति भावः । कथमेक[...]
शरीरः सर्वं वेत्ति ? तत्राह—सर्वगः स्वधर्मभूतज्ञानद्वारा कृत्स्नदेहा[...]
व्यापीति भावः । स्वतः एवम्भूतोऽप्यसावात्मा मायया स्वस[...]
म्बन्धिविचित्रपुण्यपापात्मककर्मणा गुणान् सत्त्वादीन्विसृज[...]
कर्मानुरूपं क्षोभयन्नित्यर्थः । आत्मनः स्वस्य कर्मफलभोगार्थमि[...]
शेषः । लिङ्गं शरीरं धत्ते बिभर्ति गुणक्षोभस्य कर्मानुगुणत[...]
त्कर्मणः आत्मनः कर्तृत्वगुणविसर्गेऽपि कर्तृत्वमुक्तं गुण[...]
न्विसृजन्निति, उक्तविधोऽप्यनादिपुण्यपापात्मककर्मफलभोग[...]
तदनुगुणपरिणामसत्त्वादिगुणपरिणामात्मकं देहं बिभर्ति इत्य[...]
तथाच तस्य तत्रतत्र कर्मायत्तदेहसौलभ्यात्तत्प्रयुक्तावेक[...]
संयोगवियोगौ सम्भवत इति भावः ॥ २२ ॥

ननु, नायमात्मा देहाद्भिन्नस्वरूपः किन्तु स एव यतो देव[...]
मनुष्योऽहमिति देहाद्यभेदेन प्रतीयते तत्राह—यथेति । देवोऽहं[...]
इत्यादिप्रतीतिर्भ्रान्तिरूपा न प्रमितिरूपेति भावः । तदेतदुपपादय[...]
यथेति, यथा प्रचलता अम्भसा उदकेनोपाधिना तरवो [...]
अपि चला इव कम्पमाना इव दृश्यन्ते यथाच भ्राम्यमाणेन चक्षु[...]
भूरपि चलतीव दृश्यते यथा तत्र भूम्यादिचलनप्रतीतिर्भ्रा[...]
रूपेत्यर्थः ॥ २३ ॥

एवं तथा हे भद्रे, गुणैः सत्त्वादिगुणपरिणामात्म[...]
देहेन्द्रियादिभिः सह मनसि भ्राम्यमाणे व्यापृते सति, [...]
गुणैः शब्दादिविषयैर्हेतुभिरुन्मद्यमानेऽत्यर्थः । मनसि भ्राम्यमाणे
विपर्ययीकुर्वति सति पुमान् जीवः स्वयमविकलोऽपि निरवय[...]
देहाद्भिन्नोऽपीत्यर्थः । तत्साम्यतां देहतुल्यतां याति देवोऽहं मनुष्[...]
मित्यादिदेहरूपेणात्मानं प्रत्येति इत्यर्थः । तत्तां यातीत्यनुक्त्वा तत्[...]
म्यतां यातीतिवदतोऽयमभिप्रायः देवोऽहमित्यादिदेहाकारभ्रा[...]
म्यमाणस्यापि कदाचिद्व्यतिरेकप्रतिपत्तिरस्त्येवेति. तदेव वि[...]
यति, अलिङ्गो लिङ्गवानिवेति. लिङ्गाच्छरीराद्धन्यः अलिङ्गः आत्मा
वानिवात्मानं प्रत्येति ममेदं शरीरमित्येवं रूपेण लिङ्गप्रतिस[...]
वात्मानं प्रत्येतीत्यर्थः । ममेदं शरीरमिति शरीरव्यतिरिक्तत्वेनात्[...]
प्रतीतावपि देहात्मभ्रान्तिमतां तत्प्रतीतेरस्फुटत्वद्योतनाय लि[...]
निवेतीवशब्दः प्रयुक्तः । अयं भावः, यद्यात्मनो देहाकार[...]
प्रतीतिः प्रमितिरूपा स्यात्तर्हि तद्भिन्नत्वेन प्रतीतिर्भ्रान्तिरू[...]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथाप्युक्तं शरीरप्रतिभासदशायां तत्प्रतीतिदशायाञ्च सुषुप्त्यादावहमर्थस्यात्मनोऽनुवृत्तत्वेन प्रतीयमानत्वादिति ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कटोदकं प्रेतमुद्दिश्य दीयमानमुदकम् ॥ १८ ॥

तन्मातरं तेषां मातरं नाम्ना कुशाद्भानुं दितिं जननीं च श्लक्ष्णया गिरा इदमाहेत्यन्वयः ॥ १९ ॥

हे वधूः हे सहोदरभार्ये हे पुत्राश्च पत्न्या सह ऐहिकामुष्मिकजनहिताय यो न भवतीति कृत्वा शोकं उत्सृज्य कोऽन्यःकाले जीवामीति प्रमोदहान्याप्रासः आहोस्वित्पितृमातृपुत्रभावस्य क्षणिकत्वेनेति तत्र प्रथमाद्वृत्तीयो प्रत्याह रिपोरिति ॥२० ॥

तृतीयं मानम् एका कटाक्षीकृत्याह-भूतानामिति । इह कर्मभुवि दैवेन विधिनाऽन्यत्र हरिणा वा एकत्र नीतानां सम्मीलितानामुत्पन्नानां पुत्रपौत्रादिसम्बन्धं प्रापितानां भूतानामेकत्र सम्वासः सहवासः प्रपायां पानीयशालायामिव यथाऽध्रुवस्तथाऽनित्यो भवतीत्यन्वयः । "प्रपा पानीयशालास्यान्मत्रशाला प्रतिश्रवः" इत्यभिधानम् ॥ २१ ॥

भूतानां सहवासोऽनित्यश्चेत्तर्हि केन सहवासो नित्यो भवतीत्याशंकय सर्वगतत्वाज्जीवस्य मन आदीन्द्रियाधारत्वाद्धरिणा सहवासो नित्यः "सता सोम्य तदा सम्पन्नो भवति प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन्याति" इत्यादिना सुप्तिमरणावस्थयोरपि सहाविस्थितेरन्यथा किंवक्तव्यमित्याशयेन दैवं मतमाह-नित्य इति । अव्ययो हरिरात्मनो जीवस्य मन आदीन्द्रियद्वारं धत्ते तस्याधारभूत इत्यर्थः नित्यत्वादिकं स्वरूपत्वेनोच्यते, पर इति. जीवव्यावर्तकं मायया स्वेच्छया वासनया वा गुणान् शब्दादीन् विसृजन् ददानः संसारिणा इव चिदचिदुदंहन मनआदीनां नित्यसम्बन्धो युज्यत इत्यतः सर्वगत इत्युक्तम. प्रपायां प्राणिसहवासवत् परमात्मनो देहसम्बन्धो नित्य इत्याशंकनासुरमतमप्यनेनोच्यते गुणान् विसृजन् सूक्ष्मपुरसात्मा आत्मनो भोगायतनं लिङ्गं कर्मज्ञानेन्द्रियपञ्चप्राणमनोमयं समुदितरूपं शरीरं धत्ते मायेत्युक्त्याऽनित्यो देहसम्बन्ध इति ॥ २२ ॥

इतोऽपि अविद्यावशात्कृश एव संसरतीत्येतदासुरं मतमित्याशयेनाह-यथेति । एवं गुणैर्भ्राम्यमाणे इतस्ततश्चञ्चलीक्रियमाणे मनस्यविकलः पुमान्पूर्णपुरुषः श्रीनारायणः तस्य जीवस्य सारूप्यं दोषित्वं संसारित्वं यातीति प्रतीयते. कथमिव, लिङ्गवानिव जीव इव मनोदोषैराभासं ब्रह्मप्रतिबिम्बं जीवे दूषिते तद्विषयज्ञानहीने सति तन्महाभासिनो बिम्बभूतस्य ब्रह्मणोऽपि दुष्टत्वं कल्पयतीत्यर्थः । न चैतदुपपन्नमित्याह-लोके इति । लोकं तस्मादवाप्तोऽविद्याकल्पितमित्यर्थः । अन्यच्च प्राकृतशरीररहितः, कथमिव, प्रचालिताम्भसा तरवोऽपि प्रचला इव दृश्यन्ते यथा, जलस्थजनानां प्रतिबिम्बितवृक्षस्य चलनात्तटस्थानामचलत्वं कल्पयत्यहमिति. अन्यच्च प्रतिबिम्बितवृक्षचलनेन तटस्थवृक्षचलनकल्पनमुन्मत्तकल्पनामिव. प्रज्ञस्याभ्य ..। दृश्यमानत्वादित्युक्त्वा दृष्टान्तान्तरमाह-चक्षुषेति, यथा, परिभ्रमतः पुरुषस्य भ्राम्यमाणेन चक्षुषा भूर्भ्रमतीव दृश्यते—

"असमः समतामेति भ्रान्तिदृष्ट्यैव केवलम् ।
जीवेन ब्रह्म न समं तत्त्वदृष्ट्या कथञ्चन ॥
यथोदकचलनान्मूढः प्रतिबिम्बप्रचालनात् ।
तटस्थवृक्षचलनं कल्पयेदबुधो नरः ॥
तथा मनोनिजैर्दोषैराभासे दूषिते नरे ।
आभासिनो ब्रह्मणश्च दोषमज्ञः प्रकल्पयेत् ॥
आत्मनश्चक्षुषो भ्रान्त्या यथा पश्यन्भ्रमं भुवः ।
तथैव स्वात्मनो दोषादीशदुष्टं च पश्यति" ॥

इत्येतदागमाभासिन्नत्वादुक्तः प्रकारो न स्थितः 'विष्णुर्हि द्विजक्रियामूलः' इत्यादिनोच्यमानं दैत्यासुरश्रेष्ठमतमुपपादनाय-

"विप्रयज्ञादिमूलं तु हरिरित्यासुरं मतम् ।
हरिरेव हि सर्वस्य मूलं सम्यङ्मतं नृप" ॥

इत्येतद्वाक्यमाचार्यैरत्रोदाहृतमुपर्यनुसन्धानाय चेति ॥ २३-२४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

रिपोरप्यभिमुखे किमुत श्रीविष्णोरिति च ॥ २०—२१ ॥

नित्य इत्यत्र जीवेऽपीश्वरधर्मोक्तिरसुरोक्तित्वात् सर्वत्रस्याज्ञानमिति युक्तिविरुद्धञ्च तावत् वाक्यार्थं तु सर्व लोकं गच्छति सर्वगः सर्वं शरीरं विन्दति सर्ववित् ॥ २२—२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कटोदकम् । प्रेताय प्रदेयमुदकं आदिशब्दात् प्रेतश्राद्धञ्च ॥ १७-१९ ॥

हे वधूरिति भ्रातुर्भार्यां सम्बोधयति ॥ २० ॥

बन्धुवियोगदुःखक्षेत्रं भावनायां निवर्तयन्नाह-भूतानामिति । प्रपायां पानीयशालायां उपनीतानां पुनर्वियोजितानाम् ॥ २१ ॥

दुःखप्रबोधार्थमुक्तमिदं लौकिकदृष्ट्या तत्त्वदृष्ट्या तु हिरण्याक्षः आत्मैव न तु देहस्तस्यात्मनश्च स्वरूपं शृणुतेत्याह-नित्यः मृत्युरहितः अव्ययः अपक्षयशून्यः शुद्धः निर्मलः सर्वगः सर्वगतः ईश्वरधर्मोक्तं जीवेऽसुरस्वभावात् वस्तुतस्तु सर्व लोकं गच्छतीति सः सर्वं सुखदुःखादिकं विन्दतीति सः परो देहादिभ्यो व्यतिरिक्तः असावात्मा आत्मनः स्वस्य लिङ्गं देहं मायया स्वाविद्यया धत्ते किमर्थं गुणान् उच्चावचान् स्थूलदेहान् विशेषेण सृजन् स्वीकुर्वन् तथा तत्पदार्थत्या विसृजन् त्यजन् स्थूलदेहान् जीवात्तु त्यक्त्वेत्यर्थः ॥ २२ ॥

एवं चालितङ्गं धत्ते तस्मात् सूक्ष्मदेहादन्योऽत्मा भिन्नएवेति दृष्टान्ताभ्यामाह-यथा अम्भसा प्रचलता हेतुना अम्भस्सु प्रतिबिम्बितास्तरवोऽपि चलाइवेक्ष्यन्ते न तु चलाः अम्भोऽवयवेषां भिन्नत्वात् एवमेव लिङ्गधर्माः शोकमोहादयस्तदुपहिते आत्मन्यपि प्रतीयन्ते नत्वात्मा शोकमोहादिमान्. तस्माल्लिङ्गाद्भिन्नत्वादित्यर्थः । एवमुपाधिधर्मा उपहिते भवन्तीति दृष्टान्तमुक्त्वा ग्राहकधर्मा ग्राह्ये भवन्तीति

एष आत्मविपर्यासो ह्यलिङ्गे लिङ्गभावना ।
एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः ॥ २५ ॥
सम्भवश्च विनाशश्च शोकश्च विविधः स्मृतः ।
अविवेकश्च चिन्ता च विवेकाऽस्मृतिरेव च ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दृष्टान्तमाह—चक्षुषेति । भ्राम्यमाणेन भ्रमितेनाकम्प्यमाणेन चलती भ्रमतीव यथा भूताविष्टः पुरुषो भूतग्राह्य उच्यते एवं देहाविष्ट आत्मा देहग्राह्यो देहधर्माक्रान्त उच्यत इत्यर्थः । एवम् अविकलः शुद्ध एवात्मा तत्साम्यतां मनःसमतां मनोधर्मग्राहित्वम् ॥ २३ ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कदोदकादीनि प्रेतदेयनिवापाञ्जल्यादीनि ॥ १७—१८ ॥

तेषां हिरण्याक्षसुतानां मातरं रुषाभानुं श्लक्ष्णया मधुरया ॥ १९—२० ॥

दैवेन प्राक्कर्मणा एकत्र नीतानां मातृपुत्रादिदेहसंयोजितानां पुनः स्वकर्मभिरुन्नीतानां मातृपुत्रादिसंयोगप्रददेहेभ्यो वियोजितानां संवासः संयोगः प्रपायामिव पानीयशालिकायामिव अनित्य इत्यर्थः ॥ २१ ॥

ननु, कः स आत्मा ? यः कर्मभिर्देहादुन्नीयते, केन देहेन ? त्यक्त्वा देहादुत्क्रामति केन च हेतुना तमपि देहं बिभर्तीत्याकाङ्क्षायामाह—नित्य इति । यः कर्मभिरुन्नीयते स आत्मा नित्यो ध्रुवः यतः अव्ययः विनाशाद्यवस्थारहितः अतएव शुद्धः सर्वगः "हृदयमात्मा, बुद्धेर्गुणेनात्मगुणेन चैव, आराग्रमात्रो ह्यवरोऽपि दृष्टः" इत्यादिश्रुतिभ्यो हृदयेऽणुस्वरूपोऽपि ज्ञातृत्वलक्षणात् गुणात् सर्वेषु पादशिरआदिषु व्याप्तः अत एव पादे मे सुखमित्येवं सर्ववित् परः देहेन्द्रियमनोबुद्धिप्राणादिभ्यो विलक्षणः एवंभूतगुणान् प्रकृतिगुणपरिणामात्मकान् उत्तरदेहलब्धये पूर्वपूर्वदेहान् विसृजन् लिङ्गं सूक्ष्मं देहम् आत्मनः स्थाने आत्मत्वेन मायया धत्ते बिभर्ति माययात्मत्वेन धृतेन लिङ्गदेहेन देहाद्देहान्तरं यातीत्यर्थः ॥ २२ ॥

लिङ्गदेहे आत्मत्वभ्रान्तिमुपपादयति—यथेति द्वाभ्याम् । यथाऽम्भसा प्रचलता हेतुभूतेन तत्तीरगास्तरवोऽपि जलगतस्वच्छायाद्वारा चला इव प्रतीयन्ते, भ्राम्यतेति शेषः । यथा च भ्राम्यमाणेन चक्षुषा भूः भ्रमतीव प्रतीयते ॥ २३ ॥

एवं गुणैरनादिप्रकृतिगुणैर्भ्राम्यमाणे स्वरूपाज्ञानात् चाल्यमाने मनसि मनोपलक्षिते आत्मनि अविकलः सुखरूपोऽपि अलिङ्गः देहभिन्नोऽपि पुमान् तत्साम्यतां लिङ्गदेहसाम्यतां देहोऽहमिति भावं याति लिङ्गवानिव प्रसिद्धो देहवान् यथा स्थूलोऽस्मि कृशोऽस्मीति मन्यते तद्वत् ॥ २४ ॥

भाषा टीका ।

हिरण्यकशिपु ने भी अपने मृत भ्राता के शोक से दुःखित होकर उसको तिलांजली देकर भ्राता के पुत्रों को समुझाने लगा ॥ १७ ॥

शकुनि शंबर धृष्ट भूत सन्तापन वृक काल नाभ महानाभ हरिश्मश्रु और उत्कच, इन सब हिरण्याक्ष के पुत्रों को ॥ १८ ॥

और उनकी माता रुषाभानु तथा हे जनेश्वर ! अपनी माता दिति को देशकाल के जानने वाला हिरण्यकश्यपु मीठी वाणी से ऐसे कहना लगा ॥ १९ ॥

हिरण्यकशिपु बोला कि—हे जननि ! हे वधू ! हे पुत्रो उस वीर का शोक करने लायक नहीं है । क्योंकि शूरवीर का मरना तो शत्रु के सम्मुख ही श्लाघनीय है ॥ २० ॥

हे सुव्रते ! इस संसार में प्राणियों निवास [प्रपा] प्याउके निवास के तरह जानो क्योंकि सब लोग दैव योग [प्राचीन कर्म योग] से इकट्ठे होते हैं और उसी से फिर अलग २ होजाते हैं ॥ २१ ॥

क्योंकि ? आत्मा तो नित्य अव्यय शुद्ध सर्व (देहेन्द्रियादि) को जानने वाला और ज्ञान द्वारा सर्व (देहेन्द्रियादि) व्यापी है और देहादि से पर अर्थात् विलक्षण है ॥ ऐसा होकर भी अपने पूर्व कर्मों से सत्वादि गुणों को सृजता हुआ अपने प्रारब्ध भोग लिये शरीर को धारण करता है ॥ २२ ॥

जैसे जल के चलते से वृक्ष भी चलते से मालूम पड़ते हैं ॥ और जैसे भ्रमते हुए नेत्रों से पृथिवी चलती सी मालूम पड़ती है ॥ २३ ॥

इसी प्रकार माया के गुणों से मनके भ्रमने से यह अविकल पुरुष जीवात्मा भी हे भद्रे असंसारी होकर भी संसारी की तरह मन समता को प्राप्त हो जाता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लिङ्गभावना देहाभिमानः एष आत्मनो विपर्यासोऽन्यथाभावः तमेवाह—प्रियैर्वियोगोऽप्रियैर्योगश्च कर्म च संसृतिश्च नानायोनिषु प्रवेशः ॥ २५ ॥

ततश्च सम्भव उत्पत्तिः विवेकस्यास्मृतिरननुसन्धानमित्यर्थः

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यमस्य प्रेतबन्धूनां सम्वादं तं निबोधत ॥ २७ ॥
उशीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः ।
सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत ॥ २८ ॥
विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजम् ।
शरनिर्भिन्नहृदयं शयानमसृगाविलम् ॥ २९ ॥
प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् ।
रजःकुण्ठमुखाम्भोजं छिन्नायुधभुजं मृधे ॥ ३० ॥
उशीनरेन्द्रं विधिना तथाकृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः ।
हताः स्म नाथेति करैरुरो भृशं घ्नन्त्यो मुहुस्तत्पदयोरुपापतन् ॥ ३१ ॥
रुदत्य उच्चैर्दयिताङ्घ्रिपङ्कजं सिञ्चन्त्य अस्रैः कुचकुङ्कुमारुणैः ।
विस्रस्तकेशाभरणाः शुचं नृणां सृजन्त्य आक्रन्दनया विलेपिरे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्रापि शोकहेतुं विना वृथैवायं शोक इत्यस्मिन्नर्थे प्रेतस्य मृतस्य कस्यचित् ये बन्धवस्तेषाञ्च सम्वादं शृणुत ॥ २७ ॥

उपासत तत्समीपे आवृत्य स्थिताः ॥ २८ ॥

विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टान्याभरणानि स्रजश्च यस्य शरेण निर्भिन्नं हृदयं यस्य असृजा रक्तेनाविलं व्याप्तम् ॥ २९ ॥

प्रकीर्णाः केशाः यस्य ध्वस्ते अक्षिणी यस्य रभसा संरम्भेण दष्टो दच्छद ओष्ठो येन रजसा कुण्ठमावृतं मुखाम्भोजं यस्य छिन्नमायुधं भुजश्च यस्य ॥ ३० ॥

तस्य पदयोरुपसमीपे आ समन्तादपतन् ॥ ३१ ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं देहाद्विलक्षणस्य नित्यस्यात्मनः कर्मपरिपाकानुगुण-सत्त्वादिगुणपरिणामरूपदेहसम्बन्धस्तदनुध्याननिमित्तस्तदभिन्न-त्वप्रत्ययश्च भ्रमरूप इत्युक्तम्, अथ यथा देहसम्बन्धस्तदनु-ध्याननिमित्तस्तदभेदभ्रमश्च यथा कर्ममूलकः एवं सुखदुःखादिक-मपि सर्वं कर्ममूलकमेवेत्याह—एव इति । आलिङ्गे लिङ्गादन्यस्मिन् शरीराद्भिन्ने आत्मनि लिङ्गभावना देहत्वेनानुध्यानं देवोऽहमित्या-दिदेहाभेदप्रतीतिरित्येव आत्मनो विपर्ययः अन्यथा प्रतीतिः कर्म-संसृतिः कर्मकृतसंसारो भवतीत्यर्थः । एवं प्रियाप्रियैरिष्टानिष्ट-वस्तुभिर्योगो वियोगश्च सुखदुःखरूप इत्यर्थः ॥ २५ ॥

सम्भवः उत्पत्तिः विनाशो मरणं नानाविधः शोकः अविवेकः [illegible]श्च याथात्म्याविवेचनं चिन्ता विषयानुध्यानं विवेकस्या-स्मृतिः कश्चिदात्मोपदेशादिना जातस्यापि विवेकस्याननुसन्धानम्-इत्येष सर्वोऽपि कर्मसंसृतिरेव कर्मकृतसंसाररूप एव स्मृतः ॥ २६ ॥

अत्र शोकनिमित्तमन्तरेणापि यः शोकः स व्यर्थ एवेत्य-स्मिन्नर्थे इतिहासमप्युदाहरन्ति तत्त्वविदः, इतिहासं विशिनष्टि— पुरातनं न त्वाधुनिककपोलपरिकल्पितं यमस्य प्रेतबन्धूनाञ्च सम्वाद-रूपं तमितिहासं निबोधत शृणुत ॥ २७ ॥

इतिहासमेवाह—उशीनरेष्वित्यादिना । उशीनरेषु देशेषु सुयज्ञ इति प्रसिद्धः कश्चिद्राजा बभूव स च सपत्नैः शत्रु-भिर्युद्धे निहतः तं निहतं ज्ञातयः सपिण्डाः उपासत परिवृत्यो-पविविशुः ॥ २८ ॥

कथम्भूतं विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टान्याभर-णानि स्रजश्च यस्मात्शरैर्नितरां भिन्नं हृदयं यस्य असृजा रुधि-रेण आविलं व्याप्तम् ॥ २९ ॥

प्रकीर्णाः केशा यस्य ध्वस्ते निष्प्रभे अक्षिणी यस्य संर-म्भेण क्षोभेण दष्टो दच्छदः दन्तच्छदः ओष्ठो येन रजसा कुण्ठमावृतं मुखाम्भोजं यस्य मृधे युद्धे छिन्नमायुधं भुजश्च यस्य तम् ॥ ३० ॥

विधिना दैवेनैवं कृतमुक्तदशां प्रापितम् उशीनरेन्द्रं पतिं भर्तारं प्रसमीक्ष्य तत्पत्न्यः अतीव दुःखिताः हे नाथ ! वयं हताः स्मेति वदन्त्यः करैः पाणिभिः भृशं नितरामुरो मुहुर्मुहुर्घ्नन्त्यः तस्य भर्तुः पदयोश्चरणयोरुपापतन् समीपे समन्तादाप-तन् ॥ ३१ ॥

तत उच्चैस्स्वरेण रुदन्त्यः कुचकुङ्कुमेनारुणैः कुचयोः पतितैः ततः प्रक्षालितैरिति भावः । अस्रैः शोकजनिताश्रुभिः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

द्रवितस्य प्रत्युरःप्रियपङ्कजं सिञ्चन्त्यः विस्रस्ताः केशाः आभरणानि च यासां ताः नृणामपि शुचं सृजन्त्यः शृण्वतां उत्पादयन्त्यः आक्रन्दनया रोदनेन सह विलेपिरे विलापञ्चक्रुः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

परमात्मानमेवं जानतः किं फलं ? तत्राह—एषइति। अलिङ्गे प्राकृतदेहेन्द्रियादिरहिते अत एव परतन्त्रत्वादिसर्वदोषरहिते परमात्मनि या लिङ्गभावना प्राकृतदेहेन्द्रियात्मत्वादिचिन्ता एष आत्मनः स्वस्यैवायोग्यस्य जनस्य विपर्यासस्तमःप्राप्तिलक्षणोऽनर्थो भवति इहापि यथा परत्र तमोलक्षणोऽनर्थ एवं प्रियाप्रियादियोगवियोगलक्षणापूर्वकर्मानुसारेण संसृतिर्भवति ॥ २५ ॥

कीदृशीति विशेष्याह—सम्भव इति। अज्ञानपूर्तिपर्यन्तं पुनः पुनः सम्भवस्तस्मिन्सति स्वरूपविनाशः विवेकस्मृतिः अविवेकित्व एव विवेकभ्रान्तिः शान्तित्वभ्रान्तिः असुरसिद्धान्तनिष्ठितस्य हिरण्यकशिपोरेवं देवसिद्धान्तोपन्यासेन कथं स्वबन्धुबोधनमितीयमाशङ्का—

"अन्तर्हिरण्यकादीनां भक्तिरस्त्येव केशवे।
असुरावेशतस्त्वन्यान् हरिस्तोतॄन् द्विषन्ति च" ॥

इत्यनेन परिहरणीयेति ॥ २६ ॥

पुत्रमित्रकलत्रादिभिः सह निवासो दैवाधीन इति मत्वा शोको न कार्य इत्यस्मिन्नर्थे इतिहासलक्षणकथास्तीत्याह—अत्रेति। प्रेतबन्धूनां कस्यचिन्मृतस्य ज्ञातीनाम् ॥ २७—२८ ॥

असृगाविलं रुधिरकपिलम् ॥ २९ ॥

स्तब्धाक्षं निश्चलनेत्रं रजःकुण्ठं धूलिधूसरं मुखाम्बुजं यस्य स तथा तं छिन्नायुधयुक्तौ भुजौ यस्य स तथा तम् ॥ ३०—३१ ॥

कुचकुङ्कुमधूलिभिररुणायमानैराक्रन्दनया उच्चरोदनेन नृणां शुचः शोकान् विसृजन्त्यः कुर्वाणा विलेपिरे परिदेवनं चक्रुः ॥३२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

एष इति युग्मकम्। अलिङ्गे देहातिरिक्ते आत्मनि ॥ २५—४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अलिङ्गेऽप्यात्मनि लिङ्गभावना देहाभिमानः एष एवात्मनो विपर्यासः विपर्ययः तस्मादेवात्मनः एषः प्रियाप्रियैर्योगवियोगश्च तत्कारात्तद्विपरीतश्च अप्रियैर्योगः प्रियैर्वियोगश्च कर्म च संसृतिश्च नानागर्भेषु प्रवेशः ॥ २५ ॥

विवेकस्य सतोऽप्यस्मृतिरस्फूर्तिः ॥ २६ ॥

अत्रापि अशोच्यत्वेऽपि शोके इतिहासमपि प्रेतस्य मृतस्य ये बन्धवस्तेषाञ्च ॥ २७ ॥ २९ ॥

रभसा कोपेन दष्टो दन्तच्छदः अधरो येन तं तत्रापि एव सपत्नैः शस्त्रहतत्वात्तथाभूतस्यैव मृतस्यापि स्थितमित्यर्थः ॥ ३० ॥ ३१ ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

देहात्माभिमान एव संयोगवियोगादिरित्याह—एष इति द्वाभ्याम्। अलिङ्गे देहभिन्ने लिङ्गभावना देहोऽहमिति भावना सैव आत्मनो विपर्यासः अन्यथाभावः हि हेतौ अत एव विपर्यासाद्धेतोः एष प्रसिद्धः प्रियाप्रियैर्योगो वियोगश्च कर्मभिः संसृतिः संसारश्च ॥ २५ ॥

सम्भवो जन्म विनाशो मरणम् अविवेकः कार्याकार्यविवेकाभावः कथञ्चिदुत्पादितो लब्धस्य विवेकस्य अस्मृतिरननुसन्धानम् ॥ २६ ॥

उक्तार्थे इतिहासमाह—अत्रापीति। अत्र आत्मनो ध्रुवत्वेनाशोच्यत्वे ॥ २७ ॥

उशीनरेषु देशेषु तस्य ज्ञातयः उपासत आवृत्य स्थिताः ॥२८॥

कथंभूतं विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टानि आभरणानि अङ्गे यस्य शरेण निर्भिन्नं हृदयं यस्य असृगाविलं रुधिरलिप्तम् ॥ २९ ॥

प्रकीर्णाः केशा यस्य ध्वस्ते अक्षिणी यस्य रभसा संरम्भेण दष्टो दन्तच्छदो येन रजसा कुण्ठं मुखाम्भोजं यस्य छिन्नौ आयुधयुक्तौ भुजौ यस्य तम् ॥ ३० ॥

विधिना कर्मफलदेन तथा कृतं पञ्चत्वं नीतं तस्य पदयोः उप समीपे आ समन्तात् अपतन् ॥ ३१ ॥

नृणां पश्यतां शुचं सृजन्त्यः आक्रन्दनया वैकल्यवाचया विलेपिरे ॥ ३२ ॥

भाषा टीका।

यह यही आत्मा का विपरीत पना है जो कि अशरीरी के विषय शरीरी की भावना हो जानी और इसी से प्रिय अप्रियों से संयोग और वियोग होता है। और इसी से कर्म निबन्धन संसार भी है ॥ २५ ॥

और इसी से शरीर की उत्पत्ति और विनाश और नाना तरह का शोक अविवेक चिन्ता विवेक और विस्मृति भी होती है ॥ २६ ॥

इस विषय में एक प्राचीन इतिहास कहते है॥ उसमें यमराज और प्रेतबन्धुओं का सम्वाद है उसे तुम सुनो ॥२७॥

उसीनर देशमें एक सुयज्ञ नामक राजा हुआ। उसको युद्ध में बैरियों ने मारडाला उस के ज्ञाति लोग उसको चारों तरफ से घेर कर बैठे थे ॥ २८ ॥

अहो विधात्राऽकरुणेन नः प्रभो ! भवान् प्रणीतो दृगगोचरां दशाम् ।
उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शुचां विवर्धनः ॥ ॥ ३३ ॥
त्वया कृतज्ञेन वयं महीपते ! कथं विना स्याम सुहृत्तमेन ते ।
तत्रानुयानं तव वीरपादयोः शुश्रूषतीनां दिश यत्र यास्यसि ॥ ३४ ॥
एवं विलपतीनां वै परिगृह्य मृतं पतिम् ।
अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्तत ॥ ३५ ॥
तत्र ह प्रेतबन्धूनामाश्रुत्य परिदेवितम् ।
आह तान् बालकोभूत्वा यमः स्वयमुपागतः ॥ ३६ ॥

यम उवाच ।

अहो अमीषां वयसाधिकानां विपश्यतां लोकविधिं विमोहः ।
यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचन्त्यपार्थम् ॥ ३७ ॥
अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिन्तयामः ।
अभक्ष्यमाणा अबला वृकादिभिः सरक्षिता रक्षति यो हि गर्भे ॥ ३८ ॥
य इच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुम्पते च यः ।
तस्याबलाः ! क्रीडनमाहुरीशितुश्चराचरं निग्रहसङ्ग्रहे प्रभुः ॥ ३९ ॥
पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति ।
जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तोऽस्य हतो न जीवति ॥ ४० ॥

भाषा टीका ।

इस राजा का रत्नों का कवच बिखर गया था, आभरण और मालायें टूट गई थीं । बाणों से हृदय विदीर्ण हो गया था शरीर रुधिर से भीग रहा था ॥ २९ ॥

केश बिखरे हुए आंखें बैठी हुई, रोष के मारे दांतों से होठों को दबाये हुए रज से धूसर है मुख जिसका औ युद्ध में कट गये आयुध और भुजा जिसकी ॥ ३० ॥
प्रारब्ध ने इस तरह जिसको कर दिया उस उशीनरेन्द्र राजा को रानियों ने देख कर बड़ा दुःख पाया ॥ और हे नाथ ! हम सब मरचुकीं ऐसे कह कर हाथों से छाती कूटते हुए उस के पैरों में गिर पड़ीं ॥ ३१ ॥

ऊंचे स्वर से रोती हुई अपने प्रिय के चरणों को कुच कुंकुम से शोभित अपने अश्रुपातों से धोने लगीं । और खुल गये केश और आभरण जिनों के ऐसी वो रानियें बहुत ऊंचे स्वरसे चिल्लाकर मनुष्यों को शोक पैदा कराती हुई विलाप करने लगीं ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विलापमेवाह—अहो इति द्वाभ्याम् । अकरुणात्वमेवाह, येन विधात्रा दृशामगोचरां दशां भवान्प्रणीतो गमितस्तेन विधात्रा त्वमधुना शुचां विवर्धनः कृतोऽसीत्यन्वयः ॥ ३३ ॥

हे महीपते ! त्वया सुहृत्तमेन विना वयं कथं स्याम भवेम जीवेमेत्यर्थः । अतो हे वीर, यत्र त्वं यास्यसि तत्र तेऽनुयानमनुगमनं तव पादयोः शुश्रूषां कुर्वतीनामस्माकं दिश देहि ॥ ३४ ॥

निर्हारं दाहार्थं नयनमनिच्छन्तीनाम् अस्तमर्कोऽस्तं प्राप्तः ॥ ३५ ॥

परिदेवितं रोदनं स्वपुराणमिव स्थित आश्रुत्य श्रुत्वा तत्र स्वयमेवोपागतो यमो बालको भूत्वा तानाह—अहो इत्यादिना ॥ ३६ ॥

अहो आश्चर्यम् अमीषां वयसाऽधिकानामपि लोकस्य विधिं जन्ममरणादिप्रकारं विपश्यतामपि विमोहः; मोहमेवाह, यत्र यस्मादव्यक्तादागतस्तत्रैव गतमपार्थं शोचन्ति तदुक्तं गीतासु,

"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना" इति ।

किञ्च स्वयमपि सधर्माः मृतेन सह समाना मृत्युलक्षणो धर्मो येषां तथाभूता अपि ॥ ३७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अबलाः दुर्बला अपि वृकादिभिरभक्ष्यमाणाः वयं न विचिन्तयामः तत्र हेतुः, यो गर्भे रक्षति स एव सर्वत्र रक्षिता ॥ ३८ ॥

ननु, तस्य रक्षणे किम्प्रयोजनम् ? न किञ्चिदपि; किन्तु क्रीडैव केवलमित्याह–य इति । य ईश इदं विश्वं सृजति रक्षत्यवलुम्पते संहरति च भो अबलास्तस्येशितुश्चराचरं क्रीडासाधनमाहुः अतः स एव निग्रहे संहारे सङ्ग्रहे पालने च प्रभुः ॥ ३९ ॥

प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति–पथीति । दिष्टेन दैवेनेश्वरेण रक्षितं तेनेश्वरेण विहतमुपेक्षितम् अस्य हतस्तेनोपेक्षितः ॥ ४० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विलापमेवाह--अहो इति द्वाभ्याम् । अस्माकं प्रभो हे भर्तः ! अकरुणेन निष्कृपेण विधात्रा ब्रह्मणा दृग्गोचरां दशां भवानीतो गमितः नः दृशामगोचरामवस्थां प्रणीत इति वान्वयः । येन विधात्रा पुरा उशीनराणां तद्देशोद्भवानां जनानां वृत्तिदः जीवनप्रदः कृतो भवानधुना तेनैव विधात्रा शुचां शोकानां विवर्धनः कृतोसि ॥ ३३ ॥

हे महीपते ! सुहृत्तमेन कृतज्ञेन च त्वया विना ते तव सम्बन्धिन्यो वयं कथं स्याम, कथं जीवेमेत्यर्थः । अतस्त्वं यत्र यास्यसि तत्रैव, हे वीर ! तव पदयोः शुश्रूषतीनां सेवां कर्तुमिच्छन्तीनामस्माकमनुयानं सहगमनं दिश देहि ॥ ३४ ॥

एवं मृतं पतिं परिगृह्य विलपन्तीनां निर्हारं दाहार्थं नयनमनिच्छतीनां सखीनाम् अर्कः सूर्यः अस्तम् अस्ताचलंप्रति संप्रयान्तं सन्निकृष्टो बभूव ॥ ३५ ॥

प्रेतस्य मृतस्य ये बन्धवस्तेषां परिदेवितं रोदनमाश्रुत्य स्वपुर्यामेव श्रुत्वा भगवान् यमः स्वयमेव बालकोभूत्वा तत्राक्रन्दनस्थाने समुपागतस्तानाह, हेत्याश्चर्ये ॥ ३६ ॥

तदेवाह—अहो इत्यादिना । अहो इत्याश्चर्ये किन्तत् यद्वयसा मत्तः अधिकानामपि लोकविधिं जन्ममरणादिलोकपरिपाटीं पश्यतामप्यमीषां प्रेतबन्धूनां विशिष्टो मोह इत्येतत्, विमोहमेवाह--यत्र भुवि सम्भवः उत्पत्तिः तत्रैव गतं पुनस्तत्रैव लीनं मनुष्यंप्रति स्वयं सधर्माः मृतेन तुल्यं जन्ममरणादिभाजोपि अपार्थं मुधा शोचन्ति ॥ ३७ ॥

न्यूनवयस्का अपि वयमेवाहो धन्याः श्रेष्ठाः, कुतः ? यतः पितृभ्यां मातापितृभ्यां त्यक्ता अपि वयं न विचिन्तयाम चिन्तां न कुर्मः अबला दुर्बला अपि बाला अपीति वा वृकादिभिरभक्ष्यमाणा वयम्, तत्रहेतुः, यो हि गर्भे रक्षति जन्मनः पश्चादपि स एव हि ईश्वरो रक्षिता रक्षिष्यति ॥ ३८ ॥

कोसौ रक्षिता ? तत्राह—य इति । य ईश्वरः स्वेच्छयैव न तु कर्मणा इदं कृत्स्नं जगत्सृजति तर्हि सोप्यस्मदादिवत्किं जन्ममरणादिभाक् ? नेत्याह–अव्ययः अपक्षयादिविकाररहितः कर्मायत्तप्राकृतदेहरहित इत्यर्थः । यश्च स्वेन सृष्टं जगद्रक्षति यश्च स्वेन रक्षितं जगत्पुनरवलुम्पते संहरति तर्ह्येवंविध ईश्वरः कर्मवश्यः स्वेच्छया कुरुते भवेत्सृष्ट्यादिकं किमर्थं करोति ? तत्राह—हे अबलाः ! तस्यैवं जगदुत्पत्त्यादिकर्तुरीशितुरीश्वरस्यान्तरात्मतयावस्थितस्य चराचरात्मकमिदं जगत् क्रीडनं क्रीडापरिकरं जगद्व्यापारस्तस्य क्रीडारूप इति भावः । अत एव निग्रहसंग्रहयोः निग्रहानुग्रहयोः प्रभुः समर्थः ॥ ३९ ॥

प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति–पथीति । पथि च्युतं विसृष्टमपि दिष्टेन दैवेन ईश्वरेण रक्षितमनुगृहीतं सत् तिष्ठति पुनर्बहुधं भवतीत्यर्थः । गृहे स्थितमपि तेन दिष्टेन विहतं सद्विनश्यति एवमरण्ये अनाथः रक्षकान्तररहितोपि तेन दिष्टेन ईक्षितो जीवति तत्सङ्कल्पेन जीवति गृहे गुप्तोप्यस्य हतो अनेनोपेक्षितो न जीवति किन्तु विनश्यत्येव ॥ ४० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भो दृशां चक्षुषामगोचरमविषयं नीतः येन विधिना ॥ ३३ ॥

स्याम सत्तां प्राप्नुमः तर्हि किं कर्तव्यमत्राह—तत्रेति । यत्र यास्यसि तत्र पादयोरनुयानं दिश ॥ ३४ ॥

निर्हारं दाहम् ॥ ३५ ॥

हेत्यनेन कथांतरप्रसक्तिं सूचयति यमः ॥ ३६ ॥

मा कुरुध्वं यूयं शोकं युष्मभ्यं सुखज्ञो दत्त इत्यादेरिति तत्राह—अहोइति । लोकविधिं जन्ममरणादिप्रकारं विपश्यताममीषां प्रेतबन्धूनां विमोहः अहो धिक् स्वयं सधर्माः जन्मादिसमानधर्माः अमी बन्धवः यत्र यस्य मनुष्यदर्शनायोग्यात् स्वर्गनरकादन्यत्रोद्भव उत्पत्तिर्देहयोगलक्षणाभूत् तत्र तत् अस्मच्चक्षुरगोचरं स्वर्गादिकं गतं मनुष्यमनुशोचन्तीति यत्तदपार्थं व्यर्थं गतानुगतिकत्वात् “अदर्शनादिहायातः पुनश्चादर्शनं गतः” इति वचनात्. यत्र स्वर्गादेरुद्गतो यस्य स यत्रोद्भवस्तत्र गतं स्वर्गादिगतमितिवा अपार्थमनुशोचन्तीतिवा सर्वस्य दैवाधीनत्वं स्वानुभवसिद्धमिति ज्ञापयत्यहोइति, यद्वा यत्र उत्पन्नं तत्र पृथिव्यां गतं मनुष्यशरीरं प्रतिव्यर्थम् अनुशोचन्तीति ॥ ३७ ॥

तस्मात्सर्वं दैवाधीनमिति मत्वा न शोकः कार्य इत्याशयेनाह—अहोवयमिति । पितृभ्यां अबला दुर्बलाः कुतश्चिता नास्तीति तत्राह—सरक्षितेति, यो गर्भेऽस्मान् रक्षति स भगवानधुना बहिर्गतान् रक्षिता हि यस्मात्तस्मादिति शेषः ॥ ३८ ॥

न केवलं रक्षिताऽपि तु सृष्ट्यादिकर्ताप्यतो न संशयः कार्य इतिभावेनाह—यइच्छयेति, अत्रेच्छयेतीच्छाग्रहणेन सर्वत्र सृष्टिप्रसङ्गे मायाशब्दस्येच्छार्थो ज्ञायते हे अबलाः सृष्ट्यादिकर्ता यतो अतः मरणलक्षणस्य निग्रहस्य संग्रहे परिहारलक्षणे प्रभोः समर्थस्य तस्येशितुश्चराचरं क्रीडनं लीलासाधनम् ॥ ३९ ॥

“दैवाधीनं जगत्सर्वम्”इत्युक्तेः कथमीश्वराधीनं चराचरमित्याशंक्य दिष्टदैवादिशब्देन संस्तुतोऽच्युत इत्याशयेनाह—पथीति भक्तायाभीष्टं दिशतीति दिष्टशब्दवाच्यो मुकुन्दः तेन रक्षित
न

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

विलापमाह—अहो इति । प्रणीतो गमितः येन विधात्रा तेन अधुना उशीनराणां शुचां विवर्द्धनः कृतोऽसि ॥ ३३ ॥

यत्र त्वं यासि तत्र तेऽनुयानं अनुगमनं तव पादयोः शुश्रूषार्थमित्यर्थः । दिश देहि वयमपि म्रियामहे इत्यर्थः ॥ ३४ ॥

निर्हारं दाहार्थं नयनम् अस्तम् अस्ताचलं प्राप्तो न्यवर्त्तत च-क्षुर्विषयो विश्रान्तवानित्यर्थः ॥ ३५ ॥

स्वयमुपागत इति पुण्यवज्जीवानां निर्हारान्त एव यम-पुरगमनं प्रायः सम्भवतीति कश्चित् तासामेव मध्ये कस्याश्चि-द्वैष्णवस्त्रिवः तत्समीपाद्यमदूतैर्नेतुमशक्यत्वात् तत्सामीप्य-दूरीकरणार्थं स्वयं यम एवागत इत्यन्ये प्राहुः, बालको भूत्वे-त्यन्येषां तत्र प्रवेशासामर्थ्यात् बालभाषितस्य मधुरत्वात् तत्कर्तृक-त्वकथनस्यातिविस्मयावहत्वात्तस्य जिघृक्षोत्पादनसमर्थत्वाच्च ॥ ३६ ॥

यत्र बस्मादव्यक्तात् तदुक्तं गीतासु—

"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ! ।
अव्यक्तनिधनान्येव तत्र का परिदेवना" इति ॥ ३७ ॥

अस्माकमत्यल्पवयसामपि यो विवेकः सोऽप्येषां नास्तीति साश्चर्यमाह—अहो इति ॥ ३८ ॥

ननु, त्वां गर्भवासे रक्ष इममस्मत्पतिं संग्रामे न ररक्षेत्यत्र को हेतुस्तत्राह—य इति । इच्छया स्वेच्छयैव न तु कस्याप्यनुरोधेनैवेति भावः । नन्वीदृशीच्छैव किं हेतुका तत्राह—ईशः अन्यानधीनपरमैश्वर्यवत्त्वान् तत्कारणाकल्पने तदैश्वर्यस्यैव नारशत्वं न सिद्ध्येदिति भावः । नन्वेवं सृष्ट्यादिकं किमर्थं करोति ? तत्राह—हे अबलाः चराचरं तस्य क्रीडनमेवाहुः निग्रहे संहारे सङ्ग्रहे पालने च स एव प्रभवनशीलः ॥ ३९ ॥

प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति—पथीति । दिष्टेन दैवेन ईश्वरेणेत्यर्थः । तेन ईश्वरेण विहतं तेन ईक्षितः अनेक्षितो ऽन्येनापि रक्ष्यते इत्यर्थः । अस्य हतः अनेनापेक्षितः अन्येनापि हन्यते इत्यर्थः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अहो इति खेदे येन पुरा उशीनराणां नोऽस्माकं च वृत्तिदो भवान् कृतः तेनैवाकरुणेन दृशामगोचरां दशां प्रणीतो गमितस्सन् शुचां विवर्द्धनः कृतोऽसीत्यन्वयः ॥ ३३ ॥

हे वीर ! ते त्वदीया वयं त्वया विना कथं स्याम भवेम जीवेम अतः तव पादयोः शुश्रूषतीनां शुश्रूषां कुर्वतीनां यत्र त्वं यास्यसि तत्रानुयानमनुगमनं दिश देहि ॥ ३४ ॥

एवमुक्तप्रकारेण रुदन्तीनां निर्हारं दाहार्थं निस्सारणम् [illegible] इति सम्बन्धः ॥ ३५ ॥

यमः परिदेवितं रोदनमाश्रुत्य बालकोभूत्वा तत्र स्वयमेवा-गतस्तान् राजदारान् आह अहो इत्यादिना ॥ ३६ ॥

अहो वयसा अस्मत्तोऽधिकानामपि लोकस्य विधिं जन्म-मरणादिप्रकारं विशेषतः पश्यतामपि विमोहोभवति. विमोह-मेवाह—यत्र यतः आगतस्तत्रैव गतं मनुष्यं स्वय सधर्मा मर-णशीला अप्यपार्थं शोचन्ति ॥ ३७ ॥

एवंविधेभ्यो वयोवृद्धेभ्यो जनेभ्यः वयं बाला एव धन्या इति साश्चर्यमाह—अहो इति । अबला असमर्था एव पितृभ्यां त्यक्ता वृकादिभिः अभक्ष्यमाणाः सन्तः न विचिन्तयामोऽतो वयं धन्य-तमाः यतो य ईश्वरो गर्भे रक्षति स एव सर्वदा रक्षिता ॥ ३८ ॥

हे अबलाः ! स्वरूपतो निर्विकारः ईश्वरः प्रकृतिपुरुषनियन्ता इच्छया सङ्कल्पमात्रेणाद विश्वं सृजति य एव रक्षति यो लुम्पते तस्य-शतुश्चराचरं क्रीडनमाहुः स एव निग्रहसङ्ग्रहे निग्रहे संहारे सङ्ग्रहे पालने च प्रभुः समर्थः ॥ ३९ ॥

प्रभुत्वमन्वयव्यतिरेकाभ्यामुपपादयति—पथीति । दिष्टेन-दैवेनेश्वरेण रक्षितं वस्तु पथि च्युतमपि तिष्ठति तेन विहतं ताडितं गृहेऽपि स्थितं विनश्यति तदीक्षितः तेन कृपादृष्टिविषयी-कृतः अनाथोऽपि जीवति अस्य हतो गृहे गुप्तोऽपि न जी-वति ॥ ४० ॥

भाषा टीका ।

हे प्रभो ! निर्दय विधाताने तुम्हारा दृष्टि के अगोचर दशा को प्राप्तकर दिया ॥ जो आप पहिले उशीनर देश के जीविका देने वाले थे आज जिसने शोक के बढ़ाने वाले कर दिये ॥ ३३ ॥

हे महीपते ! हम सब सुहृत्तम और कृतज्ञ ऐसे आपके बिना कैसे रहेंगी । हे वीर ! आप जहां जांयगे आपके चरणों की शुश्रूषा करने वाली हम लोगों को भी उसी जगह अनुगमन की आज्ञा दीजिये ॥ ३४ ॥

मृतकपति को पकड़कर ऐसे विलाप करने वाली और दाहादि कार्य की इच्छा न करने वाली उन रानियों के रोते २ सूर्य अस्त को प्राप्त हुए ॥ ३५ ॥

उस जगे उस मृतक के बंधुओं का विलाप सुनकर स्वयं यमराज एक बालक बनकर वहां आकर उन सबों से बोले ॥ ३६ ॥

यम उवाच ॥ यमराज बोले, कि – अहो बड़े आश्चर्य की बात है लोक की रीति जानने वाले अवस्था में भी अधिक इन लोगों का बड़ा मोह है । जहां से आया वहीं जाने वाले मनुष्य को, आप भी वहीं जाने वाले होकर व्यर्थ शोच करते हैं ॥ ३७ ॥

अहो बड़े खुशी की बात है कि हमहीं बड़े धन्य हैं जो कि हमको माता पिताओं ने छोड़ दिये तो भी हम चिन्ता नहीं [illegible] हैं । और [illegible] आदि [illegible] के जंतु भी भक्ष[illegible]

भूतानि तैस्तैर्निजयोनिकर्मभिर्भवन्ति काले न भवन्ति सर्वशः ।
न तत्र ह्यात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते ॥ ४१ ॥
इदं शरीरं पुरुषस्य मोहजं यथा पृथग्भौतिकमीयते गृहम् ।
यथोदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ॥ ४२ ॥
यथाऽनलो दारुषु भिन्न ईयते यथानिलो देहगतः पृथक्स्थितः ।
यथा नभः सर्वगतं न सज्जते तथा पुमान् सर्वगुणाश्रयः परः ॥ ४३ ॥
सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ ।
यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिचित् ॥ ४४ ॥
न श्रोता नानुवक्ताऽयं मुख्योऽप्यत्र महानसुः ।
यस्त्विहेन्द्रियवानात्मा स चान्यः प्राणदेहयोः ॥ ४५ ॥
भूतेन्द्रियमनोलिङ्गान् देहानुच्चावचान्विभुः ।
भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ॥ ४६ ॥
यावल्लिङ्गान्वितो ह्यात्मा तावत्कर्मनिबन्धनम् ।
ततो विपर्ययः क्लेशो मायायोगोऽनुवर्त्तते ॥ ४७ ॥
वितथाऽभिनिवेशोऽयं यद्गुणेष्वर्थदृग्वचः ।
यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषा ॥ ४८ ॥

भाषा टीका ।

नहीं करते. क्योंकि ? रक्षक तो वही है जिसने गर्भ में रक्षा की है ॥ ३८ ॥

जो ईश अपनी इच्छा से इस जगत को सृजता है और जो अव्यय रक्षा करता है और अंतमें जो इसका संहार करता है, हे अबलाओं ! सब चराचर जगत को उसी ईश्वर का खिलौना कहते हैं ॥ वही ईश्वर संहार और पालन में समर्थ है ॥ ३९ ॥

'प्रारब्ध का रखाया हुआ पदार्थ मार्ग में गिरा हुआ भी स्थित रहता है ॥ और प्रारब्ध का मारा हुआ गृह में धरा हुआ भी नष्ट होजाता है ॥ ऐसे ही अनाथ भी वन में भी उससे रक्षित जीवता है और उस का मारा हुआ घर में भी रक्षित हो तो भी नहीं जीता ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वेवमात्मनो जन्ममरणादिकमङ्गीकृत्येश्वराधीनत्वान्न शोकः कार्य इत्युक्तमिदानीं तु देहानामेव जन्मादि न त्वात्मन इत्याह-- भूतानीति त्रिभिः । भूतानि देहा निजयोनिः स्वकारणभूतं लिङ्गशरीरं तन्निमित्तैः कर्मभिर्भवन्ति जायन्ते न भवन्ति नश्यन्ति च सर्वशो देवादिदेहा अपि तत्र ह तदा प्रकृतौ देहे स्थितोऽप्यात्मा तस्याः प्रकृतेर्गुणैर्देहधर्मैर्जन्मादिभिर्न निबध्यते न युज्यते यतोऽन्यतमो देहादत्यन्तविलक्षणः ॥ ४१ ॥

नन्वहं कृशः स्थूल इत्यादौ वैलक्षण्यं न प्रतीयते तत्राह इदमिति । इदं शरीरं मोहजमविवेकादात्मत्वेन जातम्, वस्तुतस्तु पृथगेव यत ईयते दृश्यते भौतिकञ्च यथा गृहमित्यन्वयः अत्रैवं प्रयोगः द्रष्टुरभौतिकाच्च पुरुषाच्छरीरं भिन्नं दृश्यत्वाद्भौतिकत्वाच्च यथाऽत्यन्ताविवेकिन आत्मत्वेनाभिमतमपि गृहं तत्पृथक् तद्वदिति भौतिकत्वानुमानं विवृण्वन्नात्मनो जन्माद्यभावमुपसंहरति यथा ओदकैः परमाणुभिर्जाता बुद्बुदादिर्यथा पार्थिवैर्जातो घटादिर्यथा च तैजसैर्जातः कुण्डलादिर्विनश्यति तैरेव त्रिविधैः परमाणुभिर्जातो जनो देह एव विकृतः परिणमन्विनश्यति नत्वात्मेत्यर्थः ॥ ४२ ॥

पृथगवस्थानाभावेऽपि भिन्नत्वे दृष्टान्तत्रयमाह—यथेति यथा अनलो दारुष्वेव स्थितोऽपि दाहकत्वेन प्रकाशकत्वेन भिन्न एव प्रतीयते. यथा च देहगतोऽप्यनिलो मुखनासिकादिषु पृथ
[illegible]

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वेषां गुणानां देहेन्द्रियादीनामाश्रयस्तेष्वाश्रितो वा परः पृथगे-वेत्यर्थः ॥ ४३ ॥

र्किञ्च हे मूढाः, यमनुशोचथ सोऽयं युष्मद्गृहीतः सुयज्ञः शेते किमिति शोचथ नन्वेतावन्तं कालमसौ शृणोत्यनन्तरं प्रति-वक्ति च, इदानीं तददर्शनान्मृतइति शोचामेति चेत्स तु शोच्यो न भवति प्रागपि तस्यादर्शनादित्याह—यःश्रोतेति ॥ ४४ ॥

ननु, मुखनासिकासञ्चारी प्राणः श्रोता वक्ता च दृश्यतेति चेन्नासौ श्रोता वक्ता वा चेतनत्वादित्याह—न श्रोतेति । महान्सर्वेन्द्रियचेष्टाहेतुः अत एव "मुख्यः प्राणो वै मुख्यः" इति श्रुतेः । कस्तर्हि श्रोता वक्ता च ? तत्राह—यस्त्विह देहेन्द्रियैस्तत्त-दर्थद्रष्टा आत्मा स तु प्राणदेहाभ्यामचेतनाभ्यामन्य एव स चेतनः ॥ ४५ ॥

ननु, चेतनत्वेऽन्यत्वे च तस्याहं कृशः स्थूलः काणो बधिर इत्यादिदेहधर्मोपलब्धिः कुतस्तत्राह, भूतेन्द्रियमनोभिर्लिङ्ग्यन्ते ज्ञप्यन्तइति तथा तान्देहांस्तेभ्योऽन्य एव भजत्यहमिति मन्यते तर्हि कथं मोक्षस्तत्राह, तच्च भजनं स्वेन तेजसा विवेकबलेनो-त्सृजत्यपि हीत्यनुभवं प्रमाणयति ॥ ४६ ॥

ननु, विवेकानन्तरमप्याहारादिकर्मसु प्रवृत्तेर्बन्धः स्यादेवे-त्यत्राह—यावदिति । यावल्लिङ्गशरीरेणान्वितस्तदभिमानवानात्मा भवति तावदेव तस्य तत्कर्मनिबन्धनं बन्धहेतुर्भवति ततो वि-पर्ययो देहधर्मताकत्वं ततः क्लेशश्चानुवर्तते ननु लिङ्गाभिमाने निवृत्तेऽपि यतोऽयं मायायोगो विपर्ययादिः मायया युज्यत इति तथा न परमार्थ इत्यर्थः ॥ ४७ ॥

ननु, सुखदुःखादीनां तत्साधनानाञ्च सत्यत्वप्रतीतेः कुतो मा-यामयत्वम् ? तथाच बहवो वादिनः सत्यत्वमेव वदन्ति तत्राह—वित-थेति । वितथो मिथ्याभूतोऽयमभिनिवेशः कोऽसौ गुणेषु तत्कार्येषु सुखदुःखादिष्वर्थः परमार्थ इति हृग्वचश्चेति यत् स कुत इत्यत आह—यथेति ॥ ४८ ॥

—— ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं तर्हीश्वरेऽपि विषमः ? नेत्याह—भूतानीति । सर्वाणि भूतानि देवमनुष्यादीनि तैस्तैर्निजयोनिकर्मभिः स्वस्वजातिप्राप्ति-निमित्तकर्मभिः काले निजयोनिकर्मपरिपाककाले भवन्ति पुन-स्तत्कर्मक्षये न भवन्ति देवमनुष्यादिभूतानां भावाभावौ तत्तत्क-र्मानुगुणप्रवृत्तेश्वरायत्तौ, इति न तस्य वैषम्यमितिभावः । ननु, मास्तु वैषम्यं तस्यापि स्वन्तरात्मतयाऽवस्थितः स्वानर्थरूपं संसारं स्वयमेवापादयन् किम् अयमज्ञः ? नेत्याह—नेति । तत्र प्रकृतौ देवादिशरीरे जीवान्तरात्मतया स्थितोऽप्यात्मा परमात्मा न बध्यते न संसरतीत्यर्थः । देहित्रिकमध्ये देहेऽभ्यनस्याऽन्यैकस्य न बन्धः अन्यतरस्य तु बन्धः इति विस्मयः इतरस्य बन्ध-

न्यतमो देहेन्द्रियादीनामन्यतमो जीवः इह परमात्मनोऽपीति च बाध्यम. निबध्यते निबद्धो भवति संसरतीत्यर्थः । यद्वा, गुणैः शब्दादिभिर्विषयैर्हेतुभिस्तत्संगहेतुभूतेषु वस्तुषु निबध्यत इत्यर्थः तत्संग एव हि तस्य संसृतौ कारणमिति भावः । तथा च श्रुतिः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभि-चाकशीति" ॥ ४१ ॥

एवं सर्वभूतानामुत्पत्तिलयादेस्तत्तत्कर्मानुगुणप्रवृत्तेश्वराय-त्तत्वान्न शोकः कार्य इत्यभिप्रायेदानीं देहस्य विनाशस्वभाव-त्वादात्मनस्तु तद्विपरीतरूपत्वादुभाभ्यामपि न शोकविषयाविति वक्तुं तावद्देहात्मनोः परस्परवैलक्षण्यमाह—इदमिति द्वाभ्याम् । इदं परिदृश्यमानं राजादिशरीरं पुरुषस्य जीवस्य मोहजमविद्या-सञ्चितकर्मकृतं पुरुषस्य मोहजम् इदं शरीरम् इति व्यतिरेक-निर्देशेन देहात्मनोः परस्परभेदो दर्शितः तत्र देहस्यानात्मत्वं दृष्टान्तेनाह—यथा गृहं गृहिणः पृथक् भिन्नं तथा भौतिकं भूतसङ्घातपरिणामभिदं शरीरमपि पृथक् शरीरिणो भिन्नमीयते अवगम्यत इत्यर्थः । यथा गृहस्य गृहिस्वरूपत्वमत्यन्तासम्भा-वितं तद्वत् देहस्य देहिस्वरूपत्वमिति दृष्टान्ताभिप्रायः । एवं गृहदृष्टान्तेन जीवाद्देहस्य भेद उक्तस्तेनैव दृष्टान्तेन देहस्य विनाशि-स्वभावत्वं चाह—तथेति । यथा मृत्काष्ठादिविकारात्मकं गृहं कालेन विनश्यति तथा भौतिकः पार्थिवैस्तैजसैश्चेरं वायवीयाकाशीयैश्च पर-स्परुपसृष्टम् उदकादीनामंशैः कालेन तत्तद्देवादिजातिप्राप्ति-निमित्तकर्मफलपरिपाककालेनेत्यर्थः । जातो जनो देहः अनन्तरः पश्चादपि विकृतः बाल्ययौवनस्थाविरत्वादिभिरवस्थाभिर्विकारं प्राप्तः पुनः स्वारम्भककर्मविनाशकाले विनश्यति ॥ ४२ ॥

अथात्मनो देहाद्भेदं सदृष्टान्तमाह—यथेति । यथा अनलो-ऽग्निर्दारुषु स्थितो भिन्न ईयते दारुगतह्रस्वत्वदीर्घत्वकुटिलत्वा-दिधर्मरहितस्तेभ्यो भिन्न एव दृश्यते यथा च देहगतोऽप्यनि-लस्ततः पृथगेव दृश्यते यथा नभः सर्वत्र व्याप्तमपि न सज्जते सर्वगतधर्मैर्न सम्बध्नाति तथा सर्वगुणाश्रयः सत्त्वादिसर्वगुण-परिणामरूपदेहेन्द्रियाद्याश्रयोऽपि पुमान् जीवः परः गुणेभ्यः देहा-द्भिन्नः देहगतजन्ममरणादिभिर्विकृतस्तस्माद्विलक्षणत्वेनावलि-प्त इत्यर्थः । अविभागेनावस्थितस्यापि तद्गतधर्मास्पर्शो आद्यं निदर्शनं विजातीयस्यापि सहावस्थाने द्वितीयं तृतीयं तु सद-वस्थानेऽपि पुनस्तद्गतधर्मास्पर्श इति भेदः ॥ ४३ ॥

एवं देहात्मनोः परस्परविलक्षणस्वरूपयोरभिहितयोरप्य-तीतदेहात्मभ्रान्त्याऽनुशोचतां शोकमपनेतुं कः शोकविषयमय-मयइत्याशङ्क्य प्रतिक्षिपति—सुयज्ञ इति । हे मूढाः ! भवत्पर्ये-यमहु शोचथ सोयं सुयज्ञः शेते युष्माभिः शोच्यः सुयज्ञः शेते विद्यत एव किमर्थं शोक इति भावः । ननु, भवत्पक्षे शयान एव हि सुयज्ञ इति शङ्कार्थकतत्प्रतिक्षिपति—य इति, य श्रोता भवद्भिःउपश्रवणक्षमो यश्चानुवक्ता प्रतिवचनक्षमश्च स इह कर्हिचिदपि चिरं सुस्पष्टं निरीक्षमाणोऽपि न दृश्यते शयानो देह एव सुयज्ञशब्दवाच्यत्वं किमिति न शृणोति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नश्यम इत्याह—नेति । मुख्योऽप्यसुः प्राणो वा न श्रोता न मर्यादा-रूपितस्य श्रोता नाप्यनुवक्ता । किं पुनर्देह इत्यर्थः । ननु, श्रोतारं प्रतिवक्तारं प्रत्येवानुशोचाम इत्यत्राह—यास्त्विति । यस्त्विन्द्रि-यवान् श्रवणप्रतिवचनादिसाधनश्रोत्रवागादीन्द्रिययुक्तः स त्वात्मा इह शरीरे प्राणदेहाभ्यामन्य एवासीत्. स तु तत् तेभ्यो देहेभ्यः अन्य एव साक्षीत्यर्थः ॥ ४५ ॥

स्वेन तेजसा ज्ञानेनोपलक्षितो भूतैः पृथिव्यादिभिरिन्द्रियैः ज्ञानकर्मोभयेन्द्रियैः मनसा च लिङ्ग्यन्ते लक्ष्यन्ते इति तथा तान् उच्चावचान् उत्कृष्टापकृष्टान्देहान् भजति बिभर्ति उत्सृजति त्यजति च अपि हीत्यनुभवं प्रमाणयति इन्द्रियवानात्मा देहत्यागग्रहणोपा-दानशीलः शयानमिमं देहं त्यक्त्वा गत इति सोपि इदानीं न शोच्य इति भावः ॥ ४६ ॥

नन्वस्माकमुपभोग्यमिमं देहमन्तरेणापि हेतुं त्यक्त्वा गत इत्यनुशोचामस्तत्राह—तावदिति । यावन्निबन्धनं देहसम्बन्धकारणं कर्म पुण्यापुण्यात्मकं कर्म वर्त्तते तावल्लिङ्गान्वितः देहेनान्वितो भवति आत्मा तत एव देहान्वयादेव हेतोर्विपर्ययो देहात्मभ्रान्तिः ततः क्लेशः इत्येवंरूपो मायायोगः प्रकृतिसम्बन्धरूपसंसृति-रनुवर्त्तते, अयं भावः, सति देहसम्बन्धनिमित्ते कर्मणि देहे-नान्वयः, तस्मिंश्च सति ममायं पतिरहमस्य भार्या इत्यभिमाना-त्मको देहात्मभ्रमः तस्मिंश्च सति क्लेशः तत्र निदानस्य कर्मण एव निवृत्तत्वादस्यात्मनः पुनः शयानदेहसम्बन्धस्यैवा-भावान्निर्हेतुको व्यर्थश्च शोकः देहसम्बन्धावहकर्मनिवृत्तिरेव च देहात्मनो हेतुरिति ॥४७ ॥

देहस्योपभोग्यत्वं प्रतीत्युपपत्ति-वितथेति । अगमाभिनिवेशोऽभिमानो वितथो व्यर्थः, देहादेरपुरुषार्थरूपत्वादिति भावः । कोऽसावभिनि-वेशः ? यद्गुणेषु सत्त्वादिगुणपरिणामात्मकेषु देहादिषु नश्वरेषु भोग्येषु शब्दादिषु चार्थदृगवचः प्रयोजनत्वदर्शनवचने इत्येषः देहादिषूपभोग्यत्वज्ञानं तद्व्यवहारश्चाभिमानो व्यर्थः; एवं तथ्य-मेव दृष्टान्तमुखेन विशदयति—यथेति यथा मनोरथरूपः स्वप्नदृष्ट-कर्मानुगुणमनोवृत्तिरूपः सङ्कल्पविकल्पात्मकस्वप्नानुगुणतयेश्वर-सृष्टपदार्थः मृषा अनित्यः स्वप्नकालमात्रावस्थायी तथा सर्व-मैन्द्रियिकबाह्येन्द्रियविषयः शब्दादिकमपि मृषा अनित्यः अनित्य-त्वादपुरुषार्थः स्वप्नद्रष्टैकानुभाव्यतत्कालमात्रावस्थायिपदार्थसृष्टि-निमित्तकर्मानुगुणमीश्वरसृष्टं स्वाप्नं पदार्थं प्रतीत्य जाग्रद्व-दृष्टानुभाव्यसर्वेन्द्रियगम्यभोग्यभोक्तृदृष्टसमानकालिकपदार्थं प्रत्यु-पभोग्यत्वाद्यभिमानो व्यर्थः अनित्यत्वेनापुरुषार्थरूपत्वादिति-भावः । मृषाशब्दस्यानित्यत्वमाश्रितम्. 'अथ नित्यमनित्यञ्च' इत्यनन्तरग्रन्थादवगम्यते. "अनादी परमार्थश्च प्रकृत्युपगम्यते" इति पराशरोक्तेश्च, परमार्थेनाद्यादिशब्दानामनादिपरत्वमव-गम्यते ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सृष्ट्यादिकं कुर्वन्नात्मा तत्तज्जीवकर्मानुगुणं करोतु

तदनुसारेणेति तत्राह—भूतानीति । निजयोनिकर्मभिः स्वजाति-विहितकर्मभिः भूतानि विहितकाले भवन्ति न भवन्तीत्यात्म-प्रेरितैरिति शेषः "द्रव्यं कर्म च कालश्च" इत्यादेः * कालशब्दवा-च्यपरमात्माधिकरणतया सृष्ट्यादिकमाप्नुवन्तीति वा. ननु, जीवात्मनोरुभयोरपि देहस्थितेः कस्य संसारबन्धाभाव इति सुहृ-द्भावेन पृच्छन्तमाह—न तत्रेति, तत्र तयोर्जीवयोरन्यतम आत्मा प्रकृतौ प्रकृतिनिर्मितशरीरे स्थितोऽपि तस्याः प्रकृतेर्गुणैः सत्त्वादि-भिर्न निबध्यते ह किल—

"सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत" ॥

इत्यादिविपाकबोधबन्धो नास्तीत्यर्थः । हेत्वनेन "मुक्तयेनाऽप्यपि हितं यदासीत्तपसस्तन्महिमा आवर्तकम्" इति वाक्यं सूचयति. सुविक-सत्स्वरूपत्वाज्जीवादन्यतमो हरिरित्यतो हरेरन्यतमत्वं प्रामाणि-कमेव परमात्मा न बध्यतेऽन्यतमो बध्यत इत्येतदुत्तरश्लोकेन पुनरुक्तं स्यादित्यन्यथा व्याख्यातमाचार्यैरन्यतम आत्मा पर-मात्मेति ॥ ५१ ॥

परमात्मनो बन्धाभाववचनेन जीवात्मनोर्यो भेदः प्रतीयते स केन प्रकारेणेत्याशङ्क्याह—इदं शरीरमिति । पुरुषस्य संसारिणो मोहेनान्यथाज्ञानेन "मुह वैचित्त्ये" इति धातोः विपरीतज्ञानजं यस्मा-त्तस्मादात्मनो भिन्नमिति ज्ञातव्यम्. तथा हि, भौतिकं भूतविकृ-तैर्वृक्षैर्विरचितं गृहं गृहस्थात्पृथग्भिन्नमीयते यथा विनश्यति च तथोदकैः पार्थिवतैजसैः परमाणुभिः कालनाम्ना हरिणा चोदितै-र्विकृतो विकारं प्राप्तो जातो जन्यत इति जनो देहो विनश्यति स्वकारणावस्थितिमाप्नोतीति यस्मात्तस्माज्जीवाद्भिन्न इति निश्चीयते "नित्यो नित्यानाम्" इति श्रुतेः । जीवस्य नित्यत्वात् ॥ ५२ ॥

तदेव दृष्टान्तान्तरेण स्पष्टयति—यथेति । यद्वा ननु, जीवस्य शरीराद्भेदोऽस्तु तस्य नश्वरत्वात्परमात्मना जीवस्याभेदः किं न स्यादिति मन्दाशङ्कां परिहरति—यथेति । दारुषु स्थितो वह्नि-र्दारुभ्यो भिन्नस्तद्गुणैस्तेषु न सज्जते यथा देहिनां देहगतो वायुर्देहात् पृथक् भिन्नस्तद्गुणैश्च न लिप्यते यथा सर्वगतं नभः सर्वस्माद्भिन्नं सज्जते सर्ववस्तुगुणैश्च न लिप्यते यथा तथा ज्ञानानन्दादिसर्वगुणाश्रयः परः परमात्मा सर्वेषां जन्तूनां गुण-भूतं भोगायतनं शरीरमाश्रयो यस्य सः सर्वगुणाश्रयः सर्वजीव-देहगतः परो विलक्षणो भिन्न इति यावत् । जीवादिति शेषः । प्रकृतत्वाज्जीवगुणैर्न लिप्यत इति. देहाद्भेदस्य प्रकृतत्वात्स एवात्रोच्यत इति किं न स्यादितीयं शङ्का—

"देहदारुगतो प्राणवह्नी सर्वगतं नभः ।
देहादिभ्यो यथा भिन्ना न लिप्यन्ते च तद्गुणैः ॥
तथा जीवगतो विष्णुर्जीवाद्भिन्नो न तद्गुणैः" ॥

इति वाक्येन परिहर्तव्या. अत्रायं फलितोऽर्थः भगवन्माहात्म्य-कथनेन सर्वस्य तदधीनत्वात् स एव भजनीयो शोके न प्रयो-जनमिति ॥ ५३ ॥

किञ्च भवच्छोकयोग्यस्य सुयज्ञस्य दृश्यमानत्वात्संप्रति शोको न कार्य इति गूढाक्षेपं करोति–सुयज्ञ इति । हे मूढाः ! यमनु शोचथायं सुयज्ञः शेते निद्रां करोति । ननु न मृतः "ननु च स्याद्विरोधश्चे" इत्यभिधानात्. शेत एव लोकान्तरं न गत इति वा "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यभिधानात्. अवधारणार्थो ननुशब्दः । श्रोत्रादीन्द्रियव्यापारादर्शनादिना मरणानुमानात्कथं न मृत इत्याक्षिप्यत इति तत्राह—यः श्रोतेति । इह सुयज्ञशरीरे यः श्रोता वक्तानुवक्ता स परमात्मा कर्हिचित्कदाचिदपि न दृश्येत तस्य सूक्ष्मस्वभावत्वात् "तदव्यक्तमाह" इतिसूत्रात्. तस्यैव श्रोतृत्वादिकं कुत इति चेत् "नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता" इत्यादेः ॥४४॥

ननु, सुयज्ञशरीरस्थस्य मुख्यप्राणस्य श्रोतृत्वादि संभवात् कथं तदन्ययोगव्यवच्छेदः क्रियत इति तत्राह—न श्रोतेति । अत्र सुयज्ञदेहे श्वासोच्छ्वासादिलक्षणेन मुखे व्यज्यमानत्वान्मुख्यो यो महानसुः मुख्यप्राणः सोपि स्वतो न श्रोता नानुवक्ता च " तस्य वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्" इतिश्रुतेरन्ययोगव्यवच्छेदो युक्त इति । ननु, तर्हि सुयज्ञात्मनो जीवस्य श्रोतृत्वादिकमासीत्प्राक् तदिदानीं न तस्मान्मृत इति प्राचीनशङ्काशेषं कैमुत्यन्यायेन परिहरति—यस्त्विति, तु शब्देन नेत्यनुकृष्यते इह सुयज्ञ इत्युपलक्षणं जीवराशिदेहे य इन्द्रियवान् यश्च प्राणदेहयोरन्यः स जीवात्मा श्रोतुं वक्तुञ्च न शक्य इति किं वक्तव्यम् "एतद्वाणामयद्भ्य विधारयामि" इति श्रुतेः । सर्वशक्तिमतोपि प्राणस्य स्वतः श्रोतृत्वाद्ययुक्तेरुक्तत्वात्तस्मात्सुयज्ञंप्रति शोकेन किं प्रयोजनं तस्माज्जीवतामपि श्रोतृत्वाद्यनुपपत्तेः प्रामाणिकत्वेन मृतोऽयमित्यस्य लक्षणान्तरं वाक्ति अन्य इत्यनेन, हरेर्माहात्म्यातिशयः प्रकटितः इति सूचितम्. न केवलं प्राणदेहयोरन्यः किं तु पूर्णश्रोतृत्वादिगुणयुक्तत्वादन्यश्चान्य इति चशब्दार्थः ॥ ४५ ॥

हरेर्देहवियातिसद्भावे न तस्मादन्यश्च इति च वक्तुं युक्तं तत्कुत इति तत्राह—भूतेन्द्रियेति । भूतेन्द्रियमनांसि लिङ्गं रूपं येषां ते तथा तानुच्चावचान् सुरनरादिरूपान्त्मन उत्तममध्यमाधमान् देहान् भजति पश्चादुत्सृजति हि यस्मात्तस्मादन्य इति वक्तुं युक्तं स्पष्टञ्चाह–अन्य इति । देहयोगवियोगभागी जीवादिति शेषः "लिङ्गं स्वरूपमुद्दिष्टं लिङ्गं ज्ञापकमेव च" इति वचनाल्लिङ्गशब्दस्य स्वरूपार्थो युक्तः यदि देहभजनोत्सर्जने हरेस्तर्हि जीवात्को विशेष इति तत्राह—तच्चेति, परिच्छिन्नविषये भजनोत्सर्जनं व्याप्तस्य विष्णोः कथं घटेत इत्यतो वाह—तच्चेति, ततश्च शब्देन जीवस्य पारतन्त्र्येणेति विशेषमाह, अपिशब्देन रूपान्तरेणोत्पत्त्युपपत्तिमाह, अत्र जीवपरमात्मनोर्भेदस्य तयोरुभयोर्देहादर्भेदस्य च हरेरेव मुख्यश्रोतृत्वादेश्च प्रकरणावान्तरभेदस्य च ज्ञापनायायार्थैः पूर्वापरभावेनेन्द्रियवान् जीव इत्यादि व्याख्यातम्. ननु, जीवस्य प्राणदेहयोरन्यत्वे मरणे देहनाशान्मुक्तौ तद्भावाद्विषयभोगाभाव इत्याशङ्कापरिहारायोक्तमन्यार्थैः (१) अन्यो जीव इत्यादि ॥ अतदेहादन्यत्वं न स्वरूपभूतानुभवेन इत्यर्थः ।।(२) अन्वितो जडात्-

न्द्रियत्वं चामुख्यं तेषामचरत्वादभिमानादेव.(३)तद्द्वयं यद्यामीत्यभिमानोऽस्त्येवादेः तर्हि चक्षुरादीनि कस्याधीनानि इत्यतः प्राणाधीनानीति द्योतयितुम् "चक्षुराद्यामनोजीवः" इत्यादेः प्राणोपि न पर्याप्तमित्युक्तं तस्यापि ज्ञातृगन्तृत्वं न स्वतः शक्यते कश्चिदिति यस्तस्य ज्ञातृगन्तृत्वदाता स भगवानित्यर्थापि सूचितम्. यः श्रोतेत्यत्र प्रमाणम्, "ज्ञाता च मन्ता च" इत्यादि. ज्ञानादिदातं तस्यान्य इत्येतदन्विति सूचितम् "सर्वस्य ज्ञानदो हरिः" इत्येतत् "न स दृश्येत" इत्यनेन सूचितं स्वविषयज्ञानदातेति चेति दृश्य इत्यर्थः । भूतेन्द्रियमन इत्यादिना विष्णुरुच्यते न जीव इत्यत्र मानं "स देहान् भजत" इत्यादिना ॥ ४६ ॥

ननु अयं जीवः कियन्तं कालं देहान्वितो भवति इति चोद्यं परिहरति—यावदिति । यावन्तं कालमन्नमयप्राणमयमनोमयलक्षणेषु लिङ्गेषु अन्वितो भवति आत्मा परमात्मा तावन्तं कालं कर्मभिर्नितरां बन्धनं यस्य स तथा जीवः येषु देहेषु अन्वितो भवति, हि शब्दाद्धरिर्यदा त्रिविधदेहानुत्सृजति तदा ह्ययमप्युत्सृजतीति ग्राह्यम्, अत्रायं विशेषः यदा परमात्मा देहं सर्वात्मनोत्सृजति तदा अयमपि सर्वात्मना तदनुग्रहेणोत्सृज्य संसारान्मुक्तो भवति. अन्यदनेन सह देहान्तरं भजतीति. तस्मादनेन रूपान्तरेण कृतदेहोत्सर्जनत्वादर्शनादपि सुयज्ञेन तदाचरितमिति देहोत्सर्जनलक्षणमरणस्य पराधीनत्वेनापरिहार्यत्वाच्च शोकेन प्रयोजनमिति भावः । "यावद्देहान्वितो विष्णुस्तावज्जीवः" इत्येतदत्र मानं "यदोत्सृजति देहं स हरिः सर्वात्मना विभुः" इति च. ननु, परमात्मा जीवाभिन्नस्सन् देहान् भजत्युत्सृजतीत्युच्यते इति किं न स्यात् कल्पनालाघवादेकमेव ब्रह्माज्ञानात्संसरति मुच्यत इत्यङ्गीकारादिति तत्राह—तत इति । तस्माद्धरेर्जीवो विपर्ययो विरुद्धः पर्ययः निश्चयो यस्य स तथा विरुद्धलक्षण इत्यर्थः "अतिभिन्नस्वरूपौ तौ जीवेशावेकदेहगौ" इत्यादेः अतो [illegible]ऽज्ञानकल्पनमप्रामाणिकमिति भावः । "देहाभिमानी त्वेकोऽत्र न मानी मानदः परः" इत्यनङ्गीकारोपपादकम्, इतोपि भिन्न इत्याह–क्लेशा इति, नानाक्लेशाधिकरणत्वाद्वा भिन्न इत्यर्थः । विपर्ययस्तावत् क्लेशादयश्चास्येत्यादेः क्लेशफलमाह—मायेति ॥ ४७ ॥

कोयं मायायोगोनाम येनासौ क्लेशफलः स्यादिति तत्राह—वितथेति, गुणेषु शब्दादिषु अर्थस्यच प्रयोजनदर्शनं तद्वाचकं वचनञ्च स्वर्गे लोके न भयं किञ्चनास्तीत्यादिलक्षणं यत् अयं वितथाभिनिवेशः मिथ्याग्रहः भ्रान्तिज्ञानमित्यर्थः । क्लेशपरिजिहीर्षया शब्दादिष्विन्द्रियप्रवर्तनं तत्फलमित्युपचारः । वचनाद्धि वितथाभिनिवेशो भवति गुणेष्वर्थदर्शनस्यापि तथाभिनिवेशित्वं सदृष्टान्तमाह–यथेति, "स्वप्नस्तु प्रथमः" इतिसूत्रात्. मनोरथे कल्पितं राज्यं स्वप्ने दृष्टं रत्नं यथा मृषा वृथा तथा सर्वमिन्द्रियप्रवर्तनं मृषा सदसल्लक्षणमित्यर्थं इन्द्रियवृत्तय इत्येतद्विरुणद्धि—

"इन्द्रियाद्यभिमानेन तद्वान् जीव उदीर्यते ।
अतन्मानाद्धरिः प्रोक्तस्त्वदेहोऽनिन्द्रियस्तथा ॥
जीवाभिमते देहे न विष्णुर्जीवतिस्थितः ।
अतस्त्वदेह उदितः परमात्मा सनातनः" ॥

(३) [illegible] मतप्राणभरायाः नरपावो स

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इत्येनज्जीवपरयोर्भेदस्य जीवस्येन्द्रियवत्त्वमौपचारिकमित्यस्य चोप-पादने प्रमाणं, जीवस्येन्द्रियवत्त्वमुपचरितं चेत् कस्य तन्मुख्य-मित्याशङ्क्य—

"लेपाभिमानी जीवस्तु स्वरूपानुभवी नच।
मुक्तः प्राक् तेन मान्युक्तो न मानी विष्णुरुच्यते॥
सर्वं ममेति पश्यन्स्वल्लेपाभिमानियन्ततः।
सम्यक् स्वरूपानुभवात्स्वतन्त्रत्वाद्दोषतः" ॥

इत्यनेन परिहर्तव्या स्वानधीने वस्तुनि स्वाधीनता बुद्धिर्लेपा-भिमानः सोऽस्याऽस्तीत्येतादृशवाचो वितथाभिनिवेश इत्युच्यते हरेर्जीवदेहेन्द्रियादिषु स्वाधीनेषु स्वाधीनताबुद्धिर्लेपाभिमानः स गुणो यथार्थज्ञानलक्षणः तस्माद्धरेर्देहेन्द्रियादौ स्वामित्वेन वशत्वं मुख्यं तत्राविवेकग्रहणं कर्मनिबन्धनं ततो विपर्यय इत्यादिलक्षणोर्जीवोऽनीदृशः श्रीनारायण इति स्मर्तव्यम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

भूतेन्द्रियेति। विविधं भवतीति विभुः स्वतेजसा सर्वं क-र्मकर्तॄणां पालितस्य भगवतस्तेजसा अनाद्यविद्यायुक्तस्य स्व-रूपात्मवेदनम् "स्वतो न सम्भवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत्" इति श्रीभगवद्वाक्यात् ॥ ४९—५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु, तर्हि तस्मिन् ईश्वरे वैषम्यं प्रसक्तं कस्याप्युपेक्षणात् कस्याप्यपेक्षणादिति तत्राह—भूतानि मनुष्यपश्वादिदेहाः निजयो-निकारणीभूतैः कर्मभिस्तैस्तैरनेन कर्मणा गौर्भवत्यनेन कर्मणा सूकरो भवत्येवं शास्त्रप्रसिद्धैर्भवन्ति उत्पद्यन्ते न भवन्ति काले नश्यन्ति च सर्वशः सर्वाण्येव तत्र ह रूपं प्रकृतौ देहे स्थितोऽप्यात्मा परमात्मा अन्यतमः पृथग्भूत एवातस्तस्या गुणैर्देह-धर्मैर्जन्मादिभिर्न निबध्यते केवलं तत्तत्कृतशुभाशुभकर्मफलं स्वस-न्निधानमात्रेण जीवयतीत्येतदेव तस्यापेक्षणमुपेक्षणञ्चेति भावः ॥ ४१ ॥

तस्यान्यतमत्वमुपपादयति—इदमिति। मोहजं पुरुषस्य जी-वस्य मोहादेव जातं सत् कस्मात् परमात्मनः पृथगेव यथा भौ-तिकं भित्तिद्वारादिमद्गृहं गृहस्थपुरुषात् पृथगेवास्ते पार्थक्यं-नवैवोपपादयति—यथा ओदकैः परमाणुभिर्बुद्बुदादिः पार्थिवैर्घ-टादिः तैजसैः कुण्डलादिर्जायते नश्यन्ति च तथा तैरेव त्रिविधैः परमाणुभिर्जातो जनो देह एव विकृतः परिणतः सन् विनश्यति नत्वात्मनेत्यर्थः ॥ ४२ ॥

पृथगवस्थानाभावेऽपि भिन्नत्वे दृष्टान्तमाह—यथा अनलो दा-रुस्वरूपस्थितोऽपि दाहकत्वेन प्रकाशकत्वेन भिन्न एव प्रतीयते यथा नभो न सज्जते क्वापि सङ्गं प्राप्नोति तथा पुमानपि सर्वेषां गुणानां देहेन्द्रियादीनामाश्रयस्तेष्वाश्रितो वा परः पृथ-गेवेत्यर्थः। अतस्तेन परमेश्वरेणोपेक्षितामिमं स्वकर्मवशाम्मृतं पतिं कथं नोपेक्षध्वे इति भावः ॥ ४३ ॥

नन्वयं राजा सङ्ग्रामलब्धपराजयः संप्रति शेते कथमिम-मुपेक्ष्य निःस्नेहा भवितुं शक्नुमस्तत्राह—सुयज्ञ इति। नन्व-स्मद्विलापमतावन्तं कालमसावशृणोदब्रवीच्च तत्राह—य इति। कर्हिचित् प्रागपि नदृश्यो नासीदित्यर्थः, यस्तु दृश्यः स इदानीमपि दृश्यते देह इति भावः ॥ ४४ ॥

ननु, यावत् प्राणः स्थितस्तावदेव श्रोतृत्ववक्तृत्वे दृष्टे न तु प्राणे गते सतीत्यतः प्राण एव श्रोता वक्तेति तत्राह—नेति। मुख्योऽपि "प्राणो वै मुख्यः" इति श्रुतेः। महान् सर्वेन्द्रियचेष्टाहेतु-रपि न श्रोता। वक्ता च अचेतनत्वादिति भावः कस्तर्हि श्रोता वक्ता च तत्राह—यस्त्विह इन्द्रियवान् देहेन्द्रियादिमत्त्वेन प्रतीत आत्मा जीवः स च प्राणदेहयोः प्राणदेहेन्द्रियादिभ्योऽन्य एव सचेतनः ॥ ४५ ॥

तर्हि स संप्रति कुत्र गत्वा किं करोतीति तत्राह—भूतं प्राणम् इन्द्रियमनोरूपं लिङ्गं सूक्ष्मदेहो येषु तान् स्थूलदेहान् भजति प्राप्नोति त्यजति च यथेमं देहं प्राप्योदसृजदिति भावः। किन्त्वयं तेजसा भाग्यलब्धज्ञानबलेन तदापि लिङ्गं देहमपि कदा-चिदुत्सृजति ॥ ४६ ॥

लिङ्गदेहत्यागे सत्येव कर्मबन्धान्मुच्यते नान्यथा इत्याह यावदिति ॥ ४७ ॥

तस्माद्यूयमपि कर्मबन्धमोक्षायैव यतध्वं न तु कर्मफला स्वर्गीयवैषयिकसुखदुःखस्यास्थिरत्वेन स्वप्नतुल्यत्वादित्याह वितं व्यर्थ एवाभिनिवेशो, कोऽसौ यत् गुणेषु गुणकार्येषु सुखादि अर्थः वास्तव इति एषु यच्च "अपामसोमममृता अभूम अग-गोभिर्विहराम" इत्यादिकमित्यर्थः। यथा मनोरथः स्वप्न इति मनोरथोपनीतस्य धनपुत्रादिलाभानन्दस्य स्वप्ने स्त्रीसंभोगादिस्वरस्य च स्वर्गसुखस्य च तुल्यत्वादित्यर्थः। सर्वमैन्द्रियकम् इति यमाहुं जगदिदं मृषा मिथ्यैव ॥ ४८ ॥

श्रीमद्बलदेवकृतसिद्धान्तप्रदीपः।

तथा कर्तृत्वेऽपीश्वरस्य वैषम्यं बन्धनञ्च नास्तीत्याह—भूतानीति। निजयोनयः भूतोत्पत्तिहेतवः सत्त्वादयो मायागुणाः निमित्तैः कर्मभिर्भूतानि मनुष्यादीनि भवन्ति विनश्यन्ति गुण-निजशब्दवाच्यजीवयोनित्वमाह—अन्यतमः कर्मफलदातुरीश्वराद्भिन्नः कर्मकर्ता जीवः प्रकृतौ तस्यागुणैर्बध्यते तत्तत्कर्मफलभोगार्थं जन्ममरणप्रवाहलक्षणे संसारे पात्यते इत्यर्थः। प्रकृतौ देहरूपायां जीवकर्मफलादिदानाय स्थितोऽपि आत्मा गुणैर्न निबध्यते गुणानां तद्वश्यत्वात् तेषां च नियन्तृत्वात् ॥ ४

सर्वेषां भूतानामुत्पत्तिमरणे हि कं तत्तत्कर्मानुसारीश्वराधीनमतः शोको न कार्य इत्युक्तमधुना यश्च जन्ममरणे भवतः
[illegible]

अथ नित्यमनित्यं वा [illegible] द्विदः ।
नान्यथा शक्यते कर्तुं [illegible] मिति ॥ ४९ ॥
लुब्धको विपिने कश्चि[illegible] तोऽन्तकः ।
वितत्य जालं विदधे त[illegible] भयन् ॥ ५० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

देहमिति द्वाभ्याम् । इदं प्रसिद्धं पुरुषस्य शरीरं मोहजं मोहहे[illegible] तुभूतप्रकृतिगुणजं यथा गृहिणः पृथक् गृहं तथा शरी[illegible] रिणः पृथगेवेक्षते प्रतीयते गम्यते इत्यर्थः । यथोदकैर्जलबिन्दु[illegible] भिर्जातो विकृतः कार्यपदार्थः बुद्बुदादिः पार्थिवैर्मृत्पिण्डैर्जातो[illegible] घटादिः तैजसैरग्निकणैर्जातः प्रदीपादिः कालेन विनश्यति[illegible] तथा अयं देहः गुणैर्जातः कालेन विनश्यति न जीवः ॥ ४२ ॥

यथा दारुषु अनलोऽग्निः यथा च देहगतोऽनिलः प्राणवायु[illegible] पृथगेव स्थितो देहे यथा नभः सर्वगतं सर्वस्मिन् स्थितमपि न[illegible] सज्जते तथा पुमान् जीवः सर्वेषां गुणानां देहेन्द्रियादीनामा[illegible] श्रयो धारकस्तेभ्यः परः पृथगेव ॥ ४३ ॥

नन्विति विनर्के. हे मूढाः ! यूयं यमनुशोचथ स देहरूपः सु[illegible] यत्पदार्थोऽयं शेते यस्तु श्रोता योऽनुवक्ता श्रोतृत्वादिधर्मवान् [illegible] सुयज्ञशब्दार्थः इह अस्मिन्देहे [illegible] प न दृश्यते ॥ ४४ ॥

ननु, तर्हि प्राणादिरूप आत्मा [illegible] निवारयन् ज्ञानस्वरूपश्रोतृत्वादिधर्मकात्मतत्त्वप्रति[illegible] जडवर्गवि- लक्षणमात्मनो दर्शयति--न श्रोतेति [illegible]

विभुर्धर्मभूतज्ञानवत्त्वात् तथोक्तं [illegible] काशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री [illegible] प्रकाशयति भारत !" भूतेन्द्रियमनांसि लिङ्गानि [illegible] तान् देहान् भजति स्वीकरोति उत्सृजति च [illegible] आत्मा स्वकी- येन ज्ञानरूपेण तेभ्योऽन्यः ॥ ४६ ॥

ननु, देहाभिलक्षणस्यास्य [illegible] सुखदुःखयो- गादिकं कियत्कालपर्यन्तं भवि[illegible]—यावदिति । यावन्मायायोगः अनादिप्रकृति[illegible] आत्मा जीवात्मा लिङ्गान्वितः तावदेव बन्धनं [illegible] शुभं कर्म अनु- वर्तते ततः कर्मानुवृत्तेः तावदे[illegible] सुखं शुभकर्म फलम् विपर्ययः सुखानुभवः शुभकर्मफलम् अनुवर्तते ॥ ४७ ॥

तावदेव यथा मनोरथः अनीशस्य सोऽहमिति स्वप्नोऽमृग- स्य मृगोऽहमिति च सङ्कल्पो मृषा असत्यस्तथा वितथाभिनिवेशः देहे अहमित्यसदभिनिवेशः अनुवर्तते यत् यत एव गुणेषु गुण- परिणामभूतेषु दारापत्यादिषु अर्थदृष्टयः पुरुषार्थदृग्वचनं मम जीवनहेतव एते इत्येवंभूतं वाक्यं [illegible] अनुवर्तते । किञ्च यावन्मा- यायोगस्तावदेव सर्वमेतदयथार्थ [illegible] [illegible]

भाषाटीका ।

[illegible] प्राणी लोग भी अपने २ जन्म देने वाले भिन्न २ [illegible] प्रकार होते हैं समय पर सब ही नहीं होते । तहां [illegible] में स्थित होकर भी उसके गुणों से देह से अत्यंत [illegible] नहीं बंधता है ॥ ४१ ॥

[illegible] यह शरीर भी पृथिव्यादि से उत्पन्न गृहों के [illegible] पृथक् है ॥ जैसे जल पृथिवी तेज (सुवर्णादि) [illegible] दि होते हैं और काल पाकर नष्ट होजाते हैं [illegible] शरीर भी है ॥ ४२ ॥

[illegible] काष्ठ में भिन्न मालूम होती है । जैसे वायु देह [illegible] भी पृथक् रहता है ॥ और जैसे आकाश [illegible] होकर भी किसी में सक्त नहीं होता है ऐसे ही [illegible] रूप भी इन सब से भिन्न है ॥ ४३ ॥

[illegible] ओ ! जिसका तुम शोच करती हो वही यह [illegible] सुख सोरहा है । जो सुनने वाला और बोलने [illegible] कभी देखा ही न जासका फिर शोक कि- [illegible]

[illegible] में कोई सुनने वाला और न कोई बोलने वाला है, केवल एक इसमें मुख्य महा प्राण है, जो इन्द्रियोंके वासना का ज्ञाता आत्मा है वह इस शरीर से संबन्ध ही नहीं रखता है ॥ ४५ ॥

भूत इन्द्रिय मन लिंग और ऊंचे नीचे देहको धारण करता है और त्यागता है, तौ भी वह आत्मा अपने तेज से पृथक् प्रतीत होता है ॥ ४६ ॥

जब तक आत्माको लिंग शरीर का संबंध है तब ही तक कर्मकृत यह शरीर है और उसी में विपर्यय क्लेश और मृषा का संबन्ध भी लगा हुआ है ॥ ४७ ॥

जो कि गुणों में अर्थ की दृष्टि का वचन है यही मिथ्या अभिनिवेश है ॥ और जैसे मनोरथ तथा स्वप्न के पदार्थ अचिरथी है ऐसे ही सब इन्द्रियों के विषय भी अनित्य है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपसंहरति—अथेति । अथ तस्मात् नित्यमात्मानमनित्यं देहं तद्विदोनित्यमनित्यं च जानन्तो न शोचन्ति नन्वेवमुपदेशेऽपि

कुलिङ्गमिथुनं तत्र विचरत्समदृश्यत ।
तयोः कुलिङ्गी सहसा लुब्धकेन प्रलोभिता ॥ ५१ ॥
साऽसज्जत शिचस्तन्त्यां महिषी कालयन्त्रिता ।
कुलिङ्गस्तां तथापन्नां निरीक्ष्य भृशदुःखितः ।
स्नेहादकल्पः कृपणः कृपणां पर्यदेवयत् ॥ ५२ ॥
अहो अकरुणो देवः स्त्रियाऽऽकरुणया विभुः ।
कृपणं मानुशोचन्त्या दीनया किङ्करिष्यति ॥ ५३ ॥
कामं नयतु मां देवः किमर्द्धेनात्मनो हि मे ।
दीनेन जीवता दुःखमनेन विधुरायुषा ॥ ५४ ॥
कथं त्वजातपक्षांस्तान् मातृहीनान्बिभर्म्यहम् ।
मन्दभाग्याः प्रतीक्षन्ते नीडे मे मातरं प्रजाः ॥ ५५ ॥
एवं कुलिङ्गं विलपन्तमारात् प्रियावियोगातुरमश्रुकण्ठम् ।
स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो विलीनः ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शोचन्तो दृश्यन्ते तत्राह—नाग्यथेति । ज्ञानवाक्यैर्येषा-त्मभावो न निवर्तेत इत्यर्थः ॥ ४९ ॥

अथं सधर्मा अपीति यदुक्तं तत्रेतिहासमाह—लुब्धकस्त्वा-दिना । पक्षिणामन्तक ईश्वरेण निर्मितस्सन् यत्र यत्र ते तत्र तत्र तान् कणादिभिः प्रलोभयन् जालं विस्तार्य विशेषेण धृतवान् पाठान्तरे तेषामामिषादिभिः प्रलोभनं कृतवानि-त्यर्थः ॥ ५० ॥

कुलिङ्गः कन्दभक्षी पक्षिविशेषः कुलिङ्गयोर्मिथुनम् ॥५१॥

शिचस्तन्त्यां जालस्य सूत्रेऽसज्जत बन्धं प्राप तामापन्ना-मापद्ग्रस्ताम् दृष्ट्वा कुलिङ्गः पक्षी तां मोचयितुमकल्पस्सन् पर्यदेवयत्कृपणाम्भामाभिस्त्यविलापं चकार ॥ ५२ ॥

आकरुणया सर्वतोऽनुकम्प्या स्त्रिया किङ्करिष्यति ॥५३॥

आत्मनो देहस्यार्धेन अनेन विधुरायुषा भार्याशून्यजीवितेन दुःखं यथा भवत्येवञ्जीवता किं मे प्रयोजनम् अतो मामपि कामं नयत्वित्यन्वयः ॥ ५४ ॥

न जाताः पक्षा येषां तान्बालकान् कथं बिभर्मि पुष्णामि मन्दभाग्या मे प्रजा मातरं प्रतीक्षन्ते ॥ ५५ ॥

शाकुनिकः पक्षिहन्ता विलीनः सन् ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं देहात्मनोरुभयोरा[illegible]विषयत्वमुक्तं सहेतुकमुप-संहरति—अथेति । अथ हे [illegible]त्यमात्मानम् अनित्यं देहं

अत्यपि तद्विदः देहात्मयाथात्म्यविदो न शोचन्ति. कुतः इतिशब्दो-हेत्वर्थकः यस्मात्स्वभावः वस्तुनः स्वाभाविको धर्मः शोचतामपि शोचद्भिरन्यथा कर्तुं न शक्यते न ह्यात्मनः स्वाभावि नित्यत्वमपनीयानित्यत्वं केनचिच्छोकाद्युपायेनापादयितुं शक्यं वा देहस्यानित्यत्वमपनुद्य नित्यत्वम. न हि वह्नेरौष्ण्यापनयेन शैत्यमापादयितुं शक्यमिति . भावः ॥ ४९ ॥

यदुक्तं "अथं सधर्मा अपि शोचन्ति" इति तत्र दृष्टान्ततयेतिहासं प्रस्तौति—लुब्धक इति । कश्चिल्लुब्धको व्याधः पक्षिणामन्तकः मृत्युः निर्मित ईश्वरेण मृत्युत्वेन निर्मितिः अत एव स तत्र तत्र जालं वितत्य पक्षिणां प्रलोभनं वञ्चकं विदधे कृतवान् ॥ ५० ॥

एवं लुब्धके प्रवर्तयति सति तत्र समीपे कुलिङ्ग पक्षिणोर्मिथुनं द्वन्द्वं सञ्चरत् लुब्धकेनादृश्यत तयोः स्त्रीपुंस मध्ये कुलिङ्गी स्त्री सहसा वञ्चनोपायेन लुब्धकेन प्रलोभिता बभूव ॥ ५१ ॥

सा महिषी कुलिङ्गभार्या कालवशा सती शिचस्तन्त्यां जा सूत्रे असज्जता बद्धा बभूव अथ ततस्ताम् आपन्नाम् आपदं प्रा हीनां कर्मानुगुणेन कालेन यन्त्रितां शिचस्तन्त्यामासक्तां महिषीं भार्यां कुलिङ्गीं वीक्ष्य कुलिङ्गः पुमान् स्नेहाद्दुः दुःखितोऽकल्पो विमोचने अशक्तो अतएव केवलं स्वयमप्याशु दीनस्सन् कृपणां दीनं यथातथा पर्यदेवयत् परितस्त बभूव ॥ ५२ ॥

तदेवाह—अहो इति त्रिभिः अहो देवो विधाताऽकरुणो ध्रुवः, अकरुणत्वमेवाविष्करोति स्त्रिया आकरुणयेति [illegible] दयया सर्वतोऽनुकम्प्या स्त्रिया [illegible] भार्यया स्त्रियं [illegible]

[illegible] मां [illegible] न किमपि तस्य प्रयोजनम्. किन्तु [illegible] स्त्रियं नीतवान् इति भावः ॥ ५३ ॥

यतो [illegible] देवस्ततो मामपि कामं [illegible] नोऽर्थेन मम किं किं प्रयोजनम्. [illegible] प्रयोजनमस्तीत्यर्थः। [illegible] दीनेन कृपणेन दुःखं यथा भवति तथा जीवता [illegible] यता विधुरायुषा विधुरं भार्यारहितमायुर्यस्य [illegible] वितयुक्तेनेत्यर्थः। अनेनेति निस्पृहत्वमुक्तं [illegible] दिति भावः ॥ ५४ ॥

किञ्च अजातो पक्षो येषां तान् मात्रा हीनान् [illegible] कथमहं बिभर्मि पुष्णामि किञ्च मे मम प्रजाः [illegible] वन्ते ॥ ५५ ॥

एवं प्रियाया वियोगातुरं दुःखितम् [illegible] अश्रुकण्ठमश्रुपूर्णकण्ठं तं कुलिङ्गं स एव शाकुनिक [illegible] शाकुनिकः लुब्धकः आरात्समीपे निलीनो [illegible] कर्मानुगुणेन प्रहितः प्रेरितः शरेण विव्याध [illegible] ॥

श्रीमद्विजयध्वजतीर्थकृत[illegible]

यस्मात्सर्वस्येश्वराधीनत्वेन [illegible] परिहार्ये तस्मात्सर्वथा॰ देहेन्द्रियादेरनित्यत्वं [illegible] शोककरणं न पण्डितमतम् " [illegible] शोचन्ति पण्डिताः" इत्यादेरित्याह—अथेति, [illegible] ति सन्तोष्यं स्वभावत्वादित्याह—नान्यथेति [illegible]

अस्मिन्नेवार्थे कञ्चनेतिहासमा[illegible] ब्धको मृगयुर्निर्मितो विभिनेतिशेषः वितस्य [illegible] म ॥५०-५१॥

सिचा जालेन सह यन्त्रित[illegible] कुलिङ्गभार्या कालयन्त्रिता कालाधीना [illegible] मोचयितुमिति शेषः, पर्यदेवयद्विलपितवान् ॥ [illegible]

दुःखं जीवता दीनेन [illegible] किं प्रयोजनं न किमपि कुतो विधुरायुषा [illegible] महत्वात् ॥५४॥

मे प्रजाः पुत्राः ॥ ५५ ॥

शाकुनिकः पक्षिमारक [illegible] तः प्रेरितः निलीनो वृक्षमूले [illegible] कुलिङ्गं [illegible] दायकूटः कुलिङ्गो दीर्घतुण्डकः" इत्यभिधा[illegible]

श्रीमज्जीव[illegible]तत्त्वधर्मः।

[illegible] योरिति। हे [illegible]

[illegible] कृतसारार्थदर्शिनी।

[illegible] मीमांसकानां मते अनित्यं नश्वरं सत्यमिति साङ्ख्यानां [illegible], तदपि न वयं प्रबुध्यामहे इति तत्राह—नान्यथेति ॥४९॥

[illegible] भावत्वेऽप्यर्थे इत्यत्रेतिहासमाह—लुब्धक इत्यादिना। [illegible] ईश्वरेणेत्यर्थः। विदधे पक्षिणो विशेषेण दधार प्रलोभ[illegible] पादे आमिषादिभिस्तेषां प्रलोभनं कृतवानित्यर्थः ॥५०-५१॥

[illegible] बद्धतमयां जालस्य सूत्रे हे महिष्यः ॥ ५२ ॥

[illegible] विधाता करुणया मयि कृपावत्या ॥ ५३—५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

[illegible] नित्यानित्यविदः नित्यं क्षेत्रज्ञः अनित्यं देहादिकं [illegible] शोचतामतद्विदां स्वभावस्तु अन्यथा कर्तुं न [illegible]

[illegible] फलं नाम पयेत्याह—लुब्धक इत्यादिना। निर्मि[illegible] ईश्वरेणेति शेषः। जालं वितस्य तत्र प्रलोभन[illegible] ॥ ५० ॥ ५१ ॥

[illegible] ॥ ५२ ॥

[illegible] अनुशोचन्त्या स्त्रिया किं करिष्यति ॥५३॥

[illegible] यथेयं नयतु यतः आत्मनः देहस्य अर्द्धेन [illegible] पुरुषार्थेन भागेन मम [illegible] दीनेन दुःखं यथा भवति तथा जीवता [illegible] तेन ॥ ५४ ॥

[illegible] प्रतीक्षन्ते तान् कथं बिभर्मि पोष्यामि ५५॥

[illegible] सम् ॥ ५६ ॥

[illegible] टीका।

[illegible] वाले नित्य और अनित्य का शोक नहीं [illegible] वालों के स्वभाव भी अन्य था नहीं कियो [illegible]

([illegible]) परमेश्वर का निर्मित पक्षियों का वैरी [illegible] ल लगाकर जहां तहां लोभ देता थो [illegible]

इतने [illegible] पक्षियों का जोड़ा विचरता हुआ देखपड़ा [illegible] कुलिंगी को एक दम लुभालिया ॥ ५१ [illegible]

कालवि[illegible] उस जालमें फँस गई। उसको उस[illegible] कर कुलिङ्ग अतिदुःखित और [illegible] हीन कुलिङ्गी का बहुत [illegible]

एवं यूयमपश्यन्त्य आत्मापायमबुद्धयः ।
नैनं प्राप्स्यथ शोचन्त्यः पतिं वर्षशतैरपि ॥ ५७ ॥

हिरण्यकशिपुरुवाच ।

बाल एवं प्रवदति सर्वे विस्मितचेतसः ।
ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम् ॥ ५८ ॥
यम एतदुपाख्याय तत्रैवान्तरधीयत ।
ज्ञातयोऽपि सुयज्ञस्य चक्रुर्यत्साम्परायिकम् ॥ ५९ ॥
ततः शोचत मा यूयं परं चात्मानमेव च ।
क आत्मा कः परो वाऽत्र स्वीयः पारक्य एव वा ।
स्वपराभिनिवेशेन विना ज्ञानेन देहिनाम् ॥ ६० ॥

नारद उवाच ।

इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा ।
पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
सप्तमस्कन्धे युधिष्ठिरनारदसम्वादे दितिशोकापनयनंनाम
द्वितीयोऽध्यायः ॥ २ ॥

भाषाटीका।

और बोलाकि, अहो परमेश्वर तू बड़ा निर्दई है मुझ दीनको शोचनेवाली दयावाली उस बिचारी चीड़ी के साथ मेरा वियोग कराकर तू क्या करेगा ॥ ५३ ॥

भलेही ईश्वर मुझे लेजाय क्योंकि ? अपने अर्द्धशरीर से मेरा क्या प्रयोजनहै इस दीन बिचारी से बिना इस आयुसे दुःख पूर्वक जीकर भी क्या होगा ॥ ५४ ॥

अब कहो जिनके पङ्ख नहीं आये ऐसे बिना माताके उन छोटे २ बच्चोंका मैं कैसे पालन करूंगा अभ्रभागी मेरे बच्चे माकी वाट देखरहे हैं ॥ ५५ ॥

इस तरह प्रियाके वियोग से व्याकुल रोते हुए विलाप करने वाले उसी कुलिङ्ग को छिपे हुए उसी व्याधने बाणसे बधदिया ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मापायं आत्मनाशम् ॥ ५७ ॥
अयथोत्थितं मिथ्याविर्भूतम् ॥ ५८ ॥
साम्परायिकं परलोककृत्यम् ॥ ५९ ॥
अशोच्यत्वेतिपाठे अडागम आर्षः । कः पर स्वपराभिनिवेशं या ज्ञानं तेन विना ॥ ६० ॥
सस्नुषा स्नुषासहिता ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमितिहासं प्रस्तुत्य प्रकृतोपयोगित्वेनोपसंहरति-- एवमिति । एवं यथा कुलिङ्गस्तथा यूयमप्यात्मापायं अमृत्युम् अपश्यन्तः अनात्मोपायम्योऽत एव अबुद्धयः विवेकशून्याः वर्षशतैरपि शोचन्त एनं पतिं न प्राप्स्यथ ॥ ५७ ॥

एवं प्रेतबन्धुयमसम्वादरूपमितिहासं प्रस्तुत्योपसंहरति ... ब्राह्मणाविति द्वाभ्याम् । एवम् इत्थं बाले प्रवदति सति सर्वे ज्ञातयः सुयज्ञस्य सपिण्डाः विस्मितं चेतो येषां ते ... देहात्मेनाप्रतीतं किन्तु पुरुषार्थत्वेन विपरीत... देहादिकमनित्यमस्थिरमपुरुषार्थरूपं मेनिरे ... वन्त इत्यर्थः ॥ ५८ ॥

यमस्त्वेतदुक्तमुपाख्यानं कथयित्वा तत्रैव ... सुयज्ञस्य यत्कर्तव्यं सांपरायिकं मृतोद्देशेन ... चक्रुः ॥ ५९ ॥

एवमितिहासमुपसंहृत्य तत्फलितार्थ... तत इति । यतो देहात्मनोरेवं विलक्षणभावोऽतो ... परमन्यमात्मानं स्वं प्रति वा यूयं मा शोचत ... स गतस्तं विहायाहं कथं जीवामीत्येवं ... चतेत्यर्थः । स्वः पर इत्यभिनिवेशोऽभिमानो ... अज्ञानमूलकेन कर्मणा विना देहिनां कः परः ... स्वकीयः पारक्यो वा स्वपरविभागः ... सर्वोऽप्ययमविद्यामूलककर्माधीनदेहसम्बन्धप्र... युक्त औपाधिक आत्मनां तु केनापि प्रकारेण ... शोकहेतुर्न विद्यते अतो मा शोचतेत्यभिप्रायः ...

उपरितनं दैत्यस्य वृत्तान्तं वक्तुं तावद्धाक... ... स्थितिप्रकारमाह भगवान् नारदः-- इतीति । इति ... कशिपोर्वाक्यमाकर्ण्य स्नुषया पुत्रस्य भार्यया ... क्षणमात्रेण पुत्रशोकं त्यक्त्वा तत्त्वे देहात्म... यत् तत्त्वचिन्तनपरा बभूवेत्यर्थः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे ...
श्रीमद्वीरराघवाचार्यकृतभागवतच...
द्वितीयोऽध्यायः ॥ ...

श्रीमद्विजयध्वजतीर्थकृत... रत्नाव...

अनेन प्रकृते किमभूत्तत्राह-- एवमि... । आत्म... देहनाशं वा ॥ ५७ ॥

किं ज्ञातयो बालभाषितमिदं ... चक्रुरिति तत्राह ... यद्देहादिकं तत्सर्वमनित्यं मेनिरे ... आत्मत्वं ... जाग्रत्स्वप्नभ्रान्तिं मेनिरे "अहं मम ... इति स्मृतेः । नन्वेवं तर्हि महदादि... तत्त्वमायातं तयोरपि सर्वान्तर्गत... तथा हि, यन्महदादि तत्सर्वं ... यथार्थ...

... नित्यत्वं भगवत्समन्तरेण यथाऽस्वातन्त्र्येण स्थितत्वञ्च तदुक्तं ...--

" महदादिद्वयोरेवं च नित्या चापि यथोचिता ।
अस्वतन्त्रैव प्रकृतिः स्वतन्त्रो नित्य एव च ॥
यथार्थभूतश्च पर एक एव जनार्दनः" ॥ इति.

अतो महदादेरप्यनित्यत्वादिकं नास्तीति किमु हरेरिति केशवाद्यो दर्शितः ॥ ५८ ॥

... साम्परायिकं मृतविषयम् ॥ ५९ ॥

... आत्मपरामुद्दिश्य किमिति शोको न कार्य इति तत्राह-- ... मेति । देहादिकमप्यपेक्ष्यात्मपराभाविन्त्येवं तथा हि, आत्म-... स्वातन्त्र्येण नित्यत्वादिहानिर्भौतिकत्वेन नश्वरत्वादिकं शब्द-... परमेव, नरयनिर्वचनीयः । तद्वाहं पर इति व्यवहारस्य किं ... मूल... मिति तत्राह-- स्वपरेति, स्वः परः इति दुराग्रहवत्त्वमज्ञान-... ... न किमपि कार्यं तस्मादात्मनो बुद्धिः श्रीवासुदेवे ... मनोरतिरज्ञाननाशश्चतनाशश्चावाह्नीयो पुरुषयोग्येति निश्चे-... तदुक्तम्--

"न हि देहादिरात्मास्यात्र च शत्रुरहाहृतः ।
अतो दैहिकवृद्धौ वा क्षये वा किं प्रयोजनम् ॥
यस्तु देहगतो जीवः स हि नाशं न गच्छति ।
अतः शत्रुविवृद्धौ वा स्वनाशे शोचनं कुतः ॥
देहादिव्यतिरिक्तो तु जीवेशो प्रति जानताम् ।
अत आत्मविवृद्धिस्तु वासुदेवे रतिः स्थिरा ॥
शत्रुनाशस्तथाऽज्ञाननाशो नान्यः कथञ्चन " ॥

इत्यनेन तात्पर्यमवगन्तव्यमिति सिद्धम् ॥ ६० ॥

... समासाविति शब्दः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्... स्वामिकृतक्रमसन्दर्भः ।
... महापुराणे सप्तमस्कन्धीयस्य
... स्वामिकृतक्रमसन्दर्भस्य
... ध्यायः ॥ २ ॥

श्रीमद्... चक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मापायं ... म्रियमाणं ... ॥ ५७ ॥
सर्वं जगदनित्यं ... यथोचितं येन प्रकारेणोचितं तथा ... तिष्ठतीत्यर्थः ॥ ५८-५९ ॥
स्वश्च पर इत्यभि... बिना ॥ ६०-६१ ॥
इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमस्य द्वितीयोऽयं सङ्गतः सताम् ॥ २ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

आत्मनोऽपायं नाशमपश्यन्त्यः वर्षशतैरपि पति ...
एवं बाले प्रवदति अवधारितम् अमृतेपि आत्म... ...
दृष्टेनोत्पन्नं सर्वं शोकादिकम्, अनित्यं विवेकवा...
प्रकारेण बाले प्रवदति सति अयथेऽवस्थितमात्म...
देहेन्द्रियादिकमनित्यं मेनिरे नत्वात्मानमित्यर्थः ...

साम्परायिकं पारलौकिकं यत् तत्कुः ...

आत्मानं नित्यत्वात् परं देहादिकमनित्य...
"अथ नित्यमनित्यं वा नैव शोचन्ति तद्विदः" इत्...

तत्रे "स रक्षिता रक्षति योहि गर्भे। वह...
मव्ययः" इत्यादिना यमेनोपदिष्टे ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्...
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे...
द्वितीयाध्यायार्थप्रकाशः ॥ २ ...

भाषा टीका ।

हे निर्बुद्धियो ! इसी तरह तुमसब ...
देखकर इसका शोच करतेर सैकड़ों वर्ष...
प्राप्त न होवेगी ॥ ५७ ॥

हिरण्य कशिपु उवाच ।

... कशिपु बोला कि, उस बालक के ऐसे बोलने से
... ... बड़े विस्मित चित्त वाले होकर सब संसार
... ... हुए ॥ ५८ ॥

... भी इतना कहकर वहीं अन्तर्धान होगये और
... ... पुरुष का जो मृतक का ... है उसे
... ॥ ५९ ॥

... तुम भी सब दूसरे का और अपना भी कुछ
... करो, इस संसार में कौन अपना और पराया
... ... और दूसरा कौन है ॥ ६० ॥

... ज्ञान के बिना यह सब अपना और पराया
... नारद उवाच ॥ नारद जी बोले, कि--इस प्रकार
... ... सुन कर बधू सहित दिति ने
... ... में त्याग कर तत्व में चित्त ल-
...

...भागवत महापुराण सप्तस्कन्ध
... अध्याय की भाषाटीका
समाप्त ॥ २ ॥

इति श्रीम... ... ...स्कन्धे द्वि... ॥

॥ तृतीयो[illegible]ध्यायः ॥

नारद उवाच ॥

हिरण्यकशिपूराजन[illegible]
आत्मानमप्रतिद्वन्द्व[illegible] ॥ १ ॥
स तेपे मन्दरद्रोण्यां [illegible] ।
ऊर्ध्वबाहुर्नभोदृष्टिः पा[illegible] ॥ २ ॥
जटादीधितिभी रेजे सम्[illegible] ।
तस्मिंस्तपस्तप्यमाने दे[illegible]जिरे ॥ ३ ॥
तस्य मूर्ध्नः समुद्भूतः [illegible]यः ।
तिर्यगूर्ध्वमधोलोकानतप[illegible] ॥
चुक्षुभुर्नद्युदन्वन्तः सद्वीपा[illegible]
निपेतुः सग्रहास्तारा जज्व[illegible] ॥ ५ ॥
तेन तप्ता दिवं त्यक्त्वा ब्रह[illegible] ।
धात्रे विज्ञापयामासुर्देवदेव [illegible]
दैत्येन्द्रतपसा तप्ता दिवि स्थ[illegible]
तस्य चोपशमं भूमन् विधेहि[illegible]
लोका न यावन्नङ्क्ष्यन्ति बलि[illegible] ॥ ७ ॥
तस्यायं किल सङ्कल्पश्चरतो दु[illegible]
भवतां किन्न विदितस्तवाथापि [illegible]

श्रीधरस्वामिकृतभावार्थदीपिका ।

तृतीये तस्य तपसा तप्तं वीक्ष्य जगद्विधिः ।
आगत्य विस्मितस्तस्मै ददौ स वरानदात् ॥

तदेवं साधूनां कदने दानवप्रवृत्तिं प्रपञ्च्य लोकं तस्य- [illegible]रूपक्षेमापमीव यत्कृतवांस्तच्च हिरण्यकशिपुरित्यादिना । प्रतिद्वन्द्वं प्रतिपक्ष[illegible] कर्तुं-

[illegible]

ऊर्ध्वो [illegible] दृष्टिर्यस्य पादाङ्गुष्ठेनाश्रिताऽवनि-र्येन ॥ २ ॥
जटानां [illegible]भिः अंशुभीरश्मिभिः प्रलय-कालीनः अर्क इव [illegible]ताः सन्तो भुवि विचेरुस्ते देवाः पुनः [illegible] ॥ ३ ॥
विस्वगादि[illegible] ॥ ४ ॥
द्वीपैरद्रिभि[illegible] ॥ ५ ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तव बलिहाराः करप्रदाः पूजाकारिणः इति वा ... त्वमिभूः हे सर्वाधिपते ! पाठान्तरे भो इति सम्बोधनम् ... यन्न नंक्ष्यन्तीति सम्बन्धः ॥ ७ ॥

ब्रह्मणस्तमिमन्द्वेषमुत्पादयितुं तत्सङ्कल्पमाहुः-तस्येति ... तस्य सङ्कल्पस्तव किं न विदितोऽथाऽप्यस्माभिर्निवेदि... भूयताम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तत्त्वोपदेशेन दित्यादीनां शोकं परिहृतवतो दैत्य... तनं वृत्तान्तमाह भगवान्नारदः-हिरण्यकशिपुरित्यादिना । हे युधिष्ठिर ! हिरण्यकशिपुरात्मानं त्वधिस्सत विश्वानुवेषक... स्थूनम् अजेयमितरैर्जेतुमशक्यम् जरामरणरहितम् अप्रतिद्व... तिपक्षरहितम् एकराजम् एकः स्वयमेव राजा इत्येकराजस्त... भूतमात्मानं साधयितुमैच्छदित्यर्थः । येन साधनेन स्वयमु... श्रोभवेत्तादृशं साधनं कर्तुमैच्छदिति यावत् ॥ १ ॥

तत्साधनानुष्ठानप्रकारमेव प्रपञ्चयति-स इति । सः ... मन्दरगिरेर्द्रोण्यामत्युग्रं तपस्तेपे कृतवान् कथंभूतस्सन् ऊर्ध्वबाहु... नभसि दृष्टिर्यस्य पादाङ्गुष्ठेनाश्रिताऽवनिर्भूमिर्येन ॥ २ ॥

एवं तपः कुर्वन् दैत्यो जटानां दीधितिभिः कान्तिभिः ... रश्मिभिः सांवर्तकः प्रलयकालिकः सूर्य इव रेजे राज... तस्मिन् दैत्ये एवं तपः कुर्वति सति ये देवाः पूर्वं दैत्यैर्विता... डसन्तो भुवि चेरुस्ते स्थानानि स्वस्थानानि भेजिरे प्राप्... प्रतिपक्षस्यासुरस्य तपःस्थितत्वादुपद्रवाभावात् स्वस्थानानि भेजिरे इति भावः । तस्य दैत्यस्य मूर्ध्नः सकाशात्समुद्भूत... न्तस्तत्तपोमयः तपस आगतस्तपोमयः तत आगत इत्यर्थे मयट्" इति मयट्, तपःकार्यं भूतमित्यर्थः । धूमेन सहितोऽग्निः ... गूर्ध्वमधश्च सर्वतो लोकानतपत् ततापि ॥ ३ ॥ ४ ॥

नद्यः उदन्वन्तः समुद्राश्च चुक्षुभुः ... भूः भूमिः चचाल ग्रहैः सहितास्तारा निपेतुः ... दिशो जज्वलुश्च ॥ ५ ॥

तेन तपोग्निना तप्ता देवा दिवं ... सत्यलोकं ययुः तत्र ब्रह्मणे विज्ञापयामासुश्च. विज्ञापनमेवाह-हे देवदेव देवानामिन्द्रादीनामपि देव, हे जगत्पते, दैत्येन्द्रस्य तपसा तप्ताः वयं दिवि द्युलोके स्थातुं न शक्नुमः ॥ ६ ॥

हे भूमन्, यदि त्वं लोकानां क्षेमं ... मन्यसे तर्हि हे अभिभो सर्वाभिभवक्षम ! तव बलिहाराः हविष्प्रदाः पूजाकारिणो वा सर्वे लोकाः यावन्न नङ्क्ष्यन्ति ... तावदेव ततःपूर्वमेव तस्य दैत्येन्द्रस्य तपोऽग्निशमनं वरप्रदानरूपोपायेन विधेहि कुरु ॥ ७ ॥

दैत्यस्य गूढाभिसन्धिं ... ब्रह्मणस्तं प्रति द्वेषमुत्पादयितुं विज्ञापयन्त आहुः-तस्येति । दुश्चरमतिदुःसहमात्मनो... कुर्वतः ...

...तस्य दैत्यस्यायं किल सङ्कल्पः यद्यपि सर्वज्ञस्य तवाविदितं किमु, किमपि नास्ति. तथाप्यस्माभिर्निवेदितं श्रूयतां त्व... ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

...संख्यया तत्कालेनानेकसंभारैरार्जितैरयोग्यं दुष्प्रापं ...अनेकविधिसाधनैः सुसाध्यं तुष्णीं भावेनेत्यादिकं हिर...कशिपुतपश्चरणकथनव्याजेनाभिप्रेयतेऽस्मिन्नध्याये त्वधिस्सत ... ॥ १-२ ॥

...कः प्रलयसूर्यैः स्थानानि गमनवर्जनानीतस्ततो यान्ति ...स्थानानि भेजुः ॥ ३—६ ॥

...बलिहारा उपहारार्थकाः ॥ ७—८ ॥

श्रीजीवगोस्वामिकृतक्रमसन्दर्भः ।

...चक्रवर्तिकृतसारार्थदर्शिनी ।

...दृष्ट्वा देवान् सुखितदुःखितान् ।
...आधातात् स्तुतात् प्राप वरात् वरान् ॥

आत्मा... इत्येकराट् तं वक्ष्यमाणाभिप्रायो ब्रह्म... प्रतिपक्षं कामयमानोऽभूदित्यर्थः ॥ १ ॥ ...

... ॥ २ ॥

...तस्य शान्त्रयमनावश्येत्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ ...

अभि... सर्वाधिपते ! सविसर्गपाठे भो इ... सम्बोधनं ... ॥

...सिद्धान्तप्रदीपः ।

हिरण्यक... तस्मै वरानदादितिव... यति तृतीये... नामजेयत्वादिगुणकं न... प्रतिद्वन्द्वः प्रति... एक एव राजते इत्येक... तं अधिस्सत ...

ऊर्ध्वौ बाहू ... पादाङ्गुष्ठेनाश्रिताऽव... येन स तादृशं ...

सांवर्तकः प्र... दीधितिभिः रश्मि... रेजे रराज पूर्वं ...ष्टास्ते देवाः ... अचक्रुरात् भेजि...

सृष्ट्वा चराचरमिदं तपोयोगसमाधिना ।
अध्यास्ते सर्वधिष्ण्येभ्यः परमे निजासनम् ॥ ९ ॥
तदहं वर्द्धमानेन तपोयोगसमाधिना ।
कालात्मनोश्च नित्यत्वात्साधये तथात्मनः ॥ १० ॥
अन्यथेदं विधास्येऽहमयथा पूर्वमोजसा ।
किमन्यैः काल[illegible] ध्रुवाद्यैर्वा [illegible]वादिभिः ॥ ११ ॥
इति शुश्रुम निर्[illegible] [illegible]यितः ।
विधत्स्वानन्तरं [illegible] [illegible]स्कर ! ॥ १२ ॥
तवासनं द्विजगवां [illegible] [illegible] ! ।
भवाय श्रेयसे भूत्यै [illegible] च ॥ १३ ॥
इति विज्ञापितो देवै[illegible] ! ।
परीतो भृगुदक्षाद्यैर्ययौ [illegible] ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्वगीरितः सर्वतः प्रसृतः तिर्यक् [illegible]लोकानतपत् [illegible] तताप ॥ ४ ॥

नद्यश्चोदन्वन्तश्च नद्युदन्वन्तः चुक्षुभुः द्वीपाद्रिभिश्च सहिता भूश्चचाल ग्रहैः सह ताराः निपेतुः ॥ ५ ॥

तेन तन्मूर्द्धसमुद्भूतेनाग्निना ॥ ६ ॥

अभितोभवतीत्यभिभूस्तत्सम्बोधने हे अभिभो ! सर्वाधिपते ! यावत्तव बलिहाराः पूजाकारिणः न नक्ष्यन्ति ततःप्रागेव तस्योपशमं विधेहि कुरु ॥ ७ ॥

दुश्चरं तपश्चरतस्तस्याऽयं वक्ष्यमाणः संकल्पः यद्यपि तव किं न विदितं सर्वं विदितमेव. अथाप्यस्माभिर्निवेदितं त्वया श्रूयताम् ॥ ८ ॥

भाषा टीका ।

नारदउवाच ।

श्रीनारदजी बोले, कि–हे राजन्! हिरण्यकशिपुने अपने को अजेय अजर अमर और अप्रति[illegible] एक राजा कर लिया ॥१॥
क्योंकि ? उसने मंदरपर्वत [illegible] गुफा में ऊंचे को बाहु उठाकर आकाश में दृष्टि लगा[illegible] पैरके अंगुष्ठ मात्र से पृथ्वी [illegible]

[illegible] तप करने लगा तब देवता लोग फिर [illegible] पहुंच गये जो कि पहिले पृथ्वी पर [illegible]

[illegible] निकला हुआ धुआं सहित तपो मय अग्नि [illegible] तरफ के लोकों को तपाता हुआ ॥ ४ ॥

[illegible] नदी और समुद्र क्षुभित होगये द्वीपों सहित पृथ्वी [illegible] आकाश से ग्रहों सहित तारे टूट २ कर नीचे [illegible] लगे और दशों दिशा भी जलने लगी ॥ ५ ॥

[illegible] देवता स्वर्ग को छोड़कर ब्रह्म लोक पहुं[illegible] विज्ञापन करने लगे कि हे देव देव ! हे [illegible] के तप से तपे हुए हम लोग स्वर्ग में र[illegible] [illegible] यदि आप विचारो तो उसकी शांति करो. [illegible] आपके भेट देने वाले लोक न नष्ट होजा[illegible] ॥ ६—७ ॥

घो[illegible] [illegible]रणयकश्यप का ऐसा संकल्प है । [illegible] [illegible]दित है ? तो भी निवेदन सुनीहये ॥ ८ ॥

श्री[illegible]वार्थदीपिका ।

तपोयोग[illegible] सर्वधिष्ण्येभ्यः श्रेष्ठं निजासनं सत्यलो[illegible] [illegible]ति ॥ ९ ॥

[illegible] ब्रह्मणातिदीर्घायुषा तप [illegible]हुः–कालात्मनोरिति ।

न ददर्श [illegible]कतृणकीचकैः ।
पिपीलिका[illegible]मांसशोणितम् ॥ १५ ॥
तपन्तं तप[illegible]पिहितं रविम् ।
विलक्ष्य वि[illegible] हंसवाहनः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यप्यायुषोऽल्पत्वेन देहो वारंवारं म्रियेत तथापि [illegible] त्मनश्च नित्यत्वाद्बहुभिर्जन्मभिस्तपस्तप्त्वा तत्पदं स[illegible] ष्येति ॥ १० ॥

वर्धमानेनेति यदुक्तं तदभिप्रायमाह—अन्यथेति । [illegible] सुरासुरादिरूपत्ययेन यथापूर्वं पुण्यपापादिव्यत्ययेन [illegible] क्षिप्ताऽस्यामि अन्यैर्वैष्णवादिभिर्ध्रुवादिपदैः किं प्रयोजनम[illegible] साधयिष्यामि ॥ ११ ॥

इति स्वस्पदापहरणे तस्य निर्बन्धं शुश्रुम: अत एवासौ [illegible] परममास्थितो वर्तते यदत्रयुक्तं तदनन्तरमेव विधत्स्व ॥ १२

अन्यथा तव स्थानभ्रंशे सति साधूनामनिष्टं स्यादिति [illegible]न्त आहुः—तव पारमेष्ठ्यमिदमासनम् द्विजानां गवाञ्च भवो- द्भवाय श्रेयसे सुखाय भूत्यै ऐश्वर्याय क्षेमाय लब्धपालनाय विजयायोत्कर्षाय ॥ १३ ॥ १४ ॥

वल्मीकादिभिः प्रतिच्छन्नं प्रथमं न ददर्श पश्चात्तं वि- विलक्ष्य तं प्राहेति द्वयोरन्वयः । पिपीलिकाभिराचीर्णं समाक्र- न्तं मेदश्च त्वक्च मांसं च शोणितं च यस्य ॥ १५

अभ्रैरापिहितं छन्नं रविमिव विलक्ष्य विस्मित आह ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कोऽसौ संकल्पस्तत्राहुः—सृष्ट्वेति । सर्वेभ्य[illegible]यः इन्द्रादि- स्थानेभ्यः परमे स्थाने तिष्ठतीति परमेष्ठी ब्रह्मा तपो[illegible] यः समाधि- र्निष्ठा तेन चराचरात्मकमिदं सर्वं जगत्सृष्ट्वा [illegible]जासनं सर्वो- त्कृष्टं सत्यलोकमध्यास्ते ॥ ६ ॥

तदेवासनमहमात्मनो मम वर्धमानेन तपोयोगसमाधिना साधयिष्ये इति. ननु, ब्रह्मणा दीर्घायुषा त[illegible]प्त्वा तत्साधितम्. अन्यः कथं तत्साधयेत् ? तत्राहुः-कालात्मन[illegible] नित्यत्वादिति । यद्य- प्यायुरल्पं तथापि कालस्यात्मनश्च नित्य[illegible]द्बहुभिर्जन्मभिः साध- यिष्ये इत्यभिसन्धिरित्यर्थः ॥ १० ॥

अभिसन्ध्यन्तरमाहुः-अन्यथेति । [illegible]मिदं जगदन्यथा अधरोत्तरमयथापूर्वं देवासुरादिव्यत्ययञ्च करिष्ये कल्पान्तैः कल्पावधिभिरत एव कालेन नि[illegible]विनाशवैर्वैष्णवादिभिः पदैः वैकुण्ठादिभिः किं प्रयोजनं न किमपीत्यर्थः । अनेन "सर्वार्थान्वि- परीतांश्च बुद्धिः सा पार्थ तामसी" [illegible]त्युक्तवान्. [illegible] [illegible]

[illegible]त्वं सत्यादिलोकानां स्थिरत्वञ्चाभिसंहितवतो दैत्यस्य [illegible]बुद्धिमत्त्वमावेदितम् ॥ ११ ॥

[illegible]वत्पदापहरणे तस्य निर्बन्धमभिसन्धिरूपं शुश्रुमः [illegible]मं तप आस्थितः अतो हे त्रिभुवनेश्वर ! अत्र कर्तु [illegible]रमाश्रेव स्वयमेव विधत्स्व कुरु ॥ १२ ॥

[illegible] । तवेदं पारमेष्ठ्यं सर्वोत्कृष्टमासनं स्थानं द्विजानां [illegible] तव स्थानभ्रंशे द्विजानां गवाञ्च न भवा- [illegible]वः । तत्र, भवः अवाऽप्यवाप्तः क्षेमो लब्धपालनं [illegible]र्थः भूतिरैश्वर्यं विजयः उत्कर्षः ॥ १३ ॥

[illegible]पितो भगवानात्मभूः परमात्मनो जातो ब्रह्म [illegible]दैत्येश्वरस्याश्रमंप्रति ययौ ॥ १४ ॥

[illegible]वल्मीकैस्तृणैः कीचकैर्वेणुभिश्च प्रतिच्छन्नं तं [illegible] ब्रह्मा न ददर्श ततश्च पश्चात्कथञ्चिद्- [illegible]स्तं प्राहेति द्वयोरन्वयः । 'कथंभूतं वि- [illegible]र्णांमासमन्ताद्भक्षितं मेदश्च त्वक्च मांसञ्च [illegible] ॥

[illegible]लोकांस्तपन्तं कमिव विलक्ष्याभ्रैः पिहि- छ[illegible] ॥ १६ ॥

[illegible]जतीर्थकृतपदरत्नावली ।

[illegible]ष्टेति । ब्रह्मा तपोज्ञानादिनेदं चराच सृष्ट्वा स[illegible]भ्यः परं यत्निजासनमध्यास्ते "अ शीकृत्य[illegible] द्वितीया. अहं तदात्मनः सा धयिष्ये इत्य[illegible]त्राह—कालात्मनोरिति । कालस्य त्मनश्चेतनस्य[illegible]अविनाशात् अन्यस्य तत्साध्य हिरण्यका[illegible]तं यतो ब्रह्माणामेकमन्तरेण त्मयोग्याज्ञानै[illegible]मोहिताः आनन्तोऽपि स्वास कर्माचरन्तो [illegible]

"जा[illegible]त्मसदृशं सदा ।
तत्रात्म[illegible] विमोहिताः ॥
जानन्तो[illegible]युञ्जते विभुम् ।
चतुरा[illegible]कुर्योत्कथञ्चन" ॥ इति

नचैतत्पदमादिसः[illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सम्भारविक्षेपशतैर्बहुकोटिभिरेव च ।
न शक्यते समारोढुं ह्यात्माऽयोग्यपदं स्थितिं" ॥

तस्माद्योग्यमेवानुष्ठेयं नायोग्यमिति सिद्धम्. एवं तर्हि येऽतर्हि किमर्थं तपसां दर्विघ्नं कुर्वन्तीति चेन्न. तपस्विनां निष्कल[illegible] रिहारार्थत्वात्—

"तपाऽऽचाचरतां कुर्युर्दैत्यानां सुरनायकाः ।
विघ्नं तु तपस्विनां वैपर्यस्यापनुत्तये" ॥

इति वचनात् ॥ ९—१० ॥

वैष्णवो ब्रह्मादिः कर्ता येषां ते तथा तैर्ब्रह्मनिर्मितैरित्यर्थः [illegible] "ब्रह्मा स्वयम्भूर्द्रुहिणो वैष्णवः शतधृत्तथा" इत्यभिधानात्. अथापि साक्षाद्विष्णोः पदमत्राच्यते इति किं न स्यात्तत्राह—वचनि-र्दूरैरिति । तर्हि कियन्तं कालं स्थेयैरिति तत्राह, कल्पान्तैरिति । मन्वन्तरादिकल्पावसानिकैः "न यत्र माया न रजस्तमश्च" इत्यादिना विष्णोः पदस्य धामत्वयोक्तेः ॥ ११ ॥

निर्बन्धमसद्ग्रहम् ॥ १२ ॥

ननु, हिरण्यकशिपोरन्येषां पदानि विहाय तव [illegible]काङ्क्षायां को विशेषहेतुरत्राह—तवेति । तवात्मनं सकल[illegible]नि निरस्य स्थातुं योग्यं पदं पारमेष्ठ्यं अत्यन्तसुखकारक[illegible]त्मा[illegible]ज्ञानां भवाय ज्ञानादिगुणसमृद्ध्यै भूत्यै सम्[illegible]व पुनर्ह्रासराहि-त्याय श्रेयसे संसारान्मुक्तये क्षेमाय रक्षायै विजयायेन्द्रियज-याय च भवति तस्मादस्युत्तमपदत्वाद्धिरण्यकशिपुरभीकृतवान्. तदुक्तम्—

"भवाय श्रेयसे चैव न कश्चित्तत्प्रयत्नते ।
मधुकैटभयोश्चैव हिरण्यादेस्तथैव च ॥
नान्यो ब्रह्मपदं वाञ्छत्यृजूनयोग्यान्विना कश्चित् ।
ततः श्रेयांसि वाञ्छन्ति न तु तत्समाप्तये ॥ इति.

भवो वृद्धिः समुद्दिष्टा श्रेयो मोक्ष [illegible]हृतः ।
वृद्धस्य न पुनर्ह्रासो भूतिरित्येव कथ्यते ॥ इति शब्दनिर्णये.

[illegible]दिव स्थातुं न शक्नुमः [illegible] हिरण्यकशिपुना ब्रह्मपदावाप्त्यै सकामं तपसि [illegible]मिति ज्ञायते. यः सकामं तप आचरति तस्य तपसा [illegible] लोके स्थितिर्न घटते [illegible]न्तसकटाद्यान्तास्थितिवद्यस्तु निष्कामं [illegible]ः करोति तेन सुखावाप्तिः स्यात्. तदुक्तम् "सकामन्तु तपः कूरं [illegible]कानां क्षोभकृद्भवेत्। इतर-श्चान्तये सर्वलोकानां भवति ध्रुवम्" इति. "ब्रह्माख्यामभजद् ब्रह्म-पदार्थे स हिरण्यकः" इति च ॥ १३—१४ ॥

कीचकैरभिखोत्पन्नत्वेन [illegible]: पिपीलिकाभिर्व्याप्तत्वात् [illegible]रीरावयवैर्मेदसा कचिद्[illegible]शोषितेन च युक्तम् १५

तपस्यसित्यनेनापि तपसः कूरत्वम्—भाला वितनं महो दैत्या-नामयोग्ये वस्तुनि प्रयत्नातिशय [illegible] हसन् मन्दस्मितं कुर्वन् हंसवाहनो · ब्रह्मा "[illegible]कौ" मयिदतेहंसवाहनो" इत्यभिधानम् ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

[illegible]सुरस्य यथा ॥ ११—१९ ॥

[illegible]श्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

[illegible]भिर्वादितं श्रूयतां सर्वभिष्णोऽपः श्रेष्ठम् ॥ ९ ॥

[illegible] : सांप्रतिकादपि परमेष्ठिनो मम प्रभावो-[illegible] भावः । ननु, ब्रह्मणा अतिदीर्घायुषा तप-[illegible] स्वमेतावदायुष्कं कथन्तत्साधयिष्यसीति [illegible] पायुर्योऽल्पत्वे गर्हीयस्पूर्वं देहो वा नाऽस्मारं [illegible]त्मनश्च नित्यत्वाद् युगुभिर्जन्मभिस्तपस्तप्त्वा [illegible]नं साधयिष्याम्येवेति ॥ १० ॥

[illegible]यथा विधाऽस्वे इति ये ब्रह्मचर्यतपोव्र-[illegible]लनस्ते परलोकेऽपि नरकभाजो दुःखिनः [illegible] लौके [illegible]यिकसुखभोगमात्रनिरतास्त एव परलोके-[illegible]न्मुख्यमेव पुण्यमिष्टसाधनं च तत्सं-[illegible]नमित्यादिकं प्रवर्तनीयम् । नन्वेवं पूर्व-[illegible] तत्राह—अयथापूर्वमपि ओजसा स्वतेजसा [illegible]बाधविषिनं पारमेष्ठ्यासनमेव किं सर्वाध-[illegible]—किमर्थैरिति । वैष्णानाविभिर्भुङ्गादिपदैः [illegible] ध्रुवपदस्यानित्यत्वमननमसुरस्वभाव-[illegible]

[illegible] निर्बन्धं शुश्रुम अत एवायं तपः पर[illegible]

[illegible] भवाय कीदृशाय श्रेयसे वस्तमस्पृष्य-[illegible]ति तदा विरुद्धं स्रक्ष्यतीति भावः भूत्यै [illegible]स्परार्थं तदधिकारे स्वधर्मैर्विपर्ययभा-[illegible] क्षामाय विजयाय उत्कर्षाय तदधिकारे तु [illegible] भाविनायिति भावः ॥ १३ ॥

[illegible] वरदानैस्तत्तपसो निवर्तयामास्या-शयेन [illegible]

प्रथ[illegible] प्रतिच्छन्नं तं न ददर्श ततः कथं चित्तं विवक्ष[illegible] [illegible]वीर्यं समन्ताज्ज्वलितं मेघाच्छादितं रविमिव [illegible]

[illegible]सिद्धान्तप्रदीपः ।

यथा [illegible] [illegible]न्यवो: समाधिना सम्पादनेन परमेष्ठी ब्रह्म[illegible]ति शेषः । निजासनं सत्यलोकम् अध्यास्ते ति[illegible]

[illegible]नेन ततोऽप्यधिकेन तत्परमे·

[illegible]टीका [illegible] ।

उत्तिष्ठोत्ति [illegible]ऽसि काश्यप ! ।
वरदोऽहमनु[illegible]मभीप्सितो वरः ॥ १७ ॥
अद्राक्षमहमेतं [illegible]महद्भुतम् ।
दंशभक्षितदेहस्य [illegible]षु शेरते ॥ १८ ॥
नैतत्पूर्वर्षयश्चक्रु[illegible]रे ।
निरम्बुर्धारयेत्प्रा[illegible]ाः शतम् ॥ १९ ॥
व्यवसायेन तेऽनेन [illegible]नाम् ।
तपोनिष्ठेन भवता [illegible]न ! ॥ २० ॥
ततस्त आशिषः [illegible]न ! ।
मर्त्यस्य ते अमर्त्य[illegible]म ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

छ्यामनमात्मनः साधयिष्ये । ननु, तच्छ्रवायुर्नास्तीत्यत [illegible]— कालात्मनोर्नित्यत्वादिति ॥ १० ॥

महीमिदं विश्वमन्यथा परमेष्ठिन्[illegible]नामकाराद्न्यप्रकारे[illegible] यथापूर्वं परमेष्ठिर्निर्मितात्क्रपरीतम [illegible]जसा [illegible]तेजसा [illegible]ाद्ये कल्पान्ते कालनिर्धूतैर्वैष्णावादिभिलो[illegible]कैः किं प्रयोजनम् [illegible]निर्धू-तेषु वैष्णावस्यापि लोकस्य गमना[illegible] तामसीबुद्धियोगात् 'अधर्मं-धर्ममिति या मन्यते तमसावृता [illegible] सर्वार्थान्विपरीतां बुद्धिः सा पार्थ तामसी" इति श्रीमुखवच[illegible]नात् ॥ ११ ॥

इति त्वत्पदापहरणे तस्य निर्बन्धं सङ्कल्पं शुश्रु[illegible] अत एव परमं तप आस्थितः यदत्र[illegible]युक्तं तदनन्तरमेव विधत्स्व कुरु ॥ १२—१३—१४ ॥

वल्मीकादिभिः प्रतिच्छन्नम् पिपीलिकादिभि[illegible] चीर्णां सर्वतो भक्षितं मेदश्च त्वक्च मांसश्च शोणितञ्च [illegible] तं प्रथमं न ददर्श ॥ १५ ॥

पश्चादभ्रैरपिहितं छन्नं रविमिव विलक्ष[illegible]णि ॥ १६—१७ ॥

भाषा टीका ।

वह कहता है कि ब्रह्मा अपने तप [illegible]ा,और समाधि के बल से सब लोक से श्रेष्ठ सत्य लोक का [illegible]धिष्ठाता हुआ है ॥ ९ ॥

इस वास्ते मैं भी तप यो[illegible] और समाधि के बल को बढ़ाकर अपने को सिद्ध करूंगा क्यों कि ? [illegible] का अंत नहीं और आत्मा भी नित्य है ॥ १० ॥

इस जगत को मैं पुण्[illegible]यपाप [illegible] के [illegible] करके अन्य[illegible] [illegible]ा ॥ क्योंकि ? कल्पान्त में काल से [illegible] [illegible] लोक आदि से क्या प्रयोजन है ॥ ११

[illegible]का ऐसा निर्बन्ध सुना है इसी कारण [illegible] [illegible] । आप स्वयं त्रिभुवन के ईश्वर हो जै[illegible] [illegible] करें ॥ १२ ॥

[illegible]पते ! आपकी परमेष्ठीपने की गद्दी प्र[illegible] ऐश्वर्य पालन और उत्कर्ष के लिये है ॥

[illegible]ब्रह्माजी से देवताओं ने जब ऐसे वि[illegible] पन [illegible]श्री भृगुदक्षादिकों के सहित दैत्य हिरण्[illegible]रता था उस आश्रम पर गये ॥ १४

व[illegible]ी और बांसो से ढका हुआ, पिपीलि[illegible]ा, त्वक् मेद मांस और र[illegible] जिसका [illegible]

और [illegible]पा रहा, जैसे मेघ से ढका सूर्य ऐसे [illegible]हंस वाहन ब्रह्माजी विस्मय प्राप्त होक[illegible] १६ ॥

[illegible]र्थदीपिका ।

इत्सारं पे[illegible]स्थितो देहो यस्य ॥ [illegible]

निरम्बुनिवि[illegible]क इत्यर्थः ॥ १९ ॥

ते त्वया [illegible] ताड़ितोऽहम, त[illegible] भवता तु सुतरा[illegible]

नारद उवाच

इत्युक्त्वादिभवो देवो भक्षिताङ्गं पिपीलिकैः ।
कमण्डलुजलेनौक्षद्दिव्येनामोघराधसा ॥ २२ ॥
स तत्कीचकवल्मीकात् सहओजोबलान्वितः ।
सर्वावयवसम्पन्नो वज्रसंहननो युवा ।
उत्थितस्तप्तहेमाभो विभावसुरिवैधसः ॥ २३ ॥
स निरीक्ष्याम्बरे देवं हंसवाहमवस्थितम् ।
ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मात्रो भक्तीत्यादिभवो ब्रह्मा औक्षत्सेक्तवान् ॥ २२ ॥

वज्रवत्संहननमङ्गदार्ढ्यं यस्य तत्तस्य हेम्न आभा देहकान्तिर्यस्य ॥ २३ ॥

तस्य दर्शनेन महानुत्सवो यस्य ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तमेवाह—उत्तिष्ठेति । हे काश्यप ! उत्तिष्ठोत्तिष्ठ ते तव भद्रं कुशलमस्त्विति यावत् भविष्यति यतस्त्वं तपस्सिद्धः तपसा सिद्धः फलपर्यन्ततपस्सम्पन्नः अत एव च वरदोऽहमीश्वरोऽहमनुप्राप्तः "अत ईप्सित इष्टोऽर्थो व्रियतां वाञ्छ्यताम्" ॥ १७ ॥

ते तवैतत् दुरसारं धैर्यं महदद्भुतमद्राक्षीत् द्रष्टवानस्मि हि यस्मात् दंशैर्भक्षितो देहो यस्य तस्य प्राणा अस्थिषु शेरते अस्थीनि समाश्रित्य तिष्ठन्तीत्यर्थः ॥ १८ ॥

पूर्वेषां भृग्वादयोऽपि नैवंविधाः तपश्चक्रुः अपरे अर्वाचीना न करिष्यन्तीति किम्पुनर्वक्तव्यम्. को वै दिव्यमानेन शतं समाः ऋषीणामपि निरम्बु त्यक्तोदकं यथा भवतीत्वया प्राणान्धारयेत् ? न कोऽपीत्यर्थः ॥ १९ ॥

हे दितिनन्दन ! मनस्विभिर्धीरैरपि दुष्करेण तेनानेन व्यवसायेनैव तावज्जितोऽहं तपोनिष्ठेन भवता तु सुतरां जितः ॥२०॥

यतोऽहं जितस्ततस्ते तुभ्यम् हे असुरश्रेष्ठ ! सर्वा आशिषः इष्टार्थान् ददामि मर्त्यस्य मरणधर्मिणस्ते तव अमरस्य मम तद्रहितस्य मम दर्शनमफलसाधनं न भवति किन्तु सफलमेवेत्यर्थः ॥ २१ ॥

श्रीरीत्युक्त्वा आदिदेवो ब्रह्मा अमोघराधसा अमोघप्रभावेण दिव्येन कमण्डलुजलेन पिपीलिकैर्भक्षितमङ्गं यस्य तं दैत्यं समभिप्रोक्षितवान् ॥ २२ ॥

भित्त्वाग्निमाधुर्यग्निरिव उत्थितः वल्मीकं भित्त्वा बहिर्निर्गत इत्यर्थः । कथंभूतः सहसा प्राणबलेन ओजसा इन्द्रियबलेन बलेन देहबलेन चान्वितः तथा सर्वैरवयवैः पाणिपादादिभिः सम्पन्नः वज्रवत्संहननमङ्गदार्ढ्यं यस्य स युवा यौवनयुक्तश्च तप्तस्य हेम्न इवाभा यस्य सः तप्तसुवर्णतुल्यकान्तिरित्यर्थः ॥ २३ ॥

एवंविधः अथाकाश्याम्बरे हंसवाहनमवस्थितमभिषिक्तं देवं ब्रह्माणं निरीक्ष्य स दैत्यस्तस्य ब्रह्मणो दर्शनेन महानुत्सवः उत्सवो यस्य तादृशः शिरसा भूमौ ननाम ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

[illegible] दृढस्य सारं दार्ढ्यं दंशाः सूचीमुखाः शुकाः ते तव [illegible] शेरते इति यस्मात्तस्मादद्भुतम् ॥ १८ ॥

[illegible]तमित्याह—नैतदिति । निरम्बुजलपानरहितः "निर्निश्चय-निषेधयोः" इत्यमरः "स्युरेव तु पुनर्वे वेत्यवधारणवाचकाः" इत्यभि[illegible] इत्यनेन द्विव्यमाससमास्वपि किञ्चिदूना न भवन्ति ॥ १९ ॥

इतः [illegible] तेन व्यवसायेन मनस्विभिर्मनोबलसहितैः दुष्करेण दुस्त्यजेन जितो वशीकृतः "पराभूतं वशीकृतं जितमित्युच्यते बुधैः" इत्यभिधाने ॥ २० ॥

ददामि दास्यामीतीच्छामि मर्त्यस्य मरणशीलमनुष्यशरीरं प्राप्तस्य ते तव अमर्त्यस्य अजामरणान्यस्य देवस्य मम दर्शनमभूद्धि यस्मात्तस्मादविफलं नैव ॥ २१ ॥

आदेर्देवोऽभवो अमोघं यस्य स तथा विष्णुभूरित्यर्थः । सर्वस्यादौ भवतीति वा औक्षत्[illegible]सिक्तवान् दिव्यत्वमाह, अमोघेति ॥ २२ ॥

एधसः इन्धनात् [illegible] ॥ २३ ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उत्तिष्ठेत्यनेन पूर्वं मूर्च्छितस्य पश्चादुपवेशः सूचितः ॥ १७ ॥

उत्थाय [illegible]गो दृशा विभुम् ।
हर्षाश्रुपुल[illegible]ऽगृणात् ॥ २५ ॥

[illegible]वाच ।

कल्पान्ते काल[illegible]मसा वृतम् ।
अभिव्यनक् ज[illegible]तिः स्वरोचिषा ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दंशभक्षितत्वं पूर्वं पिपीलिकाभक्षितत्वं पश्चादि[illegible] ॥ १८—३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थद[illegible]

दुस्सारं धैर्यम् ॥ १८ ॥ १९ ॥ २० ॥

असुरजातित्वेऽपि मरणधर्मवत्त्वान्मर्त्यस्य [illegible]

पिपीलिकैरिति । पिपीलिकादंशादिभिरि[illegible] ब्रह्मा अमोघमव्यर्थं राधः संसिद्धयंतः[illegible]वान् ॥ २२ ॥

वज्रस्येव संहननमङ्गस्य दार्ढ्यं यस्य स[illegible]

श्रीमच्छुकदेवकृतसिद्धान्त[illegible]

दुस्सारं धैर्यं दंशैर्भक्षितो देहो यत्र[illegible]नु शेरते तिष्ठन्ति ॥ १८ ॥

निरम्बु निर्जलं यथा स्यात्तथा दि[illegible]तं सम्वत्सरान् प्राणान् को धारयेत् को[illegible]

मनस्विनां मर्त्तास्वाभिर्दुष्करेण [illegible]ऽर्थ-सङ्कल्पनेन अहं जितः तपोनिष्ठेन [illegible]मीत्य-ब्रवः ॥ २० ॥

आशिषः वाञ्छितानर्थान् ॥ [illegible]

दक्षादिप्रजापतिभ्यः आदौ [illegible]मोघरा-धसौ सफलताभावेन ओस्थितवान[illegible]

राधसो विभावसुरिव तद[illegible]द ओजो बलान्वितः मनइन्द्रियदेहशक्ति[illegible]मङ्गदार्ढ्यं यस्य स उत्थितः ॥ २३ ॥

तस्य दर्शनेन महोत्सवो [illegible]

[illegible]मंगल हो तुम उठो २ हम वरदान देने वाले प्राप्त हुए [illegible]च्छित वर है उसे मांगलो ॥ १७ ॥

[illegible]रा बड़ा अद्भुत धैर्य देखा देखो तुमारे देह को वल[illegible]क्षण कर लिया तुमारे प्राण तौ अस्थियों में [illegible] ॥

[illegible]षियों ने भी नहीं किया और भी कोई लोग न कर[illegible] अन्न के देवताओं के सौ वर्ष तक कौन प्राण [illegible] ॥

[illegible]मनस्वियों से भी दुष्कर तुमारे इस व्यवसाय[illegible]वो ऐसे तुम से हम जित हुए अर्थात् हार[illegible]

[illegible]से हम तुमारी सब कामनाओं को देते [illegible] वाले को हम सदृश देवताओं का दर्श[illegible] है ॥ २१ ॥

[illegible]नारद उवाच

[illegible]ब्रह्माजी ने ऐसे कहकर पिपीलि[illegible] ओंने [illegible]का ऐसे हिरण्यकश्यप के शरीर[illegible] अमोघ[illegible]डलु के जल से प्रोक्षण किया ॥२[illegible]

वह [illegible]वल्मीक से सह ओज बल से यु[illegible] अवयवों[illegible]र्वाङ्ग युवा सुवर्ण सदृश कां[illegible] वाला ऐ[illegible]स प्रकार उठकर खड़ा हुआ

वह दि[illegible]स्थित हंस वाहन श्रीब्रह्माजी देखकर उ[illegible]न्द युक्त होकर शिर से भूमि प्रणाम कर[illegible]

[illegible]र्थदीपिका।

हर्षेणाश्रुभि[illegible]सः ॥ २५ ॥

अन्येन नि[illegible]सत्त्वेन प्रकृतिगुणा[illegible] न तु स्वान्तेन तम[illegible]व्यक्तमगमभिव्यक्तम् अभ[illegible] यश्च त्रिगुणेनाऽऽत्म[illegible]ति पालयति लु[illegible] संहरति च तस्मै [illegible] आश्रयाय महते [illegible]

ब्रह्माजी बोले कि हे कात[illegible]तुम तपसे सिद्ध परमेश्वराय [illegible]

आत्मना त्रिवृता चे ... कुर्वाति ।
रजःसत्वतमोधाम्ने पर ... नमः ॥ २७ ॥

नम आद्याय बीजाय ... नमूर्तये ।
प्राणेन्द्रियमनोबुद्धिवि ... मीयुषे ॥ २८ ॥

त्वमीशिषे जगतस्तस्थुषश्च ... पेण पतिः प्रजानाम् ।
चित्तस्य चित्तेर्मनइन्द्रि ... भूतगुणाशयेशः ॥ २९ ॥

त्वं सप्ततन्तून्वितनो ... तुर्होत्रकविद्यया च ।
त्वमेक आत्मात्मवता ... कविरन्तरात्मा ॥ ३० ॥

त्वमेव कालो निमिष ... वयवैः त्रिणोपि ।
कूटस्थ आत्मा परमे ... लोकस्य च जीव आत्मा ॥ ३१ ॥

त्वत्तः परं नापरमप्यनेज ... क्कमस्ति ।
विद्याः कलास्ते तनवश्च ... बृहन्त्रिपृष्ठः ॥ ३२ ॥

• श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्र च स्वप्रकाशत्वं जगत्प्रकाशकत्वं तत्कारणत्वं तत्स्थ ... दिकर्तृत्वं परमेश्वरत्वं महत्वञ्चेति षड्विधत्वमुक्तम्. तदेव प्रपञ्चयन् नमस्करोति—नमइति चतुर्भिः । बीजाय कारणाय तत्र हेतुः आद्याय, ज्ञानं ज्ञप्तिर्विज्ञानं विषयाकारं ज्ञानं मूर्तिर्यस्य तस्मै अनेन स्वप्रकाशत्वं जगत्प्रकाशकत्वञ्च दर्शितम्. आद्येति निमित्तत्वमुक्तम्. उपादानत्वमाह, प्राणादयो ये विकारास्तैरूपैर्व्यक्ति कार्याकारमीयुषे प्राप्तवते ॥ २८ ॥

एवमात्मना त्रिवृता चेत्यनेनोक्तं कारणत्वं द्वेधा दर्शितम् महत्वमीश्वरत्वं चाह—त्वमिति । त्वमेव ... तो जङ्गमस्य तस्थुषः स्थावरस्य च ईशिषे नियन्ताभवसि ... मुख्येन प्राणेन सूत्रात्मरूपेण अतस्त्वं प्रजानांपतिः ता ... चित्तस्य चित्तेश्च तत्प्राणामभूतायाश्चेतनाया मनसश्च तद्विषयाणामिन्द्रियाणाञ्च पतिः तत्त्वमेव महान् भूतानामाकाशादीनां तद्गुणानां शब्दादीनां गुणानामाशयानां तद्वासनानां ... एतेनैव स्रष्टृत्वमुक्तम् ॥ २९ ॥

इदानीं यज्ञप्रवर्तकत्वेनान्तर्यामितया जगत्पालकत्वमाह—त्वमेव ... नग्निष्टोमादियज्ञान्वितनोषि, कथम् ? त्रय्या तन्वा वेदत्रय्या कथम्भूतया चत्वारो होतारो यत्र तच्चातुर्होत्रकं कर्म ... तया विद्यया आत्मवतां ... णिनामात्मभूतस्त्वमेवान्तरात्मा अन्तर्यामी. कुतः यतः कविः सर्वज्ञः तत्कुतः एकोऽखण्डः तत्र हेतुः अनादिरनन्तपारः ... नास्त्यन्तः कालतः पारश्च देश-

... तदेवं सृष्ट्यादिकर्तृत्वेऽपि निर्विकारत्वमे- ... त्र हेतवः आत्मा ज्ञानरूपः परमेष्ठी परमे- ... ः महान् अपरिच्छिन्नः किञ्च जीवलोकस्य ... विक्रियन्त स्वन्तु तस्य जीवो जीवन- ... नियन्ता ॥ ३१ ॥

... ति । त्वत्तोऽव्यतिरिक्तं यदि किञ्चिद्द्येत्तर्हि ... नियम्यत्वादिकं वा भवेत्तत्तु नास्ती- ... कार्यम तत्र चेजङ्गममनेजत्स्थावरञ्च ... मद्बोधकशास्त्रं व्यतिरिक्तमस्तीति- ... दिविद्याख्यानानि कलादच तदङ्गानि ... रेकाः तत्कुतः यतस्त्वं बृहद्ब्रह्मानासि ... ब्रह्माण्डं गर्भे यस्य सः त्रिपृष्ठ- ... पृष्ठे परतः स्थितः "अक्षरात्परतः परः"

—

... भागवतचन्द्रचन्द्रिका ।

तत ... ः प्रह्वः नम्रः दृशा चक्षुषा विभुं ब्रह्माणं नि ... पुलकोद्गमो रोमोद्गमश्च यस्य तादृशः गद्गद ... वोपीत् ॥ २५ ॥

तदेवाह ... । तामसत्वाद्ब्रह्माणमेव सर्वकारणं सर्वे ... यद्वा, परमेश्वरधर्मारोपेण स्तौति-कल्पा ... इदं दिनकल्पान्ते कालेन निमित्तेन ... इदं जगत्पुनर्यः स्वयंज्योतिः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्र…

स्वप्रकाशरूपः स्वरोचिषा अभिव्यनक् अभिव्यक्त… इत्युत्तरयान्वयः ॥ २६ ॥

यश्च त्रिवृता सृष्ट्यादिशक्तित्रयवता आत्मना … जगत्सृजति रक्षति लुम्पति संहरति च तस्मै … यस्य धाम्ने आश्रयाय पराय सर्वोत्कृष्टाय महते … तुभ्यं नमः ॥ २७ ॥

यतएवमत एव आद्याय बीजाय कारणकारणाय … मूर्तये शास्त्रविवेकोत्थज्ञानगम्यमूर्तये प्राणैरिन्द्रियैः … मनसा बुद्ध्या विकारैः पृथिव्यादिभूतैश्च व्यक्तिं का… ईयुषे प्राप्तवते तुभ्यं नमः ॥ २८ ॥

एवं कार्यकारणरूपेणावस्थितत्वमुक्तम् अथान्तरात्मत्व… त्वमिति । जगतो जङ्गमस्य तस्थुषः स्थावरस्य च त्वमेव … अन्तरात्मतया नियमनधारकत्वमाह-प्राणेन मुख्येन मुख्यप्राणो… लक्षितस्त्वमेव, मुख्यप्राणनिर्वाहकस्त्वमेवेत्यर्थः। अत एव प्रजा… प्रजानां पतिः यत एव मनःपर्यन्तसकलेन्द्रियधारकमुख्यप्राण… र्वाहकस्ततएव चित्तस्य चित्तवृत्तेर्मनस इन्द्रियाणाञ्च निर्वाहकः न केवलं घटादेर्भूतलादिवद्धारकः किन्तु महाभू… पृथिव्यादीनां गुणानां शब्दादिगुणग्राहकाणामिन्द्रियाणाम… अन्तःकरणस्य चेशोऽन्तःप्रविश्य नियन्ताऽन्तःप्रविश्य प्रशा… धारक इत्यर्थः ॥ २९ ॥

अन्तरात्मत्वमेव प्रपञ्चयति—सप्ततन्तून् सप्त विधान् … तन्यते विस्तार्यन्ते इति तन्तवः वैदिकाः क्रियाः पशु… मन्त्राहीनहोमपृथक् चित्यादिरूपेण सप्तविधत्वात्, यद्वा … स्तन्यन्ते इति तथा तान्. अध्वर्युहोतृप्रस्तोतृप्रतिहर्तृ… जमानैः सप्तभिर्वितन्यन्ते इति वा सप्ततन्तवस्तान् … संस्था वा निमत्तेऽपि अन्तरात्मतया प्रवर्तयसि. कया … त्रय्या कथम्भूतया चतुर्होतृकविद्यया चतुर्होत्राविद्… विद्यायुक्तया, अनेन यज्ञादिकर्तृकत्वमन्तरात्मतयोक्त… नात्मकज्ञानप्रवर्तकत्वमाह—आत्मवतां प्रशस्तमनस्… योगिनां । त्वमेव त्वमेक एवात्मा अन्तरात्मतया योगप्रवर्तक इति … सत्यादिवाक्यप्रतिपाद्यस्वरूप इत्याह—अनादिः … परिच्छेदः पारो कालतः परिच्छेदरहितः अनन्तपारः अन्तो देशतः … अनन्तपारः अन- वस्तुतः परिच्छेदस्तदुभयं यस्य नास्ति … दार्थ उक्तः, अन्त- नानन्तशब्दार्थ उक्तः, कविः सर्वज्ञः अनेन ज्ञान… र्येव, अनेन सत्य- रान्मात्मत्वाय ततविकारास्पर्शेन नियन्ता … शब्दार्थ उक्तः ॥ ३० ॥

अथ कालान्तरात्मतया तन्नियन्तृत्व… —स्त्वमेवेति । त्वयेन अनिमिषः कालः कालशरीरकस्तत्प्रवर्तक… अत एव अवाधैः काला- वयवैरायुरेव जनानामायुर्जीवनं क्षि… णोषि क्षपयसि त्वमेव कूटस्थो निर्विकार आत्मा परमात्मा … परमेष्ठी निरतिशयस्थान- सर्वी अजः कर्मायत्तजन्मादिशून्यः "… आनज आत्मा" इति श्रुत्य- र्थेऽत्राभिसंहितः । कृत्स्नस्य जीवलोक… स्य जीवः जीवयिता आत्मा त्वमेव "सोऽहमात्मा…" … श्रुत्यर्थोऽत्राभिसंहितः ॥ ३१ ॥

किंबहुना यत्किञ्चिदेजत्चरम् अनेजत् स्थावरञ्च त्वत्तः … स्वरूपमपरं तुलयञ्च नास्ति तथा 'व्यतिरिक्तमत्वदात्मकञ्च … त त्वत्तोऽपकृष्टं त्वदात्मकञ्च सर्वं चराचरं जग… र्थः। एवं रूपस्य तदात्मकत्वमुक्तम्. अथ नामरूपतदात्मकत्व… विद्याः वेदाः कलाः उपवेदादयः सर्वाः शब्दात्मिकाः ते… नवः शरीरभूताः हिरण्यगर्भोऽसि हिरण्यात्मकं ब्रह्माण्डं … स्य तथा भवोऽसि "हिरण्यगर्भः समवर्त्तताग्रे" इत्याद… …स्वरूपोऽसीत्यर्थः। स्वरूपेण गुणैश्च बृहत् त्रयाणां लोकानां … …भूतः परमव्योमनिलय इत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

…ः ॥ २५ ॥

…द्विविधा स्तुतिर्वर्तते तत्र हिरण्यकशिपुर्मिश्रवा… स्तुत्या देवतार्थाभिमन्यतीति तादृश्या स्तौति— … । अत्र ये चतुर्मुखस्यासम्भाविता गुणास्ते … र्यत्वेनैकस्थानस्थिते सर्वोत्तमे हरौ योज्या … ः न चैतावता स्तुतेर्भिन्नाधिकरणत्वमाप… तस्योपसंह्रियमाणगुणान्तर्भूतत्वेन तच्छ्रवण … ह्योल्लाससम्भवात्. तदुक्तम्—

…तिशब्देषु भिन्ना वाचो हरिं विना ।
…तत्र तन्नियन्तुर्हरेः परे ॥
…अत्वाद्विष्णोः प्राधान्यतस्तथा ।
…ताभिन्नाऽधिकृतं वचः" ॥ इति.

… रूपिणा स्वेनान्धेन तमसा दुर्गाभिमत… मानेना… अभिव्यक्तं कृतवान् स्वरोचि… स्वसाम…

एतदे… ति। आत्मना क्षोभितया त्रिवृता … गुणात्मिक… या प्रकृत्या चेदं जगत्सर्जनादिक्रि… विशिष्टं क… "रजःसत्त्वतमोधाम्ने" इत्ये… सूत्रार्थो रज… र्गं सूचयति—पराय महत इत्यने… "अणोरणीय… इति भूमिनिम्नोभयविभागं संस्म… यति हृदयवि… कि प्रादिति नामधेयं तथा … आत्मना परम… उपादानभूतया प्रकृत्या … प्रधानयेदं सृजति … कलाविभिर्विदमवति. तम… प्रधानया जात… महत महत्त्वाभिमा… पराय रुद्राद्युत्कृष्टा… ॥ २७ ॥

आद्याय पुरुष… कारणाय अन्यत्राविश… श्रीनारायणात्मजा… कारणाय फलरूपायेति … जगदुत्पत्तौ बीजशक्ति… एव मूर्तिर्वि… यस्य स तथा तस्मै … देहादिविग्रहाय प्रा… न्द्रियमनोबुद्धितद्वर्तिविकारैर्… प्राप्ताय दाम… रादपुरुषतत्त्वर्तितदोषः। उभ… ॥

मुख्येन प्राणेन सह …

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चित्तस्य चित्तिः स्मरणशक्तिप्रदः साक्षी वा महाभूतानां शब्दादी-
नामाशयस्यान्तःकरणस्य प्रवर्तकः पुनर्वचनं देनं दिनप्रवृत्त्यर्थम्...

...त्वया तन्वा प्रतिमास्थानीयेन वेदत्रवेद्य चातुर्होत्राख्यमन्त्र...
प्रकाश्ये चतुर्होत्रं तद्विषयया विद्यया च सप्ततन्तून् वितनो...
विस्तृत्य करोषि द्रव्यमन्त्रक्रियादेवतास्वत्वेन बहिरूपद्रष्टृत्वेन...
त्वेन कारयितृत्वेन शाखेज्याक्रतुतिप्रायश्चित्तादिरूपया च "अग्नि-
मीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम्" इत्यादि...
"यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः" इति आत्मवता...
ज्ञानिनां प्रेष्ठः—

"आत्मा प्रेष्ठे स्वरूपे च जीवे ज्ञातरि केशवे ।
वायौ देहे स्वयं स्वान्ते नवसु प्रोच्यते बुधैः" ...

अनादिः कारणशून्यः पुरातनो वा अनन्तपारोऽप्रमेयोऽ...
आत्मा मनो यस्य स तथा "न भारती मेऽङ्ग मृषो...
इत्यादेरन्यत्राऽब्धमानां मुक्तानामात्मा स्वामी "असंसा...
आचिरानन्द उच्यते" ॥ ३० ॥

अनिमिष इत्यनेन नित्यं जाग्रत्स्वभाव उ...
निर्विकारः आत्मा व्याप्तः परमेष्ठी सर्वोत्तमः महा...
जिक इत्यनेन सर्वोत्तमत्वं निर्णयति. अन्य... ...मात् आत...
एव महानव्ययुक्तत्वेन तत्पुत्रत्वात् जीवलोक... ...जीवराशेर्जी...
प्राणधारकः "जीव प्राणधारणे" इति धातोः... कथं धन इत्य...
उक्तम् आत्मेति इष्टादानादिकर्ता "अत्र सम... ...यो" इतिधातोरत्र
निरूपायं शब्दः सामान्यविशेषाभ्यां योज... ...ः ॥ ३१ ॥

इदानीं भगवत्स्येव सम्भाव्यमानविशेष... ...विशिष्टं तदन्यत्-
मित्याभिप्रेत्य—स्वत्तइति । परमतीतमपरमेव... ...पि वर्तमानं यत्किं-
चिदेतज्जत् स्थावरमेजज्जङ्गमञ्च वस्तु तत्... ...त्वत्तो व्यतिरिक्तं
नास्ति त्वमेवान्तर्बहिश्च व्याप्तत्वात्, त्वामन्त... ...ः स्थितः" इतिश्रुतेः ।
नास्तीत्यर्थः "अन्तर्बहिश्च तत्सर्वं व्याप्य...
"सर्वं खल्विदं ब्रह्म" इति च—

"परावरेषु यस्मात्त्वं व्याप्तो वि... ...ः सनातनः ।
...नः" इति. ॥

तस्मात्त्वव्यतिरिक्तत्वमित्यादुक्तेऽर्थो न घटत इत्यत
अनन्तत्वत्तो भिन्नं नास्ति किन्तु त्वमेव... ...तिरपि तस्यास्त्वत्तनाधा-
उक्त एवार्थः । ज्ञानं वेदादिविषयमेव तदा तत्स्याहित्यभिप्रेत्याह—
श्रितत्वात्त्वदनुग्रहमन्तरेण सुशका... परविद्यापरविद्येति ते
विद्येति । विद्याश्च कलाश्च विद्याकल... ...ते कलाः चतुःषष्टिस्त-
तनवः तव वपुषि स्थितत्वात्तत्... ...णा प्रतीतिनिरासायाचा-
र्याणां वा विद्या कला वेदाङ्गानि... ...त्यर्थे—
वैदिद्याश्च कलाश्चेति विगृहीते ...ा यतः ।
"महाविद्याः कलाश्चैव ...ः" ॥ इति मानश्चोदाहरति.

विद्यातनुरितिप्राहुस्तस्मात्तत्त्वं हरेरेव गुणामित्याह—
...स्मादयमेवार्थ इति इदमस्य गर्भे उदरे यस्य
हिरण्यगर्भ इति. हिरण्यस्याण्डस्य तस्यैव युक्तम्
स तथा गर्भीकृतानन्त" इति श्रुतेः । हिरण्मयब्रह्मा-

...ण्डकारणत्वाद्वा तत्रासि. निर्गुणस्य हरेरेते गुणाः
कथमुपयुज्यन्ते...—बृहदिति, गुणपूर्तित्वाद्बृहद्ब्रह्म "अथ
कस्मा उच्यते ब्रह्मेति बृहन्तो ह्यस्मिन्गुणाः" इतिश्रुतेः । ननु,
...शवलं किं न स्यादत्राह—त्रिपृष्ठ इति । जाग्रदाद्यवस्था-
त्रय स्थितत्वात्त्रिपृष्ठ इत्युच्यते त्रयाणां लोकानां पृष्ठे वर्त-
...त्यपव्याख्याननिरासाय तुरीय इत्यावश्यकाचार्या इति
...ादप्यधिकं विष्णुं जानता हिरण्यकशिपुना तदन्तर्या-
...गुणैरयं ब्रह्मा न स्तूयते किन्त्वन्तर्यामी स्तूयत इति चाप

...क्तम्—

"ब्रह्मणोऽप्यधिकं विष्णुं जानन्नपि हिरण्यकः ।
ब्रह्मणां तद्गुणैः स्तौति तद्गविष्णुविवक्षया" ॥ इति.

...सि महत्तत्त्वात्मकं चासीत्येकदेशीयेरिति व्याख्यानं
...दायस्तदेवमहत्तत्त्वात्मकमेवं गुणत्वेन समुच्चक्रन इति निरूप्य
...णान्तद्गुणैः स्तौति तद्गविष्णुविवक्षया" इत्युक्तत्वात् न च
...पित्वेन तदात्मकत्वमुच्यत इति वाच्यं तथैव व्याख्याना
...ते. कूटस्थस्य तदभिमानित्वेन घटतां तस्याप्युक्तदोषानिस्तारा-
...ः प्रकृत्या ... ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

...मिव्यक्तम् योऽमिव्यक्तमकरोत् त्रीन् गुणान् पृणाति स्वीक-
...त्रिवृत् आत्मा तेन ॥ २६ ॥ २७ ॥

...द्यो ये विकारास्तैर्यत्किं कार्यकारणं ईशुषे ॥ २८ ॥

...ते नियन्ता भवसि केन मुख्येन प्राणेन सूत्रात्मरूपेण भूत-
...नां पतिः तासां चित्तस्य चित्तेश्च मनःपरिणामभूता-
...ः मनसश्च नाडीवृत्तानामिन्द्रियाणाञ्च पतिः तासां
महा... तद्गुणानाम् आशयानां तद्वासनानामीशश्च ॥ २९ ॥

...सप्ततन्तून् अग्निष्टोमादिरूपान् त्रयीं वेदत्रयं तद्रूपया
तन्वा हो...ता उद्गाता अध्वर्युर्ब्रह्मेति यत्र तच्चातुर्होत्रं कर्म
तद्विषयया... च आत्मवतां देहिनां आत्मा जीवः अन्तरात्मा
अन्तर्यामी ॥.

कूटस्थः नित्यत्वेन कालव्यापी आत्मा अन्तर्यामी जीव-
लोकस्य जीवसमुदायस्य जीवाख्य आत्मा, पूर्वश्लोक कर्मप्रयो-
ज्यत्वप्रयोजकत्वात् कर्मिणामन्तर्यामित्वं उक्तं अत्र
त्वन्येषां सर्वेषामपि १ ॥

परं कारणं अपरं कार्यं एजत् स्थावरं एजत् जङ्गमं
विद्या वेदोपवेदादिविद्यास्थानानि कलाश्च तदङ्गानि ते तव
तनवः हिरण्मयरूपं ब्रह्माण्डं गर्भे यस्य सः बृहन् ब्रह्म त्रि-
अवस्थायां गुणानां पृष्ठे पदं स्थितत्वात्त्रिपृष्ठः ॥ ३२ ॥

व्यक्तं विभो [illegible]नेन्द्रियप्राणमनोगुणांस्त्वम् ।
भुङ्क्षे स्थितो धाम[illegible] अव्यक्त आत्मा पुरुषः पुराणः ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीप[illegible]

प्रह्वः नम्रः हर्षाश्रूणि पुलकोद्भेदो रोमा[illegible] यात् अस्तौषीत् ॥ २५ ॥

चतुराननं भगवदंशं भगवत्तया स्तौति-कल्प[illegible] किञ्च चतुर्मुख एव परमात्मेतिस्वीकारे "सर्वार्था[illegible] सा पार्थ तामसी" इति भगवदुक्ता तामसीबुद्धिरेव[illegible] तिनिबिडेन तमसावृतमिदं जगत् यः स्वयंज्योति[illegible] स्वरोचिषाऽव्यनक् प्रादुश्चकार ॥ २६ ॥

त्रीन् गुणान् वृणोति नियम्यतया स्वीकारो[illegible] तेन सृजत्यवति लुंपति च रज आदिधाम्ने आश्र[illegible] द्वयोरन्वयः ॥ २७ ॥

आद्याय बीजाय सर्वकारणकारणाय ज्ञानं [illegible] तदनुरूपोऽनुभवः तेन मूर्त्तिर्यस्य तदुभयगम्यायेत्यर्थः[illegible] न्द्रियाणि च मनश्च बुद्धिश्च विकाराः पृथिव्यादि[illegible] तैर्व्यक्ति विराड्रूपमीयुषे नमः ॥ २८ ॥

प्राणेन मुख्येन सर्वेन्द्रियनायकेन सहितस्य [illegible] तस्थुषः स्थावरस्य च त्वमेव ईशिषे ईशिता [illegible] प्रजानां पतिः चित्तस्य चित्तेर्बुद्धेर्मनसः इ[illegible] भूतानां खादीनां गुणानां शब्दादीनामाशय[illegible] ईशः अत एव महान् सर्वप्रभुः ॥ २९ ॥

त्वमेव सप्ततन्तून् तन्यन्ते विस्तार्यन्ते इति[illegible] होमादियज्ञान् चतुर्होत्रकविद्यया चत्वारोहो[illegible] अध्वर्युः प्रह्वोति यत्र तच्चतुर्होत्रकं कर्म त[illegible] त्रय्या वेदत्रयरूपया तन्वा वितनोषि आत्म[illegible] आत्मा आधारः अन्तरात्मा अन्तर्यामी [illegible] नास्ति अन्तः कालतः पारो देशतो यस्य [illegible] वधिकस्वरूपः पारोऽन्येषामवधिभूतः स [illegible] क्रान्तदर्शी सर्ववित्त्यर्थः ॥ ३० ॥

कालादीनां परमात्मशक्तित्वेन तदन[illegible] न्यर्वात्मत्वं दर्शयति--त्वमेव काल इत्यादि[illegible] वैर्जनानामायुः क्षिणोषि अतः काला[illegible] अक्षीणः आत्मा परमात्मासि यतो [illegible]न्यः परमेष्ठी परमलोकस्थः अत एव महान्[illegible]त्स्य बद्धजीवानां लोकस्य कार्यकारणरूपस्य[illegible] आ- श्रयः चकाराज्जीवलोकश्च त्वमेवासि जी[illegible] ॥ ३१ ॥

त्वत्तः परं कारणं प्रकृत्यादिरूप[illegible] ज- चेतनमनेजदचेतनञ्च व्यतिरिक्तं ना[illegible] विद्या वेदाद्याः कलास्तदङ्गानि ते तनवः त[illegible] तनवः त्वन्निश्वासादिरूपा इत्यर्थः । हिरण[illegible] विष्टं यस्य सोसि बृहत् विपुलस्वरूपोसि [illegible]कानां पृष्ठे उपरि सत्यलोके स्थितः मा[illegible] ॥ ३२ ॥

भाषा टीका ।

[illegible]हिरण्यकशिपु भी उठकर नम्र हो हाथ जोड़ दृष्टि से ब्रह्माजी [illegible]ता हुआ मारे हर्ष के अश्रु और रोमांच वाला गद्गद वाणी [illegible]ति करने लगा ॥ २५ ॥

हिरण्यकशिपुरुवाच ॥

[illegible]यकशिपु बोला, कि,—कल्पके अंत में काल से मूढ [illegible] से ढके हुए इस जगत को जिस स्वयं ज्योति ने [illegible] से प्रकाशित किया ॥ २६ ॥
[illegible]अपने त्रिगुण आत्मा से इस जगतको सृजता पालता [illegible]रता है ऐसे त्रिगुण धामा परमेश्वर को नमस्कार [illegible]

[illegible]प ज्ञान विज्ञान मूर्ति और इन्द्रिय मन बुद्धि के [illegible] को प्राप्त होने वाले ऐसे आपको नमः ॥ २८ ॥
[illegible]प्राण रूप से स्थावर और जंगमों के नियंता हो । [illegible]त हो, तथा चित्त चेतना मन और इन्द्रियों के [illegible] भूतगुण और आशय (अंतः करण) के ईश [illegible]

[illegible]क विद्या) अर्थात् चार हवन करने वाले [illegible] पादन करने वाली त्रयी (वेदत्रयी) रूप [illegible] का विस्तार करते हैं ॥ और आपही [illegible]मा हैं. क्योंकि ? आप सर्वज्ञ होकर आ- [illegible]

आ[illegible] काल हो जनों की आयु को चयालव [illegible]आदि [illegible] हो । आप कूटस्थ आत्मा परमेष्ठी [illegible]आज म[illegible] और नियंता हो ॥ ३१ ॥

जो [illegible]जंगम जगत है सो आप से व्यति- रिक कुछ [illegible]और कला आपका तनू हैं आप हिरण्यगर्भ [illegible]क ब्रह्मांड के ऊपर पृष्ठ पर- स्थित हैं.

[illegible]दीपिका ।

ननु, ब्रह्मा[illegible] ब्रह्मत्वं कुतोवा ब्रह्मा- ण्डगर्भत्वादि ? [illegible]रीरं व्यक्तं सत्यमिति वा येन शरीरेण [illegible]विषयान्भुङ्क्षे किञ्च पारमेष्ठ्ये पारमैश्वर्य[illegible] वस्वरूपातिरोधानेन[illegible] पुराणोऽर्थः ॥ ३३ [illegible]

अनन्ताव्यक्तरूपेण येनेदं ततम् ।
चिदचिच्छक्तियुक्ताय [illegible]वते नमः ॥ ३४ ॥
यदि दास्यस्यभिमता[illegible] वरदोत्तम ! ।
भूतेभ्यस्त्वद्विसृष्टेभ्यो [illegible]न्मम प्रभो ! ॥ ३५ ॥
नान्तर्बहिर्दिवा नक्त[illegible]पि चायुधैः ।
न भूमौ नाम्बरे [illegible] मृगैरपि ॥ ३६ ॥
[illegible]र्वाऽसुमद्भि[illegible]महोरगैः ।
अप्रतिद्वन्द्वतां [illegible] देहिनाम् ॥ ३७ ॥
सर्वेषां लोकपा[illegible] यथात्मनः ।
तपोयोगप्र[illegible]ति कर्हिचित् ॥ ३८ ॥

इति श्रीमद्भागवते [illegible]स्यां संहितायां वैयासिक्यां
सप्त[illegible]पोर्वरयाचनंनाम
[illegible] ॥

श्रीधरस्वामिकृतभावार्थदीपि[illegible]

ननु, ब्रह्मत्वं पुराणपुरुषत्वं कथमेकस्य [illegible]
हे अनन्त, येन त्वया स्वकेन मनोवचनागो[illegible]
ततं व्याप्तं तस्मै तुभ्यं भगवते अचिन्त्यैश्व[illegible]
हेतुः चिदचिच्छक्तियुक्ताय चिच्छक्तिर्वि[illegible]
ताभ्यां युक्तायेति ॥ ३४ ॥ ३५ ॥

अन्यस्मात्त्वत्सृष्टव्यतिरिक्तादपि आयुधै[illegible]मृत्युर्माभूत् ॥ ३६ ॥

अप्सुभिरप्राणैः असुमद्भिः सप्राणैः [illegible]था आत्मनः [illegible]
महिमा तथाऽप्रतिद्वन्द्वतादिकं देहीतिशे[illegible] ॥ ३७ ॥

तपसा योगेन च प्रभावो येषां ते[illegible] अदृश्यिमादिश्च[illegible]
रिष्यति न नश्यति तच्च देहीत्यर्थः ॥ ३८ ॥

इति श्रीमद्भागवते महापुरा[illegible] सप्तमस्कन्धे
श्रीधरस्वामिकृतभावा[illegible]दीपिकायाम्
तृतीयोऽध्याय[illegible] ३ ॥

श्रीमद्वीरराघवाचार्य[illegible]गवतचन्द्रचन्द्रिका ।

[illegible]पुरुषः कारणस्य [illegible]त्वं तस्य सर्वान्तरात्मत्व[illegible]
[illegible]रत्वमनुवदति-अव्यक्ति[illegible] ह्यध्यात्म । हे विभो देव ! स्थूलं
[illegible]त्मकमिदं जगच्च [illegible] शरीरं, स्थूलशरीर[illegible]

[illegible]र्वान्तरात्मा जगत्कारणपुरुषः एवंविधस्त्वं येन शरी-
[illegible]शरीरेण पारमेष्ठ्ये स्थाने स्थितः इन्द्रियादीनां गुणा-
[illegible]ब्दादीन् भुङ्क्षे, तत्सूक्ष्ममिति शेषः । येन शरीरेण
[illegible]वादीन् सृष्ट्वा तद्व्यापाराँल्लीलारसत्वेन भुङ्क्षे अनु-
[illegible] शरीरमित्यर्थः ॥ ३३ ॥

[illegible]विधपरिच्छेदरहितमतीन्द्रियं यत्स्वरूपं तदनन्ता-
[illegible]ताव्यक्तरूपेण इदमखिलं जगदन्तरात्मतया ततं
[illegible]चिदचिच्छक्तिभ्यां कार्योपयुक्तापृथक्सिद्धविशे-
[illegible]ताभ्यां युक्ताय, तच्छरीरकायेत्यर्थः । भग-
[illegible]य तुभ्यं नमः ॥ ३४ ॥

[illegible]भिमानेन तद्धर्मारोपेण वा मनुष्याद्युक्तत्वेन
[illegible] ब्रह्माणं स्तुत्वाऽथ वरान्वृणुते--यदीति । हे
[illegible]भिमतान् वरान्दास्यसि तर्हि तावत्त्वया
[illegible]भ्यस्त्वत्सकाशान्मम मृत्युर्मरणं माभूत् एवमनुगृहा-
[illegible]णत्वसृष्टत्वाभिमानेन त्वद्विसृष्टेभ्य इत्यु-

[illegible] तेभ्यो बहिः दिवा अह्नि नक्तं रात्रौ
[illegible] च स्वतोऽप्यायुधैरपि भूमौ पृथिव्याम्
[illegible] ॥ ३६ ॥
[illegible]भिः प्राणिभिश्च सुरैरसुरैर्महोरगैर्म-
[illegible]मेको वरः । वरान्तरञ्च याचते—
[illegible]प्रतिद्वन्द्वताम् अप्रतिपक्षताम्. अयं
[illegible]कामेकाधिपतित्वम्. अयं तृतीयो

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका [illegible]

तथा आत्मनो मम सर्वेषां लोकपालानाम् [illegible] माहात्म्यम्. अयं चतुर्थः । किञ्च तपसा योगेन च [illegible] तेषां योगिनां यच्च रिष्यति न नङ्क्ष्यति अ[illegible] देहीति शेषः । पञ्चमोऽयं वरः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे [illegible]
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका[illegible]
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानानन्दादिविलक्षणगुणमूर्तिं [illegible] पश्यति—अव्यक्तमिति । हिरण्यगर्भ इत्यनेन ब्रह्मायतस्य [illegible] नीयत्वं सूचितम्, तत्र तिष्ठन् हरिः सुखलक्षणान् गुणा[illegible] न तु देवदत्तवद् दुःखलक्षणानित्यतो वाह—अव्यक्तमिति [illegible] धामनि वैकुण्ठादिस्थाने सत्यलोके वा स्वरूपभूते [illegible] स्थितः पुराणः पुरुषत्वं येन शरीरेन्द्रियप्राणा[illegible] न्विषयानेव भुङ्क्ते न तु दुःखलक्षणान्,कुत एतत् ? [illegible] ह्यानन्दमादत्ते स आत्मनि" इतिश्रुतेः । [illegible] तद्विषयज्ञानं कथं नोत्पद्यते ? इति तत्राह—[illegible] कमाहाहि" इति सूत्रात्. हे विभो, तदिदं [illegible] तव स्थूलशरीरमाचक्षत इति शेषः । यत्राऽनेन [illegible] गर्विशेषणैः करोति. तथाहि, पुरं शरीर[illegible] भाग्यमिति भानादात्मा चतुर्मुखः प्रवर्तते [illegible] जगत्सृष्ट्याद्यैश्वर्यलक्षणान् गुणान् इतरस्वरूप[illegible] ॥

स्थावरजङ्गमात्मकं जगत्तद्व्यतिरिक्तं [illegible] दित्यर्थेनो व्याप्तितस्ता. तदिदं [illegible] शङ्कापरिहाराय स्वरूपमाह—अनन्तेति । [illegible] परिच्छिन्नाखर्वोहर्तुं युक्तिविरुद्धमित्युप[illegible] त्मा गूढतमः" इति श्रुतेः । प्रकृत्या [illegible] शिष्योक्तिविरहते ? इति । तत्राह—[illegible] वृत्तिः कर्तव्या " [illegible] यदभिधा या शक्तिः प्रशक्तिस्तस्याः [illegible] अपि भगवच्छक्त[illegible] येत्युक्तं न चानेन गुणभूतत्वं हरे[illegible] य आगतः' इत्यत्रोपाध्यायप्राधान्यव[illegible] कनियतत्वादर्शनात् चिदचिदात[illegible] सम्भवेन ज्ञानादेर्या सर्वव्याप्त[illegible] अतो वाह—चिदचिदिति, " [illegible] गुणात्मवस्तुनोऽपि भगवदनियत[illegible] कर्तव्यानीति कुत इत्यत उक्तं [illegible] ते नम उक्तिं विधेम " इति [illegible] नम इत्युक्तं तदुक्तेः फलाधिकत्व[illegible] ॥

किं बहुनोक्तेन त्वदभीष्टं [illegible] विविध-त्वेन सृष्टस्त्वः ॥ ३५ ॥

[illegible] यस्मादपि कायाद् अथवा भागात् अवयवविशिष्टात् [illegible] इत्युक्ते त्वन्येभ्यः किमित्यतो विशिनष्टि—न नश्यतीति ॥ ३६ ॥ [illegible] र्विगतप्रायैः पापाद्यादिभिः अमुमङ्गिमोहादिभिः एक-[illegible] काधिपत्यम् ॥ ३७ ॥

[illegible] त्वं वृणु इति शेषः । आत्मनस्तव यो महिमा स यथा [illegible] न नश्यति तथा मम महिमाऽस्तु यो महिमा यथा [illegible] न रिष्यति तथात्मनो मम महिमा न नश्यत्विति-[illegible] ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

[illegible] टीकायां वेदोपवेदादीत्यादि व्याख्यानात्. वि-[illegible] समासः अतो विद्याः कलाश्चेति पाठो न [illegible] ॥

[illegible] का वैष्णवसिद्धान्तानुगता तत्र चिच्छक्तिः [illegible] कर्मेति ज्ञेयम् ॥ ३४ ॥

[illegible] प्राप्यत इति कलेन तं वृणुते—यदीति । [illegible] त्वत्सकाशात् ॥ ३५ ॥

[illegible] आपत्याविरुष्टादिलयः । प्रभृत उपत्वं-[illegible] गयां निषेधयति । न नश्यति पादत्रयेण [illegible] प्रभृतिभिः सुखाद्भिर्वेति तत्रैव सङ्कल्प-[illegible] करणं निषेधपरम अप्राणिभिः प्राणिभि-[illegible] । इन्तुर्जीवदेहस्याऽप्यपि समाया-[illegible] श्रीयस्यात्मभागस्य स्वरूपप्राप्तत्वात् [illegible] श्रीरुक्मिणीदेव्या "त्वक्श्मश्रुरोम-[illegible] दिना प्राकृतानां निन्दयाऽप्राकृतानां [illegible] अत उक्तं वाराहे "न तस्य प्राकृता मूर्तिर्मेद[illegible] ॥ ३६—३८ ॥

[illegible] पुराणे सप्तमस्कन्धे श्रीम-[illegible] मिकृतक्रमसन्दर्भे
[illegible] ध्यायः ॥ ३ ॥

श्रीम[illegible] र्तिकृतसारार्थदर्शिनी ।

अव्यक्तं वैराज[illegible] न शरीरेण त्वमिन्द्रियप्राणमन-[illegible] सां गुणान् [illegible] तु पारमेष्ठ्ये परमैश्वर्ये धाम-नि स्वरूपे [illegible] न तु स्वरूपतिरोधानेन [illegible] अतस्त्वमव्य[illegible] र्यामी पुराणपुरुषो भग-वान् ॥ ३३ ॥

चिच्छक्ति[illegible] ता अचिच्छक्तिर्माया [illegible] बहिरङ्गा ताभ्यां गुणातीतगुणवद्यीलाय युक्ताय ॥ [illegible]

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हिरण्यकशिपोराशयः अयमहममृत्युर्भूयासमिति, वरं याचिष्ये तदा वरोऽयमसंभव एव यतः कल्पान्ते ब्रह्मादयोपि मरिष्यन्त्येवेति मद्वरं प्रत्याख्यास्यत एव तस्मादेवं युक्त्या वरं वृणोमि यत् फलतोऽमरत्वमेव प्राप्तं भविष्यतीति त्वद्विसृष्टेभ्य इति सर्वेषां भूतानां ब्रह्मसृष्टत्वादपरः कोऽवशिष्ट भावः ॥ ३५ ॥

मृत्युः खलोपि सम्भवेदत आह—नान्तर्बहिर्दिवा नक्तमिति सर्वदेशकालनिषेधेन स्वाभाविको मृत्युर्वारितः साकारो राहादिरूपो विष्णुर्महासुर एव स तु निराकारस्तस्य वक्तायत्तं याचमेतद्धीनयं इत्याशङ्क्याह—अन्यस्मादपि । मृत्युः अन्तर्बहिःशब्दाभ्यां सर्वदेशस्य प्राप्तत्वेपि तस्य स्थिरशब्दत्वेन प्रतियोगिविशेषोपस्थापकत्वेऽनर्थ पुनर्देशं निषिद्धयति न भूमावित्यनेन सत्पाताकाशाम् इत्यनेन समस्तगोर्या च निषेधः, पुनर्देवादिसृष्टसूतेभ्यो ब्रूयाह—न नरैरिति ॥ ३६ ॥

सर्वजीवजातीनामुल्लङ्घनाऽशक्यत्वादाह—अप्राणैः प्राणैः असुमद्भिः प्राणसहितैः ॥ ३६ ॥

एवं वस्तुतोऽहममरएवाभूवमिति मत्वा वरान्तरं वृणुते अप्रतीति ॥ ३७ ॥

यथा आत्मनस्तवास्ति तथा तपोयोगानां प्रभावो येषां तेषां यत् अणिमाद्यैश्वर्यं न रिष्यतिन नश्यति तन्मह्यं देहीति ॥ ३८ ॥

इति सारार्थदर्शिन्याम् हर्षिण्याम् भक्तचेतसाम् ।
सप्तमे च तृतीयोऽयं सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पारमेष्ठ्ये धामनि सत्यलोके स्थितः वै स्थितिविकल्पेन हेतुना अव्यक्तः पुराणः पुरुषस्त्वम् व्यक्तं स्थूलमेवं शरीरं वैराजम् इन्द्रियप्राणमनसां गुणांश्च भुङ्क्षेऽनुभवसि ३३ ॥

चिज्जीवरूपा अचित्कालादिरूपा ताभ्यां कार्य नमः ॥ ३४ ॥

त्वद्विसृष्टेभ्यः त्वन्निर्मितेभ्यः ॥ ३५ ॥

अन्यस्मात्वत्सदृशादपि ॥ ३६ ॥

प्राणैः अप्राणैः असुमद्भिः सप्राणैः ॥ ३७ ॥

तपोयोगाभ्यां प्रभावो येषां तेषां मुनीनाञ्च यद् यत् येन यत्नेन कर्हिचिदपि न रिष्यति न नश्यति तत् इति शेषः । तादृशं महिमानं देहि ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
तृतीयाध्यायार्थप्रकाशः ॥ ३ ॥

भाषा टीका ।

विभो ! यह व्यक्त (कार्यरूप) आपका स्थूल शरीर है जिस से आप इन्द्रिय प्राण और मनके गुणों (विषयों) को पारधाम में स्थित होकर भोगते हो, और आप साक्षात् अव्यक्त पुराण पुरुष हो ॥ ३३ ॥

अनंत अव्यक्त रूपसे जिन आप से यह सब जगत् व्याप्त हो रहा है चेतन अचेतन शक्ति युक्त उस परमात्मा भगवान को नमस्कार हो ॥ ३४ ॥

वरदोत्तम ! यदि आप मुझे अभीष्टवर देते हो तो हे प्रभो ! आपके रचे हुए प्राणियों से मेरी मृत्यु न हो ॥ ३५ ॥

भीतर बाहर दिन में रात में और किसी से तथा आयुधों से, आकाश में मनुष्यों से मृगों से भी मेरी मृत्यु न हो ॥ ३६ ॥

प्राणवालों से अथवा अप्राणवालों से मृत्यु न होवे और देवता असुर और महोरगों से युद्ध में अप्रतिद्वंद्वता को प्राप्त होऊं अर्थात् इनसे न हारूं और प्राणि मात्र का एक पति होऊं ॥ ३७ ॥

तप और योग से है प्रभाव जिनका ऐसे लोक पालों की जो महिमा और जो कभी किसी प्रकार नष्ट न हो ऐसी आपकी महिमा मुझको दीजिये ॥ ३८ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध
हिरण्यकश्यप वरयाचन
तृतीयाध्याय समाप्त ॥ ३ ॥

श्रीमद्भागवते महापुराणे सप्तमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

———:*:———

...ः ॥

एवं वृतः ... र्लभान् ॥ १ ॥

प्रादात्तत्...

... म ।

तातेमे दुर्... र्लभान् ॥ २ ॥

तथाऽपि वितरा... ।

ततो लब्धा... ३ ॥

पूजितोऽसुर...

एवं ल... ॥

भगवद्... रः ।

स वि...

...भिर्...

...निर्मितं भूपते...

...त्वा वशमानि...

...तां स्थानानि स... ॥

...पुष्टमध्यास्ते स्म ...

...न्निर्मितं विश्वकर्म...

...पतनमध्युवासाखिल...

श्रीधरस्वामिकृत...

चतुर्थे तु वराँल्लब्ध्वा ... ।

विष्णुद्वेषेण तान्सर्वान् ... ॥ १ ॥

...तधृतिर्ब्रह्मा ॥ १ ॥

मम मत्तः यद्यपि वरपीसे ...

अमोघोऽनुग्रहो यस्य प्रजेश्वरैः ... ३ ॥

...र्थे तपस्तप्तं तदाह— ... —६ ॥

सर्वेषां स... ये पतवस्तान् ॥ ७ ॥

त्रिविष्टपं ... तत्र सर्गेऽपि महेन्द्र...

भवनमध्युवासाधि...

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैत्येन वृताद् वरात् दर्शयाह भगवानादः—...

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमित्थं वृतो याचितः शतधृतिर्ब्रह्मा हिरण्यकशिपोस्तपसा तोषितः तस्य दुर्लभान्वरान् प्रादात् ॥ १ ॥

इत्येवमाह ब्रह्मा—हे तात ! मम मत्तो यान्वरान् वृणीषे ते इमे वराः पुंसो यद्यपि दुर्लभाः तथापि दुर्लभानपि तान्वरान् अङ्ग हे हिरण्यकशिपो ! तुभ्यं वितरामि वर्तमानसामीप्ये लट् दत्तवानस्मीत्यर्थः ॥ २ ॥

एवमुक्त्वा अमोघः सत्योऽनुग्रहो यस्य स विभुर्भगवान् ब्रह्मा असुरवर्येण पूजितः प्रजेश्वरैर्भृगुदक्षाद्यैः स्तूयमानः स्वधाम जगाम ॥ ३ ॥

एवं लब्धा वरा येन स दैत्यो हिरण्यवर्णप्रकाशवपुषं देहं बिभ्राणो भ्रातुर्हिरण्याक्षस्य वधं भगवत्कृतं स्मरन् भागवत-द्वेषसहितं भगवति द्वेषमकरोत् ॥ ४ ॥

तदेव प्रपञ्चयितुमुपोद्घातमाह--स इत्यादिना । स महासुरो हिरण्यकशिपुस्त्रींल्लोकान् सर्वा दिशश्च विजित्य तथा देवादीन् सर्वसत्त्वपतीन्सर्वभूताध्यक्षांश्च जित्वा वशमानीय विश्वजित्सन् लोकपालानां तेजसा सह स्थानानि जहारापहृतवान् ॥ ५—७ ॥

देवोद्यानश्च जहारेत्यनुषङ्गः श्रिया सर्वसम्पदा जुष्टं युक्तं त्रिविष्टपं स्वर्गमध्यास्तेस्म अधिष्ठितवान् "अधिशीङ्स्थासां कर्म" इति कर्मत्वम्, विश्वकर्मणा निर्मितं त्रैलोक्यलक्ष्म्या आयतनमाश्रयं भोग्यभोगोपकरणादिसर्वसमृद्धिमन्महेन्द्रस्य भवनं साक्षादध्युवास अध्युषितवान् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वरदानादिना सम्भूतं लवणाब्धिजलबुद्बुदसदृशं क्षणिकं भगवदभक्तैश्वर्यं श्रीनारायणप्रसादाविर्भूतमनन्तकालीनं शाश्वतं स्वात्मदेवापाद्यं मुमुक्षुभिरित्यादितात्पर्यं निरूप्यते कतिपयैरध्यायेषु. तत्र हिरण्यकशिपवे ब्रह्मवरदानप्रकारं तेनास्य सर्वविजयप्रकारञ्च निरूपयति—एवं वृत इत्यादिना । एवशब्देन न केवलं ब्रह्मणो वरदानमेवोच्यते अपि तु हिरण्यकशिपुविषया कथा साकल्येन कथ्यत इति सूचयति ॥ १ ॥

मम सकाशाद्यदपि दुर्लभान् अन्येषां दुःखप्रापकान् "दुरशोभनदुःखयोः" इति यादवः ॥ २ ॥

भगवान् पूज्यः अत्र प्रतिक्षणं दक्षादिस्मरणशीलानां मन्दानां स्फुरणार्थं कृतव्याख्यानानां पदानां पुनरपि तथा वचनं न दोषाय तदर्थं हीदं प्रवृत्तमिति, अमोघानुग्रहः लोकानामितिशेषः ॥ ३ ॥

समग्रैश्वर्यादिगुणरत्नाकरे परे द्वेषमकरोदसुरावेशाज्जयांशत्वेन स्वतोभक्तोपीति तात्पर्येण,तदुक्तं "स्वतो भक्ता हिरण्याद्याः परावेशात्परे द्विषः" इति "परेऽपरमात्मनोः" इत्यभिधानादत्र परः शत्रुरसुरः तदावेशादित्यर्थः ॥ ४ ॥ ५ ॥ ६ ॥

सर्वसत्त्वपतीन् सिद्धादीन् वशमेष्टान्वा किं बहुना विश्वं चराचरं विजितवानिति तेजसा प्रभावेन सह जहार ॥ ७ ॥

त्रिविष्टपं स्वर्गे त्रीणि स्थानानि सन्ति ततोपि श्रेष्ठं महेन्द्रभवनमरावतीनाम तत्स्थानापेक्षया साक्षात्पुरीयमित्युच्यते "साक्षात्प्रत्यक्षतुल्ययोः" इत्यभिधानात्. अत एवाखिलर्द्धिमदित्युक्तं साक्षात्प्रत्यक्षमध्युवासेत्यनेन वा सङ्क्रमयितव्यं त्रीणि विष्टपानि स्थानानि सकलसमृद्धिमन्त्यस्मिन्निति त्रिविष्टपशब्दार्थपर्यालोचनयाऽयमर्थस्सम्पद्यते त्रिदिवपदस्याप्ययमेवार्थः अन्यथा त्रिविष्टपस्य गतिर्वक्तव्येति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १-२४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वरान् लब्ध्वा द्विषन् विष्णुं देवांश्चाभिराम सः ।
प्रल्हादस्य गुणाः प्रेमभक्त्युत्थस्तुर्ये ईर्यते ॥

हिरण्यकशिपोः हिरण्यकशिपुना तस्य तस्मै ॥ १ ॥

यद्यपि यद्यपीमे दुर्लभास्तदपि इमान् दुर्लभान् वितरामीति सम्बन्धव्यवहिताभावः सोढव्यश्चेदेवं व्याख्येयं वरान् कीदृशान् यत्प्राप्नुवतामपि दुर्लभान् यान् प्राप्यापि न प्राप्नुवन्ति तानित्यर्थः ॥ २—४ ॥

गन्धर्वा गरुडजातयः पक्षिणः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ हिरण्यकशिपोर्भगवति द्वेषं तत्पुत्रस्य प्रह्लादस्य च भक्तिं चतुर्थेऽध्याये श्रीनारदो वर्णयति—एवमिति । शतधृतिर्ब्रह्मा ॥ १ ॥

मम मत्तो यान् वृणीषे ते इमे यद्यपि दुर्लभास्तथापि वितरामि तुभ्यं ददामि ॥ २ ॥

अमोघः सत्योऽनुग्रहो यस्य स विभुर्विपुलज्ञानः ॥ ३ ॥

हेममयं सुवर्णं प्रकाशमानम् ॥ ४ ॥

स दिग्गजादीन् जित्वा लोकपालानां तेजसा सह स्थानानि जहारेति वक्ष्यमाणेनान्वयः ॥ ५—६ ॥

सर्वेषां सत्त्वानां प्राणिजातीनां पतीन् जित्वा वशमानीय एवं विश्वजित् सन् लोकपालानामिन्द्रादीनां तेजसा तत्सामर्थ्यमहिम्ना सह स्थानानि अहरदपहृतवान् ॥ ७ ॥

देवोद्यानानां श्रीभिर्जुष्टं त्रिविष्टपं देवलोकमध्यास्ते स्म अधिष्ठितोऽभूत् तत्रापि साक्षान्महेन्द्रभवनमध्युवासेत्युत्तरेणान्वयः ॥ ८ ॥

यत्र विद्रु [illegible] ारकता भुवः ।
यत्र स्फाटि [illegible] स्तम्भपङ्क्तयः ॥ ९ ॥
यत्र चित्रविता [illegible] सनानि च ।
पयःफेननिभा [illegible] मपरिच्छदाः ॥ १० ॥
कूजद्भिर्नूपुरैर्दे [illegible] स्ततः ।
रत्नस्थलीषु प [illegible] न्दरं मुखम् ॥ ११ ॥
तस्मिन्महेन्द्रभवने मह [illegible] र्जितलोक एकराट् ।
रेमेऽभिवन्द्याङ्घ्रियुगः सुर [illegible] र्जितचण्डशासनः ॥ १२ ॥
तमङ्ग ! मत्तं मधुनोरुग [illegible] ुमशेषधिष्ण्यपाः ।
उपासतोपायनपाणिभि [illegible] बलौजसां पदम् ॥ १३ ॥
जगुर्महेन्द्रासनमोजर [illegible] हरस्मदादयः ।
गन्धर्वसिद्धा ऋषयो [illegible] सश्च पाण्डव ! ॥ १४ ॥
स एव वर्णा [illegible] ।
इज्यमानो [illegible] ॥ १५ ॥
अकृष्टपच्या [illegible] ।
तथा का [illegible] ॥ १६ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणाय नमः

॥ नारद उवाच ॥

नारदजी बोले, कि—जब हिरण्यकशि [illegible] उसके तप से प्रसन्न होकर ब्रह्माजी ने हि [illegible] दुर्लभ भी थे वर थे तो भी दिये ॥ १ ॥

ब्रह्मोवाच ॥

ब्रह्माजी बोले, कि—हे तात ! जिन [illegible] ये पुरुषों को बड़े दुर्लभ हैं, हे भाई ! यद्यपि [illegible] भी मैं तुझ को देताहूं ॥ २ ॥

तदनंतर वर देकर असुरवर्य से प [illegible] नुग्रह वाले प्रजेश्वरों से स्तूयमान श्री [illegible] धाम को गये ॥ ३ ॥

दैत्य भी इस प्रकार वर पाकर [illegible] धारण करता हुआ भ्राता के बध का स्मरण [illegible] भगवान श्री विष्णु में द्वेष करने लगा ॥ ४ ॥

वह महासुर दशों दिशाओं को [illegible] भुवनों को जीत-कर दे [illegible] गन्धर्व गरुड़ उरग सिद्ध चारण विद्याध ऋषिगण [illegible] राक्षस पिशाच भूत प्रेत और इनके अधिप [illegible] पतियों को जीत कर अपने वश लाकर [illegible] सहित सर्व लोक पालोंके स्थान को हरण [illegible] ॥ ७ ॥

देवता [illegible] भा वाले स्वर्गका अधिष्ठाता होक त्रैलोक्य की [illegible] न अखिलसमृद्धिवाले साक्षा विश्वकर्ता के [illegible] में निवास करने लगा ॥ ८ ।

[illegible] र्थदीपिका ।

अखिलसमृद्धि [illegible] त्रिभिः ॥ ९ ॥
मुक्तादामानि [illegible] वासाम् ॥ १० ॥
सुदतीः सुदत [illegible]
ऊर्जितमधिकं [illegible] यस्य ॥ १२ ॥
अङ्ग हे राजन् ! [illegible] मधुना सुरया मत्त
अत एव विवृत्ते विघू [illegible] यस्य तम् महोषा
धिष्ण्यपाः सर्वलोकपाला [illegible] पायनपाणिभिरुपासत सेव
त्रिभिर्ब्रह्मविष्णुरुद्रैर्विना पदमाश्रयभूतम् ॥ १३ ॥

श्रीधर[illegible]

उपासनप्रकारमाह—जगुरिति ॥ १४ ॥ १५ ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रि[illegible]

महेन्द्रभवनं विशिनष्टि—यत्र भवने विद्रुमम[illegible] यासु ताः भुवःस्थलानि वेदिकादीनि महामारकत[illegible] यत्र भवने स्फाटिकमयानि कुड्यानि भित्तयः यत्र वै[illegible] स्मपंक्तयः सन्ति ॥ ९ ॥

यत्र च चित्रवितानानि चित्रकविस्तराणि पद्म[illegible] न्यासनानि च पयःफेननिभाः दुग्धफेनतन्मृदुलाः शु[illegible] मुक्तादामानि परिच्छदाः परिकराः यासां ताः ॥ १०[illegible]

यत्र च देव्यः देवानां सम्बन्धिन्यः सुदत्यः [illegible] क्लिष्ध्वनन्निर्नूपुरैः तत्रतत्र शब्दयन्त्यः शब्दं कुर्वत्यो रत्नस्थल[illegible] त्मीयं मुखं पश्यन्ति ॥ ११ ॥

तस्मिन्नेवंभूते महेन्द्रस्य भवनेऽधिवस[illegible] अत्याहतमकृत्यः अतएव निर्जितो लोक[illegible] राजा ऊर्जितमधिकं चण्डं तापकं शासनं यस्य[illegible] पितैः सुरादिभिर्वन्द्यावङ्घ्रीयस्य तादृशो दे[illegible]

अङ्ग हे युधिष्ठिर ! उरुतान्धिनोऽग्रगन्धेन[illegible] मतएव विघूर्णे निघूर्णित ताम्रे अक्षिणी[illegible] बलस्य देहबलस्य ओजसः इन्द्रियबलस्य [illegible] मिर्विना ब्रह्मविष्णुशिवैर्विना अन्ये स[illegible] तद्[illegible] कपाणिभिरुपासत उपासितवन्तः ॥ १[illegible]

उपासनाप्रकारमेवाह— जगुरिति [illegible] महेन्द्रस्यासनमास्थितमधिष्ठितं तं दैत्यं[illegible] यस्य जगुर्गानमकुः, तद्गुणान् जगु[illegible] ऋषयश्च विद्याधरा अप्सरसश्च मुहु[illegible]॥ १४ ॥

स एवाऽसुरो वर्णाश्रमनिष्ठैर्ब्राह्मण[illegible] देक्षिणा येषु तैः क्रतुभिर्मुहुर्मुहुरि[illegible] हविर्भागानग्रहीत् ॥ १५ ॥

तस्यासुरस्य सम्बन्धिनी [illegible] त्या कर्षणेन विना फलिन्य[illegible] देवता यथाकामं यथे[illegible] मभूत् तथा नभः अन्तरिक्षं[illegible] भविचित्रवस्तुप्रदमभूत् ॥ १६ ॥

———

श्रीमद्विज[illegible]

सोपानमारोहावरो[illegible] ॥

वितानमुपरिविभा[illegible]

शुद्धीः भ्रंशास्तस्तपंक्तयः [illegible] ॥ १२ ॥

[illegible] दिदेवानामेवमन्नभोगविवक्षया त्रिधा [illegible] सिद्धेः, तदुक्तम्—

" आदित्या वसवो रुद्रास्त्रिविधा हि सुरा यतः ।
मरुतश्चैव विश्वे च साध्याश्चैव च तद्गुणाः ॥
अनन्ताश्च इति प्रोक्ताश्चत्वारो मानुषाः स्मृताः ।
उपानयनं ददुः सर्वे विना देवान् हिरण्मयके " ॥

इति वचनात् न ब्रह्मविष्णुमहेश्वरैरित्यर्थो ग्राह्यः किञ्च-[illegible] तात्पर्यं तथा हि, त्रिविधा देवाः, यज्ञभागभुजस्तदभुज इति. प्रथमे त्रिधा भिन्ना जातिभिन्नत्वान्मन्त्राह्वाने समूहनाग-[illegible], परमेषु सुरशब्दमात्रं वर्तते, तदन्तेवासिवद्वर्तमानाः—

" अयज्ञभागेष्वपि तु सुरशब्दः प्रयुज्यते ।
यज्ञभागभुजस्तेष्व त्र इत्यभिशब्दिताः " ॥

[illegible] वचनादयं विशेषः कल्प्यत इति इतोऽन्यत्र भिन्नमन्यथा [illegible] उच्यत इत्यङ्गीकर्तव्यम्. दैत्यस्य देवोपास्यत्वं देवानां [illegible] यशोभाजामयशः क्यास्तदनुपपन्नम् प्रमाणविरोधात्-[illegible] उभयभाक्त्वामितीश्वरकल्पमिदंमिति—

[illegible] यत्र क्व यशः स्थानमन्येषामिति कथाच ।
[illegible]पि तु देवानामित्यन्यान्पूजयेत् कश्चित् " ॥

[illegible] ' योगः सन्नहनः ' इत्यभिधानाद्योगमादिनानोपाय-[illegible] १३ ॥ १४ ॥ १५ ॥

[illegible] उलेखनमन्तरेण सस्यादिपरिपाकोपेता ॥ १६ ॥

———

[illegible]श्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

[illegible]पाणिभिरुपासत त्रिभिः ब्रह्मविष्णुरुद्रैर्विना [illegible]—१४—१५ ॥

[illegible] अपि तस्य राज्ये महातपभूतयोऽकृष्टपच्य-[illegible] [illegible]मयादेव अन्यथा महादीनां तत्क-[illegible] [illegible] तत्क्रमेत न तादृकप्रभाव आसीत् [illegible] भृग्वादीनां तेजः प्रथमभवा-[illegible] [illegible] १६ ॥

———

[illegible]कृतसिद्धान्तप्रदीपः

त्रैलो[illegible]आश्रयम् यत्र महेन्द्रभवने विद्रुमाणां सोपानाः [illegible]

पद्मराग[illegible] सदासनानि ॥ १० ॥

पयःफेना[illegible] शय्याः मुक्तादामानि परिच्छदाः परिकराः या[illegible] ॥ ११ ॥

प्रतापितः प[illegible] वन्दितमङ्घ्रियुगं यस्य सः ऊर्जितमधिकं [illegible] यस्य स तं ॥ १२ ॥

हे अङ्ग ! तं [illegible] पद्माश्रयम् उरुगन्धिना बहुगन्धेन मधुना [illegible] विघूर्णिते ताम्रवर्णे

रत्नाकरश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः ।
क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥ १७ ॥
शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान् द्रुमाः ।
दधार लोकपालानामेक एव पृथग्गुणान् ॥ १८ ॥
स इत्थं निर्जितककुबेकराड् विषयान् प्रियान् ।
यथोपजोषं भुञ्जानो नातृप्यदजितेन्द्रियः ॥ १९ ॥
एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः ।
कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः ॥ २० ॥
तस्योग्रदण्डसंविग्नाः सर्वे लोकाः सपालकाः ।
अन्यत्रालब्धशरणाः शरणं ययुरच्युतम् ॥ २१ ॥
तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः ।
यद्गत्वा न निवर्तन्ते शान्ताः संन्यासिनोऽमलाः ॥ २२ ॥
इति ते संयतात्मानः समाहितधियोऽमलाः ।
उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अस्त्रिणी यस्य तम् त्रिभिर्हरिविरञ्चिहरैर्विना अखिलाधिपपाः उपायनयुक्तपाणिभिरुपासत ॥ १३ ॥

उपासनप्रकारं वर्णयति--जगुरित्यादिना ॥ १४—१५ ॥

अकृष्टपच्या कर्षणं विनैव सस्यसम्पत्त्या ॥ १६ ॥

———

भाषाटीका ।

जिस भवन में मूंगा की सीढ़ी मरकतमणी की भूमि स्फटिक मणिके चौंतरे वैडूर्यमणी की खंभों की पंक्तियां हैं ॥

और जहां पर विचित्र चँदेवा तन रहे पद्मरागमणि के आसन हैं ॥ दुग्ध के फेन के सदृश शय्यायें, मौतियों की मालाओं के सब परिकर जिनके ऐसी शब्दायमान नूपुरों से जहां तहां शब्द करती हुई सुंदर दंतपंक्तिवाली अपने मुख को रत्नस्थली में देख रही हैं ॥ १०—११ ॥

उस महेन्द्रभवन में महाबली लोकों के जीतने वाला एक-राट् सुरादिकों से वंदितचरणयुगल प्रचण्डशासन हिरण्यकशिपु रमण करता भया ॥ १२ ॥

हे राजन् ! बड़े सुगन्धि मधुले मत्त, निकलेहुए लाल नेत्र जिसके ऐसे उस हिरण्यकश्यप को ब्रह्मा विष्णु महादेव को छोड़कर और सब लोकों के अधिपति हाथों में भेट लेलेकर उपासना करते थे। क्योंकि वह तप योग बल पराक्रम का एकही आश्रय था ॥ १३ ॥

हे पाण्डव ! जब अपने पराक्रम से वह इन्द्रासनपर बैठा तब विश्वावसु तुंबुरु और अस्मदादिक तथा गन्धर्व सिद्ध ऋषि विद्याधर और अप्सरा आदि हम सब लोग उसी का गान करते थे ॥ १४ ॥

उस समय वर्णाश्रम वाली प्रजाओं भूरि दक्षिणावाले यज्ञों से वही पूजित होकर अपने तेज से यज्ञ के भागों को ग्रहण करता था ॥ १५ ॥

उसके राज्य में भूमि बिना कमाई हुई फल को देती थी स्वर्ग भी कामनाओं को पूर्ण करता रहा और आकाश नाना आश्चर्य वाला होगया ॥ १६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्पत्न्यो नद्यः ऊहुर्वहन्तिस्म रत्नाकरानेवाह--क्षारेति ॥ १७ ॥

आक्रीडं क्रीडास्थानम् द्रुमाः सर्वेषु ऋतुषु गुणान् पुष्पफलादीन् स च लोकपालानामुपलक्षितान्गुणान्वर्षणदहनशोषणादीनेकएव दधार ॥ १८ ॥

निर्जिताः ककुभो येन यथोपजोषं यथाप्रीति ॥ १९ ॥

(ॐ नमो भगवते तुभ्यम्पुरुषाय महात्मने ।
विशुद्धानुभवानन्दसन्दोहाय यतोऽभयम् ॥ ० ॥)
तेषामाविरभूद्वाणी अरूपा मेघनिस्वना ।
सन्नादयन्तीककुभः साधूनामभयङ्करी ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महान्कालः एकसप्ततियुगानि किञ्चिदधिकानि [illegible] ॥ २१ ॥ २२ ॥ २३ ॥

अरूपा वक्तृरहिता ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रत्नाकराः समुद्राः तत्पत्न्यो गङ्गादिनद्यश्च [illegible] रत्नैः रत्नसमूहानूहुः प्रापयामासुः रत्नाकरानेव [illegible] सीधुः सुरा माध्वीमिक्षुरसः अमृतं शुद्धं क्षारादिम [illegible] येषां ते क्रमोऽत्र न विवक्षितः ॥ १७ ॥

शैलः पर्वतः जात्यभिप्रायमेकवचनम् द्रोणीभिः [illegible] मान् दधार कथंभूतान् सर्वर्तुषु वसन्तादिषु षट्सु सर्व [illegible] गुणाः फलपुष्पादयो येषां तानाक्रीडान् क्रीडास्थानान् [illegible] सर्वर्तुषु सर्वान् वृक्षान्, सफलपुष्पानेव दधारेत्यर्थः । तदेव [illegible] यति-लोकपालानां तदाधिपत्यवेलायामित्यर्थः । एको द्रुमः [illegible] न्मादिकालनियमेन पृथग्गुणान् फलपुष्पादीन्दधार अस्य [illegible] धिपत्ये अनियतकालं सर्वान्गुणान् दधारेत्यर्थः । यद्वा अयम [illegible] एक एव सर्वेषां लोकानां पृथग्गुणान् प्रतिनियतान्गुणा [illegible] दधार सर्वेषामाधिपत्यमेक एव चकारेत्यर्थः ॥ १८ ॥

इत्थं निर्जिताः ककुभो दिशो येन स दैत्यः एक एव राजा [illegible] सन् यथोपजोषं यथाप्रीति प्रियानिष्टान्विषयाननुभवन्नपि नातृप्यत् [illegible] तृप्तवान् यतोऽयमजितेन्द्रियः ॥ १९ ॥

इत्थमैश्वर्येण मत्तस्याऽतएव दृप्तस्याऽतएव च उच्छास्त्रवर्तिनः वैदिकमार्गाननुवर्तिनः, उत्पथप्रतिपन्नस्येत्यर्थः । ब्रह्मशापं सनकादीनां शापमुपेयुषः प्राप्तवतः महान् कालो बहुवर्षात्मकः कालः व्यतीयाय अतिक्रान्तोऽभूत् ब्रह्मशापमुपेयुष इत्यनेन तज्जन्मावसानकालः प्राप्त इति सूच्यते ॥ २० ॥

तदेव वक्तुं भक्तिमिर्त तावदाह—तस्य दैत्यस्योग्रदण्डेनोग्रशासनेन संविग्नाः भीताः सपालकाः सर्वे लोकाः अन्यत्राऽलब्धं शरणं निवासस्थानं यैस्ते अच्युतं भगवन्तं शरणं ययुः प्राप्ताः अन्यत्रालब्धशरणा इत्यस्यानन्यशरणा इति वार्थः । पूर्वं दैत्यतपःपीडितानामनुपशमनाय ब्रह्माणं शरणमुपगम्य वरप्रदानेन स्वामिष्टमेव चक्रुः पुनस्तदनिष्टपरिहारे ब्रह्मणापि कर्तुमशक्य इत्यालोच्याऽनन्यशरणा भगवन्तमेव शरणं ययुरित्यर्थः ॥ २१ ॥

शरणवरणप्रकारमेवाह—तस्या इति । तस्यै काष्ठायै दिशे नमः काष्ठां निर्दिशन्ति, यत्रेति । यत्र यस्यां काष्ठायामीश्वरः सर्वनियन्ता हरिराश्रितार्तिहरो भगवानास्ते शान्ताः रागादिरहिताः अत एव शुद्धान्तःकरणाः संन्यासिनः न्यासविद्यानिष्ठाः यत् याञ्च काष्ठां गत्वा प्राप्य न निवर्तन्ते पुनर्नावर्तन्ते न पुनः संसरन्ति तस्यै काष्ठायै नमः इति यस्यां दिशि प्रणतार्तिहरो भगवानास्ते [illegible]ऽस्मद्रक्षणोपाय इत्यध्यवसायपूर्वकं भगवन्तं शरणं [illegible]:, काष्ठायै नम इति दिक्शरणवरणकथनेन देवानामपि भगव[illegible]रूपं दुर्ग्रहमिति सूचितम् ॥ २२ ॥

[illegible] इत्थं ते देवाः संयतात्मानः स एव भगवान् रक्षिष्यतीति [illegible]ऽभयुक्तमनसः समाहितधियः यद्वा संयतात्मान इति बाह्य[illegible] उक्तः, समाहितधिय इत्यनेनान्तरिन्द्रियजयः, वायु[illegible] इत्यनेन प्राणजयः, निनिद्रा इत्यनेन कायजयः एवं[illegible]षीकेशमुपतस्थुस्तुष्टुवुः वक्ष्यमाणं मन्त्रं जपुर्वा ॥ २३ ॥

[illegible]ते षाड्गुण्यपूर्णाय पुरुषाय सर्वान्तरात्मने महात्मने [illegible]पायुक्त आत्मा मनो यस्य तस्मै विशुद्धः अनुभवो [illegible]न्दः सुखं तयोः सन्दोहः पूरः तद्रूपाय यतः यत्समा[illegible]तानामभयं तस्मै नमः ॥ ० ॥

[illegible]नामेवमुपतिष्ठतां वाणी शब्द आविरभूत् [illegible] अरूपा अदृष्टवक्तृका मेघनिस्वना मेघघोषतुल्या [illegible] सन्नादयन्ती प्रतिध्वनयन्ती साधूनामभय-

———

[illegible]ध्वजतीर्थकृतपदरत्नावली ।

[illegible]द्राणां पत्न्यो नद्यः क्षारं लवणम् ॥ १७ ॥ १८ ॥

[illegible]म् ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

[illegible] भवति तस्मा इति अरूपा अशरीरिणी ॥२४॥

———

[illegible]चक्रवर्तिकृतसारार्थदर्शिनी ।

[illegible] तेनैवाह—क्षारेति । आक्रीडं क्रीडास्थानः

का[illegible] हरिरस्तीति सर्वेश्वरास्यासुरतेजोग्रस्तत्वात् [illegible] गत्वा तं स्तुमहे इति भावः । यद्वा तस्मै उत[illegible] हरिरिति अन्यं सर्वं पर्यायकर्याः

* श्लोकोऽयमधिकः पाठः । विज० वीर० ।

माभैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ।
मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥ २५ ॥
ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य च ।
तस्य शान्तिं करिष्यामि कालं तावत् प्रतीक्षत ॥ २६ ॥
यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु ।
धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥ २७ ॥
निर्वैराय प्रशान्ताय स्वसुताय महात्मने ।
प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥ २८ ॥

नारद उवाच ।

इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः ।
न्यवर्तन्त गतोद्वेगा मेनिरे चासुरं हतम् ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अनेनासुरेण जिता इति भावः "काष्ठोत्कर्षे स्थितौ दिशि" इत्यमरः ॥ २२—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्पत्न्यः नद्यः ऊहुः प्रापयामासुः, रत्नाकरानाह—क्षारेति, क्षारादीन्युदकानि येषां ते तत्र सीधुः सुरा क्षौद्रमिक्षुरसः अमृतं शुक्रम ॥ १७ ॥

आक्रीडं क्रीडास्थानम् पुष्पफलादीन् ॥ १८ ॥

निर्जिताः ककुभो दिशो येन सः यथोपजोषं यथाप्रीति विषयान् भुञ्जानोऽपि नातृप्यत यतोऽजितेन्द्रियः ॥ १९ ॥

उत्क्रान्तवर्तिनः शास्त्रमुल्लङ्घ्य वर्तमानस्य ॥ २०—२१ ॥

काष्ठायै दिशे संन्यासिनः सम्यक् न्यासः [illegible]विषमरस्य भगवति [illegible] यां सोऽस्ति येषान्ते भगवत्प्रपन्नाः [illegible]—२३ ॥

सुरुपा वक्तृमूर्तिदर्शनरहिता हे विबुधश्रेष्ठाः [illegible] २४ ।

भाषा टीका ।

समुद्र और नदी भी रत्नों के समूह को अपनी लहरों से फैंकने लगीं समुद्रों से खारा मदिरा घृत [illegible] दधि दुग्ध अमृत और जल जो चाहो सो मिलनेलगा ॥ १७ ॥

और उस समय पर्वत भी गुहाओं में क्रीड़ास्थान को धारण करते हुए, वृक्ष सब ऋतुओं के गुणों को धारण करने लगे तथा हिरण्य कशिपु भी एकही पृथक् २ सबलोक पालों के गुणों को धारण करने लगा ॥ १८

यह हिरण्यकश्यप इस तरह सर्व दिशाओं को जीतकर यथेष्ट प्रिय विषयों को भोगता हुआ भी तृप्त न हुआ क्योंकि? अजितेन्द्रिय था ॥ १९ ॥

ऐसा ऐश्वर्य में मत्त शास्त्र को छोड़कर वर्तनेवाले विप्र शाप को प्राप्त करनेवाले उस हिरण्यकश्यप का बहुत काल व्यतीत होगया ॥ २० ॥

उसके उग्र दंड से उद्विग्न होकर सबलोक लोकपाल अन्यत्र कहीं स्थान को न प्राप्त होकर गोविन्द के शरण गये ॥ २१ ॥

और ऐसा बोले, कि—उस दिशा को नमस्कार है जिसमें हमारा ईश्वर हरि है जहां आकर शान्त सन्यासी लोग फिर नहीं निवृत्त होते हैं ॥ २२ ॥

इस प्रकार मनको रोक बुद्धि को समाहित कर हृषीकेश भगवान् का उपस्थान करनेलगे हैं कैसे कि? रात दिन जिन को निद्रा नहीं आती और वायु का भोजन करते हैं ॥ २३ ॥

तब उन लोगों को मेघ सदृश शब्दवाली, साधुओं को अभय देनेवाली दिशाओं में नाद करती हुई, भगवान् की वाणी सुनपड़ी ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मम दर्शनं भवतां सर्वेषां श्रेयसामुपपत्तये भवति ॥ २५ २६ ॥ २७ ॥

ननु, देवादिविद्वेषेऽप्यस्य विनाशो नास्ति ब्रह्मवरोर्जितत्वात्तत्राह—निर्वैरायेति । सर्वमहं सहे न मद्भक्तद्रोहमिति भावः ॥२८

असुरञ्च हतं मेनिरे तदानीं तद्वधे प्रवृत्तत्वादिति भावः ॥२९

तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः ।
प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ॥ ३० ॥
ब्रह्मण्यः शीलसम्पन्नः सत्यसन्धो जितेन्द्रियः ।
आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः ॥ ३१ ॥
दासवत्सन्नतार्याङ्घ्रिः पितृवद्दीनवत्सलः ।
भ्रातृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः ।
विद्याऽर्थरूपजन्माढ्यो मानस्तम्भविवर्जितः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमेव द्वेष्टुं वक्तुमादौ सुतस्य महत्त्वमाह–तस्येति । गुणैर्महानभूत्, गुणानेवाह, महदुपासक इत्यादिना ॥ ३० ॥

सत्या सन्धा प्रतिज्ञा यस्य एकएव प्रियश्च सु...

दासवत्सम्यङ्नता आर्याणामङ्घ्री येन गुरु... भावना यस्य ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वाणीमेवाह—मा भैष्टेति । हे विबुधश्रेष्ठाः ! यूयं मा... माकुरुत वो, युष्माकं सर्वेषां भद्रं सुखमेवास्तु हि यस्... दर्शनं कृत्स्नानां भूतानां श्रेयसे उपपत्तये प्रासये भवति ॥ २५ ॥

दैतेयाधमस्य तस्य हिरण्यकशिपोर्दौरात्म्यं त... त्वं विदितमेव तस्य दैत्यस्य शान्ति वधं करिष्यामि कालः त... वितकालस्तावत्प्रतीक्षन्तां किञ्चित्कालविलम्बं सहध्वमित्यर्थः ॥ २६ ॥

कोऽसौ तद्वधोचितः कालः ? तत्राह—यदेति । यस्मिन् काल... देवादिषु तस्य नितरां द्वेषस्तदा स आशु विनश्यति ॥ २७ ॥

ननु, देवादिषु विद्वेषेऽपि न तस्य नाशः, कथम् ? ब्रह्मवरेणोर्जितत्वादित्यत्राह—निर्वैरायेति । यदा प्रह्लादाय द्रुह्येत्तदा वरेणोर्जितमपि हनिष्ये हनिष्यामि कथम्भूताय महात्मने अहमेवात्मा यस्य स महात्मा तस्मै निर्वैराय सर्वभूतसुहृदे प्रशान्ताय रागादिरहिताय स्वहस्तात्मजाय निरतिशयप्रियसकलावहाय यदा द्रोहं कुर्यात्तदा तस्मिन्नेव तदा हनिष्यामि मद्भक्तविषयापराधस्य मम नितरामसह्यत्वादिति भावः ॥ २८ ॥

इतीत्थं लोकगुरुणा भगवता उक्ताः दिवौकसो देवाः भगवन्तं प्रणम्य गतोद्वेगाः गत उद्वेगो भयं येषां तादृशाः सन्तो न्यवर्तन्त, भगवदुपस्थितेरितिशेषः । असुरं हिरण्यकशिपुं हतप्रायञ्च मेनिरे अमन्यन्त ॥ २९ ॥

तस्य पूर्वमेव विप्रशापमुपेयुषः उचितकाले हनिष्यामीत्येवंविधभगवत्सङ्कल्पविषयस्य दैत्यपतेर्हिरण्यकशिपोः परमाद्भुताश्चत्वारः प्रह्लादानुह्लादसंह्लादह्लादाख्याः पुत्रास्तेषां मध्ये प्रह्लादो गुणैरक्रोधादिभिर्महानभूत् माहात्म्यावहगुणोक्तं विशिनष्टि, महदुपासकत्वाविना महतां भागवतानामुपासकः भागवतमात्रोपसेवी भगवद्भक्तिनिष्ठः इयमेव भगवद्भक्तेः परा काष्ठेति भावः ॥ ३० ॥

ब्रह्मण्यः ब्राह्मणकुले साधुरनुकूलो ब्रह्मण्यः यद्वा ब्रह्मणि परमात्मनि साधुः ब्रह्मण्यः शीलेन सुस्वभावसद्वृत्त्यात्मकेन युक्तः सत्यसन्धः सत्यप्रतिज्ञः जितानि इन्द्रियाणि मनसा वशीकृतानि येन सः ...भूतानामात्मना तुल्यमात्मवत् एकएव असाधारणः प्रियतमः सुहृच्च प्रियसुहृत्तमः आत्मा यथा प्रियतमः स्वहितैकैषी च ...पि सर्वभूतविषयकप्रीतियुक्तस्तद्धितैषीत्यर्थः ॥ ३१ ॥

...सम्यङ्नताः नमस्कृताः आर्याणां महतामङ्घ्रयो येन पितृ...वात्सल्ययुक्तः भ्रातृवत्सदृशेषु स्वतुल्येषु स्निग्धोऽनुरा...रुषु ईश्वरत्वेन भावना अस्त्यस्य विद्यादिभिर्हेतुभि...ो गर्वो स्तम्भश्च ताभ्यां विवर्जितः सत्रार्थौ वित्तं रूपं ...जन्माभिजात्यमाद्यशब्दः प्रकारार्थः विद्यादिसद्भा...नादिनिमित्तं विवर्जितम् ॥ ३२ ॥

———

...मद्विजयध्वजतीर्थकृतपदरत्नावली ।

...प्रयागत ॥ २५ ॥ २६ ॥

... विद्वेषः स आशु साधननाशमवाप ॥ २७ ॥ २८ ॥

...त—

...माऽयं नु किञ्चनास्यमुदीरितम् ।
... नु सन्धार्योतिशास्त्रस्य निश्चयम्"
... एकपद तात्पर्यादवगन्तव्यम् ॥ ३१ ॥

... अभिमानानिमित्तस्तम्भदोषरहितः ॥ ३२ ॥

———

...स्वामिकृतक्रमसन्दर्भः ।

तद... नुभवः ॥ २५ ॥ २६ ॥

यदा ... स्यात् तदा स वै प्रणिष्टो भवेव नश्यति ॥

नोद्विग्नचित्तो व्यसनेषु निःस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् ।
दान्तेन्द्रियप्राणशरीरधीः सदा प्रशान्तकामो रहितासुरोऽसुरः ॥ ३३ ॥
यस्मिन्महद्गुणा राजन् गृह्यन्ते कविभिर्मुहुः ।
न तेऽधुनापि धीयन्ते यथा भगवतीश्वर ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तथाप्ययमुत्तरत्रारब्धप्रभावमपि सम्प्रति वरोर्जितमपि तं स्वयमहमेव हनिष्यामि । किन्त्वहमपि तत्प्रभावलोपकच्छिद्र-विशेषं प्रतीक्षमाणोऽस्मीत्याह निर्वैरायेति ॥ २८—३५ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मद्दर्शनं हीति यस्मान्मद्दर्शनं यावदेव न भवति तावदेव युष्माकं दुःखमिति भावः ॥ २५—२७ ॥

ननु, ब्रह्मवरोर्जितोऽयं बहुकालेन एव देवादीन् द्विषन्नपि नैव नश्यति तत्राह-निर्वैरायेति । सर्वमहं सहे न भक्तद्रोहमिति भावः ॥ २८—३१ ॥

सम्यक् नता आर्य्याणां अङ्घ्रयो येन सः गुरुष्वीश्वरबुद्धिमनं गौरवेणेव श्रीभगवन्मन्त्रोपदेशके गुरावित्यर्थः । रहित आसुरो भावो मत्सरादिर्यस्य सः ॥ ३२—३३ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विबुधश्रेष्ठत्वमत्र भगवद्विषयकज्ञानवत्त्वं हि मज्ज्ञानवन्त इत्यर्थः । अतो माभैष्ट यतो मद्दर्शनं मज्ज्ञानं सर्वश्रेयसामुपपत्तये भवति सर्वश्रेयोपपत्तये इत्यत्र मा भैष्टेत्यर्थः ॥ २५—२६ ॥

यदा यस्य देवादिषु विद्वेषस्तदा स आशु विनश्यति देवादिकोऽप्येवेति भावः ॥ २७ ॥

यदा तु मद्भक्तेषु यस्य विद्वेषस्तदा भक्तानां समदर्शिनां क्रोधादिविकाराभावात् मद्भक्तद्रुहं हन्ताऽहमित्याशयेनाह- निर्वैरायेति ॥ २८—२९ ॥

निर्वैरायेति निर्वैरमित्यनेन संसूचितो भगवता वर्णितान् प्रह्लादगुणान् मुनिर्विस्मरन्वर्णयति--तस्येत्यादिभिः ॥ ३० ॥

शब्दब्रह्मपरब्रह्मणोर्ब्रह्मणो हितकृत् ब्रह्मण्यः सत्यसन्धः सत्यप्रतिज्ञः सर्वभूतानामात्मवत् एक एव प्रियः सुहृत् ... दासवद्वृजनानाम् आर्याणां श्रेष्ठानामङ्घ्रयो येन गुरुषु ईश्वरमन्त्र... ईश्वरवद्भावना यस्य सः ॥ ३१—३२ ॥

———

भाषा टीका ।

वाणी बोली, कि—हे देवता लोगों ! भय मतकरो तुम्हारा मङ्गल हो हमारा दर्शन प्राणियों की सर्व मङ्गल की सिद्धि के लिये होता है ॥ २५ ॥

दैत्यों में भी इस हिरण्यकश्यप की दुरात्मता मैं जानचुका तिसकी शांति मैं करूंगा तब तक कुछ काल की प्रतीक्षा करो ॥ २६ ॥

जिस समय यह देवताओं में वेदों में गौ ब्राह्मण और साधुजनों में तथा धर्म में और मेरे विषय में द्वेष करने लगेगा तब वह शीघ्र ही नष्ट होजायगा ॥ २७ ॥

निर्वैर प्रशान्त अपने पुत्र माहात्मा प्रह्लाद से जब द्रोह करेगा वस कैसे भी वरों से बढा हो मैं उसी समय उसको मारूंगा ॥ २८ ॥

॥ नारद उवाच ॥

नारदजी बोले, कि- देवताओं को लोक गुरु गोविन्द की जब एसी आज्ञा हुई, तब उद्वेग को छोडकर गोविन्द को प्रणाम कर वहां से लौटे और असुरको तो मरा समुझने लगे ॥ २९ ॥

उस दैत्य पति के परम अद्भुत चार पुत्र थे उन सब में प्रह्लाद गुणों से बडा था और महात्माओं की उपासना करने वाला था ॥ ३० ॥

और ब्रह्मण्य शील सम्पन्न सत्य प्रतिज्ञा वाला जितेन्द्रिय-तथा आत्मा के सदृश सर्व प्राणियों का एक प्रिय और सुहृतम भी था ॥ ३१ ॥

और श्रेष्ठजनों के चरणों का दासवत् सेवक, और दीनों का पितृवत् परिपालक, सदृश लोगों में भ्राता के तुल्य स्नेह वाला तथा गुरजनों में ईश्वर भावना वाला विद्यार्थ रूप श्रेष्ठ जन्म युक्त और मान गर्व से वर्जित था ॥ ३२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यसनेषु प्राप्तेष्वपि नोद्विग्नचित्तः दृष्टेषु श्रुतेषु गुणेषु विषयेषु निःस्पृहः यतस्तेष्ववस्तुदृक् दान्ता इन्द्रियादयो यस्य रहित आसुरो भावो मत्सरादिर्यस्य सः असुरोऽपि सन् प्रशान्तकामः ॥ ३३ ॥

यं साधुगाथासदसि रिपवोऽपि सुरा नृप ! ।
प्रतिमानं प्रकुर्वन्ति किमुतान्ये भवादृशाः ॥ ३५ ॥
(१) गुणैरलमसङ्ख्येयैर्माहात्म्यं तस्य सूच्यते ।
वासुदेवे भगवति यस्य नैसर्गिकी रतिः ॥ ३६ ॥
न्यस्तक्रीडनको बालो जडवत्तन्मनस्तया ।
कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ॥ ३७ ॥
आसीनः पर्यटन्नश्नन् शयानः प्रपिबन्ब्रुवन् ।
(२) नाऽनुसन्धत्त एतानि गोविन्दपरिरम्भितः ॥ ३८ ॥
क्वचिद्रुदति वैकुण्ठचिन्ताशबलचेतनः ।
क्वचिद्धसति तच्चिन्ताह्लाद उद्गायति क्वचित् ॥ ३९ ॥
नदति क्वचिदुत्कण्ठो विलज्जो नृत्यति क्वचित् ।
क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अधुनाऽपि ते गुणा नापिधीयन्ते तिरोहिता न भवन्ति ...

साधुगाथासदसि साधुकथाप्रसङ्गवत्यां सभायां ... प्रह्लादम् प्रतिमानं दृष्टान्तम् रिपवोऽपि सुराः कुर्वन्ति ... कथं भवादृशा विष्णुभक्ताः ॥ ३५ ॥

सूच्यते मया केवलं द्योत्यते सुष्ठु कथ्यत इति वा ॥ ३६ ॥

नैसर्गिकरतेर्लिङ्गान्याह—न्यस्तक्रीडनक इति षड्भिः । तन्मनस्तया तदेकचित्तत्वेन ॥ ३७ ॥

एतान्यासनादीनि गोविन्देन परिरम्भित आत्मना एकीकृतः ॥ ३८ ॥

रुदति रोदिति रौति वैकुण्ठस्य चिन्तया शबला व्यामिश्रा क्षुभिता चेतना यस्य तस्य चिन्तयाऽह्लादो यस्य ॥ ३९ ॥

क्वचिदुत्कण्ठो मुक्तकण्ठः सन् अनुचकार तच्चेष्टादिकं यं कृतवान् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

व्यसनेषु दुःखहेतुषु नोद्विग्नमभीतं चित्तं यस्य दृष्टेष्वैहिकेषु श्रुतेष्वामुष्मिकेषु च स्वर्गस्वाराज्यादिषु गुणेषु विषयेष्ववस्तुदृगनित्यबुद्धियुक्तोऽत एव तेषु स्पृहादिरहितः सदा दान्ताः नियमेन वशीकृताः इन्द्रियादयो यस्य प्रशान्ताः कामा यस्य, निःस्पृह इत्य... ...सिद्धेषु विषयेषु इच्छाराहित्यमुक्तम्. प्रशान्तकाम इत्यनेन ...हितेच्छत्वतो न पौनरुक्त्यं. स्वयमसुरोऽपि रहितासुरः ...आसुरभावरहितः ॥ ३३ ॥

...जन् ! यस्मिन् प्रह्लादे गुणा उक्ता वक्ष्यमाणा अन्ये च ...मुहुर्मुहुर्यथा भवति तथा गृह्यन्ते बहुमन्यन्त इत्यर्थः । ...क्रियाविशेषणमन्यथा सामानाधिकरण्यासम्भवे ...त्वापत्तिः महतः प्रह्लादस्य गुणा इत्यर्थे यस्मिन्... ...त्वापत्तिः महतां गुणा इति वा, ते गुणाः अधु... ...पिधीयन्ते न तिरोहिता भवन्ति, न विस्मृता ...र. यथा भगवतीश्वरे गुणाः पुनःपुनः कथ्य... ...यन्ते तद्वत् ॥ ३४ ॥

...ष्ठिर ! साधुगाथासदसि साधुकथाप्रसङ्गव... ...रिपवः शत्रवोऽपि यं प्रह्लादं प्रतिमानं ... ...र्वन्ति किं पुनर्भवादृशा अन्ये प्रतिमानं ...

...ङ्ख्येयैर्गुणैस्तस्य माहात्म्यं सूच्यते, न ...र्णयितुं शक्या इति भावः । अलमिति ... ...यं सूच्यते. मया त्रिकमात्रं गुणप्रदर्शन... ...भावस्य माहात्म्यमित्युच्यत इत्यर्थः । ...वर्णितानपि—वासुदेवेति. यस्य प्रह्ला... ...र्गिकी स्वाभाविकी उत्पत्तिसिद्धेत्यर्थः । ...तां वासुदेवस्यैवानन्तमाहात्म्यमभिन... ...भावः ॥

मा... पाठे... नेन म... अपार... वस्य व... रतिः ... भावः ॥

(१) गुणैः परमसंख्येयैः इतिपाठान्तरम्—वीर० (२) नाऽनुसन्धत्त ... वीर० विज० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नैसर्गिकलिङ्गानि वदन्निर्दिशति—न्यस्तेत्यादिषड्भिः। बाल एव बाल्यात्प्रभृतीत्यर्थः। तन्मनस्कतया भगवद्गतहृदयत्वेन न्यस्तक्रीडनकः परित्यक्तबालक्रीडः कृष्णग्रहः श्रीकृष्ण एव ग्रहस्तेन गृहीत आत्मा मनो यस्य, ग्रहगृहीतवद्वर्तमान इत्यर्थः । अत एव जगदीदृशं न वेद बाह्यवस्तुविषयकचिन्तारहित इत्यर्थः ॥ ३७ ॥

एतदेव प्रपञ्चयति—आसीन इति । आसनाद्यवस्थास्वस्थितोऽपि एतान्यासनादीनि नानुसन्दधे नानुसंहितवान् तत्र हेतुर्यतो गोविन्देन भगवता परिरम्भितः संश्लिष्टः गोविन्दानुसन्धानरूपतत्परिरम्भविस्मृतदेहधर्म इत्यर्थः ॥ ३८ ॥

क्वचिद्गोविन्दानुसन्धानविच्छेदवशायां रुदति रोदिति प्राप्यत्वाच्छत्रलुक्, इद्गुणाभावश्च. गोविन्दचिन्तया शबला व्यामिश्रा क्षुभिता चेतना बुद्धिर्यस्य तादृशः क्वचिद्धसति. क्वचित्तच्चिन्तया आह्लादो यस्य तादृश उच्चैर्गायति गोविन्दगुणानिति शेषः ॥ ३९ ॥

क्वचित्तच्चिन्ताह्लादादेव नदति ध्वनति क्वचिदुत्कण्ठः कण्ठोपरिव्याप्तहर्षः विगतलज्जो नृत्यति उत्कण्ठो मुक्तकण्ठस्सन् ध्वनतीति वा क्वचित्तद्भावनया भगवदनुस्मृत्या युक्तस्तन्मयस्तदात्मकः स्वात्मानं तदपृथक्सिद्धत्वेन पश्यन्नपि तदपि तदनुसन्धानेन विस्मृत्य तद्रूपतापत्त्यभिमानेनानुचकारानुकरोति भगवानिव चेष्टते इत्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुणेषु शब्दादिषु शरीरस्य दान्तत्वमुपचारमर्दना रहितासुरः असुरत्वभावकसंसर्गरहितः जात्यासुरः ॥ ३३ ॥

यथा भागवताष्टमस्कन्धेऽपि " अन्येषां हरिस्मास्यन्तु किञ्चित् साम्यमुदीरितम्" इत्यादिप्रमाणमित्यत्रापि ज्ञातव्यमिति ॥३४॥

प्रतिमानं दृष्टान्तम् ॥ ३५ ॥ ३६ ॥

कृष्णाख्यो ग्रहस्तेन वशीकृतमनाः ॥ ३७ ॥

अनुसन्दधे सस्मार ॥ ३८ ॥

तद्भावभावितः तस्य श्रीनारायणस्य ध्यानार्पितः तन्मयस्तत्प्रधानः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

असंख्येयैर्गुणैरलं भाति ते वक्तुं न शक्यामीत्यर्थः । अनन्तस्य माहात्म्यं स्पृश्यते ह्यस्तेन नाश्नम । यद्वा, अनन्तस्यैव बालमत्यर्थ तस्य माहात्म्यं स्पृशन्ति, वक्तुं शक्यत इत्यर्थः । उभयत्र च हेतुः वा... ति ॥ ३३ ॥

तन्मनस्कतयाऽस्पृष्टतया न्यस्तक्रीडनकः तदनन्तरं तथैव जडवत्स्थितः ततः पश्चात् कृष्णग्रहगृहीतात्मा ग्रहेणेव कृष्णेनार्तिग्रहः सन् जगदीदृशं न वेद न ददर्श यथा लोकाः पश्यन्ति न तथा, किन्तु तत्स्फूर्तिमयत्वेनैव ददर्शेत्यर्थः । गोविन्देन परिस्फुरता परिरम्भित इत्यर्थः ॥ ३७ ॥

प्रथमं निजाभियोग स्फुरिते द्वितीये संयोगे एवं वियोगे क्वचिद्रुदति । संयोगे हसति । वियोगे नदति उच्चैराहूयते । संयोगे वियोगे क्वचित्सम्भावना इति ॥ ३८—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

महतो भगवतो गुणाः अप्राकृता धैर्यगाम्भीर्यादयः स्वभावेनैव स्थिताः कविभिर्विवेकिभिर्गृह्यन्ते एते गुणा जीवनिष्ठा न भवन्ति किन्तु भगवदीया एवेति शुद्धैर्मनआदीन्द्रियैर्विषयीक्रियन्ते इत्यर्थः । गुणानां नित्यत्वमाह—ते गुणा अधुना एतत्कालपर्यन्तं नापिधीयन्ते कालकर्मादिभिर्नाच्छाद्यन्ते एतावत्सु कालेषु गतेष्वपि प्रह्लादस्तादृग्गुणविशिष्ट एव वसुतले तथा वैकुण्ठे महावैकुण्ठे च विराजत एवेति भावः ॥ ३४ ॥

प्रतिमानं दृष्टान्तं प्रह्लादतुल्योऽयं भक्त इत्येवम् ॥ ३५ ॥

असङ्ख्येयैः सङ्ख्यातुमशक्यैरेवंगुणैस्तस्याथ कः खलूत्कर्षं इत्यर्थः । अन्ये पुरुषा गुणोत्कर्षयन्तो नाम न तु प्रह्लादस्तस्य तूत्कर्षहेतुरन्यदुत्स्वन्तं वर्तत इति भावः । तदेव किं तत्राह—माहात्म्यं सूच्यते सुष्ठु उच्यते किन्तत् वासुदेव इत्यादि. यद्वा तस्य माहात्म्यं सूच्यते नत अभिधातुमशक्यत्वाद्व्यज्यते मात्रं । कृष्णग्रहगृहीतात्मेत्याद्युत्तरग्रन्थे प्रह्लादिशब्दैरिति भावः । तस्य कीदृशस्येत्यपेक्षायामाह—वासुदेवे इति । नृसिंहाकारे इति केचित् प्रह्लादस्तुत्यनन्तरम् "आविर्बभूव भगवान् पीताम्बरधरो हरिः" इति वैष्णवोक्तेः कृष्णग्रहगृहीतात्मेति गोविन्दपरिरम्भितत्वप्रतीतेश्च वासुदेवे वसुदेवनन्दनाकार एवेत्यन्ये प्रह्लादस्य पूर्वोत्तरदशयोः क्रमेण वासुदेवनृसिंहनिष्ठत्वमित्यपरे नैसर्गिकी रतिरन्येषामिव पूर्वजन्मकृतैः साधनैः सिद्धेत्यर्थः ॥ ३६ ॥

नैसर्गिकरतेर्लिङ्गान्याह—न्यस्तक्रीडनक इति षड्भिः । बालोऽपि त्यक्तबाल्यलीलकस्तन्मनस्तया कृष्णैकाग्रमनस्कत्वेन जड इवान्यैरवधार्यमाणः नत्वान्यभक्तैरिव तेन स्वमनः कृष्णविषयकं कृतं, किन्तु कश्चिद्ग्रहो लोऽस्यं द्रव्यमिव कृष्ण एव यन्मनो गृहीतवानित्याह—कृष्णेति । अत एव जगत् ईदृशं व्यवहारमयं न वेद किन्तु कृष्णमयमेवेत्यर्थः ॥ ३७ ॥

एतानि आसनचर्मभक्ष्यशयनीयपेयवक्तव्यानि नानुसन्धत्ते न जानाति. कुतः ? गोविन्देन परिरम्भितः अतिवत्सलेन पित्रा मात्रा वा एकाब्दिको बालो यथा प्रतिक्षणमेव परिरभ्य क्रोडीक्रियते तथैव प्रह्लादो भोजनशयनादिसमयेऽपि भगवता आलिङ्ग्यते इति प्रह्लाद एव पश्यति नान्य इति भावः ॥ ३८ ॥

ततश्च क्वचिदिति स्वबालकं स्वक्रोडस्थलाद्भूमौ निधाय गृहकृत्यार्थमन्यत्र गतायां मातरि तामनालोच्य स बालो यथा रोदिति तथैव मामधुनैव परित्यज्य मत्प्रभुः क्व गत इति तच्चिन्तया शबला व्यामिश्रा विह्वला चेतना यस्य सः रुदन् रोदिति क्वचिद्धसतीति तदैव पुनः स्फूर्तिप्राप्तेन भगवता प्रह्लाद वत्स ! क्षणमात्रमेव मामनालोक्य कथमेवं रोदिषीत्युक्ते सति हसति चिरात् प्राप्तामातिकर्णी मातरमवलोक्य पुनर्बाल इवेत्यर्थः । तच्चिन्तेति मत्प्रभुर्मामेवं कृपया स्वदर्शनदानेन सुखयतीति चिन्तया आह्लादो यस्य सः ॥ ३९ ॥

नदतीति स्फूर्तिप्राप्तं हरिम् अतिदूरे दृष्ट्वा उत्कण्ठः उच्चैः कण्ठः भोः प्रह्लाद वत्स ! त्वामनालोक्याहं नैव निर्वृतो यतस्त्वमेव ममातिप्रिय इत्युक्तस्सन् आनन्दातिशयेन विवि

क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः ।
अस्पन्दप्रणयानन्दसलिलामीलितेक्षणः ॥ ४१ ॥
स उत्तमश्लोकपदारविन्दयोर्निषेवयाऽकिञ्चनसङ्गलब्धया ।
तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसङ्गदीनान्यमनःशमं व्यधात् ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवं विलज्जो नृत्यति तदैव स्फूर्तिभङ्गे सति तद्विरहखेदाधिक्येन तद्भावनातिशययुक्तः उन्मादभरश्चारिप्राबल्येन अङ्गैरेव हारेरिति तन्मयस्सन् तल्लीलां रामकृष्णाद्यवतारगतामपि अनुचकार अनुकृतवान् ॥४०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

व्यसनेषु आपत्सु नोद्विग्नचित्तः श्रुतेषु पारलौकिकेषु दृष्टेषु ऐहिकेषु च गुणेषु विषयेषु यतोऽवस्तुदृक् अनित्यत्वदर्शी अतो निस्पृहः दान्ताः वशगाः इन्द्रियादयो यस्य सः ॥ ३३ ॥

यथा भगवति तथा यस्मिन् ये महान्तो गुणाः ते कविभिर्विवेकिभिः स्वस्मिन् अधुनापि मुहुर्गृह्यन्ते पुनःपुनः संगृह्यन्ते ते चात्मनि न धीयन्ते अविवेकिभिरात्मनि धारयितुं न शक्यन्त इत्यर्थः ॥ ३४ ॥

हे नृप ! साधूनां गाथायाः गुणकथायाः सदसि समाजे रिपवः सुरा अपि यं प्रह्लादं प्रतिमानमुपमानं प्रकुर्वन्ति अमुकः साधुः प्रह्लादसम इत्येवं दर्शयन्तीत्यर्थः । नहि भवादृशाः साधवः अन्ये रिपुभिन्नाः स्वकीयाश्च प्रतिमानं प्रकुर्वन्तीति किमुत ॥ ३५ ॥

यस्य वासुदेवे भगवति नैसर्गिकी स्वाभाविकी रतिः प्रीतिः तस्य असङ्ख्येयगुणैर्गुणैः पर्याप्तमिति नस्य माहात्म्यं सूच्यते योत्यते गुणास्तु गुरवो वासुदेवे रतिरेव तदैव सर्वे गुणाः सन्ति तदभावे सर्वे गुणा दोषा भवन्ति भावः । उक्तं चैकादशे स्कन्धे "किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः" इत्यादिना ॥ ३६ ॥

तां नैसर्गिकीं वासुदेवे रतिं प्रह्लादस्य वर्णयति भगवत्यादः न्यस्तक्रीडनक इति षड्भिः । तन्मनस्कतया वासुदेवविषयकचिन्तनत्वेन ॥ ३७ ॥

गोविन्देन परिरम्भितः पर्याणि आसनपर्यटनादीनि नानुसन्धत्त न बुबुधे ॥ ३८ ॥

वैकुण्ठचिन्तया शबला मिश्रिता चेतना यस्य सः क्वचिद्रोदिति तस्य गोविन्दस्य चिन्तया ध्यानेनाह्लादो यस्य सः ॥ ३९ ॥

क्वचिदुत्कण्ठः उर्ध्वीकृतकण्ठस्सन् नदति ध्यानेन क्वचित् तन्मयो गोविन्दमयः सन् अनुचकार तल्लीलां स्वयं चकार ॥४०॥

भाषा टीका ।

व्यसन प्राप्त होने पर जिसका चित्त उद्विग्न नहीं होता और सदा निस्पृह रहता तथा दृष्ट श्रुत (देखे सुने हुए) विषय को कुछ वस्तु नहीं समुझता था, इन्द्रिय प्राण शरीर और बुद्धिका दमन करनेवाला सदा प्रशांत कामना वासना और आसुर भाव से रहित था ॥ ३३ ॥

हे राजन् ! जिस प्रल्हाद में बड़े २ गुण थे जिन गुणों को बड़े २ महात्मा लोग ग्रहण करते हैं व गुण प्रल्हाद के अब भी तिरोहित नहीं हैं जैसे कि भगवान श्रीमन्नारायण में ॥ ३४ ॥

हे नृप ! साधु कथा प्रसंगवाली सभा में वैरी जो देवता लोग हैं वो भी जिस प्रल्हादको उत्तम पुरुषों का दृष्टांत बनाते हैं फिर आप सदृश विष्णुभक्तों का तो क्या ही कहना ॥ ३५ ॥

उसके असंख्येय गुणों को तो कहां तक कहैं पर उसके माहात्म्यमात्र की सूचना करते हैं कि जिसकी भगवान वासुदेव के विषे स्वाभाविक प्रीति थी ॥ ३६ ॥

जो कि कृष्ण में मन लगने से जड़ के तरह बालक पने में भी खिलौनों को छोड़ बैठा, और कृष्णरूप ग्रह से ग्रसित हुआ मन जिसका ऐसा प्रल्हाद, जगत् कैसा है वह भी नहीं जानता हुआ ॥ ३७ ॥

बैठे चलते सोते खाते पीते बोलते में भी गोविन्द में पूर्ण प्रीति से चित्त लगजाने से प्रल्हाद को इन सब बातों का अनुसंधान नहीं रहता था ॥ ३८ ॥

वैकुण्ठ भगवान की चिन्ता में [illegible] होगई चेतना जिसकी ऐसा प्रल्हाद कभी रोने लगता कभी हँसने लगता कभी परमात्मा की चिन्ता के आल्हाद से गाने लगता ॥३९॥

किसी [illegible] ऊंचे स्वर से नाद करने लगता कभी निर्लज्ज होकर नाचने लगता [illegible] भावना युक्त होकर तन्मय होकर भगवान का अनुकरण करने लगता ॥४०॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

संस्पर्शेनतच्छायाभिस्तेन निर्वृतः अस्पन्दः स्थिरो यः प्रणयः [illegible] आनन्दस्तेन यत्सलिलं तेन सुष्ठु आमीलिते ईक्षणे यस्य सः ॥ ४१ ॥

आत्मनः परां निर्वृतिं तन्वन्दुःसङ्गेन दीनस्यान्यस्यापि मनः शमं शान्तं व्यधात् ॥ ४२ ॥

तस्मिन्महाभागवते महाभागे महात्मनि ।
हिरण्यकशिपूराजन्नकरोदघमात्मजे ॥ ४३ ॥

॥ युधिष्ठिर उवाच ॥

देवर्ष एतदिच्छामो वेदितुं तव सुव्रत ! ।
यदात्मजाय शुद्धाय पिताऽदात्साधवे ह्यघम् ॥ ४४ ॥
(१) पुत्रान् विप्रतिकूलान् स्वान् पितरः पुत्रवत्सलाः ।
उपालभन्तो शिक्षार्थं नैवाघमपरो यथा ॥ ४५ ॥
किमुतानुवशान् साधूंस्तादृशान् गुरुदेवतान् ।
एतत्कौतूहलं ब्रह्मन्नस्माकं विषम प्रभो ! ॥
पितुः पुत्राय यद्द्वेषो मरणाय प्रयोजितः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे [illegible] संहितायां
वैयासिक्यां सप्तमस्[illegible]रिते
चतुर्थोऽध्[illegible] ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अघं द्रोहमकरोत् ॥ ४३ ॥

प्रथमाध्यायान्ते पृष्टमेवार्थमतिविस्मयेन पुनः पृच्छ[illegible] र्षे इति । तव त्वत्तस्तवाक्यमिति वा साधवेऽघमदात् [illegible] कृतवानिति यदेतद्वेदितुं ज्ञातुमिच्छामः ॥ ४४ ॥

उपालभन्ते आक्षिपन्ति अघन्तु नैव कुर्वन्ति [illegible] शत्रुरिव ॥ ४५ ॥

अनुवशाननुकूलान् साधूनरागरोषान् गुरुः [illegible] येषां तानुद्दिश्याघं न कुर्वन्तीति किमु वक्तव्य[illegible] पुत्रमुद्दिश्य पितुर्द्वेषः पित्रा कृतोद्वेषः पुत्रस्य[illegible] जितः प्रवर्तित इति यदेतत्कौतूहलं विषमापाकुरु[illegible] यो द्वेषः स पितुर्मरणाय प्रयोजितोऽत एव[illegible] मेत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे [illegible]
श्रीधरस्वामिकृतभावार्थदी[illegible]
चतुर्थोऽध्यायः ॥ [illegible]

श्रीमद्वीरराघवाचार्यकृतभ[illegible] ।

कश्चिच्च संस्पर्शेनाऽविच्छिन्नानु[illegible]: स्वयम्भः स्थिरो यः प्रणयः स्नेहस्तेन च [illegible]नाऽऽमीलते ईषन्मीलिते ईक्षणे यस्य उत्पुलक[illegible] तूष्णीमास्ते ॥ ४१ ॥

[illegible]: अकिञ्चनसङ्गो निरुपाधिकस्नेहस्तेन लब्धया [illegible]स्य भगवतः पदारविन्दयोः निषेवया मुहुर्मुहुरात्मनः [illegible] निर्वृतिमानन्दं तन्वन् वितन्वन्, अत इत्यार्ष-[illegible]षष्ठीकं पृथक् पदम्, यद्वा, तत एव सविशेषणस्यापि [illegible] विषयासङ्गेन दीनस्य मनसः शमं शान्तिं राग-[illegible]त्यं व्यथावक्रं दुःसङ्गदीनस्येति विशेषणं लोकपरि-[illegible]तं न तु तस्य कदाचिदपि विषयासक्तमभून्मन इति [illegible]: ॥ ४२ ॥

हे राजन् ! तस्मिन्नेवंभूते महाभागवतश्रेष्ठे महाविवेकिनि महात्मन्युक्तविधमाहात्म्ये तत्राप्यात्मजे हिरण्यकशिपुरघं द्रोह-मकरोत् ॥ ४३ ॥

एवंविधस्य द्रोहानर्हत्वशङ्कया पृच्छति युधिष्ठिरः—देवर्ष इति । हे देवर्षे ! एतद्वेदितुं ज्ञातुमिच्छामः, किन्तत् ? हे सुव्रत ! शुद्धाय निरपराधाय साधवे महाभागवताय तत्राप्यात्म जाय अनेन द्रोहानर्हविषयत्वमुक्तम्. पितेत्यनेन द्रोग्धृत्वानर्हत्वं अघं द्रोहमधात्मके इत्येतत् ॥ ४४ ॥

उक्तविशेषणाव्याख्यार्थमेव विशदयति–पुत्रेष्विति । प्रतिकूलेषु पुत्रे विषयभूतेषु पुत्रवत्सलाः पितरः शिक्षार्थं केवलमुपालभन्ते आ क्षिपन्ति अपरे यथा शत्रवस्तथाघं द्रोहं नैव कुर्वन्ति. प्रतिकूलानां पुत्रान् केवलं शिक्षार्थमुपालभन्ते न तेभ्यो द्रुह्यन्ति, किम्पुनरनु कूलान् साधून् गुरुः पितैव दैवतं येषां तानुपालभन्ते न तु तेभ्यो द्रुह्यन्ति इति भावः ॥ ४५ ॥

अतो हे ब्रह्मन् ! अस्माकमेतत्कौतूहलम् एतत्प्रश्नकौतूहलं वि न अपनय हे प्रभो ! पुत्राय यः पितुर्द्वेषः स मरणाय पितुर्मरणा

(१) पुत्रेषु प्रतिकूलेषु. [illegible] । वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रयोजितः प्रयोजकोऽभूदिति यदेतत्प्रश्नकौतूहलमित्यन्वयः पितुः पुत्रविषयकद्वेषः स्वस्यैव मरणप्रयोजकः कथमभूदित्येवं विध-प्रश्नविषयकौतूहलं विधमेत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्पर्शेषु विषयेषु स्पृहारहितः अस्पन्दप्राणः प्राणचेष्टारहितः आनन्दसलिलेन सन्तोषाश्रुजलेन निमिलेन किञ्चि[illegible]त-नेत्रः ॥ ४१ ॥

अकिञ्चनानां महतां सतां सेवालक्षणसङ्गेन [illegible]

अघं मरणलक्षणं व्यसनम् ॥ ४३ ॥

"विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि" [illegible] न्मरणसकथा नारदेनापरिहृतम् जानन् राजा यु[illegible] जानन्नकरोदघमात्मज इतिप्रसक्तं श्रुत्वा तदेव पृच्छ[illegible] पुत्रस्य मरणकारणमासुरकर्म न तु शास्त्रीयमिति[illegible] अघमिति संहिताकार्यं न कृतम् ॥ ४४ ॥

अपरं शत्रवः ॥ ४५ ॥

विभ्रम परिहर पुत्राय प्रयोजितो विद्वेषः पितुर्मरण[illegible] यत्स्मात्कौतूहलमिति ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

संयोगे क्वचिदुत्पुलकइति । संस्पर्शः कृपामयतत्कर्तृका-लिङ्गनस्फूर्तिः ॥ ४१ ॥

कस्यपाठे स्वसमं स्वान्तःकरणतुल्यं व्यधात् ॥ ४२ ॥

महाभागवतस्यलक्षणं पूर्वमेव दर्शितम्. महान् भागो भाग्यं श्रीनारदकृपारूपं यस्य महान् पूज्य आत्मा धैर्यगाम्भीर्यादि-युक्तः स्वभावो यस्य ॥ ४३ ॥ ४४ ॥

- पुत्रानिति सार्द्धकम् ॥ ४५—४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

क्वचिदुत्पुलक इति क यामि कुत्र प्रभुं प्राप्स्यामीति कदाचि-त्प्रभुविच्छेददुःखेन मुद्रितनेत्र अकस्मात् स्वहृदय एव तमालोक्य तत्पादारविन्दर्शनेन निर्वृत उत्पुलकः न विद्यते स्पन्दनो यस्य सः प्रणयेनानन्दसलिलं ययोस्तथाभूते ईषन्मुद्रिते ईक्षणे यस्य स च स च सः ॥ ४१ ॥

ननु, तस्य हिरण्यकशिपुप्रभृतिदुःसङ्गत्वे कथं स्थिरा भक्ति-स्तत्र प्रह्लादस्य तस्य सङ्गात्येऽपि दुःसङ्गिनस्तत्सहचरबालाः कृतार्था बभूवुः कथं तस्यैव दुःसङ्गाशङ्केत्याह--सदेति । दुःसङ्गदूषी-तस्यान्यस्यापि मनः शमं "शमो मन्निष्ठता बुद्धेः" इति भगवद्व-चनात् भगवन्निष्ठमकरोत् ॥ ४२ ॥

अघं द्रोहम् ॥ ४३ ॥

प्रथमाध्यायान्ते पृष्टमेवार्थमतिविस्मयेन पुनः पृच्छति देवर्षे इति । तत्र तस्य: अघं दुःखम् ॥ ४४ ॥

नैव अघं मापयन्ति अपरः मनुष्यान् अनुकूलान् ॥४५॥

कुतूहलं गर्व कौतूहलं सन्देहं विभ्रम अपाकुरु सन्देहः कः पुत्राय पुत्रं हन्तुं पितुर्द्वेषः यत् यो द्वेषः मरणाय स्वस्य मरणार्थ-मेव प्रकर्षेण योजितः ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

सप्तमेतु चतुर्थोयं सङ्गतः सङ्गतस्सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

[illegible]पुलको जातरोमाञ्चः संस्पर्शेन ध्यानस्थभगवच्चरणसंस्पर्शेन [illegible]सुखितस्तूष्णीमास्ते अस्पन्दप्राणयेन अचलप्रेम्णा च आन-[illegible]सलिलं तेन युक्ते आमीलिते ईषन्मुद्रिते ईक्षणे यस्य

[illegible]नां भगवदनन्यशरणानां सङ्गेन लब्धया उत्तम-[illegible]शीलैः पदारविन्दयोर्निविष्टया आत्मनः परां निर्वृतिं [illegible] दुःसङ्गेन दीनस्यान्यस्यापि मनः शमं भगव-[illegible]त् ॥ ४२ ॥

[illegible]हमित्यर्थः ॥ ४३ ॥

[illegible]प्रमदात् पुत्रे द्रोहं कृतवानित्यर्थः । एतत् [illegible]च्छामः ॥ ४४ ॥

[illegible] विप्रतिकूलानपि शिक्षार्थमेवोपालभन्ते आ-[illegible] तथा अघं नैव कुर्वन्ति किमुत नाद्य-[illegible]ति अघं न कुर्वन्तीति ॥ ४५ ॥

[illegible]द्वेषः स पितुर्मरणाय प्रयोजितः, पित्रेति [illegible]म अपाकुरु ॥ ४६ ॥

[illegible]महापुराणे सप्तमस्कन्धीये

[illegible]कृतसिद्धान्तप्रदीपे

[illegible]प्रकाशः ॥ ४ ॥

भाषा टीका।

किसी समय स्फूर्ति प्राप्त भगवत्स्पर्शानुभवसे आनंदित होकर रोमांचित होजाता और निश्चल होकर प्रेम से हुआ जो आनंदबाष्प तिससे किञ्चित् निमीलित है नेत्र जिसका ऐसा होकर तूष्णीं भाव को प्राप्त होजाता ॥ ४१ ॥

अकिंचनों के संग से प्राप्त हुई जो गोविन्द चरणार-विन्द की सेवा उससे अपने आनंद की परा काष्ठा का विस्तार करता हुआ, वारंवार दुःसंग से दीनजनों के मन की भी शांति करता हुआ ॥ ४२ ॥

हे राजन्! उस बड़भागी महात्मा महा भागवत अपने पुत्र प्रल्हाद में हिरण्यकशिपुने ऐसा पाप क्यों किया ॥ ४३ ॥

युधिष्ठिरउवाच।

युधिष्ठिरजी बोले, कि—हे देवर्ष! हे सूत! मैं आप से इतने जानने की इच्छा करता हूं कि परमसुशील अपने पुत्रको पिताने कैसे द्रोह किया ॥ ४४ ॥

पिता लोग पुत्रों के विषय में ऐसे वत्सल होते हैं कि अत्यंत प्रतिकूल भी अपने पुत्रों को शिक्षा ही लिये कुछ आक्षेप करते हैं, शत्रुके तरह दुष्ट अभिप्राय वाले नहीं होते हैं ॥ ४५ ॥

फिर गुरु लोगों को देवता के सदृश मानने वाले अपने वशंवद सुशील प्रल्हाद सदृशों पर क्या ही कहना, हे ब्रह्मन् यही मुझे बड़ा कौतूहल है कि पिताने पुत्र के लिये मरणार्थ द्वेष किया इस कौतूहल को आप दूर करो ॥ ४६ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध चतुर्थाध्याय की भाषा टीका समाप्त ॥ ४ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥



॥ पञ्चमोऽध्यायः ॥

नारद उवाच ।

पौरोहित्याय भगवान् वृतः काव्यः किलासुरैः ।
शण्डामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके ॥ १ ॥
तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदम् ।
पाठयामासतुः [illegible]न्यांश्चासुरबालकान् ॥ २ ॥
यत्तत्र गुरुणा [illegible]ऽनुपपाठ च ।
न साधु मनसा [illegible]रासद्ग्रहाश्रयम् ॥ ३ ॥
एकदाऽसुरराट् पुत्र[illegible]ध्य पाण्डव ! ।
पप्रच्छ कथ्यतां [illegible] साधु यद्भवान् ॥ ४ ॥

[illegible]

तत्साधु मन्येऽसुरवर्य दे[illegible]द्विग्नधियामसद्ग्रहात् ।
हित्वात्मपातं गृहमन्धकूपं वनं [illegible]श्रयेत ॥ ५ ॥

नारद[illegible]

श्रुत्वा पुत्रगिरो दैत्यः पर[illegible]ः ।
जहास बुद्धिर्बालानां भिद्य[illegible] ॥ ६ ॥
सम्यग्विधार्यतां बालो गुरु[illegible] ।
विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्य[illegible] ॥ ७ ॥
गृहमानीतमाहूय प्रह्लादं दै[illegible]
प्रशस्य श्लक्ष्णया वाचा सम[illegible] ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चमे गुरुतोऽधीतं त्यक्त्वा विष्णुस्तुतौ रतम् ।
घातयन्विप्रसर्पाद्यैः सुतं दैत्यो न चाशकत् ॥ १ ॥

भगवद्भक्तिरेव विद्वेषे कारणमिति वक्तुमाह--पौरोहित्यायेन्या-[illegible]हिना । काव्यः शुक्रः अतस्तस्य सुतौ दैत्यराजगृहान्तिके न्यवसतामितिशेषः ॥ १ ॥

पाठ्यान्वक्ष्यतीत्यादीन् पाठयामसुरबालकानितिवान्वयः ॥ २ ॥

अनु[illegible] पपाठ च किन्तु तत्साधु न मेने तत्र हे[illegible]ग्रहो मिथ्याभिनिवेशपक्षाश्रयो यस्य तत् ॥ ३ ॥ [illegible]

हे असुर[illegible]मेति मिथ्याऽभिनिवेशाद्धेतोः सम्यगुद्विग्न[illegible]वनं गतः सन्हरिमाश्रयेतेति यत्तदेवाहं [illegible]ं गृहम् आत्मपातमात्मनोऽधःपातनि[illegible]मोहावहम् ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परपक्षे विष्णौ समाहिताः परिनिष्ठिताः हासे हेतुः बुद्धिरिति ॥ ६ ॥

विष्णुपक्षैर्भागवतैर्हेतुभूतैः ननु, त्वद्गृहे कृतस्तेषां प्रवेशः सत्यम् तथाऽपि प्रतिच्छन्नैर्व्यवधानरतया कृतः ॥ ७ ॥

दैत्यैर्गृहमानीतम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

एवमापृष्टप्रह्लादचरितविषयकप्रश्नस्तावदुपोद्घातमाह भगवान्नारदः— पौरोहित्यायेत्यादिना । भगवान् काव्यः शुक्रः पौरोहित्याय पुरोहितकर्मकर्तुमसुरैर्वृतः, किञ्चान्ति प्रामाङ्घ्रि द्योतयति तस्य काव्यस्य सुतौ शण्डामर्कौ दैत्यराजस्य हिरण्यकशिपोः गृहसमीपे आस्तामिति शेषः ॥ १ ॥

तौ च शण्डामर्कौ दैत्यराजेन प्रापितं नीतिशास्त्रपठनार्थं प्रापितं प्रह्लादमन्यांश्चासुरबालकांश्च पाठ्यान् दण्डनीत्यादीन् पाठयामासतुः पठनं कारितवन्तौ अत्र नयकोविदमिति क्रियाविशेषणं यथा नयकोविदाः नीतिशास्त्रनिपुणा भवन्ति तथा पाठयामासतुरिति ॥ २ ॥

तत्र एवं स्थिते प्रह्लादो यद्गुरुणा प्रोक्तं तच्छ्रुतं श्रुतवान् अनुपठितवांश्च परन्तु तत्प्रोक्तं मनसा साधुयथार्थतया न मेने तत्र हेतुं वदन् प्रोक्तं विशिनष्टि—असद्ग्राहग्रहाश्रयम् अयं स्वः स्वकीयो मित्रम् अयन्तु परः शत्रुरित्येवंरूपो योऽसद्ग्रहो वृथाग्रहरूपोऽभिमानस्तस्याश्रयं हेतुभूतम् ॥ ३ ॥

एवं स्थिते हे पाण्डव ! कदाचिदसुरराट् पुत्रं प्रह्लादमङ्कमारोप्योत्सङ्गे निधाय हे तात पुत्र, भवानाचार्यप्रोक्तेषु मध्ये यत्साधु मन्यते तत्कथ्यताम्. इत्येवं पप्रच्छ ॥ ४ ॥

एवं दैत्येन पृष्टः प्रह्लादस्तमाह—तदित्येकेन । हे असुरवर्य दैत्यराज ! असद्ग्रहात् देहात्माभिमानस्वतन्त्राभिमानमूलशब्दादिविषयाभिनिवेशादिरूपादसद्ग्रहाद्धेतोः सदा नित्यं समुद्विग्ना नितरां भीता धीर्येषां तेषां देहिनां कुत्सितदेहधारिणामात्मपातं पतत्यनेनेति पातम् आत्मनः अधःपतनहेतुमन्धकूपतुल्यं गृहं त्यक्त्वा वनमरण्यं प्रविश्य हरिम् आश्रितवत्सलं भक्तवत्सलमाश्रयेतेति यत्तदेव साधु मन्ये इति. हित्वेतिपदेन हेयसंक्षेपः हरिमाश्रयेतेत्यनेन उपादेयतत्त्वतदनुष्ठानसंक्षेपः एवं सर्वत्र मन्तव्यमिति विविक्तदेशोपलक्षणम् ॥ ५ ॥

एवमुक्तो दैत्यराजः किमाहेत्याह देवर्षिः—श्रुत्वेति । परपक्षसमाहिताः परपक्षे विष्णौ समाहिताः परिनिष्ठिताः पुत्रस्य प्रह्लादस्य गिरः श्रुत्वा दैत्यो जहास हर्षपूर्वकमुवाचेत्यर्थः । तदेवाह—बालानां बुद्धिः परबुद्धिभिः परपक्षैः शत्रौ विष्णौ बुद्धिर्येषां तैर्भिद्यते अन्यथाक्रियते विपरीता क्रियते इत्यर्थः ॥ ६ ॥

नूनं गुरुगेहे प्रतिच्छन्नैर्विष्णोर्भक्तैर्द्विजातिभिः ब्राह्मणैः अयं बालो भिद्यते विपरीतबुद्धिः क्रियते अतोऽस्य बालस्य बुद्धिर्यथा नभिद्येत तथा सम्यग्विधार्यतां विधार्यतामित्यर्थः ॥ ७ ॥

ततो दैत्ययाजकाः दैत्यपुरोहिताः स्वगृहप्राप्तिं दैत्यभटैरानीतम् प्रापितं प्रह्लादम् आहूय प्रशस्य प्रस्तुत्य सामोक्तिभिः श्लक्ष्णया मृद्व्या उक्त्या च समपृच्छन् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हिरण्यकशिपुप्रह्लादसंवादच्छलेन भक्तिस्वरूपं हरेर्निरतिशयस्वातन्त्र्यञ्च निरूपयत्यस्मिन्नध्याये--काव्यः शुक्रः शण्डश्च मर्कश्च शण्डामर्कौ तस्य शुक्रस्य दैत्यराजगृहान्तिके न्यवसतामिति शेषः ॥ १ ॥

राज्ञा हिरण्यकशिपुना ॥ २ ॥

अपाठ्यस्य विशेषणभूतेन हेत्यनेन सूचितं हेतुमाह—नेति । असाधुत्वे किङ्कारणमत्राह—स्वरूपेति, "स्वातन्त्र्यात्स्वरूपमिति प्रोक्तः" इत्यतः स्वस्य स्वतन्त्रस्य हरेरूपस्यासत्त्वं शून्यत्वं गृह्णातीति निराकारो हरिरिति यः पक्षः स आश्रयो यस्य तत्तथा निराकारपक्षविषयत्वादित्यर्थः । प्रपञ्चस्वरूपस्यासद्ग्रहः शून्यत्वप्रतिपादकः शून्यवादः स आश्रयो यस्य तत्तथा अद्वैतविषयत्वादित्यर्थः इति वा जीवपरस्वरूपयोरत्यन्तपृथग्भावं गृह्णातीति स्वरूपासद्ग्रहः जीवपरमात्मनोरभिन्नाविति यः सिद्धान्तः स आश्रयः यस्य तत्तथा अद्वैतविषयत्वादित्यर्थं इति वा, स्वरूपासद्ग्रहः औत्पत्तिकदुराग्रहोऽवैष्णवपक्षपातः स आश्रयो यस्य तत्तथा वैष्णवसिद्धान्तविरुद्धत्वादित्यर्थं इति वा विन्यासभेद एवायं तात्पर्यन्त्वेकमेवेति ॥ ३ ॥ ४ ॥

हे असुरवर्य ! असद्ग्राह्यविषयाभिनिवेशात् समुद्विग्नधियां परवशीकृतबुद्धीनां देहिनां तत्साधु संसारनिर्मूलसाधनं मन्य इत्यन्वयः । किं तदिति, तत्राह—हित्वेति. आत्मपातं स्वस्य निरयपातम् अन्धमज्ञानं यस्य तस्य कूपं निधानस्थानं गृहं हित्वा वनं सज्जनसङ्गमलक्षणं गतः ॥ ५ ॥

सज्जनशिक्षार्थं प्रह्लादेन तत्त्वमुक्तं न तु तं ग्राहयितुं तस्यासुरावेशेन दुराग्रहगृहीतत्वात्तत्फलमाह—श्रुत्वेति । परिहासः फलं परबुद्धिभिः प्रतिपक्षबुद्धिभिःपरपक्षसमाहिताः पूर्वपक्षविषयत्वेन प्रवृत्ताः ॥ ६ ॥

पुत्रस्नेहेनाभिमतोऽयं न हासः किं त्वनभिमत एवेत्यभिप्रेत्याह—सम्यगिति । विधार्यतामवधार्यतां विष्णुपक्षः प्रतिच्छन्नो येषां ते तथा तैर्विष्णुसिद्धान्तमभिगृह्यस्थितैरित्यर्थः ॥ ७ ॥

अवशवशीकरणाय चत्वार उपाया विहितास्तत्र द्विजातीनां सामोपाय एव श्रेयानिति दर्शयन् परकृतबुद्धिभेदकत्वं ज्ञातुं तत्रापि योग्यानां भगवत्तत्त्वविषयज्ञाननिश्चयाद्, च दैत्यभयाच्च दैत्ययाजकाः प्रह्लादमपृच्छन्नित्याह । गृहीमिति--सामभिर्वचनैः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १——१० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गुरुणाऽध्यापितः पित्रा पृष्टः कृष्णं स्तुवन् सुतः ।
पञ्चमे हिंसितो दैत्यैर्गजाद्यैस्स हतोऽपि स्वस्थराजत ॥ ० ॥

प्रह्लादस्य भक्तिरेव विद्वेषकारणमिति वक्तुमाह-पौरोहित्यायेत्यादिना। काव्यः शुक्रः अतस्तस्य सुतौ तत्र न्यवसतामिति शेषः ॥ १ ॥ २ ॥

यत् ग्राहितं पठनीयत्यादिकं तत् साधु न मेने कुतः ? स्वः पर इत्यसद्ग्रहं दुरभिनिवेशमेव सा सम्यक् पकारेण भवत इति मत् ॥ ३॥

कठिनपदार्थानां प्रश्ने बालस्यास्य स्तोभो भविष्यतीति मत्वा प्राह-यद्भवान् साधु मन्यते पठितानां वस्तूनां मध्ये साधु अङ्गीकृतं यत् त्वं जानासि तदेव वक्तुञ्च शक्नोषि तदेव, वदेति हिरण्यकशिपोरभिप्रायः ॥ ४ ॥

प्रह्लादस्तु तदभिप्रायं ज्ञात्वापि जगत्यस्मिन् जिज्ञास्यानां मध्ये भवान् किं वस्तु साधु मन्यते इति बुद्ध्या विचार्य स्वसम्मतीकरोमीति मां पृच्छति चेदस्य समुचितमुत्तरं दास्यामीत्याह-तदिति । हे असुरवर्य ! असद्ग्रहात् अहं ममेति मिथ्याभिनिवेशात् उद्विग्नधियां जनानां तदेव साधु मन्ये. किं तत् ? आत्मपातहेतुं गृहं त्यक्त्वा वनं गतस्सन् यद्धरिमाश्रयेतेति, अत्र यत् हरिमाश्रयेत तदेव हरिचरणाश्रयणं साधु मन्ये गृहस्थितोऽपि स एव गृहमन्धकूपं हित्वा वनं गतः अन्यथा वनं गतोऽपि गृहमन्धकूपमेव श्रित इति च व्याचक्षते ॥ ५ ॥

परपक्षे शत्रुपक्षे विष्णौ समाहिताः परिनिष्ठिताः जहासेति बालोऽयं यो यस्मात्यति तदेव वक्त अस्य को दोषस्तदध्यापकस्य नाध्यापका वैष्णवा नात्र प्रवेशनीया इत्यादिदेशेति भावः ॥ ६ ॥

तदपि गुरुगेह एव ते नैवं वक्तव्या इत्याह-विष्णुपक्षैरिति ॥७॥

प्रशास्य श्लक्ष्णयेत्यन्यथा बालोऽयं भयेन स्वोपदेशकं वैष्णवं न वक्ष्यतीति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवद्भजनतः प्रह्लादः पित्रा गजादिभिर्घातितोऽपि भगवदनुग्रहान्न मृत इति पञ्चमे वर्णयति. भगवद्भजनरतं पुत्रं दृष्ट्वा हिरण्यकशिपुस्तं प्रति विद्वेषं कृतवानिति वक्तुमाह-पौरोहित्यायेत्यादि। काव्यः शुक्रः तस्य सुतौ दैत्यराजगृहान्तिके न्यवसतामिति शेषः ॥ १ ॥

तौ प्रह्लादमन्यांश्चासुराणां बालकान् पाठ्यान् पाठयामासतुः ॥ २ ॥

ग्राहितं पठनीयत्यादिकं गुरुणा प्रोक्तं तत् शुश्रुवे श्रुतवान् अनुश्रवणानन्तरं पपाठ च पठितवांश्च मनसा तु साधु न मेने यतः स्वपररूपो योऽसद्ग्राहो ग्रहोऽभिनिवेशस्तदाश्रयम ॥ ३ ॥ ४ ॥

असद्ग्रहात् नित्यस्वरूपो जीवः तद्विपरीतोऽनित्यो देहोऽसत्तस्मिन् यो ग्रहोऽहमित्यभिनिवेशस्तस्मादनात्मन्यात्मभ्रमात् सदा समुद्विग्नधियाम् आत्मनः पातो यस्मिन् तमन्धकूपं गृहं हित्वा वनं गतस्सन् यद्धरिमाश्रयेत तत्साधु मन्ये ॥ ५ ॥

परपक्षे विष्णौ समाहिताः सम्यगाहिताः संयोजिताः पुत्रगिरः श्रुत्वा बालानां बुद्धिः परेषां बुद्धिभिर्भिद्यते इति मत्वा जहास ॥ ६ ॥

गुरुगेहे बालः सम्यग्निवार्यताम् अस्मद्गृहात्प्रतिच्छन्नैर्गुप्तवेषैर्विष्णुपक्षैर्वैष्णवैर्द्विजातिभिर्यथाऽस्य धीर्न भिद्येत ॥ ७ ॥

दैत्ययाजकाः गृहमानीतं प्रह्लादं श्लक्ष्णया मधुरया वाचा प्रशस्य सामभिः प्रियवाक्यैः समपृच्छन्त ॥ ८ ॥

भाषा टीका ।

श्रीविदर्भराजतनयाकुचकाश्मीरमुद्रितोरसे नमः ॥

नारद उवाच

नारदजी बोले, कि—असुर लोगों ने भगवान् श्रीशुक्राचार्यजी को पुरोहित किये थे, उनके शंडा मर्क नामक दो पुत्र दैत्यराज के महलों के समीप रहते थे ॥ १ ॥

वो दोनों राजा के भेजे हुए, नीतिनिपुण प्रह्लाद नामक बालक को पढाते थे तथा और भी पढने के योग्य छोटे २ असुरबालकों को पढाते थे ॥ २ ॥

जो कुछ वहां पांडे ने पढाया उसको सुना भी और पढा भी परंच अपना पराया झूठेआग्रहवाला यह पढना प्रह्लाद को मन से अच्छा न मालूम हुआ ॥ ३ ॥

हे पांडव ! एक दिन दैत्यराज ने अपने पुत्र को गोद में बैठाकर [illegible] कि हे वत्स ! तुम क्या अच्छा मानते हो ॥ ४ ॥

प्रह्लाद उवाच ॥

प्रह्लाद बोले, कि—हे असुरवर्य ! संसार में सदा [illegible] प्राणियों को तो मैं यही अच्छा समझता [illegible] पतन होने का गृह रूप अंधकूप को छोड़कर [illegible] हरि का आश्रयण करें ॥ ५ ॥

नारदउवाच ॥

[illegible] पुत्र की वाणी शत्रु के पक्ष में [illegible] हँसा और बोला कि—बालकों की बुद्धि [illegible] से भेद को प्राप्त होजाती है अर्थात् [illegible] ॥ ६ ॥

इसी गुरु [illegible] बालक को अच्छी तरह शिक्षा दो कि जिससे [illegible] पक्ष वालों से इस की बुद्धि न बिगड़े ॥ ७ ॥

दैत्य पुरोहित [illegible] हुए प्रह्लाद को बुलाकर मधुरवाणी [illegible] से पूछा ॥ ८ ॥

वत्स ! प्रह्लाद ! भद्रं ते सत्यं कथय मा मृषा ।
बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ॥ ९ ॥
बुद्धिभेदः परकृत उताहो ते स्वतोऽभवत् ।
भण्यतां श्रोतुकामानां गुरूणां कुलनन्दन ! ॥ १० ॥
प्रह्लाद उवाच ।
(१) स्वः परश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः ।
विमोहितधियां दृष्टस्तस्मै भगवते नमः ॥ ११ ॥
स यदाऽनुव्रतः पुंसां पशुबुद्धिर्विभिद्यते ।
अन्य एष तथाऽन्योऽहमिति भेदगताऽसती ॥ १२ ॥
स एष आत्मा (२) स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते ।
मुह्यन्ति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिम् ॥ १३ ॥
यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ ।
तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया ॥ १४ ॥
नारद उवाच ।
एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः ।
तं निर्भर्त्स्याथ कुपितः स दीनो (३) राजसेवकः ॥ १५ ॥
आनीयतामरे ! वेत्रमस्माकमयशस्करः ।
कुलाङ्गारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बालान्सर्वानति अतिक्रम्य तुभ्यं तव ॥ ९ ॥ १० ॥

अहो मायामोहिताः भवन्तो मामाक्षिपन्तीत्याशयेन तावदाह—स्वःपरश्चेति । मिथ्याभिनिवेशो यदीयया मायथैव कृतो न तु वास्तवः अत एव तदीयया मायया विमोहितबुद्धीनां भवतामेव दृष्टो न तु मम तस्मै अचिन्त्यमायेश्वराय नमः ॥ ११ ॥

अहो किमेतत्प्रलपसि तव बुद्धिभेदो यतो जातस्तं कथयेत्याक्षिप्तः संस्तत्प्रसादादेवेत्युत्तरमाह—स इति त्रिभिः । स भगवान्यदानुव्रतोऽनुकूलो भवति तदा पशूनामविवेकिनामिव बुद्धिर्भेदगता असती मिथ्या संसारविषया विभिद्यते अभिन्नात्मनिष्ठा भवति ॥ १२ ॥

भेदस्यासत्त्वं दर्शयन्नाह—स एष आत्मैव स्वःपर इत्यविवेकिभिर्निरूप्यते युक्तश्चैतत् यतोऽस्य वर्त्मनि जिज्ञासायां ब्रह्मादयोऽपि मुह्यन्ति, तत्र हेतुः, दुरत्ययं दुर्घटमनुक्रमणमनुचरितमनुवर्णनं वा यस्य ॥ १३ ॥

ननु, निर्विकारस्य कथं मतिभेदकत्वं ? तत्राऽऽह—यथेति । यथा अयो लोहमाकर्षस्यायस्कान्तस्य समीपे स्वयमेव भ्रमति तथा मे चेतश्चक्रपाणेः सन्निधौ तव कुतो जातस्तत्सन्निधिः ? तत्राऽऽह—यदृच्छयेति. कस्य तपोदानादेः फलमेतदिति न ज्ञायत इत्यर्थः ॥ १४ ॥

राजसेवक उवाचेति शेषः ॥ १५ ॥

अरे वेत्रं कशाऽऽनीयतां सामदानभेददण्डानां मध्ये चतुर्थो दमो दण्डोऽस्य दुर्बुद्धेरुदित उक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः कुलस्याङ्गारवन्नाशहेतोः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रश्नमेवाह—वत्सेति द्वाभ्याम् । हे वत्स ! प्रह्लाद ! ते तव भद्रमस्तु, न त्वां ताडयाम इति भावः । सत्यं यथार्थं कथय मृषा मिथ्या मा कथय. किं कथयेयम ? तत्राह—बालानिति । बालानति अतिक्रम्य सर्वान् बालान् विहाय तुभ्यं तवैव एष बुद्धिविपर्यासः कुतो हेतोः ? अभूदिति ॥ ९ ॥

किमयं बुद्धिविपर्यासः परैर्विष्णुपक्षपातिभिः कृतः

---

(१) परः स्वश्चेति पाठान्तरम्. वीर० विज० क्रम० वि-चक्र० सिद्धा० । (२) स्वपरेत्यबुद्धिदुरन्वयानुक्रमणो-इति पाठान्तरम्. वीर०।
(३) राजसेवकमिति पाठः वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उताहो आहोस्वित् स्वत एव तवाभवत् हे दैत्यकुलनन्दन ! त्वदुक्त्यां श्रोतुकामानामस्माकं भवयतां कथ्यतामिति ॥ १० ॥

एवमुक्त आह प्रह्लादः—पर इत्यादिना चतुर्भिः । यत्पृष्टं बुद्धिभेदः परकृतः उत स्वाभाविक इति तत्र तमिमं स्वपरविभागं देहात्माभिमानरूपाज्ञानमूलकं भगवन्मायामोहितानामिति निन्दितुं तावद्देहात्माभिमानादिरूपमोहनिमित्तविचित्रमायाशक्तियुक्तं भगवन्तं नमस्करोति—पर इति. यस्येश्वरस्य मायया हेतुना स्वः परश्चेत्यसद्ग्राहः इदं मित्रमयं शत्रुरयन्देवो मनुष्यो ब्राह्मण इत्यादिदेहात्मभ्रमः कृतः सम्पादितः विमोहितधियां भगवन्मायया विमोहिता धीर्येषां तेषां भवतामेव दृष्टो न ममेति भावः तस्मै पूर्णषाड्गुण्याय नमः विमोहितधियामित्यनेन “दैवी ह्येषा गुणमयी मम माया दुरत्यया” इति भगवदुक्तरीत्या भगवदप्रपन्नानां भवतामेवासद्ग्राहः न तु तत्प्रपन्नस्य मम इति सूचितम् ॥ ११ ॥

तदेव व्यञ्जयन्नसद्ग्राहं निन्दति—स इति । स भगवान् यदा पुंभिरनुव्रतः आश्रितः तदा पुंसां पशुबुद्धिः पशुष्विव बुद्धिः देहात्माभिमानरूपा बुद्धिर्विभिद्यते निरस्यते कासौ पशुबुद्धिः ? या, अन्य एषः अन्योऽहम् इत्येवंरूपा सर्वशरीरेषु ज्ञानैकाकारतया परमात्मशरीरतया चावस्थिता नात्मनो विस्मरतां स्वः पर इत्येकरूपा भेदगता अनात्मभूतदेवासुरमनुष्यादिशरीरगता अत एवासती दुष्टा अनर्थावहा येषां पशुबुद्धिरित्यर्थः ॥ १२ ॥

एवं स्वपरविभागहेतुभूतदेहात्मभ्रमादेर्भगवन्मायाहेतुकत्वकथनेन तच्छरणात्तन्निवृत्तिकथनेन च भगवत एवाज्ञानप्रदत्वं तन्निवर्तकत्वञ्चोक्तम्. अथ ज्ञानप्रदातृत्वमपि तस्यैवेत्याह—स इति । स उक्तविध एष आत्मा प्रकृतः परमात्मा स्वपरेत्यबुद्धिः स्वः पर इति बुद्धिरहितः सर्वान्तरात्मतया सर्वत्र समत्वादित्यर्थः । दुरन्वयं पुरुषान्तरेष्वघटमानमनुक्रमणं व्यापारो यस्य तादृशो निरूप्यते अन्यैरशक्यं सर्वं सर्वशक्तिलीलया करोतीत्यर्थः । यस्य वर्त्मनि मार्गे यत्स्वरूपविमर्शने वेदवादिनो ब्रह्मादयोऽपि मुह्यन्ति स एष एव परमात्मा मम मति बुद्धिं भिनत्तीत्यर्थः । स्वपरेत्यबुद्धिरित्यनेन देवासुरादिविभागमन्तरेण सर्वेषां ज्ञानप्रदत्वमुक्तम्. दुरत्ययानुक्रमण इत्यनेन सर्वशक्तित्वं वैषम्यादिराहित्यञ्चोक्तम्. यद्वर्त्मनि ब्रह्मादयोऽपि मुह्यन्तीत्यनेन तत्प्रसादादेव ब्रह्मादीनामपि ज्ञानोदयः अन्यथा केवलं तेषामपि मोह एवेत्युक्तम्. स्वपरेत्यबुद्धिभिरिति तृतीयान्तमपि पाठान्तरं तत्र स्वः पर इति न विद्यते बुद्धिर्येषां तैः स्वपरविभागात्मकविवेकरहितैरित्यर्थः । तादृशैर्दुरन्वयानुक्रमणोऽनितरसाधारणव्यापारो निरूप्यते ज्ञायते इत्यर्थः । तत्प्रसादान्निवृत्तदेहात्माभिमानादिभिः ज्ञानाज्ञानादिप्रदत्वेन परमात्मा ज्ञायते इत्यर्थः ॥ १३ ॥

एवं ज्ञानप्रदत्वमुक्तम् अथ तस्यैव तत्प्रदानेन स्वस्य प्रवर्तकत्वमाह—यथेति । आकर्षसन्निधौ अयस्कान्तसन्निधाने अयो लोहं स्वयमेव यथा भ्रमति, भ्राम्यति चलं भवतीत्यर्थः । तथा मम चेतोऽपि चक्रं पाणौ यस्य तस्य हरेः सन्निधौ यदृच्छया हेत्वन्तरनिरपेक्षं भिद्यते तत्प्रसादात्तत्सान्निध्यादेव ममैवंविधा बुद्धिवृत्तिरभूदित्यर्थः । अनेन “बुद्धिभेदः परकृतः उताहो ते स्वतोऽभवत्” इति प्रश्नस्योत्तरमुक्तं भवति ॥ १४ ॥

एवमुक्तो गुरुराहेत्याह—मुनिः—एतावदिति । ब्राह्मणान् दैत्ययाजकान् प्रत्येवम् एतावद्वोक्त्वा महामतिः स प्रह्लादो विरराम तूष्णीम्बभूव. ततो दीनः उपायान्तरेण तं स्ववशीकर्तुमशक्तो गुरुः तं निर्भर्त्स्य कुपितस्सन् राजसेवकम् उवाचेति शेषः ॥ १५ ॥

तदेवाह—आनीयतामिति द्वाभ्याम् । अरे हे राजभट ! इत्यर्थः वेत्रं प्रहरणसाधनयष्टिविशेषमानीयताम् अस्माकमयशोऽपकीर्तिं करोतीत्ययशस्करस्तस्य अत एव कुलस्य दैत्यकुलस्याङ्गारवन्नाशकः तस्य दुर्बुद्धेरितः परं दमः शिक्षणोपायः चतुर्थ एव स्यात् दण्ड एवोपायः कर्तव्यो, न सामादिरित्यर्थः । चतुर्थोऽस्योदितो दम इति पाठे उदितः शास्त्रोक्तः चतुर्थो दण्डोपाय एवास्य दमो दमनसाधनमित्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तुभ्यं नव वो बुद्धिविपर्यय एव बालान् वयस्यान् अतिक्रम्य कुतोऽभूदिति शेषः बालानां बुद्धिमतिक्रम्यैव बुद्धिभेदः कुतः तस्मात्तुभ्यं रोचित इति वा ॥ ९ ॥

एतदेव विवृण्वन्ति—बुद्धिभेद इति । अस्माकं तत्त्वमेव वक्तव्यं त्वयेत्यतो गुरूणामिति ॥ १० ॥

उत्तरं वक्ति—पर इति । पुंसां योऽयं परस्त्वश्चेत्यसद्ग्राहः “एकमेवाद्वितीयम्” इतिश्रुतेः परमार्थवस्तुन एकत्वे प्रामाणिके सिद्धे तत्र श्रीनारायणमन्तरेण परनियामकत्वं स्वनियामकत्वमिति भेदः स्वातन्त्र्यकल्पनालक्षणमन्यथाज्ञानम् एव यस्येश्वरस्येच्छया कृतः कल्पितः सर्वकर्तृत्वात्तस्य तस्मै भगवते महामहिम्ने नमस्यन्वयः । तत्प्रत्युत्तरमित्याह-विमोहितधियामिति. एतैः प्रत्यक्षस्तस्मात्तादृशी बुद्धिर्भवादृशैनं कार्येति शेषः । विमोहितेत्यनेनापीश्वरकर्तृत्वं ज्ञायते ॥ ११ ॥

यन्मायेत्युक्तं स्पष्टं दर्शयति—स यदेति । स भगवान् यदा पुंसां स्वात्मप्र[illegible]बुद्धिजनकत्वेनानुगतोऽनुकूलो भवति तदा पशुबुद्धि[illegible] तत्कर्षमित्युत्तमः, अन्य इति. एव देवद[illegible] स्वतन्त्र इति [illegible]करणामिति [illegible] ज्ञानत्वेन मोक्षानुपयोगित्वात् “[illegible] न स वेद यथा पशुः” इति श्रुतिप्रतीक [illegible] निषिध्य चिन्त्यं विधीयत इती[illegible] किं प्रमाणमितीयमाशङ्का [illegible] “अन्योसावन्योह[illegible]मिति पद[illegible]

“[illegible] भेदं स्वरूपतः ।
[illegible] जीवाः सर्वेन तु ॥
स्वरूप[illegible] च ।
मुक्त[illegible] सदा” ॥

इत्यनेन परिहृतेति [illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, यदि जीवपरौ मिथो भिन्नौ तर्हि किमिति घटपटभेदज्ञानवत्तद्विषयज्ञानं नोत्पद्यत इत्याशङ्क्य प्रतियोगिज्ञानस्य दुःसाध्यत्वादित्यभिप्रेत्याह—स एव इति । यः स्वस्वकर्मानुसारेण स्वस्वयोग्यज्ञानमुत्पादयति स एव आत्मा परमात्मा स्वपरत्वबुद्धिभिः यथार्थज्ञानविरोधिज्ञानवद्भिः पुरुषैर्दुरन्वयानुक्रमणः दुरन्वयं दुर्ज्ञानमनुक्रमणं तत्तद्योग्यतानुसारेण प्रवर्तनं यस्य स तथा दुर्बोधचेष्ट इत्यर्थः । निरूप्यते निश्चीयते ननु "वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णम्" इति श्रुतेः ब्रह्मादेस्तद्विषयज्ञानश्रवणात्कथं प्रतियोगिज्ञानस्य दुःसाध्यत्वमित्यत आह—मुह्यन्तीति । ब्रह्मादीनां भगवद्विषयज्ञानं दुःसाध्यं किं न्वितरेषामित्यतो वाह—मुह्यन्तीति । हिशब्दोऽप्यर्थे हेतौ वा यद्वर्त्मनि कोविदाः ब्रह्मादयोऽपि यद्वर्त्मनि यत्र स्वरूपविषये मुह्यन्ति यस्मात्तस्मात्स एव दुरन्वयानुक्रमण इति निरूप्यते अतनहरेरनुग्रहमन्तरेण तद्विषयज्ञानं नोत्पद्यते तस्मिन् सति तत्स्यात् "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेः अन्वयव्यतिरेकौ दर्शितावित्युक्तं भवति. ननु, स्ववृत्त्यैव स्वदुर्बोधभेदजनकः कश्चित्स्यात्स क इति विचार्यत इति तत्राह—एष इति. मुह्यन्तीत्येतदत्राप्यनुकृष्यते यद्वर्त्मनि मुह्यन्त्येव हरिर्मम मतिं भिनत्ति विपरीतीकरोति मत्स्य स्ववशत्वं स्वस्यानन्याधीनत्वं स्वप्रसादान्मोक्षादिसकलपुरुषार्थप्राप्तिरित्यादिबुद्धिं जनयतीति भावः तदुक्तम् "आह तद्ब्रह्मणो भिन्ना भिन्ना जीवाः सदैव तु" इत्यादि ॥ १३ ॥

एतदर्थं सदृष्टान्तमाह—यथेति । यथाकर्षकस्यायस्कान्तस्य सन्निधौ सत्ययः स्वयं भ्राम्यति स्वात्मानमुद्दिश्य गमनशक्तिं करोति तद्वदिति शेषः तथा मे चेतो यदृच्छया यदिच्छया चक्रपाणौ भिद्यते, तद्विपरीतीकरणशक्तीक्रियते अयोगमनशक्तिवच्चेतनस्यापि नैसर्गिकीति भावः । एतेन सर्वं हर्यधीनमित्युक्तं भवति. "एतस्य वा अक्षरस्य प्रशासने गार्गि ! प्राच्योऽन्या नद्यः स्यन्दन्ते य आत्मानमन्तरो यमयेत्" इतिभेदस्वरूप आहेत्यादि श्रुतिस्मृतिभ्याम् । विशेषण चराचरस्य सर्वस्य श्रीहर्यधीनप्रवृत्त्यवगमात्(१)पद्यद्वयस्य इत्यनेन पशुबुद्धिरबुद्धिभिरित्येतत्पद्द्वयाभिप्रायो दर्शितः ॥ १४ ॥

सुदीनः वाचा शिक्षायां क्षीणोऽशक्त इत्यर्थः । राजसेवक इत्यनेन भेदज्ञानासामर्थ्यञ्च सूचितम् उभयोरपि विस्तसाध्यत्वात् ॥ १५ ॥

अयशस्कृतो दुष्कीर्तिकरस्यास्य चतुर्थो दमो दण्डसंज्ञ इति वादिन इत्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पर इति पुंसां "भयं द्वितीयाभिनिवेशतः स्यात्" इत्यादिरीत्यानादित एव भगवद्बहिर्मुखानां जीवानाम् [illegible] एव स्फूर्त सर्वथा यस्य भगवतो मायया मोहितधियां [illegible]पूर्वकदेहात्मबुद्ध्या विशेषेण मोहितबुद्धीनामस्ति तन्माययैव परः परकीयोऽयं स्वीयोऽयमित्यसद्ग्रहः कृतस्तस्मै भगवते नमः, तेषां तदाग्रहशान्तये तमेव नमस्करोमीत्यर्थः । [illegible]दायमात्मवाचक-

(१) तात्पर्यो[illegible]तिक मितम् ।

तायां नपुंसकमेव स्यात् "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने" इत्यमरः । तस्मादेवं व्याख्यातम् ॥ ११ ॥

ततश्च स यदेति कथञ्चिन्महतः प्रसङ्गेन तत्साम्मुख्ये सति यदा स भगवाननुकूलः स्यात्तदा पूर्वोक्तया पशुबुद्धिर्विभिद्यते नश्यतीत्यर्थः । ततस्तामेव निवृत्य दर्शयति—अन्य इति. अर्थकामशास्त्रानुसारिणां भक्ताननुगतानां सर्वं सङ्गात् [illegible]आत्मता मननादिति भावः ॥ १२ ॥

स प्रसिद्धः परमात्मा तु एव मदुद्दिष्टगोचरतामिव गतः पूर्वोक्तैः स्वपरेत्यबुद्धिभिस्तु दुरत्ययानुक्रमणो निरूप्यते दुर्बोधशीलतया निर्धार्यते ॥ अहो आसतां ते यतस्तद्वर्त्मनि वेदवादिनोऽपि मुह्यन्ति तेष्वासतां ब्रह्मादयोऽपि मुह्यन्तीति स एव एव च मन्मतिं भिनत्ति । भवन्मतात् पृथक्करोति ॥ १३ ॥

ननु, तेनैव त्वन्मतिर्भिद्यते न त्वस्माभिः तथा तथैव मतिस्तेन भिद्यते न त्वस्माकमिति कथं ? तत्राह—यथेति । यदृच्छया स्वैरितया कारणान्तरनिरपेक्षतयेत्यर्थः । "यदृच्छा स्वैरिता" इत्यमरः । आकर्षायसोर्यथासौ स्वभावस्तथा द्वयोरपीति युक्तमेव तत्त्वादित्यर्थः ॥ १४ ॥

एतावदित्यर्धकम् । तमित्यर्धकम् ॥ १५ ॥

आनीयतामित्यस्याद्य चरणो युष्माभिरिति द्वितीये यस्मादयमिति पराद्धे यतो यस्येत्यध्याहारः 'आनयध्वमरे वेत्रम्' इत्यादिकतया तु यन्नोक्तं तत् खलु तस्य कोमलतां दृष्ट्वा नातिहृष्टं कर्कशत्वादिति गम्यते ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भद्रं ते इति त्वदिष्टं मोदकादिकं दास्याम इति भावः । वाचान् अतिक्रम्य तुभ्यं तव ॥ ९ ॥

भययतामिति यद्ययं वैष्णवस्य कस्यचिन्नाम गृह्णाति तदा तं वैष्णवं ज्ञात्वा राज्ञः सभां नीत्वा घातयाम इति भावः ॥ १० ॥

अहो मूढा इमे संसारे पापच्यमानाः मां मुग्धबालकं जानन्तीति मनसि विभाव्याह—परः परपक्षः स्वः स्वपक्ष इति असद्ग्राहः असदाग्रहः स एव पुंसां संसारसिन्धुपतितानां ग्राहो हिंस्रजलजन्तुविशेषः कृतः मायया सृष्टः दृष्टः पूर्वमनुमित एवासीत् संप्रति तु प्रत्यक्षीकृत इत्यर्थः । अतो यूयं तेन प्रतिचर्यां चर्वयध्वे एवेति भावः ॥ ११ ॥

बुद्धिभेदोऽयं तव कुत इत्यस्य प्रश्नस्योत्तरमाह—सहेति । अनुव्रतो ऽनुकूलः विशेषेण भिद्यते. विदीर्यते पशुबुद्धिरेव. का ? तत्राह—अन्य एवोऽस्मद्विपक्षस्तथाऽन्योऽहमेतस्य घातयितेति भेदं गता असती असाधुः "न हि गोप्यं हि साधूनामसन्मिन्नो दृष्टविद्विषाम्" इति भगवदुक्तेर्वस्तुतस्त्वात्मदृष्ट्या सर्वजीवानामेकरूपत्वात् देहदृष्ट्यापि सर्वदेहानां पञ्चभूतात्मकत्वाद्भेदो नास्त्येवेति भावः ॥ १२ ॥

उक्तलक्षणपशुबुद्धिमतां दुर्बोधत्व इत्याह—स इति । एव परमात्मा स्वः स्वपक्षः परो विपक्षः इति कुत्सिता बुद्धिर्येषां तैर्दुरन्वयं

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

गमम् अनुक्रमेण अनुसरणं यस्य सः न च सुबुद्धिभिः शास्त्रैः गममेव तदनुसरणमिति वाक्यमित्याह—यद्वर्त्मनि यस्यामि-र्गेऽनुसरणरूपे भक्तियोगे वेदवादिनां वेदार्थतात्पर्यविवेचका अपि मुह्यन्ति यूयन्तु ज्ञानलवदुर्विदग्धाः किमुतेति भावः । स भगवान् मे मतिं भिनत्ति युष्मन्मतिभ्यस्सकाशाद्भिन्नां करोति ॥ १३ ॥

स एव मतेर्भेदः किमाकार इति चेत्तत्राह—यथा अयो लोहं आकर्षयत्ययस्कान्तस्य सन्निधौ स्वयं भ्राम्यति तथैव मे चेतः चक्रपाणेः सन्निधौ स्वयमेव भ्राम्यति भिद्यते युष्मत्तोऽन्यः स्वकाशाद्भिन्नं भवति यदृच्छयेति नात्र स्वतकर्मतपोबलादिहेतुत्वं मन्यमानीत्यर्थः । अयमर्थः अयस्कान्तेन स्वशक्त्यैव लोहमाकृष्य स्वसंयुक्तीक्रियते तत्र किमपि कारणं प्रयोजनञ्च नास्तीत्ययस्कान्तस्य स्वभाव एव यथा तथैव चक्रपाणेरपि स्वभाव एवायं चक्रपापरवशतया स्वभक्तस्य चेतसः स्वस्मिन्नाकर्षणमिति तत्र मम किं स्वातन्त्र्यमस्तीतिभावः ॥ १४ ॥

राजसेवक उवाचेति शेषः ॥ १५ ॥

वेत्रं प्रहरणं दण्डनिशेषः यद्वयमयशस्करस्ततोऽस्य दुर्बुद्धेरुपायानां मध्ये चतुर्थो दमो दण्डः उदितः उक्तः शास्त्रेषु ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बालानुपति उल्लङ्घ्य तुभ्यं तव बुद्धिविपर्ययः कुतो जातः ॥ ९ ॥

ते बुद्धिभेदः प्रवृत्तिमार्गमस्मदाद्यनुप्रिश्नं त्यक्त्वा वासुदेवे बुद्धिप्रवेशः परेण केनापि कृतः उताहो स्वतोऽभवदिति भगवताम् ॥ १० ॥

परः स्वश्चेति असद्ग्राहः दुष्टाग्रहः यस्य मायया प्रकृत्या कृतः तथैव मोहितधियां भवतां दृष्टो, न तु मम. तस्मै भगवते नमः सर्वस्य वासुदेवात्मकत्वात् यदनुग्रहतो वासुदेवबुद्धिप्रवेशस्तस्य श्रीमद्गुरोर्विशेषतः परत्वासम्भवात् हरिगुरुप्रसादं विना स्वतश्च वासुदेवे बुद्धिप्रवेशासम्भवात् बुद्धिभेदः परकृतः उताहो मे स्वतोऽभवदिति वाक्यं सर्वथाऽनुपपन्नमिति भावः ॥ ११ ॥

तव बुद्धिभेदः कुत इत्यत्राह–सयदेति । स भगवान् यदा अनुवृत्तः अन्तर्यामिरूपेण गुरुरूपेण च अनुकूलो भवति तदा एषोऽन्योऽहमन्यः इति भेदगता इत्थं वासुदेवात्मकभ्रान्तिलक्षणिता भेदं प्राप्ता अत एवासती संसारप्रापिका अत एव पशूनामिव विवेकहीना बुद्धिर्विभिद्यते प्रवृत्तिमार्गाद्भिन्ना भवति वासुदेवे प्रविशतीत्यर्थः ॥ १२ ॥

–नन्वस्माकमनुमतः स कुतो नेत्यत्राह–स इति । स एव आत्मा परमात्मा दुरत्ययं दुरधिगममनुक्रमणाम् अतत्त्ववेदिनां यस्य अत एव स्वस्य परः शत्रुरिति अबुद्धिभिः परमात्मा भजनीय इति नास्ति बुद्धिर्येषां तैर्निरूप्यते न तु भवादृशास्तत्प्रपन्ना भवन्तीति भावः । "न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः । माययापहृतज्ञाना आसुरं भावमाश्रिताः" इति श्रीमुखोक्तेः ॥ भवतामसुरपक्षीयाणान्तु का वार्ता वेदवादिनो वेदत्रयीप्रोक्तकर्मनिष्ठास्तेभ्योऽपि श्रेष्ठाः ब्रह्मादयः यद्वर्त्मनि यत्प्राप्तिमार्गे मुह्यन्ति स्वपरेति सन्धिरार्षः ॥ १३ ॥

तत्कृपया तु मम बालस्यापि चेतस्तद्वर्त्मनि प्रविशतीत्याह-यथेति । यथा आकर्षसन्निधौ अयस्कान्तसमीपे अयो लोहः स्वयं भ्राम्यति तथा मे चेतो यदृच्छया चक्रपाणेः सन्निधौ भवतां प्रकृतिमार्गाद्भिन्नं भवति, तद्वर्त्मनि प्रविशतीत्यर्थः ॥ १४ ॥

तं प्रह्लादम् स ब्राह्मणो निर्भर्त्स्याहेति शेषः ॥ १५ ॥

अरे वेत्रमानीयताम् यतोऽयमस्माकमयशस्करः अतोऽस्य कुलाङ्गारस्य दैत्यकुलनाशहेतोः दमः दमनहेतुः उपायानां चतुर्थो दण्ड उदितः शास्त्रे उक्तः ॥ १६ ॥

भाषाटीका ।

हे वत्स प्रह्लाद ! तुमारा भला हो तुम सत्य कहो झूठ मत बोलो कि इन बालकों को भी अतिक्रमण करके यह तुमारी विपरीति बुद्धि कैसे हुई ॥ ९ ॥

यह तुमारी बुद्धि का भेद किसी दूसरे के सिखाने से है अथवा आपही से है, हे कुलनन्दन ! हम तुमारे गुरु लोक सची सुनने की इच्छा करते हैं तुम कहो ॥ १० ॥

प्रह्लाद उवाच ॥

प्रह्लाद बोले, कि यह अपना यह पराया ऐसा असत् आग्रह जिसकी माया से मोहित बुद्धि वाले असत्पुरुषों को होरहा है उस भगवान को नमस्कार है ॥ ११ ॥

वही भगवान् जब पुरुषों पर अनुकूल होता है तब यह अन्य है मैं अन्य हूं इस प्रकार पशुओं के तरह भेद को प्राप्त जो दुष्ट बुद्धि सो मेरीतरह भेद को प्राप्त हो जाती है ॥ १२ ॥

जिसके चरित का अनुवर्णन दुर्घट है और अबुद्धि लोग जिस को स्व पर ऐसा करके वर्णन करते हैं और जिसके मार्ग में वेद वादि बड़े २ ब्रह्मादिक मोहित होते हैं वही परमात्मा हमारी मति का भेद करते है ॥ १३ ॥

हे ब्रह्मन् ! जैसे चुंबक के समीप में लोह आपही खिच जाता है इसी प्रकार मेरा भी चित्त उन चक्रपाणि की इच्छा से भिन्न होरहा है ॥ १४ ॥

नारद उवाच ॥

नारदजी [illegible] कि—महामति प्रह्लाद ब्राह्मण से इतना कह [illegible] होगए ॥ वह विचारा दीन ब्राह्मण राज सेवक [illegible] दिखाकर कुपित होकर बोला ॥ १५ ॥

अरे [illegible] यह हमारी अकीर्ति करने वाला है [illegible] को चतुर्थ उपाय दंड ही उचित है ॥ [illegible]

दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः ।
यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः ॥ १७ ॥
इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः ।
प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनम् ॥ १८ ॥
तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयम् ।
दैत्येन्द्रं दर्शयामास मातृमृष्टमलङ्कृतम् ॥ १९ ॥
पादयोः पतितं बालं प्रतिनन्द्याऽऽशिषाऽसुरः ।
परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिम् ॥ २० ॥
आरोप्याङ्कमवघ्राय मूर्द्धन्यश्रुकलाऽम्बुभिः ।
आसिञ्चन्विकसद्वक्त्रमिदमाह युधिष्ठिर ! ॥ २१ ॥

हिरण्यकशिपुरुवाच ।

प्रह्लादानूच्यतां तात ! स्वधीतं किञ्चिदुत्तमम् ।
कालेनैतावताऽऽयुष्मन् ! यदशिक्षद्गुरोर्भवान् ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्कुतः ? तत्राह—दैतेया एव चन्दनद्रुमास्तेषां वनेऽयं कण्टकद्रुमतुल्यो जातः, तदेवाऽऽह, यस्य दैतेयचन्दनवनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोरयमर्भक एव नालायितो नालमिवाचरत् यथा परशोश्छेदकत्वे कण्टकाद्रिद्रुमनिर्मितो दण्डः सहकारी तं विना छेदनासम्भवात्तथाऽयं विष्णोर्दैत्यमूलोच्छेदे हेतुर्जात इत्यर्थः ॥१७॥

इति तं प्रह्लादं भीषयन्धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रमध्यापयामास ॥ १८ ॥

ज्ञातं ज्ञेयमुपायानां चतुष्टयं सामदानादि येन तं दैत्येन्द्रं प्रति मात्रा मृष्टमुद्वर्त्य स्नापितम् अलङ्कृतं भूषणतिलकादिभिः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कुलनाशकत्वं व्यनक्ति—दैतेया एव चन्दनद्रुमाः तेषां वनेऽयं कण्टकद्रुमतुल्यो जातस्तन्मूलेषि तेषां दैतेयचन्दनवनानां यानि मूलानि तेषामुन्मूलने छेदने परशोः परशुस्थानीयस्य विष्णोरयमर्भको नालायितः नालवदाचरितवान् यथा परशोश्छेदकत्वे कण्टकादिद्रुमनिर्मितो दण्डः सहकारी तं विना छेदनासंभवात् तथा अयं विष्णोः दैत्यमूलच्छेदे हेतुः सहकारी जात इत्यर्थः ॥ १७ ॥

इतीत्थं वदन् तर्जनादिभिर्नानोपायैर्भीषयन् प्रह्लादं तं त्रिवर्गस्योपपादनं धर्मार्थकामप्रतिपादकं शास्त्रं ग्राहयामास ॥ १८ ॥

ततो गुरुस्तं प्रह्लादं ज्ञातं ज्ञेयानामुपायानां सामादीनां चतुष्टयं यस्य तादृशं ज्ञात्वा आलक्ष्य मात्रा मृष्टं उद्वर्त्य स्नापितम् अलङ्कृतञ्च प्रह्लादं दैत्येन्द्रंप्रति दर्शयामास, पितृसन्निधौ प्रापयामासेत्यर्थः ॥ १९ ॥

ततः पादयोः प्रणमन्तं नमस्कुर्वन्तं बालम् आशिषा आशीःपूर्वकं प्रतिनन्द्य असुरो हिरण्यकशिपुः दोर्भ्यां भुजाभ्यां (पुत्रस्य शिरः) परिष्वज्य परमां निर्वृतिमानन्दं प्राप्तवान् ॥ २० ॥

ततः उत्सङ्गे निधाय मूर्द्धन्युपाघ्राय च अश्रुकलाम्बुभिर्हर्षाश्रुजलबिन्दुभिरासिञ्चन् विकसद्वदनं यस्य तादृशो दैत्यः सुतं प्रतीत्थं वक्ष्यमाणमाह—युधिष्ठिरेति पाठे सम्बोधनम् ॥ २१ ॥

तदेवाह—प्रह्लादेति । हे आयुष्मन् तात ! पुत्र प्रह्लाद ! भवाने तावता कालेन गुरोः सकाशाद्यदुपशिक्षदधीतवांस्तन्मध्ये किंचिदुत्तमं स्वधीतं सम्यगादरेण गृहीतं तत् हे तात ! प्रह्लाद, अनूच्यतां सम्यगनुक्रमेण पठ्यताम् ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उन्मूलयतीत्युन्मूलः स चासौ परशुश्च उन्मूलपरशुस्तस्य दैतेयचन्दनवनस्य मूलं तन्मूलपरशुस्तस्य नालायितः दण्डरूपस्तम्भवान् ॥ १७ ॥

त्रिवर्गस्योपपादनं शास्त्रम् ॥ १८ ॥

ज्ञातं ज्ञेयानां धर्मादिपुरुषार्थानां चतुष्टयं येन स तथा तं ज्ञातज्ञेयसाधनचतुष्टयं वा मातृमृष्टं शरीरमलत्यागेन स्नानं कारितम् १९ ॥ २० ॥ २१ ॥

प्रह्लाद उवाच ।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ २३ ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नव लक्षणा ।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुष्ठु अधीतं पठितम् ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुनश्च स एव तादृशपरमशुद्धरूपस्य विष्णोर्नाशयितः इत्यसामञ्जस्यमतीवेति भावः ॥ १७—२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यस्य वनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोर्नाशयितो दण्डस्थानीयः लोके हि परशोर्दण्डो वर्धुर एव सिद्धः स च कण्टकिद्रुमः ॥ १७ ॥

ग्राहयामास ग्राहयितुं यतते स्मेत्यर्थः ॥ १८ ॥

ज्ञातं ज्ञेयं ज्ञातुमर्हं चतुष्टयं सामदानभेददण्डात्मकमुपायचतुष्कं येन तत् ॥ १९—२१ ॥

सुष्ठु अधीतं संशयादिरहितं अनुकूलं गुरोर्हिरण्यकशिपुमते शुक्राचार्यात्मजात् प्रह्लादमते गुरोः श्रीनारदात् ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च दैतेयचन्दनवने अयं कण्टकद्रुमः यत् यस्य दैतेयचन्दनवनस्य यन्मूलं हिरण्यकशिपुप्रभृतिदैत्ययूथपसमूहभूतन्तदुन्मूलयतीति तथा तस्य परशोः परशुस्थानीयस्य विष्णोर्नालियो नालमिवाचरन्नयमर्भकः ॥ १७ ॥

त्रिवर्गस्य धर्मार्थकामसमूहस्योपपादनं प्रतिपादकं प्रवृत्तिशास्त्रं ग्राहयामास ॥ १८ ॥

ततस्तदनन्तरं गुरुः पाठकः एनं प्रह्लादं ज्ञातं ज्ञेयचतुष्टयं ज्ञातव्यभूतानां सामदानभेददण्डानां चतुष्टयं येन तं तथाभूतं ज्ञात्वा मात्रा मृष्टमुद्वर्त्यस्नापितमलंकृतञ्च दैत्येन्द्रंप्रति दर्शयामास ॥ १९ ॥

चिरञ्जीवेत्याद्याशिषा प्रतिनन्द्य ॥ २० ॥

अश्रुकलाम्बुभिः आनन्दाश्रुबिन्दुजलैः ॥ २१ ॥

आयुष्मन् हे तात ! प्रह्लाद ! एतावता कालेन गुरोस्सकाशात् भवान् यत्किञ्चित् अशिक्षत् तत्र उत्तमं सारभूतं सुष्ठु अधीतम् अनूच्यताम् अनुक्रमेण भण्यताम् ॥ २२ ॥

भाषा टीका ।

यह दैत्य रूप चंदन वन में कंटकद्रुम उत्पन्न हुआ है जिस दैत्य रूप चंदन वन की मूलका उन्मूलन करने वाला जो विष्णुरूप परशु (कुल्हाड़ी) उसका नाल (बेंटा) रूप सहकारी यह बालक है ॥ १७ ॥

इस तरह तर्जन आदि नाना उपायों से प्रह्लाद को भय देते हुए, अर्थ धर्म और काम इस त्रिवर्ग के प्रतिपादक शास्त्र को पढ़ाने लगे ॥ १८ ॥

तदनंतर गुरुने जाना कि यह सामदानादि चारों उपायों को जानचुका तब माता से उबटन स्नान आदि पूर्वक अलंकृत कराकर, दैत्येन्द्र के समीप ले गये ॥ १९ ॥

असुरराज भी चरणों में पड़े हुए बालक को असीस द्वारा अभिनंदन कर बाहुओं से आलिंगन कर बड़े हर्ष को प्राप्त हुआ ॥ २० ॥

और गोद में बैठा कर मस्तक आघ्राणकर उसके प्रसन्न मुख को प्रेमाश्रुओं से सींचता हुआ, हे युधिष्ठिर ! यह वक्ष्य माण वाक्य बोला ॥ २१ ॥

हिरण्यकशिपुरुवाच ॥

हिरण्यकशिपु बोला, कि—तात प्रह्लाद ! तुम्हारी दीर्घ आयु हो इतने काल तक जो तुमने कुछ गुरुजी से सीखा और जो अच्छा पढ़ा उसे कहो ॥ २२ ॥

…भावार्थदीपिका ।

पादसेवनं … दास्यं कर्मार्पणम्, सख्यं तद्विश्वासादि, … आत्मार्पणम्, यथा विक्रीतस्य गवाश्वादेर्भरणपोषण… क्रियते तथा देहं तस्मै समर्प्य तच्चिन्ताव…

निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा ।
गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः ॥ २५ ॥
ब्रह्मबन्धो ! किमेतत्ते विपक्षं श्रयताऽसता ।
असारं ग्राहितो बालो मामनादृत्य दुर्मते ! ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति नव लक्षणानि यस्याः सा भक्तिः अधीते न चेद्भगवति विष्णौ भक्तिः क्रियते सा चार्पितैव सती यदि क्रियेत ननु कृता सती पश्चादर्प्येत तदुत्तममधीतं मन्ये तत्त्वस्माद्गुरोरधीतं शिक्षितं वा तथाविधं किञ्चिदस्तीति भावः ॥ २४ ॥ २५ ॥

न विद्यते सारं यत्र तदसारम् न विद्यते सारं यस्मादिति वास्तवोऽर्थः ॥ २६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तमुत्तममधीतमध्ये किञ्चिदनूद्यतामिति तत्राह—श्रवणमिति । यदुक्तं पूर्वं "वनं गतो यद्धरिमाश्रयेत" इति तदेवाश्रयणं विवृणोति, श्रवणमिति द्वाभ्याम्. पुंसां श्रवणादीनि नव लक्षणानि यस्याः सा भक्तिश्चेन्नव लक्षणा भक्तिप्रतिपादकशास्त्रमधीतं चेत्तदेव स्वधीतमुत्तमं मन्ये न त्वधुना गुरोः सकाशादधीतं नत्तु गुरुभिर्नोऽध्यापितमिति भावः । स्वधीतप्रश्नोत्तरमिति गतमुत्तममधीतमिति. श्रवणमित्यादि तु पूर्वोक्ताश्रयणविवरणपरं भगवत्यद्धा क्रियते चेदधीतविद्याप्रतिपाद्या नव लक्षणा भक्तिर्निष्कपटभावेन भगवति क्रियते इति यत्कृतापि सा भक्तिर्विष्णावर्पितेति चेत् तदेतदुत्तमं मन्ये न केवलं नवलक्षणा भक्तिप्रतिपादकशास्त्राध्ययनमात्रमेवोत्तमम् अपि तु तदर्थानुष्ठानमनुष्ठितस्येश्वरे समर्पणं चेत्तदुत्तमं मन्ये केवलाध्ययनमात्रस्य व्यर्थत्वादिति भावः अर्पिता विष्णाविरमनेन भक्तेरनन्यप्रयोजनत्वेन कर्तव्यतोक्ता. तत्र विष्णोः श्रवणं तत्स्वरूपरूपगुणविभूतिश्रवणम्. कीर्तनं नामोच्चारणाद्यात्मकम्, स्मरणं स्वरूपादिविषयकमेव पादसेवनार्चनवन्दनदास्यसख्यानि तु तदीयपर्यन्तानि वन्दनं नमस्कारः पादसेवनं पादयोः सम्वाहनं तच्चार्चाविग्रहरूपावतारयोरेवेति वेदितव्यं परव्यूहविभवादेरतीन्द्रियत्वेन तत्पादसेवनासम्भवात् यद्वा भगवद्विषये मानसिकं तदीयविषये तु कायिकं विवक्षितम् आत्मनिवेदनम् "ओमित्यात्मानं युञ्जीत" इति श्रुत्युक्तरीत्या तच्छेषत्वानुसन्धानं यद्यपि भक्तिर्नाम ध्यानोपासनादिशब्दवाच्याऽहरहरभ्यासाधेयातिशया आप्रयाणादनुवर्तमाना विवेकादिसाधनसप्तकानुगृहीता तैलधारावदविच्छिन्नस्मृतिसन्तानात्मिका प्रीत्यात्मिका प्रत्यक्षतापन्ना ध्रुवानुस्मृतिः । ननु श्रवणादिरूपेण नवलक्षणा, तथाप्युक्तविधया भक्तेरेव कर्मज्ञानयोगादिवत्स्वमहिम्नैव श्रवणादीन्यप्यवश्यत्वेन निवर्तकान्युच्यन्ते. यद्वा, नवलक्षणा लक्ष्यते एभिरिति लक्षणानि चिह्नानि ज्ञापकानि भक्तियोगपरिपाकावस्थाज्ञापकानीति यावत्. उत्कर्षावधभक्तियोगनिष्ठेन रागत एव श्रवणादीनि क्रियन्ते. लोकेऽपि हि यद्वस्तुविषया प्रीतिस्तद्विषयकश्रवणादीनि स्वत एव प्राप्तानीति न तत्र यत्नेन भवितव्यम्. अतः श्रवणादीनि प्रीत्यात्मकभक्तियोगकारितावस्थाविशेषरूपाणि तन्निष्पत्तिसूचकानीति तात्पर्यम्. एवं प्रीतिकारितश्रवणादिपर्यन्तभक्तियोगानुष्ठानमेव "वनं गतो यद्धरिमाश्रयेत" इत्युक्तमाश्रयणमित्युक्तं भवति ॥ २३ ॥ २४ ॥

एतदेवंविधं सुतस्य वचो निशम्याकर्ण्य तदा हिरण्यकशिपुः रुषा प्रस्फुरितः कम्पमानः अधरोष्ठो यस्य तादृश इदं वक्ष्यमाणं गुरुपुत्रं प्रत्युवाच ॥ २५ ॥

तदेवाह—हे ब्रह्मबन्धो ब्राह्मणाभास ! किमेतत्ते त्वया कृतमिति शेषः, अतीवानुचितमेतत्कृतमित्यर्थः । किंतत् ? यन्मामनादृत्य विपक्षं शत्रुपक्षमाश्रयता अत एव असतां महामहितकारिणा त्वया हे दुर्मते ! असारं ग्राहितो बाल इति एतत् ॥ २६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नियन्तृत्वेनात्मनि मयि स्थितो भगवानिति नितरां वेदनमात्मनिवेदनम्—

"मुक्तस्यापि ममान्तःस्थो नियन्तैव हरिः सदा ।
इति ज्ञानं समुद्दिष्टं सद्भिरात्मनिवेदनम्" ॥

इत्यनेनात्म समर्पणं नार्थः किन्तूक्त एवार्थः इत्युक्तकारेण श्रवणादिभिर्लक्ष्यते असंभवव्यभिचारपरिहारेण ज्ञायत इति ॥ २३ ॥

नवलक्षणा विष्णौ भक्तिर्यस्मिन् शास्त्रेऽर्पिता प्रतिपादिता पुंसा सा भगवत्युत्तमश्लोके अद्धा निर्व्याजेन क्रियते चेद्यदि तर्हि तदधीतं शास्त्रमुत्तमं मन्ये नान्यदित्यन्वयः । नव श्रवणादीनि लक्षणानि चिह्नानि यस्यां सा तथा ॥ २४—२५ ॥

ते त्वया ॥ २६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रवणमिति युग्मकं । तत्र श्रवणम्, नामरूपगुणपरिकरलीलामयशब्दानां श्रोत्रस्पर्शः एवं कीर्तनस्मरणयोरपि क्रमो ज्ञेयः स्मरणं यत्किञ्चिन्मनसानुसन्धानम्. पादसेवनं कालदेशाद्युचितपरिचर्या. अर्चनं विष्णुपूजा. वन्दनं नमस्कारः. दास्यं तद्दासोऽस्मीत्यभिमानः, सख्यं बन्धुभावेन तद्धितोत्साहनम्,

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आत्मनिवेदनं देहादिशुद्धात्मपर्यन्तस्य सर्वतोभावेन तस्मिन्ने-वार्पणम् इति नवलक्षणानि यस्याः सा भगवति तद्विषयिका भक्तिः साक्षाद्रूपा न तु कर्माद्यर्पणरूपपरम्परा भक्तिरियं तत्रापि श्री विष्णुरेवार्पिता तदर्थमेवेदमिति भावितेन न तु धर्मार्थादिष्वर्पिता एवमेवम्भूता भक्ति क्रियेत, तदा तेन कर्मा यदधीतं तदुत्तमं मन्ये इत्यर्थः । तथाच श्रीगोपालतापनी श्रुतिः "भक्तिरस्य भजनं तदि-हामुत्रोपाधि नैरास्येनामुष्मिन् मनः कल्पनमेतदेव नैष्कर्म्यम्" इति. अत्र नवलक्षणसमुच्चयो नावश्यकः एकेनैवाङ्गेन साध्यसि-द्धिश्रवणात् कश्चिदन्याङ्गमिश्रणान्तु तथापि भिन्नभक्तरुचि-त्वात्. ततो नवलक्षणशब्देन सामान्योक्त्या तन्मात्रानुष्ठानं विधी-यत इति ज्ञेयं नवलक्षणत्वञ्चास्याः अन्येषामप्यङ्गानां तदन्तर्भावाद्यु-क्तम्. किञ्चिच्चात्र विशिष्यलिख्यते—तदेवं नामादिश्रवणादिक्रमाङ्ग-क्रमः, तत्र यद्यप्येकतरेणापि व्युत्क्रमेणापि सिद्धिर्भवत्येव तथापि प्रथमं नाम्नः श्रवणमन्तःकरणशुद्ध्यर्थमपेक्ष्यम्. शुद्धे चान्तःकरणे रूपश्रवणेन तदुदययोग्यता भवति. सम्यगुदिते च रूपे गुणानां स्फुरणं सम्पद्यते. सम्पन्ने च गुणानां स्फुरणेन परिकरवैशिष्ट्ये-न तद्वैशिष्ट्यं सम्पद्यते ततस्तेषु नामरूपगुणपरिकरेषु सम्यक् स्फुरितेषु लीलानां स्फुरणं सुष्ठु भवतीत्यभिप्रेत्य साधनक्रमो लि-खितः । एवं कीर्त्तनस्मरणयोश्च ज्ञेयम् इदञ्च श्रवणं श्रीमहन्मुखरितं तन्महात्म्यं जातरुचीनां परमसुखदम्. तच्च द्विविधम्, महदाविर्भा-वितं महत्कीर्त्यमानञ्चेति. तत्रापि श्रवणे श्रीभागवतश्रवणन्तु परमश्रेष्ठं तस्य तादृशप्रभावमयशब्दात्मकत्वात् परमरसमयत्वाच्च. अत्र मूर्च्छाभिभवाय इतिवदजामीलनामादिश्रवणान्तु मुहुरा-वर्त्तितव्यम् तत्रापि सवासनमहानुभवमुखात् सर्वस्य श्रीकृष्ण-नामादिश्रवणन्तु परमभाग्यादेव सम्पद्यते, तस्य पूर्णभगवत्वात् इति. एवं सङ्कीर्त्तनादिष्वप्यनुसन्धेयम्. तत्र यत् स्वयं सम्प्रति कीर्त्यते तदपि श्रीशुकदेवादिमहत्कीर्त्तितचरत्वेनानुसन्धाय कीर्त्तनीय-मिति तदेव श्रवणं दर्शितम्. अस्य कीर्त्तनादितः पूर्वत्वं तद्विना तदा-वहाभावात् । विशेषतश्च यदि साक्षादेव महत्कृतस्य कीर्त्तनस्य श्रवणमात्रं सम्पद्यते तदैव स्वयं पृथक्कीर्त्तनीयमिति तत्प्राधान्यात्. एवमेवोक्तं तद्वाग्विसर्गइत्यादौ टीकाकृद्भिः यत् यानि नामानि वक्तरि सति शृण्वन्ति श्रोतरि सति गृणन्ति अन्यदातु स्वयमेव गायन्तीति. अथातः कीर्त्तनम्, तत्र पूर्ववत् नामादिक्रमोऽयः नाम-कीर्त्तनञ्चेदमुच्चैरेव प्रशस्तं "नामान्यनन्तस्य हतत्रपः पठन्" इत्यादौ. अथ तथोपदिष्टं कलियुगपावनावतारेण श्रीभगवता "तृणादपि सुनी-चेन तरोरपि तितिक्षुणा । अमानिना मानदेन कीर्त्तनीयः सदा हरिः" ॥ इति. इदञ्च कीर्त्तनाख्या भक्तिर्भगवतो द्रव्यजातिगुणा-क्रियादीन् अनेकविपयापारकरुणामयीतिश्रुतिपुराणादिविश्रुतिः कलौ तदीनत्वम्. यथा ब्रह्मवैवर्त्ते "अतः कलौ तपोयोगविद्या-यज्ञादिकाः क्रियाः । साङ्गा भवन्ति न कृता कुशलैरपि देहिभिः" ॥ इति. अत एव कलौ स्वभावत एवातिदीनेषु लोकेष्वाविर्भूय अनायासेनैव तत्तद्युगगततत्तत्साधनानां सर्वमेव फलं ददाना सा कृतार्थयति. यत एव कलौ भगवतो विशेषतश्च सन्तोषो भव-ति. अत्र कलिप्रसङ्गेन कीर्त्तनस्य गुणोत्कर्ष इति वक्तव्यं भक्ति-मात्रे कालदेशादिनियमस्य निषिद्धत्वात्. तस्मात् सर्वत्रैव युगे श्रीमत्कीर्त्तनस्य समानमेव सामर्थ्यम् कलौ श्रीभगवता कृपया तद्ग्राह्यम् इत्यपेक्षयैव तत्तत्प्रशंसेति स्थितम् अत एव यद्यन्या भक्तिः कलौ कर्त्तव्या तदा तत्संयोगेनैवेत्युक्तं "यज्ञैः सङ्कीर्त्तनप्रायैर्यजन्ति हि सुमेधसः" इति । तत्र च स्वतन्त्रमेव नामकीर्त्तनमत्यन्तप्रशस्तं "हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा" इत्यादौ. अत्र पाद्मोक्ताः दशापराधाः त्याज्याः यथा सनत्कुमारवाक्यं "सर्वापराधकृदपि मुच्यते हरिसंश्रयः । हरेरप्यपराधान् यः कुर्याद्द्विपदपांसनः ॥ ना-माश्रयः कदाचित् स्यात् तरत्येव स नामतः । नाम्नोऽपि सर्वसु-हृदो ह्यपराधात् पतत्यधः" ॥ अपराधाश्च संक्षिप्य लिख्यन्ते, यथा सतां निन्दा (१) श्रीविष्णोस्सकाशाच्छिवनामादेः स्वातन्त्र्या-मननम् (२) गुर्ववज्ञा (३) श्रुतितदनुगतशास्त्र निन्दनम् (४) । हरि-नाममहिम्नि अर्थवादमात्रमितिमननम् (५) तत्र प्रकारान्तरे-णार्थकल्पनम् (६) । नामबलेन पापे प्रवृत्तिः (७) । अन्यशुभ-क्रियाभिर्नामसाम्यमननम् (८) । अश्रद्दधाने विमुखेऽप्यशृण्वति नामोपदेशः (९) । नाममाहात्म्ये श्रुतेऽप्यप्रीतिरिति (१०) । एतेषामपराधानामनन्यप्रायश्चित्तञ्चोक्तम्. तत्रैव "नामापराधयु-क्तानां नामान्येव हरन्त्यघम् । अविश्रान्तप्रयुक्तानि तान्येवार्थ-कराणि च" इति । सत्स्वप्यपराधेषु तत्सन्तोषणार्थमेव सन्त-तनामकीर्त्तनादिकं समुचितम् अम्बरीषचरितादौ तदेकस-म्बन्धे नानापराधानां दर्शनात् उक्तञ्च नामकौमुद्याम् महद-पराधस्य भोगएव निवर्त्तकस्तदनुग्रहो वेति. अत एवोक्तं श्री-शिवंप्रति दक्षेण—"योऽसौ मया विदिततत्त्वदृशा सभायाम्" इत्यादि. अस्मिन्कीर्त्तने निजरैर्नानाभिर्नामभिर्मिश्रणपाठा-दप्यन्तर्गतौ तथात्र श्रीभागवतस्थितनामादिकीर्त्तनन्तु पूर्व-वदन्यदीयनामादिकीर्त्तनादधिकं ज्ञेयम्. अथ कीर्त्तनादिभिः शुद्धा-न्तःकरणश्चेत् "एतन्निर्विद्यमानानाम" इत्याद्युक्तत्वान्नामकीर्त्तना-परित्यागेन स्मरणं कुर्यात् यदेव नामादिस्मरणभेदेन बहु-विधं भवति तत्र पञ्चविधं यत्किञ्चिदनुसन्धानं स्मरणं सर्व-तश्चित्तमाकृष्य सामान्याकारे मनोधारणं धारणा. विशेषतो रूपादिचिन्तनं ध्यानं अमृतधारावदनवच्छिन्नं तद्ध्यानानु-स्मृतिः ध्येयमात्रस्फुरणं समाधिरिति कांचल्लीलादियुक्ते च तस्मिन् अन्यास्फूर्त्तिः समाधिस्स्यात् एतद्रूपं दासादिभक्तानां पूर्वस्तु प्रायः शान्तभक्तानाम् अथ रुचिः शक्तिश्च चेत्तदपरि-त्यागेन पादसेवाच कर्त्तव्या सेवा स्मरणाभिन्नार्थं सा किञ्चि-न्निर्दिष्टे दास्यसेवायां पादशब्दो भक्त्यैव निर्दिष्टः ततः सेवायाः सादरत्वं विधीयते अस्य श्रीमूर्त्तिदर्शनस्पर्शनपरिक्रमानु-व्रजनभगवन्मन्दिरगङ्गापुरुषोत्तमद्वारकामथुरादितदीयतीर्थस्थान-गमनादयोऽप्यन्तर्भाव्याः तत्परिकरप्रायत्वात् गङ्गादीनां परमभागवतत्वप[illegible] तत्सेवादिकं महत्सेवादावेव पर्य-वस्यति तुलसी[illegible] तस्याश्चैतान्तर्भाव्या ततो महतामिव गङ्गादीनां [illegible] अर्चनम्. तन्मार्गे श्रद्धाचेद्दाश्रित-मन्त्र [illegible] पि श्रीभागवतमते पञ्चरात्रादि-वदर्चनमा[illegible] तद्विनापि श्रवणादीना-मेकतरेणापि [illegible] त्. तथोक्तं प्राचीनै-रपि ।——

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

"श्रीविष्णोः श्रवणे परीक्षिदभवत् वैयासकिः कीर्तने-
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ।
अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्जुनः-
सर्वस्वात्मनिवेदने बलिरभूत् कृष्णाप्तिरेषां परम्" ॥ इति.

तथापि श्रीनारदादिवर्त्मानुसरद्भिः श्रीभगवता सह सम्बन्धविशेषं दीक्षाविधानेन श्रीगुरुचरणसम्पादितं चिकीर्षद्भिः कृतायां दीक्षायामर्चनमवश्यं क्रियेतैव येतु सम्पत्तिमन्तो गृहस्थास्तेषां त्वर्चनमार्ग एव मुख्यः तदकृत्वापि निष्किञ्चनवत्केवलस्मरणादिनिष्ठत्वे वित्तशाठ्यप्रतिपत्तिः स्यात्. परद्वारा सम्पादनं व्यवहारनिष्ठत्वस्यालसत्वस्य वा प्रतिपादकं ततो अश्रद्धामयत्वाद्धीनमेव तत्. किञ्च, गृहस्थानां परिचर्यामार्गे द्रव्यसाध्यतया तदर्चनमार्गाद्विशेषेण प्राप्तस्यार्चनमार्गस्य प्राधान्यम् अत्यन्तविधिसापेक्षत्वात्तेषां तथा गार्हस्थ्यधर्मस्य देवता यागरूपस्य शाखापल्लवादिसेकस्थानीयस्य मूलसेकरूपं तदर्चनमित्यपि तदकरणे महान् दोषः । दीक्षितानाञ्च सर्वेषां तदकरणे नरकपातः श्रूयते । अशक्तमयोग्यंप्रति चाग्नेये । "पूजितं पूज्यमानं वा यः पश्येद्भक्तितो हरिम् । श्रद्धया मोदयेद्यस्तु सोपि योगफलं लभेत्" ॥ इति. योगोऽत्र पाञ्चरात्राद्युक्तः क्रियायोगः किञ्चास्मिन्नर्चनमार्गे अवश्यं विधिरपेक्षणीयः तत्र वैष्णवसम्प्रदाय एव प्रमाणम् । ननु, भगवन्नामात्मका एव मन्त्राः तत्र विशेषेण नमः शब्दाद्यलङ्कृताः । श्रीभगवता श्रीमहर्षिभिश्चाहितशक्तिविशेषाः श्रीभगवता सममात्मसम्बन्धविशेषप्रतिपादकाश्च. तत्र केवलानि भगवन्नामान्यपि निरपेक्षाण्येव परमपुरुषार्थफलपर्यन्तदानसमर्थानि. ततो मन्त्रेषु नामतोऽधिकसामर्थ्ये लब्धे कथं दीक्षाद्यपेक्षा ? उच्यते यद्यपि स्वरूपतो नास्ति तथापि प्रायः स्वभावतो देहादिसम्बन्धेन कदर्यशीलानां विक्षिप्तचित्तानां जनानां तत्सङ्कोचीकरणाय श्रीमहर्षिप्रभृतिभिरत्रार्चनमार्गे क्वचित् काचिन्मर्यादा स्थापितास्ति. ततस्तदुल्लंघने शास्त्रं प्रायश्चित्तमुद्भावयति तत उभयमपि समञ्जसमिति. तदेतदर्चनं द्विविधम् । केवलं कर्ममिश्रञ्च, तयोः पूर्वंनिरपेक्षाणां श्रद्धावताम् उत्तरं व्यवहारचेष्टातिशयवतां यादृच्छिकभक्त्यनुष्ठानवत्तादिलक्षणलक्षितश्रद्धानां । तथा तद्विपरीतलक्षितश्रद्धानामपि प्रतिष्ठितानां भक्तिवार्त्तानभिज्ञबुद्धिषु साधारणवैदिककर्मानुष्ठानलोपोऽपि माभूदिति लोकसंग्रहपराणां गृहस्थानां दर्शितम् । अस्याङ्गानि चागमादौ ज्ञेयानि तथा श्रीकृष्णजन्माष्टमीकार्तिकादिव्रतैकादशीजागरणादिकम् अत्रैवान्तर्भाव्यम् अथास्मिन् पादसेवनार्चनमार्गे अपराधास्त्याज्या अत्रागमोक्तानुसारेण लिख्यन्ते—

"यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे ।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥
उच्छिष्टे वाप्यशौचे वा भगवद्वन्दनादिकम् ।
एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणम् ॥
पादप्रसारणञ्चाग्रे तथा पर्यङ्कबन्धनम् ।
शयनं भक्षणञ्चापि मिथ्याभाषणमेव च ॥
उच्चैर्भाषा मिथो जल्पो रोदनानि च विग्रहः ।
निग्रहानुग्रहौ चैव नृषु च क्रूरभाषणम् ॥
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः ।
अश्लीलभाषणञ्चैव अधोवायुविमोक्षणम् ॥
शक्तौ गौणोपचारश्च अनिवेदितभक्षणम् ।
तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणम् ।
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिके ।
पृष्ठीकृत्यासनञ्चैव परेषामभिवादनम् ॥
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा ।
अपराधास्तथा विष्णोर्द्वात्रिंशत् परिकीर्तिताः" ॥

वाराहे च येऽन्येऽपराधास्ते संक्षिप्य लिख्यन्ते । राजान्नभक्षणम् ध्वान्तागारे हरेः स्पर्शः विधिं विना हर्युपसर्पणं वाद्यं विना तद्द्वारोद्घाटनं कुक्कुरदृष्टभक्ष्यसंग्रहः अर्चने मौनभङ्गः पूजाकाले विडुत्सर्गाय गमनं । गन्धमाल्यादिकमदत्वा धूपनम् अनर्हपुष्पेण पूजनं तथा—

"अकृत्वा दन्तकाष्ठञ्च कृत्वा निधुवनं तथा ।
स्पृष्ट्वा रजस्वलां दीपं तथा मृतकमेव च ॥
रक्तं नीलमधौतञ्च पारक्यं मलिनं पटम् ।
परिधाय मृतं दृष्ट्वा विमुच्यापानमारुतम् ॥
क्रोधं कृत्वा श्मशानञ्च गत्वा भुक्त्वाप्यजीर्णभुक् ।
भुक्त्वा कुसुम्भं पिण्याकं तैलाभ्यङ्गं विधाय च ॥
हरेः स्पर्शो हरेः कर्मकरणं पातकावहम्" ॥

तथा तत्रैवान्यत्र । भगवच्छास्त्रानादरेण मतप्रतिपत्तिः अन्यशास्त्रप्रवर्त्तनं तदग्रतस्ताम्बूलचर्वणं एरण्डपत्रस्थपुष्पैरर्चनं आसुरकाले पूजा पीठे भूमौ चोपविश्य पूजनं स्नपनकाले वामहस्तेन तत्स्पर्शः पर्युषितैर्याचितैर्वा पुष्पैरर्चनं पूजायां ष्ठीवनं तस्यां स्वगर्वप्रतिपादनं तिर्यक्पुण्ड्रधृतिः अधौतपदत्वेऽपि तन्मन्दिरप्रवेशः अवैष्णवपक्वनिवेदनं अवैष्णवदृष्टौ पूजनं विघ्नेशमपूजयित्वा कपालिनं दृष्ट्वा वा पूजनं नखाम्भसा स्नपनं घर्माम्बुलिप्तत्वेऽपि पूजनम् इत्यादयः अन्यत्र निर्माल्यलंघनं भगवच्छपथादयोऽन्ये च बहवः अथ तथापि प्रामादिके भगवदपराधे पुनर्भगवत्प्रसादनानि कर्त्तव्यानि. यथा स्कान्दे अवन्तीखण्डे श्रीव्यासशौनकयम्. "अहन्यहनि यो मर्त्यो गीताध्यायं पठेत्तु वै । द्वात्रिंशदपराधांस्तु क्षमते तस्य केशवः" इति तत्रैव द्वारकामाहात्म्ये "सहस्रनाममाहात्म्यं यः पठेत् शृणुयादपि । अपराधसहस्रेण न स लिप्येत् कदाचन" इति तत्रैव रेवाखण्डे—

द्वादश्यां जागरे विष्णोर्यः पठेत्तुलसीस्तवम् ।
द्वात्रिंशदपराधान् हि क्षमते तस्य केशवः ॥

तत्रैवान्यत्र । तुलस्यारोपणं कार्यं श्रवणेन विशेषतः ।
अपराधसहस्राणि क्षमते पुरुषोत्तमः" ॥ इति.

अत्रैवान्यत्र कार्तिकमाहात्म्ये—

तुलस्या कुरुते यस्तु शालग्रामशिलार्चनम् ।
द्वात्रिंशदपराधांश्च क्षमते तस्य केशवः" ॥ इति.

ब्रह्मपुराणे—

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यः करोति हरेः पूजां कृष्णशस्त्राङ्कितो नरः ।
अपराधसहस्राणि नित्यं हरति केशवः" ॥ इति.

आदिवाराहे—

"संवत्सरस्य मध्ये तु तीर्थे सौकरवे मम ।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात् ॥
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ।
अनयोस्तीर्थयोरेकं यः सेवेत् सुकृती नरः ॥
सहस्रजन्मजनि कृतानपराधान् जहाति सः" ॥ इति.

सौकरवे सूकरक्षेत्राख्ये अथार्चनमार्गे क्वचिन्मानसपूजाविहितास्ति यथा पाद्मे उत्तरखण्डे "साधारणं हि सर्वेषां मानसेज्या नृणां प्रिया" इति. गौतमीये—संन्यासिनां मुमुक्षूणां मानसोपहृतिः परा" इति. तन्महिमा यथा श्रीनारदपञ्चरात्रे श्रीनारायणवाक्ये "अयं यो मानसो योगो जराव्याधिभयापहः" इत्यादौ—

"यश्चैतत्परया भक्त्या सकृत् कुर्यान्महामते ।
क्रमोदितेन विधिना तस्य तुष्याम्यहं मुने !" ॥ इति.

एषा कचित् स्वतन्त्रापि भवति–मनोमय्या मूर्तेरष्टमतया स्वातन्त्र्येण विधानात् "अर्चादौ हृदये वापि यथा लब्धोपचारकैः" इत्यादिहंसवचने वाशब्दात् । अत्र ब्रह्मवैवर्ते कथा च. यथा, प्रतिष्ठानपुरे कश्चिद्विप्र आसीत् स च दरिद्रोऽपि कर्माधीनमात्मानं मन्यमानः शान्त एवासीत् स तु सरलबुद्धिः कदाचिद्विप्रेन्द्राणां सदसि वैष्णवान् धर्मान् शुश्राव ते च धर्मा मनसापि सिद्ध्यन्तीति श्रुत्वा दरिद्रः स्वयं तथैवाचरितुमारब्धवान् ततश्च गोदावरीस्नानपूर्वकं नित्यं कर्म समाप्य शान्तमतिर्भूत्वा विविक्तासनप्राणायामादिपूर्वकं स्थिरीभूयमनसैवाभिमतां हरिमूर्तिं स्थापयित्वा स्वयं दुकूलादिकं परिधाय दृढं परिकरं बद्ध्वा तत्सदनं सम्मार्ज्य तां प्रणम्य च राजनसौवर्णघटैः सर्वेषां गङ्गादितीर्थानां जलमाहृत्य तथा नानापरिचर्याद्रव्याण्युपनीय तदीयस्नपनादिकं आरात्रिकान्तं महाराजोपचारं समाप्य दिनन्दिनं सुखातिशयमाप्नुवन्नासीत् तदेवं बहुषु कालेषु गतेषु कदाचिन्मनसैव घृतसहितं परमान्नं निर्माय सौवर्णपात्रेण तद्भोजनार्थमुत्थाप्य स्थितः तत्तथा स्फुरिते तस्मिन् प्रविष्टमङ्गुष्ठयुगलं दग्धं प्रतियन् हन्त तदिदं दुष्टं जातमिति दुःखेन समाधिभङ्गेऽपि जाते दग्धाङ्गुष्ठतया बहिरपि पीडितो बभूव तदवधाय वैकुण्ठे समुपविष्टेन श्रीवैकुण्ठनाथेन हसता श्रीप्रभृतिभिस्तत्कारणं पृष्टेन च सता स्वान्तिकं विमानेनानयामासे तथाविधतया दर्शयामासे स्वान्तिके प्रोर्ध्यतया स्थापयामासे च । अथ वन्दनम्. तच्च यद्यप्यर्चाङ्गत्वेनापि वर्तते तथापि कीर्तनस्मरणवत् स्वातन्त्र्येणापीत्यभिप्रेत्य पृथग्विधीयते एवमन्यत्रापि वन्दनस्य पृथग्विधानं चानन्तगुणैश्वर्यश्रवणात् तद्गुणानुसन्धानपादसेवादौ त्रिभूतद्भ्यानां नमस्कारमात्रे कृताध्यवसायानामर्थे स एव नमस्कारस्तत्पादावनत्येनाप्यति दिष्टः नमस्कारेऽपराधाश्चैते परिहर्तव्याः विष्णुस्मृत्यादिदृष्ट्या ये खलु एकहस्तकृतत्ववस्त्रावृतदेहत्वभगवदग्रपृष्ठवामभागाधृतनिकटगर्भमन्दिरगतत्वादिमयाः । अथ दास्यम् "जन्मान्तरसहस्रेषु यस्य स्यान्मतिरीदृशी । दासोऽहं वासुदेवस्य सर्वान् लोकान् समुद्धरेत्" ॥ इतीतिहाससमुच्चयोक्तलक्षणम् । अस्तु तावत्तद्भजनप्रयासः केवलतादृशत्वाभिमानेनापि सिद्धिर्भवतीत्यभिप्रेत्यैवोत्तरत्र निर्देशश्च तस्य एतस्य कार्यभूतं परिचर्यादिकं केवलपरिचर्यादिकं केवलपरिचर्यारूपत्वे भेदो न स्यात्. अथ सख्यम् । यथा अगस्त्यसंहितायाम्—

परिचर्यापराः केचित् प्रासादेषु च शेरते ।
मनुष्यमिव तं द्रष्टुं व्यवहर्तुं च बन्धुवत्" ॥ इति.

अत एव "यन्मित्रं परमानन्दमित्यत्र मित्रपदविन्यासः कृतः । अस्य चोत्तरपाठः प्रेमविश्रम्भभावनामयत्वेन दास्यादप्युत्तमत्वापेक्षया. किञ्च परमेऽश्वरेऽपि यत् सख्यं विधीयते तच्चाश्चर्यं "नादेवो देवमर्चयेत्" इति तद्भावस्यापि विधानश्रवणात् किन्तु तद्भावस्तत्सेवा विरुद्ध इति भक्तैरपेक्ष्यते सख्यन्तु परमसेवानुकूलमित्युपादीयते इति । तदेतत् साक्षाद्भजनात्मकं दास्यं सख्यञ्च टीकायामपि दर्शितमस्ति तस्यैव मे सौहृदसख्यमैत्रीदास्यं पुनर्जन्मनि स्यादिति श्रीदामविप्रवाक्ये । यथा श्रीकृष्णस्य भक्तवात्सल्यं दृष्ट्वा भक्तिं प्रार्थयते तस्येति सौहृदं प्रेम च सख्यं हिताशंसनञ्च मैत्री उपकारकत्वं दास्यं सेवकत्वञ्च तत्समाहार एकवचनं तस्य तत् सम्बन्धि मे मम स्यात् ननु विभूतिरस्त्वेतत् अत्र दास्यसख्याभ्यां कर्मार्पणविश्वासौ न स्यातां साक्षात् भक्तित्वाभावात् कर्मार्पणस्य फलं भक्तिविश्वासश्च भक्त्यभिनिवेशहेतुः श्रवणकीर्तनमित्यादौ विष्णोः श्रवणं विष्णोः कीर्तनमिति अथात्मनिवेदनं तत् कायस्यात्मार्थचेष्टाशून्यत्वं तन्न्यस्तात्मसाधनसाध्यत्वं तदर्थैकचेष्टामयत्वञ्च इदं ह्यात्मार्पणं गोविक्रयवत् विक्रीतस्य गोरर्थनार्थं विक्रीतवता चेष्टा न क्रियते तस्य च श्रेयःसाधकत्वं क्रीतवानेव स्यात् स च गौस्तस्यैव कर्म कुर्यात् न पुनर्विक्रीतवता चेष्टा न क्रियते तस्य च श्रेयःसाधकत्वं क्रीतवानेव स्यात् स च गौस्तस्यैव कर्म कुर्यात् न पुनर्विक्रीतवतोऽपीति अत्र केचिद्देहार्पणमेवार्पणमिति मन्यन्ते यथा भक्तिविवेके "चिन्तां कुर्यान्न रक्षार्थे विक्रीतस्य यथा पशोः । तथार्पयन् हरौ देहं विरमेदस्य रक्षणात्" ॥ इति केचिच्चतुर्द्धैवार्पणमेव. यथा श्रीमदालवन्दारस्तोत्रे "वपुरादिषु योऽपि कोऽपि वा गुणतो सानि यथा तथाविधः । तदहं तव पादपद्मयोरहमद्यैव मया समर्पितः" । इति अत्र योऽपि कोऽपि वेति वादिभेदान् स्वरूपतः अथवा गुणतो यथा तथाविधः देवमनुष्यादिरूपः असानि भवानि कामचारे लोट् भवेयमिति सत्त्वाभावयश्चेति विग्रहात् सोऽयमित्यर्थः । तत्र केवलमात्मनिवेदनं दानसमये बलिराजे दृश्यते अन्येषु मिश्रेषु दास्येनात्मनिवेदनं श्रीमदम्बरीषे प्रथमं भावेन श्रीरुक्मिणी देव्यामेवं सख्यादिनापि ज्ञेयम् ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

सन्ति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः ।
तेषामुदेत्यघं काले रोगः पातकिनामिव ॥ २७ ॥

गुरुपुत्र उवाच ।

न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेन्द्रशत्रो ! ।
नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं कदद्‍ाः स्म मा नः ॥ २८ ॥

नारदउवाच ।

गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतम् ।
न चेद्गुरुमुखीयं ते कुतोऽभद्राऽसती मतिः ॥ २९ ॥

प्रह्लाद उवाच ।

मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानाम् ।
अदान्तगोभिर्विशतां तमिस्रं पुनःपुनश्चर्वितचर्वणानाम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विप्राधमयोरनयोर्गुरुत्वं नास्तीति गुरोः श्रीनारदात् सकाशात् केवलां भक्तिमेवाहमशिक्षमतस्तामेव ब्रवीमि इति मनसि कृत्वाह—श्रवणमिति । पादसेवनं परिचर्या अर्चनं पूजा दास्यं स्वस्य दासत्वभावना सख्यं स्वस्य तन्मित्रत्वभावना दृढविश्वासश्च आत्मनिवेदनम् आत्मसमर्पणञ्च तच्च भाव-विशेषेण सहितं रहितञ्च यथा रुक्मिण्यादीनां बैरोचन्यादीनां पुंसा पुरुषार्थेनेति नात्र वर्णाश्रमादिनियम इति भावः, पुंसाऽस्य जीवमात्रकत्वात् स्त्रियापि नवलक्षणानि यस्या इत्येषां मध्ये किमपिकृतमङ्गेनसद्वा भक्तिरित्यर्थः । अद्धा साक्षादेव नतु ज्ञानकर्मादिव्यवधानेनेत्यर्थः । साच अर्पितैवसतीयदिक्रियेत नतु कृता पश्चादर्प्यतेति श्रीस्वामिचरणाः । यद्वा सा यदि विष्णौ अर्पिता क्रियेत विष्णुसुखोद्देशेनैव नतु तत्फलस्य स्वस्मिन् विनियोगेनेत्यन्याभिलाषशून्यत्वं द्योतितं तदा उत्तमम् अधीतं मन्ये इति उत्तमा भक्तिरिति भावः ॥ २३ ॥ २४ ॥ २५ ॥

ये त्वया वस्तुतस्तु न विद्यते सारो यतस्तत् ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिभजनोपदेष्टा गुरुर्नान्यतः उत्तमं स्वधीत हरिभजनवतश्च श्रीनारदाद्धरिभजनं स्वधीतम् [illegible] । पादसेवनं परिचर्या अर्चनं पूजा दास्यं [illegible] मित्रत्वभावना आत्मनिवेदनं सपरिकर [illegible] २४ ॥

इति नवलक्षणानि यस्याः [illegible] विष्णौ अर्पिता तत्प्रीणनैकप्रयोजनकता सङ्कल्पिता सती पुंसा क्रियेत्तेत् तदधीतमुत्तमं मन्ये ॥ २४—२५ ॥

हे ब्रह्मबन्धो ब्राह्मणाधम ! मामनादृत्य असता त्वया बालोऽसारं ग्राहितः ॥ २६ ॥

भाषा टीका ।

प्रह्लादउवाच ॥

प्रह्लाद बोले, कि—विष्णुका श्रवण कीर्त्तन स्मरण पाद सेवन अर्चन वंदन दास्य सख्य और आत्मनिवेदन ॥ पुरुष यदि साक्षात् विष्णु भगवान में इस नवधा भक्ति को समर्पण करै तौ मैं उसी को उत्तम पढना मानता हूं ॥२३–२४॥

हिरण्यकशिपु भी पुत्र के इस प्रकार के वचन सुन कर मारे रोष के होंट फरकने लगे और क्रोध करके गुरुपुत्र से इस प्रकार बोला ॥ २५ ॥

हे ब्राह्मणाधम हे दुर्मते ! विपक्षका आश्रय लेने वाले असत तुझने मेरा निरादर कर इस बालक को क्या असार पढादिया ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मित्रत्वेन प्रवर्त्तमानस्यापि तव विरोधाचरणं नासम्भावितमित्याह—सन्तिहीति । दुष्टं मैत्रं मित्रत्वं येषां ते दुर्मैत्राः रोगहेति "ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः । स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः" ॥ इत्यादिस्मृत्युक्तपातक-

न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः।
अन्धा यथान्धैरुपनीयमाना वाचीशतन्त्यामुरुदाम्नि बद्धाः ॥ ३१ ॥
नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः।
महीयसां पादरजोऽभिषेकं निष्किञ्चनानां न वृणीत यावत् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

किन्तु काले नरकभोगानन्तरं रोगो यथोदेति तथा तेषां दुर्जनानां सुजनत्वेन वर्तमानानामप्यघं विद्वेषादिकमुदेतीत्यर्थः ॥ २७ ॥

मत्प्रणीतं मया पाठितं नोऽस्मत्कृतं कत् कुत्सितं दोषं मास्म भद्राः अद्धागम आर्षः, मयि दोषारोपं मा कृथा इत्यर्थः। इन्द्रशत्रो ! इति न हि ब्राह्मणेषु तव कोप उचित इति भावः ॥ २८ ॥

गुरुमुखी गुरुवाक्यजनिता हे अभद्र ! ॥ २९ ॥

अस्मिन्नामियं वार्ता भवादृशानां विषयासक्तानामत्रानधिकारादित्याशयेनाऽऽह—मतिरिति। परतो गुरोः स्वतो वा मिथोवाऽन्यतो नाभिपद्येत न सम्पद्येत केषां गृहव्रतानां गृह एव व्रतं सङ्कल्प इतिकृत्यचिन्ता येषाम् अत एवादान्तैरनुपरतैर्गोभिरिन्द्रियैर्हेतुभूतैस्तामिस्रं संसारं विशतां तत्र चर्वितस्यैव चर्वणं येषाम् ॥ ३० ॥

ननु, श्रीकृष्णस्य परमानन्दस्वरूपत्वात्तेऽपि तन्निष्ठा एव किन्न स्युः ? इति चेत्तदज्ञानादित्याह—नेति। ये दुराशयाः विषयवासितान्तःकरणास्ते हि विष्णुं न विदुः, तत्र हेतुः, स्वस्मिन्नेवार्थः पुरुषार्थो येषां गतिं गम्यताम्। ननु, तेऽपि गुरूपदेशाद्विष्णुं ज्ञास्यन्ति, तत्राऽऽह, बहिर्विषयेष्वर्थो येषां ते बहिरर्थास्तानेव गुरुत्वेन मन्तुं शीलं येषां ते अतोऽन्धैरुपनीयमाना अन्धाः यथा पन्थानं न विदुः किन्तु गर्ते पतन्ति तथा तेऽपीशस्य तन्त्यां दीर्घरज्ज्वां वेदलक्षणायामुरूणि दामानि ब्राह्मणादिनामानि यस्यां तस्यां काम्यैः कर्मभिर्बद्धा एव भवन्तीत्यर्थः। तदुक्तम्—

"विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः।
वारुणीदिग्गतं वस्तु व्रजन्नैन्द्रीं किमाप्नुयात्" ॥

इति ॥ ३१ ॥

ननु च "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" इत्यादिश्रुतिप्रतिपादितं विष्णुं कथं न विदुः ? कुतो वा तेषां तमिस्रप्रवेशः ? तत्राऽऽह—नैषामिति। निष्किञ्चनानां निरस्तनिखिलाभिमानानां महत्तमानां पादरजसोऽभिषेकं यावन्न वृणीत तावच्छ्रुतिवाक्यतो जातापि येषां मतिरुरुक्रमस्याङ्घ्रिं न स्पृशति न प्राप्नोति, असम्भावनादिभिर्विहन्यत इत्यर्थः। अनर्थस्य संसारस्यापगमो यदर्थो यस्याङ्घ्रिस्पर्शिन्या मतेरर्थः प्रयोजनं महदनुग्रहाभावान्न तत्त्वनिश्चयो नापि मोक्षस्तेषामित्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

भिन्नत्वेन, वर्तमानस्यापि तव विरोधाचरणं नासम्भावितमित्याह—सन्तीति। दुष्टं मैत्रं मित्रत्वं येषां ते अत एव असाधवद्भव्यवेषिणः कपटवेषधारिणो भवादृशा अपि हि लोके सन्ति तेषामघं द्रोहः काले उचितकाले प्रकटो भवति रोगः पातकिनामिव यथा "ब्रह्महा क्षयरोगी स्यात्सुरापी श्यावदन्तकः स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः" ॥ इति स्मृत्युक्तः पातकिनां रोगः उचितकाले उदेति तथा तेषामघं द्रोहादिकमुचितकाले उदेतीत्यर्थः ॥ २७ ॥

एवमुपालब्ध आह गुरुपुत्रः—नेति। न मया पाठितं नापि परेण, किन्तु केवलमेव तव पुत्र एव वदत्येवं, हे इन्द्रशत्रो ! तव ब्राह्मणेष्वनुग्रह उचितो विनयत्वादिति भावः। न स्वपरप्रणीतं चेत्कुतोऽस्याभूदियं मतिः? तत्राह—नैसर्गिकीति, हे राजन् ! अस्य त्वत्पुत्रस्येयं मतिर्नैसर्गिकी स्वाभाविकी न तु परेणोपादिता, अतो मन्युं क्रोधं नियच्छ उपसंहर नोऽस्मभ्यं कत् कुत्सितं दुःखमित्यर्थः। मास्मगाः न देहीत्यर्थः। माङ्योगेऽप्यडागमः। कद्नात्मनां न इति पाठान्तरम्। तत्र कद्नात्मनां दीनात्मनां न मन्युं मद्विषयं क्रोधं नियच्छेत्यर्थः ॥ २८ ॥

इत्थं गुरुणा प्रत्युक्तो दैत्यः सुतमाहेत्याह देवर्षिः—गुरुणेति। तदेवाह—न चेदिति, हे अभद्र ! इयं दुष्टा गुरुमुखी गुरूपदेशजाता न चेत्तर्हि कुतो हेतोस्तवासती दुष्टा मतिरभूत् ॥ २९ ॥

एवमुक्त आह प्रह्लादः—मतिरिति। यत्पृष्टं कुतस्तवेयं मतिरिति तत्र महतामनुग्रह एवेदृशीमतिहेतुरिति वक्तुं तावन्महद्भिरननुगृहीतानां भवादृशानामीदृशी मतिर्दुर्लभेत्याह—मतिरिति। गार्हस्थ्यव्रतानां स्वतः परतो वा मिथोऽन्योन्यस्माद्वा कृष्णे मतिर्भक्त्यात्मिका नाभिपद्येत तत्र हेतुं वदन् गृहव्रतान्विशिनष्टि—अदान्तगोभिरिति, अदान्तैरजितैर्गोभिरिन्द्रियैर्हेतुभिस्तमिस्रं निरयरूपं संसारं पुनःपुनर्विशतां चर्वितमनुभुक्तं तस्यैव पुनश्चर्वणमुपभोगो येषां पूर्वपूर्वैर्भुक्तमेव विषयं भुञ्जानानां पूर्वं दुर्भुक्तानेव वनितादीन् विषयान् पुनरप्यनुभुञ्जानानामिति, वा एवं विषयासक्तचित्तानां त्वादृशां कृष्णे मतिर्दुर्लभा इत्युक्तम्, यद्वा चर्वितचर्वणाः पशवस्तत्तुल्यानामिति ॥ ३० ॥

मास्तु कृष्णे मतिः स्वश्रेयोऽपि न स्वयं जानन्तीत्याह—नेति। स्वार्थश्च गतिश्च स्वार्थगतिस्तं स्वस्य पुरुषार्थभूतं तदुपायभूतञ्च विष्णुं गृहव्रता न विदुः, तत्र हेतुं वदंस्तान्विशिनष्टि, बहिरर्थमानिनः बहिः शब्दादिविषयेषु अर्थमानिनः पुरुषार्थाभिमानिनः अतएव अन्धैरुपनीयमाना अन्धा यथा पन्थानं न विदुः किन्तु श्वभ्रे पतन्ति तथा तेऽपि ईशस्य तन्त्यां वेदलक्षणायां स्थूलरज्ज्वामुरुदाम्नि [illegible] वर्णाश्रमादिरूपनामाविधकगटमूत्रे बद्धा भवन्ति [illegible]ासक्तैः प्रलोभितास्तत्रैवासक्ताः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुनःपुनः संसरन्तो दुःखमेव प्राप्नुवन्ति न तु निरतिशयानन्द-रूपपुरुषार्थलक्षणं भगवन्तं प्राप्नुवन्तीत्यर्थः ॥ ३१ ॥

तदेव व्यनक्ति–नेति । एषामुक्तविधानां विषयासक्तचित्तानां मतिर्बुद्धिः उरुक्रमस्य निरतिशयमहिमशालिनो भगवतो निरतिशयपुरुषार्थरूपमङ्घ्रिं न स्पृशति न विषयीकरोति तदङ्घ्रिस्पर्शनं विशिनष्टि ; यदर्थं यस्योरुक्रमस्याङ्घ्रिस्पर्शस्य अर्थः प्रयोजनं फलमनर्थापगमः दुःखनिरासरूपः कियत्पर्यन्तं न स्पृशति तत्राह— यावन्निष्किञ्चनानामनन्यप्रयोजनानां महीयसां महाभागवतानां पादरजस्स्नेभिषेकं न वृणीत न वृणुयात् महत्सेवां न कुर्यात्तावन्न स्पृशतीत्यर्थः । मम मातृगर्भावस्थानदशायामेव महीयसःश्रीनारदस्यानुग्रहादियं बुद्धिरुरुक्रमस्याङ्घ्रिविषयाऽभूदिति गूढोऽभिप्रायः ॥३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

साधुत्वेन वृतस्य गुरोर्दुर्मते इति सम्बोधनं निन्दनं कथं घटते ? इति तत्राह–मन्तीति ।—

"गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम् " ॥

इति वाक्यं हिशब्देन स्मारयति पातकिनां पापफलत्वेन रोग उदेति यथा, तथा तेषामघनपराधलक्षणं व्यसनं प्रकाशत इत्यन्वयः ॥ २७ ॥

लोके सन्त्रसाधवः नाहं तादृशः यतस्त्वत्पुत्रो न मया रचितं नापि परेण पठ्यत इत्याह—नमदिति । तर्हि कस्मादियं मतिरभूदिति तत्राह–नैसर्गिकीति । तदा तस्मिन्पक्षे ममात्मनः स्वरूपाभिमानो मया प्राहितेयं मतिरिति कस्तस्मात् कोपं संहरेति ॥ २८ ॥

पृष्ठाय कुध्यन्नाह–गुरुणेति । गुरुमुखी गुरुमुखादुत्पन्नेयं मतिः ॥ २९ ॥

सत्येव मन्मतिः त्वन्मतिरेवासतीति पितरं कटाक्षीकृत्य परिहरति–मतिरिति । परतो गुर्वादिबोधनप्रयत्नेन स्वतः स्वप्रयत्नेन तत्र निमित्तमाह—गृहेति । धनादिनिमित्तसमन्तरेण गृह एवावस्थानलक्षणं व्रतं येषां ते तथा तेषाम्, ननु " कुटुम्बी शुचौ देशे स्वाध्यायमधीयानः " इतिश्रुतेर्गृहस्थानामपि श्रेयःप्राप्त्युपपत्तेरिति तत्राह—अदान्तेति । अदान्तानामिन्द्रियनिग्रहरहितानां पुरुषाणां गोभिर्योगिभिस्तामिस्रं नरकसुखकल्पं विषयसुखं विशतां भुञ्जानानां तत्रापि नूतनापूर्वभोगो नास्तीत्यभिप्रेत्याह—पुनरिति । पुनःपुनर्भुक्तविषयानेव भुञ्जानानामित्यर्थः । अदान्तगोभिरशिक्षिताभिर्योगिभिर्नैवगताभिस्तामिस्रमतस्त्वार्थविषयमवानम् अन्यथाज्ञानञ्च विशतां गाहमानानां न तत्रापि यत्नो स्तीत्याह—पुनरिति वा ॥ ३० ॥

एतदेव स्पष्टमाह–न त इति । दृष्टेषु प्रतीतिसुन्दरेषु परिणामविपर्यस्त्वाशयो येषां ते तथा तत्र हेतुमाह–बहिरिति । बहिरर्थेषु मुखतः प्रतीयमानार्थेष्वेव भावस्तात्पर्यार्थनिश्चयो येषां ते तथा श्रुतितात्पर्यार्थानभिज्ञा इत्यर्थः । एते स्वार्थगतिं पुरुषार्थस्वरूपं स्वभक्तप्रयोजनसाधकं वा कृष्णं न विदुरित्यन्वयः । अत्र कारणमाह–वाचीति । ईशतन्त्यामीशस्य वेदवाग्लक्षणायां तन्त्यां ब्राह्मणादिबहुनामाख्यबद्धानामदाम्नि बद्धाः अत्रोदाहरणमाह—अन्धा इति । अन्धैरेवोपनीयमाना उपदिश्यमानकर्ममार्गाः अन्धा अद्धा उपदिष्टाम्यमार्गं यथा न विदुस्तथेति अनेन "अन्धेनैव नीयमाना यथान्धाः" इति स्मृतिं स्मारयति ॥ ३१ ॥

नन्वेवं तर्हि गृहव्रतानां मुक्त्युपायः कः ? इत्याह—नैषामिति । यावदेषां गृहव्रतानां मतिर्महीयसां निष्किञ्चनानां संन्यासिनां पादरजोऽभिषेकं न वृणीत तावन्तं कालमुरुक्रमस्याङ्घ्रिं न स्पृशति न विषयीकरोति उरुक्रमस्याङ्घ्रिस्पर्शस्य किं फलम् ? तत्राह–अनर्थेति । यस्य हरेरङ्घ्रिस्पर्शोत्थफलमनर्थापगमः संसारनिवृत्तिः अथवाऽनर्थापगमो यस्मात् पादरजोभिषेकादुत्थितः प्रकाशितो भवति तम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गुरुरेव मुखं द्वारं यस्याः सा गुरुमुखी ॥ २९ ॥ ३० ॥

स्वस्मिन् श्रीविष्णावेवार्थः प्रेमरूपः पुरुषार्थो येषां तेषाम् ॥३१॥
अनर्थस्य तत्स्पर्शविघ्नस्याप्यगमः ॥ ३२—३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मद्वैरिपक्षवर्ती त्वमेतावद्दिनान्ते मद्व्यग्रैव व्यक्तोऽभूस्तदद्यैव ते समुचितां दण्डं दास्यामीत्यर्थान्तरस्य न्यासेनाह—सन्तीति दुष्टं मेऽयं मित्रत्वं येषान्ते अघं कुष्ठादिकं उदेति दैवात् प्रकटीभवति रोग इति—

"ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः ।
स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः" ॥

इत्यादिस्मृत्युक्तः ॥ २७ ॥

हे इन्द्रशत्रो ! इति मयि दीने ब्राह्मणे कोपस्ते नोचित इति भावः । नोऽस्मभ्यं कतु कुत्सितं दोषं मास्म अदाः अज्ञागम आर्यः मयि दोषारोपणं माकृथा इत्यर्थः ॥ २८ ॥

हे अभद्र ! असती वस्तुतस्तु भद्रा सती सर्वोत्तमा ॥ २९ ॥

सत्यमियं कृष्णविषया मतिर्भवन्मते असत्येव किन्त्वेषा मतिर्भवादृशानां साधूनां कुतोऽपि कदाचिदपि नोत्पद्यत इति वक्रोक्त्या उपहसन्नाह–मतिरिति । परत इदशाद्गुरोरन्यतो वा स्वतो वा मिथोऽन्योन्यतो वा नाभिपद्येत न संपद्येत किन्तूत्तरग्रन्थदृष्ट्या महद्भजरजोभिषेकलिप्सारहितानामिति तदीयस्वगताक्षिरत्र श्लोकेऽपि ज्ञेया केषां गृहव्रतानां गृहासक्तानां गृहव्रतत्वमेवाह, अदान्तैरवशीकृतैर्गोभिरिन्द्रियैस्तामिस्रं नरकम् ननु, गृहव्रताः कदाचित्स्वर्गिणोऽपि भवन्ति तत्राह—अपराऽर्था

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चर्वितस्यैव पुनःपुनश्चर्वणं येषां तेषां वेश्यालयः स्वर्गो वा तुल्य एवेति भावः ॥ ३० ॥

ननु, रे मूढ मामिन्द्रादिवन्द्यपादपीठं पितरमपि वक्रोक्तिविषयीकुरुषे शृणु रे कुमते शृणु शुक्राचार्यस्य शिष्या महाविद्वांसस्त्वद्गुरवः किं सर्वशास्त्रतात्पर्यं न जानन्ति ? यतस्तत्कर्त्तृकोऽधीतमर्थं न त्वं साधु मन्यसे, इत्यत आह—नेति । ते स्वस्य अर्थरूपां गतिं विष्णुं न विदुः किं स्वानर्थरूपाङ्गतिं स्वर्गादिमेव जानन्तीति भावः । यतो दुराशयाः दुष्टान्तःकरणाः बहिर्विषयसुखमनर्थमेव अर्थं मन्तुं शीलं येषां ते अतस्त एव यदि विष्णुं न विदुः तदा कथं तच्छिष्या ज्ञास्यन्तीति सदृष्टान्तमाह अन्धैरुपनीयमानाः उपदिष्टमार्गाः सन्तोऽन्धा यथा गर्त्ते पतन्ति तथैव वाचि वेदलक्षणायां तन्त्या दीर्घरज्ज्वां उरूणि दामानि ब्राह्मणादिनामानि यस्य तस्यां कर्मभिर्बद्धा एव भवन्तीत्यर्थः ॥३१॥

ननु च यदि विष्णुरेव स्वार्थरूपा गतिः शास्त्रैरुच्यते तदा त्वद्गुरूणां सर्वशास्त्रज्ञानामपि मतिः विष्णुनिष्ठैवोत्पद्येत त्वतस्तेषां विष्णुनिष्ठमतित्वाभावादेव विष्णुभक्तिरशास्त्रीयेत्यनुमीयत इत्यत आह—नैषामिति । निष्किञ्चनानां "मत्कृतेत्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः" इति भगवद्वाक्यविश्वासात् त्यक्तव्यावहारिकानित्यपुत्रकलत्राभिलाषकर्मज्ञानादीनां भक्तिमात्रैकवासनत्वेन महीयसां पादरजसा स्वस्य वैष्णवत्वेनाभिषेकं यावन्न वृणीत तावन्मतिरुरुक्रमाङ्घ्रिं नस्पृशयति—

"यथा देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्मै ते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति ॥

"यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" इत्यादि श्रुतिभ्यः अनर्थस्य संसारस्य अपगमोऽयम् स्वार्थः यथा अङ्घ्रिस्पर्शिन्या मतेरर्थः प्रयोजनमानुषङ्गिकमेव फलं मुख्यं फलन्तूरुक्रमाङ्घ्रिस्पर्शः स एव ॥ ३२ ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

असाधवः दुराचाराः छद्मपरिधाः मित्रत्वेन वर्त्तमानाः शत्रवः अत एव दुष्टं मैत्रं मित्रत्वं येषां ते तेषामघं दुर्मित्रत्वं पातकिनां रोगो यथा तत्र काले उदेति प्रकटं भवति ॥ २७ ॥

हे इन्द्रशत्रो ! एष तव सुनो यद्ब्रवीति तन्मत्प्रणीतं न परप्रणीतं मत्पितृपितामहादिप्रणीतं वा न भवति किन्त्वस्येयं नैसर्गिकी मतिः अतोमन्युं नियच्छ उपसंहर नोऽस्मभ्यं कलु कष्टं मास्म अदाः अद्यागम सार्थः ॥ २८ ॥

गुरुमुखी गुरूपदिष्टा न चेत्तर्हि कुतोऽभूत् ॥ २९ ॥

कृष्णमतेरात्मनः कृतार्थतां द्योतयितुमकृष्णमतीनामकृतार्थतामाह—मतिरिति द्वाभ्याम् । गृहव्रतानां प्रवृत्तिमार्गनिष्ठानां पुनः पुनश्चर्वितचर्वणानां भुक्तविषयभोगरतानाम् अदान्तैर्गोभिरिन्द्रियैस्तमिस्रं जन्ममरणप्रवाहलक्षणं संसारं विशताम् मतिः परतः स्वतो मिथोऽन्योन्यतो वा नाभिपद्येत ते शोच्या इति भावः ॥ ३० ॥

ये दुराशयाः दुष्टं विषयसुखे आशयोऽन्तःकरणं येषां तथाभूताः अत एव बहिरर्थेषु ध्यानानन्दादिकैर्दूरतस्त्यकेषु मानिनः पुरुषार्थाभिमानिनः वागीशस्य वेदस्वामिनो हरेः तन्त्यां वेदलक्षणायां दीर्घरज्जुस्थानीयायामुरूणि दामानि ब्राह्मणादीनि नामानि तद्बन्धनस्थानानि यस्यां बद्धाः स्वार्थमतिं न लभन्ते इत्यर्थः । प्राप्योऽर्थः स्वस्यार्थः स्वार्थं गम्यते अनयेति गतिः प्राप्यमार्गः स चासौ स च उपायोपेयरूपः तं न विदुः ते संसारे एव पतन्ति अन्धा यथान्धैर्नीयमानाः गर्त्तं ते तं तन्मार्गञ्च न विदुः प्रत्युत गर्त्ते पतन्ति तद्वत् तेषामुपदेष्टारोऽपि स्वार्थगतिं विष्णुं न जानन्ति संसारे एव निमज्जन्तीति दृष्टान्ताभिप्रायः ॥ ३१ ॥

अज्ञानहेतुमाह—नैषामिति । एषां मतिः यावदकिञ्चनानां भगवच्चरणैकशरणानां पादरजोऽभिषेकं न वृणीत तावत् उरुक्रमाङ्घ्रिं न स्पृशति न विषयीकरोति यस्याश्च उरुक्रमाङ्घ्रिस्पर्शिन्या मतेरर्थः प्रयोजनं अनर्थस्य अर्थो मोक्षस्तद्विपरीतस्य बन्धस्यापगमः ॥ ३२ ॥

भाषा टीका ।

लोक में कपट रूपी दुष्ट मैत्री वाला बहुत से असाधु (दुष्ट) हैं, कि जिनका पाप समय पाकर पातकियों के रोग की तरह प्रकट होता है ॥ २७ ॥

गुरुपुत्रउवाच ॥

गुरुपुत्र बोला, कि—हे इन्द्रशत्रो ! तुमारा पुत्र न हमारा बनाया हुआ न दूसरे का बनाया हुआ भी कहता है, इसकी मति ऐसी स्वाभाविक है राजन् ! आप क्रोध को रोकिये हम लोगों पर मिथ्या दोषारोपण न कीजिये ॥ २८ ॥

नारद उवाच ॥

नारदजी बोले, कि—जब गुरु ने लौट कर फिर ऐसा कथन किया तब असुर फिर पुत्र से बोला कि—यदि तेरी यहमति गुरुमुखी नहीं तो फिर यह खोटी मति कहां से हुई ॥ २९ ॥

प्रह्लाद उवाच ॥

प्रह्लाद बोले, कि—गृहकार्य्य किया चाहें और अवशीकृत इन्द्रियों से बार २ चर्वित विषयों का चर्वण करते चाहें अत एव बारंबार संसार में प्रविष्ट होने वाले ऐसे लोगों की मति कृष्ण में आप से वा गुरु के उपदेश से वा अन्य किसी से नहीं लगती ॥ ३० ॥

बाहिर्विषय में अर्थ दृष्टि वाले जो दुराशय लोग हैं वे परम पुरुषार्थ के प्रापक श्री विष्णु को नहीं जान सके हैं, अंधों के हाथ पकड़ के चलाने वाले अन्धे जैसे मार्ग न जान सका किन्तु खड्डे में पड़ते हैं इसी प्रकार ये लोग भी ईश्वर की वाणी रूप तंती में बंधे हुए संसार ही में पड़ते हैं ॥ ३१ ॥

इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपूरुषा ।
अन्धीकृतात्मा स्वोत्सङ्गान्निरस्यत महीतले ॥ ३३ ॥
आहामर्षरुषाविष्टः कषायीभूतलोचनः ।
वध्यतामाश्वयं वध्यो निस्सारयत नैर्ऋताः ॥ ३४ ॥
अयं मे भ्रातृहा सोऽयं हित्वा स्वान्सुहृदोऽधमः ।
पितृव्यहन्तुर्यः पादौ विष्णोर्दासवदर्चति ॥ ३५ ॥
विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमञ्जसः ।
सौहृदं दुस्त्यजं पित्रोरहाद्यः पञ्चहायनः ॥ ३६ ॥
परोऽप्यपत्यं हितकृद्यथौषधं स्वदेहजोऽप्यामयवत्सुतोऽहितः ।
छिन्द्यात्तदङ्गं यदुतात्मनोऽहितं शेषं सुखं जीवति यद्विवर्जनात् ॥ ३७ ॥
सर्वैरुपायैर्हन्तव्यः सम्भोजशयनासनैः ।
सुहृल्लिङ्गधरः शत्रुर्मुनेर्दुष्टमिवेन्द्रियम् ॥ ३८ ॥
नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः ।
तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ॥ ३९ ॥
नदन्तो भैरवान्नादांश्छिन्धि भिन्धीति वादिनः ।
आसीनं चाहनञ्छूलैः प्रह्लादं सर्वमर्मसु ॥ ४० ॥

भाषा टीका ।

इनकी मति जब तक निष्किञ्चन महज्जनों के चरणरज के अभिषेक को नहीं स्वीकार करता है तब तक इसकी मति भगवच्चरणारविंद का स्पर्श नहीं करती है जिस स्पर्श से संसार रूप अनर्थ दूर होता है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निरस्यत चिक्षेप ॥ ३३ ॥

अमर्षोऽसहनं तेन सहितया रुषाऽऽविष्टो व्याप्तः कषायीभूते आताम्रे लोचने यस्य हे नैर्ऋता राक्षसाः ! ॥ ३४ ॥

वध्यत्वे हेतुः यतोऽयं मे भ्रातृहा कृतः यो विष्णोः पादौ दासवदर्चति, तत्पक्षपातीत्यर्थः । अतः स वध्य इत्यन्वयः ॥ ३५ ॥

अहो विष्णुरप्यविश्वसनीयं किमिति स्वीकृतवानित्याह—विष्णोर्वेति अहाज्जहौ ॥ ३६ ॥

ननु, तवायमपत्यं कथं वध्यस्तत्राऽऽह—परोऽप्यौषधमिव हितकृच्चेदपत्यमेव ज्ञेयः सुतः स्वदेहजोऽप्यहितश्चेदामय इव ज्ञेयः आस्तां ममतास्पदस्य कथा, अङ्गमपि च यत्करचरणादि तद्यदात्मनोऽहितं चेच्छिन्द्यादेवेत्यर्थः ॥ ३७ ॥

अतः सर्वैरुपायैर्हन्तव्यः सम्भोजो भोजनम् भोजनादिषु विषादिप्रयोगैरित्यर्थः । यथा दुष्टमिन्द्रियं मुनेः शत्रुः ॥ ३८ ॥

तिग्मास्तीक्ष्णा दंष्ट्रा येषाम् करालान्यास्यानि भयङ्कराणि मुखानि येषां ते च ते च ताम्राणि श्मश्रूणि शिरोरुहाश्च येषाम् ॥ ३९ ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीत्थमुक्त्वोपरतं तूष्णीमासीनं पुत्रं रुषा क्रोधेनान्धीकृतः आत्मा विवेको यस्य स हिरण्यकशिपुः स्वस्योत्सङ्गात् महीतले निरस्य तं पातयित्वा आहेत्युत्तरेणान्वयः । निरस्यतीति पाठे न्यपातयदित्यर्थः ॥ ३३ ॥

अमर्षः असहनं तत्सहितया रुषा आविष्टो व्याप्तः अतएव कषायीभूते आताम्रे लोचने यस्य सः आह च उक्तवांश्च तदेवाह—वध्यतामिति । हे नैर्ऋताः ! इत एनं निःसारयत बहिर्गमयत अयं बालो वध्यो वधार्हः अतःआशु वध्यतां हन्यताम् ॥ ३४ ॥

वध्यत्वे हेतुर्यतोऽयं मे मम भ्रातुर्हन्ता कृतःयोऽयमधमः,

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

बालः अर्भः स्वकीयान् सुहृदोऽस्मान् हित्वा पितृव्यस्य पितृभ्रातुर्हिरण्याक्षस्य हन्तुर्विष्णोः पादौ चरणौ दासवद्भजतीति तत्पक्षपातीत्यर्थः । अतः स एवावमित्यन्वयः, हित्वाऽसून् सुहृद इति पाठे अयं मे भ्रातृहा कुतः यद्यस्मादधमोऽयं सुहृदः प्रियानसून् प्राणान् हित्वा विष्णावेव समर्प्य दासवत्तत्पादावर्चति अतोऽयमेव प्रह्लादो मे भ्रातृहेत्यर्थः ॥ ३५ ॥

मद्दृष्टान्तेन विष्णोरप्ययमसावसमञ्जसोऽननुकूलः साधु करिष्यति किन्तु ? न करिष्यत्येव. अव्यवस्थितचित्तत्वादिति भावः । यतोऽसौ पञ्चहायनः पञ्चवर्षवयस्क एवसन् दुस्त्यजं त्यक्तुमशक्यं पित्रोः मातापित्रोः सौहृदमहादत्याक्षीत् ॥ ३६ ॥

ननु,तथापि पुत्रः तत्कथं वध्यः?तत्राह–परोऽपीति। परोऽपि शत्रुपक्षप्रभवोऽपि यथा औषधं तथा हितकृत् हितकारी चेत्तर्हि सोऽपत्यं पुत्र एव देहाज्जातोऽप्यामयवद्रोगवदहितो दुःखकृच्चेत्तर्हि आमयवत्परित्याज्यः । आस्तां ममतास्पदस्य कथा हि यस्माद्यदङ्गं करचरणादिकमपि सर्पदंशव्रणादिदूषितं सदात्मनोऽहितं दुःखकृच्चेत्तर्हि तदङ्गं छिन्द्यादेव यस्य दुष्टाङ्गस्य विसर्जनात्परिहाराच्छेषमवशिष्टमङ्गं सुखं जीवति ॥ ३७ ॥

अतोऽयं सुहृल्लिङ्गधरः पुत्रवेषधारी शत्रुर्यथा दुष्टमिन्द्रियं मुनेः शत्रुः तद्वद्वर्तमानः सर्वैरुपायैः भोजनादिभिः सम्भोजनादिभिरुपायैर्हन्तव्यः ॥ ३८ ॥

एवं भर्त्रा दैत्येन्द्रेण समादिष्टाः ते नैर्ऋताः शूलपाणयः तिग्माः तीक्ष्णा दंष्ट्रा दन्ताः येषां करालान्यास्यानि येषां ताम्राणि श्मश्रूणि शिरोरुहाणि च येषां तादृशाः ॥ ३९ ॥

भैरवान् भयङ्करान्नादान्नदन्तः कुर्वन्तश्छिन्धि भिन्धीति वदन्त आसीनम् उपविष्टं प्रह्लादं सर्वेषु मर्मस्थानेषु शूलैरहनन् हतवन्तः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कषायीकृतलोचनः रक्तनेत्रः ॥ ३३—३४ ॥

पितृव्यस्य हिरण्याक्षस्य हन्तुः असावसमंजसः प्रह्लादः विष्णोः किं वा साधु करिष्यति ॥ ३५ ॥

कथमसमंजसो भूतत्राह–सौहृदमिति ॥ ३६ ॥

परः शत्रुरप्यपत्यं द्वेष्येणापि हितकृच्चेत्स एव सुतः"यथा औषधं तिक्तरसेन "हरीतकी मनुष्याणां मातेव हितकारिणी" इति वचनात् स्वदेहजोऽपि सुतोऽपि अहितोऽपकारी चेत्तं छिन्द्यादामयवत् किञ्चात्मनः स्वस्य यदहितमङ्गं सर्पदष्टं तच्छिन्द्यात्तदेव विशिनष्टि–यद्विवर्जनादिति शेषमङ्गं सुखं जीवतीत्यन्वयः ॥ ३७ ॥

संभोज्यो भोजनम् ॥ ३८—३९ ॥

भैरवं नादमुद्दिश्य ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पञ्चहायन इति । गर्भे चिरकालस्थितत्वात् ॥ ३९—३८ ॥

नैर्ऋता इति युग्मकम् । दंष्ट्रा इति क्वचित् । किन्तु स्वाम्यसम्मतः ॥ ३९—४८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अमर्षः असहनं तेन सहितया रुषा आविष्टः हे नैर्ऋताः ! राक्षसाः ॥ ३४ ॥

अयं मे भ्रातृहा, ननु, विष्णुस्ते भ्रातृहा प्रसिद्धस्तत्राह स विष्णुरयमेवेत्यर्थः । कुतः हित्वेत्यादि दासवदिति असुरमहाराजनन्दनोऽपि भूत्वेत्यर्थः विष्णुना स्वदासेषु स्वसारूप्यार्पणात् विष्णुरेवायमिति बध्यताम् ॥ ३५ ॥

विष्णुरप्यविश्वसनीयः कथमिमं बुद्धिमान् भूत्वा कथं विश्वस्तः स्यादित्याह—विष्णोर्वेति, ॥ ३६ ॥

ननु, त्वदपत्यमयमस्माभिः कथं हन्तुमर्हस्तत्राह–परोऽप्यौषधमिव हितकृच्चेत्तदपत्यमिव श्रेयः आस्तां ममतास्पदस्य कथा अङ्गमपि यत् करचरणादि तदप्यात्मनोऽहितं चेत् छिन्द्यादेवेत्यर्थः ॥ ३७ ॥

भोज्यादिवस्तुषु विषाद्यर्पणैरपि हन्यतामित्याह—सर्वैरिति ॥ ३८ ॥ ३९ ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्येवमुक्त्वोपरतं तूष्णीं स्थितम् स्वस्योत्सङ्गात् महीतले निरस्यत अपातयत् ॥ ३३ ॥

अमर्षेण पुत्राभिक्रान्तासहनेन युक्तया रुषाऽऽविष्टोऽभिभूतः कषायीभूतेऽतिताम्रे लोचने यस्य सः हे नैर्ऋताः अयं वध्यः आशु निःसारयत तदनन्तरं वध्यतामित्याह ॥ ३४ ॥

वध्यत्वे हेतुमाह–अयमिति । यो मे भ्रातृहा विष्णुः सोऽयं प्रह्लादः तद्दासत्वात्तदनन्य इत्यर्थः । तदेवाह,यः स्वान्सुहृदोऽस्मदादीन् हित्वा पितृव्यहन्तुर्विष्णोः पादौ दासवदर्चति सोऽयम् अधमः वधार्ह इत्यर्थः ॥ ३५ ॥

यः पञ्चहायनः पञ्चवर्षः पित्रोः सौहार्दं दुस्त्यजम् अहात् अत्यजत् सोऽसावसमञ्जसः अविश्वसनीयः विष्णोर्वा किं साधु प्रियं करिष्यति ॥ ३६ ॥

राजनीतिरियं वदन्यत्वात्पुत्रोऽप्येवंविधो वध्य इत्याह–पर इति । परःशत्रुरपि अपत्यं यदि हितकृत् यथौषधम् स्वदेहजः सुतोऽप्यहितश्चेत्परः शत्रुरेव आमयवत् यदङ्गमङ्गुल्यादि अहिविषादिना आत्मनोऽहितं तच्छिन्द्यादेव यद्विवर्जनात् शेषं शरीरं सुखं यथा तथा जीवति ॥ ३७ ॥

यस्मादयं मुनेर्दुष्टमिन्द्रियमिव सुहृल्लिङ्गधरः शत्रुरतः सम्भोजोभोजनं तदादिभिः विषदूषितान्नदानादिभिरुपायैर्हन्तव्यः ॥ ३८ ॥

परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि ।
युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ॥ ४१ ॥
प्रयासेऽपहते तस्मिन्दैत्येन्द्रः परिशङ्कितः ।
चकार तद्वधोपायान्निर्बन्धेन युधिष्ठिर ! ॥ ४२ ॥
दिग्गजैर्दन्दशूकैश्च अभिचाराऽवपातनैः ।
मायाभिः सन्निरोधैश्च गरदानैरभोजनैः ॥ ४३ ॥
हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि ।
न शशाक यदा हन्तुमपापमसुरः सुतम् ।
चिन्तां दीर्घतमां प्राप्तस्तत्कर्त्तुं नाभ्यपद्यत ॥ ४४ ॥
एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः ।
तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ॥ ४५ ॥
वर्तमानोऽविदूरे वै बालोऽप्यजडधीरयम् ।
न विस्मरति मेऽनार्यं शुनःशेप इव प्रभुः ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भर्त्रा हिरण्यकशिपुनाऽऽदिष्टाः तिग्माः तीक्ष्णाः दंष्ट्रा येषां करालानि भयङ्कराणयास्यानि येषान्ते च तथा ताम्रायश्मश्रूणि श्मश्रूणि शिरोरुहाश्च येषान्ते ॥ ३९ ॥ ४० ॥

भाषा टीका ।

इतना कहकर चुप होने पर मारे रोष के अंधा हो रहा जो हिरण्यकशिपु, उसने अपने पुत्र प्रल्हाद को गोद से उठाकर पृथ्वी पर पटक दिया ॥ ३३ ॥

क्रोध से व्याप्त होने से लाल नेत्र जिसके ऐसा हिरण्यकशिपु बोला, कि हे राक्षसो ! यह लड़का वध के योग्य है, इसको मारो और निकाल दो ॥ ३४ ॥

यह अधम हमारे भ्राता का घातक है, क्योंकि ? अपने सुहृदों को छोड़कर पितृव्य के मारने वाले विष्णु के चरणों को दास के तरह पूजता है ॥ ३५ ॥

जो पांच वर्षका ही अपने मा बापों से सौहृद छोड़चुका यह छोटा विष्णु का क्या भला करेगा ? ॥ ३६ ॥

जो दूसरा होकर भी औषध के तरह हितकारी है वह अपना पुत्र है और अपने देह से भी पैदा है पर रोग के तरह दुःखदायी हो तो वह पुत्रभी वैरी है जो अपना अहित करने वाला अंग भी हो (जैसे सर्प की काटी अंगुली) तो उसे काट डाले, कि जिसके विना शेष में सुख पूर्वक जीवता रहे ॥ ३७ ॥

भोजनादिक में विषादि प्रदान से ऐसे सर्व उपायों से इसे मारना चाहिये क्योंकि यह सुहृद का चिन्ह धारण करने वाला शत्रु है जैसे मुनि के दुष्ट इन्द्रियें शत्रु हैं ॥ ३८ ॥

अपने भर्त्ता की आज्ञा पाकर तीक्ष्णदाढे और कराल मुख वाले लाल २ डाढी मूंछ और केश जिनके ऐसे वे राक्षस लोग हाथों में त्रिशूल लेने से भयंकर, बैठे हुए प्रल्हादके सर्व मर्म स्थानों में शूलों से प्रहार करने लगे ॥ ३९ ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परे ईश्वरे युक्तः समाहित आत्मा मनो यस्य तस्मिन्प्रह्लादे तेषां नैर्ऋतादीनां प्रहाराः निष्फलाः आसन् जाताः तत्र हेतवः ब्रह्मणि निर्विकारेऽनिर्देश्येऽविषये भगवति निरतिशयैश्वर्येऽखिलात्मनि वाय्वादीनामपि नियन्तर्येवम्भूते परे अपुण्यस्य निर्दैवस्य सत्क्रियाः महोद्यमा इव ॥ ४१ ॥ ४२ ॥

दन्दशूकैः सर्पैः अभिचाराः कृत्यादयः अवपातनानि गिरिशृङ्गादधःपातनानि तैः मायाभिः शम्बरनिर्मिताभिः अवटादिषु सन्निरोधैश्च ॥ ४३ ॥

पर्वताक्रमणैः पर्वतानां तदुपरि क्षेपैः बहुयत्नैरभिचाराद्यावृत्तिं दर्शयति तद्धननं कर्त्तुं नाभ्यपद्यत न प्राप नाशक्नोदित्यर्थः ॥ ४४ ॥

अप्रमेयानुभावोऽयमकुतश्चिद्भयोऽमरः ।
नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ॥ ४७ ॥
इति तं चिन्तया किञ्चिन्म्लानश्रियमधोमुखम् ।
शण्डामर्कावौशनसौ विविक्त इति होचतुः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चिन्तामेवाऽऽह-एष इति त्रिभिः । मे मया असाधु परुषं यथा भवति तथोक्तः असद्धर्मैरपकारैरभिचारैर्वा ॥ ४५ ॥

अविदूरे समीपे वर्तमानोऽपि बालोऽप्ययमजडधीर्निर्भयश्चित्तो मेऽनर्थमन्यायं शत्रुत्वं वा न विस्मरति अजीगर्तस्य मध्यमपुत्रः शुनःशेफो नाम पितृभ्यां हरिश्चन्द्राय विक्रीतस्सन्यथा तयोरपकारमविस्मरंस्तावपहाय विश्वामित्रमाश्रित्य गोत्रान्तरमापन्नस्तद्वत् यद्वा स्वभावापरित्यागे दृष्टान्तः शुनःशेपः पुच्छमिवेति ॥ ४६ ॥

अप्रमेयोऽपरिमेयोऽनुभावो यस्य न कुतश्चिद्भयं यस्य अमरोऽमृत्युरन्यश्च न वा भविता अन्यथा मृत्युर्नैव भविष्यतीत्यर्थः ॥ ४७ ॥

औशनसौ उशनसः पुत्रौ नीतिज्ञौ विविक्ते एकान्ते ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनिर्देश्ये चेतनाचेतनसजातीयत्वेन निर्देष्टुमशक्ये अखिलात्मनि हन्तृहन्तव्याद्यन्तरात्मनि पूर्णषाड्गुण्ये परे ब्रह्मणि युक्तः नियुक्तः आत्मा मनो यस्य तस्मिन् प्रह्लादे नैर्ऋतैः कृता अपि शूलघातादयो मारणोपायाः अफलाः व्यर्थाः बभूवुः, मरणहेतवो दुःखहेतवश्च न बभूवुरित्यर्थः । यथा अपुण्यस्य पापरतस्य कृता अपि सत्क्रियाः सन्ध्योपासनादयः अफलास्तद्वदफलत्वे हेतुगर्भं विशेषणम् अखिलात्मनि युक्तात्मनीति । अयं भावः, कर्मवश्यदेहसम्बन्धप्रयुक्तसुखदुःखभोक्तृत्वतदनुगुणपुण्यपापकर्तृत्वा — नुगुणं जीवपर्यन्तदेहेन्द्रियादिशरीरकपरमात्मत्वमजीवश्चित्तम्. तत्र हन्त्रन्तरात्मतया हन्तव्यदुःखजननानुगुणव्यापारानुगुणं नियमयन्नपि पुनर्हन्तव्यस्य हन्तृव्यापारजन्यदुःखाननुभवानुगुणतया नियमयतीति. कथमेकस्यैवंविधं परस्परविरुद्धं नियमनमितिशङ्कानिराचिकीर्षयाऽनिर्देश्य इत्युक्तम् वीचिविलक्षणाविविधविचित्रशक्तेरीदृशं नियन्तृत्वमुपपन्नमित्यभिप्रायः ॥ ४१ ॥

एवं शूलघातादिरूपमरणोद्योगरूपे प्रयासे अपहते व्यर्थे सति दैत्येन्द्रो हिरण्यकशिपुः परिशङ्कितः किमहो अयं शूलघातादिभिरपि नाहन्यत किमस्मादेव मम मृत्युर्भविष्यतीत्याशङ्कितः हे युधिष्ठिर ! निर्बन्धेन तस्य प्रह्लादस्य वधोपायान् चक्रे ॥ ४२ ॥

तानेवोपायानेव प्रपञ्चयंस्तैरप्यहतत्वमाह—दिग्गजैरिति । दिग्गजाक्रमणैः दन्दशूकेन्द्रैः सर्पश्रेष्ठदंशनैः अभिचारैर्मारणहोमैः अवपातनैः गिरिशृङ्गेभ्योऽधःपातनैः मायाभिरकस्मादग्निपातनादिभिः सन्निरोधैर्बन्धनागारनिधानैः गरदानैः विषप्रयोगैः अभोजनैरुपवासैः ॥ ४३ ॥

हिमादिषु पातनैः पर्वताक्रमणैः पर्वतानां तदुपरि निक्षेपैः एवंविधैरुपायैरसुरैः प्रयोज्यकर्तृभिः यदा निरपराधं सुतं हन्तुं न शशाक नाशक्नोत् तदा तत्कर्तुं तद्धननं कर्तुं नाऽध्यपद्यत उपायान्तरं न लेभे इत्यर्थः । प्रत्युत दीर्घतमां चिन्तां प्राप्तः ॥ ४४ ॥

चिन्तामेव प्रपञ्चयति—एष इति । एष बालो मे मया असाधु यथा भवति तथोक्तः तथा वधोपायाश्च निर्मिताः कारिताः असद्धर्मैरभिचारादिभिस्तैस्तैः द्रोहैः शूलघातादिभिश्च मुक्तोऽविहतः स्वेनैव तेजसा माहात्म्येन उक्तोपायेभ्योऽविदूर एव वर्तमानो बालोऽप्ययमजडा निपुणा धीर्यस्य तादृशः मे मम अनार्यं द्रोहं न स्मरति शुनःशेफ इव यथा शुनश्शेफाख्यः पितृभ्यां हरिश्चन्द्राय विक्रीतस्सन् तयोरपकारं विस्मरन् तावुपेक्ष्य विश्वामित्रमाश्रित्य गोत्रान्तरमापन्नस्तद्वत् यद्वा स्वभावापरित्यागे दृष्टान्तः शुनःशेफः पुच्छमिवेति प्रभुः जितेन्द्रियः ॥ ४५ ॥ ४६ ॥

अप्रमेयोऽपरिमेयोऽनुभावो यस्य न कुतश्चिद्भयं यस्य अत एवामरो मरणरहितः एतस्य विरोधेन हेतुना नूनं ममैव मृत्युः भविता भविष्यति न वा भविता एतद्विरोधेन मम मृत्युरभावे हेत्वन्तरेण नैव भविष्यतीत्यर्थः ॥ ४७ ॥

इतीत्थं तच्चिन्तया पुत्रविषयकचिन्तया म्लानश्रियं निस्तेजस्कं किञ्चिदधःकृतमुखं तं हिरण्यकशिपुमौशनसौ उशनसः शुक्रस्य पुत्रौ शण्डामर्काख्यौ विविक्ते निर्जने देशे, तस्य प्रतिष्ठाभङ्गादिरभिभावः, इति वक्ष्यमाणप्रकारेण ऊचतुः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनिर्देश्यत्वादिगुणशालिनि हरौ युक्तात्मनि प्रयोजितमनस्के प्रह्लादे अपुण्यस्येव पापिन इव तत्क्रियाः तेषां नैर्ऋतानां ताडनादिक्रियाः ॥ ४१—४२ ॥

वधोपायमाह—दिग्गजैरित्यादिना । अवपातनं गिरिशृङ्गादधःपातनं सन्निरोधैरनिर्गमगेहे निक्षिप्य पीडनैः पर्वताक्रमणैः पर्वतारोहणैः उपरि पर्वतपातनैर्वा ॥ ४३—४४ ॥

तत्कर्तुं हननं कर्तुम ॥ ४५ ॥

असद्धर्मैरसतां योग्यैः अविदूरे समीपे विदूरे वा वर्त-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मानोऽजडधीः पटुतरबुद्धिः अनार्यं मूर्खकर्म अभ्याव्यमिति पाठे नवशास्त्रविरुद्धं महामपरं घातं इत्याह्मेनं विश्वासिष्यामीत्याद्य-जीगर्तकृतकर्म शुनःशेपेन यथा सोढुं तथेति ॥ ४६—४७ ॥

इति वक्ष्यमाणप्रकारं हेत्युच्यमानेर्थे तात्पर्यातिशयं वक्ति ॥४८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भगवति हरौ युक्तः संयुक्तः आत्मा देहो यस्य तस्मिन् 'गोविन्द-परिरम्भितः' इत्यादि पूर्वोक्तेः पित्रा स्वाङ्कगुप्ते पुत्रे इवेति भावः ननु, तर्हि किं भगवदङ्गोपरि शस्त्रप्रहाराः अभूवंस्तत्र न हि न ह्यसम्भवादेवेत्याह-परे इत्यादि । ब्रह्मणि व्यापके निर्वि-कारे अनिर्देश्ये भगवति अनर्घ्यैश्वर्ये अखिलात्मनि शस्त्रादीनामपि नियन्तरि शस्त्रघाताः कथं सम्भवतीतिभावः अपुण्यस्य दुर्भाग्यस्य ॥ ४१ ॥ ४२ ॥

अभिचारैः कृत्यादिभिः अवपातनैरत्युच्चदेशात्पातनैः गर्तादिसंनिरोधैः बहुवचनैरभिचाराद्यावृत्तयः सूचिताः तद्ध-ननं कर्तुं नाऽभ्यपद्यत नाशक्नोदित्यर्थः ॥ ४३ ॥ ४४ ॥

चिन्तामाह—एष इति त्रिभिः । असतां धर्मैरभिचारैश्च ॥४५॥

अविदूरे वर्तमानोपि मे अनार्यं शत्रुं शिष्यो न विस्मरति स्व-भावापरित्यागे दृष्टान्तः शुनः शेफः पुच्छमिव वस्तुतस्तु शुन-श्शेफो नाम पितृभ्यां हरिश्चन्द्राय विक्रीतो मध्यमः पुत्रः स यथा तयोरपकारमविस्मरंस्तांस्त्यक्त्वा विश्वामित्रमाश्रित्य गोत्रान्तरमाप-न्नस्तद्वत् ॥ ४६ ॥ ४७ ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अखिलात्मनि परे अखिलविलक्षणे बृहत्स्वरूपगुणादिमति भगवति युक्त आत्मा मनो यस्य तस्मिन् प्रह्लादे प्रयासा अफला आसन् सम्यक् कृता अपि निष्फला जाता इत्यत्र दृष्टान्तमाह-अपुण्यस्य पापिनः बहुपापाचरणेन सत्कर्मनाशकस्य सत्क्रियाः नित्यनैमित्तिकानि सत्कर्माणि इव ॥ ४१ ॥

अपहते निष्फले जाते निर्बन्धेनात्याग्रहेण ॥ ४२ ॥

दिग्गजादिभिः हन्तुं यदा न शशाक तदा चिन्तां प्राप्तस्त-त्कर्तुं नाऽभ्यपद्यतेत्यनेनान्वयः दिग्गजैस्तद्वाक्रमयौः दन्दशूकेन्द्रै-स्तद्दंशनैः अभिचारैः कृत्यादिभिः अवपातनैः पर्वतादितः मायाभिः आसुरीविद्याभिः संनिरोधैर्गर्तादिषु ॥ ४३ ॥

पर्वताक्रमणैस्तुर्गरपर्वतनिष्पेषैः यदा हन्तुं न शशाक तदा दीर्घतमां दुस्तरां चिन्तां प्राप्तस्सन् तद्घातं कर्तुमुपायं नाऽभ्य-पद्यत न प्राप्तः ॥ ४४ ॥

चिन्तामेवाह—एषेत्यादिना । मे मया असाधु परुषं यथा स्यात्तथोक्तः वधोपायाश्च बहुधा निर्मिताः तैर्द्रोहैर्वधोपायैरसतां धर्मै-रसद्भिः कर्तुमुचितैः स्वेनैव तेजसा भजनबलेन मुक्तः ॥ ४५ ॥

यद्यप्ययं बालस्तथापि अविदूरे वर्तमानः अजडधीः पण्डितः प्रभुः समर्थश्च शुनःशेफः पुच्छमिव स्वभावापरित्यागीत्यर्थः अतो मेऽनार्थ्यं न विस्मरति ॥ ४६ ॥

अतश्च नूनं निश्चितमेतद्विरोधेन मे मृत्युर्भविता भवि-ष्यति वाऽथवा अप्रमेयानुभावोऽपि अयममरो देवकृतः ममामार्त्यं विस्मृत्य मां न घातयेदित्यर्थः ॥ ४७ ॥

औशनसौ शुक्रपुत्रौ मतः शुक्रोक्तनीतिशास्त्राभिज्ञत्वाद्वि-विक्ते एकान्ते इति वक्ष्यमाणमूचतुः ॥ ४८ ॥

भाषा टीका ।

परब्रह्म अनिर्देश्य (प्राकृत इन्द्रियों का अविषय) अखिल जीवों का आत्मा षड्गुण सम्पन्न परमात्मा में चित्त लगा जिसका ऐसे प्रल्हाद के ऊपर वे शस्त्र सब निष्फल हो गये जैसे प्रारब्धहीन पुरुष के उद्यम ॥ ४१ ॥

हे युधिष्ठिर ! दैत्यों के प्रयास के नष्ट होने पर दैत्येन्द्र हिरण्य-कशिपु शंकित होकर निर्बन्ध से प्रल्हाद के वध का उपाय करने लगा ॥ ४२ ॥

हस्ती सर्प अभिचार अवपातन नाना प्रकार की माया और निरोध विषदान भोजन न देना ॥ हिम वायु अग्नि जल ऊपर पर्वत से पटकना इत्यादिक उपायों से निष्पाप अपने पुत्र को असुर जब न मार सका तब बड़ी दीर्घ शंका को प्राप्त हुआ और मारने के उपाय को न प्राप्त हुआ ॥ ४३-४४ ॥

और बोला कि—इसको मैंने बहुत परुष कहा और मारने के भी बहुत से उपाय रचे और द्रोह भी किये परन्तु उन २ द्रोहों से और अधर्मों से यह बालक अपने तेज से ही मुक्त होगया ॥ ४५ ॥

और मेरे समीप रहकर बालक होकर भी यह निर्भय चित्त है और वह मेरी शत्रुता को नहीं भूलता, और इसका स्वभाव नहीं त्यक्त होता, जैसे कुत्ते की पूंछ कितना ही यत्न करो पर सीधी नहीं होती ॥ ४६ ॥

इसके प्रभाव का प्रमाण नहीं होसका और इसको कहीं से भय भी नहीं और यह अमर मालूम होता है क्या इसके विरोध से मेरी मृत्यु तो न होगी ? ॥ ४७ ॥

इस तरह की चिंता से किञ्चित् म्लान हुई शोभा जिसकी और नीचे को मुखकर बैठा हुआ ऐसे हिरण्य-कशिपु से शुक्राचार्य के पुत्र शंडामर्क होने एकांत में ऐसे बोले ॥ ४८ ॥

जितं त्वयैकेन जगत्त्रयं भ्रुवो विजृम्भणत्रस्तसमस्तधिष्ण्यपम् ।
न तस्य चिन्त्यं तव नाथ ! [1] चक्ष्महे न वै शिशूनां गुणदोषयोः पदम् ॥ ४९ ॥
इमं तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा ।
बुद्धिश्च पुंसो वयसाऽऽर्यसेवया यावद्गुरुर्भार्गव आगमिष्यति ॥ ५० ॥
तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् ।
धर्मो ह्यस्योपदेष्टव्यो राज्ञां यो गृहमेधिनाम् ॥ ५१ ॥
धर्ममर्थं च कामं च नितरां चानुपूर्वशः ।
प्रह्लादायोचतू राजन् ! प्रश्रितावनताय च ॥ ५२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भ्रुवोर्विजृम्भणेनैव त्रस्ताः समस्ता धिष्ण्यपा लोकपाला यस्मिन् तस्य तव चिन्त्यं न चक्ष्महे न पश्यामः पदमालम्बनं नैवास्ति यद्वा शिशूनां गुणदोषयोः पदं विषयो न भवतीत्यर्थः ॥ ४९ ॥

तथाऽपि तु बन्धनमस्योचितमित्याहतुः—इममिति । यावद्गुरुर्भार्गव आगमिष्यति तावद्बद्ध्वा निधेहि ततः किमत ऊचतुः यतः पुंसो बुद्धिश्च वयसा तथा आर्यसेवया समीचीना भवति ॥ ५० ॥

अनुज्ञाय तथेत्यङ्गीकृत्य ॥ ५१ ॥

ततश्च तौ प्रह्लादाय धर्मादिकमूचतुः प्रश्रितश्चासाववनतश्च तस्मै ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह—जितमिति । तव भ्रुवो विजृम्भणेन चलनमात्रेण त्रस्ता भीताः सर्वे धिष्ण्यपाः लोकपाला यस्मिन् तज्जगत्त्रयं त्वयैकेनासहायेन जितम् एवंभूतस्य तव हे नाथ प्रभो ! चिन्तनीयं न चक्ष्महे न पश्यामः शिशूनां कृत्यमिति शेषः तद्गुणदोषयोः पदं विषयो भवे न भवतीत्यर्थः ॥ ४९ ॥

अत इमं बालं यावद्गुरुर्भगवान्भार्गवः शुक्र आगमिष्यति तावद्वरुणस्य पाशैः बद्धं निधेहि कुरु भीतोऽयं यथा न पलायते तथा बद्धं निधेहीत्यर्थः । ततः किं तत्राहतुः वयसा आर्याणां सेवया च पुंसो बुद्धिर्भविष्यति ॥ ५० ॥

एवं गुरुपुत्रोक्तं तथेत्यनुज्ञायाङ्गीकृत्य दैत्येन्द्र इदं वक्ष्यमाणमब्रवीत्, तदेवाह—धर्मो इति । अस्य बालस्य धर्मा उपदेष्टव्याः, के ते ? ये राज्ञां ये च गृहस्थानां ते ॥ ५१ ॥

एवमुक्तौ गुरुपुत्रौ तथैवोपदिदिशतुरित्याह नारदः—धर्ममिति । धर्मार्थकामस्वरूपान् साधनान् नितरामत्यन्तमानुपूर्व्यशः हे राजन् प्रश्रयेण विनयेन अवनताय नम्राय प्रह्लादायोचतुरुपदिदिशतुः ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धिष्ण्यपाश्चन्द्रादित्यादयः लोकपाला वा चक्ष्महे पश्यामः शिशूनां प्रेक्षायां शयनशीलानां बुद्धिविकासरहितानां वा गत्करणं गुणदोषयोः पदमास्पदं न वै हि गुणदोषग्रहणबुद्धिविकासाभावादित्यर्थः । शिशूनां गुणदोषयोः पदं नास्तीति वा ॥ ४९ ॥

तर्हि का परबुद्धिरित्यत्रोच्यते—इममिति । गुणाऽगुणेयमेव बुद्धिरिति विशिनष्टि, कियन्तं कालमेवमिति तत्राह [illegible]वदिति । तावदिति शेषः तनश्च किन्तत्राह, बुद्धिश्चेति. पाप[illegible]नी च वयसा कालविशेषविशिष्टेनायुलंक्षणेनार्याणां सेवया स्यादिति शेषः ॥ ५०—५१—५२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

शिशूनां गुणदोषयोः पदमालम्बनं नास्ति । यदालम्ब्य तौ प्रवर्तेत तदेव तेषां नास्ति सारासारविचाराभावात् ॥ ४९ ॥ ५० ॥

गृहमेधिनां तत्रापि राज्ञाम् ॥ ५१—५३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्य तव चिन्त्यं स्वाभिलषणीयवस्तुनोऽप्राप्त्या चिन्तनीयं किमपि न चक्ष्वहे न पश्याव इत्यर्थः पुत्रोऽयं मे बुद्धिकदाचिद्भाव इति चेत्तत्राह—नेति । शिशूनां पदं व्यवसायं गुणदोषयोर्मध्ये न चक्ष्वहे न किमपि पश्यावः यौवनवान्ते सति बुद्धेर्भ्रमभ्रम्यं त्याजयाव इति भावः । वै इति वार्थे । चक्ष्वहे इत्युभयत्रान्वयः ॥ ४९ ॥

भवतु सम्प्रति किं करोमि तत्राहतुः—इममिति । यतः पुंसामस्यैव बुद्धिर्वयसा बाल्यात् परेणैव तथा आर्यस्य सेवया च, क आर्यः ? कदा वा अनेन सेव्यः ? तत्राह—यावदेतस्य भार्गवः शुक्राचार्य इत्यर्थः ॥ ५० ॥

अनुज्ञाय अङ्गीकृत्य ॥ ५१ ॥ ५२ ॥

---

(१) चक्ष्वहे इति—चक्रवर्ति० ।

यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितम् ।
न साधु मेने तच्छिक्षां द्वन्द्वारामोपवर्णिताम् ॥ ५३ ॥
यदाचार्यः परावृत्तो गृहमेधीयकर्मसु ।
वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ॥ ५४ ॥
अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः ।
उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ॥ ५५ ॥
ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः ।
बाला न दूषितधियो द्वन्द्वारामेरितेहितैः ॥ ५६ ॥
पर्युपासत राजेन्द्र तन्न्यस्तहृदयेक्षणाः ।
तानाह करुणो मैत्रो महाभगवतोऽसुरः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां सप्तमस्कन्धे प्रह्लादचरिते
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे नाथ भ्रुवोर्विजृम्भणेन त्रस्ताः समस्ताः धिष्ण्यपाः यस्मिन् तज्जगत्त्रयं त्वयैकेनैव जितं तस्य तव चिन्त्यं चिन्तास्पदं न पश्यामः शिशूनां बालानाञ्च गुणदोषयोः पदं निमित्तं न भवतीह बालाः पित्रादीनामप्रियमपि कुर्वन्तीत्यर्थः ॥४९॥

तथापि दैवेषु त्वद्भयान्न पलायेत यथा तथेमं यावद्भार्गव आगमिष्यति तावत्कालं वरुणस्य पाशैर्बद्ध्वा निधेहि एकत्र स्थापय भार्गवे आगते तु विचक्षणोऽयं भविष्यतीत्याशयेनाहतुः बुद्धिभ्रंशितमतिरपि जनः वयसा वृद्धसङ्गेन च ज्ञानवान् भवतीत्यर्थः ॥५०॥

गुरुपुत्रोक्तं तथेत्यनुज्ञाय स्वीकृत्येदमब्रवीत् ॥ ५१ ॥

तौ च प्रश्रितनम्रमावनतञ्च तस्मै धर्मादिकमूचतुः ॥ ५२ ॥

भाषाटीका ।

हे नाथ! तुम इकले ने ही भ्रूकुटि के विक्षेप से तीनो जगत और समस्त लोकपालों को जीत लिया सब आप के चिंता के लायक कुछ नहीं दिखाई देते फिर आप सदृशों को बालकों का चरित कुछ भी गुण दोष का विषय नहीं है ॥ ४९ ॥

और इस लड़के को तो वरुण के पाशों से बांधकर रखो कि जिससे भय के मारे भाग न जाय और पुरुष की बुद्धि भी अवस्था अधिक होने तथा श्रेष्ठों के सेवा से अच्छी होजाती है और तब तक श्रीगुरुजी (शुक्राचारी) भी आय जाते हैं ॥ ५० ॥

गुरु पुत्र के वचन को अंगीकार कर हिरण्यकशिपु बोला कि अच्छा तो अब इसको गृहस्थ राजाओं के जो धर्म हैं उनको उपदेश करो ॥ ५१ ॥

नारदजी बोले, कि-हे राजन् तदनंतर वे दोनों गुरुपुत्र प्रश्रय और नम्रता युक्त प्रह्लाद को क्रम से निरंतर धर्म अर्थ और काम का उपदेश करने लगे ॥ ५२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथा यथावत् त्रिवर्गमुपशिक्षितमपि न साधु मेने तत्तां शिक्षां च कुतः द्वन्द्वैः रागद्वेषादिभिर्विषयेष्वारमयां येषां तैरुपवर्णिताम् ॥ ५३ ॥

परावृत्तोऽन्यत्र गतः स उपहूतः सन्धिः पादपूरणार्थम् क्रीडार्थं कृतक्षणैः कृतोत्सवैर्लब्धावसरैरितिवा ॥ ५४ ॥

तन्निष्ठां तेषां निष्ठां जन्ममरणादिलक्षणां विद्वान् ॥ ५५ ॥

द्वन्द्वारामाणामीरितैरीहितैश्च न दूषिता धीर्येषाम् यतो बालाः ॥ ५६ ॥

तस्मिन्नेव न्यस्तं हृदयमीक्षणाञ्च यैः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तद्यथावत् त्रिवर्गमात्मने अस्मै उपशिक्षितमपि साधु न मेने नामन्यत तच्छिक्षायाश्च कुतः द्वन्द्वैः रागद्वेषादिभिः विषयेष्वारमणं येषां तैरुपवर्णिताम् ॥ ५३ ॥

किञ्च यदा आचार्यः गार्हस्थ्यधर्मेषु परावृत्तः परोक्षं प्रवृत्तः ऽन्यासक्तान्तरपरैरित्यर्थः । तदा कृतक्षणैः अध्यायकार्यैः वयस्यैः समानवयस्कैः बालैस्तत्रोपहूतः सः प्रह्लादः ॥ ५४ ॥

महान्सुधीर्विद्वान् श्लक्ष्णया मधुरया वाचा तान् बालकान्प्रत्याहूय सम्बोध्य कृपया प्रहसन्निव तन्निष्ठां विज्ञानमार्गनिष्ठाम् उवाच ॥ ५५ ॥

ते तु बालकाः सर्वं तद्गौरवात् तद्वचनगौरवात् त्यक्ताः क्रीडापरिच्छदाः क्रीडोपकरणानि यैर्द्वन्द्वारामाणामीरितैरीहितैश्च न दूषिता धीर्येषां ते ॥ ५६ ॥

हे राजेन्द्र ! तस्मिन्नेव प्रह्लादे न्यस्तं हृदयं मन ईक्षणाञ्च येषां ते तं प्रह्लादमेव पर्युपासत शुश्रूषवः परिवेष्ट्योपविविशुरित्यर्थः । तान्पर्युपासीनान् कारुण्यमैत्र्ययुक्तो महाभागवतो ऽसुरः प्रह्लादः प्राह प्राह ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथा द्वन्द्वारामोपवर्णितां रागद्वेषादिव्याप्तबुद्धिभिर्व्याख्याताम् ॥ ५३ ॥

यदाचार्योऽध्यापनात्परावृत्त उपरतः गृहमेधीयकार्यस्य गृहोपार्जितव्यापारेषु व्यापृतो वा तत्र तदा कृतक्षणैः कृतावसरैः वयस्यैर्बालकैः स उपहूतः क्रीडार्थमिति शेषः 'मेदिन्युत्तमगुणता सोऽचिन्तुसर्वा' सेपदाशरथीराम इत्यादिषु द्वन्द्वयोऽयं प्रयोगः ॥ ५४ ॥

अथागतस्तान् तस्यां क्रियायां निष्ठां तन्निष्ठां विज्ञानैकपरां धयन्यानां निष्ठां स्वस्मिन् स्नेहविशेषं वा ॥ ५५ ॥

द्वन्द्वारामोरितैर्वचनैरीहितैः प्रवृत्तिभिश्च न दूषितधियः ॥ ५६ ॥

स एषोऽसुः "स एष प्राणः" इति श्रुतेः गुणपतये रमत इत्यसुरः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यदेति तत्र तदा ॥ ५४—५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यथावत् त्रिवर्गमुपशिक्षितमपि साधु न मेने तां शिक्षाञ्च यतो द्वन्द्वारामे सांसारिकलोकविषये एव उपवर्णितां न तु पारमार्थिके ॥ ५३ ॥

परावृत्तः अध्यापनस्थानात् परावृत्य स्वगृहं गतः कर्मसु प्रावर्त्तत तदा स प्रह्लादः कृतक्षणैः क्रीडार्थं कृतोत्सवैः बहुभक्तिशास्त्रार्थम् अयं निभृतः समय इति कृतावसरैः ॥ ५४ ॥

तेषां बालानां स्वस्मिन् गुरुत्वनिष्ठां विद्वान् जानन् प्रहसन्निव अहो इमे अपि भगवदनुकम्पाजाले पतिताः इति स्मयमानः ॥ ५५ ॥

द्वन्द्वारामाणां द्विजानां ईरितैर्व्याख्यातैरीहितैश्चेष्टितैश्च न दूषिता धीर्येषां ते ॥ ५६ ॥ ५७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

सप्तमे पञ्चमोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रह्लादस्तु गुरुभिर्यथावदात्मने उपशिक्षितं त्रिवर्गं न साधु मेने तच्छिक्षाञ्च द्वन्द्वारामाभ्यामुपवर्णितां न साधु मेने ॥ ५३ ॥

यदाऽऽचार्यौ गृहमेधीयकर्मसु परावृत्तः परोक्षो भूत्वा प्रवृत्तः तत्रावसरं कृतक्षणैर्लब्धावसरैः सः प्रह्लाद उपहूतः ॥ ५४ ॥

अथ तदाह्वानानन्तरं सोऽपि महान्बालकांस्तान्प्रत्याहूय सम्बोध्य प्रहसन् तन्निष्ठां तस्मिन् स्वोपास्ये विष्णौ निष्ठां कृपयोवाच ॥ ५५ ॥

ते बालकास्तु द्वन्द्वारामाणामसुराणामीरितैर्वाक्यैरीहितैश्चेष्टितैश्च न दूषिता धीर्येषां तथा भूताः ॥ ५६ ॥

पर्युपासत प्रह्लादस्य परितः उपविविशुः, कथम्भूताः? तस्मिन् प्रह्लादे न्यस्तानि हृदयानीक्षणानि च यैस्ते तथा ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चमाध्यायप्रकाशः ॥ ५ ॥

भाषा टीका ।

गुरुने प्रह्लाद को त्रिवर्ग का विषय यथावत् सिखाया परंच द्वंद्वारामों से उपवर्णित उस शिक्षा को प्रल्हाद ने अच्छा न माना ॥ ५३ ॥

जब एक समय आचार्य किसी गृह में स्वीय कर्म के निमित्त अन्यत्र चले गये तब अवसर मिलने पर समान वयस्क बालकों ने इनको (क्रीडार्थ) बुलाया ॥ ५४ ॥

तब तो बड़े बुद्धि वाले विद्वान प्रल्हादजी कृपा करके उनको समीप बुलाकर हंसते से उनकी निष्ठा (दशा) को कहने लगे ॥ ५५ ॥

वो लड़के भी सब प्रल्हाद के गौरव से क्रीड़ा की सामग्री को छोड़कर समीप आये, और हे राजन् संसारियों के वचन और चेष्टा से नहीं दूषित हुई बुद्धि जिनकी एसे वो बालक लोग प्रल्हाद में हृदय और नेत्र लगाकर आंखें २ प्रल्हाद के चारों तरफ बैठ गये । तब बड़े कारुणिक मैत्र महा भागवत प्रल्हाद उनसे बोले ॥ ५६—५७ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, ५अध्याय

की भागवताचार्यकृत भाषा टीका

समाप्त ॥ ५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

———०:#:०———

॥ षष्ठोऽध्यायः ॥

प्रह्लाद उवाच ।

(हन्तार्भका ! मे शृणुत वचो वः सर्वतः शिवम् ।
वयस्यान्पश्यत मृतान् क्रीडान्धा माप्रमाद्यत ॥ ० ॥
न पुरा विवशं बाला आत्मनोऽर्थे प्रियैषिणः ।
गुरूक्तमपि न ग्राह्यं यदनर्थेऽर्थकल्पनम् ॥ ० ॥
यदुक्त्या न प्रबुध्येत सुप्तस्त्वज्ञाननिद्रया ।
न श्रद्दध्यान्मतं तस्य यथाधोह्यन्धनायकः ॥ ० ॥
कः शत्रुः क उदासीनः किं मित्रं चेह आत्मनः ।
भवत्स्वपि नयैः किंस्याद्दैवं सम्पद्विपत्पदम् ॥ ० ॥
यो न हिंस्याद्धर्मकाममात्मानं स्वजने वशः ।
पुनः श्रीलोकयोर्हेतुः समुक्तान्ध्योतिदुर्लभः ॥ ० ॥)

प्रह्लाद उवाच ।

कौमार आचरेत्प्राज्ञो धर्मान् भागवतानिह ।
दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ॥ १ ॥
यथा हि पुरुषस्येह विष्णोः पादोपसर्पणम् ।
यदेष सर्वभूतानां प्रिय आत्मेश्वरस्सुहृत् ॥ २ ॥
सुखमैन्द्रियकं दैत्याः ! देहयोगेन देहिनाम् ।
सर्वत्र लभ्यते दैवाद्यथा [(१)] दुःखमयत्नतः ॥ ३ ॥
तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परम् ।
न तथा विन्दते क्षेमं मुकुन्दचरणाम्बुजम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठे गुरौ गृहं याते प्रह्लादो दैत्यबालकान् ।
अनुकम्प्य परं तत्त्वं नारदोक्तमुपादिशत् ॥ १ ॥
निरर्थकक्रियाखार्थैरायुर्व्ययमजानताम् ।
प्रह्लादः सदयं प्राह धर्मं भागवतं कृती ॥ २ ॥

कौमार इत्यादिना इहैव मानुषजन्मनि धर्मानाचरेत्, यतोऽर्थदमेतत्. तत्र च कौमार एव यतस्तदप्यध्रुवम्; नचैवंभूतं जन्मान्तरम् यतो दुर्लभम्. तत्र धर्मानेवाचरेत्, सुखार्थं प्रयासात्. तत्र भागवतानेव, न काम्यान् ॥ १ ॥
इह भागवतानेव धर्मानाचरेदित्येतदुपपादयति–यथाहीति,

इतः श्लोकाः विजयध्वजरीत्याऽधिकाः पठ्यन्ते ॥ (१) यथाऽसुखमिति वीर० पा० ।

श्रीधरस्वामिकृतभावार्थदीपिका।

चतुर्भिः। इह पुरुषस्य विष्णोः पादोपसर्पणमेव यथाऽनुरूपं योग्यमित्यर्थः। यद्यस्मादेष प्रिय इत्यादि ॥ २ ॥

ननु, भोगोद्यमः कथन्त्याज्य इति चेत्तत्राऽऽह–सुखमिति। सर्वत्र पश्वादावपि दैवात्पूर्वादृष्टादेव ॥ ३ ॥

अतस्तदर्थं प्रयासो न कर्तव्यः यतः प्रयासात्परं केवलमायुषो व्यय एव यतस्तथा तेन प्रकारेण क्षेमं न प्राप्नोति ॥ ४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं दैत्यकुमारैः पर्युपासितो महाभागवतः प्रह्लादस्तेभ्यः करुणयाऽनन्तस्थिरफलब्रह्मानन्दानुभवसाधनभागवतधर्मानुपदि-दिक्षुरुपदेश्यमानधर्मप्रतिष्ठापनाय तद्धेतुवैराग्यजननाय च वैषयिकसुखानामल्पास्थिरत्वं दुःखगर्भत्वमत एव हेयत्वम- यत्नलभ्यत्वञ्च विवक्षुस्तावन्मनुष्यजन्मन एव भागवतधर्मा- चरणार्हत्वं तत्राप्यस्थिरत्वेन बाल्यात्प्रभृत्येव तद्धर्मानुष्ठानस्य कर्तव्यत्वञ्चाह—कौमार इति। इह मनुष्यजन्मन्येव प्राज्ञः हेयो- पादेयविभागाभिज्ञः पुमान् कौमारे बाल्य एव तत्प्रभृतीत्यर्थः भाग- वतान् भगवत्सम्बन्धिनः भगवत्प्राप्तिसाधनान् धर्मानेवाचरेत् भगवच्छब्देन तेषां निष्फलत्वशङ्काप्रयुक्ताऽननुष्ठेयत्वशङ्काप्यु- दस्यते. तथाह—

> “शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते।
> मैत्रेय ! भगवच्छब्दः सर्वकारणकारणे ॥
> सम्भर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः।
> नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ! ॥
> ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
> ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥
> वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि।
> स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ॥
> ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।
> भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः” ॥

इत्यादिना श्रीमत्पराशरोक्तप्रकारमसृणनिर्वचनावगताः भग- ...गमयितृत्वस्रष्टृत्वसर्वशरीरकत्वसर्वभूतान्तरात्म- त्वनिरस्तनिखिलदोषत्वकल्याणगुणपूर्णत्वादयोऽर्थाः अत्र विव- क्षिताः। तत्र संभरणं नाम उपकरणसंविधानं तद्वत्, प्रकृतिपुरुष- कालानां कार्यार्हत्वसंयोजनापादनरूपम् भर्तृत्वम्, निरुपाधिकस्वा- मित्वं नेतृत्वम्, गमयितृरूपं स्थितिकर्तृत्वं गमयितृत्वम्, सङ्गमयि- तृत्वरूपं संहर्तृत्वम्, ...रूपं सृष्टिकर्तृत्वम्, यशो- गुणवत्ता यथा, श्रीः सम्पत्, वैराग्यं विरक्तिः सा च परिपूर्ण- त्वादनादररूपा एवञ्चाऽनुष्ठितैर्यैः प्राप्तस्य भगवत एवं- विधत्वात्तस्याः निःश्रेयसरूपत्वात्तत्प्राप्तिसाधनभूता धर्माः परमपुरुषार्थार्थिभिरवश्यमनुष्ठेयाः स्तेन च बाल्यादारभ्यैव कर्त- व्या इत्यर्थः। इहैवेत्यनेन मनुष्यजन्मन एव भगवद्धर्माचरणोपयु- क्तत्वमन्यस्य तु तदननुगुणत्वञ्चाभिप्रेतम्, तत्रापि पुरोवर्ति- परामर्शिनेह शब्दप्रकृतिभूतेनेदंशब्देनाधुना वर्तमानमनुष्य- जन्मन्येव भगवद्धर्मकर्तव्यताऽभिप्रेता. नन्वन्यस्मिन्नपि मनुष्य- जन्मनि तेषां कर्तुं शक्यत्वात्किं विशेषेणाधुनिक एव जन्मनि कर्तव्यतोच्यते इत्यत आह—दुर्लभं मानुषं जन्मेति। विविध- विचित्रात्मकपुण्यपापात्मककर्मभिः देवतिर्यङ्मनुष्यस्थावरादि- रूपेण संसरतो जीवस्य नियमेन प्रतिजन्म मानुषंजन्मैवेति विश्वासहेतोरभावात् दुर्लभं मानुषं जन्म सुकृतपरिपाकविशे- षालभ्यमिति. तत्रैव भगवद्धर्मानाचरेदिति भावः। ननु, किं विशे- षेण कौमार एवाचरेदित्युच्यते यथेष्टं विषयभोगानन्तरं चतु- र्थे वयसि तेषां कर्तुं शक्यत्वादित्यत आह—तदप्यध्रुवमिति। चतुर्थवयःपर्यन्तजीवन हेतोर्विश्वसनीयस्याभावात्कौमारात्प्रभृत्ये- वाचरेदितिभावः। ननु, चिरकालसाध्या भगवद्धर्माः कथमस्थिरेण मनुष्यजन्मना निर्वर्त्यन्ते! कथन्तरां निःश्रेयसप्राप्तिः? अत आह—अर्थ- दमिति, यद्यप्यध्रुवं तथाप्यर्थदमित्यर्थः। अयं भावः, यद्यप्यध्रुवं तथापि चिरकालजीवननिमित्ते कर्मण्यारब्धभगवद्धर्मविरोधिक- र्माभावे च सति यथावत्फलपर्यन्तभगवद्धर्मोपसंहारद्वारा निः- श्रेयसरूपनिरतिशयपुरुषार्थदं चिरजीवनहेत्वभावे वा आरब्धभग- वद्धर्मविरोधिकर्मसद्भावेऽपि वा “नेहाभिक्रमनाशोऽस्ति, न हि कल्या- णकृत्कश्चिद्दुर्गतिं तात ! गच्छति” इत्यादिभगवदुक्तरीत्या जन्मान्तरे यथावद्भगवद्धर्मोपसंहारद्वारा निःश्रेयसरूपार्थदं भवतीति. अत्र “सर्वं वाक्यं सावधारणम्” इति न्यायेनाब्भक्षो वायुभक्ष इत्यादिव- त्कौमार एव भागवतान्धर्मानिहैवेत्यवधारणमभिप्रेतम् ॥ १ ॥

तत्र भागवतानेव धर्मानाचरेदित्यवधारणं तावदुपपादयति- यथार्हेति। हि तथार्हेत्यर्थः यथाशब्दो योग्यताद्योतकः इह मनु- ष्यजन्मनि विष्णोः परमपुरुषार्थस्वरूपस्य पादयोरुपसर्पणं भजनं यथा योग्यं तदेव युक्तमित्यर्थः। कुतः? यद्यस्मादेष परमपुरुषः सर्व- भूतानामात्मेश्वरः अन्तःप्रविश्य प्रशासनपूर्वकं भर्ता, शरीरस्यात्मा- ऽनुवर्तनं युक्तमिति भावः। नन्वात्माप्यपुरुषार्थरूपत्वान्नानुवर्तनी- योऽत आह—प्रिय इति। प्रियः इष्टतमः निरतिशयानन्दरूप इत्यर्थः। आनन्द एव हीष्टः स एव हि पुरुषार्थरूपः इति भावः। नन्वेवं- भूतोऽपि निष्कृपत्वादननुवर्तमानान् प्राकृतापर्यन्तत्राह—सुहृ- दिति। “एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति” इति श्रुत्युक्तरीत्या स्वानुवृत्तिरूपकर्ममात्रेणाविर्भूत- परमकारुण्ययुक्त उत्तरोत्तरं स्वानुवृत्तिप्रवर्तनारूपहितकारी- त्यर्थः ॥ २ ॥

विष्णोः पादोपसर्पणमेव युक्तमित्यनेन वैषयिकसुखसाधन- यत्नो न युक्त इत्युक्तम् तदेव सहेतुकं सदृष्टान्तञ्चोपपादय- न्निहैवेत्यवधारणमप्युपपादयति–सुखमिति। हे दैत्याः! देहिनां देह- योगेन देहसम्बन्धमात्रेण इन्द्रियकं सुखं सर्वत्र पश्वादिजन्मस्वप्या- धुनिकयत्नमन्तरेणापि दैवात्प्राचीनकर्मणैव लभ्यते तत्र दृष्टान्तः यथाऽसुखमिति, असुखं दुःखं यथा यत्नमन्तरेणापि दैवादेव लभ्यते. तथा वैषयिकं सुखमपीत्यर्थः। सर्वत्र लभ्यते इत्यनेन वैष- यिकसुखलाभः सर्वजन्मसाधारणः भगवद्धर्मलाभस्तु मनुष्य- जन्मासाधारण इत्युक्तं भवति ॥ ३ ॥

यतो वैषयिकं सुखं सर्वजन्मसाधारणं तच्च दैवादेव सुलभम्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अमुख्यस्मात्प्रयासो वैषयिकसुखार्थप्रयासो न कर्तव्यः एतमविजानता कृतोपि प्रयासः केवलमायुर्व्ययकर इत्याह—यत इति । यतो वैषयिकसुखार्थात्प्रयासात्परं केवलमायुःक्षय एव, नान्यत्किञ्चिदपि प्रयोजनमित्यर्थः । ननु, जन्मान्तरे पुनरैन्द्रियकसुखलाभाय कर्तव्य एव सुखस्तत्राह—न तथेति, यद्यपि कृतोऽपि तदर्थप्रयासो जन्मान्तरेऽपि वैषयिकसुखसाधनस्तथापि तथा तद्वत्क्षेमं न प्राप्नोति । कथं यथा मुकुन्दचरणाम्बुजं, भजन्निति शेषः । यथा भगवच्चरणाम्बुजं भजन् पुमान् निःशेषदुःखनिवृत्तिपूर्वकं निरतिशयाधिकानिरतिशयाऽपरिच्छिन्नब्रह्मानन्दानुभवरूपं क्षेमं प्राप्नोति, तथा वैषयिकसुखार्थं यतमानस्तादृशं क्षेमं न विन्दते किन्तु दुःखमिश्रमनित्यमल्पाधिकाल्पमिदानीमनुभूयमानसजातीयं प्राप्नोतीत्यर्थः ॥ ४ ॥

——

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुकुन्दचरणारविन्दनिरन्तरसेवैवेहामुत्रानश्वरानन्दनिदानम्, नान्यदतः सैव मुमुक्षुभिरनुदिनं कर्तव्येति विधीयतेऽस्मिन्नध्याये, तत्र प्रह्लादो बालकान् किमाहेत्याशंक्याह—हन्तेति । बालानुकम्पायां वाक्यारम्भे वा तद्वचःश्रवणात्किं फलं स्यादिति तत्राह—वहतीति । वः सर्वतः सर्वस्मात् शिवं सुखं स्यादिति शेषः कीदृशं वच इत्यतोवोह, व इति । शिवं शुभं मङ्गलम्, ननु, कस्मान्मङ्गलमिति तत्राह, ययस्यार्जितेति संसारनिवृत्तिजनकत्वेन पुरुषार्थहेतुत्वान्मङ्गलमित्यर्थः । अतोनाधुनाऽस्माकं बाल्यमुत्तरत्र श्रेयःसम्पादनाय प्रयतामहे इत्याशा निरस्तेति ज्ञायते यतोऽस्मदायुः कृतान्तनिलुण्ठितं तस्मात् क्रीडासक्तत्वेन युष्मद्धितविमर्शप्रमादो न कार्य इत्याह—क्रीडान्धा इति ॥ ० ॥

ननु, बालानां क्रीडान्धत्वं स्वभाव इति तत्राह—नेति । इतः पुरातना बाला अन्तःकरणं क्रीडायां विवशं न कुर्वन्तीति शेषः तर्हि किङ्कारं वर्तत इति तत्राह—आत्मन इति, अर्थं जन्मप्रभृति आत्मनोर्थं आत्मनः प्रियेषिणः परमात्मनः आनुकूल्यमाक्षलक्षणाप्रियेच्छवो वा आत्मनः प्रियेषिणः स्वप्रयोजनसाकांक्षमाणा आत्महितात्प्रवर्तन्त इति वा, तत्कस्मादपि शंकामाकाङ्क्षां गुरुकृपामुपविष्टत्रिवर्गविषयशास्त्रश्रवणाभ्यासे प्रवर्तन्ते तत्र गुर्वेवसरप्रतीक्षणार्थं क्रीडेति तत्राह—गुरुकर्मिभिरिति । कृतोन प्राप्तमिति तत्राह—यदनर्थ इति, संसारहेतुत्वादनर्थं त्रिवर्गलक्षणं श्रेयस्यर्थकरणं यत्तस्मादिति शेषः—

"त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते"

"इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः"

इत्यादेश्च ॥ ० ॥

ननु, गुरुकर्मणार्थत्वेन ज्ञानहेतुत्वोपपत्तेः कथं तदनर्थकत्वमिति तत्राह—यद्वस्त्विति । सत्यानलक्षणानिद्रया सुप्तशिवलक्षणाज्ञानलक्षणो यथार्थज्ञानाविरोधित्वादज्ञानं नाश न तु ज्ञानमुत्राभावः सुप्तस्यापि गुरूक्त्या प्रबोधो हि प्रयोजनं स नोत्पद्यते चेत्तदुपदेशेन किं प्रयोजनं प्रत्युत तदनुष्ठानेनानर्थ एव स्यादिति भावः । अतः फलितमाह—नेति—अत्रोदाहरणमाह—यथेति, अन्धो नायको नेता यस्य स तथा हि शब्देनोभयोरप्यन्धत्वान्मार्गज्ञानं नोत्पद्येत यथा, तथात्रापीत्यस्माच्छ्रद्धा न कार्या ॥ ० ॥

ननु,

"समूलघातमध्नन्तः पराभवन्ति भूभृतः ।

निहितद्वयोर्द्विधं कथं शेरते ते निमाकतम् ॥

आपत्सु मित्रं जानीयात्पुत्रमुत्तरजन्मनि ।

य उदास्ते स्वकार्येषु स मित्रो यत्नतो नरः"

इत्यादि नीतिशास्त्रं शत्रुमित्रोदासलक्षणज्ञापकं हितकारित्वाहितत्याभ्यां नो बोध्यते तन्मतं कथं न भद्रध्याहृत्करणम् इति तत्राहक इति । यः शत्रुः स आत्मनो मम पक्षे कः न कोपीत्याह योऽयं त्वत्पक्षे शत्रुप्रभावेष्वस्मत्पक्षेस्युरिति तत्राह—सर्वास्विति । मत्पक्षेपि के शत्र्वादयः स्युर्न केऽपीत्यतो नीतिशास्त्रश्रवणाज्जनितैर्मतिभिः किं फलं स्यान्न किमपीत्यर्थः । नीतिगिरापरिहारः सम्प्राप्तिश्च स्यातामिति तत्राह, दैवमिति । सर्वोत्कृष्टत्वात् श्रीनारायण एव सम्यक्त्रिदाश्रयो न नीतिगीस्तस्यान्वयव्यतिरेकाभावात् अस्मत्प्रकारे दर्शनात् आत्मनो देहस्य यः शत्रुरित्यस्य मनस्तु कियद्भिर्गैः किं स्यात्परिहार्यत्वान्मरणादिकं प्राप्यत एव कामादिषड्गणमन्तरेण न तत्परिहारः परिहार्य इति शेषं पूर्ववत ॥ ० ॥

ननु, तर्हि माभून्नीतिशास्त्रं परिच्छिन्नलक्षणधर्मशास्त्रमभ्यसनीयं श्रेयोहेतुत्वादित्यत—य इति । न आत्मानं परमात्मानमुद्दिश्य धर्मकामं धर्मेच्छां न दिक्षासु हिनस्ति न त्यजति किं चानुतिष्ठति सोतिदुर्लभः प्रशान्तात्माकोटिष्वपि महात्मनः क्वापि अनवशीकृतेन्द्रियग्रामस्य भगवद्धर्मतत्त्वलक्षणाधर्मेच्छा कथं स्यादिति तत्राह—स्वजन इति, स्वेन सह जन्यत इति स्वजनः इन्द्रियग्रामस्तस्मिन्नवशे यशो न भवति वशीकृतेन्द्रियग्राम इत्यर्थः यद्वा पुत्रमित्रादिलक्षणो स्वजनं यशो न स्वानुष्ठानानुकूलपुत्रादिक इत्यर्थः अत एव तुलात्मवः जीवानन्धस्वभावः तत्त्वतोऽकामुष्यकफलाकांक्षाणां निवृत्तिधर्मानुष्ठानतः कथं तत्प्राप्तिः स्यादित्याह—पुनरिति । पुनरर्थं निवृत्तिधर्मानुतिष्ठत्प्रयोजनमिह लोकपरलोकयोर्हेतुर्भवति पुनर्निवृत्तिधर्मानुष्ठानान्तरं वा प्रवृत्तिनिवृत्तिधर्मयोरनुष्ठानयोः पुनर्भवति पुनर्जन्म ततः पातोऽपि इमं लोकं हीनतरं वा विशन्ति" क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इत्यादेः । तत्वतः ज्ञानसामर्थ्यं स्मरणात् ततः पुनरन्ते धैर्यलोकप्राप्तिश्च स्यात् "स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते स यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् तं तं लोकं जयते तांश्च कामान्" इत्यादेः "एतत्प्रथमं कामांकस्मादात्मनः परमीश्वरा लिङ्गाः" इत्यादेः "पुनरप्रथमं मेदे" इत्यतः । यदा आत्मानं धर्मयुक्तः कामो यस्य स तथा न तु नरं नाकस्याश्च धीस्यति आत्मानं प्रवृत्तिधर्मकामिना धीर्मनं न करोति सोतिदुर्लभः धर्मात्मकं इत्यं कामो यस्य स तथा निवृत्तिधर्मनिरत इत्यर्थः । तं नाकःपातयतीति वा मङ्गलत्वान्निर-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तादेव तद्वाञ्च भिर पैहिकवाः सफरदः स्नन: सफरमाया लोकस्य ज्ञानस्यापरोक्षत्वाद्यस्य च पात्रं या अत्र प्रवृत्तिनिवृत्तिलक्षणौ धर्मावनुष्ठाय तत्फलानिच्छयैव भगवद्भक्तिमनिशं कुर्वाणाः पुरुष उत्तमाः इति तात्पर्यम् ॥ ० ॥

नन्वस्तु निवृत्तिधर्मानुष्ठानस्य श्रेयःसाधनत्वं तस्य नेदानीमवसरः वार्धके कर्तव्यत्वाऽविनाभूतत्वात्—

" बाल्ये विद्यां निषेवेत यौवने दारसंग्रहम् ।
वयसि वार्धके मोक्षमार्गनिष्ठस्तदा धर्ममाचरेत्" ॥

इति स्मृतेरिति तत्राह—कौमार इति । सर्वदेति विशेषणाद्विद्याभ्यासकालेऽपि मोक्षधर्मानुष्ठानं कर्तव्यमिति न तस्य स्मृतिविरोधः नानायोनिषु का योनिः श्रेयःसाधनमिति तत्राह—दुर्लभमिति । यन्मानुषं जन्म तदपि नश्वरार्थदं ज्ञानादिप्रयोजनप्रदम् अत एव बहुपुण्यवसादनन्यसाद्दुर्लभं तर्हि चिरकालस्यापि किम ? नेत्याह—अध्रुवमिति । "सस्यमिव मर्त्यः पच्यते सस्यमिव जायते पुनः अपि सर्वं जीवितमल्पमेव" इत्यादिश्रुतेः अध्रुवमपि मानुषं यज्जन्म सुदुर्लभं तत्राप्यर्थदं दुर्लभतरं "एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्" इति श्रुतेः ॥ १ ॥

ननु, कथङ्कारं पुरुषार्थप्रदं तत् अन्यथा तद्वतां सर्वेषामपि पुरुषार्थः स्यान्न चासौ सम्भवति अदर्शनादित्यवधार्यत्याशङ्कयाचिकित्सामाह—यदाहीति । इह मानुषे यदा यदि युभूषोः पुरुषस्य विष्णोः पादोपसर्पणं सम्भवति तदर्थदं "यावत्सेवापरे तस्य नाचत्सुखविशेषता" इति. एतद्धिशब्देन सूचयति अतो मानुषी योनिरेव निःश्रेयसः कारणं नान्या असङ्कल्पाद्वेदानर्हत्वेनान्यासाम्, अतः कौमारवय आरभ्य भगवत्सेवा कर्तव्येति भावः । ननु, श्रीहरिसेवामन्तरेणान्यसेवा अर्थदा किं न स्यादिति तत्राह, यदेष इति । सर्वभूतप्रियत्वादिगुणयुक्त एव इति यद्यस्मादेतत्सेवैव पुरुषार्थदा नान्यसेवा "तदेतत्प्रेयः" इति श्रुतेः "एष सर्वेश्वरः" इति च ॥ २ ॥

इतोऽपि भगवत्सेवालक्षणनिवृत्तिधर्मानुष्ठानमेव कर्तव्यं न प्रवृत्तिधर्मभेदनं विषयसुखसंलब्धाय तदनुष्ठानमिति नोच्यते तदन्तरेणापि तल्लभ्यते यथा दुःखमित्याह—सुखमिति । सर्वत्र नरकादावपि "सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्" इति स्मृतेः, दैवात् प्रारब्धकर्मप्रेरकात् ॥ ३ ॥

ततश्च किमिति तत्राह—तदिति । तस्मात्तत्प्रयासपेन्द्रियसुखप्राप्तये प्रवृत्तिधर्मकरणे बहुक्लेशो न विधेयः, कुतो न विधेयः ? इति तत्राह, आयासेति । परं केवलमायासेनायुषो व्ययः क्षय एवावशिष्यत इति शेषः । प्रवृत्तिधर्मानुष्ठानस्य दुःखासम्भिन्नप्रदेशादिशास्त्रात्तत्कथं दुःखफलत्वेन निन्द्यत इति तत्राह, न तथेति । मुकुन्दचरणाम्बुजं भजन्यथा क्षेमं विन्दते प्रवृत्तिधर्मानुष्ठायी न तथा नश्वरं सुखं लभत इत्यन्वयः "प्लवा ह्येते अदृढा यज्ञरूपाः" इति श्रुतेः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भागवतान् धर्मानाचरेत् यतोऽयं मेनजन्म, देवादिजन्मनि महाविषयावेशात् पश्वादिजन्मनि विवेकाभावाच्च तत्रापि न विलम्बेनेत्याह—कौमारे कौमारमारभ्येत्यर्थः । यतस्तदपि जन्म ध्रुवं पुनर्दुर्लभञ्च तथाच ब्रह्मवैवर्ते "प्राप्यापि दुर्लभतरं मानुष्यं विबुधेप्सितम् । यैराश्रितो न गोविन्दस्तैरात्मा वञ्चितश्चिरम् ॥ अशीतिं चतुरश्चैव लक्षांस्तान् जीवजातिषु । भ्रमद्भिः पुरुषैः प्राप्यं मानुष्यं जन्म पर्ययात् ॥ तदप्यफलतां जातं तेषामात्माभिमानिनाम् । वराकाणामनाश्रित्य गोविन्दचरणद्वयम्" इति शास्त्रस्य प्राधान्येन मानुषमधिकृत्य प्रवर्त्तत्वात् तदनुवादेनोक्तिरियं तद्दुःखादिसामान्येन मानुषत्वमारोप्यैवेति ज्ञेयम् ॥ १ ॥

तत्र भागवतधर्माचरणस्यैव युक्तत्वं दर्शयति—यथाहीति । यत् यस्मात् एष भूतानां स्वभाव एव प्रियः प्रेमविषयः प्रेमकर्त्ता च तत्र हेतुः आत्मा परमात्मा पादोपसर्पणे हेत्वन्तरं यस्माद्येष ईश्वरः कर्तुमकर्तुमन्यथाकर्तुं समर्थः सुहृत् सर्वेषां हितं चिकीर्षुश्चेति ॥ २ ॥ ३ ॥

मुकुन्दचरणाम्बुजरूपं क्षेमम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षष्ठे तु ग्राहयामास प्रह्लादो भक्तिमर्भकान् ।
आसक्तिं देहगेहादौ त्याजयामास बोधयन् ॥

नानाह करुणो मैत्र इति पूर्वमुक्तं तत् किमाहेत्यत आह—कौमारे धर्मानाचरेत्. ननु, कौमारे वर्णाश्रमधर्माणामनधिकारस्तत्राह—भागवतान् श्रवणकीर्त्तनादीन् इह भारतभूमौ. ननु, तान् यौवनादावपि कृत्वा कृतार्था भवन्ति. तत्राह, प्राज्ञ इति । यदि कौमारान्त एव मृत्युः स्यात्तर्हि किं भवेदिति प्रकृष्टज्ञानवान्, ननु, तत्र का चिन्ता ? जन्मान्तरन्तु भावि तत्रैव भक्तिः कार्य्येति तत्राह, दुर्लभं मानुषं जन्म तदपि भाग्याल्लब्धमप्यध्रुवम् अद्य वर्त्तमानत्वेऽपि तस्य श्वः स्थितौ निश्चयाभावात्. ननु, तर्हि तावन्मात्रकालेन कुतो भक्तिसिद्धिस्तत्राह, अर्थदं मुहूर्त्तमात्रस्यापि भक्तिमतामपि खट्वाङ्गादीनां सिद्धिदर्शनात् ॥ १ ॥

भागवतधर्मान् केन प्रकारेणाचरेदित्यपेक्षायामाह, यथा येन प्रकारेण विष्णोः पादयोरुपसमीपे सर्पणं प्राप्तिर्भवेत्तथा आचरेदित्यनुषङ्गः तमेव प्रकारं चतुर्विधं व्यञ्जयन् विष्णुं विशिनष्टि—यदस्मादेष प्रिय इत्यादि तेन "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इति भगवदुक्तिप्रामाण्येन कान्तभावशान्तिरतिदास्यभावसख्य भावानां मध्ये येन भावेन उपसर्पितुमिच्छेत्तेनैवोपसर्पयन् भागवतान् धर्मानाचरेदिति रागभक्तावपि विधिर्योजितः । आत्मतुल्यत्वादात्मा सुत इति तन्त्रेणोक्ता पञ्चैव भावाः प्रह्लादेनोपदिष्टा इति वा ॥ २ ॥

सुखभोगार्थमुद्यमस्तु मानुषं देहं प्राप्य न कर्त्तव्य इत्याह सुखमिति । देहयोगेनेति सुखदुःखे देहधर्मावेवेत्यर्थः । सर्वत्र पश्वादावपि ॥ ३ ॥

ततो यतेत कुशलः क्षेमाय भयमाश्रितः ।
शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ॥ ५ ॥
पुंसो वर्षशतं ह्यायुस्तदर्धं चाजितात्मनः ।
निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ॥ ६ ॥
मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः ।
जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥ ७ ॥
दुरापूरेण कामेन मोहेन च बलीयसा ।
शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तथा तेन प्रकारेण क्षेमं न विन्दते क्षेममेवाह, मुकुन्देति ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवद्भजनमेव परमपुरुषार्थं इत्याहाऽसुरबालकान्प्रति श्रीप्रह्लादः—कौमार इति, पञ्चमाध्यायेन । मानुषं जन्म दुर्लभम् बहुपुण्यलभ्यं यतोऽर्थदं पुरुषार्थदम् तस्मात् पुरुषार्थासक्ये इह मानुषजन्मनि भागवतान् धर्मान् आचरेत. ननु, धर्मान्तराचरणे को दोषः? अत्राह-प्राज्ञ इति । भगवद्धर्माचरणेऽपुनरावृत्तिपदप्राप्तिः तदितरधर्माचरणे तु पुनरावृत्तिपदप्राप्तिरित्येवं ज्ञानवानित्यर्थः—

"देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ।
आब्रह्मभुवना लोकाः पुनरावृत्तिनोऽर्जुन ॥
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते"

इति श्रीमुखवचनमत्रानुसन्धेयम् तत्रापि कौमारे आचरेत् तत्र हेतुमाह, अध्रुवमनित्यम् अनियतकालस्यापि तारुण्यं स्थास्नुम् आश्रमादाश्रमान्तरगमनञ्च न प्रतीक्षेत् ब्रह्मचर्यादेव सर्वं त्यक्त्वा भगवद्धर्मपरो भवेदित्यर्थः । तथा च श्रुतयः "यदहरेव विरजेत्तदहरेव परिव्रजेत्" "किमर्थं वयं यजामहे येषामयमात्मालोकः किं धनेन किं प्रजया त्यागेनैकेनामृतत्वमानशुः" इत्याद्याः । स्मृतिश्च "स्मर्तव्यः सततं विष्णुः विस्मर्तव्यो न जातु चित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः" इति ॥ १ ॥

एतदेवोपपादयति-यथा हीति, चतुर्भिः । पुरुषस्येह जन्मनि विष्णोः पादोपसर्पणेन यथा योग्यम् यस्मात् सर्वभूतानां चेतनाचेतनानां भोक्तृभोग्यपदार्थानाम् ईश्वरः, ईश्वरत्वे हेतुः, आत्मा आश्रयः सर्वेषां चेतनाचेतनानां तत्परापरप्रकृतिरूपत्वात्, अत एव प्रियः स्थितिप्रवृत्तिहेतुत्वात् अत एव सुहृत् सर्वदा सर्वथानुकूलत्वात् ॥ २ ॥

ननु, ऐन्द्रियकसुखमपि मानुषजन्मन्येव सुकरमतस्तदर्थं यतितव्यमित्यत्राह-सुखमिति । दैवात् पूर्वकर्मवशात् यथाऽयत्नतो दुःखं लभ्यते तथा सर्वत्र सर्वयोनिषु देहयोगेन सुखमपि ॥ ३ ॥

तस्मादेतयोः यत ऐन्द्रियकसुखप्रयासात्परं केवलमायुर्व्ययः तत्प्रयासो न कर्तव्यः, ननु, ऐन्द्रियकसुखरूपस्य फलस्य सत्त्वात्कथं केवलमायुर्व्ययस्तेन भवतीत्यत आह, तथा तादृशेनैन्द्रियकसुखप्रयासेन क्षेमं निरतिशयसुखदं मुकुन्दचरणाम्बुजं न विन्दते न प्राप्नोति ॥ ४ ॥

भाषा टीका ।

प्रह्लाद उवाच ॥

प्रह्लाद बोले, कि—इस संसार में यह मनुष्य जन्म बड़े प्रयोजन (मुक्ति पर्यन्त) का देने वाला है पर बड़ा दुर्लभ है सोभी अध्रुव (अनित्य) है इसी से बुद्धिमान् कुमार अवस्था में ही भागवत धर्मों का आचरण करें ॥ १ ॥

इस संसार में पुरुष को श्रीविष्णुभगवान् के चरणोंकी शरणजाना यही योग्य है, क्योंकि ? यह विष्णुही सर्वप्राणियों का प्रियआत्मा ईश्वर और सुहृद है ॥ २ ॥

हे दैत्यबालको ! जीवों को इन्द्रियों का सुख तो देह के योग से प्रारब्ध के आधीन सर्वत्र ही मिलता है जैसे कि ये दुःख आप ही मिलता है ॥ ३ ॥

उस सुख के लिये प्रयास नहीं करना योग्य है क्योंकि इस में केवल व्यर्थ ही आयु गमाना है पुरुष जैसा गोविन्द के चरणारविन्द के शरण में सुख को प्राप्त होता है वैसा अन्यत्र नहीं होता है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भयमाश्रितः संसारं प्राप्तः पुरुषरूपं शरीरं यावत्पुष्कलमस्ति न विपद्येत सर्वांश न भवेत् तदर्थादर्वागेव तावत्क्षेमाय यतेत ॥ ५ ॥

आयुर्व्ययक्रममाह-पुंस इति त्रिभिः । यद्यस्मात्स्वप्ने ॥ ६ ॥

(१)(नष्टप्रज्ञं मतिनैपुण्यं ज्ञातीनां नः कुटुम्बिनाम् ।
श्रेयो विघातादायासादहितामनुसंसृतिम् ॥ ० ॥)
को गृहेषु पुमान् सक्तमात्मानमजितेन्द्रियः ।
स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुम् ॥ ९ ॥
कोन्वर्थतृष्णां विसृजेत् प्राणेभ्योऽपि य ईप्सितः ।
यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥ १० ॥
कथं प्रियाया अनुकम्पितायाः सङ्गं रहस्यं रुचिरांश्च मन्त्रान् ।
सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥ ११ ॥
पुत्रान् स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन् स्वसॄर्वा पितरौ च दीनौ ।
गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विंशतिर्वर्षाणयायुर्याति ॥७॥

दुरापूरेण दुःखेः समन्तादापूर्यमाणेन ॥ ८ ॥

ननु, यौवने गृहासक्तोऽपि पश्चाद्विरक्तः सन् क्षेमं यास्यतीत्याशंक्य तदसम्भवं दर्शयन्कौमार एवाचरेदित्येतदुपपादयति-को गृहेष्विति सप्तभिः ॥ ९ ॥

यमर्थमसुभिः क्रीणाति प्राणहानिमङ्गीकृत्यापि साधयति तस्करादिः तस्मिन्नर्थे तृष्णां को नु विसृजेत् ॥ १० ॥

किञ्च कथमित्यादि प्रियायाः सङ्गादिकं स्मरन्कथं त्यजेदिति तृतीयेनान्वयः । मन्त्रान्हितशिक्षालापान् सुहृत्सु च सङ्गम् तेषां स्नेहेन सितो बद्धः कलानि मधुराण्यक्षराणि येषां तेषां च सङ्गम् तेष्वनुरक्तं चित्तं यस्य ॥ ११ ॥

ताः श्वशुरगृहे स्थिताः हृदय्या हृदयङ्गमाः मनोज्ञा उरवः परिच्छदा येषु तान् गृहान् वृत्तीर्जीविकाः कुल्याः कुलपरम्परागताः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः कारणात्रुद्धमनर्थावहं संसारमाश्रितः पुमान् कुशलः हेयोपादेयविभागकुशलः सन् क्षेमायैव उक्तविधक्षेमार्थमेव यतेत कौमार एवेत्युक्तमवधारणं प्रतिपादयितुं तदुपपादयति-शरीरमिति । पौरुषं पुरुषस्य जीवस्य स्वस्य सम्बन्धि शरीरं यावत् पुष्कलं पटुतरमस्ति न तु विपद्येत विपन्नं न भवति तावदेव क्षेमाय यतेतेति पूर्वेणान्वयः बाल्यादारभ्यैव यतेतेति भावः ॥ ५ ॥

एतदेव प्रतिपादयन् विषयासक्तस्य केवलं वृथायुर्व्ययमाह—पुंस इति । पुंसो मनुष्यस्य तावद्वर्षशतं ह्यायुर्जीवनयोग्यकालः शतवर्षपरिमितः तस्य शतवर्षपरिमितस्यायुषोऽर्धं पञ्चाशद्वर्षात्मकमजितेन्द्रियस्य निष्फलमेव यातीत्युत्तरेणान्वयः । नैष्फल्येन याने हेतुं वदन्पुमांसं विशिनष्टि, यदिति. यद्यस्मादसावजितात्मा पुमान् रात्र्याम् अन्धन्तमः निद्रात्मकं प्रापितस्तूष्णीं शेते जितेन्द्रियः कौमार एवारब्धभक्तियोगरूपभगवद्धर्मयोगस्तु रात्र्यामपि मध्यमं यामद्वयं निद्रार्थमुपयोज्य पूर्वोत्तरयोर्यामयोर्नियतं कालं भगवद्धर्ममाचरतीति भावः ॥ ६ ॥

एवं बाल्ये मुग्धस्य मूढस्य दशवर्षाणि कौमारे क्रीडतो दशवर्षाणीत्येवं विंशतिर्वर्षाणां याति, जितेन्द्रियः कुशलस्तु तस्यामपि विंशत्यां भगवद्धर्ममनुतिष्ठतीति भावः । एवमुत्तरत्राप्यूह्यम्. जरया ग्रस्तो देहो यस्य अत एवाकल्पस्यासमर्थस्य स्वाधीनदेहस्य वर्षाणां विंशतिर्यातीति बाल्यात्प्रभृत्यारब्धभगवद्धर्मस्तु तदभ्यासशिक्षितदेहत्वात्तस्यामपि विंशत्यां तमनुतिष्ठतीति भावः ॥ ७ ॥

एवमहर्भागात्मकान्यायुषश्चत्वारिंशद्वर्षाणि गतानि शेषमवशिष्टं दशवर्षात्मकमायुः दुरापूरेण दुःखैः समन्तादापूर्यमाणेन कामेन तदनुबन्धिना बलीयसा मोहेन चकारात् क्रोधेन च गृहेषु गृहधर्मेषु सक्तस्यात एव प्रमत्तस्य स्वहितमजानतोऽपयाति जितेन्द्रियस्तु कुशलः कामाद्युपशमनेन तस्मिन्नपि दशवर्षात्मके वयसि भगवद्धर्ममनुतिष्ठतीति भावः ॥ ८ ॥

एवमजितेन्द्रियस्य वैषयिकसुखरतस्यायुषो नैष्फल्यमारब्धभक्तियोगस्य कुशलस्य जितेन्द्रियस्य तु निःश्रेयससाधनभगवद्धर्मप्रसाधनोपयुक्तत्वेन साफल्यं भागवतधर्माणामेव निरतिशयश्रेयस्साधनत्वं तेषाञ्च वर्तमानमनुष्यजन्मनैवानुष्ठेयत्वं चोक्तम्. अथ वैराग्यमन्तरेणापि दृष्टोऽपि भागवतधर्मः प्रतिष्ठितो न भवतीति वैराग्येण तावदेषां भवितव्यं तच्च सत्संगतिमन्तरेण न सेत्स्यतीति तया भवितव्यम्. सा च विषयासक्तचित्तजनसङ्गपरिहारमन्तरेण दुर्लभेत्यभिप्रेत्य तत्परिहारञ्च गृहवित्तकलत्रापत्यादिष्वनुरक्तचित्तस्य यद्यप्यशक्यस्तथाप्युपा-

(१) श्लोकोऽयमधिकः पठ्यते विज० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

येन विवेकात्मना दुस्सङ्गः परिहार्य इति वक्तुं तावद्गृहादिष्वनुरागस्य दुस्त्यजत्वमनर्थावहत्वञ्चाह—को गृहेष्वित्यादिना । तावद्गृहानुरागस्य दुस्त्यजत्वमाह—क इति. गृहेष्वासक्तं ममेदं गृहमित्यभिमानयुक्तं, दृढैः दुर्मोचनीयैः स्नेहा एव पाशास्तैर्बद्धमात्मानं विमोचयितुमजितेन्द्रियश्च कः पुमानुत्सहेत, कोऽप्युत्साहं न कुर्यादित्यर्थः। जितेन्द्रियस्तूत्सहेतैवेति भावः। अनेन "हित्वात्मपातं गृहमन्धकूपम्" इतिपूर्वमुक्तगृहाभिनिवेशत्याग एव भगवदाश्रयणे प्रथमं कार्यमित्युक्तम् ॥ ९ ॥

तदभिनिवेशत्यागश्च वित्तकलत्रापत्याद्यनुरागत्यागपूर्वकः सोऽप्यजितेन्द्रियस्य दुष्कर इत्याह—कोन्विति । अर्थतृष्णां वित्तस्पृहाम् अजितेन्द्रियश्चेत् कःपुमान् विसृजेत् त्यजेत् दुस्त्यजत्वे हेतुं वदंस्तां विशिनष्टि—य इति. योऽर्थः प्राणेभ्योऽपि गरीयसीमिति. प्राणस्पृहापेक्षया गरीयसीं दृढतरामित्यर्थः।प्राणेभ्योऽपि गरीयस्त्वमेव दृष्टान्तमुखेन दर्शयन्नर्थं विशिनष्टि—यमिति. यमर्थमसुभिः प्राणैः तस्करश्चोरः सेवकः आयुधोपजीवी वणिक् नाविकश्च क्रीणाति प्राणहानिमङ्गीकृत्यापि तस्करादिरयमर्थं साधयति तद्विषयां तृष्णां कोनु विसृजेदित्यर्थः ॥ १० ॥

किञ्च अनुकम्पितया दयायुक्तायाः प्रियायाः रहसि भवं सङ्गं रुचिरान् मनोज्ञान् हितालापांश्च सुहृत्सु च सङ्गं स्मरन् कथं प्रियासङ्गादीन् त्यजेदिति तृतीयेनान्वयः । कथम्भूतः ? तत्स्नेहसितः तेषां शिशूनां स्नेहेन सितो बद्धः कलानि मधुराव्यक्ताक्षराणि येषां तेषां शिशूनां च सङ्गमित्यनुषज्यते सङ्गं तेष्वनुरक्तं चित्तं यस्य सः ॥ ११ ॥

पुत्रान् हृदय्याः हृदयङ्गमाः दुहितॄः श्वशुरगृहे स्थिताः तथा भ्रातॄन् स्वसृर्भगिनीश्च दीनौ मातापितरौ च उरवः बहवः परिच्छदाः भोगोपकरणानि येषु तान् मनोज्ञान् गृहांश्च कुल्याः कुलक्रमागताः वृत्तीर्जीविकाश्च पशून् भृत्यवर्गांश्च कथं त्यजेत कथन्तरां विरज्येत विरक्तः स्यात् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्माद्विद्वद्भिः कर्तव्यमिति तत्राह—अत इति । चशब्दाद्यदभीष्टं तत्साधय इत्याह—इतोऽपि बाल्य एव मुक्तये प्रयतेतेत्याह—शरीरमिति । पौरुषं पुरुषस्य विद्यमानं पुष्कलं पुरुषस्थपक्षुत्वाद्यनवयवैकल्यादिगुणमित्यर्थः । विपश्चित् मरणलक्षणविपत्तिं प्राप्नोति ततस्तेन यतेतेति शेषः ॥ ५ ॥

"शतायुर्वै पुरुषः" इतिवचनात् शतायुः शरीरस्थितेर्निश्चितत्वात्तदन्तरालकालेऽनेकश्रेयःसमार्जनोपपत्तेः बाल्य एव निर्वृत्तश्रेयसे यतनीयमिति नियमो नापेक्षित इत्याशङ्क्य गर्भात्समारभ्य शतायुःपर्यन्तं स्वतः परतो वा शरीरस्य नाशदर्शनाच्च तत्स्थितिनियमः शाश्वतः अस्तु वा कस्यचित् तथापि न श्रेयो यतो दरिद्रदन्तं अन्यव्यापारायासप्रस्तावेन दिनमेवानवच्छिन्नपरम्परायां क्षपायेवं न अवशेषायुषेणापि मुकुन्दचरणारविन्दसेवालक्षणश्रेयःसम्पादनं सुशकमित्याह—पुंस इति ॥ ६ ॥ ७ ॥

दुरापूरेण न शक्यपूरणेन हिशब्दो हेतौ ॥ ८ ॥

निद्रादिकमन्तरेणावशिष्टकालान्तरालेऽपि श्रेयोऽभिलाषहेतुरस्तीत्याह—गृहेष्विति । कलहसवर्णां मतिनैश्चल्यं अनुसंसृतिमित्यनेनैकोऽपि क्षणोऽनावशिष्यत इति सूचयति ॥ ० ॥

नन्वस्माकं श्रेयइच्छा नास्ति येनकेनचित्कस्य चिरस्य स्यात्तदनुसरमापद्येतेति तत्राह—क इति ॥ ९ ॥

ननु, प्रवृत्तिधर्मेण माभूच्छ्रेयोऽर्थेन तत्स्यागतो मुकुन्दपादसेवा कुतो नियुज्यत इति तत्राह—कोन्विति । योऽर्थस्तदर्थतृष्णां प्राणेभ्योऽपि यावैतृष्णायैवार्जितस्य व्यये लिप्सयाऽर्थेन सुकृतं साधयेति वाञ्छन्ते साधयिष्यामीति कपटोपरि गद्गदनिगदनेन काले यातीति पुरुषायुषेणापि वित्तेन सुकृतार्जनं दवीय इति वित्तव्ययमन्तरेण कायक्लेशेनैव श्रीहरिचरणाभिषेवणं जन्मसफलं करोतीति भावः तत्र दर्शनं प्रमाणयति तस्करादयो मृता अप्यर्थतृष्णां न मुञ्चन्तीत्यनुपलक्षणं परितः प्रत्यक्षं नानाजीवानां वर्तते ॥ १० ॥

ननु, माभूदर्थोच्छेदः कामादस्त्वित्याशङ्क्य कीदृशोऽसौ भगवद्भक्तिकामो विषयकामो वा न द्वितीयः अभिध्यायन्गृहनिप्रमोदासक्तिरीर्ष्यर्जीविते को रमेतेत्यादि शास्त्रानिन्दितत्वात् विषयानिरस्या तत्यागेन भाव्यं तस्य दुःसाधनत्वादित्याह—कथमिति. रहस्यं रहसि भवं सङ्गं मैथुनलक्षणं कथं त्यजेदित्युत्तरेणान्वयः मन्त्रादिगृहीतानां संलापानां रसेनेति शेषः ॥ ११ ॥

प्रजा दत्ताः हृदय्याः हृदयप्रियाः रुचिरच्छदान् रुचिरपरिकरान् कुल्याः कुलपरंपरया समागताः वृत्तीर्जीवनकरीः ॥१२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुरुषरूपमिति स्वामिपादपमिति सम्बन्धोक्तिः ॥ ५ ॥ ६ ॥

कौमार इत्यत्र कैशोर इति क्वचित् ॥ ७—२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी॥

भयमभिन्न इति हरिभजनाभावे स्थानात्तूद्याः पतन्त्यध इति भवं भुत्वेति वैधभक्तौ विधिकृतः पुष्कलं जरारोगाद्यभावात् पुष्टं यत्नसमर्थमित्यर्थः ॥ ५ ॥

आयुर्व्ययक्रममाह—पुंस इति ॥ ६ ॥

क्रीडत इति बालैर्बालाभिश्च सह ॥ ७ ॥

शेषवमशिष्टमायुः ॥ ८ ॥

त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः ।
औपस्थ्यजैह्व्यं बहुमन्यमानः कथं विरज्येत दुरन्तमोहः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्रतत्र कृष्णं भजेदिति विवेकवत्त्वेऽपि भजनासामर्थ्यमाह—क इति । तस्मात् कौमारत एव भजने आरम्भणीयो भजन एवासक्ता स्युरपद्यमानयान्यत्रानासक्त्या भजनं सिद्ध्यति नान्यथेति भावः ॥ ९ ॥

द्रव्यासक्तेः प्राबल्यं दर्शयति—कोन्विति । योऽर्थः अर्थस्य प्राणेभ्योऽपिप्रियत्वमाह, यम् अर्थं प्राणैः क्रीणाति प्राणहानिमङ्गीकृत्यैव तस्करो द्रव्यार्थं रात्रौ धनिनां गृहं प्रविशति सेवको राजकीयो युद्धाभिमुखं चलति वणिक् समुद्रादि दुर्गगामी ॥ १० ॥

स्त्रीपुत्राद्यासक्तेः प्राबल्यं दर्शयति—कथमिति । प्रियायाः सङ्गादिकं स्मरन् कथं त्यजेदिति तृतीयेनान्वयः सख्यान् हितशिक्षालापान् मित्रां बन्धुः शिशूनाञ्च सङ्गं श्वशुरगृहे स्थिताः दुहितरः हृदयङ्गमाः वृत्तोर्जीविकाः कुल्याः कुलपरंपराप्राप्ताः ॥ ११ ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यतो हेतोः शरणाश्रितः जन्ममरणप्रवाहलक्षणं संसारं प्राप्तो बद्धजीवः कुशलो मुमुक्षुः सन् पौरुषं मानुषं शरीरं यावन्न विपद्येत यावच्च पुष्कलं तावत् क्षेमाय मुकुन्दचरणाम्बुजाय तत्प्राप्तय इत्यर्थः यतेत ॥ ५ ॥

कौमारे यो हि क्षेमाय न यतेत तस्याकुशलस्य तु मुकुन्दचरणांबुजप्राप्तिर्न घटेत इत्याह—पुंसइति द्वादशभिः ॥ ६ ॥

मुग्धस्य बाल्ये बालैः क्रीडतः कौमारे विद्याग्रहणादिना च क्रीडतः विंशतिवर्षाणि आयुर्याति ॥ ७ ॥

दुरापूरेण दुःखेनापि पूरयितुमशक्येन बलीयसा समं जीव जयर्कर्षा ॥ ८ ॥

गृहेष्वासक्तमात्मानं स्नेहपाशैर्बद्धं विमोचितुं क उत्सहेत न कोऽपीत्यर्थ कृपाभाजनं विनेत्यर्थः ॥ ९ ॥

योऽर्थः प्राणेभ्योऽपीप्सितः प्रियतमः यमर्थं तस्करः परगृह प्रवेशेन राजसेवको युद्धेन वणिक् दुर्गमदेशप्रवेशेन असुभिः प्राणैः क्रीणाति तस्यार्थस्य तृष्णां कोऽनु विसृजेत् ॥ १० ॥

प्रियायाः रहस्यं गोप्यं सङ्गं रुचिरान् मनोहरान् मन्त्रान् मधुरभाषणानि शिशूनाञ्च कलभाषिणां सङ्गं सुहृत्सु सङ्गं च स्मरन् स्नेहसितः प्रियादिस्नेहबद्धः प्रियाद्यनुरक्तचित्तश्च कथं त्यजेतेति तृतीयेनान्वयः ॥ १३ ॥

हृद्याः हृदयङ्गमाः ताः लोके प्रसिद्धस्नेहविषयाः मनोज्ञाः उरवः परिच्छदाः ये तु तान् कुल्याः पितृपितामहाद्यागताः पशूनां भृत्यानां च वर्गान् समूहान् ॥ १२ ॥

भाषा टीका ।

तस्मात् कुशल पुरुष संसार को प्राप्त होकर अपने परमक्षेम के लिये यत्नकरे जबतक कि यह अच्छा भला मनुष्य शरीर विपत्ति को न प्राप्त हो ॥ ५ ॥

देखो पुरुष की सौ वर्षकी आयु है तिसमें भी अजितात्मा पुरुष की अर्द्ध आयु निष्फल है क्योंकि ? वह अन्धतमको प्राप्त होकर रात्रि में सोता है ॥ ६ ॥

और बीस वर्ष भोले भाले की बाल और कौमार अवस्था में खेलने में जाती हैं। और बीस वर्ष जरा अवस्था से ग्रस्त देह वाले असामर्थ्य की व्यर्थ जाती हैं अर्थात् उस समय कुछ साधन नहीं बन सक्ता ॥ ७ ॥

शेष मध्य की जो आयु है वह दुष्पूर काम और बलवान मोह से गृह में आसक्त अत एव प्रमत्त पुरुष की व्यर्थ चली जाती है ॥ ८ ॥

अजितेन्द्रिय पुरुषों में ऐसा कोन होगा जो कि, गृह में आसक्त और दृढ स्नेह पाशों से बँधे हुए इस आत्मा को छुटाने का उत्साह करेगा ॥ ९ ॥

भला प्राणों से भी जो प्रिय इस तरह के द्रव्य की तृष्णा को कोन छोड सक्ता है, जिस द्रव्य को तस्कर चाकर और बणिक् अपने प्रिय प्राणों से कीनते हैं ॥ १० ॥

अनुकम्पित अपनी प्रिया के एकान्त सङ्ग को और सुहृल्लोगों के स्नेह से बँधा हुआ, छोटे २ बच्चों की मधुर वाणी से अनुरक्त चित्त, अपने हृदयंगम (बहुत ही प्रिय) लडके लडकी और भ्राता लोगों की याद कर २ तथा वीनतिकारे माता पिताओं की और नाना प्रकार के मनोहर उपकरण वाले घरों की तथा अपनी कुल परम्परा और उत्तम२ पशु, और नोकर चाकरों की याद कर२ के इन सबों को कोन छोड सक्ता है ॥ ११ ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कोशस्कृत् कोशस्कारी कीटः स यथा आत्मनो हितं गृहं कुर्वाणो निर्गमाय द्वारमपि नावशेषयति तथा कर्माणीहमानः तृप्तविवितृप्तकामोऽपि दोषदर्शनेन विरक्तः संस्त्यजेन्नत्याऽऽह—

कुटुम्बपोषाय वियन्निजायुर्न बुध्यतेऽर्थं विहतं प्रमत्तः ।
सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुम्बरामः ॥ १४ ॥
वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः ।
प्रेत्येह चाथाप्यजितेन्द्रियस्तदशान्तकामो हरते कुटुम्बी ॥ १५ ॥
विद्वानपीत्थं दनुजाः ! कुटुम्बं पुष्णन् स्वलोकाय न कल्पते वै ।
यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः ॥ १६ ॥
यतो न कश्चित् क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः ।
विमोचितुं* कामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः ॥ १७ ॥
ततो विदूरात्परिहृत्य दैत्याः ! दैत्येषु सङ्गं विषयात्मकेषु ।
उपेत नारायणमादिदेवं समुक्तसङ्गैरिषितोऽपवर्गः ॥ १८ ॥

न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ! ।
आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः ॥ १९ ॥
परावरेषु भूतेषु ब्रह्मान्तस्थावरादिषु ।
भौतिकेषु विकारेषु भूतेष्वथ महत्सु च ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

औपस्थ्यं शैश्न्यं जैह्व्यञ्च सुखं बहुमन्यमानस्ततोऽप्यधिकं मन्यमानः अतो दुरन्तो मोहो यस्य स कथं विरज्येत विरक्तः स्यात् ॥ १३ ॥

दुरन्तमोहत्वं दर्शयन्नाह, कुटुम्बपोषणाय वियत्क्षीयमाणं निजमायुः पुरुषार्थञ्च विहतं न बुध्यते अत एव तापत्रयेण दुःखितचित्तोऽपि न निर्विद्यते तत्र दुःखबुद्धिं न करोति यतः स्वकुटुम्बे रामो रतिर्यस्य ॥ १४ ॥

प्रत्युत चौर्यं करोतीत्याह—वित्तेष्विति । नित्यमभिनिविष्टं चेतो यस्य स परवित्तहर्तुः प्रेत्य नरकलक्षणमिह च वधदण्डादिरूपं दोषं यद्यपि विद्वान् जानन्नथाप्यशान्ताभिलाषस्तत्परवित्तं हरत्येव ॥ १५ ॥

तदेवं को गृहेषु पुमानित्यादि समभिः श्लोकैरुपपादितं गृहादिषु प्रसक्तस्य वैराग्याद्यसम्भवमुपसंहरति—विद्वानिति । स्वलोकायात्मपरामर्शाय न कल्पते किन्तु विमूढो यथा तथा विद्वानपि तमोऽभिनिवेशमेव प्रपद्यते. तत्र हेतुः, य इति. स्वीयमिदं पारक्यमिदमिति विभिन्नो भावो भावना यस्य सः ॥ १६ ॥

तस्मात्कौमार एव भागवतान्धर्मानाचरतेति सहेतुकमुपसंहरति—यत इति । यतः कश्चिदपि स्वमात्मानं मोचितुं न समर्थः स्यादतो नारायणमुपेत शरणं यातेत्युत्तरेणान्वयः । असामर्थ्ये हेतुः अलं दीनो लम्पटः अतः कामो दृशि यासां तासां विहारे क्रीडायां निमित्ते क्रीडामृगः, विहारेति पृथक्पाठे तासां विहारसाधनमात्मानम् यतस्तासां क्रीडामृगः स इत्यर्थः । किञ्च यस्यासु निगडः शृङ्खलातुल्यो विसर्गः पुत्रपौत्रादिरूपो भवति ॥ १७ ॥

विदूराद्दूरतः सङ्गं परिहृत्य यस्मात् अविदूराच्छीघ्रं नारायणमुपेतेत्यन्वयः यस्मात्स एवाऽपवर्ग इषित इष्टः ॥ १८ ॥

ननु, बालानामस्माकं तद्भजनमशक्यमिति चेत्तत्राऽऽह—नहीति । बह्वायासोऽतिप्रयासः ॥ १९ ॥

आत्मत्वात्सर्वत्र सिद्धत्वादिति च हेतुद्वयमुपपादयति—परावरेष्विति, चतुर्भिः । ब्रह्मा अन्तो येषां स्थावर आदिर्येषां तेषु भूतेषु भौतिकेष्वजीवेषु घटादिषु महत्सु च भूतेष्वाकाशादिषु ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथम्भूत. कोशकृदिव कोशकारी कीट इव कर्मणा बध्यमानो यथा कोशकृद्गृहं कोशात्मकं गृहं कुर्वन्नात्मनो निर्गमाय द्वारमपि नावशेषयति । तथा स्वबन्धकानि कर्माणि कुर्वाण इत्यर्थः । अवितृप्तः कामो यस्य तादृशः औपस्थ्यं जैह्व्यञ्च सुखं बह्वधिकं मन्यमानः अतो दुरन्तो मोहो यस्य ॥ १३ ॥

दुरन्तमोहं दर्शयन्विशिनष्टि—कुटुम्बपोषणाय वियत्क्षीयमाणां निजायुः परिच्छिन्नायुर्यस्य तादृशो विशेषेण हितमनुकूलमर्थं परमं पुरुषार्थं न वेद, विहतमिति पाठे, विहतमपि स्वामिप्रतमर्थं न वेद इत्यन्वयेन तानुसन्धानं सर्वत्र देशे काले च तापत्रयेण दुःखित आत्मा मनो यस्य तादृशो न निर्विद्यते संसृतौ हेयत्वबुद्धिं न करोति यतः स्वकुटुम्बे रामो रतिर्यस्य ॥ १४ ॥

*वामदृशामिति. पाठान्तरम्. [illegible] ज० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रत्युताकार्यं करोति इत्याह—निवेशितेति । पञ्चन्यायपहारिणो यां दोषः प्रेत्य मरणानन्तरं नरकलक्षणः इह च लोके दण्डरूपश्च तं विद्वान् जानन्नपि निवेशेषु नित्यमभिनिविष्टं चेतो यस्य सोऽजितेन्द्रियोऽशान्तकामः कुटुम्बी च सन् तत्परस्य वित्तं हरति ॥ १५ ॥

एवं कौ गृहेष्वित्यादिभिः सप्तभिः श्लोकैर्गृहादिष्वनुरागो दुस्त्यज इत्युक्तम्, अथ तत्त्यागस्यानर्थावहत्वमाह–विद्वानिति । हे दनुजाः ! इत्थं विद्वानपि उक्तविधं संसारं जानन्नपि कुटुम्बं पुष्णन् बिभ्रत् यः स्वलोकाय आत्मयाथात्म्यदर्शनाय न कल्पते न समर्थो भवति प्रकृतिपुरुषेश्वरयाथात्म्यावमर्शनपरो न भवति, किन्तु इदं स्वीयमिदं परकीयमित्येवं विभिन्नो भावो यस्य, सर्वेषां परमात्मशेषत्वमजानन्नित्यर्थः, यथावद् विमूढः स तमो नरकमेव प्रपद्येत, यद्वा तत्त्वविदपि कुटुम्बभरणासक्तो देहात्माभिमानस्वतन्त्रात्माभिमानयुक्तो मूढवन्नरकमेव प्रपद्यते, न मुक्तिम् किं पुनः केवलमूढ इत्याह–विद्वानपीति । विद्वानपि प्रकृतिपुरुषेश्वरयाथात्म्यविदपि यः पुनः स्वीयपरकीयविभिन्नभावः इत्थं कुटुम्बं पुष्णन्भवति सः स्वलोकाय परमपदप्राप्तये न कल्पते किन्तु नितरां मूढवत्तम एव प्रपद्येत विदुष एवेयं गतिः, किं पुनरविदुष इति भावः यथा विमूढ इति दृष्टान्तप्रदर्शनेऽपि कैमुत्यन्यायोऽत्रोत्यते ॥ १६ ॥

एवं गृहाद्यासक्तेर्दुस्त्यजत्वमनर्थावहत्वञ्चोक्तम्, अथोक्तमुपसंहरन् दुस्त्यजगृहाद्यनुरागस्यापनिमित्तमसत्सङ्गं परित्यज्य सत्सङ्गादिप्रसक्त्या भगवन्तमाश्रयेतेत्याह—यत इति । यतः कश्चिदपि पुमान् गृहाद्यभिनिविष्टश्चेदात्मानं कांचिदपि काले कुत्रचिदपि देशे मोचितुं मोचयितुमसमर्थस्तत इत्युत्तरेणान्वयः । असामर्थ्ये हेतुस्तमस्यर्थं दीनो विषयलंपटः वामा दृशो यासां तासां विहारे क्रीडामृगः क्रीडार्थं संवर्धितशाखामृगादितुल्यः, विहारेति पृथक्पदपाठे विहारस्थानमात्मानमित्यन्वयः । वामदृशां विहारक्रीडामृगत्वं विशिनष्टि, यदिति । यद्यस्माद्वामदृशां क्रीडामृगत्वात्तेन निगडरूपो विसर्गः संसारबन्धो भवति अयमिति वा छेदः यत् क्रीडामृग इत्येतदयमेव निगडरूपः संसार इत्यर्थः यदिति छेदपक्षे यच्छब्देन वामदृशां वा परामर्शः यत् यासु निगडः शृङ्खलरूपो विसर्गः पुत्रादिरूपः सर्ग इत्यर्थः । अविसर्ग इति वा छेदः यद्यस्मात्क्रीडामृगत्वादविसर्गः । अविमोक्यो निगडः शृङ्खलातुल्यः संसारबन्धो भवतीत्यर्थः ॥ १७ ॥

तत इति । ततः यतो गृहादिष्वासक्तः आत्मानं मोचितुमसमर्थस्ततो विषयेषु शब्दादिष्वेव आत्मा मनो येषां तेष्वसत्सु दैत्येषु सङ्गं दूरात्परित्यज्य आदिदेवं जगदुत्पत्त्यादिनिर्वाहकं सत्तजता दीप्यमानं नारायणं जीवानां प्राप्यं प्रापकमाश्रयभूतं भगवन्तम् उपेत तत्सङ्गादिप्रणाड्याश्रयत् प्रजेत सत्सङ्गश्च सत्सङ्गो: कण्ठोक्तिर्नास्ति तथापि तस्य सत्सङ्गस्यैव हेतोर्ज्ञातादरस्य सत्सङ्गेनैव सत्सम्प्राप्त्यास्वपक्तव्यैव तैः सत्सङ्गैः कृतवादसम्बाध तदनुक्तावपि सामर्थ्येनैव, एवं गृहाद्यासक्तस्य दुस्त्यजत्वं दोषावहत्वादिकथनेनैव तेषां वैराग्यमुदेष्यतीति वैराग्यमपि सहायदीनार्गमिति शब्दतो नोक्तं ...। ज्ञानोपदेष्टृत्वादाचार्यत्वेनावस्थितत्वाद्दुर्वाभिगमन-मपीहशब्दतः कर्तव्यत्वेननोक्तम्, किन्तु श्रीशप्रपदनमात्रमेव कुरुतेति शब्देनोक्तम् धर्मान्भागवतानिति भगवत्कर्मत्वेनाभिप्रेतं निष्फलत्वशङ्काव्युदासं व्यनक्ति–स इति । स उपेयो नारायणः अपवर्गं परमपुरुषार्थलक्षणापवर्गहेतुत्वेन मुक्तः सङ्गो देहतदनुबन्धिष्वेव नोपगमित इष्टः स एव मुक्तसङ्गानामिष्टोऽपवर्गः फलरूप इत्यर्थः ॥ १८ ॥

एतदेव प्रतिपादयितुं तावत्तत्समाश्रयणस्य दुःशकत्वशङ्कां निराकुर्वन्नाह–नहीति । हे असुरात्मजाः ! अच्युतं सकृदाश्रयणादेव नापि भ्रष्टान् रक्षयतीति अच्युतः तं प्रीणतः पुंसो बहुतरायासो न हि विद्यते देशकालान्तरप्रतियोगिकप्रत्यवायनिवृत्त्यादिसाधनाऽनुष्ठानवदुगमनायुत्पादककर्मानुष्ठाने नायासो विद्यते इत्यर्थः अनायासे हेतुः आत्मत्वादिति सर्वभूतानामात्मत्वात्सर्वतः सिद्धत्वात्सुलभत्वात्सर्वत्र इति "सार्वविभक्तिकस्तसिः" षष्ठ्यर्थः । इह लोके सर्वतः सर्वेषां देवासुरादिस्त्रीपुंसवर्णाश्रमादिविभागमन्तरेण सर्वेषां सिद्धत्वादित्यर्थः अयमभिप्रायः, न हि सुलभस्य तृणलोष्टादेरन्वेषणाय विदूरगमनादिरूपः प्रयासोऽपेक्षितः सर्वत्र सर्वेषां सुलभत्वादेवं सर्वेषामात्मत्वेन सर्वत्र सुलभस्य प्रीणनेनातीवायास इति, यद्वा, सिद्धत्वादित्यस्य स्वर्गादिवत्र साध्यः पुरुषार्थः अपितु सिद्धरूप साध्यपुरुषार्थसाधने हि यागाद्यनुष्ठानरूपप्रयासबाहुल्यम्. सिद्धस्यतु तल्लाभोपयुक्तप्रीणनोपायतत्समाश्रयणमात्रमपेक्षितमित्यर्थ यद्वा, आत्मत्वादित्यनायासे पृथग्घेतुः आत्मा हि स्वशरीरे निरतिशयप्रीतियुक्तस्तद्वत्पाणीश्च लोके दृष्टः एवं सर्वेषां जीवानां परमात्मानं प्रतिशरीरत्वात्तद्विषयकप्रीतेस्तस्य स्वतसिद्धाया अपि विपुलापराधैरनभिव्यक्तायास्तदभिव्यक्त्यावहं किञ्चिदानुकूल्यादिकमात्रमपेक्षितमिति भावः । सिद्धत्वादिति तत्र वाच्यो हेतुः, न हि सिद्धस्य हिरण्यनिधेस्तत्परिज्ञानमन्तरेण तल्लाभोपयुक्तोऽन्यः प्रयासोऽपेक्षितः एवं परमात्मनोऽपि निरतिशयपुरुषार्थरूपस्य हृदये सिद्धस्य तल्लाभोपयुक्तस्वात्मस्वशेषत्वादिज्ञानपूर्वकतत्समाश्रयणमात्रेण तस्य समाश्रितविषयकप्रीतिरुदेष्यतीति नातीवायासो विद्यते इत्यर्थः ॥ १९ ॥

"आत्मत्वात्सर्वभूतानाम्" इत्येतदेव प्रपञ्चयति—परावरेष्विति चतुर्भिः । ब्रह्मा चतुर्मुखोऽन्तो येषां स्थावरा आदिर्येषां तेषु परावरेषूच्चावचेषु भूतेषु चराचरात्मकदेहभाक्षु चेतनेष्वित्यर्थः तथा भौतिकेषु पृथिव्यादिभूतपरिणामरूपेष्वचेतनेषु घटपटादिषु महत्सु पृथिव्यादिमहाभूतेषु ॥ २० ॥

— ——

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कोशकृत् कोशकारी कीटः, एतदेव स्पष्टयति–औपस्थ्यमिति ॥ १३ ॥

यदिति स्पृहं निजमात्मीयमायुर्यस्य स तथा शास्त्रविहितमर्थं अपवर्गलक्षणं न बुध्यते स्वकुटुम्बे भार्यादौ रामः क्रीडा यस्य स तथा न निर्विद्यते विरक्तो न भवति ॥ १४ ॥

परवित्तहर्तुश्चोरादेरिह देहात्प्रेत्य यत्पूर्वमार्जितम्

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथाप्यनन्तरमपि तथा तदेव दुष्कर्म हरते नवनीत्यन्वयः परलोकेऽपि विषयेष्वलं बुद्धिर्नास्तीति भावः ॥ १५ ॥

अनुक्तविशेषप्रदर्शनाय कथितमेवार्थं विशिनष्टि—विद्वानिति । स्वलोकाय स्वफलभूतमोक्षाय स्वयोग्यज्ञानाय वा तत्र हेतुमाह—यदिति. न केवलं मोक्षाय कल्पत इति. प्रत्युतानर्थं चाप्नोति, यत इति । विमूढो विपरीतज्ञानी यथा तमः प्रतिपद्यते तथाऽयमित्यन्वयः ॥ १६ ॥

श्रीनारायणानुग्रहमन्तरेण विद्वत्ताद्यकिञ्चित्करमित्याह—यत इति । शास्त्रगुरूपदेशेन विद्वान् संसारव्यानित्यतामिति शेषः दीनं स्वात्मानं विमोचितुमलं समर्थो नेति यतोऽत इति शेषः यदि जीवराशौ कश्चिदकर्त्रीत्याभिमानस्तर्हि कुत्र कस्मिन्काले न कस्मिन्निदित्यर्थः । कुतोऽत्राह—वामदृशामिति. अयं पुरुषो वामदृशां विहारार्थं निर्मितक्रीडामृगवदिति यत्कथमयं तथाभूदिति तत्राह—निगड इति. आसामाक्षिसर्गः कटाक्षमोक्षो यस्य निगडः शृङ्खलायितः तस्मात्स इति शेषः ॥ १७ ॥

एतावन्तं दैत्यान् कटाक्षीकृत्योक्तं प्रकटयन्नभिमतार्थमाह तत इति । नन्वेवं तर्हि संसारमोक्षस्य दौर्घट्यतापादितमिति शंका माभूत् यतोऽर्थितास्ति तद्गुणायं वदामीत्यतो वाह—तत इति । यतो धर्मार्थकामैर्ब्रह्मापेक्षाधुर्यार्थाकल्पनागर्हितैः संसारमोक्षो न सेत्स्यति ततो दैत्येषु सङ्गं दूरात्परिहृत्य नारायणं शरणमुपेत, यातेत्यन्वयः । सोऽपवर्गो मुक्तसङ्गैः पुरुषैरीप्सितः प्राप्तो भवति “इषुगतौ” इतिधातोः ॥ १८ ॥

नेदं दुःसाध्यमित्याह—न हीति । सर्वभूतानामात्मत्वात्तत्प्रेष्टत्वात्सर्वत्र व्याप्तत्वेन सुलभत्वाच्च ॥ १९ ॥

नारायणस्य सेव्यत्वे हेतुगर्भविशेषणमाह, परावरेष्विति ॥ २० ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कोशस्कृत् कोशकीटः स यथा गृहं कुर्वन्नात्मनो निर्गमाय द्वारमपश्यन् म्रियते तथैव कर्माणि ईहमानः सोपद्रवं सुखं जेतव्यञ्च सुखम् ॥ १३ ॥

क्षियत् क्षीयमाणं निजमायुः पुरुषार्थञ्च हतं न बुध्यते घटिकामात्रस्याप्यपव्ययन्तु बुध्यत एवेति भावः । तदपि तस्मान्निर्विद्यते ॥ १४ ॥

प्रेत्य नरकलक्षणम् इह च राजदण्डादिरूपं दोषं यद्यपि विद्वान् तदपि तानि वित्तानि हरते ॥ १५ ॥

विद्वानपि शास्त्रज्ञोऽपि स्वलोकाय कोऽहं किं करोमीति स्वमवलोकयितुमित्यर्थः । यथा विमूढस्तथैव हे दनुजाः ! ॥ १६ ॥

यतः कुटुम्बात् क्वापि देशे कुत्रचिदपि काले समर्थे शास्त्रज्ञानादिमानपि कश्चिदपि आत्मानं स्वीयं वा विमोचयितुम् अलं न शक्नोति. विहारमिति पाठे आत्मानमित्यस्य विशेषणं समासपाठे कर्तृविशेषणं याः कामदृशा एव निगडो यत्र तथाविधः सर्गो जन्म भवेत् अपवर्गः संसारबन्धविमोचकः ईप्सित इष्टः ॥ १७ ॥ १८ ॥

प्रीणयतः परिचर्यया प्रीणयितुं न बहुायासः, यथा कुटुम्बं प्रीणयन इति भावः । न च तस्यान्वेषणे श्रमः आत्मत्वात् हृदयेव वर्त्तमानत्वात् न च तत्प्रीणनेऽपि श्रमः सर्वतः सर्वैरपि प्रकारैर्मानसैरप्युपचारैस्तत्प्रीणनस्य सिद्धत्वात्तथा अच्युतं प्रीणयामीति सङ्कल्पमात्रेणापि प्रीतेः सिद्धत्वात् अनर्पणकाले तेनाप्यन्यतमेनापि वा सिद्धत्वात् ॥ १९ ॥

न केवलं सत्त्वहृदय एव वर्त्तमानः परिचरणीयः अपितु सर्वत्रैव वर्त्तमानः सर्वसमानेनैव सन्तोषणीय इत्युपबृंह्य तस्य सार्वत्रिकीं सार्वकालिकीञ्च सत्तामाह, द्वाभ्याम्. परावरेषु उत्कृष्टनिकृष्टेषु भूतेषु ब्रह्मा अन्तो येषां स्थावर आदि येषां तेषु भौतिकेष्वजीवेषु घटादिषु च महत्सु भूतेष्वाकाशादिषु गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्त्वादौ परः भूतादिभ्यः प्राकृतेभ्यः प्रकृतेश्च सकाशादप्य एकः परं ब्रह्मेति आत्मा परमात्मेति भगवानिति शब्दत्रयवाच्य ईश्वर ईयत इत्युत्तरेणान्वयः । कीदृशः ? अव्ययः सर्वेष्वपि कालेष्वनश्वरः ॥ २० ॥ २१ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दुरन्तो दुष्पारो मोहो यस्मात् परोपकल्पजेतव्यं सुखं बहु अधिकं मन्यमानः नेष्वप्यवितृप्तकामः असमाप्तवासनः अत एव कोशस्कृत् कीटविशेषो यथा स्वबन्धनाय कोशं करोति तद्वत्स्वबन्धनाय कर्माणीहमानः कथं विरज्येत पुत्रादिषु विरागं कुर्यात् तान् विरागाभावात्कथं त्यजेत ॥ १३ ॥

कुटुम्बपोषाय निजायुर्वियत् क्षिपयन् प्रमत्तो विहतमर्थं न बुध्यते सर्वत्र तापत्रयेण दुःखित आत्मा यस्य स कुटुम्ब एव रामः रमणस्थानं यस्य सः न निर्विद्यते ॥ १४ ॥

परवित्तहर्तुः प्रेत्येह च दोषं विद्वान् जानन्नपि हरते परवित्तमिति शेषः । यतो वित्तेषु नित्याभिनिविष्टं चेतो यस्य सः तत्र हेतुरविजितेन्द्रिय इति तत्रापि हेतुः आशान्तकामः प्रवृत्तव्यापनः ॥ १५ ॥

यो विद्वान् सोऽपि इत्थं पूर्वोक्तानिमुष्टवत् स्वकुटुम्बं पुष्णन् स्वीयपारक्यविभागमात्रमेतत् इदं स्वमिदं पारक्यमित्येव विभिन्ना नितान्तिशतो भावः सर्वात्मकत्वाद्बुद्धेरसज्जनं येन सः स्वलोकाय निजस्वाप्यलोकाय न कल्पते योग्यो न भवति किन्तु यथा विमूढस्तथा तमः संसारं प्रपद्येत प्राप्नुयादित्यर्थः ॥ १६ ॥

यतः कश्चिदपि क्व कापि कुत्रचिदपि काले आत्मानं विमोचितुं समर्थो न भवति ततो दैत्येषु सङ्गं परिहृत्य नारायणमुपेतेत्युत्तरेणान्वयः असामर्थ्ये हेतुः अलमर्थं दीनः अनादिमायाभिभूतः अत एव कथं हेतु यासां तासां विहारे क्रीडामृगः विनोदप्रदः यत् यासां विसर्गः पुत्रादिरूपो विविधः सर्गो निगडो बन्धनम् ॥ १७ ॥

नारायणमुपेत शरणं यात स मुक्तसङ्गैः त्यक्तसर्वसङ्गैः परमहंसैरीप्सितः यतोऽपवर्गः मुक्तप्रदः ॥ १८ ॥

गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा ।
एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः ॥ २१ ॥
प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम् ।
व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ॥ २२ ॥
केवलानुभवानन्दस्वरूपः परमेश्वरः ।
माययान्तर्हितैश्वर्य ईयते गुणसर्गया ॥ २३ ॥
तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदम् ।
आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः ॥ २४ ॥
तुष्टे च तत्र किमलभ्यमनन्त आद्ये किन्तैर्गुणव्यतिकरादिह ये स्वसिद्धाः ।
धर्मादयः किमगुणेन च कांक्षितेन सारञ्जुषां चरणयोरुपगायतां नः ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अच्युतस्य सर्वेषां भूतानां चेतनाचेतनानामात्मत्वान्मूलत्वात् सर्वतः धारकत्वनियन्तृत्वादितः इह जगति सिद्धत्वाभिव्यक्तत्वात् हेतोः अच्युतं प्रीणयतोऽयत्नाद्यासो नहि ॥ १९ ॥

सर्वमूलत्वं सर्वत्र सिद्धत्वञ्चाह-परावरेष्विति द्वाभ्याम् । भूतेषु चेतनाचेतनरूपेषु अस्तीति शेषः ॥ २० ॥

भाषा टीका ।

कोश कर कीड़े के सदृश चेष्टा करने वाला नाना प्रकार के कर्मों को करता हुआ कामनाओं से तृप्त नहीं होकर दुरन्त मोहवाला इन्द्रियोंको बहुत मानने वाले कैसे वैराग्य को प्राप्त हो सक्ता है ॥ १३ ॥

कुटुम्ब पोषण मे क्षीण होरहा जो आयु उसको और नष्ट हुए भये पुरुषार्थ को यह प्रमत्त नहीं जानता है सर्वत्र तापत्रय से दुःखित होकर भी उस दुःख को दुःख नही मानता है, क्योंकि ? अपने कुटुम्ब में रागवाला है ॥ १४ ॥

द्रव्य के विषै नित्य ही प्रविष्ट चित्त वाला होकर पराये के द्रव्य हरने में पर लोक और इस लोक में जो नरक और दण्डादि दोष है उसको जानता भी है तो भी अजितेन्द्रिय अशान्त काम यह कुटुम्बी चोरी करता ही है ॥ १५ ॥

हे दनुजो ! ऐसे जानता हुआ भी कुटुम्ब पोषण करता हुआ आत्म विचार करने को समर्थ नहीं होता और अपने पराये पदार्थ में भिन्न भावना वाला होकर जैसे मूढ नरक को प्राप्त होता है तैसे ही जानता हुआ भी ॥ १६ ॥

जिसकारण कहीं भी कोई भी अपने आत्माको इस संसारसे छुड़ाने को समर्थ नही क्योंकि ? विचारा दीन स्त्रियोंके विहार करने का क्रीड़ा मृग हो रहा है जिन स्त्रियों पुत्रपौत्रादि रूप पादका बन्धन होता है ॥ १७ ॥

हे दैत्य हो ! तस्मात् विषयात्मक दैत्यों के सङ्गको दूरसे परित्याग करके आदिदेव श्रीनारायणके शरण जाओ क्योंकि ? वही मुक्तसङ्ग मुनिलोगों का इष्ट है ॥ १८ ॥

हे असुरात्मजहो ! नारायणको प्रसन्न करने में बहुत परिश्रम नहीं है क्योंकि ? वह सर्व प्राणिओं के आत्मा है और सर्व सिद्ध है ॥ १९ ॥

परा वर स्थावरों से लेकर ब्रह्मापर्यन्त प्राणिओं में तथा पञ्चभूतों के विकार घटपटादिक और पञ्च महाभूतो में । गुणों में प्रकृति में और महत्तत्वादिकमें एकही ईश्वर अव्यय परमात्मा भगवान श्रीमन्नारायण विराजते हैं ॥ २० ॥ २१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्त्वादौ च परो ब्रह्मस्वरूपः ॥ २१ ॥

कथं तर्हि द्रष्टृदृश्यभोक्तृभोग्यादिभेदः ? माययेत्याह, प्रत्यगात्मा द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया निर्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण च व्याप्यतया निर्देश्यो मायया ईयत इत्युत्तरेणान्वयः वस्तुतस्तु स्वयमविकल्पितोऽनिर्देश्योऽपि सन् यद्वा अनिर्देश्योऽप्येवंनिर्देश्यः सन् विकल्पित ईयत इत्यन्वयः ॥ २२ ॥

यतः केवलोऽनुभवात्मक आनन्द एव स्वरूपं यस्य. ननु, स एवचेत्सर्वत्र तर्हि सर्वत्र सर्वज्ञत्वाद्युपलभ्येत तत्राऽऽह, गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया माययाऽन्तर्हितमैश्वर्यं येन सः ॥ २३ ॥

यस्मादेवं तस्मात्सर्वेषु भूतेषु यथोचितं दयां सौहृदञ्च कुरुत यया दयया उन्मुच्य सन्त्यज्य ॥ २४ ॥

धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्ता ।
मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥ २६ ॥
ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय ।
एकान्तिनां भगवतस्तदकिञ्चनानां पादारविन्दरजसाऽऽप्लुतदेहिनां स्यात् ॥ २७ ॥
श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम् ।
धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः किमत आह, तुष्टे च तत्र तस्मिन्किमलभ्यम् तथाऽपि गुणपरिणामादैवादेव स्वसिद्धा अयत्नतः सिद्धा धर्मादयस्तैः किम् अगुणेन च मोक्षेण काङ्क्षितेन किं तमनुपगायतामस्माकम्-काङ्क्षितस्यापि तस्य सिद्धेः यद्वा माभून्मोक्षस्तस्य चरणयोः सारं जुषां सुधां सेवमानानां तेनापि किमित्यर्थः ॥ २५ ॥

ननु, च धर्मादिपुरुषार्थत्वे किमित्याचार्याभ्यां वेदोक्तत्वेन सत्यत्वाभिहितस्तत्राऽऽह, धर्मोऽर्थः कामश्चेति यस्त्रिवर्गस्तदर्थं च य ईक्षाद्या अभिहिताः ईक्षा आत्मविद्या त्रयी कर्मविद्या नयदमौ तर्कदण्डनीतिश्च द्विविधा च वार्ता जीविका तदेतत्सर्वं निगमस्यार्थजातं स्वसुहृदः स्वान्तर्यामिणः परमस्य पुंसः स्वात्मार्पणसाधनं चेत्तर्हि सर्वं सत्यं मन्ये सत्यपरत्वात् अन्यथा तदसत्यमेव यद्वा तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यं पुनर्निस्त्रैगुण्यलक्षणं परमस्य पुंसः स्वात्मार्पणमेवेत्यर्थः । तदुक्तं भगवता "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन!" इति ॥ २६ ॥

तेषां पुनर्विश्वासार्थं गुरुसम्प्रदायमाह-ज्ञानमिति । यत्र नारदः श्रोता तत्र कुतो मादृशानामधिकार इति माशङ्कीत्याह-भगवत एकान्तभक्तानां यत्पादरजस्तेनाऽऽप्लुतानां जातानां देहिनां सर्वेषामपि तज्ज्ञानं स्यान्न तूत्तमानामेवेति नियमः ॥ २७ ॥

अत एव मयापि पूर्वं नारदादुक्तं विज्ञानसहितमनुभवपर्यन्तं ज्ञानं धर्मं च श्रुतम् ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गुणेषु सत्त्वादिषु गुणानां सत्त्वादीनां साम्यं यस्मिंस्तस्मिन् प्रधाने मूलप्रकृतावित्यर्थः । गुणव्यतिकरे गुणवैषम्यवति महदहङ्कारादौ चेत्यर्थः ॥ २१ ॥

प्रत्यगात्मस्वरूपेण प्रत्यगात्मा जीवः स्वं स्वासाधारणं रूपं शरीरं यस्य तेन प्रत्यगात्मशरीरकत्वेनेत्यर्थः । दृश्यमचेतनं रूपं यस्य तेन अचेतनशरीरकत्वेन चेत्यर्थः । एकः स्वसमानरहित एव पर आत्मा परमात्मा अन्तः प्रविश्य भर्ता अव्ययः अपृथक्शरीरगतविकारः निरस्तनिखिलदोषः षाड्गुण्यपरिपूर्णः ईश्वरो जीवकर्मानुगुणं नियन्ता व्याप्यव्यापकनिर्देश्यः व्याप्येषु व्यापकतया निर्देश्यः अविकल्पितः जातिगुणादिरहितः ॥ केवलोऽनुभवः दुःखप्रतिभटं ज्ञानम् आनन्दरूपं तदेव स्वरूपं यस्य सः परमेश्वरः स्वव्यतिरिक्तेश्वरान्तररहितः गुणसर्गया संसारिणां मोहादिगुणान् सृजतीति तया मायया अन्तर्हितैश्वर्यः संसारिणामप्रकाशमानमहिमा ईयते गम्यते सदाचार्योपदेशेन ज्ञायत इत्यर्थः । उक्तविधतत्त्वयाथात्म्यज्ञानपूर्वकं तत्समाश्रयणमात्रमेव तत्प्राप्तिनिमित्ततत्प्रीतिहेतुरुपाय इति भावः । अत्र अविकल्पितः' 'केवलानुभवानन्दस्वरूपः' इति पदद्वयेन "अस्थूलमनण्वह्रस्वम्" 'सत्यं ज्ञानमनन्तम्' 'विज्ञानमानन्दम्" इति श्रुत्यर्थप्रत्यभिज्ञापनेन प्राप्यं ब्रह्मस्वरूपमुक्तम् अर्थाद्गुणैरेक एवेत्यादिभिः प्रथमान्तपदैः 'प्रत्यगात्मस्वरूपेण' दृश्यरूपेणाचेति पदद्वयेन च प्राप्यस्य गुणा उक्ताः, "परावरेषु भूतेषु प्रत्यगात्मस्वरूपेण" इत्यनेन जीवस्य तदंशत्वापरपर्यायतच्छरीरत्वकथनेन प्राप्तृस्वरूपमुक्तम् "गुणसर्गया माययाऽन्तर्हितैश्वर्यः" इत्यनेनाऽज्ञानात्मकत्वस्वमन्यात्मत्वादिरूपमोहादिप्राकृतगुणगण एव प्राप्तिविरोधीति कथनेन विरोधिस्वरूपमप्युक्तम्. तत्प्राप्तिफलन्तु तच्चरणकैङ्कर्यादिरूपं "सारं जुषां चरणयोः" इति वक्ष्यति. एवमर्थपञ्चकमुपादेयं भवति पूर्वम् "उपेतनारायणम्" इति तत्समाश्रयणं कर्तव्यत्वेन विहितं तस्य दुष्करत्वशङ्कापरिहारप्रसङ्गात्समाश्रयणोपयुक्तार्थपञ्चकज्ञानं सदाचार्योपदेशात्स्यादित्युक्तम्. एतमर्थपञ्चकज्ञानपूर्वकतत्समाश्रयणमात्रमेव तत्प्रसादजननद्वारा तत्प्राप्तिहेतुरित्यभिप्रेतम्, तत्समाश्रयणञ्च तद्भक्तिप्रपत्त्यन्यतरात्मकमधिकारभेदेन व्यवस्थितमिति तात्पर्यम् ॥२२॥२३॥

यदुक्तं "न ह्यच्युतं प्रीणयतो बह्वायासः" इति तदुपसंहरन् तत्प्रीतिनिमित्ततत्सन्तोषजनकं कृत्यन्तरमाह-तस्मादिति । यस्मात् सर्वान्तरात्मत्वादिप्राप्यब्रह्मस्वरूपादिज्ञानपूर्वकतत्समाश्रयणमात्रमेव तत्प्राप्त्युपायतत्प्रीतिजनकम् अतो यूयं सर्वे आसुरं भावं भूतद्रोहबुद्ध्यादिरूपम् उन्मुच्य समूलं त्यक्त्वा परमात्मशरीरेषु सर्वेषु भूतेषु ब्रह्मादिस्तम्बपर्यन्तेषु यथोचितं दयां सौहृदञ्च कुरुत ययादयया अधोक्षजो भगवांस्तुष्यति तादृशीं भूतेषु दयां कुरुतेत्यर्थः ॥ २४ ॥

तुष्यत्यधोक्षजः ततः किमत आह—तुष्ट इति । तस्मिन्नाद्ये जगत्कारणभूते अनन्ते भगवति तुष्टे सति अलभ्यं किम् ? न किमपि सर्वं तस्मिन् तुष्टे सति अभिलषितं सुलभमेवेत्यर्थः । यद्यपि सुलभं तथापि निरतिशयपुरुषार्थरूपतच्चरणारविन्दानुभवरूपममृतमनुभवद्भिः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मारशेषधर्मैश्वर्यकामकैवल्यादिकममृतं पिबद्भिरूषरोदकमिव नेष्यते इत्यभि प्रयन्नाह-किमिति । नोऽस्माकं गुणव्यतिकरात् कर्मानुगुणसत्त्वादिगुणपरिणामादेव आसिद्धा अयत्नतःसिद्धाः ये धर्मादयः धर्मार्थकामाः तैर्धर्मार्थकामैः किं, न किमपि प्रयोजनमित्यर्थः । काङ्क्षितेनाभिलषितेन अगुणेन गुणत्रयरहितेन कैवल्येन मोक्षेण वा किं सोऽपि न पुरुषार्थ इत्यर्थः । न कथम्भूतानां भगवच्चरणयोः सारमनुभवात्मकममृतसारं जुषतां सेवमानानाम् उपगायतां तद्गुणान् स्तुवतां मनसा तच्चरणारविन्दाऽनुभवामृतम् अनुभवतां वाकूचित्ताभ्यां तद्गुणानुभवामृतञ्चानुभवतामस्माकं धर्मादय ऊषरोदकप्राया इत्यर्थः ॥ २५ ॥

ननु, त्वदुक्तमेतत्सर्वं जानन्तोऽप्यस्मद्गुरवस्त्रिवर्गमेव पुरुषार्थत्वेनोपदिदिशुः त्वन्तु त्रिवर्गमनादृत्य भगवच्चरणारविन्दाश्रयणमेव सारतमं मन्यसे किञ्च गुरुभिरनुशिष्टानाम्आन्वीक्षिक्यादिविद्यास्वेव न त्वदुक्तधर्मः कर्तव्यत्वेनोपलक्ष्यते अतः किं तद्धर्मप्रमापकं तत्राह—धर्मेति धर्मादीनां समाहारद्वन्द्वः पुंस्त्वमार्षम् धर्मोऽर्थः कामश्चेति यस्त्रिवर्गो विहितःअस्मदाचार्यैर्भार्गवादिभिरिति शेषः । यस्त्रिवर्गः पुरुषार्थत्वेनाचार्यैरुक्त इत्यर्थः । यच्च तत्प्रतिपादिकेत्यादिरूपा विद्या च तदेतत्सर्वमहं मन्ये तत्रेक्षा आन्वीक्षिकी संज्ञा तर्कविद्या, त्रयी वेदपूर्वभागः नयदमौ दण्डनीतिप्रतिपादकं शास्त्रं, विविधा वार्ता कृष्याद्याजीविकाज्ञानजनकं शास्त्रम्,एतत्सर्वमहं मन्ये जानाम्येव, किन्तु यत्स्वसुहृदः परमस्य पुंसो निरुपाधिकसुहृदे, परमपुरुषायेत्यर्थः । सम्प्रदानस्यैव शेषत्वविवक्षया षष्ठी. स्वात्मार्पणं भगवति स्वात्मसमर्पणं तदेतन्निगमस्य वेदोत्तरभागस्य, प्रमेयमिति शेषः । उपनिषद्भागस्य प्रतिपाद्यं सत्यं नित्यम् परमपुरुषार्थसाधनं, मन्य इत्यर्थः । अस्मद्गुरुभिः ज्ञातमप्यहं जानामि नित्यनिरतिशयपुरुषार्थसाधनं भगवत्स्वात्मसमर्पणं वेदान्तप्रतिपाद्यं स्वाधिकारं जानामीत्यर्थः । गुरवस्तु तैनज्ञानन्तीत्यभिप्रायः आपाततो जानन्तो वा भगवदनुग्रहाभावान्नानुष्ठानोपयोगितया निस्संशयं जानन्तीति तात्पर्यं निगमस्येत्यनेनाऽस्मदुक्तार्थे वेदान्तभागः प्रमाणमित्युक्तम् । स च "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इत्यादिरूपः स्वात्मार्पणमित्यनेन चोपनिषद्गायत्र्यां हरिसाश्रयणेनैतदुक्तमाश्रयणमात्मसमर्पणरूपमिति विवृतम्. भगवति स्वात्मसमर्पणं नाम स्वात्मनो भगवच्छेषतैकस्वभावत्वानुसन्धानपूर्वकं भगवति स्वात्मरक्षाभरसमर्पणरूपम् एवं नारायणोपासनं नाम तच्छरणागतिरित्युक्तम्भवति. समनन्तराध्याये तदुपायनस्य तच्छ्रवणानन्तरं वक्ष्यति एवञ्च स्वाधिकारं भक्तिप्रपत्त्यन्यतरात्मकं भगवत्समाश्रयणं कर्तव्यमिति तात्पर्यम् ॥ २६ ॥

ननु, गुरुभिरज्ञातमिदमन्तरेणापि सदुपदेशेन कथं त्वं ज्ञातवानित्याशङ्कायां भगवतो नारदस्यानुग्रहादेवेति वक्तुं तस्य साम्प्रदायिकत्वमाह-ज्ञानमिति । तदेतद्दुरत्ययं दुर्लभं ज्ञानं नरस्य सखा भगवान्नारायणः बदरिकाश्रमवासी नारदायाह उपदिष्टवान्. ननु, यत्र नारदः श्रोता नारायणो वक्ता तस्मिन्मादृशानां कथमधिकार इति शङ्कां निराह, एकान्तिनामिति एकान्तिना भक्तिमतामनन्यप्रयोजनानां भगवतः पादारविन्दरजसा आप्लुतानां स्नातानां देहिनां भगवत्सेवासक्तानां सर्वेषामपि तज्ज्ञानं स्यादेव मादृशानामपीति नियमः ॥ २७ ॥

अत एव मयापि नारदाच्छ्रुतमित्याह—श्रुतमिति. विज्ञानेन विवेकादिजन्येन संयुतं ज्ञानं शास्त्रोत्थं विशुद्धं भागवतधर्मरूपं भगवद्याथात्म्यवेदिनो नारदाच्छ्रुतं श्रवणेन ज्ञातं भगवतो नारदस्य वचसां श्रवणान्मम ज्ञानविज्ञानसम्पत्तिरभूदित्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुणसाम्ये प्रलये गुणव्यतिकरे सृष्टौ ॥ २१ ॥

व्याप्तिप्रकारमाह—प्रत्यगात्मेति । सर्वपदार्थानामन्तः प्रत्यगात्मस्वरूपेणान्तर्यामिरूपेण बहिः कालरूपेण व्याप्तेन ब्रह्मादिपर्वपर्यन्तेन एवमेक एव व्याप्यव्यापकनिर्देश्यो विकल्पितो विविधकल्पतः "अन्तर्यामी प्रत्यगात्मा व्याप्तः कालो हरिः स्मृतः" इति वाक्यसिद्धोऽयमर्थः घट इव निर्देश्यो नेत्यनिर्देश्यरूपः ॥ २२ ॥

"अचिन्त्यमव्यपदेशमैकात्म्यप्रत्ययसारम्,, इति श्रुतिनिरूपित इत्याह—केवलेति । सर्वत्र भिन्नश्चेत्किमिति न दृश्यत इति तत्राह—माययेति. मायया प्रकृत्या "तमसा गूढमग्रे" इति श्रुतेः । सत्त्वादिगुणैः सर्गसृष्टिर्यस्याः सा तथा तया ॥ २३ ॥

अतः सर्वभूतानि भगवन्निवासस्थानानि तस्मात्तथाभूतद्रव्यमासुरं भावं द्वेषं "विष्णोर्गृहत्वाद्भूतेषु दया कार्या विजानता" इति स्मृतेः प्रजुषन्तोऽस्यसूयका इति ॥ २४ ॥

भगवत्तुष्ट्या किं प्रयोजनमिति तत्राह—तुष इति । ये मनुष्याः जन्मप्रभृतिप्राप्तैर्गुणव्यतिकरैर्विषयसुखैरीश्वरचरणाम्बुजसारं जुषां गुणलक्षणमकरन्दं सेवमानानां तद्गुणांश्चोपगायतां गायमानानां नोऽस्माकं काङ्क्षितेनागुणगान्वितेनाऽऽकृतेन मोक्षेण किं अपकर्मादिक्षयमुक्तैर्भक्तैः परमानन्दस्वरूपत्वात्तत्रापि सुखाधिक्यहेतुत्वात्सुतरां धर्मादिभिः सुलभां गुणव्यतिकरैः फलं नास्तीति किमु वक्तव्यम्. मोक्षं सुखमनाकाङ्क्षमाणस्य यथा सुखाधिकं भवति यथा मोक्षगमं दुःखं काङ्क्षमाणस्य सुखं पूर्णं न लभ्यत इत्यभिप्रायेण काङ्क्षितेनेति विशेषणम् "काङ्क्षतो मोक्षमपि सुखमाकाङ्क्षतो यथा" इति वचनात् ॥ २५ ॥

ननु, शास्त्रविहितानां धर्मादीनां कथङ्कारं साफल्यं भवतीत्याशङ्का परिहरन्नाह—धर्मेति । धर्मार्थकाम इति नामभिर्यस्त्रिवर्गः शास्त्रे विहितस्तस्येक्षा ज्ञानमनुष्ठानं च या त्रयी त्रयं वेदाख्येषां शास्त्रार्थतश्च ज्ञानं यौ नयदमौ नीतिदण्डशास्त्रे तयोरीक्षा तात्पर्यज्ञानं या च विविधा वार्ता कृषिवाणिज्यादिलक्षणा तदीक्षा प्रयोगज्ञानं वा "ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वश्चतुर्थः" इत्यारभ्य "सर्पदेवजनं विद्या" इत्यनेन यदुक्तं तस्य सर्वस्यानुकर्षणार्थश्चकारः यदेतदुक्तं तदेतदखिलं परमपुरुषस्य स्वात्मपूर्वकसमर्पणमर्पितुमुद्दिष्टं भवति. तर्हि निगमस्य ऋग्वेदादिसकलशाखापठितस्य सत्यं यथार्थफलमिति मन्ये इत्यन्वयः ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नेदं स्वमनीषोत्थं किन्तु सम्प्रदायतः प्राप्तत्वाच्छ्रद्धेयमित्याह, ज्ञानमिति । नरसखोऽनन्तसखः अनेन विशेषणेन सनकादिभ्य उपदिष्टमिदमिति ज्ञापितम्. किल शब्देन पुरातनत्वेन प्राशस्त्यं दर्शयति ज्ञानाधिकारिणमाह, एकान्तिनामिति ॥ २७ ॥

तच्च कुतः प्राप्तमेतदत्राह, श्रुतमिति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वोक्तं तत्तद्रूपत्वमेवोपपादयति—परावरेष्विति, चतुष्केण । तेषु तेष्वेव एव पर आत्मा सर्वेषां मूलस्वरूपो भगवान् स्वरूपभूताऽचिन्त्यतत्तच्छक्तिः । अत एवेश्वरो दुर्घटघटनासमर्थः अत एवाऽव्ययः । स्वेनैव तत्तद्भावेऽप्यविकारी सन् स्वयमेव प्रत्यगात्मस्वरूपेण जीवरूपेण केषाञ्चित् तन्मात्रज्ञानानामीयते केषाञ्चित्तु ततोऽप्यधमज्ञानानां दृश्यरूपेण प्रधानरूपेण चेयते । तत्र जीवरूपेण व्यापकत्वेन निर्देश्यो भवति । प्रधानादिरूपेण तु व्याप्यरूपतयेत्यनेनेत्यर्थः । केषाञ्चित्तु अद्वैतज्ञानिनां स एव परमेश्वरः अनिर्देश्यः सन्नविकल्पितो भेदमात्रशून्यश्च सन् केवलानुभवानन्दस्वरूप एवेयते नतु स्वरूपशक्तिमयैश्वर्ययुक्तः । कथं ? तत्राह, माययेति । तत् कृपया मायान्तर्धाने सम्यक् सत्यैवेयते । न तत् प्रकाशत इति भावः तस्यास्तच्छादकधर्मत्वमेव दर्शयति—गुणसर्गयेति । सत्त्वादिगुणविक्षेपिकयेत्यर्थः । अद्वैतज्ञानिनामप्यस्ति सत्त्वगुण एवावरक इति भावः ॥ २१—२३ ॥

तस्मात् सर्वेष्वेव भूतेषु तत्तदात्ममात्रसम्बन्धिषु दयां कुरुत. भगवत एवाधिष्ठानत्वात् । सौहृदमात्मीयबुद्धिं कुरुत ॥ २४ ॥

पूर्वानुसारेणैव भगवत्तोषस्य ब्रह्मसिद्धितोऽप्युत्कृष्टं फलमाह—तुष्टे चेति । अहो तदन्यान्यपि फलानि तत्साधनान्यपि अत्र सम्बन्धेनाल्पत्वफलाय कल्पन्त इत्याह—धर्मार्थेति ॥ २५—२६ ॥

एतादृश ज्ञानस्य विरलत्वं तद्भक्तकृपैकलभ्यत्वञ्चाह—ज्ञानमिति । नरसख इति तत्र श्रीमन्नरस्य तद्भक्तवरस्य कृपायाता व्यं दर्शितं यत एवैकान्तिनामिति । साक्षात्तदुपदेशेऽपि तद्भक्तकृपापेक्ष्यते, किमुतान्यदेशेनेति भावः ॥ २७ ॥

तत्रैव स्वस्य दर्शयति श्रुतमिति । ज्ञानं तत्प्रतिपादकं वाक्यं यदेव खल्वनुभवपर्यन्तं फलं तत्सहायत्वेन भागवतं धर्मञ्च श्रुतम्, तच्च शुद्धमेव नतु ज्ञानकर्मादिमिश्रम् ॥ २८—३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, स ज्ञायते चेदित्थमित्थंकारेण निर्दिश्यतामित्यत आह—प्रत्यगात्मेति । प्रतीचां सर्वजीवानामात्मा परमात्मा तत्स्वरूपेण व्यापकः दृश्यञ्जगत् तद्रूपेण व्याप्य इत्येवं व्याप्यव्यापकनिर्देश्यः वस्तुतः स्वयं ह्यनिर्देश्यः अनिर्देश्योऽपि विकल्पितः उपासकभेदैर्ब्रह्म परमात्मा भगवानित्येवं विकल्पविषयीकृतोऽपि केवल एकोऽनुभवात्मक आनन्द एव स्वरूपं यस्य सः एवं सर्वत्र स्वस्वरूपभूतैश्वर्येण प्रकटमेव विराजमानोऽपि मायया अविद्यया हेतुना जीवैर्दुष्प्रकाशकत्वादन्तर्हितैश्वर्य इयते. कीदृश्या ? गुणानाम् इन्द्रियैरनुभूयमानानां शब्दादीनां सर्गः सृष्टिर्यतस्तयेति शब्दादय एवानुभाव्यन्ते न तु तत्रैव प्रति तया स्ववृत्त्या सन्नपीश्वरः ईश्वरं प्रतितया स्ववृत्त्या अविद्यया जीवस्यैवावरणात्तेन—

> "दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
> मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" ॥

इति भगवदुक्तेस्तद्दृष्ट्यैव मायातरणे सति स यथायोगं भक्तितारतम्येन निर्देश्योऽपि भवतीति भावः ॥ २२ ॥ २३ ॥

यतो भक्तिगम्य एव भगवान् सा च भक्तिः सर्वभूतेषु दयासौहृदाभ्यां सुस्थिरा निर्विघ्ना भवत्यतस्ते एव विधत्ते तस्मादिति सौहृदं स्नेहञ्च सर्वाण्यपीमानि भूतानि भगवच्छक्तिमयत्वाज्जगद्रूपाण्येव स्वरूपेणापि सर्वत्रैतेषु स मत्प्रभुर्विराजत एव श्रीमद्गुरुवैष्णवकृपया यदि मां भक्तिदेवी स्वीकरिष्यति तदा सोऽपि साक्षात् द्रष्टव्य इति बुद्ध्येति भावः यथा दयया सौहृदेन च ॥ २४ ॥

ततश्च तस्मिंस्तुष्टे त्वयि धर्मादिभिः काङ्क्षितैः किम ? न किमपि फलमित्यर्थः । ये गुणानां व्यतिकरात् परिणामात् इह जगति स्वत एव सिद्धाः अगुणेन मोक्षेण च किं यतः चरणयोः सारङ्गुणं भजमानानाम् उपभोगादपाधिक्येन गायतामिति चरणयोः कमलत्वं सारस्यसौरभ्यमाधुर्यादित्वं तत्सेविनां भ्रमरत्वमारोपितं भ्रमरत्वेन स्वाभाविकं कांक्षितान्तरशून्यत्वं व्यञ्जितम् ॥२५॥

ननु, च धर्मादिरपुरुषार्थत्वे कथं त एव गुरुपुत्राभ्यां वेदोक्तत्वेनोक्तास्तत्राह—धर्मार्थ इति । ईक्षा आत्मविद्या त्रयी कर्मविद्या नयदण्डनीतिश्च विविधा च वार्त्ता जीविका तदेतदखिलं निगमस्यैव समग्रमेव वेदोक्तमेव मन्ये एव तत्, दूरयामि तादृशाधिकारिसम्मतत्वादिति भावः । सत्यं सद्भ्योऽहितं तु परमस्य पुंसः परमे पुंसि स्वात्मार्पणं स्वस्यात्मनस्तदीयत्वेनार्पणं श्रीस्वामिचरणास्तु तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यं पुनर्निस्त्रैगुण्यलक्षणं परस्य पुंसः स्वात्मार्पणमेवेत्यर्थः । तदुक्तं भगवता "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन!" इति व्याचक्षते स्म ॥ २६ ॥

तेषां विश्वासार्थं गुरुसम्प्रदायमाह—ज्ञानमिति । यत्र नारदः श्रोता तत्र मादृशानां निकृष्टानां कुतोऽधिकार इति नाशङ्कनीयमित्याह, भगवता एकान्तभक्तानां यत्पादरजोभिरप्लुतानां स्नातानां देहिनां सर्वेषामपि तज्ज्ञानं स्यात् न तु मत्सामान्येनेति नियमः ॥ २७ ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गुणसाम्ये प्रधाने च गुणव्यतिकरे महदादौ परः सर्वत्रैवमाचेतनाविलक्षणस्वरूप इयते धारकत्वनियन्तृत्वादिना निर्भावते

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मा सर्वेषामात्मा मूलभूतः एको निरस्तसमानातिशयो भगवानेव. ननु, सर्वभूतत्वे सति तस्य विकारित्वं स्यादित्याह, अव्ययः निर्विकारस्वरूपः विश्वं सृजतीति भावः ॥ २१ ॥

स्वरूपेण निर्विकारत्वं सर्वमूलत्वञ्चोपपादयति, प्रत्यगात्मस्वरूपेण "अणुर्ह्येष आत्मा चेतसा वेदितव्य एवपरस्यांशः" इत्यादिश्रुतिप्रसिद्धजीवस्वरूपेण स्वांशेन अदृश्येन दृश्यरूपेण "देवात्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादिश्रुतिप्रसिद्धशक्तिविकारेण च व्याप्यव्यापकानिर्देश्यः व्यष्टिसमष्टिकार्यरूपतया निर्देश्यः स्वयं तु अविकल्पितः स्वरूपतो व्यष्टिसमष्टिकार्यभावेन नैव निरूपितोऽतोऽनिर्देश्यः परिणामित्वस्थूलत्वकृशत्वादि निर्देशानर्ह इत्यर्थः । अतःप्रत्यगात्मा द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया अनिर्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण च व्याप्यतया निर्देश्य इत्यादि व्याख्यातं तदयुक्तम् प्रत्यगात्माणुत्वप्रतिपादकश्रुतिविरोधात् प्रत्यगात्मनो मोक्तुर्व्यापकत्वे सति उत्क्रान्त्याद्यसंभवप्रसङ्गात् स्वर्गनरकगतसर्वशरीरविषयकसुखदुःखाद्यनुभवप्रसङ्गाच्च ॥ २२ ॥

सर्वेषु जीवेषु स एवोक्तलक्षणः परमेश्वरो वर्त्तते इत्याह— केवलानुभवानन्दस्वरूप इति । केवलो निरस्तसमानातिशयः अनुभवो ज्ञानं स चासावानन्दश्च स्वरूपं यस्य सः गुणाः गुणात्मकः संसारः सृज्यते इति सर्गः कार्यं यस्याः तया अन्तर्हितमावृतमैश्वर्यं ज्ञानं यस्य तस्मिन् जीवे आताधेकवचनं सर्वेषु जीवेषु ईयते "अन्तःप्रविष्टः शास्ता जनानाम्" इति श्रुतेर्ज्ञायते ॥ २३ ॥

यस्मादेवं तस्मादासुरं भावमुन्मुच्य सर्वेषु भूतेषु दयां सौहृदञ्च कुरुध्वमनेन तद्भजनं भवतामनुरूपमिति भावः । ययैव अधोक्षजस्तुष्यति ॥ २४ ॥

तस्मिंस्तुष्टे सर्वं यच्चादिदं तदप्राप्तमेव लभ्यं भविष्यति धर्मादिफलस्याप्रलब्धस्य का कथाऽनिर्दुर्लभोमोक्षोपि न कामितव्यो निष्कामतया तद्भजनमेव कर्त्तव्यमित्युपदिशति, तुष्टे— चेति । तस्मिन् तुष्टे सति किमलभ्यं न किमपीत्यर्थः । एवं सति उपगायतां तद्गुणादिकीर्तननिष्ठानां चरणयोः सारं सौन्दर्यं जुषतां सेवमानानां तच्चरणध्यातॄणां नोऽस्माकं यद्वा अगुणेन प्राकृतगुणसम्बन्धरहितेन मोक्षेणाप्याकाङ्क्षितेन किं, न किमपि तदाऽगुणव्यतिकरात् प्रकृतिगुणपरिणामात् स्वसिद्धाः अयत्नलभ्याः अर्थात्संसारे भ्रमता जीवेन यत्र कचन लभ्याः एव ये धर्मादयः धर्मार्थकामाः तैराकांक्षितैः किं, न किमपीत्यर्थः हरिदासेन यदि भजनफलभूते मोक्षेपि आकाङ्क्षा न कार्या तर्हि धर्मादिषु कुत इति फलितोऽर्थः ॥ २५ ॥

ननु, वेदोक्तानि कर्मज्ञानाद्यात्मकानि बहूनि श्रेयस्साधनान्यनादृत्य चरणयोः सारं जुषामिति परमपुरुषचरणध्यानमेव कुतोमुख्यं श्रेयस्साधनं मन्यसे इत्यत्र सर्वस्य वेदोक्तसाधनजातस्य परमपुरुषचरणध्यानाङ्गत्वान्न कस्याप्यनादर इत्याह, धर्मार्थेति । परमस्येति अधिकरणस्य शेषत्वविवक्षया षष्ठी परमे पुंसि अंशिनि आत्मनोंऽशभूतस्यार्पणं परमपुरुषस्वरूपगुणचिन्तया नियोजनंप्रति निगमस्यार्थभूतं यदेतदखिलं धर्मादिकं श्रेयःसाधनं सत्यं मन्ये इत्यन्वयः । धर्मादीन समाहारद्वन्द्वे पुंस्त्वमार्षम् । धर्मादिरूपस्त्रिवर्गो योऽभिहितो वर्णितः ईक्षा आत्मानात्मपरमात्मस्वरूपगुणादिज्ञानम् त्रयी कर्मविद्या नयदमौ तर्को दण्डनीतिश्च विविधा वार्त्ता जीविकाः तत्र धर्मस्य हृदयशुद्धिद्वारा ज्ञानसाधनत्वं ज्ञानस्य ध्रुवास्मृतिपरभक्तियोगाविर्भावकध्यानसाधनत्वम्, अन्यस्य सर्वस्य जीवनद्वारा धर्मसाधनत्वमितिदिक् "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इतिसूत्रमत्रानुसन्धेयम् ॥ २६ ॥

यदन्यैर्दुरवापं तदेतज्ज्ञानम् नारदाय भगवद्गुरवे नरसखो नारायण आह उक्तवान् तदधुना एकान्तिनां मुमुक्षूणां भगवतः पादारविन्दरजसा आप्लुतदेहिनां स्यान्नान्येषाम् ॥ २७ ॥

विज्ञानेनाऽनुभवेन संयुतम् धर्मं धर्मरूपम् भागवतं भगवत्प्राप्तिसाधनम् एतज्ज्ञानं मया नारदाच्छ्रुतम् ॥ २८ ॥

भाषाटीका ।

स्वयं अनिर्देश्य और अविकल्पित जो ईश्वर है वही चेतनाचेतन शरीर वाला होने से व्याप्य और व्यापक पने से निर्देश करने के योग्य है ॥ २२ ॥

वही केवलानुभव और आनन्द स्वरूप वाला होकर भी परमेश्वर है अर्थात् ईश्वरों का भी ईश्वर निरवधिक नियंता है परंच जीवों को मोहादि गुणों की सृष्टि करने वाली माया से अंतर्हित ऐश्वर्य प्रतीत होता है ॥ २३ ॥

हे दैत्य बालकों ! तस्मात् तुम लोग आसुर भाव को छोड़ कर सर्व प्राणियों पर दया करो और सौहृद रक्खो जिससे हरि प्रसन्न होवे ॥ २४ ॥

सब से आदि में होने वाला और जिसका अंत नहीं ऐसा जब ईश्वर प्रसन्न होजाय तब क्या अलभ्य है तथापि जो प्रारब्ध के आधीन धर्मादिक आपही सिद्ध हैं उन सब से क्या प्रयोजन हैं और चरण रजकी सेवा करने वाले और चरणों के गुण गान करने वाले हम लोगों को मोक्ष से भी क्या प्रयोजन है ॥२५॥

धर्म अर्थ और काम यह कथितजो त्रिवर्ग तथा आत्मविद्या और कर्मविद्या तर्क दण्डनीति और दो प्रकारकी जीविका यह सम्पूर्ण निगमअर्थ, जो परम सुहृद परमात्माको जो आत्म अर्पण करदेवेतो सर्व सत्य है, नहीतो असत्यही है ॥ २६ ॥

यह निर्मल और दुर्लभज्ञान नरके सखा श्रीमन्नारायणने नारद को दियाहुआ सो यह ज्ञान एकांती और भगवान के चरण कमलकी रजसे स्नान करने वाले अकिंचनमहात्माओं को होता है ॥ २७ ॥

मैने यह ज्ञान प्रथम देव दर्शन श्रीनारदजी के मुखसे सुना है और विज्ञान सहित शुद्धभागवत धर्म भी सुना है ॥ २८ ॥

दैत्यपुत्रा ऊचुः ।

प्रह्लाद ! त्वं वयं चापि नर्त्तेऽन्यं विद्महे गुरुम् ।
एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ ॥ २९ ॥
बालस्यान्तःपुरस्थस्य महत्सङ्गो दुरन्वयः ।
छिन्धि नः संशयं सौम्य ! स्याच्चेद्विश्रम्भकारणम् ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां सप्तमस्कन्धे प्रह्लादानुचरिते
षष्ठोऽध्यायः ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्रातिविस्मिताः पृच्छन्ति-प्रह्लादेति । हे प्रह्लाद ! त्वं वयमेताभ्यां शण्डामर्काभ्यामृते ऽन्यं गुरुं न विद्मः एतदागमनात्पूर्वमेवाहं नारदपार्श्वे गत इति चेत्तत्राऽऽहुः, बालानामप्यतिशिशूनामस्माकमेतावीश्वरौ नियन्तारावतस्तवान्यत्र गमनं न सम्भवति ॥ २९ ॥

स एवात्रागत इत्यपि न सम्भवतीत्याहुः-बालस्येति । दुरन्वयो दुर्घटः विश्रम्भकारणं विश्वासहेतुः ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र विस्मिताः पृच्छन्ति दैत्यकुमाराः—प्रह्लादेति । हे प्रह्लाद ! त्वं वयञ्चाप्येताभ्यां गुरुपुत्राभ्यामृते विनाऽन्यं गुरुं न विद्महे, एतदागमनात्पूर्वमेवाहं नारदपार्श्वे गत इत्यत्राहुः, बालानामपि शिशूनामपि सतामस्माकमेतावेवेश्वरौ नियन्तारौ अतस्तवान्यत्र गमनं न सम्भवतीति नः शङ्का वर्त्तत इत्यर्थः ॥ २९ ॥

नारद एवात्रागत इति न सम्भवतीत्याहुः—बालस्येति । अन्तःपुरस्थस्य बालस्य तव महतो नारदस्य सङ्गो दुरन्वयो दुर्घटः हे सौम्य, प्रह्लाद ! नोऽस्माकं संशयं छिन्धि अपनुद विस्रम्भकारणं विश्वासहेतुः स्याच्चेत् असम्भवितत्वेनाऽस्माभिरविश्वसनीयो नारदसङ्गमः त्वदुक्तस्तत्र यद्यस्माद्विश्वासहेतुरस्ति चेत्तदुपपादनपूर्वकं तत्सङ्गतिविषयं संशयं छिन्धीत्यर्थः ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतस्मिन्नवसरे दैत्यपुत्राः प्रह्लादकथितार्थशङ्कया तं पृच्छन्तीत्याह—प्रह्लादेति । एताभ्यां गुरुपुत्राभ्यां शण्डामर्काभ्यामृते नान्यं गुरुं विद्महे यस्मात् किञ्च विज्ञानञ्चेश्वरविषयं विवक्षितं तदुपाधिनापि बालानामक्षराभ्यासनिरतानामस्माकमीश्वरो न काङ्क्षित इति यस्मात् अन्यगुर्वभावेऽपीश्वर उपदेष्टा स्यादतो वाह, बालानामिति । बालानामीश्वरोऽस्त्यपि किं नास्तिप्रतिपत्त्यभावात् ॥ २९ ॥

कस्मिंश्चिदवसरे देशान्तरेऽन्यगुरुसङ्गतः किं न स्यादिति तत्राह, बालस्येति । तस्मादुत्पन्नं नः संशयं जहीत्यन्वयः तत्र कृत्यमाहुरित्याह, स्यादिति ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सविस्मयं पृच्छन्ति—प्रह्लादेति । एताभ्यामृतेऽन्यं गुरुं न विद्मः बालानामीश्वरावेति त्वयाऽप्येतद्गृहात् अमुष्मोच्य तत्पार्श्वे गन्तुमशक्यमिति भावः ॥ २९ ॥

स एवात्रागत इत्यपि न सम्भवतीत्याहुः, बालस्येति ॥ ३० ॥

इति सारार्थदर्शिन्याम् हर्षिण्याम् भक्तचेतसाम् ।
षष्ठोऽध्यायः सप्तमस्य सङ्गतः सङ्गतः सताम् ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे प्रह्लाद ! एताऽभ्याम् अन्यं ते गुरुं, वदसीति शेषः । वयन्तु न विद्महे न विद्मः एतावेव नो बालानामीश्वरौ गुरू अनयोर्मध्यादन्यत्र गमनासम्भवादिति भावः ॥ २९ ॥

नारदेन सह तव समागम इह न सम्भवतीत्याहुः, अन्तःपुरस्थस्य महता नारदेन सह सङ्गमो दुरन्वय इति विश्रंभस्य विश्वासस्य कारणं भूयं स्यादस्ति चेत्तर्हि तद्वर्णनेन संशयं छिन्धि ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षष्ठाध्यायार्थप्रकाशः ॥ ६ ॥

भाषा टीका ।

दैत्यपुत्रा ऊचुः ।

दैत्यपुत्र बोले, कि—हे प्रह्लाद ! तुम और हम सब भी । दोनों गुरुपुत्रों को छोड कर तीसरे किसी गुरू को जान ही नहीं, क्योंकि ? हम लोगों के छोटी अवस्था से • यही दो शिक्षक हैं ॥ २९ ॥

और भीतर रनिवास में रहने वाले तुमको तो महत्स बहुत ही दुर्लभ है, हे सौम्य ! जो हम लोगों पर विश्वास हो ? यह हमारा संशय दूर करो ॥ ३० ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, षष्ठ अध्याय की भागवताचार्यकृत भाषा टीका
समाप्त ॥ ६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

॥ सप्तमोऽध्यायः ॥

नारद उवाच ।

एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः ।
उवाच स्मयमानांस्तान्स्मरन्मदनुभाषितम् ॥ १ ॥

प्रह्लाद उवाच ।

पितरि प्रस्थितेऽस्माकं तपसे मन्दराचलम् ।
युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति ॥ २ ॥
पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः ।
पापेन पापोऽभक्षीति वादिनो वासवादयः ॥ ३ ॥
तेषामतिबलोद्योगं निशम्यासुरयूथपाः ।
वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशम् ॥ ४ ॥
कलत्रपुत्रमित्राप्तान् गृहान् पशुपरिच्छदान् ।
नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥
व्यलुम्पन् राजशिबिरममरा जयकाङ्क्षिणः ।
इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥ ६ ॥
नीयमानां भयोद्विग्नां रुदतीं कुररीमिव ।
यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥
प्राह नैनां सुरपते ! नेतुमर्हस्यनागसम् ।
मुञ्च मुञ्च महाभाग ! सतीं परपरिग्रहम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तमे मातृगर्भस्थे स्वस्मिन्नारदभाषितम् ।
प्रह्लादो वर्णयामास शिष्यप्रत्ययसिद्धये ॥ १ ॥
अश्रावि नारदादेतन्मया गर्भे इतीरितुम् ।
तत्प्रस्तावकथामाह पद्यैः षोडशभिः सुधीः ॥ २ ॥ १ ॥

अस्माकं पितरि हिरण्यकशिपौ स्वकृतेनैव पापेन पापोऽसावभक्षि भक्षित इति हर्षेण वदन्तो युद्धोद्यमं चक्रुः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

राज्ञः शिबिरमावासं व्यलुम्पन् सर्वस्यापहारेण नाशितवन्तः ॥ ६ ॥ ७ ॥

अनागसं निरपराधामेनां नेतुं नार्हसीति प्राह, ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दैत्यकुमारैरेवं पृष्टः प्रह्लादस्तत्सङ्गतिहेतुमुपपादयंस्तत्त्वत्रय-याथात्म्योपदेशपूर्वकं सपरिकरं भगवद्भक्तियोगमुपदिष्टवानित्याह,

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भगवान्नारदः-एवमिति । एवम् इत्थं दैत्यसुतैः पृष्टो भागवतोत्तमः प्रह्लादस्तान्दैत्यपुत्रान्प्रति स्मयमानो मया नारदेनानुभाषितं स्मरन्नुवाच ॥ १ ॥

तदेवाह—पितरीत्यादिना, नाऽधुनाऽप्यजहात्स्मृतिरित्यन्तेन । अस्माकम् पितरि हिरण्यकशिपौ तपसे तपः कर्तुं मन्दराचलंप्रति प्रस्थिते प्रयाते सति इन्द्रादयो विबुधा देवाः दानवान्प्रति युद्धोद्यमं चक्रुः ॥ २ ॥

कथम्भूतास्सन्तः लोकोपतापनः लोकानां दुःखकारी पापः पापात्मा स्वपापेनैव दैवात्पिपीलिकैरहिः सर्प इव अभक्षि भक्षितः इति वादिनो वदन्तः सन्तः वासव इन्द्र आदिर्येषां ते युद्धोद्यमं चक्रुरिति पूर्वेणान्वयः ॥ ३ ॥

ततः किं जातम् ? तत्राह—तेषां वासवादीनां बलोद्योगं बलप्रयुक्तयुद्धोद्योगं निशाम्य दृष्ट्वा सुरैर्वध्यमाना अत एव भीताः सन्तोऽसुरयूथपाः सर्वे त्वरिताः सर्वतो दिशं दुद्रुवुः पलायितवन्तः ॥ ४ ॥

कथम्भूताः कलत्रादीन् नावेक्षमाणास्तेषु त्यक्तस्पृहा इत्यर्थः, तत्र हेतुः, सर्वे प्राणपरीप्सवः प्राणमात्रपरित्राणेच्छवः तत्र परिच्छदा भोगोपकरणानि ॥ ५ ॥

ततो जयकाङ्क्षिणोऽमरा देवाः राज्ञो हिरण्यकशिपोः शिबिरं गृहं व्यलुम्पन् सर्वस्वापहारेण नाशितवन्तः इन्द्रस्तु राज्ञो हिरण्यकशिपोर्भार्यां मम मातरमग्रहीत् ॥ ६ ॥

तामिन्द्रेण नीयमानामत एव भयोद्विग्नां कम्पितां कुररीमिव क्रन्दन्तीं रुदतीं देवर्षिर्नारदो यदृच्छयोपगतः पथि ददर्श प्राह च ॥ ७ ॥

तदेवाह—हे सुरपते ! अनागसं निरपराधामेनां नेतुं त्वं नार्हसि अतो हे महाभाग ! परेणाऽन्येन हिरण्यकशिपुना परिगृहीतां परदारानित्यर्थः, मुञ्च मुञ्च ॥ ८ ॥

तवोपभोक्तुं योग्या न भवतीत्याह—परपरिग्रहमिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सप्तमे नारदात् प्राप यज्ज्ञानं मातृगर्भगः ।
तदेवोपादिशद् बालान् भक्तिं प्रेम च तत्फलम् ॥

॥ १—५ ॥

राज्ञो हिरण्यकशिपोः शिबिरं आवासं व्यलुंपन् सर्वस्वापहारेण नाशितवन्तः ॥ ६—८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तद्विश्वासकारणं सप्तमे वर्ण्यते एवमुक्तवानित्या ॥ १ ॥

तपसे तपःकर्तुं मन्दराचलमस्माकं पितरि हिरण्यकशिपौ प्रस्थिते सति तत्रापि पिपीलिकैर्भक्षिते सति तदा वासवादयः पिपीलिकैरहिरिव लोकोपतापनः पापः पापेन अभक्षि भक्षित इति वदन्तो दानवान् प्रति युद्धोद्यमं चक्रुरिति द्वयोरन्वयः ॥ २ ॥ ३ ॥

प्रतियत्नेन उद्योगं यत्नम् ॥ ४ ॥

नावेक्षमाणाः तत्प्रतीक्षामकुर्वाणाः ॥ ५ ॥

राजशिबिरं राजस्थानम् व्यलुम्पन् सर्वस्वापहारेण शून्यं कृतवन्तः ॥ ६ ॥

यदृच्छया भाग्यवशात् ॥ ७ ॥

परपरिगृहं परदारान् अनागसं नास्त्यागोऽपराधो यस्यास्तामेनां नेतुं नार्हसीति प्राह, ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनेन सम्भु साधनानां भक्तेरेव प्राधान्यं हरेर्मुख्यप्रसादजनकत्वाद्भक्तिरेव पुरुषेणापाद्येत्यादिकं निरूप्यतेऽस्मिन्नध्याये, भक्तिप्रतिपादनात्मकत्वादस्य शास्त्रस्य पुनः पुनस्तत्प्रतिपादनान्न पुनरुक्तिशङ्का कार्या तत्र दैत्यपुत्रैः पृष्टः प्रह्लादः किं चकारेति युधिष्ठिरशङ्कानिवृत्त्यर्थं परिहरन्नारद आह—नारद इति । नारदस्य ममाऽनुशासनम् ॥ १ ॥ २ ॥

अहिः सर्पः पिपीलिकैर्यथा भक्ष्यते तथा लोकोपतापनः पापो हिरण्यकशिपुः स्वपापेनाऽभक्षि नष्टप्रायोभूत् दिष्ट्या सुखमस्तु लोकार्थमिति श्रुनाणाः "दिष्ट्या समुपजोषञ्च" इत्यमरः ॥ ३—५ ॥

व्यलुम्पन् जयकाङ्क्षिणो जिगीषवः असुरजयेन प्रकाशमानाः ॥ ६ ॥ ७ ॥

भाषा टीका ।

श्रीरुक्मिणीकान्ताय नमः ।

नारद उवाच ॥

नारदजी बोले, कि—इस प्रकार दैत्य पुत्रों ने महा भागवत प्रह्लाद को जब पूछा तब प्रह्लाद विस्मय को प्राप्त होनेवाले दैत्यपुत्रों के प्रति मेरे भाषण का स्मरण करता हुआ बोला ॥ १ ॥

प्रह्लाद उवाच ।

प्रह्लाद बोला, कि हमारे पिता जब तप के लिये मन्दराचल

इन्द्र उवाच ।

आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः ।
आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवींगतः ॥ ९ ॥

नारद उवाच ।

अयं निष्किल्बिषः साक्षान्महाभागवतो महान् ।
त्वया न प्राप्स्यते संस्थामनन्तानुचरो बली ॥ १० ॥
इत्युक्तस्तां विहायेन्द्रो देवर्षेर्मानयन्वचः ।
अनन्तप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥ ११ ॥
ततो नो मातरमृषिः समानीय निजाश्रमम् ।
आश्वास्येहोष्यतां वत्से ! यावत्ते भर्तुरागमः ॥ १२ ॥
तथेत्यवात्सीद्देवर्षेरन्ति साऽप्यकुतोभया ।
यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्त्तत ॥ १३ ॥
ऋषिं पर्यचरत्तत्र भक्त्या परमया सती ।
अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥ १४ ॥
ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः ।
धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्म्मलम् ॥ १५ ॥
तत्तु कालस्य दीर्घत्वात् स्त्रीत्वान्मातुस्तिरोदधे ।
ऋषिणानुगृहीतं मां नाधुनाऽप्यजहात्स्मृतिः ॥ १६ ॥

भाषा टीका ।

को गये, तब देवताओं ने दानवों के प्रति युद्ध का बड़ा उद्यम किया ॥ २ ॥

और देवता लोग बोले, कि-भला भया सब लोकों को दुःख देने वाले पापी को उसी के पाप से सर्प के नाईं पिपीलिकाओं ने भक्षण करलिया ॥ ३ ॥

देवताओं की सेना का उद्योग देखकर असुर यूथप लोग भी भयभीत होकर ताड़ित हुए २ अपने २ स्त्री पुत्र मित्र आप्त लोकों को तथा गृह पशु और उपकरणादि को न देख कर बड़ी जल्दी सब दिशाओं को प्राण लेकर भाग गये ॥४-५॥

जीत की इच्छा वाले देवता लोगों ने भी राजा के निवास स्थान का भङ्ग कर दिया, और इन्द्र ने राजमहिषी मेरी माता को ग्रहण कर लिया ॥ ६ ॥

तब भय से उद्विग्न कुररी (पक्षिणी) के तरह रोनेवाली मेरी माता को इन्द्र ले चला, इतने में अकस्मात् उस मार्ग में आए हुए नारदजी दिखाई पड़े ॥ ७ ॥

और नारद जी बोले, भी कि-हे सुरपते ! हे महाभाग ! तुम इस बिचारी निरपराधिनी पराई स्त्री को लेजाने के योग्य नहीं हो, इस बिचारी सती को छोड़ो २ ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अविषह्यं दुःसहम् अतोऽस्या प्रसवपर्यन्तमत्रास्यताम् तत आर्यस्य पदवीं मार्गं गतः प्राप्तः सन् जातं पुत्रं हत्वा मोक्ष्यामीत्यर्थः ॥ ९ ॥

साक्षात्स्वगुणैरेव महान् तु पित्रादिसम्बन्धात् त्वया हेतुभूतेन संस्थां मृत्युं न प्राप्स्यति तत्र हेतवो निष्किल्बिष इत्यादयः ॥ १० ॥

अनन्तस्य प्रियो योऽहं स वा प्रियो यस्य तस्य मम भक्त्या एनां प्रदक्षिणीकृत्य ॥ ११ ॥

इहोष्यतामित्याहेति शेषः ॥ १२ ॥

अन्ति समीपे ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्तर्वत्नी गर्भिणी इच्छया भर्तुरागमनानन्तरं प्रसूतये एवमपि स्वगर्भस्य क्षेमाय ॥ १४ ॥

तस्याः शोकशान्त्यै धर्मस्य तत्त्वं भक्तिलक्षणम् ज्ञानमात्मानात्मविवेकस्तदुभयं प्रादात् ईश्वरः समर्थः ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्युक्त आहेन्द्रः—आस्त इति । अस्याः जठरे कुलिशाघविषह्यमस्माभिः सोढुमशक्यं सुरद्विषो हिरण्यकशिपोः वीर्यं गर्भरूपेण वर्द्धमानमास्ते तिष्ठत्यतोऽनया प्रसवपर्यन्तमास्यताम् मत्समीपे स्थीयताम् ततश्चार्थस्य पदवीं मार्गं गतस्सन् मोक्ष्ये जातं पुत्रं हत्वा एनां त्यजामीत्यर्थः ॥ ९ ॥

एवमुक्तो देवर्षिराह—सोयमिति । सोयं गर्भस्थः शिशुस्त्वया हन्त्रा संस्थां मरणं न प्राप्स्यते. तत्र हेतुं वदन् तमिमं विशिनष्टि, निष्किल्बिषः मरणनिमित्तप्राचीनकिल्बिषरहितः, तत्कुतः ? महाभागवतः भगवद्भक्त्यैव ध्वस्तकिल्बिष इति भावः । महागुणैः श्रेष्ठः अनन्तस्य भगवतोऽनुचरः बली महाबलसम्पन्नः यद्यपि गर्भस्थदशायां स्वानुग्रहात्पूर्वं न भागवतत्वादयो धर्मास्तथापि समनन्तरमेव स्वेनानुग्रहीष्यमाणस्य पुनर्जन्मकाले "जायमानं हि पुरुषं यं पश्येत्" इत्युक्तरीत्या भगवत्कटाक्षमाणस्य उक्तधर्मान्वय इत्यभिप्रायेण निष्किल्बिष इत्यादीनि विशेषणान्युक्तानि । ननु, इन्द्रेण मुक्तांप्रति स्वोपदेशे सति तद्गर्भस्थस्योक्तधर्मसम्पत्तिः तस्य तद्धर्मसम्पत्तौ हि तद्धेतुकस्तत्याग इतीतरेतराश्रयत्वमिति कथं देवर्षिणैवमुक्तमिति चेन्नैवं गर्भस्थं नितरामीश्वरकटाक्षविषयमत एव——

> "ईश्वरस्य च सौहार्दं यदृच्छा सुकृतं तथा ।
> विष्णोः कटाक्षमद्वेष आनुकूल्यं च सात्विकैः ॥
> संभाषणं षडेतानि ह्याचार्यप्राप्तिहेतवः" ।

इत्युक्तहेतुषट्कसम्पन्नं देवर्षिरालक्ष्य त्वयैतस्यामनुच्यमानायामप्यहमुक्तप्रमेयं नूनं करवाण्यतोऽयं त्वया संस्थां न प्राप्स्यतीत्युक्तवानिति नेतरेतराश्रयः ॥ १० ॥

इतीत्थमुक्त इन्द्रो देवर्षिनारदस्य वचो मानयन् गौरवाद्बहुमानयन् तां राजमहिषीं विहाय अनन्तस्य भगवतः प्रियो योऽयं तस्य मम भक्त्या एनां मन्मातरं परिक्रम्य प्रदक्षिणीकृत्य दिवं प्रति ययौ ॥ ११ ॥

ततः ऋषिर्नारदः मम मातरं स्वाश्रमंप्रति समानीय समाश्वास्य नानाविध उक्त्वा गर्भिणीं आश्वास्य मां वर्तयतथा हे वत्से, वत्स ! तव भर्तुरागमनं तावत्पर्यन्तं त्वया इहास्मिन्मदाश्रमे उष्यतां स्थीयतामित्युवाचेति शेषः ॥ १२ ॥

तत्तथेत्यङ्गीकृत्य सा मन्माता देवर्षेरन्तिके समीपे नास्ति कुतोऽपि भयं यस्यास्तादृशी अकुतोभया कुश्तनिवसन्ती ॥ दैत्यपतिरुग्रतपसो यावन्न्यवर्तत नागच्छत् तावत् सा मन्माता अन्तर्वत्नी गर्भिणी स्वगर्भस्य क्षेमाय स्वेच्छया च भर्तुरागमनानन्तरं प्रसूतये च परमया भक्त्या ऋषिं नारदं पर्यचरत शुश्रूषितवती ॥ १३ ॥ १४ ॥

ततस्तां देवर्षिरन्वगृह्णादित्याह—ऋषिरिति । ईश्वरः समर्थ ऋषिः तस्याः परिचरन्त्याः मन्मातुर्मामप्युद्दिश्य निर्मलं धर्मस्य तत्त्वं ज्ञानञ्चेत्युभयं प्रादात् धर्मो भगवद्भक्तियोगलक्षणः तस्य तत्त्वं याथात्म्यं तदङ्गभूतं ज्ञानं देहाद्विविक्तप्रत्यगात्मयाथात्म्यज्ञानं च प्रादात् उपदिष्टवान् इत्यर्थः ॥ १५ ॥

तद्दशायामुपदिष्टं तदुभयं मम मातुः स्त्रीत्वात् कालस्य दीर्घत्वाच्च तिरोदधे, विस्मृतमभूदित्यर्थः । ऋषिणा भगवता नारदेनाऽनुगृहीतं मां तु सा स्मृतिस्तदुपदेशजनितं स्मृत्यात्मकं ज्ञानमधुनापि नाजहात् न तत्याज ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुरद्विषो हिरण्यकशिपोर्वीर्यं रेतोलक्षणम् अस्या यावत्प्रसवः तावन्मम वशे आस्यतां पश्चादहं मोक्ष्ये ततःपूर्वं कस्मान्नमुञ्चसीति तत्राह, अर्थपदवीमिति ॥ ९ ॥

अनया प्रसूतः पुत्रो हन्तुं त्वया न शक्यत इत्याह, न त्वयेति । संस्थां मरणं कुतोऽत्राह, अनन्तेति ॥ १० ॥

अनन्तप्रियः श्रीनारायणो अस्य भक्त्या अनन्तस्य हरेः प्रिया बहुमानलक्षणा भक्तिरनन्तप्रिया भक्तिस्तया वा ॥ ११ ॥

तावदत्रोष्यतामित्याह—यावदिति ॥ १२ ॥

ऋष्यन्तिके ॥ १३ ॥

अन्तर्वत्नी गर्भिणी ॥ १४ ॥

गर्भक्षेममिच्छाप्रसवञ्चेत्युभयम. ईश्वरो वरप्रदानसमर्थः नारदाच्छ्रुतमित्यनेन नारदस्य यद्गुरुत्वमभिप्रेतमेधंविधमित्याह—धर्मस्येति । धर्मस्य हरेर्भागवतसंज्ञस्य वा तत्त्वं तदुभयविधज्ञानं च गर्भस्थं मामुद्दिश्य मात्रे उपदिष्टम् ॥ १५ ॥

तदुभयं तयोः कालस्यातिक्रान्तत्वात् स्त्रीत्वात् शब्दादिविषयलोलत्वाच्च मातुस्तिरोहितमभूदित्यन्वयः "अणुरेषधर्मः" इति श्रुतिः । धर्मो हरिस्ततस्तत्र किमभूदिति तत्राह, ऋषिणेति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अनन्तानुचर इति । तस्य पूर्वत एव भक्तिसंस्कारो दर्शितः ॥ १०—१४ ॥

ऋषिरिति । शोकमात्रशान्त्यै धर्मस्य तत्त्वं साधारणस्वरूपं ज्ञानञ्चात्मविषयं प्रादात् तत्रैव मामप्युद्दिश्य निर्मलं यद्धर्मस्यैतस्य तत्त्वं भागवताख्यम् "न शोभते ज्ञानमलं निरञ्जनम्" इति न्यायेन ज्ञानञ्च यत्तदाख्यं तत् प्रादात् तत्कथने तत्तदपि प्रतिपादितवान् । किन्तु सा गृहीतुं न शशाकेति भावः ॥ १५ ॥

भवतामपि भूयान्मे यदि श्रद्दधते वचः ।
वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥ १७ ॥
जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः ।
फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तरिवति तद्वीत्यर्थः । तेनैव स्वमातरि श्रीनारदस्य सम्यगनुग्रहो नाभूदिति व्यञ्जितम् ॥ १६—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आस्यतां मत्कारागार एव प्रसवपर्यन्तमनया स्थीयतां प्रसवपर्यन्तं स्वार्थमार्गं गतः प्राप्तस्सन् मोक्ष्ये जातं पुत्रं हत्वा इमां मोक्षयामीत्यर्थः ॥ ९ ॥

त्वया हेतुभूतेन मत्स्यां मृत्युम् ॥ १० ॥

अनन्तप्रिये मयि या भक्तिस्तया हेतुना परिक्रम्य एतद्गर्भस्थाय हरेर्भक्ताय नम इति प्रणम्य च ॥ ११ ॥ १२ ॥

अन्ति अन्तिके ॥ १३ ॥

भर्त्तुरागमनानन्तरमेव वा इच्छयाप्रसूतिकस्त्वर्थं ॥ १४ ॥

उभयं गर्भस्थं स्वेच्छाप्रसवं च निर्मलमिति विशेषणात् धर्मस्य तत्त्वं भक्तियोगं भागवतधर्मं ज्ञानञ्च मामपीत्यपिकारेण मन्मातरमपि ॥ १५ ॥

तर्हि मातुस्ते भक्तिः कथं न दृश्यत इत्यत आह—तरिवति । तत्रापि बालत्वात् कालदैर्घ्याच्च कथं न तिरोदधे तत्राह, अनुग्रहेति । तेन मन्मातुस्तदनुगृहीतत्वाभावात् स्त्रीत्वकालदैर्घ्ये तत्र प्राभूतामिति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सुरद्विषो हिरण्यकशिपोः । मा विषह्यं दुस्सहं वीर्यमस्याः जठरे आस्ते अतः अनया आप्रसवमास्यतां ततश्चार्थपदवीं गतकामविषह्यं हत्वा एतां मोक्ष्ये ॥ ९ ॥

यतोऽयमनन्तानुचरः अतो महात्मा बली साक्षान्महाभागवतः अतस्त्वया संस्थां न प्राप्स्यते ॥ १० ॥

अनन्तप्रियस्य मम भक्त्या एतां परिक्रम्य तां तथाभूतां सत्कृतां विहाय गयौ ॥ ११ ॥

इहास्मिन् आश्रमे त्वमोष्यतां स्थीयताम् ॥ १२ ॥

नास्मिन् कुतोऽपि भयं यस्याः सा अन्ति निकटे ॥ १३ ॥

इच्छया स्वच्छन्देन प्रसूयन्ते तत्रापि गर्भस्य क्षेमाय ॥ १४ ॥

धर्मस्य हरिभक्तिस्तत्त्वं याथात्म्यं तत्साधन हरिज्ञानं अनुग्रहं मामप्युद्दिश्य तस्याः प्रादात् ॥ १५ ॥

तत्तु मनुभयं तिरोदधे सूक्ष्मतां जातम् ॥ १६ ॥

भाषा टीका ।

इन्द्र उवाच ॥

इन्द्र बोला, कि—इसके जठर मे सुरद्वेषी हिरण्यकशिपु का असह्य वीर्य है, इस लिये जब तक इसके संतान पैदा होगी तब तक रहने दीजिये पीछे उत्पन्न हुए पुत्र को मार कर इसे छोड दूंगा ॥ ९ ॥

नारद उवाच ॥

नारदजी बोले, कि—इसके गर्भ में जो बालक है वह निष्पाप है और साक्षात् महा भागवत है वह तेरे से नहीं मरेगा, क्योंकि ? यह अनंत भगवान का अनुचर है और बली है ॥ १० ॥

ऐसे जब कहा तब देवर्षि का वाक्य मान कर मेरी मा को छोडकर मुझे अनंत प्रियजान मेरी भक्ति से माता की परिक्रमा कर स्वर्ग को चला गया ॥ ११ ॥

तत्पश्चात् ऋषि मेरी माता को अपने आश्रम में लाकर आश्वासन कर बोले, कि—हे वत्से! जबतक तुमारा पति न आवे तब तक यहां निवास करो ॥ १२ ॥

ठीकहै, ऐसा कहकर मेरी माताभी जबतक दैत्यपति घोरतप से नहीं निवृत्त हुआ तबतक ऋषिके आश्रममें निर्भय होकर रही ॥ १३ ॥

उस आश्रम में गर्भवती पतिव्रता मेरी माता अपने भर्त्ता के आगमन के अनंतर प्रसव की इच्छा से ऋषि की परिचर्या करने लगी ॥ १४ ॥

परम दयालु समर्थ ऋषि श्रीनारदजी ने उसकी शोक शांति के लिये मेरे उद्देश करके भक्ति और ज्ञान दोनों दिये ॥ १५ ॥

बहुत कालहोने से यह स्त्री के कारण मेरी माता को भूलगया ऋषि के अनुग्रह से मुझ को अबपर्यंत भी नहीं भूला ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गुणातीत वैशारदी स्वार्थं तास्मिनः देहाद्यहङ्कारच्छेदनिपुणेत्यर्थः ॥ १७ ॥

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ।
अविक्रियः[1] स्वदृग्घेतुर्व्यापकोऽसङ्ग्यनावृतः ॥ १९ ॥
एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ।
अहम्ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥ २० ॥
स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ।
क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत ॥ २१ ॥
अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ।
विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥ २२ ॥
देहस्तु सर्वसङ्घातो जगत्तस्थुरिति द्विधा ।
अत्रैव मृग्यः पुरुषो नेतिनेतीत्यतत्त्यजन् ॥ २३ ॥
अन्वयव्यतिरेकेण विवेकेनोशताऽऽत्मना ।
सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कास्मौ वैशारदी धीरित्यपेक्षायां नारदोक्तमेव देहात्मविवेकप्रकारमाह—जन्मेति द्वाभिः । जन्माद्या जायते अस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीत्येवम्भूता इमे षड्भावविकारा वृक्षस्येव यथा फलानां दृश्यन्ते नतु तदात्मनि तथैव स्थिते देहस्य दृष्टा इत्यर्थः ईश्वरी विकारसमर्था मूर्तिर्यस्य तेन ॥ १८ ॥

तदेवं देहधर्मैस्तद्वैलक्षण्येनात्मनो देहाद्भेदो दर्शित इदानीमात्मधर्मैरेव भेदं स्फुटयंस्तदहङ्कारादिकं त्याजयति—आत्मेति । आत्मा नित्यः "अविनाशी वारेऽयमात्मा" इति श्रुतेः, अव्ययोऽपक्षयशून्यः "ऋचो अक्षरे परमे व्योमान्" इति श्रुतेः, शुद्धः "निरवद्यं निरञ्जनम्" इतिश्रुतेः, एकः "एकमेवाद्वितीयम्" इति श्रुतेः, क्षेत्रज्ञः "विज्ञातारमरेकेन विजानीयात्" इति श्रुतेः, आश्रयः "यस्मिन्द्यौः पृथिवी चान्तरिक्षम्" इतिश्रुतेः, अविक्रियः 'निष्कलं निष्क्रियं शान्तम्' इतिश्रुतेः स्वदृक् "आत्मज्योतिः सम्राडिति होवाच" इति श्रुतेः, हेतुः "स इमाँल्लोकानसृजत्" इतिश्रुतेः "व्यापकः "सत्यं ज्ञानमनन्तम्" इतिश्रुतेः असङ्गी "असङ्गो ह्ययं पुरुषः" इति श्रुतेः, अनावृतः "पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" इति श्रुतेः ॥ १९ ॥

एतैर्द्वादशभिरात्मनो लक्षणैः परैः श्रेष्ठैर्विवेकसमर्थैर्देहाद्भेदं विद्वानसङ्गार्थं मिथ्याबुद्धिं त्यजेत् ॥ २० ॥

नन्वेवं विविक्तात्मज्ञानिनामप्यपरोक्षानुभवेन ब्रह्मताप्राप्तिः कथं स्यादतोऽहङ्कारादिकं त्यजेदित्यपेक्षायां तत्प्राप्तिप्रकारं सदृष्टान्तमाह—स्वर्णमिति क्षेत्रेषु स्फुरत्स्वर्णकणेषु ग्रावसु योगैर्धमाद्युपायैस्तदभिज्ञ उपायाऽभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् । आत्मयोगैरात्मप्राप्त्युपायैः ब्रह्मगतिं ब्रह्मताम् अध्यात्मविदात्माधिकृतकार्यकारणसंघातज्ञाता ॥ २१ ॥

अध्यात्मविवेकमात्मप्राप्त्युपायमाह—अष्टाविति त्रिभिः । मूलप्रकृतिर्महदहङ्कारौ पञ्चतन्मात्राणि चेत्यष्टौ, त्रयः सत्त्वादयस्ते च प्रकृतिगुणा एव, न तु भिन्नाः एकादशेन्द्रियाणि पञ्च महाभूतानि चेति षोडश पुमानात्मा एकः प्रोक्तः कपिलादिभिराचार्यैः । एकत्वे हेतुः, एषु साक्षित्वेनान्वयात्, तदुक्तम् "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" इति ॥ २२ ॥

जगज्जङ्गमम् तस्थुः स्थावरम् अत्रैव सर्वसङ्घातात्मके देह एव पुरुषो मृग्योऽन्वेष्टव्यः सुशकश्चैतदित्याह, नेतिनेतीत्यन्यापोहे क्रियमाणे स्वयमेवातत्त्यजन् अनात्मवर्गात्पृथगुपलभ्यमान इत्यर्थः ॥ २३ ॥

मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः अत एव मणिभ्यः[illegible] सूत्रस्येवैकव्यतिरेकश्च तयोर्द्वैविध्यम्, तेन यो विवेकः पूर्वोक्तो वा तेन उशता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नायैः सृष्टिस्थिति संहारैः "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुत्युक्तसर्गाद्यनुसन्धानेनेत्यर्थः । विमृशद्भिर्विचारयद्भिः असत्वरैरव्यग्रैर्मृग्य इति पूर्वेणान्वयः ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवम् "प्रह्लाद त्वम्" इत्यादिना यद्दैत्यकुमारैः पृष्टं तस्योत्तरमुक्तम्, अथैतत्परसंप्रदायागतधर्मस्वरूपज्ञानजिघृक्षा वर्तते येन्द्रयनां मदनुग्रहेण तदुभयं सम्पत्स्यत इत्याह—भवतामिति । यदि भवन्तो मद्वचः श्रद्दधते मदुक्तार्थमहत्यातदृढाकारविषये त्वरायुक्तास्तत्रावतामपि तदुभयं भूयात् अज्ञामन्तरेणोपादिष्टमपि तत्त्वम्,

(१) स्वदृग्घेतुः इति विजयध्वजपाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

न प्रतिष्ठितं भवतीत्याह-वैशारदीति। वैशारदी निपुणतरा धीः तत्त्वविषया बुद्धिः स्त्रीणां बालानाञ्च प्रसादात् एव भूयान्न तु तां विभेत्यर्थः। तत्र दृष्टान्तः, मे यथेति. यथा प्रसादतः मम वैशारदी बुद्धिरभूत् शुश्रूषारहितायाः मन्मातुर्नाभूत् एवं सर्वेषां बालानां स्त्रीणां च प्रसादात् एव ज्ञानं प्रतिष्ठितं भवत्यन्यथा मन्मातुरिवाप्रतिष्ठितमित्यर्थः॥ १७॥

तदेवं तेषां श्रद्धामुत्पाद्य श्रद्धायुक्तान् शुश्रूषूंस्तान् दैत्यकुमारानालक्ष्य, तेभ्यो भगवद्भक्तियोगमुपदिदिक्षुस्तावत्तदङ्गभूतप्रकृतिवियुक्तात्मयाथात्म्यज्ञानयोगमुपदिशति,जन्माद्यास्त्वादिना। तावज्जीवात्मस्वरूपं देहाद्विलक्षणं विवक्षुर्देहधर्मानाह-जन्माद्या इति। ईश्वरो गुणपरिणामापादनसमर्था मूर्तिराकारो यस्य तेन कालेन निमित्तभूतेन "जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यति" इत्येवं रूपा इमे षड्भावविकाराः दृष्टाः प्रत्यक्षमुपलभ्यमानाः देहस्यैव धर्माः नात्मनः यथा वृक्षं सत्येव फलानां जन्मादयो दृश्यन्ते न वृक्षस्य तद्वदात्मन्येकरूपत्वेनैवावस्थितेऽस्य देहस्य दृष्टा इत्यर्थः। आत्मव्यतिरिक्तस्य स्थिरस्यैकरूपस्य वस्तुनोऽभावात्कथंचित्प्रदर्शनार्थमस्थिरः षड्भावविकारवानपि वृक्षस्थात्मस्थानीयत्वेन दर्शितः॥ १८॥

तदेवं देहधर्मैस्तद्वैलक्षण्यं नात्मनो देहाद्भेदो दर्शितः। अथ स्वधर्मैरेवात्मनो देहाद्भेदमाह-आत्मेति। आत्मेति विशेष्यनिर्देशः आत्मा प्रत्यगात्मा नित्यः उत्पत्तिविनाशरहितः अव्ययः अपक्षयरहितः अविक्रियः मनाग्वृद्धमानत्वरहितः यद्यपि'दृष्टा देहस्य नात्मनः'इत्यनेनैव षड्भावविकाराराहित्यमुक्तम्, तथापि फलानामिव वृक्षस्येति दृष्टान्तबलाद्यथा फलगतोत्पत्त्याद्यनाश्रयस्यापि वृक्षस्य स्वगतोत्पत्त्याद्याश्रयत्वम् एवं देहगतोत्पत्त्याद्याश्रयत्वाभावेऽपि स्वगतोत्पत्त्याद्यन्तराश्रयत्वं प्रसक्तं तदनेन निषिध्यते एवञ्च स्वतोऽन्यतो वा षड्भावविकाररहित इति फलितम्. शुद्धः प्राकृतरागादिगुणैरकलुषितस्वरूपः एकः ज्ञानैकाकारतया सर्वेषु देहेष्वेकरूपः 'एकोऽग्निहिः' इतिवज्जात्यभिप्रायक एकत्वव्यपदेशः न तु व्यक्त्यैकत्वाभिप्रायकः आत्मव्यक्तिबहुत्वस्य बहुप्रमाणप्रतिपन्नत्वात् क्षेत्रं शरीरं जानातीति तथा ममेदं शरीरमिति जानातीत्यर्थः अनेन ज्ञानाश्रयत्वमुक्तम् स्वदृक् स्वं पश्यतीति स्वदृक् स्वस्मै भासमानः अनेन ज्ञानस्वरूपत्वमुक्तम् आश्रयः देहेन्द्रियादीनामाधारो हेतुर्देहेन्द्रियाणां व्यापारहेतुः व्यापकः धर्मभूतज्ञानेन व्यापकस्वरूपस्याणुत्वात् असङ्गी जीवान्तरेण सम्बन्धरहितः अनावृतः स्वरूपस्वभावतिरोधानरहितः इदं मुक्तावस्थं स्वाभाविकं जीवात्मस्वरूपम्, यद्वा, अनावृतः स्वरूपतिरोधानरहितः बद्धदशायामपि धर्मभूतज्ञानस्यैव कर्मणा तिरोहितत्वात् देहत्वनित्यः व्ययवान् शुद्धः देवमनुष्यादिरूपेण नानाविधः ज्ञानाऽनाश्रयोऽप्येषां बान्धवस्तत्समनाश्रयः विरागहेतुर्भोग्यः पितृपुत्रत्वादिसम्बन्धवान् संकोचभाक्चेति भावः॥ १९॥

अस्त्वेवं देहात्मनः परस्परवैधर्म्यं ततः किमत आह-एतैरिति। विद्वानित्थं देहात्मनोर्याथात्म्यविदेतैरुक्तैर्द्वादशभिरात्मनो लक्षणैः परैः उत्कृष्टैः पावकैर्देहादौ आविद्यकेन देहानुबन्धिपुत्रादिषु अहं ममेत्यसदभिमानं मोहजमज्ञानजं त्यजेत. देहात्माभिमानादिकं त्यक्त्वोक्तलक्षणलक्षितात्मस्वरूपावलोकनपरो भवेदिति भावः॥२०॥

ततोपि किमत आह-स्वर्णमिति। यथा हेमकारस्तद्भिज्ञो हेमप्रकृतीनां ग्राव्णामभिज्ञः प्रथमं क्षेत्रेषु हेमग्राव्णामुत्पत्तिभूमिषु योगैरन्वेषणादिभिरुपायैराप्नुयात्,ग्राव्ण इति शेष.। विभक्तविपरिणामेनानुषक्तो वा पश्चाद्दहनादिभिरुपायैः ग्रावसु हेम आप्नुयात् एवं देहरूपेषु क्षेत्रेष्वात्मयोगैर्देहविलक्षणात्मयाथात्म्यविवेचनसाधनैरुपायैरात्मवित् उक्तविधात्मयाथात्म्यदर्शी पश्चात् ब्रह्मस्वरूपेण गुणैश्च निरतिशयबृहतः पुरुषोत्तमस्य गतिमवगति तद्याथात्म्यज्ञानं लभेत प्राप्नुयात् यथावस्थिततत्साक्षात्कारं लभेतेति यावत्॥ २१॥

एवं ज्ञानयोगस्य भगवत्साक्षात्काराख्यभक्तियोगाङ्गत्वमुक्तम् 'एतैर्द्वादशभिः'इत्यादिनोक्तासङ्गत्यागप्रकारम्,"क्षेत्रेषु देहेषु तथात्मयोगैः"इत्युक्तमेव देहविलक्षणात्मस्वरूपविमर्शनं च सप्रकारं प्रपञ्चयति, अष्टावित्यादिभिः पञ्चभिः। तावदष्टौ प्रकृतयः-

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा"॥

इत्युक्तरीत्या उक्ता अष्टौ प्रकृतयः अत्र भूम्यादिशब्दैः गन्धादितन्मात्रसहितानि पृथिव्यादीन्युच्यन्ते बुद्धिशब्देन महत्तत्त्वं त्रयः सत्त्वादयस्तद्गुणा एव प्रकृतिगुणा एव नत्वात्मनो गुणाः षोडश विकारा विकृतयः तेच कर्मज्ञानोभयेन्द्रियाणि दश पञ्चप्राणाः बुद्धिश्चित्तं वा एकं संभूय षोडश आचार्यैः गीताचार्यादिभिः प्रोक्ताः पुमानेक एकस्मिन् शरीरे एकः पुमान् जीवः प्रोक्तः कुतः? समन्वयात्. एवमेव हि प्रतिशरीरं नियमेन सुखदुःखप्रतिसन्धानजीवेश्वरबद्धमुक्तशिष्याचार्यत्वादिव्यवस्थायाः समन्वयादुपपत्तेरिति भावः। सर्वशरीरेषु जीवैकत्वे उक्तविधा व्यवस्था दुर्घटा स्यादिति भावः॥ २२॥

देहस्तु सर्वसङ्घातः प्रकृतिविकृतिसर्वसङ्घातात्मकः स च जगज्जङ्गमस्तस्थुः स्थावरश्चेति द्विविधः एवं वस्तुस्थितिरिति भावः। अस्त्वेवं वस्तुतस्त्वात्मविवेचनस्य किमायातं? तत्राह— अत्रैवेति। अत्रैव देहएव पुरुषः प्रत्यगात्मा मृग्यः विवेचनीयः कथं किं कुर्वन्, नेतिनेतीति,इति शब्दः प्रत्यक्षरष्टप्रकारद्योतकः इति नेति एवंविधो न भवति गन्धवान् भवति रसवान् भवति रूपवान् भवतीत्येवं प्रकारेणेत्यर्थः। अतत् आत्मव्यतिरिक्तं वस्तुपृथिव्यादिवस्तु तत् त्यजन् तस्मिन्नात्मबुद्धिमकुर्वन् तद्विलक्षणमात्मान्वेषणीय इत्यर्थः। अनेन "अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत" इत्युक्तं विवृतं भवति॥ २३॥

"तथात्मयोगैः" इत्युक्ताऽनात्मयोगान्विवृण्वन् तैर्मृग्यते इत्याह—अन्वयेति. अन्वयव्यतिरेकाख्येन व्यतिरेकेण नाहं जानामि-जानामि इच्छामीत्येवं बुद्ध्यादीनां ज्ञानरूपाणां ज्ञातर्यहमर्थं एवान्वयेन व्यतिरेकेण मम शिरः पाणिः पाद इति सर्वावयवेभ्यो व्यतिरेकप्रतीत्या चेत्येवंरूपेण विवेकेनानात्मनो विभागेन उशता निर्मलेनात्मनाऽहं ममेति प्रतीयमानेनात्मनाऽहंप्रतीत्यादेरित्यर्थः। सर्गस्थानसमाम्नायैः सर्गस्थित्यादिपरवेदान्तवाक्यार्थानुसन्धानैरेतैरुपायैर्देहादिभ्यः परमात्मानं विमृशद्भिरसत्तरैः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अवयवविशेषैः पुंभिरात्मा मृग्य इतिपूर्वेणान्वयः "सम्भूताः सोऽष्टेमाः त्रय्याः प्रजाः" इत्यादि सर्गस्थानादिसमाम्नायार्थानुसन्धानैरित्युक्तेऽथोऽन्येऽध्यात्मविमर्शनोपायाः परमात्मशेषत्वतच्छरीरत्वादयोऽवगता भवन्तीत्यभिप्रायेण सर्गस्थानसमाम्नायैरित्युक्तम् ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ततोऽस्माकं किं प्रयोजनमिति तत्राह—भवतामपीति। यथा मे वैशारदी धीः भगवद्विषयज्ञानमभूत्तथा तर्हि भवतामपि भूयादित्यन्वयः। न केवलं युष्माकमेव, स्त्रीणां बालानाञ्च श्रद्धातस्तत्स्यादित्याह—श्रद्धात इति। यदि स्त्रीबालानां श्रद्धास्यात्तर्हि तेषामिति ॥ १७ ॥

प्रह्लादस्तेषां स्ववचसि श्रद्धामुत्पाद्य नारदोक्तं ज्ञानमुपदिशति—जन्माद्या इति। "जातः कंसवधार्थाय भूभारहरणाय च" "जनितो तद्विष्णोः" इत्यादिषु हरेर्जन्मादिकं प्रतीयते तत्र जन्मादिमतो हरेरनित्यदेहांगशरीरस्थस्य तच्छरीरयोग्यभोगप्राप्त्या व्याकुलचित्तस्य सर्वसमर्पणानुगुणफलदानं कथं घटत इत्यादिशङ्कां दैत्यपुत्रचित्तस्थां परिहरन्नित्यतो वाह—जन्माद्या इति। इमे षड्भावा जन्मास्तित्ववृद्धिपरिणामापक्षयविनाशाख्यविकारा देहस्य दृष्टाः प्रत्यक्षेण प्रमिता आत्मनः परमात्मनो न सन्तीत्यन्वयः "षड्विकाराः शरीरस्य न विष्णोस्तद्गतस्य तु" इत्यनेन निरस्तत्वात्. दृष्टाः इत्युक्तं स्पष्टयति, फलानामिति। वसन्ताद्यवयवविशेषेण कालेन वृक्षस्य चूतादिफलानां जन्मादिकं दृश्यते यथा वृक्षस्य कालाधीनत्वं तथा देहस्येश्वराधीनत्वमिति ज्ञापनायेश्वरमूर्तिनेत्युक्तं देवदत्तस्य सर्वमिदम्मदधीनमिति मिथ्याज्ञाननिरासायोक्तमिदं तात्पर्यमिति ज्ञातव्यं तदुक्तम् "तदधीनं शरीरं च ज्ञात्वा तन्ममतां त्यजेत्" इति ॥ १८ ॥

"क्षेत्रज्ञः पुरुषो ह्यात्मा संसारी चेतनो मतः" इत्युक्तेरात्मा जीवः किं तत्पारिस्त्यन्तस्तन्निवर्तकलक्षणमाह—आत्मेति। परैरव्याप्त्यादिदोषरहितैरेतैर्द्वादशभिरात्मनो हरेर्लक्षणैः स्वरूपभूतैरुपेत इति, विद्वानहं ममेत्यनन्तभावमतत्त्वं मोहजमज्ञानजं देहादौ त्यजेदित्यन्वयः। नित्यः स्वरूपतो विनाशरहितः अव्ययः अविद्यमानो नास्तीत्यव्ययः प्रकृतिनिर्मितशरीरत्वेनाविद्यारागादिदोषविधुरत्वाच्छुद्धः एको मुख्यः मुख्यत्वं हरेरेव स्वरूपज्ञानेन क्षेत्रावयशरीरज्ञातृत्वात् स क्षेत्रज्ञः आश्रय उपजीव्यः अविक्रियः स्वतः परतो वा परिणामरहितः स्वमात्मानं स्वयमेव पश्यतीति स्वदृक् "तद्ब्रह्मवेदाहं ब्रह्मास्मि" इतिश्रुतिवश्योऽपराधीनः स्वतन्त्र इति यावत् वशं व्यापयति सर्वमिति वा व्यापकोऽन्तर्बहिर्हरिरिति शेषः "आकाशो नीलिमोन्दे" इति श्रुतेः भूताकाशस्य परिच्छिन्नत्वादव्याकृतस्य चित्प्रकृत्यात्मकत्वेन भगवदनुगृहीतत्वेन तस्याव्यापकत्वमुपचरितमनेनेति भवत्येव व्यापकः असाधारणत्वादसङ्गी "असङ्गो ह्ययं पुरुषः" इति श्रुतेः। अनावृतो ज्ञानाद्यावरणरहितः एवंविधलक्षणोपेतस्य विष्णोः सर्वं युष्मच्छरीरस्य तदधीनत्वेन तस्मिन्देहे ममतां त्यजेदित्यर्थः ॥ १९—२० ॥

हरेर्देहादिभ्यो विविक्तत्वेन ज्ञानोत्पत्तिप्रकारं वक्ति—हेमेति। यथा हेमकारो ग्रावसु क्षेत्रेषु निकषाश्मसु स्थानेषु हेमकारः क्षेत्रेषु हेमवत्सु पाषाणेषु वा योगैर्हेमावाप्त्युपायैः कषणाग्निदाहनादिपरीक्षालक्षणैर्हेमप्राप्नुयादित्यन्वयः न सर्वस्य सुवर्णकर्मित्वतउक्तं तद्विद इति तथा मुमुक्षुः पुरुष आत्मयोगैर्ध्यात्मविद्याश्रवणभक्त्याद्युपायैः देहेषु क्षेत्रेषु सम्यगालोच्य विविक्तं ब्रह्मगतिं क्रमेण देहादिभ्यो वैलक्षण्येन ब्रह्मविषयज्ञानमाप्नोतीत्यन्वयः। कोऽसावधिकारीत्यत उक्तम् अध्यात्मविदिति. "तरति शोकमात्मवित्" इति श्रुतेः। आत्मानमधिकृत्य वर्तमानं वेदान्तशास्त्रमध्यात्मं तद्वेत्ति सम्यग्जानातीति सात्त्विकादिस्वभावोऽध्यात्मं तद्वेत्तीति वा महाभूतादिर्वाऽध्यात्मं तद्वेत्तीति अध्यात्मवित् ॥ २१ ॥

कानि महाभूतादीनीति तत्राह—अष्टाविति। मूलप्रकृतिर्महदादयः * सप्तैवमष्टौ प्रकृतयः सत्त्वादिगुणानां प्रकृतावन्तर्भावसम्भवेनाष्टत्वं युक्तमितिभावेनाह, त्रय एवेति। तस्याः प्रकृतेर्गुणास्तद्गुणाः प्रकृतिजत्वाद्विकाराश्च तद्ग्रहणेन गृहीता इति नाष्टत्वासम्भव इत्याशयेनाह, विकारा इति। मनसा सहैकादशेन्द्रियाणि शब्दादिविषयाश्चेति विकाराः षोडशेति पूर्वाचार्यैः, संख्याता इति शेषः। शरीरेष्वनुगतत्वेन विकारसम्भवादेतैः सह किं न पठित इति तत्राह, पुमानिति। समन्वयादिति ल्यब्लोपे पञ्चमी समन्वयमनुगतं प्राप्येकः पुमाञ्जारायण एव केवलं शुद्ध इत्यतो विकारेषु न पठित इत्यर्थः। अत्रेदं तात्पर्यमवगन्तव्यम्. तथाहि, अभिमन्यमानजडापेक्षया पुमान् जीवः पञ्चविंशोऽभिमानचेतनविवक्षया विष्णुः षड्विंश इति सम्यगन्वयानियन्तृत्वेन अनुगतिज्ञानाज्ज्ञेय इति. तदुक्तम्—

"अभिमान्यपेक्षया विष्णुः पञ्चविंश इति स्मृतः।
जडव्यपेक्षया जीवः सम्यग्ज्ञेयो हरिः स्मृतः" ॥ इति

यद्वा आकाशादिपञ्चभूतानि सत्त्वादित्रयो गुणा इत्यष्टौ प्रकृतयः तत्र मूलप्रकृतिमहदहङ्काराणामाकाशादिष्वनुगतत्वेन पृथग्ग्रहणं न क्रियते गुणानां तदात्मकत्वेन गुणग्रहणेन तद्ग्रहणोपपत्तेः शेषं पूर्ववत् ॥ २२ ॥

तत्त्वसंख्याकथनेन प्रकृते किमायातमिति तत्राह—देहस्त्विति। सर्वेषां प्रकृतितत्कार्याणां सङ्घातः समूहः तन्निर्मित इत्यर्थः तत्त्वेभ्योऽथतदभिमानिभ्यो विविच्य परमात्मा ज्ञातव्य इत्यभिप्रायेण तत्त्वसंख्यानं कृतमितीममर्थं दर्शयति, तुशब्देन देहशब्देन प्रपञ्चो विवक्षित इति कृत्वा तं देहं विभजति, जगदिति। जगच्छब्दो द्विरावृत्त्या व्याख्येयः तथाहि जगत्समस्तं जगज्जङ्गमं तस्थु स्थावरमिति द्विधा विभक्तं किं चान इत्यत आह—अत्रेति। तत्रत्वाद्रूप तत्र भवतीत्यतत्प्रकृत्यादिकं त्यजन् हित्वा स्वतः सर्वदा भिन्न इत्यर्थः। पुरुषः पूर्णः षड्गुणोऽत्रैव देहलक्षणे प्रपञ्चे मृग्योऽन्वेषणीयो विचार्यो ज्ञातव्य इति यावत्। शतृप्रत्ययेन सदा प्रकृत्यादित्यागो न कादाचित्क इति च सूचयति, तत्र किं प्रमाणमिति तत्राह—नेति। "स एष नेतिनेतीत्यात्मा" इति श्रुतिः प्रमाणमित्यर्थः। योऽतत्त्यजंस्तत्पुरुषस्त्वजंस्तेनेति वा अतत्त्यजतीत्यतत्त्वकृत् तेनातत्त्वजेति वा पाठः ॥ २३ ॥

* महत्तत्त्वाहङ्कारतत्त्वपञ्चमहाभूतानि।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कया युक्त्या मृग्यत इति तत्राह—अन्वयेति । अन्वययुक्त्या व्यतिरेकेण यत्र यत्र जगत्तत्र तत्र ब्रह्मेत्यन्वयः यत्र यत्र ब्रह्म न तत्र तत्र जगत्परिच्छिन्नत्वादिर्व्यतिरेकस्तद्रूपया युक्त्याऽऽकाशवत् जगद्व्याप्तत्वेन यदेतदसङ्गत्वरूपापृथक्त्वेन चेति युक्त्या निश्चितेन विवेकेनाक्तेन युक्तेनात्मना मनसा, ननु, व्याप्तिग्राहकप्रमाणाभावेनाभासत्वान्वयव्यतिरेकयो न स्यादिति तत्राह—सर्गेति । अत्र सर्गस्थानाभ्यां संहारादिकमुपलक्ष्यते न सहिता स्वरा येस्ते असस्वरास्तैः "सर्वेस्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रो बलं ददातीति सर्वे ऊष्माणो ग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददातीति सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति" इति श्रुतेः विमृशद्भिः विचारं कुर्वद्भिः "को न आत्मा किं ब्रह्म" इत्यादि श्रुतेः सर्गस्थानादिविषयैः समाम्नायैः निर्दोषगुणोपेतैर्वेदैः "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति" इत्यादिलक्षणैः "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इत्यादिकैश्चाऽनुगृहीतया ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र देहाद्यध्यासपरित्यागार्थं स्वमातृप्रतिपन्नमात्मज्ञानमात्रमापतन्नाह—जन्माद्या इत्यादिभिः ॥ १८ ॥

एको न तु देहेन्द्रियादिसंघातरूपः । क्षेत्रज्ञो ज्ञातृत्वादिधर्मकः इन्द्रियादीनामाश्रयः स्वाभाविकज्ञातृत्वादिना विक्रियः स्वदृक् स्वस्मै स्वयं प्रकाशः हेतुः सर्गादिनिमित्तम्. तदुक्तं श्रीमूतेन "हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः" इति. व्यापको व्याप्तशीलः असङ्गी अनावृतश्च स्वतः स्वप्रकाशरूपत्वात् ॥ १९ ॥

मोहजं त्यजेदिति । देहाद्यधिकरणकमोहजस्यैव त्यागो न तु स्वरूपभूतस्यत्यहमर्थस्य इति व्यज्यते. तदेवं जीवस्याणुत्वात् सूक्ष्मं ज्योतीरूपं इत्येके । तथैव हि कौस्तुभांशत्वेन व्यञ्जितम्. तथाच स्कान्दे प्रभासखण्डे जीवनिरूपणे "नास्य रूपं वर्णो वा प्रमाणं दृश्यते क्वचित् । न शक्यं कथितुं वापि सूक्ष्मत्वाऽनन्तविग्रहः ॥ वालाग्रशतभागस्य शतधा कल्पितस्य च । तस्मात् सूक्ष्मतरो देवः स चानन्त्याय कल्पते ॥ आदित्यवर्णं सूक्ष्माभमाब्धिजन्तुमिव पुष्करे । नक्षत्रमिव पश्यन्ति योगिनो ज्ञानचक्षुषा" इति ॥ २० ॥

तत्पदार्थज्ञानमप्याह—स्वर्णमिति ॥ २१—२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मूर्यादिवदाशीर्वादेन स्वस्मिन् वर्तमानं श्रीनारदानुग्रहं तेष्वपि भक्तिकारणत्वेनाशास्ते. यदि भवन्तः श्रद्धधते तदा वैशारदी विशारदो भगवांस्तद्विषया भवतादिति मदनुग्रहात् श्रद्धा श्रद्धातो भक्तिः भक्तेः प्रेमेत्याप्रेमपर्यन्ताधिगन्तव्यम् ॥ १७ ॥

केषांचित् मुमुक्षुभक्तानां तु ज्ञानमपेक्षितमिति तदाह—जन्माद्या, इति दशभिः । जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीत्येवंभावाः षड्विकाराः सदा स्थितस्य वृक्षस्य प्रतिवर्षं फलानामेव यथा न तु वृक्षस्य तथैव नित्यस्थितस्यैवाऽऽत्मनो देहस्यैव षडिमे दृष्टाः न त्वात्मनः ईश्वरस्य मूर्तिः समष्टिव्यष्ट्यात्मकं शरीरं यतो भवति तेन ॥ १८ ॥

जीवात्मनि षड्विकाराभावभावना त्वं पदार्थशुद्धिः सा च तत्पदार्थस्य परमात्मनश्चिन्तनरूपया भक्त्यैव स्यादित्यतः परमात्मस्वरूपमाह—आत्मेति द्वाभ्याम् । आत्मा परमात्मा नित्यः "अविनाशी वा अरेऽयमात्मा" इति श्रुतेः, अव्ययः अपक्षयशून्यः "अक्षोऽत्रेपरमे व्योमन्" इति श्रुतेः । शुद्धः "निरवद्यं निरञ्जनम्" इति श्रुतेः एकः "एकमेवाद्वितीयम्" इति श्रुतेः । क्षेत्रज्ञः "विज्ञातारमरे केन जानीयात्" इति श्रुतेः । आश्रयः "यस्मिन् द्यौः पृथिवी चान्तरीक्षम्" इति श्रुतेः । अविक्रियः निष्कलं निष्क्रियं शान्तम्" इति श्रुतेः । स्वदृक् "आत्मज्योतिः सम्राडिति होवाच" इति श्रुतेः । हेतुः "स इमान् लोकानसृजत" इति श्रुतेः । व्यापकः "सत्यं ज्ञानमनन्तम्" इति श्रुतेः । असङ्गी "असङ्गो ह्ययं पुरुषः" इति श्रुतेः । अनावृतः "पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" इति श्रुतेः ॥ १९ ॥

आत्मनः परमात्मनः परैर्जीवात्मलक्षणैर्द्वादशभिर्लक्षणैः नित्यं चिन्तितैरिति शेषः देहादौ देहे दैहिकेषु च असदभावस्वभावपरमात्मचिन्तनं विना सत्यपि विवेके दिग्भ्रम इव मोहो न निवर्तत इति भावः ॥ २० ॥

नन्वेवंभूतः परमात्मा क वर्तते ? इति चेत् स्वदेहेऽपीति तदुपलब्धिप्रकारं सदृष्टान्तमाह—स्वर्णमिति । ग्रावसु स्फुरत्स्वर्णकणापाषाणेषु क्षेत्रेषु स्वर्णाकरस्थानेषु योगैर्धमनादिभिर्गुलवर्त्तिकादिभिरेवोपायैः तदुपायाभिज्ञो हेमकारो यथा स्वर्णमाप्नुयात् तथैव देहरूपक्षेत्रेषु आत्मयोगैरात्मप्राप्त्युपायैर्भक्त्यनाद्यैः ब्रह्मगतिं ब्रह्मणः परमात्मनो गतिमुपलब्धिम् ॥ २१ ॥

अध्यात्मविद्भिरुक्तमतोऽध्यात्मवस्त्वाह—अष्टाविति सार्धेन । मूलप्रकृतिर्महदहङ्कारो पञ्चतन्मात्राणि चेत्यष्टौ । त्रयः सत्त्वादयो विकाराः एकादशेन्द्रियाणि पञ्च महाभूतानि चेति षोडश आचार्यैः कपिलादिभिः प्रोक्ताः पुमानात्मा एकः समन्वयात् एषु सर्वगत्वं संबन्धं प्राप्य वर्तमानः यद्वा समन्वयं सम्बन्धं अनति सततं प्राप्नोति "अत सातत्यगमने" इति ॥ २२ ॥ ,

स्वत्वमज्ञानः उक्तलक्षणमर्थं तत्समूहरूपः जगत् जङ्गमो मनुष्यादिः तस्थुः स्थावरो वृक्षादिः अत्रैव देह एव पुरुषः परमात्मा मृग्यः । अन्वेषणप्रकारमाह—नेति नेतीत्यतत् तद्भिन्नं वस्तु त्यजन् त्यजेदित्यर्थः ॥ २३ ॥

ननु, तर्हि तत्त्वय एव अनवस्थागे सूक्ष्ममेधाऽविशिष्यते इत्यत आह—अन्वयेति । देहे परमात्मनोऽन्वयः परमात्मनि देहव्यतिरेको यः प्रसिद्धस्तेन जडानामपि बुद्ध्यादीनां यदन्वयेनैव प्रवृत्तिः बुद्ध्यादिव्यतिरिक्तश्च यः परमात्मा देहस्थ इति यो विवेकस्तेन तथा उशता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नायैः सृष्टिस्थितिसंहारैः पराम्रष्टेरिति शेषः "यतो वा इमानि

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भूतानि जायन्ते" इत्यादि श्रुत्युक्त सर्गाद्यनुसन्धानेनेत्यर्थः । असत्त्वैरेऽस्यमैर्मुग्यः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदि भवन्तो मद्वचः श्रद्दधते तर्हि श्रद्धातो भवतां स्त्रीणां बालानामपि मे मम यथा वैशारदी विशारदो हरिस्तद्विषयकज्ञानभक्तिमती धीः भूयाद्भवेत् ॥ १७ ॥

हरिभक्तिबोधं ज्ञानञ्च भाक्तुं तद्ग्रहणयोग्यतानिष्पादकात्मानात्मविवेकोपदेशपूर्वकं जन्माद्या इत्यारभ्य "एतावानेव लोकेऽस्मिन् पुंसः स्वार्थः परः स्मृतः । एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणम्" इत्यन्तेन ग्रन्थेनोपदिशति, ईश्वरात्सर्वप्रवर्तकात् क्षणादिद्विपरार्द्धवत्सरमूर्तिरभिव्यक्तिर्यस्य तेन वृक्षस्येव अतिप्रसिद्धषड्विकाराणां तत्फलानामिव च जन्माद्याः जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते विनश्यतीतीमे षड्भावविकाराः देहस्यैव दृष्टाः नत्वात्मनः वृक्षगतस्य देहस्य चेत्यर्थः । एवं देहस्य षड्विकारयुक्तत्वेन च देहादावहं ममेत्यसद्ग्राहो न कार्य इति भावः ॥ १८ ॥

अथ सर्वस्य चेतनाचेतनस्य भगवत्पृथक्स्थितिप्रवृत्त्याद्यभावात्तदीयत्वाच्च अहं ममेत्यसद्भावं देहादौ त्यजेदिति वक्तुं भगवतोऽपि जन्मादि षड्विकाररहितत्वं तदसाधारणान् एकत्वसर्वाश्रयत्वसर्वहेतुत्वव्यापकत्वानावृतत्वादीन् गुणान् आह—आत्मेति । आत्मा "एष त आत्मान्तर्यामी, आत्मा वा अरे द्रष्टव्यः" इत्यादिप्रसिद्धः परमेश्वरः नित्यः जन्ममृत्युशून्यः अव्ययोऽपक्षयशून्यः किंबहुना शुद्धः सर्वदोषरहितः एकः निरस्तसमानातिशयः क्षेत्रज्ञः समष्टिव्यष्टिरूपसर्वशरीरज्ञः आश्रयः सर्वचेतनाचेतनानां स्थित्यादिप्रदः हेतुः सर्वोपादाननिमित्तकारणभूतः तथापि अविक्रियः स्वरूपतोऽविकारी नित्यसिद्धाभिः स्वशक्तिभिः चेतनाचेतनरूपाभिः कूर्माङ्गप्रसारणाऽप्रसारणन्यायेन सृष्टिसंहारौ करोति । तथोक्तम्, भारते "प्रसार्य च यथाङ्गानि कूर्मः संहरते पुनः । एवं भूतानि भूतात्मा सृष्ट्वा संहरते पुनः" इति स्वदृक् स्वप्रकाशः व्यापकः सर्वत्र सर्वदा वर्तमानः असङ्गी सर्वचेतनाचेतनदोषास्पृष्टः अनावृतो निरावरणः । जीवपरो नायं श्लोकः "जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः" इत्यनेनैव जीवजन्माद्यभावप्रतिपादनात् एकत्वादीनां भगवद्धर्माणां जीवे असम्भवात् सति मुख्यार्थे अर्थान्तरकल्पनाया अन्याय्यत्वाच्च ॥ १९ ॥

आत्मनः परमेश्वरस्य परैः परमेश्वरलक्षणैः नाहं देहरूपः न चाहं स्वातन्त्र्येण तदीयः न च देहादिकं मम किन्तु भगवत एव सर्वं देहगेहादिकमित्येवमहं ममाभिमाननिराकरणहेतुभूतैः अहं ममेत्यसद्भावं देहादौ वर्तमानं मोहजमज्ञानकृतं त्यजेत् ॥ २० ॥

अचेतनं जडत्वसंघातत्वादिना तद्भिन्नं ज्ञातृत्वादिना चेतनं चेतनाचेतनभिन्नं तदुभयनियन्तृत्वादिना सर्वोपास्यं सर्वात्मभूतं ब्रह्म चेति तत्त्वत्रयज्ञानप्रकारमाह, अश्मेति । यथा हेमकारः स्वर्णभिज्ञः धातुषु स्फुरत्स्वर्णकणेषु स्वर्णं तत्प्राप्तियोगैराप्नुयात् एवं क्षेत्रज्ञयोगैः तदभिज्ञः क्षेत्रज्ञोऽनेकदेहविज्ञीवस्तत्स्वरूपगुणादिश्रवणमननादिरूपैर्योगैः ज्ञातृत्वाहमर्थत्वादियोगैश्च क्षेत्रेषु स्वपरशरीरेषु ज्ञेयत्वाचेतनत्वादिना क्षेत्रज्ञभिन्नतया निश्चितेषु आप्नुयात् क्षेत्रज्ञमिति शेषः । तथा देहेषु समष्टिव्यष्टिरूपेषु अध्यात्मवित् आत्मनि क्षेत्रज्ञे नियन्त्रे अधिवर्तमानमन्तरात्मानं वेत्तीति स तथा ब्रह्मवित् आत्मयोगैः आत्मा अन्तरात्मा तत्स्वरूपगुणादिश्रवणमननादिरूपैर्योगैरुपायैः सर्वनियन्तृत्वादिभिश्च ब्रह्मगतिं परमात्मतत्त्वं प्राप्नुयादित्यर्थः ॥ २१ ॥

चेतनाचेतनब्रह्मपदार्थान् दर्शयन् अचेतने चेतनस्य रतिर्बन्धहेतुः ब्रह्मणि भगवति रतिस्तु मोक्षहेतुरित्याह, अष्टौ इत्याद्यष्टभिः प्रकृतिः महदहंकारौ पञ्च तन्मात्राणि चेत्यष्टौ प्रकृतयः । तस्याः प्रकृतेस्त्रयः सत्त्वादयो गुणाः एकादशेन्द्रियाणि पञ्चमहाभूतानि चेति षोडश विकाराः अचेतनात्मकाः आचार्यैः प्रोक्ताः । पुमान् चेतनश्च प्रोक्तः जातावेकवचनम् "चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" इति जीवबहुत्वश्रवणात् "सर्वे वेदा यत्पदमामनन्ति" वेदैश्च सर्वैरहमेव वेद्यः "तत्तु समन्वयात्" इति श्रुतिस्मृतिसूत्रेभ्यः समन्वयात् सर्वेषु वेदेषु विषयत्वेन समन्वयात् एकः सर्ववेदार्थभूतो भगवांश्च आचार्यैरौपनिषदैः प्रोक्तः ॥ २२ ॥

तत्र भगवतो देहः सर्वसङ्घातः विराड्रूपः जीवस्य देहद्वयमाह, जगत्तस्थुरिति द्विधेति । तद्बोधप्रकारमाह—गत्रैवेति सार्द्धेन । विमृशद्भिर्विचारयद्भिः असत्त्वैरेऽस्यमैर्मुमुक्षुभिः उद्यतात्मना शुद्धेन मनसा अत्रैव देहेन्द्रियमनोबुद्धिप्राणेभ्यो जीवो भिन्नः चेतनत्वाद्धीश्वरवत् इत्यन्वयेन देहेन्द्रियमनोबुद्धिप्राणेष्वेकतमोऽपि न जीवस्तस्य चेतनत्वाभावात् पाषाणादिवदिति व्यतिरेकेण च हेतुना एवं नेतिनेतीति देहाद्यात्मत्वनिषेधेन असदनात्मभूतं देहेन्द्रियादिकं त्यजन् देहो नात्मा पाञ्चभौतिकत्वात् गृहादिवत् इन्द्रियेष्वेकतमोऽपि नात्मा करणत्वाद्दात्रादिवत् प्राणो नात्मा वायुविशेषत्वात् व्यजनजन्यवायुवत् इत्येवमज्ञानगृहीतं तदात्मत्वं परिहरन् पुरुषो जीवः मृग्यः तन्त्रादिना पुरुषः परमेश्वरश्च सर्गस्थानसमाम्नायैः सृष्टिस्थितिप्रतिपादकैर्वेदैः "यतो वा इमानि भूतानि जायन्ते" इत्यादिभिः चेतनाचेतनरूपेभ्यः सृज्येभ्यो भूतेभ्यः कृत्स्नत्वाद्विलक्षण एवेति द्योतितो यो विवेकस्तेन मृग्यः इतिद्वयोरन्वयः ॥ २३—२४ ॥

भाषा टीका ।

जो हमारे वाक्य में श्रद्धाहो तो तुमारी भी देहाद्यहंकार छेदन में निपुण मतिहो, स्त्री और बालकों की मति शुद्ध होती है जैसे कि मेरी ॥ १७ ॥

जन्मादिक ये छः भाव देह के हैं आत्माके नहीं सो भी ईश्वरात्मक काल कृत है जैसे वृक्षके रहते २ फूलों के ॥ १८ ॥

और आत्मा तो नित्य अव्यय शुद्ध एक क्षेत्रज्ञ आश्रय विकार रहित स्वदृक् हेतु और प्रकृति का व्यापक होकर भी असंगी और अनावृत है ॥ १९ ॥

इन आत्मा के द्वादश लक्षणों से विद्वान् देहै गेहादि के

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः।
ता येनैवाऽनुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥ २५ ॥
एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः।
स्वरूपमात्मनो बुध्येद्गन्धैर्वायुमिवान्वयात् ॥ २६ ॥
एतद्द्वारो हि संसारो गुणकर्मनिबन्धनः।
अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवेष्यते ॥ २७ ॥
* (मनोमयत्वात्सर्वार्थाः स्वप्नजागरयोः समाः।
दृष्टानर्थानपि ध्यातुः शोकमोहभयप्रदाः ॥ ० ॥
परस्य निर्गुणस्यापि गुणसङ्गाज्जनिर्मृतिः।
व्यक्तं जन्माप्ययप्रोक्तं छायामस्येव न स्वतः।
हरिसञ्चिन्तया सर्वे प्रयान्ति परमम्पदम् ॥ ० ॥)
तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मनाम्।
बीजनिर्हरणं योगः प्रवाहोपरमो धियः ॥ २८ ॥
तत्रोपायसहस्राणामयं भगवतोदितः।
यदीश्वरे भगवति यथा यैरञ्जसा रतिः ॥ २९ ॥
गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च।
सङ्गेन साधुभक्तानामीश्वराराधनेन च ॥ ३० ॥
श्रद्धया तत्कथायां च कीर्त्तनैर्गुणकर्मणाम्।
तत्पादाम्बुरुहध्यानात्तल्लिङ्गेक्षाऽर्हणादिभिः ॥ ३१ ॥
हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः।
इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ३२ ॥

भाषाटीका।

में मोह से उत्पन्न जो मैं मेरा यह असद्भाव तिसको छोड़े ॥ २० ॥

जैसे अभिज्ञ सुवर्णाकार क्षेत्र (खेत) में सुनहले पाषाण में से उपायों से स्वर्ण को प्राप्तहोता है, वैसेही अध्यात्मवेत्ता आत्म योग से देह में ब्रह्मगति को प्राप्त होता है ॥ २१ ॥

आचार्यों ने अष्ट प्रकृति कहीं हैं और उनके गुण तीन कहे हैं तथा प्रकृति के विकार षोडश हैं और इन में साक्षित्वेन अन्वित होने वाला पुरुष एक है ॥ २२ ॥

सर्व संघात रूप देह स्थावर जंगम भेद से दो प्रकारका है इसी देह में अनात्म वस्तु के लक्षणों से भिन्न आत्मा को ढूँढना चाहिये ॥ २३ ॥

अन्वय व्यतिरेक से हुआ जो विवेक तिससे और शुद्ध मनसे तथा सृष्टि स्थिति संहार के अनुसंधान द्वारा विचार करने वाले सत्यपुरुषों से ढूँढने के योग्य है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

विमर्शप्रकारमाह—बुद्धेरिति द्वाभ्याम्। अध्यक्षः साक्षी ॥ २५ ॥
अत एभिर्बुद्धिभेदैः परिणामैः पर्यस्तैः परितः स्थितैरमात्म-धर्मत्वेन निरस्तैः बुद्धिधर्मत्वे हेतुः त्रिवर्णैस्त्रिगुणात्मकैः क्रियोद्भवैः

---

*॰ श्लोकाविमौ विजयध्वजरीत्याऽधिकौ पठ्येते ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्मजन्यैः बुद्धेरेव त्रिगुणात्मकत्वात् कर्मकर्तृत्वाच्च तस्या एवैता अवस्थाः आत्मा तु बुद्ध्यन्वयात्तदवस्थावानिवाभाति न तत्त्वत इत्यमात्मनः स्वरूपं बुध्येज्जानीयादित्यर्थः । अत्र दृष्टान्तः कुसुमधर्मैर्गन्धैस्तदाश्रयं वायुमिव ॥ २६ ॥

ननु, तर्हि यथा कुसुमोपाधिकोपि वायोर्गन्धो विवेकज्ञानेन निवर्तते एवमात्मनः संसारो न निवर्तत इत्याशङ्कयाऽऽह, एतद्द्वारो बुद्धिद्वारकस्तदवस्थाद्वारको वा संसारो न स्वतः हि यस्मात् बुद्धेर्ये गुणाः कर्माणि च तैर्निबध्यत इति तथा स चाज्ञानमूलोऽतोऽपार्थो मिथ्याभूतोऽपि स्वप्न इवेष्यते वायोस्तु गन्धद्रव्यसम्बन्धस्य वास्तवत्वाद्विषमो दृष्टान्तः ॥ २७ ॥

यस्मादेवं निवृत्तिर्घटते तस्माद्बीजमज्ञानं तस्य निर्हरणं दहनम् किं तत् योगः कथम्भूतः धियः प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा ॥ २८ ॥

तदेवं ज्ञानप्रकारमुक्त्वा तत्साधनं धर्मस्य तत्त्वं नारदोक्तमेवाऽऽह–तत्रेति, पञ्चभिः । यैर्धर्मैर्यथा यथावदनुष्ठितैर्भगवति श्रीनारायणे रतिरिति, यद्वयमुपायो भगवतोक्तः । तथा च गीतासूक्तम्—

" यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् " ॥

इति "भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः" इत्यादि च ॥ २९ ॥

तत्रैवान्तरङ्गान्धर्मानाऽऽह, गुरोः शुश्रूषया भक्त्या प्रेम्णा सर्वेषां लब्धानामर्पणेन च ॥ ३० ॥

तस्य लिङ्गानां मूर्तीनामीक्षणमर्हणमादिर्येषां वन्दनादीनां तैश्च ॥ ३१ ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अन्यानपि तद्विमर्शनोपायान् वदंस्तैः प्रत्यगात्मस्वरूपं देहविलक्षणमवगच्छेदित्याह—बुद्धेरिति । जागरणं स्वप्नः सुषुप्तिरिति एतास्तिस्रो बुद्धेर्वृत्तयः व्यापाराः ता वृत्तयो येनैवाऽनुभूयन्ते स एव परः देहेन्द्रियबुद्ध्यादिभ्योऽन्यः अध्यक्षो देहादीनां द्रष्टा धारको वा पुरुषः प्रत्यगात्मा जागरणं नाम बाह्येन्द्रियव्यापारानुविद्धा बुद्धिवृत्तिः स्वप्नस्तदननुविद्धा सुषुप्तिर्बुद्धिवृत्त्युपरमः तदुपरमोपि तत्सम्बन्ध्येवेति बुद्धेर्वृत्तय इत्युक्तम् एतद्वृत्तित्रयज्ञातृत्वाश्रयत्वेन यः प्रतीयते स प्रत्यगात्मेति भावः ॥ २५ ॥

एतदेव सदृष्टान्तं विशदयन्नेतमादिभिरुपायैरात्मस्वरूपं बुद्ध्येदित्याह—एभिरिति । एभिस्त्रिवर्णैस्त्रिविधैः सत्त्वादिगुणत्रयमूलकैर्वा पर्यस्तैर्व्यस्तैः क्रियोद्भवैः पुण्यपापात्मककर्मनिमित्तैर्बुद्धिभेदैर्बुद्धिवृत्तिभेदैर्जागरादिभिरुपलक्षितमात्मनः स्वरूपं विद्यात् यथा गन्धैः कुसुमादिगतैरुपलक्षितं तदाश्रयं वायुं बुध्यति तद्वत्. कुतः ? अन्वयाज्जागरणाद्यवस्थात्रयेऽन्वयादनुवृत्तेः यथा पवमात्मककर्मणा नवतपङ्कजादिकुसुमादिगतं गन्धमादाय तदाश्रयतया तदन्वितं प्रवहन्तं वायुं ततःपृथग्भूतमुपलक्षयते पार्थिवकुसुमादिगतस्य गन्धस्य न वायुराश्रयस्तदन्वयात्तु वायोः तदाश्रयत्वम्. अत एव तदन्वयापाये केवलस्पर्शगुणस्य वायोरुपलम्भः ततो गन्धात्पृथगेव वायुः स्वाभाविकस्पर्शगुण इति तं यथोपलक्षते तथा बुद्धिभेदो न स्वभावतः आत्मगता तेषां स्वाभाविकत्वेऽन्यतमबुद्धिभेदेऽन्यतमस्योपलम्भप्रसङ्गः किन्तु कर्मविशेषबुद्धिसम्बन्धप्रयुक्तवृत्त्यन्वयात्तदनुभवोपलम्भः स्वभावस्त्वात्मा तद्वृत्त्यनन्वितएव ततःपृथग्भूत इत्येवं तं बुद्ध्येदित्यर्थः ॥ २६ ॥

तदेवं देहाद्यात्मविवेकस्य भावस्यागमकारो देहविलक्षणात्वेनात्मविमर्शनप्रकारश्चोक्तः अथैवंभूतस्य प्रत्यगात्मनः कुतस्तद्देहादिसम्बन्धरूपः संसारो यस्मिन् न सन्नाव इत्याशङ्कायां त्रिवर्णैः क्रियोद्भवैरिति परिहारः सूचितः । तमेव विशदयितुं स्वरूपयाथात्म्याज्ञानमूलकदेहात्मभ्रमादिरूपाऽनादिमोहनिमित्तगुणकर्मसम्बन्धप्रयुक्तः संसारस्तस्य एवात्मनः स्वरूपप्रयुक्तत्वाभावादपुरुषार्थोऽप्यौपाधिकत्वाद्यावदुपाधिबुद्धिसंम्बन्धद्वाराऽनुवर्तते इत्याह—एतद्दिति । एष बुद्धिसम्बन्ध एव द्वारं यस्य स संसारः स्वप्न इवाल्पास्थिरत्वात्स्वप्नतुल्योऽतएवापार्थः अपुरुषार्थोऽपि पुंसः प्रत्यगात्मनोऽर्प्यते प्राप्यते कर्तुः पुंसः शेषत्वविवक्षया षष्ठी पुंसां संसारः प्राप्यत इत्यर्थः । बुद्धिसम्बन्धे हेतुं वदन्संसारं विशिनष्टि—अज्ञानमूल इति । अज्ञानं मूलं कारणं यस्याज्ञानमूलः स्वपरयाथात्म्याज्ञानमूलकबुद्धीन्द्रियसम्बन्धनिमित्तोदेहतदनुबन्धिरूपः संसार इत्यर्थः । कथमुक्तविधस्यात्मनो ज्ञानसम्बन्ध इति शङ्कां निराकुर्वन् संसारमेव विशिनष्टि. गुणकर्मनिबन्धन इति । गुणकर्माधीनः सत्त्वादिगुणपरिणामानुगुणकर्मपरिपाकाधीन इत्यर्थः । अयं भावः । स्वभावतः सर्वे प्रत्यगात्मानः "आत्मा नित्योऽव्ययः" इत्याद्युक्तविधा अप्यनादिकर्मणा सत्त्वादिप्राकृतगुणसंसृष्टास्तत्र तत्तत्कर्मपरिपाकवशाद्गुणपरिणामस्ततः स्वपरयाथात्म्याज्ञानं ततो गुणकर्मानुरूपं परमात्मसृष्टबुद्धीन्द्रियसम्बन्धः ततो देहतदनुबन्धिसम्बन्धरूपः संसारस्ततो देहात्माभिमानस्ततः पुनः कर्म ततः पुनर्गुणपरिणामादिरित्येवं परिवृत्तिर्यावत्कर्मोपाध्यनुवर्तत इति ॥ २७ ॥

यतोऽयमुक्तविधस्याप्यात्मनो देहात्मभ्रमादिरूपाऽज्ञानमूलककर्मनिमित्तः संसारस्तस्माद्भवद्भिः कर्मनिवारणोपायोऽनुष्ठेय इत्याह, तस्मादिति । तस्मात्संसारस्याज्ञानमूलगुणकर्मायत्तत्वात् त्रिगुणात्मनां सत्त्वादिगुणत्रयपरिणामहेतूनां कर्मणां यद्बीजं मूलं देहात्मभ्रमादिरूपं तस्य निर्हरणं निर्हरणोपायात्मको यो योगो वक्ष्यमाणः स च धियः प्रवाहः शब्दादिविषयकं ज्ञानं तस्योपरतिरूपो भवद्भिः कर्तव्यः ॥ २८ ॥

वक्ष्यमाणभगवद्भक्तियोगस्यैव बीजनिर्हरणोत्तमोपायत्वमाह, तत्रेति । तत्रावश्यं बीजनिर्हरणोपाये कर्तव्ये सति उपायसहस्राणां मध्येऽयमेवोत्तम उपायः कथितो भगवता, कोऽसौ ? यैः साधनैः भगवतीश्वरे रतिरनुरागः प्रीतिरञ्जसा सुखेन यथा स्यादित्येवः, स्वसाधनैरनुगृहीता भगवति रतिरित्येष एव उत्तम उपाय इति—

"नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन !" ॥ इति.

"न मे भक्तः प्रणश्यति" इत्यादिना तत्र तत्र भगवता प्रोक्त इत्यर्थः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रतिरित्यनेन निरतिशयप्रीतिरूपापन्ना भक्तिरुच्यते तस्या एवसाक्षाद्भगवत्प्राप्तिहेतुत्वं संसारनिवर्तकत्वञ्च सूच्यते ॥ २९ ॥

सा च कैः साधनैर्निष्पद्यते इत्यपेक्षायां साधनानि वदंस्तैरेवकृतेन, ध्यानयोगेन निष्पद्यते इत्याह—गुरुशुश्रूषयेत्यादिभिश्चतुर्भिः । गुरुशुश्रूषया गुरूणां परिचर्यया गुरुश्चस्तस्य भगवच्छया वा भक्त्या गुरूणां भक्त्या उपासनेन सर्वेषां गुर्वपेक्षितानां मध्ये लाभः लभ्यते इति लाभः स्वस्य सुलभं यत्तस्य समर्पणेन, यथाशक्ति तदपेक्षितसमर्पणेनेत्यर्थः । साधु यथा भवति तथा भगवद्भक्तानां सङ्गेन साधवः कोपमात्सर्यलोभाशुभमतिराहित्यरूपसाधुलक्षणलक्षिता भक्तास्तेषां सङ्गेन वा ईश्वराराधनेनार्चाविग्रहाराधनेन हृदयकमलस्थस्य मानसोपचारैराराधनेन वा. अर्हणादिभिरित्यर्चाराधनस्य वक्ष्यमाणत्वात् ॥ ३० ॥

तत्कथायामीश्वरकथायां श्रद्धया श्रवणासक्त्या ईश्वरस्य गुणानां कर्मणां कीर्तनैस्तस्येश्वरस्य पादाम्बुजयोर्ध्यानात्तल्लिङ्गस्यार्चाविग्रहस्येक्षणार्हणादिभिर्दर्शनपूजादिभिः आदिशब्देन प्रणामपरिक्रमादिसंग्रहः ॥ ३१ ॥

किञ्च भगवानीश्वरः सर्वभूतेष्वन्तरात्मतया वर्ततेऽतः सर्वाणि भूतानि भगवदात्मकानीति बुद्ध्या यथाशक्ति यथायोग्यं तद्भूतान्यर्पितैः कामैः साधु मानयेत्समानयेदित्यनेन च ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विमृश्य निर्णयप्रकारं दर्शयति, बुद्धेरिति । सत्त्वबुद्ध्यादिषादेस्तु जीवोऽपि कश्चिद्धार्यते इति वचनाद्बुद्धेर्जीवस्य जागरणाद्यावृत्तयोऽवस्थास्ता येन परमात्मना प्रेरितेन जीवेनानुभूयन्ते "जाग्रदाद्याः कर्म चैव सुखदुःखे च तस्य हि" इति वचनात् । स परः पुरुषोऽध्यक्षः "जाग्रदादेः परो द्रष्टा सुखानन्दो हरिः स्मृतः" इति वचनात् । सोऽध्यक्षो जाग्रदादिनाभिगतेन्द्रियसुखदुःखपरो जीवः परो विश्वादिविग्रहाङ्गरस्य इत्युत्तराङ्कस्यार्थभेदो ज्ञातव्यः एव शब्देन कालादिकं व्यावर्तयति ॥ २५ ॥

"कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ । प्राज्ञः कारणबद्धस्तु" इति वचनाद्विश्वादिविग्रहाभासगणावस्थत्वं जीवस्य कथं जीवधर्माक्रान्तत्वात्तस्येति तत्राह, एभिरिति । बुद्धीनां ज्ञानानां भेदस्तारतम्यलक्षणो यैर्ज्ञायते तैर्जीवतारतम्यज्ञापकैरत एव पर्यस्तैरेकत्र समस्तैरभिन्नैर्वर्णैस्त्रिभाववर्णैर्वर्णान येषां त तथा तैर्जाग्रदादिभिस्त्रयो वर्णाः शुक्लकृष्णपीतलक्षणा येषां ते तैः सत्त्वादिगुणैर्वा स परमात्माऽज्ञजनदृष्ट्यात्मनो जीवस्य स्वरूपं रूपसमानरूपं कार्यादिबद्धं भजत इति दृश्यते न तु प्राज्ञजनदृष्ट्या तद्दृष्ट्या ज्ञानानन्दादिसमानं रूपं धृत्वा तत्स्वरूपं भजत इति "स जीवेन सहस्थानात्तत्स्वरूपः प्रदृश्यते" इति स्मृतेः । अन्वयादीन्वग्याक्ष्यादिष्वनुगतत्वात्कीदृशैः क्रियोद्भवैः क्रियया उद्भवो येषां ते तथा तैः कर्मजनितैः यद्वा क्रियाया उद्भवो येभ्यो गुणेभ्यस्ते तथा तैः शुक्लसत्त्वजन्यं जागरणं पीतरजोजन्यं स्वप्नं कृष्णतमोजन्या सुप्तिः कर्मायत्तैर्वर्णैरिति "अजामेकां लोहितशुक्लकृष्णाम्" इति श्रुतेः । कुत्रायं व्यवहारो दृष्ट इति तत्राह, गन्धैरिति । यथा गन्धैरन्वयात् सौरभ्यादिगन्धसम्पर्कात् सुगन्धो दुर्गन्धो मिश्रगन्धो वायुरिति व्यवह्रियते न तावता तादात्म्यं वायोस्तथात्वे सर्वदा तथा स्यात् न चैवं तस्माद्भिन्न एव वायुस्तथा हरिरपि "यथा गन्धयुतोऽनिलः" इति च "तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत्" इति श्रुतेः । देहाद्यप्रपञ्चसम्पर्कोऽस्त्येव हरेरिति भावः ॥ २६ ॥

अभेददर्शने बाधकमाह, एतद्द्वार इति । एतदभेददर्शनं द्वारं यस्य संसारस्य स तथा पुंसः संसारः प्राप्यते हि यस्मात् "अदृष्टेर्जीवपरयोर्भेदस्यान्तोऽति संसृतिम्" इति वचनात् । अभेददर्शने कारणमाह, गुणेति । अभेददर्शनजनकत्वेन गुणकर्मणः संसारनिमित्तत्वमाह, तस्येति । विशेषकर्मणः कारणमज्ञानं तद्द्वारा संसारहत्याशयेनाह, अज्ञानेति । अज्ञाननिमित्तकर्मपरम्परया मुग्धमनसः पुंसोऽभेदमिथ्यादृष्टस्तस्मात् एव शरणमित्याशयेनाह अपार्थ इति । अपगतानिवृत्तिस्तमम इति शेषः

"अर्थः स्यादिष्टवे मोक्षे शब्दवाच्ये प्रयोजने ।
व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु" ।

इत्यभिधानात्. मशकार्थे धूम इति प्रयोगाच्च "अभेदमिथ्याधाति तमो नास्त्यत्र संशयः" इति स्मृतेः । अपिशब्देन नित्यदुःखभूयिष्ठतमःप्राप्तिं सूचयति, "दुःखरूपोऽपि संसारो बुद्धिपूर्वमवाप्यते" इति संसारस्तमः इन्द्रियार्थसन्निकर्षादर्थोपलब्धिर्जाग्रत् जाग्रदनुभवसंस्कारोपस्थापितविषयाभासोपलब्धिः स्वप्नः उपरतसर्ववृत्तीन्द्रियविषयज्ञानं सुप्तिः अत्र जाग्रद्दृष्टभूतपदार्थसंस्कारकृतः स्वप्नः स्वशिरश्छेदनादिलक्षणो दुःखादिहेतुर्यथा, तथा जाग्रदपि राजाऽहं वस्तोऽनर्थपरम्परा इत्यवज्जीवपरयोरभेदं जानतः पुंस इहामुत्र दुःखबाहुल्यहेतुरित्यर्थः । "यथा स्वप्ने शिरश्छेदं स्वयं कृत्वाऽऽत्मनोऽज्ञः । ततो दुःखमवाप्येत तथा जागरितेऽपि तु ॥ जानन्नप्यात्मनो दुःखमवशस्तु प्रवर्तते" इति स्मृतौ दर्शनात् ॥ २७ ॥

अर्थक्रियाकारित्वात् न स्वप्नादिमिथ्यात्वमित्याह—मनोमयत्वादिति । मनसा निर्मितकर्मनिमित्तत्वाद्दोऽस्य स्वप्नप्रायेण स्वप्नजाग्रत्साम्यम् अन्यथा शोकमोहभयप्रदा इत्येतदसम्बद्धम् स्यात् न च शुक्तिरजतादिकं भयकरणादियोग्यम् ॥ ० ॥ ० ॥

विपक्षे बाधकमुक्त्वा विपर्ययं पर्यवसानकत्वेन संसारबीजनिर्हरणोपायमाह — तस्मादिति । यस्मात्पुंसो गुणकर्मनिर्मिताभेददर्शनद्वारः संसारस्तस्माद्भेदनिमित्तत्रिगुणमयकर्मबीजमर्जनोपायो भवद्भिः कर्तव्यः तत्राप्रष्टेमादिकमन्तरेण कर्मणां बीजभूतस्य लिङ्गशरीरस्य हननोपायः । कोऽसौ ? यमनियमादिलक्षणश्चेत्तदोभयत्र साधारणत्वेनानन्तरङ्गत्वात् अत आपाकानिवृत्तिमात्रदहनयोग इत्यास्य तत्साधनं वक्तव्यमिति तत्राह, प्रवाह इति । धियः प्रवाहस्य सजातीयप्रत्ययानन्तरिततया विषयीकरणनिपुणोपासनालक्षणस्य तं कर्तुं पाति रक्षतीति ध्रुपः "उपाधिकं" इति सूत्रात्पुपः सर्वाधिको वा परमेश्वरस्तस्मिन् रमणं निरन्तराभिराधनाचरणसंसारसिंजसांअन्तनलक्षणोपासनात् स एवेत्यभिप्रायः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धियः प्रवाहस्याप्युपरमसाधनमाह, तत्रेति । भगवतेत्यनेन प्रामाण्ये आप्तमूलत्वं दर्शयति—अन्यथा बाधकमाह—नेति ॥ २९ ॥

भक्त्या गुरुशुश्रूषया "यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ" इति श्रुतेः सर्वलाभार्पणेन इत्यादिविशेषः "ब्रह्मार्पणं ब्रह्म हविः" इत्यादेः साधु भक्तानाम् "माऽभक्ताय दातव्यं नोदबिन्दुं न तण्डुलम्" इत्यादेर्नियतभगवद्भक्तानां सेवालक्षणप्रसंगेन "महत्सेवां द्वारमाहुर्विमुक्तेः" इत्यादेः ईश्वराराधनेन पञ्चरात्रोक्तेन पञ्चकालीनभगवत्पूजया पञ्चकालपरायणं पञ्चकालैकमनसामित्यादेः ॥ ३० ॥

तत्कथायां श्रद्धया "पानेन ते देवकथासुधायाः" इत्यादेः गुणकर्मणां सङ्कीर्तनैः "कलौ सङ्कीर्त्य केशवम्" इत्यादेः विभवविग्रहध्यानविधानार्थं तत्पदाम्बुरुहध्यानादिति "सञ्चिन्तयेद्भगवतश्चरणारविन्दम्" इत्यादेः तस्य हरेर्लिङ्गं प्रतिमा तस्येक्षा दर्शनं अर्हणं पूजनम् आदिशब्देन प्रदक्षिणादि गृह्यते "बर्हायिते ते नयने नराणाम्" इत्यादेः ॥ ३१ ॥

"हरिः सर्वेषु भूतेषु" इत्यादिना हरिरेवपूज्यो न तु भूतानि योग्यतातिरेकेणातीन्द्रियमेव कथ्यते "ईश्वरो जीवकलया प्रविष्ट" इत्यादेर्वा ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ स्वप्रतिपत्तिं प्रतिपादयति—तत्रोपायेत्यादिभिः । तत्र पूर्वोक्ते त्रिगुणात्मककर्मणां बीजनिर्हरणेऽपि उपायसहस्रैः सिद्धानां मध्ये अयमेव उपायो भगवता श्रीनारदेन मां प्रत्युपदिष्टः येरुपायसहस्रैः सिद्धात् यद्यस्मादुपायात् यथा यथावत् ईश्वरे भगवति अञ्जसा व्यवधानान्तरं विनैव रतिः प्रीतिर्भवति । अतः कर्मबीजनिर्हरणमपि तस्यानुषङ्गिकमेव फलमिति भावः । यद्वा तत्र बीजनिर्हरणे निमित्ते यान्युपायसहस्राणि तेषामप्ययमेवोपायो भगवता श्रीनारदेनोदितः । अनेनैवोपायेन कृतकृत्यानि भवन्तीत्यर्थः । कोऽसौ ? तत्राह—येरुपायैः सिद्धात् यद्यस्मादुपायादीश्वरे भगवति यथा यथावदञ्जसा उपायान्तर व्यवधानं विना रतिर्भवतीति ॥ २९ ॥

गुरुशुश्रूषयेति त्रिकम् ॥ ३०–३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विमर्शप्रकारमाह, बुद्धेरिति द्वाभ्याम् । यदन्वितताया एवबुद्धेस्तिस्रोऽवस्था उद्भवन्ति सः परः पुरुषः परमात्मा ॥ २५ ॥

यस्त्वेतद्बुद्ध्यवस्थात्रयद्रष्टाभाति स जीवात्मेत्याह—एभिः बुद्धेर्भेदैः परिणामैः जागरादिभिः त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः पर्यस्तैः अनात्मधर्मत्वेन निरस्तैरपि एभिरेव आत्मनोऽशुद्धजीवस्य स्वरूपं बुद्ध्येत् जानीयात् यथा अन्वयात् सम्बन्धमात्रादेव गन्धैः पुष्पादिगन्धैर्वायुं गन्धवन्तं जानीयात् यदन्विता बुद्धिः प्रवर्तते स परमात्मा यो बुद्ध्यन्वितः स जीवात्मेति भेदः ॥ २६ ॥

एषा बुद्धिरेव द्वारं यस्य सः अत एव गुणकर्मभ्यां तदीयाभ्यां निरतरां बन्धनं यत्र सः किञ्च ज्ञानं यस्य तथाभूतं मूलं यस्य सः, यस्य मूलं न ज्ञायत इत्यर्थः । अपार्थः अवस्तुभूतोऽपि जीवस्य संसारो देहाध्यासरूपः स्वप्न इव अर्प्यते इति तस्मिन् पुंसि परमेश्वरस्यैवेत्यर्थः ॥ २७ ॥

तस्मात्तन्निवृत्तये यतितव्यमित्याह, तस्मादिति । बीजं प्राकृती बुद्धिः तस्य निर्हरणं दहनं दहनमेव किं तदाह, धियो बुद्धेः प्रवाहाणां जागराद्यवस्थानां उपरमः स एव योगः फलम् "योगोऽपूर्वार्थसंप्राप्तौ सङ्गतिध्यानयुक्तिषु" इति मेदिनी ॥ २८ ॥

तत्र बीजनिर्हरणे विषये उपायसहस्राणां मध्ये अयमुपायो भगवता उदितः अन्ये त्वन्यैर्मुनिभिरुदितत्वादस्मात्ते निकृष्टा एवेति भावः । अयमेव कस्तत्राह, यदिति । यैर्गुरुशुश्रूषणाद्यैरङ्गैरुपलक्षणात् यत् यस्माद्भक्तियोगाद्रतिर्भवति अयं भक्तियोग एवोपाय इत्यन्वयः । अत्र पञ्चम्यन्तयत्पदात् अञ्जसा शब्दाच्च रतिरेव भक्तियोगस्य मुख्यं फलं बीजनिर्हरणं त्वानुषङ्गिकमयत्नत एव शुद्धभक्तानां भवेत् । यदुक्तम्, "जरयत्याशु या कोषं निगीर्णमनलो यथा" इति ॥ २९ ॥

धर्मस्य तत्त्वं ज्ञानञ्चेति द्वयमुपदेष्टव्यत्वेन यत् प्रक्रान्तं तत्र ज्ञानमुक्त्वा धर्मं तत्त्वं भक्तियोग एवेति द्योतयन् पूर्वोक्तयत्पदवाच्यानि तदङ्गान्याह—गुर्वितित्रिभिः । गुरोः शुश्रूषया स्नपनसंवाहनादिकया तथा सर्वेषां लब्धानां वस्तूनां तदर्पणेन च तदर्पणं भक्त्यैव न तु प्रतिष्ठादिना हेतुना साधवः सदाचारा ये भक्तास्तेषां सङ्गेनेति दुराचारा भक्ताः सेव्या वन्द्या दर्शनीयाश्च न तु सङ्गार्थमुपादेया इति भावः ॥ ३० ॥

एव मेतत्प्रकारकया भक्त्यैव निर्जितः षण्णां कामादीनामिन्द्रियाणां वा वर्गो यैस्तैर्गुरुशुश्रूषाद्यैरङ्गैर्भक्तिरिति पूर्वोक्तं बुद्धिप्रवाहोपरमरूपमानुषंगिकं फलमुक्तं भक्तेर्मुख्यं फलमाह, एवेति । रतिं प्रेमाणम् ॥ ३१—३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जागराद्यवस्थानुवृत्त्येव जीवात्मानं बुद्ध्येदित्याह, बुद्धेरिति द्वाभ्याम्, बुद्धेर्जागरणाद्याः वृत्तयो येन ज्ञानस्वरूपेणानुभूयन्ते सोऽध्यक्षः बुद्ध्यादिस्वामी परो बुद्ध्याद्यचेतनवर्गविलक्षणः ॥ २५ ॥

एभिस्त्रिवर्णैः सत्त्वादिगुणत्रयमयैः पर्यस्तैरनित्यैः अनित्यत्वे हेतुं दर्शयितुं विशेषणं क्रियोद्भवैरिति क्रिया जीवकर्म तदनुसारेण जातैः यस्य जीवस्य शुभं कर्म तेन जीवेन स्वकर्मजन्या बुद्धिवृत्तयः सुखप्रदा अनुभूयन्ते अशुभकारिणो दुःखप्रदा अनुभूयन्ते यन्मते तु बुद्धेरेवकर्तृत्वं तन्मतमुपेक्षणीयं सद्भिः "विज्ञानं यज्ञं तनुते," "कर्ता शास्त्रार्थवत्वात्" इत्यादिश्रुतिसूत्रविरोधात् करणभूतायाः अचेतनायाः कर्तृत्वसम्भवाच्च तद्वत्प्रकृतेरपि जगत्कर्तृत्वप्रसङ्गाच्च एवंभूतैर्बुद्धिभेदैः बुद्धिवृत्तिभिः गन्धैस्तद्धारकं वायुमिव आत्मनः स्वरूपं बुद्ध्येत् अन्वयानुकारणत्वात् तद्बुद्धिसाक्षिणो जीवस्यैवानुवृत्तेः ॥ २६ ॥

एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे ।
वासुदेवे भगवति यया संलभते रतिम् ॥ ३३ ॥
निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि ।
यदाऽतिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥ ३४ ॥
यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे ! जगत्पते ! नारायणेत्यात्ममतिर्गतत्रपः ॥ ३५ ॥
तदा पुमान्मुक्तसमस्तबन्धनस्तद्भावभावानुकृताऽऽशयाकृतिः ।
निर्दग्धबीजाऽनुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवा बुद्धिरेव द्वारं यस्य ततो बुद्धिगुणनिमित्तानि यानि जीवकर्तृकानि कर्माणि तैर्निरतं बन्धनं यस्मिन् अज्ञानं तत्त्वबोधाभावो मूलं यस्य अपगतोऽर्थः आत्मा परमात्मबोधरूपः पुरुषार्थो यस्मात् एवम्भूतः संसारः जन्ममरणप्रवाहलक्षणः पुंसः पुंसि आर्पिताः, कर्मफलदेनेति शेषः। एवम्भूतसंसारभयेनातिभीतान् प्रत्याह, स्वप्न इवेति। स्वप्नो यथा तात्कालिककर्मफलदेन पुंस्यर्पितस्तेनैव निराक्रियते तद्वत्संस्काराश्रितेन भगवतैव संसारो निवार्यत इत्यर्थः ॥ २७ ॥

तन्निवृत्त्युपायः कर्तव्य इत्याह–तस्मादिति। यस्मादेवं तस्माद्भवद्भिः बीजनिर्हरणं पूर्वोक्तस्य संसारमूलस्याज्ञानस्य निर्हरणं दहनं तद्दहनार्थं तत्त्वज्ञानसंपादनं कर्तव्यं धियो बुद्धेः कारणभूतायाः यानि कर्माणि तेषां फलभूतस्य प्रवाहस्य जन्ममरणप्रवाहभूतस्य संसारस्योपरमो यस्मात् स योगः संसारतरणोपायश्च कर्तव्य इत्यन्वयः ॥ २८ ॥

तत्र तत्त्वज्ञानसंपादने संसारतरणे यैर्धर्मैः यथा यथावत् अञ्जसा भगवति रतिरिति यत् अयमेवोपायसहस्राणां मध्ये मुख्य उपायः भगवतोदितः "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" इति "मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते" ॥ इति ॥ २९ ॥

तस्याः परभक्तिरूपाया रतेः साधनरूपान् धर्मानाह—गुरुशुश्रूषयेति चतुर्भिः। गुरुशुश्रूषारूपया भक्त्या सर्वेषां लब्धानां प्रियपदार्थानां भगवति अर्पणेन च ॥ ३० ॥

तस्य भगवतः कथायां श्रद्धया गुणानां सर्वज्ञत्वादीनां कर्मणां विश्वसर्जनादीनां कीर्तनैः तल्लिङ्गानां तस्य मूर्तीनाम् ईक्षणमर्हणाश्चादिर्येषां वन्दनप्रणामादीनां तैश्च ॥ ३१ ॥

सर्वेषु भूतेषु हरिः आस्ते इति हेतोस्तल्लक्षितैः कामैर्भूतानि साधु यथा भवति तथा मानयेत् ॥ ३२ ॥

भाषा टीका।

जागरण, स्वप्न सुषुप्ति, बुद्धि की इन तीनों दशाओं का जो अनुभव करता है और बुद्धि से पर है वही अध्यक्ष पुरुष है ॥ २५ ॥

क्रिया से उत्पन्न होने वाले त्रिगुणात्मक विकृत बुद्धि के परिणामों से आत्मा के स्वरूप को जाने, जैसे पुष्प के गंध से उसके आश्रय वायु को जानता है ॥ २६ ॥

गुण कर्म निबंधन यह संसार बुद्धि की दशा द्वारक ही है और अज्ञान मूलक और अपार्थ भी है, और पुरुष को स्वप्न के तरह अनित्य है ॥ २७ ॥

तस्मात् तुम लोग त्रिगुणात्मक कर्मों के बीज की हानि के लिये, बुद्धि के प्रवाह के उपराम करने वाले योग का साधन करो ॥ २८ ॥

तहां पर हजारों उपायों के मध्य में यह उपाय भगवान ने कहा है, कि जैसे जिन धर्मों से साक्षात् भगवान् में रति होवे ॥ २९ ॥

यही भगवान् में रति जिन अन्तरंग धर्मों से होती है उनको कहते हैं कि गुरु की शुश्रूषा, भक्ति, जो प्राप्त हो तिस सबका अर्पण, साधु और भक्तों का संग, ईश्वर का आराधन, ॥ हरिकथा में श्रद्धा, हरि के गुण कर्मों का कीर्तन उनके चरणकमल का ध्यान और भगवत्प्रतिमाओं [मूर्तियों] का दर्शन पूजनादि, इन सभों से ॥ ३० ॥ ३१ ॥

और सर्व भूत प्राणियों में हमारे ईश्वर भगवान् विराजमान हैं इस प्रकार के मनसे प्राणियों को सम्यक् प्रकार से तत्तत् कामों से मानें ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निर्जितः षण्णां कामक्रोधलोभमोहमदमत्सराणामिन्द्रियाणां वा वर्गो यैः ॥ ३३॥

भगवद्रतेर्लिङ्गान्याह, निशम्येति त्रिभिः। गुणाश्च कर्माणि च वीर्याणि च अतिहर्षेणोद्गताः पुलकाः अश्रूणि च तैर्गद्गदं यथा भवत्येवं प्रोत्कण्ठो मुक्तकण्ठ उद्गायति ॥ ३४ ॥ ३५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य भावश्चेष्टादिस्तस्य भावो भावना तेनानुकृते आशयाकृती मनश्शरीरे यस्य निर्दग्धं बीजमज्ञानमनुशयो वासना च यस्य सः सम्यगेति प्राप्नोति ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्येतैः साधनैर्जितैः षड्वर्गां कामक्रोधलोभमोहमदमात्सर्याणां वर्गो भगवतीश्वरे भक्तिः क्रियते कर्त्तव्येत्यर्थः भक्तिरहरहर्ध्या-नम् एवमहरहःक्रियमाणया(१)ध्यानात्मिकयोत्तरोत्तरसाक्षात्कारे-च्छात्मिकया भक्तिपरंपरया यथा वासुदेवे ध्यानात्मिकाया-भक्तेः प्रीत्यात्मिकां भक्तिं लभेत इत्याह—वासुदेवे इति । यथाऽहरहः क्रियमाणया गुरुशुश्रूषादिसाधनानुगृहीतया अनु-ध्यानात्मिकया उत्तरोत्तरसाक्षात्कारेच्छात्मकपरमभक्त्यपरपर्या-यया वासुदेवे भगवति रतिं परमभक्त्यपरपर्यायभूतां निरन्तरानु-बुभूषात्मिकां तत्प्रीतिरूपां लभेत इत्यर्थः ॥ ३३ ॥

एवं विधभक्तियोगनिष्पत्तिलिङ्गानि वदंस्तेन परिनिष्पन्नेन भगवद्भक्तियोगेन परमात्मानं प्राप्नोतीत्याह–निशम्येति त्रिभिः। यदा भगवतो गुणानतुल्याननितरसाधारणान् । तथा लीलातनुभिः स्वेच्छोपात्ताप्राकृतविग्रहावतारविग्रहैः रामकृष्णादिभिः कृतानि कर्माणि चेष्टितानि निशम्य श्रुत्वा अतिहर्षेणोद्गता उदञ्चिताः पुलकाः रोमाणि अश्रूणि आनन्दबाष्पबिन्दवश्च तैर्गद्गदं यथा भवत्येवं प्रोत्कण्ठः मुक्तकण्ठः उद्गायति अत्युच्चैर्गायति रौति ध्वनति नृत्यति च ॥ ३४ ॥

सर्वदा च ग्रहग्रस्त इव हसति क्वचिदाक्रन्दते रोदिति क्वचिच्च ध्यायति क्वचिच्च जनं भगवदात्मकं वन्दते नमस्करोति क्वचिच्च पुनः पुनः श्वसन् श्वासं मुञ्चन् गतत्रपो निर्लज्जः हे नारायण ! जगत्पते ! हरे ! इतीत्थं वाक्यं वदति तदेत्युत्तरेणान्वयः इयमेव भक्तियोगस्य निष्पन्नावस्थेति भावः ॥ ३५ ॥

तदा एवं परिनिष्पन्नभक्तियोगावस्थायां पुमानुक्तविधभक्तियोग-निष्ठः महीयसा सर्वोत्तमेन भक्तियोगरूपेणोपायेन प्रारब्धाव-साने मुक्तं समस्तबन्धनं भगवत्प्राप्तिविरोधिपूर्वोत्तरपुण्यपापा-त्मकाघरूपं यस्मात्तादृशो निर्दग्धो नितरां दग्धो बीजाऽनुशयः संसृतिमूलभूतकर्मवासनात्मको यस्य तस्य भगवतो भावः प्रकारः आकृतिरित्यर्थः । तस्य भावो भावनानुऽध्यानं तेनाऽनुकृतः आशयोन्तःकरणम् आकृतिर्विग्रहश्च यस्य भगवता समानरूप-इत्यर्थः । अधोक्षजं भगवन्तमुपैति प्राप्नोति ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यया भक्त्या हरौ रतिमुपासनां लभते तया स्वरूपानन्दा-ऽनुभवलक्षणां रतिं लभत इति परस्परया योज्यम् ॥ ३३ ॥

---

(१) ध्यानात्मिकया भक्त्या प्रीत्यात्मकां प्रकृष्टां भावनां लभते इत्यान्ध्राक्षरमुद्रित पुस्तके ।

पूतनावधादीनि कर्माणि कंसवधादीनि, वीर्याणि उद्गानादिकं न सर्वभक्तसाधारणं तदुक्तम्—

"केचिद्भक्ताः प्रनृत्यन्ति गायन्ति च यथेप्सितम् ।
केचित्तूष्णीं भजन्त्येव केचिल्लोमप्रकारिणः" ॥

इति ॥ ३४ ॥ ३५ ॥

एतदेवाह– तद्भावेति । तस्य भावे यथा स्वरूपे भावोक्ति-स्तस्यानुकृतेऽनुकूलत्वेन प्रकटित आशयाकृती अन्तःकरणाकारौ यस्य स तथा कश्चिदुद्गानेनान्तरां भक्तिं प्रकटयति, कश्चि-द्रोदनाश्रुपातकरणेन कश्चिन्नर्तनेन कश्चित्तूष्णीं भजनेनेति तस्य प्रहरणो भावो लीला तत्र यो भावो भक्तिस्तया रञ्जिताभि-प्रायाकार इति वा स्थानाभिप्राय आशय इति वा निर्दग्धं कर्म-बीजं यस्य स तथा स चानुशयोन्तःकरणं यस्य स तथा अनु-शयः संसारो वा ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ तस्यैवोपायस्यैवाङ्गान्युक्तान्याह—एवमिति । एवं पूर्वोक्तगुरुशुश्रूषादिप्रकारेणैव न तु तदर्थंपृथक्प्रयत्नेन निर्जि-तकर्मबीजलक्षणकामादिभिर्जनैः पुनरपि भक्तिः क्रियत एव ॥ ३३ ॥

निशम्येति त्रिकम् ॥ ३४—३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रतेश्चिह्नान्याह, निशम्येति । कर्माणि दधिपयश्चौर्यादीनि गुणान् भक्तवात्सल्यादीन् वीर्याणि गोवर्द्धनोद्धरणकंसवधादीनि ॥ ३४ ॥

हरे ! जगत्पते ! नारायणेति वाचा वक्ति आत्मना मनसा च मतिर्मननं यस्य सः तस्मिन् भावा दास्यसख्यादयस्तेषां भावना दासोऽहं सखाहमित्याद्यात्मनो मननं तेन अनुकृते अनुरूपीकृते आशयाऽऽकृती मनः शरीरे येन सः न च शरीरसद्भाव एव संसार आशंक्य इत्याह, निर्दग्धं पूर्वमेवाविनष्टं बीजं प्राकृती बुद्धिः अनुशयो विषयवासना च यस्य सः महीयसा अनुराग-मार्गवता सामतिः अधोक्षजसंयोगं प्राप्नोति ॥ ३५—३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं यथा गुरुशुश्रूषणादिबहुक्रिया वासुदेवे रतिं परां भक्तिं लभते मुमुक्षुः सापि निर्जितः षड्वर्गामिन्द्रियाणां वर्गो यैस्तैरेव क्रियते न त्वजितेन्द्रियैरित्यन्वयः ॥ ३३ ॥

रतिशब्दोक्ताया परभक्तेर्लिङ्गानि वदन् तया सर्वबन्धवि-निर्मुक्तो भवतीत्याह–निशम्येति त्रिभिः । वासुदेवस्य अतुल्यान् सर्वेश्वरत्वसर्ववेदैकवेद्यत्वसर्वशक्तित्वसर्वात्मत्वादीन् अनुपमान् गुणान् लीलातनुभिः स्वेच्छोपात्ताप्राकृतविग्रहावतारैः कृतानि कर्माणि वीर्याणि प्रभावांश्च निशम्य श्रुत्वा अतिहर्षेणोद्गताः पुलका अश्रूणि वा तैर्गद्गदं यथा भवत्येवं प्रोत्कण्ठः प्रकृष्टा उत्कण्ठा यस्य सः तथाभूतः यदा उद्गायति उच्चैर्गायति रौति जयकृष्णेत्यादीन् पुण्यान् शब्दान् करोति नृत्यति च ॥ ३४ ॥

आत्मनि परमात्मनि मतिर्यस्य यदा च ग्रहग्रस्त इव कश्चित्

अथोक्षजालम्भमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम्।
तद्ब्रह्म निर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ ३७ ॥
कोऽतिप्रयासोऽसुरबालका ! हरेरुपासने स्वे हृदि छिद्रवत्सतः।
स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥ ३८ ॥
रायः कलत्रं पशवः सुतादयो गृहा मही कुञ्जरकोशभूतयः।
सर्वेऽर्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्य कियत्प्रियं चलाः ॥ ३९ ॥
एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः साऽतिशया न निर्मलाः।
तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

आत्मानं भगवद्दासत्वेन कृतार्थं मत्वा हसति कश्चिच्च भगवन्तं दुर्दर्शं मत्वा स्वकृतसाधनानां तत्कृपां विनाऽकिञ्चित्करत्वं च मत्वा आक्रन्दते रोदिति कश्चिच्च भक्तवत्सलत्वदीनबन्धुत्वसर्वशरण्यत्व पतितपावनत्वादीन् भगवद्गुणान् स्मृत्वा तमेव भजनं दृढविश्वासेन ध्यायति कश्चिच्च गता भगवन्नामोच्चारणादिसङ्कोचकरी अमङ्गला त्रपा लज्जा यस्य सः हे हरे ! इत्यादि वक्ति ॥ ३५ ॥

तदा प्रारब्धक्षये मुक्तानि समस्तानि बन्धनानि यस्य सः निर्दग्धबीजरूपः संसृतिहेतुः अनुशयः संसारिकवासनाग्रन्थिर्यस्य सः तस्य भगवतो भावः कार्यकारणात्रिगुणप्रकृतिविलक्षणस्वरूपगुणविग्रहवत्त्वं तस्य भावो ध्यानं तेन अनुकृताऽनुयोजितः आशयोऽन्तःकरणं तदुपलक्षिताप्राकृतसकलकरणकलापः प्राकृतिरप्राकृतविग्रहश्च यस्य सः भक्तिप्रयोगेण भक्तिरूपेण प्रकृष्टयोगेन अधोक्षजं भगवन्तं प्राप्नोति "निरञ्जनः परमं साम्यमुपैति "इदं ज्ञानमुपाश्रित्य ममसाधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च"॥ इति श्रुतिस्मृतिप्रसिद्धं भगवत्साधर्म्यलक्षणं मोक्षं प्राप्नोतीत्यर्थः ॥ ३६ ॥

भाषा टीका।

इस प्रकार जितेन्द्रिय होकर जगन्नियंता भगवान वासुदेव के विषय भक्ति करे, कि जिससे रति को प्राप्त हो ॥ ३३ ॥

भगवान में रति प्राप्त होने पर, भगवान ने लीला-शरीर को धारण कर जो कर्म किये, उन कर्म वीर्य और गुणों को सुनकर जब अति हर्ष से पुलकित गात्र और अश्रुओं से गद्गद कण्ठ होजाता है तब मुक्त कंठ होकर उंचेस्वर से गान करता है रोता है, और नाचता है ॥ ३४ ॥

जब ग्रहग्रस्त सरी का हो जाता है तब कभी हँसता है कभी आक्रोश करता है, किसी समय ध्यान करता है, किसी समय मनुष्यों दण्डवत करता है, कभी बड़ी श्वास लेता हुआ परमात्मा में मन लगा कर, हे हरे ! हे जगत्पते ! हे नारायण ! इस प्रकार निर्लज्जहोकर नाम सङ्कीर्तन करता है ॥ ३५ ॥

पुरुष जब ऐसा हो जाता है तब समस्त बन्धनों से छूटकर भगवान की चेष्टाकी भावनासे भावित हुआ अन्तःकरण और शरीर जिसका ऐसा, और महान् भक्ति के प्रयोगसे निर्दग्ध हो गया वासना रूप संसार का बीज जिसका ऐसा हो कर अधोक्षज श्रीहरिको प्राप्त होजाता है ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ततः किमत आह—अधोक्षजस्यालम्भं मनसा स्पर्शम् पाठान्तरे तस्याऽऽश्रयणम् अशुभात्मनः अशुभो रागादियुक्त आत्मा मनो यस्य संसृतिचक्रशातनं तन्निवर्तकं बुधा विदुस्तदेव ब्रह्मणि निर्वाणं लयो मोक्षस्तदात्मकं सुखं विदुः हृदीश्वरमन्तर्यामिणम् ॥ ३७ ॥

भक्तिरशक्येति च न मन्तव्यमित्याह—क इति। छिद्रवदाकाशवद्धृदि स्थितः विषयाणामुपपादनैरर्जनैः किम। तत्र हेतुः सर्वदेहिनां सामान्यतः विषयनिष्ठत्वं सूकरादिसाधारणत्वादित्यर्थः न चैवमादौ पौनरुक्त्यदोषः नारदोक्तानुवादरूपत्वादस्य प्रकरणस्य ॥ ३८ ॥

अनर्थकं विषयार्जनमित्याह—रायोऽर्थाः क्षणभङ्गुरमायुर्यस्य तस्यैते कियत्प्रियं कुर्वन्ति तदुक्तमितिहासेषु "धनं हि पुरुषं लोके पुरुषं धनमेव वा। अवश्यमेकं त्यजति तस्मात्किं धनतृष्णया" इति ॥ ३९ ॥

"यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम्" इत्येवंभूता स्वर्गादिभोगा अपि न सेव्या इत्याह, एवं हीति। क्षयिष्णुत्वे हेतुः क्रतुभिः कृता इति "तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः। अत एव

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुण्यतारतम्येन सातिशयाः न च निर्मलाः स्पर्धादिमत्त्वात् न विद्यते दृष्टं श्रुतश्च दूषणं यस्मिन् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपैतु ततः किमत आह—अधोक्षजेति । इह लोकेऽशुभा-श्मगस्तापत्रयदुःखितमनसः शरीरिणः संसृतिचक्रं चक्रवत्प-रिवर्त्तमानानिष्टरूपा संसृतिस्तस्याः शातनं निवर्त्तकमधोक्षज-ध्यानरूपः स्पर्शः प्राप्तिरितियावत् एवं भगवत्प्राप्तेरनिष्टनिवर्त-कत्वमुक्तम्. अथेष्टप्रापकत्वमाह—तदधोक्षजालम्भनमेव ब्रह्म-निर्वाणसुखं ब्रह्मसम्बन्धि गतिर्वाणां निर्वाणो मोक्षस्तद्दशा-यामनुभूयमानमित्यर्थः । तत्सुखं यस्मिंस्तादृशं, यद्वा, निर्वाणं निरतिशयानन्दो ब्रह्मरूपं गतिर्वाणं तस्य सुखमनुभवरूपं यस्मिंस्तादृशं बुधाः ब्रह्मविदो विदुः यतोऽनिष्टनिवर्त्तनेष्टप्राप-कत्वमभगवत्प्राप्तिसाधनभूतस्तद्भक्तियोगस्ततो यूयं हृदये हृद्गते "अथ यदि"दहरपत्मनगतं जीव इत्यर्थः । "हृदिह्ययमात्मा प्रतिष्ठितः" इति श्रुतेः । तस्मिन्नीश्वरं नियन्तृतयावस्थितं हृदयपुण्डरीके भगवन्तं भजध्वम् अनेन "तमात्मस्थं येनु पश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्" इति श्रुत्यर्थः. सत्यितमपाणित ॥ ३७ ॥

अथैवं निरतिशयानन्तस्थिरफलभगवत्प्राप्तिसाधनधर्मानुष्ठा-नस्य दुःशकत्वशङ्कां निरासं "न ह्यच्युतं प्रीणयतो बह्वायासः" इत्युपक्रम्य तद्ग्रन्थद्वन्द्वगतप्रकारद्वयेन तदाशङ्कां निरस्यार्थैव-मस्मिन् सुकरे भगवद्धर्मानुष्ठाने न कोऽपि प्रयास इत्युपसंहरन् वैराग्यजननाय स्वर्गस्त्राण्याद्यर्वाचीनपुरुषार्थस्य सातिशया-ल्पास्थिरत्वं वक्तुं तावद्दृष्टान्ततया वैषयिकस्यैहिकलौकिकसु-खस्य तुच्छतामाह—क इति द्वाभ्याम् । हे असुरबालकाः ! स्वे स्वकीये हृत्पद्मे छिद्रवदाकाशवत् सतां वर्त्तमानस्य सत्यस्य सत्य-कामत्वादिनिस्यातिभूतगुणाष्टकाश्रयस्य आत्मनः परमात्मनः अशे-षदेहिनां सामान्यतः साधारणतया सख्युः "द्वासुपर्णौ" इत्यादि श्रुत्युक्त सखत्वयुक्तस्य हरेरुपासनेन कोऽयासोऽत्र प्रयासः न कोऽपी-त्यर्थः । विषयाणां शब्दादीनामुपपादनैरर्जनैः किम् ? न किमपि ते ऽतितुच्छा इति भावः । छिद्रवत्सत इत्यनेन "यावान्वा अयमाकाश-स्तावानेषोऽन्तर्हृदय आकाशः" इति दहरविद्योदितभूताकाशदृष्टान्तो-ऽभिमतः तत्र हि भूताकाशस्येवाग्निवायुसूर्याचन्द्रमोविद्युन्नक्षत्रा-दिकृत्स्नजगदाधारत्वं हृत्पुण्डरीकस्थस्य दहराकाशस्य प्रतिपादि-तम् "उभावग्निश्चवायुश्च सूर्याचन्द्रमसौ विद्युन्नक्षत्राणि यच्चास्येह-ास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितम्" इति. एवं हृत्पुण्ड-रीके दहराकाशरूपेण वर्त्तमानस्याऽपहतपाप्मत्वादिगुणाष्टक-युक्तस्य हरेरुपासनं सुशकमित्यभिप्रायः ॥ ३८ ॥

"किं विषयोपपादनैः"इत्यनेन सूचितं विषयाणामल्पास्थिरत्वमा-तिशयस्वरूपं तुच्छत्वमुपपादयति—राय इति । रायो धनानि सुतादय इत्यादिशब्देनान्ये पित्रादयो देहानुबन्धिनो विवक्षिताः मही क्षेत्रम् आजीविकारूपं विषयो वा कुञ्जरा गजास्तेषां कोशः शाला धनकोशस्य राय इत्यनेनोक्तत्वात् भूतयः भोग्यभोगोपकरणादि-समृद्धयः सर्वे च एते अर्थकामाः काम्यमाना अर्थाः प्रयोगाल्पका-लेन क्षणभङ्गुरमायुरवस्थानं येषां ते अत एव चञ्चला अस्थिराः मर्त्यस्य मरणशीलस्य पुंसः कियत्प्रियं सुखं कुर्वन्ति जनयन्ति न कियदपि, सातिशयमस्थिरमल्पमेव सुखं जनयन्ति न तु निरति-शयमनन्तं स्थिरञ्चेत्यर्थः ॥ ३९ ॥

अथैतद्दृष्टान्तेन स्वर्गादेरपि सातिशयाल्पास्थिरत्वमाह— एवं हीति । यथा रैप्रभृतिजन्यानि सुखानि तुच्छानि एवं क्रतुभिर्या-गादिकर्मभिः कृताः सञ्चिता अमी स्वर्गादयो लोका अपि क्षयिष्णवो नश्वराः साऽतिशयाः न निर्मला अनिर्मला दुःखमिश्राश्चेत्यर्थः । अत्र "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते, प्लवाह्येते अदृढा यज्ञरूपाः, परीक्ष्य लोकान् कर्मचितान्" इत्यादि श्रुत्यर्थोऽभिप्रेतः । यत एवं तस्माददृष्टश्रुतदूषणं न विद्यते दृष्टं श्रुतं वा दूषणं यस्य श्रुतिस्मृतिभ्यामदूषितम्, किन्तु प्रशस्तमित्यर्थः । तं भक्त्यैवोपायेन लभ्यं परं परमपुरुषमात्मलब्धये भजत आत्मलाभाय आत्मलब्धये आत्मनः सत्तायै भजत । अन्यथा संसरत आत्मनोऽन्ततः स्थावरत्वादिप्राप्त्या असत्प्रायतैव स्यात् इति भावः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्त्यनन्तरं भगवत्कथा निर्वाणसुखजननीत्याह, अधोक्षजेति । अधोक्षजालापं संसृतिचक्रशातनं नाशनं तद्गुणविषयकथाक-थनं ब्रह्मनिर्वाणसुखं ब्रह्मणोऽनुग्रहात्प्राप्य मुक्तिसुखं विदुरिति यत्ततो देहहृदयस्थितं जीववत् हृदि स्थितमीश्वरं भजध्वमित्य-न्वयः "योऽयं बहिर्धा पुरुषादाकाशो यो वै स बाह्यो यमन्तः पुरुष आकाशो यो वै सोऽन्तः पुरुष आकाशो यं वा वसयो यमन्त-र्हृदय आकाशः" इति श्रुतेः । हरीश्वरं मनः प्रेरकत्वेन तत्स्वा-मिनं "स हि सर्वमनोवृत्तिप्रेरकः समुदाहृतः" इति वाक्याद्वा ॥ ३७ ॥

भगवदुपासनं स्वाधीनत्वेन बहुपायसाध्यत्वेन भागीरथी-यात्रावत् दुःसाधनं किं नेत्याह, कोऽतिप्रयास इति । अस्यात्मनो जीवस्य स्वे स्वाधीने हृदि छिद्रवदाकाशवत्सतः स्थितस्य हरेरुपासने कोऽतिप्रयासः न कोऽपि सर्वगतत्वेन समीपस्थत्वात् "तद्दूरे तद्वन्तिके" इति श्रुतेः । अशेषदेहिनां सामान्यतः साधा-रणत्वेन हृदिस्थितत्वेन सख्युः तस्माद्विषयोपपादनैः किम् ? ग्राम्यै-रिति शेषः ॥ ३८ ॥

भक्तेरन्तरङ्गसाधनं वैराग्यमेवेत्याशयेनाह, राय इति ॥ ३९ ॥

विहितयज्ञसाध्यत्वेन स्वर्गादेर्नित्यत्वं सम्भाव्यमिति, नेत्याह, एवमिति । एवं मर्त्यलोकवदनिर्मलाः प्राकृतत्वात् न दृष्टं श्रुतं दूषणं यस्य स तथा तं सहचरीभूतवैराग्ययुक्तया भक्त्या आत्मलब्धये स्वरूपानन्दानुभवलक्षणमुक्तिप्राप्त्यर्थमात्मनो देहादेर्विविक्तस्य स्वरूप ज्ञानलक्षणलाभाय वा ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु अधोक्षजालम्भे सति संसारो विद्यते न वा तत्राह—अधोक्षजेति । 'शातनमिति शीलार्थे ल्युट् । तत्स्वभावतः स्वत एव लोकोऽपि यातीति भावः ॥ ३७ ॥

सामान्यं तु: सख्युः "सयुजौ सखायौ" इत्युक्तेः ॥ ३८—३९ ॥

आत्मलब्धये आत्मनः स्वस्यैवैशस्य लब्धये । यद्वा आत्मनो लब्धये भजत । अन्यथात्मानं नाशयिष्यथ इति भावः ॥ ४०—४७ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु, ब्रह्मनिर्वाणसुखमेव पुरुषार्थसार इति प्रसिद्धिः । सत्यं तदपि अधोक्षजसंयोगसुख एवान्तर्भवतीत्याह, अधोक्षजस्यालम्भं मनसा ईषत् स्पर्शं साक्षात् प्राप्तिं वा संसृतिचक्रस्य शातनं निवर्त्तकं विदुर्जानन्ति, तदत्र ब्रह्मनिर्वाणसुखं च अधोक्षजस्यैव ब्रह्मत्वात् तच्चरणमाधुर्यानुभवस्यैव परमानन्दरूपत्वेन निर्वाणसुखरूपत्वात् तत्र दास्यादिभावत्वेन ममताविशेषोत्थं तु सुखमधिकमपारमेव यथा सर्वजनसुभगं परमाह्लादकं चन्द्रं दृष्ट्वा यः स्वाभाविक आनन्दस्तस्मात् कोटिगुणित आनन्दः स्वपुत्रे पोषाभावेऽपि सर्वजनदुर्भगेऽपि ममतोत्थः स्यादित्यतो भगवति दास्यादिभाववत्त्वे परब्रह्मस्वरूपत्व एव परमानन्दाब्धित्वेन यदि ममतोत्थोऽपि स्यात्तदा किं वक्तव्यमानन्दपारावारपरस्सहस्रमध्यपातित्वभोगगोत्कर्षमहामहत्त्वम् अतएवोक्तम् "यानिर्वृतिस्तनुभृताम्" इत्याद्यन्यत्र च "ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः । नैति भक्तिसुखाम्भोधेः परमाणु तुलामपि" इति अधोक्षजालम्भमिति पाठे अधोक्षज आलम्बो विषयालम्बनो यत्र तम् अर्थाद्दास्यसख्यादिरसं हरीश्वरं हृदयनाथमिति दास्यादिभावविशिष्टा भक्तिर्व्यञ्जिता ॥ ३७ ॥

सर्वप्रकारा अपि भक्तेः सुखसाध्यत्वमाह, कोऽतीति । छिद्रवत् आकाशवत् आत्मनो जीवस्य सख्युः "सयुजौ सखायौ" इति श्रुतेः न हि सख्युरुपासने किञ्चित् कष्टमिति भावः । उपास्यस्य स्वतो विद्यमानत्वात् प्रियत्वाच्च उपासनस्य च श्रवणादिरूपत्वात् तत्साधनानां श्रवणादीनाञ्च स्वत एव विद्यमानत्वात् नहि कुतश्चन काचन तत्सामग्री आनेतव्येति भावः । वरं नरकसाधनेऽपि श्रमोऽस्तीति व्यञ्जयन् वैषयिकसुखप्रवृत्तिं निन्दति, विषयाणां स्रक्चन्दनवनितादीनाम् उपपादनैर्द्रव्यादिनोपार्जनैः किम् ? तत्र हेतुः सर्वदेहिनां सामान्यतः विपर्ययनिष्ठत्वे सूकरादिसाधारण्यापत्तेरिति भावः ॥ ३८ ॥

न च कामिनां वैषयिकं सुखमपि वस्तुतोऽस्तीत्याह, रायो धनानि अर्थाश्च कामार्थ ॥ ३९ ॥

स्वर्गादिभोगा अपि न सेवार्हा इत्याह, एवं हीति । चयिष्णवः "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः पुण्यतारतम्येन सातिशयाः स्पर्द्धादिमयत्वाच्च न निर्मलाः श्रीमल्लब्धये आत्मकर्तृकहरिप्राप्तये परमात्मप्राप्तये वा यद्वा आत्मरूपरत्नस्य प्राप्तये अन्यथा तत्स्वर्गनरकादि कर्दमे क्षिप्तं नष्टमेव जानीतेति भावः ॥ ४० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यतः अधोक्षजस्य आलम्भनजनीयतया प्रहर्षं अशुभे संसारे आत्मा यस्य तस्य बद्धजीवस्य संसृतिचक्रशातनं जन्ममरणप्रवाहनिवर्तकम् । तस्मादधोक्षजालम्भात् शरीरिणां ब्रह्मणाऽधोक्षजेन सह निर्वाणं निर्गता वाणाः उपद्रवा यस्मात्तथाविधं सुखं मुक्त्यानन्दं बुधा विदुः अतः हृदये हरीश्वरमधोक्षजं भजध्वम् ॥ ३७ ॥

अधोक्षजस्य सुकरत्वमाह, हे असुरबालकाः ! सर्वदेहिनां हृदि सामान्यतः सतो विद्यमानस्यापि स्वे हृदि तु स्वकीये भक्तहृन्मन्दिरे तु छिद्रवत् छिद्रं इव सतः चोरो यथा सहसा सन्धिछिद्रं खनकेन खनकसर्पछिद्रं प्रविष्टो भवति तद्वदूर्ध्वकर्षणेन स्वभक्तहृदि प्रविष्टस्य हरेः आत्मात्मीयभक्त्याभावेऽजायां सर्वस्वहारिणः स्वस्य भक्तजनस्य आत्मनः अन्तर्यामिणः सख्युः साङ्कल्य-निर्माहकतया सख्युश्च उपासने कोऽतिप्रयासः विपर्ययोपपादनैर्विषयाणामर्जनरक्षणादिभिः किं प्रयोजनम् ? न किमपीत्यर्थः ॥ ३८ ॥

विपर्ययोपपादनस्य निष्प्रयोजनत्वं दर्शयति—राय इति । क्षणभङ्गुरमायुर्यस्य तस्य रायो धनानि कलत्रादयः सर्वे अर्थाश्च कामाश्च चलाः क्षणभंगुराः कियत्प्रियं कुर्वन्ति ? न किमपीत्यर्थः । तथाऽऽमनन्ति "सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः । संयोगा विप्रयोगान्ताः मरणान्तं हि जीवितम्" इति भगवताप्युक्तं "ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय ! न तेषु रमते बुधः" इति ॥ ३९ ॥

यथा ऐहिकाः धनादिपदार्थाः चलाः एवं अमी स्वर्गादयः कर्तृभिः कृता निर्मिताः चयिष्णवः चला एव सातिशयाः क्रतुतारतम्यतःऽतिशयेन युक्ताः हर्षशोकजनका इत्यर्थः । न निर्मलाः मलिनाश्च यस्मादेवं तस्मात् परं निरतिशयानन्दनिधिं न विद्यते इष्टं श्रुतं च दूषणं यस्मिन्नतम् ईशं सर्वनियन्तारम् आत्मलब्धये तत्प्राप्त्यर्थम् एकया सर्वेऽपि साधनेभ्यः श्रेष्ठया भक्त्या भजत ॥ ४० ॥

———

भाषा टीका ।

रागादियुक्त मनवालों के संसार चक्र का नाश करने वाला केवल भगवानही का ध्यान है । उसी को बुध लोग निर्वाण अर्थ सुख जानते हैं, तिसी कारणसे अपने हृदयमें हरीश्वर (अन्तर्यामी) श्रीहरि को भजो ॥ ३७ ॥

हे असुर बालको ! आकाशवत हृदयमें रहने वाले हरिके उपासनमें कौनसा प्रयासहै । क्योंकि वह सामान्यसे समस्त

यदध्यर्थेह कर्माणि विद्वन्मान्यसकृन्नरः ।
करोत्यतो विपर्यासममोघं विन्दते फलम् ॥ ४१ ॥
सुखाय दुःखमोक्षाय सङ्कल्प इह कर्मिणः ।
सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ॥ ४२ ॥
कामान्कामयते काम्यैर्यदर्थमिह पूरुषः ।
स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च ॥ ४३ ॥
किमु व्यवहितापत्यदारागारधनादयः ।
राज्यं कोशगजामात्यभृत्याप्ता ममतास्पदाः ॥ ४४ ॥
किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः ।
अनर्थैरर्थसङ्काशैर्नित्यानन्दमहोदधेः ॥ ४५ ॥
निरूप्यतामिह स्वार्थः कियान्देहभृतोऽसुराः ! ।
निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ॥ ४६ ॥
कर्माण्यारभते देही देहेनात्मानुवर्तिना ।
कर्मभिस्तनुते देहमुभयं त्वविवेकतः ॥ ४७ ॥
तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ।
भजतानीहयात्मानमनीहं हरिमीश्वरम् ॥ ४८ ॥

भाषा टीका ।

देहियों का सखा और आत्मा है, उसीका उपासन करो, और विषयों के उपपादनसे क्या प्रयोजन है ॥ ३८ ॥

द्रव्य स्त्री पशु पुत्रादि गृह पृथ्वी हाथी खजाना संपदायें, और सब चीजें, क्षण भंगुर आयुवाले इस प्राणी का कितना प्रिय करते हैं ? क्योंकि आप भी चल हैं ॥ ३९ ॥

जैसे इस लोक के पदार्थ नाशमान है ऐसे ही परलोक में यज्ञ यागादि से संपादित जो लोक हैं वे भी सब नाशमान और सातिशय हैं (अर्थात् ऐसे तरतम भाग वाले हैं कि जिसमें एक दूसरे के वैभव को देख कर जला करें) तस्मात् जिसका दोष कभी देखने सुनने में नहीं आया अपने आत्म लाभ के लिये उसी परमात्मा को भक्ति से भजो ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च यदध्यर्थं यत्सङ्कल्प्य अतः सङ्कल्पिताद्विपर्यासम् विपरीतं फलममोघमवश्यं प्राप्नोति ॥ ४१ ॥

तदेव दर्शयति, सुखायेति । ईहया इच्छया क्रियया वा यः पूर्वमनीहाया हेतोः सुखेनावृतो व्याप्त आसीत्स ईहया दुःखमाप्नोत्येव ॥ ४२ ॥

किञ्च कामान् भोगान् काम्यैर्विषयैः कर्मभिर्वा पारक्यः श्वादिभोग्यो न त्वात्मीयो भंगुरश्च ॥ ४३ ॥

किमु देहाद्व्यवहिता अपत्यादयो ममताविषयाः पारक्या इति वक्तव्यम् ॥ ४४ ॥

किञ्च स्वयं पुरुषार्थरूपस्य किमेतैरतितुच्छैरित्याह, किमेतैरिति ॥ ४५ ॥

भोगावसराभावाच्चैतैः क उपयोग इत्याह, निरूप्यतामिति । प्राचीनैः कर्मभिः क्लिश्यमानस्य कर्मभिः कियान्स्वार्थ इति वाऽन्वयः ॥ ४६ ॥

ननु, कुर्वत्सु समाप्तेषु भोगावसरः स्यात्तत्राऽऽह—कर्माणीति । न चेदं कर्म तस्य फलं देहादिकञ्च परमार्थं इत्याह, उभयं कर्म च देहं च अविवेकतोऽज्ञानेनैव तनुते ॥ ४७ ॥

अर्थादयो यदपाश्रया यदधीनाः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

किञ्च वैषयिकसुखाभिप्सया कुर्वन्नपि न तत्प्राप्नोति किन्तु तद्विपरीतं दुःखमेवातस्तत्परित्यज्य भगवन्तमेव भजेतेत्याह—यदर्थ इति. विद्वन्मानी नरः विद्वांसमात्मानं मन्यते इति विद्वन्मानी कुशलकर्ममीमांसोपचितबुद्धिरित्यर्थः। नरो यदर्थं यद्वैषयिकसुखार्थमिह लोके असकृद्वारंवारं कर्माणि यागादीनि करोति स ततोऽभिलषितसुखाद्विपरीतं फलं दुःखात्मकमेवामोघमवश्यं विन्दते प्राप्नोति॥ ४१॥

तदेव दर्शयति—स चेति। यः पुमाननीहायां निमित्तभूतायां वैषयिकसुखार्थव्यापारारम्भात्प्राङ्निर्व्यापारावस्थायां सुखावृतः सुखेन व्याप्त आसीत् स एवेहया आरब्धेन व्यापारेण हेतुना दुःखमेवाप्नोति स्वर्गादिसुखार्थयागादिव्यापारेण दुःखमेवाप्नोतीत्यर्थः। भगवत्प्राप्त्यर्थभक्तियोगानुष्ठानदशायामपि निरतिशयानन्दभगवदनुभवरूपं सुखमेव प्राप्नोति अन्ततस्तु नित्यनिरतिशयब्रह्मानन्दमग्नो भवति स्वर्गाद्यर्थं यागादिकं कुर्वाणस्तु जीवद्दशायां वित्ताद्यार्जनेन तदनुष्ठानप्रयासरूपं दुःखमन्ततस्तु सातिशयाल्पास्थिरफलरूपं स्वर्गादिकं तन्निमित्तपुण्यक्षये तु नरकमिति वैषम्यमभिप्रेतम्॥ ४२॥

किञ्चेह लोके पुरुषो यदर्थं यस्य देहस्य प्रयोजनाय काम्यन्त इति कामाः 'कर्मणि घञ्' तान् शब्दादीन् कामैः 'करणे घञ्' कामोत्पत्तिसाधनैः कामयते इच्छति स एव तु देहः पारक्यः श्वसृगालादिभक्ष्यः भङ्गुरो नश्वरः उपैति कदाचिद्देहिनमालिङ्गति कदाचिदपैति जहातीत्यर्थः॥ ४३॥

देहस्यैवेयमवस्था किमुत देहानुबन्धिनां दारादीनामित्याह, किमिति। देहस्यैव साक्षादात्मनः सम्बन्धो दारादिभिस्तु देहद्वारेति व्यवहितेत्युक्तम्। व्यवहिता ये दारादयः आगारं मन्दिरम् आदिशब्देन पशुपुत्रादयः कोशो रत्नादिपेटिका दन्ति चतुरङ्गयुक्तम् भृत्याः परिचारकाः एते सर्वे ममतास्पदाः ममेत्यभिमानविषयाः उपयन्त्यपयन्ति चेति किमुत वक्तव्यमित्यर्थः॥ ४४॥

ननु, न देहार्थो विषयार्थो व्यापारः किन्तु आत्मार्थ इति चेत्तत्र नित्यानन्दसुखरूपस्यात्मनः समृद्धस्य विषयैः किमेतैर्वैषयिकं सुखमित्याह—किमेतैरिति। नित्यानन्दः स एव स्वः स एवोदकं तस्याश्रयस्यात्मनः एतैर्देहेन साकं नश्वरैरत एव तुच्छैरल्पैर्वस्तुतोऽनर्थैः पुरुषार्थत्वभ्रान्त्यैवार्थसदृशैः अर्थाभासैः कामैः किं प्रयोजनं तदनुभवजनितं सुखमतितुच्छमित्यर्थः॥ ४५॥

किञ्चाऽऽत्मार्थमार्जितमपि वैषयिकसुखमनुभवितृदुःखापेक्षयाल्पमेव तदनुभवावसराभावादित्याह—निरूप्यतामिति। हे असुराः! इह संसारे कर्मभिः प्राचीनैः क्लिश्यमानस्य दुःख्यतः देहभृतो निषेकादिष्ववस्थासु स्त्रीसम्भोगाद्यवस्थासु स्वार्थे उत्पन्न आनन्दः कियान् तदधिकदुःखापेक्षया सुखमल्पमिति भावः। यद्वा निषेकादिष्ववस्थासु पितृरेतोद्वारा मातृयोनिप्रवेशप्रभृतिषु श्मशानान्तासु तासु अवस्थासु प्राचीनैः कर्मभिः क्लिश्यमानस्य अनेन दुःखप्राचुर्यमुक्तम्॥ ४६॥

ननु, निषेकाद्यवस्थायाः कर्मनिमित्तत्वान्निःशेषकर्मक्षये प्रभूतं सुखं स्यादित्याशङ्कां निराकर्तुमन्तरेण परमात्मोपासनं न कदाचिदपि कर्म निवर्तत इत्याह—कर्माणीति। देहात्मानुवर्तिना देहेन तावत्कर्माणि देहान्तरारम्भकाणि पुण्यपापात्मकानि कर्माणि कुरुते तैश्चारब्धं कर्मभिर्निमित्तभूतैर्देहं तनुते बिभर्ति, तेन पुनः कर्माणि तैश्च पुनर्देहमित्येवं बीजाङ्कुरतुल्या परिवृत्तिर्न निवर्तत इति न कदाचिदपि निःशेषकर्मक्षय इति भावः। कुतस्त्वियं परिवृत्तिस्तत्राह—तमस्तु देहेन कर्माणि कर्मभिर्देहः इत्येतदनुबन्धः अविवेकतः आत्मपरमात्मयाथात्म्याज्ञानादेव हेतोर्भवतीत्यर्थः॥ ४७॥

एवं वैराग्योदयार्थमैहिकामुष्मिकसुखस्याल्पाऽस्थिरत्वादिदुःखमिश्रत्वानर्थानुबन्धित्वादिकमभिधायाऽथेश्वरं भजतां यद्यपि सर्वे पुरुषार्थाः सुलभास्तथाप्यनन्यप्रयोजनत्वेनैव तद्भजनं श्रेय इत्याह—तस्मादिति। तस्मादैहिककर्मणः परिवृत्तिरूपसंसारस्य कदाप्यनिवृत्तेरैहिकामुष्मिकसुखस्याल्पत्वास्थिरत्वाद्दुःखमिश्रत्वाद्भयकत्वाच्च तन्निवृत्त्यै निःशङ्कं सदा हरिमाश्रितानां संसृतेर्बन्धहरः ईश्वरः अनीहया निष्कामेन भजत, हरिं विशिनष्टि, धर्मश्चार्थश्च कामाश्च यदपाश्रया यस्मिन्वर्गस्यापि दाता तमित्यर्थः। तथा च श्रुतिः "इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः" इति, "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इति "य आत्मदा बलदा य एको बहूनां विदधाति कामान्" इति च. अर्थादयो यदुपाश्रयास्तं हरिमनीहया भजतेत्यनेन [illegible] भजतामनर्थहेतुं संसृतिबन्धं हरति, ईहया भजतां त्वीहितमात्रमेव ददातीति सूचितम् भवति॥ ४८॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

भगवदनुग्रहस्य सुखानुभवत्वाद्विकर्मोऽनर्थहेतुरित्याशयेनाह—यदर्थमिति। भजेतेत्यादि विषयाङ्गानि विपर्यासं दुःखम् अमोघं सदानन्दत्वेनावश्यम्॥ ४१॥

एतदेव निदर्शयति—सुखायेति। ब्रह्माप्रेमाजन्मोत्थेन कारणामनीहा। तदुक्तम् *"अज्ञानेन परमात्मनीहा निश्चयेन नुः" इति॥ ४२॥

शाश्वतानन्दानुभवप्राप्तं विहाय शरीरसुखकामं प्रयतमानो विमूढ इत्येतदनुसरन्नित्याशयेनाह—कामानिति। काम्यान् कामान् यदर्थं यस्य शरीरस्यार्थे पारक्यस्तु श्वसृगालादिभक्ष्यो न कार्यः। व्यवहिताः शरीरसंपर्कद्वारेण॥ ४३—४४॥

ननु, विषयभोगार्थं भगवानपि विग्रहं गृह्णातीति चेत्तत्राह, किमेतैरिति। आत्मनो हरेः तस्मात्स्वतोऽखण्डानन्दस्वरूपस्य श्रीनाथस्य अनित्यादिना किं न किमपि कृत्यमित्यतो वाह, किमेतैरिति॥ ४५॥

विचारासहत्वान्न देहादिना प्रयोजनमित्याह, निरूप्यतामिति। निषेकादिषु गर्भाधानादिष्ववस्थासु कर्मभिः क्लिश्यमानस्य देहभृतः कियान्स्वार्थ इति निरूप्यतामित्यन्वयः॥ ४६॥

* अकारस्य च्यवनमुद्देशात्।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

संसारस्य प्रवाहरूपेण नित्यत्वाद्धरेर्ज्ञानमन्तरेण निवृत्तिः क्यादित्याशयेनाह, कर्माणीति। आत्मानुवर्तिना परमात्माधीनेन कर्मदेहश्चेत्युभयमविवेकतोऽज्ञानात् ॥ ४७ ॥

तर्हीश्वरसेवायां भक्तिरेव प्रयोजिका चेत्तदर्थादिना प्रयोजनमित्याशङ्कां परिहरन्नुपसंहरति, तस्मादिति। अर्थाद्देहादिविषयत्वे साफल्यं भवतीत्यर्थः। ननु, प्रतीते चेष्टाराहित्यमनीहशब्दार्थं परित्यज्यान्यार्थकल्पने किं प्रमाणम् उक्तं हि प्रमाणमिति चेन्न, तस्य यत्नं विनाप्यन्येन स्वाभिप्रेतार्थमन्तरेहात् "करणं कारणं कार्यं माधवेऽनुक्रमादिषु" इत्युक्तेरिति तत्राह, अनीहामिति. अस-माध्याक्रियाराहित्यादनीहामित्यभ्योक्तपदार्थः (१) अप्रयत्नेनेति विशेषणाच्च असमाध्याक्रियाराहित्येनोच्यते--

"स्वप्राकृतारणाभेदे ध्यानपञ्चाशनादिषु।
अनवन्धे नादृचभेदे गीतके कर्मणीन्द्रिये" ॥

इत्युत्तरवाक्ये कर्मण्यपि प्रयोगाच्च ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अनीहया निरुपाधिकया अनीहं तमेव निरुपाधिककृपाकरम्। "अहन्मकामस्तद्गतस्तस्य स्वाश्रितपाश्रयः" इति वक्ष्यमाणात् ॥ ४८—५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यदर्थं सत्सङ्कल्पय अतः सङ्कल्पितात् विपर्यासं विपरीतं फलममोघमवश्यं प्राप्नोति ॥ ४१ ॥

अनीहाया हेतोः सुखावृतः सुखपरिपूर्णः स्यात् ॥ ४२ ॥

काम्यैः कर्मभिः अयंति नश्यन्ति उपैति पुनरपि दुःखदानार्थम् उत्पद्यायान्ति ॥ ४३—४४ ॥

आत्मनः स्वस्य नित्यो भजनरूप आनन्दरसोदधिर्यस्य तस्य भक्तजनस्य ॥ ४५ ॥

क्लिश्यमानस्येति भोगेऽवसर एव नास्तीति भावः ॥ ४६ ॥

देहेन मानुषशरीरेण कर्मसाधकेन देहं स्वर्गिशरीरम् उभयं तद्देहद्वयं अविवेकतः तदुभयस्य अहं कर्म कुर्वे इति, अहं कर्मफलं स्वर्गमुपभुञ्जे, इत्यभिमानमूलत्वात् तदभिमानस्याऽविवेकमूलत्वात् आत्मनश्च देहद्वयातिरिक्तत्वात् ॥ ४७ ॥

तर्हि विवेक एव कर्तव्यस्तत्राह, तस्मादिति। यदपाश्रया यदधीनाः अनडुहां वृषाणां कर्तृत्वभोक्तृत्वादयः स्वाऽस्यधीना इत्यर्थः अनीहया कामनाराहित्येन अनीहं निरपेक्षम् ॥ ४८ ॥

(१) तात्पर्योक्तमिदम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवद्भजनातिरिक्तकर्मणामाह, यदर्थ इति। ययोः सुख-दुःखमोक्षयोरर्थे कर्माणि असकृत्करोति अतः विपर्यासं विपरीतं फलममोघं विन्दते ॥ ४१ ॥

एतदेव प्रपञ्चयन् कर्मफलेहा दुःखदा कर्मफलानीहा सुखदे-त्याह—सुखायेति। ईहया कर्मफलेच्छया दुःखमाप्नोति, न सुखम. अतोऽनीहायाः कर्मफलानीहातः सुखावृतः सुखव्याप्तो भवति॥४२॥

पुरुषो यदर्थं कामान् भोगान् काम्यैः कर्मभिः कामयते स देहस्तु पारक्यः परेषां पितृवृत्तिप्रदादिममताविषयः भङ्गुरोऽनि-त्यश्च यतो याति जायते उपैति नाशं प्राप्नोति च ॥ ४३ ॥

यदायमहितोऽहन्तास्पदो देहः पारक्यादि दोषवान् तदा व्यवहिताः ममतास्पदा अपत्यादयः पारक्यादिदोषवन्त इति किन्तु वक्तव्यम् ॥ ४४ ॥

किञ्च अनर्थैरपुरुषार्थरूपैः अर्थसंकाशैः पुरुषार्थवदाभासमानैः पतैरपत्यदारादिभिः देहेन सह नश्वरैरनित्यैः नित्यानन्दमहोदधेः अपरिच्छिन्नपरमानन्दनिधेः श्रीभगवतः सम्बन्धिनः अंशभूतस्य आत्मनः प्रत्यगात्मनः किम् ? न किमपि प्रयोजनमित्यर्थः ॥ ४५ ॥

प्राचीनैः कर्मभिर्निषेकादिष्ववस्थासु क्लिश्यमानस्य देह-भृतो जीवस्य इह संसारे कियान् स्वार्थः तन्निरूप्यताम् ॥ ४६ ॥

देहेन कर्माणि आरभते देहं तु कर्मभिरारभते एवमुभयं कर्मदेहद्वयमविवेकतो हेयोपादेयबोधाभावतस्तनुते न तु भग-वद्भक्त्या मुक्तो भवतीति भावः ॥ ४७ ॥

अर्थादयो यदपाश्रया यदधीनाः अनीहया ऐहिकामुष्मिकपदार्थ-कामनात्यागेन आत्मानमन्तर्यामिणम् "एष त आत्मान्तर्यामी" इति श्रुतिप्रसिद्धम् अनीहं स्वतोऽवाप्तसमस्तकामत्वात् भोगेच्छारहितं भजत ॥ ४८ ॥

भाषा टीका।

पंडित मानी मनुष्य जिस संकल्प से बार बार कर्म करता है उस संकल्पित पदार्थ को न प्राप्त होकर विपरीत फल को ही अवश्य प्राप्त होता है ॥ ४१ ॥

इस संसार में कर्म करने वाले पुरुष को सुख की प्राप्ति और दुःख छूटने का ही संकल्प रहता है परंच जब तक चेष्टा नही करता तब तक सुख में रहता है, और सुख के लिये चेष्टा करने से सदा दुःख ही को प्राप्त होता है ॥ ४२ ॥

पुरुष जिस देह के पोषण के लिये विषयों के द्वारा नाना प्रकार के भोगों की इच्छा करता है, वह देह तो पराया है अर्थात् श्वशृगालादिकों का भोग्य है, क्षण भंगुर है और आग-मापायी है ॥ ४३ ॥

जब साक्षात् शरीर की यह दशा है फिर जो शरीर के संबंधि ममतास्पद हैं जैसे कि पुत्र स्त्री गृह धन राज्य कोश (खजाना) हस्ती अमात्य नौकर चाकर इत्यादि इन तुच्छों से आत्मा का क्या प्रयोजन होने वाला है, क्योंकि ? आत्मा तो

सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः ।
भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः ॥ ४९ ॥
देवोऽसुरो मनुष्यो वा यक्षो गन्धर्व एव च ।
भजन्मुकुन्दचरणं स्वस्तिमान्स्याद्यथा वयम् ॥ ५० ॥
नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः ! ।
प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता ॥ ५१ ॥
न दानं न तपो नेज्या न शौचं न व्रतानि च ।
प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम् ॥ ५२ ॥
ततो हरौ भगवति भक्तिं कुरुत दानवाः ! ।
आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ॥ ५३ ॥
दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ।
खगा मृगाः पापजीवाः सन्ति ह्यच्युततां गताः ॥ ५४ ॥
एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः ।
एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणम् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां सप्तमस्कन्धे दैत्यपुत्रानुशासनं नाम
सप्तमोऽध्यायः ॥ ७ ॥

भाषा टीका ।

मिथ्याऽऽनन्द का महासागर है, और ये सब अर्थ सत्य जान पड़ते हैं, और हैं अनर्थ तथा देह के साथ नष्ट होने वाले हैं, ॥ ४४—४५ ॥

प्रह्लाद कहते हैं कि—हे असुर पुत्रहो ! तुमही बतलाओ कि इस संसार में निषेक आदि संपूर्ण अवस्थाओं में कर्मों से क्लेशित इस देहधारी का कितना स्वार्थ है ॥ ४६ ॥

देही (जीव) स्वाधीन देह से कर्म करता है, तथा कर्मों से देह को प्राप्त होता है तथा देह और कर्म दोनों अविवेक से अर्थात् हेयोपादेय के अज्ञान से होते हैं ॥ ४७ ॥

. तस्मात् अर्थ काम और धर्म ये सब जिसके अधीन हैं कर्मों की चेष्टा न करके अपने आत्मा उस हरि ईश्वर को भजो ॥४८॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भूतानां प्राणिनाम् जीवसंज्ञितोऽन्तर्यामी ॥ ४९ ॥

असुराणामस्माकमत्राऽनधिकार इत्यपि न वाच्यमित्याह, देव इति पञ्चभिः ॥ ५० ॥ ५१ ॥

अमलया निष्कामया अन्यद्विडम्बनं नटनमात्रम् ॥ ५२ ॥ ५३ ॥

अच्युततामसृतत्वम् ॥ ५४ ॥

अध्यायद्वयोक्तमुपसंहरति, एतावानिति । तदीक्षणं गोविन्ददृष्ट्या संमाननम् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ दैत्यकुमाराणां सर्वेषामात्मनां भगवद्भजनेऽनधिकार-शङ्कां निराकुर्वन्ननीहया भजनामेवापवर्गनिर्वृत्तिरिप्राप्तिरित्यर्थान्स्वदृष्टान्तेनाह—सर्वेषामपीति द्वाभ्याम् । स्वकृतैः स्वसृष्टैर्महद्भिः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भूतैः पृथिव्यादिभिः कृतानां सृष्टानां भूतानां देवादीनां सर्वेषां भगवान् बीजसंज्ञितः आदिकारणभूतः आत्मा अत एव निरतिशयप्रिय ईश्वरोऽन्तःप्रविश्य नियन्ता तावद्भगवान् सर्वेषां साधारण इति भावः ॥ ४९ ॥

अतो देवादिजातिविभागमन्तरेण यः कश्चिन्मुकुन्दचरणं भजन् स्वस्तिमानिवृत्तोऽनिष्टः प्राप्तेष्टश्च स्यादेव यथा वयमिति वयमसुरा अपि भगवन्तं भजन्तः स्वस्तिमन्तोऽभूम, तथेतरेऽपीत्यर्थः । यथा वयमिति दृष्टान्तस्वारस्याद्भगवतः सर्वभूतसाधारणप्रतिपादनस्वारस्याच्च निरुपाधिकोक्तविधात्मत्वादिसम्बन्धज्ञानपूर्वकमनन्यप्रयोजनेन भजन्तः स्वस्तिमन्तो भवेयुरन्यथा तु समीहितमाप्नुवन्त इति सूचितम्. तथा च श्रुतिः “नान्यः पन्था अयनाय विद्यते” इत्यादिका ॥ ५० ॥

तदेतदुपपादयति-नालमिति द्वाभ्याम् । हे असुरात्मजाः ! द्विजत्वादयो मुकुन्दस्य प्रीणनाय प्रीतिजननाय नालं न प्रभवः किं त्वमलया अनन्यप्रयोजनया भक्त्यैव हरिः प्रीयते अन्यदुपायान्तरन्तु विडम्बनं नटनमात्रम्. द्विजत्वमिति वर्णाधिक्योपलक्षणम् देवत्वमिति जात्याधिक्यस्य ऋषित्वमित्यतीन्द्रियद्रष्टृत्वादिरूपज्ञानाधिक्योपलक्षणम् बहुज्ञतेति तु शास्त्रजन्यज्ञानाधिक्यस्य वृत्तं पित्राद्यि परंपरागता सद्वृत्तिः ॥ ५१ ॥

दानं पात्रे वित्तत्यागः तपः कृच्छ्रादि इज्या यागः शौचं स्नानादिकृतं शुचित्वं व्रतानि प्राजापत्यादीनि ॥ ५२ ॥

यतो भक्त्यैव भगवान्प्रीयते नोपायान्तरेणातो हे दानवाः ! यूयमाश्रितसंसारबन्धहारिणि सर्वभूतानामन्तरात्मनि भगवति ईश्वरे भक्तिमनन्यप्रयोजनां कुरुत कथम्भूताः सर्वत्रात्मौपम्येन स्वात्मतुल्यत्वबुद्ध्या स्वस्मिन्निवेश्वरशरीरभूतेषु सर्वेषु दययोपलक्षिताः भगवद्भक्तिं कुरुतेत्यर्थः ॥ ५३ ॥

किमेवं भजन्तः केऽपि मुक्ता बभूवुरित्यपेक्षायां पापजातयोऽपि केनचिद्भगवत्सम्बन्धविशेषेण मुक्ताः किं पुनरेवं भजन्तो मुच्यन्त इति वक्तव्यमित्याशयेनाह—दैतेया इति । रक्षांसि बकवृकादयः स्त्रियः पूतनादयः व्रजौकसो नन्दादयः शूद्राः कुब्जादयः खगाः जटायुप्रभृतयः मृगाः मायामृगादयः एवंविधाः पापजीवा अच्युततां भगवत्साधर्म्यं कृताः प्राप्ताः सन्ति हीति प्रसिद्धौ. त्रिकालज्ञत्वाद्भगवता प्रह्लादेनैवमुक्तम् ॥ ५४ ॥

अध्यायद्वयोक्तार्थं निष्कृष्योपसंहरति-एतावानिति । अस्मिँल्लोके पुंसां पर उत्कृष्टः स्वार्थः पुरुषार्थः एतावानेव कियान् यत् गोविन्दे भगवत्येकान्तभक्तिरनन्यप्रयोजना भक्तिर्यच्च सर्वेषु भूतेषु तदीक्षणं गोविन्देक्षणं भगवदात्मत्वदर्शनमित्येतावानेव निरतिशयपुरुषार्थसाधनभूत इत्यर्थः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेरेव भजने कारणमाह, सर्वेषामिति । अव्यक्तकारणबीजाकृत, इति शेषः “व्यक्तनाज्जगतो विष्णुर्बीजं न परिणामतः” इति वचनाच्च बीजशब्दस्य विकारोऽर्थः अप्रयत्नेनेति“अक्लिक्रियः स्वरूपतः” इति स्मृतेः ॥ ४९—५० ॥

भूतानामुत्पत्त्यादिना मत्स्यभावे जातिविशेषो वृत्तादिविशेषोऽप्यकिञ्चित्कर इत्याह, नालमिति । वृत्तमाचारः “वृत्तं चरूपे चरिते” इति यादवः ॥ ५१—५२ ॥

आत्मौपम्येनात्मस्नेहवत्स्नेहेन ॥ ५३ ॥

वेदान्तादिशास्त्रमनधिकारित्वेन पापजीवत्वं न तु पापकरणात् अच्युतता च्युतिवर्जनं मोक्षं गताः सन्ति हि यस्मात्तस्मात् मुकुन्दभक्तिरेव सम्पाद्या ॥ ५४ ॥

तात्पर्यात्पुनरेतदेव हि करणं श्रेय इत्याह, एतावानिति । तस्य हरेः सर्वसत्ताप्रदत्वेनाधिष्ठितेरीक्षणं दर्शनं ज्ञानमिति यदीयं भक्तिरिति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नालमिति युग्मकम् ॥ ५१—५२ ॥

तत इति सर्वत्र सर्वस्मिन् देशे काले च आत्मौपम्येन आत्मनि यथा आनुकूल्येन कायमनोवचनवृत्तिरूपं भजनं कुरुत तद्वदपि कुरुतेति ॥ ५३ ॥

व्रजौकसोऽत्र नीचसहपाठात् “किरातहूणान्ध्रपुलिन्द पुल्कसा आभीरकङ्का यवनाः खसादयः” इत्यादावपि गवोपजीवना नीचजातिविशेषा एव आभीरा ज्ञेयाः । ननु “कृषिवाणिज्यगोरक्षाः कुसीदं तुर्यमुच्यते । वार्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम्” इतिवद्वैश्यभेदा इति विशेषः प्रतिपत्तव्यः ॥ ५४ ॥

तस्य भागवत एव ईक्षणं स्फूर्तिः “सर्वभूतेषु यः पश्येत्” इत्यादेः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यतः सर्वेषां देहश्च जीवश्च परमात्मा च प्रियस्तु वस्तुतो हरिरेव तस्मात्तं भजतेत्याह, सर्वेषां देवतिर्यगादीनामपि आत्मा परमात्मा स एवेश्वरः स्वेनैव कृतैः कृतानामिति देहोऽपि तत्कारणकत्वात् स एव जीवसंज्ञा सञ्ज्ञाता यस्य सः जीवस्य तद्वीयतटस्थशक्तिरूपत्वात् । यद्वा सर्वेषां प्रियत्वादपि तमेव भजतेत्याह, सर्वेषां भूतानां यो जीवसंज्ञः जीवनामा ततोऽपि प्रियः ॥ ४९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यस्मादेवं तस्मात्सर्व एव भक्तिं कुर्युरित्याह, देव इति ॥५०॥

प्रीणनाय न अलं न समर्थमित्यर्थः । विडम्बनं पुंसः प्रत्युत तिरस्कारकारणमित्यर्थः ॥ ५१ ॥ ५२ ॥

'आत्मौपम्येनेत्यत्र सुखदुःखादिदृष्ट्येति शेषः ॥ ५३ ॥

नच भक्तिः सज्जात्यादिकमपेक्षत इत्याह, दैतेया इति । अच्युततां चिन्मयशरीरत्वेन अच्युततुल्यत्वम् अच्युतता अच्युतिं गता कर्मिण इव न च्युता भवन्तीत्यर्थः । यदुक्तं काशीखण्डे—

मच्यवन्ते च यद्भक्ता महत्यां प्रलयापदि ।
अतोऽच्युतोऽखिले लोके विद्वद्भिः परिगीयते ॥

इति ॥ ५४ ॥

एकान्तभक्तिरनन्यभक्तिः यत् यस्यां भक्तौ सत्यां सर्वत्रैव स्थावरजङ्गमवस्तुषु तदीक्षणं भगवतो भावना परिपाकेन भगवदीक्षणं यदुक्तम्—

"नारायणमयं धीराः पश्यन्ति परमार्थिनः ।
जगद्धनमयं लुब्धाः कामुकाः कामिनीमयम्" ॥ इति.

यथायं प्रह्लादश्च स्तम्भेऽपि भगवन्तमपश्यत् ॥ ५५ ॥

इति सारार्थदर्शिन्याम् हर्षिण्याम् भक्तचेतसाम् ।
सप्तमे सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वकृतैः स्वसृष्टैः महद्भिर्भूतैः पृथिव्यादिभिः कृतानां सर्वेषां सुरादीनाम् आत्मा अन्तर्यामी प्रियो हितकृच्चासौ ईश्वरो नियन्ता हरिरेव अतो जीवसंज्ञितः यः कश्चिदपि जीवपदार्थः देवादिनामको मुकुन्दचरणं भजन् स्वहितमान् स्यादित्युत्तरेणान्वयः ॥ ४९ ॥ ५० ॥

वृत्तं वर्णाश्रमक्रियात्मकम् ॥ ५१ ॥

व्रतानि नानातिथ्युपवासतीर्थवासादीनि ॥ ५२ ॥

यथा मयि स्वांशभूते दासे भगवानन्तर्यामिरूपेण वर्त्तते तथा सर्वेषु भूतेष्वपि एवमात्मौपम्येन सर्वत्र वर्त्तमाने सर्वभूतानामात्मनि अन्तर्यामिणि भगवति भक्तिं कुरुत भूतद्रोहो नकार्यः किन्तु सर्वत्र हरिरहया यथाशक्ति यथायोग्यमानुकूल्यं कुरुतेत्यर्थः ॥ ५३ ॥

यतो भक्त्यैव दैतेयादयः अच्युततां भगवद्भावापत्तिलक्षणां मोक्षं गताः सन्ति ॥ ५४ ॥

अध्यायद्वयोक्तार्थमुपसंहरति, एतावानिति । गोविन्दे भक्तिः सर्वत्र तदीक्षणं तदात्मकत्वदर्शनमित्येतावानेव स्वार्थः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तमाध्यायार्थप्रकाशः ॥ ७ ॥

भाषा टीका ।

अपने रचे हुए महाभूतों से निर्मित सर्व भूतों का आत्मा और प्रिय नियन्ता श्रीहरि हैं और अंतर्यामी भी वोही है ॥ ४९ ॥

देव हो असुर हो वा मनुष्य हो यक्ष हो अथवा गन्धर्व हो वा कोई भी हो, श्रीमुकुन्द के चरणारविन्द के भजन से स्वास्तिमान् होता है जैसे कि ? हम ॥ ५० ॥

हे असुरात्मजहो ! श्रीमुकुन्द की प्रसन्नता के लिये ब्राह्मणपना देवतापना अथवा ऋषिपना नहीं चाहिये तथा न वृत्त न बहुज्ञता न दान न तप न इज्या न शौच न बहुत से व्रत ये कुछ भी न चाहिये, क्योंकि ? हरि तो केवल निर्मल भक्ति मात्र से प्रसन्न होते हैं, और तो सब विडंबन ही है ॥ ५१-५२ ॥

हे दानव हो ! आत्मा की उपमा से सर्वत्र सर्व भूतात्मक ईश्वरही है, तिसी हेतु से भगवान श्रीहरि में भक्ति करो ॥ ५३ ॥

दैत्य यक्ष राक्षस स्त्री शूद्र व्रजवासी खग मृग और बहुत से पापी जीव भी हरि भक्त होकर अमृतत्व को प्राप्त हो गये ॥ ५४ ॥

इस लोक में इतना ही पुरुषों का परम स्वार्थ है कि गोविंद में एकांत भक्ति वाला होकर सर्व जगत को गोविन्द दृष्टि से देखे ॥ ५५ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, सप्तम अध्याय
की भागवताचार्यकृत भाषा टीका
समाप्त ॥ ७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

———○:*:○———

॥ अष्टमोऽध्यायः ॥

नारद उवाच ।
अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम् ।
जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितम् ॥ १ ॥
अथाचार्यसुतस्तेषां बुद्धिमेकान्तसंस्थिताम् ।
आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा ॥ २ ॥
श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयाऽनयम् ।
कोपावेशचलद्गात्रः पुत्रं हन्तुं मनो दधे ॥ ३ ॥
क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणम् ।
आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ॥ ४ ॥
प्रश्रयावनतं दान्तं बद्धाञ्जलिमवस्थितम् ।
सर्पः पदाऽऽहत इव श्वसन् प्रकृतिदारुणः ॥ ५ ॥
हिरण्यकशिपुरुवाच ।
हे दुर्विनीत ! मन्दात्मन् ! [(१)] कुलभेदकराधम ! ।
स्तब्धं मच्छासनोद्धृतं नेष्ये त्वाऽद्य यमक्षयम् ॥ ६ ॥
क्रुद्धस्य यस्य कम्पन्ते त्रयो लोकाः सहेश्वराः ।
तस्य मेऽभीतवन्मूढ ! शासनं किम्बलोऽत्यगाः ॥ ७ ॥
प्रह्लाद उवाच ।
न केवलं मे भवतश्च राजन्स वै बलं बलिनां चापरेषाम् ।
परेऽवरेऽमी स्थिरजङ्गमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमेऽतिरुषा सूनुं निघ्नन् दैत्यो हतः स्वयम् ।
आविर्भूय नृसिंहेन स च ब्रह्मादिभिः स्तुतः ॥ १ ॥
अन्तः कृपासुधापूर्णो बहिःक्रोधो नृकेसरी ।
दैत्येन्द्रमरिभावेन भजन्तं समभावयत् ॥ २ ॥

एकान्तसंस्थितां प्रत्यक्प्रवणनिष्ठाम् यथा यथावत् ॥ १ ॥ २ ॥

स च पुत्रं हन्तुं मनो दधे कथम्भूतः कोपस्यावेशेनोद्रेकेण चलद्गात्रं वपुर्यस्य सः ॥ ३ ॥

क्षिप्त्वा तिरस्कृत्य पापेन सरोषेण तिरश्चीनेन वक्रेण ॥ ४ ॥ ५ ॥

हे मन्दात्मन्नल्पबुद्धे ! मदाज्ञाऽनिलङ्घिनं त्वामद्य यमालयं नेष्यामि ॥ ६ ॥

अभीतवत् किं बलं यस्य सः किम्बलः ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भगवता प्रह्लादेनोपदिष्टतत्त्वत्रययाथात्म्यहेयोपादेयभगवद्धर्मतदनुष्ठानोद्योगान् दैत्यकुमारानालक्ष्याचार्यसुतो दैत्येन्द्राय

---

(१) कुलच्छेद इतिपाठः—वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

स्यवेदयदित्याह देवर्षिः—यथेति । भगवद्धर्मोपदेशानन्तरं तेन प्रह्लादेनानुवर्णितमाकर्ण्य निर्दुष्टत्वात्प्रह्लादोक्तमेव जगृहुर्दैत्यकुमाराः नतु गुर्वनुशिक्षितमसुरोपाध्यायानुशिक्षितम् अगृहुः ॥ १ ॥

अथ तेषां दैत्यपुत्राणामेकान्तसंस्थितामव्यभिचारिणीं भगवद्धर्मविषयां बुद्धिमाज्ञाय विज्ञैकात्मा भीतस्त्वरितः सञ्जातत्वरः यथावद्राज्ञे हिरण्यकशिपवे न्यवेदयद्विज्ञापितवान् ॥ २ ॥

ततो दैत्यो हिरण्यकशिपुर्गुरुणोक्तं सुतस्यात्मजस्यानीतिमत्तां स्वमार्गानुवर्तनम् अत एवाऽप्रियं तच्छ्रुत्वा कोपावेशेन क्रोधव्याप्त्या चलत्कम्पमानं गात्रं शरीरं यस्य तादृशः पुत्रं प्रह्लादं हन्तुं मनोदधे मनोरथं कृतवान् ॥ ३ ॥

कठोरया गिरा अनर्हणां तिरस्कारानर्हं प्रह्लादं क्षिप्त्वा तिरस्कृत्य क्रोधेन तिरश्चीनेन वक्रेण चक्षुषेक्षमाणः आह उवाच ॥ ४ ॥

कथम्भूतं विनयेन नितरां नम्रं दान्तं निरस्कारादिभिरप्यजातक्रोधं बद्धो अञ्जलिर्येन तं स्वसमीपे स्थितं कथम्भूतः पादेनाहतस्ताडितः सर्प इव श्वसन् श्वासं गुञ्चन् स्वभावेनैव क्रूरः ॥ ५ ॥

उक्तिमेवाह—हे दुर्विनीत इति द्वाभ्याम् । हे दुर्विनीत ! मन्दात्मन्नल्पबुद्धे ! मदाज्ञातिलङ्घिनं त्वामधुना यमालयं नेष्यामि ॥ ६ ॥

यस्य मे क्रुद्धस्य सतः सपालास्त्रयो लोकाः परितः कम्पन्ते तस्य मे मम शासनमभीतवद्भयरहितवन्मत्तो भयरहितः कोऽपि नास्तीत्यभिप्रायेण वतिः प्रयुक्तः अत्यगाः अतिक्रान्तवानसि एवमति वर्तने भवान् किंबलः को बलं यस्य तादृशः ॥ ७ ॥

एवमुक्त आह भगवान्प्रह्लादः—न केवलमिति चतुर्भिः । तावद्युक्तं किंबल इति तत्रोत्तरमाह, द्वाभ्याम् । हे राजन् ! स न केवलं ममैव बलं किन्तु भवतो ऽन्येषाञ्च बलिनां बलम्, कोऽसौ? येन ब्रह्मादयः चतुर्मुखप्रभृतयः उच्चावचाश्चराचरात्मकाः सर्वे लोकाः वशं स्ववशं प्रणीताः प्रापिताः ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

वैराग्याद्यङ्गोपाङ्गरुचिरभक्तिसुन्दरीसुन्दरावयवसन्निवेशाख्यापरमपुरुषार्थकरणं यदुत्तरचरितमित्येतन्निदर्शयितुं नरसिंहावतारो निरूप्यतेऽस्मिन्नध्याये, तत्र दैत्यसुतैः प्रह्लादवर्णितं श्रुत्वा किं कृतमिति युधिष्ठिरस्य मानसीं शङ्कां परिहरति, अथेति । निरवद्यत्वान्निर्दोषत्वात् ॥ १ ॥

एकान्ते क्वचित् सम्यक् स्थितामेकसंस्थितामभिन्नविषयामिति वा यथा यथावत्साकल्येन यथा तैस्तेनोक्तं गृहीतं तथेति वा ॥ २ ॥

तनयस्यानयं स्वसिद्धान्तविरुद्धसिद्धान्तम् ॥ ३ ॥

पापेन पापसाधनेन ॥ ४—५ ॥

यमक्षयं यमगृहम् ॥ ६ ॥

कस्य बलं यस्य स किम्बलः महद्बलमाहत्य तव बलभूतः क इत्यर्थः ॥ ७ ॥

किम्बलमित्यस्योत्तरमाह, न केवलमिति । येत्यनेन "बलमानन्द ओजश्च सहो ज्ञानमनाकुलम्" इति श्रुतिं सूचयति, परावराश्च परावरे एतदेव विशदयति, स्थिरजङ्गमा इत्यादिना ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

टीका पदे प्रतिभावेन भजन्तमिति तद्वाक्यकृतत्वाद्बहिरङ्गेनैव तेन भजन्तं स्वं प्रति अमायावत् प्रापयत्, श्रुत्वेति पदार्थं गौडमिथिलयोर्नास्ति स्वाग्रयस्मस्मतञ्च । सर्वेत्यध्याहारस्य वैयर्थ्यात् ॥ १—१३ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सप्तमे स्वसुतं हन्तुमद्यतं कश्यपात्मजम्।
स्तम्भोत्थस्तमहन् साक्षान्नृसिंहो दैत्यहस्तुतः॥

एको मुख्यश्चासावन्तः सर्वेषां चैकान्तो विष्णुभक्तियोगो वा तत्र संस्थिताम् ॥ २ ॥ ३ ॥ ४ ॥

दुर्विनीतेति अत्वत्वयमयं दुष्टेष्वपि विशिष्टं भीत कृपाकृष्णां यस्य परदुःखासहिष्णुत्वात् मन्दात्मन्नल्पात्मा मनो यत्र सर्वचित्ताकर्षकत्वात् कुलभेदकरः कुलाङ्गारपण्डारः प्रजापतयोऽपयशा यस्मात् महाविभूतिमत्त्वात् कश्यपात् असुरेषु पूज्यबुद्धित्वाभावात् मच्छासनोल्लङ्घनं मदाज्ञालङ्घिनं यमक्षयं यमालयं पक्षे यमानामष्टाङ्गयोगानां क्षयं निवासभूतं त्वां नेष्ये स्वप्रापकत्वेनाङ्गीकरिष्यामीत्यर्थः ॥ ५ ॥ ६ ॥

अभीतवत् किं बलं यस्य सः ॥ ७—८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सप्तमे प्रह्लादं हन्तुं प्रवृत्तो हिरण्यकशिपुर्नृहरिणा हतः स च ब्रह्मादिभिस्स्तुत इति दर्शयन्—अथेति । निरवद्यत्वान्निर्दोषत्वात्प्रह्लादेन वर्णितं जगृहुः ॥ १ ॥

एकस्मिन्भगवति अनन्यः समावेशो यस्य तम् प्रह्लादवाक्येन संस्थितां बुद्धिमाज्ञाय ज्ञात्वा ॥ २ ॥

तनयस्याऽनयं पक्षान्तरयां तत्तादृशमप्रियं श्रुत्वा कोपस्यावेशोनोद्रेकेन चलत्कम्पनं गात्रं यस्य सः ॥ ३ ॥

क्षिप्त्वा भर्त्सयित्वा पापेन दुष्टेन तिरश्चीनेन चक्षुषा ॥४-५॥

मन्दात्मनाम्मदाज्ञयाद्युल्लङ्घनं बहिर्भूतम् त्वा त्वाम् ॥ ६ ॥

किं किञ्चिन्मात्रं विष्णोर्नाख्यं बलं यस्य सः किंबलः अभीतवत् मच्छासनम् अत्यगाः अतिक्रान्तवानसि ॥ ७ ॥

स ईश्वरः काल उरुक्रमोऽसावोजः सहः सत्त्वबलेन्द्रियात्मा ।
स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ॥ ९ ॥
जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न सन्ति विद्विषः ।
ऋतेऽजितादात्मन उत्पथस्थितात्तद्धि ह्यनन्तस्य महत्समर्हणम् ॥ १० ॥
दस्यून् पुरा षण्ण विजित्य लुम्पतो मन्यन्त एके स्वजिता दिशो दश ।
जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥ ११ ॥

हिरण्यकशिपुरुवाच ।

व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे ।
मुमूर्षूणां हि मन्दात्मन्ननु स्युर्विप्लवा गिरः ॥ १२ ॥
यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।
क्वासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते ॥ १३ ॥
सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते ।
गोपायेत हरिस्त्वाऽद्य यस्ते शरणमीप्सितम् ॥ १४ ॥

एवं दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः ।
खड्गं प्रगृह्योत्पतितो वरासनात् स्तम्भं तताडातिबलः स्वमुष्टिना ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदुक्तं किंबलइति तत्र बलमाह. हेराजन् मे ममैव स बलं नास्ति किन्तु भवदादीनां सर्वेषां बलम् ॥ ८ ॥

भाषाटीका ।

श्रीरुक्मिणीपतये नमः ॥

॥ नारद उवाच ॥

नारदजी बोले, कि-तदनन्तर सब दैत्यपुत्रों ने प्रह्लाद का कथन सुनकर, शुद्ध होनेके कारण उसीको ग्रहण किया और गुरु का सिखाया हुआ नहीं ग्रहण किया ॥ १ ॥

अनंतर आचार्य पुत्र ने उन सबों की बुद्धि परमात्मनिष्ठ देखकर, भय भीत होकर उसी समय राजा से सब समाचार निवेदन किया ॥ २ ॥

दैत्य (हिरण्यकशिपु) ने भी उस दुःसह अप्रिय पुत्र की अनीति को सुनकर, कोप के आवेश से चलायमान गात्रवाला होकर पुत्र के मारने का मन किया ॥ ३ ॥

नम्रता से अवनत दान्त और हाथ जोड़े योग्य प्रह्लादको कोप के आवेश से चलायमान गात्र जिसका प्रकृति से दारुण, पादताडित सर्प के नाईं श्वास लेता हुआ और रोषयुक्त तिरछी दृष्टि से देखता हुआ हिरण्यकशिपु यों बोला ॥ ४—५ ॥

हिरण्यकशिपु बोला, कि—हे दुर्विनीत ! हे मन्दबुद्धे ! अरे कुल भेदक ! अरे अधम ! मेरी आज्ञा को उल्लंघन करने वाले स्तब्ध तुझ को अबही यमराज के घर पहुंचाता हूं ॥ ६ ॥

जब मैं कुपित होताहूं तब लोकपालों सहित तीनो लोक कांपने लगते हैं, हे मूढ ! तिस मेरी आज्ञा को निडर के नाईं किस के बल से तूंने उल्लंघन किया ॥ ७ ॥

प्रह्लाद उवाच ।

प्रह्लाद बोले, कि—हे राजन् ! न केवल हमारा किंतु तुमारा और संसार में अन्य जितने बली लोग हैं उन सभों का वह परमात्माही बल है, कि जिसने पर अवर (बड़े छोटे) स्थावर जंगम जो ब्रह्मादिक जीव हैं सब को वश में कर के रखे हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बलं प्रणीता इत्यत्र हेतुः-स ईश्वर इति । उरवः क्रमाः पादविक्षेपा यस्य बहुपराक्रम इति वा ओज आदिरूपः सत्त्वं धैर्यं बुद्धिर्वा ॥ ९ ॥

ननु, मच्छत्रुरसौ कथं ममापि स एव बलं स्यादत आह, जहीति । आत्मनः स्वस्य भावं स्वभावं त्यज यतोऽजितादात्मनो मनसः ऋते

तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनाण्डकटाहमस्फुटत्।
यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामात्ययमङ्ग ! मेनिरे॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

त्विमाऽन्ये विद्विषो न सन्ति किञ्च तद्धि तदेव हि साम्येन मनसो- धीरणमेव समर्हणमाराधनम् ॥ १० ॥

ननु, मया दिग्विजये सर्वे रिपवो जिता अतः साम्प्रतं विद्विषो न सन्तीतिचेत्सत्यं तत्राऽऽह—दस्यूनिति। एके मादृशा मन्दाः पुरा आदौ लुम्पतः सर्वस्वं हरतः षडिन्द्रियलक्षणान् शत्रून् विजित्याऽजित्वा दश दिशः स्वयञ्जिता मन्यन्ते साधोस्तु जितचित्तस्य देहिनां समस्य तस्य विदुषः स्वाज्ञानकल्पिताः परे शत्रवः कुतः स्युः ॥ ११ ॥

व्यक्तं निश्चितम् विप्लवा अनन्विता इत्यर्थः ॥ १२ ॥

हे मन्दभाग्य ! मदन्यो जगदीश्वरो यद्यस्ति, तर्ह्यसौ क्वास्ति? प्रह्लाद आह, स सर्वत्रास्ति, हिरण्यकशिपुराह, तर्हि कस्मात्स्तम्भे नास्ति प्रह्लादस्तु तं स्तम्भं निरीक्षमाणो नमस्यन्नाह, दृश्यति इति ॥ १३ ॥

हिरण्यकशिपुस्तु तत्र तमपश्यन्नाह, सोऽहमिति। विकत्थमानस्य विपरीतं ब्रुवाणस्य ते शिरः कायाद्धरामि पृथक्करोमि ॥ १४ ॥

प्रह्लादेन मूर्ध्नि बद्धाञ्जलिना निरीक्ष्यमाणं स्तम्भं मुष्टिना ताडितवान् ॥ १५ ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

कोऽसौ तस्य नाम कथयेत्यत्राह—स इति। स सर्वेषां बलाधायकः ईश्वरः, कोऽसावीश्वरः? उरुक्रमः उरवः लोकत्रयसंग्राहकाः क्रमाः पादविक्षेपा यस्य सः त्रिविक्रम इत्यर्थः। "सर्वं पदं हस्तिपदे निमग्नम्" इति न्यायेन पादत्रयेणैव लोकत्रयाक्रमणरूपमहामहिमशालित्वलक्षणं स्वस्मिन् तदुक्तं त्रिविक्रमनामदिव्यभिप्रायः न केवलमुरुक्रमः सर्वेषाञ्च बलाधायक एव, किन्तु तेषां आदीनामात्मा आश्रयो धारक इति यावत्। ओजः इन्द्रियशक्तिः सहः मनोबलं सत्त्वं धैर्यं बलं देहबलम् इन्द्रियाणि च तेषामप्याश्रय इत्यर्थः। किञ्च स एव परमः निरतिशयैश्वर्यादिमान् स्वशक्तिभिः स्वांशभूताभिः प्रकृतिपुरुषकालात्मिकाभिः शक्तिभिः कृत्स्नं विश्वं सृजति अवति रक्षति अत्ति संहरति च स्वयं गुणत्रयेशः सत्त्वादीनां त्रयाणां गुणानामीशो नियन्ताऽगुणवश्यो न कर्मवश्यश्चेति भावः ॥ ९ ॥

ननु, शत्रवोऽसौ कथं ममापि बलं स्यादत आह—जहीति। त्वमिममात्मनः स्वस्याऽऽसुरं भावं जहि त्यज समं निश्चलानुसन्धानरहितं यथा भवति तथा मनो धत्स्व धारय, तथा मनः शिक्षयेत्यर्थः। एवं चेत्क्वापि विद्विषो न सन्ति, किञ्च "आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः" इत्युक्तरीत्या मनोरेव रिपुर्न तदन्यः कोपि रिपुरस्तीत्याह—ऋत इति। अजितादविधेयादात्मन एव उत्पथे दुर्विषये स्थितात्स्वीयादात्मनोऽन्तःकरणादृते न सन्ति विद्विष इति पूर्वेणान्वयः तद्धि मनसः साम्यमेव तावत्कालं अनन्तस्य त्रिविधपरिच्छेदरहितस्य परमात्मनः समर्हणं सम्यगाराधनम् ॥ १० ॥

किञ्च सर्वदिशां जयिनोऽप्यजितेन्द्रियस्य भवादृशस्य केवलं जयशालित्वाभिमानमात्रमेव न वस्तुतो जयित्वमस्तीत्याह—दस्यूनिति। पुरा तावल्लुम्पत आत्मनोऽपहृतपापत्वादिगुणाऽष्टकरूपमैश्वर्यमपहरतः षडिन्द्रियरूपान् दस्यून् दुष्टजन्तून् शत्रून् न विजित्याऽजित्वा एके त्वादृशाः दश दिशः स्वाजिताः स्वेनैव जिता इति मन्यन्ते अभिमानमात्रमेतदित्यर्थः। जितात्मनो जितेन्द्रियस्य तु तस्य स्वात्मपरमात्मयाथात्म्यवेदिनो देहिनः समस्य सर्वाणि भूतानि परमात्मशरीरत्वेन समं पश्यतः साधोः महाभागवतस्य स्वमोहप्रभवाः देहात्मभ्रमकृतात्मभ्रान्तिकल्पिताः परे शत्रवः कुतो भवन्ति न सन्त्येवेति भावः ॥ ११ ॥

एवमुक्तवन्तमाह हिरण्यकशिपु—व्यक्तमिति। हे अल्पबुद्धे। त्वं व्यक्तं नूनं मर्तुकामोऽसि मर्तुमिच्छसि यस्त्वम त्यन्तं निकत्थसे अत्यर्थं विकत्थनं तव न स्यादिति भावः। हि यस्मात् मुमूर्षूणां मर्तुमिच्छूनां विप्लवा अनन्विता वाचो न सङ्गच्छेयुरेव ॥ १२ ॥

हे मन्दभाग्य ! यस्त्वया मत्तोऽन्यो जगत ईश्वरः उक्तः असौ क्वास्ते ? यदि स भवदभिमतो जगदीश्वरः सर्वत्रान्तरात्मतया वर्तेत तर्हि कस्मादितोः स्तम्भे पुरोवर्तिनि न दृश्यते मदन्यो जगदीश्वरः कोऽस्माद्वर्ततीति दैत्यः प्राह ईशः सर्वत्रास्तीति प्रह्लादः ईशो यदि सर्वत्रास्ते तर्हि स्तम्भे नास्तीति हिरण्यकशिपुः प्रह्लादः स्तम्भे पश्यन्नाह, न दृश्यतेऽपितु दृश्यत एवेति व्याख्यान्तरम् ॥ १३ ॥

सोऽहं सर्वेषामीश्वरोऽहमेवं विकत्थमानस्य ते तव देहाच्छिरो हरामि छिनद्मि यो हरिस्तव शरणम् रक्षक: ईप्सितः सोऽधुना त्वां गोपायेत स रक्षिता चेदधुना त्वां रक्षिष्यतीति अन्यथा तु तदेव छिनद्मीति भावः ॥ १४ ॥

एवमित्थं रुषा कोपेन कृत्वा मुहुर्मुहुर्महाभागवतं सुतं प्रह्लादमर्दयन् महासुरो हिरण्यकशिपुः खड्गं प्रगृह्य वरासनात् सिंहासनादुत्पतित उत्थितोऽत्यन्तं बली यस्य तेन स्वमुष्टिना स्तम्भं तताड ताडितवान् बलात् ॥ १५ ॥

तदैव ताडनानन्तरमेव तस्मिन् स्तम्भेऽतिभीषणो निनदो ध्वनिर्बभूव, निनदं विशिनष्टि, येन निनदेनाण्डकटाहं ब्रह्माण्डकटाहमस्फुटदिवाभवत् अङ्ग हे युधिष्ठिर ! यं निनदं श्रुत्वा स्वधिष्ण्यगता अजादयो ब्रह्मादयः स्वधिष्ण्यानां स्थानानां नाशं मेनिरे प्रलयकालममन्यन्तेत्यर्थः ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु "स्थाणुमन्ये प्रपद्यन्ते शरीरत्वाय देहिनाम्" इति श्रुतेः शिवं बलं वदन्ति केचित् "कालाद्भवन्ति भूतानि मन्यन्ते कालचिन्तकाः" इत्यतः कालमन्ये कथमयं निर्णयः परमात्मबलमिति तत्राह, स इति ॥ ९ ॥

कुतो न सन्ति विद्विष इति तत्राह, ऋते इति । उत्पथस्थितात् स्वमार्गविरुद्धमार्गानिरतादजितात् अवशीकृतादात्मनो मनसोऽक्षीन्द्रियग्रामादृते शुद्धमनसा विना विचार्यमाणा शत्रवो न सन्तीत्यर्थः ननु, तर्हीदं "युङ्क्ते यम परं चक्रुर्विनुभाद्रानवान्प्रति" इत्यादि कथं सङ्गच्छत इत्याशङ्क्य यथायोग्यतादर्शनलक्षणं समत्वं कर्तव्यम् अन्यथा शास्त्रविरोध इति भावेनोक्तमनत्वफलमाह, तद्धीति। तत्तद्योग्यतानुसारेण तत्तन्नोधारणं हरेः समर्हणं विद्धीत्यन्वयः नैतदल्पं किन्तु महदित्याह, महदिति ॥ १० ॥

एतदेव विशदयति—दस्यूनिति । एके भवादृशाः पुरं शरीरं लुम्पतः षड्दस्यून् पञ्चेन्द्रियाख्यचोरानविजित्य दश दिशः स्वेन जिता इति मन्यन्त इत्यन्वयः आन्तरशत्रुजयं विना कुतो बाह्यशत्रुजय इति भावेनाह, जितेति । परं बाह्यशत्रवः यद्वा एके मादृशाः षडिन्द्रियजयो नास्ति चेत् बाह्यशत्रुविषयाद्दश दिशः सुष्ठु जिता इति मन्यन्ते शेषं पूर्ववत् ॥ ११ ॥

असुरावेशोद्भिन्नत्वात्पुत्रोक्तं तत्त्वं न तस्य श्रोत्रविवरगतमभूदत्युन्मादिचित्तस्याज्यहोमवद्भूदिति भावेनोत्तरमवतारयति, व्यक्तमिति । अतिमात्रं वक्तव्यांशादधिकं विकत्थसेऽबद्धं भाषसे विप्लुतावागाद्युत्प्लुतिवदसङ्गताः ॥ १२ ॥

यदि त्वदुक्तं युक्तं स्यात्तर्हि तथा प्रतीयेत तस्मादसम्बद्धमिति भावेनाह, यस्त्वयेति ॥ १३ ॥

अस्येदमर्थकलितमित्याह, सोहमिति । गोपायेत रक्षेत ॥ १४ ॥

यदि विष्णुं जयस्वेति वचः न हार्दमसम्भावितत्वात्तत्राह, एवमिति ॥ १५ ॥

स्तम्भमुष्टिनाभिघातेन सञ्जातानां शरीरचूर्णनादिव्यथा सम्भाविसेत्याशङ्क्य भगवत्सन्निधानयत्नाद्वज्रनिष्ठुरस्तम्भोत्थनिर्ह्रादोऽभूदित्याह, तदैवेति । अस्फुटत् अभिनत् स्वधिष्ण्योपगमं स्वकीयत्वेनाभिमतं सत्यलोकं प्राप्तं स्वयम्भाव्यं स्वलोकनाशम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विकत्थमानस्येति—तत्तदुक्तेरात्मश्लाघायामेव पर्यवसानात् ॥ १४—१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

जहि त्यज आत्मनः स्वस्य मनः समं स्वस्मिन्निव सर्वत्र तुल्यं कुरु, ननु, शत्रुषु स्वसमं मनः कथं करोमि तत्राह, विद्विषः शत्रवो नैव सन्ति अजितादवशीकृतादात्मनो मनसः ऋते मनसः सर्वत्र स्वतुल्यदर्शनलक्षणं साम्यमेव वशीभावस्तस्मिन् सति शात्रवादर्शनान्न केपि शत्रव इति भावः । साम्यमेव समर्हणमाराधनम् ॥ १० ॥

एके युष्मादृशाः मन्दा दस्यून् कामादीन् लुम्पतः सर्वस्वं हरतः स्वसङ्गस्थितानपि अविजित्य अजित्वा दश दिशः स्वजिताः स्वेन जिता मन्यन्ते जितचित्तस्य चित्तजयेनैव विजितषड्रिपुत्वस्य ज्ञस्य विदुषः परे शत्रवः कुतो हेतोरपि तु नैव इत्यर्थः । यतः अमोहप्रभवाः ॥ ११ ॥

विकत्थसे हरिभक्तत्वादहमेव विजितषडमित्रो न तु ममार्थं जनक इत्यात्मश्लाघां करोषीत्यर्थः विप्लुवा असन्निबद्धाः ॥ १२ ॥

हे मन्दभाग्येति यथा जगदैश्वर्यं मम तथैव मत्पुत्रत्वात्तवापि तत्प्रायप्राप्तमिति तत्त्वया त्यज्यत इति भावः । यद्यसावस्ति तर्हि क्वास्ति प्रह्लाद आह, सर्वत्रास्ति हिरण्यकशिपुराह, कस्मात् स्तम्भे नास्ति प्रह्लादस्तु सर्वगामं पश्यन्नाह, दृश्यत इति ॥ १३ ॥

हिरण्यकशिपुस्तत्र तमपश्यन्नाह सोहमिति ॥ १४—१५

अस्फुटदिवेत्यर्थः यं निनदं अव्ययं नाशम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ईश्वरः सर्वनियन्ता कालः "ज्ञः कालकालः" इति श्रुतेः । उरवः क्रमाः पादविक्षेपा यस्य सः सएव ओजः इन्द्रियशक्तिः सहो मनश्शक्तिः सत्त्वं धैर्यं बलं देहशक्तिः इन्द्रियाणि च तेषामात्मा आश्रयः ॥ ९ ॥

त्वमिममात्मनः स्वस्य आसुरं भावं जहि त्यज अजितादात्मनो मनसः ऋते अन्ये विद्विषः शत्रवो न सन्ति अतो मनः समं यथा भवति तथा धत्स्व धारय तद्धि साम्येन मनसो धारणं हि अनन्तस्य महत्समर्हणं श्रेष्ठं पूजनम् ॥ १० ॥

एके भवादृशाः पुरा आदौ भजनार्हमायुर्धनं लुम्पतः षडिन्द्रियनामकान् दस्यूनविजित्य दशापि दिशः स्वजिता मन्यन्ते जित आत्मा मनो येन तस्य मनोपलक्षितसकलेन्द्रियजयशीलस्य ज्ञस्य सर्वं भगवदात्मकमित्येवं ज्ञानवतः अतएव सर्वदेहिनां समस्य साधोः मोहप्रभवाः परे शत्रवः कुतो न कुतोपि ॥ ११ ॥

अतिमात्रमतिमर्यादम् विकत्थसे अतोऽवश्यं निश्चितं मर्तुकामोसि तत्र चिह्नमाह ननु नूनं मुमूर्षूणां गिरो विप्लवाः असम्बद्धाः स्युः ॥ १२ ॥

हे मन्दभाग्य ! प्रथमतस्त्वीश्वरो ह्यमेव यदि मदन्यः मत्तः अन्योपि यदीश्वरस्त्वयोक्तासौ क्वास्ति ? प्रह्लाद आह सर्वत्र, हिरण्यकशिपुराह कस्मात्स्तम्भे नास्ति प्रह्लाद आह दृश्यते ॥ १३ ॥

हिरण्यकशिपुस्तमपश्यन्नाह—सोहमिति ॥ १४ ॥ १५ ॥

यं निनदम् अव्ययं नाशम् ॥ १६ ॥

स विक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतम् ।
अन्तःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥ १७ ॥
सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ।
अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ॥ १८ ॥
स सत्त्वमेनं परितोऽपि पश्यन् स्तम्भस्य मध्यादनुनिर्जिहानम् ।
नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेन्द्ररूपम् ॥ १९ ॥
मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकम् ।
प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेसरजृम्भिताननम् ॥ २० ॥
करालदंष्ट्रं करवालचञ्चलक्षुरान्तजिह्वं भ्रुकुटीमुखोल्बणम् ।
स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुतव्यात्तास्यनासं हनुभेदभीषणम् ॥ २१ ॥
दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमम् ।
चन्द्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधम् ॥ २२ ॥
दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम् ।
प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किम् ॥ २३ ॥

भाषा टीका ।

क्योंकि ? बड़े पराक्रम वाला वही ईश्वर काल ओज सह सत्व बल इन्द्रिय और मनोरूप है, और वही परमेश्वर गुणत्रय का ईश इस विश्व की सृष्टि स्थिति और संहार करता है ॥ ९ ॥

आप भी इस अपने आसुर भाव को छोड़ दीजिये और मन को शांत कीजिये, उत्पथ में स्थित और अनिर्जित [नहीं जीताहुआ] अपने मन के सिवाय संसार में कोई भी वैरी नहीं है, और मन को समता में लाना यही एक परमात्मा का भी बड़ा आराधन है ॥ १० ॥

कितने एक प्रथम अपने देह में स्थित षडिन्द्रिय रूप वैरियों न जीत कर हमने दश दिशाओं को जीत लिया, ऐसा मानते हैं, ॥ जितेन्द्रिय और सर्व प्राणियों को साधु विद्वान को स्वाज्ञान, से बने हुए शत्रु ही कहाँ ॥ ११ ॥

हिरण्यकशिपुरुवाच ।

हिरण्य कशिपु बोला, कि-अब निश्चित ही तूं मरने की इच्छा करता है क्यों कि ? अब तू बहुत विकत्थन [बकवाद] करता है । हे मन्दात्मन् ! मरने वालों की ऐसी ही विपरीत वाणी होती है ॥ १२ ॥

और हे मन्द भाग्य ! जो तूने मेरे से दूसरा जगदीश्वर बताया, तो फिर वह कहां पर है, यदि वह सर्वत्र है तो इसमें क्यों नहीं देख पड़ता है ॥ १३ ॥

सो मैं अब तेरे बकवाद करने वाले के शरीर से शिर को हरलेता हूं, जिसको तू ने रक्षक समझा है वह हरि अब तेरी रक्षा करें ॥ १४ ॥

वह महा असुर ऐसी दुरुक्तियों से कोप के मारे महाभागवत पुत्र को पीड़ा करता हुआ खड्ग को हाथ में लेकर सिंहासन से उतर कर बड़े ज़ोर से अपनी मुष्टि से स्तम्भ को ताड़न करता हुआ ॥ १५ ॥

बस उसी समय उस स्तम्भ में से अति भयङ्कर बड़ा नाद हुआ, कि जिसके मारे ब्रह्माण्ड फूटने लगा और वह शब्द इतनी दूरतक पहुंचा कि जिसको सुनकर ब्रह्मादि कभी अपने २ धाम का अत्यय (नाश) मानने लगे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्पदं तस्य ध्वनेराश्रयम येन नादेन ॥ १७ ॥

भगवांस्तत्र स्तम्भे शिराणोऽदृश्यत इदयौ बभूव किमर्थम् निजभृत्येन प्रह्लादेन यद्भाषितं दृश्यत इति तत्सत्यं विधातुं कर्तुम् तथाऽखिलेषु भूतेष्वात्मनोव्याप्तिश्च सत्यां कर्तुं स्तम्भेऽदृश्यत तत्किमर्थम् "भौतिकेषु च सर्वेषु भूतेष्वथ महत्सु च" भगवानास्ते इति तेनैव भृत्येन यद्भाषितं तत्सत्यं कर्तुम तथाऽत्यद्भुतं दैत्यघातकर्मानिघोरं रूपमुद्वहन् दधत्. तत्किमर्थम ? निजभृत्यैः सनकादिभिः शापानन्तरमनुतसंभाषितं यत् त्रिभिर्जन्मभिः शापमोक्षो भवेदिति

एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिंहंप्रति दैत्यकुञ्जरः ।
अलक्षितोऽग्नौ पतितः पतङ्गमो यथा नृसिंहौजसि सोऽसुरस्तदा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्सत्यं कर्तुम् तथाऽत्यद्भुतं रूपं ब्रह्मसृष्टावदृष्टमश्रुतञ्च रूपमुद्वहन् तच्च न मृगाकारं न मनुष्याकारमुद्वहन् सभायां मध्येऽदृश्यत. तत्किमर्थम् ? निजभृत्येन हिरण्यकशिपुना ब्रह्माणम्प्रति यद्भाषितम् "भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो" इति तथा नान्तर्बहिरिति न नरैर्न मृगैरपीति च ब्रह्मणा च निजभृत्येन तथास्त्विति यद्भाषितम् तदुभयोर्वाक्यं सत्यं कर्तुम् नहि तद्ब्रह्मसृष्टं भूतं नच नरो वा मृगो वा नच सभागृहस्यान्तः नच प्राङ्गणाद्बहिः एवं ताभ्यां यद्भाषितम् तत्सत्यं कृतम् यच्च हिरण्यकशिपुना भाषितम्, "नूनमेतद्विरोधेन मृत्युर्मे भविता" इति अकुतश्चिद्भयोऽमर इति च, यच्च नारदेन निजभृत्येन भाषितमिन्द्रम्प्रति "अयं महात्मवधां संस्थां न प्राप्स्यति अनन्तानुचरः" इत्यनेन स्वभक्तपक्षपातित्वं च यद्भाषितं तच्च सत्यं कर्तुं तथा अदृश्यत चकारान्निजभाषितञ्च. किं? तत् "कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति" इति. तथा "तेषामहं समुद्धर्ता मृत्युसंसारसागरात्" इत्यादि तच्च सत्यं कर्तुमदृश्यतेति द्रष्टव्यम् अलमतिविस्तरेण ॥ १८ ॥

स दैत्य एवमद्भुतं ध्वनिं श्रुत्वा तदाश्रयं सत्त्वं प्राणिविशेषं सर्वतो विलोकयन् स्तम्भमध्यान्निर्गच्छत् नृमृगेन्द्रयोर्मिश्रं रूपमहो किमेतदिति मीमांसितवानिति शेषः ॥ १९ ॥

तस्यैवमलं भयानकं तन्नृसिंहरूपं मीमांसमानस्याग्रतो नृसिंहरूपो हरिः समुत्थितः, भयानकत्वमेव दर्शयंस्तद्रूपमनुवर्णयति, प्रतप्तेत्यादिना, विद्रावितदैत्यदानवमित्यन्तेन । प्रतप्तं चामीकरं सुवर्णं तद्वत्पिङ्गानि चण्डानि लोचनानि यस्मिन् सटा जटाः केसराः कण्ठरोमाणि स्फुरद्भिः सटाकेसरैर्जृम्भितं साटोपमाननं यस्मिन् ॥ २० ॥

करालास्तुङ्गा दंष्ट्रा यस्मिन् करवालः खड्गस्तद्वच्चञ्चला क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिन् भ्रुकुटीयुक्तेन मुखेनोल्बणम् स्तब्धावुन्नतौ शङ्कुवदूर्ध्वौ कर्णौ यस्मिन् गिरिकन्दरवदद्भुतं व्यात्तं प्रसृतमास्यं नासं च यस्मिन् हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणम् कर्णान्तमुखविस्तारमित्यर्थः ॥ २१ ॥

दिविस्पृशन् कायो यस्मिन् अलुक्रममामः अदीर्घा ह्रस्वा पीवरा च स्थूला ग्रीवा यस्मिन् उरु विशालं वक्षःस्थलं यस्मिंस्तच्च तच्च अल्पं मध्यममुदरं यस्मिन् चन्द्रांशुवद्गौरैस्तनूरुहैर्लोमभिश्छुरितं व्याप्तम् विष्वञ्चः सर्वतः प्रसृता भुजास्तेषामनीकानि स्तोमास्तेषां शतानि यस्मिन् नखान्येवायुधानि यस्मिन् ॥ २२ ॥

दुरासदं प्राप्तुमशक्यम् सर्वाणि च निजानि चक्रादीनीतराणि वज्रादीनि च एवायुधप्रवेकाः शस्त्रोत्तमास्तैर्विद्राविता दैत्यदानवा येन तद्रूपं मीमांसमानस्याग्रतः समुत्थित इति पूर्वेणान्वयः, तदाविर्भावप्रयोजनाविमर्शपूर्वकं तेन सह दैत्यस्य युद्धमाह—सप्तभिः । प्रायेण महामायिना हरिणायमेवंभूतो मे मृत्युहेतुः स्मृतश्चिन्तितस्तथाऽप्यनेन समुद्यतेन किं न किञ्चित्स्यादित्येवं ब्रुवन्नभ्यपतदित्यन्वयः ॥ २३ ॥

तदा सोऽसुरो नृसिंहस्यौजसि दीप्तौ पतितः सन्नलक्षितोऽदृष्टोऽभूत् ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः किं जातं तदाह, स इति । ओजसा बलेन पुत्रवधेप्सुः पुत्रवधं कर्तुमिच्छुस्तदर्थं विक्रमन् पराक्रमं कुर्वन् स दैत्येन्द्रो यं निर्ह्रादं ध्वानिम् अपूर्वं कदाचिदपि न श्रुतम् अत एवाद्भुतमाश्चर्यजनकं निशम्य श्रुत्वा तस्य निनादस्य एवमाश्रयमन्तःसभायां सभामध्ये न ददर्श येन निनादेन सुरारियूथपाः दानवश्रेष्ठाः वितत्रसुर्विशेषेण तत्रसुः त्रासं प्रापुरित्यर्थः ॥ १७ ॥

तदा भगवान्निजभृत्यस्य प्रह्लादस्य भाषितं कृत्स्नजगदन्तरात्मत्वादिभाषणं सर्वेषु चराचरात्मकेषु भूतेषु आत्मनः स्वस्य व्याप्तिरूपं च सत्यं यथा भवति तथा कर्तुमत्यद्भुतरूपमुद्वहन् बिभ्रत् सभायां स्तम्भे तस्मिन्नदृश्यत तद्दृष्टो बभूव कथम्भूतं रूपं न मृगं नापि मानुषं रूपमपितूभयमिश्रमित्यर्थः निजभृत्यभाषितमित्यत्र बहुवचनान्तेन निजभृत्यशब्देन समासस्तदयमर्थः, यत्तावत्प्रह्लादस्य निजभृत्यस्य भाषितम् "भौतिकेष्वथ भावेषु भूतेषु च महत्सु च । भगवानास्ते" इति तत्सत्यं कर्तुं, तथाऽत्यद्भुतदैत्यघातकमतिघोरं रूपमुद्वहन्निति तथा निजभृत्यैः सनकादिभिर्यद्भाषितं त्रिभिर्जन्मभिः शापमोक्षो भवित्वति तत्सत्यं कर्तुम्, तथा ब्रह्मसृष्टावदृष्टमश्रुतञ्चात्यद्भुतं रूपमुद्वहन् सभायां मध्येऽदृश्यत तत्किमर्थं निजभृत्येन हिरण्यकशिपुना ब्रह्माणं प्रति यद्भाषितम् "भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो" इति तथा नान्तर्बहिरिति न नरैरिति न मृगैरिति च ब्रह्मणा निजभृत्येन यद्भाषितं तथास्त्विति तत्सर्वं सत्यं कर्तुं न च तद्ब्रह्मसृष्टं रूपं न च नरो न मृगो वा न च सभागृहस्यान्तः न च प्राङ्गणाद्बहिः एवं ताभ्यां भाषितं सत्यं कर्तुं यच्च हिरण्यकशिपुना भाषितं "नूनमेतद्विरोधेन मृत्युर्मे भविता" इति तथा "अकुतश्चिद्भयोऽमरः" इति यच्च नारदेन स्वभृत्येनेन्द्रम्प्रति भाषितम् "अयं महान् संस्थां न प्राप्स्यते" इति अनन्तानुचर इत्यनेन स्वभक्तपक्षपातित्वं च यद्भाषितं तच्च सत्यं कर्तुमदृश्यत चकारान्निजभाषितं च यत् "कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति । तेषामहं समुद्धर्ता" इति तच्च सत्यं कर्तुमदृश्यतेति ॥ १८ ॥

स दैत्येन्द्र एवं ध्वनिं श्रुत्वा तदा सत्त्वं प्राणिविशेषं सर्वतो विलोकयन् स्तम्भस्य मध्यान्निर्गच्छन्तं नाप्यं मृगं नापि

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नरः किन्तु नृमृगेन्द्रयोरुभयोरपि रूपमहो किमेतदिति मीमांसितवानिति शेषः ॥ १९ ॥

तस्यैव महाभयानकं तन्नृसिंहरूपं मीमांसमानस्य दैत्येन्द्रस्याऽग्रतः स नृसिंहरूपो हरिः समुत्थितः भयानकत्वमेव दर्शयंस्तद्रूपमनुवर्णयन्नृत, त्रिभिः । प्रतप्तेति । प्रतप्तं चामीकरं स्वर्णं तद्वत्पिशाङ्गे चण्डे उग्रे लोचने यस्मिन् स्फुरन्त्यः सटाः जटाः केसराः स्कन्धलोमानि च तैर्जृम्भितं साटोपमाननं मुखं यस्मिन् ॥ २० ॥

करालाः उग्राः दंष्ट्रा यस्मिन् करवालः खड्गस्तद्वत् चञ्चला क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिन् भ्रूकुटी युक्तेन मुखेनोल्बणं स्तब्धावूर्ध्वाश्रितावूर्ध्वौ कर्णौ यस्मिन् गिरिकन्दरवदद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणम् ॥ २१ ॥

दिवि स्पृशन् कायो यस्मिन् अलुक्समासः अदीर्घा ह्रस्वा पीवरा स्थूला च ग्रीवा उरु विशालं वक्षःस्थलं च यस्मिन् अल्पं मध्यमं उदरं यस्मिन् चन्द्रांशुवद्गौरैस्तनूरुहैर्लोमभिश्छुरितं व्याप्तं विष्वञ्चः सर्वतः प्रसृताः भुजास्तेषामनीकानि स्तोमास्तेषां शतानि यस्मिन् भुजा एवानीकं सेना तद्युक्तं यस्मिन्निति वा स्वेनानीकेन मर्दितामिति प्रयोगात् नखा एवायुधानि यस्मिन् ॥ २२ ॥

दुरासदं प्राप्तुमशक्यं सर्वाणि निजानि चक्रादीनीतराणि च वज्रादीनि त एवायुधप्रवेकाः शस्त्रस्तोमास्तैर्विद्राविता दैत्या दानवाश्च येन तद्रूपं मीमांसमानस्याऽग्रतः समुत्थितमिति पूर्वेणान्वयः ॥ २३ ॥

तथा आविर्भावे प्रयोजनविमर्शनपूर्वकं तेन सह दैत्यस्य युद्धमाह सप्तभिः—प्रायेणेति । प्रायेण महामायाविना हरिणा मे मम अयमेवंभूतो वधः वधोपायः स्मृताश्चिन्तितस्तत्पादनेन समुद्यमेन किं न किंचित्स्यादित्येवं ब्रुवन् गदेव आयुधं यस्य स दैत्य एव कुञ्जरो गजो नदन् जगत् नृसिंहं प्रत्यभ्यपतत् अभिमुखमागतवान् तदा सोऽसुरो नृसिंहस्य तेजसि दीप्तौ पतितः सन्नलक्षितो ऽदृष्टोऽभूद्यथा पतितः पतङ्गः शलभस्तद्वत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदा हिरण्यकशिपुः किंकृतवानिति तदवस्थामाह, अभिक्रमन्निति । पुत्रमभिक्रमन् पादविक्षेपं कुर्वन् तस्य निर्जीवस्य पदं विषयं कर्तुंभूतं न ददर्शेत्यन्वयः येन नादेन अनेन हिरण्यकशिपोर्हृदयभाराऽतिशयो दर्शित इति ज्ञायते ॥ १७ ॥

आकाशविशेषगुणस्य शब्दस्य चेतनाश्रयत्वेन दर्शनात् किमिदमिति मीमांसमानेषु सत्सु तदाश्रयोऽप्यदर्शि इत्याह, सत्यमिति । रूपं विशिनष्टि, न मृगमिति नाभावान्यो नञर्थोऽभिव्यनक्ति वचनात् न मृगं केवलं मृगस्य विद्यमानं न भवति न मानुषं मानुषस्य विद्यमानं न किन्तु तयोः समाहारवपुः ॥ १८ ॥

एवंविधं सत्यं प्राणविशिष्टं रूपमुद्वहंस्तस्याग्रतोऽग्रे समुत्थितोऽदृश्यतेत्यन्वयः । किंविशिष्टस्य स्तम्भस्य मध्यान्निर्जिहानमुत्तिष्ठमानमेतन्नृमृगेन्द्ररूपं किमितिमीमांसमानस्य विचारं कुर्वतो हिरण्यकशिपोः तद्रूपं विशिनष्टि, तदुग्रमित्यादिना । चामीकरं सुवर्णं सटाकेसरैः कर्णगतरोमविशेषलक्षणान्तर्दंष्ट्रैर्जृम्भितं विकसितमाननं यस्य स तथा ॥ १९—२० ॥

करालाः क्रूरदंष्ट्रा यस्य स तथा करवालवत् चन्द्रहासवच्चञ्चलं क्षुरान्तः क्षुरधारा तद्वत्स्थिता जिह्वा यस्य तत्तथा भ्रूकुट्या मुखेन पूर्वभागेनोल्बणं क्रूरं स्तब्धौ दृढौ ऊर्ध्वीकृतौ च कर्णौ यस्य तत्तथा तद्गिरिकन्दरवत् अद्भुतं व्यात्तमास्यं नासापुटं च यस्य तत्तथा तत् हनुभेदेन विदीर्णकपोलेन भीषणं भयजनकम् ॥ २१ ॥

ग्रीवा चोरू च वक्षःस्थलं च तानि तथा अदीर्घाणि पीवराणि ग्रीवोरुवक्षःस्थलानि यस्य तत्तथा तत् "चन्द्रो हिमे हिमांशौ ना चन्द्रकं रोचिषेऽपि च" इत्यभिधानात् चन्द्रांशुवर्णावदातैररुणैस्तनूरुहैः छुरितं व्याप्तम् "पीतेऽरुणो सिते गौरे" इत्यभिधानं विष्वक् व्याप्तैर्भुजानीकशतैर्युक्तं बहुत्वापेक्षयानीकैर्युक्तम् ॥ २२ ॥

"निजमात्मीयनित्ययोः" इत्यमरः निजान्यात्मीयानि नखापेक्षयेतराणि चक्रादीनि यानि तैरायुधप्रवेकैरायुधमुख्यैर्विद्राविता दैत्यदानवा येन तत्तथोक्तं तत् यद्वा निजं सहजं नखलक्षणमायुधम् इतराणि पृथक्स्थितानि चक्रादीनीति मे श्रीरमारिणा निसर्गशत्रुणा हरिणा अनेन रूपेण प्रायेण मदर्थं वधः स्मृतो निरूपितः किं स्मृतो वधोपायं किमिति वा कीदृशस्य मे पुत्रवधे समुद्यतस्य पुत्रहन्तुर्योवधः शास्त्रेषु स्मृतो विहितः सोऽयमद्य प्राप्तः किमिति ॥ २३ ॥

एवं विमृश्य वधाभिमुखः किमित्याह, एवमिति । कमभ्यपतदित्यत उक्तं नृसिंहं प्रतीति । दैत्यकुञ्जरो दैत्येन्द्रः निदर्शनमाह, अलक्षितः इति । साहसिकः पतङ्गः शलभः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मीमांसेति सार्द्धत्रिकं तत्र मीमांसत्यर्थकम् ॥ २०—२१ ॥

चन्द्रेति । भुजा एवानीकानि सेनाः ॥ २२—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्य ध्वनेः पदमाश्रयम् ॥ १७ ॥

निजभृत्यस्य प्रह्लादस्य भाषितं दर्शयन् इति वचनं सत्यं विधातुं सत्यंशेष नत्वेकोऽपि सत्यत्वेन प्रकटीकर्तुमित्यर्थः । तथैवाखिलेषु भूतेषु आत्मनो नृसिंहाद्याकारस्य व्याप्तिं च सत्यां कर्तुं स्तम्भे अदृश्यत दृष्टो बभूव, कीदृशः ? न मृगं न मृगस्यैवान्यद् नापि मानुषं रूपं समायामुद्वहन् अत्रापि हेतुः, सत्यमिति. निजभृत्यस्य हिरण्यकशिपोर्भाषितम् "मृत्योरस्त्राणि च्छिन्धि ... मृत्युर्माभून्मम प्रभो" इति तथापीतरं बहिरिति न नरैर्न मृगैरिति प्रार्थितं सत्यं

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कर्तुं यतो न हि तद्रूपं भूतं न च नरो वा मृगो वा नच सभा-गृहस्यान्तः नापि प्रांगणवद्बहिरिति एवञ्च केचित् निजस्य भृत्यानां नारदादीनामपि भाषितं सत्यं विधातुमिति व्याचक्षते तथाहि "कौन्तेय प्रतिजानीहि न मे भक्त प्रणश्यति" इतिनिजोक्तम् "अयंमहान् संस्थां न प्राप्स्यतीतीन्द्रं प्रति नारदोक्तं "नूनमेतद्विरोधेन मृत्युर्मे भविता" इति हिरण्यकशिपुना नीयमाने वरे तथास्त्विति ब्रह्मोक्तं च ॥ १८ ॥

स दैत्यः एवंभूतं प्राणिविशेषं स्तम्भमध्यान्निर्गच्छन्तं परितः स्तंभस्य चतुर्दिक्षु विपश्यन् किमेतदिति मिमांसितवानिति-शेषः ॥ १९ ॥

तद्वममतिशयेन भयानकं नृमृगेन्द्ररूपं मीमांस्यमानस्य तस्या-ग्रत एव नृसिंहरूपः समुत्थित इत्यन्वयः भयानकत्वं निरूपयन् रूपं विशिनष्टि त्रिभिः, प्रतप्तेति । चामीकरं सुवर्णं सटाः जटाकेसराः कण्ठरोमाणि ॥ २० ॥

करवालः खड्गः । भ्रुकुटीयुक्तेन मुखेन उल्बणां हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणाम् ॥ २१ ॥

अदीर्घा पीवरा च ग्रीवा यस्मिन् उरु विशालं वक्षःस्थलं यस्मिन् तत् अल्पमध्यं क्षीणमध्यदेशं चन्द्रांशुगौरैः श्वेतैः विष्वक् सर्वदिक्षु स्थितानां भुजानीकानां शतानि यस्मिंस्तत् । नखान्यायुधतुल्यानि यस्मिन् तत् ॥ २२ ॥

स्वीयानि निजानि चक्रादीनि इतराणि वज्रादीनि । तान्येवायुधप्रवेकाः शस्त्रोत्तमास्तैर्विद्राविता दैत्यदानवा यत्र तत् तदद्भुतं दृष्ट्वा तस्य मानसं वाचिकञ्च व्यवहारमाह—प्राये-णेति । वधः स्मृत इति प्राक् चिकीर्षित एवासीत् । सम्प्रति संस्मृतिविषयीकृत इत्यर्थः । तदप्यन्येन हरिणा समुद्यतेन तदर्थं कृतोद्यमेनापि किं न किञ्चदपीत्यर्थः । मद्वधस्यानेन दुष्पा-रत्वादिति भावः ॥ २३ ॥

स नृसिंहस्यौजसि वह्नौ पतितस्सन्नलक्षितोऽदृष्टोऽभूत् । सत्त्वधामनि शुद्धसत्त्वप्रकाशे हरौ तत् तस्य तमोमयस्या-दर्शनं न विचित्रम् । यतः पुरा सृष्ट्यादौ प्रलयकालीनं तमोऽपि-यत् महत्तत्त्वमधिष्ठायैव नाशयामास । सम्प्रति साक्षात् स्वरूप-भूतेनैव किमुतेति भावः ततस्तस्मात् पृथग्भूय अभिपद्य अभिमुखमागत्य ॥ २४—२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य निर्हादस्य परमुद्भवस्थानम् ॥ १७ ॥

निजभृत्यभाषितस्य निजभृत्यान्प्रति श्रीमुखेन भाषितं "न मे भक्तः प्रणश्यति" इति सत्यार्थता यद्वा भृत्येन प्रह्लादेन भाषितं दृश्यते इति तथास्मत्त्वायास्ति प्रति निजभृत्येन प्रह्लादेन भाषितं सत्यमेवेति तथा निजभृत्येन हिरण्यकशिपुना भाषितम-कुतश्चिद्भयोऽमरः एतद्विरोधेन मे मृत्युर्भवितेति तथा हिर-ण्यकशिपुना "यदि दास्यस्यभिमतान्वरान्मे वरदोत्तम । भूतेभ्यस्त्व-द्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो" इत्यादिवरे प्रार्थिते सति यद्ब्रह्मणा निजभृत्येन भाषितं "तातेमे दुर्लभाः पुंसोयान् वृणीषे वरान्मम तथापि वितराम्यङ्ग" इति तथा निजभृत्यैः सनकादिभिः शापा-नन्तरमनुनतैः त्रिभिर्जन्मभिः शापमोक्षो भवितेति भाषितं तत्सर्वं सत्यं विधातुं कर्तुम् अद्भुतं रूपमुद्वहन् दधत् स्तम्भे अदृश्यत दृश्योबभूव, भगवानिति शेषः ॥ १८ ॥

हिरण्यकशिपुः एवं ध्वनिरूपं कार्यं यथा ज्ञातवान्तद्वत् तत्कर्तृ सत्त्वं प्राणिविशेषमपि ज्ञातुं परितः विपश्यन् विलोक-यन् अनु अनन्तरं स्तम्भस्य मध्यान्निर्जिहानं निर्गच्छन्तं नृमृ-गेन्द्ररूपम् विपश्यन् अहो अयं न मृगः नापि नरः एतद्वि-चित्रं किमिति मीमांसितवानिति शेषः ॥ १९ ॥

एवमलं भयानकं न मृगेन्द्ररूपं मीमांसमानस्य अग्रत नृसिं-हरूपो भगवान् समुत्थितोऽभूत्. तद्रूपमनुवर्णयति प्रतप्तेत्यादि त्रिभिः । प्रतप्तं यच्चामीकरं स्वर्णं तद्वत्पिशङ्गे चण्डे उग्रे लोचने यस्मिन् स्फुरन्त्यः सटाः जटाः केसराः कण्ठरोमाणि च यस्मिन् तत् स्फुरत्सटाकेसरं जृम्भितमाननं यस्मिन्तज्जृम्भिताननं तच्च तच्च तत् ॥ २० ॥

कराला उग्रा दंष्ट्रा यस्मिन् करवालः खड्गः भ्रमत्करवाल-वत् चञ्चला क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिन् भ्रुकुटीयुक्तेन मुखेनोल्बणं स्तब्धौ ऊर्ध्वौ कर्णौ यस्मिन् गिरिकन्दरवत् अद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् हन्वोः कपोलप्रान्तयो र्भेदेन प्रसारणेन भीषणाम् ॥ २१ ॥

दिविस्पृशत्स्पृक् कायो यस्मिन् अलुक्समासः अदीर्घा पीवरा पुष्टा च ग्रीवा यस्मिन् उरु विशालं बहु विस्तीर्णं वक्षःस्थलं यस्मिन् तच्च तच्च तत् अल्पं मध्यममुदरं यस्मिन् चन्द्रांशुगौरैः तनूरुहैः विष्वक् परितः छुरितं व्याप्तम् भुजा-एवानीकशतं यस्मिन् नखान्येवायुधानि यस्मिन् ॥ २२ ॥

दुरासदं आसादयितुमशक्यम् सर्वाणि च निजानि सुदर्श-नादीनि इतराणि वज्रादीनि एवायुधप्रवेकाः शस्त्रश्रेष्ठास्तैः विद्राविताः दैत्या दानवाश्च येन एवंभूतं रूपं मीमांसन समु-त्थितमिति पूर्वेणान्वयः प्रायः उरुमायिना अत्यद्भुतशक्तिमता हरिणा विष्णुना मे ममायं सङ्ग्रामे श्लाघ्यत्वेन प्रसिद्धो वधः स्मृत-श्चिन्तितस्तथाप्यनेन समुद्यतेन किं स्यात् ॥ २३ ॥

स दैत्यकुञ्जरपदं ब्रुवन् गदायुधः नदन् नृसिंहं प्रत्यभ्यपतदपि तु पुनर्नृसिंहौजसि पतितः सन् अग्नौ पतङ्गो यथा तद्वदलक्षितो-ऽभवत् ॥ २४ ॥

भाषा टीका ।

वह पुत्र वध की इच्छा करने वाला बड़े शरीर के बल से पराक्रम करता हुआ अद्भुत और अपूर्व शब्द को

न तद्विचित्रं खलु सत्त्वधामनि स्वतेजसा यो नु पुराऽपिबत्तमः ।
ततोऽभिपद्याभ्यहनन्महाऽसुरो रुषा नृसिंहं गदयोरुवेगया ॥ २५ ॥
तं विक्रमन्तं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाऽग्रहीत् ।
स तस्य हस्तोत्कलितस्तदाऽसुरो विक्रीडतो यद्वदहिर्गरुत्मतः ॥ २६ ॥
असाध्वमन्यन्त हृतौकसोऽमरा घनच्छदा भारत ! सर्वधिष्ण्यपाः ।
पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे ॥ २७ ॥
तं श्येनवेगं(1) शतचन्द्रवर्त्मभिश्चरन्तमच्छिद्रमुपर्यधो हरिः ।
कृत्वाऽट्टहासं (2) खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः ॥ २८ ॥
विष्वक्स्फुरन्तं ग्रहणातुरं हरिर्व्यालो यथाऽऽखुं कुलिशाक्षतत्वचम् ।
द्वार्यूर आपात्य ददार लीलया नखैर्यथाऽहिं गरुडो महाविषम् ॥ २९ ॥
संरम्भदुष्प्रेक्ष्यकरालल्लोचनो व्यात्ताननान्तं विलिहन्स्वजिह्वया ।
असृग्लवाक्तारुणकेसराननो यथाऽन्त्रमाली द्विपहत्यया हरिः ॥ ३० ॥

भाषा टीका ।

सुनकर, उस सभा के भीतर उस शब्द के आश्रय को न देखता भया कि जिस शब्द से दैत्य यूथप लोग त्रास को प्राप्त हुए ॥ १७ ॥

प्रभु ने भी अपने निजदास के भाषण को सत्य करने के लिये और प्रह्लादोक्त निखिल भूतों में अपनी व्याप्ति को सत्य करने के लिये ऐसा अति अद्भुत रूप धारण करके दर्शन दिया कि उस सभा मे उसस्तम्भ के मध्य में आप का रूप न सिंह का मालूम पड़ता और न मनुष्यका ॥१८॥

हिरण्यकशिपु भी उस शब्द के कारण को चारो तरफ देखता हुआ, उस स्तम्भ के मध्य से निकलते हुए श्रीनृसिंह देवरूप एक अपूर्व प्राणि विशेष को देखता हुआ, और देखकर बोला, कि यह न मृग है न नर है अहो अति आश्चर्य है यह मिलकर नरसिंह रूप क्या है ॥ १९ ॥

हिरण्यकशिपु ऐसा विचार करता रहा इतने में अग्रभाग में बड़े भयानक नृसिंह रूपसे भगवान उठ खड़े हुए वह नृसिंहरूप कैसा है कि प्रतप्त सुवर्ण के सदृश पीले लोचन हैं जिसमें और स्फुरायमाण होरहे जटा और कंठ रोम जिसमें॥ २०॥

बड़ी ऊंची २ डाढे जिसमें खड्ग छुरीकी चंचल और छुरा सरीकी तीक्ष्ण जिह्वा, शंकु सदृश ऊंचे खड़े हुए कर्ण गिरि गुहा के सदृश अद्भुत पसरा हुआ है मुख और नासिका जिसमें, और हनु (ठोडी) के विदारण करने से बड़ा भयानक ॥ २१ ॥

शरीर आकाश में स्पर्श कररहा जिसमें, बड़ी पुष्ट ग्रीवा वाला भारी वक्षःस्थल वाला अल्प मध्य भाग वाला और चन्द्रकिरण वत् गौर लोम समूह से व्याप्त चारों तरफ फैली हुई सैकड़ों भुजावें जिसमें और नख ही आयुध जिसमें ॥ २२ ॥

और बड़ा दुरासद, कि जिसको देखकर समीप न जासके और निज तथा इतर जो चक्र वज्रादि आयुध तिनों से विद्रावित किये हैं दैत्यदानव जिसने ऐसे रूपको हिरण्यकशिपु देखकर विचारने लगा, कि प्राय करके बड़ा मायावी इस हरि ने मेरे वधका विचार किया है तौ भी इसके उद्योग से क्या होना है ॥ २३ ॥

उस समय वह दैत्यकुंजर हिरण्यकशिपु ऐसे कहता हुआ हाथ में गदा लेकर श्रीनृसिंह देव के ऊपर चला जैसे अग्नि पतंग गिरने से अलक्षित होजाता है ऐसे ही वह असुर भी नरहरि के तेज में अलक्षित होगया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्त्वधामनि सत्त्वप्रकाशे हरौ पतितस्य तमोमयस्यादर्शनं तद्विचित्रं न भवति तत्र हेतुः यो हरिः पुरा सृष्ट्यादौ प्रलयकालीनं तमः नु अहो अपिबत्पीतवान् ॥ २५ ॥

विक्रमन्तं तमस्ततः प्रहरन्तम् हस्तादुत्कलितो निस्सृतः ॥२६॥

तदा अमरा देवाः सर्वधिष्ण्यपा असाध्वमन्यन्त हृतान्योकांसि स्थानानि येषां ते तद्भिया घनच्छदा मेघान्तरिताः सन्तः अस्य हस्तात्स्वयं मुक्तस्तं नृहरिं स्ववीर्योच्छ्रितं मन्यमानः खड्गचर्मणी प्रगृह्य पुनस्तमासज्जताऽऽसज्जतेत्यन्वयः ॥ २७ ॥

श्येनस्येव वेगो यस्य तम् शतचन्द्रवर्त्मभिः खड्गचर्ममार्गैः

(१) शतचन्द्रवर्त्मभिरिति-विज० ॥ (२) खरनिस्वनोल्बणः इति. श्री-वीर० ।

नखाङ्कुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् ।
अहन्समन्तान्नखशस्त्र * पार्ष्णिभिर्दोर्दण्डयूथोऽनुपथान्सहस्रशः ॥ ३१ ॥
सटाऽवधूताजलदाः परापतन् ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः ।
अम्भोधयः श्वासहता निचुक्षुभुर्निर्ह्रादभीता दिगिभा विचुक्रुशुः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अच्छिद्रं यथा भवत्येवमुपर्यधश्चरन्तम् अट्टहासमेवाऽऽह, खरं तीव्रम् उत्स्वनेन महाशब्देनोल्बणां भयङ्करम् तद्भयेन हरेस्तेजसा च निमीलिते अक्षिणी यस्य ॥ २८ ॥

अहयो दृष्टान्तः व्यालो यथा आखुं मूषकम् विदारणे दृष्टान्तः अहिं गरुड इवेति विष्वक् सर्वतः स्फुरन्तं निःसरन्तम् अहयोनातुरं विवशम् इन्द्रेण सह युद्धे तत्प्रयुक्तेन कुलिशेन न क्षता त्वगपि यस्य द्वारि सभायां नान्तर्नबहिः ऊरे ऊरौ निपात्य न भूमौ न चाम्बरे नखैः व्यसुभिरसुमद्भिर्वा एवं दिवानक्तपरिहाराय सन्ध्यायामिति द्रष्टव्यम् ॥ २९ ॥

दैत्यवधमुक्त्वा तद्भृत्यवधमाह, द्वाभ्याम् । संरंभेण दुष्प्रेक्षणाणि करालानि लोचनानि यस्य असृजो रक्तस्य लवैर्बिन्दुभी रक्ताः सिक्ता अत एवारुणाः केसरा आननं च यस्य सः क इव द्विपहत्यया गजवधेन हरिः सिंहो यथा एवंभूतस्तस्यानुचरानहनदित्युत्तरेणान्वयः आन्त्राणां माला कण्ठे विद्यते यस्य॥३०॥

नखांकुरैरुत्पाटितं हृत्सरोरुहं यस्य तम् दोर्दण्डानां यूथानि समूहा यस्य सः तं दैत्येन्द्रमनुपन्था येषां तान् अन्यानपि तत्पक्षपातिन इत्यर्थः ॥ ३१ ॥

दैत्यवधव्यग्रस्य नृहरेराटोपमाह द्वाभ्याम् । सटाभिरवधूताः प्रकम्पिता जलदा मेघाः परापतन् व्यशीर्यन्त अनेन ये मेघान्तरिताः देवास्ते स्पष्टं पश्यन्तित्याशां दृत्तवानित्यर्थः । तस्य दृष्ट्या विमुष्टं रोचिर्येषां ग्रहाणां ते तिरस्कृतप्रभा अभवन्निति शेषः । दिगिभा दिग्गजाः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सत्त्वधामनि शुद्धसत्त्वाश्रये हरौ पतिततमोमयस्य दैत्यस्याऽदर्शनं यत्तन्निचित्रं न भवति तत्र हेतुर्यो हरिः पुरा सृष्ट्यादौ प्रलयकालिकं तमः स्वतेजसा अपिबत् ततो महासुरोऽभिपत्याभिमुखमागत्य रुषा क्रोधेन उरुवेगया भ्राम्यमाणया गदया नृसिंहमभ्यहनत्ताडितुमुद्युक्त इत्यर्थः । सगदमग्रहीदित्युत्तरस्यारस्यादिति भावः ॥ २५ ॥

विक्रमन्तं कथञ्चित्प्रहर्तुमुद्यतवन्तं तं दैत्येन्द्रं गदाधरो नृसिंहः सगदमग्रहीत् यथा तार्क्ष्यसुतो गरुत्मान् महासर्पं तद्वदित्यर्थः । स गृहीतोऽसुरस्तदा विक्रीडतस्तस्य नृसिंहस्य हस्तादुत्कलितो विसृष्टो यद्वद्यथा विक्रीडतो गरुत्मतोऽहिर्गलितो भवति तद्वत् भगवतस्तत्क्रीडनं तद्विसर्जनरूपमजानन्तो लोकपालाः सर्वे इन्द्रादयः सुराः हृतं दैत्येन्द्रेणापहृतम् ओकः स्थानं येषां ते अतएव तद्भयेन घनच्छदा मेघेषु छन्नाः सन्तः असाध्वमन्यन्त अहो भगवतोऽप्ययं बलीयाऽननेनैव तस्य किं स्यादित्येवममन्यन्तेत्यर्थः यस्य हस्तात्स्वयं मुक्तस्सन् नृहरिं स्ववीर्योच्छ्रितं मन्यमानो ऽत एव महामना अहमेव बलीयानित्याभिमानयुक्तो ऽसुरो मृधे युद्धे जितश्रमः श्रमरहितः खड्गचर्मणी खड्गखेटे प्रगृह्य पुनस्तं नृसिंहं पुरा असज्जत अभ्यपतत् ॥ २६ ॥ २७ ॥

श्येनस्येव वेगो यस्य शतचन्द्रवर्त्मभिः शतचन्द्रश्चर्म तस्य वर्त्मभिः खड्गचर्ममार्गैरच्छिद्रं यथा भवति एवमुपर्यधश्च चरन्तं दैत्यं हरिरट्टहासं कृत्वा खरेण कठिनेन निस्वनेन ध्वनिना उल्बणो भीषणो महावेगो निमीलितेऽट्टहासस्वरनिस्वनाभ्यानिमीलिते ऽक्षिणी यस्य तं जग्राह, खरनिस्वनोल्बणमिति द्वितीयान्तपाठे तु खरेण निस्वनेन महाशब्देनोल्बणं भयंकरमट्टहासं कृत्वा तद्भयेन हरेस्तेजसा च निमीलिताक्षमग्रहीत् इत्यर्थः ॥ २८ ॥

ततः विष्वक् सर्वतः स्फुरन्तं सर्वावयवान् प्रचालयन्तमित्यर्थः । अहयोन हेतुना आतुरं विवशमिन्द्रेण सह युद्धे तत्प्रयुक्तेन कुलिशेन अक्षता त्वगपि यस्य तं दैत्यं द्वारि सभायाः नान्तर्बहिः ऊरावङ्कं निपात्य न भूमौ न चाम्बरे नखैर्नतु व्यसुभिरसुमद्भिर्वा एवं दिवानक्तं विहाय संध्यायामिति द्रष्टव्यं लीलया क्रीडया ददार विदारितवान्, तत्र अहयो दृष्टान्तः यथा व्यालः सर्पः आखुं मूषकमिति विदारणे दृष्टान्तः महाविषमहिं सर्पं गरुड इवेति ॥२९॥

एवं दैत्येन्द्रवधमुक्त्वा तद्दशावस्थितं नृसिंहमनुवर्णयन् दैत्येन्द्रभृत्यवधमाह संरम्भेणेति द्वाभ्याम् । अहिते संरम्भेण क्रोधेन दुष्प्रेक्ष्ये दुर्निरीक्ष्ये कराले लोचने यस्य व्यात्तं विकासितं यदाननं मुखं तत्पर्यन्तं स्वजिह्वया विलिहन्सन् असृजो रक्तस्य लवैः बिन्दुभिः अक्तासिक्ता अतएवारुणाः केसरा आननञ्च यस्य आन्त्रमालाधरः क इव द्विपहत्यया गजवधेन हरिः सिंहो यथा तद्वत् ॥ ३० ॥

एवंभूतो नखांकुरैः उत्पाटितं हृदयसरोजं यस्य तद्दैत्यशरीरं विसृज्य तस्य दैत्येन्द्रस्यानुचरान् कथम्भूतान् उद्यतायुधानि येषां तमनुपन्थाः अनुवृत्तिर्येषां तान् दोर्दण्डानां यूथानि यस्य सः नखा एव शस्त्राणि पार्ष्णयश्च तैः समन्तात्सहस्रशो व्यहनत् हतवान् ॥ ३१ ॥

* पाणिभिरिति पाठः श्रीवीर० विज० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दैत्यवधध्वनस्य नृहरेराटोपमाह—सटेति द्वाभ्याम् । सटाभिरवधूताः प्रकम्पिताः जलदाः मेघाः परापतन् व्यशीर्यन्त तस्य नृहरेर्दृष्ट्या विमुष्टमपहृतं रोचिः येषां तादृशाः ग्रहाः सूर्यादयोऽभूवन् श्वासेन हताः पीडिता अम्भोधयः समुद्राः चुक्षुभुः संचेलुः निर्ह्रादेन भीताः दिग्गिभा दिग्गजाः मुदं हर्षं जहुः तत्यजुः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

द्विसप्तश्लोकैकारैः केवलं तुच्छीकरणं भगवच्छक्तिवैशद्याय न तत्त्वत इति नेत्याह—नतादिति । सत्त्वधामनि ज्ञानसमाहारमूर्तौ पराक्रममूर्तौ वा जगदादौ तमः पानं पुरुषरूपेण अनेन जगदावरकं तमःपानरतो हरेरसुरभक्षी कथं किमिति दर्शितम्, अथो श्लोकं विडम्बयतो हरेरसुरेण सह समरप्रकारं वर्णयति, तत इति ॥ २५ ॥

तस्य गदाशिक्षालाघवं वक्ति, स तस्येति । हस्तोत्कलितः हस्ताद्विलित उत्प्लुतो वा ॥ २६ ॥

तस्य हरेर्विडम्बनम् अजानताममराणां निरूपणप्रकारं वक्ति, असाध्विति । हतौजसः भ्रष्टावष्टम्भा इव घनेन च्छदा च्छादनं येषां ते तथा मेघच्छायायां विलीना इव लुप्तोपमेयं सर्वधिष्ण्यपाः सर्वनक्षत्रपतयः चन्द्रादयोऽमराः तदसाध्वमन्यन्तेत्यन्वयः । तत्र हेतुः तं मन्यमाना इति, नृहरेर्हस्तमुक्तोऽसुरः तं नृहरिं निजवर्चसा आत्मपराक्रमे शङ्कितं मन्यमानोऽभूदिति यत्तदिति हरेर्हस्तमुक्तोऽसुरः पराद्रवत् उताप्यपतत् ? इति संशयो माभूदित्याह, पुनस्तमिति । आसज्जत सक्तोऽभूद्युद्धाय सन्नद्धोऽभूदित्यर्थः । शतचन्द्रवर्गाभिः शतचन्द्रचर्मण्यां खड्गचर्मणीति प्रकृतत्वात् "भद्रं कर्णेभिः शृणुयाम देवाः" इत्यादिश्रुतेः छान्दसात्प्रायेणायं प्रयोगः । परिभ्रमणे च परिभ्रमणो शिक्षाप्रकर्षद्रष्टृणां द्वे एव बहूनीव दृश्यन्त इत्यतो ता बहुवचनं युज्यते अच्छिद्रं निरवकाशमिति क्रियाविशेषणमनेनैव सूचयति, असुरवीर्यमाशङ्कमानो हरिः किमकरोदिति तत्राह, हरिरिति ॥ २७–२८ ॥

विष्वक् परितः स्फुरन्तं भ्रमन्तमित्यनेनापि शिक्षोत्कर्षं ध्वनयति, हरिः पुनर्महर्षेणानातुरमकरोदिति शेषः । अनेनातुरत्वं सूचयति, तत्र दृष्टान्तमाह, श्येन इति । व्यालः सर्पः खननशीलत्वादाखुः प्रमथनरत्वयोग्यार्थमाह, द्वारीति । द्वार्यधस्तिरश्चीनदंष्ट्रया स्थित्वा ऊरावङ्के उत्तानतयाऽऽपात्य अत्रापि ह्रस्वत्वं छान्दसं संरम्भेण दुष्पारात्यान्तकोपेन दुष्प्रेक्ष्ये कराले लोचने यस्य व्यात्ताननान्तं विवृतवदनस्याधरोष्ठम् असृक्लवसया रुधिरबिन्दुनाक्ते रुषिते अत एवार्द्रकेसरानने यस्य स तथोक्तः स हरिः सिंहः ॥ २९–३० ॥

न केवलमेनमेव हतवान् किन्तु तदनुचरानसुरानित्याह, नखाङ्कुरेति । अहन् हतवान् नखशस्त्रपार्ष्णिभिर्नखैः शस्त्रैः पार्ष्णिभिश्च हरेर्दोर्दण्डजानां यूथानुपथान् निकराकृतान् ॥ ३१ ॥

तद्वदसुरविक्रमं वक्ति, सटावधूता इति । दिगिभा दिग्गजा मदं जहुरुत्सृष्टवन्तः प्रोत्सर्पत प्रोत्सर्पत उद्गतेत्यर्थः ॥ ३२–३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हस्तादुत्कलितः निःसृतः । घनच्छदा मङ्गलमेते विरम्यन्त इति दैत्यकोपभयान्मेघान्तरिताः हतौकसोऽसाध्वमन्यन्तेति मांकांस्यपहृतवानेव सम्प्रति यद्ययं जीविष्यति तदस्माकमवशिष्टान् प्राणानपि हरिष्यतीति भावः । निजवीर्याशङ्कितं मन्यमानः यदस्मात् हस्तान्मुक्तः ॥ २६—२७ ॥

शतचन्द्रवर्त्मभिः खड्गचर्ममार्गैः अट्टहासशब्दोच्चारभयेन निमीलिते अक्षिणी येन तम् ॥ २८ ॥

व्यालो यथा मूषिकमिति मदहृतो दृष्टान्तः गरुडो यथाहिमिति, विदारयो कुलिशेनाक्षता त्वगपि यस्य तम् लीलयाऽवहेलयैव ददार द्वारि सभायां नान्तर्न बहिः ऊरे ऊरौ निपात्य न भूमौ नाम्बरे नखैर्न व्यसुभिरसुमद्भिर्वा एवं विधानकं परिहाय सन्ध्यायामिति ज्ञेयम् ॥ २९ ॥

असृजो रक्तस्य लवैर्बिन्दुभिराक्ताः सिक्ताः अत एवारुणाः केसरा आननञ्च यस्य सान्त्रमाली मालारूपेणान्त्रं दधान इत्यर्थः । द्विपहत्यया हस्तिवधेनान्वितो हरिः सिंह इव नखाङ्कुरैरुत्पाटितं हृत्सरोरुहं यस्येति यत्राहमेव प्रविष्टा सुखमवसं तत्र सप्रश्रयं मन्दभाग्यः क्रोधमत्सराविष्टं तामसं कथं वासयति स्मेति क्रुद्धमिवेत्युत्प्रेक्षा सरोरुहरूपकेण व्यज्यते । अत एवाङ्कुररूपकं सरोरुहभङ्गाभावायैव बुध्यते दोर्दण्डानां यूथानि यस्य सः अनुपथान् अनुवर्तिनः ॥ ३०–३१ ॥

तत् प्रतापमाह, सटेत्यादि ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सत्त्वस्याप्राकृतस्य तेजसो धामनि आश्रये भगवति पतितस्य तमोमयस्य दैत्यस्य यददर्शनं तच्चित्रं न भवति यः पुरा सृष्ट्यादौ प्रलयकालीनं तमः नु अहो ऽपिबत् संक्षेपेणोक्तं पतनादर्शनप्रकारं विस्तरेण वर्णयति तत इत्यादिना ॥ २५ ॥

विक्रमन्तं ततस्ततः प्रहरन्तं तार्क्ष्यसुतो गरुडो महोरगं यथाऽग्रहीत् तथा निष्क्रीडतोऽपि हरेर्हस्तादुत्कलितो भवत् तद्वत् सोऽसुरः तस्य हस्तादुत्कलितो मुक्तः ॥ २६ ॥

तेन हृतौकसोऽमराः देवाः सर्वे धिष्ण्यपाः दिक्पालाः घनच्छदाः मेघान्तरिताः तमुत्कलनमसाध्वमन्यन्त महासुरः यस्य हस्तान्मुक्तस्तं नृहरिं निजवीर्यशङ्कितं मन्यमानः खड्गचर्मणी प्रगृह्य मृधे जितश्रमः अमर्षणः वेगेन पुनस्तमासजत ॥ २७ ॥

तं श्येनं खलं हिरण्यकशिपुं श्येनवद् वेगो यस्य स तथा तम्, शतचन्द्रवर्त्मभिः खड्गचर्मभ्रामणमार्गैः अच्छिद्रं यथा स्यात्तथोपर्यधश्चरन्तं महाजवो हरिः अट्टहासेनोद्गीर्णमालयं भयङ्करं

द्यौस्तत्सटोत्क्षिप्तविमानसङ्कुला प्रोत्सर्पत क्ष्मा च पदातिपीडिता ।
शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे ॥ ३३ ॥
ततः सभायामुपविष्टमुत्तमे नृपासने संहृततेजसं विभुम् ।
अलक्षितद्वैरथमत्यमर्षणं प्रचण्डवक्त्रं न बभाज कश्चन ॥ ३४ ॥
निशम्य लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे ।
प्रहर्षवेगोत्कलितानना मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अट्टहासमुच्चैर्हासं कृत्वा जगृहे कथंभूतमट्टहासेन निमीलिते अक्षिणी यस्य तम् ॥ २८ ॥

विष्वक् सर्वतः स्फुरन्तं निस्सरन्तं ग्रहणेनातुरम् इन्द्रेण सह युद्धे कुलिशेनापि न क्षता त्वक् यस्य तम् यथा आखुं मूषकं व्यालः सर्पो विदारयेद्दन्तैरिति शेषः "व्यालो दुष्टगजे सर्पे" इति कोषात् यथा गरुडो महाविषमहिं नखैर्विदारयेत् तथा द्वारि नांतर्न बहिः ऊरू ऊरौ निपात्य न भूमौ न व्योम्नि नखैरेव न तु स्वसुभिरसुमाङ्गिर्वा लीलया ददार दिवानक्ताभावाय सन्ध्यायामिति शेषम् ॥ २९ ॥

हिरण्यकशिपुवधमुक्त्वा तदनुचरवधमाह—संरम्भेति द्वाभ्याम् । संरम्भेण कोपेन दुष्प्रेक्ष्ये द्रष्टुमशक्ये कराले लोचने यस्य स्वजिह्वया व्यात्ताननान्तं विलिहन् द्विपस्य हत्यया यथा हरिः सिंह इव असृग्लवैरक्तबिन्दुभिः आरक्ता अतएव अरुणाः केसराः आननं च यस्य आन्त्राणां माला यस्य स हरिः ॥३०॥

नखांकुरैरुत्पाटितहृत्सरोरुहं तं विसृज्य तस्य सहस्रशः अनुचरान् भृत्यान् अनुपथान् तमनुपन्था जीवनमार्गो येषां तान् दोर्दण्डयूथानि यस्य स नखादिभिः अहन् हतवान् ॥ ३१ ॥

तस्य निरतिशयं प्रतापमाह, सटेति द्वाभ्याम्। सटाभिरवधूताः अपनीताः परापतन् दूरमगमन् ॥ ३२ ॥

भाषा टीका ।

जिस हरि ने सृष्टि काल में प्रलयकाल के तम को पान किया उस हरि में दैत्य का अलक्षित होना कुछ विचित्र नहीं ॥ तदनन्तर महाअसुर ने समीप में आकर रोष से नर हरि के ऊपर बड़े वेग वाली गदा चलाई ॥ २५ ॥

जहां तहां प्रहार करने वाले गदा सहित उस असुर को पकड़ा जैसे भारी सर्प को गरुड का बालक पकड़े इतने ही में वह असुर भगवान के हस्त से सटकगया जैसे कि गरुड के खेलने में हस्त से सर्प निकलजावे ॥ २६ ॥

हे भरत ! उस समय जिनों के घर द्वार छुड़ाये गये वो सब लोकपाल मेघों में छिपे हुए अच्छा नहीं मानते हुए हिरण्यकशिपु भी जिनके हाथ से छूटा है उन भी नर हरि को अपने वीर्य से शंकित मानकर, श्रम को न मानकर फिर भी खड्ग चर्म (तरवार ढाल) को लेकर संग्राम के निमित्त वेग से प्रभु के समीप पहुंचा ॥ २७ ॥

श्येन सरीखे वेग वाले और नीचे ऊपर खड्ग के चालों से निश्छिद्र विचरते हुए और उच्च स्वर से भयंकर तीक्ष्ण किया जो अट्टहास तिससे निमीलित (बंद) हुए नेत्र जिसके ऐसे उस दैत्य को भगवान ने पकड़ लिया ॥ २८ ॥

इन्द्र के वज्र से जिसके त्वचा में खरोंट भी नहीं आई सर्प के ग्रहण करने से मूषक जैसे ऐसे ग्रहण करने से आतुर चारों तरफ छटपटाते हुए उस दैत्य को द्वार में अपने जघन पर पटक कर, महा विष हरे सर्प को गरुड जैसे ऐसे लीलाई से नखों से विदारण करडाला ॥ २९ ॥

संरम्भ से दुर्निरीक्ष्य (देखे न जासकें) और कराल भयानक नेत्र जिनके, फाड़े हुए मुख की दोनों बगलों को जिह्वासे चाटते हुए रुधिर कणों से सिंचा हुआ है मुख और केसर (बाल) जिनके हिरण्यकशिपु की आंतों की माला पहिने हुए ऐसे नर हरि हाथी की हिंसा से सिंह जैसे, ऐसे शोभित हुए ॥३०॥

नखों से फाड़डाला हृदय कमल जिसका ऐसे हिरण्यकशिपु को फेंककर चारों तरफ शस्त्रों लिये खड़े हुए जो हजारों दैत्यानुचरों को भुजा रूप दंडों का समूह विद्यमान जिनके ऐसे नर हरि नख रूप शस्त्रों से मारते हुए ॥ ३१ ॥

उस समय आपका रूप कैसा है कि जिनके शिरके बालों टक्कर के से मेघ तितर बितर होगये और जिनकी दृष्टि से ग्रह और नक्षत्रों की कांति फीकी पड़गई, और जिनकी श्वास से ताड़ित हुए २ समुद्र क्षुभित होगये, और जिनके शब्द से त्रस्त होकर दिग्गज भी चिल्लाने लगे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य सटाभिरुत्क्षिप्तानि विमानानि तैः सङ्कुला व्याप्ता सती प्रोत्सर्पत स्वस्थानादपकर्षेणोदसर्पच्चलिता ॥ ३३ ॥

अभूतपूर्वमैश्वर्यमिव मत्वा कौतूहलेन तस्याऽऽसने उपविष्टं भयात्केऽपि न बभाज नासेवत न चलितो द्वैरथः प्रतियोद्धा येन ॥ ३४ ॥

तदा विमानावलिभिर्नभस्तलं दिदृक्षतां सङ्कुलमास नाकिनाम् ।
सुरानका दुन्दुभयोऽथ जघ्निरे गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः ॥ ३६ ॥

तत्रोपव्रज्य विबुधा ब्रह्मेन्द्रगिरिशादयः ।
ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ॥ ३७ ॥
(१)मनवः प्रजानां पतयो गन्धर्वाप्सरचारणाः ।
यक्षाः किम्पुरुषास्तात ! वेतालाः सिद्धकिन्नराः ॥ ३८ ॥
ते विष्णुपार्षदाः सर्वे सुनन्दकुमुदादयः ।
मूर्ध्नि बद्धाञ्जलिपुटा आसीनं तीव्रतेजसम् ।
ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ॥ ३९ ॥

ब्रह्मोवाच ।

नतोऽस्म्यनन्ताय दुरन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे ।
विश्वस्य सर्गस्थितिसंयमान्गुणैः स्वलीलया सन्दधते ऽव्ययात्मने ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लोकत्रयस्य मस्तकज्वरं शिरोव्यथेव दुःसहम् प्रहर्षस्य वेगेनोत्फुल्लितानि विकसितान्याननानि यासां ताः सुरस्त्रियः पुष्पवर्षैः नृहरिं ववृषुः ॥ ३५ ॥

नाकिनां देवानां विमानावलिभिर्नभस्तलं सङ्कीर्णमास सुराणामानकाः पटहास्तैर्जघ्निरे वादिताः स्त्रियो अप्सरसो ननृतुर्गन्धर्वाः जगुः ॥ ३६ ॥ ३७ ॥

गन्धर्वाप्सरसश्चारणाश्चेत्यर्थः ॥ ३८ ॥

नरशार्दूलं पुरुषोत्तमम् ॥ ३९ ॥

ब्रह्मादयो नृसिंहस्य शान्त्याकुलचेतसः ।
आराद्वेवास्तुवन् सप्तदशश्लोकैः पृथक् पृथक् ॥—

● अनन्तायानन्तं त्वां प्रसादयितुं नतोऽस्मि अनन्तत्वे हेतुः दुरन्ताः अनन्ताः शक्तयो यस्य, तत्कुतः ? विचित्राणि वीर्याणि प्रभावा यस्य, तत्किमर्थम् ? पवित्राणि श्रवणमात्रेण शोधकानि कर्माणि यस्य, वीर्यत्वमेवाह, विश्वस्येति। सन्दधते सम्यक्कुर्वते एवमप्यव्ययात्मने अप्रच्युतस्वरूपाय ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य नृहरेः सटाभिरुत्क्षिप्तानि विमानानि तैः सङ्कुला व्याप्ता द्यौः प्रोत्सर्पितस्ततश्चालितेवाभूत्. नृहरेः पद्भ्यामतीव पीडिता क्ष्मा भूमिरभूत् अत एव तस्यासह्येन रंहसा वेगेन बलेन वा शैलाः समुत्पेतुः उत्पलुत्य पतितवन्तः तस्य नृहरेः तेजसा खमाकाशं ककुभो दिशश्च न रेजिरे ॥ ३३ ॥

ततोऽहमेव सर्वेश्वर इति लोकस्य प्रदर्शयितुं सभायामुत्तमे नृपासने उपविष्टं संभृतं संपूर्णं तेजो यस्य अलक्षितः न लक्षितो द्वैरथः प्रतियोद्धा येन प्रचण्डमुखं यस्य तं विभुं नृसिंहं कश्चन कोऽपि न बभाज नासेवत कोऽपि समीपं गन्तुं नाशक्नोदित्यर्थः ॥ ३४ ॥

लोकत्रयस्य मस्तकज्वरं शिरोव्यथावद्दुःसहं तमादिदैत्यं हिरण्यकशिपुं हरिणा नृसिंहेन युद्धे हतं निशाम्य हर्षप्रहर्षवेगेन उत्फुल्लितानि विकसितान्याननानि यासां ताः सुराणां स्त्रियः पुष्पवर्षैः पुनःपुनर्नृहरिं ववृषुः ॥ ३५ ॥

तदा दिदृक्षतां द्रष्टुमिच्छतां दर्शनार्थमागतानामित्यर्थः । नाकिनां देवानां विमानपंक्तिभिर्नभस्तलं सङ्कुलं संमर्दं बभूव सुराणामानकाः पटहास्तैर्दुन्दुभयो जघ्निरे नादिताः गन्धर्वश्रेष्ठाः ननृतुः स्त्रियः अप्सरसो जगुः ॥ ३६ ॥

तत्रोपव्रज्य किञ्चित्समीपमागत्य ब्रह्मरुद्रप्रभृतयो देवादयः हे तात! मूर्ध्नि बद्धाञ्जलिपुटानि येस्ते आसीनमुपविष्टं तीव्रं दुःसहं तेजो यस्य तं श्रीनृसिंहं नातिदूरवर्तिनः पृथगेकैकश ईडिरे तुष्टुवुः ॥ ३७-३८—३९ ॥

तावदपारभिविधविचित्रशक्तिवीर्यमङ्गलयशजगद्व्यापारं जगत्कारणं स्तुवन्नमस्करोति ब्रह्मा—नतोऽस्म्यहमिति। अनन्ताय स्वरूपतस्त्रिविधपरिच्छेदरहिताय दुरन्तशक्तये अपारशक्तये अचिन्त्यशक्तये या शक्तिः ज्ञेनस्सर्वसामर्थ्यनिर्वाहिका. "जगत् प्रकृतिभावो मे या सा शक्तिरुदीरिता" इत्यादिनोक्ता. यद्वा यदन्यैरशक्यत्वादघटितमिव विभाति तद्घटनसामर्थ्यरूपा. यतस्त्वमुक्तविधदुरन्तशक्तिमत्त्वशक्तिरत एव मद्भरेण सर्वतोऽघटितमस्यां दैत्यं हतवानसीति भावः। यतस्त्वमनन्तोऽत एवाऽचिन्त्ये स्तम्भेऽप्याविर्भूतोऽसीत्यभिप्रायः

(१) मनुः प्रजानामिति. वीरराघ० पाठः ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनन्तपदेन हि सर्वव्यापित्वाद्देशपरिच्छेदराहित्यम्, सर्वकालवर्तित्वात्कालपरिच्छेदराहित्यम्, साक्षात्परम्परया सर्वप्रकारत्वेन सर्ववस्तुसामानाधिकरण्यार्हत्वाद्वस्तुपरिच्छेदराहित्यम् विवक्षितम्, येन केनापि प्राशस्त्येन स्वस्मादुत्कृष्टैः कैश्चिद्वस्तुभिरपरीकृतत्वाभावरूपं वा वस्तुपरिच्छेदराहित्यम्, इति त्रिविधपरिच्छेदराहित्यं विवक्षितम् । नन्वस्त्वेवं स्वरूपं कृत्स्नजगदुदयविभवलयलीलस्य किमेतद्दैत्यहननमित्यभिप्रयन्, तावज्जगत्कारणत्वप्रयुक्तं विकारं निराह, विचित्रवीर्यायेति । वीर्यं नाम सर्वोपादानत्वे सर्वसाधारणे सर्वनियमने विकाररहितत्वम्, यथोक्तम्, "विकारविरहो वीर्यं प्रकृतित्वेऽपि मे सदा" इत्यादि. विचित्रशब्देनैवंविधस्य वीर्यस्यानितरसाधारणत्वमुच्यते. पवित्रकर्मणे अकर्मायत्तजगद्व्यापाराय स्वव्यापारं शृण्वतां दुरितानि नाशयन्सम्यक्पारायेति वा. गुणैः सर्वज्ञत्वसर्वशक्तित्वादिभिर्जगदभिमतनदुपादानत्वोपयुक्तैः स्वनियाम्यसत्त्वादिप्राकृतगुणैर्वा कृत्स्नस्य विश्वस्य सर्गादीन् स्वलीलयैव न तु कर्मणा सन्दधते विदधते अव्ययात्मने एवमप्यव्ययः विकाररहितः आत्मा स्वभावो यस्य. स्वगतेनापि विकाररहितायेत्यर्थः स्वरूपतोऽपि विकारराहित्यस्योक्तत्वात् ॥ ४० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सभायस्थानं तस्य वक्ति, तत इति । सम्भृततेजसं राशीकृततेजसं अलक्षितं न केनापि दृष्टम् ॥ ३४ ॥

नन्वयं जयः केनापि न लक्षितः तदङ्कुरव्यक्तवर्णनादित्याशङ्क्य, पुरुषकोपोपशमनं स्त्रीणामिव सुशकमिति भावेन सुरस्त्रीपुष्पवर्षप्रकारमाह, निशाम्येति । लोकत्रयस्य मस्तकज्वरं शिरोरोगायमाणं प्रहर्षातिरेकेणोत्कलितं विकसितमाननं यासां तास्तथा ताः ॥ ३५ ॥

सुरस्त्रीवृष्टपुष्पसौरभ्याघ्राणेन किञ्चिच्छान्तकोपत्वादकस्मादव्ययमनसर इति मत्वा नानादेवानां नभसि विमानावलिसाङ्कुल्यप्रकारं वक्ति, तदेति । सुराणामानका दुन्दुभयः ॥ ३६ ॥

भगवदभुज्ञाभावाल्लाहादकरी स्तुतिरेवेति भावेन ब्रह्मादीनामुपक्रममाह, नत्वुपव्रज्येति । यं पूर्वमुपगन्तुं तत्रास ते ब्रह्मादयस्तं पृथगिन्द्रर इत्यन्वयः ॥ ३७ ॥

नातिदूरचराः किञ्चित्समीपवर्तिनः ॥ ३८-३९ ॥

तत्र पृथक्पृथक् मतिजयाणां स्तुतिप्रकारं ब्रूते, नतोऽस्मीति । गुणैः सत्त्वादिभिः स्वलीलया स्वरूपभूतलीलया अव्ययात्मने नित्यदेहाय ॥ ४० ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सटाभिरूर्ध्वं क्षिप्तैरभ्रावलिभिर्विमानैः सङ्कुला व्याप्ता क्ष्मा च प्रोत्सर्पत भ्रड्गमभ्रावतकादयो । तिर्यगूर्ध्वं भो भावेनातिष्ठत ॥ ३३ ॥

नृपासने वैदिकमिति येन यः पराभूयते तेन तदधिकारः स्वीक्रियते इति राजनीतिं प्रदर्शयन्तमिव । यद्वा । शापप्रस्तेति असूरवे स्वाभिमानस्यागामावो व्यञ्जितः । यः किल ऋषिभिरपि समर्पितानन्यानुपहृतान्मन्त्रपूतानन्यासनाद्युपहारान् नाङ्गीकरोति स एव भगवान् स्वभक्तेनासुरभावप्रस्तेन स्वोपभुक्तेनाप्यवहृतमपि तदुपभुक्तमपि सिंहासनं यत् स्वयमेवास्त तद्भक्तसौभाग्यमेव सर्वान् दर्शयामासेति तत्त्वं । सम्भृततेजसं सम्पूर्णप्रकाशं न लक्षितो द्वैरथः प्रतियोद्धा येन तं न बभाज भयाद्राजवादिना कोऽपि कोऽपि नासेवत ॥ ३४ ॥

निशाम्य दृष्ट्वा मस्तकस्य ज्वरमिव दुःसहम् ॥ ३५ ॥

नाकिनां स्वर्गिणां प्राप बभूव ॥ ३६—३७ ॥

अप्सरश्चारणा इत्यार्षम् ॥ ३८ ॥

सनकादीन् कोपयसि स्वभक्तौ भ्रंशयसि मया वरान् दापयसि दैत्यगृहे भक्तराजमाविर्भावयसि । दैत्यं प्रेर्य भक्तं निबाधयसि भक्तरक्षार्थं स्वयमेवमाविर्भवसीति तव विधित्सितं न कोऽपि वेत्तीत्याह—नतोऽस्मीति । अनन्ताय नष्टातुं शक्योऽन्तो यस्य तस्मै अनन्तं त्वां प्रसादयितुं दुरन्तशक्तये दुर्बोधोऽन्तो यासां तथाभूताः शक्तयो यस्य तस्मै विचित्रवीर्याय स्वमात्रेण सर्वजैवदैत्यनिहन्त्रे क्रोधवेष्टितत्वेऽपि शुद्धसत्त्वमयत्वात् पवित्रं कर्म यस्य तस्मै सन्दधते कुर्वते ॥ ३९—४० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्यौस्तस्य सटाभिः क्षिप्तैराकृष्टैर्विमानैः सङ्कुला व्याप्ता जाता यदा अतिपीडिता क्ष्मा प्रोत्सर्पत अनुव्यचलत् अमुष्य रंहसा वेगेन तस्य तेजसा खं नभः ककुभो दिशश्च न रेजिरे ॥ ३३ ॥

ततस्तदनन्तरं सभायामुत्तमे नृपासने प्रह्लादार्थं तत्प्रसादीकर्तुमुपविष्टं सम्भृतं सम्यक् स्वभावत एव भृतं पूर्णं तेजो यस्य तं न लक्षितो द्वैरथः प्रतियोद्धा येन तत् अत्यमर्षणं प्रचण्डवक्त्रं भीत्या कश्चन कोऽपि न बभाज नासेवत ॥ ३४ ॥

सुराणां स्त्रियः लोकत्रयस्य मस्तकज्वरं दुःसहशिरःपीडामिव तमादिदैत्यं हरिणा दुःखमाशङ्केन मृधे हतं निशाम्य प्रहर्षवेगेनोत्कलितान्याननानि यासां ताः प्रसूनवर्षैर्ववृषुः ॥ ३५ ॥

तदा तस्मिन्नवसरे दिदृक्षतां द्रष्टुमिच्छतां नाकिनां दिवौकसां विमानावलिभिर्नभस्तलं सङ्कुलमास बभूव सुराणामानकाः दुन्दुभयश्च जघ्निरे तैर्वादिताः गन्धर्वमुख्याः जगुः स्त्रियश्च ननृतुः ॥ ३६-३७ ॥

गन्धर्वाश्च अप्सरसश्च चारणाश्चेति द्वन्द्वे अप्सर इत्यत्र सकाराभावः आर्षत्वात् ॥ ३८—३९ ॥

दुरन्तशक्तये नित्यशक्तये स्वलीलया स्वाधीनविहारेण हेतुना गुणैः स्वशक्तिगुणैः रजआदिभिः विश्वस्य सर्गादीन् विदधते अतएवाऽव्ययात्मने निर्विकारस्वरूपाय नतोऽस्मि ॥ ४० ॥

———

रुद्र उवाच ।

कोपकालो युगान्तस्ते हतो ऽयमसुरो ऽल्पकः ।
तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ! ॥ ४१ ॥

इन्द्र उवाच ।

प्रत्यानीताः परम ! भवता त्रायता नः स्वभागा दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि ।
कालग्रस्तं कियदिदमहो नाथ ! शुश्रूषतां ते मुक्तिस्तेषां न हि बहुमता नारसिंहाऽपरैः किम् ॥ ४२ ॥

ऋषय ऊचुः ।

त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषाऽऽत्मगतं ससर्ज ।
तद्विप्रलुप्तममुना ऽद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥ ४३ ॥

पितर ऊचुः ।

श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत्तिलाम्बु ।
तस्योदरान्नखविदीर्णवपाद्य आर्च्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥ ४४ ॥

भाषा टीका ।

खड़े हुए जिनके शिरके केशों से उत्क्षिप्त (चालित) जो विमान तिनसे व्याप्त भया स्वर्ग लोक भी चलायमान होगया तथा चरणों से पीड़ित पृथिवी भी प्रचालित होगई, और वेगसे पर्वत उखड़ गये तेज से आकाश और दिशा शोभित न होने लगी ॥ ३३ ॥

तदनन्तर सभा में उत्तम नृपासन के ऊपर बैठे हुए प्रशान्त तेज वाले और नहीं देखा गया शत्रु जिन का ऐसे प्रचण्ड वदन वाले असह्य रूप विभु श्रीनरहरि के समीप कोईभी न जा सका ॥ ३४ ॥

तीन लोकों के मस्तक का ज्वर रूप उग्र आदि दैत्य को प्रभुके हाथ से मरा हुआ देखकर, हर्षके वेग से प्रसन्न मुख वाली देवाङ्गना पुष्पों की वर्षा करने लगी ॥ ३५ ॥

उस समय देखने वाले देवताओं के विमानों की पंक्तियों से आकाश व्याप्त होगया, और देवताओं के आनक-दुन्दुभि बाजे बाजने लगे, और गन्धर्व प्रभृति गाने लगे और अप्सराये नाचने लगीं ॥ ३६ ॥

उस समय वहां पर ब्रह्मा महादेव प्रभृति देवता, ऋषि पितर सिद्ध विद्याधर महोरग मनु प्रजापति गन्धर्व अप्सरा चारण यक्ष किंपुरुष वेताल सिद्धेश किन्नर और सुनन्द कुमुदादिक सब विष्णु पार्षद मस्तकपर अञ्जलि बांधकर समीप आकर अति दूरस्थित न होकर तीव्र तेज वाले श्री नरहरिको पृथक २ स्तुति करने लगे ॥ ३७—३९ ॥

ब्रह्मो वाच ।

ब्रह्माजी बोले, कि—अनन्त दुरन्त शक्तिवाले विचित्र वीर्यवाले और पवित्र कर्मा जो आप हैं तिनको नमस्कार हो, और अपने गुण और लीलासे अव्ययात्मा को नमस्कार हो ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रुद्रस्तु तत्कोपकालाभिज्ञो नायं कोपावसर इति तं प्रार्थयते, कोपेति। सहस्रयुगान्तलक्षणः कोपस्य कालः कोपायोग्य इत्याह, अल्पकोऽत्यल्पः अतः कोपान्निवृत्त्या प्रह्लादं मा हिंसीरित्याह, तत्सुतमिति। यद्वा अकालेऽप्ययं कोपोऽस्य भक्तस्य रक्षार्थमिति चेत् तर्हीदानीं कोपं त्यक्त्वेमं पाहीत्यर्थः ॥ ४१ ॥

इन्द्रस्तु नास्माकं हविर्भागादिलाभः पुरुषार्थः, किन्तु त्वद्भक्तिरेव सा भवता पुनरनेन संरक्षिता अतो गम्भीरेण साधितं तस्य च निरसनादुपसंहरेदं कोपमित्याशयेनाह, हे परम! नो अस्मांस्त्रायता रक्षता भवता स्वीया एव भागा दैत्यात्प्रत्याहृताः अन्तर्यामिणस्तवैव यज्ञेषु भोक्तृत्वात् अन्तर्यामिणं हृदयकमलं त्वद्गृहमधुनासत्पर्यन्तं भगवत्तेनाश्मतस्मूर्तिरपि नित्यं कियन्तं दैत्येनाक्रान्तं व्याप्तं सत्प्रत्यबोधि भयापाकरणेन विकासं नीतम्। ननु, तव त्रैलोक्यैश्वर्यं गम्भीरार्थमत्रमुग्रम इति चेत्तत्राऽऽह—कालग्रस्तमिति। ते त्वाम् हे नारसिंह नरस्य सिंहस्य चाकाराद्यस्मात्त्वमाविर्भूत! अपरैः स्वर्गादिभिः किम् ॥ ४२ ॥

ऋषयस्तु तपःप्रवर्तनेनास्माकं महाननुग्रहः कृत इत्याहुः,

सिद्धा ऊचुः ।

यो नो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोबलेन ।
नानादर्पं तं नखैर्विददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ! ॥ ४५ ॥

विद्याधरा ऊचुः ।

विद्यां पृथग्धारणयाऽनुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः ।
स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यम् ॥ ४६ ॥

नागा ऊचुः ।

येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ।
तद्वक्षःपाटनेनासां दत्तानन्द ! नमोऽस्तु ते ॥ ४७ ॥

मनव ऊचुः ।

मनवो वयं तव निदेशकारिणो दितिजेन देव ! परिभूतसेतवः ।
भवता खलः स उपसंहृतः प्रभो ! करवाम ते किमनुशाधि किङ्करान् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्वं नो यद्दात्थ परमं ध्यानलक्षणं तपः परमात्मे हेतुः आत्मनस्तव तेजः प्रभावरूपं तदेवाहुः येन तपसाऽऽत्मनि लीनमिदं विश्वं समजं सृष्टवानसि तदमुना दैत्येन विप्रलुप्तं कुण्ठितं सत् हे शरणपाल ! अद्य रक्षार्थं गृहीतेनानेन वपुषा पुनरपि तपः कुरुतेत्यनुज्ञातवानसि तस्मै ते नम इत्युत्तरश्लोकचतुर्थपादस्यानुषङ्गः ॥ ४३ ॥

पितरस्तु श्राद्धोद्धरणेन परमोपकारिणं श्रीनृसिंहं प्रणमन्ति—श्राद्धानि श्रद्धायुक्तानि पिण्डादीनि नोऽस्मभ्यं पुत्रैः दत्तानि प्रसभं बलात् स्वयमधिकृत्य बुभुजे किञ्च तीर्थस्नानसमये दत्तं तिलोदकमप्यपिबत् तानि च तस्योदराद्याच्छिद्याहृतवान् कथंभूतात् नखैर्विदीर्णा वपा यस्य तस्मात् वपाविदारणस्य तद्गतपिण्डोद्धरणमेव फलमिति भावः ॥ ४४ ॥

योगसिद्धां गतिमणिमादिसिद्धिम् नाना अनेके दर्पा यस्य तम्, तस्मै तुभ्यं तं त्वामुद्दिश्य ॥ ४५ ॥

विद्यामन्तर्धानादिलक्षणाम् अनुराद्धां संप्राप्तां संख्ये युद्धे ॥ ४६ ॥

रत्नानि फणासु स्थितानि तथा स्त्रीरत्नानि चोत्तमाः स्त्रियः आसां स्त्रीणां दत्त आनन्दो येन तत्सम्बोधनं पाठान्तरेऽस्माकं दत्त आनन्दो येनेति ॥ ४७ ॥

नृसिंहेनावलोकिताः सन्तो मूर्ध्नि बद्धाञ्जलयो मनवः प्रोचुः मनवो वयं धर्मपालकाः परिभूताः सेतवो वर्णाश्रमधर्ममर्यादाः येषां ते अनुशाधि अनुशिक्षय ॥ ४८ ॥

—————

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्ब्रह्मणोऽभिप्रेतं कृत्स्नजगत्सर्गादिकर्तृत्वं किमयं तद्विनिहन्ति तदेव विशदयन्नात्मजयुक्तं स्तौति, रुद्रः—कोपकाल इति. तव कोपकालो युगान्तः द्विपरार्द्धावसानं कोपकाल इत्यनेन मदन्तर्यामितया मन्मुखेन संहर्ता त्वमेवेत्युक्तं भवति. अयन्तु कोपाविषय इत्याह; अयमल्पकोऽल्पबलो हतोऽतः कोपनिवृत्त्या हे भक्तवत्सल ! तव भक्तं तत्सुतं तस्य दैत्येन्द्रस्य सुतं उपसृतं तव समीपमागमिष्यन्तं पाहि संरक्ष ॥ ४१ ॥

इन्द्रस्तु स्वदुःखमावेदयन्सर्वरक्षकं सर्वान्तरात्मानं समस्तपुरुषार्थदं स्तौति—प्रत्यानीता इति । हे परम सर्वोत्कृष्ट ! नोऽस्मान् त्रायता त्रात्रा भवता दैत्येनाक्रान्ताः प्रसह्य गृहीताः स्वभागाः स्वकीया यज्ञियभागाः अस्मदादिमुखेन त्वमेव यज्ञभोक्तेत्यभिप्रायेण स्वशब्दः प्रयुक्तः प्रत्याहृताः दैत्याक्रान्तमिति द्वितीयान्तपाठे तु दैत्यभयाकुलमिति हृदयविशेषणम्. एवं दैत्यवधेन स्वभागप्रत्यानयनेन च त्वद्गृहं त्वदावासभूतम् अत एवाऽस्मदमस्माकं हृदयं प्रत्यबोधि भयेन पूर्वं मुकुलितमिदानीं तदपाकरणेन विकासितं भवतीत्यनुषङ्गः । त्वां सेवतामस्माकं स्वतो लौकिकपुरुषार्थप्राप्तिरित्येतत्कियदित्याह. हे नाथ स्वामिन् ! ते शुश्रूषतां परिचर्यापराणामिदं लौकिकं पुरुषार्थजातं कालेन भक्ष्यमाणं कियत् यत्किञ्चिदेतदित्यर्थः । तदेवाह, तेषां त्वां परिचरतां मुक्तिरपि न बहुमता त्वत्सेवासुखासक्तानां मुक्तिरपि न परमं प्रयोजनम्. अतः हे नारसिंह ! अपरैरर्वाचीनैः पुरुषार्थैः किम् ? न किमपि तेषामतितुच्छमर्वाचीनपुरुषार्थजालमिति भावः ॥ ४२ ॥

ऋषयस्तु सर्वगुरुं साधुपरित्रातारं दुष्कृद्विनाशकृञ्च तुष्टुवुः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वमिति । परममुत्कृष्टं तपस्तवद्ध्यानरूपं नोऽस्माकं त्वमात्थ उपदिष्टवानसि. तपो विशिंषन्ति, यत्तप आत्मनस्तव तेजः प्रकाशकम् अस्माकं स्वस्वरूपावेदकमित्यर्थः । येन च तपसा आदिपुरुषस्त्वमुमुक्षः इदं जगदात्मगतं परमात्मना त्वया गतमन्तरात्मतया व्याप्तं ससर्ज. आदिपुरुषात्मगतमित्यत्र "गूढात्मा न प्रकाशते" इतिवत्सन्धिरार्षः आदिपुरुषात्मेति पाठे आदिपुरुषेति लुप्तप्रथमान्तं पृथक्पदम्. यद्वा हे आदिपुरुष ! इति सम्बोधनं ससर्ज प्रक्षेति शेषः । तत् तपोऽमुना दैत्येन्द्रेण विप्रलुप्तं विशेषेण प्रच्छादितमासीत् तदेवाधुना हे शरण्य ! शरणमर्हतीति शरण्यः तथाभूत ! हे पावक ! स्वगृहीतवपुषा साधुपरित्राणार्थं गृहीतेन नरसिंहशरीरेण पुनरन्ववमंस्थाः अनुज्ञापितवान्. यः शत्रुर्मया विनाशितोऽतः पुनर्निर्भयं तपः कुरुतेति नोऽनुज्ञापितवानसीत्यर्थः ॥ ४३ ॥

पितरस्तु स्वतुःसमावेदयन्तोऽखिलधर्मगोप्तारं हितकारिणं स्तुवन्तो नमस्कुर्वन्ति—श्राद्धानीति । अस्माकं तनूजैः पुत्रादिभिरस्मदुद्देशेन दत्तानि श्राद्धानि श्राद्धसम्बन्धीनि पिण्डानि यो दैत्यः प्रसभं बलात्स्वयमभिद्भुजेऽनुभूतवान् । तथा तीर्थसमये पुण्यतीर्थस्नानसमये अस्मत्तनूजैः यद्दत्तं तिलोदकं तदप्यपिबत् तस्य दैत्यस्य उदराच्छ्राद्धानि तिलाम्बु च यः पुनराच्छिद्याहृत्यास्माकं दत्तवान् कथंभूतादुदरात् नखैर्विदारिता वपा यस्य तस्य तस्मात्. वपाविदारणस्य तद्गतपिण्डोद्धरणमेव फलमिति भावः । तस्मै समस्तधर्माणां गोप्त्रे रक्षित्रे नृहरये ते नमः तिलाम्बवसव्या इत्यपि पाठः । तदाऽसव्य इति दैत्येन्द्रविशेषणम्. तिलाम्बु तिलोदकमसव्यः सभाऽनर्हो यो दैत्येन्द्रोऽभिबुभुजे पीतवानित्यर्थः ॥ ४४ ॥

सिद्धा अपि स्वयोगगत्यपहारकदैत्येन्द्रवधद्वारा स्वयोगगत्याधायकं परमसुहृदं वर्णयन्तो नेमुः—य इति । योऽसावुग्रात्मा दैत्यो नोऽस्माकं योगसिद्धां गतिं भक्तियोगप्राप्तां गतिम् अणिमादिरूपां स्वयोगेन तपोबलेन अहार्षीदपहृतवान्. तम् नानावर्पं नानाऽनेकाः दर्पा यस्य तं नखैर्यो विददार विदारितवान्. तस्मै तुभ्यं हे नृसिंह ! वयं प्रणताः स्मो नमस्कुर्मः ॥ ४५ ॥

विद्याधरा अपि तेनापहृतविद्याप्रत्यावाहेन हितकारिणं स्तुवन्तो नमन्ति—विद्यामिति । धारणया मनोधारणयाऽनुरुद्धां संसिद्धां विद्यामस्मत्सम्बन्धिनीमन्तर्धानादिलक्षणां योऽसौ मूढो बलवीर्याभ्यां गर्वितो दैत्येन्द्रो न्यषेधत्निषेधितवान् यं देहवधं वीर्यं पराभिभवसामर्थ्यम्. स दैत्यो येन संख्ये युद्धे पशुवद्धतस्तं त्वां मायानृसिंहमात्मीयसङ्कल्पोपात्तनृसिंहतनुं नित्यं प्रणताः स्मः कर्तरिक्तः नमस्कृतवन्तः स्मेत्यर्थः ॥ ४६ ॥

नागास्त्वेवं तदपहृतरत्नप्रदानेनानन्दकरं स्तुवन्तो नेमुः—येनेति । येन पापात्मना नोऽस्माकं रत्नानि स्त्रीरत्नानि नागकन्यारूपाणि रत्नानि चापहृतानि तस्य वक्षोविदारणेनास्मां स्त्रीणां दत्त आनन्दो येन तस्य सम्बोधनं ते तुभ्यं नमोऽस्तु ॥ ४७ ॥

तदाज्ञापरिपालनरूपकैङ्कर्यविरोधिनिरसनेन कैङ्कर्याधायकं हितकारिणं स्तुवन्तस्तमेव प्रार्थयन्ते मनवः—मनव इति । वयं तव निदेशकारिणः कैङ्कर्यकारिणो मनव इति प्रसिद्धाः ते वयमेतावन्तं कालं येन दितिजेन दैत्येन परिभूताः परिहापिताः सेतवः त्वत्कृताः वर्णाश्रममर्यादा येषां तादृशा बभूविम अधुना स खलो दितिजस्त्वया उपसंहृतो हतः हे प्रभो ! निवृत्तकैङ्कर्यविरोधिनो वयं किं कैङ्कर्यं ते तुभ्यं करवाम तथा किङ्करानोऽस्मान् अनुशाधि विविच्याऽऽज्ञापयेत्यर्थः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

येनायमसुरो हतः स कोपकालो युगान्तो युगावसानोचितो नेदानीमत्यल्पासुरहनने तस्मात्कोपं संहृत्याऽनुसृतं शरणं प्राप्तं तस्य सुतं प्रह्लादं रक्षेत्यन्वयः ॥ ४१ ॥

हे परम ! नस्त्रायता रक्षता भवता दैत्यहृता यज्ञेषु स्वभागा अस्मद्योग्यहविर्भागाः प्रत्यानीता इत्यन्वयः । तपोयत्नेन दैत्येनाक्रान्तं निमीलितं च यद् गृहं तत्र वासयोग्यं हृदयकमलं. प्रत्यगाधि विकासितमस्माकं भवतीति शेषः । त्वत्प्रसादाभिलाषिणामेव वशीकर्तुं योग्यो नान्येनेत्याशयेनाह, कालेति । नाथ ! यदिदं स्वर्गादिरूपान्तं कालग्रस्तं कियत्सुखजनकम् ? न किमपीति मत्वा भजन्ति. ते शुश्रूषन्तं त्वां सेवमानानां तेषां करगता मुक्तिरपि बहुमता न हि यस्मात्तस्मात् हे नारसिंह ! तेषां भक्तानां अपरैर्धर्मादिभिः प्राप्तैः किम ? इत्यन्वयः ॥ ४२ ॥

हे आदिपुरुष ! त्वं यदात्मनैव आत्मनो हरेर्धामलक्षणं तेजस्तपोनोऽस्माकं परमश्रेष्ठम् आत्थ येन तपसा आलोचनरूपेण महिम्ना इदं समस्तमात्मगतं व्याप्तं हे शरण्यपाल ! अमुना दैत्येन विप्रलुप्तं नष्टं तत्तपो जगद्रक्षार्थं गृहीतनृवपुषा नरसिंहात्मना पुनरप्यस्मान्प्रति कटाक्षमन्ववमंस्थाः उद्धरिष्यामीति शेषः । "तप आलोचने" इति धातोः "यस्य ज्ञानमयं तपः" इति श्रुतेश्च. भगवज्ज्ञानसादृश्यादस्याभिज्ञत्वमित्युपपन्नं युज्यते विप्रलोपादितरोधानं न स्वरूपनाशः ॥ ४३ ॥

यो भवानश्चार्यवपाकश्रावितानि श्राद्धानि तस्य दैत्यस्योदरादाच्छिनत् "आच्छिदि गतौ" इति धातोः आनीयास्माकमगमयदित्यन्वयः ॥ ४४ ॥

योगसिद्धामणिमाद्यैश्वर्यलक्षणां गतिं योगः पवनविजयः तपः कायक्लेशलक्षणं तयोर्बलेन नानाविधो दर्पो यस्य स तथा ॥ ४५ ॥

पृथक् अणिमादिलक्षणानां हरेर्भक्त्याऽखण्डोपासनया अनुवृत्तां लब्धां छिन्नामन्तर्धानलक्षणाम ॥ ४६ ॥

प्राप्तं स्त्रीणामर्थं दत्तानन्द ! ॥ ४७ ॥

निदेश ...... आज्ञाकारिणः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ ४१ ॥

इन्द्रस्तु स्वोपकारावशेषानुमोदनेन तं प्रसादयन्—प्रत्येति । स्वभागा अस्मदुपलक्षकवर्णाः प्रत्यानीताः पुनःपदे एव प्रापिताः तथा दैत्याक्रान्तमिति मावमायेव परमोपकारो श्रेयाय राज्यदानन्तु यत्किञ्चिदित्याह—कालेति ॥ ४२—४३ ॥

समये पयपिबत्तिलाम्बु इति पाठः स्वामिसम्मतः । मायानृसिंहमिति कृपाप्रधानं नृसिंहमित्यर्थः ॥ ४४—४७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मनवोऽत्र वर्तमानमनुप्रभृतिकल्पःस्थिताः अतीता इत्यर्थः ते च भाविनोऽप्यात्मानमेवं मत्वा निवेदयन्ति स्मेति मनव ऊचुरित्युक्तम् ॥ ४८--५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तव घोरस्वरूपमालक्ष्य प्रलयशङ्कया सर्वे बिभ्यति मत्वहमित्याह—कोपेति । युगान्तः प्रलयः तव कोपस्य कालः प्रलयस्तत्र संहारे कर्मणि अहमेव त्वदंशोवतंसप्रेवेति भावः भक्तवात्सल्यार्थमयं कोप इति चेत् अल्पकः त्वदपेक्षया अत्यल्पोऽय मसुरो हत एव । अतस्तत्सुतं प्रह्लादम् उपसृतमनुगतम् ॥ ४१ ॥

एतावद्दिनपर्य्यन्तं त्वच्चरणस्मरणविमुख एवाहं वर्त्ते इत्याह-हे परम ! नोऽस्मांस्त्रायता रक्षता भवता स्वीया एव भागाः दैत्यात् प्रत्यानीताः प्रत्याहृताः इन्द्रादीनां त्वद्दासानामस्माकं वस्तुषु वस्तुनः प्रभोस्तवैव स्वत्वौचित्यात् किञ्चास्माकं हृदयं खलु कमलं तव शश्वत्तवैव ध्यातत्वात्त्वद्गृहं । तच्च कमलं यथा निःश्रीकं रात्रौ तमसाक्रान्तं मलिनं निद्रितं भवेत् तथैव दैत्यजन्मारभ्य एतावद्दिनपर्य्यन्तं मयादैत्यस्यैव ध्यातत्वाद्दैत्याक्रान्तं सम्प्रति तव नृसिंहसूर्य्यस्योदये मतिः प्रत्यबोधि त्वच्चरणाक्रान्तं सद्व्यकस्पादित्यर्थः । यद्वा, त्वद्गृहं वैकुण्ठं प्रति प्रयोधि त्वच्चरणसेवार्थं बुद्धिं प्रापेत्यर्थः । ननु, मत्कार्याभिमानित्विन्द्रपदं गृहाणोऽथ तत्र सत्यमहं सकामो भक्तिशून्यो गृहीष्यामीत्याह, त्वंऽिभक्तानशक्तानान्तु कालग्रस्तमिति इममिन्द्रपदं अपरैः योगैश्वर्य्यादिभिः ॥ ४२ ॥

एतावद्दिनपर्य्यन्तमस्माभिर्न तपस्तप्तमित्याहुः । त्वं नोऽस्माकं परमं गुणद्वयानमयं यत्तपस्तत् आत्मनः स्वस्य तेजः आत्मअस्मासु तत्प्रवर्त्तनार्थमिति भावः । येन तेजसा तपो रूपेण आत्मनि लीनमिदं विश्वं ससर्ज असाक्षीः । ससर्ज्जेत्यपि पाठः "सृजामि तपसैवेदम्" इति त्वदुक्तेः । तत्तपः अमुना दैत्येन घोरं तेजो राहुणेव विप्रलुप्तं । तत् सम्प्रति रक्षार्थं गृहीतेनानेन वपुषा नृसिंहाकारेण अन्वमंस्थाः पुनरप्यस्मत्कर्त्तव्यत्वेन अनुमतं सम्मतमकरोः ॥ ४३ ॥

वयमेतावद्दिनपर्य्यन्तमुपवासपरा एवाभूमेत्याहुः । श्राद्धानि श्राद्धपिण्डादीनि तीर्थस्नानसमये तिलाम्बु तिलतर्पणोदकं तानि तच्च । तस्य उराद आच्छेत् आहृतवान् । कथम्भूतात् नखैर्निर्दीर्णा वपा मेदो यस्य तस्मात् "वपा विवरमेदसोः" इति मेदिनी । वपाः विदार्य्य पिण्डतिलोदकादीन्येवास्मान् दर्शयामासेत्यर्थः ॥४४॥

योगैश्वर्य्यसम्पत्तिहीना रङ्का एव वयमेतं कालं प्रतीक्षामहे इत्याहुः, यो नो गतिमणिमादिसिद्धिं नानाद्दर्पमनेकदर्पवन्तं तमसुरम् ॥ ४५ ॥

वयमप्येतावद्दिनपर्य्यन्तं विद्या रहिता एवास्मेत्याहुः । विद्यामन्तर्द्धानादिलक्षणां राज्ञां सिद्धां संख्ये युद्धे । मायानृसिंहं कृपाप्रधानं नृसिंहम् ॥ ४६ ॥

हृतधना हृतश्रीका एव वयमेतावद्दिनपर्य्यन्तं सन्तप्ता एवेत्याहुः-येनेति । तद्वक्षसः पाटनेन विदारणेन आसां स्त्रीणां हे दत्तानन्द ॥ । ४७ ॥

नृसिंहेनाकस्मादवलोक्यमाना मनवो मूर्ध्नि बद्धाञ्जलयो वयं त्वदाज्ञाकारिणो मनवो भवामेत्याहुः-एवमग्रेऽप्येवताविख्येया मनव इति । सेतवो वर्णाश्रमधर्ममर्य्यादाः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रुद्रोपि भगवन्तं प्रणम्याहेति योज्यम् एवमग्रेऽपि यत्र नतिर्नास्ति तत्र योज्यम् ते तव कोपस्य कालः युगान्तः प्रलयः इदानीमपि सत्यमकुल्पस्य तव यत्प्रति कोपः स तु अत्यल्पोऽसुरो हतः अतः कोपं त्यक्त्वा तत्सुतं ते भक्तमुपसृतं त्वां शरणं गतं पाहि ॥ ४१ ॥

हे परम ! नोऽस्मान् त्रायता रक्षता स्वभागाः "अहं हि सर्वयज्ञानां भोक्ता च" इति स्मृतेः स्वीया एव भागाः दैत्यात्प्रत्याहृताः "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" इति अस्मदादिहृदयकमलं त्वद्गृहमेव तच्चैतावत्पर्य्यन्तं दैत्याक्रान्तम्. तद्भयात्स्वाद्विस्मृते स्तत्स्मृतेश्च तेन रुद्धम् इदानीं प्रत्यबोधि त्वत्स्वरूपगुणग्राहकं कृतम् स्वर्गादिसुखं दुःखोदर्कं ज्ञात्वा हरिभक्तानां सुखं निरुपाधिकं कामयमान आह, हे नाथ ! हे वाच्य ! हे भक्तिरसप्रद ! हे नारसिंह ! काले ग्रस्तमिदं देवैश्वर्यं कियत् ते त्वां शुश्रूषतां मुक्तिरपि न बहुमता अपरैः पुरुषार्थैः किम् ? त्वद्भजनसुखं तावदनुपमं त्वद्भावापत्तिलक्षणस्य त्वद्भजनफलस्य मोक्षस्य निरतिशयत्वं को वर्णयेदिति भावः ॥ ४२ ॥

हे आदिपुरुष विश्वहेतो ! येनेदं विश्वं आत्मगतं सूक्ष्मरूपेण त्वमपि वहन्तं ससर्ज स्थूलतया प्रकटितवान् नोऽस्मभ्यं यदात्थ उपदिष्टवानसि कथम्भूतं परमं सर्वैश्वर्यप्रदम् आत्मनो विभूतिरूपम् "तपो ब्रह्म" इति श्रुतेः तदमुना दैत्येन विप्रलुप्तं पुनस्त्वं रक्षार्थं गृहीतेन वपुषा नरहरिरूपेणान्वमंस्थाः तपःकुरुतस्यभ्यनुज्ञातवानसि ॥ ४३ ॥

योऽस्मभ्यो विद्भ्यस्तमानहैः श्राद्धानि श्राद्धनिमित्तानि पिण्डादीनि तिलाम्बु च तनूजैर्नोऽस्मभ्यं तीर्थसमये तिथिपात्रादियोगकाले दत्तानि प्रसभं बलात् स्वयमभिबुभुजे तस्योदराद्नखैर्विदीर्णा वपा यस्य तस्मात् स आच्छेत् आहृतवान् तस्मै नमः ॥४४॥

योऽसाधुः नोऽस्माकं योगसिद्धां तपश्चित्तैकाग्र्यरूपयोगेन साधितां गतिमणिमादिसिद्धिमहार्षीत् अपहृतवान् तं नानादर्पमनेकाभिमानवन्तं यो नखैर्विददार विदारितवान् तस्मै तुभ्यं प्रणताः स्मः ॥ ४५ ॥

योऽन्यः स्त्रियां अन्तर्धानादिलक्षणां पृथग्धारणया तत्तद्विद्यार्थमनोधारणयाऽनुरुद्धां सम्पादितां न्यषेधत् सत्त्वेन संङ्ख्ये संग्रामे पशुवत्कृतः तं मायया वयुनेन सङ्कल्पेन नृसिंहरूपेणाविर्भूतं नित्यं प्रणताः स्मः ॥ ४६ ॥

रत्नानि मणयादीनि स्त्रीरत्नानि च आसां भवत्प्रजानां मस्तद्वक्षःपाटनेन हस्त आनन्दो येन तत्सम्बुद्धौ हे दत्तानन्द ! ते तुभ्यं नमः ॥४७॥

प्रजापतय ऊचुः ।

प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः ।
स एष त्वया भिन्नवक्षा नु शेते जगन्मङ्गलं सत्त्वमूर्तेऽवतारः ॥ ४९ ॥

गन्धर्वा ऊचुः ।

वयं विभो ! ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः ।
स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥ ५० ॥

चारणा ऊचुः ।

हरे तवाङ्घ्रिपङ्कजं भवापवर्गमाश्रिताः ।
यदेष साधुहृच्छयस्त्वयाऽसुरः समापितः ॥ ५१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निर्देशकारिणः आज्ञाकारिणः येन परिभूताः निराकृताः मनवो वर्णाश्रममर्यादा येषां ते स उपसंहृतो हतः अतः अनुशाधि अनुशिक्षय ॥ ४८ ॥

भाषा टीका ।

रुद्र उवाच ।

श्रीमहादेवजी बोले, कि आपके कोपका समय तो युगान्त अर्थात् प्रलय है यह तो आपने अभी छोटे से असुर को मारा है ॥ तस्मात् हे भक्तवत्सल ! शरणागत आपके भक्त, उस के पुत्र प्रह्लाद की रक्षा करो ॥ ४१ ॥

इन्द्र उवाच ।

इन्द्र बोले, कि—हे नाथ ! हे परमेश्वर ! हे नरहरे ! आपने बड़े प्रचण्ड दैत्य का बधकर के हमारे भाग हम को दिवाये, और आपका निवासस्थान जो हमारा हृदय कमल उसको आपने निर्भय करके प्रफुल्लित किया, और काल ग्रस्त यह ऐश्वर्य तो क्या है, पर आप के चरणों की शुश्रूषा करने वाले तो मुक्ति का भी बहुमान नहीं करते फिर औरों से क्या है ॥ ४२ ॥

ऋषय ऊचुः ।

ऋषिलोग बोले, कि हे परमेश्वर ! हे शरण्यपाल ! जिस तपो बल से आपने में लीन इस जगत् को रचा और जो आत्मा का तेज रूप है उसी तप की हम लोगों को आज्ञा आपने दी है, आज हमारे उस तप का इस दैत्यने लोप कर दिया, फिर जिन आपने रक्षार्थ वपु को धारण कर उसी तप की अनुमति दी तिन आप को नमस्कार हो ॥ ४३ ॥

पितर ऊचुः ।

पितृलोग बोले, कि—हमारे पुत्रों ने श्राद्ध में जो हमको पिण्ड समर्पण किये इसने उनको बलात्कार से भोगा, और स्नान काल में जो तिलाञ्जलि हम को पुत्रों ने दी उसको भी यही पी गया, जिन आपने उस के उदर से अपने नखों से त्वचा को विदीर्ण कर खाये हुए सबरे पिण्ड निकाल दिये, अखिल धर्म की रक्षा करने वाले नृसिंह देव आपको नमस्कार हो ॥ ४४ ॥

सिद्धा ऊचुः ।

सिद्धलोग बोले, कि जिस दुष्टने अपने योग और तपोबल से हमारी योग सिद्ध गति को चुराली उस नानादर्प वाले दैत्य को आप ने नखों से विदारण किया। हे नृसिंह ! ऐसे आपको हम लोग प्रणत हैं ॥ ४५ ॥

विद्याधरा ऊचुः ।

विद्याधरलोग बोले, कि बल और वीर्य के दर्पसे जिस मूढ़ ने हमारी पृथक् धारणा से सिद्ध करी हुई विद्या का निषेध किया उसको जिन आपने संग्राम में पशु के तरह मार दिया ऐसे मायानृसिंह रूप आप को हम नित्य प्रणाम करते हैं ॥ ४६ ॥

नागा ऊचुः ॥

नाग लोग बोले, कि जिस पापी ने हमारे रत्न और स्त्रीरत्न दोनों छुड़ा लिये, उस के वक्षस्थल के फाड़ने से दिया है आनन्द जिन ने ऐसे आप को नमस्कार हो ॥ ४७ ॥

मनव ऊचुः ॥

मनु लोग बोले, कि हम आपके आज्ञाकारी मनु लोग हैं। हे देव ! इस दैत्य ने हमारे मर्यादा सेतु तोड़दिये परन्तु आपने उसी खल का उप संहार किया। प्रभो ! हम आपके किङ्कर क्या करें, आप हमको आज्ञा दीजिये ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रजापतयोऽपि तद्वधोक्तिना प्राहुः, हे परेश ! हे त्वया अभिसृष्टाः वयं प्रजेशा येन निषिद्धाः सन्तः प्रजा न सृजामः स एषः भिन्नं वक्षो यस्य सः नु निश्चितं मृतः शेते अतःपरं

यक्षा ऊचुः ।

वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वम् ।
स तु जनपरितापं तत्कृतं जानता ते नरहर ! उपनीतः पञ्चतां पञ्चविंश ! ॥ ५२ ॥

किम्पुरुषा ऊचुः ।

वयं किम्पुरुषास्त्वं तु महापुरुष ईश्वरः ।
अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥ ५३ ॥

वैतालिका ऊचुः ।

सभासु सत्रेषु तवाऽमलं यशो गीत्वा सपर्यां महतीं लभामहे ।
यस्तां व्यनैषीद्भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथाऽऽमयः ॥ ५४ ॥

किन्नरा ऊचुः ।

वयमीश ! किन्नरगणास्तवानुगा दितिजेन विष्टिममुनाऽनुकारिताः ।
भवता हरे ! स वृजिनोऽवसादितो नरसिंह ! नाथ ! विभवाय नो भव ॥ ५५ ॥

विष्णुपार्षदा ऊचुः ।

अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद ! सर्वलोकशर्म ।
सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम् वैयासिक्यां
सप्तमस्कन्धे प्रह्लादानुचरिते दैत्यराजवधे नृसिंहस्तवो नाम
अष्टमोऽध्यायः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रजाः स्रजाम इति द्रष्यन्तः प्राहुः, हे सत्त्वमूर्त्ते ! तवायमवतारो जगतो मङ्गलम् ॥ ४९ ॥

गन्धर्वा अपि तद्दनलोकिताः प्रोचुः, हे प्रभो ! वयं ते त्वदीया नटा वर्त्तका नाट्ये नृत्ये गायकाश्च येन स्वाधीनाः कृताः कथम्भूतेन वीर्यं शौर्यं बलं शक्तिः ताभ्याभोगः प्रभावो यस्य तेन स एव भवता इमां दशां मृतिम् नीतः उचितश्चैतदित्याहुः किमिति ॥ ५० ॥

भवापवर्गं संसारनिवर्त्तकम् । आभयणो हेतुः यद्यस्मात् साधूनां हृदि भयजनकत्वेन शेते तिष्ठतीति तथा स एषोऽसुरः त्वया समापितः अन्तं नीतः ॥ ५१ ॥

मनोज्ञैः कर्मभिः तवानुचरेषु मुख्यास्ते वयं दितिसुतेन शिबिकावाहकत्वं प्रापिताः पञ्चतां मृत्युं हे पञ्चविंश ! चतुर्विंशति-तत्त्वनियामक ॥ ५२ ॥

किम्पुरुषास्तु त्वां स्तोतुं के वयं वराका इत्याहुः,—वयमिति । वयं किम्पुरुषास्तुच्छप्राणिनः त्वन्तु महान् अद्भुतप्रभावः पुरुषः नन्वेवं महान् दैत्यो हत इति किं न वर्ण्यते इत्याशङ्क्य कियदेत-दित्याहुः अयमिति यदा साधुभिर्भगवद्भक्तैर्धिक्कृतस्तदैव नष्टः ॥ ५३ ॥

सत्रेषु यज्ञेषु ते त्वया हतः एतद्दिष्ट्या भद्रं कृतम् ॥ ५४ ॥

अमुना दितिजेन विष्टिं निर्मूल्यं कर्म अनु निरन्तरं कारिताः अतःपरं नो विभवाय समृद्धये भव ॥ ५५ ॥

सोऽस्माकं भक्तानां शरणद ! आभयप्रद ! सर्वेषां लोकानां शर्म मङ्गलमेतदद्भुतम् । रूपमद्यैव दृष्टं ननु पूर्वं वि[illegible] किङ्करः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सहारकत्वकृष्टपापरूपजगत्सर्गात्मकाहमकृष्यापारविरोधि-निरसनेन तदुपकाराधायकां सर्वेषां शुभाधायकमूर्तिं तुष्टुवुः प्रजापतयः—प्रजेशा इति । हे परेश ! परेषां ब्रह्मादीनामपीश ते त्वया अभिसृष्टा अवहितसर्गार्थं त्वया सृष्टाः प्रजेशाः प्रजापतय इति प्रसिद्धाः ते वयमेतत्पर्यन्तं येन दैत्येन्द्रेण निषिद्धा इतस्ततः प्रजाः न वै सृजामः न सृष्टवन्तः स एव दैत्यस्त्वया भिन्नं विदीर्णं वक्षो यस्य तादृशोऽनु शेते अतःपरं प्रजाः सृक्ष्यामः इति हृष्यन्त आहुः हे सत्त्वमूर्ते अप्राकृतशुद्धसत्त्वविग्रह ! ते तवावतारो जगन्मङ्गलं जगतो मङ्गलावहः ॥ ४९ ॥

तन्मुखोल्लासार्थं नाट्यादिकैङ्कर्यविरोधिनिरसनेन तदाधायकं सुहृदं तुष्टुवुर्गन्धर्वाः—वयमिति । हे विभो ! ते तव नट-नाट्यगायका नटाः नर्तकाः नाट्ये कर्मणि गायकाश्च वयं येनैतावत्पर्यन्तमात्मसात्कृताः स्वाधीनाः कृताः कथम्भूतेन वीर्यं शौर्यं बलं शक्तिः ताभ्यामोजः प्रभावो यस्य तादृशेन स एष दैत्यो भवता निरतिशयकृपायुक्तेन इमां दशां मरणमवस्थां नीतः प्रापितः तथाहि उत्पथस्थः उत्पथे कुमार्गे पापकर्मणि तिष्ठतीति तथा कुशलाय क्षेमाय कल्पते किम् ? क्षेमयुक्तो भवति किम् ? न कल्पत एवेत्यर्थः ॥ ५० ॥

तत्पादपङ्कजपरिचर्याविरोधिनिरसनेन पुनस्तदाधायकं हितकरं तुष्टुवुश्चारणाः,हर इति । हे हरे—आश्रितार्तिहर ! भवापवर्गमैहिकामुष्मिकसुखहेतुं तवाङ्घ्रिपङ्कजमाश्रिताः परिचरन्तो वयमनेन निषिद्धा इति शेषः स एषोऽसुरः साधूनां प्रपन्नानां हृच्छयः हृदयरोगरूपस्त्वया समापितः उपसंहृतो हत इत्यर्थः ॥ ५१ ॥

स्वकुःखमावेदयन्तस्तन्निवर्तकं सुखाधायकं वर्णयन्ति यक्षाः, वयमिति । मनोज्ञैः कर्मभिर्वयं तवानुचरश्रेष्ठाः ते वयमिह तावद्दितिजेन वाहकत्वं यानादिवाहकत्वं भारवाह—कत्वं वा प्रापिताः हे नरहरे ! तेन दितिजेन कृतं तव भक्तजनानां भक्तजनानां परितापं जानता ते त्वया पञ्चविंशो दैत्येन्द्राख्यो जीवः पञ्चतां मृत्युम् उपनीतः प्रापितः "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवाऽनुविनश्यति" इति वत्पञ्चविंशस्य शरीरद्वारका पञ्चताप्राप्तिरत्र विवक्षिता पञ्चविंशेति पाठे, हे जीवशरीरकेति सम्बोधनम्, स तु जनपरितापमिति पाठे । येन दितिसुतेन वाहकत्वं नीताः स तु पञ्चविंश इत्यन्वयः ॥ ५२ ॥

स्वनैच्यानुसन्धानपूर्वकमनितरसाधारणप्रभावं तुष्टुवुः किंपुरुषाः—वयमिति । वयं किंपुरुषाः कुत्सिताः पुरुषास्त्वं तु महापुरुषः अनितरसाधारणगुणपूर्णः ईश्वरः सर्वान्तरात्मा च अयं महान् दैत्यो हतस्त्वयेति किं न वर्ण्यते इत्याशङ्क्य कियदेतदित्याहुः, "अयमिति. कापुरुषः ईषत्पुरुषः अस्मदपेक्षया बलीयांस्त्वसौ-ऽयम इति भावः । ईषदर्थे विभाषा पुरुषे" इति सूत्रेण कुशब्दस्य कादेशः यदा साधुभिर्धिक्कृतस्तिरस्कृतस्तदैव नष्टो नष्टप्रायः अतः किंयदेतदत्रेति भावः ॥ ५३ ॥

अस्मत्सम्मानावहत्वगुणगानविरोधिनिरसनेन त्वयैव वयं बहुमता इत्याहुर्वैतालिकाः—सभास्विति । तवामलं यशः सभासु सत्रेषु च गीत्वा वयं महतीं सपर्यां पूजां पूर्वं लभामहे तामस्मान्यो दुर्जनो दैत्यः स्ववशं यथा भवति तथाऽनैषीत् स एष दुर्जनः, हे भगवन् ते त्वया हतः एतद्दिष्ट्या भद्रं जातं दिष्ट्या दैवेन त्वयेति वान्वयः । यथा आमयः यथा शिरोव्यथारूपो रोगः पीडकारकः तद्वदयमासीदित्यर्थः ॥ ५४ ॥

स्वदुःखमावेदयन्तः सर्वसुखाधायकं लोकार्तिहरं तुष्टुवुः किन्नराः—वयमिति । हे ईश ! वयं किन्नरगणा इति प्रसिद्धास्तवानुगाः अनुचरास्ते वयमेतावदमुना दितिजेन विष्टिमनुकारिताः मूल्यरहितं कर्म विष्टिस्तामनुनिरन्तरं कारिताः, हे हरे जनदुरार्तिहर ! स वृजिनः पापात्मा दैत्यो भवता उपसादित उपसंहृतः हे नरसिंह ! हे नाथ ! नोऽस्माकं विभवाय सुखसमृद्धये त्वं भव ॥ ५५ ॥

स्वामिन्नदृष्टपूर्वं रूपं विपत्तामस्यनुग्राहकं पृतमानसीत्याहुः विष्णुपार्षदाः—अद्येति । नोऽस्माकं भक्तानां हे शरण्य आश्रयप्रद ! निरतिशयपुरुषार्थसाधनभूतोपायप्रद ! इति वा, सर्वेषां लोकानां शर्म सुखावहमेतदद्भुतं रूपमद्यैव दृष्टं न तु पूर्वं हे ईश ! स्वामिन् ! सोऽयं दैत्यस्तव नियोगकरः निदेशकारी किङ्करः स च विप्रैः सनकादिभिः शप्तः सन् अपि कैङ्कर्यनिरोधो जात इति भावः । तस्य दैत्यस्येदं निधनं त्वत्कृतमनुग्रहाय पुनः कैङ्कर्यलाभरूपतदनुग्रहार्थमेवेति वयं जानीमः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे परेश ! त्वयाभिसृष्टा येन दैत्येन निषिद्धा वयं प्रजाः न सृजामो धे स दैत्यस्त्वयैव तु इदानीं भिन्नवक्षाः शेते तथाऽयमवतारो जगन्मङ्गलं जगति शुभसारभूतः जगतो मङ्गलमुद्दिश्य गृहीतो वा ॥ ४९ ॥

नटो नटनं कथायन्धवचनं नाट्यं शृङ्गारादिभावदर्शनम् एतयोर्गायकाः । एतदुक्तम् "नटनं तु कथायन्धं नाट्यकं भावदर्शनम्" इति वीर्यबलौजसा येनात्मसात् आत्माधीनाः कृताः कल्पते समर्थो भवति ॥ ५० ॥

साधून् हरन्तीति साधुहृतः सज्जनापहर्तॄणां भव आश्रयः साधूनां हृदयं भयति तापयतीति वा समापितो विनाशं गमितः भवस्यापवर्गस्य त्यागो यस्मात्तथा तद्भवात्संसारान्मोक्षो यस्मात्तथेति वा ॥ ५१ ॥

पञ्चतां विनाशं हे पञ्चविंश ! चतुर्विंशानां मध्य इति शेषः ॥ ५२ ॥

किंपुरुषाः पुरुषाभासाः ॥ ५३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सत्रेषु सभासु सत्रकारिणः दिष्ट्या सुखं कर्तुम् ॥ ५४ ॥

वेदनहीनतया क्रियमाणं कर्म विद्धि वृजिनं दुःखं करोतीति वृजिनः कर्त्रर्थः प्रत्ययः सः अपसारितोऽपहृत्य नाशितः विभवाय संसारान्मुक्तये ॥ ५५ ॥

हरिनरयोः सिंहनरयोरूपं विधिकरो भृत्यः किं विप्रशापात् * असुरयोनिमाप्तस्य ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे श्रीमद्विजयध्वज-

तीर्थकृत पदरत्नावल्याम्

अष्टमोऽध्यायः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हरे इति पूर्वमनाश्रयणे हेतुः साधुहृच्छय इति । सम्प्रत्याश्रयणे हेतुः समापित इति ॥ ५१ ॥

हे नरहरे ! ते तव मनोज्ञैः कर्मभिरनुचरा ये शिवकुबेरादयः ते मुख्याः स्वामिनो येषां ते वयम् ॥ ५२—५५ ॥

एते विष्णुपार्षदाः श्रीविकुण्ठानन्दनसम्बन्धिनो ज्ञेयाः श्रीनृसिंहदेवेनैकीभूय तस्यावतरणात् ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीजीवगोस्वामिकृतक्रमसन्दर्भे

अष्टमोऽध्यायः समाप्तः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

हे परेश परमेश्वर ! निषिद्धाः अरे मा प्रजाः सृजतेत्याज्ञप्ताः । हे सत्त्वमूर्त्ते तवावतारो जगन्मङ्गलम् ॥ ४९ ॥

येन दैत्येनात्मसात्कृतास्सन्तः स्तस्यैव नटा नाट्ये गायकाश्चाभूमेत्यर्थः ॥ ५० ॥

साधूनां हृदि तच्छय्यायामपि शेते इति सः । अत एव तदसहिष्णुनेव त्वया समापितः अन्तं नीतः । अत एवाद्यारभ्य तेषां हृदि त्वमेव शेष्वेति भावः ॥ ५१ ॥

ते तव मनोज्ञैः कर्मभिरनुचरेषु मुख्याः । यद्वा । अनुचरा स्त्वद्भक्ता एव मुख्या येषां ते वयमपि शिबिकावाहकत्वं प्रापिताः । तेन दितिसुतेन कृतं जनपरितापं जानता त्वया पञ्चतां मृत्युं हे पञ्चविंश चतुर्विंशतितत्त्वनियामक ॥ ५२—५३ ॥

ताम् अस्मत्संप्रदानकसपर्यां यः स्वाधीनतां विशेषेण अनैषीत् नीतवान् ॥ ५४ ॥

विद्धि निर्मूल्यं कर्म अनु निरन्तरं कारिताः । वृजिनो दुःखदः ॥ ५५ ॥

सोऽयं हिरण्यकशिपुस्ते विधिकरो दास एव विप्रैः सनकादिभिः शप्तः ॥ ५६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

सप्तमस्याष्टमोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे परेश "सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णेन चापरे" इति वचनात्सत्त्वेन स्वानन्त्र्येण मूर्तिर्यस्य तत्सम्बुद्धौ हे सत्त्वमूर्त्ते ! ते त्वया अभिसृष्टाः प्रजेशा वयं येन निषिद्धाः प्रजाः न सृजामः स एष त्वया भिन्नवक्षाः भिन्नं विदारितं वक्षो यस्य स तथा शेते तस्मात्स्वमङ्गलस्यैकस्य का कथा ते तवावतारो नु निखिलं जगन्मङ्गलम् ॥ ४९ ॥

हे विभो ! ते त्वदीयाः नटाश्च नाट्यगायकाः नाट्येषु तत्तदनुरूपगानकर्त्तारश्च वयं वीर्यबलौजसा वीर्यबलाभ्यां शूरत्वसामर्थ्याभ्यामोजः प्रभावो यस्य स तथा एवंभूतेन येन आत्मसात्कृताः स्ववशगाः कृताः स एव भवता इमां दशां नीतः उत्पथस्थः किं कुशलाय कल्पते नैव कुशलयोग्यो भवतीत्यर्थः ॥५०॥

हे हरे क्लेशहर ! यस्मादेष साधूनां हृदि भयदत्वेन शेते तिष्ठतीति तथाभूतः त्वया समापितो हतः अतो निर्भया वयं भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तच्चरणाङ्घ्रिपङ्कजमाश्रिताः ॥ ५१ ॥

हे पञ्चविंश ! प्रकृतिर्महत्तत्त्वमहंकारश्चेति त्रितयम् पञ्च तन्मात्राणि पञ्च महाभूतानि एकादशेन्द्रियाणि चेति चतुर्विंशतिप्राकृतपदार्थनियन्तः हे नरहरे ! ते त्वदीयाः मनोज्ञैः कर्मभिरनुचरेषु मुख्याः वयं येन दितिसुतेन वाहकत्वं प्रापिताः स तु तत्कृतं जनपरितापं जानता त्वया पञ्चतां मृत्युमुपनीतः अथ निर्भयाः मनोज्ञैः कर्मभिस्त्वां भजाम इति भावः ॥ ५२ ॥

वयं किंपुरुषाः दीनाः त्वं महापुरुषो दीनबन्धुः अयं कुपुरुषः न दीनो न दीनबन्धुः अतः साधुभिर्धिक्कृतः अतो नष्टः ॥ ५३ ॥

सपर्यां पूजां पुरा लभामहे यस्तां व्यनैषीत् स एष त्वया यथाऽऽमयो रोगस्तद्वद्धतः एताद्दृष्ट्या भद्रं जातम् ॥ ५४ ॥

हे ईश ! दितिजेनामुना विष्टिं निर्मूल्यसेवाम् अनु निरन्तरं कारिताः स वृजिनो दुःखदः हे हरे ! भवता व्यवसादितः उपसंहृतः हे नरसिंह ! हे नाथ ! नोऽस्माकमभवाय मोक्षाय भव ॥ ५५॥

हे वरप्रद ! सर्वेषां लोकानां शर्म मङ्गलं तेऽद्भुतमेतद्धरिनररूपमद्य नोऽस्माभिर्दृष्टम् हे ईश ! सोयं विप्रशप्तस्ते विधिकरः किंकरोऽत एव तस्येदं निधनम् अनुग्रहाय विद्मो जानीमः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

अष्टमाध्यायार्थप्रकाशः ॥ ८ ॥

---

* अध्याहृतं पदम् ॥

भाषाटीका ।

प्रजापतय ऊचुः ।

प्रजापति लोग बोले, कि—हेपरेश ! हम आप के रचे हुए प्रजेश हैं जिसके निषेध के मारे हम प्रजा को सृजते रहे, सो आपकी कृपा से हिरण्य वक्षःस्थल वाला सोरहा है हे सत्वमूर्ते ! जगत के मङ्गल के लिये आप का अवतार है ॥ ४९ ॥

गंधर्वा ऊचुः ।

गंधर्व लोग बोले, कि—हे विभो ! हमतो आप के नाचने गानेवाले हैं इसने बलसे जबरजस्ती हम लोगों को अपने वश में कर लिये, तिसको अपने इस दशाको प्राप्त किया, भलो कुमार्गगामी का कब भला हो सक्ता है ॥ ५० ॥

चारणा ऊचुः ।

चारण लोग बोले कि । हेहरे ! संसार से पार लगाने वाले आपके चरणकमल का हमलोगों ने आश्रय लिया है, क्योंकि ? यह साधुओं के हृदय में खटकने वाला असुर आपने समाप्त कर डाला ॥ ५१ ॥

यक्षा ऊचुः ।

यक्ष लोग बोले, कि-हम लोग आपके मनोज्ञ कर्मों से अनुचरों में मुख्य हैं तिन हम को इस दैत्य पुत्र हिरण्य कशिपुने पालकी उठाने वाले और बोझा उठाने वाले बना लिये हैं नर हरे ! तब अपने जनों के दुःख जानने वाले आपने उसको पञ्चता को प्राप्त किया आप कैसे हो कि पचीसवां तत्व रूप हैं ॥ ५२ ॥

किंपुरुषा ऊचुः ।

किंपुरुष लोग बोले, कि—प्रभो हम लोग तो किंपुरुष (खोटे पुरुष) हैं और आप महा पुरुष ईश्वर हो, और जब साधु जनों ने धिक्कार कर दिया तब यह कुपुरुष नष्ट होगया ॥ ५३ ॥

वैतालिका ऊचुः ।

वैतालिक लोग बोले, कि—हे भगवन् ! सभा और यज्ञ यागादिकों में हम लोग आप के निर्मल यश का गान करके बड़ी पूजा को प्राप्त होते हैं, जिस दुर्जनने हमारी उस पूजा को उडाली इस दुर्जन को रोगके नाईं आपने ठंडा किया हे भगवन् ! यह बडा मङ्गल भया ॥ ५४ ॥

किन्नरा ऊचुः ।

किन्नर लोग बोले कि हे ईश ! हम लोग आपके अनुग किन्नर गण हैं इस दैत्य ने हम लोगोंको सदा के बेगारी बना लिये हैं हे हरे ! हे नरसिंह ! आपने इस पाप का नाश किया हे नाथ आप हमारी के अर्थ होवे ॥ ५५ ॥

विष्णुपार्षदा ऊचुः ।

विष्णुपार्षद लोग बोले, कि—इस समय यह अद्भुत नरहरि रूप आप का देखा हे आश्रय प्रद ! कैसा आपका यह रूप है कि सर्व लोक के सुख देने वाला है हे ईश सो यह विप्र शाप को प्राप्त हुआ आप का किंकर है इसका यह निधन (मरण) इसी के अनुग्रह के लिये हैं ॥ ५६ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, अष्टम अध्याय की भागवताचार्यकृत भाषा टीका समाप्त ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

———:*:———

॥ नवमोऽध्यायः ॥

नारद उवाच ।

एवं सुरादयः सर्वे ब्रह्मरुद्रपुरस्सराः ।
नोपैतुमशकन्मन्युसंरम्भं सुदुरासदम् ॥ १ ॥
साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम् ।
अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शङ्किता ॥ २ ॥
प्रह्लादं प्रेषयामास ब्रह्माऽवस्थितमन्तिके ।
तात ! प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ॥ ३ ॥
तथेति शनकै राजन्महाभागवतोऽर्भकः ।
उपेत्य भुवि कायेन ननाम विधृताञ्जलिः ॥ ४ ॥
स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः ।
उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं कालाहिवित्रस्तधियां कृताभयम् ॥ ५ ॥
स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ।
तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ॥ ६ ॥
अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः ।
प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ॥ ७ ॥

प्रह्लाद उवाच ।

ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः सत्त्वैकतानमतयो वचसां प्रवाहैः ।
नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवमे ब्रह्मणा भीत्या चोदितोऽसुरबालकः ।
कोपं प्रशमयन्नस्तौन्नृसिंहमतिभीषणम् ॥ १ ॥
"उग्रोऽप्यनुग्रएवायं स्वभक्तानां नृकेसरी ।
केसरीव स्वपोतानामन्येषामुग्रविग्रहः"—

इत्याद्यागमोक्तां भक्तानुकम्पितामाह—एवमिति सप्तभिः । एवं दूरतएव स्थित्वा स्तुवन्तः मन्युना संरंभ आवेशो यस्य तं उप समीपं गन्तुं नाशक्नुवन् ॥ १ ॥

श्रीर्लक्ष्मीर्देवैः प्रेषिताऽपि महदद्भुतं तद्रूपं दृष्ट्वा शंकिता सती तं नोपजगाम अद्भुतत्वे हेतुः अदृष्टेति ॥ २ ॥

उपेह्युपगच्छ ॥ ३ ॥ ४ ॥

कालएवाहिस्तस्माद्वित्रस्ता धीर्येषां तेषां कृतमभयं येन तत्कराम्बुजम् ॥ ५ ॥

तस्य श्रीनृसिंहस्य करस्पर्शेन धुतं निरस्तमखिलमशुभं यस्य सपदि तत्क्षणमेवाभिव्यक्तमपरोक्षीभूतं परात्मदर्शनं ब्रह्मज्ञानं यस्य निर्वृतस्सन् हृदि दधौ हृष्यन्ती रोमाञ्चिता तनुर्यस्य क्लिन्नं प्रेमार्द्रं हृदयस्य अश्रूणि लोचनयोर्यस्य परमपुरुषार्थतया दधौ न साधनत्वेनेत्यर्थः ॥ ६ ॥

सुसमाधिमेवाऽऽह—तस्मिन्नेव न्यस्तं हृदयमीक्षणञ्च येनेति ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्मिन्निव समस्तेषु तत्कृपाऽमृतदृष्टये ।
प्रह्लादस्तौति सत्पद्यैर्द्विचत्वारिंशता हरिम् ॥

तत्र तावदात्मनो भगवत्स्तुतावनधिकारमिवाशङ्क्याधिकारं समर्थयन्नाह—ब्रह्मादय इति पञ्चभिः । मुनयो मननशीलाः सिद्धाः ज्ञानिनोऽपि कृतकृत्याः सत्त्व एवैकाग्रमनसो विस्तारो यस्याः सा मतिर्येषां तथाविधा अपि वचसां प्रवाहैरपि तथा बहुभिर्वक्ष्यमाणैर्गुणैरपि यमाराधयितुं न विभुर्न पूर्णा न शक्ता इत्यर्थः स हरिर्मे मम कथं तोषं प्राप्तुमर्हति तत्र हेतुः उग्रजातेः उग्रा घोरा आसुरी जातिर्यस्य ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रत्येकं ब्रह्मादिभिः संस्तुतमप्यशान्तसंरम्भम् इतरैर्दुरासदं श्रीनृसिंहं चतुर्मुखप्रेषितः प्रह्लादः प्रसादयामासेत्याह देवर्षिः—एवं प्रत्येकम् इत्थं स्तुवन्तोऽपि ब्रह्मादयः सर्वे देवाः मन्युना संरम्भ आवेशो यस्यात एव दुरासदं दुष्प्रापं भगवन्तमुपैतुं समीपं गन्तुं नाशक्नुवन् समर्था न बभूवुः ॥ १ ॥

किं पुनर्निरतिशयप्रिया साक्षात्प्रसिद्धा श्रीर्लक्ष्मीरपि देवैर्ब्रह्मादिभिः प्रेषिता पतिसमीपमेहीति प्रार्थिताऽप्यद्भुतं महानृसिंहरूपं दृष्ट्वा पूर्वमदृष्टमश्रुतञ्च यत्तदृष्टाश्रुतपूर्वं तस्य भावस्तत्त्वं तस्मात्कुतो: शंकिता सती नोपेयाय न समीपमगात् ॥ २ ॥

एवं स्थिते ब्रह्मा चतुर्मुखोऽन्तिके समीपेऽवस्थितं प्रह्लादं प्रेषयामास, प्रेषणप्रकारमेवाह—तातेत्यर्धेन । तात हे वत्स ! त्वत्पित्रे कुपितं क्रुद्धं प्रभुं श्रीभगवन्तं प्रशमय प्रसन्नं कुरु उपेहि समीपं गच्छेति ॥ ३ ॥

हे राजन् युधिष्ठिर ! तथेत्यभ्युपगम्य भागवतश्रेष्ठोऽर्भकः प्रह्लादः शनकैः समीपमेत्य प्राप्य विधूतो बद्धाञ्जलिर्येन तादृशो भुवि देहेन दण्डवन्ननाम नमस्कृतवान् ॥ ४ ॥

ततः स्वस्य पादयोः मूले पतितं तमर्भकं प्रह्लादं विलोक्य देवः श्रीनृसिंहः कृपया परिप्लुतः परितः प्लुतो व्याप्तः तमुत्थाप्य तस्य प्रह्लादस्य शिरसि स्वकराम्बुजमदधात् निहितवान् कथंभूतं कालव्यालाहिः सर्पस्तस्माद्वित्रस्ता भीता धीर्येषां तेषां कृतमभयमभयप्रदानं येन तादृशं संसृतिभीरूणां कृताभयप्रदानमित्यर्थः ॥ ५ ॥

स प्रह्लादस्तस्य भगवतः करस्य स्पर्शेन धुतं निरस्तमखिलमशुभं यस्य तादृशः सद्य एवाभिव्यक्तौ प्रत्यक्षिणौ परास्मानौ स्वात्मपरमात्मानौ तयोर्दर्शनं याथात्म्यसाक्षात्कारात्मकं यस्य पूर्वं प्रत्यक्तापक्ष्यकभगवदपरोक्षज्ञानयुक्तः तत्करस्पर्शेन तु "ज्ञातुं द्रष्टुं च तत्त्वेन" इत्युक्तविधपरमात्मदर्शनयुक्त इत्यर्थः । अत एव निर्वृतः सुखितोऽतएव हृष्यत्तनुरुहाश्चितरोमयुक्ततनुः क्लिन्नं प्रेमार्द्रं इव हृदयं यस्य अश्रूण्यानन्दजानि लोचनयोर्यस्य तादृशस्तस्य भगवतः पादाब्जं हृदि दधौ धृतवानिरतिशयपुरुषार्थत्वेनानुसंहितवानित्यर्थः ॥ ६ ॥

ततः प्रेमगद्गदया वाचा एकाग्रमनसा श्रीभगवदेकविषयेण मनसा हरिमस्तौषीत् कथम्भूतः सुसमाहितः सुसमाधिमेवाह, तस्मिन्नेव न्यस्तं हृदयम् ईक्षणञ्च येनेति "हृदा मनीषा मनसाभिक्लृप्तः" इति वाचितबुद्धिवृत्तीनाम् एकविषयत्वाभिप्रायेणैकाग्रमनस्त्वं तन्न्यस्तहृदयेक्षणा इति चोक्तम् ॥ ७ ॥

स्तुतिमेवाह—ब्रह्मादय इत्यादि द्विचत्वारिंशच्छ्लोकैः । तावद्भगवत्स्तुतावात्मनोऽनधिकारमाशङ्कते—ब्रह्मादय इति । चतुर्मुखप्रभृतयो देवगणाः सत्त्वैकतानमतयः सत्त्वस्यैकतानामुख्याश्रयभूता मतिर्येषां ते केवलसत्त्वप्रधानमनस इत्यर्थः । अनेनाच "तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्" इत्युक्तरीत्याऽतीन्द्रियार्थदर्शनयोग्यत्वं सूचितम् एवंविधा अपि मुनयः सिद्धाश्च स्ववचसां प्रवाहैस्तोत्रैः तथा वक्ष्यमाणैरभिगुणैरपि यमाराधितुं स्तुत्यादिरूपाराधनद्वारा यस्य तोषमुत्पादयितुमधुनापि न विभुः आराधयितुं न पर्याप्ता न समर्था इत्यर्थः । स हरिः उग्रा आसुरी जातिर्यस्य तस्य मे अनेन च वक्ष्यमाणगुणराहित्यमुक्तम् । ईदृशस्य मे मम किं कथं तोष्टुं तोषं प्राप्तुमर्हति, वाङ्मनसाऽपरिच्छेद्यस्वरूपरूपगुणस्वभावविभूत्यादिको भगवान् विपश्चिद्भिर्ब्रह्मादिभिरपि स्तोतुमशक्यः कथमल्पबुद्धेरासुरस्वभावस्य मम स्तुत्या कथं तुष्यादित्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्रापि भक्तमाहात्म्यमेव प्रकटयति, ब्रह्मादिदेवतास्तुत्यनन्तरं कथं कथामसङ्ग इति श्रोतुरान्तरीं शङ्कां परिहर्तुमाह—एवमिति । एवं स्तुवन्तोऽपि उपैतुं समीपं गन्तुं मन्युसंरम्भं कोपसंरम्भं "मन अवबोधने" इति धातुः "ज्ञानसारं प्रत्ययसारम्" इति श्रुतेः । ज्ञानविवक्षयैतत् । ननु, तर्हि कथं समीपं गन्तुं नाशक्नुवन्निति उच्यते ? इति चेदशक्तत्वज्ञापनार्थमिति तात्पर्यम् ।"न तत्र चक्षुर्गच्छति न वागगच्छति, तेभ्यो ह प्रादुर्बभूव तत्र व्यजानन्" इत्यादिश्रुतेरनमेव दर्शयति, दुरासदमिति । सुजन विपर्यीकर्तुमशक्यम् ॥ १ ॥

एतदेव विवृणोति, साक्षादिति । भगवत्यादिरूपादृश्यर्थं साक्षादिति अदृष्टाश्रुतपूर्वत्वादन्यैः भावारयोजनैरिति शेषः । साक्षादित्यमुक्ताधिष्ठाने: । तर्हि नोपेयाय शङ्कितेत्यत्कथं घटमानेति चेत् यद्यपीश्वरः परिच्छेत्तो न भवति किन्त्वन्यैरिति ज्ञापनाय असुरजनमोहनार्थेति वा "अदृष्टाश्रुतपूर्वत्वादन्यैः साधारणोऽज्ञैः ॥ नृसिंहं शङ्कितेव श्रीर्लोकमोहाय नागमत्" इति वाक्यविरुद्धम् ॥ २ ॥

भगवतोऽतिप्रह्लादं वात्सल्यातिशयोऽस्ति भक्तानां सत्स्वेवातिशयफलाधिकार्थमिति गगनस्थलज्ञापनाय ब्रह्मणा प्रह्लादः प्रेषित इत्याशयेनाह, प्रह्लादमिति । अयमपि लक्ष्मीकान्तसमीपागमनहेतुरन्यथा प्रह्लादे वात्सल्यातिशयो न प्रकटितः स्यादित्युक्तम् "प्रह्लादे चैव वात्सल्यं दर्शनाय हरेरपि ॥ ज्ञात्वा भगवदा ब्रह्मा प्रह्लादं प्रेषयत्तदा" इति प्रकृते हरेः निर्भीतिर्यस्य स तथा इत्यनेन प्रह्लादशब्दनिरुक्तिः सूचिता भक्त्यादिवात्सल्यतां हित्वा गत्वादि तत्करणार्थमेवासर्वांकृतोऽशङ्किता असुरजनमोहनार्थापवर्तनञ्च "एकत्रैकस्य वात्सल्यं विशेषादर्शयेद्धरिः ॥ अपरस्यापि मोहाय'

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति मत्वा दिवानं नैव करोति किन्तु वात्सल्यानुसारेणोत्य-भिप्रायेण दर्शितं क्रमेणैवापि वत्सल इत्युक्तं उपेहि उपेत्य ॥ ३-४ ॥

नृहरेः प्रह्लादे वात्सल्यातिशयं दर्शयति—स्वपादमूले इति । ब्रह्मादिकराम्बुजेऽप्यहरेः कराम्बुजं विशिनष्टि, कालाहीति । कालाख्याहिना निर्दष्टा ग्रस्ता धीर्येषां ते तथा तेषाम् ॥ ५ ॥

इतरकरस्पर्शवैशिष्ट्यदर्शनायेशकरस्पर्शफलाभिव्यक्तिं वक्ति । स तत्कर इति । स भगवत्करस्पर्शविधूतसमस्तपापत्वात्तत्क्षण एव समुपांकुरितपरमात्मज्ञानः अभिव्यक्तं परस्य हरेरात्मनः संसारिणश्च दर्शनं स्वरूपविषयज्ञानं यस्य स तथेति वा क्लिन्नहृदङ्किवक्षणामृतजलेनार्द्रीकृतान्तःकरणोऽश्रुणा युक्ते लोचने यस्य स तथा ॥ ६ ॥

तत्त्वज्ञानमस्योत्पन्नमित्यस्य किञ्चिल्लिङ्गमित्यतस्तत्स्तुत्या व्यज्यत इति भावेन दर्शयति, अस्तौषीदिति ॥ ७ ॥

सत्त्वे नित्याविर्भूतब्रह्मज्ञानसमाहार एक एव नान्य इति वितानमतिर्विस्तृतबुद्धिर्येषां ते सत्त्वैकतानमतयः यद्वा सत्त्वे हरावेव नियतबुद्धयः अधुना परतः परस्य वस्त्वान्तं नापि नैव यान्ति स हरिरुग्रजातेरसुरजातेर्मे तोष्टुं स्तोतुमर्हति किमित्यन्वयः "न ते विष्णो" इति श्रुतेः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १ ॥

साक्षात् श्रीरिति साऽपि तस्यैव प्रेयसी अदृष्टाश्रुतपूर्वत्वा-त्वादिति । अत्रादृष्टाश्रुतपूर्वत्वं संभ्रमादेव जातमिवेत्यूह्यम् ॥ २-५ ॥

अथ प्रह्लादस्य श्रीभगवत्साक्षात्कारकृतसर्वाघधूननपूर्वकं ब्रह्मसाक्षात्कारानन्तरं भगवत्साक्षात्कारविशेषात्मकनिर्वृतिं परमाभीष्टत्वेनाह, स तदिति ॥ ६—७ ॥

तत्र तावन्निजायोग्यतायां कैमुत्यं व्यञ्जयति—ब्रह्मादय इति । वचसां कर्मयोगज्ञानप्रधानानां शब्दानां प्रवाहैर्निरन्तराभ्यासैः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सर्वैर्विघ्नस्ततागन्तुमन्तिकं नवमे हरेः ।
प्रह्लादो ब्रह्मणाऽऽदिष्टस्तुष्टुवे सन्निधिं गतः ॥
रमापि यत्र न प्राभूदन्येषां तत्र का कथा ।
वात्सल्यं मूर्तिमत् किन्तु प्रह्लादोऽनुबभूव तम् । ० ।

ननु, अस्त्वनु समानेद्यन्तो दूरत एव स्तुवाना देवादयः किमिति समीपमेत्य नोपासते स्म तत्राह—एवमिति । मन्युना संरम्भ आवेशो यस्य तम् ॥ १ ॥

अदृष्टाश्रुतपूर्वत्वादिति नृसिंहरूपस्य पूर्वकल्पदृष्टत्वेऽपि नृसिंहस्य वैकुण्ठे सदैव दृष्टत्वेऽपि तदानीमदृष्टाश्रुतत्व-प्रतीतिर्लीलाशक्त्यैव कारिता । अद्भुतरसास्वादप्रापणार्थमित्याहुः ॥ २—४ ॥

कृतमभयं येन तत् ॥ ५ ॥

असुरजातित्वात्तदीयस्पर्शादिप्राप्त्यसंभावनालक्षणमशुभं यत् पूर्वमासीत् तत् धुतं निरस्तं यस्य सः । तत्करस्पर्श-प्रभावात् अभिव्यक्तं पूर्वसिद्धमेव तदानीं सर्वतोभावेन व्यक्ती-भूतं परात्मदर्शनं परमात्मानुभवो यस्य सः ॥ ६ ॥

सुसमाधिमाह—आत्मन्येव न्यस्तं हृदयमीक्षणञ्च येन सः ॥ ७ ॥

भो गुणगणमाश्चर्यं प्रभो ! मयि कं गुणमालक्ष्य कृपयसीत्याह, ब्रह्मादय इति । सात्त्विकत्वमपि न ते कृपायाः कारणं किं पुनस्तामसत्वमित्याह, सत्त्वेषु धर्मज्ञानतपःस्वेव एकताना अनन्यवर्तिनी मतिर्येषां ते । किं पुनरधर्माज्ञानविषयभोगैकतानमतयो वयमिति भावः । "एकतानोऽनन्यवृत्तिः" इत्यमरः । न च केवलं स्तुतिवादानामेव त्वत्प्रसादकत्वमित्याह, वचसां प्रवाहैः पुरुगुणैर्ध्वनिगुणालंकारयुक्तैः प्रवाहपक्षे स्वच्छत्वशैत्यमाधुर्यपावित्र्याद्यैः । आराधितुं देवेषु सन्तोषयितुमित्यर्थः । न विभुः नाशक्नुवन्नित्यर्थः । मे ममेत्यर्थः । उग्रजातेर्महातामसजातेः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नवमे प्रह्लादस्तोत्रेण विगतकोपोऽभूद्धरिरिति वर्ण्यते—मन्युना संरम्भः आवेशो यस्य तमुपेतुमासादितुं नाशकन् ॥ १ ॥

देवैः तद्रूपस्य अदृष्टाश्रुतपूर्वत्वाद्धेतोः साक्षादनेकावतार-चरितज्ञा श्रीः प्रेषितापि तन्नृहरिरूपं महदद्भुतं दृष्ट्वा शङ्किता इदानीं समीपगमनं आनुकूल्यं प्रातिकूल्यं वा स्यादित्येवं जात-शङ्का सा नोपेयाय समीपं नैवाऽगात् ॥ २ ॥

हे तात वत्स ! स्वपित्रे कुपितं हरिं प्रशमय तदर्थमुपेहि शरणं व्रजेत्युक्त्वा प्रह्लादं प्रेषयामास ॥ ३ ॥

उपेत्य समीपं गत्वा शिरसि विधृताञ्जलिः कायेन भुवि ननाम ॥ ४ ॥

स्वपादमूले स्वचरणसमीपे कृपया परिप्लुतो व्याप्तः उत्थाप्य काल एवाऽहिस्तस्माद्भिग्रस्ता धीर्येषां तेषां कृतमभयं येन तत्कराम्बुजं शीर्ष्ण्यदधात् ॥ ५ ॥

स प्रह्लादः तस्य भगवतः करस्पर्शेन धुतानि निरस्तान्यखिलान्य-शुभानि यस्य सपदि त्वरितमेवाभिव्यक्तं प्रोद्भूतं परस्योपास्यस्य व्यापकस्वरूपस्य आत्मन उपासकस्याणुस्वरूपस्य स च दर्शनं यस्य विग्रहदर्शनानन्तरं स्वरूपानुभवो जात इत्यर्थः । हृष्यन्ती आनन्दिता तनुर्यस्य क्लिन्नं प्रेमार्द्रं हृदयस्य अश्रूणि लोचनयोर्यस्य सः निर्वृतः सुखितः तत्पादपद्मं कार्यकारणप्रकृतिसम्बन्धनिवृत्तिपूर्वकतास्य-धर्म्यप्राप्तिलक्षणमोक्षार्थे हृदि दधौ ॥ ६ ॥

मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः ।
नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान् गजयूथपाय ॥ ९ ॥
विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचनेहितार्थप्राणः पुनाति स कुलं न तु भूरिमानः ॥ १० ॥
नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते ।
यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥ ११ ॥
तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषम् ।
नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन ॥ १२ ॥
सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो ब्रह्मादयो वयमिवेश !(१) न चोद्विजन्तः ।
क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भगवतो रुचिरावतारैः ॥ १३ ॥
तद्यच्छ मन्युमसुरश्च हतस्त्वयाऽद्य मोदेत साधुरपि वृश्चिकसर्पहत्या ।
लोकाश्च निर्वृतिमिताः प्रतियन्ति सर्वे रूपं नृसिंह ! विभयाय जनाः स्मरन्ति ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं कृतध्यानः सपद्येव तस्मिन् भगवति न्यस्तं समर्पितं हृदयं मन ईक्षणञ्च येन सः एकाग्रेण हरिमस्तौषीत् ॥ ७ ॥

"सत्त्वं रजस्तम इति गुणास्तत्र कृष्णो न चापरे" इत्यंशभूते भगवत्स्वांशेऽस्मिन् एकस्मिन् गुणे विस्तारो यस्याः सा मतिर्येषां ते भगवदनुरक्तबुद्धिमन्त इत्यर्थः। ब्रह्मादयः प्रजापतयो राजसाः सुरगणाः प्रजापालकाः सात्त्विकाः "सत्त्वं रजस्तम इति गुणा रजसः प्रजेशाः" इति वक्ष्यमाणात् किं बहुना मुनयो मननशीलाः पराशरादयः सिद्धाः कपिलादयः गुणानामोघ वचसां प्रवाहैर्वेदैः पुरुगुणैः सृष्टिपालनमननध्यानैः यमाराधयितुं न विप्रुर्न पूर्णाः स हरिः उग्रजातेः उग्रा दैत्यस्यासामसी जातिर्यस्य तस्य मे किं कथं तोष्टुमर्हति ॥ ८ ॥

भाषा टीका।

श्रीरुक्मिणीपतये नमः ॥

॥ नारद उवाच ॥

नारदजी बोले, कि—इस प्रकार ब्रह्मा महादेव प्रभृति सम्पूर्ण देवता लोग कोपावेश युक्त, और अत्यन्त दुरासद, श्री नृसिंह देवके समीप जाने को समर्थ न हुए ॥ १ ॥

तब देवताओं ने साक्षात् श्री लक्ष्मीजी को भेजा, लक्ष्मी जी ने भी आप का ऐसा स्वरूप कभी न देखा सुना अत एव वो भी शंकित होकर समीप में नहीं गई ॥ २ ॥

तब समीप में स्थित प्रह्लाद को ब्रह्मा जी ने ऐसे कहकर भेजा, कि-हे तात ! अपने पिता पर कुपित प्रभु को समीप जाकर शान्त करो ॥ ३ ॥

तब तो हे राजन् महा भागवत अर्भक [छोटासा लड़का] प्रह्लाद 'जो आज्ञा' ऐसा धीरे से कह कर प्रभु के समीप में जाकर हाथ जोड़कर शरीर से पृथिवीमें दण्डवत करता हुआ ॥ ४ ॥

तब प्रभु भी अपने चरणों में पड़े हुए उस अर्भक [लड़के] को देखकर कृपा में डूबगये, और उसको उठाकर काल रूप सर्प से त्रस्त बुद्धि वालों को अभय देने वाले अपने करकमल को, प्रह्लाद के मस्तक पर धारण करते हुए ॥ ५ ॥

प्रह्लाद का भी नरहरि के कर स्पर्श से सम्पूर्ण अशुभ नष्ट हुआ, और तत्काल में पर ब्रह्म के स्वरूप रूप गुण विभूति के ज्ञान वाला होकर पुलकितांग आर्द्र हृदय अश्रु लोचन और आनन्दित होकर हरि के चरणों को हृदय में धारण करता हुआ ॥ ६ ॥

और एकाग्र मन से समाहित होकर प्रभु में हृदय और दृष्टि को लगाकर प्रेमपूर्वक गद्गद वाणी से स्तुति करने लगा ॥ ७ ॥

प्रह्लाद उवाच।

प्रह्लाद बोले, कि— सत्त्व गुण के एक विस्तार वाली बुद्धि वाले ब्रह्मादिक देवता और मुनि सिद्ध लोग बहु गुणयुक्त वाणीके प्रवाहों से जिस हरि के आराधन करने को अबतक भी समर्थ हुए वो हरि क्या मेरे सदृश उग्रजाति के स्तुति करनेके योग्य हैं ? ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

एवं हरितोषणे स्वस्यायोग्यतामाशङ्क्य योग्यतां स्थापयति, मन्य इति द्वाभ्याम्। अभिजनः सत्कुले जन्म रूपं सौन्दर्यं श्रुतं पाण्डित्यं ओज इन्द्रियनैपुण्यम् तेजः कान्तिः प्रभावः प्रतापः पौरुषमुद्यमः बुद्धिः प्रज्ञा योगोऽष्टाङ्गः एते धनादयो द्वादशापि गुणाः परस्य पुंस आराधनाय न भवन्ति [illegible] मत्त्यैव गजेन्द्राय तुष्टोऽभवत् ॥ ९ ॥

(१) तवोद्विजन्त इति वी०र०।

नाहं बिभेम्यजित ! तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् ।
आंत्रस्रजः क्षतजकेसरशङ्कुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् ॥ १५ ॥
त्रस्तोऽस्म्यहं कृपणवत्सल ! दुःसहोग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः ।
बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं भक्त्यैव केवलया हरेस्तोषः सम्भवतीत्युक्तमिदानीं भक्तिविना नान्यत्किञ्चित्तत्तोषहेतुरित्याह—विप्रादिति । पूर्वोक्ता धनादयो द्विषट् द्वादशगुणास्तैर्युक्ताद्विप्रादपि श्वपचं वरिष्ठं मन्ये यद्वा सनत्सुजातोक्ता द्वादशधर्मादयो गुणा द्रष्टव्याः । तदुक्तम्
"धर्मश्च सत्यञ्च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया ।
यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्य" ॥
इति यद्वा—
"शमो दमस्तपः शौचं क्षान्त्यार्जवविरक्तताः ।
ज्ञानविज्ञानसन्तोषाः सत्यास्तिक्ये द्विषड्गुणाः" ॥——
इति कथम्भूताद्विप्रात् अरविन्दनाभस्य पादारविन्दाद्विमुखात् कथम्भूतं श्वपचं तस्मिन्नरविन्दनाभेऽर्पिता मनआदयो येन तं ईहितं कर्म वरिष्ठत्वे हेतुः । स एवंभूतः श्वपचः स्वं कुलं पुनाति भूरिमानो गर्वो यस्य स तु विप्र आत्मानमपि न पुनाति कुतः कुलम्, यतो भक्तिहीनस्यैते गुणा गर्वायैव भवन्ति न तु शुद्धयेऽतो हीन इति भावः ॥ १० ॥

तर्हि किं धनाद्यर्पणेन संमानं प्राकृत इव भगवानपेक्षते ? नेत्याह—नैवेति । अयं प्रभुरीश्वरोऽविदुषोऽल्पकाज्जनान्मानं पूजामात्मनोऽर्थे न वृणीते नेच्छति यतो निजलाभेनैव पूर्णः तर्हि पूजां नेच्छत्येव तत्राह, करुणः कृपालुस्ततो वृणीते च तत्र हेतुः यद्यदिति । यं यं मानं यद्वा यद्यस्माद्यद्धन धनादिना भगवते मानं विदधीत तदेवाऽऽत्मने भवति नान्यत् यथा मुखे कृतैव तिलकादिश्रीः शोभा प्रतिबिम्बस्य भवति नतु साक्षात्तस्यैव कर्तुं शक्यते तद्वत् ॥ ११ ॥

यस्मादेवं भगवान्भक्त्यैव तुष्यति तस्मादहं नीचोपि विगतविक्लवो गतशंकः सर्वेश्वरस्य महि महिमानं सर्वप्रयत्नेन स्वमनीषानुसारेणाऽनुवर्णयामि अजानतोऽपि स्तुतिकरणे हेतुमाह— येनैव महिम्नाऽनुवर्णितेनाऽविद्यया संसारमनुप्रविष्टः पुमान्पूयेत शुध्येत तन्महि अन्यस्य तथा शोधकत्वाभावादित्यर्थः ॥ १२ ॥

तदेवमात्मनः स्तुतावनधिकारं परिहृत्येदानीं तं स्तुवन् कोपोपसंहारं प्रार्थयते—सर्वेहीति द्वाभ्याम् । भो ईश ! अमी उद्विजन्तो विश्यतः सर्वे ब्रह्मादयः सत्त्वमूर्तेस्तव धिषिकारास्त्वन्नियोगकर्तारो भक्ता एव नान्ये नच वयमसुरा इव वैरभावेनैते भक्ताः किन्तु अस्यैव तव रुचिरैरवतारैर्विविधं क्रीडनमस्य विश्वस्य क्षेमादिप्रयोजनाय न तु भयोत्पादनाय ॥ १३ ॥

तत्तस्मादेषां भयपरिहाराय मन्युं यत्कोपसंहर यदर्थमयं मन्युः स चासुरः साधूनां सन्तोषार्थमद्य हतः । अतःपरं क्रोधेन कार्याभावात्तं नियच्छ. नन्वस्यैषां वधेन साधुः किं मोदेत ? तत्राह—वृश्चिकादेः परोपद्रवकारिणोऽस्यतो जातया हत्या वधेन तस्यैव तद्व्यं जातमिति साधुरपि मोदेतैव तर्हि बहूनां सुखावहत्वादमुं क्रोधं न त्यजामीति चेत्तत्राह—लोकाश्च निर्वृतिमिताः प्राप्ताः सन्तः प्रतियन्ति क्रोधोपसंहारं प्रतीक्षन्ते तर्हि जनानां पुनर्भयाभावाय मन्युं धारयामीति चेत्तत्राह—रूपमिति । विभयाय भयनिवृत्त्यै एतद्रूपस्मरणादेव भयनिवृत्तेर्न मन्युधारणेन कृत्यमस्तीत्यर्थः ॥ १४ ॥

त्वं चेद्बिभेषि तर्हि त्यजामीति चेत्तत्राह—नाहमिति । भो अजित ! तेऽस्माद्रूपादहं न बिभेमि कथंभूतात् आस्यं च जिह्वा चार्कसदृशनेत्राणि च भ्रुकुटीनां रभस आटोपश्च उग्रा दंष्ट्राश्च एतान्यतिभयानकानि यस्मिंस्तस्मात् आन्त्रमय्यः स्रजो यस्मिंस्तदान्त्रस्रक् तस्मात् क्षतजाक्ताः केसरा यस्मिन् शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिन् तच्च तच्च तस्मात्, निर्ह्रादेन भीता दिगिभा यस्मात् अरीन् भिन्दन्तीत्यरिभिन्ति तानि नखाग्राणि यस्मिन् एवंभूतादपि ते रूपादहं न बिभेमि ॥ १५ ॥

मद्भयं त्वन्यदस्तीत्याह—त्रस्तोऽस्मीति । दुःसहं उग्रं संसारचक्रं कदनं दुःखं तस्मादहं त्रस्तोऽस्मि तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः सम्प्रणीतो निक्षिप्तोऽस्मि हे कृपणवत्सल ! हे उशत्तम ! कदा नु त्वं प्रीतः सन्नपवर्गभूतं शरणं तवांघ्रिकमलंप्रति ह्वयसे मामाह्वयसि ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमनधिकारमात्मन आशङ्क्य पुनरधिकारंसम्भावयितुं तावद्रुणतो जातिगुणानुरूपादिलाभतस्याऽनादरेण भक्त्यैकतोष्यत्वमाह—मन्य इति द्वाभ्याम् । धनादयः परमपुरुषस्याराधनाय सन्तोषनिमित्ताराधनाय न भवन्ति इति मन्ये किन्तु भक्तिरेव परमपुरुषसन्तोषाराधनाय भवतीति मन्य इत्यर्थः । कुतः हि यस्माद्भगवान् गजयूथपाय धनादिविरहिताय गजेन्द्राय भक्त्यैव तुतोष. तत्र धनं वित्तम्, अभिजनः सत्कुले जन्म, रूपं सौन्दर्यं तपः स्वधर्मः कृच्छ्रादिरूपं वाऽनशनरूपं वा श्रुतं पाण्डित्यम् ओज इन्द्रियबलं तेजः कायकान्तिः प्रभावः प्रतापः बलं शारीरं पौरुषमुद्यमः बुद्धिः प्रज्ञा योगः प्राणजयः ॥ ९ ॥

एवं धनाद्यभावेपि केवलभक्तेरेव श्रीभगवत्तोषहेतुत्वं निदर्शितम्. यतो भक्तेरेव श्रीभगवत्तोषहेतुत्वमत एवेतरगुणसंपत्त्यपेक्षया श्रीभगवद्भक्तिसम्पत्तिरेव श्रेयसीत्याह—विप्रादिति. द्विषड्गुणाः द्वादश गुणास्ते च—
"धर्मश्च सत्यं च दमः श्रुतञ्च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया ।
दानं च यज्ञश्च धृतिः शमश्च व्रतानि वै द्वादश ब्राह्मणस्य ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इतिसनत्सुजातोक्तः श्रीमहाभारते । एतैर्युक्तादरविन्दनाभस्य पादारविन्दविमुखाद्ब्राह्मणाच्छ्वपचं श्वपाकं वरिष्ठं श्रेष्ठं मन्ये श्वपचं विशिनष्टि. तदर्पितेति तस्मिन्नरविन्दनाभे अर्पिताः समर्पिता मन आदयो येन तं तथोक्तं, ईहितं कर्म तस्य श्रेष्ठत्वे ततो विप्रस्याऽश्रेष्ठत्वे च हेतू आह, स एवंभूतः श्वपचः कुलं स्वकुलमपि पुनाति भूरिमानो गर्वो द्विषड्गुणैर्युक्तो यस्य स तु विप्रः नात्मानमपि पुनातीत्यर्थः। यद्यप्युक्ता एव गुणाः भगवद्भक्त्यनुग्राहका भक्तिश्च वेदान्तविहितब्रह्मोपासनात्मिका तत्र चाधिकारस्त्रैवर्णिकस्यैव. ननु शूद्रस्य एतच्च शारीरकाऽपशूद्राधिकरणन्यायसिद्धम्. एवं च तत्र सुतरां श्वपाकस्याधिकारो न सम्भवतीति उक्तगुणयुक्तात् द्विजाद्भक्तियुक्तस्य श्वपाकस्य परत्ववर्णनमनुचितम् तथाप्यत्र प्रकरणे भक्तिशब्देन भक्तिः प्रपत्तिश्चोच्यते प्रपत्तौ च सर्वेषामधिकारो बहुप्रमाणप्रतिपन्नः अतएव हि—

"दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः।

खगा मृगाः पापजीवा सन्ति ह्यच्युततां गताः" ॥ इति

स्त्रीशूद्रादीनामपि भगवति भक्त्या तत्साधर्म्यापत्तिरुक्तोपपन्ना भवति "वनङ्गतो यद्धरिमाश्रयेत, उपेत नारायणमादिदेवम्, ॥ मन्येतदेतदखिलं परमस्य पुंसः, आत्मार्पणं स्वसुहृदः परमस्य पुंसः, इति प्रपत्तिरपि कर्तव्यत्वेन पूर्वमुक्तेत्यतो नविरोधः। उपपादितश्चैतत्पुरस्तान्मन आदीनां भगवति समर्पणं नाम तच्छेषत्वेन तदायत्तसत्ताकत्वेन चानुसन्धानरूपाध्यवसायात्मकज्ञानं प्राणशब्दः प्राणाश्रयप्रत्यगात्मस्वरूपस्याप्युपलक्षक एवञ्चात्मात्मीयादिसमर्पणेन भगवति न्यस्तभरः श्वपाकोऽपि श्रीमगवत्तोपकत्वाद्युक्तविप्राद्विशिष्येतेति भावः। तदुक्तम् श्रीभगवता—

"अपिचेत्सुदुराचारो भजते मामनन्यभाक्।

साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥

प्रियो हि ज्ञानिनोऽत्यर्थमहं च मम प्रियः"।

इत्यादि—

अपिपापेष्वभिरता मद्भक्ताः पाण्डुनन्दन !।

मुच्यन्ते पातकैः सर्वैः पद्मपत्रमिवाम्भसा ॥ इति ॥१०॥

ननु, परिपूर्णस्य भगवतो जातिगुणविद्याविनिहीनश्वपाकसमर्पितमनआदिभिः किं प्रयोजनम्? कथं वा तत्स्तव्य [illegible]? कथंचैतदेवंविधोऽपि मामनन्यभावेन भजन्नितरां मत्प्रिय इति श्रीमगवतोक्तम्? इत्यत्राह-नैवेति। प्रभुरीश्वरो निजलाभपूर्णः निजेन स्वाभाविकेन लाभेन समस्तकामावाप्त्या पूर्णः अत एव मानं स्वाराधनरूपं कर्म नैव जनाद् आत्मने इत्यपकृष्यते आत्मने आत्मार्थं स्वप्रयोजनाय न जनादित्यर्थः। किन्तु करुणो वृणीते करुणः करुणावान् "गुणवचनेभ्यो मतुपो लुगवक्तव्यः" इति लुप्तमतुबन्तं पदं लुप्ततलुगिति टापो लुक् हेतुगर्भमिदं दयालुत्वाद्विदुषो वृणीते प्रबुद्धजनान्स्वाराधनविधानेनाङ्गीकरोतीत्यर्थः। करुणयाऽऽराधकोज्जीवनार्थमेवाराधनं स्वीकरोतीति भावः। तदेव विशदयति, यद्यदाराधनं भगवते जनो विदधीत करोति तच्चात्मने स्वार्थमेव भवति "यंक्रतुमभिसंवयताँ मेति वन्द्यमानश्च वन्द्यताम्" इति न्यायाद्भगवत्पूजनेन स्वयमपि पूज्या भवन्तीत्यर्थः। कथमन्यस्य पूजनेन अन्यस्य पूज्यतेत्यपेक्षायां, तदधीनसत्तादिमतो वस्तुनस्तत्सत्कारेण तत्साफल्यावाप्तौ दृष्टान्तमाह, यथा मुखश्रीः प्रतिमुखस्येति। यथा साक्षादलङ्कारादिजन्या मुखस्य शोभा तदधीनच्छायामुखस्य भवत्येवं भगवतः पूज्यता तदाराधकानां तथैव भवतीत्यर्थः। "तद्यथामातानरुणवत्सं वत्सो वा मातरम्, छाया सत्त्वमनुगच्छेत् तथाप्रकारः" इति श्रुतिर्हिजीवस्यच्छायावदीश्वरपारतन्त्र्यमवगमयति जनादविदुष इतिपाठे। अविदुषः किञ्चिज्ज्ञादपि जनान्मानमात्मार्थेन वृणीत इत्यर्थः ॥ ११ ॥

एवं भगवतो भक्त्यैकतोष्यत्वं तत्तोषस्य च भक्तोज्जीवनार्थत्वं चोक्तं तदेवं स्वस्योग्रजातेरपि तद्भक्तस्य तत्तोषकस्तुतावनधिकारः सम्भावितः यत एवंभूतो ऽहमतो यथामति स्तोष्यामीत्याह–तस्मादिति। यस्माद्भगवान्भक्त्यैकतोष्यस्तस्मानीचोऽप्यहं तद्भक्तियुक्तोऽहमतएव विगतविक्लवः गतशङ्कः सन् सर्वात्मना करणत्रयैकयेनेश्वरस्य भगवतो महि महिमानं यथामति स्तौमि गृणामि किमीश्वरस्य स्तुत्या प्रयोजनमिति शङ्कां निराकुर्वन्तन्महिमानुवर्णनं विशिनष्टि, येनेश्वरगुणानुवर्णनेन अनुवर्णितेनेति भावक्तः अजया प्रकृत्या गुणविसर्गं गुणकार्यं शरीरमनुप्रविष्टः पुमान्पूयेत शुद्ध्येत् स्तुत्या न तस्य कोऽप्यतिशयः किन्तु स्तुवतएवात्मविशुद्धिरूपोतिशयइतिभावः ॥ १२ ॥

एवमात्मनः स्तुतावनधिकारं परिहृत्य तत् स्तुतिं प्रतिज्ञाय तं तुष्टूषुस्तावत्कोपोपशमं प्रार्थयते—सर्वे हीति द्वाभ्याम्। हे ईश वयमिव यथा वयं तव किंकरास्तथा अमी सर्वे ब्रह्मादयोपि सत्त्वधाम्नस्तव विधिकराः किंकराएव अस्त्वेवं ततः किमत आह उद्भिजन्तः त्वत्कोपादविभ्यतो वर्तन्ते ततो मन्युं यच्छ त्युत्तरेणान्वयः सत्त्वधाम्न इत्यनेन शुद्धसत्त्वैकतानस्य तव कोपः स्वाभाविको न भवति किन्तु लोकरक्षणाधिकृतस्य तव तद्रक्षणारूपक्रीडार्थमाहित इत्यभिप्रेतं तदेव व्यनक्ति क्षेमायेति अस्य जगतः क्षेमाय लब्धपरिरक्षणाय भूतयेऽलब्धलाभायात्मसुखाय ब्रह्मात्मकस्वात्मानन्दानुभवजसुखाय च भगवतस्तव शरीरैः सुन्दरैरवतारैर्नृसिंहादिभिर्विक्रीडितं भावक्तः विविधाक्रीडा इत्यर्थः इयं दुष्कृद्विषयकोपादिरूपा तव क्रीडा लोकस्य समाधर्षमिति भावः। एवंविधक्रीडया हि दुष्कृद्विनाशद्वाराखिलपरिपालनमपूर्वश्रेयःप्राप्तिःश्रवणादिना क्रीडामनुभवतो लोकस्य निःशेषपापकर्मक्षयरूपमोक्षब्रह्मानन्दसुखानुभूतिश्च भवतीत्यतदर्थं तव [illegible]क्रीडितमिति भावः ॥ १३ ॥

यतस्तव विक्रीडितं लो[illegible]सुखाद्यर्थं तस्मात्संतोः हे नृसिंह मन्युं यच्छ उपसंहर इतःपरं न मन्युना प्रयोजनमस्तीत्याह—अधुनाऽसुरो भवता त्वया हतः लोकाः निर्वृतिं सुखमिताः प्राप्ताश्च ननु लोका निर्वृतिं यान्तु नाम लोकान्तर्गताः साधुजनास्तु मत्कृतामिमां भूतहिंसां नानुमोदेरन् अत आह साधुरपि लोकोपद्रवकारिवृश्चिकसर्पादिहत्या मोदेत वृश्चिकसर्पादितुल्यस्य मेऽसुरस्य हत्या साधुजनोऽपि मोदेतेत्यर्थः इति शब्दः किंभूतः सर्वे ब्रह्मादयो निर्भयाः प्रतियान्तु स्वस्थानानि प्रतिगच्छन्तु इतःपरमिदं त्वद्रूपमभयाय जनाः स्मरन्ति ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, ब्रह्मादय उद्विजन्त इति विशेषेण ब्रह्मादीनामेव क्रोधयुक्तान्मदुग्ररूपाद्भयं प्रोक्तं त्वन्तु न बिभेषि किमतआह–नेति । हेऽजित ! तथाऽस्माद्रूपादिति विशेषणाध्याहारः अहं न बिभेमि कथंभूतादास्यं च जिह्वा चार्कसदृशे नेत्रे च भ्रुकुटीनां रभस आटोपश्च उग्रा दंष्ट्राश्चैतान्यतिभयानकानि यस्मिन् अन्त्रमय्यः स्रजो यस्मिन् क्षतजाः रुधिराक्ताः केसरा यस्मिन् तत् क्षतजकेसरं शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिंस्तच्छंकुकर्णं द्वयोर्बहुव्रीह्योः कर्मधारयःक्षतजकेसरशंकुकर्णनिर्ह्रादेन भीता दिगिभा दिग्गजा यस्मात् तत्पूर्वेण पुनः कर्मधारयः क्षतजकेसरशंकुकर्णनिर्ह्रादभीतदिगिभं तस्मादरीन् भिन्दन्तीत्यरिभिद् तानि नखाग्राणि यस्मिन्नेवंभूताद्रूपादहं न बिभेमीत्यर्थः ॥ १५ ॥

तर्हि कुतो बिभेषि इत्यपेक्षायां तद्भीति इतो बिभेमीत्याह–त्रस्तोस्मीति । हे कृपणवत्सल ! दुस्सहं यदुग्रं संसारचक्रं कदनं तस्मादहं त्रस्तः भीतोऽस्मि कथंभूतोहं असतांप्रणीतः असतामिति कर्त्तरिषष्ठी असद्भिः त्वच्छेषभूतं मत्स्वरूपं तिरोधापयद्भिर्देहात्माभिमानस्वतन्त्रात्माभिमानममकारादिभिः तत्र संसारे प्रणीतः प्रापितस्तन्मूलभूतैः कर्मभिश्च बद्धः निगडितः हे उशत्तम कमनीयतम ! उक्तविधं मां प्रीतः मन्निष्ठकर्निरतिशयप्रीतियुक्तस्त्वं ते तवाङ्घ्रिमूलं प्रति कथंभूतमंघ्रिमूलमपवर्गशरणमपवर्गोपायभूतं कदानु ह्वयसे आहूयसे कदा मां त्वदंघ्रिमूलं प्रापयिष्यसि तावन्मामनुवर्त्तते भयमिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्त्या ननु भक्त्यैव यूथपाय गजेन्द्राय "समानेतरि नागेन्द्रे यूथनाथः प्रसीर्नितः" इत्यभिधानम् अनेन धनादिकमपि भक्त्युपबृंहितं सफलमित्युक्तं भवति ॥ ६ ॥

इतोपि भक्तिरेव हरेः प्रसादे प्रधानसाधनमित्याह, विप्रादिति । द्विषड्गुणा द्वादशगुणा एभिर्युक्तात् "ज्ञानं च सत्यं च दमः शमश्च अमात्सर्यं ह्रीस्तितिक्षानसूया । दानं च यज्ञश्च तपः श्रुतं च महाव्रतं द्वादश ब्राह्मणस्य ॥" एतेभ्यः प्रवरो द्वादशेभ्यः सर्वामपीमां पृथिवीं प्रशिष्यात् त्रिभिर्द्वाभ्यामेकतोवा विशिष्टो नास्य समोऽस्तीतिनिर्वेदितव्य इत्येते भक्तिमत एव सम्भवन्ति नान्यस्य कचित्समसम्भवन्ततो न तेभ्योऽर्थः स्यात् "अनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयतएव" इति श्रुतेः । तस्माद्भक्तिरेव प्रयोजिकेति तात्पर्यम्. सकलं मनआदिकं पुनाति विषयोपरक्तं मलं निरस्य दर्पणवत्स्वच्छं करोति जगत्पुनातीति वा "यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः" इति श्रुतेः । अन्यत्र बाधकमाह–मन्येति । भूरिमानोऽहङ्कारस्यभिमन्ता नैव पुनातीत्यन्वयः "समर्थं मन्यसे यच्च कुन्तीपुत्रं वृकोदरं । तस्मिन्यथा हि न मे कृत्स्नं प्रभावं वेत्थ भारत ॥ मत्समो हि गदायुद्धे पृथिव्यां नास्ति भारत । नासीत्कश्चिदतिक्रान्तो भविता वा न कश्चन" इत्यादि भारते दुर्योधनोक्ताहङ्कारप्रतीतेरेवंविधो भूरिमान इत्यर्थः। "नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्" इति श्रुतेः "शमोदमस्तपः शौचं क्षान्त्यार्जवविरक्तता । ज्ञानविज्ञानसन्तोषाः सत्यार्जवेऽपि द्विषड्गुणाः" इति केचित्. "सत्यं दमस्तपः शौचं सन्तोषो ह्रीः क्षमार्जवम् ॥ ज्ञानं शमो दया ध्यानं विप्रस्यैते द्विषड्गुणाः" इति केचित् असम्प्रदायस्यैकत्वादत्र न प्रकृष्टमेतन्मतद्वयमिति ॥ १० ॥

ननु, श्वपचं वरिष्ठमितीदमसम्भावितं वर्णहीनत्वेन तत्कृतसपर्यास्वीकारानुपपत्तेः " नाहं तथाद्मि यजमानहविर्वितानैः " इत्यादावन्यथाकथनाच्चेति तत्राह, नैवेति । अयं प्रभुरविदुषो ज्ञानोपदेशानधिकारिणः पूर्वचीर्णपुण्यनिचयात्तज्ज्ञानेन यथार्थतत्त्वज्ञानिनो वर्णहीनाज्जनान्मानं पूजां वृणीते स्वीकरोति इति यत्तदात्मनोऽर्थे अप्राप्तप्राप्तये नैवेत्यन्वयः । कुत इत्यत उक्तं निजेति निजलाभेन नित्यानन्देन पूर्ण इति हेतुगर्भविशेषणम् " को ह्येवान्यात् " " यो वै भूमा तत्सुखम् " इत्यादि श्रुतेः । ननु, स्वार्थाभावे सपर्यास्वीकारे किङ्कारणमिति तत्राह—करुणइति । करुणवतीति करुणः " देवस्यैष स्वभावो यम् यमेवैष वृणुते " इत्यादि श्रुतेः करुणः स्वगुणभङ्गुरत्वात् कृपया तत्फलप्रदानाय तत्स्वीकारोपचार इति तात्पर्यं विद्वद्भिः क्रियमाणं मानं स्वार्थमपि किन स्यादित्याशङ्क्य विशेषमाह, यद्यदिति । विद्वदविद्वद्भेदमन्तरेण समानो जनः भगवते यद्यन्मानं विदधीत तत्तदात्मने च स्वप्रयोजनायैवेत्युपगन्तव्यम् अत्रदृष्टान्तमाह–प्रतिमुखस्येति । तथाऽलङ्कृतमुखश्रीर्दर्पणादौ प्रतिफलितस्य प्रतिबिम्बलक्षणमुखस्य स्वालंकारमन्तरेण श्रीर्लभ्यते तथा स्वबिम्बभूतपरमात्मनो निर्दोषगुणराशिध्यानलक्षणमानेन तत्प्रतिबिम्बत्वात्स्वस्यापि निर्दोषसुखलक्षणश्रीर्लभ्यत इत्यर्थः अनेन ब्रह्मादिजीवराशिरस्यैतत्तुच्छीभूतइति सूचितं "श्वपचादपि कष्टत्वं ब्रह्मेशानादयः सुराः" इत्यादेः अयं तु नरसिंह आत्मनएव न प्रभुः किन्तु सर्वस्याप्यतोऽखण्डैश्वर्यत्वात् चक्रवर्तीकरमिवाविदुषोजनान्मानं वृणीते अनेन विद्वज्ज्ञानमानाङ्गीकारो व्याख्यातः स्वतः सिद्धत्वात्. ननु, जनपदादर्थादानादिना राज्ञः स्वप्रयोजनोपलब्धिवदीश्वरस्यापि तथा स्यात्किमित्याह, निजेति. ननून्मत्तः किमीश्वरइति तत्राह,करुणइति. कस्यार्थे मानकरणमिति तत्राह, यद्यदिति. कथमिव यथा मुखस्य मुख्यस्य स्वामिनोदाक्षो मानलक्षणा श्रीः प्रतिमुखस्य राजमुखमनुवर्तमानस्य जनपदस्य परोपद्रवराहित्येन धनधान्यादिसमृद्धिलक्षणा श्रीर्भवति तथा हरिविषया क्रियमाणा मानश्रीरनुरक्तजनस्य संसारशृङ्खलान्मोचनलक्षणा श्रीर्भवतीत्यर्थः ॥ वनमालन्दमोजश्चेत्यादेः ननु, हरेर्जन्मादिमत्त्वेन विशेषमाहात्म्यायोगात् देवदत्तवदतोयुक्तं विप्रादीतरजनपरिगृहीतत्वमिति तत्राह–नैवेति. अयं नृसिंहआत्मनोदेहात्प्रभुः प्रभूतउत्पन्नोनैव किन्तु स्तम्भात् दृष्टत्वादिति शेषः अदेहस्य जननायोगात् अजनवतएव विषयसुखानुभवोपपत्तेरतः कथं हरेर्विषयानुभूतिरिति तत्राह निजेति सत्यं परतश्चेत्प्राप्तिर्मा भूत् तथा निजो लाभो यस्य स तथा स्वतःसिद्धानुभवश्च पूर्णोव्याप्तश्च नहि व्याप्तस्य परिच्छिन्नगर्भवासादिकं युज्यते "प्रादेशमात्रं पुरुषम्" इत्यादौ परिच्छेदप्रतीतेरितिचेत् "तस्यान्ते सुषिरं सूक्ष्मम्"

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इति श्रुतेराकाशवदनुपपत्तेरुपाधिकल्पनायामनवस्थादिदोषापत्तेरतः स्वभृत्यभाषितं सत्यं कर्तुं स्वस्य सर्वत्र स्थापितं दर्शयितुमितरत्र आत्मदर्शनमसुरजनमोहार्थमित्यादि ज्ञातव्यं स्वभृत्यभाषितस्य सत्यकरणायेत्येतत्कथमवगतमिति तत्राह—मानमिति. अविदुषः स्वरूपाज्ञानिनोऽस्माज्जनान्मानं वृणीते न केवलमस्माज्जनात्किन्तु सैवंस्मादपि योग्यादित्याशयेनाह—यदीदमिति। शेषं पूर्ववत्. स्वपत्त्योऽपि भक्तपत्र यदीवामाभक्तस्तस्य दुष्टित्वेन दम्भार्थत्वेन विहितपूजाया अस्वीकारादित्यतोवाह, नेति. अयं हरिरात्मवृषोनित्याज्ञानिनोऽसुरजनादात्मनः स्वस्य मानं लोके दम्भाभिप्रायेण कृतपूजां नैव वृणीते अत्युमानर्थं च करोतीत्याह करुणा इति "कृ विक्षेपे" इति धातोः असुरजनानिरसनशीलत्वाद्दन्धं तम एव प्रापयतीत्यर्थः "परा पूर्वेषाम्" इति श्रुतेः तस्मादसुरजनकृतमपर्यामर्थजननीत्याशयेनाह यदीदिति आत्मने अनर्थायेति शेषः यथा मुखश्रीः प्रधानभटयोगश्रीः प्रतिमुखस्यापरस्य प्रतिभटस्यानर्थाय मरणलक्षणाय स्यादिति शेषः ॥ ११ ॥

तस्माद्भक्तिरेव प्रयोजिकेत्याह—तस्मादिति। यस्मादचिन्त्यमहिमत्वात्सर्वात्मनेश्वरस्य स्वरूपं स्तोतुं न शक्नोमि तस्माद्विगतविक्लवो निधूंतचापल्योऽहं यथामनीषं भक्त्या गृणामीत्यन्वयः स्तुतेः फलमाह, लोकइति प्रजया प्रकृत्या नीचगुणविसर्गं संसारमनुप्रविष्टं पुमान्येनानुवर्णितेन गुणापकृीर्तितेन पूयेत शुद्धो भवति हि यस्मात्तेन संसारमोक्षो भवतीत्यर्थः ॥ १२ ॥

यथामनीषं गृणामीत्युक्तं विवृणोति—सर्वइति। अमी वयं ब्रह्मादयश्च सर्वे सत्त्वधामनस्तव निधिकराहि "विष्णोर्नियुक्तिं प्रविशाविधर्मेणि"इति श्रुतेः तत्र विशेषास्ति यथा वयं उद्भिज्जन्तस्तथा ब्रह्मादयोऽपि नोद्भिज्जन्तः प्रधानभक्तत्वात्कुतएतत्कथं निश्चापयतइति तत्राह क्षेमायेति अस्य हरेर्लीलावतारैः विक्रीडितम् अस्य जगतः क्षेमाद्यनेकप्रयोजनाय स्यादिति यद्नेनास्माभिश्च ध्येनेनास्माकमुद्वेगोऽब्रह्मादिरक्षणेन तेषामनुद्वेगश्च ज्ञायतइत्यर्थः ॥१३॥

अथैवंकर्तव्यमित्याह—तद्यच्छेति। अद्य त्वया असुरो हतश्च यस्मात्तस्मान्मथ्नाति कलुषीकरोति ज्ञानमिति मन्युः कोपः इतरेषामेवस्मिन्विधो हरेस्तु क्षेश्वरस्फुरणादिविडम्बनलक्षणादिस्तं यच्छ संहर, प्रसन्नभावं दर्शयेत्यर्थः। मन्युश्च त्वद्विषयं ज्ञानं च यच्छानुगृहाणेत्यर्थः।"मन अवबोधने" इति धातोरिति वा त्वद्विषयं पूजालक्षणं यज्ञमिति वा "मन्युः कोपे क्रतौ युद्धे" इत्यभिधानम्. सज्जनानन्दाकांक्षापि भगवत्प्रसादकरीत्याशयेनाह मोदेतेति वृश्चिकसर्पलक्षणासुरहननेन साधुः सज्जनोऽपि मोदेत साधुरपि मोदेतेति वा योगविभागः, वृश्चिकसर्पलक्षणासुरहत्या निर्वृतिमानन्दमिताः प्राप्ताः सर्वे लोकाः प्रतियान्तु स्वगृहमिति शेषः गत्वा किङ्कुर्वन्तीति तत्राह रूपमिति। हे नृसिंह! जनाः तव नृसिंहाकारं रूपं दुरितनिवृत्तिलक्षणाय विभवाय स्मरन्तीत्यन्वयः साधुरहिंसापरोऽपि वृश्चिकादिहत्या मोदेत किम्पुनः सर्वलोकोपद्रवकृत असुरहत्यातोवाह मोदेतेति हत्यामिति पाठे साधुः शासनस्वभावोदुष्टवृश्चिकादिहत्यां यथा मोदेत तथाहमपि भगवद्द्वेषित्वेन दुष्टत्वात्पितृहत्यां मोद इत्यभिप्रेत्याभोवाह मोदेतेति. नृसिंहेति सम्बोधनं नामकरणाभिप्रायेणेति ज्ञातव्यम् ॥ १४ ॥

पूर्वमज्ञाततत्त्वात्वादिति तव कोपाकुलरूपदर्शनाद्भीत्या लोकस्य स्मरणं न सम्भाव्यतइति चेत्तत्कथमनं कर्तव्यमित्युक्तं तन्मम ज्ञाततत्त्वस्य विषयो न भवति मम भयं संसारचक्रादित्याह, नाहमिति. भयानकस्य ते तव रूपान्नबिभेमीत्यन्वयः कीदृशात् जिह्वे वक्रे अग्नियुक्ते नेत्रे यस्य तत्तथा जिह्वया भ्रुकुट्या रभसी यस्य तत्तथा उग्रे दंष्ट्रे यस्य तत्तथा जिह्वाग्निनेत्रं च जिह्वा भ्रुकुटी रभसं च उग्रदंष्ट्रं च तत्तथा तस्मादान्त्रमेव स्रङ्माला यस्य तत्तथा तस्मात्क्षतजेन रुधिरेण सिक्ताः केसराः यस्य तत्तथा शङ्कुवत्स्थूणवल्लम्बौ कर्णौ यस्य तत्तथा क्षतजकेसरं च शङ्कुकर्णं च तत्तथा तस्मात् निर्ह्रादेन भीता दिग्गिभा दिग्गजा यस्य तत्तथा तस्मात् अरिभिन्नद् नखाग्राणि यस्य तत्तथा तस्मात् अरीन् भिन्दन्तीत्यरिभिन्दि नखानामग्राणि दुःसहं घोरं च संसारचक्रं च यत्तेन सह कदनात् हिंसालक्षणाद्दुःखाद्दुःशासन सत्यकाम, भीतानां अपवर्गं भीतिजनकसंसारनाशनमरणं शरणं समियां यामि ॥ १५—१६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तस्मादेवं दृष्टत्यादेनं निर्णीय इत्याह—मन्य इति। वरणप्रयेण धनाद्यकलत्तत्कृत्याश्रयासफलरूपास्तमपि नाराधनाय न परितोषाय। तर्हि केन तोषः स्यादित्यपेक्षायां दृष्टान्तद्वारेण तद्दर्शयति, भक्त्येति। ब्रह्मादिषु ब्रह्मादिकालिपर्यन्तानां भक्त्येपि तेन तेन तु तेषामपि स परितुष्टो न भवतीति विवक्षयोक्तम् ॥ ९ ॥

ननु, भक्तिव्यतिरिक्ता अपि केचित्ते परिपुष्टयोद्गुणगुणास्त तत्राहतमान आह, विप्रादिति ॥ १० ॥

भक्तास्तु श्रीभगवतोऽपि स्वत एव परमाणीष्टरूपाः भक्तिरेव च भक्तानां सुखरूपेति भक्त्या तुतोषेत्यंतात्कर्षयन् स्वकर्तव्यत्वेन मानेन निगमयितुमाह—नैवात्मन इति। अयं प्रभुरात्मनो मानं पूजां जनात् निजभक्तात् न वृणीते नेच्छति। तत्र हेतुः। निजस्य भक्तस्य लाभेनैव पूर्णः परमसन्तुष्टः। इत्यन्तरं करुणः पूजितत्प्रयासासाग्रसहिष्णुः कथंभूतात् जनात् अविदुषः। पितुरग्रे बालकस्य मन्यार्थं न किञ्चिदपि जानतः यथा स्वस्य अनेकचर्येन दैन्यांशि। यद्वा तदावेशनात्सत किञ्चिदपि न जानत इत्यर्थः। उभयत्र पक्षेऽपि तस्य तद्वत्कारणार्थं हेतुरिति भावः। तर्हि किं जनस्तस्य मानं न कुरुते एवेत्याशङ्क्याह—यद्यदिति। अत्र जनोयत् यं यं मानं भगवते विदधाति समर्पयति स सर्वोऽस्यात्मार्थमेव तत्तत्स्माकमात्रमेव स्वस्मरमानाभिमननात् सुखं मन्यमानस्तस्मात् करोत्येवेत्यर्थः तत्समानताश्रेण समानश्च तदेकजीवनस्य जनस्य युक्त एवेति दृष्टान्तमाह—यथा मुखे या शोभा क्रियते तन्मात्रमेव प्रतिमुखस्य शोभायै भवति नान्यादिति ॥ ११ ॥

निगमयति तस्मादिति ॥ १२ ॥

नन्वेवं ब्रह्माद्याः भक्ता न भवन्ति भवानेव तु भक्त इत्याशङ्क्यासुरकुलजन्मत्वात् दैन्येनात्मानमपि तत्स्वभावत्वेन

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निर्द्दिशन् ब्रह्मादीन् प्रसादविषयीकारयितुं व्यतिरेकदृष्टान्तेन तेषां भक्तत्वमेव द्रढयति—सर्वं इति । नच ननु वयमिवासुरा इवोद्विजन्तः त्वदसमोर्द्ध्ववैभवदर्शनेनोद्वेगमीर्ष्यादिभावं प्राप्नुवन्तो भवन्ति । भवांस्तु सर्वमङ्गलचरित एवेत्याह, क्षेमायेति ॥ १३ ॥

ननु, परमसाधोस्तव हिंसकोयमिति महाप्राणिनोऽप्यस्य मया हननं साधवोऽप्येनत्तत्त्वानभिज्ञा एते ब्रह्ममरीच्यादयो न सहेरन् । अत एवैतेष्वपि प्रसादो न युक्त इत्याशङ्क्याह—मोदेतेति । अहं को वराकः किन्तु वृश्चिकादेरिव सर्वहिंसकस्यास्य हननं साधुजनोऽप्यनुमोदेत किमुतेन इत्यर्थः । किं वक्तव्यं त एव मोदं लब्धा इति । यतो लोकाश्चेति अतो विश्वसुखदत्वात् साध्वेवानुष्ठितमिति । प्रसादस्यावसरोयं ननु मन्योरिति भावः । किञ्च । रूपमिति ॥ १४—१५ ॥

दुस्सहेति तदूग्रहिमुखनामयत्वादिति भावः । तत्रापि प्रसन्नां त्वद्भक्तेः सर्वाङ्गलानामसुराणां मध्ये ततो हे उशत्तम ! न तवाङ्घ्रिमूलं चरणारविन्दयोः नित्याधिष्ठानं श्रीवैकुण्ठंप्रति कदाचुद्भयसे ॥ १६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नच बहुधन प्रदानादिभिस्त्वं तुष्यसीत्याह—मन्य इति । अभिजनं सत्कुले जन्म ओज इन्द्रियनैपुण्यं तेजः कान्तिः प्रभावः प्रतापः पौरुषमुद्यमः योगोऽष्टाङ्गः कर्मयोगो ज्ञानयोगश्च नाराधनाय न सन्तोषणाय तर्हि केनाहं सन्तुष्यामीत्यत आह भक्त्येति तुतोषेति भूतनिर्द्देशेन नात्र काप्यन्या युक्तिरन्वेष्टव्या किन्तु भवतस्स्वभाव एवायं भक्तेर्वा काप्यद्भुता शक्तिरिति द्योतते । तेन च त्वत्सन्तोषान्यथानुपपत्त्या मय्यपि श्रीनारदकृपाद्भूतो भक्तिगन्धो वर्त्तत इति व्यञ्जनम् ॥ ९ ॥

किमन्यद्वक्तव्यं भक्त्यभावसद्भावाभ्यामेवं विविच्यत इत्याह, भक्तिहीनात् विप्रादपि श्वपचं वरिष्ठं मन्ये किमुत क्षत्रियादिभ्यः तत्रापि द्विषट् पूर्वोक्ताधनादयो द्वादशगुणास्तैर्युक्तात् किमुत समाष्टत्रिचतुरादि गुणयुक्तात् किमुततरां तत्तद्गुणहीनात् तत्रापि वरिष्ठमतिशयेनाधिकमेव सनत्सुजातोक्ता द्वादश वा गुणा द्रष्टव्याः तदुक्तं "ज्ञानञ्च सत्यञ्च दमः श्रुतञ्च ह्यमात्सर्यं ह्रीस्तितिक्षानसूया । यज्ञश्च दानञ्च धृतिः शमश्च महाव्रता द्वादश ब्राह्मणस्य" इति अरविन्देति तेन ज्ञानयोगादि सत्त्वे विप्रो भगवद्विमुखोनोच्यते इति मतं परास्तं श्वपचं कीदृशं तस्मिन्नरविन्दनाभे अर्पिता मन आदयो येन तम् ईहितं कर्म अर्थोधनं विप्राद्वरिष्ठत्वे हेतुः स श्वपचः कुलं स्वीयं सर्वमेव पुनाति भूरिमानो लोकप्यादरो यस्य तथाभूतोपि सतु विप्रः आत्मानमपि न पुनाति कुतः कुलमिति भावः । भक्तिहीनस्यैते गुणाः गर्वायैव भवन्ति नतु शुद्धये इति श्रीस्वामिचरणाः ॥ १० ॥

ननु, तर्हि श्रवणकीर्त्तनार्हणादिभिर्मत्सम्मानं हि भक्तिस्तयैव तुष्यामि ननु तपःश्रुतादिभिः पुंनिष्ठैर्गुणैरिति चेन्मम स्वार्थपरत्वं प्रसक्तं तत्र नहि नहीत्याह—नैवेति । अयं प्रभुरीश्वरो भवान् आत्मनः स्वस्य मानं संमाननं जनात् जनमात्रात् न वृणीते कीदृशात् अविदुषः तदपेक्षया ब्रह्मादिस्तम्बपर्य्यन्तः सर्व एव जनो ह्यविद्वानेवेत्यर्थः । नहि शास्त्रादिविद्याज्ञानशून्यजनकृतं सम्माननं मत्तः कश्चिद्वृणातीति मानाग्रहणे जननिष्ठोऽज्ञानलक्षणो धर्मोहेतुरुक्तः तत्र त्वन्निष्ठो धर्मोऽपि हेतुरस्तीत्याह निजलाभेन पूर्णः किन्तु करुणः कृपालुः सन् वृणीते च यत् कृतश्चिद्वृणीते इति दृश्यते तत्तमनुग्रहीतुमेवेति मानग्रहणेपि करुणत्वलक्षणस्त्वन्निष्ठो धर्म एवहेतुरस्तीति भावः । न च प्राकृतजनदत्तेन मानेन तव कश्चिदुत्कर्षो भवेदपितु मानप्रदातुरेवेत्याह यद्यत् यं यं मानं पूजां भगवते विद्धीत कुर्यात् तत्संमानः आत्मने स्वस्मै स्वोत्कर्षायैव भवेत् यथा मुखश्रीः मुखेकृता तिलकादिशोभा प्रतिमुखस्य प्रतिबिम्बस्य भवेत् नतु प्रतिबिम्बे कृता प्रतिबिम्बस्येत्यर्थः ॥ ११ ॥

यस्मादेवं भवान् भक्त्यैव तुष्यति ननु जन्मज्ञात्यादिभिः यस्माच्च त्वत्संमाननं स्वस्यात्मने एव फलति तस्मादहं नीचोपि महि महिमानं गृणामि स्तौमि येन त्वन्महिम्ना अनुवर्णितेन गुणविसर्गं संसारव्याधिमनुप्रविष्टो जनः पूयेत तस्मान्मुच्यते इत्यर्थः ॥ १२ ॥

वयमसुरा एवास्मिन् जगत्यभक्ता मन्दभाग्याः अन्येतु सर्वे तव भक्ता भूरिभागा एवेत्याह सर्वेविधिकरास्त्वन्नियोगकर्त्तारो दासा एव नच वयमसुरा इव वैरभाववत्त्वादुद्विजन्तः त्वत्तो भीता अतोऽस्य स्वभक्तरूपस्य विश्वस्य क्षेमाय भूतये संपत्त्यैच उत आत्मनः स्वस्यच सुखार्थं तवेदमसुरवधादिविक्रीडितं भवेत् ॥ १३ ॥

यस्माद्विश्वस्य क्षेमाद्यभूत् तस्मान्मन्युं क्रोधं दूरीकुरु ननु परदुःखेन सुखित्वात् कथमस्य विश्वस्य साधुत्वं तत्राह साधुरपि परोद्वेजकवृश्चिकसर्पादीनां हत्या हिंसयाऽन्यकृतया मोदेतेति विधेर्नासाधुत्वमित्यर्थः । प्रतियन्ति तव दुष्टनिग्रहशिष्टपालन कर्त्तृत्वे प्रतीतिं प्राप्नुवन्ति न चातःपरं लोकाद्दशावतारापेक्षापीत्याह हे नृसिंह ! तव रूपमेवेदं नि शाय भायाभावाय स्मरन्ति तवै तद्रूपस्मरणेनैवातःपरं भीताः असुरा नंक्ष्यन्तीतिभावः ॥ १४ ॥

असुरजातित्वेप्यन्येषामसुराणामिव त्वत्तो न मे भयमित्याह नाहमिति । ते अस्माद्रूपादहं न बिभेमि कीदृशात् अतिभयानकं आस्यं जिह्वा अर्कतुल्यनेत्राणि भ्रुकुट्यारभस आटोपः उग्रा दंष्ट्रा च यत्र तस्मात् अन्त्रमय्यः स्रजो यत्र तदान्त्रस्रक् तस्मात् क्षतजाक्ता केसरा यस्मिन् शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिन् तच्च तस्मात् निर्ह्रादेन भीता दिगिभा यस्मात् अरीन् भिन्दन्तीत्यरिभिन्दि तानि नखाग्राणि यस्मिन् तस्मात् ॥ १५ ॥

किन्तु त्वद्वैमुख्यप्रदायकदुःसङ्गाद्विभ्य एव भीतोस्मीत्याह त्रस्तोस्मीति । दुस्सहं यत्र्वान्धिनादा द्वेषादिमयत्वादुग्रं संसारचक्रकदनं तस्मादेव त्रस्तोस्मि ननु साधारणसंसारादिति प्रह्लादा-

अभि ... वंशीधरकृतभावार्थदीपिका ।

भिप्रायो व्याख्येयः "नैवोद्विजे परदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः" इत्यभिमतमुक्तेः यतः प्रसन्तां त्वद्भक्तं मां भक्षितुमिवेच्छतामसुराणां मध्ये प्रणीतो निक्षिप्तः ननु त्वं किं मया निक्षिप्तस्तत्र नहि नहीत्याह बद्धः सन् स्वकर्मभिरेव तस्मात् कदा नु प्रीतस्सन् अपवर्गभूतं भवतां तथाङ्घ्रिकमलं प्रति इदं पादसंवाहनार्थं मामाह्वयसि ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च धनादिभिरपि भगवान्न तुष्यति किन्तु भक्त्या तुष्यतीत्याह, मन्ये इति । धनादयः परस्याराधनाय न भवन्ति यतस्तत्रहिताय गजयूथपाय भगवान् भक्त्यैव तुतोष अभिजनः सत्कुले उद्भवः रूपं सौन्दर्यम् तपः कृच्छ्रादि श्रुतं शास्त्रश्रवणम् ओजः इन्द्रियापाटवम् तेजः प्रकाशः प्रभावः प्रभुत्वम् बलं देवान्तरोपासनादिजम् पौरुषं कार्यक्षमत्वम् बुद्धिरर्थधारणशक्तिः किंबहुना भक्तिविरुद्धाः युज्यन्ते इति योगाः सर्वे उपाया इत्यर्थः ॥ ९ ॥

अथ हरिभक्तप्रशंसार्थं तद्बहिर्मुखनिन्दार्थञ्च सर्वेभ्योऽधमस्यापि श्वपचस्य हरिभक्तत्वे सति सर्वश्रेष्ठत्वं सर्वेभ्यः श्रेष्ठस्यापि विप्रस्य हरिविमुखत्वे सति सर्वेभ्योऽधमत्वञ्चाह, विप्रादिति । अरविन्दनाभपादारविन्दविमुखात्तु पूर्वोक्तधनादिद्विषड्गुणयुतात् यद्वा "धर्मश्च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया । यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्य ॥" इत्युद्योगपर्वणि धृतराष्ट्रं प्रति सनत्सुजातोक्तद्वादशगुणयुक्तादपि तदर्पितमनोवचनेहितार्थं तस्मिन्नरविन्दनाभे अर्पिताः मनआदयो येन तं श्वपचमपि वरिष्ठं मन्ये यतः स उक्तलक्षणः श्वपचः प्राणं प्राणोपलक्षितमात्मानं सकुलं पुनाति, न तु भूरिमानः उक्तद्विषड्गुणाभिमानी हरिपादारविन्दविमुखो विप्रः कुलमात्मानं च पुनाति ॥ १० ॥

मनोवचनाद्यर्पणादिना पूजां स्वानन्यभक्तहितायैव भगवान् स्वीकरोति नत्वन्यथेत्याह, निजलाभपूर्णः "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति स्वाभाविकेन निजानन्दलाभेनैव पूर्णः अविदुषः "द्वा सुपर्णा सयुजा सखाया" इति श्रुतिप्रोक्तस्वाभिन्नजीवात् स्वानन्योपासकादित्यर्थः । मानं पूजां करुणः कृपालुः आत्मनः सुखार्थं न वृणीते नेच्छति किन्तु यद्यन्मानं पूजां जन उपासको भगवते विदधीत कुर्यात्तत् आत्मने स्वस्यैव स्यात् यथा मुखश्रीः मुखे मुख्यः शोभादिः तदर्पिता प्रतिमुखेनाऽऽमात्यादिना श्रीः धनविद्याविनयादिरूपा लक्ष्मीः प्रतिमुखस्यामात्यादेरेव सुखदा भवति तद्वदित्यर्थः । यद्वा आश्रयगतं वस्तु आश्रितेऽपि गच्छतीति दृष्टान्तेनाह मुखे स्थिता श्रीः प्रतिमुखस्य दर्पणादिस्थस्यापि भवतीत्यर्थः । अनेन दृष्टान्तेन जीवो भगवदंशभूतः स्वरूपतोऽपि स्वायत्तस्थितिप्रवृत्तिमान्न भवति यदा तदा केन पदार्थेन भगवत उपकारं कुर्यादिति द्योतितम् अनेन दृष्टान्तेन ब्रह्मप्रतिबिम्बो जीव इति शङ्का न कार्या व्यापकस्य प्रतिबिम्बासम्भवात् न चाकाशस्य जले प्रतिबिम्बो दृश्यते इति वाच्यम् आकाशगतस्य परिच्छिन्नस्य मेघादिद्रव्यस्य तथा द्रव्यमात्रत्वात् विस्तरस्तु अध्यासगिरिवज्रादौ द्रष्टव्यः ॥ ११ ॥

यस्माद्भगवान् भक्त्यैव तुष्यति तस्मात् अहं नीचोऽसुरजोऽपि विगतविक्लवो निःशङ्कः ईश्वरस्य महि महिमानं यथामति यथामति सर्वात्मना सम्पूर्णेन मनसा गृणामि वर्णयामि येन महिम्नाऽनुवर्णितेन अजया प्रकृत्या गुणविसर्गं संसारमनुप्रविष्टः पुमान् पूयेत शुद्धो भवेत ॥ १२ ॥

ब्रह्मादिषु कृपावलोकनं कुरु मन्युं कोपं संहरेति प्रार्थयन्, सर्वे इति द्वाभ्याम् । हे ईश ! सत्त्वधाम्नः प्रकृतिसम्बन्धवर्जितं स्वाभाविकं यत्सत्त्वं गुणविशेषस्तदाश्रयस्येत्यर्थः । अमी ब्रह्मादयः उद्विजन्तः बिभ्यतः, भवदीयगौरवयन्त्रिता इत्यर्थः । न च वयमिवाधुनैव त्वां शरणं गताः किन्तु प्राञ्चः कृपावलोकार्हा इति फलितोऽर्थः । किञ्च तव रुचिरैरवतारैः विविधं क्रीडितं सदसदधिकारिजनस्य क्षेमाय रक्षणाय भूतये ऐश्वर्याय आत्मसुखाय मोक्षाय च न तु भयोत्पादनाय ॥ १३ ॥

तस्मात् हे नृसिंह ! मन्युं निजक्रोधं संहर यदर्थोऽयं मन्युः सोऽसुरस्त्वया अद्य हतः यथा वृश्चिकसर्पहत्या परोद्वेजकस्य वृश्चिकस्य सर्पस्य च वधेन साधुरहिंसकोऽपि जनो मोदेत एकवधेन बहूनां भयनिवृत्तेः तथा असुरवधेन लोका निर्वृतिं सुखमिताः प्राप्ताः सन्तः प्रतियन्ति भयनुत्प्रसादं प्रतीक्षन्ते जना मुमुक्षवः तवैतद्रूपं अभयाय मोक्षाय स्मरन्ति ॥ १४ ॥

किन्त्वमस्माद्रूपाद्बिभेषि ? नेत्याह—नाहमिति । हे अजित ! अतिभयानकमास्यं च जिह्वाग्रमर्कवन्नेत्रं च भ्रुकुटीरभसश्च उग्रा दंष्ट्राश्च यस्मिन् तस्मात् आन्त्रस्रजः क्षतजा रुधिराक्ताः केसराः शङ्कुवत्कर्णौ च यस्मिन्निर्ह्रादेन भीता दिग्गजा यस्मात् अरीन् भिन्दन्तीति अरिभिन्दीनि नखाग्राणि यस्मिन् तस्माच्च रूपादहं न बिभेमि रूपादित्यध्याहारः ॥ १५ ॥

तर्हि कुतस्तव भयमित्यत्राह, हे कृपणवत्सल ! दुःसहमुग्रं संसारचक्रं कदनं दुःखं तस्मादहं त्रस्तोऽस्मि प्रसन्तां आशापरमात्मस्मृतिप्रतिबन्धिनामिन्द्रियाणां अन्योन्यघातिनां बद्धजीवानां वा मध्ये स्वकर्मभिर्बद्धः "बन्धको भवपाशेन भवपाशाच्च मोचकः" इति स्मृतेस्त्वयैव प्रणीतो निक्षिप्तोऽस्मि हे उरुक्रम ! अपवर्गं शरणं मोक्षाश्रयं ते अङ्घ्रिमूलं प्रति प्रीतः सन्मां कदा हृदयसे आह्वयसि ॥ १६ ॥

भाषा टीका ।

परन्तु मैं जानता हूं किन्तु अच्छे कुलमें जन्म रूप तप पाण्डित्य और तेज प्रभाव बल पौरुष बुद्धि इत्यादि सब भी परम पुरुष श्रीगोविन्द की प्रसन्नता के हेतु नहीं हो सकते हैं क्योंकि गजेन्द्र के ऊपर भगवान् केवल भक्ति मात्र से प्रसन्न हुए ॥ ९ ॥

यस्मात्प्रियाप्रियवियोगसयोगजन्मशोकाऽग्निना सकलयोनिषु दह्यमानः।
दुःखौषधं तदपि दुःखमतद्धियाऽहं भूमन्! भ्रमामि वद मे तव दास्ययोगम् ॥ १७ ॥
सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह! विरिञ्चिगीताः।
अञ्जस्तितर्म्यनुगृणन्गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससङ्गः ॥ १८ ॥
बालस्य नेह शरणं पितरौ नृसिंह! नार्तस्य चागदमुदन्वति मज्जतो नौः।
तप्तस्य तत्प्रतिविधिर्य इहाञ्जसेष्टस्तावद्विभो! तनुभृतां त्वदुपेक्षितानाम् ॥ १९ ॥
यस्मिन्यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा।
भावः करोति विकरोति पृथक्स्वभावः सञ्चोदितस्तदखिलं भवतः स्वरूपम् ॥ २० ॥

भाषा टीका।

पद्मनाभ श्रीहरि के पादारविन्द से विमुख द्वादश गुण विशिष्ट ब्राह्मण से मैं श्वपच (चांडाल) को श्रेष्ठ मानता हुं वह चांडाल कैसा हो कि श्रीहरि में अर्पण किया है मन वाणी चेष्टा अर्थ (द्रव्यादि) प्राण पर्यन्त जिसने, वह चांडाल कुल को पवित्र करता है, और अभक्त, गर्व वाला ब्राह्मण अपने आत्मा को भी पवित्र नहीं कर सक्ता है ॥ १० ॥

और हमारे प्रभु श्रीहरि तो निज लाभसों पूर्ण हैं दयालु हैं अत एव अज्ञजन से मान की इच्छा नहीं करते परंच यह जन जो कुछ श्रीहरिके अर्थ मान (पूजोप हारादि) करता है वह अपने ही लिये होता है जैसे साक्षात् मुख का अलंकार प्रतिबिंब में होता है ॥ ११ ॥

तस्मात् सर्व प्रकार से विगत शंका वाला मैं भी यथा मति ईश्वर के महिमा को वर्णन करता हुं यद्यपि मैं माया के गुणों से रचित संसार में प्रविष्ट और नीच असुर जाति हूं तौभी गुण वर्णन से पवित्र हो जाऊंगा क्योंकि ? जिसके गुण वर्णन करने से पुरुष पवित्र होजाता है ॥ १२ ॥

हे ईश! ये सब ब्रह्मादिक सत्त्व धामा आप के किङ्कर हैं. और सब आप से डरते हैं, और हमारे असुर लोगों के सदृश वैर भाव से भक्त नहीं किन्तु श्रद्धापूर्वक हैं, और आपके रुचिरावतार धारण करके जो विक्रीडित है वह इस जगत के क्षेम और वृद्धि के अर्थ हैं तथा आत्म सुख के लिये भी हैं ॥ १३ ॥

तस्मात् कोप को शांत कीजिये और इस असुर को आपने अच्छा मारा क्योंकि साधु जन भी वृश्चिक (विच्छू) सर्प की हिंसा से सुख ही पाते हैं और संपूर्ण लोक भी सुखित होकर आप के क्रोध शांति की प्रतीक्षा कर रहे हैं हे नृसिंह! और आप के इस रूप को मनुष्य भय निवृत्ति के लिये स्मरण करते हैं ॥ १४ ॥

हे अजित! अत्यंत भयानक मुख, जिह्वा, और सूर्य सदृश नेत्र, और भृकुटियों का आटोप और उग्रडाढे जिसमें, और आंतों की माला, रुधिर की केसर, शङ्कु सदृश कर्ण जिसमें, शब्दा से डरे है दिग्गज जिसके, वैरी का भेदन करने वाले नखाग्र हैं जिसमें ऐसे आप के इस रूप से मैं नही डरता हूं ॥ १५ ॥

किन्तु हे कृपावत्सल! इस संसार के दुसह दुःख से मैं बड़ा दुःखी हूं क्योंकि ? अपने कर्मों के बंधन में बँधा हुआ मैं इन हिंसक जीवों में पड़ा हूं अत एव संसार के दुःखों से डरता हूं हे अति कमनीय! मेरे ऊपर प्रसन्न हो मोक्ष के गृह रूप आप के चरणारविन्दों में कब बुलाओगे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

दास्ये सति मत्प्रार्थितिरिति चेत्तर्हि नानायोनिषु क्लिश्यमानस्य मम दास्यज्ञानाभावात्त्वमेव तदुपदिशेति प्रार्थयते, यस्मात्प्रियैरप्रियैश्च यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोऽस्मि दुःखस्य प्रतीकारः कार्य इति चेत्तत्राऽऽह दुःखस्यौषधं प्रतीकारस्तदपि दुःखमेव एवमप्यतद्धिया देहाद्यभिमानेन भ्रमामि अतो हे भूमन्विभो! मे तव दास्यरूपं योगं निस्तारोपायं वद ॥ १७ ॥

ननु, दास्ययोगेन प्रवृत्तस्यापि मध्ये अन्तरायभूतानां पूर्वोक्तनानादुःखानां कुतः परिहारस्तत्राह—सोऽहं त्वद्दासः सन् भो नृसिंह! तव लीलाकथा अनुगृणन्दुर्गाणि महादुःखान्यञ्जसा नितरां तरामि तरणाभिष्यामीत्यर्थः। तत्र हेतुः गुणै रागादिभिर्विशेषेण प्रमुक्तः सन् तत्कुतः ते पदयुगमेवालयो येषां भक्तानां तएव हंसाः ज्ञानिनस्तैः सङ्गो यस्य मम सोऽहम् कथंभूतस्य कथास्तत्राऽऽह प्रियस्येत्यादि कुतो ज्ञाताः विरिञ्चेन गीतास्तत्सम्प्रदायप्रवृत्ताः तथाचाथर्वणी श्रुतिः"देवाह वै प्रजापतिमब्रुवन्" इत्यादि दास्ये प्रवृत्तस्य भवदनुग्रहेण सत्सङ्गस्ततो वीतरागतया भगवद्गुणानुवर्णनं ततश्च न दुःखाभिभवः स्यादिति वाक्यार्थः ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ननु, दुःखे तत्तत्तस्यैतत्प्रतीकारो लोके प्रसिद्ध एव किं महदास्थया इति, तत्राऽऽह—बालस्येति। भो नृसिंह! तनुभृतां तत्प्रतिविधिर्दुःखप्रतीकार इह लोके योऽञ्जसेष्टः स त्वयोपेक्षितानां तावदेव क्षणमात्रमेव नत्वात्यन्तिकः तदेवाऽऽह बालस्य पितरौ शरणं रक्षकाविह न भवतः ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्शनात् कचिद्रोगिनामिषु ताभ्यामेव तद्वधदर्शनाच्च, न चार्तस्य रोगिणोऽगदमौषधं शरणम् कृतेऽप्यौषधे मृत्युदर्शनात् न चोदन्वति समुद्रे मज्जतः पुंसो नौः शरणं तया सह मज्जनदर्शनात् अनन्यत्वमत्र शरणमित्यर्थः। अथवैवं काका व्याख्येयं तनुभृत्तत्प्रतिविधिर्य इह तावत्प्रसिद्धः स त्वदुपेक्षितानां किमञ्जसेष्टोऽपितु नेष्ट एव यद्वा यस्तावदिह प्रतिविधिरिष्टः स किमञ्जसा नैवाञ्जसेत्यादि योज्यम् बालस्येत्यादि पूर्ववदेव ॥ १९ ॥

ननु, कचित्कुतश्चित्केनचित्कदाचित्कश्चिद्रक्षकोऽपि दृश्यत एवेत्याशङ्क्य तत्रापि तत्तद्रूपेण त्वमेव रक्षक इत्यङ्गीकृत्य तदेव सर्वात्मतामाह—यस्मिन्निति। परोऽवरोऽवीनः पित्रादिः परो ब्रह्मादिर्वा भावः कर्ता तत्कारकैर्यत्करोति तत्सर्वं भवानेव स्वरूपं नतु पृथक् यस्मिन्नधिकरणे यतो निमित्तात् यर्हि यस्मिन्काले येन करणेन येन हेतुकर्त्रा प्रयोजितश्च यस्य सम्बन्धि यस्मादपादानाद्यस्मै सम्प्रदानाय यदीप्सिततमं यः कर्तेत्यर्थं मत्वाविभक्त्यर्थाः यथा येन प्रकारेणेति क्रियाविशेषणभूतानामव्ययानामर्थः पृथक्त्वभावः सत्त्वादिप्रकृतिः करोत्युत्पादयति विकरोति रूपान्तरं नयतीति ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ननु, भयं चेत्तद्दुःखदर्शनजं किन्तत्संसारचक्रे दुःखमित्यपेक्षायां तद्दर्शयन्नात्मानं विशिनष्टि—तस्मादित्यर्द्धेन। येन कर्मणाऽहं बद्धः तस्मात्कर्मणो निमित्तात्प्रियैरप्रियैश्च विषयैर्यथासंख्यं वियोगसंयोगौ ताभ्यां जन्म उत्पत्तिर्यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोऽतीव दुःखितोऽहमित्यर्थः भ्रमामीत्यन्वयः नहि दुःखनिमित्तकर्मनिवृत्त्युपायमनुतिष्ठत्यपेक्षायामन्तरेण भवद्दास्यमन्यान्निःशेषदुःखनिवृत्त्युपायः नूनं नास्त्येव कथंचित्सदपि दुःखात्मकमेवेत्याह दुःखौषधमिति यद्दुःखस्यौषधं प्रतीकारात्मकं तदपि दुःखं दुःखात्मकमित्यर्थः दुःखस्य प्रतीकारो हि दुःखनिमित्तदुरितनिरसनेन भवति निःशेषदुरितनाशसंभवश्च न किंचिदन्यदस्ति प्रतिपदोक्तप्रायश्चित्तादिकं न निःशेषदुरितनिवर्तकं परन्तु दुःखात्मकं चेत्यर्थः अतो हे भूमन् सर्वाङ्गिनाथ तज्ज्ञानहिताय न भवति तत्क्रियाहमिति पाठे अहं कदाचिदपि नेत्र भ्रमामि अतस्तव दास्ययोगं दिश तव नित्यदास्यमस्मभ्यं देहि वदेति पाठे उपदिश नित्यप्रवृत्तत्त्वद्दास्यसंबन्धवान्यथा भवेयं तथा मामनुगृहाणेत्यर्थः ॥ १७ ॥

एवं कोपोपशान्तः प्रार्थितः भगवद्दास्यमेव दुःखौषधमिति चोक्तम् "पूर्वेण येन हि पुमाननुवर्तितेन" इति भगवद्दास्येन निःशेषदुःखनिवृत्तिफलकमित्युक्तम् अथ त्वदनुग्रहेण प्रवृत्तनित्यभवद्दास्यसम्बन्धोऽहं यथामति त्वां स्तुवन् दुःखनिमित्तकर्मभिर्विमुक्तः सर्वाणि दुःखानि यथा तरेयं तथा अनुगृहाणेत्याह—सोऽहमिति। सोऽहं त्वदनुग्रहेण प्रवृत्तनित्यभवद्दास्यसंबन्धोऽहं सुहृदो हितैषिणः प्रियस्य मम निरतिशयप्रीतिविषयस्य परदेवतायास्तव ब्रह्मादिभिर्गीताः लीलारूपव्यापारविषयाः कथाः अनुगृणन् गुणविप्रयुक्तः सत्त्वादिगुणमूलककर्मबन्धैः रागादिभिर्वा विमुक्तः ते तव पदयुगलमेवाश्रयमाश्रयो येषां ते भक्तास्त एव हंसाः परिशुद्धा जनास्तैः सङ्गो यस्य तादृशः अञ्जसैव नामि सुखेन तितर्मि अतितरामि तथानुगृहाणेत्यभिप्रायः अयमर्थः क्रमः तावत्त्वदनुग्रहेण सत्सङ्गस्ततो भगवद्गुणानुवर्णनं ततो निरासः तत्त्वज्ञानतो दुःखनिमित्तकर्मक्षयद्वारा संसृतेस्तरणमिति ॥ १८ ॥

एतत्सर्वं त्वदनुग्रहेणैव भाव्यम् अनुपायान्तरेणेति कैमुत्यन्यायेन वक्तुं तावत्त्वदुपेक्षितानां न दुःखप्रतिक्रियाक्लेशाह—बालस्येति! हे नृसिंह! इह लोके बालस्य त्वदुपेक्षितस्य पितरौ मातापितरौ न शरणं न रक्षकौ एवमार्तस्य रोगपीडितस्य त्वदुपेक्षितस्यागदमौषधं न शरणं तथोदन्वति स्वमृते मज्जतस्त्वदुपेक्षितस्य नौर्न शरणं पित्रादिषु सत्स्वपि बालादीनां विनाशदर्शनादिति भावः। अतो हे विभो नृसिंह! इह लोके तनुभृतः दुःखितस्य तत्प्रतिविधिस्तापप्रतीकारोपायः तावत्प्रसिद्धः स त्वदुपेक्षितानां स्वामनभिमतानां तनुभृतां शरीरिणां पोषणपराणां किमञ्जसेष्टः अपितु नेष्ट एव बालादिदुःखोपशमने एव पित्रादयो न प्रभवः किंपुनर्निःशेषदुःखोपशमने न प्रभवन्त्यतस्त्वदनुग्रहेणैव निःशेषं दुःखात्मकसंसृतिनिवृत्तिरिति संसृतिचक्रादुत्तारकस्त्वमेवेति भावः ॥ १९ ॥

यतस्त्वमेवभूतोऽतः संसृतिचक्रपतितं त्वत्प्रपन्नं मामुत्तारयेति विज्ञापयिष्यन् त्वत्प्रपत्तिमन्तरेण न कोऽप्यस्मात् तारयितुं प्रभुरिति वक्तुं तावदाचार्यादिमुखेन कस्मिन्नपि त्वदङ्गणगतं त्वत्कारितमेव यतस्तत्तत्क्रियाश्रयकर्मादिकारकपदकमनस्याभिव्यक्तिकत्वेन च कालशरीरकत्वेन च त्वमेवाभिधीयत इत्याह—यस्मिन्निति। यस्मिन्नित्यधिकरणकारकनिर्देशः यत इति हेतुत्वशक्त्याश्रयं निर्दिश्यते यर्हीत्यनेन कालः येनेति करणत्वशक्त्याश्रयं शक्त्याश्रयं यस्येति सम्बन्धी यस्मादित्यपादानत्वशक्त्याश्रयं यस्मै इति संप्रदानत्वशक्त्याश्रयं यथेत्यनेनोक्ताधिकरणादिनः प्रकारः यदिति कर्मत्वशक्त्याश्रयं उताऽपरश्च य इत्यनेन प्रयोजककर्त्ता सञ्ज्ञादिति इत्यनेन प्रयोज्यकर्त्ता तात्पर्यतः परश्च यद्वा पर उत्कृष्टः अपरोऽवरः भावः पदार्थः सप्रकारकारकपदार्थरूपः सत्त्वाभिरूपः कालरूपश्च यो यः पदार्थः पृथक्त्वभावप्रतीयमानः सत्त्वाभिरूपः कर्तृकर्मादिनात्मक्रियाश्रयस्वभावो यस्य सः पृथक्त्वभावः कर्तृकर्मादिना तत्तत्क्रियाश्रयत्वं स्वतन्त्रकरणत्वद्रव्यगणपरि... [illegible] ... मति सव्यापारनिर्व्यापारनिष्ठत्वं हेतुत्वं धातूपात्तव्यापारजन्यफलाभावेन सव्यापारनिर्व्यापारश्रयत्वं करणत्वं सम्बन्धमात्राश्रयत्वं सम्बन्धित्वं हितपूर्वव्यापाराश्रयत्वं करणत्वं सम्बन्धमात्राश्रयत्वं सम्बन्धित्वम् प्रकृतधातूपात्तव्यापाराणामिष्टत्वं भाति तज्जन्यविभागाश्रयत्वमपादानत्वं दानस्य कर्मणा क्रियया वा सम्बध्यमानत्वं सम्प्रदानत्वं धातूपात्तव्यापाराधिकरणजन्यफलाश्रयत्वं कर्तृत्वं प्रकृतधातूपात्तव्यापारानुकूलव्यापाराश्रयत्वं प्रयोजककर्तृत्वं धातूपात्त-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

व्यापाराश्रयत्वं कर्तृत्वमित्येवं सप्तविभक्त्यर्थानां प्रवर्तकस्वभावः कालस्यत्वात्मव्यतिरिक्तपरिच्छेदकत्वं स्वभावः एवं पृथक्स्वभावः उच्चावचं रूपः करोति उत्पादयति विकरोति विनाशयति उत्पाद्नाश्रयो विनाशनाश्रयोवा भवति तदखिलं कारकषट्कादिरूपं वस्तु भवतः स्वाभाविकं रूपं शरीरमित्यर्थः एवंच सर्वभावान्तरात्मतया तच्छरीरकतयावस्थितस्य तवैव सर्वे निग्रहानुग्रहादयः संहारकव्यापारा इतिभावः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवादियोनौ सुखसम्भवात्तस्मात्संसाराच्चक्रात्कथं बिभेषीति तत्राह—यस्मादिति । देवादिसकलयोनिषु प्रियस्य वियोगोऽप्रियस्य संयोगः तयोर्जन्म यस्य स तथा स च शोकाग्निस्तेन प्रियादिवियोगादिना जन्मना च यः शोकाग्निस्तेन वा दह्यमानोऽहं यत् दुःखपरिहारलक्षणं कर्म तदपि दुःखरूपमिति मत्वा मतिहीनतया नत्वाहं नत्वारितया दुःखपरिहारौषधाज्ञानेन भ्रमामि कुत्रगतेन केनौषधेन वा मे सुखं स्यादित्यनवस्थिति प्राप्तोऽस्मीति यस्मात्तस्मादिदमेव संसारनाशनमिति मत्वा भवन्तं प्रार्थये किं तदाह यदेति तव दास्यलक्षणं योगमौषधं यदानुगृहाणेत्यन्वयः ॥ १७ ॥

मदुपासनाद्युपायमन्तरेण दास्यमात्रेण तव किं स्यादित्याशङ्क्य बहुप्रयत्नसाध्यामुपासनामन्तरेणापायोऽस्तीत्याह । सोऽहमिति । गुणमयसंसाराद्विप्रमुक्तः पादयुगलमेवालयमाश्रयो येषां ते तथा ते च हंसाः निःसङ्गाः परमहंसास्तेषां सङ्गः सेवालक्षणो यस्य स तथा दुर्गाणि कलत्रादीनि नरकाणि वा ॥ १८ ॥

नृसिंह आर्तस्येत्यनेन सन्ध्यकरणेन दृष्टान्तदार्ष्टान्तिकयोर्मद्वैलक्षण्यमस्तीति ज्ञापनायाज्ञानजनबुद्धयवनाशाय चेति ज्ञातव्यं निदाघनष्टस्य जलादिना तर्पणादिविधिराप्यायनलक्षणपरिहारः ज्वराद्यभिभूतस्य ज्वरादिपरिहारप्रकारोयत् इष्टः इष्टसाधनञ्च ॥ १९ ॥

ब्रह्माद्यन्यतमदृष्टः किं न स्यादित्याशङ्क्य कर्तृत्वाद्यभिमतस्य ब्रह्मादेः सत्तायामपि यदा यदधीनत्वं प्रमाणिकं तदा सर्वस्मादुत्तरत्वं किं वक्तव्यमितिभावेनाह—यस्मिन्निति । अपरः कालादिर्वः परो ब्रह्मादिर्वा यस्मिन्नधिष्ठाने स्थित्वा यतोमृदादेर्यर्हि यस्मिन्काले येन चक्रसलिलादिना यस्याद्दृष्टादेः सहायेन यस्मै जलाहरणाद्यर्थं यथाविधिना । यं भावं घटादिपदार्थं करोति विकरोति सामान्यतोविशेषतोवा कीदृशः पृथक् स्वभावः कार्यादिलक्षणस्वरूपः मञ्चादिनत्स्वादृशेन पुरुषेण प्रेरितः तदखिलं कार्यकारणलक्षणं सर्वं भवतः स्वरूपञ्च त्वदधीनसत्तात्मकमित्यन्वयः "कर्तृकर्मक्रियादीनां सत्तावृत्तिस्तथैवच । विष्णवधीनं यतः सर्वं सर्वरूपस्तदुच्यते" इति वचनादभेदोऽत्रेति बोद्धव्यम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, यावद्राज्यामि तावत् पैतृकं राज्यसुखमनुभवेति चेत् दुःखमेव तत् तावच्च प्रार्थनीयस्त्वेव एवेत्याह—यस्मादिति दास्यं दासस्य कर्म तच्च श्रीभगवत्प्रतिमापरिचर्या तदेव योगस्त्वत्संयोगरूपस्त्वम् ॥ १७ ॥

तत्तदुपद्रवहानिस्तु तत्र स्वतसिद्धप्रकारान्तरेण संवत्स्फूर्तिविशेषादेव स्यादित्याह—सोऽहमिति ॥ १८ ॥

नान्यत इत्याह—बालस्येति । तर्हि कथं शास्त्रान्तरे तत्तत्प्रतीकार इष्यते तत्राह—तप्तस्येति च त्वदुपेक्षितानां मज्ञानत्वाद्विषयोपेक्षाणां त्वद्बहिर्मुखानामित्यर्थः । तेषामर्थे साक्षादुपदेशेन यः प्रतिविधिः तत्रतत्रेष्टः स तावदेव आपातधैर्यार्थमेवेत्यर्थः । तेषामतस्तत्रापि सर्वभक्ताश्रयपरमशक्तिना तवैव रक्षणमितिभावः ॥ १९ ॥

तस्य तादृशत्वमेव दर्शयति—यस्मिन्निति । टीकायां योऽपरोऽर्वाचीन इति यद्यत् कारकैरिति च पाठोऽवगन्तव्यः । स्वरूपमिति स्वोपादान कार्यभूतमित्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, मदङ्घ्रिसेवया किं करिष्यसि पैतृकं त्रिजगदैश्वर्यसुखं तावद्भुङ्क्ष्वेत्यत आह । यस्मात् प्रियैरप्रियैश्च यथा सत्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिष्विति राजदेहेऽपि तादृशशोकाग्निदाहस्य नासद्भाव इतिभावः ननु शोकाग्निप्रतीकारा अपि बहवो वर्तन्त इत्यत आह दुःखस्यौषधं प्रतीकारास्तदपि दुःखमेव तदपि मतिहीनतया अदुःखबुद्ध्यैव सुकरादियोनावप्यहं सुखीति बुद्ध्यैव भ्रमामि अतस्तव दास्यस्य योगमुपायं तद् केनोपायेन तव दास्यं प्राप्नुयाम् तत्त्वमेवोपदिश त्वद्दास्यवत्त्वे सति नानायोनिगतस्यापि न मे किमपि दुःखमिति भावः ॥ १७ ॥

ननु मद्दास्ये वर्तमानेऽपि त्वया प्रस्तुत सांसारिकदुःखस्यौषधमन्यदप्यन्वेष्टव्यमेवेति तत्र साटोपं स प्रगल्भास्फोटश्चाह सोऽहं त्वदनन्यभक्तः श्रीनारदभृत्यत्वेन प्रसिद्धः प्रह्लादोऽहम् अन्य इव न ज्ञानकर्मादिकं स्वप्नेऽप्यङ्गीकरोतीति भावः । तव लीलाकथागुणान् कीर्तयन्नेव गुणान् कीर्तयन्नेव गुणविप्रमुक्तो गुणातीत इति यद्यहं गुणातीतोऽभवं तदा मे कुतः प्रस्तुतदुःखं दुःखौषधं चेति भावः । ननु गुणातीतस्य भक्तस्यापि दुःखानि दृश्यन्ते तत्राह दुर्गाणि त्वद्विरहसन्तापान् अञ्जः शीघ्रं तितर्म्यतिशयेन तरामीति त्वत्साक्षात्सेवाप्राप्तावपि त्वत्कीर्तनप्रसादान्मे नाति विलम्बो भावीति भावः त्वत्पदयुगस्य कमलत्वात् तदलयैर्हंसैस्त्वत्पार्षदैर्मां नेतुमागच्छद्भिः सह सङ्गो यस्य सः विरञ्चिगीतादिति कथानां प्रामाण्यं नच त्वत्कथाकीर्तने केषामपि श्रम इत्याह सुहृदः सखा भक्तानां सख्युः परदेवतायाः दास्यभक्तानां मद्विधानां प्रभो ॥ १८ ॥

माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणाऽनुमतेन पुंसः।
छन्दोमयं यदजयाऽर्पितषोडशारं संसारचक्रमज ! कोऽतितरेत्त्वदन्यः ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अथ दुःखस्य प्रतीकारा अपि त्वां विनाफलन्तीत्याह—बालस्य पितरौ शरणं रक्षकाविह न भवतः ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्शनात् कांचिदङ्गीगतांश्चिदु तत्रदर्शनाच्च नचार्तस्य रोगिणः अगममौषधं शरणं कृतेऽप्यौषधे मृत्युदर्शनात् न च उदन्वति समुद्रे मज्जतः पुंसो नौः शरणं तयासहैव मज्जनदर्शनात् अतस्तत्तस्य दुःखिनस्तत्प्रतिविधिर्दुःखप्रतीकारो य इह दृष्टः स त्वदुपेक्षितानां त्वदिच्छाया अविषयीभूतानां जनानां नेति पूर्वेणान्वयः तावदिति वाक्यालङ्कारे ॥ १९ ॥

केषाञ्चित् यः पित्रादिको रक्षको दृश्यते सोऽपि त्वद्रूप एवेत्याह-यस्मिन्निति। अपरोऽर्वाचीनजनः परः प्राचीनो ब्रह्मादिर्वाभावः कर्ता कारकैर्यत् यत् करोति, तत् सर्वं भवतो मायाशक्तियुक्तस्य स्वरूपं स्वीयं रूपमित्यर्थः। यस्मिन्नधिकरणे यतो निमित्तात् यर्हि यस्मिन् काले येन करणेन येन हेतुकर्त्रा सञ्चोदितश्च यस्य सम्बन्धि यस्मादुपादानात् यस्मै संप्रदानाय यदीप्सिततमं यः कर्त्तेत्येवं सप्तविभक्त्यर्थः यथा येन प्रकारेणेति क्रियाविशेषणभूतानामव्ययानामर्थाः त्वत्तो निर्गुणात् पृथक्स्वभावः सत्त्वादि प्रकृतिः करोति उत्पादयति विकरोति रूपान्तरं नयति ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

चरणप्राप्त्युपायः भगवत्प्रसाद एवेति प्रीन इत्यनेनोक्तमथ त्वत्प्रसादकारणं त्वद्दास्यमेव तत्त्वमेवोपदिशेति प्रार्थयते-यस्मादिति। यस्मात् तद्ब्रह्म न तद्गतत्संसारस्तस्मिन्या संसाराभिनिवेशेन प्रियाप्रियाभ्यां वियोगसंयोगौ वियोसंयोगौ च जन्म च तैर्यः शोकाग्निस्तेन सकलयोनिषु दह्यमानः तावद्यमानो भ्रमामि अस्य दुःखस्य त्वद्दास्यव्यतिरिक्तं यदौषधं तदपि दुःखमेव अतो हे भूमन् तव दास्ययोगं सर्वदुःखघ्नं मे मह्यं वद ॥ १७ ॥

हे नृसिंह ! सोऽहं भवद्दासस्सन् ते पादपद्मयुगे आलयो निष्ठा येषां परमहंसानां सारग्राहिणां भागवतानां संगो यस्य सः अत एव गुणैः रागादिभिः विशेषेण प्रमुक्तः तव लीलाकथाः अनुगृणन् दुर्गाणि अञ्जः अनायासेन तितर्मि तरामि ॥ १८ ॥

हे नृसिंह ! हे विभो ! तावत्त्वदुपेक्षितानां त्वत्तोऽप्राप्तत्वद्दारक्षानां मध्ये इह संसारे बालस्य शरणं दुःखहरं पितरौ न. आर्त्तस्य रोगार्दितस्यागदमौषधं शरणं न उदन्वति समुद्रे मज्जतो नौः न तीसस्य च यस्तत्प्रतिविधिरिहाऽसंदृष्टस्तच्छरणं न किन्तु त्वमेव सर्वेषां शरणमिति भावः ॥ १९ ॥

"सर्वं खल्विदं ब्रह्म, तत्त्वमसि" "क्षेत्रज्ञं चापि मां विद्धि" "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" इति श्रुतिस्मृतिसूत्रसाधितं स्वात्मनः त्वदात्मकत्वानुसन्धानं विना संसारचक्रं कोऽतितरेदित्याह—मायेति द्वाभ्याम्। यस्मिन्नधिकरणे यतो निमित्तात् यर्हि यस्मिन् काले येन करणेन येन हेतुकर्त्रा सञ्चोदितश्च यस्य सम्बन्धि यस्मादुपादानात् यस्मै संप्रदानाय यदीप्सिततमं यश्च स्वयंकर्त्ता यथा येन प्रकारेण पृथक् स्वभावः करोति उत्पादयति विकरोति रूपान्तरं नयति भावः अन्योऽप्यनुक्तः पदार्थः अपरः प्राकृतः परोऽप्राकृतः तत्सर्वं भवतः स्वरूपं भवदात्मकमित्यर्थः "एतदात्म्यमिदं सर्वम्" इति श्रुतेः ॥ २० ॥

भाषा टीका।

हे भूमन् ! इस प्रिय अप्रिय पदार्थों के संयोग वियोग से उत्पन्न हुआ जो अग्नि जिस्से सर्व योनियों में जलता हुआ दुःख की शान्ती के लिये जो औषध करता हूं वहभी दुःख रूपही है परञ्च उससमय मेरी उसमें दुःख की बुद्धि नहीं रहती है इस तरह से इस संसार में भटक रहा हूं इसलिये अब आप अपना दास्य कैंकर्य रूप सिद्ध महौषधि बताइये कि जिस्से फिर न भटकूं ॥ १७ ॥

हे नृसिंह देव ! अब मैं परमप्रिय और सुहृद तथा परात्पर देव जो आप तिनकी ब्रह्मादिकों की गाई हुई जो आपकी कथा ये तिनको गाताहुआ बिन प्रयास गुणों से छूटकर दुःखों को तर जाऊंगा केवल इतना अपेक्षित है कि आपके चरण कमल घर है जिनके एसे हंसों का सङ्ग मुझे हो ॥ १८ ॥

हे विभो ! हे नृसिंह ! आपने जिनोंकी उपेक्षा की है उन पुरुषों का कोई रक्षक नहीं, जैसे कि, इस संसारमें आपकी उपेक्षा होने से बालक के माता पिता रक्षक नहीं हो सके रोगी की औषध अच्छानहीं करसकी, समुद्रमें डूबते हुए को नौका नहीं बचासकी इसी प्रकारी तापकी शान्तिके लिये जो कुछ कहा उससे उसकी शान्ति नहीं हो सकी जबतक आपकी कृपा नहीं ॥ १९ ॥

ब्रह्मा से लेकर अपने पिता पितामह प्रभृति जो कुछ है करते हैं विकार को प्राप्त होते हैं जिस अधिकरण में जिसकाल में जिस कारण से जिसके लिये जिस हेतु से अंसे जो कुछ कार्य जाता है वह सब आपकाही स्वरूप है ॥२०॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अतोऽन्यस्य रक्षकस्याभावादसंसारित्वाच्च नित्यमुक्तत्वमेव मां शरणागतं रक्षेति प्रार्थयते—मायेति द्वाभ्यां। अदृष्टस्य पुंसोऽनुमतेनेक्षणरूपेणानुग्रहेण मनो मनः प्रधानं लिङ्गं माया सृजति

स त्वं निहत्य विजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्य विसर्गशक्तिः ।
चक्रे विसृष्टमजयेश्वर ! षोडशारे निष्पीड्यमानमुपकर्ष विभो ! प्रपन्नम् ॥ २२ ॥
दृष्टा मया दिवि विभो ऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यान् जनोऽयम् ।
येऽस्मत्पितुः कुपितहासविजृम्भितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः ॥ २३ ॥
तस्मादमूस्तनुभृतामहमाशिषोऽज्ञ आयुः श्रियं विभवमैन्द्रियमाविरिञ्च्यात् ।
नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोऽपनय मां निजभृत्यपार्श्वम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कथंभूता कालेन चोदिताः क्षोभिता गुणा यस्याः कथम्भूतं मनः कर्ममयं कुर्वद्रूपम् बलीयो दुर्जयम् छन्दोमयं वेदोक्तकर्मप्रधानञ्च अजया जीवस्याविद्यया तद्भोगार्थमर्पिताः षोडश अरा विकारा यस्मिन् यदेवंभूतं संसारचक्रात्मकं मनस्तत् कोऽतितरेत्, मां भज । त्वदन्यः त्वत्तः पृथक् स्थितः स्वामभजन्नित्यर्थः ॥ २१ ॥

ननु, ममापि मायासम्बन्धात्कर्तृत्वाद्यविशेषाच्च त्वत्तः कोविशेष इत्याह—स इति । स्वधाम्ना चिच्छक्त्या नित्यं विजिता आत्मनो बुद्धेर्गुणा येन स हि त्वम् यतः कालो मायाप्रेरकः अतएव वशीकृता विसृज्यानां कार्याणां विसर्गाणां साधनानाञ्च शक्तयो येन अत इत्थं षडशारे निष्पीड्यमानं मामुपकर्ष स्वसमीपं नय ॥ २२ ॥

ननु, लोकपालानां भोगान्भुंक्ष्व पित्र्यं वा राज्यमिदं दास्यामि किमिति संसारान्मुक्तिं प्रार्थयसे तत्राह—दृष्टा इति विभो । श्रियः सम्पदः विभव उद्भवः आयुरादयो दृष्टाः इति काका तुच्छत्वमुक्तम्. तदेवाऽऽह येऽस्मत्पितुः कोपहासविकृतभ्रूभङ्गमात्रेण विध्वस्ताः सच त्वया निरस्तः ॥ २३ ॥

यस्मादेवं तस्मादाशिषो भोगान् अस्तत्परिपाकं विद्वानहमैन्द्रियमिन्द्रियैर्भोग्यं ब्रह्मणो भोगमभिव्याप्य किमपि नेच्छामि ते कालात्मन उरुविक्रमेण विलुलितान्विध्वस्तानणिमादीनपि ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ त्वत्प्रपदनमन्तरेण कः पुमानतितरेत्संसारचक्रमित्याह—माययेति । त्वदन्यः त्वत्समाश्रयणविमुखः कः पुमान्संसारचक्रमतितरेत्,न कोपीत्यर्थः । संसारचक्रं चक्रवत्परिवर्तमानं संसारं चक्रशब्देन तत्र पतितस्य दृढतरावलम्बनमन्तरेण न यथा ततो निष्क्रमणं सम्भवति तथा संसारे पतितस्यावलम्बनभूतं श्रीभगवन्तं भवन्तमन्तरेण न तस्मादतितरणं सम्भवतीत्यभिप्रेतम्. संसारं चक्रत्वेन रूपयन् तं विशिनष्टि, यद्यस्मिन्मनसि नाभिरूपे पुंसः परमपुरुषस्य अजया भगवन्मायया हेतुभूतया अर्पिताः षोडश ज्ञानकर्मोभयेन्द्रियव्यापाराः दश प्राणापानादिरूपाः पञ्च प्राणवृत्तयः मनोवृत्तिश्चेति षोडश एत एव अराणि यस्य तत्र तत्तज्ज्ञानकर्मोभयेन्द्रियव्यापाराणां मनोव्यापारानुविद्धत्वस्वाभाव्यात् तद्व्यापारपूर्वकत्वाच्च तदायत्तत्वेन तदर्पितत्वं मनोवृत्तेस्तु साक्षान्मनस एवाश्रयत्वात्तदर्पितत्वं यद्यपि मनःपर्यन्तानामिन्द्रियाणां प्राणाधारस्थितित्वेन प्राणव्यापारपूर्वकत्वेन च प्राणवृत्तीनां साक्षात्परंपरया वा न मन आश्रयः तथापि मनोव्यापाराभावदशायां विद्यमानापि प्राणवृत्तिरज्ञाता अतएवासत्प्रायेति, तद्वृत्तिसत्ताज्ञानस्य मनोव्यापारपूर्वकत्वात्तस्यास्तदर्पितत्वमवगन्तव्यम्. यद्वा अजया हेतुभूतयार्पिताः षोडशैकादशेन्द्रियाणि पञ्च भूतानीति षोडश विकारा एवाराणि यस्य यदेतत्संसृतिचक्रमित्यन्वयः । संसारस्य सर्वेन्द्रियव्यापारपूर्वकत्वात्तद्वृत्तमवगन्तव्यम्. अस्मिन् पक्षे नाभित्वेन न किञ्चिदपि रूपितं यद्वा अजया नाभिरूपया हेतुभूतया चार्पिताः षोडशैकादशेन्द्रियपञ्चभूतात्मकानि अराणि यस्येत्यर्थः संसारचक्रस्यार्पितषोडशारत्वेऽजाया हेतुत्वमुक्तम्. सा किं साक्षादेव हेतुः ? नेत्याह, माययेति । मनस्सृष्टिद्वाराहेतुरिति भावः । किं तर्हि तस्याः सहकारिकारणमत्राह, कालेनेति । कालेन सह माया मनस्सृजति कालसहकृता प्रकृतिर्मनः सृजतीत्यर्थः । कालोऽपि न स्वरूपेण प्रकृतेर्मनः सर्गे सहकार्यपितु गुणक्षोभद्वारेति वदन् कालं विशिनष्टि, चोदितगुणानुमतेनेति चोदिताः कालेन क्षुभिताः सत्त्वादयः गुणास्तैरनुमतेन सह कृतेन स्वचोदितगुणत्रयमाचिवेन कालेन सहकृता भगवतो माया मनःसृजति संसारचक्रस्य दुस्तरत्वं भगवदाभिमुख्येतु सुतरत्वञ्चाविष्कर्तुं मनो विशिनष्टि, कर्ममयमिति । त्रिगुणात्मकप्रकृतिपरिणामरूपत्वेन स्वयमपि त्रिगुणात्मकत्वाद्रजोमयतया पुण्यपापरूपकर्मविषयप्रवृत्तिप्रचुरं बलीयः अनतिवर्त्यदोषं छन्दोमयं सत्त्वानुयानाच्छास्त्रावगतिसाधनप्रचुरम् इच्छामयमित्यर्थस्त्वनुपपन्नः छन्दशब्दः इच्छावाची न तु छन्दःशब्दः अनेन सत्त्वप्राचुर्ये सति श्रीभगवदाभिमुख्येन संसृतिचक्रं सुतार्यमित्यभिप्रेतम्. एवंभूतं मनः सृजतीत्यन्वयः । तदेवं मनोदोषात्संसारानतिवृत्तिस्त्वत्समाश्रयणविमुखस्येत्युक्तं भवति त्वदन्यः कः संसारचक्रमतितरेत् इत्यनेन त्वदनन्यस्त्वतितरेदेवेति सूचितम् ॥ २१ ॥

तदेवाविष्कुर्वन् त्वदनन्यं मां संसारचक्रान्निर्गमयेति प्रार्थयते—स त्वं हीति । यः स्वमायया मनःसर्गद्वारा संसृतिचक्रे जीवलोकं पातयति स त्वमजया स्वकीयया मायया षोडशारे चक्रे संसारात्मके विसृष्टमत एव नितरां पीड्यमानमनुना

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वां प्रपन्नं मां, हे विभो ! अपकर्ष संसृतिचक्राद्बहिर्निर्गमय "स एव बन्धकः स एव मोचकः" इति न्यायेन त्वमेव मतो निर्गमयितुं समर्थ इति भावः । सामर्थ्यमेव दर्शयंस्तं विशिनष्टि, नित्यत्वादिना । आत्मगुणाः स्वशरीरभूतप्रकृतिगुणा नित्यं निर्जिता आत्मगुणा येन नित्यास्पृष्टदेहधर्मेण स्वधाम्ना स्वस्वरूपेण च, यद्वा विजितात्मगुणो यः स आत्मा तस्य धाम्ना प्रकाशेनेव वशीकृताविसृज्यविसर्गशक्तिः विविधं सृज्या विसृज्याः जीवास्तेषां विसर्गे शक्तिर्यस्याः सा प्रकृतिः शक्तिर्वशीकृता येन स तथोक्तः कालशरीरकश्च वशीकृतसंसृतिनिमित्तप्रकृतिस्त्वां मोचयितुं त्वमेव प्रभुरिति भावः । नित्यविजितात्मत्यादिना विसृज्यजीववर्गानृब्रह्मादिस्तम्बपर्यन्तान्द्वैलक्षण्यमुक्तम । अतः संसारिजीववर्गे न कोपि तन्मोचने दक्षः नहि स्वयं कारागृहबद्धोऽन्यं तादृशं मोचयितुं प्रभुरित्युक्तं भवति ॥ २२ ॥

ननु, त्वं बालस्तमेव किं संसारान्निर्विद्यसे भुङ्क्ष्व भोगानित्यत्राह–दृष्टा इति त्रिभिः । हे विभो ! अयं संसारिजनो यानि वस्तूनि कामयते ते अखिलधिष्ण्यपानां इन्द्रादीनामायुरादयो मया विविच्य दृष्टाः श्रियः भोग्यभोगोपकरणादिसमृद्धयः विभवाश्च लोकाधिपत्यरूपमैश्वर्यम् आयुरादयो दृष्टा इति काका तुच्छत्वमुक्तं तदेवाह, येति । येऽस्मत्पितुः कोपहासविजृम्भितभ्रूभङ्गमात्रेण विलुलिताः ध्वस्ताः स तु मत्पिता त्वया हतो निरस्तः ॥ २३ ॥

यस्मादायुरादयो मत्पितृदृष्टान्तेन तुच्छत्वेन दृष्टा तस्मात्तनुभृतां देहिनाम् अमूः आयुरादिरूपाः आशिषः फलरूपपरिपाकं विद्वान् अहमिति शेषः, ब्रह्मस्थानम् ऐन्द्रियम् इन्द्रियैरनुभाव्य मन्यद्यपि सुखमाविरिञ्चाद्ब्रह्मणोऽनुभाव्यमभिवाञ्छ्याऽपि तथा कालात्मना कालरूपेण उरुविक्रमेण विपुलपराक्रमेण विपुलपादविक्षेपेण वा विलुलितान्विध्वस्तान्गोपादीनपि न इच्छामि अतो निजभृत्यानां स्वपार्षदानां पार्श्वं समीपमेव मां प्रापय ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

संसारचक्रं भक्त्या जनितश्रीहरिप्रसादं विना दुस्तरं, प्रसादश्च निगृहीतमनसां दुःसाध्यो मनोजयस्तु संसारचक्रस्यातः स एव सम्पाद्य इत्याशयेन संसारस्वरूपं निरूपयति—मायेति । चित्प्रकृत्याभिमतमायाप्रकृतिरुदितगुणानुमतेमोद्भूतरजआदिगुणानुसारिणा कालेन प्रेरितेनादृष्टेन च सहकारिणा पुंसो जीवस्य कर्ममयं छन्दोविकारकोशमतएव बलीयो निगृहीतुमशक्यं छन्दोमयं सङ्कल्पविकल्पलक्षणेच्छात्मकं यन्मनः सृजति हे अज ! तन्मनोमूलं संसारचक्रं त्वदन्यस्त्वदनुग्रहरहितः पुरुषः कोऽनुतरेत, न कोपीत्यन्वयः । केवलात्परिकरोपेतस्य बलाधिक्यं स्यादित्यभिप्रायेणाह अजयेति, अजया प्रकृत्याऽर्पिताः कलिना निजवर्तिना मनसा सह षोडशेन्द्रियाणि पञ्च प्राणा एवारा दशस्थानीया यस्य तत्तथा तत् ॥ २१ ॥

"मनएव मनुष्याणां कारणं बन्धमोक्षयोः" इति श्रुतेः सम्यक् नियुक्तं मुक्तिनिमित्तं च त्वदनुग्रहेण स्यादित्याशयेनाह–सत्वमिति यस्त्वं स्वधाम्ना नित्यं विजिता आत्मनो देहस्य गुणा जननादिलक्षणा धर्मा जीवस्य वा दुःखादिलक्षणा येन स तथा यश्च कलयति जानाति सर्वमिति कालो वशीकृता स्वसमवेता विसृज्यस्य सुरनरादिनानाविधस्य जगतो विसर्गशक्तिर्विविधसृष्टियोग्यमितस्य तथा हे ईश्वर ! स त्वं षोडशारे संसारचक्रे लिङ्गशरीरे वा अजया विसृष्टमुत्पन्नमतएव दुःखेन निष्पीड्यमानं तत्परिहाराय शरणं प्रपन्नं मां ततोऽपकर्ष उद्धर विभो ! समुद्धरणसमर्थ ॥२२॥

त्वया कस्मात्स्वर्गादैश्वर्यं नेष्यत इत्याशङ्क्य तस्य नश्वरत्वादित्याशयेनाह–दृष्टा इति । अखिलानां धिष्ण्यपानामिन्द्रादीनां विभवो हिरण्यवलक्षणोऽर्थः अस्मत्पितुर्हिरण्यकशिपोः कुपितहासो दृष्टासक्तेन विजृम्भितयोः स्फुरितलक्षणयोर्भ्रुवोर्विस्फूर्जितेन विकासविशेषेण लुलिता विनाशिताः स तु हिरण्यकशिपुरपि ते त्वया ॥ २३ ॥

यस्मात्क्षणभङ्गुरास्तस्मात् न अनित्या इति जानन्नैन्द्रियं भोग्यादीन्द्रियभोगयोग्यमैन्द्रियस्य विद्यमानं वा आविरिञ्चात् विरिञ्चपर्यन्तं निजभृत्यानां मुक्तानां पार्श्वम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्वस्य च तदधीनत्वं दर्शयन्नेकरूपत्वं स्थापयति–मायेति । मायातात् कर्म मायाविरूपं मनः सृजति तस्मात् तस्य दुर्बलत्वात् छन्दोमयादिरूपं संसारचक्रं त्वत्कृपामप्राप्तः कोऽतितरेत कोपीत्यर्थः ॥ २१ ॥

पुनस्तदेव विशेषतो दर्शयन् स्वाभीष्टं निवेदयति——स त्वमिति ॥ २२ ॥

पुनरपि स्वदुःखदर्शनया कृपयन् स्वाभीष्टं प्रार्थयते—दृष्टा इति द्वाभ्याम । एकैव निजपरमाभीष्टरूपा तत्सेवकचरणानुगत्या साक्षाच्चरणारविन्दप्रेमसेवादैन्यभङ्ग्याच्छाय बहुविधं प्रार्थ्यत इति द्वयं पूर्वत्र परत्र च ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, यद्यहमेव सर्वरूपस्तर्हि संसारोऽप्यहमेव कुतो मद्रूपात् संसारादस्माद्विमोक्तुमिच्छसीत्यत आह द्वाभ्यां । माया त्वदीयबहिरङ्गा शक्तिर्मनोमहदाद्यात्मकं लिङ्गदेहं जीवस्योपाधिं सृजति कर्माणि लौकिकवैदिकव्यापारास्तन्मयं बलीयो दुर्जयं पुंसस्तवैव अनुमतेन ईक्षणरूपेण चोदिताः क्षोभिता गुणाः यस्याः सा छन्दोमयं वासनामयं "छन्दः पद्येऽभिलाषे च" इत्यमरः यदेव चक्रं खलु संसारचक्रं भवेत् कीदृशम् अजया अविद्यया अर्पितं वस्तुतो निःसङ्गस्यापि जीवस्य यद्वात् समर्पितं च षोडश अरा विकारा यस्मिंस्तच्च तत् कोऽनितरेत् त्वदन्यः त्वत्तः पृथग्भूतः त्वामभजन्नित्यर्थः । त्वद्भजनवतस्तु तरेदेवेत्यर्थः ॥ २१ ॥

अतो मायायाः स्वशक्तित्वात्तन्मयं संसारचक्रं यद्यपि त्वद्रूपं तदपि त्वं स्वरूपशक्त्या तस्मात् पृथग्भूतोऽस्ति यथाहमपि

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्माद्विमोक्तुमिच्छामि मां स्वचरणान्तिकं नयेत्याह—स त्वमिति। यन्माया हि गुणमयं जीवोपाधिं सृजति स त्वं स्वधाम्ना स्वरूपशक्त्या विजिता आत्मगुणा बुद्धिगुणा येन सः यो गुणान् क्षोभयति स कालोऽपि त्वम् अत एव वशीकृता विसृज्या माया-कार्य्यभूता उपाधयस्तेषु विसर्गो निक्षेपः शक्तिरविद्या च येन स अत इक्षुदण्डवन्निष्पीड्यमानं प्रपन्नं जनमुपकर्षं समीपं नय ॥ २२ ॥

न च त्वां विनाऽन्यं कमप्यैश्वर्य्यवन्तं पश्यामि यमहं प्रपद्ये यो मां संसारादुद्धरिष्यतीत्याह—दृष्टा इति । दिविस्थानामखिललोकपालानामायुरादयो दृष्टाः श्रियो धनसम्पदः विभव ऐश्वर्यं ये धिष्ण्यपाः अस्मत्पितुः कोपहासविकृतभ्रूभङ्गमात्रेणैव निरस्ताः स च त्वया निरस्तः इत्यसाधारणप्रभावादपि त्वमेव परमेश्वर इति जानामीति भावः ॥ २३ ॥

एवञ्चेत् मत्तः परमेश्वरतः किमत आह—तस्मादिति । यस्मान्मत्पिता तादृशैश्वर्य्यसम्पन्निमानपि निरस्तस्तस्मादहं आशिषो भोगान् अस्ततपरिपाकं विद्वान् ऐन्द्रियम् इन्द्रियैर्भोग्यं माविरिञ्च्यात् ब्रह्मणो भोग्यमप्यभिव्याप्य किमपि नेच्छामि ते कालरूपेण विलुलितान् विध्वस्तान् अणिमादीनपि निजभृत्यपार्श्वमिति तदेव सर्वोत्तमं जानामीति भावः ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवंभूतस्य सर्वात्मनः पुंसः "पुरुष एवेदं सर्वम्" इत्यादि-श्रुतिप्रसिद्धस्य श्रीभगवतस्तव माया प्रकृत्याख्या शक्तिः संसारचक्रं सृष्टिसंहारप्रवाहम् सृजति पुंसो भवत एवानुमतेन शक्तिभूतेन कालेन चोदिता सृष्ट्यर्थविस्ताराय संसारार्थसंकोचाय च प्रेरिताः गुणाः यस्याः सा यद्यस्मिन् अजया नित्यरूपया भवच्छक्त्या तयैव मायया अर्पिताः एकादशेन्द्रियाणि पञ्च तन्मात्राणि चेति षोडश आराः अतएवा अस्मिन् बलीयः दृढतरं जीवबन्धनं मनस्तत्प्रधानं लिङ्गशरीरं भवति कर्म्मभूतं कर्ममयं मायामोहितजीवकर्मफलभूतम् छन्दोमयं मायामोहितजीवाभिलापजन्यं च "छन्दः पद्येऽभिलाषे च" इति कोशात् हे अज ! तत्संसारचक्रं त्वदन्यः अंशस्य स्वरूपेण भिन्नत्वेऽपि अंशांशिनोरत्यन्तभेदाभावात् य आत्मानं त्वदन्तर्गतं जानाति सत्त्वदनन्यः यस्तु "एष परमांशः" तत्त्वमसि "ममैवांशो जीवलोके जीवभूतः सनातनः" "क्षेत्रज्ञं चापि मां विद्धि" "अंशो नानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत एके" इति श्रुतिस्मृतिसूत्रोक्तरीत्यात्मनो भवदंशभूतस्य भवदन्यत्वं न जानाति स त्वदनन्यः जीवब्रह्मणोऽत्यन्तभेदो एवेति भ्रान्ति-मोहितः कोऽतितरेत् न कोपीत्यर्थः त्वदनन्यस्तु तरेदेवेति भावः ॥ २१ ॥

हे ईश्वर ! सर्वात्मा सर्वशक्तिस्त्वं चक्रे संसारचक्रे तत्रापि षोडशारे लिङ्गदेहे अजया मायाख्यया भवच्छक्त्या विसृष्टं निष्पीड्यमानं च मां प्रपन्नं त्वां शरणं गतं हे विभो ! उपकर्षं संसारचक्रात् निस्सारय यतस्त्वं बद्धबन्धनयोः जीवमाययोः स्वामीत्याह, वशीकृते विसृज्य विसर्गशक्ती विसृज्यते देवमनुष्यादियोनिषु पात्यते माययाभिभूयते इति विसृज्यो जीवः विसर्गो देवमनुष्यादिजीवयोनिजनने शक्तिर्यस्याः सा माया एवंभूते जीवमाये येन सः "प्रधानक्षेत्रज्ञपतिः" इति श्रुतेः कथम्भूतः कालः स्वशक्तिभूतो यः कालस्तस्यापि क्षोभको नियन्तृभूतः काल इत्यर्थः "ज्ञः कालकालः" इति श्रुतेः ननु, अन्ये अन्यान् ब्रह्मरुद्रादीनपीश्वरान्मन्यन्ते ते एव भवन्तोऽपि कुतः संसारचक्रान्निर्गमनार्थं न प्रार्थ्यन्ते इत्यत्राह हि निश्चितं स्वधाम्ना स्वासाधारणेन स्वरूपेण नित्यं सर्वदा विजिताः स्ववशे कृताः आत्मानः सर्वे ब्रह्मादयो जीवाः गुणास्तत्-द्गुणाश्च येन सः एव सर्वेश्वरः "एष सर्वाधिपतिः" इति श्रुतेः ॥ २२ ॥

ननु, संसारचक्रेऽपि भोगाः सन्ति तान् भुंक्ष्व किं मोक्षेणेत्यत आह—दृष्टा इति त्रिभिः । हे विभो ! यानयं बुभुक्षुजनः इच्छति ते दिवि अखिलधिष्ण्यपानां आयुः श्रियः सम्पदः विभवः उद्भवः एते सर्वे मया दृष्टाः येऽस्मत्पितुः कुपितहासाभ्यां कोपहासाभ्यां विजृम्भितेन विकृतेन भ्रूविस्फूर्जितेन लुलिता निरस्ताः स तु ते त्वया निरस्तो हतः ॥ २३ ॥

तस्माद्धेतोः "ज्ञाज्ञौ द्वावजावीशानीशौ" इति श्रुतिप्रसिद्धः अज्ञोऽल्पज्ञो जीवोऽहं भवदीयदास अभूः तनुभृतामाशिषो भोगान् आयुरादिकं ऐन्द्रियैर्भोग्यं आविरिञ्च्यात् किमपि नेच्छामि ते त्वया कालात्मनोरुविक्रमेण लुलितान् निध्वस्तानणिमादिपदार्थानपि नेच्छामि, अतो मां निजभृत्यानां पार्श्वमुपनय ॥ २४ ॥

———

भाषा टीका ।

पुरुष की अनुमति से काल करके क्षुभित हुए गुण जिसके ऐसी माया कर्म प्रधान दुर्जन मनको सृजती है, हे अज ! अजा (अविद्या) ने अर्पित किये सोलह विकार रूप आरा जिसके ऐसे संसार चक्र वाले वेद मय मनको आपको विना भजन किये कौन तरसक्ता है ॥ २१ ॥

हे ईश्वर ! सो आप मुझे आपना ज्ञान देकर इस षोडश आरे वाले चक्र में माया से पड़ा हुआ निष्पीड्यमान अर्थात ऊख के तरह पिर रहा जो मैं तिसको हे विभो ! हे समर्थ ! आप खेंचलो ॥ क्योंकि आपने इस माया के गुणों को अपने तेज (चैतन्यशक्तिरूप) से जीता है और आप काल रूप अर्थात् माया के प्रेरक हो और कार्य कारण शक्ति को आप ने वश में किया है ॥ २२ ॥

हे विभो ! मैंने स्वर्गसे आदि लेकर अनेक लोकपालों के आयु श्री और वैभव देख लिये, जिनके लिये यह मनुष्य सदा इच्छा करता रहता है. उनके वैभव कैसे हैं कि मेरे पिता के कोप युक्त हास से विकराल भृकुटी के भंग मात्र से नष्ट

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः।
निर्विद्यते न तु जनो यदपीति विद्वान्कामानलं मधुलवैः शमयन्दुरापैः ॥ २५ ॥
क्वाहं रजःप्रभव ईश ! तमोऽधिकेऽस्मिन् जातः सुरेतरकुले क्व तवानुकम्पा।
न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥ २६ ॥
नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथात्मसुहृदो जगतस्तथाऽपि।
संसेवया सुरतरोरिव ते प्रसादः सेवाऽनुरूपमुदयो न परावरत्वम् ॥ २७ ॥
एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसङ्गात्।
कृत्वाऽऽत्मसात्सुरर्षिणा भगवन्गृहीतः सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ॥ २८ ॥

भाषाटीका।

होगये उस मेरे पिता को तो आपने सहज ही निरस्त कर-दिया ॥ २३ ॥

इसी कारण से मैं आप का मत्त दास ब्रह्मादिक पर्यन्त के वैभव आयु लक्ष्मी इन्द्रिय सुख इत्यादिकों की इच्छा नहीं करता हूं, क्योंकि ? ये सब तो काल स्वरूप आपके महान् पराक्रम से नष्ट प्राय हैं तस्मात् आप केवल मुझको अपने दासों के समीप में पहुंचा दीजिये ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

किंच वर्तमानकालेऽपि न भोगादौ स्पृहेत्याह--कुत्रेति। श्रुतिः श्रवणं तदेव सुखं यासु ताः मृगतृष्णिकावन्मिथ्याभूताश्चाशिषः क्व अशेषाणां रुजां रोगाणां विरोह उद्भवस्थानं क्वेदं कलेवरम्। एवं चेत्सर्वोऽपि जनः किं न विरज्यते? तत्राह—यद्यपि यद्यपीति एवं विद्वानयं जनस्तथापि न निर्विद्यते विरक्तो न भवति कुतः काम एवानलस्तं मधुलवैः सुखलवैर्दुःसाध्यैरपि शमयन्, कामाग्निशमनव्यग्रस्य निर्वेदावकाशो नास्तीत्यर्थः। यद्वा, मच्चित्त्वमिदं त्वन्मायाचेष्टितमिति भावः ॥ २५ ॥

तर्हि त्वं कथं निर्विण्णोऽसि अनर्होऽपि मयि प्रवृत्तया त्वत्कृपयैवेत्याशयेनाह--क्वेति। रजसैव प्रभवो जन्म यस्य सः समस्यन्तं वा कुलविशेषणं तमोऽधिकेऽस्मिन्नसुराणां कुले जातोऽहं क्व, क्व च तवानुकम्पा, तामेवाह ब्रह्मादीनां शिरसि यो नार्पितः स पद्मवत्सकलसन्तापहरः करः प्रसादः पुरुषार्थरूपो मे शिरस्यर्पित इति यत् तथाऽनुकम्पयेति वा ॥ २६ ॥

न च त्वयीदमतिचित्रमित्याह--नैषेति। एवं ब्रह्मादय उत्तमाः अयमसुरो नीच इत्येषा परावरमतिर्जन्तोः प्राकृतस्य यथा, तथा भवतो नैव स्यात्, अत्र हेतुः जगत आत्मनः सुहृदश्च तर्हि सर्वत्र सत्प्रसाद एवंरूपश्च किं न स्यात्तत्राह संसेवया तव प्रसादो भवति तत्र च सेवानुरूपं तत्तदिच्छानुसारेण धर्मादीनामुदयो भवति एवं सत्यपि वैषम्याभावे दृष्टान्तः सुरतरोर्यथा सेवकस्यैव सङ्कल्पानुसारेण फलं ददाति न च विषमस्तद्वत् न परावरत्वमत्र कारणमिति शेषः ॥ २७ ॥

एतच्च त्वद्भक्तकृपया मया प्राप्तमिति त्वद्भृत्यपार्श्वमेव मां नयेत्याशयेनाह--एवमिति। यथा त्वया अनुकम्पितोऽस्म्येवं नारदेनात्मसात्कृत्वा पूर्वमनुगृहीतः सोऽहं कथन्नु त्वद्भृत्यसेवां विसृजामि कथम्भूतोऽनुगृहीतोऽस्मि प्रभवः संसारः स एवाहिकूपस्तस्मिन्कामानभितः कामयमानं जनं निपतितमनु तत्प्रसङ्गात्प्रपतन्नप्यहम् अतएव त्वद्भृत्यस्य नारदस्यानुग्रहेण त्वयाप्यनुकम्पितोऽस्म्ययमेव च मम परमोऽनुग्रहो न पुनरिदमतितुच्छं मत्प्राणरक्षणादि ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

किंच श्रुतिः श्रवणं तदेव सुखं यासु ताः अत एव मृगतृष्णिकरूपाः मरीचिकावदस्थिराः आशिषः कुत्र पुरुषार्थाभासा आशिषः केत्यर्थः। अशेषाणां रुजां रोगाणां विरोहः उद्भवस्थानं क्वेदं कलेवरं दुःखमयत्वादिति भावः। एवं चेत्सर्वोऽपि जनः किमिति संसारान्न निर्विद्यते तत्राह–निर्विद्यत इति। यदैहिकं सुखम् इत्येवं मृगतृष्णिकातुल्यं विद्वान् जानन्नपि न निर्विद्यते विज्ञानपरिपाकशून्यत्वान्न निरतं निर्वेदाभावः सञ्चितः विदुषोऽप्यनिर्वेद इत्युक्त्वा विद्वांसं विशिनष्टि—दुरापैर्दुःखेनापि लब्धुमशक्यैर्मधुलवैर्वैषयिकसुखलवैः काम एवानलस्तमुपशमयन्निति पूर्वासक्तस्सन् विद्वानपि न निर्विद्यत इत्यर्थः। विषयासक्तस्य निर्वेदस्यावकाशो नास्ति इति भावः ॥ २५ ॥

एवं तत्कृतमनुग्रहं संप्रार्थ्य स्वशिरसि कृतेन तत्करपल्लवनिधानेनात्मनः कृतार्थतामाविष्करोति—क्वेति। हे ईश ! तमोऽधिके तमःप्रचुरे रजःप्रभवे रजसः उत्पत्तिस्थाने रजस्तमःकार्यकामक्रोधलोभादिभिः प्रचुरे सुरेतरकुले, असुरकुले जातोऽहं क्व क्व च तवानुकम्पा दुर्लभत्वादित्यर्थः। किं तादृशमाह ब्रह्मादीनां शिरसि यो नार्पितस्तेषामपि दुर्लभ इति भावः। सः प्रसादः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रसादसूचकः पद्ममिव तापहरः करः मम शिरस्यर्पित इति यदेतत् दुर्घटमिति भावः । अतोऽहमचक्ष्यवामेन कृतार्थोऽस्मीति तात्पर्यम् ॥ २६ ॥

नैतावता तव वैषम्यादि दोषप्रसङ्ग इत्याह—नैषेति । यथा या जन्तोः प्राकृतस्य परावरमतिरुत्कृष्टापकृष्टबुद्धिर्विषमाबुद्धिरिति यावत् सैषा बुद्धिर्भवतो नैव स्यात् ननु तदभावे हेतुं वदंस्तं विशिनष्टि, जगत आत्मसुहृदः आत्मनोऽन्तरात्मनः सुहृदो हितैषिणश्च आत्मन इत्यनेन जगतः शरीरत्वमवगम्यते नहि कस्मिंश्चिच्छरीरे आत्मनः प्रीतिरन्यस्मिन्नप्रीतिरिति भावः । सर्वस्यापि जगतः स्वाभाविकसुहृद इति वार्थः । नहि सर्वेष्वेकरूपो मत्प्रसादः किमस्यात्तत्राह—यद्यप्येवंभूतस्त्वं तथापि वैषम्यरहितस्यापि तव संसेवया प्रसादो भवति तत्र सेवानुरूपं तत्तदपेक्षानुसारेण धर्मादिपुरुषार्थानामुदयो भवत्यपेक्षानुरूपफलदत्वे दृष्टान्तः सुरतरोरिवेति. यथा सुरतरोः कल्पद्रुमस्य तत्तत्सेवकापेक्षानुसारेण फलप्रदत्वं न च तावता तस्य वैषम्यं तद्वन्न परावरत्वं सर्वेष्वेकरूपप्रसादाभावे परावरत्वं वैषम्यं न कारणमित्यर्थः ॥ २७ ॥

एवमात्मनस्तत्प्रसादेन कृतार्थतामाविष्कृत्याथ न केवलमधुनैव त्वत्प्रसादविषयोऽहं जातः किन्तु यदा मातृगर्भस्थं मामनुजिघृक्षता त्वया सञ्चोदितेन सुरर्षिणानुगृहीतस्तदैव त्वदनुग्रहविषयोऽभवम् अतो जन्मन आरभ्य त्वयानुगृहीतोऽहं त्वद्भृत्यपार्श्वं न विसृज इत्याह—एवमिति । हे भगवन् ! यः सुरर्षिणा नारदेनात्मसात्कृत्वा आत्माधीनंकृत्वा "तदधीनवचने च" इति सातिप्रत्ययः पूर्वं विषयपरवशत्वेन तदधीनं मां स्वाधीनं कृत्वेत्यर्थः । यद्वा,"अभिविधौ सम्पदा च"इति सातिः अभिविधिश्च किञ्चिदन्यथात्वं पूर्वं भगवत्प्रातिकूल्येन स्थितं मां किञ्चित्त्वदनुकूलं कृत्वेत्यर्थः । गृहीतस्तत्त्वत्रयोपदेशेनानुगृहीतः सोऽहं इदानीं तव भृत्यसेवां दासानुदास्यं कथं नु विसृजे न कथं चिदपित्यक्ष्यामीत्यर्थः कथम्भूतोऽनुगृहीतोऽस्मि प्रभवः संसार एवाहिकूपः सर्पयुक्त कूपस्तस्मिन्कामाभिकामं कामयन्त इति कामाः विषयाः शब्दादयस्तान् कामयमानं जनं निपतितमन्वनुसृत्य तत्सङ्गात्तस्य तत्र निपतितजनस्य यः प्रकृष्टः सङ्गस्तस्माद्धेतोः प्रपतन्नहं विषयासक्तचित्तजनसङ्गात्प्रभवाहिकूपे पतन्नहमित्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोऽपि संसारसुखं हेयमित्याह—कुत्रेति । श्रान्तिं कर्णौ सुखयन्तीति श्रुतिसुखा मृगतृष्णारूपा ऊष्मोदकसदृशाः अशेषाणां रुजां रोगाणां विशेषेण रोहो यस्मात्तथा दुरापैर्मधुलवैः उदबिन्दुकल्पैः सुखलवैः कामाग्निं शमयन् शान्तिं कर्तुमिच्छन् यद्यपि पर्यायेण कलेवरं विषयसुखं चेत्युभयं नश्वरं विद्वानयं जनः इहोभयस्मिन्नपि ननु निर्विद्यते निर्वेदं नैव प्राप्नोतीत्यन्वयः ॥ २५ ॥

हरेर्भक्तवात्सल्यं प्रकटयन् प्रह्लादस्तस्य ब्रह्मादिभ्योऽप्यधिकं जनमोहायाह—क्वाहमिति । हे ईश्वर ! तमोगुणप्रचुरे रजोगुणोत्पत्तिहेतौ अस्मिन् सुरेतरकुले असुरकुले जातोऽहं क्व भक्तानुग्रहलक्षणा तवानुकम्पा क्व मिथो विरुद्धस्वभावत्वात् किञ्चाद्यमत्रेति तत्राह न ब्रह्मणा इति निरन्तरसेवा मे दूरस्थेनेतरस्मादधिकोऽद्योऽपीदानीं रमादीनां शिरसि नार्पितो मम शिरसि तव पद्मकरपद्मोदरप्रभावत्पाशिनिधानलक्षणः प्रसादोऽर्पित इति यत्तस्माच्चित्रं तव चरितमित्यर्थः । "श्रीर्ब्रह्म ब्राह्मीर्वीन्द्राहिविकं तस्त्रीपुरुहुता तदन्ये च क्रमात्सर्वे सदा मुक्तौ मृतावपि । हरिभक्तौ च तज्ज्ञाने सुखेन नियमेन तु । परतः स्वतः कर्मतो वा न कथंचित्तदन्यथा" इति वचनादुक्त एवार्थ इति ॥ २६ ॥

सेवाधिक्यमेव फलाधिक्ये कारणं न त्वाभिजात्यादिकमित्यभिप्रेत्याह—नैषेति । यथा जन्तोर्या परावरमतिः सैषा भवतो न स्यान्न तु कुत आत्मसुहृदः "तदेतत्प्रेयः" इति श्रुतेः लोके यद्यप्याभिजात्यादिकं परावरत्वं निमित्तं तथापि लोकविलक्षणमहिमत्वात् भवतः प्रसादः जगतः संसेवया सेवानुगुणः फलाधिक्योदयः स्यात् "यावत्सेवा परं तत्त्वे तावत्सुखविशेषता" इतिस्मृतेः परावरत्वं च सेवानिमित्तं "शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते" इतिवचनात् ॥ २७ ॥

नन्वेवं सेवानुरूपफलोदये शास्त्रीये सिद्धे त्वं किङ्करोषीति तत्राह—एवमिति । फलोदयस्य सेवानुविधायित्वात् सोऽहं तव भृत्यसेवां कथं नु विसृजे मम हितरूपत्वादित्यतस्त्वदस्यागे कारणमाह । जनमिति । प्रभवाहिकूपे जन्मादवसर्पविषकलिलसंसारगर्ते पतितं कामाः विषयास्तानभिकामयत इति कामाभिकामस्तं जनमनु तस्य जनस्य प्रकर्षेण सङ्गः जन्मलक्षणस्तस्मात्प्रपतन् आत्ममात्कृत्वात्मीयत्वेन इति बुद्धिं कृत्वा सुरर्षिणा गृहीतोनुगृहीतोऽयः सोहमिति यस्मात्तस्मादिति शेषः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुनः स्वस्यातिदैन्यं दर्शयितुं सामान्यतो जीवानां दैन्यं दर्शयति—कुत्रेति । मधुरूपकं तेनाग्नेः प्रत्युत वृद्धेः ॥ २५ ॥

अथ स्वस्यापि दैन्यं दर्शयन् तत्कृपया निरुपाधित्वं प्राबल्यञ्च दर्शयति—क्वाहमिति । नच ब्रह्मणा इति तदानीतन वृत्तान्तापेक्षया ॥ २६ ॥

यत्तु भवान् भक्ताननुगृह्णाति तच्च यद्यपि चित्रं तथापि दृष्टान्तसद्भावात् नातिचित्रं मय्यनुग्रहस्तु तदभावादतीव चित्रमिव पूर्वार्थमेवोत्कर्षयितुमाह—नैषेति ॥ २७ ॥

अथैतादृश्याः कृपायाः कारणं स्मरन्नपि तदेवाभीष्टं प्रार्थयते एवमिति । एवं त्वत्कृपायोग्यं यथास्यात्तथा अनुगृहीतो यः सोऽहं दृष्टभगवद्भृत्यकृपातिशयत्वात् कथं विसृजे त्यक्तुं शक्नोमि नैवेत्यर्थः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

तर्हि किमिति भोगैश्वर्यं सर्व एव लोको वाञ्छतीति चेत्तत्रो्यमभिज्ञ एवेत्याह—कुत्रेति। मृगतृष्णारूपाः मृगतृष्णा यथा दृष्टसुखरूपास्तथैवाशिषो राज्याद्या अपि भुतिसुखमात्रयः ईर्ष्याऽसूया रागद्वेषापायचिन्तादिभिर्वस्तुतः सुखलेशस्याप्यभावात् अस्तु वा सुखं तस्य भोगाऽसामर्थ्यात् महदेव दुःखमित्याह क्वेदमिति. यद्यतो विद्वानपि जन इति विचार्यापि न निर्विद्यते ततो मूर्खः किमुतेति भावः कीदृशः कामरूपमनलं मधुलवैः सुखलेशैः शमयन्निति नहि मधुलवैरनलः शाम्यति प्रत्युत दीप्यते एव दुरापैरिति ते च सुखलेशा दुःखैरेवोपार्ज्यन्ते ॥ २५ ॥

किञ्च यद्यपि मादृशो नास्तिकोऽप्यधमस्तदपि त्वं मां सर्वोत्तममकरोस्तत्ते कृपामाहात्म्यं किं वर्णयामीत्याह—क्वाहमिति। यत् यः पद्मकरः मम शिरस्यर्पितः सन् ब्रह्मणा इत्यादि ॥ २६ ॥

न च त्वं स्वकृपया उत्तमाधमौ गणयसीत्याह—नैषेति। एते ब्रह्मादय उत्तमाः अधमसुरो नीच इत्येषपरावरमतिर्जतोः प्राकृतस्य यथा तथा भवतो नैव स्यात् तत्र हेतुः जगत आत्मनः सुहृदश्च तर्हि सर्वत्रैव सम एव मत्प्रसादोऽस्तु तत्राह संसेवया यथा सुरतरुराश्रितस्यैव सङ्कल्पानुसारेण फलं ददद्पि न विषमस्तथैव त्वमपि तत्रापि सेवानुरूपम् उदयः सेवातारतम्येनैव कृपाया उदयतारतम्यं नतु परावरत्वं उत्कृष्टनिकृष्टत्वमेव कृपोदयतारतम्यस्य कारणमित्यर्थः ॥ २७ ॥

ननु, मत्संसेवया त्वयि मम सम्यक् प्रसाद इत्यत्र सुरतरुदृष्टान्तेन मद्वैषम्यं पर्यवहार्षीः किंतु संसेवया किं कारणं मदनुगृहीति तत्राह एवम् उत्कृष्टनिकृष्टाभावेन जनं सर्वमेव कामानभिकामयमानं प्रसभं एवाहियुक्तः कूपस्तत्र निपतितम् अनु तत् प्रसङ्गात् प्रपतन्नेवाहं सुरर्षिणा श्रीनारदेन आत्मसात्कृत्वा अयं जीवो मदीयो भवत्विति मयि स्वस्वत्वमारोप्य गृहीतः यस्मात् स्वपाणिनैव गृहीत्वा ततः सकाशात् स्वान्तिकं नीत्वा तन्मंत्रराजमुपदिश्य स्वसेवकीकृत इति भावः सोऽहं संसारकूपपतित एव संप्रत्यहं प्रह्लादस्त्वद्भक्तो यत्प्रसादादभवं तस्य तव भृत्यस्य श्रीमद्गुरोः सेवां कथं विसृजामि त्यजामि यथा कर्मज्ञानियोगिनः फलप्राप्तौ साधनं त्यजन्ति, तथेत्यर्थः। भक्तिमार्गे हि साधनस्यापि फलीभावात् भगवन्तं प्राप्तानामपि ध्रुवादीनां साधुसङ्गादिसाधनस्पृहा यथा भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो भूयादनंतमहताममलाशयानामिति ध्यायंश्चराम्यनुगृहाण यथास्मृतिः स्यादिति चातएव विचार्यैव मया प्रार्थितं मैव मां निजभृत्यपार्श्वमिति ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ननु, स्वत एव भवान् कुतो न गच्छति अत्राह—कुत्रेति मृगतृष्णारूपाः मृगतृट् मृगतृष्णा यथा जलाभासरूपा तथा पुरुषार्थाभासाः भूतिः अथवा तदेव मूलं यासु ताः आशिषः कुत्र अशेषरुजां विरोहो जन्मस्थानमिदं सकलेवरं च क इत्येवं यद्यपि जनो विद्वान् तथापि दुरापैर्दुःखलभ्यैर्मधुलवैर्विषयसुखलेशैर्दुष्पूरं कामानलं शमयन् आस्ते नतु विरज्यते त्वद्भृत्यपार्श्वे न गच्छतीति भावः ॥ २५ ॥

आत्मनो लब्धभगवत्प्रसादत्वमाह—क्वाहमिति। रजसः प्रभवो यस्मिन् तस्मिन् तमोधिकं यत्र तस्मिन् सुरेतरकुले जातोऽहं क क च तवानुकम्पा यत् यया प्रसादः प्रसादद्योतकः पद्मकरः पद्मवत् सुखदः करः मे शिरसि अर्पितः नतु ब्रह्मणो न भवस्य नतु रमायाः शिरसि अर्पितः यद्वा एवंविधः पद्मकरो ब्रह्मणो न भवस्य रमाया अपि नेति योज्यम् ॥ २६ ॥

ननु, अहो अयं परः उत्तमः अधमपरोऽधमः एषा मतिर्जतोः प्राकृतस्य जीवस्य यथा भवति तथा जगतः आत्मनः एरमसखरूपस्य सुखदः हितकारिणो भवतो नैव स्यात् तथापि सुरतरोः कल्पद्रुमात् सेवानुरूपमुदयो वांछितार्थलाभः इव संसेवया ते प्रसादो भवति एवमयं पर उत्कृष्टः मम प्रसादार्हः न त्वपर इति तव प्रसादे परावरत्वं कारणं न भवति ॥ २७ ॥

प्रकर्षेण भवन्तीति प्रभवाः कामक्रोधलोभादयस्ते एवाहयस्तद्युक्तं कूपं कूपवद्दुस्तरे संसारे नितरां पतितं कामान् विषयानभिकामयतीति कामाभिकामस्तं जनं कलत्रापत्यादिरूपमनु अनुसृत्य प्रसङ्गात् तस्मिन् जने प्रकृष्टे यः सङ्गस्तस्मात्प्रपतन् योऽहं देवर्षिणाऽऽत्मसात्कृत्वा गृहीतो अनुकम्पितः सोऽहं तव भृत्यसेवां कथं विसृजे अतस्तव भृत्यपार्श्वं मां नयेति भावः ॥ २८ ॥

भाषा टीका।

अथवा रमणीय और मृग तृष्णा रूप आशिष (ऐहिक पारलौकिक सुख सामग्री) तो कहां, और अनंत रोगों के जमने की भूमि यह कलेवर कहां। ऐसा यह पुरुष जानता है तो भी वैराग्य को नहीं प्राप्त होता, क्योंकि ? वह दुष्प्राप्य काम सुख के बिंदुओं से काम रूप अग्नि के शमन करने में व्यग्र होरहा है ॥ २५ ॥

हे ईश ! कहां रजोगुण से उत्पन्न होने वाले तमोगुण प्रधान इस असुर कुल में, मैं उत्पन्न हुआ, और आपकी निर्हेतुक कृपा कहां, क्योंकि यह प्रसाद तो ब्रह्मा को भी नहीं मिला शिवजी भी नहीं प्राप्त हुआ, और निश्चय करके रमा (श्रीलक्ष्मीजी) को भी नहीं मिला जोकि ? मेरे असुर बालक के मस्तक पर आपने अपना करकमल अर्पित किया ॥ २६ ॥

ये ब्रह्मादिक उत्कृष्ट हैं और यह असुर नीच है इस प्रकार की पर अवर मति जगत के आत्मा और सुहृद ऐसे आप की कभी नहीं होती, तथापि कल्प वृक्ष के तरह आपकी प्रसन्नता है, जैसे कल्प वृक्ष समीप जाने से और इच्छा करने से फल देता है, ऐसे ही आप भी शरण आने से इच्छा के अनुकूल फल देते हैं ॥ २७ ॥

मत्प्राणरक्षणमनन्त ! पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुम्।
खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि॥ २९॥
एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यन्तयोः पृथगवस्यसि मध्यतश्च।
सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः॥ ३०॥
त्वं वा इदं सदसदीश ! भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था।
यद्यस्य जन्म निधनं स्थितिरीक्षणं च तद्वै तदेव वसुकालवदष्टितर्वोः॥ ३१॥
न्यस्येदमात्मनि जगद्विलयाम्बुमध्ये शेषेऽऽत्मना निजसुखानुभवो निरीहः।
योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युङ्क्ते॥ ३२॥

भाषा टीका।

संसार रूप सर्प विशिष्ट कूप में पड़े हुए जनों के प्रसङ्ग से मैं भी उसी कूप में गिरता हुआ वर्त्तमान था, श्रीनारदजी ने अपना करके मुझे ग्रहण किया है भगवान्! सो मैं आप के दासों की सेवा को कैसा भूल सकता हूं॥ २८॥

श्रीधरस्वामिकृतभावार्थदीपिका।

न चेदं त्वया मदनुग्रहार्थं कृतं किन्त्वन्यार्थमित्याह—भो अनन्त! यदेतन्मत्प्राणरक्षणं मां हन्तुमुद्यतस्य मत्पितुर्वधश्च तदुभयं स्वभृत्यऋषिवाक्यमृतं सत्यं विधातुमित्यहं मन्ये कुतः यद्यस्मादसद्युक्तं विधित्सुः खड्गं प्रगृह्यावोचत् किं मदपरो मद्व्यतिरिक्तोऽन्य ईश्वरोऽस्ति तर्हि त्वामिदानीमवतु तव कं शिरोऽहं हरामीति पाठान्तरेऽप्ययमेवार्थः। यद्यदाऽवोचत्तदा मत्प्राणरक्षणमिति वाऽन्वयः एतच्च सत्यं विधातुं निजभृत्यभाषितमित्यत्रैव बहुधा व्याख्यातम्॥ २९॥

न चेदं पक्षपातेन रक्षणं दैत्यहननञ्च त्वयि स्वाभाविकं किन्तु मायागुणोपाधिकं सर्वात्मके त्वयि स्वतस्तदयोगादित्याह एकइति। एतच्च जगत् त्वमेवैकः यद्यतः अमुष्यादावन्ते च पृथगवस्यसि विरामं करोषि सन्मात्रतया कारणत्वेनावधित्वेन च वर्तसइत्यर्थः। अतोमध्यतश्च त्वमेव कुतस्तर्हि भेदप्रतीतिरत आह, निजमायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वा तदनुप्रविष्टस्तथन्तैर्गुणैर्हेतुभूतैर्नानेव रक्षकइव हन्तेव चावसितः प्रतीतः तदुक्तं स्कन्धोपक्रमे “निर्गुणोऽपि ह्यजोऽव्यक्तोभगवान्प्रकृतेः परः। स्वमायागुणमाविश्य बाध्यबाधकतां गतः॥ ” इत्यादिना॥ ३०॥

ननु, यद्येतज्जगदहमेव तर्हि जगतो वैषम्येण मम वैषम्यमपि किं न स्यादित्यतआह। त्वं वै त्वमेवेदं सदसत्कार्यकारणात्मकं जगत्तु त्वत्तः पृथक् भवांस्तु ततोऽन्यः आद्यन्तयोः पृथगवस्थानात् यद्यस्मादेवमतोऽयमात्मीयोऽयं पर इति या बुद्धिः साऽपार्था मायैव कार्यकारणाभेदं दृष्टान्तेन साधयति—यद्यतो यस्य जन्म ईक्षणं प्रकाशश्च यस्मिन्निधनञ्च स्थितिश्च तद्वै तदेव अष्टिर्बीजं कारणं तरुः कार्यं तयोर्यथा वसुकालमात्रत्वम् अयमर्थः कालशब्देन नीलत्वाद्यसाधारणगुणयोगात्पृथ्वी वसुशब्देन वस्तुमात्रं भूतसूक्ष्मं तत्र तरोर्यथा पृथिवीमयबीजमात्रत्वं तस्य च यथा भूतसूक्ष्ममात्रत्वमेवं सर्वमपि कार्यकारणात्मकं जगत्परमकारणात्मकमेवेति तथाच पारमर्षं सूत्रं “तदनन्यत्वमारम्भणशब्दादिभ्यः” इति. श्रुतिश्च “वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्”इति॥ ३१॥

तत्र तावदन्ते पृथगवस्थानं दर्शयति—न्यस्येदमिति। इदं जगदात्मनैवात्मनि निक्षिप्य स्वसुखमेवानुभवन्निष्क्रियः सम्प्लवयोदकमध्ये शयनं करोषि, तर्हि किं जीवस्येव ममापि तमोवृत्तिरूपा निद्राऽस्ति? नहि नहि. योग एव तु बहिर्वृत्त्यभावसाम्यान्निद्रोच्यत इत्याह—योगेन मीलिते दृशौ येन आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन यतस्तुर्येऽवस्थात्रयातीते स्वरूपे स्थितस्त्वं नतु सुप्तइवाऽऽत्मना तमोयुङ्क्षे योजयसि न पश्यसि न जाग्रत्स्वप्नयोरिव गुणान्विषयांश्चेत्यर्थः॥ ३२॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

यो नारदमुखेन मयि कृतः स एव परमोऽनुग्रहः न चेदमतितुच्छं मत्प्राणरक्षादिरूपं न चेदं त्वया मदनुग्रहार्थं कृतं किन्त्वन्यार्थमित्याह—मत्प्राणरक्षणमिति। हे अनन्त! यदेतन्मत्प्राणरक्षणं मत्पितुर्वधश्चेति तदुभयं स्वभृत्य ऋषिवाक्यम् ऋतं सत्यं यथा भवति तथा विधातुं कर्तुं कृतमित्यहं मन्ये स्वभृत्यऋषिवाक्यमित्यत्र निजभृत्यभाषितम् इत्यत्रैवार्थो द्रष्टव्यः किञ्च यदस्मत्पिता विधित्सुर्मद्वधमिति शेषः। मां जिघांसुरित्यर्थः। खड्गं प्रगृह्य मत्तोऽन्यश्चेदीश्वरस्त्वद्रक्षकोऽस्ति तर्हि स त्वामिदानीमवतु रक्षतु तव कं शिरोहरामीति यदवोचदुक्तवान् तदीश्वरान्तरराहित्य वचः असदसत्यं च विधातुं मत्प्राणरक्षादिकं त्वया कृतमित्यहं मन्ये इत्यर्थः॥ २९॥

एवं कोपोपशमनप्रार्थनानुकूलोक्तं स्वाभिप्रेतं तद्दास्ययोगं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

संग्राह्य इदानीं कृत्स्नचिदचिदात्मकजगदन्तरात्मानं तच्छरीरकं तदुत्पत्तिस्थितिलयकारणं तदनन्यं स्तौति–एक इति । एतत्परिदृश्यमानं जगच्चिदचिदात्मकं कृत्स्नं जगदेकस्त्वमेव. एतद्विभक्तनामरूपं चिदचिदात्मकं जगन्निर्दिश्य तस्य त्वच्छब्दवाच्यब्रह्मणोऽनन्यत्वं साध्यते "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यत्र यथैव इत्यनेनाविभक्तनामरूपचिदचिच्छरीरकत्वं कारणावस्थावस्थितमुच्यते यथै कमेवाद्वितीया मित्यत्रैक शब्देन तत्र हि वक्ष्यमाणनामरूपविभागनिबन्धनबहुत्व प्रति सम्बन्धैक्यं एकदचिच्छरीरकत्वं कारणावस्थावस्थितमुच्यते. यथा "एकमेवाद्वितीयम्" इत्यत्रैकशब्देन तत्र हि वक्ष्यमाणनामरूपविभागनिबन्धनबहुत्वप्रतिसम्बन्ध्यैक्यम् एकशब्दार्थः । अत्राप्येतच्छब्देन प्रसिद्धपरामर्शिना यदभिप्रेतं नामरूपविभागप्रयुक्तं बहुत्वं तत्प्रतिसम्बन्ध्येकत्वं तद्विभागाभावनिबन्धनमुच्यते, तदयमर्थः । यथा कारणावस्थायां घटशरावादिनामरूपविभागरहित एकत्वेनावस्थितो मृत्पिण्डः पश्चाद्घटादिरूपेण परिणतनामरूपविभागविभक्तस्तेभ्योऽनन्य एव, एवं त्वमपि कारणावस्थायां नामरूपविभागानर्हचिदचिच्छरीरकतयैकत्वेनावस्थितो देवादिनामरूपविभागार्हस्थूलचिदचिच्छरीरकत्वेन परिणतस्ततोऽभिन्न इति कार्यकारणयोरनन्यद्रव्यत्वात्त्वत्कार्यभूतजगदनन्यस्त्वं कार्यत्वकारणत्वयोस्ततो द्रव्यस्यावस्था विशेषरूपत्वेन सर्वावस्थास्वनुस्यूतं द्रव्यमेकमेवेति भावः । तदेव सहेतुकमुपपादयति, यत् यस्मात्त्वमस्य जगत आद्यन्तयोरवस्थयोः पृथगवस्थानात्मानमिति शेषः । पृथक् मध्यावस्थारहितमात्मानम् अवस्यसि पर्यवसितं करोषि जगत आदौ सृष्टेः पूर्वं तस्यान्ते प्रलये चात्मानं पर्यवशेषयसि ततो मध्यतः मध्यावस्थायाञ्च त्वमेव, तथाहि कटकमकुटादिकारणतया कटकाद्यवस्थातः पूर्वमवस्थितः स्वर्णपिण्डः कटकाद्यवस्थायाः पर्यवशेषितो मध्यतः कटकाद्यवस्थायास्तदवस्थावतो द्रव्यान्नभिद्यते तद्वदिति भावः एवं जगतो भिन्नत्वोपपादनेन जगदुपादानत्वमुक्तम् अथ तन्निमित्तकारणत्वं तदुपादानत्वप्रयुक्तविकारित्वादिदोषपरिहारं ———— सूचयन् कार्यावस्थायां नानात्वेनावस्थानञ्चाह सृष्ट्वेति गुणव्यतिकरं सत्त्वादिप्राकृतगुणपरिणामात्मकम् इदं जगत् निजमायया आत्मीयसङ्कल्परूपज्ञानेन सृष्ट्वा तत्सृष्टं जगदनुप्रविष्टोऽन्तरात्मतयानुप्रविष्टः "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुत्युक्तरीत्या तावत्स्वानुप्रवेशेनैव सृष्टं जगच्चिदचिदात्मकं पुनः संरक्षणोपयुक्तसङ्कल्परूपज्ञानद्वारान्तरात्मतयानुप्रविष्टस्तैः स्वशरीरभूतैश्चिदचिदात्मकैः देवादिकैः शरीरैर्नानेव भिन्न इवावसितः प्रतीतः अतो देवमनुष्यादिभेदभिन्नं जगत्त्वमेवेति भावः । सृष्ट्वानुप्रविष्ट इति सृष्ट्यनुप्रवेशयोरेककर्तृकत्वकथनेन जगन्निमित्तकारणत्वं तच्च निष्कृष्टविशेष्यांशभूतस्वरूपस्यैवेति च फलितं येनाकारेणानुप्रवेशस्तेनैवाकारेण स्रष्टृत्वमपि. एवञ्च विशिष्टाकारेणानुप्रवेशकृतेनैवाकारेण स्रष्टृत्वं हि क्त्वाप्रत्ययस्वारस्यादवगम्यते अनुप्रवेशश्च विशेष्याकारेणेति तेनैवाकारेण स्रष्टृत्वमपि एवं च विशिष्टाकारेणोपादानत्वं विशेष्याकारेण तु निमित्तकारणत्वमित्युक्तं भवति. अत एव चेदं सृष्ट्वेतीदं शब्दनिर्दिष्टं सृष्टिंप्रति कर्मभूतं जगत् चिदचिदुभयात्मकमेव साक्षादुत्पत्त्यावस्थाश्रयमित्यवगम्यते, अनुप्रविष्ट इत्यनेन तत्तदवस्थानियोक्तृतयान्तरात्मतयानुप्रवेशकथनेन स्वविशेषणीभूतचिदचिद्द्वारा तद्गतोत्पत्त्याद्यवस्थाश्रयत्वमवगम्यते अनुप्रविष्ट इत्यनेनात्मत्वकथनेन साक्षाद्दृगतविकारास्पर्शश्चोक्तः अत एवोपादानत्वप्रयुक्तविकारित्वादिदोषश्च परिहृतः जगतः शरीरत्वकथनेन शरीरशब्दबुद्धीनामात्मन्यभिकरणन्यायेनात्मपर्यन्तत्वज्ञापनेऽपि तस्य जगदनन्यत्वे हेतुरित्युक्तं भवति ॥ ३० ॥

ननु, त्वत्पितादयश्चतुर्मुखादिकमेवेश्वरं मन्यमानाः कृत्स्नं जगत्तत्कारणकं तदनन्यमभ्यवदन्त त्वन्तु मदेककारणकं मदभिन्नं च जगन्मन्यसे तदेतद्विरुद्धमित्याशङ्कायां देहात्मबुद्धिवज्जीवेश्वरबुद्धेर्भ्रान्तिरूपतां वदन्नुक्तमेव कार्यकारणयोरनन्यत्वं दृष्टान्तमुखेन दर्शयति–त्वमिति । हे ईश ! सदसदात्मकं चिदचिदात्मकम् इदं जगत्त्वमेव चिदचिदात्मकजगत्कारणभूतस्तदनन्यश्चेश्वरस्त्वमेव, नान्य ईश्वर इत्यर्थः । ईशेति सम्बोधनकारणादिदं जगत्कारणभूतस्तदनन्यश्चेश्वरस्त्वमेवेत्यर्थः । आत्मनि जीवात्मनि परबुद्धिर्या ईश्वरबुद्धिः सा अपार्था अर्थशून्या मायाऽविद्याकार्यभूता अज्ञानमूला भ्रान्तिरूपेति यावत् देहात्मवादवज्जीवेश्वरवादोऽपि भ्रममूल एवेत्यर्थः । यत एवं ततस्तस्माज्जीवादन्य एव भवानीश्वरः कर्मवश्यस्य जीवस्यैवंविधजगन्निमित्तोपादानकारणत्वासंभवान्मुक्तस्य जगद्व्यापारवर्जनाच्चेति भावः । अतश्चिदचिदात्मकं जगत्त्वमेव. ननु, मत्कारणकत्वमात्रेण कथं मदनन्यं जगत्तत्राह—यदिति । जन्म उत्पत्तिर्निधनं नाशः स्थितिः पालनम् ईक्षणं प्रकाशः जन्मादिशब्देन संतुलेक्ष्यते यस्योत्पत्तिस्थितिविनाशप्रकाशानां हेतुभूतं तद्धेतदेव तत्कार्यस्योपादानकारणादव्यतिरिक्तम्, यद्वा, यतः यस्य जन्मादयस्तदेव तत्र दृष्टान्तद्वयमाह—वसुकालवदृष्टितर्वोरिति । वसु शब्दो वसुमतीं पृथ्वीं लक्षयति यथा भानुशब्दो भानुमन्तं लक्षयति प्रतिपादयति तद्वत् उष्टिः प्रभातकालः तरुर्वृक्षस्तयोर्जन्मादिहेतुभूतकालवद्वसुमतीवदिति व्युत्क्रमेणान्वयः । यथा प्रभातादिकालावयवाः स्वोपादानभूतमहाकालादनतिरिक्ताः यथा च वृक्षः पृथिव्या अनतिरिक्तस्तद्वदित्यर्थः । ननु कालवदुप्तितर्वोरिति पाठे, तत्रैवं योजना ईश्वरो जगदुपादानं निमित्तं चातस्तद्द्वन्द्वे दृष्टान्तः कालः प्रभातादिकालावयवानां कालत्वमुपादानं वृक्षादीनां तु निमित्तं यथा प्रभातादिः कालाव्यतिरिक्तः यथा वृक्षश्चाभूदस्ति भविष्यतीति कालाविनाभूतः प्रतीयते तद्वन्निमित्तोपादानभूतादीश्वराज्जगदव्यतिरिक्तमित्यर्थः । अष्टितर्वोरित्यपि पाठः तत्रैवं व्याख्याने अष्टिर्बीजं कारणं तरुः कार्यं तयोर्यथा वन्न्कालात्मकत्वम्, अयमर्थः कालशब्देन नीलत्वादि साधारणगुणयोगात् पृथ्वी लक्ष्यते वसुशब्देन वस्तुमात्रं भूतसूक्ष्मं तत्र तरोर्यथा पृथ्वीमयबीजपरिणामात्मकत्वेन ततोऽभेदः तस्य च यथाभूतसूक्ष्मात्मकत्वम् एवं सर्वस्य जगतः परमकारणभूतपरमात्मात्मकत्वमेवेति ॥ ३१ ॥

एवं जगतस्तदनन्यत्वं तदेकेश्वरत्वं तदेककारणत्वं चोक्तम् अथ चतुर्मुखस्य तत्कार्यत्वं तदाहितसृष्ट्युपयुक्तज्ञानशक्त्यादिमत्त्वञ्च विवक्षुस्तावदुक्तं विश्वस्याद्यन्तयोः पृथगवस्थानं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्रान्ते पृथगवस्थितिप्रकारमाह—त्वय्येवेति । इदं परिदृश्यमानं चिदचिदात्मकं जगत् आत्मनि त्वय्योपसंहृत्य शेषे शयानोऽसि शेषात्मनेति पाठे, शेषस्य कारणात्मनावशिष्टस्य चिदचिद्द्रव्य स्यान्तरात्मना स्वरूपेणात्मनि स्वस्मिन्नेवावस्थित इत्यन्वयः । कथंभूतः स्वतो निरुपाधिकं निजसुखस्यानुभवो यस्यातएव निरीहः निष्क्रियः योगेन निजसुखानुभवरूपयोगेन मीलितदृक् निवृत्तसंकल्परूपज्ञानः मीलितदृशेति पाठे मीलितदृशा योगेन निवृत्तसङ्कल्परूपज्ञानावस्थानयोगेन विशिष्ट इति शेषः । मीलितदृगित्यनेन प्रसक्तं निद्राप्रसङ्गं निराह, वीतनिद्र इति आधाराऽन्तरनैरपेक्ष्यमाह आत्मनि स्थितः इति कथम्भूते तुर्ये जाग्रदाद्यवस्थात्रयातीते प्रथमान्तपाठेऽपि इदमेव तत्रान्वयः एतार्थः । तमः सूक्ष्मावस्था प्रकृतिः "अक्षरं तमसि लीयते" "आसीदिदं तमोभूतम्" इति श्रौतत्वात्तत्प्रयोगात् तमस्तद्गुणान् सत्त्वादींश्च न युङ्क्षे न सम्बध्नासि प्रकृतितद्गुणास्पृष्टो भवसीत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वभृत्यभाषितमृतं कर्तुं स्तम्भादभूदिति यत्सूचितं पूर्वत्र तदिदानीं स्पष्टमाह—मत्प्राणेति । मत्प्राणरक्षणं मम पितुर्वधं च स्वभृत्यनारदऋषिवाक्यं च प्रसाधयितुं खड्गं प्रगृह्य हिरण्यकशिपुर्यदि मदपर ईश्वरोऽस्ति स त्वामवतु तस्य तव कं शिरो हरामीति यदवोचत् तच्च ऋतं विधातुं अयमवतार इति मन्य इत्यन्वयः ॥ २९ ॥

भूविजृम्भणानिभ्रंशितेन्द्राद्यैश्वर्यस्य मत्पितुर्हननमस्माकं चित्रं चेदपि न तव चित्रं तस्य जगत्येकत्वात् जगच्च त्वत्सृष्टं त्वत्प्रविष्टं त्वदधीनसत्ताकमतः स्तम्भादाविर्भावोऽपि युक्त इत्याह—एक इति । अयमर्थः एतज्जगत्त्वमेव नान्यः कुतः एकः प्रधानः प्राधान्यं च कुतोऽवगम्यत इति तत्राह—अमुष्य इति । अमुष्य जगत आद्यन्तयोरुत्पत्तेः पूर्वं विनाशादूर्ध्वं च मध्यतः स्थितिकाले च त्वमेवावस्थितोऽसि सर्वातिनिर्णीतोऽसि शास्त्रेण इति यस्मात् ननु जगतस्तद्विकारत्वेन तद्विवर्तत्वेन वा त्वदवसानं युक्तमत्राह—पृथगिति । भिन्नत्वेनेत्यर्थः । पुनः सृष्टिकाले निजमायया स्वसामर्थ्येन स्वाधीनया चिदचित्प्रकृत्या चेदं गुणव्यतिकरं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्भिन्नैः पदार्थैर्निमित्तैः नानेव भिन्न इव ननु भिन्न इत्यवसितोऽसीति यत्तस्माच्च । प्रतिदर्शमिव नैकधार्कमेकमिति स्वोक्तेः "इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रुतेश्च "नेह नानास्ति किञ्चन" इत्यादि श्रुत्या नानात्वस्य निषिद्धत्वात् नानेवानुविधावतीत्यादिनानर्थहेतुत्वाच्च भेददृष्टेः ॥ ३० ॥

हरेर्जगदन्यत्वस्य स्पष्टमप्रतीतेः तदर्थं पूर्वपद्योक्तं विशदयति त्वं वायुरिति । हे ईश ! इदं सदसच्चराचरलक्षणं जगत्त्रयं सत्ताया अपि त्वदधीनत्वादयं व्यपदेशो न तादात्म्यात् तस्य तत्तदात्मत्वं किं न स्यादिति तत्राह—भवानिति । ततो जगतो भवानन्योऽपि अतो भिन्नोऽपीत्यर्थः मत्स्वातन्त्र्यवज्जगत्स्वातन्त्र्यमपि किं न स्यादुभयोरंशोऽपि इदमतः कथं स्यादिति तत्राह—मायेति । आत्मेत्युपलक्षणम् आत्मानात्मलक्षणस्य प्रपञ्चस्य परत्वबुद्धिः स्वातन्त्र्यज्ञानं यत्सेयं मायाऽविद्यमाना कुत इति तत्राह—अपार्थेति । श्रीनारायणस्य तव स्वातन्त्र्यज्ञानं यथा पुरुषार्थसाधनं तथाऽन्यस्य स्वातन्त्र्यज्ञानमनर्थहेतुरिति उभयं हिशब्देनासिद्धमिति दर्शयति स्वतन्त्रजीवात्मकत्वात्स्वतन्त्रं जगदित्यतोऽप्याह—मायेति आत्मनो जीवस्य परत्वबुद्धिः जीवस्य परमैक्ये परमात्मना यज्जन्मादिकं क्रियते तदनेनापि कर्तव्यम् । तदनुभवविरुद्धमतो यदधीनं जन्मादिकं तद्वस्तु तद्देवेति प्राधान्यविवक्षया अभेदव्यपदेशोपपत्तिरिति प्रकारान्तरेण तद्वानिमाह—यद्यस्येति । अयमर्थः । यस्य जगतो जन्मादिकं यदधीनं तज्जगत्तदेवेत्युच्यते इति यस्मात्तस्माज्जगत्त्वमेवेत्यर्थः । अस्मिन्नर्थे दृष्टान्तमाह—बीजेति । उप्तयोः वृक्षदाहकयोः कालवत् कालाधीनत्ववत् एतदेवाचार्यः स्पष्टमित्युक्तं यथा वृक्षश्च वृक्षदाहकश्च देशकालाधीनत्वादेवं कालश्चेत्युच्यते एवञ्च त्वदधीनत्वात्सर्वस्य सर्वमित्युच्यते अतस्तद्भिन्नोऽसीति । "उष दाहे" इति धातुः अत्र खलु शब्दः साक्षाद्वैकर्ण्यमर्थे वर्तते "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" इति सूत्रात् अलमैक्यकथानिष्टत्वमित्यर्थः । "यएष आदित्ये पुरुषो दृश्यते सोऽहमस्मि सएवाहमस्मि यएषचन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि" इत्यादि श्रुतौ स्वस्यान्यस्य परमात्मत्वोपदेशः प्रतीयते अतः कथं भेदः कथ्यते इत्यतोऽप्याह—मायेति । आत्माहं च परोऽन्यश्च परश्च परमेश्वर एवेति याबुद्धिरियमपार्था माया स्वीकृतसमासदधीनत्वात्तदन्तर्यामित्वेन स्थितत्वाच्च सोऽहमस्मीत्युच्यते न तु तद्रूपत्वात्तदपायार्थैकत्वम् अहं चान्यश्च परमेश्वर एवेत्यपार्थाभ्रान्तिस्तदधीनत्वात्सदित्युच्यते न स्वरूपत्वादित्यर्थः । इति द्वैतयां स्थानम् ॥ ३१ ॥

सत्वमाद्यन्तयोरित्यत्रापि श्रीहरिरवशिष्यते इत्युक्तं तं प्रकारं दर्शयति—त्वय्येवेति । विलयावधिमध्ये इदं जगदात्मनि स्वोदरे न्यस्य शेषात्मनाभूत्वा तुर्यस्थितो जाग्रदाद्यवस्थाप्रवृत्तिशून्यमूर्तौ स्थितस्त्वं तमः प्रकृतिं गुणान्सत्त्वादीन्नात्मनि युङ्क्षे न "प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः क्षोभयामास" इत्यादौ प्रतीतप्रस्तावात्ताम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मत्प्राणरक्षणादिकञ्च तथैवेत्याह—मत्प्राणेति ॥ २९ ॥

अथ रसान्तरेण तत्कोपशमनं तथाहि कथमयं वराकस्तव कोपविषयो यत एक इत्यादि तथापि पूर्णेन भक्तिरुदेत्यनेन तथाहि—तदेवं भक्तानुग्रहसम्बन्धेन साक्षाद्देवावतीर्णो भावमिव रक्षणं करोषीति स्थितं चरमन्तर्यामितया सामान्यतो विश्वरक्षणं तच्च त्वयैव क्रियमाणमपि न साक्षात् किन्त्वन्यद्वारैवेति दर्शयन्तदनुसङ्कुलः सृष्ट्यादिलीलामाह—एक इति ॥ ३० ॥

तत्र तस्य वैलक्षण्यं स्थापयति त्वम्वा इति ॥ ३१ ॥

प्रसङ्गेन महाभक्तधिक्कृत्याद्यनुग्रहतः सृष्ट्यादिमयीं साक्षाल्लीलामेव विशेषतो वर्णयति—त्वय्येवेदमिति सप्तभिः । आत्मनि

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गर्भोदकशायिरूपे जगत् प्रेरकं योगमाह तुर्ये स्वतुरीयतत्त्वे श्रीवासुदेवाख्ये स्थितः । तस्मात्त्वेनात्मन्युररीकृत स्फूर्तिः इत्यर्थः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु तव भक्तवश्यत्वात् भक्तकृपानुगामित्वं च लोकेषु तव कृपा दृष्टा ननु त्वं स्वभक्तमनाश्रितान् कांश्चिदपि कृपयसीति नैव कापि वैषम्यं मय्यपि तव स्वभक्तानुरोधेनैव सर्वं एवानुग्रह इत्याह—सदिति । स्वभृत्यः ऋषिर्यो नारदस्तस्य वाक्यं सत्यं कर्तुमित्यहं मन्ये तस्मात्तु मदर्थं प्रार्थितेन श्रीनारदेन त्वत्पुत्रस्य विद्वेषकनाशादिना कल्याणं भविष्यतीति वरदानात् यदुक्तम् "ऋषिं पर्यचरत्तत्र भक्त्या परमया सती । अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः" इति यद्यस्मादसत् असिहस्तं बिभ्रत् कः शिरो हरामीति तथाहि दिग्गजादिभ्यो यथा मद्रक्षणं तथा तद्वृत्तान्तसम्भवतीति तद्वधश्च त्वया कृत इति एवं भगवतः सर्वत्र साम्येऽपि भक्तवश्यत्वं विशिष्यत इति प्रह्लादेन ज्ञापितम् ॥ २९ ॥

एवं गुणातीतानां मादृशभक्तानां गुणातीतेन त्वया भक्तवत्सलेन पालनं गुणातीतमेव गुणमयस्य जगतस्तु सृष्टिपालनसंहारा उदासीनेनैव त्वया गुणमया एवेति यदस्तस्य जगतस्तत्कारणकत्वात् त्वन्मयत्वमेवेत्याह—एक इति । यद्यस्मादमुष्य आदौ अन्ते मध्ये च अमुष्मात् पृथग्भूतोऽपि त्वमेव प्रवर्त्तसि सर्वमायं विवेकिभिः प्रतीयसे इत्यर्थः कुतस्तर्हि तथा न प्रतीतिस्तत्राह निजमायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वेति निर्गुणस्य तव शक्तेः स्वरूपशक्तित्वाभावादिति भावः । तदनुप्रविष्टस्त्वं त्रैगुण्यहेतुभूतैस्तैरेव हन्तृपालक इव उत्पादक इव प्रतीतः वस्तुतस्तु तमोगुण एव हन्ता सत्त्वगुण एव पालकः रजोगुण एव स्रष्टा तत्रौदासीन्येन त्वत्प्रवेशादेव त्वं हन्तेत्यादि व्यपदेशः ॥ ३० ॥

ननु, जगतो मायिकत्वेऽपि मायाया मच्छक्तित्वाज्जगतो वैषम्ये ममापि वैषम्यं किं न स्यादित्यत आह त्वं वै इदं सदसत् कार्यकारणात्मकं जगत् प्राधानिकत्वात् सत्यमेव न तु त्वत्तः पृथक् । ततोऽस्माज्जगतस्तु भवानन्यः पृथगेव आद्यन्तयोः पृथगवस्थानात् यद्यस्तु तस्मिन्नेव जगति आत्मा अयं ममात्मीयः परः अयं ममशत्रुरिति बुद्धिः सा माया अविद्या जीवस्याविद्याकाल्पनिकैवेत्यर्थः । अपार्था सा तु मिथ्याभूतैवेत्यर्थः । कार्यस्य कारणाभेदमपि साधयन् दृष्टान्तेन परमकारणस्य भगवतो वैषम्यमपि निराकरोति यद्यतः यस्य जन्मनिधनस्थितिप्रकाशाः यस्मिन्निदं स्थितिश्च तद्वैतदेव यदि बीजं कारणं तरुः कार्यं तयोर्वसुकालवत् वसुत्वकालत्वे यथेत्यर्थः वसुशब्देन वस्तुमात्रं भूतसूक्ष्ममुच्यते कालशब्देन नीलत्वाद्याधारगुणायोगात् पृथ्वी कालशब्दोऽत्र नीलगुणवाची ततश्च कारणकार्यात्मकयोरविशेषयोरेव यथा पृथ्वीत्वं गन्धत्वञ्च तथैव कारणकार्यात्मकस्य जगतः प्रधानत्वं परमेश्वरत्वं च अयमर्थः यथा वसुमात्रत्वकालस्य कालमात्रत्वे: अभिन्नत्वं प्रधानस्य प्रधानमात्रत्वं महदादीनां महदादिमात्रत्वं देवतिर्यगादिमयं जगतः, एवं च तर्हि सर्वकार्यकारणात्मकं यथा भूतसूक्ष्ममेको गन्धएव तथा देवतिर्यगादिसर्वकार्यकारणात्मक एको भवानेव तथा च पारमर्षं सूत्रं "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति. श्रुतिश्च "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति तेन पार्थिवपदार्थानां कालपाषाणादीनां वैषम्येऽपि तत्परमकारणस्य गन्धस्य यथा न वैषम्यं तथैव जगतो वैषम्येऽपि न भगवत इति ॥ ३१ ॥

आद्यन्तमध्यावस्थानेनोक्तं जगत्कारणत्वं प्रपञ्चयति—न्यस्येति पञ्चभि । इदं जगत् आत्मन्येव न्यस्य विसृज्य विगतलयान्यतमः स्वशक्त्या शेते यस्य तस्य कारणार्णवस्य मध्ये शेषे स्वपिषि आत्मना आत्मस्वरूपशक्त्यैव निजसुखस्यानुभवो यस्य सः निरीहः मायिकलीलारहितस्तु: तर्हि किं जीवस्येव ममापि तमोरूपा निद्राभिन्न नहि नहि वहिः वृत्त्यभावसाम्यान्निद्रोच्यते इत्याह योगेन मीलितदृशौ येन आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन यतस्तुरीयं अवस्थात्रयातीतं स्वरूपं स्थित एव ननु तमः सुषुप्तदन्ते युक्ते जीववत् स्वीकरोषि नापि जाग्रत् स्वप्नयोरिव गुणान् विषयान् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीनारदेनोक्तमित्थं प्रति अनन्तानुचर इति तद्विषवाक्यं चानुचरत्वसूचकेन मद्रक्षणेन सत्यं कृतमित्याह—सदिति । यत् यदा अन्य इत्युक्तं पुत्रं यथ्यं निधातं खड्गं प्रगृह्य मदपरः मत्तोऽतिरिक्तश्चेदीश्वरोऽस्ति तर्हि त्वामिदानीमसत् तव कं शिरो हरामीत्यवोचत् मम पितेति शेषः तदा यत् मत्प्राणरक्षणं तदेव मत्पितृवधश्च तत् हि सत्यम् । स्वभृत्यो य ऋषिस्तस्य अनन्तानुचर इति वाक्यमनृतं यथा भवति तथा निधातुमिति अहं मन्ये ॥ २९ ॥

एवं सर्वत्र समेनापि भगवता स्वभक्तपक्षपातित्वेनासुरं हत्वा मद्रक्षणं कृतमित्युक्तमर्थं सर्वहन्तृत्वेन सर्वात्मनापि त्वया बहूनां ब्रह्मादीनां बहून् मधुकैटभादीन् हत्वा रक्षा कृता इत्येवं भगवन्तं स्तौति । एकस्त्वमित्यादिभिर्नवभिः । एतावद्भिर्वात्मकं जगत् त्वमेव "सर्वं खल्विदं ब्रह्म" इति श्रुत एकः सर्वकारणभूतः "स कारणं करणाधिपाधिपः" इति श्रुतेः कुत एतद्वक्तव्यं तत्राह अमुष्य कार्यभूतस्य यस्मात् आद्यन्तयोर्मध्यतो मध्ये च अविच्युताविर्भूतमिति त्वमसि हेतुतया सर्वेभ इत्यर्थः ननु तर्हि मय्यपि जडत्वादयो दोषाः सन्ति इत्यत्राह पृथक् असि चेतनाचेतनरूपात् कार्यभूताज्जगतः स्वरूपतः भिन्न एवासि विकारस्वात्मकजगतो असम्बन्धीत्यर्थः तथाह भगवान् सूत्रकारः "उभयव्यपदेशात्त्वहिकुण्डलवत्" इति सूत्रार्थस्तु तद्व्याख्याने द्रष्टव्यः । यतः गुणव्यतिकरे सर्गाद्गुणपरिणामरूपं स्वांशभूतजीवभोगार्थं अपरिणामस्वरूपमेवेदं जगत् मायया प्रकृत्या सृष्ट्वेत्यर्थः ततः पृथक् स्वरूप एव सृष्ट्वा तत्सृष्टं जगदनुप्रविष्टः त्रैगुण्यानुगतानां जीवानां स्वस्य निग्रहानुग्रहादिकं करोषि त्रैगुण्यानामेव निग्रहादिकर्त्तैव

तस्यैव ते वपुरिदं निजकालशक्त्या सञ्चोदितप्रकृतिधर्मण आत्मगूढम् ।
अम्भस्यनन्तशयनाद्विरमत्समाधेर्नाभेरभूत्स्वकणिकावटवन्महाऽब्जम् ॥ ३३ ॥
तत्सम्भवः कविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिन्त्य ।
नाविन्ददब्दशतमप्सु निमज्जमानो जातेऽङ्कुरे कथमुहोपलभेत बीजम् ॥ ३४ ॥

श्रीमच्छुकेन्द्रचक्रकृतसिद्धान्तप्रदीपः ।

अवसितः तमोगुणावृतेन जीवेन पापकर्मफलदत्वेन निग्रहकर्ता रजोगुणावृतेन ऐहिकपुण्यकर्मफलदत्वेनानुग्रहकर्ता सत्त्वगुणावृतेन जीवेन पारलौकिकसुखदत्वेनानुग्रहकर्ता निश्चितः सन् इदम् वसि ॥ ३० ॥

इमं कार्यकारणयोर्जगद्ब्रह्मणो भेदाभेदसम्बन्धं दृष्टान्तेनोपपादयति, त्वमिति । यतो यस्य जन्मोत्पत्तिः निधनं समाप्तिः स्थितिः पालनमीक्षणं दर्शनम् तद्भिन्नमपि तदेव तदभिन्नमेव वसुकालवत् वसुकालयोरिव वसुकालवत् एको वै शब्द इवार्थे तस्य अस्तित्वो-रित्यन्वयः वसुशब्देन वसुधा गृह्यते तथा च वस्तुतः वसुधातः उत्पत्तिरोषध्यादेः तद्वसुधातो भिन्नमप्यभिन्नमेव कालतः समाप्ति-क्षयादिस्तच्च ततो भिन्नत्वेऽप्यभिन्नम् अपि तोऽस्मात्पालनं शरीरस्य तच्च ततो भिन्नत्वेऽप्यभिन्नम् रुद्रतो दर्शनं हरिनादेस्तच्चापि ततो भिन्नम् एवं हे ईश ! यद्यपि भवान् स्वासाधारणरूपेण ततो जगतो ऽन्यो पि तथापि इदं चिदचिदात्मकं सदसत्स्थूलसूक्ष्मरूपं जगत् वै निश्चितं त्वमेव त्वत्तो भिन्नमप्यभिन्नमेव तथा च श्रुतिः "सर्वं खल्विदं ब्रह्म तज्जलानिति" इति यत् या आत्मनि विश्वात्मनि त्वयि पर बुद्धिः मत्तः सर्वथान्योऽयमिति केवलभेदबुद्धिः सा माया दम्भरूपा अपार्था च "अन्यो सावन्योऽहमस्मि न स वेद यथा पशुः" इति श्रुतेः ॥ ३१ ॥

अथ भगवतः महाप्रलयान्ते परे वैकुण्ठे शयनं तदनन्तरं ब्रह्माण्डोत्पादनं ब्रह्मोत्पादनं तद्रक्षणादिकं च चेष्टितं जीवहितायैवेति वर्णयति—त्वमेवेत्यादिना । निरीहः त्यक्तलोकक्रीडेच्छः अत एव निजसुखस्याऽनुभवो यस्य सः त्मना आत्मना आत्मनि कारणरूपे कार्यरूपमिदं जगत् न्यस्य विलयानि विगतलयानि नित्यानि अप्राकृतानि अम्बूनि यस्मिन् तत्परमं धाम तन्मध्ये योगेन निजानन्दयोगेन निमीलितदृक् प्राकृतनिद्राप्रसङ्गं निवारयति आत्मनिपीतनिद्र इति आत्मना परानन्दस्वरूपप्रकाशेन निपीता निद्रा येन सः शेषे शयनं करोषि तस्य लोकस्य प्रकृतितद्गुणवर्जितत्वमाह, तुर्ये प्रकृता ये लोकाः ऊर्ध्वाधोमध्यभेदात् त्रिविधाः तदपेक्षया चतुर्थे—

"ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः" ॥

इत्येवं त्रिविधजीवागम्ये इत्यर्थः । तत्र स्थितः तमः प्रकृतिं तदीयान् गुणांश्च न युंक्षे न योजयसि तत्र प्रकृतितद्गुणतत्कार्यव्यवहारं नैव प्रवर्त्तयसीत्यर्थः ॥ ३२ ॥

भाषा टीका ।

हे अनंत ! आपने मेरे प्राणों की रक्षा और पिता को वध ये दोनों जो किये सो मैं जानता हूं कि अपने दास और ऋषि लोगों के वाक्य सत्य करने के वास्ते किये, जो मेरा पिता हाथ में खड्ग लेकर बोला कि मेरे से दूसरा यदि ईश्वर है तब तेरी रक्षा करे मैं तेरा मस्तक हरण करताहूं ॥ इतने पर आपने रक्षा करी ॥ २९ ॥

यह संपूर्ण जगत् एक आपही का स्वरूप है इस जगत् के आदि अंत में आपही विराम करते हैं अर्थात् वर्तमान रहते हैं अत एव मध्य में भी आपही हैं आप अपनी निज मायासे गुणों के परिणामात्मक इस जगत् को रचकर उसमें प्रविष्ट होकर नाना सरीके मालूम पड़ते हो ॥ ३० ॥

हे ईश ! यह कार्य कारणात्मक जगत् आपसे पृथक् नहा है आप तो जगत से भिन्न हो क्योंकि ? आदि तथा अंत में स्थूल चेतनाचेतन युत जगत नहीं रहता और आप तो स्थित रहते हो, और यह जो बुद्धि है कि "यह मेरा और यह पराया, सो अपार्थ माया ही है जिस परमात्मा से इस जगत् का जन्म नाश स्थिति और प्रकाश है उसी स्वरूप यह है, जैसे बीज और वृक्ष कार्य कारण मात्र अवस्था से भिन्न हैं ॥ जो जिससे आरम्भ होता है वह भी तत्स्वरूप ही है जैसे मृत्तिका से हुआ घट मृत् स्वरूपही है ॥ ३१ ॥

प्रलय काल के जल मध्य में आप अपने में इस जगत् को लीन कर, निज सुख मात्र के अनुभव वाले निश्चेष्ट होकर सोते हैं उस समय में आप योग से निमीलित दृष्टि वाले होकर आत्मा में निपीत की निद्रा जिसने ऐसे चतुर्थ अवस्था में स्थित होकर तम और गुणों का योग नहीं करते हैं ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदानीं कारणत्वेनाऽद्यावपि पृथगवस्थानं दर्शयन्मध्यतश्च त्वमेवेत्येतत्प्रपञ्चयति चतुर्भिः । यस्त्वमम्भसि शेषे तस्यैव ते इदं अगद्वपुः स्वरूपं नान्यस्य यतस्त्वं मध्यतोऽपि तस्य कथम्भूतस्य निजया कालशक्त्या सञ्चोदिताः प्रकृतेर्धर्माः सत्त्वादयो येन स्वरूपत्वे हेतुः अनन्तशयनाच्छेषपर्यङ्काद्विरमन्समाधिर्यस्य तस्य तव नाभेः सकाशात् एकार्णवोदके महाब्जं लोकपद्ममभूत् कथम्भूतं आत्मनि त्वय्येव गूढं सत् स्वकणिकातः सूक्ष्माद्वटबीजान्महावट इव ॥ ३३ ॥

स त्वात्मयोनिरतिविस्मित आस्थितोऽब्जं कालेन तीव्रतपसा परिशुद्धभावः ।
त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं भूतेन्द्रियाशयमये विततं ददर्श ॥ ३५ ॥
एवं सहस्रवदनाङ्घ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यम् ।
मायामयं सदुपलक्षितसन्निवेशं दृष्ट्वा महापुरुषमाप मुदं विरिञ्चः ॥ ३६ ॥
तस्मै भवान्हयशिर(१)स्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ ।
हत्वाऽऽनयच्छ्रुतिगणांस्तु रजस्तमश्च सत्त्वं तव प्रियतमां तनुमामनन्ति ॥ ३७ ॥
इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान् ।
धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ॥ ३८ ॥
नैतन्मनस्तव कथासु विकुण्ठनाथ ! सम्प्रीयते दुरितदुष्टमसाधु तीव्रम् ।
कामातुरं हर्षशोकभयैषणार्तं तस्मिन्कथं तव गतिं विमृशामि दीनः ॥ ३९ ॥
जिह्वैकतोऽच्युत ! विकर्षति मावितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ।
घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं कारणत्वेनानुगतः सन्भवांस्तस्माद्व्यतिरिक्त इत्युक्तम् एतदेव शुद्धसत्त्वस्य ब्रह्मणोऽनुभवेन स्फुटयितुं तस्य प्राक्तनीमवस्थामाह—तस्मिन्नब्जे सम्भवो यस्य कविर्ब्रह्मा अतः पद्मादन्यदपश्यन् बीजमुपादानकारणभूतं त्वां स्वस्मिन्व्याप्तं सन्तमपि नाविन्दत् युक्तं चैतत् उह अहो अङ्कुरे जाते सति बीजं तदनुगतं कारणं पृथक्कथं नाम पुमान्पश्येत् ॥ ३४ ॥

तदुपासनया तु स्वस्मिन्नेव दृष्टवानित्याह—स त्विति । परावृत्त्याऽब्जमास्थितः सन् तीव्रेण तपसा ध्यानेन अनेन सन्मात्ररूपेणोपादानतया दर्शनमुक्तम् ॥ ३५ ॥

ईश्वरत्वेन च दृष्ट्वा कृतार्थोऽभवदित्याह—एवमनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धम् मायामयं मायाप्रधानं सता प्रपञ्चेनोपलक्षितः सन्निवेशः पादादिरचना यस्य ॥ ३६ ॥

तदा च भवांस्तस्यानुग्रहं कृतवानित्याह—तस्मा इति । हयग्रीवमूर्तिं बिभ्रत्सन् रजस्तमोरूपौ मधुकैटभाख्यौ हत्वा तस्मै श्रुतिगणान्समर्पितवान् तत्र हेतुः सत्त्वमिति ॥ ३७ ॥

एकस्त्वमेवेत्यादिभिरष्टभिः श्लोकैर्यदुक्तं पक्षपातेन रक्षणं तद्विपक्षवधश्च सत्त्वोपाधिको न तु स्वत इति तदुपसंहरति—इत्थमिति । विभावयसि पालयसि हंसि घातयसि कलौ तु तन्न करोषि यतश्छन्नस्त्वं कलावभवः अतस्त्रिष्वेव युगेष्वाविर्भावात्त्वमेवंभूतस्त्वं त्रियुग इति प्रसिद्धः ॥ ३८ ॥

तदेवं भगवतस्तत्त्वं निरूप्य स्वस्य च तद्विचारायोग्यतां निवेदयन्प्रार्थयते—नैतदिति त्रिभिः । असाधु बहिर्मुखम् तीव्रं दुर्धरम् हर्षशोकभयैरेषणाभिश्चार्तं दुःखितमपि त्वत्कथासु न संप्रीयते तस्मिन्नेवंभूते मनसि सति कथं तव तत्त्वं विचारयामि ॥ ३९ ॥

किञ्च जिह्वा अवितृप्ता सती भो अच्युत ! मा मां एको मधुरादिरसं प्रत्याकर्षति उदरं तु क्षुधासन्तप्तं अन्यत्र यत्किञ्चिदाहारमात्रंप्रति चपला दृक् चक्षुः कर्मशक्तिः कर्मेन्द्रियाणि लुनन्ति त्रोटयन्ति ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुपसंहृतजगतः कारणतयावस्थितात्त्वत्तः उत्पत्तिप्रकारं मध्यतस्तत्तत्त्वप्रदर्शनायाह—तस्यैवेति । तस्योक्तविधमवस्थितस्य तव नाभेः पुष्करशरीरभूतं जगदाकारं महाब्जमभूदभूत् कथंभूतस्य तव निजकालशक्त्या स्वांशभूतया कालाख्यया शक्त्या सञ्चोदिता क्षुभितगुणा प्रकृतिरेव धर्मः अपूर्वस्वरूपविशेषणं यस्य तस्य अम्भसि अनन्तशयनादीनि लब्धलोपपद्मर्माशेषपर्यङ्कारूढस्य निरस्तसमाधिः जगद्व्यापारवैमुख्यमादर्शयन् रूपो यस्य निसृष्टोर्मिति फलितोऽर्थः, एवंभूतस्य तव नाभेः स्वशरीरभूतं जगदात्मकमात्मनि त्वयि निगूढं सूक्ष्मावस्थापन्नं महाब्जं स्वकार्यकाले बीजादङ्कुरवदभूदित्यर्थः ॥ ३३ ॥

तस्मिन्नब्जे महाब्जसंभवः कविर्ब्रह्मा अतः पद्मादन्यदपश्यमानः स्वात्मन्यन्तरात्मतया तत्र व्याप्तं बीजं पश्यन् कारणभूतं त्वां स्वस्मादुपाहितया अपृथक्स्थितं यद्यपि तथापि निमज्जमानो विचिन्वन्नन्वेषयन्नाविन्दत नोपलब्धवान् अहो तथाहि अङ्कुरे जाते बीजं कथमुपलभेत नोपलभेतैवेत्यर्थः । यथाऽङ्कुरे जाते सति ततः पृथक्स्थितं बीजं नोपलभेत बालकतया तत्कार्य-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भूतं जगदात्मकं पद्मं मदभिन्नमिति दर्शयितुं भवान्मद्बुध्या विचिन्वतापि ब्रह्मणा नोपलब्धइति भावः ॥ ३४ ॥

ततो भगवदुपासनया स्वस्मिन्नेव दृष्टवानित्याह—मत्विति । स तु विचिन्वन्नात्मयोनिर्ब्रह्मा अतिविस्मितः अब्दशतपर्यन्तान्वेषणेनापि अनुपलम्भप्रयुक्तविस्मययुक्तः परावृत्याऽऽश्रमाश्रितस्सन् तीव्रेण तपसा ध्यानेन परिशुद्धभावः परिशुद्धमनाः निरस्तत्वद्दर्शनविरोधिकर्मा हे ईश ! त्वामात्मन्येव विततं व्याप्तं ददर्श कथंभूतं भुवि गन्धमिवातिसूक्ष्मं स्वात्मनः पृथग्विभागानर्हम् अति सूक्ष्मभूतेति समस्तपाठे भुवि गन्धमिवात्मनि विततं ददर्श भुवि गन्धमित्येतावन्मात्रे दृष्टान्तः अति सूक्ष्माणि विभागानर्हाणि कारणात्मतामापन्नानि भूतान्याकाशादीनि इन्द्रियाणि बाह्यान्तःकरणानि च तन्मयं तत्प्रचुरमेवंभूतं तावद्ददर्श ॥ ३५ ॥

ततः सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धमतएव मायामयमाश्चर्यरूपं सदुपलक्षणसन्निवेशं सता सर्वैर्नानात्वेनोपलक्षणीयः सन्निवेशः वदनाद्यवयवसंस्थानं यस्य तं सता सूक्ष्मरूपेण सता प्रपञ्चेनोपलक्षितः सन्निवेशो वदनादिविन्यासो यस्य तमित्यर्थः एवंभूतं महापुरुषं दृष्ट्वा विरिञ्चो ब्रह्मा मुदं हर्षमाप प्राप्तवान् ॥ ३६ ॥

तदा च तं भवाननुगृहीतवान् इत्याह—तस्मा इति । तस्मै तीव्रतपसा परिशुद्धभावयोक्तविधं त्वां दृष्टवते विरिञ्चाय भवान् हयशिरस्तनुतां हयग्रीवरूपं बिभ्रत् श्रुतिगणान्सृष्ट्युपायान्वेदकान् वेदगणान् आनीय समर्पितवान् किं कृत्वा आनयत् रजस्तमश्च रजस्तमोरूपौ वेदद्रुहौ वेदापहारिणावतिबलौ मधुकैटभाख्यावतिबलावसुरौ हत्वा समर्पितवान् यतस्समर्पितवानत एव तव प्रियतमां तनुं हयशिरस्तनुं सत्यं शुद्धसत्वात्मिकाम् आमनन्ति धर्मस्थापनायोपात्तां तनुं शुद्धसत्वमयीमामनन्ति जानन्ति अवतारयाथात्म्यविद इति शेषः ॥ ३७ ॥

एवं जगतउत्पत्तिप्रकार उक्तः अथ रक्षाप्रकारमाह, इत्थमुचितकालेषु तैस्तैः स्वेच्छोपात्तैः शुद्धसत्वमयैः नृतिर्यगृषिदेवझषावतारैः रामकृष्णवराहपरशुरामोपेन्द्रमत्स्यावतारैः अवतारान्तराणामपीदमुपलक्षणं लोकान् विभावयसि पालयसि जगद्विरोधिनो रावणादीन्हंसि च हे महापुरुष ! युगानुवृत्तं कृतादियुगेष्वनुवृत्तं धर्मं वर्णाश्रममर्यादादिरूपं जगत्प्रतीपनिरसनेन पासि पालयसि यतस्त्वं कलौ युगे छन्नोऽभवः आसीः अथ ततः त्रियुगशब्दप्रवृत्तिनिमित्तान्यवीति कृतत्रेताद्वापरेष्वेवावतारमुखेनाविर्भावात् त्रियुग इत्यभिधीयत इत्यर्थः ॥ ३८ ॥

एवमखिलजगदुदयविभवलयैककारणं तदन्तरात्मानं तच्छरीरकं संस्तुत्य यथावत्स्वरूपरूपादिविमर्शने मन्मनो न समर्थमिति वदन् किञ्चित्प्रार्थयते नैतदिति त्रिभिः । हे विकुण्ठनाथ ! दुरितैर्दुष्प्रमतएवासाधुवृत्ति कामातुरं विषयप्रवणं हर्षेणाभिमतविषयलाभे हर्षेण तद्विपरीतविषयलाभे तु शोकेनेषणया पुत्रदारधनैषणया चार्त्तं मदीयं मनः तव कथास्वेव न सम्यक् प्रीयते, नासक्तं भवतीत्यर्थः । तस्मिन्मनस्येवं स्थिते सति दीनः विषयपारवश्येन दुःखितोऽहं तव गतिं याथात्म्यं कथं विमृशामि ॥ ३९ ॥

न केवलं मन एव ममैवं जातं किन्त्विन्द्रियान्तराण्यपीत्याह—जिह्वेति । हे अच्युत ! जिह्वा मा अवितृप्ता अतृप्तासती एकतो मधुरादिरसान् प्रति मां विकर्षति तथा शिश्नोऽप्यतृप्तः स्वगादयश्च कुतश्चिद्विकर्षन्ति तत्तद्विषयभोगाय कर्षन्ति चपलदृक् चक्षुश्च दृष्टुः क्वाभिमतरूपदर्शनाय विकर्षति उदरशब्दः प्राणोपलक्षकः तथा कर्मशक्तिः क्रियाशक्तिः पाणिपादादिरपि विकर्षन्ति कश्चिद्गृहपतिं गृहस्थं बह्व्यः सपत्न्य इव देहपतिम् इन्द्रियाणि लुनन्ति विकर्षन्तीत्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सृष्टेः प्रागित्युक्तं दर्शयति—तस्यैवेति । तस्य तुरीयस्यास्य जगत्कारणस्य च कश्चिद्विशेषो नास्तीति द्योतनायैवकारः आत्मनि देहे जठरे गूढं निलीनमिदं जगज्जगदात्मकं महाब्जं यस्य तव नाभेरभूत्तदब्जं तस्यैव ते वपुः सन्निधानविषयत्वात् प्रतिमास्थानीयम् । कीदृशं स्वरूपं भूतसृष्टिकालशक्त्या संचोदितं सृष्ट्यै प्रेरितं कटाक्षीकृतं कीदृशस्यास्य प्रकृतिधर्मिणः प्रकृतिप्रेरकधर्मवतः प्रलयोदकेऽनन्ताख्यशयनादुत्थाय विरमन् समाप्तिं कुर्वन् समाधिर्योगनिद्रालक्षणो यस्य स तथा तस्य कथमिव वटवत् वटलक्षणांकुरो यथा स्वकाणकात् उत्पत्स्यमानकणिकात् कणिकाख्यवटबीजादित्यर्थः । नन्वयं विषमो दृष्टान्तस्तथाहि, कणिकानाम। वटबीजविकारो हि वटाख्यांकुरः न चायं प्रकृते सम्भवति. "निर्विकारोक्षरः शुद्ध" इति वचनादुच्यते स्वकणिकादितिलिङ्गव्यत्ययेन कश्चिद्विशेषो विज्ञायते कार्यमिति चेदुच्यते कणिकानामा दृश्या देवता सर्वस्थावरबीजानामभिमानिन्यपि वटाश्वत्थबीजयोर्विशेषतः संनिहिता अतस्तद्बीजेभ्यस्तदंकुरव्यंजनात्प्रागपि तत्र स्थित्वा जातेत्युच्यते यथा, तथा श्रीहरेरपि प्रकृत्याविष्टाभिरत्वेन च तत्सन्निहितत्वेन च स्थितस्तत्कार्येष्वनुविष्टत्वेन जातइत्युच्यते "आत्मन आकाशः सम्भूतः" इत्यादौ श्रुतत्वात् तत्रापि वटबीजादङ्कुरस्य साक्षादुत्पत्तिर्वटवृक्षस्थास्तेतनस्य चेतनाभिमानादुत्पत्तिः उभयाभिमानिन्या देवताया अभिव्यंजकत्वेनाऽभिव्यक्तिस्तथा यथायोग्यं सत्वतमोभिरजोगुणान् जगदात्मनः पद्मस्य साक्षादुद्भवः पद्मिनो हिरण्यगर्भस्याभिमानजननं हरेः पुरुषान्तरणाविर्भावइत्यादिकमिति, "स्थावराणां तु सर्वेषां देवताभिमानिनी । विशेषाद्वटबीजे च अश्वत्थे च व्यवस्थिता ॥ अदृश्या कणिका नाम सा वृक्षावृक्ष्यंजयत्यपि । अतोबीजमिति प्रोक्ता सा जातेत्यंकुरे स्थिता ॥ एवं हरिः कारणेषु स्थितः कार्यजनेरनु । कार्याण्यनुप्रविष्टः सन् प्रथमं तत्र दृश्यते" इत्यनेनोक्तविशेषाविज्ञातइति न कापि शंका कार्येति, तस्माद्दृष्टान्तदार्ष्टान्तिकयोरुपपत्तिरस्तीति युक्तएव दृष्टान्तः ॥ ३३ ॥

तत्र विरिञ्चस्य लोकपद्मलक्षणदेहाभिमानोत्पत्तिपूर्वकं हरेर्वटबीजाभिमानिदेवतावद्दृश्यत्वं प्रकटयंस्तस्य मीमांसामाह—तत्सम्भवइति । पद्मस्य प्रकृत्यात्मकत्वेन तस्मात्पद्मात् सम्भवो जननं यस्य स तथा लोकात्मकत्वेन तस्मिन्देहस्थानीयेऽभिमानसम्भवो यस्य स तथा उभयोरप्यत्र विवक्षितत्वात् अतः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अब्जाद्यन्यदपश्यंस्तु न पश्यन्नप्सु निमज्जमानोऽनिमज्य मूलं विचिन्वन् लोके बीजादङ्कुरे जाते नष्टं बीजमिव पृथिव्यां कथमुपलभेत पुरुषइति तद्विष्णुं दर्शयन्नेवं विधःकार्ययन्त्राऽऽत्मनि स्वस्मिन्नेव मज्जतस्तस्मादृष्टाहिव्यवितर्तं व्यञ्जकत्वादूबीजदेवतावत् बीजसंज्ञत्वोऽप्याविष्टोपलब्धवानित्यन्वयः ॥ ३४ ॥

आत्मा परमात्मा योनिः कारणं यस्य स तथा तुशब्देनैकस्य हरेर्बहुधाजन्मास्तीति विशेषं दर्शयति सएव ब्रह्मा अब्दशतसंज्ञितेन कालेन विचिन्त्य विविधपृथिव्याद्याधारायामनुत्पन्नत्वादस्य केनचिदाधारेण भवितव्यं लौकिके बीजनाशवत् नाशायोगात् सन्नपि न दृश्यते कुतूहलमेतदिति भीतिविस्मितोऽब्जमाश्रितस्तपेतिद्व्यक्षरं श्रुतवान् तपसाहं द्रष्टुं शक्तास्यनेनोक्तमभिजानन् तीव्रेण तपसा परिशुद्धान्तःकरणोऽभूर्तेन्द्रियाशये जगति वितर्तं स्वामात्मनि स्वस्मिन् स्थितं ददर्शेत्यन्वयः कथमिव भुवि व्याप्तमतिसूक्ष्मं गन्धाख्यदेवतास्वरूपं यथा पश्यति योगी तथेत्यर्थः गन्धाख्या देवता यद्वत्पृथिव्यां व्याप्य तिष्ठति एवं व्याप्तं जगद्विष्णुं ब्रह्मात्मस्थं ददर्श इतिवाक्यं गन्धशब्देन देवताकथनं युक्तमिति भावः ॥ ३५ ॥

यथा सूक्ष्मरूपं दृष्ट्वा मुमुदे तथा विराड्रूपमपि तयोरपि विशेषाभावादित्याह—एवमिति । अनेन ब्रह्माण्डशरीरी ब्रह्मा "पातालमेतस्य हि पादमूलम्"इत्याद्युक्तं यद्रूपमपश्यत्तदेव पद्मजोपीति ज्ञातव्यम्. आत्मयोनिरिति विशेषणाम्मायामयं ज्ञानरूपम्. अनिर्वाच्याविद्यामायानामेति–किंतस्यादित्यत्राह सदिति । आनन्दादिलक्षणसमुदायरूपम्. अथ कस्मादुच्यते सदिति "सन्तो ह्यस्मिन्नानन्दमोजोबलम्"इति स्पष्टश्रुतेः ।"सन्निवेशश्च यः स्तोमः समुदायोगणः स्मृतः"इत्यभिधानम् आनन्दादिलक्षणानां सन्निवेशो यस्मिन् स तथा तं गुणगुणिनोरभेदात्स्वरूपत्वं सिध्यति "विज्ञानमानन्दं ब्रह्म"इति श्रुतेः, लक्षणान्यज्ञापनायादिशब्देन ज्ञानग्रहणम् ॥ ३६ ॥

रजस्तमःस्वभावावनिवर्त्यौ वेदद्रुहौ मधुकैटभाख्यौ हत्वा श्रुतिगणानानयत् आनीयास्मै विरिञ्चायार्चयदिति शेषेणान्वयः अनेनैतस्मिन्नभूदित्याह—सत्त्वमिति ॥ ३७ ॥

चतुष्पदवृषभं पासि यस्त्वं कलौ छन्नोऽभवइति यस्मात्तस्मात्त्वं त्रियुगइति ख्यातः ॥ ३८ ॥

एवं हरेर्भक्तवात्सल्यं विज्ञाप्य स्वाशंकां विज्ञापयति–नैतदिति । यदेतन्मनस्तव कथासु न सज्जेत तस्मिन्नत्वयि मम गतिं कथं विमृशामीत्यन्वयः इन्द्रियाणां चित्तादीनामिति शेषः ॥ ३९ ॥

मनःसमाधानाभावादन्येन्द्रियाण्यपि मत्कुर्वन्त्यर्थविरुद्धानीत्याह जिह्वेति । स्पर्शाभावेऽपि शीतस्वादजिह्वा दुःसंगेन पुनरन्यदन्यत्स्पर्शाकर्षत्वात् शिश्नः "त्वच संपर्के"इति धातोः दुःसंपर्कशीलत्वाद्व्यक्तःउदरात्कर्तुं नमयतीत्युदरं कर्मशक्तिरित्यनेन कर्मेन्द्रियाणि नाना इति कर्षयति गेहपतिं देहस्वामिनं अन्यत्र गृहपतिम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

जातमात्रेऽप्यंकुरेऽधिकरणे स्वांशेन वर्तमानमपि बीजं कथमुपलभते ? नैवेत्यर्थः । किन्तु तस्मिन्नेवोपलभते तत्तु तस्यागव्यमेवासीदिति भावः ॥ ३३ ॥ ३४ ॥

ततश्च समाधिना प्रथमं तावत् तत्रैव ब्रह्माख्य सम्मात्मत्वेन तमनुभूतवानित्याह—सत्त्वमिति ॥ ३५ ॥

ततश्च सच्चिदानन्दरूपं तस्य विग्रहमपि दृष्टवानित्याह-एवमिति । ननु, कथं तत्कथर्वाजस्थानीयस्य-तस्य तत्रैव दर्शनं तत्राह एवं समाधौ चिन्तनस्यानुभवप्रकारेणेति तद्विग्रहस्य मध्यमपरिमाणतया दृश्यमानत्वेऽपि विभुत्वानुभवादिति भावः मायामयं प्रचुरतच्छक्तिमिति प्रपञ्चाधिष्ठातृत्वात् । ३६ ॥ ३७ ॥

तत्रतत्र साक्षाद्वतीर्य तत्पालनत्वेनोपसंहरति—इत्थमिति ॥ ३८ ॥

तदेवं तत्कथामनूद्य पूर्वपूर्वजन्मस्वभावमनुस्मृत्य तत्र दैन्येनास्मिन् जन्मन्यारभ्य मत्यासत्यनितृष्णाया नामसंनमानमिव मत्वा स्वमनसि तरक्करोति–नैतन्मन इति ॥ ३९ ॥

तदेव दुःखसाहश्येन जनदुःखमनुस्मृत्य कृपापरवशः स्वदुःखमप्यनादृत्य तदर्थमेव निवेदयति–जिह्वैकत इति द्वाभ्याम् ॥ ४० ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्च तस्यैव तत्र पुनः सृष्ट्यारंभे निजकालशक्त्या सत्त्वादिनाः प्रकृतेर्धर्माः सत्त्वादयो येन तस्य आत्मनि स्वस्मिन् गूढमेव इदं ब्रह्माण्डरूपं वपुः प्रकृतेः सकाशात् प्रकटमभूत् ततश्च अस्भसि तद्गर्भोदे शयानस्य तत्र अनन्तशयनात् विरमन् समाधिर्यस्य तस्य नाभेः सकाशात् महाब्जम् अभूत् स्वर्णाण्डकाले सूक्ष्माद्वटबीजान्महावट इव ॥ ३३ ॥

तत्संभवः तदब्जजातः कांश्चेब्रह्मा अतोऽब्जादन्यदपश्यन् तद्बीजं स्वशक्त्येशोपादानकारणं स्वाम् आत्मानि स्वस्मिन् विततं व्याप्तया सन्तमपि स्वयंहिरव वर्तमानं विचार्यं अप्रकाशं व्याप्तात्मिस्वयमपि ना विदत् युक्तं चैतत् उ अहो अंकुरे जाते तत्र स्वांशेन वर्तमानमपि बीजं तदांकुरेऽधिकरणे कथं उपलभेत किन्तु तस्मिन्नेव उपलभ्यतेत्यर्थः । कमलसूरणादीनां अंकुरोत्पत्त्यादिपत्तेप्यपि बीजनाशदर्शनं तदनेतु तदानीं ब्रह्मणोऽगव्यमेवासीदिति भावः ॥ ३४ ॥

आकिवत अन्वेषणान्निवृत्य अब्जमेवाश्रितस्सन् तीव्रतपसा त्वदीयध्यानेन आत्मनि स्वदेहे एव भुवि कार्यभूतायां स्थितं कारणं गन्धमिव त्वां ददर्श ॥ ३५ ॥

एवमनेन प्रकारेण सहस्रमपरिमितानि यानि पद्मादीनि तैराढ्य महापुरुषं चिदानन्दविग्रहमपि मायामयं स्वरूपभूतया नित्यशक्त्या मायाख्यया युत "अतो मायामयं विष्णुं प्रवदन्ति मनीषिणः" इति श्रुतिः यद्वा मायाया जीवस्यावृत्यया मामयं

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रोगमिव विनाशकं सन् समुचितस्तेनोत्तमः उप आधिक्येन लक्षितः सामुद्रकलक्षणाक्रान्तः सन्निवेशोनयनग्रीवादिविन्यासो यस्य तं यद्वा तमेव कारणकार्ययोरैक्यात् सता प्रपञ्चेन पातालादिना उपलक्षितः संनिवेशः पादादिरचना यस्य तथाभूतं वैराजं मायामयं दृष्टेति सम्बन्धः ॥ ३६ ॥

भक्तं तत्र पुनःपुनरवतीर्य त्वमरक्षीरित्याह—तस्मादिति । हयग्रीवमूर्तिं दधत् श्रुतिगणान् अनयत् तस्मै समर्पयामास मधुकैटभाख्यौ कीदृशौ रजस्तमस्वभावावित्यर्थः तयोर्हननेहेतुः, सत्त्वमिति. यद्यपि गुणमात्र एवोदासीनस्य हरेः सत्त्वगुणेन प्रियः तदपि तत्स्वरूपभूते शुद्धसत्त्वे सत्त्वगुणस्य प्रातिकूल्याभावदर्शनादेव प्रियतमत्वमुत्प्रेक्षितं न तु वस्तुतः प्रियतमत्वमपि किंतु सात्त्विकलोकपक्षपातित्वमेव तव तादृशोत्प्रेक्षायां हेतुः शिष्टपालनार्थमेव तव दुष्टनिग्रहो यस्तत् खलु गुणानामेव स्वभावो न तु वस्तुतस्त्वयि वैषम्यमिति भावः ॥ ३७ ॥

यथा विरिञ्चस्य कृते हयग्रीवावतारस्तथैवान्येषामपि भक्तानां कृते अन्येऽप्यवतारा इत्याह—इत्थमिति । विभावयसि पालयसि हंसि घातयसि युगेयुगे अनुरूपं वृत्तं चरित्रं यस्य सः यत् यस्मात् त्वं कलौ छन्नः अन्यवर्णरूपभावाभ्यां बहिराच्छन्नः अतः स एव त्वं त्रियुग इति प्रसिद्धः सत्यादियुगत्रय एव स्वस्य प्रख्यापनात् न तु कलावित्यर्थः अत एवाग्रे तत्प्रमाणवचनमप्यर्थान्तराच्छन्नतयैव वक्ष्यते "नानातंत्रविधानेन कलावपि तथा शृणु । कृष्णवर्णं त्विषा कृष्णं सांगोपांगास्त्रपार्षदम् । यज्ञैः संकीर्तनप्रायैर्यजन्ति हि सुमेधसः" इति ॥ ३८ ॥

तदेवं मुहुरप्यवतीर्य त्वं स्वीयरूपगुणलीलामृतं वर्षसि तदप्यस्माकं पापिष्ठं मनस्तत्र न प्रीणाति दुर्विषयविषगर्त एव मुहुः पतति किं कुर्मः इत्याह—नैतदिति त्रिभिः । तव रूपगुणलीलादीनां कथासु नन्वतिसाध्वीष्वपि कथासु किमिति न प्रीयते तत्राह दुरितदुष्टं यथा पित्तदुष्टा रसना सितामित्यर्थः तीव्रं दुर्वारम् ईषणाजनादिवासना तस्मिन् मनसि तव गतिं तत्त्वं कथं विमृशामि यद्यपि महाभागवतस्य प्रह्लादस्य मनो न प्राकृतमेतादृशं त्वल्लीलागायनमहामृतमप्रविष्टं इत्यस्यैवाग्रिमोक्तेस्तदपि प्रेम्णो विचित्रविधतरंगवत्त्वेनातिदैन्योदयादेव प्रेमिलोकस्यैव युक्तिर्न विरुद्ध्यते ॥ ३९ ॥

मनसो दुष्टत्वेऽपि मत्कीर्तनादिना जनः कृतार्थो भवतीति चेत्तत्राह—जिह्वा वागिन्द्रियरसनेन्द्रियञ्च अवितृप्ता सती भो अच्युत मामाकर्षति प्रास्यकटुमिष्टादिद्रव्यंप्रति मधुरादिरसंप्रतिचेति भावः । अन्यतस्ततोऽप्यन्यत्र कामिनीषु कर्मणि धनोपार्जनादावन्यताडनादौ वा शक्तिः सामर्थ्यं लुनन्ति छोटयन्त्यतस्त्वत्कीर्तनादावकाशमेव न प्राप्नोमीति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदनन्तरं यः परमधाममध्येशयनं करोति तस्यैव तु पुनः सृष्टिवेलायां निजकालशक्त्या सञ्चोदिताः प्रकृतेः स्वगुणकर्माः सत्त्वादयो येन तथाभूतस्य आत्मनि स्वस्मिन् गूढं सूक्ष्मरूपेण संस्थितमिदं ब्रह्माण्डाख्यं वपुरभूत् स्वस्मात् स्थूलतयोत्पादितमित्यर्थः । तदनंतरं नारायणरूपेण अम्भसि ब्रह्माण्डान्तर्गते जले शयानस्य अनन्तशयनाद्विरमत्समाधिर्यस्य तस्य ते नाभेः सकाशात् महाब्जमभूत् स्वकणिकातः स्वबीजाद्वट इव ॥ ३३ ॥

तस्मिन् सम्भवो जन्म यस्य सः कविर्ब्रह्मा अतोऽब्जादन्यदपश्यमानः त्वां बीजं स्वात्मनि स्वबहिश्च विततं वर्तमानमपि जातेऽङ्कुरे बीजं कथमुपलभेतेति विरिञ्च्यापि तदन्वेषणार्थमब्दशतमप्सु निमज्जमानोपि नाविन्दत् ॥ ३४ ॥

हे ईश ! आत्मा भवान् योनिः कारणं यस्य सः परावृत्त्या ऽब्जमाश्रितस्तस्मात् तीव्रेण तपसा ध्यानेन परिशुद्धभावः आत्मनि चेतने ततो बहिरपि भूतेन्द्रियाद्यात्मकेऽचेतनवर्गे च भुवि गन्धमिव अतिसूक्ष्मं विततं त्वां ददर्श ज्ञातवानित्यन्वयः ॥ ३५ ॥

चेतनाचेतनविलक्षणभगवत्स्वरूपज्ञानं निर्दिश्याथाप्राकृतविग्रहमपि दृष्टवानित्याह—एवमिति । यथा स्वरूपं ददर्श तथा महापुरुषं महाविग्रहयुक्तमपि दृष्ट्वा विरिञ्च्यो मुदमापेत्यन्वयः । कथंभूतं सहस्राण्यपरिमितानि यानि वदनादीनि तैराढ्यं सम्भृतं मायामयं माया कृपा तत्प्रधानं कृपयाविष्कृतमित्यर्थः । सदुपलक्षितसन्निवेशम् सता वेदेन हिरण्यश्मश्रुः हिरण्यकेशः "आप्रनखात्सुवर्णः" इत्यादिनोपलक्षितसन्निवेशः अवयवविन्यासो यस्य तम् ॥ ३६ ॥

भवान् हयशिरस्तनुं हयग्रीवमूर्तिं बिभ्रत् वेदद्रुहौ रजश्च तमश्च रजस्तमःस्वभावौ मधुकैटभौ ब्रह्मणो वेदान् गृहीत्वा तदपाय प्रवृत्तौ हत्वा तस्मै श्रुतिगणान् अनयत् दत्तवान् यतः सत्त्वं सत्त्वस्वभावं जनं तव प्रियतमां तनुं वासस्थानमामनन्ति सत्त्वस्वभावजनहितार्थमसुरवधब्रह्मरक्षणवेदानयनानि कृतवानित्यर्थः ॥ ३७ ॥

ब्रह्मणि कृतमनुग्रहमन्यत्रादिशति—इत्थमिति । यथा ब्रह्माणं पालितवान् एवं नृतिर्यगादिषु कृतैरवतारैः लोकान् धार्मिकान् जनान् विभावयसि पालयसि जगत्प्रतीपान् अधार्मिकान् हंसि घातयसि युगे अनुवृत्तं धर्मं पासि कथंभूतो यो धर्मः कलौ छन्नः कथंभूतस्त्वमभवः भवोपलक्षितसर्वविकारशून्यदेहवानित्यर्थः । यतस्त्वं त्रियुगः त्रीणि युगानि युगलानि षड्भगलक्षणानि यस्य सः भगवानित्यर्थः कलौ त्वं छन्नो ऽभवः इत्यन्वये प्राय इत्यध्याहारो बोध्यस्तत्रापि बुद्धाद्यवतारप्रसिद्धेः ॥ ३८ ॥

अथ स्वदैन्यनिवेदनपूर्वकं मां पालयेति प्रार्थयते—नैतदिति त्रिभिः । हे विकुण्ठनाथ ! एतत् दुरितैर्दुष्टम् अत [illegible] विषयासक्तं तीव्रं दुर्भरम् हर्षशोकभयैषणाभिरार्तं मनः [illegible] न सम्प्रीयते अतस्तस्मिन् मनसि सति दीनोहं तव गतिं [illegible] प्रसाधनं विमृशामि ॥ ३९ ॥

किञ्च हे अच्युत ! मा मां जिह्वा रसनेन्द्रियमवितृप्ता [illegible] एकतो रसंप्रति तथा अवितृप्तेति पदं विकृत्यययेन [illegible] योज्यम् शिश्नो अन्यतो मैथुनानन्दंप्रति त्वक् अन्यतः स्पर्शं प्रति उदरं क्षुधासन्तप्तं अन्यत आहारं प्रति श्रवणं कश्चित् शब्दं प्रति घ्राणो अन्यतः गन्धंप्रति चपला दृक् दृष्टि क्व रूपं प्रति

एवं स्वकर्मपतितं भववैतरण्यामन्योऽन्यजन्ममरणाशनभीतभीतम् ।
पश्यन् जनं स्वपरविग्रहवैरमैत्रं हन्तेति पारचर ! (१)पीपृहि मूढमद्य ॥ ४१ ॥
कोन्वत्र तेऽखिलगुरो ! भगवन्प्रयास उत्तारणोऽस्य भवसम्भवलोपहेतोः ।
मूढेषु वै महदनुग्रह आर्तबन्धो ! किं तेन ते प्रियजनाननुसेवतां नः ॥ ४२ ॥
नैवोद्विजे परदुरत्ययवैतरण्या(२)स्त्वद्वीर्यगायनमहाऽमृतमग्नचित्तः ।
शोचे ततो विमुखचेतस इन्द्रियार्थमायासुखाय भरमुद्वहतो विमूढान् ॥ ४३ ॥
प्रायेण देवमुनयः स्वविमुक्तिकामा मौनं चरन्ति विजने न परार्थनिष्ठाः ।
नैतान्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तथा कर्णशक्तिः वाक्पाणपादादिकर्मेन्द्रियशक्तिः कश्च वचनदानादिकं प्रति विकर्षन्ति सर्वाणीन्द्रियाणि संसारप्रापकस्वस्वविषयगर्तपातनेन मां त्वद्विमुखं कुर्वन्तीत्यर्थः । बहवः सपत्न्यः गेहपतिं स्वस्वामिनं लुनन्तीव पातयन्ति यथा स्वस्वार्थनिबन्धेन तद्विषयात् विमुखं कुर्वन्ति यथेत्यर्थः ॥ ४० ॥

———

भाषा टीका ।

यह जगत् आपही का शरीर है, क्योंकि ? जब आप की प्रलय काल के जलमें शेषजी के शयन से समाधि विराम को प्राप्त हुए तब आपने अपनी काल शक्ति से प्रकृति के धर्मों को प्रेरणा की, उस समय आपके विषे गूढ रहा जो जगत् सो, वटके बीज से जैसे महावट उत्पन्न होता है, उसी तरह आपकी नाभि से (चतुर्दशभुवनात्मक) महाकमलरूप से उत्पन्न हो गया ॥ ३३ ॥

उस नाभि कमल से उत्पन्न हुआ जो ब्रह्मा वह उस कमल के सिवाय और कुछ नहीं देखता हुआ, आत्मा के विषे श्याम, उस कमल के बीज रूप आपको अपने से बाहर ढूंढता हुआ, उस प्रलय के जलों में डूबता हुआ, सौ वर्ष तक मूल कारण को नहीं प्राप्त हुआ, यह भी तो ठीकही है क्योंकि ? जब अंकुर उत्पन्न होचुका तब अंकुर से पृथक् बीज [illegible] होवे ॥ ३४ ॥

[illegible] वही ब्रह्मा अत्यंत विस्मित होकर उसी कमल पर [illegible] बैठा और बहुत काल में तीव्रतप करने से शुद्ध भाव [illegible] होकर, हे ईश ! जैसे पृथिवी में गन्ध इसी प्रकार [illegible] इन्द्रिय अंन्तःकरणमय अपने आत्मा ही में अति [illegible] रूप से आप को देखता भया ॥ ३५ ॥

इसी प्रकार फिर आप को हजारों वदन चरण शिर हस्त, ऊरु नासा मुख कर्ण नेत्र और आभरणों से युक्त, माया मय, (कृपा प्रधान) और समीचीन उपलक्षित है निग्रह संनिवेश जिनका, ऐसे महापुरुषरूप को देख कर ब्रह्मा परम आनन्द [illegible] हुआ ॥ ३६ ॥

तिस ब्रह्मा के अर्थ आप हयग्रीव स्वरूप को धारण कर, वेदके द्रोही अतिबलिष्ठ मधु कैटभ दैत्यों को मारकर, फिर वेद समर्पण किये, इसी से शुद्ध लोग रज तम और सत्त्व इनको आपकी प्रिय तनु कहते हैं ॥ ३७ ॥

हे महापुरुष ! इसी प्रकार आप मनुष्यों में (रामकृष्णादि) तिर्यकों में (वराहादि) ऋषियों में (कपिलादि) देवताओं में (वामनादि) अवतारों को धारण करके, लोकों को पालन करते हो, जगत् के दुःख देने वालों का नाश करते हो, और युगानु गुण धर्म को पालन करते हो, और जिस कारण कलि में आप छन्न (आवृत) होकर रहते हैं, और तीन युगों में धर्म की रक्षा करते इसी से आपका नाम त्रियुग है ॥ ३८ ॥

हे विकुण्ठ नाथ ! यह मेरा मन दुरितदुःख असाधु तीव्र कामातुर हर्ष शोक भय इच्छाओं से आतुर है विकुण्ठनाथ ! यह मेरा मन पाप कर्मों से दुष्ट होरहा है, असाधु तीव्र और कामातुर, हर्ष शोक भय इच्छाओं से आर्त है इसी से आपकी कथा में प्रीत नहीं होता है, मैं अति दीन हूं इस मन से आपकी गति को कैसे विचारूँ ॥ ३९ ॥

हे अच्युत ! अवितृप्त मेरी जिह्वा मुझे एक ओर खींचती है, शिश्न एक ओर, त्वचा और ओर को, उदर और अथवा किसी ओर को, घ्राण और ओर को, चपल दृष्टि किसी ओर को, कर्म शक्तियें कहीं को खींचती हैं । जैसे बहुत सी पत्नी किसी के हों और वे अपने पति की खेंचातानी करती हैं वह दशा मेरी होरही है ॥ ४० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

न केवलमहमेक एवैवं कष्टां दशामापन्नः किन्तु महाजनोऽप्येवमेव क्लिश्यमानः सर्वं जनं पालयेति प्रार्थयन् . सत्र-

(१)पारमति पीपृहि मूढसत्त्वम् इति विजय० । पिपृहि इति वीर० पा० । स्वद्वीर्यमिति पाठः विज० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

मिति। भवः संसार एव वैतरणी यमद्वारनदी तस्याम् अन्योऽन्यतो यानि जन्मादीनि तेभ्योऽतिभीतं स्वेषां परेषां च विग्रहेषु यथायथं वैरं मैत्रं च यस्य एवं मूढं जनं पश्यंस्त्वं हे पारचर! तस्याः पारे स्थितनित्यमुक्त हन्तेति अहो कष्टमित्येवमनुकम्प्याद्य पीपृहि वैतरणीमुत्तार्य पालय ॥ ४१ ॥

एकेन मया कथं सर्वो जनस्तारणीय इति चेत्तत्राऽऽह कोन्विति। को नु ते अत्र सर्वजनोत्तारणे प्रयासो न कोऽपि कुतः अस्य विश्वस्य भवसम्भवलोपानामुत्पत्तिस्थितिसंहाराणां हेतोः ततोऽपि किमेतद्दुष्करमिति भावः। उचितं चैतदित्याह, मूढेष्विति। त्वां च त्वदीयांश्च तारयिष्यामीमं दुराग्रहं मा कृथा इति चेत्तत्राऽऽह मम ये प्रियजनाः भक्तास्ताननुसेवमानानां नोऽस्माकं तेनोत्तारणेन किम्। "कोऽति प्रयासोऽसुरबालका हरेः कोऽन्वत्र तेऽखिलगुरो भगवान् प्रयासः । प्रह्लाद इत्थमुपमन्त्र्य मिथो नराणामीशेन सख्यमकरोदपनीय मायाम्" ॥४२॥

वत्स प्रह्लाद! त्वां तावत्तारयिष्यामि तावतैव कृतार्थः स्याः किमनेन निर्बन्धेनेत्यत आह—नैवेति। हे पर! सर्वोत्तम त्वद्वीर्यगायनमेव महामृतं तस्मिन्मग्नं चित्तं यस्य सोऽहं भववैतरण्या नैवोद्विजे किन्तु विमूढान् शोचामि, तानेवाह. ततो महामृताद्विमुखं चेतो येषाम् प्रत्यगिन्द्रियार्थानामिति यन्मायासुखं तदर्थं भरं कुटुम्बादिभारमुद्वहतः ॥ ४३ ॥

त्वं तावन्मुक्तिं गृहाण—तांस्तु तारयन्तु मुनय उपदेशेनेति चेत्तत्राऽऽह, प्रायेणेति. न विमुमुक्षे निर्मुक्तिं नेच्छामि तदन्यं कमपि प्रार्थय मामेव किमिति निर्बध्नासीति चेदत आह त्वत्तोऽन्यमस्य जनस्य शरणं न पश्यामि ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलमहमेवेदृशीं दशां प्राप्तः किन्तु मदीयो जनोऽप्येवमेव खिद्यतेऽतः सर्वं मदीयं जनं संसारान्मोचयेति प्रार्थयते, एवमिति। भव एव वैतरणी दुःखप्रदा यमलोकनदी तस्यां स्वकर्मभिः पुण्यपापात्मकैः पतितमन्योन्यं यानि मरणादीनि शत्रूणां पुत्रादिजन्मना स्वस्य भयं स्वस्य पुत्रादिजन्मना परेषां शत्रुभ्यः स्वस्य भयं स्वस्माच्छत्रूणाम् एवं परैः स्वद्रव्यभक्षणेन स्वस्य भयं स्वेन परद्रव्यभक्षणे स्वस्मात्परेषामिति यथा सम्भवमूह्यम्। तेभ्यो जन्मजरामरणाशनेभ्यो भीतभीतं भीतादपि भीतं स्वेषां परेषां च विग्रहेषु देहेषु यथायथं वैरं मैत्रञ्च यस्य तमेवमद्यापि मूढमतिं जनं पश्यन् त्वं हे पारचर! भववैतरणीपारे चरतीति तथा तस्य सम्बोधनम्. अति पिपृहि "पृपालनपूरणयोः" इति धातुः अतीव पालयेत्यर्थः। यद्वा अतिपीपृहि हन्तेति अहो कष्टमित्यनुकम्प्य भववैतरण्या अतिपारय पारं नय संसारान्मोचयेत्यर्थः ॥ ४१ ॥

ननु, त्वदीयसर्वजनोत्तारणे मम महान्प्रयासो भवेदित्याह—कोन्विति। हे अखिलानां गुरो हितोपदेष्टः! हे भगवन् ज्ञानशक्त्यादिषाड्गुण्यपूर्ण! अस्मिन् मदीयजनस्योत्तारणे तव को नु प्रयासः? न कोऽपीत्यर्थः। प्रयासाभावे हेतुं वदन् भगवन्तं विशिनष्टि, अस्य कृत्स्नस्य चिदचिदात्मकप्रपञ्चस्य भवसंभवलोपहेतोरुत्पत्तिस्थितिलयकारणस्य कृत्स्नजगदुदयविभवलयलीलस्य मदीयजनोत्तारणे न कोऽपि प्रयास इति भावः। युक्तं चैतदित्याह, मूढेष्वेषु विशेषेण महतामनुग्रहो भवतीति. ननु, मम सेवामन्तरेणाहं नाऽसि पारयामि, अन्यथा सर्वमुक्तिप्रसङ्गः तत्राह, हे आर्तबन्धो! किन्नमार्त्तबन्धुत्वमिति यत्तेन नोऽस्माकं किं त्वत्सेवया स्यात्तथा त्वत्सेवायामप्यशक्ता वयमार्त्तानुकम्प्या इति भावः। सर्वमुक्तिप्रसङ्गं निराकुर्वन्नात्मनो विशिनष्टि, ये तव ये प्रियाः भक्तजनास्ताननुसेवतां त्वद्दासानुदासत्वं कुर्वतामस्माकमित्यर्थः। तावन्मात्रमपेक्ष्य मज्जनोत्तारणोपपत्तेर्न सर्वमुक्तिप्रसङ्गोऽपीति भावः। मामनुगृह्णतवता त्वया मदीयजनस्य भवद्दासानुदासत्वमपि संपाद्यमिति तात्पर्यम् ॥ ४२ ॥

इदमेव मया प्रार्थनीयमित्यभिप्रायेणाहं भववैतरण्या बिभेमि किन्तु तस्यां पतिष्यमाणान्मज्जनानवलोक्य दुःखयामीत्याह, नैवेति। हे परम! दुरतिक्रमणीयो भवः संसारः स एव वैतरणी ततो नैवाहमुद्विजे बिभेमि उद्वेगाभावे हेतुं वदन्नात्मानं विशिनष्टि, त्वद्वीर्येति. त्वद्वीर्यगायनं त्वदीयस्वरूपगुणानामगायनमेव महदमृतं तस्मिन् मग्नं चित्तं यस्य सोऽहमतो न स्वार्थं शोचे किन्तु निशेषया मूढान्मदीयान्प्रति शोचे तदर्थं शोचे इत्यर्थः। तत्र हेतु वदंस्तान्विशिनष्टि, ततस्त्वद्वीर्यगायनाद्विमुखं चेतो येषाम्. इन्द्रियार्थाः शब्दादयो विषयास्तेषां मायासुखाय तदनुभवजन्यप्राकृतसुखाय गर्भभरं कुटुम्बादिभारम् उद्वहन्तीति तथा तान् ॥ ४३ ॥

ननु, यथा श्रीनारदानुग्रहात्त्वं मुमुक्षुस्तथा त्वदीया अपि महतामनुग्रहात् मुमुक्षवः स्युः तान् मोक्षयिष्यास्यतस्त्वमेव मुक्तिमिच्छेत्यत्राह—प्रायेणेति। हे देव! प्रायशो मुनय आत्मनामेव मुक्तिं कामयमाना विजने निर्जने अरण्यादिदेशे मौनं शुभाशुभसंशीलनं कुर्वन्ति, नतु परार्थम्. अन्येषां प्रयोजने निष्ठा येषां ते भवन्ति अतस्तदनुग्रहो मदीयजनस्य दुर्लभ इति भावः। तत एतान् कृपणान्विहाय अहमेको न मुमुक्षे न संसृतिबन्धं मोक्तुमिच्छामि तदन्यं कमपि प्रार्थय मामेव किमिति निबध्नासीति चेत् तत्राह, भ्रमतः संसृतौ भ्राम्यतोऽस्य जनस्य त्वत् त्वत्तोऽन्यं शरणं रक्षणोपायभूतञ्च नानुपश्यामि ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वैः परैश्च सह विग्रहलक्षणं वैरं विरुद्धलक्षणं मैत्रं च यस्य तथा तं जनं पश्यन्नतस्तमसो भवस्य पारमतिपीपृहि, अतिपारं गमय मूढसत्त्वं मूढप्राणिनमसुरजातित्वात् तिर्यग्जातित्वात्तामसमिव स्थितं गजेन्द्रं पारं नीत्वा यथाऽपालयस्तथा पारं च प्रापय्य मां पालयेति वा ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

मम संसारपारनेतृत्वं तव दुःशकं नेत्याह—क इति। हे अघ ! अघपातृरहित, भगवन् ! मम संसारोत्तारणे ते तव कोनु प्रयासो न कोऽपि अत्र जीवराशौ वा कुतो न प्रयासः इति तत्राह अस्येति। अस्य जगतो भवो जन्मसंभवः स्थापनेन संभावनं लयः संहारो येषां हेतोः करणात् तस्य जगत उत्तारणे तव प्रयासो नास्ति मनीषितारणे कोऽन्विति वा, कुत इति तत्राह, भवेति भवस्य संसारस्य संभव उत्पत्तिस्तस्य नाशहेतोस्तव किं प्रकृतमित्याशङ्क्याह्मदादिभक्तिप्रदर्शन-मन्तरेण न किमपि प्रयोजनं तवेत्याह—मूढेष्विति। गजेन्द्रकल्पान् जनवन्धो मूढेष्वस्मासु यो महदनुग्रहस्तेन तव किं प्रयोजनम् नकिम-पीत्यर्थः। ननु, प्रयोजनाभावे किमर्थं तथाकरणमित्याशंक्य स्वभाव इत्याशयेनाह—प्रियेति। प्रियजनाननुसेवमानस्त्वमिति यत् स तव स्वभाव इति शेषः ॥ ४२ ॥

संसारभीरूणां संसारवैतरण्युत्तरणोपायः क इत्याशंक्य निरन्तर-वेदान्तशास्त्रश्रवणमननादिर्यैषामस्ति तेषां तद्भयं नास्ति अन्यथा न कदापि तत उत्तरणमित्याशयेनाह—नैवेति. त्वद्वीर्यं त्वत्प्रियं वेदान्तशास्त्रं तस्य गायन श्रुत्वा मत्वा व्याख्यानं व्याख्यापनं च तदेव महामृतं यत्तेन मत्तं हृष्टं विमग्नं वा चित्तं यस्य स तथा एवंविधोऽहं संसारवैतरण्या नैवोद्विजे। न बिभेमि एव शब्देन त्वत्तत्त्वश्रवणाभावे संसारकर्दमादुद्विजेऽति तत्संसर्गेनत्वयोग-व्यवच्छेदः क्रियते अनेनासंगतं प्रह्लादस्याननुतीर्णत्वमपि परिहृत "मत्स्वस्थस्य ततो दयया" इति वचनात् इदं च भक्तलक्षणमिति प्रकट यन्नाह—शोच इति। ते स्वस्त इन्द्रियार्थेभ्यो विषयेभ्यो मायासुखं प्राकृतमस्वरूपं सुखं यत्तदर्थं भरं कुटुम्बभारम ॥ ४३ ॥

स्वेतरेषु क्रियमाणा कृपा स्वाभिनेत्वेन कर्तव्या देवादिभि क्रियमाणत्वादित्यभिप्रेत्याह—प्रायेणेति। देवा मुनयश्च विजनेनैकान्त-स्थलेन साधनेन सहिताः काष्ठमौनादिव्रतं चरन्ति कं इशा स्वकीयानां जनानां विमुक्तिः स्यादिति स्वविमुक्तिकामाः स म-हतां स्वभाव इत्याह—परेति। परप्रयोजनतात्पर्येणापि देवेषु नास्त्येवं विशेषतो मुनिषु केषुचिदस्तीति विशेषप्रकाशनाय प्रायेणेति तदुक्तं "आश्रितेषु कृपा कार्या विशेषात्सात्त्विकैः सुरैः ॥ मुनिभिश्च तथा कैश्चित्कैश्चित्कार्याखिलेष्वपि ॥ तथापि सात्त्विकसुराः कृपाविषयतां गताः ॥ एत एव विमुक्त्यन्ते तदन्ये न कथञ्चन" इति यतो देवादयोऽप्या-श्रितेषु कृपां कुर्वन्ति अतोऽहमप्याश्रितानेतान्कृपणान् कृपाविषः-यान् विहाय एको न विमुमुक्षे त्वमेको मत्प्रसादेन मुक्तो भव अन्ये त्वेव बन्धेनाऽमुक्ताः सन्त्विति तत्राह—नान्यमिति। स्वकर्मणा नाना योनिषु भ्रमतो ममाश्रितजनस्यानुकूलं त्वदन्यं शरणं नानुपश्ये इत्यन्वयः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तत्र श्रीकिंस्तदीनकृपणाविन्याभिमानेन सम्प्रदायोपालम्भ-मिवापि निवेदयति, कोन्विति ॥ ४२ ॥

ननु, त्वत्प्रियजनसेविनामपि भवादनुत्तीर्णानां तदुद्वेग-स्याद्वेत्याशङ्क्य नहि नहीति स्वं दृष्टान्तयति—नैवेति। त्वद्वीर्याणां ये गायकास्तत्प्रियजनाः तत्सम्बन्धि यन्महामृतं तद्गान-रूपमेव तत्र मग्नं चित्तं यस्य सोऽहं नैवोद्विजे अत्र पूर्वं अहमा-स्म्यहमित्यादिकं यदुक्तं तत् खलु अस्य तद्वार्तमुख्य माङ्गलिकत्वेन। अतएव नैवोद्विज इत्यादिकं तत्कथामृत माधुर्याविष्टत्वेन मध्ये च नैतन्मन इत्यादिकमतितृष्णापर्यन्ति विवेचनीयम्। भावानां विचित्रगतित्वात् ॥ ४३ ॥

यथा श्रीभगवत्तं कोन्वत्र इत्यादिकमुवाच तथैव मुनीनपि गत्याह—प्रायेणेति ॥ ४४—४७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

न केवलमहमेक एव, अपि तु सांसारिकः सर्व एव जनः क्लिश्यतीति तदुद्धारं प्रार्थयते—एवमिति। अत एव वैतरणी यमद्वारनदी तस्यां स्वेषां परेषां च विग्रहे यथायथं वैरं मैत्रं च यस्य तं हे पारचर ! एवंभूतवैतरण्याः पार एव विराजित स्थित इति हेतोऽहं त्वं कृपया पिपृहि वैतरणीमुत्तारयं पालय ॥ ४१ ॥

एकेन मया कथं सर्वो जनस्तारणीयः? इति चेत्तत्राह-कोन्विति अखिलगुरो ! गुरुकृपाधारिणा एकेनापि त्वया परः परार्द्धमपि गौवत्सनमर्पने सर्व एव जनो निस्तीर्यतामिति भावः। न चैतावत् सामर्थ्यं मे नास्तीति नाकर्णितमित्याह—अस्य विश्वस्य जन्मस्थिति-संहारकारणस्य यदि जन्मादेः कारणमभूस्तदा उद्धारस्यापि कारणं भवितुमर्हस्येवेति भावः। उचितमेवैतदित्याह—मूढेष्विति। त्वं च त्वदीयाश्रितानभिष्यन्ति इममनिगृह्णन् माकृथा इति चेत् तत्राह, तव ये प्रियजना भक्तास्ताननुसेवमानानां मोऽस्माक तेन त्वत्कर्तृकोत्तारणेन किं त्वद्भक्तसेवाप्रभावात्स्वयमेव वयं तरिष्याम इति भावः ॥ ४२ ॥

किञ्चाहं स्वार्थं तु संसारतारणं नैवार्थय इत्याह—नैवेति। हे पर सर्वश्रेष्ठ ! वैतरण्याः सकाशान्नोद्विजे तत्र हेतुः त्वद्वीर्येति किन्तु विमूढान् शोचामि इन्द्रियार्थहेतवः मायायाः सुखं तदर्थभरं कुटुम्बभरणादिभारमुद्वहतः ॥ ४३ ॥

त्वं तावन्मुक्तिं गृहाण नास्ति तत्वश्च मुनयो मुक्तिसाधनमुपदे-क्ष्यन्तीति चेत्तत्राह—प्रायेणेति। अहं तु न तथा बुभूषामीत्याह, नैतानिति। त्वत्तोऽन्यमस्य जनस्य शरणं न पश्यामि ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवमन्येऽपि संसारनद्यां निमग्ना अतः सर्वोऽनस्माधार्थीम पाल-येति प्रार्थयते—एवमिति। एनं स्वकर्मभिः भवो जन्ममरणप्रवाहम-भ्रणः संसारः स एव वैतरणी तस्कृपाधिकाभूता नदी तस्यां पति-तम अन्योन्यतो यानि जन्मादीनि तेभ्यो भीतावपि भीतस्य स्वेषां परेषां च विग्रहेषु कलहेषु देहेषु वा स्वप्रयोजनानुसारेण वैरमैत्रं च यस्य तम् मूढ स्वगुरुकार्यार्थात्मकं जनं मारयाम त्वं पदयन् पार

यन्मैथुनादि गृहमेधिसुखं हि तुच्छं कण्डूयनेन करयोरिव दुःखदुःखम् ।
तृप्यन्ति नेह कृपणा बहुदुःखभाजः कण्डूतिवन्मनसिजं विषहेत धीरः ॥ ४५ ॥
मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः ।
प्रायः परं पुरुष ! ते त्वजितेन्द्रियाणां वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम् ॥ ४६ ॥
रूपे इमे सदसती तव वेदसृष्टे बीजाङ्कुराविव न चान्यदरूपकस्य ।
युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥ ४७ ॥
त्वं वायुरग्निरवनिर्वियदम्बुमात्राः प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च ।
सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्यत्त्वदस्त्यपि मनोवचसा निरुक्तम् ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भववैतरण्यविषये चरतीति तथा तस्य सम्बोधनं हे पारचर ! हन्त अहो कष्टमित्येवमनुकम्प्य अद्याधुना पीपृहि वैतरणीमुत्तार्य पालय ॥ ४१ ॥

दीनजनोत्तारणे विश्वसृष्ट्यादिकर्तुस्तव श्रमो नास्ति अहं तु त्वद्दासचरणसेवयैव कृतार्थ इति प्रार्थयते, कोन्वत्रेति । हे अखिल-गुरो ! अस्य विश्वस्य भवसम्भवलोपानां सृष्टिस्थितिसंहाराणां हेतोः ते नु निश्चितम् अत्र दीनस्य जनस्य तारणे कः प्रयासः ? न कोपीत्यर्थः । ननु, निखिलजनोत्तारणे सर्वमोक्षप्रसङ्गः स्यादत्राह, मूढेषु हे दीनबन्धो ! महतां त्वद्दासानां त्वद्भजनोपदेशरूपो अनुग्रहो भवत्कृपया भवतु इति शेषः । नन्वात्मतरणं कुतो न प्रार्थयसे ? अत्राह, हे भगवन् ! ते प्रियजनान् भागवतान् सेवतां सोऽस्माकं तेन भवतरणेन किम् ? त्वत्प्रियजनसेवयैव कृतार्था इत्यर्थः ॥ ४२ ॥

एतदेवाह—नैवेति । हे पर पूर्ण ! त्वद्वीर्यगायनं भवत्प्रियसेवाल-ब्धत्वद्वीयपराक्रमगानमेव महाऽमृतं तत्र मग्नं लब्धरुचि चित्तं यस्य सोऽहं दुरत्ययवैतरण्या नैवोद्विजे किन्तु ततस्त्वद्वीर्यगायन-महामृतात् मद्वदनुग्रहाभावेन विमुखं चेतो येषां तान् इन्द्रियार्थ-मिन्द्रियनिमित्तं यन्मायासुखं प्राकृतमानन्दं तदर्थं भारादुःखदं गृहकुटुम्बादिभरमुद्वहतोऽहं शोचामि अतस्तान् भववैतरण्याः उत्तार्य पालयेति भावः ॥ ४३ ॥

स्वं मद्भजनेन मुक्तो भव एतान् मुनयस्तद्धर्ममुपदेक्ष्यन्तीत्यत्राह, हे देव ! यतः प्रायेण स्वमुक्तिकामा नतु परार्थनिष्ठाः मुनयो निर्जने मौनं स्वधर्मं चरन्ति, अतः स्वत् त्वत्तः अन्यं शरणं नानुपश्ये त्वं तान् प्रेरय इति भावः । अहं तु एतान् कृपणान् विहाय एकः न विमुमुक्षे विमुक्तिमिच्छामि ॥ ४४ ॥

भाषाटीका ।

मेरी ही यह दशा नहीं है—यह सब जने अपने कर्मों से इस भव वैतरणी में पड़े हैं । परस्पर जन्म मरण अशन और भय से भीत हैं अपने पराये के वैर और मित्रता में खिन्न हैं हे पार चर ! (आप इस वैतरणी के पार पर हो) कृपाकर इन मूढ़ों को दुखित देखकर आज इसके पार उतार कर पालन कीजिये ॥ ४१ ॥

हे भगवन् ! हे अखिल गुरो ! आप इस जगत के जन्म स्थिति प्रलय के हेतु हैं इनको संसार वैतरणी से उतारने में आपको क्या प्रयास है ? । हे आर्तबन्धो ! मूढ़ों पर अनुग्रह करना महा पुरुषों को उचित ही है । (भगवान् यह न कहें कि तुम क्यों जगत् के निमित्त दुराग्रह करते हो तुमको और तुम्हारे सबों को उद्धार करूँगो) यह विचार कर प्रल्हाद कहने लगे प्रभो ! आपके प्रियजनों के सेवन करने वाले हमको उससे (तरनेसे) क्या है ? हम तो आपके भक्तों के अनुग्रह से ही तर जायंगे ॥ ४२ ॥

हे पर ! (सर्वोत्तम !) तुम्हारे लीला पराक्रमगान महा अमृत में मग्न मन, मैं इस दुरत्यय भव वैतरणी से उद्विग्न नहीं हूं, मैं केवल उन मूढ़ पुरुषों का सोच करता हूं जो आप की लीला गान से विमुखचित्त हैं । और इन्द्रियार्थ माया सुख के निमित्त भार वहन कर रहे हैं ॥ ४३ ॥

हे देव ! प्रायः बड़े २ मुनिजन अपनी विमुक्ति की कामना कर विजन वन में मौनधारण करते हैं किन्तु वे भी स्वार्थ रत हैं परार्थ निष्ठ नहीं है मैं इन कृपण जीवों को छोड़कर अकेला नहीं मुक्त होना चाहता हूं क्योंकि इन भ्रमते जीव समूह का शरण तुम से अन्य मैं नहीं देखता हूं । जो आप इनका उद्धार न करेंगे तो कौन करेगा ? ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वेते स्त्रीसम्भोगादिना सुखिन एव न कृपणास्तत्राह— यदिति । करयोः कण्डूयनेन सङ्घर्षणेनेव दुःखमनु दुःखं यस्मिन् तर्हि दुःखत्वादेव ततो निर्विद्य मुच्येरंस्तत्राह—कृपणाः कामुका बहुदुःखभाजोऽपीह गृहमेधिसुखे न तृप्यन्त्यतस्तदपि न मन्यन्ते कण्डूतिवत्कामस्य दुःसहत्वात्. ननु, कोऽवारक[illegible]

श्रीधरस्वामिकृतभावार्थदीपिका।

अपि सहन्ते। कामं चेत्यत आह—त्वत्प्रसादात् कश्चिद्धीर एव मनसिजं कामं विषहेत न तु सर्वे अत्रापि कण्डूतिवदिति दृष्टान्तः ॥ ४५ ॥

ननु, मौनादिभिर्मोक्षसाधनैः सुलभैव तेषामपि मुक्तिस्तत्राह, मौनेति। हे पुरुष! अन्तर्यामिन्! ये मौनादयो दश आपवर्ग्याः अपवर्गहेतवः प्रसिद्धाः रहो विविक्तवासः ते तु प्रायशोऽजितेन्द्रियाणामिन्द्रियभोगायार्थं विक्रीयमाणानां वार्त्ता जीवनोपाया भवन्ति दाम्भिकानां तु वार्त्ता अपि भवन्ति वा न वा दम्भस्यानियतफलत्वात् ॥ ४६ ॥

त्वज्ज्ञानं भक्तिं विना सकामैर्मौनादिभिर्न भवत्येवेत्याह—रूपे इति, त्रिभिः। बीजाङ्कुराविव प्रवाहापन्ने इमे सदसती कार्यकारणे एव ते रूपे उपलक्षणभूते वेदेन सृष्टे प्रकाशिते नचान्यत् स्वसमवेतं गौरत्वादिकमिव देवदत्तादेः कुतः अरूपकस्य प्राकृतरूपादिशून्यस्य अतो युक्ताः संयता एव भक्तियोगेन प्रत्यक्षं त्वामुभयत्र कार्ये कारणे चानुगतं पश्यन्ति मथनेन दारुषु वह्निमिव नान्यतः स्यात्त्वज्ज्ञानमिति शेषः। यद्वा ज्ञानप्रकारमेवाह—एतदुभयमन्यतः प्रधानपरमाण्वादेर्न स्यात् "स ऐक्षत" इत्यादि श्रुतेः। अतस्त्वमेव कारणत्वात्सर्वत्रानुस्यूत इति ॥ ४७ ॥

तदेवाऽऽह—त्वं वायुरिति। हृदयं मनः चित्तम् अनुग्रहो ऽहङ्कारो देवतावर्गो वा सगुणः स्थूलः विगुणः सूक्ष्मः मनश्च वचश्च मनोवचस्तेन निरुक्तं प्रकाशितं किमपि त्वत्तोऽन्यन्नास्ति ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ननु, त्वदीया जना न दैन्यं प्राप्ताः किन्तु विषयानुभवेन हृष्टा एवातस्तेषां दैन्यापादनेन त्वं किमितीत्थं प्रार्थयसे तत्राह—यदिति। यन्मैथुनादिकं गृहमेधिनो गृहस्थस्य सुखं तत्करयोः पाम्नादूषितयोर्हस्तयोः कण्डूयनेन संघर्षणेनेव तज्जन्यदुःखवद्दुःखदुःखमतीव दुःखात्मकं दुःखानुपरि दुःखं दुःखोदर्कमित्यर्थः। अत एव तुच्छं तर्हि तस्य दुःखत्वादेव ततो निर्विद्य मुमुक्षेयुस्तत्राह—कृपणाः कामिनः बहुदुःखभाजोऽपीह गृहमेधिसुखं न तृप्यन्त्यलमिति न मन्यते कण्डूतिवत्कामस्य दुस्सहत्वात्तदन्ते ख्यातमेव न जानन्तीति भावः। ननु, केचित्कण्डूतिमपि सहन्ते कामं चेत्यत आह—सत्यं, धीरास्त्वदनुग्रहाज्जितेन्द्रियश्च मनसिजं कामं सहेत नत्वजितेन्द्रिय इति भावः ॥ ४५ ॥

तर्हि केचिन्मौनादिभिरुपायैरिन्द्रियाणि जयन्त्विरपवर्गः साध्यस्तत्राह—मौनेति। हे पुरुष परमपुरुष! मौनादय आपवर्ग्याः जितेन्द्रियस्यापवर्गोपाया एवेति सत्यमेव अजितेन्द्रियाणां तु वार्त्ता जीवनोपाया भवन्ति'अयं मौनादिसम्पन्नस्ततोऽस्मै देयम्'इति मन्यमानेभ्यः परेभ्यः लब्धवित्तो भवतीति जीवनोपाया भवन्ति सतीन्द्रियजये मौनादय आपवर्ग्याः ननु तस्मिन् असति भवदनुग्रहाद् विषयवैतृष्ण्येन भवितव्यमिति भावः। अपवर्गार्थतया अनुष्ठिता अपि मौनादयोऽजितेन्द्रियाणां वार्त्ता एव न त्वापवर्ग्याः किंपुनर्दम्भार्थं कृता आपवर्ग्याः न भवन्तीत्याह—उतेति दाम्भिकानां मौनादयो वार्त्ता अपि भवन्त्युत। न वा किंपुनरापवर्ग्या न भवन्तीति. दाम्भिकानां दाम्भिकत्वे प्रकटे सति जीवनहेतवोऽपि न भवन्तीत्युत न वा शब्दार्थः, तत्र मौनं वाङ्नियमः व्रतमनशनादिरूपं श्रुतमध्ययनं तपः कृच्छ्रादि अध्ययनमध्यापनं पाण्डित्यं स्वधर्मः स्ववर्णाश्रमोचितो धर्मः व्याख्याऽध्यापनं रहो निर्जनदेशवसतिः जपो मन्त्रजपः समाधिध्यानं मनसिजं विषहेत धीर इतीन्द्रियजयमूलकः कामजय इत्युक्तं तथाऽजितेन्द्रियाणां वार्त्ता भवन्तीत्यनेन जितेन्द्रियाणां त्वापवर्ग्या भवन्तीति सूचितम् ॥ ४६ ॥

नहीन्द्रियजयः कथं स्यादित्यपेक्षायां सर्वात्मकनिरतिशयानन्दरूपब्रह्मोपासननिष्ठस्यार्थादेवेन्द्रियजयः स्यादिति वक्तुं तावत्तदुपासनाप्रकारं विवक्षुश्चेतनाचेतनयोः परमात्मशरीरत्वमाह—रूपे इति। इमे सदसती चिदचिद्द्रव्यरूपे बीजाङ्कुराविव स्थिते अरूपकस्य कर्माधीनदेहरहितस्य तव वेदरूपे वेदबोधिते रूपे शरीरे "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यस्याक्षरं शरीरं यस्याव्यक्तं शरीरम्" इत्यादिवेदबोधितशरीर इत्यर्थः। बीजाङ्कुरौ इत्यनेन कदाचित्कारणावस्थया कदाचित्कार्यावस्थया चाप्रवाहावस्थिते उभे अपि चिदचिद्द्रव्ये तव शरीरभूते इत्युक्तं भवति। अरूपकस्य रूपे इत्यनेन तच्छरीरकत्वं न तव कर्माद्युपाधिप्रयुक्तमपितु निरुपाधिकमित्युक्तं यत उभयावस्थावस्थितयोश्चिदचितोस्त्वच्छरीरत्वमत एव न चान्यत्. अन्यत्त्वदनात्मकं किञ्चिदपि वस्तु नास्त्येवमुभयत्र त्वच्छरीरभूतयोश्चिदचितोस्त्वां योगेनोपासनात्मकेन युक्ताः सन्तो मुनयो विचक्षते पश्यन्ति। तत्र दृष्टान्तः, वह्निमिव दारुषु यथा दारुषु मथनाद्युपायेन वह्निं विचक्षते तद्वत्. अन्यतो योगादन्यत उपायान्तरात्कस्मात् साक्षात्कार इति शेषः उपायान्तरेण साक्षात्कारो न स्यादित्यर्थः ॥ ४७ ॥

न चान्यदित्यनेनान्यत् त्वदात्मकं नास्तीत्युक्तं नान्यतः स्यादित्यनेनोपायान्तराद्दृश्यत्वञ्च तदेतदुभयं प्रपञ्चयन् सर्वात्मकब्रह्मसाक्षात्कारादेव निःशेषेन्द्रियजय इत्याह—त्वमिति, द्वाभ्याम्। तावत्सर्वात्मकत्वं प्रपञ्चयति, त्वमिति। त्वमेव वाय्वादिरूपेणावस्थितः तच्छरीरकत्वेनावस्थित इत्यर्थः। पूर्वं "तव रूपे" इति व्यतिरेकनिर्देशाद्वाय्वादिनिर्देशाच्च तादात्म्यं शरीरात्मभावनिबन्धनमित्यवगम्यते. तत्र मात्राः शब्दादयस्तन्मात्राः प्राणाश्चेन्द्रियाणि हृदयं मनः चित्तमनुग्रहं ज्ञानोत्पत्त्यनुग्राहकं हृदयविशेषणं चित्तमनुग्रहश्चेति पाठे ज्ञानोत्पत्त्यनुग्राहको महान् वाहङ्कारस्तत्त्वात्मक उच्यते किं बहुना सगुणः सत्त्वादिगुणयुक्तः प्रकृतिपरिणामात्मकः सर्वः पदार्थः विगुणाः सत्त्वादिगुणरहितस्वरूपपरिणामात्मको जीववर्गश्च मनश्च वचश्च तयोः समाहारो मनोवचस्तेन निरुक्तं विषयीकृतं तदेतत्सर्वं त्वमेव त्वच्छरीरभूतमेव ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुखानुभवार्थं हि गोसाकांक्षानच्छन्दादिविषयेष्वपि स्याद्-तोऽज्ञागलस्तनायितमांससुखाय कोवा प्रेक्षावान् महाप्रयत्नं कुर्या-दुन्मत्तमन्तरेणात तत्राह—यन्मैथुनादीति । मैथुनादिगृहस्थसुखं यत् तल्लब्ध्वा देहकृपणा देहमात्रपोषणपरायणास्तृप्यन्ति नान्ये प्रेक्षावन्त इति शेषः । तदपि न सुलभमित्याह, बहुदुःखेति, तत्र बुद्धिमतैवं कार्यमित्याह—कण्डूतिवदिति । मनसिजं कामम् ॥ ४५ ॥

मुमुक्षुभिः प्रथमत इन्द्रियजय एव समर्थनीयोऽन्यथा मुक्तिसा-धनानामपि मौनादीनां लोके जीवनोपायमात्रत्वं भवतीत्याह, मौनेति । आपवर्ग्या मुक्तिहेतवः प्रायः सम्यग्भक्त्यानुष्ठिता इति शेषः । हे पुरुष ! परं न चेत् न त्वजितेन्द्रियाणां पुंसां वार्तास्त-स्माज्जीवनमात्रोपाया भवन्त्युत अपि संभावनामात्रं ननु मुख्यत इत्यर्थः । लोकमोहनार्थं मौनादिकमनुतिष्ठतां दांभिकानां तदपि न सेत्स्यतीत्याह, अत्र जीवलोके वा यथा अजितेन्द्रियाणां जीवनमात्रोपाया न तथा दांभिकानां भवन्तीति "वा विकल्पोप-मानयोः" इत्यभिधानं तथा भवन्तीत्येकं वाक्यमिति वा ॥ ४६ ॥

मौनादीनां क्लेशसाध्यत्वेनाल्पाधिकारिकत्वात् सर्वाधिका-रिकोपासनाविषयं निरूपयति, रूपे इति । इमे सदसती कार्य-कारणे तव रूपे त्वदधीनत्वात्त्वत्सन्निधानयोग्ये अत्रप्रमाणमाह, वेदेति । "द्वावेव ब्रह्मणो रूपे" इत्यादौ कार्यकारणत्वं किंविकार-भावेन निमित्तनैमित्तिकभावेन चेत्याशंक्य यथायोग्यमित्यूहनीय-मित्यत्र दृष्टान्तमाह—बीजेति । व्याख्यातमेतत् "विज्ञानमानन्दं ब्रह्म" इतिवत् वेददृष्टं चेत् किं साक्षाद् रूपे इति ? नेत्याह—नचेति । अन्यद्विलक्षणं ज्ञानानन्दादिलक्षणं नैव कुतोऽत्राह—अरूपक-त्वेति । प्राकृतरूपाभावादित्यर्थः । महतां प्रत्यक्षं चात्रप्रमाण-मित्याह, युक्ता इति । भक्तियोगेनोभयत्र रूपद्वये युक्ता उपासनालक्षणध्यानेनेति शेषः । युक्ता योगिनः उभयत्र सन्निहितं त्वां पश्यन्तीति वा दर्शनप्रकारमाह—वह्निमिति । योगेन भजना-ख्येन अन्ययोगं निवारयति—नान्यत इति । भक्तियोगादन्यतो-ऽन्येनेति । साक्षात्स्वरूपादन्यत् प्राकृतं रूपं नैव "अरूपमक्षरं ब्रह्म" इति श्रुतेः । अतो न साक्षाद्रूपे इति वा योजना, साक्षात्स्वरू-पापेक्षया स्वरूपादन्यद्रूपं नेत्याचार्यविवरणमत्र प्रमाणम् ॥ ४७ ॥

के ते कार्यकारणे इत्यतस्तन्नामनिर्देशः तत्सत्तादत्त्वेन तदधीनत्वे तद्रूपत्वाभिप्राय इत्याशयेनाह—त्वमिति । चिदनुग्रहश्चेतन-स्तन्मनसा वचसा निरुक्तं न त्वदन्यत् त्वां विना प्रवृत्तिमदस्ति सगुणः संसारी शौक्ल्यादिगुणयुक्तो वा, विगुणो मुक्त उत्पन्ना-नन्तरक्षणविशिष्टपदार्थो वा ॥ ४८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्वमिति । हृदयमन्तरिन्द्रियं मनोबुद्ध्यहङ्कारचित्तात्मकं । चित् शुद्धो जीवः अनुग्रहः स्वसन्मुखीकरणशक्तिः किं बहुना सगुणो मायिकः विगुणश्चामायिकः सर्वार्थस्त्वमेवेति ॥ ४८ ॥ ४९ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नन्वेते स्त्रीसम्भोगादिभिः सुखिन एव न कृपणास्तत्राह—यदिति । कण्डूः कण्डूयनेन सङ्घर्षणेनैव दुःखमनुदुःखं यत्र तत् तर्हि दुःखत्वादेव ततो निर्विद्य मुक्तेरन्नत्राह—कृपणाः कामुकाः बहुदुःखभाजोऽपि इह गृहमेधिसुखं दुःखकर्पऽपि न तृप्यन्ति सर्वामिति न मन्यन्ते कण्डूतिवत् कण्डूनामिवेत्यर्थः । ननु, कश्चित् कश्चित्ततो निर्विण्णोऽपि दृश्यते सत्यं त्वत्प्रसादाद्धीर एव मनसिजं कामं दुःखरूपमेव विषहते न तु सर्वे ॥ ४५ ॥

ननु, ब्राह्मणानां तावन्मौनादिभिर्मोक्षसाधनैः स्वत एव सिद्धेर्मोक्षोऽपि स्वत एव सिद्धस्तत्राह, मौनेति । हे पुरुष । अन्तर्यामिन् ! त्वां किं विज्ञापयामीति भावः । ये मौनादयो दश आपवर्ग्याः अपवर्गहेतवः प्रसिद्धाः रहः विविक्तवासः ते तु प्रायशः अजि-तेन्द्रियाणां विषयभोगार्थमेव तान् विक्रीणतां वार्त्ता जीवनोपाया एव भवन्ति दांभिकानां तु वार्त्ता अपि भवन्ति न वा दम्भस्या-नियतफलत्वात् ॥ ४६ ॥

त्वत्प्राप्तिस्तु भक्तियोगं विना मौनादिभिर्नैव भवतीत्याह—रूपे इति । इमे सदसती कार्यकारणे बीजाङ्कुराविव प्रवाहापन्ने समष्टिव्यष्टी तवैव रूपे न च अन्यत्समष्टिव्यष्ट्यात्मकं विश्व-मिदं त्वत्तो भिन्नं न भवति अरूपकस्य प्राकृतरूपरहितस्य तव अतो युक्ता विवेकिनः त्वाम् उभयत्र समष्टौ व्यष्टौ च विविच्यते प्राप्तुमन्विष्यन्ति यतस्त्वं कारणत्वेनोभयत्र वर्त्तसे इति भावः । योगेन उपायेन भक्तियोगेनैव न चान्यतो ज्ञानादिना "भक्त्याह-मेकया ग्राह्यः" इति त्वदुक्तेरिति भावः । वह्निपक्षे योगेन मन्थ-नेन अत एव भक्त्येत्यस्य स्पष्टशब्दस्याप्रयोगः ॥ ४७ ॥

उक्तमर्थं विवृणोति—त्वमिति । हृदयं मनः चित् चित्तं अनुग्र-होऽनुग्राहको देवतावर्गः सगुणः स्थूलः विगुणः सूक्ष्मः मनश्च वचश्च मनोवचस्तेन निरुक्तं प्रकाशितं किमपि त्वत्तो नास्ति ॥ ४८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, एते कृपणाः विषयसुखास्वादोपदर्शनेन विरक्ताः सन्तो मज्जिज्ञासया मुक्ता भविष्यन्तीत्यत्र त्वदनुग्रहं विना दुःखोदर्कात् विषयसुखादपि जनानां विरागो न भवतीत्याशयेनाह, यदिति । यन्मैथुनादिगृहमेधिसुखं यद्यपि तुच्छं क्षणभङ्गुरादिदोषग्रस्तं कण्डूयनेन सङ्घर्षणेन दुःखं यस्मिन् तत्तथाविधं च तथापीह कृपणा बहुदुःखभाजो न तृप्यन्ति कश्चित्त्वत्कृपापात्रो धीर एवं कण्डूतिवन्मनसिजं कामं विषहेत ॥ ४५ ॥

किञ्च मौनादयः आपवर्ग्याः मुक्त्युपायाः ते तु तथा भूता अपि हे पुरुष ! अत्र लोके त्वजितेन्द्रियाणां बुभुक्षूणां परं केवलं वार्त्ता जीवनोपाया न वा भवन्ति उत अपि च दांभिकानान्तु वार्त्ता जीवनोपाया वा न भवन्ति दम्भेन तत्फलनाशाद-इत्यर्थः । तत्र मौनं वृथा वचनत्यागः व्रतानि एकादश्युपवासा-दीनि श्रुतं शास्त्रश्रवणम् तप आलोचनं ज्ञानम् अध्ययनं

नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः ।
आद्यन्तवन्त उरुगाय ! विदन्ति हि त्वामेवं विमृश्य सुधियो विरमन्ति शब्दात् ॥ ४९ ॥
तत्ते ऽर्हत्तम ! (१) नमःस्तुतिकर्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायाम् ।
संसेवया त्वयि विनेति षडङ्गया किं भक्तिं जनः परमहंसगतौ लभेत ॥ ५० ॥

नारद उवाच ।

एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः ।
प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ॥ ५१ ॥

श्रीभगवानुवाच ।

प्रह्लाद ! भद्र ! भद्रं ते प्रीतो ऽहं तेऽसुरोत्तम ! ।
वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम् ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विविधवेदाध्ययनम् स्वधर्मः वर्णाश्रमधर्मः व्याख्या अध्यापनम् रह एकान्तवासः जपो मन्त्रजपः समाधिर्देवप्राणायाम एवं त्वदनुग्रहं विना मदवेनरयाः तरणं त्वत्पदप्राप्तिश्च कस्याप्यधिकारिणः केनाप्युपायेन न सम्भवतीति फलितोऽर्थः ॥ ४६ ॥

अथ त्वदनुग्रहलब्धया सर्वत्र त्वद्दर्शनपूर्वकया त्वद्भक्त्यैव मुक्तिर्जनस्य स्यादित्याह—रूपे इति चतुर्भिः । वेदसृष्टे येन प्रकाशिते इमे सदसती स्थूलसूक्ष्मे बीजाङ्कुरादिवत् कार्यकारणे कारणं प्रधानं कार्यं ब्रह्माण्डं चेत्यर्थः । अरूपकस्य कर्मजन्यरूपरहितस्य तवैव नान्यत् त्वदन्यत् किमपि न "पुरुष एवेदं सर्वम्" इति श्रुतेः । अत एव युक्ताः त्वदनुग्रहयुक्ता उभयत्र रूपद्वयं समस्तं यथा भवति तथा दारुषु वह्निमिव योगेन त्वदनुग्रहलब्धबुद्धियोगेन त्वां विचिन्वते प्राप्तुमन्विष्यन्ति नान्यतः स्यात् एवमन्वेषणम् अन्यतः अधिकारिसामर्थ्यात् साधनसामर्थ्याच्च न स्यात् किन्तु त्वदनुग्रहत एव स्यादित्यर्थः "ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इति श्रीमुखवचनात् रूपे इमे इत्यनेन सुरासुरयोर्ग्रहणं न भवति बीजाङ्कुरावितिति निर्देशात् अत एव द्वितीये "अतः परं यदव्यक्तम्" इत्यत्र प्रधानस्यैव ग्रहणं न जीवस्य ॥ ४७ ॥

सर्वं त्वदात्मकमेवेत्याह—वायुरादिस्त्वमेव मात्राः शब्दादयः इन्द्रियमन्तःकरणम् चित्तेतनवर्गः अनुग्रहोऽनुग्राहको देवतावर्गः सगुणः सर्वोऽपि प्राकृतपदार्थः विगुणः प्रकृतिगुणरहितः कालः अप्राकृतलोकश्च किं बहुना मनश्च वचश्च तयोः समाहारस्तेन निरुक्तं विपर्ययीकृतं त्वदन्यत् नास्ति सर्वस्य त्वच्चेतनाचेतनशक्तिमयत्वात् ॥ ४८ ॥

भाषा टीका ।

यह जो सांसारिक गृह मैथुन सुख है अति तुच्छ है जैसा हाथों के खुजाने से फिर दुःख होता है ऐसाही यह भी दुःख दुःख है कृपणजन बहुत दुःख भोगने पर भी इससे तृप्त नहीं होते हैं । धीर पुरुष को उचित है कंडून (खुजाव) के समान मनोसिज (काम) को सहन करे ॥ ४५ ॥

मौन, व्रत, श्रुत, तप, वेदाध्ययन, स्वधर्म, व्याख्या, एकान्त निवास, जप, समाधि, ये दशों मुक्ति के साधन हैं, किन्तु हे पुरुष ! ये ही सब अजितेन्द्रियों की वार्ता (जीविका) होजाते हैं वे इन्हीं से धन उपार्जन कर कुटुंब पालन करते हैं । और दांभिकों की तो वार्ता भी नहीं होसकते हैं । इसार्थ व्यर्थ परिश्रम होता है ॥ ४६ ॥

(हे भगवन्) ये स्थूल सूक्ष्म कार्य कारण दोनों आप के रूप हैं वेदने प्रकाश किये हैं, बीजांकुर के समान स्थित हैं आपसे पृथक् नहीं हैं । युक्त जन योग से इन दोनों में आप को प्रत्यक्ष ढूंढ लेते हैं । और काष्ठ में अग्नि को, आपके बिना इस जगत् की सृष्टि नहीं होसकती है ॥ ४७ ॥

हे भूमन् ! वायु अग्नि पृथ्वी आकाश जल और पञ्चतन्मात्रा प्राण इन्द्रियें मन चित्त अहङ्कार सब आप ही हो, स्थूल सूक्ष्म जो कछ मन और वाणी से प्रकाशित है वह आप से अलग कुछ भी नहीं है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतस्तान्तु [illegible] रूपमपि त्वां न जानन्तीत्याह—नैत इति । एते गुणाः [illegible] आद्यन्तवन्तो [illegible] निरुपाधिं त्वां न विदन्ति हि यस्मात् सुधियो विद्वांस एवं विचार्य

---

(१) तत्ते ऽर्हत्तम ! इति वीर० पा०

श्रीधरस्वामिकृतभावार्थदीपिका ।

शब्दादध्ययनादिव्यापारादुपरमन्ति त्वामेव समाधिनोपासत इत्यर्थः । तथाच श्रुतिः"किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे" इति "नानुध्यायेद्बहून् शब्दान्वाचो विग्लापनं हि तत्" इति स्मृतिश्च—

"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" ॥

इत्यादिः ॥ ४६ ॥

उपसंहरति–तदिति । हे अर्हत्तम ! नमःस्तुतिकर्मपूजाः प्रणिपातस्तुति सर्वकर्मार्पणानि कर्म च परिचर्या चरणयोः स्मृतिश्च कथायां श्रवणं चेत्येवं षडङ्गया सम्यक्सेवया विना परमहंसानां गतौ प्राप्ये त्वयि जनः कथं भक्तिं लभेत? यस्मादेवं भक्तिं विना न मोक्षो न च भक्तिः संसेवया विनाऽतः प्राक् प्रार्थितं त्वद्दास्ययोगमेव देहीति प्रकरणार्थः ॥ ५० ॥

एतावन्तो वर्णिता गुणा यस्य यतमन्युरुपसंहृतकोपः ॥ ५१ ॥

कामान्पूरयतीति तथा यस्त्पुरुषार्थप्रवाहो ऽस्मीत्यर्थः ॥ ५२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नैत इति, गुणाः सत्त्वादयः गुणिनः प्राकृतगुणपरिणामात्मकाः महदादयः आदिशब्देनाहङ्कारतन्मात्राकाशादिभूतानि विवक्षितानि सह देवमर्त्यैः देवमर्त्यादिभिः सहिताः मनःप्रभृतयश्च करणानि करणिनश्च ये इत्यर्थः । त एते सर्वे त्वां न विदन्ति गुणाः न विदन्ति गुणिनोऽपि न विदन्तीति प्रत्येकान्वयाभिप्रायेण नञ्द्वयोपादानं सकरणाः सर्वे देवमनुष्यादयः स्वान्तरात्मतयावस्थितमपि न त्वामुपायान्तरेण विदन्तीत्यर्थः । तत्र हेतुं वदंस्तान् विशिनष्टि, आद्यन्तवन्त इति । कर्मायत्तोत्पत्तिविनाशिनः कर्मणा संकुचितज्ञानत्वाच्च विन्दतीति भावः । मुनयःसर्वान्तरात्मभूतत्वत्स्वरूपमननशीलास्तु । हे उरुगाय ! त्वामेव सर्वात्मकब्रह्मानुसन्धानरूपयोगेन त्वत्साक्षात्कारविरोधिकर्मनिरसनेन विमृश्य विमर्शनपूर्वकं साक्षात्कृत्य शब्दात् शब्दादिविषयाद्विरमन्ति एवमेव हि निःशेषमिन्द्रियजय इति भावः ॥ ४६ ॥

एवमुपासनात्मकभक्त्यैकवेद्यत्वं निरतिशयानन्दरूपत्वत्स्वरूपविषयकभक्तियोगगतस्याथादेव शब्दादिविषयेभ्यो विरामश्चोक्तः सा च भक्तिर्वक्ष्यमाणषडङ्गसेवया विना दुर्लभेति वदन्नुपसंहरति–तदिति । हे महत्तम ! तव नमस्तुतिकर्म नमस्क्रिया नमस्कारः स्तुतिक्रिया च, पूजा अर्घ्यपाद्यादिनिवेदनात्मिका कर्म परिचर्यात्मकम्, यद्वा, प्रथमकर्मशब्देन पादसेवनादिपरिचर्यात्मकं कर्म उच्यते पूजाकर्म पूजात्मकं कर्म-चरणयोः स्मृतिः स्मरणं कथायां विषयभूतायां श्रवणं कथाविषयकश्रवणं चेतीत्थं षडङ्गया सेवया विना परमहंसानां प्राप्ये त्वयि भक्तिं जनो लभेत किम् ? नैव लभेतेत्यर्थः ॥ ५० ॥

तदेवं प्रह्लादेन संस्तुतो नृसिंहस्तमुवाचेत्याह देवर्षिः—एतावदिति । भक्तेन प्रह्लादेन भक्त्या एतावदेतावन्मात्रं वर्णिता गुणा यस्य एतावच्छब्देन गुणानामानन्त्यं सूचयति–निर्गुणो हेयगुणरहितः श्रीनृसिंहःयतमन्युरुपसंहृतक्रोधः प्रीतः स्तुत्या इदः "स महात्मा सुदुर्लभः" इत्युक्तरीत्या दुर्लभस्वभक्तलाभेन वा प्रीतः प्रणतं तं प्रह्लादमभाषतोवाच ॥ ५१ ॥

तदेवाह–प्रह्लादेति, त्रिभिः । हे प्रह्लाद वत्स ! ते भद्रमनिष्टनिवृत्तिरिष्टप्राप्तिश्च भवेत् कुतः हे असुरोत्तम ! यतो ऽहं ते त्वया प्रीतः प्रीतिं प्रापितः अत एवाभिलषितं वरं वृणीष्व वरय अहं नृणामर्थिनां कामपूरः काम्यन्त इति कामाः धर्मादयस्तान् पूरयति ददातीति तथा ऽहमस्मि ॥५२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पृथिव्यादिमहत्तत्त्वान्तं पदार्थजातं कार्यकारणात्मना द्वित्वेन क्रोडीकृतं भगवद्रूपं ततोभिन्नमित्युक्तम् इदानीं तदवस्थितपरमात्मानं तदभिमानिनो देवा अपि साकल्येन न जानन्तीत्येव. विष्णोऽनन्तमाहात्म्यास्पुराणिरिति निश्चित्य, तमुपासते सन्त इत्याह, नैति । गुणाः सत्त्वादिगुणाभिमानिनः गुणिनो गुणविकाराः सहदेवमर्त्या इत्यत्र देवशब्देन पृथगिन्द्रग्रहणन्त इन्द्रादयो गृह्यन्ते सुधियो निश्चितशास्त्रार्थाः शब्दाद्वेदादिशब्दराशिप्रमाणादेते आद्यन्तवन्तस्त्वां न विदन्तीत्येवं विमृश्य विचार्योपास्य तत्प्रसादेन संदृश्य विरमन्ति संसारादिति शेषः ।"यद्वाचानभ्युदितम्"इत्यादि श्रुतेः शब्दाद्विरमन्तीत्यत्र शब्दत्यागो नार्थः किन्तु वेदेन निर्णीततत्त्वस्य तत्त्वे निरन्तरस्यन्दमानबुद्धिजलराशेः पुंसो हरिगुणानुस्मरणायासो नास्तीति वा ॥ ४९ ॥

श्रीनारायणप्रसाद एव पुरुषार्थसाधनमित्युक्तं तस्य भक्तिज्ञाने तयोश्च षडङ्गोपासनासाध्यं ध्यानं विना नान्यदन्यथा न स्यादित्याशयेनाह–तत्त्व इति । हिशब्देनान्यथाजीवङ्कत्व इत्याह–अपि शब्दात् पादौ नव क्षेत्रानुगमनेनियोज्यावितिग्राह्यं एवं षडङ्गया सेवया विना जनो मुमुक्षुः परमहंसानां गताश्रयभूते त्वयि भक्तिं ज्ञानं च लभेत किम् ? साधनान्तराभावान्नाप्नोतीत्यन्वयः । भक्तिज्ञानयोर्हेतुहेतुमद्भावादेकग्रहणेन द्वयोर्ग्रहणं युज्यत इति भावः । "परा पूर्वेषां सकृद्ध्या वृणक्ति"इति श्रुतेः ॥ ५० ॥

हरेरसुरेषु प्रद्वेषाश्रयात्प्रह्लादस्यापि तज्जातित्वेन तत्स्तुत्या कोपोपशमः स्यात्किम् ? प्रत्युतोद्दीपकत्वेनाग्नौ शुष्केन्धनप्रक्षेपवज्ज्वलनाय स्यादिति तत्राह, एतावदिति । योग्यतानुकूल्येन भक्त्या भक्तेनेति विशेषणद्वयेन शङ्कानिरस्तेति ज्ञातव्यं जातित्वमप्रयोजकं भक्तिरेवेति सूचनेन दैत्यवत्सत्त्वदुष्प्रत्तो न भवति भगवानिति सिद्धम् ॥ ५१ ॥

मन्युशान्तेः किं गमकमिति तत्राह—प्रह्लादेति । वरदानसामर्थ्ये हेतुमाह—कामपूर इति । नृणां भक्तानामिति शेषः ॥ ५१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

कर्म पूजापरिचर्या कर्मस्मृतिर्लीलास्मरणं चरणयोरिति सर्वत्रान्वितम्, भक्तिव्यञ्जकं तस्मात् सर्वकृतार्थतामूलत्वत्प्रेमभक्तिसम्पादनीं षडङ्गां संसेवामेव सर्वेऽपि देहि. अहञ्च त्वद्भक्तकृपया साक्षात्त्वदङ्घ्रिमूलप्राप्तौ त्वद्रसास्वादाख्ययोगाद्वा कृतार्थतामप्राप्तोऽपि तेनैव कृतार्थतां मंस्ये इति. प्रह्लादेषु प्रसादो यः प्रथमं प्रार्थितःतस्यापि कैमुत्येन गमितत्वात् सर्वप्रार्थनावाक्यैकवाक्यत्वे सिद्धे तदनुगतानामन्येषामपि वाक्यानां तत्स्वतःसिद्धम् ॥ ५० ॥

गुणाः कारुण्यादयः तत्तन्नामादिक्रियाशक्ति रूपाश्च ॥ ५१ ॥

तदेवं श्रीमत्प्रह्लादस्य सर्वजीवगतां कृपामनुमोदमानः तस्याश्च पूरकं च एतत् कीर्त्तयन्निति पर्यन्तमाशंसनं करिष्यन्नभीष्टान्तरमर्पयितुमुत्साहयति—अभिमतमन्यमन्यमपि तरम् ॥५२॥५३

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

त्वज्ज्ञानं त्वद्भक्त्यैव भवेत् नतु शास्त्राध्ययनबुद्धिकौशलादिभिरित्याह—नेति। यतस्ते त्वां न विदन्ति तर्ह्येतैरेव मनोबुद्ध्यादिभिः शास्त्राध्ययनाध्यापनादिभिर्विमृश्यैवं जीवाः कथं ज्ञास्यन्ति विमृश्य,शब्दादध्ययनादिव्यापारादुपरमन्ति तथा च श्रुतिः"किमर्थां वयं वक्ष्यामः" इति "नानुध्यायेद्बहून् शब्दान् वाचो विग्लापनं हि तत्"इति स्मृतिश्च "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति। तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" इत्यादि ॥ ४९ ॥

स्तुतिमुपसंहरति—तदिति। यस्मादध्ययनादिभिस्त्वज्ज्ञानं भवेत्तस्मात् त्वज्ज्ञानार्थमाग्रहं परित्यज्य सर्वपुरुषार्थसारस्य त्वत्प्रेम्णः साधनार्थमेव यतेतेत्याह, हे अर्हत्तम! नमो नमस्कारश्च स्तुतिकर्म स्तव करणञ्च पूजा अर्चनञ्च ताः कर्मपरिचर्य्यां चरणयोः स्मृतिश्च कथायां श्रवणं चेत्येवं षडङ्गया भेनया भक्त्या विना त्वयि किं भक्तिं प्रेमाणं लभेम ? नैव लभेमेत्यर्थः। परमहंसानां ज्ञानिनां गतिर्मुक्तिर्यस्मात्तस्मिन्निति कथञ्चिद्भक्तिमिश्रज्ञानेन मुक्तिमेव लभेमेति भावः। तस्मात्सर्वकृतार्थता—मूलत्वत्प्रेमभक्तिसम्पादनीं षडङ्गां संसेवामेव सर्वेऽपि देहि सा दुर्लभा चेत् मुक्तिमेव दत्त्वा संसारदुःखात्त्वत्सर्वांस्त्रायस्व अहन्तु त्वद्भक्तमेवयैव कृतार्थीकृत एव नर्त्ते इति न काचिच्चिन्तेति भावः ॥ ५० ॥

गुणाः कारुण्यादयः निर्गुणः प्राकृतगुणरहितः यन्मन्युः मद्भक्ताय प्रह्लादायापि द्रुह्यतीति यो दुर्वारो मन्युरभूत् स प्रह्लादस्यानन्यदर्शनादुपशान्त इत्यर्थः ॥ ५१ ॥

अभिमतं वृणीष्वेति भविभूत्यवसरत्वे परमोदारचूडामणेः 'सङ्कोच इति भावः। येषां कृते त्वं मां प्रार्थयसे तेषामपि नृणामहं कामपूरोऽस्मि पुरुषार्थप्रवाहरूप एव वर्त्ते. किं पुनरेकां मुक्तिमेव दूवे इति भावः। तेन प्रह्लादबुद्धिविषयीकृतास्तात्कालिका जीवा निस्तीर्णा एव जीवानामानन्त्यात्तदन्यैरेव जीवैः तदनन्तरं ब्रह्माण्डमपूरीति ज्ञेयम् ॥ ५२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एते गुणाः सत्त्वादयो जडत्वात् त्वां न विदन्ति गुणिनो महदादयो गुणकार्यभूता ये च मनःप्रभृतयस्ते सर्वे आद्यन्तवन्तः जडाश्च अतो न विदन्ति। हे उरुगाय! सह देवमर्त्त्यैः देवैर्मर्त्त्यैश्च सहिताः सुधियः साधवस्तु "एवं युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिवदारुषु" इत्युक्तप्रकारेण त्वां विमृश्य शब्दात् ज्ञानोपायबोधकात् शास्त्राद्विरमन्ति फलं प्राप्याध्यापनाध्ययनश्रमं विहाय त्वां ध्यायन्तीत्यर्थः ॥ ४९ ॥

हे अर्हत्तम! यस्मात्त्वमेव सर्वात्मा तस्मात्ते सेवया साधनरूपया भक्त्या विना परमहंसानां गतौ प्राप्ये त्वयि अतः भक्तिं परां भक्तिं किं लभेम? नैव लभेमेत्यर्थः। अतः सेवां देहि, यया परा भक्तिर्यया जनस्य मुक्तिरिति फलितोऽर्थः। कथंभूतया नमो नतिश्च स्तुतिकर्म स्तुतिकरणं च पूजा ऽर्चनञ्च कर्म परिचर्या च चरणयोः स्मृतिः कथायां श्रवणं चेति षडङ्गया ॥ ५० ॥

निर्गुणो हेयगुणरहितः भक्त्या प्रह्लादेन एतावत् एतावन्मात्रं वर्णिताः गुणाः कल्याणरूपा यस्य सः जित उपसंहृतो मन्युर्येन सः प्रह्लादमभाषत ॥ ५१ ॥

कामान् पूरयतीति कामपूरः ॥ ५२ ॥

———

भाषा टीका।

न ये गुण और न गुणी जो मनः प्रभृति हैं और महदादिक हैं देवता और मनुष्यों सहित वे सभी आदि अन्त वाले हैं हे उरुगाय! (वेदपुराणादिकों में आप बहुत गाये गये हो) इसी कारण से वे सब आपको नहीं जान सके हैं ऐसा विचार कर ही सुधीजन शब्द अर्थात् बहुत पठन पाठन की खट पट से विराम को प्राप्त हो जाते हैं ॥ ४९ ॥

हे अर्हत्तम! हे पूज्यतम! आप को नमस्कार स्तुति और सर्व कर्मार्पण परिचर्या चरणा... कथाश्रवण, इन छै अङ्गो सहित आप की सेवा के बिना परमहंसों के प्राप्य आप में भक्ति को पा सकता है ? नहीं, किन्तु आप की सेवा ही से भिक्षा भक्ति मिलती है ॥ ५० ॥

नारद उवाच ॥

नारदजी बोले, कि—आप स्वयं निर्गुण हैं अर्थात् प्राकृत गुण शून्य हैं, तो भी अपने भक्त प्रह्लाद ने भक्ति से आप के गुण वर्णन किये, तब प्रभु ने कोप शान्त कर प्रसन्न हो प्रधान भक्त प्रह्लाद से भाषण किया ॥ ५१ ॥

श्रीभगवान् उवाच।

श्री भगवान अर्थात् श्री नरसिंह देव बोले, कि—हे भद्र! हे प्रह्लाद! हे असुरोत्तम! हम तुम्हारे ऊपर प्रसन्न हैं तुम अपने अभीष्ट वर मांगो मैं मनुष्यों की कामनाओं को पूर्ण करने वाला हूं ॥ ५२ ॥

———

मामप्रीणत आयुष्मन् ! दर्शनं दुर्लभं हि मे ।
दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति ॥ ५३ ॥
प्रीणन्ति ह्यथ मां धीराः सर्वभावेन साधवः ।
श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिम् ॥ ५४ ॥
एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः ।
एकान्तित्वाद्भगवति नैच्छत्तानसुरोत्तमः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम् वैयासिक्यां सप्तमस्कन्धे प्रह्लादाऽनुचरिते दैत्यराजवधे नृसिंहस्तवो नाम नवमोऽध्यायः ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अप्रीणतः अप्रीणयतः तप्तुमपूर्णकामत्वेन शोचितुम ॥ ५३ ॥
प्रीणन्ति तोषयन्ति ॥ ५४ ॥
एकान्तित्वान्निरुपाधिभक्तत्वात् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् नवमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे आयुष्मन् ! मामप्रीणतः प्रीतमकुर्वतः पुंसो दुर्लभं हि मम दर्शनं मां दृष्ट्वा जन्तुर्देही पुनरात्मानं तप्तुमपूर्णकामत्वेन शोचितुं नार्हति ॥ ५३ ॥

अथातो धीरा जितेन्द्रियाः श्रेयस्कामयमाना महाभागा विवेकिनः साधवः सर्वासामाशिषां पुरुषार्थानां पतिं दातारं मां सर्वभावेन करणत्रयैक्येन प्रीणन्ति तोषयन्ति हि खलु ॥ ५४ ॥

एवं वराय चोदितोपि नैच्छदसुरोत्तम इत्याह, नारदः एवमिति । लोकानां विषयातुराणां प्रलोभनैर्विमोहकैर्वरैरेवमित्थं प्रलोभ्यमानोऽप्यसुरोत्तमः प्रह्लाद एकान्तभक्तत्वादनन्यप्रयोजनभगवद्भक्तियुक्तत्वात्तान् धर्मादीन्वरान्नैच्छन्नेयेष ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मत्प्रसाद एव दर्शने कारणमित्याह—मामिति । मामप्रीणतोऽप्रीणयतः मद्दर्शनफलं न प्राप्यदर्शनत्वमेत्याह, दृष्ट्वेति ॥ ५३ ॥

यतो न तत्प्राप्त्यैतथा तस्माद्धीरा माधवं मां प्रीणन्ति प्रीणयन्ति केन सर्वभावेन पूर्णभक्त्या माधव इत्यस्यार्थो मद्भक्तदेवतापतिरित्यभिप्रायेणाह—सर्वेषामिति । सर्वेषामभिशेषेण या या अभिलषिता आशिषस्तासां तासामाशिषां पतिं पातृत्वेन दातारमित्यर्थः ॥ ५४ ॥

प्रह्लादोपि सामान्यभक्तो न भवति किंतु भक्तोत्तम इति प्रकटनाय भगवता विप्रलुब्धोऽपि तान्वरान्नैच्छदित्याह, एवमिति । एकान्तित्वान्नैसर्गिकभक्तत्वात् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् नवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ अत एव अभिमत वरेच्छात एव ॥ ५४ ॥
एवं पूर्वोक्त प्रकारेण वरैः स्वयमेव निर्दिष्टैः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे नवमोऽध्यायः समाप्तः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अप्रीणतः अप्रीणयतः तप्तुम् अपूर्णकामत्वेन शोचितुम् ॥ ५३ ॥
प्रीणन्ति प्रीणयन्ति मां प्रति तुष्यन्तीति वा सर्वभावेन दास्यसख्यादिना ॥ ५४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

एकान्तित्वात् "एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति" इति तल्लक्षणात् ॥ ५५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
सप्तमेऽष्टमोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मामप्रीणतोऽप्रीणयतः जनस्य मे दर्शनं दुर्लभम् भक्त्या प्रसन्नं मां दृष्ट्वा तु आत्मानं तप्तुमपूर्णकामत्वेन सन्तापयितुं नार्हति ॥५३॥

सर्वभावेनाशयज्ञा भक्त्या प्रीणन्ति तोषयन्ति ॥ ५४ ॥

एकान्तित्वान्निष्कामभक्तत्वात् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
नवमाऽध्यायार्थ प्रकाशः ॥ ९ ॥

भाषा टीका।

हे आयुष्मन्! मुझे प्रसन्न न करके मेरा दर्शन दुर्लभ है वह मेरा दर्शन पाकर अन्तु सन्ताप को प्राप्त नही होसकता है ॥५३॥

साधुजन धीर पुरुष सर्व भाव से मुझे प्रसन्न करते हैं जो कि श्रेय की कामना वाले महाभाग है, मैं भी कैसा हूं कि सर्व संपत्ति और अभीष्ट पुरुषार्थों का देने वाला हूँ ॥ ५४ ॥

इस प्रकार बहुत लुभाने वाले वरों से प्रह्लाद को लोभ दिखाया परंतु असुरोत्तम श्रीप्रह्लाद जी ने भगवान् के एकांति भक्त होने से उनवरों की इच्छा नहीं की ॥ ५५ ॥

इति श्रीमद्भागवत महापुराण सप्तम स्कन्ध में
श्रीप्रह्लाद चरित में श्रीनरहरि स्तुति नामक
नवम अध्याय की भागवताचार्य कृत
भाषा टीका समाप्त ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे नवमोऽध्यायः ॥ ९ ॥



॥ दशमोऽध्यायः ॥

नारद उवाच ।

भक्तियोगस्य तत्सर्वमन्तरायतयाऽर्भकः ।
मन्यमानो हृषीकेशं स्मयमान उवाच ह ॥ १ ॥

प्रह्लाद उवाच ।

मा मां प्रलोभयोत्पत्त्याऽऽसक्तं कामेषु तैर्वरैः ।
तत्सङ्गभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः ॥ २ ॥
भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् ।
भवान्संसारबीजेषु हृदयग्रन्थिषु प्रभो ! ॥ ३ ॥
नान्यथा तेऽखिलगुरो ! घटेत करुणात्मनः ।
यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् ॥ ४ ॥
आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ।
न स्वामी भृत्यतः स्वाम्यमिच्छन्यो राति चाशिषः ॥ ५ ॥
अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ।
नान्यथेहावयोरर्थो राजसेवकयोरिव ॥ ६ ॥
यदि रासीश ! मे कामान्वरांस्त्वं वरदर्षभ ! ।
कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ॥ ७ ॥
इन्द्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः ।
ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यन्ति जन्मना ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दशमे त्वनुगृह्यामुं भक्तमन्तर्हिते हरौ ।
प्रसङ्गात्त्रिपुरं रुद्रे कृतोऽनुग्रह ईर्यते ॥ १ ॥

तत्सर्वं वरजातम् ॥ १ ॥

उत्पत्त्या स्वभावेनैवासक्तं माम् तेषां कामानां सङ्गाद्भीतः ॥२॥

ननु, किमहं भक्तं प्रलोभयामि? नहि,किन्तु वरं वृणीष्वेति वद-तस्तवाभिप्रायोऽन्य एवेत्याह-भृत्यलक्षणेति । हृदयस्य ग्रन्थिवद्-बन्धकेषु ॥ ३ ॥

अन्यथा ऽनर्थसाधने प्रवर्त्तनं न घटेतेत्यर्थः कथमेवं भृत्यलक्ष-णज्ञानं स्यात्तत्राह-य इति । ते तवत्तः ॥ ४ ॥

ननु, कामनयाऽपि सेव्यसेवकयोः स्वामिभृत्यभावः प्रसिद्धः, सत्यम्, सोपाधिको ऽसौ नतु तात्त्विक इत्याह—स्वामिन्यात्मन आशिषो ऽपेक्षमाणो नैव भृत्यः भृत्यहेतुकमात्मनः स्वाम्यमिच्छन्यो भृत्याय ददाति स च नैव स्वामी ॥ ५ ॥

आवयोस्तु तात्त्विकोऽसावित्याह-अहं त्विति । अनपाश्रयो निर-भिसन्धिः अन्यथा कामाद्यभिसन्धिनाऽर्थः प्रयोजनं नास्ति ॥ ६ ॥

ननु, तथाऽपि परमोदारस्य मम सन्तोषार्थं किमपि वृणीष्वेति

श्रीधरस्वामिकृतभावार्थदीपिका ।

चेद्दत आह-यदीति । कामाङ्कुराणामसंरोहमनुत्पत्तिम् भवतः सकाशात् ॥ ७ ॥

ननु, कामोत्पत्तौ सत्यां को दोषस्तत्राह-इन्द्रियाणीति यस्य जन्मना नश्यन्ति-आत्मा देहः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वराऽनिच्छायां हेतुं वदन् तं विशिंषन्भगवन्तं प्रह्लादः प्राहेत्याह-देवर्षिः, भक्तियोगस्येति । तद्भगवता चोदितं धर्मादिवरजातं सर्वमनन्यप्रयोजनभक्तियोगस्यान्तरायतया विघ्नरूपतया मन्यमानः स्मयमानः अहो मदभिप्रायज्ञो भगवन्तरात्मा सन्मामेवं प्रलोभयतीति स्मयमानो हृषीकेशं भगवन्तमुवाच ॥ १ ॥

तदेवाह—दशभिः, मेति । उत्पत्त्या स्वभावेनैव कामेषु सक्तमासक्तमिति वा छेदः उत्पत्तिप्रभृतिकामेष्वासक्तं मामेतैःकामरूपैर्वरैर्मा प्रलोभय प्रलुब्धं मा कुरु यतोऽहं तत्सङ्गेन कामासक्त्याऽनर्थावहया भीतस्तत्र कामेषु निर्विण्णः संसृतिबन्धान्मोक्तुमिच्छुस्त्वामुपाश्रितः शरणं गतः ॥ २ ॥

वरं वृणीष्वेति वराय चोदयतस्तव चोदनाद्वारा याचमानाय मह्यं न वरप्रदानेऽभिप्रायः किन्तु भृत्यस्य मम मनःपरीक्षायामित्याह—भृत्येति । कामेषु भृत्यं मां चोदयन् भवान् भृत्यस्यानन्यप्रयोजनत्वरूपं लक्षणं जिज्ञासुः सर्वज्ञोपि भवान् मन्मुखेन मन्मनः परिजिज्ञासुरेव भृत्यं मां तन्मनः परीक्षार्थमेव मां भृत्यं कामेषु भवान् चोदितवानित्यर्थः । अचोदयदिति पाठः सुगमः अन्यथा वरयाञ्चायै चोदना कारुण्यजलधेर्हितोपदेष्टुर्भक्तानुग्राहकस्यानर्थावहेषु कामेषु भृत्यं प्रति चोदना न घटत इत्याह—अन्यथैवं चोदयतस्तव भृत्यलक्षणजिज्ञासुत्वाभावे तव करुणात्मनः कारुण्यमूर्तेरखिलबन्धहितोपदेष्टुर्हितरूपेषु दुःखरूपगर्भजन्ममरणादिरूपसंसारस्य बीजभूतेषु हृदयग्रन्थिवद्दुर्मोचनेषु न घटत चोदनेति शेषः । अतो भृत्यलक्षणजिज्ञासुः सन्नेव कामेषु मामचोदयदित्यर्थः । अत्र घटत करुणात्मन इत्यस्यानन्तरं क्वचित् "नष्टदृष्टेस्तमस्यन्धे त्वमेकः पारदर्शनः" इति पठ्यते. तत्रायमर्थः । इतोपि न कामेषु चोदना भवतो घटत इत्याह—नष्टदृष्टेरिति । अन्धेतमसि संसारात्मके नरके नष्टदृष्टेः स्वात्मपरमात्मयाथात्म्यज्ञानरहितस्यान्धतमस्तरणोपायानभिज्ञस्य वा पुंसः त्वमेवैकः पारदर्शनोऽन्धतमसः पारभूतमात्मानं दर्शयतीति तादृशः यत एवंभूतस्त्वं अतस्तव न घटत इति ॥ ३ ॥

नन्वाशिषः कामयमानोऽपि भृत्यो मम दृश्यत एवेत्यत आह—न इति । ते त्वत्तः निरतिशयपुरुषार्थस्वरूपात् पुमानाशिषः कामानाशास्ते त्वत्सेवापूर्वकं प्रार्थयते. स तव न भृत्यः न भृत्यलक्षणान्वितः किं तर्हि सतु वणिक्तुल्यः यथा वणिग्यावत्स्वप्रयोजनमन्यमनु वर्तते—तद्वत्सोपाधिकानुवृत्तिमानित्यर्थः ॥ ४ ॥

एवं भृत्यास्निकात्प्रयोजनमपेक्ष्य तस्मै कामान्ददतः स्वामित्वमपि निरुपाधिकं नास्तीत्याह-आशासान इति । आत्मनः स्वस्य स्वामिन्याशिषः कामानाशासानः कामयमानः न वै भृत्यः भृत्यो न भवति अयं दृष्टान्तार्थम् अस्यार्थस्य पूर्वमुक्तत्वाद्यथायं भृत्यो न भवतीत्यर्थः । तथा भृत्यात्स्वात्मीयं स्वामिनः प्रयोजनं स्वाऽर्थं तदिच्छन्कामयमानो यो भृत्यायाशिषो रातिं ददाति सवै न स्वामी स्वामिशब्दवाच्य एव न भवति नित्यं निरुपाधिकं स्वमस्यास्तीति स्वामीति नित्ययोगार्थमत्वर्थीयप्रत्ययान्तस्वामिशब्दवाच्य एव न भवति तस्य सोपाधिकस्वामित्वादिति भावः । अत्र "नाति चाशिष" इत्यस्यानन्तरम् "स वै स्वामी स वै भृत्यो गुणालुब्धौ न कामुकौ" इति क्वचित् पठ्यते. तत्रायमर्थः को तर्हि स्वामिभृत्यौ इत्यत आह—सवा इति । यौ गुणालुब्धौ परस्परानुरागजनकसद्गुणमात्रमोहितौ न कामुकौ परस्परं प्रयोजनान्तरमनपेक्ष्यमाणावनुवर्तेते स एव भृत्यः स एव स्वामीति ॥ ५ ॥

आवयोस्तु भृत्यस्वामिभावः स्वाभाविक इत्याह-अहमिति । अहन्तु, कीदृशो वा भवतु लोके भृत्यः अहं त्वकामोऽनन्यप्रयोजनः त्वद्भक्त इति तु शब्दार्थः । त्वमनपाश्रयः स्वामीति त्वद्भक्तोऽहमकामोऽनन्यप्रयोजनः ।

"स्वत्वमात्मनि सञ्जातं स्वामित्वं ब्रह्मणि स्थितम् ।
नान्यथा लक्षणं तेषां बन्धे मोक्षे तथैव च" ॥

इत्युक्तरीत्या प्रभुस्त्वमित्यनिरुपाधिकस्वहास्योऽहं त्वं तु निरुपाधिकस्वामीत्यध्यवसायपूर्वकं नित्यं स्वस्य स्वाऽत्यनुवर्तनं स्वस्वरूपानुबन्धीत्यध्यवसायेन परिहृतान्यप्रयोजनस्त्वद्भक्तोऽस्मीत्यर्थः । अतोऽन्यथा प्रकारान्तरेणावयोरिह स्वस्वामिभावोऽर्थः प्रयोजनं नास्ति राजसेवकयोरिवेति व्यतिरेकदृष्टान्तः यथा राजसेवकयोः प्रयोजनान्तरमूलकः स्वस्वामिभावः; तथा नावयोरिति तदेतत्सर्वेषांस्त्वं जानास्येवेति भावः ॥ ६ ॥

अहो सर्वज्ञस्यापि किमनङ्गरयाञ्चायै चोदयतः सत्यसङ्कल्पस्य मम वचसः प्रत्याख्यानं न शोभन इति भगवदभिप्रायमभिप्रेत्य यदि भवतो मह्यं वरप्रदानेऽभिलाषस्तर्हि वरय इत्याह—यदीति । हे ईश ! वरदर्षभस्त्वं मे मह्यं कामान्वरान् राति ददासि तर्हि भवतस्त्वत्तोऽहं मत्सर्व कामानां कामाङ्कुराणामसंरोहमनुत्पत्तिरूपं वरं वृणे धर्मादिपुरुषार्थेच्छानुदयरूपं वरं याच इत्यर्थः ॥ ७ ॥

ननु, कामोत्पत्तौ सत्यां को दोषस्तत्राह—इन्द्रियाणीति । यस्य हृदि सञ्जातकामाङ्कुरस्य कामान् कामयमानस्येन्द्रियाणि जन्मना जन्मपरम्परया नश्यन्ति कामिनोऽन्यतः स्थावरत्वप्राप्तौ इन्द्रियमनःप्राणात्मानः एवासत्प्राया भवन्ति किं पुनर्धर्मादय इति भावः । नहीतोऽन्यः कश्चिदनर्थो विद्यत इति तात्पर्यम्, तत्रात्मा-प्रत्यगात्मा. धर्मो वर्णाश्रमाऽनुगुणो भगवदाराधनरूपः धृतिः धैर्यमिन्द्रियजयो द्वन्द्वसहिष्णुता वा. मतिः स्वात्मपरमात्मविषया. ह्रीरनुचितकृत्यविषया लज्जा. श्रीर्ज्ञानसम्पत्तिरैश्वर्यं वा. तेजोऽन्याऽसम्पन्नता स्मृतिः हेयोपादेयार्थस्मरणात्मिका. सत्यं भूतहितत्व सत्यवचनं वा ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्मिन्नध्याये भक्त्यैव पुरुषार्थो न क्लेशात्प्रत्यर्थतत्प्रतिपादन पुनः पुनर्भक्तेः प्राधान्यज्ञापनायान्यद्वारानुग्रहो नाक्ष्यायेति तात्पर्यम्, वरानभिच्छन् प्रह्लादो हरिं किमप्युवाचेति हरिं युधिष्ठिरप्रश्नं परिहरन्

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नारदस्तत्र वक्तीत्याह—नारद इति। यथसाभर्को ननु बालेनेत्येतद्विशेषप्रकाशनाय इति विशेषणं हि इतापिस्यमरः ॥ १ ॥

ज्ञातसर्वेन्द्रियवृत्तित्वादनुग्रहाकेक्षेण त्वया मन्मनोगतं ज्ञातमिति यद्वतो मनःपरीक्षणार्थं एतैर्मनःप्रलोभनं न कुर्विति प्रार्थ्यते, इत्याशयेनाह—मामेति । गुरुवचनमज्ञातेष्टबोधकत्वेन प्रमाणं स्यादिदं स्वभावत एव ज्ञातेष्टबोधकत्वाद्व्यर्थमिव प्रतिभातीत्याशयवानाह—उत्पत्त्येति । आसक्तमिति लोकवृत्तान्तप्रदर्शनपरं प्रह्लादस्यार्भकावस्थामारभ्य विष्णुधर्मैकनिष्ठत्वात् यतो विषयसङ्गिनामनर्थपरम्परा दृश्यते नत्वस्माद्विषयाः । विषयिणो विषयाऽसिद्धया तात्कालिकप्रसूननिर्वेदवशायं निर्वेद इत्याह-मुमुक्षुरिति । अनेन प्रह्लादस्याधिकारलक्षणसामग्री विद्यत इति दर्शितम् ॥ २ ॥

ननु, भगद्वाक्यं क्वापि विप्रलम्भकं न भवति "अजस्याप्रचेतसः" इति श्रुतेः । भवता तथैव प्रोच्यते तथाच भगवद्वाक्यस्याविश्वसनीयत्वं स्यादिति तत्राह—भृत्येति । चोदयात् चोदयति "धियो यो नः प्रचोदयात्" इति श्रुतेः ॥ ३ ॥

यज्ञार्थमेव तथोच्यत इति किमस्यादत्राह—नान्यथेति । अखिलगुरुत्वान्यथानुपपत्त्या न वञ्चनं युक्तमित्यर्थः । इतोऽपि भृत्यलक्षणजिज्ञासैव प्रयोजनं त्वद्वचनस्यान्यथा तवेष्टजनघातकत्वदोषापत्तिः स्यात् सा निर्दोषत्वेन न युक्तेत्याशयवानाह-नष्टेति । न केवलमितरगुरुवन्मार्गमात्रप्रदर्शकः किन्तु गम्यं च, अतो विप्रलोभनं न युक्तमतो वाह-नेति। पारदर्शिनः पारं वाग्नं द्रष्टुमिच्छन्नः ननु, मत्प्रार्थितकामावाशीर्वचनमस्तु नाम प्रलोभनं तत्कामुकस्याभीष्टदानाचनेऽनाकाङ्क्षिताभिधानं स्यादिति तत्राह, वक्त इति । ते तव सकाशात् आशिषः सम्पदः सेवायाः । तर्हि स क इति तत्राह—स इति ।"वन षण सम्भक्तौ" इति धातोः सम्भजनं विक्रयं द्रव्यं प्रसार्य दानलक्षणं तत्कर्तावाणिग्वै । हि भयं च किञ्चित्पुक्तनकरणलक्षणदानेन भवादृशाज्जनात्पुष्कलपुण्यफलादानं करोतीति यस्मात्तस्माद्वणिगित्यर्थः । आशास्ते इच्छति अनेन फलदस्य स्वामित्वं च विघटितं भवतीति दर्शितम्.* तर्हि कयोः स्वामिभृत्यभाव इति तत्राह—स्वा इति ।"लुभ गार्ध्ये" इति धातोः भक्त्यादिगुणोद्रेकाकाङ्क्षिणौ गुणालुब्धौ मिथः फलानि न कामुकौ ॥ ४ ॥

ननूभयोः फलकामित्वे को दोष इति तत्राह—आशासान इति । स्वामिनि समवेता आशिष आत्मनः स्वस्याशासानो यः स भृत्यो न वै नैव किन्तु वणिग्भट एव वरदानादिना भृत्यात्स्वस्य स्वामित्वमिच्छन् यो भृत्यायाशिषो राति ददाति स स्वामी न च । कल्पितस्वामित्वेन तच्छब्दस्य मुख्यार्थाभावात् ॥ ५ ॥

प्रकृते किमभूदिति तत्राह—अहन्त्विति । अनपाश्रयो भृत्यप्राप्यफलानाश्रयः स्वामी अव्याहतस्वामीत्यर्थः । एतदेव स्पष्टयति, नान्यथेति । निष्कामत्वेन भृत्यत्वं मम अनपाश्रयत्वेन स्वामित्वम् एतस्मादन्यथा प्रकारान्तरेणावयोरर्थो नास्ति किन्तत्प्रकारान्तरं तत्राह—राज्ञेति । इह लोके यथा राज्ञः सेवकस्य च स्वाज्ञातिवर्तनप्रीत्यादिलक्षणमेतनादिलक्षणश्चार्थोऽस्ति तथेति ॥ ६ ॥

ननु, शास्त्रेषु प्रतिपाद्यमानसेव्यसेवकभावो ज्ञातृज्ञेयभावो दातृयाचकत्वभाव इत्यादि सम्बन्धिसम्बन्धलक्षणार्थसम्भवादावयोरर्थो नास्तीति निषेधः कथं क्रियते? इत्याशङ्कां परिहर्तुमाह-यदीति । "नान्यथेश्वरभाषितम्" इति वचनात् भवदुक्तम् अन्यथा माभूदिति भीत्या च तं वृण इत्यतो वाह—यदीति। "दाप् दाने" इति धातुः काङ्क्षन्ते कामाः अभिमता एव वरास्तान् कामानां विषयाणाम् असंरोहं सम्यगनुत्पादं नाम वरं वृण इत्यन्वयः* ॥ ७ ॥

केन दोषेण तेषामनुत्पादः प्रार्थ्यत इति तत्राह—इन्द्रियाणीति । येषां कामानां विषयाणां जन्मना इन्द्रियादयो नश्यन्ति तेषामिति शेषः "सर्वेन्द्रियाणां जरयन्ति तेज" इतिश्रुतेः । आत्मा भक्तिः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १ ॥

मुमुक्षुस्तान् कामान् त्यक्तुमिच्छुः ॥ २ ॥

भृत्येति सार्द्धकम् । भृत्यस्य लक्षणम् असाधारणं धर्मं जिज्ञासुः लोकेषु ज्ञापयितुमिच्छुरित्यर्थः ॥ ३ ॥

यस्त इत्यर्द्धकम् ॥ ४ ॥ ५ ॥

व्यतिरेके दृष्टान्तः राजसेवकयोरिवेति ॥ ६—१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

प्रह्लादाय वरं दत्त्वा दशमेऽन्तर्हिते हरौ ।
तस्यैवानुप्रहादीशः पुरस्तिस्रो ददाह सः ॥

तत्सर्वं वरजातं स्मयमान इति मां याचकमहं प्रलोभयन् प्रभुरयं मद्बुद्धिं परीक्षते इति विचारोत्थं स्मितम् ॥ १ ॥

उत्पत्त्या स्वभावेनैव वरैर्वरदानैस्तेषां कामानां सङ्गप्रीतः अत एव मुमुक्षुस्तान् कामान् मोक्तुमिच्छुः ॥ २ ॥

ननु, किमहं भक्तं प्रलोभयामि? न हि न हि स्वभक्तस्य सर्वोत्कृष्टां निष्ठां लोके स्थापयामीत्याह—भृत्येति । मयादीयमानान् वरान् कथं न गृह्णासीत्युक्ते मद्भृत्य एव मद्भृत्यस्य लक्षणं कथयिष्यतीत्यभिप्रायस्तवावगम्यते इति भावः । प्रभुरिति सर्वज्ञस्य तव जिज्ञासा नोपपद्यत इत्यतः सर्वान् ज्ञापयितुमेवेति भावः । अखिलगुरोः सर्वहितोपदेष्टुस्तव ब्रह्मरुद्रादीनामिवेति भावः ॥ ३ ॥

तद्ब्रूहि भृत्यलक्षणमिति चेत्स्वामिभृत्ययोरुभयोरपि लक्षणं ब्रवीमीत्याह—य इति । ते त्वत्तः वणिगिति तुभ्यं किञ्चित् पत्रपुष्पनैवेद्यादिकं दत्त्वा हस्त्यश्वरथादिमतीं सम्पत्तिं ब्रह्मेन्द्रादिपदं वा जिघृक्षतीति भावः ॥ ४ ॥

उक्तमेवार्थं पुष्णाति—आशासान इति । भृत्यहेतुकमात्मनः स्वाम्यमैश्वर्यं इच्छन् यो भृत्याय ददाति स च नैव स्वामी ॥ ५ ॥

आवयोस्तु स्वामिभृत्यभावस्तात्त्विक इत्याह—अहं त्विति । अनपाश्रयः सेवकाधीनमपफलमैश्वर्यं नाश्रयस इत्यर्थः । अन्यथा स्वकामिताभिसन्धिना ते नाभिसन्धिकः स्वामिभृत्यभावो लोके प्रसिद्धोऽपि सोपाधित्वाद्विगीत एवेति द्योतितम् ॥ ६ ॥

---

* "सवै स्वामी सवै भृत्यो गुणलुब्धौ न कामुकौ" इति विजय० पाठाऽधिकः ।

विमुञ्चति यदा कामान्मानवो मनसि स्थितान् ।
तर्ह्येव पुण्डरीकाक्ष ! भगवत्त्वाय कल्पते ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, तथापि मम परमोदारस्य सुखार्थं किमपि दातव्यमिति चेत्तत्राह, असंरोहं मम हृदि कामा मोत्पद्यतामित्यर्थः ॥ ७ ॥

यस्य कामस्य इन्द्रियादीनां जन्मना तुर्योऽमहत्त्वमेव कुपथगामिता सैव नाशः ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ प्रह्लादं प्रत्यनुग्रहं कृत्वा ब्रह्मायां प्रत्येकविधो वरो ऽसुरे-ऽप्यस्त्वथा न देय इत्युक्त्वा हरिरन्तर्हितोऽभूदिति अनेन भक्तवत्सलेन हरिणा रावणादिभावं गतयोः स्वपार्षदयोर्युद्धलीलया प्यनुग्रहः कृत इति शिवेऽप्यनुग्रहः कृतः इति च दर्शने श्रीनारद आह—भक्तियोगस्येति । भक्तियोगस्यान्तरायतया विघ्नंदकतया तत्सर्वं वरजातं मन्यमानः ॥ १ ॥

आमुत्पत्त्याद्यभावेनैवं कामेषु सक्तं तैर्वरैर्मा प्रलोभय ततस्तेषां कामानां सङ्गाद्भीतो मुमुक्षुरहं त्वामुपाश्रितोऽस्मि ॥ २ ॥

भृत्यलक्षणजिज्ञासुः जानन् अपि भृत्यलक्षणं ज्ञातुमिच्छुः लोके ख्यापयितुमित्यर्थः । हृदये ग्रन्थयोऽसन्नात्मकं मूलं येषां तेषु संसारबीजेषु कामेषु मामचोदयत् अन्यथा करुणात्मनः करुणाया आश्रयस्य करुणानिधेः तेषु भक्तप्रेरणा न घटेत ॥ ३ ॥

ते त्वत्तः आशिषः कामान् य आशास्ते प्रार्थयते स वणिक् न तु स भृत्यः किन्तु यः आत्मनः स्वकृते स्वामिनि आशिषः आशासानो वै निश्चितं स भृत्यो भवति. भृत्यतः स्वाम्यं स्वार्थं मिच्छन् यः आशिषां ददाति स स्वामी न भवति सोऽपि वणिक् ॥ ४ ॥ ५ ॥

आवयोः स्वस्वामिभावस्तु शुद्ध इत्याह—अहमिति । अहमकामो निष्कामस्त्वञ्चाकृतत्वं च अनपाश्रयः स्वानन्दपूर्णः मम स्वामी अतः आवयोरर्थः प्रयोजनम् राजसेवकयोरिव अन्यथा इतरेतरप्रयोजनमूलो न हि ॥ ६ ॥

हे ईश ! यदि भक्तवात्सल्यतः मे कामान् वाञ्छितान् वरान् दास्येव तर्हि हे वरदर्षभ ! कामानां विषयसङ्कल्पानाम्' हृदि असंरोहमनुत्पत्तिं भवतः सकाशात् वरं वृणे ॥ ७ ॥

यस्य विषयसङ्कल्पस्य जन्मना इन्द्रियादयो नश्यन्ति तत्रेन्द्रियमनःप्राणानां नाशो ऽधर्मप्रवृत्तिरूपः आत्मनो देहस्य चिन्ताशोकादिजन्यज्वरार्त्तत्वरूपश्च आत्मनो जीवस्य वा स्वरूपविस्मरणरूपः धर्मादीनां ततो निर्गमनरूपः तथोक्तम्——

"देहीति वचनं श्रुत्वा देहस्थाः पञ्च देवताः ।
तत्क्षणादेव गच्छन्ति श्रीह्रीधीधृतिकीर्तयः" ॥ ८ ॥

———

भाषा टीका ।

नारद उवाच ।

नारद जी बोले, कि—छोटा सा बालक प्रह्लाद, इन सब वरों को भक्ति के विघ्नकारी जानकर हसता सा हृषीकेश श्रीनरहरि से बोला, ॥ १ ॥

प्रह्लाद उवाच ॥

प्रह्लाद बोले, कि—हे प्रभो ! मैं तो उत्पत्ति से ही विषयों मे आसक्त हूं, मुझे वरों से मत लुमाइये, उस सङ्ग से भय भीत निर्वेद को प्राप्त हुआ मैं मुमुक्षु आपके शरण आया हूं ॥ २ ॥

हे प्रभो ! आप अपने भक्त के लक्षण जानने की इच्छा-से हृदय के ग्रन्थि रूप और संसार के बीज रूप कामों के लिये प्रेरणा करते हो ॥ ३ ॥

हे अखिल गुरो ! अन्यथा परम दयालु आपका ऐसा कथन कैसे घटे, जो आप से कुछ चाहना करता है वह भृत्य नहीं किन्तु वणिक् है ॥ ४ ॥

स्वामी से अपने लिये कुछ चाहना जो करने वाला है, वह भृत्य नहीं है, और वह स्वामी भी नहीं है जो अपने भृत्य से स्वामीपने की इच्छा करता हुआ कुछ इच्छित प्रदान करता है ॥ ५ ॥

मैं तो आपका निष्काम भक्तहूं. और आप मेरे निरुपाधिक स्वामी हैं, यदि जो कामादि की अभिसंधि होती तो राजा और सेवक के तरह कुछ प्रयोजन ही नहीं था ॥ ६ ॥

हे वरद श्रेष्ठ ! यदि आप मुझे वरही देते हैं तो आपसे मैं यही वर मागता हूं कि मेरे हृदय में किसी कामना का अंकुर नहो । कि जिस से मैं फिर भी कभी वर न मागूं ॥ ७ ॥

क्योंकि ? जिस कामना के उत्पन्न होने से ही इन्द्रिय मन प्राण आत्मा धर्म धृति मति लज्जा श्री तेज स्मृति सत्य ये सब ही नष्ट होजाते हैं ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

कामाभावे गुणमाह—विमुञ्चतीति । भगवत्त्वाय त्वत्साम्यार्थाय तथाच श्रुतिः "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति ॥ ९ ॥

नमो भगवते तुभ्यं पुरुषाय महात्मने ।
हरये ऽद्भुतसिंहाय ब्रह्मणे परमात्मने ॥ १० ॥

श्रीनृसिंह उवाच ।

नैकान्तिनो मे मयि जात्विहाशिष आशासते ऽमुत्र च ये भवद्विधाः ।
अथापि मन्वन्तरमेतदत्र दैत्येश्वराणामनुभुङ्क्ष्व भोगान् ॥ ११ ॥
कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि सन्तमेकम् ।
सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ॥ १२ ॥
भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा ।
कीर्तिं विशुद्धां सुरलोकगीतां वितत्य मामेष्यसि मुक्तबन्धः ॥ १३ ॥
य एतत्कीर्तयेन्मह्यं त्वया गीतमिदं नरः ।
त्वां च मां च स्मरन् काले कर्मबन्धात्प्रमुच्यते ॥ १४ ॥

प्रह्लाद उवाच ।

वरं वरय एतत्ते वरदेशान्महेश्वर ! ।
यदनिन्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् ॥ १५ ॥
विद्धामर्षाशयः साक्षात्सर्वलोकगुरुं प्रभुम् ।
भ्रातृहेति मृषा दृष्टिस्त्वद्भक्ते मयि चाघवान् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निर्दोषान्कामान्दातुमिच्छन्तं प्रत्याख्यानस्यक्षमस्यति, नम इति ॥ १० ॥

सत्यमेकान्तभक्तस्त्वं तथापि मदाज्ञा करणीयेत्याह—नेति । मे एकान्तिनः कदाचिदपि इहामुत्र च मत्त आशिषो न वाञ्छन्त्येव तथाप्येतन्मन्वन्तरमात्रं भोगान्भुङ्क्ष्व ॥ ११ ॥

ननु, तर्हि बन्धः स्यादित्यत आह, कथा इति द्वाभ्याम् । सर्वेषु भूतेषु सन्तमेकमीशं यज्ञाधिष्ठातारं मामात्मन्यावेश्य यजस्व तर्ह्येतेनैवापि कर्मणा बन्धः स्यान्नेत्याह, योगेन मदर्पणेन कर्म हिन्वंस्त्यजन्यजस्व ॥ १२ ॥

किञ्च भोगेन सुखानुभवेन प्रारब्धं पुण्यं हित्वा मुक्तबन्धः सन् लोकानुग्रहार्थं कीर्तिं च विस्तार्य मां प्राप्स्यसि कुशलेन पुण्याचरणेन पापं हित्वेति विशेषणमात्रम्, अन्यथा तस्य राज्येऽप्रवृत्तेः । ननु तस्य प्राचीनं पापमस्ति "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" इति न्यायात् "तत्सुकृतदुष्कृते विधुनुते" इति श्रुतेश्च । नचेदं प्रारब्धं पापाभिप्रायं तस्य भोगेनैव क्षयात् कुशलेन हित्वेति वचनाऽनुपपत्तेः नचाऽऽसामविद्वानिति वाच्यं भगवतैव कृतार्थत्वस्यानन्तरं वक्ष्यमाणत्वात् अत एव योगेन कर्म हित्वाचिरतावमपि लोकसङ्ग्रहार्थं कर्मणि प्रवर्तितस्यानुष्ठानमात्राचेति सर्वमनवद्यम् ॥ १३ ॥

किञ्च य इति, त्वां च मां चेदं मच्चरित्रं च स्मरन्नेतत्स्तोत्रं यः कीर्तयेत्सो ऽपि कर्मबन्धाद्विमुच्यते कुतस्तव बन्धशङ्केत्यर्थः ॥ १४ ॥

ईश्वराज्ञया प्राप्तकर्माधिकारः सन्पितुर्निष्कृतिं प्रार्थयते, त्रिभिः । वरं वरणीयमेतदपरं वृणे ते त्वत्तः ॥ १५ ॥

विद्धो ऽमर्षेण क्रोधेनाऽऽशयो यस्य ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निष्कामस्तु त्वां भजंस्त्वत्साधर्म्यं प्राप्नोतीत्याह—विमुञ्चतीति यदा मानवो मनुष्यःस्वहृदिस्थितान् कामान् विमुञ्चति अनन्यप्रयोजनेन त्वां भजतीति भावः । हे पुण्डरीकाक्ष ! तर्हि तदा स मानवः भगवत्त्वाय भगवतो भावः भगवत्त्वं तस्मै कल्पते अपहतपाप्मत्वादिधर्माविर्भावाय कल्पते आविर्भूतगुणाष्टकवत्त्वेन भगवत्साधर्म्यमागतो मुक्तो भवतीति यावत् ॥ ९ ॥

मम हृदि कामानुदयरूपाद्वरादन्यं वरं सर्वथा मादा इति प्रार्थनाऽभिप्रायेण भगवन्तं नमस्करोति—ओमिति भगवते पूर्ण-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

षाड्गुण्याय पुरुषाय सर्वान्तरात्मने महात्मने केवलं भक्तानुग्रहैकस्वभावाय हरये आश्रितार्तिहराय अद्भुतसिंहाय माहात्म्यगुणपरिमाणानामुपात्तनृसिंहरूपाय ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते, परमात्मने लोकत्रयस्यान्तः प्रवेशेन सर्वे प्रणवप्रतिपाद्याय तुभ्यं नमः ॥ १० ॥

एवं प्रह्लादवाक्यं श्रुत्वा प्रह्लादमाह भगवान्श्रीनृसिंहः—नैकान्तिन इति चतुर्भिः। भवद्विधाः त्वादृशा मयि एकान्तिन एकान्तभक्ता अनन्यप्रयोजनेन भजन्तः मे मत्तः जातु कदाचिदपि इहामुत्र च लोके आशिषः कामान्नाशासते. यद्यपि न प्रार्थयन्ते तथाप्येतन्मन्वन्तरपर्यन्तमत्रैव लोके दैत्येश्वराणामधिपो भूत्वेति शेषः । भोगान् भुङ्क्ष्व ॥ ११ ॥

तर्हि बद्धः स्यामित्यत्राह—कथेति । प्रियः मम नितरामिष्टः प्रियः त्वं मदीयाः कथाः जुषमाणः सेवमानः प्रिया इति पाठे कथाविशेषणं मत्कथाः शृण्वंस्त्वं न बद्धः स्या इति भावः । अनभिलषन्तमपि त्वामत्र कामेषु किमर्थं योजयसीत्यत आह—आत्मनि सर्वेषु भूतेषु चान्तरात्मतया सन्तमधियज्ञं यज्ञाधिपतिमीश्वरं मां भक्तियोगेन यजस्वाराधयस्व किं कुर्वन् मत्प्राप्तिविरोधिपुण्यपापात्मकं कर्म हित्वा अपनुदन्ननुद्योरप्यनुपगतमत्प्राप्तिविरोधिप्रारब्धफलस्य सुखदुःखात्मकस्यावश्यमनुभाव्यत्वात् अनिच्छन्तमपि त्वां कामेषु योजयामीति भावः ॥ १२ ॥

एतदेव व्यनक्ति—भोगेनेति । पुण्यमनुपगतप्रारब्धपुण्यकर्म तत्फलभोगेन हित्वा त्यक्त्वा अपनुद्य पापमनुपगतप्रारब्धाख्यं पापं कर्म कुशलेन भोगेन हित्वा भोगकौशलेन हित्वेत्यर्थः । पापफलभोगस्य दुःखरूपत्वात्मनो विकारः स्यादिति यथा मनो न विक्रियेत तथा भोगकौशलेनेत्यर्थः । "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । समदुःखसुखं धीरम्" इत्याद्युक्तरीत्याऽनुद्वेगसमत्वादिभोगकौशलेनेति यावत्. कुशलेन पुण्येन यज्ञादिकर्मणा पापमनुपगतप्रारब्धमपुण्यं कर्म हित्वेति नार्थः । अनुभवैकविनाश्यस्य पुण्यकर्मणा निवृत्त्यनुपपत्तेः । न चात्र पापशब्दः सञ्चितानुपगतादिपापपरः तस्य भक्तियोगेनैव निवृत्तेः न च भक्तियोगप्रतिबन्धकपापपरः परिपूर्णभक्तियोगनिष्ठत्वात्प्रह्लादस्य तन्निवृत्तेः पूर्वमेव जातत्वात्समाप्तयोः कृपवार्थः, कालजवेन कालवेगेन कलेवरं हित्वा कालवेगेन निमित्तेनानुभूतप्रारब्धावसाने कलेवरं हित्वेत्यर्थः । सुरलोकेऽपि गीयमानं स्वीयां कीर्तिं वितत्य विस्तीर्य मुक्तबन्धः मद्भक्तियोगेन विनष्टाश्लिष्टपूर्वोत्तराघरूपमत्प्राप्तिप्रतिबन्धको मामेष्यसि प्राप्स्यसीत्यर्थः ॥ १३ ॥

किञ्च यः पुमान् त्वां च मां च स्मरन्यदिदं मह्यं त्वया गीतं मत्स्तुत्यात्मकं स्तोत्रं कीर्तयेत् सोऽपि पुमान् काले प्रारब्धानुभवावसानकाले कर्मबन्धान्मत्प्राप्तिबन्धकात्पुण्यपापात्मककर्मरूपाद्विमुच्यते त्वद्गुणकीर्तनमज्जातमद्भक्तियोगनिरस्तमत्प्राप्तिप्रतिबन्धककर्मबन्धाद्विमुक्तो भवतीत्यर्थः ॥ १४ ॥

ईश्वरादुत्पत्त्या प्राप्तदैत्याधिपत्यः स्वपितुर्निष्कृतिं प्रार्थयते—त्रिभिः प्रह्लादः वरमिति । हे महेश्वर ! वरदानां ब्रह्मादीनामपि ईश्वरात्ते त्वत्तोऽहमेतद्वरं वृणे, किं तत् ? यन्मे पिता ईश्वरस्य तव सम्बन्धि तेजः प्रभावमविद्वानजानन् ॥ १५ ॥

सर्वलोकहितोपदेष्टारं प्रभुं त्वामनिर्दिश्याभिहितवान्, कथंभूतः, अत्र भ्रातृहेति मृषादृष्टिः अभिमानयुक्तः मम एव पुत्राणामंशायः प्रवृद्धो यो ऽमर्षः क्रोधः तद्युक्त आशापतिः काशां यस्य सा रुषा: रुष्टेति पाठेऽप्ययमेवार्थः । विद्धेति पाठे विद्धो व्यथितः सम्भाषणसमर्पयुक्तान्तःकरणश्चेत्यर्थः । एवं भूतस्त्वां सर्वलोकहितोपदेष्टारं प्रभुमानिन्दत्वितिः यत् यच्च त्वद्भक्ते मय्यघवान् द्रोहीति द्रोहं कृतवानिति ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, कामासंरोहो नाम काममोक्षो विषविनष्टस्यान्तिकफलमिति तत्राह—विमुञ्चतीति । भवाय पुनर्जननाय ॥ ९ ॥

भवत्समनर्हितत्वया भक्तिश्च तत्फलमित्याह*नम इति । भगवत इत्यनेन किञ्चित्पूज्यमानस्तुतिरत्यन्तः पुरुषायेत्यनेनापि कश्चिद्दैवत्यतो महात्मन इति. कोमाविष्टतो हरय इति. हरिशब्दस्यानेकार्थत्वाद्य क इत्यतोऽद्भुतेति. निर्विकल्पाशिना त्वया किं स्यादित्यतो ब्रह्मण इति. अस्याप्यनेकार्थत्वाद्य क इत्यतः परमात्मन इति ॥ १० ॥

अहं त्वकाम इत्येकान्तभक्तलक्षणं वस्तयोक्तं तस्मात् तथापि महाह्लादकारित्वात्त्वत्पुण्याभिवृद्धिः स्यादिति एतत्कर्तव्यमित्याह, नैकान्तिन इति । किमर्थमिति तत्राह, तथापीति ॥ ११ ॥

ननु, कर्दमजलस्नानादिनिकृष्टया लितान्तं कालं मया कथं क्षोपणमकारि तद्वशगवेनित्यद्भुतधर्मभूषितत्वं तत्रैव स्नाद्यैत्युपविज्ञापनस्वभावानुकूलतया त्वमेव जानासीति शङ्कां निर्मूलनाय सुखमाध्य्यर्थं विभाव्यमित्याशयत्राह—कथा इति । बहुवचनेन सर्वाभिमानिकथा उपलक्षयति, भूतेष्वपि युपलक्षणं यज्ञपुरोडाशादिष्वपि यज्ञमूर्तिमधिष्ठित इति योगेन भक्तियुक्तध्यानेन हित्वा नाशयन् ॥ १२ ॥

तदेवाग्रता मम किं कालान्तरभाविनी त्वत्प्राप्तिः स्यादेवेत्याह—भोगेनेति । मुक्तायतनमिमं पुण्यं भोगेन क्षपयित्वा प्रायश्चित्तादिकुशलकर्मणा पापं निर्मूलयित्वा वितत्य विस्तृत्य ॥ १३ ॥

मया तवोक्तयोगकरणाशक्त्यामायामुपास्यं योगमुपदिशामीत्युपसंहरति—य इति । मह्यं मामुद्दिश्य युक्तकाले ॥ १४ ॥

अभिमतमित्युक्तत्वादिमं त्वदभिमतं वरं वृणे इत्याह—वरमिति । ते भक्तिमान् अनेन दातृत्वीकर्तृभावसम्बन्धोक्तीर्ति व्यापने ॥ १५—१६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तथापीति, श्रीनृसिंहवाक्यमेतत् विहायेति तत्प्रार्थनानुसारेण सर्वलोकाधनार्थीकरणमेव मुख्यं प्रयोजनम् अन्यत्तु तदनुमात्रं । तथैव वक्ष्यते "कीर्तिं विशुद्धां सुरलोकगीतां वितत्य" इति । य एतदिति च ॥ ११ ॥

---

* नारदेनोपदिष्टं मे तवमन्त्रमिमं स्मरे । इत्यधिकः पाठः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यांस्तु दृष्टश्रुतांस्त्वमधुना स्मरसि तेषां का वार्त्तेति तत्कृपया-गतानामपि कीर्त्यैर्यमभिप्रेतम् ॥ १२ ॥

भोगेन पुण्यं प्रारब्धं कुशलेन मद्भजनेन तत्प्रतियोगितया पापञ्च प्रारब्धमेव "श्वादोऽपि सद्यः सवनाय कल्पते" इति न्यायात् "भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात्" इति न्यायाच्च ॥ ॥ १३ ॥ १४ ॥

वरं वरय इत्यर्द्धकम् । अनेन श्रीप्रह्लादस्य जापिनोर्जयविजय-त्वादि ज्ञानं नासीदिति गम्यते वांदति सार्द्धयुग्मकम् ॥ १५-१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु, यदि कामं न कामयसे तर्हि वद मे तव दास्ययोग-मिति ब्रुवन् कथं मद्दास्यं कामयसे तत्राह–विमुञ्चतीति । मनसि स्थितान् स्थायिभावतया वर्त्तमानान् कामान् अप्राकृतांस्त्वद्दा-स्यसख्यादीनपि यदा विशेषेण मुञ्चति भगवत्त्वाय सायुज्याय तव सायुज्यं मे नाभीष्टं किं तैर्गुणव्यतिकरादिह ये स्व-निष्ठा धर्मादयः किमगुणेन च काङ्क्षितेन "सारं जुषाम् चरणयो रुपगायताम् नः" इति मदुक्तेरेवातो भवद्दास्यरूपमप्राकृतम् काम-मह त्वयि एव भगवतत्त्वाय भगवत्समानैश्वर्यायेति श्रीस्वामि-चरणाः ॥ ९ ॥

ननु, मत्सायुज्यमात्मारामसुनिभिरप्यादरणीयं किमित्य-सुरबालकोऽपि भूत्वा तत्र कटाक्षयसीति भगवद्वाचा पराजित-म्मन्यः प्रणमति–ओं नम इति ॥ १० ॥

न केवलं तवैवायं स्वभावः अपि तु सर्वेषामेव मद्भक्ताना-मित्याह–नेति । एतन्मन्वन्तरमात्रं नत्वाधिकं ददामि मा क्रुध्यंति-भावः ॥ ११ ॥

ननु, मां विषयान्धकूपे केनापराधेन क्षिपसीत्यत आह— कथा इति । अधियज्ञं सर्वयज्ञाधीश्वरं मां स्वयोगेन स्वीयभक्ति-योगेनैव यज भज इतिअकृता अपि अश्वमेधादयो यज्ञाः कृता एव भविष्यन्तीत्यधियज्ञपदेन द्योत्यते कर्म वैदिकं लौकिकं च छिन्दन् त्यजन् मद्भक्तस्याधिकारिणः कर्मकरणानौचित्यात् ॥ १२ ॥

भोगहेतुकात् कर्मबन्धात्तु नैव शङ्किष्ठास्तव पूर्वजन्मन्येव सर्वं कर्म नष्टमेवेत्याह––भोगेन सुखानुभवेन प्रारब्धं पुण्यं कुशलेन सुकृताचरणेन पापं कलेवरं पूर्वदेहं च हित्वा एषि मां सम्प्रति प्राप्तोऽसि असि मुक्तबंधः इत्यस्मिन् जन्मनि तु मुक्तबन्धो जीवन्मुक्त एव वर्त्तसे इत्यर्थः । एवं प्रह्लादस्यांशेन साधनसिद्धत्वं नित्यसिद्धत्वं च नारदादिवत् ज्ञेयम् ॥ १३ ॥

तव कर्मबन्धाभावे कैमुत्यं दर्शयित्वाह–य इति । मह्यं मां प्रसादयितुम् ॥ १४ ॥

किञ्च पूर्वं संसारिणां नृणां मोचाय श्रीमच्चरणेषु प्रार्थितं सम्प्रति बद्धनाहशं सौभाग्यं मह्यमद्दातनर्हौऽकस्य महापराधिनोऽपि निस्ताराय प्रार्थये इत्याह––वरमिति त्रिभिः, । वरये वृणे ॥ १५ ॥

विगतोऽमर्षेणाऽऽशयो यस्य सः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवत्त्वाय कल्पते भगवद्भावापत्तियोग्यो भवति, भगवद्भा-वापत्तिर्नाम भगवत्साधर्म्यप्राप्तिः––

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" ॥

इति श्रीमुखवचनात् ॥ ९ ॥

अतिदुर्लभभगवद्दर्शनचरणस्पर्शवचनामृतश्रवणादि निर्वृतो नमस्करोति नम इति ॥ १० ॥

भगवानपि तत्प्रारब्धकर्मानुसारेण तद्दर्शनादिना लोकमिमं विशोधयितुं च किञ्चित्कालमत्रैव मां भजन् वासं कुरु पुनर्मा-मेष्यतीत्याह—नैकान्तिन इति त्रिभिः ॥ ११ ॥

सर्वेषु चेतनाचेतनेषु भूतेषु एकं नियन्तारं मां सन्तम् आत्मनि हृदि आवेश्य मदीयाः कथाः जुषमाणः सेवमान योगेन मदर्पणविधियोगेन अधियज्ञं यज्ञाधिष्ठातारं मां कर्म प्रारब्धं कर्म छिन्दन् क्षपयन् यजस्व ॥ १२ ॥ १३ ॥

प्रह्लादोक्तकथाश्लोककीर्त्तनादिफलमाह—य इति ॥ १४ ॥

ते त्वत्तो वरं वरये वृणे मे पिता ऐश्वरं भवदीयं तेज अविद्वान् त्वां यदनिंदत् तस्मात् अघात् मे पिता पूयेतेति तृतीयेनाऽन्वयः ॥ १५ ॥

विगतो व्याप्तो ऽमर्षेण क्रोधेनाशयो यस्य सः ॥ १६ ॥

भाषा टीका ।

और पुरुष जब मन के मनोरथों को छोड़ देता है, पुण्डरीकाक्ष ! तब वह आप ही भगवद्भाव को सम[illegible] होता है ॥ ९ ॥

षडैश्वर्य सम्पन्न पुरुष महात्मा हरि अद्भुत सिंह [illegible] स्वरूप परमात्मा एसे आप को नमस्कार हो ॥ १० ॥

श्री नृसिंह उवाच ॥

श्री नृसिंहजी बोले, कि—तुम्हारे सदृश हमारे एकान्[illegible] भक्त लोग इसलोक और परलोक के पुरुषार्थों की हम [illegible] कभी चाहना नहीं करते हैं, तौभी इस मन्वन्तर पर्य[illegible] यहां पर दैत्येश्वरों के भोगों को तुम भोगो ॥ ११ ॥

हमारी प्रिय कथाओं का सेवन करते हुए, सर्वभूतों [illegible] वर्त्तमान एक ईश्वर यज्ञों का अधिष्ठाता ए[illegible]

तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघात् ।
पूतस्ते ऽपाङ्गसन्दृष्टस्तदा कृपणवत्सल ! ॥ १७ ॥

श्रीभगवानुवाच ।

त्रिःसप्तभिः पिता पूतः पितृभिःसह तेऽनघ ! ।
यत्साधो ऽस्य गृहे जातो भवान्वै कुलपावनः ॥ १८ ॥
यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शिनः ।
साधवः समुदाचारास्ते पूयन्त्यपि कीकटाः ॥ १९ ॥
सर्वात्मना न हिंसन्ति भूतग्रामेषु किञ्चन ।
उच्चावचेषु दैत्येन्द्र ! मद्भावेन गतस्पृहाः ॥ २० ॥
भवन्ति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः ।
भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥ २१ ॥
कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः ।
मदङ्गस्पर्शनेनाङ्ग ! लोकान्यास्यति सुप्रजाः ॥ २२ ॥
पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः ।
मय्यावेश्य मनस्तात ! कुरु कर्माणि मत्परः ॥ २३ ॥

नारद उवाच ।

प्रह्लादो ऽपि तथा चक्रे पितुर्यत्साम्परायिकम् ।
यथा ऽह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः ॥ २४ ॥

भाषाटीका ।

आत्मा में आविष्ट करके मेरा यजन करो मेरे विषे कर्मों का अर्पण करते हुए त्याग करते जावो ॥ १२ ॥

सुखानुभव करके पुण्य को और कुशलाचरण से पाप को और काल के वेग से कलेवर को छोड कर तथा सुरलोक गीत विशुद्ध कीर्ति को विस्तार समस्त बन्धनों से मुक्त होकर हमको प्राप्त होगे ॥ १३ ॥

जो नर इस तुमारे गाये हुए स्तोत्र का कीर्त्तन करेगा तथा तुमारा और हमारा स्मरण करेगा वह समय पर कर्मों के बन्धों से मुक्त हो जावेगा ॥ १४ ॥

प्रह्लादउवाच ॥

प्रह्लाद बोले, कि—हे महेश्वर ! वर देने वालों के ईश्वर आप से मैं यही वर मागताहूँ कि आप के ऐश तेज को न जानने वाला और "वह मेरे भ्राता का मारने वाला है" [illegible] मिथ्या दृष्टि वाला और क्रोध से विवशचित्त जिसका, ऐसे मेरा पिताने, सर्व लोक के गुरु और प्रभु ऐसे आपकी जो निन्दा की है, और आप के भक्त ऐसे मेरे विषे अपराध किया है ॥ १५—१६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ते ऽपाङ्गेन सन्दृष्टो ऽतः पूत एव तथापि भोः कृपणवत्सल ! कार्पण्येन प्रार्थय इत्यर्थः ॥ १७ ॥

यद्यपि कश्यपो मरीचिब्रह्मा चेति तत्पितृत्वाय एव पूर्वजास्त-थापि त्रिःसप्तभिः सहेति प्राकृतपगतापित्राभिप्रायेणोक्तं यद्य-स्मात् ॥ १८ ॥

सत्वगुणम आचारो येषां ते कीकटा अपि देशास्तत्सम्बन्धा-द्देशाश्च पूयन्ते शुद्धा भवन्ति ॥ १९ ॥

ननु, त्वद्भक्तानामयं महिमेति न चित्रं अहं तु तादृशो न भवामि

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति चेत्तत्राह—सर्वात्मनेति, द्वाभ्याम् । मद्भावेन मद्भक्त्या विगता स्पृहा येषाम् ॥ २० ॥

त्वामनुगता ये केचित्पुरुषास्ते ऽप्येवं लक्षणाः सन्तो मद्भक्ता भवन्त्यतो भवान्मे भक्तानां सर्वेषां प्रतिरूपधृगुपमानात्पदं श्रेष्ठः खल्वित्यर्थः ॥ २१ ॥

मदङ्गस्पर्शनेन सर्वशः पूतस्य ते पितुः पापशङ्कैव नास्ति केवलं पुत्रकृत्यानि प्रेतकार्याणि कुरु ॥ २२ ॥

ब्रह्मवादिभिर्वेदवादिभिः उक्तमनतिक्रम्य मत्परः सत्कर्माणि कुरु ॥ २३—२६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्माद्दुस्तरादघात् पापान्मे पिता पूयेत विशुद्ध्येत् एतद्वरं वरये इत्यन्वयः । यद्यपि ते तवापाङ्गेन सन्दृष्टो ऽतएव पूतएव मम पिता तथापि हे कृपणवत्सल ! कार्पण्येन प्रार्थये इत्यर्थः ॥ १७ ॥

एवं प्रह्लादेन प्रार्थितो भगवांस्तमाह—त्रिःसप्तभिरिति षड्भिः । न केवलं तव पितैव पूतः अपितु हे अनघ ! त्रिःसप्तभिः पितृभिः सह तव पिता त्रिः पूत इति त्रिवारमनुगृह्णामीत्यर्थः । त्रिःसप्तभिरिति पाठे, एकविंशतिपर्यन्तैः पितृभिः सह पूत इत्यर्थः । कुतः यद्यस्मात् हे साधो ! महाभागवतः कुलपावनो भवान् तस्य हिरण्यकशिपोर्गृहे जातः । यद्यपि हिरण्यकशिपोः पितरः कश्यपो मरीचिर्ब्रह्मा चेति त्रय एव ; तथापि प्राक्कल्पगतपित्राद्यभिप्रायेण त्रिःसप्तभिरित्युक्तं मद्भक्तस्य तव जननादेवेदं त्वत्कुलं पूतमित्यभिप्रायः ॥ १८ ॥

एतदेव स्वभक्तप्रभावप्रदर्शनमुखेनाह—यत्रेति । समदर्शिनः कृत्स्नं जगत् ब्रह्मात्मकत्वेन पश्यन्तः प्रशान्ताः जितेन्द्रियाः सम्यगुत्तमः आचारो येषां ते साधवः परोपकारशीलाः मद्भक्ताः यत्र यत्र देशे सन्ति ते कीकटा अपि कीकटकल्पाः म्लेच्छदेशा अपिशब्दात्तत्प्रभवा अपि पूयन्ते शुद्धा भवन्ति ॥ १९ ॥

ननु, मद्भक्तानामयं प्रभाव इति न चित्रं नाहं तु तादृशः इति चेत् तत्राह—सर्वात्मनेति, द्वाभ्याम् । हे दैत्येन्द्र ! लोके ये मद्भक्ताः पुरुषास्ते त्वां मद्भक्तश्रेष्ठमनुव्रता अनुवर्तमाना भवन्ति. त्वं यथा मद्भक्तश्रेष्ठस्तथा वयमपि भगवद्भक्ता भवेम इति त्वत्पद्धतिमनुवर्तमाना मद्भक्ता भवन्ति. अतः सर्वेषां भक्तानां भवान् प्रतिरूपधृक् दृष्टान्तभूतः अतस्त्वं भागवतोत्तमोत्तम इति भावः । तदनुवृत्तिप्रकारमाह—उत्कृष्टेषु च भूतग्रामेषु देवमनुष्यादिभूतसङ्घेषु सर्वात्मना करणत्रयेण न किञ्चिदपि हिंसन्ति. मद्भावेन मद्भक्त्या विगता स्पृहा येषां मत्साम्यापत्तिनिस्पृहा इति वा तादृशाश्च भवन्ति. त्वद्दृष्टान्तेनैवात्मानं शिक्षयन्तीत्यर्थः ॥ २० ॥ २१ ॥

अतः सर्वथा पूतस्य विशुद्धस्य तव पितुः प्रेतकार्याणि दाहादिकर्माणि कुरु अङ्ग हे प्रह्लाद ! शोभना प्रजास्त्वद्रूपो यस्य सः त्वत्पिता मदङ्गस्पर्शनेन मच्छरीरसंस्पर्शनेन हेतुना लोकान्पुण्यलोकान् यास्यति प्राप्स्यति. पश्यतीति पाठे द्रक्ष्यतीत्यर्थः वर्तमानसामीप्ये भविष्यति लट् ॥ २२ ॥

पित्र्यं पितृसम्बन्धि पित्राधिष्ठितं महेन्द्रभवनं विहाय पित्र्यं दानवाधिपत्यस्थानमधितिष्ठेत्यर्थः । हे तात ! मयि मन आवेश्य ब्रह्मवादिभिरुक्तमनतिक्रम्य कर्माणि मदाराधनरूपाणि मत्परः अहमेव परस्तेषां कर्मणां फलं यस्य तादृशः सन् कुरु ॥ २३ ॥

एवमुक्तः प्रह्लादो यथोक्तमकरोदित्याह नारदः—प्रह्लादोपीति । हे राजन् युधिष्ठिर ! यथा भगवानाह तथैव प्रह्लादः पितुर्यत्साम्परायिकं प्रेतोद्देशेन कर्तव्यं तत्सर्वं चक्रे ततो द्विजोत्तमैरभिषिक्तश्च बभूव दानवादीनामाधिपत्यमकरोदित्यर्थः ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शुद्ध्यर्थं साधनान्तरानुष्ठानं नापेक्षितमित्याह—पूत इति ॥ १७ ॥

न केवलमयमेव पिता पूतः किन्तु जन्मान्तरेपि विद्यमानाः पितरः पूताः स्युरित्याशयवानाह—त्रिःसप्तभिरिति । सा विशुद्धिर्मत्कटाक्षपात्रीभूतस्य जन्मनेत्याह—यत्साधोऽस्येति ॥ १८ ॥

एतत्प्रभावमन्यत्रातिदिशति—यत्रेति । कीकटा इति पाठे आभीरा इत्यर्थः ॥ १९ ॥

ननु, त्वद्भक्तानामेवंविधमाहात्म्यं कस्मादित्याशङ्क्य तपोवृद्धिक्षयहेतुर्हिंसाद्यभावादित्याह—सर्वात्मनेति । सर्वात्मना यदपि किञ्चन कृकलासादिकमपि "तस्मात्प्राणभृतः प्राणं न विंहिंस्यादपि कृकलासस्य" इति श्रुतेः । तत्र निमित्तमाह—मद्भावेनेति "ईश्वरो जीवकलया प्रविष्टः" इति वचनात् सर्वत्र मम भावः सत्तास्तीति भावो भावना निरन्तरानुस्मरणं तेन गतस्पृहाः मत्स्पर्शाः हिंसायाः कारणं निमित्ताभावान्नैमित्तिकाभाव इत्यर्थः ॥ २० ॥

इह लोके ये मद्भक्ताः पुरुषा भवन्ति विद्यन्ते ते न हिंसन्तीत्यन्वयः मद्भक्तेष्वपि तव विशेषोऽस्तीत्याह—भवानिति । प्रतिरूपधृक् दृष्टान्तस्थलभूतः खलुशब्देन काञ्चिद्विद्याधिविद्यानां सर्वेषामित्यर्थो गृह्यते तेन यावत्तावदित्यर्थः । "ऋते तु सात्त्विकान्देवान्नारदादींस्तथैव च । प्रह्लादादुत्तमः को नु विष्णुभक्तो जगत्त्रये" इति वचनात् "निरवधवाक्याङ्कुरजिज्ञासानुमेय अङ्" इत्यभिधानम् ॥ २१ ॥

मत्पिता भगवद्द्वेषीति मत्वा तत्प्रेतकार्याणि न करोमीति मतिर्माभूत् "श्रौतं स्मार्तं न लङ्घयेत्" इति वचनात् मदाज्ञया तान्यपि कर्तव्यानि "नावैष्णवाय दातव्यं नोदविन्दुं न तण्डुलम्" इत्येतदसम्बन्धिविषयत्वेन सावकाशमित्याशयेनाह मदङ्गेति सुप्रजाः सुपुत्रः ॥ २२ ॥

पितृमेधं कृत्वा विरज्य वनं न व्रज किन्तु राज्यं कुर्वित्याह—पित्र्यमिति । राज्यं कुर्वन् पितृवल्लोकोपद्रवं न कुरु किन्तु ब्रह्मवाद्युक्तधर्मेणेत्याह यथोक्तमिति न त[illegible]

श्रीमद्वीरराघवाचार्यकृतपदरत्नावली।

अधिवयकमित्याह-मर्यानीति। कर्माणि सामांहिविधानि पूजादीनि वा ॥ २३ ॥

भगवदाज्ञानुलङ्घनेन भगवत्प्रीतिः स्यादिति कृत्वा तदाज्ञाकरण-प्रकारमाह—नारद इति। साम्परायिकं पारलौकिकम्॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

त्रिःसप्तभिरिति। यदि सप्तत्रयसङ्ख्यास्तव पितरः सम्भवन्ति तदा तैरपि सह पूनः स्यादित्यर्थः। प्राक्कल्पगतत्वे यदिति हेतुवाक्यं न सङ्गच्छते. श्रीप्रह्लादस्यात्र जन्मना सह पूर्वपितृणाम-सम्बन्धात् अत एव सम्बन्धाच्च हिरण्यकशिपोश्च पूर्वजन्मा-भावात् ॥ १८ ॥ १९ ॥

सर्वात्मनेति युग्मकम् ॥ २० ॥ २१ ॥

कुर्विति, अस्य भवता सुप्रजस्त्वं भगवत्प्रार्थनया भवद्-पराधखण्डनमुत्तमलोकप्रापणाञ्च करिष्यतीत्यर्थः ॥ २२—३९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

यद्यपि अपाङ्गेन दृष्टः पूत एव तदपि श्रीमुखात् प्रसादवाक्यं श्रोतुं कार्पण्यात्प्रार्थये इति भावः॥ १७॥

त्रिःसप्तभिरित्यस्मिन् जन्मन्ययं तव पिता पूत इति किं वक्तव्यं मम त्रिःसप्तजन्मसु ये त्रिःसप्तसङ्ख्याः पितरोऽभूवन् तेऽपि पूता इत्यर्थः। पितॄन् पुनाति इत्येतदपि कियत् यतस्त्वं कुलपावनः पितृमात्रादिकुलमपि ते पूतम् ॥ १८ ॥

मद्भक्तः स्वसङ्गिनं देशमपि पुनाति किमुत पित्रादीनि-त्याह-यत्रेति। पूयन्ति पूयन्ते पूता भवन्तीत्यर्थः॥ १९ ॥

ननु, त्वद्भक्तानामयं महिमा न चित्रम् अहं तु तादृशो न भवामीति चेत्तत्राह-सर्वेति। ये पुरुषास्त्वामनुव्रता भवन्ति तेऽपि मद्भक्ता भवन्ति कीदृशाः मम भावेन प्रेम्णैव विगलितविषयस्पृहाः सर्वात्मना अहिंसकाश्च भवन्ति. अतस्तव महिमा केन निरूप्य-तामिति भावः। यतो भवान् मे भक्तानां प्रतिरूपधृक् उपमा-नास्पदं तेषु श्रेष्ठत्वादिति भावः ॥ २० ॥ २१ ॥

मदङ्गस्पर्शेनैव सर्वशः पूतस्य ते पितुः पापशङ्कैव नास्ति तदपि प्रेतकार्याणि प्रेतस्यैव कृत्यानि कुरु, केवलं व्यवहार-रक्षार्थमित्यर्थः ॥ २२ ॥

यद्यपि मद्भक्तस्य तव नास्ति कर्माधिकारस्तदपि मदाज्ञयैव व्यवहाररक्षार्थं कर्माणि कुरु मत्पर इति कर्मसु श्रद्धाशून्यः इत्यतः कर्मणां करणमप्यकरणं एव पर्यवस्यतीति मा शुच इति भावः ॥ २३ ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यद्यपि हे कृपणवत्सल! ते अपाङ्गेन दृष्टः तस्मादघात् ते निन्दारूपात् मे पिता पूत एव तथापि पूयेत अपि प्रार्थितम्-इत्यर्थः ॥ १७ ॥

त्रयो ब्रह्ममरीचिकश्यपाः अष्टादश जन्मान्तरीयाः एवं त्रिःसप्तभिस्ते पितृभिः सह ते पिता पूतो ऽस्ति। हे साधो! यस्मादस्य गृहे भवान् कुलपावनो जातः। दैत्यकुलमपि त्वज्जन्मना पूतमित्यर्थः ॥ १८ ॥

किं बहुना सर्वगुणसमः मत्पादशरणप्रधान आचारो येषां ते यत्र यत्र सन्ति ते कीकटा अपि देशास्तत्तुल्याश्च पूयन्ते ॥ १९ ॥

स्वभक्तस्तुतिपूर्वकं प्रह्लादमभिनन्दति-सर्वात्मनेति, द्वाभ्याम्। भूतग्रामेषु किञ्चन अपि न हिंसन्ति उच्चावचेषु कुलेषु भवन्ती-त्युत्तरेण सम्बन्धः। अतो हे दैत्येन्द्र! दैत्योऽस्मीति मा शुच इति भावः ॥ २० ॥

त्वामनुव्रताः ये दैत्यादयस्तेऽपि मद्भक्ता भविष्यन्ति भवांस्तु मे भक्तानां सर्वेषां प्रतिरूपधृक् प्रतिनिधिरूपधृक्॥ २१ ॥

त्वज्जन्मना मदङ्गस्पर्शेन च सर्वशः पूतस्यापि लोक-संग्रहार्थं पुत्रकृत्यानि प्रेतकार्याणि कुर्वित्यर्थः ॥ २२ ॥

वेदवादिभिर्मन्वादिभिर्यथोक्तं तदनुसारेण कर्माणि कुरु मत्परो मद्भजनाऽविरोधेनेत्यर्थः ॥ २३—२४ ॥

भाषाटीका।

उस दुस्तर पापसे मेरा पिता पवित्र होजाय, हे कृपण-वत्सल! यद्यपि उसी समय आप के कृपा कटाक्ष से पवित्र हो गया है तौ भी मैं अपनी कृपणता से ऐसा वर मांगता हूँ ॥ १७ ॥

श्रीभगवानुवाच ॥

श्री भगवान् बोले, कि—हे अनघ! सप्तत्रिंशति पितरों सहित तुमारा पिता पवित्र हुआ; क्योंकि? हे साधो! कुल को पवित्र करने वाले तुमारे सरीखे इस के घर में पुत्र हुए ॥ १८ ॥

जहाँ २ प्रशान्त समदर्शी साधु उत्तमाचार वाले मेरे भक्त रहते हैं, वे कीकट (मगध) देश भी पवित्र हो जाते हैं ॥ १९ ॥

हे दैत्येन्द्र! मेरी भक्ति में विगत स्पृहावाले लोग ऊंचे नीचे भूत ग्रामों को किसी प्रकार भी किञ्चित् पीडा नहीं देते हैं ॥ २० ॥

लोक में हमारे भक्त लोग तुमारे सदृश होते हैं और तुमतो सम्पूर्ण हमारे भक्तों में उपमा देने के योग्य हो ॥२१॥

मेरे अंगस्पर्श से सर्व प्रकार पवित्र ऐसे तुमारे पिता के

प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिम् ।
स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ॥ २५ ॥

ब्रह्मोवाच ।

देवदेवाऽखिलाध्यक्ष ! भूतभावन ! पूर्वज ! ।
दिष्ट्या ते निहतः पापो लोकसन्तापनोऽसुरः ॥ २६ ॥
योऽसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः ।
तपोयोगबलोन्नद्धः समस्तनिगमानहन् ॥ २७ ॥
दिष्ट्याऽस्य तनयः साधुर्महाभागवतोऽर्भकः ।
त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽधुना ॥ २८ ॥
एतद्वपुस्ते भगवन् ! ध्यायतः प्रयतात्मनः ।
सर्वतो गोप्तृ सन्त्रासान्मृत्योरपि जिघांसतः ॥ २९ ॥

श्रीनृसिंह उवाच ।

मैवं वरोऽसुराणां ते प्रदेयः पद्मसम्भव ! ।
वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥ ३० ॥

नारद उवाच ।

इत्युक्त्वा भगवान् राजन् तत्रैवान्तर्दधे हरिः ।
अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥ ३१ ॥
ततः सम्पूज्य शिरसा ववन्दे परमेष्ठिनम् ।
भवं प्रजापतीन्देवान् प्रह्लादो भगवत्कलाः ॥ ३२ ॥

भाषा टीका ।

प्रेतकार्य (मरण के नंतर के कृत्य) करो, तुमारे सदृश सुन्दर जिसके पुत्र हैं, ऐसा तुमारा पिता उत्तम लोकों को जावेगा ॥२२॥

ब्रह्मवादि लोगों की उक्ति के अनुगुण अपने पिता की गादी पर बैठ कर मेरे विषै मन लगाकर मत्परायण होकर कर्म करो ॥ २३ ॥

नारद उवाच

नारदजी बोले, कि—हे राजन् ! द्विजोत्तमों से अभिषिक्त होकर, प्रह्लाद ने भी भगवदाज्ञा के अनुगुण पिता का अंतिम कृत्य यथावत् किया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मम सृष्टिभिर्मया सृष्टैर्भूतैः समस्तान्निगमान्धर्मानित्यर्थः अहन् हतवान् स त्वया हतः एतद्दिष्ट्या भद्रम् ॥ २७ ॥

समितः मत्पदक् प्राप्तः ॥ २८ ॥

सर्वतः सन्त्रासात् गोप्तृ रक्षकम् ॥ २९ ॥

एवं वरस्त्वया न प्रदेयः क्रूरो निसर्गः स्वभावो येषाम् अमृतं क्षीरम् ॥ ३०—३४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः प्रसादाभिमुखं सुन्दरं मुखं यस्य तं नरहरिं श्रीनृसिंह-रूपं हरिमाश्रितार्तिहरं भगवन्तं दृष्ट्वा ब्रह्मा चतुर्मुखः देवा-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्धिर्भिः परिप्लुतः पवित्राभिर्वाग्भिः स्तुत्वा वाचां भगवद्गुण-विषयकत्वेन लोकपावनकरत्वात्पवित्राभिरित्युक्तं प्राहोवाच ॥२५॥

तदेवं चतुर्मुखोक्तमाह—देवेति चतुर्भिः। हे देवदेव, देवानामपि देव ! ननु, त्वम्, इन्द्रादिदेवानामपि देवो नाहं तत्राह—हेऽखिलाध्यक्ष ! ननु, सोऽपि त्वमेव तत्राह—हे भूतभावन ! भूतानि भावयत्युत्पादयतीति तथा ननु, सोऽपि त्वमेव तत्राह—हे पूर्वज ! मत्तोऽपि पूर्वं कारणत्वेनावस्थित लोकानां सन्तापनकरः स एव पापोऽयमसुरो दिष्ट्या दैत्यस्ते त्वया निहतः दिष्ट्या हत इति तद्वधस्य दुष्करत्वं सूचितम् ॥ २६ ॥

तदेवाविष्कुर्वन् असुरं विशिनष्टि—योऽसाविति । योऽसावसुरः मत्तः लब्धो वरो येन तादृशः मम सृष्टिभिर्मया सृष्टैर्भूतैर्न वध्यः हन्तुमशक्यः तपोयोग एव बलं तेनोत्कटः गर्वितः समस्तनिगमान् शास्त्रीयधर्मान् घ्नन् विनाशितवान् स तु त्वया विनाशितः एतद्दिष्ट्या जातमिति भावः ॥ २७ ॥

किं तदापि दिष्ट्या जातं किमस्यासुरस्य तनयो महाभागवतोऽर्भकः प्रह्लादः त्वया मृत्योः सकाशात् विमोचित इति सच त्वामतीव क्रोधाविष्टं सम्यगितः प्राप्तो ऽधुनाचेति चैतदपि दिष्ट्या जातमित्यर्थः ॥ २८ ॥

हे भगवन् ! तवैनद्वपुः नृसिंहरूपं ध्यायतः प्रयतात्मनः समाहितमनसः पुंसः सर्वतः सन्त्रासात् भयाद्गोप्तृ रक्षकं जिघांसतः हन्तुमिच्छतः मृत्योरपि सकाशाद्गोप्तृ एतच्च प्रह्लादवृत्तान्तेनास्माभिरनुमितमिति भावः ॥ २९ ॥

एवमभिहितस्तमाह श्रीभगवान्—नेति। हे पद्मसम्भव ! इतः प्रभृत्येवं विधो वरोऽसुराणां ते त्वया न प्रदेयः। क्रूरो निसर्गः स्वभावो येषां तेषाम् अहीनां सर्पाणाममृतं क्षीरं यथा क्षीरप्रदत्वेन वर्द्धनं यथा लोकोपद्रवकारि तद्वदिदं तेषां वरप्रदानमित्यर्थः ॥ ३० ॥

एवं ब्रह्मणानुभाष्यमाणेऽन्तर्दधे हरिरित्याह—नारदः, इतीति. हे राजन् ! इति इत्थमुक्त्वा परमेष्ठिना पूजितः सर्वप्राणिनामदृश्यः हरिरित्युक्त्वान्तर्दधेऽदृश्योऽभूत् ॥ ३१ ॥

ततः प्रह्लादः परमेष्ठिनं ब्रह्माणं भवं रुद्रं प्रजापतीन् मरीच्यादीन् देवान् इन्द्रादींश्च भगवत्कला: भगवदंशभूतान् सम्पूज्य शिरसा ववन्दे ननाम ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्रागतेषु देवेष्वेकतमेनापि संलापो हरेरभून्न वा आद्ये केन द्वितीये देवेभ्य एषां को विशेषः ? किञ्च सत्यसेवकादिभावेन ब्रह्मविद्याधिकारोऽप्युत्पादितः स्यादित्याशङ्कां परिहरति—प्रत्यादेति, देवादिभिर्भूत इत्यनेन तेऽपि ससम्भ्रमवचनं कृतमिति ज्ञातव्यम् ॥ २५ ॥

द्विषया स्वयमभूत् ॥ २६ ॥

मम सकाशात् सुदं सञ्जनमेवामहित ते मम सृष्टिभस्तैर्मयासृष्टैरित्यर्थः ॥ २७ ॥

दिष्ट्या सज्जनसुखहेतुतः अधुना तस्मै दिष्ट्या सुखवत्तयोवरो दत्त इति शेषः ॥ २८ ॥

अनेन वपुषा न केवलं दैत्यहननमेव प्रयोजनं किमन्यदप्यस्तीत्याह—एतदिति ॥ २९ ॥

एवं स्तुतो भगवान् कमनुग्रहमकार्षीत्तेषामिति तत्राह—श्रीभगवानिति । निसर्गतः क्रूराणाम् अमृतं पयः "दैवात्ते सलिले क्षीरे त्वमृतं नाविमुक्तिमे" इति अत्र हिरण्यकशिपुमन्तरेणान्येषां न ज्ञातव्य इत्याज्ञा क्रियते नत्वस्य हि । "यथा हिरण्यकस्याद्यात्मनः स्थितहरीरितः" इत्यादिना स्वप्रेरितत्वावगमादिति ॥ ३० ॥

मनुष्याणामपि योग्यप्रत्यक्षत्वे "हरेरुपर्युपरि व्यवहारेण ध्यायन्ति देवमनुष्याः" इति श्रुतेः। देवस्वभावो यः स विहितः स्यादिति मत्वा तद्व्युदासार्थं नादृश्यं ब्रह्मोऽभूदित्याह—नारद इति । सर्वभूतानामदृश्य इत्यनेन भक्तानुकम्पार्थं प्रदर्शितम् ॥ ३१ ॥

अनन्तरं प्रह्लादेन ब्रह्मादयो देवाः सत्कृता उतास्मनो भगवदनुग्रहपात्रत्वेनाहम्भावेन धिक्कृताः ? आद्ये वैष्णवाचारः प्रवर्तितः स्यात् द्वितीये भगवद्भक्तस्य गजस्नानवास्यादिति तत्राह, ततइति । भगवतः कलांशा येषु तथा भगवतो भिन्नांशा वा ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भूतभावनाः ब्रह्ममरीच्यादयः पूर्वजाः प्रथमजाता यस्माद् ॥ २६ ॥ २७ ॥ २८ ॥

मृत्योः सकाशादपि गोप्तृ ॥ २९ ॥

एवं वरो वरः अतिवृद्धतमो वरः ॥ ३०—३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे पूर्वज, सर्वेभ्यो ऽस्मदादिभ्यः पूर्ववर्तिन् ! पूर्वं वसुधा कृतावतार इत्यर्थः ॥ २६ ॥

मम सृष्टिभिः निगमान् स्वव्याख्यारूपान् वेदान् घ्नन् उपेक्षितवान् ॥ २७ ॥

दिष्ट्या भद्रं त्वां सद्भिः सम्यक् प्राप्तः ॥ २८ ॥

गोप्तृ रक्षकम् ॥ २९ ॥

अहीनाममृतं यथा न देयम् तथा वरः श्रेष्ठः एवं वरो न त्वया क्रूरनिसर्गाणां दुष्टस्वभावानामसुराणां मा प्रदेयः न देयः ॥ —३०—३४ ॥

ततः काव्यादिभिः सार्द्धं मुनिभिः कमलासनः ।
दैत्यानां दानवानां च प्रह्लादमकरोत्पतिम् ॥ ३३ ॥
प्रतिनन्द्य ततो देवाः प्रयुज्य परमाशिषः ।
स्वधामानि ययू राजन् ! ब्रह्माद्याः प्रतिपूजिताः ॥ ३४ ॥
एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः ।
हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥ ३५ ॥
पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः ।
कुम्भकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥ ३६ ॥
शयानौ युधि निर्भिन्नहृदयौ रामसायकैः ।
तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥ ३७ ॥
ताविहाथ पुनर्जातौ शिशुपालकरूषजौ ।
हरौ वैरानुबन्धेन पश्यतस्ते समीयतुः ॥ ३८ ॥
एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः ।
जहुस्त्वन्ते तदात्मानः कीटः पेशस्कृतो यथा ॥ ३९ ॥
यथा यथा भगवतो भक्त्या परमया ऽभिदा ।
नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिन्तया ययुः ॥ ४० ॥

भाषा टीका ।

अपने ऊपर प्रसन्न जानकर सुमुख श्रीनृसिंहदेव की पवित्र वाणी से स्तुतिकर, सब देवताओं के सहित ब्रह्माजी बोले ॥ २५ ॥

ब्रह्मोवाच ॥

ब्रह्माजी बोले, कि——हे देव देव ! हे अखिलाऽध्यक्ष ! हे भूतभावन ! हे पूर्वज ! लोकों को संताप देनेवाले पापी का आपने वध किया यह बडा मंगल हुआ ॥ २६ ॥

एकतो इसने मेरेसे यह वरपाया था कि "मेरीसृष्टि से नमरे और दूसरे तप योग और बलसे उन्मत्त (मस्त) होने से इसने सब वेदों का नाश करदिया ॥ २७ ॥

यह भी बडे मंगल की बात हुई, कि इसका छोटा सा पुत्र परम भागवत साधु एवं प्रह्लादको आपने मृत्युसे छुडाया, और यह उससे भी मंगल हुआ जोकि ? वह इसी समय में आपको प्राप्त होगया ॥ २८ ॥

हे भगवन् ! जोपुरुष आपके इसदिव्य मंगल विग्रह का ध्यान करेगा वह सर्व त्रासों से और मारते हुए मृत्युके त्रास से भी छूट जावेगा ॥ २९ ॥

श्रीनृसिंह उवाच ॥

श्रीनरसिंहजी बोले, कि——हे पद्मसंभव, हे ब्रह्माजी ! इसप्रकार के क्रूरस्वभावे वाले असुरों को तुम ऐसा वर मतदियाकरो । जैसे कि सर्पों को अमृत ॥ ३० ॥

नारद उवाच ॥

नारदजी बोले, कि——हे राजन्, हे युधिष्ठिर ! श्री [illegible] भी ब्रह्माजी से ऐसे कहकर ब्रह्माजी से पूजित होकर सर्व प्राणियों के अदृश्य होकर अंतर्धान होगये ॥ ३१ ॥

तबप्रह्लादने ब्रह्मा शिव प्रजापति और सर्व देवों को भगवानकी कला जानकर शिर से वंदना की ॥ ३२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

शिशुपालदन्तवक्रयोर्द्विषतोः श्रीकृष्णसायुज्यं कथमिति यत्पृष्टं तदेव तयोः पूर्वजन्मकथनादिभिरुपपादितमुपसंहरति——एवमिति सप्तभिः । दितेः पुत्रत्वं प्रापितौ विप्रशापेनेत्युत्तरस्यानुषङ्गः ॥ ३५ ॥ ३६ ॥

तच्चित्तौ श्रीरामे चित्तं ययोस्तौ ॥ ३७ ॥

करूषजो दन्तवक्रः हरौ सायुज्यं समीयतुः ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कृष्णाभिध्यानादिना पूर्वकृतं च यदेनः पापं तद्ध्यानेन तदात्मानः सन्तो जहुः। तदात्मत्वे दृष्टान्तः, कीटः पेशस्कृतो ध्यानेन यथा तदात्मा भवतीति ॥ ३९ ॥

अभिदा भेददर्शनशून्यया हरेः सात्म्यं सारूप्यम् ॥४०॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ततः कमलासनो ब्रह्मा काव्यादिभिर्भार्गवादिभिस्सह सहितः प्रह्लादं दैत्यानां दानवानां च पतिमकरोत् ॥ ३३ ॥

हे राजन्! ततो ब्रह्मादयः सर्वे देवाः प्रह्लादं प्रतिनन्द्याहो स्वत्प्रभावोऽमितरसाधारण इत्यभिनन्द्य, परमाः श्रेष्ठाः आशिषः प्रयुज्य प्रह्लादेन प्रतिपूजिताः स्वधामानि स्वकीयस्थानानि ययुः ॥ ३४ ॥

तदेवं शिशुपालदन्तवक्त्रयोर्भगवन्तं द्विषतोः कथं मुक्तिरिति युधिष्ठिरप्रश्नस्य तत्पूर्वजन्मकथनादिमुखेनोक्तमुत्तरमुपसंहरति— एवमिति, सप्तभिः। विष्णोः पार्षदौ स्थितौ विप्रशापेन सनकादीनां शापेन दितेः पुत्रत्वमेवं प्रापितौ वैरभावेन हेतुना स्वहृदि स्थितेन हरिणा नृसिंहरूपं बिभ्रता हतौ ॥ ३५ ॥

पुनः कुम्भकर्णरावणाख्यौ राक्षसौ बभूवतुः तौ च दाशरथेः रामस्य विक्रमैर्हतावभिभूतावित्यर्थः ॥ ३६ ॥

तौ च रामस्य राघवस्य बाणैर्युधि निर्भिन्नं हृदयं ययोस्तौ तच्चित्तौ तस्मिन् श्रीरामे एव चित्तं ययोस्तौ यथा प्राक्तनजन्मनि तद्वद्देहं जहतुः सन्तत्यजतुः ॥ ३७ ॥

तावेवेह शिशुपालकरूषजौ, करूषजो दन्तवक्त्रः शिशुपालदन्तवक्त्ररूपेण जातौ पुनर्हरिणा हतौ वैरानुबन्धेन हेतुना ते तव पश्यतः सतः समीयतुः सायुज्यं प्रापतुः ॥ ३८ ॥

न केवलं शिशुपालकरूषजौ एव समीयतुः अपित्वन्येऽपि राजानः कृष्णवैरिणस्ते सर्वेऽपि यदेनः पापं पूर्वं कृतं तज्जहुः तत्यजुः तदात्मानः कृष्णात्मानश्चाभवन्. यथा पेशस्कृता ध्यायमानात्केतोः कीटः तदात्मा भवति, तद्वत् तदात्मानस्तत्तुल्यस्वभावा अभवन् इत्यर्थः। आत्मशब्दः स्वभाववाची तस्यैवाऽऽत्मा स्वभावो येषां ते इत्युपमानबहुव्रीहिः अन्यथा दृष्टान्तवैघट्यात्. न हि कीटः पेशस्कृता ऐक्यं याति किन्तु तस्य समानाकारो भवत्यत एव ह्यनन्तरग्रन्थे साम्यं ययुरित्युक्तम् ॥ ३९ ॥

यथा अभिधा अनन्यया भक्त्या भगवतः साम्यं यान्ति तद्भक्तास्तथा वैद्यादयोऽपि नृपास्तस्य भगवतश्चिन्तया संरम्भपूर्वकचिन्तया हरेः साम्यं ययुः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

भगवच्चित्तेन ब्रह्मणा वेदमन्त्रप्राहेत्याह—तत इति। अनेन भक्तेन भगवद्भक्तेषु यथायोग्यं प्रेमकर्तव्यमिति शास्त्राचारो दर्शितः ॥ ३३ ॥

प्रह्लादवरदानानन्तरं भगवता स्वाचाराचेन यदवशिष्टमकारि तदस्माभिरप्यनुष्ठेयमिति कृत्वा ब्रह्माद्या अपि स्वगृहाण्ययुरित्याह, प्रतिनन्द्येति ॥ ३४—३५ ॥

इदानीं विशकलितोक्तमर्थं निश्चित्योपसंहरति—एवमिति। हृदि स्थितेन वैरभावेन हेतुना हरिणा हतौ ॥ ३६ ॥

प्राक्तनजन्मनि जयविजयशब्दवाच्यौ पूर्वजन्मनि यथा तच्चित्तौ तथा ऽत्रापीति शेषः। हिरण्यकशिपुर्हिरण्याक्षाख्यः पूर्वजन्मनि यथा तथेति वा ॥ ३७ ॥

वैरानुबन्धेन वैरोपमर्जनमाऽनुबन्धेन स्नेहेन समीयतुर्हरिमिति शेषः। तत्रासुरौ तम इवतुरित्यनुसन्धेयम् सत्त्वगुणकार्यैव श्रीहरिप्राप्तिः तद्भावेन तम एवेति योजनाय समित्युपसर्गः—

"मधुकैटभौ भक्त्याभावासुरौ भगवता मृतौ।
तम एव क्रमादासौ भक्त्या वैद्यो हरिं ययौ"

इति वचनात् ॥ ३८ ॥

अन्येषामपि भक्त्याभावेन पुण्यबलयार्थमुक्तिमित्यभिप्रेत्याह—एन इति। अत्रापि वैरानुबन्धेनेत्यनुवर्तते. ये राजानः पौण्ड्रकादिशब्दवाच्यास्तेऽप्यसुरदेहत्वात्ताद्रूप्यविशेषो येषां ते तथा तत्रापि तस्मिन्कृष्णे आत्मा चित्तं येषां ते तथा तदनुष्ठितपुण्यफलस्वीकारार्थं तत्राविष्टास्तद्भक्ता इत्यर्थः। ते भक्त्येव यत्पूर्वकृतं तत्सम्बन्धाप्राप्तमेनः पापं तज्जहुः तात्त्वत्वा हरीशाकल्याप्राप्तपुण्यप्रचयेन तं हरिमीयुः त एव कृष्णवैरिणो ऽनादिकालमारभ्य भगवद्द्वेषिणः कृष्णाश्च तामसाश्च वैरिणः वैरिरूपिणो राजानो राजसाः तम:प्रकृतयो दैत्याः तदात्मानो द्वेषरूपिणः ते जन्मप्रभृति चीर्णं यदेनः तेन पापेन वैरानुबन्धेन निरन्तरवैरचिन्तया पूर्वकृतं ब्रह्मणा पूर्वं कल्मषं तमो जहुर्जग्मुरित्यन्वयः। "ओहाक् गतौ" इति धातुः इति 'सखे कहाकन्यस्य समुकुर्यं सुरं प्रसंशे हासने, इति प्रयोगश्च। अन्ते भक्त्यादिसाधनसामग्र्यनन्तरं इत्यत्र द्वेषपूर्वमनन्तरमित्यत्र "तस्य तावदेव चिरम्" इति श्रुतेः "अनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयते" इत्यादेश्च कीटाः पेशस्कृतश्चिन्तया पेशस्कृताकारमाप्नुवन्ति ननु तदात्मत्वम् अत्र प्रमाणम् "पौण्ड्रके नरके चैव शाल्वे कंसे च दन्तवक्त्रे। आविष्टास्ते हरेर्भक्तास्तद्भक्त्या हरिमीयिरे ॥ असुरास्तु स्वयं ते तु महातमसि पातिताः" इति वाक्यम् ॥ ३९ ॥

अत्रापि तारतम्यमस्तीत्याह, यथेति। भिदां विशेषम् "भिदा विशेषे द्वैधे" इत्यभिधानम् अभिदामसम्प्रज्ञातसमाध्यवस्थां ययुरिति वा. साम्यं निर्दोषत्वादिचतुर्भुजत्वलक्षणम्। अन्यथा कीटाः पेशस्कृतो ध्यानेन केवलं पेशस्कृतो भवन्ति ननु स एव पृथग् इदममात्मवादित्ययं दृष्टान्तोऽनर्थः स्यादिति ॥ ४० ॥

आख्यातं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान् ।
दमघोषसुतादीनां हरेः सात्म्यमपि द्विषाम् ॥ ४१ ॥
एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः ।
अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथेति । यथा यथा भगवतः परया भक्त्या अन्ये सारूप्यं ययुस्तथा चैद्यादयो नृपा अपि परमया तच्चिन्तया तद्ध्यानावेशेन ययुः अभिदा व्यवधानशून्यया निरन्तरयेत्यपि भक्तिचिन्तयोः विशेषणं तत्र चैद्यकारूषकयोः सारूप्याविर्भाव एव तत्प्राप्तिरिति गम्यम् ॥ ४०—४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

शिशुपालदन्तवक्त्रयोः सायुज्यं कथमिति यत्पृष्टं तत्तयोः पूर्वजन्मकथनादिभिरुपपादितमित्युपसंहरति, एवमिति ॥ ३५ ॥

एनोऽपराधः कृष्णनिन्दादिरित्यर्थः । पूर्वकृतं यत् पापं तदपि तद्ध्यानेन तदात्मानः सन्तो जहुः । तदात्मत्वे दृष्टान्तः कीटः पेशस्कृतः कीटविशेषस्य ध्यानेन यथा तदात्मा भवतीति ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

भक्त्या यथा यथा अभिदा अभेदेन ज्ञानिभक्ता हरेः सात्म्यं ययुः तथा चैद्यादयोपि तच्चिन्तया तद्ययुः भक्त्या कीदृश्या तदीयज्ञानवैराग्यादिरूपयोऽपि परमया प्रसङ्गेनैवं "निभृत मरुन्मनः" इत्यत्र "तदरयोपि ययुः स्मरणात्" इति वक्ष्यते ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवद्द्रोहवासनया तौ जन्मद्वयानन्तरं भगवन्तं सात्म्यं गताविंत्याह—एवमित्यादिना । हरेः पार्षदौ तौ जयविजयौ दितेः पुत्रत्वं प्रापितौ विप्रशापेनेत्युत्तरस्यानुषङ्गः ॥ ३५—३७ ॥

तौ राक्षसौ वैरानुबन्धेन शिशुपालकरूषजौ शिशुपालदन्तवक्त्रौ पुनर्जातौ ते पश्यतः हरौ सायुज्यं च समीयतुः ॥ ३८ ॥

कृष्णवैरिणो राजानः पेशस्कृतः सारूप्यं तद्ध्यानेन कीटो यथा प्राप्नोति तथान्ते तदात्मानः कृष्णसाधर्म्यं गताः सन्तः यत्पूर्वं कृतमेनः पापं तत् जहुः ॥ ३९ ॥

यथा यथा स्वस्वद्रोहानुरोधेन चिंतया हरिस्मरणेन चैद्यादयो हरेः सात्म्यं स्वारूप्यं ययुर्यदा तदा नृपा अंबरीषादयः भगवतो भक्त्या तत्रापि परमया तत्रापि अभिदा "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" ४।१।३ इति पारमार्षसूत्रोक्ततदात्मकत्वानुसन्धानयुक्तया हरेः सात्म्यं ययुरिति किमुत वक्तव्यम् ॥ ४० ॥

भाषा टीका ।

तदनंतर ब्रह्माजी ने शुक्रआदि मुनियों को साथ लेकर प्रह्लादजीको दैत्य और दानवोंका पति बनाया ॥ ३३ ॥

हे राजन् ! उस समय ब्रह्मादिक सर्व देवता लोग पूजित होकर प्रह्लादके अभिषेक का अभिनंदन कर उत्तम आशीर्वाद देकर अपने २ घर को पधारे ॥ ३४ ॥

एसे वे दोनों (जय विजय) श्रीविष्णुके पार्षद दिति के पुत्र होकर हृदयमें स्थित हरि के साथ वैरभाव से युद्धकरके हरि ही से मृत्युको प्राप्त हुए ॥ ३५ ॥

फिर वेहीदोनों सनकादिकों के शाप से कुंभकर्ण और रावण नामसे राक्षस हुए, जोकि ? सर्व लोकाभिराम दूर्वादलश्याम श्रीचक्रवर्तिकुमार श्रीराघवेन्द्र के पराक्रम से मारे गये ॥ ३६ ॥

संग्राममें श्रीराम के बाणों से विदीर्ण हृदय पृथ्वीपर सोये हुए, श्रीराम में चित्त लगाकर देहको छोड़ते हुए जैसे पूर्वजन्म में (हिरण्यकशिपुके जन्ममें) छोडा ॥ ३७ ॥

वेही दोनों फिर यहां शिशुपाल और दन्तवक्त्रहुए श्रीहरि में वैरके संबंधसे आपही को प्राप्तहुए ॥ ३८ ॥

ऐसेही श्रीकृष्ण से वैर करने वाले और राजा लोगभी पूर्वकृत पाप को छोड़तेहुए, और जैसे कीट [कीड़ा] भृङ्गी के भयसे भृङ्गीरूप होजाता है एसे ही, आपके स्वरूप को प्राप्त हुए ॥ ३९ ॥

भगवान से कुछ भेदभाव न रखकर अर्थात् कपट न रखकर परमभक्तिसे जैसे भक्तलोग आपको प्राप्त होतेहैं, ऐसेही शिशुपालादिक रिपुगणभी हरि की चिंतासे आपके सात्म्यको (समान विग्रहयोग्य) प्राप्तहुए ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रह्लादचरितार्थमुपसंहरति—एषेति, चतुर्भिः । अवतारः श्रीनृसिंहरूपस्तस्य कथा आख्यातेति शेषः ॥ ४२ ॥

प्रह्लादस्यानुचरितं महाभागवतस्य च ।
भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४३ ॥
सर्गस्थित्यप्ययेशस्य गुणकर्माऽनुवर्णनम् ।
परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥ ४४ ॥
धर्मो भागवतानां च भगवान् येन गम्यते ।
आख्याने ऽस्मिन्समाम्नातमाध्यात्मिकमशेषतः ॥ ४५ ॥
य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम् ।
कीर्त्तयेच्छ्रद्धया श्रुत्वा कर्मपाशाद्विमुच्यते ॥ ४६ ॥
एतद्य आदिपुरुषस्य मृगेन्द्रलीलां दैत्येन्द्रयूथपवधं प्रयतः पठेत ।
दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वा ऽनुभावमकुतोभयमेति लोकम् ॥ ४७ ॥
यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयो ऽभियन्ति ।
येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रह्लादस्यानुचरितमित्यादेः समाम्नातमिति तृतीयेनान्वयः अस्येत्यनेनोक्तं सर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वम् अनेन कृतं हरेर्गुणकर्मानुवर्णनं चेत्यर्थः ॥ ४३ ॥

परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विपर्यासः ॥ ४४ ॥

आध्यात्मिकमात्मानात्मविवेकादि ॥ ४५ ॥

एतच्छ्रवणादिफलमाह-य इति, द्वाभ्याम् । एतच्छ्रुत्वा यः कीर्त्तयेत् ॥ ४६ ॥

एतदेतां मृगेन्द्रस्य लीलां, तामेवाह—दैत्येन्द्रस्य यूथपानां च वधं यः शुचिस्सन्पठेत पुण्यमनुभावं प्रभावं मतिनिश्चयं वा लोकं वैकुण्ठम् ॥ ४७ ॥

अहो प्रह्लादस्य भाग्यं येन देवो दृष्टो वयं तु मन्दभाग्या इति विषीदन्तं प्रत्याह-यूयमिति, त्रिभिः । येषां युष्माकं गृहान्मुनयः अभियन्ति सर्वतः समायान्ति तत्कस्य हेतोः येषु गृहेषु नराकारं गूढं सच्छ्रीकृष्णाख्यं परं ब्रह्म साक्षाद्वसतीति ॥ ४८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे नृप त्वं मां यत्पृष्टवान् किं तद्द्विषतामपि दन्तवक्त्रसुतादीनां शिशुपालादीनां हरेः साम्यमित्येतत्सर्वं ते तुभ्यमाख्यातं कथितं मयेति शेषः ॥ ४१ ॥

तदेवं प्रश्नस्योत्तरमुपसंहृत्य तदेतदाख्यानं विशिंषन् तत्कीर्त्तनश्रवणादिफलमाह-एतदिति, षड्भिः । ब्रह्मणि ब्रह्मकुले सानुब्रह्मण्यः स चासौ देवश्च तस्य लोकत्रयमङ्गलप्रसिद्धस्य विभोः कृष्णस्येयममलतरकथा पुण्या पुण्यावहा यत्र कथायामादिदैत्ययोर्हिरण्याक्षहिरण्यकशिप्वोर्वधः प्रतिपाद्यते ॥ ४२ ॥

तथा यत्र महाभागवतस्य प्रह्लादस्य चरित्रं भक्तिर्ज्ञानं विरक्तिश्च, भक्तिशब्देन भक्तियोगानुष्ठानप्रकारो विवक्षितः विरक्तिशब्देन तदुत्पत्तिप्रकारः ज्ञानशब्देनात्मयाथात्म्यविवेचनपूर्वकतदनुसन्धानप्रकारः । एतत्सर्वं यत्र कथायां प्रतिपाद्यत इत्यर्थः ॥ ४३ ॥

तथा जगत्सर्गस्थितिलयकारणस्य हरेर्याथात्म्यं तत्त्ववर्णनं तस्य गुणानां कर्मणां च वर्णनम् परावरेषां देवासुरादीनां यानि स्थानानि तेषां कालेन निमित्तेन महान् व्यत्ययो विपर्यासश्च ॥ ४४ ॥

भगवान् येन गम्यते लभ्यते स भागवतानां धर्मश्च यथाध्यात्मिकमात्मानमधिकृत्य वर्त्तमानः वस्तु चेति तदेतत्सर्वमस्मिन्नाख्याने समाम्नातमाख्यातम् ॥ ४५ ॥

यः पुमानेतद्विष्णोर्वीर्येण पराक्रमादिगुणजातेनोपबृंहितं तत्प्रतिपादनेन विस्तीर्णमत एव पुण्यमाख्यानं श्रद्धया श्रुत्वा कीर्त्तयेत् स पुमान् कर्मपाशैः पुण्यपापात्मकैः कर्मभिरेव पाशैर्विमुच्यते ॥ ४६ ॥

किञ्च यः पुमानादिपुरुषस्य मृगेन्द्रस्य सिंहरूपस्य या लीला दैत्येन्द्रयूथपवधात्मिका प्रतिपाद्या यस्मिन् तदेतदाख्यानं प्रयतः समाहितचित्तः सतां प्रवरस्य दैत्यात्मजस्य प्रह्लादस्य पुण्यं प्रभावं च श्रुत्वा पठेत्पठेत् सोऽकुतोभयं कुतश्चिद्भयरहितं लोकं वैकुण्ठाख्यमेति प्राप्नोति. पूर्वं कर्मपाशविमुच्येत इत्युक्तमत्राकुतोभयं लोकमेतीत्युक्त्या कर्मपाशविमोचनद्वाराऽकुतोभयं लोकमेतीत्यर्थः । अतोऽत्र पौनरुक्त्यम् ॥ ४७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अहो प्रह्लादस्य भाग्यं येन भगवान् दृष्टः वयं तु मन्दभाग्या इति विषीदन्तं युधिष्ठिरमाह—यूयमिति त्रिभिः । नृलोके यूयमहो बतभूरिभागाः अहो बहुभाग्यवन्तः तदेव व्यञ्जयन् ताम्बाधि-नष्टि, येषां युष्माकं गृहान् लोकं पुनानाः मुनयोऽभियान्ति सर्वतः समायान्ति. तत्कुतः मनुष्यलिङ्गं मनुष्यस्येव लिङ्गं शरीरं यस्य तत् परं ब्रह्म श्रीकृष्णरूपं गूढं प्रच्छन्नं सर्वेषां युष्माकं गृहानावसति इति हेतोः समायान्ति ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ग्रन्थाधिकभयादुपसंहरति, आख्यातमिति । अतएवाद्यो दम-घोषसुतादीनामित्यादि बहुवारोक्तिर्भक्तेरनादिकालसम्बन्धित्वद्यो-तनार्था अन्यथा वेनादीनामित्याद्युक्तिरपि स्यात् ॥ ४१ ॥

भक्त्याजननाय स्तौति—एषेति । आद्यपदेवस्य रामस्य च-कम्द्रानरसिंहस्य यत्र कथायाम् ॥ ४२ ॥

भक्त्यादिकमेव मुक्तिसाधनं न द्वेषादिकमित्येतदत्र प्रति-पाद्यते इत्युपसंहरति—प्रह्लादस्येति । भक्त्यादिलक्षणो धर्मश्चात्र-कथित इत्यन्वयः ॥ ४३ ॥

येन भक्त्यादिलक्षणधर्मेण हरिमितरेभ्योऽव्यावर्त्यति, सर्गेति । अव्ययो यथास्थिततत्त्वम् ॥ ४४ ॥

आत्मानमधिकृत्य वर्तमानमिन्द्रियादिस्वरूपं च कथितमस्मिन्ना-ख्यान इत्याहुः, तदुपाख्यान इति । अत्रैव वै पार्षदौ विष्णोरित्यावृता-नुकथनं च भक्त्यादिकं मुक्तिसाधनं न द्वेषादिकमिति ज्ञाप-नाय येन भागवतधर्मेणैव भगवान् गम्यते न द्वेषादिभिरिति शेषः,

"भक्तिर्ज्ञानं विरक्तिश्च नवकं श्रवणादिकम् ।
धर्मो भागवतः प्रोक्तस्तत्त्वज्ञेषु तथा नव" ॥

इति वचनात् भागवतधर्मेणैव श्रीहरिर्गम्यत इति कथमुच्यते ? भक्त्यादिना विनेतीयमाशंका परिहृता भक्त्यादेर्धर्मशब्दवाच्य-त्वात् श्रवणं कीर्तनं विष्णोरित्यादिश्रवणादि नवकम् ॥ ४५ ॥

अधुनाऽऽख्यानकीर्तनादिना यत्पुण्यं तदाह य इति ॥ ४६ ॥

सामान्यत उक्तं विवृणोति एतदिति ॥ ४७ ॥

ननु, प्रह्लादानुभवस्यात्युत्तमत्ववर्णनेन युधिष्ठिरादीनां ततो-ऽधमत्वं प्रतीयत इति मन्दाशङ्कां परिहरति—यूयमिति । मुनय एतानिति यथातील वर्तयन्ति बत विस्मये "खेदानुकम्पासन्तोष-विस्मयामन्त्रणे बतः" इति ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रह्लादस्येति त्रिकम् । अस्य श्रीकृष्णाख्यस्य हरेर्याथात्म्यं तत्त-याथात्म्यमाहात्म्यं सर्वावतारित्वात्. टीकायामस्येति पाठमुख्यात्व-व्याचष्टे, अनेन प्रह्लादेनोक्तमित्यादिकं गम्यम् ॥ ४३—४७ ॥

अहो प्रह्लादस्य भाग्यम् इति सविस्मयं तं राजानं प्रत्याह—यूयमिति, त्रिभिः । मनुष्यलिङ्गमिति तदाकारे तदाविर्भावस्याऽपि न तादृशत्वमिति व्यञ्जितम् ॥ ४८ ॥ ४९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अनुचरितम् आख्यातमिति पूर्वेण समाम्नातमिति परेण वान्वयः । हरेर्याथात्म्यं हरेः स्वरूपम् अनतिक्रम्य सार्थं यज्ञ सर्गेति सृष्ट्यादयोऽपि उक्ताः परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विनाशः ॥ ४१-४६ ॥

एतत् एतां मृगेन्द्रस्य सिंहस्य लीलाम् "ऋक्सन्ध्य राजमातङ्गाः" इति वत्समास आर्षः । लीलामाह-दैत्येन्द्रएव यूथपो हस्ती तस्य दैत्येन्द्राणां यूथपस्य हिरण्यकशिपोश्च वधम् ॥ ४७ ॥

अहो !! प्रह्लादस्य भाग्यं येन देवो दृष्टः वयं तु मन्दभाग्या इति विषीदन्तं राजानंप्रति यूयं प्रह्लादात् प्रह्लादगुरोर्म-त्तोपि अन्येभ्योऽपि भक्तेभ्यो युष्मत्पूर्वजेभ्यो यदुपुरुरव-प्रभृ-तिभ्योपि वसिष्ठमरीचिकश्यपादिऋषिभ्योऽपि ब्रह्मरुद्राभ्यामपि भूरिसौभाग्यवन्त इत्याह, यूयं नृणां जीवानां लोकमध्ये भूरि-भागाः येषां युष्माकं गृहान् लोकं स्वदर्शनदानादिना पवित्री-कुर्वन्तोपि मुनयो अभि सर्वतोभावेन स्वीकृतार्थीकरणादिना हेतुनाऽपि गच्छन्ति. यतो गूढं सर्वतोऽपि रहस्यं यन्मनुष्यलिङ्गं नराकृतिपरं ब्रह्म तत्सम्यक् प्रकारेण युष्माभिरनादृतमप्यासक्ति-पूर्वकं येषां गृहेषु साक्षाद्वसति, सदैव. न हि प्रह्लादादीनां गृहेषु नराकृतिपरं ब्रह्म साक्षाद्वसति न च तद्दर्शनेन कृतार्थीभवितुं मुनयो गच्छन्तीति भावः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः :

उपसंहरति-आख्यातमित्यादिना । दमघोषसुतः शिशुपालस्त-दादीनाम् ॥ ४१ ॥

कृष्णस्य अवतारः श्रीनृसिंहस्तस्य कथा आख्यातेति लिङ्गव्यत्ययतः पूर्वेणान्वयः ॥ ४२ ॥

प्रह्लादस्यानुचरितमित्यादेः अस्मिन्नाख्याने । समाम्नातमिति तृतीयेनान्वयः । अस्य हरेर्याथात्म्यं तत्त्वम् ॥ ४३ ॥

सर्गादीनामधीशस्य हरेः प्रह्लादकृतं गुणकर्मानुवर्णनं च परा-वरेषां ब्रह्मादिमनुष्यान्तानां यानि स्थानानि तेषां व्यत्ययो विपर्यासः ॥ ४४ ॥

आध्यात्मिकमात्मानमधिकृत्य वर्तमानं जीवात्मानां ब्रह्मात्म-कत्वं चैतत्सर्वं समाम्नातम् ॥ ४५ ॥

आख्यानकीर्तनादिफलमाह—य इति, द्वाभ्याम् ॥ ४६ ॥

अकुतोभयमप्राकृतं लोकम् ॥ ४७ ॥

स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः ।
प्रियः सुहृद्वः खलु मातुलेय आत्मा ऽर्हणीयो विधिकृद्गुरुश्च ॥ ४९ ॥
न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ।
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ५० ॥
स एष भगवान्राजन्! व्यतनोद्विहतं यशः ।
पुरा रुद्रस्य देवस्य मयेनाऽनन्तमायिना ॥ ५१ ॥

राजोवाच ।

कस्मिन्कर्मणि देवस्य मयोऽहन् जगदीशितुः ।
यथाचोपचिता कीर्तिः कृष्णेनाऽनेन कथ्यताम् ॥ ५२ ॥

नारद उवाच ।

निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः ।
मायिनां परमाचार्यं मयं शरणमाययुः ॥ ५३ ॥
स निर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः ।
दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ॥ ५४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यूयमपि धन्या इति प्रसङ्गाद्राजानमभिनन्दति यताहो नृलोके यूयं भूरिभागाः येषां युष्माकं गृहान् लोकं पुनाना ये मुनयस्ते ऽभियन्ति सर्वतः समायान्ति. तेषां समागमने हेतुमाह: येषु गृहेषु गूढं अतिगोप्यं ब्रह्म श्रीकृष्णाख्यं साक्षात् वसति कथंभूतं मनुष्यलिङ्गं मनुष्यार्थं मनुष्योपलक्षितभक्तहितार्थं लिङ्गानि चक्रादीनि चिह्नानि वंशीवेत्रनियोगपाशादीनि च यस्य तत् ॥ ४८ ॥

———

नारद उवाच ।

राजन्! जो आपने शिशुपालादि द्वेषियों कोभी भगवत्प्राप्ति का आख्यान हमसे पूंछा सो हमने सब कहा ॥ ४१ ॥

यहसाक्षात् ब्रह्मण्यदेव महात्मा श्रीकृष्णकी नृसिंह अवतार की कथा है, कि जिसमें दोनो आदिदैत्यों का वध है ॥ ४२ ॥

और महाभागवत श्रीप्रह्लादका चरित है जिसमें भक्ति ज्ञान वैराग्य और प्रह्लाद को हरि के याथात्म्य की प्राप्ति का वर्णन है ॥ ४३ ॥

सृष्टि पालन और संहार करने वाले ईश्वर के गुणकर्मों का वर्णन है, और देवदैत्यों के स्थानों के कालकृत व्यत्यास का वर्णन है ॥ ४४ ॥

और जिनसे भगवान् प्राप्त होते हैं ऐसे भागवतों के धर्मों का वर्णन है, और इस आख्यान में संपूर्ण आध्यात्मिक [illegible] है ॥ ४५ ॥

श्रीविष्णुके पराक्रमोंसे पूरित इस पुण्य आख्यान को जो श्रवणकर श्रद्धासे कीर्तन करे वह कर्मकी पाश (फाँसी) से छूटता है ॥ ४६ ॥

जो पुरुष आदिपुरुष श्रीनृसिंहदेवकी दैत्येन्द्र युथपवधरूप मृगेन्द्रलीला को, और सत्पुरुषों में श्रेष्ठ ऐसे दैत्यात्मज श्री प्रह्लाद के प्रभाव को श्रवण कर प्रयत्न से पढते हैं वे सर्वथा निर्भय श्री वैकुंठलो[illegible] को प्राप्त होते हैं ॥ ४७ ॥

हे राजन्! यु[illegible]र! इस मनुष्यलोक में तुम तो बड़े बड़भागी हो, क्योंकि? लोकों को पवित्र करने वाले मुनिजन चारों तरफ से नित तुमारे यहां आते हैं, और उसका भी यह हेतु है, कि तुमारे यहां मनुष्य के चिन्हों से छिपा हुआ यह गुण और स्वरूपसे सबसे बड़ा साक्षात् परब्रह्म निवास करता है ॥ ४८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, कृष्णोऽस्माकं मातुलेयः कथं ब्रह्मेत्युच्यते तत्राह, सवा इति, सो ऽयं ब्रह्मैव कथंभूतः महद्भिर्विमृग्यं यत्कैवल्यनिर्वाणसुखं निरुपाधिः परमानन्दस्तदनुभूतिरूपो वो युष्माकं खलु प्रियः सुहृदित्यादिरूपो भवति विधिकृत् आज्ञानुवर्ती ॥ ४९ ॥

ननु, परं ब्रह्म चेत्कथं तद्यदुसहस्रलीषु रतिः कथं वा धर्मोपाचरणं तत्रपेक्षत आह-नेति । यस्य रूपं तत्त्वं भवादिभिरपि धिया

ताभिस्तेऽसुरसेनान्यो लोकांस्त्रीन्सेश्वरान्नृप ! ।
स्मरन्तो नाशयाञ्चक्रुः पूर्ववैरमलक्षिताः ॥ ५५ ॥
ततस्ते सेश्वरा लोका उपासाद्येश्वरं विभो ! ।
त्राहि नस्तावकान्देव ! विनष्टांस्त्रिपुरालयैः ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वबुद्ध्या वस्तुतयेदमित्थमिति साक्षान्नोपवर्णितं स युष्माकं स्वयमेव प्रसन्नः अस्माकं तु मौनादिसाधनैस्तत्प्रसादः प्रार्थनीय एवेत्याह-मौनेनेति । स एव सात्वतांपतिर्नः प्रसीदतु नहि ब्रह्मादस्य गृहेषु परं ब्रह्म वसति नच तद्दर्शनाय मुनयस्तद्गृहानभियान्ति नच तस्य ब्रह्म मातुलेयादिरूपेण वर्तते नच स्वयमेव प्रसन्नमतो यूयमेव ततोऽप्यस्मत्तोऽपि भूरिभागा इति भावः ॥ ५० ॥

नन्वन्यैर्दुष्करं त्रिपुरमेदादिकं श्रीरुद्रः कृतवान् स एवम्भूतः ईश्वरोऽप्यस्य तत्त्वं न जानातीति कथमित्यपेक्षायां तस्याप्येतत्साहाय्याद्वैवासौ प्रभावो न केवलस्येति वक्तुमाख्यानमुपाक्षिपति—स एष इति ॥ ५१ ॥

राजा युधिष्ठिर उवाच ।

जगदीशितुर्देवस्य कीर्तिं कस्मिन्कर्मणि मयो हतवान् ॥ ५२ ॥

अनेन श्रीकृष्णेनोपबृंहितैः सर्ववर्जितैः ॥ ५३ ॥

हैमी च रौप्या चायसी चेति तिस्रः पुरो निर्माय तेभ्यो ददाविति शेषः । दुर्लक्ष्यावपायसंयोगौ गमनागमने यासां दुर्वितर्क्याः परिच्छदा यासु ॥ ५४ ॥

सेनान्यः सेनापतयः पूर्ववैरं स्मरन्तः ॥ ५५ ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, श्रीकृष्णोऽस्माकं मातुलेयः कथं परं ब्रह्मेत्युच्यते? तत्राह, स वा इति । स वै सोयं श्रीकृष्णो ब्रह्मैव; किंतद्ब्रह्म ? यदभिज्ञः श्रीकृष्णो वो युष्माकं न केवलं मातुलेयोऽपितु प्रियः सुहृच्च आत्मा अन्तरात्मा अर्हणीयः पूज्यः विधिकृन्नियोगकारी गुरुर्हितोपदेष्टा च एवमनेकधा युष्माकं तत्सम्बन्धिनां भाग्यं कियदिति वक्तव्यमिति भावः । मद्वद्भिर्मृग्यमित्यनेन महतामपि तत्स्वरूपं यथा यद्दुरवगममित्युक्तम् प्रियः सुहृच्च इत्यनेन तन्मद्वद्भिर्मृग्यं ब्रह्म स्वयमेव युष्माकं प्रसन्नमिति च ॥ ४९ ॥

तन्मद्वद्भिर्मृग्यत्वमेव प्रपञ्चयन् तत्प्रसादं प्रार्थयते—नेति । यस्य भगवतो रूपं भवपद्मजादिभिः रुद्रब्रह्मादिभिः धिया स्वमनीषया वस्तुतया याथात्म्येन नोपवर्णितम् उपवर्णितं विषयीकृतं न भवति वाङ्मनसागोचरस्वरूपस्वभावत्वात्तैरेतावदित्युपवर्णितुमशक्यमित्यर्थः । किन्तु केवलं मौनेन शुभाश्रयसंशीलनरूपेण भक्त्योपासनात्मिकया प्रीतिरूपया उपशमेनेन्द्रियजयादिना च पूजितः आराधितः स सात्वतां योगेश्वराणां पतिर्भगवान् मे मह्यं प्रसीदताम् प्रसन्नो भवतु ॥ ५० ॥

एवं संप्रार्थ्य श्रीकृष्णस्य मनुष्यलिङ्गस्य परब्रह्मत्वसूचकम् इतिहासं प्रस्तोष्यन् तत्प्रश्नावसरप्रदानाय श्रीकृष्णं विशिनष्टि-स इति । हे राजन् ! स एष भगवान् ज्ञानशक्तिबलैश्वर्यादिषाड्गुण्ययुक्तः श्रीकृष्णः पुरा अनन्तमायिना ऽनन्ताः बहवो माया यस्य तेन मयेन निमित्तभूतेन रुद्रस्य देवस्य यद्विहतं यशः तद्व्यतनोत् तेनानेन रुद्रादीनामपि यच्च आदिगुणावृहत्त्वाभावकत्वकथनेन स्वयमबृहत् इतरेषां तदाधायकत्वायोगात् सामर्थ्यातिशयापि तल्लाभेन च परब्रह्मत्वं सूचितम् ॥ ५१ ॥

तदेवं लब्धप्रश्नावसरो युधिष्ठिरः रुद्रयश उपचयप्रकारं बुभुत्सुः पृच्छति-कस्मिन्निति । जगदीशितुः भगवदायत्तजगदीशितृत्वस्य "विलोक्य भग्नसङ्कल्पं विमनस्कं वृषध्वजम्" इत्यादिना भगवदायत्तसामर्थ्यस्य वक्ष्यमाणत्वाद्देवस्य रुद्रस्य कीर्तिः कस्मिन् कर्मणि यत्नेन श्रीकृष्णेन कर्त्रा मयेन निमित्तेनोपचिता वर्द्धिता तत् कथ्यताम् ॥ ५२ ॥

इति पृष्ट आह देवर्षिः-निर्जिता इत्यादिना । अनेन कृष्णेनोपबृंहितैराहितबलैर्देवैर्निर्जिता असुराः मायिनां परमाचार्यं महामायाचार्यं मयं शरणं जग्मुः ॥ ५३ ॥

ततः स विभुः समर्थो मयः हेम्नो विकृतिर्हैमी रूप्यस्य रजतस्य रौप्या आयसो लोहस्यायसी त्रयाणामितरेतरयोगद्वन्द्वः नास्तिस्रः पुरो निर्मायासुरेभ्यो ददाविति शेषः । पुरो विशिनष्टि, दुर्लक्ष्यः दर्शनाविषयः अपायः संयोगश्च यासां ता इमाः पुरः अत्रागताः इतो गताश्चेति जनैरलक्षिता इत्यर्थः । तथा दुर्वितर्क्याः सार्वजनीनसाधारण्येन तर्कितुमशक्याः परिच्छदा उपकरणानि यासां ताः ॥ ५४ ॥

ताभिर्विमानरूपाभिरपेक्षितदेशगमनक्षमाभिः पुरीभिरसुरसेनान्यः दैत्यसेनानायकाः हे नृप ! अलक्षिताः देवैरदृश्यमानाः पूर्ववैरं स्मरन्तः सेश्वरान् सपालान् त्रीन् लोकान् नाशयाञ्चक्रुः नाशयितुमारब्धवन्त इत्यर्थः ॥ ५५ ॥

ततस्ते सेश्वरा इन्द्रादिलोकपालैः सहिता लोका जनाः ईश्वरं रुद्रमुपासाद्य प्राप्य आनताः सन्त ऊचुः, तदेवाह-हे विभो ! त्रीणि पुराणि आलयाः स्थानानि येषां तैर्विनष्टान् तावकान् त्वदीयान् अस्मान् हे देव, रुद्र ! त्राहि पालयेति ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, परब्रह्मणि मुक्तिगा इत्यतः परब्रह्म[illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

निर्वाणः कथमिति ? तत्राह—स वा इति । कैवल्येनाऽनासक्त्येन निर्वाणसुखमशरीरसुखम् तस्यानुभूतिरनुभवो यस्य स तथा अनुभवोत्थस्वरूपानन्दमनुभवतीत्यर्थः । अनेन विष्णुत्वं निरस्यापि विभिन्नदासकारी गुरुर्हितोपदेष्टा ॥ ४९ ॥

ननु, दुर्ज्ञेयरूपत्वं हि विष्णुलिङ्गं "नहि सुज्ञेयमणुह्येष आत्मा" इति श्रुतेः । स्वरूपानन्दानुभवित्वं सायुज्यभाजोऽप्यस्त्यतः कथं निर्णयः ? इति तत्राह—न यस्येति॥ ५० ॥*

अस्मिन्नध्याये हरौ भक्तिविधानार्थं रुद्रमाहात्म्यकथनव्याजेन तन्माहात्म्यं प्रतिपाद्यते. अधुना "तत्रैको रुद्रो न द्वितीयो वतस्थे" इत्यादि श्रुतेः प्रतीयमानरुद्रस्याद्वितीयार्थत्वं प्रतिपाद्यमानैर्जनैर्महाद्रव्यव्ययेन पूज्यमानस्य "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्"इत्यादि मन्त्रैः स्तूयमानस्य सतः रुद्रस्यासुरावेशात्संशयो बभूव. इदं सर्वं भगवदधीनं नवेति तत्र दयालुर्भक्तवत्सलः श्रीनारायणो रुद्रस्य तं संशयमपाचक्रे कथं केनेति तत्राह—स एष इति । स भगवान्नृसिंहात्मना अस्मद्दत्तवरेण हिरण्यकशिपुपुरस्सरासुरजातिं निर्मूलयित्वा प्रह्लादादिभक्तमनुग्रहायस्याऽनुग्रहीता स एव युष्मद्बन्धुभूतः श्रीकृष्णः पुरा कल्पविशेषे देवस्य हरेः स्तुतिध्यानादिकं कुर्वाणस्य रुद्रस्य रौद्रमायावगतनलक्षणात्स्यात एव तस्मान्नः शिवस्यानन्तमायिनाऽनेकशतसहस्रमायावताऽत एवार्थादल्पेन मयेन वध्यमायाप्रतीकारं कृत्वा तस्य रुद्रस्य भगवद्भक्तप्रधान इत्यादि यशो विततं त्रिपुरनाशनेन ख्यातमकरोदात्मनोऽतिशयस्तामित्येन तदनुग्राहकत्वेन च विभक्तमकर्तेत्यन्वयः ॥ ५१ ॥

"नापृष्टः कस्यचिद्ब्रूयात्" इति वचनात्प्रसक्तं प्रमेयं विस्तृत्य श्रोतुं राजा पृच्छति—कस्मिन्कर्मणीति । कस्मिन्कर्मणि मयो विपरीतं चकार येनेशितुर्देवस्य यशोऽभूत् सा च कीर्तिः कृष्णेन यथा-ऽयमुपचिता प्रचिता स कथाविशेषो मम कथ्यतामित्यन्वयः॥ ५२॥

नारदः प्रश्नं परिहरति—निर्जिता इति । अनेन हरिणोपबृंहितैः अन्यसहायेनासुरा जिता इत्येतद्देवानां न दोषाय विष्णुबलस्य स्वतस्सिद्धत्वाद्देवानां सापेक्षं न तु दोषाय "यत्र सिद्धमपेक्षितम्" इति वचनात् ॥ ५३ ॥

मयेन त्रिपुरनिर्माणकर्मविपरीतं कृतमित्याह—स निर्मम इति । स निम्नः दुर्लक्ष्यो दुर्ज्ञेयोऽपायसंयोगो नाशसम्बन्धोऽन्तःप्रवेशसम्बन्धो वा यासां तास्तथाऽत एवाद्भुत बहुतराद्युधादिपरिकराः ॥ ५४ ॥

असुरसेनान्यः असुरसेनानायकाः ॥ ५५ ॥

सेश्वराः सहरयः अत्रापि विष्णुसहितदेवानां रुद्रोपसेवनं न दोषाय त्रिपुरहननं रुद्रेण कार्यमिति हरिणाकलितत्वात् इन्द्रादिभिर्वा ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

ननु, कश्चिद्दृश्यैतद्रूपमप्यवस्तुत्वेन मन्यते तत्राह—न यस्येति, यस्य साक्षात् प्रत्यक्षमपि रूपं परमविद्भिर्मुनिभिर्ब्रह्मादिभिस्तु अवस्तुतया अपरमार्थतया नोपवर्णितं किन्तु परमार्थतया निरूपितमित्यर्थः । "त्वं ब्रह्म परमं साक्षादिति, यन्मित्रं परमानन्दमित्यादिना, मल्लानामशनिर्नृणां नरवर इत्यादौ, विराड्विदुषां तत्त्वं परं योगिनाम् इत्यनेन च ॥ ५० ॥ ५१ ॥

अनेनेति । सर्वत्र श्रीकृष्णमेव स्वांशत्वेनावतारित्वेन च दर्शयति, एवमुत्तरत्रापि ॥ ५२—७० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

न च परं ब्रह्मैव नराकृतिः कृष्णोऽभूदिति वाच्यं किन्तु कृष्ण एव परं ब्रह्म भवतीत्याह—सोऽयं प्रसिद्धो नराकृतिः कृष्ण एव ब्रह्म कीदृशं महद्भिर्विमृग्यं यत् कैवल्यनिर्वाणसुखं निरुपाधिः परमानन्दः तस्यानुभूतिरनुभवरूपमित्यर्थः । कृष्णस्तु भगवान् स्वयमिति वदनुवादविधेयभावेन व्याख्येयमत्र प्रमाणम् "ब्रह्मणो हि प्रतिष्ठाहम्" इति गीतोपनिषदेव एतावदर्थस्य निश्चायिकेतिवै शब्दार्थः । न केवलं स युष्मद्गृहे वसति मात्रं किन्तु प्रियः सन्निति युष्माकं नेत्रानन्दनीयत्वं सुहृदिति हिते प्रवर्तनीयत्वं मातुलेय इति सम्बन्धविशेषस्यानुगम्यत्वम् आत्मेति स्वीयशरीरमात्रैरभिमन्तव्यत्वम् गर्हणीय इति कृपया प्रतिपाल्यत्वं विधिकृत् किङ्कर इति सारथ्यादिषूपाज्यत्वं गुरुरित्यनुशासनीयत्वमिति. न च प्रह्लादादीनां गृहेषु सगुरुकिङ्करादिभावेन तिष्ठतीति भावः ॥ ४९ ॥

नन्वेवं साक्षात्परब्रह्मप्रतिष्ठाभूतस्यास्य प्राप्यानामस्मदादीनां कैङ्कर्यादौ किङ्करत्वमिति चेत् सत्यम्, अस्य महैश्वर्यस्य प्रेमवश्यतायाश्च तत्त्वं विज्ञातुं कोऽहं वराको यतो ब्रह्माद्या अपि न जानन्तीत्याह—न यस्येति । रूपं तत्त्वं वस्तुतया याथात्म्येन इदमित्थमिति साक्षान्नोपवर्णितं धियेति तत्र मुख्यं प्रेक्षाभावादेवेति भावः । मौनेनैकस्मदादयो यत् प्रसादं मौनादिभिः साधनैः प्रार्थयन्ते स कृष्णो युष्मत्प्रसादं कैङ्कर्यादिना प्रार्थयत इति युष्मदस्मदाद्योरतिमहदन्तरमिति भावः ॥ ५० ॥

ननु, पद्मजो न जानातु भवत्स्वीश्वर एव सत्यं तत्रापदैश्वर्यमेतद्दर्शयति भक्तानामनुग्राहयते स एव इति ॥ ५१ ॥

राजा युधिष्ठिरः अहन् कीर्तिम् ॥ ५२ ॥

अनेन कृष्णेन ॥ ५३

दुर्लक्ष्यो अपायसंयोगो गमनागमने यासां ताः निर्माणास्तु-रेक्ष्यो दुरार्थनिवेशः ॥ ५४—५५ ॥

ईश्वरं रुद्रम् ॥ ५६-५७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भक्तहितकारित्वं भगवतो वर्णयति—स इति । सोऽयं वो युष्माकं भक्तानां सुहृत् अनुकूलः विधिकृत् कृत्यसारथ्यादिकर्त्ता गुरु-

* विजयध्वजटीकायामेकादशोऽध्यायः समाप्तः । इत

अथानुगृह्य भगवान्माभैष्टेति सुरान्विभुः ।
शरं धनुषि सन्धाय पुरेष्वस्त्रं व्यमुञ्चत ॥ ५७ ॥
ततोऽग्निवर्णा इषव उत्पेतुः सूर्यमण्डलात् ।
यथामयूखसन्दोहा नाऽदृश्यन्त पुरो यतः ॥ ५८ ॥
तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः ।
तानानीय महायोगी मयः कूपरसेऽक्षिपत् ॥ ५९ ॥
सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः ।
उत्तस्थुर्मेघदलना [1]वैद्युता इव वह्नयः ॥ ६० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हितोपदेष्टा आत्मा अन्तर्यामी अर्हणीय उपास्यः सर्वथा प्रियः प्रीतिविषयः कैवल्यनिर्वाणसुखं निरतिशयनित्यानंदस्तदनुभवरूपः एवंभूतो मातुलेयः महद्भिर्मृग्यं ब्रह्मैव ॥ ४९ ॥

भगवतो गूढत्वं वर्णयन् तत्प्रसादं प्रार्थयते-नेति । यस्य रूपं साक्षाद्ब्रह्मपद्मजादिभिर्धिया निपुणया मुख्यवस्तुतया इदमित्थमिति भावेन नोपवर्णितम् स एषः श्रीकृष्णः सात्वतां भक्तानां पतिः पालकः मौनेन मुनिधर्मेण ब्रह्मचर्यादिरूपेण भक्त्योपशमेन पूजितोऽस्माकं प्रसीदताम् ॥ ५० ॥

ब्रह्मादयोऽपि तद्रूपं साकल्येन नैव वर्णयन्तीत्युक्तं तत्र हेतुं दर्शयितुं मयवृत्तान्तकथनेन तेषां भगवद्दत्तैश्वर्यत्वं द्योतयति, स एष इत्यादिना ॥ ५१ ॥

जगदीशितुः शिवस्य कस्मिन् कर्मणि मयो ऽहन् हतवान् कीर्तिमिति शेषः । यथा चानेन कृष्णेन जगदीशितुः कीर्तिरुपचिता वर्द्धिता तथा कथ्यताम् ॥ ५२ ॥

अनेन श्रीकृष्णेनोपबृंहितैः स्वशक्त्या सम्वर्द्धितैः ॥ ५३ ॥

दुर्लक्ष्यापायसंयोगाः दुर्ज्ञेयो ऽपायः तिरोभावः संयोग आविर्भावश्च यासां ता निर्माय तेभ्यो ददाविति शेषः ॥ ५४ ॥

पूर्ववैरमनुस्मरन्तस्ते असुराणां सेनान्यः सेनापतयः ताभिः पूर्भिः सेश्वरान् इन्द्रादिसहितान् नाशयाञ्चक्रुः नाशितवन्तः ॥५५॥

उपासाद्य निकटं गत्वा ॥ ५६ ॥

भाषा टीका ।

यह श्रीकृष्ण वहीपरब्रह्म हैं जोकि-महात्माजनों के ढूढने योग्य कैवल्य मोक्षसुख के अनुभवरूप, प्रिय, और सुहृद और आपके मामाके पुत्र, आत्मा पूजनीय और आज्ञा करने वाले तथा गुरुभी हैं, तस्मात् तुमारे भाग्य धन्य हैं ॥ ४९ ॥

जिनके रूपका वर्णन वास्तव रीतिसे अपनी बुद्धिसे शिव ब्रह्मादिक भी नहीं कर सके, किंतु मौन होकर भक्तिसे और शांतिसे पूजनमात्र किया, वो यह भक्तों का पति श्रीकृष्ण मेरे ऊपरप्रसन्न हो ॥ ५० ॥

हे राजन् यह वही भगवान् हैं कि जिनोंने, बड़े मायावी मयदानव से खंडित हुए रुद्रके यशको फिर विस्तार किया ॥ ५१ ॥

राजा उवाच ॥

राजायुधिष्ठिर बोले, कि-जगदीश्वर श्रीमहादेवजी के यश को मयदानवने किसप्रकार नष्टकिया और फिर श्रीकृष्णने कैसे श्रीभोलानाथ की कीर्तिका विस्तार किया, सोआप कहिये ॥ ५२ ॥

नारद उवाच ॥

नारजी बोले, कि-इन श्रीकृष्ण की सहायसे देवताओं ने असुरोंको जब जीता तब असुर लोग मायावियोंके परम गुरु मय दैत्यके शरण गये ॥ ५३ ॥

मयनेभी सोने चांदी और लोहेकी तीन पुर ऐसे निर्माण किये, कि-जिनकी सामग्री तर्कना करने में न आवे, और जिन के नाश का संबन्ध भी किसी को लखाई नहो ॥ ५४ ॥

हेराजन् ! उनतीन पुरोंसे वे असुरों के सेनापति लोग देवतों के पहिले वैरकी यादकर २ लोकपालों सहित तीनों लोकों को नाश करने लगे ॥ ५५ ॥

तदनन्तर अधिष्ठाताओं सहित तीनों लोक श्रीशिवजी के समीप जाकर बोले, कि—हे विभो ! तीन पुरों में रहने वाले शत्रु से नष्ट हुए ऐसे हम देव लोग आपके हैं हमारी आप रक्षा करो ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्त्रमभिमन्त्रितं शरं पुरेषु व्यमुञ्चत् ॥ ५७ ॥

ततः शरात् सूर्यमण्डलान्मयूखसन्दोहा रश्मिसमूहा इव यतो येभ्यः ॥ ५८ ॥

कूपरसे स्वयं निर्मितकूपामृते ॥ ५९ ॥

(१) मेघ दलनाविति पा० वीर०



विलोक्य भग्नसङ्कल्पं विमनस्कं वृषध्वजम् ।
तदाऽयं भगवान्विष्णुस्तत्रोपायमकल्पयत् ॥ ६१ ॥
वत्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः ।
प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ॥ ६२ ॥
ते ऽसुरा ह्यपि पश्यन्तो न न्यषेधन्विमोहिताः ।
तद्विज्ञाय महायोगी रसपालानिदं जगौ ॥ ६३ ॥
स्वयं विशोकः शोकार्तान्स्मरन्दैवगतिं च ताम् ।
देवो ऽसुरो नरोऽन्यो वा नेश्वरो ऽस्तीह कश्चन ॥ ६४ ॥
आत्मनोऽन्यस्य वा दिष्टं दैवेनाऽपोहितुं द्वयोः ।
अथाऽसौ शक्तिभिः स्वाभिः शम्भोः प्राधनिकं व्यधात् ॥ ६५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वज्रसाराः वज्रवद्दृढाङ्गाः महौजसो महाबलाः मेघदलना मेघभेदिनो विद्युद्रूपा वह्नय इव ॥ ६० ॥ ६१ ॥

काले मध्याह्ने ॥ ६२ ॥ ६३ ॥ ६४ ॥

आत्मनो वा अन्यस्य वा द्वयोरपि वा दैवेन दिष्टमुपकल्पितम् अपोहितुं परिहर्तुमिह कश्चिदपीश्वरः समर्थो नास्ति असौ श्रीकृष्णः प्रधनं संग्रामस्तत्साधनम् ॥ ६५ ॥ ६६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ तद्विज्ञापनानन्तरं तान् सुरान् माभैष्ट मयं माकार्ष्ट इत्यनुगृह्य भगवान् विभू रुद्रः धनुषि शरं बाणं सन्धायास्त्रं पाशुपतं तस्मिन् संयोज्येति शेषः। पुरेषु व्यमुञ्चत ॥ ५७ ॥

ततः शराद्यथा सूर्यमण्डलान्मयूखसन्दोहाः रश्मिसमूहाः तथाग्निवर्णा इषवो बाणा उत्पेतुः यतो येभ्य इषुभ्यः पुरो नादृश्यन्त अतैरिति शेषः। तावद्भिरिषुभिः प्रच्छन्ना बभूवुरित्यर्थः ॥ ५८ ॥

ततः किमत आह, तैरिषुभिः स्पृष्टास्ताडिताः श्रीणि पुरायणौकांसि स्थानानि येषां ते असुराः सर्वे व्यसवः विगता असवो प्राणा येषां तादृशाः सन्तो निपेतुः पतितवन्तः तान् व्यसूनसुरानानीय महायोगी मयः कूपरसे स्वयं निर्मितकूपगते रसेऽमृतसंजीवरतर्यक्षिपदपातयत् ॥ ५९ ॥

तेच सिद्धामृतरसेन स्पृष्टा असुराः वज्रसारवत् दृढाङ्गाः महौजसः महाबलाः सन्तः मेघदलनात् मेघच्छेदाद्विद्युद्रूपा वह्नयः इवोत्तस्थुरुत्थितवन्तः ॥ ६० ॥

तथा भग्नः सङ्कल्पो यस्मात् एव विमनस्कं दुःखितमनस्कं वृषध्वजं रुद्रं विलोक्यायं भगवान् श्रीकृष्णरूपो विष्णुस्तत्र सिद्धामृतरसविनाशे उपायमकल्पयत् ॥ ६१ ॥

तदेवाह—वत्स इति । अयं श्रीकृष्णरूपो विष्णुः स्वयं गौर्धेनुरूपा आसीत् ब्रह्मा चतुर्मुखो वत्स आसीत् ततो गोरूपोऽयं विष्णुस्सवत्सः त्रिपुरं मयाख्यां पुरीं समाहारस्तत्प्रविश्य काले मध्याह्ने रसकूपामृतं रसरूपं कूपगतममृतं पपावपिबत् ॥ ६२ ॥

तेऽसुराः पिबन्तीं गां पश्यन्तोपि भगवन्मायाविमोहिताः न न्यषेधन् न न्यवारयन्तः तत्पानं ज्ञात्वा महायोगी मयः रसं कूपामृतरसंपालयन्तीति तथा तानसुरान् शोकार्तान् तां दैवगतिं स्मरन् अत एव विगतशोकः स्वयं स्मयन्निदं वक्ष्यमाणं जगौ उवाच ॥ ६३ ॥

तदेवाह—देव इति । आत्मनोऽन्यस्य वा द्वयोरपि दैवेनेश्वरेण दिष्टमुपकल्पितं सुखं दुःखं वाऽपोहितुमिह लोके देवादिष्वन्यतमो यः कोऽपि देवादिरीश्वरः न प्रभुर्नसमर्थः दैवमेव सुखदुःखादिहेतुरित्यर्थः । अथ निःशेषकूपामृतरसपानानन्तरम् असौ श्रीकृष्णः धर्मादिभिः स्वाभिः शक्तिभिः शम्भोरुद्रस्य प्राधनिकं प्रधनं संग्रामः तत्साधनं यत् रथसूतादिरूपं तद्व्यधात् कर्मणा धर्मादिस्वशक्तिरेव रथादिरूपेण अकरोदित्यर्थः स्वशक्त्याहितशोकमकरोदिति यावत् ॥ ६४ ॥ ६५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विभुः शिवः माभैष्टेत्युक्त्वा पुर्यामित्येकवचनं जातिविवक्षया ॥ ५७ ॥

ततो धनुषो मयूखसन्दोहाः रश्मिराशयः यतो यैः शरैः पुरः पुराणि ॥ ५८ ॥

स्पृष्टास्तथा व्यसवः गतप्राणाः इदं च मयेन कृतं विपरीतमित्याशयवानाह—तानिति ॥ ५९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सिद्धामृतरसोमृतसञ्जीवनरसः तस्मिन् स्पृष्टाः स्नाताः वधूताः विद्युत्सम्बन्धिनः वज्रेण जलादिना वधा नाशो नास्ति तथैषामिति सूचयति ॥ ६० ॥

कथं कृष्णेनोपचिता कीर्तिरितीमं प्रश्नं परिहर्तुमाह—विलो-कयेति ॥ ६१ ॥

कोसाविति तत्राह—वत्सइति । हिशब्देन विष्णुर्ब्रह्माण-मपेक्षते इति न दोषायेति तत्संकल्पकारित्वेन सिद्धत्वादिति सूचयति काले माध्यन्दिने ॥ ६२ ॥

अन्यान्तरसिद्धत्वाद्धिशब्देन भगवन्मायास्तन्मायातोऽपरि-मितमाहात्म्यमस्तीति सूचयति, स्वकृतापराधप्रहाणाय स्वस्य भगवद्भक्तिप्रकटनाय च मयहर्तादिवचनानं च ममास्तीत्यभि-प्रायेणाह—तदिति । तद्दैत्यवधोपायकरणं किंश्चित्कालमसुराणां जयदायिनीमिदानीं देवानामिति दैवगतिं किं जगदिति तत्राह, देव इति । आत्मनः स्वस्य अन्यस्य देवदत्तस्य चेति द्वयोर्दैवेन विष्णुना दिष्टं कल्मषं व्यपोहितुम् अन्यथा कर्तुम् इह जीवराशौ देवोऽसुरोऽन्यो वा कश्चनेश्वरः समर्थो नास्तीत्यतस्तूष्णीभाव एव वरीयानित्यर्थः ॥ ६३ ॥ ६४ ॥

ननु, सिद्धरसपानं व्यर्थमिव प्रतिभाति त्रिपुराणामनाशा-दित्याशङ्क्य तन्नाशसाधनमाह—धर्मेति । अथ दैत्यजीवन-साधनरसनाशानन्तरं स्वाभिः शक्तिभिः भूम्यादिभिः शम्भोः प्राधनिकं युद्धसाधनं रथादिकं व्यधादित्यन्वयः ॥ ६५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यथेति सूर्यमण्डलादित्यस्मात् पूर्वं योज्यं यतो येभ्य इषुभ्यो हेतुभ्यः ॥ ५८ ॥

कूपरसे स्वनिर्मितकूपरसामृते ॥ ५९ ॥

मेघदलना मेघभेदिनो विद्युद्रूपावह्नयः इव मेघस्थाविद्युतो यथा मेघकान्तितिरस्कारिण्यस्तथैव ते धीरा अपि श्यामविमान-कान्तितिरस्कारिण इत्यर्थः ॥ ६०—६१ ॥

काले मध्याह्ने ॥ ६२—६३ ॥

आत्मनो वा अन्यस्य वा द्वयोरपि वा दैवेनोपकल्पितं दिष्टम् अपोहितुं दूरीकर्तुम् इह कश्चिदपीश्वरः समर्थो नास्ति ॥ ६४ ॥

असौ कृष्णःप्रधनं संग्रामस्तदर्हं रथादिकं स्वाभिः शक्तिभिः धर्मादिभिरारचितं क्रमेण व्यधादिति स्वशक्तीनामनश्वरत्वाच्च तदाविष्टानां रथादीनामपि तादृशत्वं तत्र स्वीयधर्मस्य शक्तियोग-स्यावेशो रथे भक्तियोगाश्रितानां ज्ञानादीनां रथाश्रितेषु सूतादिषु ज्ञेयः ॥ ६५ ॥ ६६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शरं शस्त्रविशेषं तदेवास्त्रम् अस्त्रेण पाशुपतेनाधिष्ठितत्वात् ॥५७॥

ततः ब्रह्माधिष्ठिताच्छरात् यतो येभ्यः पुरो नादृश्यन्त छन्नाः अभवन् ॥ ५८ ॥

तान् असून् सवः कूपरसे स्वनिर्मितकूपस्थसिद्धामृतरसे ॥५९॥

वज्रस्येव सारः काठिन्यं येषाम् महौजसो महाबलाः मेघ-दलना घनभेदिनस्तडिद्रूपा वह्नय इवोत्तस्थुः ॥ ६०—६१ ॥

काले सुरासुरसमृद्ध्यसमृद्धिकरे ॥ ६२—६३ ॥

आत्मनोऽन्यस्य वा द्वयोर्वा दैवेन कर्मफलदात्रा आदिष्टं प्रापितं फलमपोहितुं परिहर्तुं देवोऽसुरो नरो वा नेश्वरः समर्थो नास्ति असौ श्रीकृष्णः धर्मादिभिः स्वशक्तिभिः सह प्राधनिकं प्रधन संग्रामस्तदर्हं रथादिकं व्यधात् ॥ ६४—६६ ॥

भाषा टीका ।

तब तो भगवान् श्रीशङ्कर अनुग्रह करके देवतों से बोले, कि—तुम लोग भय मत करो बस इतना कहकर धनुष के ऊपर बाण लगाकर श्रीभोलानाथ ने अस्त्र छोड़े ॥ ५७ ॥

तब तो अग्निके समान वर्ण वाले बाण श्रीमहादेवजी के धनुष से चलने लगे, जैसे सूर्य मण्डल से किरणों का समूह निकलें, जिन बाणों के मारे तीनों पुर अदृश्य होगये ॥ ५८ ॥

बस उन तीनों पुरों के रहने वाले जिन २ दैत्यों को बाणों का स्पर्श हुआ, वो सब बिना प्राण के होकर पतन हुए, बड़े योगी मय दैत्य ने भी उन सबों को लाकर कूप के अमृत रस में डाला ॥ ५९ ॥

उस कूप के सिद्ध उस अमृत रसके स्पर्श होते ही वज्र सदृश अंग वाले बड़े पराक्रमी एकही बार सब उठ खड़े हुए जैसे मेघों का दलन करने वाली विद्युतों की अग्नियां ॥ ६० ॥

उस समय वृषभध्वज श्रीमहादेव के संकल्प के भंग होने से उदास होने पर, इन्हीं श्रीकृष्ण ने वहां उपाय रचा ॥ ६१

तब ब्रह्माजी तो बछरा बने और ये विष्णु स्वयं गौ बने, और समय पर त्रिपुर में प्रवेश करके उस कूप के अमृतरस का पान कर गये ॥ ६२ ॥

वे असुर लोग सब देखते ही रहे पर आपकी माया से विमो-हित होकर देखने पर भी निषेधन किया, ऐसा समाचार जान कर बड़ा योगी विगत शोक वाला स्वयं मय दैत्य, उस दैवी गतिका स्मरण करता हुआ शोक से व्याकुल एसे उन रस पालों से यों बोला, कि देव असुर नर अथवा और भी कोई, दैव रचित प्रारब्ध के हटाने को समर्थ नहीं। बस यहां ऐसी बातें होती थीं इतने में इन श्रीकृष्णने अपनी शक्तियों से भोलानाथ श्रीशम्भुकी संग्रामकी सामग्री त्यार करदी ॥ ६३—६५ ॥

धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः ।
रथं सूतं ध्वजं वाहान्धनुर्वर्म्मशरादि यत् ॥ ६६ ॥
सन्नद्धो रथमास्थाय शरं धनुरुपाददे ।
शरं धनुषि सन्धाय मुहूर्तेऽभिजितीश्वरः ॥ ६७ ॥
ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप !।
दिवि दुन्दुभयो नेदुर्विमानशतसङ्कुलाः ॥ ६८ ॥
देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः ।
अवाकिरन् जगुर्हृष्टा ननृतुश्चाप्सरोगणाः ॥ ६९ ॥
एवं दग्ध्वा पुरस्तिस्रो भगवान्पुरहा नृप ! ।
ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ॥ ७० ॥
एवंविधान्यस्य हरेः स्वमायया विडम्बमानस्य नृलोकमात्मनः ।
वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किम् ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां युधिष्ठिरनारदसंवादे त्रिपुरविजयो नाम
दशमोऽध्यायः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अभिजिति मध्याह्ने ॥ ६७ ॥

विमानशतानि सङ्कुलानि सङ्कीर्णानि येषां ते देवादयः। ॥ ६८ ॥ ६९ ॥

आदित आरभ्य स्कन्धार्थं निगमयति, एवं विधानीति नृलोकं नराकारमात्मनो विडम्बमानस्यानुकुर्वतः ॥ ७० ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र शक्तिर्नाम अपृथक्सिद्धविशेषणभूतकार्योपयुक्ता सा च धर्मादिरूपेण बहुविधा तत्र धर्मशक्तिर्नाम साधुपरित्राणसामर्थ्यात्मिका ज्ञानशक्तिरिह "यः सर्वज्ञः सर्ववित् सर्वदर्शी स्वाधीनोऽनादिः सर्वेश्वरः सर्वदृक्" इत्यादिश्रुत्यवगता सर्वसाक्षात्कारसामर्थ्यात्मिका तथा चोक्तं श्रीमन्नाथमुनिभिः "यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः" इति. विरक्तिर्नाम "सर्वमिदमभ्यात्तोऽवाक्यनादरः" इति श्रुत्यवगताऽवाप्तसमस्तकामस्यापि तदनादरेणाऽवस्थानसामर्थ्यात्मिका, ऋद्धिर्नामैश्वर्यम् "एष सर्वेश्वरः एष भूताधिपतिः" इत्यादिप्रमाणाऽवगतं सर्वान्तरात्मत्वेन नियन्तृत्वसामर्थ्यम्. तपश्शक्तिर्नाम "स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत" इत्याद्यवगता जगत्सर्गोपयुक्तसङ्कल्परूपज्ञानात्मिका, विद्यानाम "सत्यकामः सत्यसङ्कल्पः" इत्याद्यवगता सत्यसङ्कल्पात्मिका सत्यसंकल्पत्वं च भावनाद्यपूर्वमोग्यात्मस्रष्टा जगद्व्यापारादिषु चामोघसङ्कल्पत्वम्. क्रियानाम अघटितघटनात्मिका "स्वाभाविकी ज्ञानबलक्रिया च" इत्याद्यवगता. आदिशब्देन बलवीर्यतेज आदयः तत्र बलं श्रमप्रसङ्गरहितं सर्वधारणसामर्थ्यम् "एतस्य वा अक्षरस्य प्रशासने" इत्यादिश्रुत्यवगतम्. वीर्यनाम, सर्वाश्रयत्वेऽपि विकाररहितत्वम् तेजः अन्याभिभवसहकार्यनपेक्षत्वम्. रथमिति वाहानश्वान् वर्म कवचमादिशब्देन प्रग्रहादिकं गृह्यते ॥ ६६ ॥

भगवच्छक्त्यात्मकं रथमारुह्य सन्नद्धः कवचित ईश्वरो रुद्रः शरं धनुश्चोपाददे स्वीकृतवान् ततो धनुषि शरं सन्धायाभिजिति मुहूर्ते अभिजिन्नामके मुहूर्ते दिवसस्याष्टमे मुहूर्ते ॥ ६७ ॥

भगवतः श्रीकृष्णस्य तेजसा कार्यविधेन युक्तं त्रिपुरं ददाह यथोपयुक्तद्वारेण दग्धवान् । हे नृप ! तदा दिवि दुन्दुभयो नेदुः ध्वनुः विमानशतानि सङ्कुलानि येषां ते ॥ ६७ ॥

देवर्ष्यादयः जयेति वदन्तः इति शेषः । उत्करैर्वा वर्षयन्ति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ववृषुः कुसुमोत्करैः पुष्पवर्षैः शम्भुमवाकिरन् ववृषुः अप्सरसांगणाश्च जगुर्ननृतुश्च ॥ ६९ ॥

हे नृप ! एवमित्थं तिस्रः पुरः पुरीर्दग्ध्वा पुरहा भगवान् रुद्रः ब्रह्मादिभिः स्तूयमानः स्वस्थानं प्रत्यपद्यत प्रासवान् ॥ ७० ॥

श्रीकृष्णस्य परब्रह्माभिन्नत्वमूचकप्रभावप्रतिपादनम् उपसंहरन् प्रश्नान्तरावसरं प्रयच्छति—एवमिति । आत्मनः स्वस्य मायया सङ्कल्पेन न तु कर्मणेति भावः । नृलोकं विडम्बमानस्यानुकुर्वतः इतरसजातीयचेष्टां कुर्वत इत्यर्थः । हरेराश्रितार्त्तिहरस्य लोकस्य हितोपदेष्टुरस्य श्रीकृष्णस्य ऋषिभिरस्मदादिभिर्गीतान्येवंविधानि वीर्याणि लोकं पुनानानि बहूनि सन्तीति शेषः । साकल्येन केनापि वक्तुं न शक्यानीतिभावः । अपरमन्यत्किं वदाम अतो अन्यत्किञ्चित्त्वया प्रष्टव्यमस्तिचेत् तत्कथयामेत्यर्थः ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिकायाम्

दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धर्मादिवलोपेतत्वात् अमेयाभिः किं तत्प्राधनिकमिति तदाह–रथमिति । भगवतो हरेस्तेजसा गुप्तो रचितः ॥ ६६॥६७ ॥

यथोचिततिप्रकारमाह—दिवीति । जयेत्युक्त्वा जगुरित्यनेन यशोचिततिर्ज्ञायते ॥ ६८ ॥ ६९ ॥

ब्रह्मादिभिर्ब्रह्मोत्तमैः सनकादिभिः "इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे" इत्यादिवेदवाक्यैर्वा शम्भोः पुरदहनमाहात्म्यं यत् तत् श्रीनारायणैकनिष्ठमित्याशयेनोपसंहरति–एवंविधानीति । अपरं भगवच्चरितं नवदंति शेषः । अपरमन्यद्वस्त्वेवंविधमाहात्म्योपेतं किं वदामि न किमपीति वा ॥ ७० ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

दशमोऽध्यायः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवमिति । नृलोकं तच्चेष्टाम ॥ ७१ ॥

इत श्रीप्रह्लादो प्रह्लादचरितं त्रिपुरविजयं च दशमोऽध्यायः इत्येव पाठः

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अभिजिति मध्याह्ने ॥ ६७—७० ॥

स्वमायया विडम्बमानस्य अत एव मोहवशात् अत एव नृलोकस्तं न भजत इति भावः ॥ ७१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमे दशमोऽध्यायस्सङ्गतः सङ्गतस्सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सन्नद्धो वर्ष्मितः अभिजिति मध्याह्ने ॥ ६७ ॥

विमानशतानि सङ्कुलानि सङ्कीर्णानि येषां ते देवादयः जयेति ववृषुः कुसुमोत्करैरवाकिरन् ववृषुः ॥ ६८—७० ॥

आत्मनः स्वस्य नृलोकं भक्तजनं स्वमायया विडम्बमानस्य स्वकृपया ऽनुकुर्वतः तत्तद्भक्तानुरूपं चेष्टितं कुर्वतः अस्य श्रीकृष्णस्य हरेः भक्तदुःखहारिणः लोकान् पुनानानि वीर्याणि ऋषिभिर्गीतानि एवंविधानि सन्ति. तत्र किञ्चिदुक्तमपरं किं वदामि तदुच्यतामिति शेषः ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

दशमोऽध्यायार्थ प्रकाशः ॥ १० ॥

भाषा टीका ।

अर्थात् धर्म ज्ञान विरक्ति ऋद्धि तप विद्या क्रिया इत्यादिकों से रथ सूत ध्वजा घोड़े धनुष कवच बाण आदि जो चाहिये से सबही कुछ रचदिया ॥ ६६ ॥

श्री शिवजी भी कटिबद्ध होकर रथ पर बैठ धनुषबाण हाथ में लेकर मध्याह्न काल अभिजित मुहूर्त में धनुष के ऊपर बाण लगाकर ॥ ६७ ॥

भाषा टीका।

हे नृप! उस बाण से श्रीहर ने दैत्यों के तीनों पुर जलादिये, बस तब तो स्वर्ग में सैकड़ों विमानों पर बैठकर देवता लोग दुंदुभी बजाने लगे॥ ६८॥

देव ऋषि पितृ सिद्धेश जय २ शब्द करके कुसुमों की वर्षा करने लगे, और हर्ष के मारे गाने लगे अप्सरा नृत्य करने लगे॥ ६९॥

हे नृप! ऐसे भगवान् श्री शंकर जी तीनों पुरों को जलाकर अपने धाम को सिधारे॥ ७०॥

इस प्रकार मनुष्य लोक का अनुकरण करने वाले इन जगद्गुरु श्री हरिके पराक्रम है जिनको ऋषि लोग गान करते हैं, और जो लोकों को पवित्र करते हैं ऐसे आपके वीर्य हैं सो मैंने तुमसे कहे अब और क्या कहूं॥ ७१॥

इति श्रीमद्भागवत महापुराण सप्तम स्कन्ध में

दशम अध्याय की भागवताचार्य कृत

भाषा टीका समाप्त॥ १०॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे दशमोऽध्यायः॥ १०॥

---:#:---

॥ एकादशोऽध्यायः ॥

श्रीशुक उवाच ।

श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः ।
युधिष्ठिरो दैत्यपतेर्मुदायुतः पप्रच्छ भूयस्तनयं स्वयम्भुवः ॥ १ ॥

युधिष्ठिर उवाच ।

भगवन् ! श्रोतुमिच्छामि नृणां धर्म्मं सनातनम् ।
वर्णाश्रमाचारयुतं यत्पुमान्विन्दते परम् ॥ २ ॥
भवान्प्रजापतेः साक्षादात्मजः परमेष्ठिनः ।
सुतानां सम्मतो ब्रह्मंस्तपोयोगसमाधिभिः ॥ ३ ॥
नारायणपरा विप्रा धर्मं गुह्यं परं विदुः ।
करुणाः साधवः शान्तास्त्वद्विधा न तथा परे ॥ ४ ॥

नारद उवाच ।

नत्वा भगवते ऽजाय लोकानां धर्महेतवे ।
वक्ष्ये सनातनं धर्म्मं नारायणमुखाच्छ्रुतम् ॥ ५ ॥
यो ऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्म्मतः ।
लोकानां स्वस्तये ऽध्यास्ते तपो बदरिकाश्रमे ॥ ६ ॥
धर्ममूलं हि भगवान्सर्ववेदमयो हरिः ।
* स्मृतं च तद्विदां राजन् ! येन चात्मा प्रसीदति ॥ ७ ॥
सत्यं दया तपः शौचं तितिक्षा शमो दमः ।
अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकादशे नृणां धर्माः साधारण्येन वर्णिताः ।
विशेषेण च वर्णानां मुख्यामुख्याश्च बोधिताम् ॥ १ ॥
"तदेवं दशभिर्ज्ञानभक्तियोगावुदीरितौ ।
अथ पञ्चभिरध्यायैः कर्मयोगो ऽनुवर्ण्यते ॥ २ ॥

दैत्यपतेः प्रह्लादस्य साधूनां सभासु सभाजितं सत्कृतमीहितं चरितं श्रुत्वा पुनर्नारदं पप्रच्छ कथम्भूतस्येहितं महत्तमानाम-ग्रण्यो मुख्यस्य तत्र हेतुः उरुक्रमे आत्मा मनो यस्य ॥ १ ॥

श्रवणेच्छायां हेतुः यद्यतो धर्मादनुष्ठितात्पुरं ज्ञानं भक्तिं च विन्दते ॥ २ ॥ ३ ॥

ननु, स्मृतिकारैर्धर्म उक्त एव तत्राह—नारायणपरा इति ॥ ४ ॥

अजाय श्रीनारायणाय तस्यैव मुखाच्छ्रुतम् ॥ ५ ॥

---

* स्मृतेरिति पाठः, वीरराघ० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तन्मुखादात्मनः श्रेयः संभावयन्विशिनष्टि, य इति ॥ ६ ॥

प्रथमं तावद्धर्मे प्रमाणमाह—धर्मेति । धर्मस्य मूलं प्रमाणं स्मृतं च स्मृतिः तद्विदां वेदविदां येन चाऽऽत्मा मनः प्रसीदति तुष्यति च । तथाच याज्ञवल्क्यः "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्" इति. मनुश्च "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च" इति ॥ ७ ॥

तत्र तावत्सर्वसाधारणधर्ममाह—सत्यमिति, पञ्चभिः । तपः एकादश्युपवासादिः ईक्षा युक्तायुक्तविवेकः शमो मनसः संयमः दमो बाह्येन्द्रियाणाम्. त्यागो दानं स्वाध्यायो यथोचितजपः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं श्रुतप्रह्लादचरितोऽपरं वदाम किमिति प्रश्नाय चोदितो युधिष्ठिरः वर्णाश्रमादिधर्मान् तत्रतत्र भगवद्भक्तियोगाङ्गत्वेनोक्तान् बुभुत्सुः पप्रच्छ देवर्षिमित्याह भगवान् बादरायणिः, श्रुत्वेति । उरुविक्रमे भगवत्यात्मा मनो यस्य तस्य दैत्यपतेः प्रह्लादस्य साधुभिः सभाजितमनुसेवितम् आदृतं वा ईहितं चरित्रं श्रुत्वा मुदा हर्षेण अन्वितो युक्तो युधिष्ठिरः पुनर्महत्तमानामग्रयं प्रथमतो गणं स्वयंभुवो ब्रह्मणः तनयं नारदं पप्रच्छ "साधु सभासभाजितं महत्तमाग्रयउरुक्रमात्मनः" इति पाठान्तरं तत्र महत्तमानामग्रयः मुख्यः उरुक्रमे भगवति आत्मा मनो यस्य दैत्यपतेः प्रह्लादस्येहितं साधूनां सभायां सभाजितं सत्कृतं श्रुत्वेत्यर्थः ॥ १ ॥

प्रश्नमेवाह—भगवन्निति, त्रिभिः । हे भगवन् ! अहं वर्णानां ब्राह्मणादीनाम् आश्रमाणां ब्रह्मचर्याद्याश्रमनिष्ठानां चाचारैर्युतं नृणां सनातनमनादिपरंपरागतं तत्तद्वर्णाश्रमानपायिगडुकल्पितं वर्णाश्रमाचारयुतं मतूत्पथप्रतिपन्नजनाचारयुतम् एवंविधाद्धर्मादेव परमात्मानं विन्दन् इति भावः—

> "वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
> विष्णुराराध्यते नान्यः पन्थास्तत्तोषकारणम्" ॥

इति स्मृतेः । धर्मं श्रोतुमिच्छामि तच्छ्रवणेच्छायां हेतुं वदन्विशिनष्टि—यद्यस्माद्धर्मात्परं परमपुरुषं विन्दते भक्तियोगनिष्पत्तिद्वारा प्राप्नोतीत्यर्थः ॥ २ ॥

नन्वेतद्धर्मविदो बहवः सन्ति अतस्तत्प्रति नाहं पृष्टव्य-इत्यत्राह—भवानिति । त्वमिवान्ये धर्मं गुह्यं न विदुरतस्त्वमेव ब्रूहीति भावः । तदेव स्पष्टयंस्तं विशिनष्टि, प्रजानां पत्युः परमेष्ठिनः साक्षाद्भगवानात्मजः पुत्रः सर्वोऽपि धर्मः परमेष्ठिमुखोपदिष्ट इति ततो गृहीतधर्मरहस्यस्त्वमेव तद्वक्तुं समर्थ इति भावः । ननु, परमेष्ठिनः सुता अपि बहवः सन्तीत्यत्राह—हे ब्रह्मन् ! सुतानां मध्ये भवान्परमेष्ठिनः संमतः सुतः नितरां प्रीतिविषयः सुतो ऽतो धर्मरहस्यं तेन तुभ्यमुपदिष्टम् भवेदितिभावः ॥ ३ ॥

मनूपदिष्टधर्मरहस्योऽप्यहं तान्नस्मृतवानस्मीत्यत्राह—तप आदिभिरुपायैर्नारायणपराः नारायणः पर उत्कृष्ट उपास्यो येषां तादृशा विप्रा यूयं परं धर्मगुह्यं विदुः भगवद्भक्त्यङ्गत्वेन वर्णाश्रमादिधर्ममनुतिष्ठतां युष्माकं न तद्विषया विस्मृतिरितिभावः । जानन्तो वयं रहस्यत्वादेव न कथयाम इति चेत्तत्राह—करुणा इति । करुणाः करुणावन्तः करुणावतां मम धर्मरहस्याऽज्ञानप्रयुक्तदुःखस्य निराचिकीर्षायुक्तैवेति भावः । ननु, तच्छ्रवणेत्वमनधिकारीति शङ्कां निराकुर्वन्विशिनष्टि, शान्ता रागादिप्रयुक्तवैषम्यरहिताः किं तवैतद्रहस्योपदेशेन मम प्रयोजनं तत्राह. साधवः स्वार्थनिरपेक्षपरोपकारशीलाः एवंभूतास्त्वद्विधा एव न त्वपरे सन्तीत्यर्थः ॥ ४ ॥

एवमापृष्टो धर्मान् भगवान् नारदस्तान्निगमयुः स्वस्य साक्षात्तदुपदेष्टारं श्रीमन्नारायणं नमस्कुर्वन् प्रतिज्ञाय तं विशिनष्टि—नत्वेति द्वाभ्याम् । अजाय कर्मायत्तोत्पत्तिरहिताय भगवते नारायणाय लोकानां यो धर्मस्तस्य हेतवे नारायणाय प्रवर्तकाय नत्वा नारायणमुखाच्छ्रुतं सनातनं धर्ममहं वक्ष्ये ॥ ५ ॥

एवं प्रतिज्ञां कृत्वाऽथ तन्मुखादात्मनः श्रेयः संभावयन् तं विशिनष्टि—य इति । यो भगवानात्मनोंऽशभूतेन नरेण सह नारायणनाम्ना धर्मतो मूर्त्यां धर्मभार्यायां दक्षदुहितरि मूर्त्यां धर्मप्रवर्तनार्थं लोकानां स्वस्तये बदरिकाश्रमे ऽद्याप्यध्यास्ते ॥ ६ ॥

तावद्विवक्षिते धर्मे प्रमाणमाह—धर्ममूलमिति. धर्मस्य मूलं प्रमाणं धर्मप्रमापकं भगवानित्यर्थः । ननु, भगवतः प्रत्यक्षादिप्रमाणानन्तर्भूतत्वात्कथंतस्य धर्मप्रमापकत्वमितिशङ्कां निराकुर्वन् तं विशिनष्टि, सर्ववेदमयः ऋग्यजुस्सामादिसर्ववेदप्रचुरः न साक्षाद्धर्मे भगवान् प्रमाणमपितु साक्षात्प्रमाणभूतसर्ववेदाविष्कारद्वारेतिभावः । वेदाविष्कारकारकत्वं च तस्य श्रूयते "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदः" इत्यादि. किञ्च हे राजन् ! तद्विदां वेदविदां स्मृतिश्च तद्धर्ममूलमित्यर्थः तद्विदामित्यनेन स्मृतीनां स्वमूलभूतश्रुत्यनुमापनद्वारा धर्मप्रमापकत्वमिति सूचितम् तद्विदां स्मृतय इत्यनेनतादृग्वेदमूलकशाक्यादिस्मृतिव्यावृत्तिः । स्मृतिश्चेति च शब्देन शिष्टाचारादिसंग्रहः । तदुक्तं मनुना—

> "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
> आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ इति.

याज्ञवल्क्यश्च——

> "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
> सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥ इति.

धर्मं विशिनष्टि, येन धर्मेण स्वाराधनभूतेनात्मा परमात्मा प्रसीदति परमात्मप्रसादहेतुत्वादेवदेवं तच्छ्रवणादिकर्तव्यम इति भावः ॥ ७ ॥

एवं धर्मप्रमाणान्यभिधाय तावन्नृणां ये साधारणा धर्मास्तानाह—सत्यमिति पञ्चभिः, । सत्यं भूतहितत्वं दया स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वम. तप अनशनादिरूपम. शौचं स्नानादिजशुचित्वम. तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता. ईक्षा हेयोपादेयविवेकः. शमोऽन्तरिन्द्रियजयः दमो बाह्येन्द्रियजयः अहिंसा करणत्रयेणापि परपीडानिवृत्तिः । ब्रह्मचर्यमनुज्ञातकालेषु

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

श्रीमद्भक्तिरहित्यं त्यागो लोभराहित्यं स्वाध्यायो यथोचितमन्त्रजपः आर्जवं मनोवाक्कायानामैकरूप्यम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवद्भक्त्या यथावद्वर्णाश्रमाचाराचरणेन समुत्पन्नाऽपरोक्षज्ञानेन प्रसन्नो हरिः स्वस्वयोग्यां मुक्तिं ददातीत्येतदर्थमुक्त्वाऽध्यायानामारम्भः । तत्र वर्णाश्रमधर्माञ्छ्रोतुकामो युधिष्ठिरो नारदं पृच्छतीत्याह—श्रुत्वेति । महत्तमानामग्रण्यस्य श्रेष्ठस्य उरुक्रमे हरावात्मा मनो यस्य स तथा तस्य दैत्यपतेः प्रह्लादस्य ईहितं चरितं साधुसभासु सभाजितं सम्भावितं महत्तमानां ब्रह्मादीनां उत्तमस्य दैत्यानामपि पत्युरुरुक्रमात्मनो नरसिंहस्येति वा ॥ १ ॥

धर्मं विशिनष्टि-वर्णेति । वर्णाश्रमाचारयुतं "यु मिश्रणे" इति धातुः ॥ २—५ ॥

पुरुषार्थोपयोगित्वाद्वक्तुमिच्छामीत्याह—यो धर्मेति । दाक्षायण्यां नाम्ना मूर्तौ धर्मतो धर्मप्रवर्तनार्थम् "स्यादध्यधिक ईश्वरः" इत्यभिधानादीश्वरः तप उद्दिश्य बदरिकाश्रम आस्त इत्यन्वयः बदरिकाश्रमे तपोऽध्यास्त इति वा ॥ ६ ॥

तत्रानुष्ठानधर्मविषयं ज्ञाते क्षिप्रप्रवृत्तिः स्यादधिकारिणामिति तमाह—धर्ममूलमिति । धर्ममूलं धर्मविषयः सर्ववेदमयः सर्ववेदप्रतिपाद्येषु प्रधानः अनेन रुद्रादयो निवृत्ता इति ज्ञातव्यं न केवलं धर्मविषय एव तत्प्रतिष्ठापकश्चेत्यतो धर्ममूलमित्यत्र प्रमाणं सर्ववेदमय इति, प्रमाणान्तरं चास्तीत्याह—स्मृतिरिति, प्रमाणमिति शेषः । भगवत्प्रसादहेतुत्वात्प्रमाणमित्याह—येनेति । अनेन भगवत्तत्त्ववेदिभिः स्मृतो धर्मो न कपिलादिभिरित्युक्तम् भवति ॥ ७ ॥

विषयं निरूप्य सर्वसाधारणं सर्वधर्मसाधनमाह—सत्यमिति । सत्यादिचतुष्टयमन्तरङ्गं तितिक्षादिकमुपाङ्गमिति ज्ञातव्यम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हतसन्देहत्वान्मुदा युतः । अत एव राज्ञाऽनुकूलैर्धर्मकथामकरोदित्याह, पप्रच्छेति ॥ १ ॥

तामपि लोकहितायैव परमार्थमाश्रित्यैव श्रीनारदेन सममेव चाकरोदित्याह—यत् पुमानिति ॥ २ ॥ ३ ॥

ननु, मन्वादयो नारायणपरा एव तत्राह-गुह्यमिति । गुह्यत्वात्तेऽपि न प्रकाशयन्तीत्यर्थः ॥ ४ ॥

धर्महेतव इति । धर्मोऽत्र ज्ञानभक्तिजनको धर्मविशेषो ज्ञेयः ॥ ५ ॥

आत्मवतामनुकम्पया तपोऽव्यक्तगतिश्चरतीति पञ्चमस्कन्धात् आत्मनोंऽशेन नरेण ॥ ६ ॥

तस्य प्रमाणं—आज्ञया तद्बहिर्मुखधर्मस्य अपार्थत्वं भगवद्धर्मस्यैवावश्यकत्वं चोक्तम् अत एव "वेदोऽखिलो धर्ममूलम्" इत्यादि मनुस्मृतिवाक्यादप्यत्र विशिष्टतयोपदिष्टं तच्च युक्तं "धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सताम्" इत्याद्युक्तित्वात् येनैव धर्मेण मनः प्रसीदतीत्यनेन यथात्मा सुप्रसीदतीतिवत् सुष्ठु विशिष्टतया अनुक्तत्वात्तल्लक्षणलब्धा साक्षाद्भक्तेरेव प्राधान्यञ्च बोधितं येन चात्मेत्यात्मतोषोऽपि प्रमाणमित्यर्थः ॥ ७ ॥

सत्यमित्यादि सार्द्धपञ्चकम् ॥ ८—१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

> वासनामगवद्भक्तसङ्गात् सात्त्वी निरूपिता ।
> दशभिः पञ्चभिश्चाथ सत्कर्म प्रभवोच्यते ॥
> नृणां साधारणान् धर्मान् विप्रादीनां विशेषतः ।
> स्त्रीणां सङ्करजातीनां चोवाचैकादशे मुनिः ॥

तदेवं निर्गुणभक्तिवासनायाः कारणत्वेन महत्कृपां दशभिरध्यायैरुक्त्वा सगुणभक्तिवासनायाः कारणं निष्कामकर्मयोगं पञ्चभिरध्यायैर्वक्तुमारभते-श्रुत्वेति । साधूनां सभासु सभाजितं सत्कृतं महत्तमानामग्रण्यो मुख्यस्य प्रह्लादस्य ॥ १ ॥

सनातनं फलप्राप्तावपि स्थास्नु भक्तियोगमित्यर्थः । वर्णाश्रमाचारयुतमिति वर्णाश्रमाचारधर्मं च श्रोतुमिच्छामीत्यर्थः ॥२॥३॥

मन्वन्ये मुनयः स्मार्ताः पृच्छयन्तामित्यत आह, नारायणेति ॥ ४ ॥

अजाय श्रीकृष्णाय ॥ ५—६ ॥

धर्मस्य मूलं कारणं प्रमाणं च हि निश्चितं भगवानेव यतः सर्ववेदेति तद्भक्त्या विना धर्मो नैव सिद्ध्यन्तीति भावः । स्मृतं स्मृतिः तद्विदां सर्ववेदमयभगवद्विदां तेन प्राथमिकविष्णुपूजाविरहितश्राद्धादिसप्तमीविद्धरोहिणयष्टमीव्रतादिविधायिकाः स्मृतयो व्यावृत्ताः येन च आत्मा मनः प्रसीदतीति,

> "स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ।
> अहैतुक्यप्रतिहता ययाऽऽत्मा सुप्रसीदति" ॥

इतिवत्सुष्ठुप्रयोगात् यथा केवलया भक्त्या न तथा कर्मादिमिश्रया भक्तिमिश्रकर्मणा वा मनः प्रसीदतीति ज्ञापितं भक्तिरहितो धर्मस्त्वप्रमाण एव तेन—

> "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
> सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्" ॥

इति याज्ञवल्क्योक्तेः

> "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
> आचारश्चापि साधूनामात्मन स्तुष्टिरेव च" ॥

इतिमनूक्तेरपि सकाशात् धर्ममूलं हि भगवानिति नारदोक्तिरेव श्रेयसी बहुक्तं सारसिद्धे—

सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः ।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

"सनकादयो निवृत्ताख्ये ते च धर्मे नियोजिताः ।
प्रवृत्ताख्ये मरीच्याद्या मुक्त्वैकं नारदं मुनिम्"

इति नारदस्यैव तेभ्य उभयेभ्यः श्रेष्ठ्यं सर्वधर्मसारविज्ञत्वं च ध्वनितम् ॥ ७ ॥

तत्र तावत्सर्वमात्रसाधारणं सनातनं भक्तियोगं धर्ममाह, सत्यमिति, पञ्चभिः । तत्र सत्याद्या एकत्रिंशतिभक्त्युपकरणीभूताः श्रवणाद्य नव तु साक्षाद्भक्तिरेवेति ज्ञेयं तप एकादश्युपवासादिः शमो मनसो निग्रहः दमो बाह्येन्द्रियाणां स्वाध्यायो यथोचितजपः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवमतिक्रान्तेन ग्रन्थेन भगवत्प्रियो भक्तियोगो ज्ञानयोगश्च वर्णितः अथ तत्प्रियः कर्मयोगः पञ्चभिरध्यायैर्वर्ण्यते तत्रैकादशेनाध्यायेन सर्वेषामधिकारिणां साधारणा धर्माः विशेषतश्च वर्णानां स्त्रीणां च धर्मा वर्ण्यन्ते । युधिष्ठिरः, महत्तमा हरिध्याननिष्ठास्तेषामग्रं हरिध्यानं नयति वहतीति महत्तमाग्रणीस्तस्य महत्तमाग्रण्यः यतः उरुक्रमे हरौ आत्मा मनो यस्य तस्य दैत्यपतेः प्रह्लादस्य साधुसमासु सभाजितं प्रशंसितमीहितं हरिज्ञानभक्तिगर्भं सुचरितं श्रुत्वा पुनर्ज्ञानभक्तिसाधनभूतकर्मयोगज्ञानार्थं स्वयंभुवस्तनयं नारदं पप्रच्छ ॥ १ ॥

सनातनं नित्यसिद्धवेदप्रोक्तम् यतो धर्मात् ज्ञानभक्तिद्वारा परं परमेश्वरं विन्दते प्राप्नोति ॥ २ ॥

परमेष्ठिनः साक्षात्सुतः सुतानां मरीच्यादीनां मध्ये तपआदिनिमित्तैः सम्मतः प्रीतिविषयश्च ॥ ३ ॥

भवद्विधा नारायणपरा एव धर्मं जानन्ति ते परोपदेष्टुं कुशलाः नान्ये इत्याह-नारायणपरा इति ॥ ४ ॥

अजाय श्रीनारायणाय ॥ ५ ॥

यः धर्मसन्ततिर्दाक्षायण्यां मूर्तौ आत्मना स्वेच्छया अंशेन, स्वांशेन नरेण सह अवतीर्य लोकानां स्वस्तये तपोऽध्यास्ते ६ ॥

धर्मे प्रमाणमाह-धर्ममूलमिति । आत्मा परमात्मा प्रसीदति तस्य धर्मस्य सर्ववेदमयो वेदमूर्तिः भगवान् मूलं प्रवर्तकः प्रमाणमित्यर्थः । तद्विदां वेदविदां स्मृतं स्मृतिश्च धर्ममूलम् ॥ ७ ॥

प्रथमं सर्वसाधारणं धर्ममाह-सत्यमिति, पञ्चभिः । सत्यं सार्वत्रिकं आर्जवं तप एकादश्युपवासादिः ईक्षा हेयोपादेयविवेकः शमोऽन्तरिन्द्रियसंयमः दमो बाह्येन्द्रियसंयमः त्यागो दानम् स्वाध्यायो यथाधिकारं गुरुवाक्यसाधारणम् ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीप्राणनाथाय नमः ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—हे परीक्षित ! महत्तमों में अग्र गण्य श्रीहरि में लग्नचित्त दैत्यपति ऐसे श्रीप्रह्लादके साधु सभामें संश्लाघनीय चरितों को सुनकर हर्षमें निमग्न हुए२ युधिष्ठिरजी ब्रह्मपुत्र श्रीनारदजीसे फिर पूँछने लगे ॥ १ ॥

युधिष्ठिर उवाच ।

युधिष्ठिरजी बोले, कि-हे भगवन् ! हे श्रीनारद जी ! मैं वर्णाश्रम के आचार सहित मनुष्यों के सनातन धर्मों के श्रवण करने की इच्छा करता हूं जिनसे पुरुष परमात्माको प्राप्त होता है ॥ २ ॥

हे ब्रह्मन् आप परमेष्ठी श्रीब्रह्माजीके पुत्र हैं तपयोगसमाधि से सब पुत्रों में सम्मत हैं ॥ ३ ॥

कारुणिक साधु शान्त आप सरीखे नारायणपरायण विप्रजन ही उत्कृष्ट ऐसा गुप्त जो सनातन धर्म है तिसको जानते हैं ऐसा और हरिविमुख जन नहीं जानते हैं ॥ ४ ॥

नारद उवाच ।

नारद जी बोले, कि—भगवान् अजन्मा श्रीनारायण को नमस्कार करके उनही श्रीनारायण के मुख से सुने हुए सनातन धर्मों को कहता हूं ॥ ५ ॥

जो साक्षात् अपने अंश से दक्षपुत्री श्रीमूर्ति मातामें धर्मसे अवतार लेकर लोकों के स्वस्ति (कल्याण) के लिये श्रीबदरिकाश्रम में तप आचरण करते हैं ॥ ६ ॥

धर्मका मूलतो हे राजन् ! सर्व वेदमय भगवान श्रीहरी ही हैं, और वेदार्थ साक्षात्कार करनेवाले महर्षियों की स्मृतियें हैं कि जिनके आचरण से मन सन्तुष्ट होताहै ॥ ७ ॥

सत्य दया तप शौच (शुद्धि) तितिक्षा (सहन स्वभाव) शम दम अहिंसा ब्रह्मचर्य त्याग स्वाध्याय आर्जव ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सन्तोषो दैवलब्धेनालम्बुद्धिः समदृशां महतां सेवा. ग्राम्येहोपरमः प्रवृत्तकर्मभ्यो निवृत्तिः, विपर्ययेहेक्षा निष्फलक्रियाणामीक्षणम्. मौनं वृथालापनिवृत्तिः, आत्मविमर्शनं देहादिव्यतिरिक्तात्मानुसन्धानम् ॥ ९ ॥

अन्नाद्यादेः संविभागो भूतेभ्यश्च यथाऽर्हतः ।
तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव ! ॥ १० ॥
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ।
सेवेज्याऽवनतिर्दास्यं सख्यमात्मसमर्पणम् ॥ ११ ॥
नृणामयं परो धर्मः सर्वेषां समुदाहृतः ।
त्रिंशल्लक्षणवान् राजन् ! सर्वात्मा येन तुष्यति ॥ १२ ॥
संस्कारा यदविच्छिन्नाः स द्विजोऽजो जगाद यम् ।
इज्याऽध्ययनदानानि विहितानि द्विजन्मनाम् ।
जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः ॥ १३ ॥
विप्रस्याध्ययनादीनि षडन्यस्याऽप्रतिग्रहः ।
राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः ॥ १४ ॥
वैश्यस्तु वार्त्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः ।
शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् ॥ १५ ॥
वार्ता विचित्रा शालीनं यायावरशिलोञ्छनम् ।
विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मेति देवतेति च बुद्धिः ॥ १० ॥

अस्य श्रीकृष्णस्य श्रवणादयो नव इज्या ऽर्चनम् ॥ ११ ॥

एवं त्रिंशल्लक्षणवान् ॥ १२ ॥

इदानीं वर्णधर्मान्वक्तुं द्विजानां लक्षणमाह—संस्कारा मन्त्रवन्तो गर्भाधानादयो यस्मिन्नविच्छिन्नाः स द्विजः तर्हि शूद्रस्यापि संस्काराविच्छेदे सति द्विजत्वं स्यात्तत्राऽऽह—अजो ब्रह्मा यमेवंभूतसंस्कारयुक्तं जगाद स द्विजः शूद्रं तु न मन्त्रवत्संस्कारयुक्तं जगाद न चोपनयनवन्तमतो नासौ द्विजः तथाच स्मृतिः "विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा । न केनचित्समसृजच्छन्दसा तं प्रजापतिः" इति. श्रुतिश्च "गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छूद्रम" इति अतो विवाहव्यतिरिक्तसंस्कारस्यानावश्यकत्वादुपनयनस्य तु सर्वथा निषेधान्न तस्य द्विजत्वमित्यर्थः । पाठान्तरे वैदिकादय इति गर्भाधानादय इत्यर्थः त्रैवर्णिकानामावश्यकान्धर्मानाह—इज्येति । जन्मना विशुद्धेन कुलेन कर्मणा चाचारेण अवदातानां शुद्धानां दुष्कुलानां दुराचाराणाञ्च नैतानि विहितानीत्यर्थः । ब्रह्मचर्याद्याश्रमविहिताः क्रियाश्च शूद्रस्य तु वर्णधर्मा एव आश्रमभेदकृतविशेषाभावात् ॥ १३ ॥

ब्राह्मणादीनां चतुर्णामपि वृत्तिरूपान्धर्मानाह—विप्रस्येति सार्द्धैः सप्तभिः । विप्रस्य षट् कर्माणि विहितानीत्यनुषङ्गः । तत्र स्वाध्यापनं याजनं प्रतिग्रहश्च जीविका यथाह मनुः "षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" इति. अन्यस्य क्षत्रियस्य अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चापद्यनुजानाति वक्ष्यति चानन्तरमेव ऋते राजन्यमिति । श्रूयते चाश्वपतिकैकयप्रभृतीनां क्षत्रियाणामुपदेष्टृत्वादि प्रजापालने ऽधिकृतस्य क्षत्रियस्य वृत्त्यन्तरमाह—राज्ञ इति, आदिशब्देन दण्डशुल्कादि ॥ १४ ॥

वार्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य शूद्रस्य द्विजानां शुश्रूषा विहिता स्वामिनो द्विजस्य तु शुश्रूषावृत्तिश्च भवेत् ॥ १५ ॥

विप्रस्य मुख्याऽनुकल्पभेदेन वृत्त्यन्तराण्याह—वार्तेति । वार्ता विचित्रा कृष्यादिरूपा. शालीनं याच्ञां विनैव प्राप्तमयाचितम्. यायावरं प्रत्यहं धान्ययाच्ञा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानं उञ्छनमापणादिपतितकणोपादानं शिलोञ्छनद्वयमेकीकृत्य चतुर्धेत्युक्तं श्रेयसी उत्तमा ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सन्तोषो दैवाल्लब्धेनालम्बुद्धिः समदृक्सेवा समदर्शां महतां सेवा ग्राम्येहाऽभ्यः प्रवृत्तिकर्मचेष्टाभ्य उपरमो निवृत्तिः नृणां

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विपर्ययेहेक्षा निष्फलचेष्टानिरूपणं मौनं मितभाषणम् आत्मविमर्शनं देहविलक्षणात्मयाथात्म्यपरिशीलनम् ॥ ९ ॥

भूतेभ्यो यथायोग्यमन्नाद्यमन्नभक्षणां तदादेः संविभागः विभज्य प्रदानं तेषु भूतेष्वात्मदेवताबुद्धिः आत्मेति च देवतेति च बुद्धिः आत्मनः स्वस्य देवता दैवतं परमात्मा तद्बुद्धिः ब्रह्मात्मकत्वबुद्धिरिति वा स्वात्मतुल्यता बुद्धिः देवताबुद्धिश्चेति वा. इष्टदेवताबुद्धिः । हे पाण्डव ! भूतानांमध्ये नृषु मनुष्येषु तु सुतरामतीवात्मदेवताबुद्धिरित्यर्थः ॥ १० ॥

महतां गतेः भक्तानां शरण्यस्य भगवतः श्रवणं गुणश्रवणं कीर्तनं गुणप्रतिपादकनामादिकीर्तनम्. स्मरणं स्वरूपरूपगुणविभूतिस्मरणम्. सेवा पादपीडनादिरूपा. इज्याऽर्घ्यपाद्यादिनिवेदनरूपा. अवनतिः नमस्कृतिः प्रह्वीभावो वा. सख्यं सर्वात्मना आनुकूल्यम्. आत्मसमर्पणं स्वात्मनस्तदनुबन्धिनश्च तदायत्तसत्तादिमत्त्वानुसन्धानं चेत्ययं त्रिंशल्लक्षणवान् सर्वेषां नृणां साधारणः पर उत्कृष्टो धर्मः उदाहृतः प्रदर्शितः येन धर्मेण सर्वान्तरात्मा भगवान् तुष्यति प्रसन्नो भवति, सोऽयं त्रिंशल्लक्षणवानित्यर्थः ॥ ११ ॥ १२ ॥

एवं नृणां साधारणं धर्ममभिधायाथ नरविशेषाणां ब्राह्मणादीनां वर्णानां त्रयाणामावश्यकान् धर्मान्विवक्षुस्तावत् त्रैवर्णिकसाधारण्येन द्विजत्वलक्षणमाह–संस्कार इति । यत्र संस्काराः गर्भाधानादयः षोडश अविच्छिन्नाः स द्विजः । ननु, शूद्रस्यापि तदविच्छेदे द्विजत्वं स्यात्तत्राह, अजो ब्रह्मा यमेव संस्कारयुक्तं जगाद श्रुतिस्मृतिमुखेन स द्विजः, शूद्रं तु न मन्त्रवत्संस्कारयुक्तं जगाद. न चोपनयनवन्तमतो नाऽसौ द्विजः । तथा च स्मृतिः——

"विवाहमात्रं संस्कारं शूद्रोऽपि लभतां सदा ।
न केनचित्समसृजच्छन्दसा तं प्रजापतिः" ॥ इति.

श्रुतिश्च—गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छन्दसा शूद्रम्"इति । अतो विवाहव्यतिरिक्तसंस्काराणामभावात् उपनयनस्य निषेधाच्च तस्य द्विजत्वमुच्यते इति व्याचक्षते । वस्तुतस्तु, द्विजत्वादिकमदृष्टविशेषसम्बन्धरूपं न जातिरूपं न ब्राह्मणादेर्ब्राह्मणादिपूत्पत्तिमात्ररूपं केवलसंस्कारमात्रपरत्वं वा अन्यथाऽऽदिकाले ब्रह्मणो मुखबाहूरुपत्प्रभवानांपश्चाद्विश्वामित्रप्रभृतीनां च ब्राह्मणत्वाद्यभावप्रसङ्गात् सन्तानविशेषप्रसूतत्वादिकं च तादृगदृष्टविशेषवत्त्वसूचकं सन्तानविशेषोत्पत्तेस्तन्मूलकसंस्कारादेश्च प्रकृष्टादृष्टकार्यत्वादलौकिकप्रकर्षविशेषकारणत्वाच्च । एवं च "कार्येण कारणानुमानम्"इति न्यायेन यत्र कार्यभूताः संस्काराः अविच्छिन्नाः पित्रादिपरम्परयाऽविच्छिन्नाः दृष्टाः स द्विज इत्यर्थः । सन्तानविशेषप्रभवत्वतन्मूलकसंस्कारादिमत्त्वानुमितादृष्टसम्बन्धविशेषवान् द्विज इति यावत् 'संस्कारान् ब्राह्मणादेर्ब्राह्मणादिषु प्रसूतस्यैव कर्तव्यत्वेन प्रजापतिना"अष्टवर्षं ब्राह्मणमुपनयीत" इत्यादिश्रुतिस्मृत्यादिमुखेन प्रणीताः तथा च यत्सन्तानविशेषप्रभवं संस्कारमजो जगाद तत्सन्तानप्रभवत्वानुमितादृष्टविशेषसम्बन्धवान् द्विज इति फलितोऽर्थः । त्रैवर्णिकानामावश्यकान् धर्मानाह–इज्येति । जन्मना कुलेन कर्मणा चावदातानां शुद्धानां द्विजानां त्रैवर्णिकानामिज्यादीनि स्वाश्रमचोदिताः ब्रह्मचर्याद्याश्रमेषु विहिताः क्रियाः चोदितानि विहितानि एषामकरणे प्रत्यवाय इति भावः । तुर्याश्रमिणामनग्नित्वेनेज्याद्यभावात्तदभिप्रायेण स्वाश्रमचोदिताः क्रिया इत्युक्तम्. साग्नित्वे इज्यादीनि त्रीणि स्वाश्रमचोदिताः क्रियाः चेत्येतानि विहितानि अनग्नित्वे स्वाश्रमचोदिताः क्रियाविहिता इत्यर्थः । अनाश्रमिणां विधुरादीनां तु पूर्वोक्तत्रिंशल्लक्षणवान् धर्म इति भावः ॥ १३ ॥

एवं त्रैवर्णिकानामावश्यकान् धर्मानभिधायाऽथ तत्र विप्रस्य जीविकाधर्मानाह—विप्रस्याध्यापनादीनीति । आदि शब्देन याजनप्रतिग्रहौ विवक्षितौ याजनाध्यापनप्रतिग्रहाः जीविकाधर्माः इज्याऽध्ययनदानादीनि त्वावश्यकाधर्मा इत्यर्थः । एवं संभूय विप्रस्य षड् धर्माः तथा चोक्तं मनुना—

"षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥ इति.

अथ क्षत्रियस्य जीविकाधर्मानाह—अन्यस्याऽप्रतिग्रह इति, अत्रान्यस्य क्षत्रियस्याऽप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चानुजानाति, वक्ष्यति चानन्तरमेव "वृत्तेराजन्यम्"इति. श्रूयते च अश्वपतिकैकयप्रभृतीनां क्षत्रियाणामुपदेष्टृत्वादिप्रजापालनेऽधिकृतस्य क्षत्रियस्य वृत्त्यन्तरमाह–राज इतीति व्याचक्षते तच्चिन्त्यम्. "प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात्"इति द्वादशाध्यायान्त्याधिकरणे क्षत्रियादेर्याजनाध्यापनयोः प्रतिषिद्धत्वात् । तत्र हि दर्शपौर्णमासज्योतिष्टोमादिषु किं त्रिभिरपि द्विजातिभिरार्त्विज्यं कारयितव्यमुत ब्राह्मणैरेवेति संशय्य तत्र त्रयोऽप्यार्त्विज्यम् इति विद्वत्त्वादृत्वरणं पुनः पुरुषार्थमतः कर्मवैगुण्यं नास्ति । किञ्च याजनाध्यापनप्रतिग्रहाः ब्राह्मणस्यैव वृत्त्युपाया इति नियमः पुरुषार्थतया स्मर्यते न क्रत्वर्थतया तेन क्षत्रियवैश्यावार्त्विज्यं कुर्वन्तौ नियमातिक्रमात्कामं स्वधर्मात्प्रच्यवेयातां न क्रतोः कदाचिद्गुणहानिः तस्मात् त्रिभिरप्यार्त्विज्यं कारयितव्यमिति पूर्वपक्षं प्रापय्य "द्विजोत्तमानामार्त्विज्यं न तु क्षत्रियवैश्ययोः ब्राह्मणार्त्विज्यनियमः क्रत्वर्थेनापि हि स्मृतः" यत्र व्याख्यास्याम इत्युपक्रम्य "ब्राह्मणानामार्त्विज्यम्"इति यत्सूत्रकाराः क्रत्वर्थेन स्मरन्तीति स्पष्टमतत्. तथा च भगवद्गीतायामपि—

"क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः" ॥ इति.

सुरा देवता ऋषयश्च ऋत्विग्भूता इति देवताद्यविभागनिराकरणात् क्रतुवैगुण्यमदर्शितम् "राजयाजकयाज्यस्य विनश्यति यथा हविः" इति ब्राह्मणार्त्विज्ये हविर्विनाशः स्मृतः लिङ्गानि च दर्शितानि "ब्राह्मणानामिदंहविः"इत्येवमादीनि तस्माद्ब्राह्मणानामेवार्त्विज्यं भिक्षुर्मति शास्त्राभिमतम्. तस्मान्न राजन्यवैश्ययोर्याजनाध्यापनाधिकारः अश्वपतिकैकयप्रभृतीनां यद्वेदान्तोपदेष्टृत्वमवगतम् नतदध्यापनरूपं किन्तु सूतादीनामिव

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ब्रह्मस्वरूपतदुपासनाद्युपदेष्टृत्वरूपम्. अध्यापनंनाम स्वोच्चारणा-नूच्चारणाय शिष्योद्देशेन भागद्वयात्मकवेदराशेः साङ्गस्य स्वर-वर्णाद्यनपभ्रंशपूर्वकमुच्चारणम् तस्मात्प्रतिग्रह इत्यस्यायमर्थः । प्रतिग्रहग्रहणं याजनाध्यापनयोरप्युपलक्षणम्. ये ब्राह्मणानां याजनाध्यापनप्रतिग्रहरूपा वार्तारूपा धर्माः न ते राजन्यादेर्जी-विका धर्मा इति. का तर्हि राजन्यादेर्वृत्तिरित्याह—राज्ञ इति. तत्र राजन्यो द्विविधः प्रजापालनाधिकृतस्तदनाधिकृतश्चेति. आद्यस्य वृत्तिरनन्तरे द्वितीयस्य तु ऋतामृताभ्यामित्यनेन-वक्ष्यति प्रजागोप्तुः प्रजापालनाधिकृतस्य राज्ञो राजन्यस्याऽविप्रा-द्विप्रेतरात् करादिभिर्वृत्तिः स्वामिग्राह्यभागः करः तदादिभिरा-दिशब्देन दण्डशुल्कादिकं विवक्षितं वा शब्देन प्रजापालनानधि-कृतस्य तु वृत्त्यन्तरमेवेति सूचयति ॥ १४ ॥

अथ वैश्यस्याह—वैश्य इति । नित्यं ब्रह्मकुलं विप्रकुलमनुगच्छ-त्यनुवर्त्तते इति अनुगः तादृशस्सन् वार्त्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य स भवेत् । अथ शूद्रस्याऽवश्यकं धर्मं वृत्तिरूपंचाह—शूद्रस्येति । तत्र द्विजशुश्रूषा शूद्रस्यावश्यको धर्मः स्वामिनो वृत्तिश्च भवेत्स्वामिदत्तेनान्नादिना जीवनं भवेदित्यर्थः ॥ १५ ॥

एवं चतुर्णां वर्णानामावश्यकान् जीविकारूपांश्च धर्मानभिधा-याऽथतेषामेवोक्तवृत्त्यलाभे वृत्त्यन्तराणि विवक्षुस्तावद्ब्राह्मणस्य मुख्यानुकल्पभेदेन वृत्त्यन्तराण्याह—वार्त्तेति । विचित्रावार्त्ता कृषि-गोरक्षादिरूपा शालीनं धार्ष्ट्यं विनैव प्राप्तमयाचितमित्यर्थः।"शालीन कौपीने धृष्टा कार्ययोः" इति निपातितः शालीनशब्दः । इदं द्वितीयं यायावर्यं यायावरः प्रवासी तस्य कर्म यायावर्यं प्रवा-सादिना याच्ञापूर्वकमर्जनं तृतीयं शिलोञ्छनम् "उञ्छः कणश आ-दानं कणिशाद्यर्जनं शिलम्" तदुभयमेकीकृत्य चतुर्थं विप्रस्य वृत्तिरित्युक्तम् आसां चतसृणां वृत्तीनां पूर्वपूर्वापेक्षयोत्तरोत्तरा श्रेयसी ज्यायसी उत्तमेति यावत् । यद्यपि पूर्वं विप्रस्याध्ययना-दीनि षडन्यस्याप्रतिग्रह इति विप्रस्य प्रतिग्रहवृत्तेः कथि-तत्वात् अत्र शालीनं यायावर्यमिति च न कथनीयम्; तथापि स एव प्रतिग्रहो याच्ञापूर्वकस्तदपूर्वकश्चेति द्विविध इति वक्तुं शालीनं यायावर्यंचेत्युक्तम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रारब्धेहोपरमः विषयभोगेच्छानिवृत्तिः विषयविपर्ययेहेत्वा प्राणिनां स्वत एव निषिद्धकर्मचेष्टा ईहा तस्याः पर्यालोचनं मोक्षविपरीतप्रवृत्तिदर्शनं वा मौनं मन्त्रार्थचिन्तनं प्रलापवर्जनं वा आत्मविमर्शनमात्मविचारः ॥ ९ ॥

तेषु नृषु आप्तदेवताबुद्धिः परमात्माधिष्ठित इति ज्ञानम् सुतरामित्यनेन नृषु विशेषतः कर्तव्यमिति सूचयति—

"अहिंसा सत्यमस्तेयं शौचमिन्द्रियसंयमः।
दमः क्षमार्जवं दानं सर्वेषां धर्मसाधनम्" ॥

इति स्मृतत्वादेषां धर्माङ्गत्वं नतु धर्मत्वमिति ज्ञातव्यम् ॥ १० ॥

ननु, तर्हि कोऽयं धर्मो नामेत्याशङ्क्य सर्वसाधारणं धर्म-माह—श्रवणमिति । महतां या गतिः स्थितिस्तस्याः सेवा सत्कृतेः सेवेति वा दास्यात्मसमर्पणयोरेकार्थत्वात् कथं पृथ-ग्ग्रहणं कृतमित्याशङ्क्य—

अनाद्यनन्तकालेषु मुक्तौ संसार एव च ।
मयि स्थश्चोदयत्येको विष्णुर्मां सर्वदैव तु ॥
इति सम्प्रीतिकं ज्ञानं विद्यादात्मसमर्पणम् ।
बहिश्चेश्वरदासत्वं दास्यमित्युच्यते बुधैः ॥

इत्यनेन परिहरणीया, अनाद्यनन्तकालं मयि स्थित्वा विष्णुः सर्वत्र मां प्रेरयतीति प्रीतिपूर्वकज्ञानमात्मसमर्पणं प्रतिमादि-सन्निहितभगवद्दासत्वज्ञानं दास्यम् ॥ ११ ॥

तारतम्यज्ञानार्थं ब्रह्मादिविषयश्रवणादिरपि धर्मः स्यादतो विशिष्योच्यत इत्यत उक्तं पर इति, "एष मे सर्वधर्माणां धर्मो ऽधिकतमो मतः" इति वचनात्समुदाहृत इति समीचीनत्वं कुतो ऽत्राह—त्रिशल्लक्षणेति । अनन्तलक्षणस्य हरेस्त्रिंशल्लक्षणयुक्तत्वं "तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे" इति वचनाद् भक्त-प्रकाश्याकारविषयविवक्षया "सप्तपादश्चतुर्हस्तः" इत्यादिवाक्येषु पुरुषलक्षणस्य निरूपितत्वात् इदं च भक्तिप्रबन्धाय प्रोक्तमिति ज्ञायते अनेन भगवत्तोषकरो धर्मो नान्य इत्युक्तं भवति ॥ १२ ॥

एवं धर्मस्वरूपं निरूप्य तदधिकारिणं निरूपयति—संस्कारा इति । निषेकादिश्मशानान्ता ये संस्कारास्ते यस्याविच्छिन्ना अखण्डिताः स द्विजः स एवाधिकार्यत्रेति शेषः । अविच्छेदत्वेन कर्तव्यत्वे कोहेतुरिति तत्राह—वैदिकेति । वेदप्रतिपाद्यत्वेन प्रामाणिकत्वेन कर्तव्या इत्यर्थः । नन्विदं द्विजमात्रसा-मान्यं किमित्याह—आद्य इति स्त्रीणां ब्राह्मणजातित्वेपि मन्त्रेण क्रिया एता इति वदतः शिष्टाचारत्वेन संगृहीतत्वात् इदं वैदिकत्वेपि कर्तव्यत्वं ननु स्त्रीणां वैदिकसंस्काराभावे यागा-नधिकारित्वमित्यस्यैवमेवोत्तरं वैदिकादय इति वैदिका अवैदि-काश्च सन्तीत्यर्थः तदुक्तम्—

"निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ।
गर्भाधानमृतौ पुंसवनं च स्पन्दनात्पुरा ॥
षष्ठेऽष्टमे वा सीमन्तो मासतो जातकर्म च ।
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः ॥
षष्ठेऽन्नप्राशनं मासे चूडा कार्या यथाकुलम् ।
एवमेनः शमं याति बीजगर्भसमुद्भवम् ॥
तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः ।

इत्यादि—

तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति ।
या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपं ॥
उपोपमे परामृश मा मे दभ्राणि मन्यथाः ।
सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥

इत्यादि संस्कारमन्त्राः ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चत्वारः वर्णास्तेषां आद्यास्त्रयो द्विजाः तेषां साधारणं धर्ममाह इज्येति "ब्राह्मणक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः" इति स्मृतेः "इज्या ध्ययनदानानि विप्रस्य क्षत्रियस्य च" इत्यादेः एतान्यपि द्विज-मात्रस्य न किन्तु विशिष्टानामित्याशयेनाह—जन्मेति । जन्मना

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कर्मणा वा ऽवदातानां "कारीर्या यजेत वृष्टिकामः, मद्यब्राह्मणा न सम्वदेत्" इत्यादिवेदोदिताः क्रियाश्च विहिता इत्याह, क्रिया इति ॥ १३ ॥

विशेषधर्ममाह—विप्रस्येति। अध्यापनयाजनप्रतिग्रहाः ततो ब्राह्मणादन्यस्य क्षत्रियादेरप्रतिग्रहः "प्रतिग्रहाधिको विप्रो याजनाध्यापने तथा" इति वचनात् प्रतिग्रहादिनापि प्रवृत्तिमभिप्रेत्य राजादिवृत्तिमाह—राज्ञ इति। आदिशब्देन न्यायतो वयडाद्यागतं धनं गृह्यते प्रजागोप्तुरित्यनेन प्रजागुप्त्यैव ततो धनमाहर्तव्यम् अन्यथा दुष्कृतमेवादत्त इति सूचयति, वाशब्देन देवा गृह्यन्ते देवविप्रैर्विनेत्यर्थः वयडार्हविप्रमन्तरेण चेति॥१४॥

वार्ता कृषिगोरक्षवाणिज्यलक्षणा स्वामिनः सकाशाज्जीवनं चेति शेषः। भृत्यानां स्वामिनः शुश्रूषा च वृत्तिरिति वा ॥ १५॥

विप्रवृत्तिं कथंचित्याह—वार्तेति। अत्र वार्तादिकमापदीति ग्राह्यं विप्राऽनुज्ञया क्षत्रियवैश्ययोस्तत्वविज्ञापनं धर्म इत्युच्यते ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

संस्कारा इत्यर्थकम्. ननु, शूद्रस्यापि तेषु संस्कारेषु कृतेषु द्विजत्वं स्यात्तत्राह—अजो यं सृष्ट्वा द्विजं जगाद द्विजत्वेन निर्दिदेश तज्जातिक एव संस्कारेषु लब्धेषु द्विजः स्यादित्यर्थः ॥ १३ ॥

अविप्राद्वेति वा शब्दात् कश्चिद्विप्रादपीत्यर्थः। वपनं द्रविणादानमित्यादेः ॥ १४ ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

समदृशां महतां सेवा विपर्ययेहा निष्फलक्रियास्तासां पर्यालोचनं मौनं वृथा वाक्यनिवृत्तिः आत्मविमर्शनमात्मनो देहभिन्नत्वभावना ॥ ९ ॥

अन्नाद्यादेः अन्नमोदनं आद्यं मोदकादि तत्तदादेर्वस्त्रस्रक्चन्दनादेर्यथोचितं विभज्यैव ग्रहणम् आत्मवत् देवतावच्च बुद्धि-, र्भावना ॥ १०—१२ ॥

इदानीं वर्णधर्मान् वक्तुं द्विजानां लक्षणमाह-संस्कारा मन्त्रवन्तो गर्भाधानादयो यस्मिन् स वा स द्विजः विच्छिन्नसंस्कारो द्विजबन्धुरित्यर्थः। अजो ब्रह्मा यं जगादेति ब्रह्मसृष्ट्यारम्भत एव प्रवृत्तायां द्विजजातौ विशुद्धमातापितृकं जन्मैव मुख्यं लक्षणमित्यर्थः ॥ १३ ॥

ब्राह्मणादीनां चतुर्णां वृत्तिरूपान् धर्मानाह-विप्रस्येति सार्द्धैः सप्तभिः। षट् विहितानीत्यनुषङ्गः। तत्र त्वध्यापनं याजनं प्रतिग्रहश्च जीविका। तथा च मनुः—

"षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥ इति

अन्यस्य क्षत्रियस्य अप्रतिग्रह इति याजनाध्यापने आपद्वृत्ती प्रतिग्रहस्तस्यापद्यपि निषिद्धः प्रजागोप्तुरिति पाल्यमानाभिः प्रजाभिर्दत्तं प्रत्यग्युपायनमेव वृत्तिरित्यर्थः। विप्रभिन्नात् लोकात् करदण्डशुल्कादिभिर्वा ॥ १४ ॥

वार्ता कृषिवाणिज्यादयो वृत्तिर्यस्य सः द्विजशुश्रूषा धर्मः स्वामिनो द्विजस्य शुश्रूषा सेवा वृत्तिश्च ॥ १५ ॥

विप्रस्य वृत्त्यन्तराण्याह—वार्ता विचित्रा विविधा तत्र शालीनमयाचितं यायावरं प्रत्यहं धान्यमात्रयाच्ञा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानं उञ्छनं आपणादिपतितकणोपादानम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः :

सन्तोषो न्यायागतेनान्नादिना ऽलंबुद्धिः प्राप्तेहोपरमः अधार्मिकजनचेष्टात्यागः विपर्ययेहया विपरीतफलासु चेष्टासु देवर्शः मौनं निष्फलभाषणत्यागः आत्मविमर्शनं देहेन्द्रियमनोबुद्धिभ्यः पृथग्भूतस्यात्मनो ऽनुसन्धानम् ॥ ९ ॥

तेषु भूतेषु आत्मवत् मानार्हत्वात् देवतावत्भगवद्वत् भगवदंशत्वात् बुद्धिर्भावना ॥ १० ॥

अस्य श्रीकृष्णस्य सेवा परिचर्या इज्याऽर्चनम् ॥ ११ ॥

नृणामित्युपलक्षणं तत्फलत्रयस्यापि त्रिंशल्लक्षणवान् सत्यत्वादित्रिंशद्विभागवान् येन सर्वात्मा भगवान् तुष्टो भवति ॥१२॥

इदानीं वर्णधर्मान् वक्तुं द्विजलक्षणमाह—यमजो ब्रह्मा गायत्र्यादिना सृष्ट्वा जगाद द्विजकुलत्वेनोक्तवान् यत्रैव गर्भाधानादयः संस्काराः अविच्छिन्नाः स द्विजः ब्रह्मप्रवर्तितकुलजः संस्कारवान् द्विज इत्यर्थः। "गा… त्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं जगत्या वैश्यं न केन… शूद्रम्" इति श्रुतिरत्रानुसन्धेया शूद्रकुलं मंत्रपूर्वकं ब्रह्मणानप्रवर्तितमत एव शूद्रस्य द्विजातिसंस्काराभावाच्च द्विजत्वं "विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा" "न केनचित् समसृजच्छन्दसा तं प्रजापतिः" इति श्रुतिः द्विजावश्यकान् धर्मानाह—इज्येति। जन्मना ब्रह्मप्रवर्तितकुलोत्पत्त्या कर्मणा संस्कारेण चावदातानां शुद्धानाम् आश्रमचोदिताः ब्रह्मचर्याद्याश्रमविहिताः ॥ १३ ॥

चतुर्णां वर्णानामावश्यकान् जीविकारूपांश्च धर्मानाह—विप्रस्येति, सार्द्धैः सप्तभिः। अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहाः इत्यध्ययनादीनि षट् कर्माणि विप्रस्य, तत्राध्यापनयाजनप्रतिग्रहाश्च जीविकाः

"षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविकाः।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥ इति.

मनुवचनात् अन्यस्य क्षत्रियस्य अप्रतिग्रहः प्रतिग्रहाभावः अर्थात्प्रतिग्रहातिरिक्तानि अध्ययनाध्यापनयजनयाजनदानानीत्यर्थः ॥ १४ ॥

जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ।
ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥ १७ ॥
ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ।
सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथञ्चन ॥ १८ ॥
ऋतमुञ्छशिलं प्रोक्तममृतं यदयाचितम् ।
मृतं तु नित्ययाच्ञा स्यात्प्रमृतं कर्षणं स्मृतम् ॥ १९ ॥
सत्याऽनृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ।
वर्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सिताम् ।
सर्ववेदमयो विप्रः सर्वदेवमयो नृपः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृषिवाणिज्यादिरूपा वार्त्ता वृत्तिर्यस्य सः शूद्रस्य द्विजशुश्रूषा आवश्यको धर्म इत्यर्थः । स्वामिना भक्ताद्विदानेन निवर्तकैंकर्यंकारयितुस्तु द्विजस्य शुश्रूषा वृत्तिर्जीविका भवेदित्यर्थः ॥१५॥

विप्रस्य जीविकान्तरमाह—वार्त्तेति । विचित्रा वार्त्ता कृष्यादिरूपा शालीनमयाचितग्रहणम् यायावरं भिक्षाटनम् शिलोञ्छं चेति चतुर्धा ॥ १६ ॥

भाषा टीका ।

सन्तोष, समदर्शियों की सेवा, धीरे धीरे प्राकृत चेष्टाओं से विराम, मनुष्यों की लौकिक चेष्टाओं को निष्फल देखना, मौन और आत्मा का विचार ॥ ९ ॥

हे पाण्डव ! और यथा योग्य प्राणी मात्र को अन्नादिका अच्छी तरह विभाग करना उन अतिथि प्रभृति प्राणियों में और मनुष्यों में निरन्तर देवत बुद्धि करना ॥ १० ॥

आपने दैवत श्रीहरिके गुणोंका श्रवण और कीर्तन तथा महज्जनों के प्राप्य श्रीगोविन्दकी सेवा पूजा साष्टांगप्रणाम, दास भाव सख्य भाव, और आत्मसमर्पण, अर्थात् पञ्चरात्र शास्त्रोक्त भगवत्-शरणागतिः ॥ ११ ॥

हे राजन् ! यह सर्व मनुष्यों का साधारण तीस (३०) लक्षण वाला धर्म कहा गया है सर्वात्मा श्रीमन्नारायण इसी के आचारण से सन्तुष्ट होते है ॥ १२ ॥

और अविच्छिन्न अर्थात् परम्परासे संस्कार गर्भाधानादि निरन्तर जिनके यहां चले आते हैं और ये संस्कार ब्रह्माने जिस द्विजके कहे हैं वेही द्विजहै । और द्विजन्मामों को अर्थात् ब्राह्मण क्षत्रिय और वैश्यको जोकि जन्मकर्म से शुद्ध हैं उनको इज्या (यज्ञ करना) अध्ययन (वेदपढना) दान (दान देना) यह तीन कर्म वेद विहित हैं, और आश्रम के उचित जो किया है वो भी विहित हैं ॥ १३ ॥

और ब्राह्मण को अध्ययनादिक छै (६) कर्म विहित हैं, वो छै ये हैं कि (यजन याजन अध्ययन अध्यापन, दान प्रतिग्रह) ब्राह्मण से अन्य को प्रतिग्रह (दानलेना) निषिद्ध है प्रजापालक राजा की जीविका यह है कि विप्र को छोडकर और लोगों से षष्ठांश कर लेवे ॥ १४ ॥

वैश्य की जीविका वार्त्ता (खेती, गोरक्षा, व्यापार, ब्याज) है । और सदा ब्राह्मण कुलके अनुगामी रहना यह वैश्य का धर्म है शूद्र को तीन वर्णों की शुश्रूषा करके जीविका करना यही शूद्र का धर्म है ॥ १५ ॥

खेती, १ ढिठाईके विना, बिना मांगे मिलजावे; २ प्रतिदिन अन्न की भिक्षा, ३ (शिल) खेत में शिला बीनले, ऊंछ बाजार में दाना बीनले, ४ बस यह चार प्रकार की वृत्ति ब्राह्मण की हैं, इसमें उत्तरोत्तर श्रेष्ठ हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृत्तिष्वेव व्यवस्थां दर्शयन्नापद्वृत्तीराह—जघन्यो नीचः उत्तमामध्यापनादिरूपां ऋते राजन्यं क्षत्रियस्तु प्रतिग्रहादिरूपां भजेत् ॥ १७ ॥

चतुर्विधां पूर्वोक्तां विप्रवृत्तिमितरेषामपि दर्शयन्नाह—ऋतामृताभ्यामिति ॥ १८ ॥

श्लोकं व्याचष्टे ऋतमिति ॥ १९ ॥

तयोस्तद्वर्जने हेतुमाह—सर्ववेदमय इति ॥ २० ॥

शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् ।
ज्ञानं दया ऽच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ॥ २१ ॥
शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ।
ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम् ॥ २२ ॥
देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणम् ।
आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणम् ॥ २३ ॥
शूद्रस्य सन्नतिः शौचं सेवा स्वामिन्यमायया ।
अमन्त्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वर्णानामभिव्यञ्जकरूपान्धर्मानाह–शम इति, चतुर्भिः । अच्युतात्मत्वं श्रीविष्णुपरत्वम् ॥ २१ ॥

शौर्यं युद्धोत्साहः वीर्यं प्रभावः तेजःप्रागल्भ्यम् त्यागो दानं आत्मनो मनसो जयः ॥ २२ ॥ २३ ॥

अमन्त्रयज्ञः नमस्कारेणैव पञ्चयज्ञानुष्ठानं तथाच याज्ञवल्क्यः "नमस्कारेण मन्त्रेण पञ्चयज्ञान्नहापयेत्"इति ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं विप्रस्य याजनाद्यलाभे वार्तादिरूपा वृत्तिस्तत्राप्युत्तरोत्तरोत्तमत्वं चोक्तम् अथोत्तरोत्तरवर्णस्य स्वस्ववृत्त्यलाभरूपापदि पूर्वपूर्ववर्णस्य चोत्तरोत्तरस्य वा वृत्त्याश्रयणं वक्तुं तावदनापदि तदाश्रयणं निषेधति—जघन्य इति । जघन्यवर्णो नरः अनापदि स्वस्ववृत्त्यलाभरूपापदभावे उत्तमां पूर्वपूर्ववर्णसम्बन्धिनीं वृत्तिं न भजेन्नाश्रयेत् आपत्सु तु राजन्यं विना राजन्यव्यतिरिक्तानां सर्वेषामपि यथालाभं सर्वा अपि वृत्तय आश्रयणीया भवन्ति सर्वेषां सर्वेति इत्येतावदुक्तं राजन्यस्य प्रजापालनप्रयुक्तकरादानरूपस्ववृत्त्यलाभरूपापदि याजनाध्यापनप्रतिग्रहादिरूपपूर्ववर्णवृत्त्याश्रयणं वार्ताशुश्रूषयोरुत्तरवर्णवृत्त्योराश्रयणं प्रसक्तमृतेराजन्यमिति निषिध्यते ॥ १७ ॥

अथ विप्रराजन्ययोः स्वस्ववृत्त्यलाभरूपापद्युपादेयां वृत्तिं निष्कृष्य दर्शयन्नुत्तरोत्तरवर्णसेवारूपां वृत्तिं प्रतिषेधति–ऋता मृताभ्यामिति । ऋताद्यन्यतमेन जीवेत श्ववृत्त्या तु कथञ्चन न जीवेत सर्वथा श्ववृत्तिं नाश्रयेदित्यर्थः ॥ १८ ॥

ऋतादिपदार्थानाह—सार्द्धेन ऋतमिति । स्पष्टोऽर्थः ॥ १९ ॥

न कथञ्चनेति व्याचष्टे—वर्जयेदिति । विप्रो राजन्यश्च तां नीचसेवां स्वोत्तरवर्णसेवां जुगुप्सितां निन्दितां परिवर्जयेत् जुगुप्सितत्वमेव वदन्विप्रराजन्यौ विशिनष्टि—सर्ववेदमय इति । प्राचुर्ये मयट् पूज्ययोः पूजकसेवानिन्दितेति भावः ॥ २० ॥

अथ वर्णानामभिव्यञ्जकान् धर्मानाह–शम इति चतुर्भिः । शमादिपदार्थानामर्थोऽष्टादशलक्षणधर्मव्याख्यायामुक्ताः । तत्र क्षान्तिः क्रोधः अच्युतात्मत्वमच्युतप्रवणचित्तत्वम् । शमादिकं ब्रह्मलक्षणं ब्राह्मणकुलाभिव्यञ्जकमित्यर्थः ॥ २१ ॥

शौर्यमिति । शौर्यादिक्षत्रलक्षणं क्षत्रियत्वाभिव्यञ्जकं तत्र शौर्यं स्वगृह इव युद्धे प्रवेशसामर्थ्यं वीर्यं परैरनभिभाव्यत्वं धृतिः धैर्यमापद्यदुःखित्वं तेजः पराभिभवसामर्थ्यं त्यागः स्वोपरादित्सदानशीलता आत्मजयो देहजयः देहधर्मैरनभिभाव्यत्वं क्षमा सहिष्णुता ब्रह्मण्यता ब्राह्मणकुलानुवृत्तिः प्रसादोऽनुग्रहः रक्षा प्रजापालनम् ॥ २२ ॥

एवं देवादिभक्त्यादिकं वैश्यलक्षणं तत्र देवगुर्वच्युतेभक्तिः देवाश्च गुरवश्चाचार्या ज्ञानवृद्धा गावश्चैषां भक्तिः त्रिवर्गस्य धर्मादिपुरुषार्थत्रयस्य परितोषणं परितुष्टिः अस्ति परलोक इति मतिर्यस्य सः आस्तिकस्तस्य भाव आस्तिक्यं नित्यमुद्यमः अर्थार्जने प्रयत्नः तत्र नैपुण्यम् ॥ २३ ॥

शूद्रस्य सन्नत्यादिकं लक्षणमित्यनुषङ्गः । सन्नतिः पूर्ववर्णविषये नम्रता. शौचं स्नानादिजं स्वस्वामिन्यमायया निष्कपटभावेन सेवा. अमन्त्रयज्ञः नमस्कारेणैव यज्ञानुष्ठानम्. तथाच याज्ञवल्क्यः "नमस्कारेण मन्त्रेण पञ्च यज्ञान्नहापयेत्" इति. अस्तेयमचौर्यं सत्यमनृतावदनं गवां विप्राणाञ्च रक्षणम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदभावे शूद्रस्य कथमिति तत्राह—जघन्य इति । जघन्यो नरः शूद्रोऽनापदि तत्सद्भावे उत्तमां वृत्तिं तत्त्वज्ञानलक्षणां न भजेत कुर्यादित्यन्वयः । आपदि तदभावे तदनुज्ञया कुर्यादित्यतो नापदीति विशेषणं पालनादि वृत्तिं वा । ननु, वर्णहीनस्य कथमित्यस्येदमेवोत्तरं जघन्यो वर्णहीनो नापद्यप्युत्तमां वृत्तिं न भजेत "वर्णोच्चकेषु वर्णास्तु न ज्ञानी स्यात् कथञ्चन" इति श्रुतिः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

राजन्यं विना सर्वेषां विप्रादीनामापद्युक्तसर्ववृत्तिभिर्जीवने दोषो नास्तीत्याह—ऋतेन राजन्यमिति ॥ १७ ॥

ऋतादीनामप्रतीतार्थत्वाद्व्याचष्टे—ऋतमित्यादिना । कर्षणम् कृषिः ॥ १८ ॥ १९ ॥

श्ववृत्तिवर्जनेहेतुमाह–सर्वेति । "सर्वा देवता वेदविदि ब्राह्मणे वसन्ति" इति श्रुतेः नाविष्णुः पृथिवीपतिरित्यादेश्च ॥ २० ॥

विप्रादीनां विविच्य ज्ञाने प्रथमं लक्षणमाह—शम इत्यादिना । अच्युतात्मत्वमच्युतमनस्कत्वम् ॥ २१ ॥

त्यागो दातव्ये मुक्तहस्तता आत्मजयो मनोजयः ॥ २२ ॥

त्रिवर्गैर्धर्मार्थकामैः ईश्वरपरितोषणं त्रयो वर्गा येषां ते त्रिवर्गाः तेषां द्रव्यादिना परितोषणम् ॥ २३ ॥

शूद्रस्यांततः सकृत्स्पृष्टाभिरद्भिराचमनलक्षणं शौचं "हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः । शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः" इति वचनात् कण्ठमश्रुनलाद्यधारणं मौक्येन ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आपद्वृत्तीराह—जघन्यो नीचः उत्तमां अध्ययनादिरूपां ऋते राजन्यं क्षत्रियस्तु प्रतिग्रहादन्यां भजेत् ॥ १७ ॥

विप्रवृत्तीर्वैश्यवृत्तीश्च काश्चित् सर्वेषामप्यापद्यनुजानीते ऋतामृताभ्यामिति ॥ १८ ॥

श्लोकमिमं व्याचष्टे ऋतमिति सार्द्धेन ॥ १९ ॥

तयोस्तद्वर्जने हेतुमाह—सर्वेति । तेन वैश्यशूद्रयोः नीचसेवयाप्यापदि न तावान् दोष इति भावः ॥ २० ॥

वर्णानामभिव्यंजकानि लक्षणान्याह–शम इति चतुर्भिः । अच्युतात्मत्वं विष्णुमनस्कत्वम् ॥ २१—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जघन्यः कनिष्ठवर्णः उत्तमां श्रेष्ठवर्णोचितामनापदि न भजेत् ऋते राजन्यं स तु अनापद्यपि उत्तमामपि याजनरूपामध्यापनरूपां च भजतीत्यर्थः आपत्सु तु यथोक्तवृत्त्यलाभे सर्वेषां सर्वशो वृत्तयः ॥ १७ ॥

पूर्वोक्ताश्चतुर्विधा विप्रवृत्तयो ऽन्यैरपि ग्राह्याः श्वापेक्षया नीचसेवा तु न कर्त्तव्या विप्रराजन्याभ्यां तु विशेषतो नीचसेवा वर्ज्येत्याह–ऋतामृताभ्यामित्यादि सार्द्धैस्त्रिभिः ॥१८—२०॥

वर्णानां लक्षणान्याह शम इति चतुर्भिः । अच्युतात्मत्वं विष्णुमनस्कत्वम् ॥ २१ ॥

शौर्यं न्यायप्राप्तयुद्धोत्साहः वीर्यं प्रभावः तेजःप्रागल्भ्यम् त्यागः उदारत्वम् आत्मजयो जितमनस्कत्वम् प्रसादः प्रसन्नता ॥ २२ ॥

आस्तिक्यं श्रद्धा उद्यमो ऽनालस्यम् ॥ २३ ॥

शूद्रस्य सन्नत्यादिकम् लक्षणमिति शेषः अमायया निष्कापट्येन अमन्त्रयज्ञः नमस्कारेण पञ्चयज्ञानुष्ठानम् तथाच याज्ञवल्क्यः "नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत्" इति ॥ २४ ॥

भाषा टीका ।

नीचवर्ण ऊंचे वर्ण की वृत्तिको अनापत्काल में न करे एक क्षत्रिय को छोड़कर अध्ययनादिमात्र ब्राह्मण की वृत्ति करले, आपद के विनादूसरेकी वृत्ति न करे वह तात्पर्य है सो आपदमेंभी श्वह को छोड़कर सब कोई सब की वृत्ति करे ॥ १७ ॥

ऋत अमृत मृत प्रमृत इन चारो से अपना जीवन करे अथवा सत्याऽनृत से जीवे परञ्च श्ववृत्ति से कदापि जीवन न करे ॥ १८ ॥

ऋत, यह उंछ शिल का नाम है । अमृत, वह विना मांगे जो मिले उसकानाम है । मृत, वह नित्य भीख मांगे से जो प्रमृत, यह खेती से प्राप्त किये का नाम है ॥ १९ ॥

सत्या नृत, वह वाणिज्य का नाम है । श्ववृत्ति, वह नीच सेवा का नाम है। ब्राह्मण और क्षत्रिय इस निन्दित वृत्ति को सर्वदा वर्जन करे क्योंकि ? वि सर्वदेव मय है, और राजा सर्व देव मय है ॥ २० ॥

शम, दम, तप, शौच, संन्तोष, शान्ति, (सीधापन) ज्ञान, दया, और गोविन्द में चित्त लगाना, सत्य बोलना, ये ब्राह्मण के लक्षण हैं ॥ २१ ॥

शूरता, वीरता, धृति, तेज, त्याग, मनका जीतना, क्षमा ब्राह्मणोंकी भक्ति, प्रसन्नता, और सर्व वर्ण कीरक्षा या क्षत्रिय का लक्षण हैं ॥ २२ ॥

देव गुरु गोविन्द में भक्ति, अर्थ धर्म काम की पुष्टि आस्तिक होना, नित्य उद्यम करना, और निपुणता यह वैश्य का लक्षण हैं, ॥ २३ ॥

नम्ररहना, शुद्ध रहना, निष्कपट स्वामिकी सेवा करना विना मंत्र के यज्ञ करना चोरी न करना सत्य बोलना, गो विप्र की रक्षा करना ये शूद्रके लक्षण हैं ॥ २४ ॥

स्त्रीणां च पतिदेवानां तच्छुश्रूषाऽनुकूलता ।
तद्बन्धुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणम् ॥ २५ ॥
सम्मार्जनोपलेपाभ्यां गृहमण्डनवर्त्तनैः ।
स्वयं च मण्डिता नित्यं परिमृष्टपरिच्छदा ॥ २६ ॥
कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च ।
वाक्यैः सत्यैः प्रियैः प्रेम्णा कालेकाले भजेत् पतिम् ॥ २७ ॥
सन्तुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ।
अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ॥ २८ ॥
या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा ।
हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥ २९ ॥
वृत्तिः सङ्करजातीनां तत्तत्कुलकृता भवेत् ।
अचौराणामपापानामन्त्यजान्तेऽवसायिनाम् ॥ ३० ॥
प्रायः स्वभावविहितो नृणां धर्मो युगेयुगे ।
वेददृग्भिः स्मृतो राजन् ! प्रेत्य चेह च शर्मकृत् ॥ ३१ ॥
वृत्त्या स्वभावकृतया वर्त्तमानः स्वकर्मकृत् ।
हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्त्रीधर्मानाह—स्त्रीणामिति, पञ्चभिः । पतिरेव देवो यासाम् तस्य पत्युरेव शुश्रूषा पादसंवाहनादिभिः तदनुकूलता च हिताचरणं तस्य यद्व्रतं नियमस्तस्य धारणमाचरणं एतच्चतुष्टयं पतिव्रतानां लक्षणं धर्मश्च ॥ २५ ॥

किञ्च सम्मार्जनोपलेपाभ्यामित्यादेः पतिं भजेदित्युत्तरेणान्वयः परिमृष्टा उद्वर्तनादिना निर्मलीकृताः परिच्छदा गृहोपकरणानि यया ॥ २६ ॥ २७ ॥

किञ्च सन्तुष्टा यथालाभेन तावन्मात्रभोगे ऽप्यलोलुपा दक्षा अनलसा प्रिया सत्या च वाग्यस्याः सर्वत्राप्यप्रमत्ता ऽवहिता अपतितं महापातकशून्यम्, यथाह, याज्ञवल्क्यः "आशुद्धेः सम्प्रतीक्ष्यो हि महापातकदूषितः" इति ॥ २८ ॥

. तत्परा सती भजेत् श्रीर्हरिमिव हर्यात्मना पत्या सह ॥ २९ ॥

प्रतिलोमजानुलोमजानां वृत्तिमाह—वृत्तिरिति । तत्तत्कुलकृता कुलपरम्पराप्राप्ता परम्पराप्राप्तमपि चौर्यं हिंसादिकं च प्रतिषेधति, अचौराणामपापानां चेति तत्तत्प्रदर्शनार्थं कांश्चित्प्रतिलोमजविशेषानाह—अन्त्यजेति "रजकश्चर्मकारश्च नटो बुरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" अन्तेऽवसायिनस्तु चण्डालपुल्कसमातङ्गाद्यः तेषां परम्पराप्राप्तैव अन्यनियोजनादिवृत्तिरित्यर्थः ॥ ३० ॥

श्रेष्ठादपि परधर्मात् नीचोऽपि स्वधर्म एव श्रेयानित्याह-प्राय इति, स्वभावेन सत्त्वादिप्रकृत्या विहितो धर्मः शर्मकृत्सुखहेतुः स्मृतः कैः वेदा एव दृक् चक्षुर्येषां तैः भगवता चोक्तम् "श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्" इति ॥ ३१ ॥

ननु, स्वभावविकस्य कर्मणो बन्धहेतुत्वात्कथं सुखहेतुत्वं तत्राऽऽह—वृत्त्येति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ स्त्रीणां धर्मानाह—स्त्रीणामिति । पतिरेव देवो दैवतं यासां तासां स्त्रीणाम्. तस्य पत्युः शुश्रूषा परिचर्या तदनुकूलता च तस्य पत्युर्बन्धुषु पितृभ्रात्रादिषु अनुवृत्तिः तस्य तु यद्व्रतं पत्यर्थे यो नियमस्तस्य धारणमेतच्चतुष्टयं पतिदेवतानां पतिव्रतानां स्त्रीणां लक्षणं धर्मश्चेत्यर्थः ॥ २५ ॥

किञ्च संमार्जनोपलेपाभ्यां गृहस्येति शेषः । गृहसंमार्जनादिभिः पतिं भजेदित्युत्तरेणान्वयः । लेपः जलविक्षेपः मण्डनं विचित्रालङ्कारः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वर्तेत नित्यं स्वगृह एवावस्थानम् पतेः कथंभूता स्वयं मण्डिता अलंकृता परिमृष्टाः विशोधिताः परिच्छदाः पात्रवस्त्राभूषणादयो यया तादृशी ॥ २६ ॥

उच्चावचैर्नानाविधैः पत्युरपेक्षितैः कामैः प्रश्रयेण विनयेन दमेन उपशान्त्या सत्यैः प्रियैश्च वाक्यैः प्रेम्णा च कालेकाले उचितसमये उचितकामेषु सन्तुष्टा यथालाभेन तावन्मात्रभोगेऽप्यलोलुपा दक्षाऽनलसा धर्मज्ञा भर्तृशुश्रूषणमेव परं धर्मं जानातीति प्रिया तथोक्ता सत्या च वाग्यस्याः सा वाक्यैः सत्यैरिति पतिविषये सत्यवाक्यमुक्तम् प्रियसत्यवागित्यनेन तदितरविषयेऽपीत्यतो न पौनरुक्त्यम् ॥ २७ ॥

सर्वत्राप्यप्रमत्ता अवहिता शुचिः परिशुद्धा स्निग्धा अनुरक्ता पतिं भजेदपतितं महापातकरहितं पतिं भजेत् तु शब्देन पतितं न भजेदिति सूचितम्. यदाह, याज्ञवल्क्यः "आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः" इति ॥ २८ ॥

एवंविधस्य भर्तृभजनस्य फलमाह-येति । श्रीर्लक्ष्मीर्हरिमिव या स्त्री हरिभावेन तत्परा स पतिरेव परो दैवतं यस्याः सा पतिं भजेत् सा हर्यात्मना हरिरूपेण हरिसमानरूपेण पत्यासह श्रीर्हरिणा सहैव हरेर्लोके मोदते शनैः पत्या सह मुक्ता भवेदित्यर्थः ॥ २९ ॥

अथ सङ्करजातीनां वृत्तिमाह-वृत्तिरिति । सङ्करजातयः प्रतिलोमजाः अनुलोमजाश्चेति द्विविधाः तत्रोत्तरवर्णात्पूर्ववर्णायां स्त्रियां जाताः प्रतिलोमजाः पूर्ववर्णादुत्तरवर्णायां जातास्त्वनुलोमजाः तेषां तत्कुलकृता कुलपरम्पराप्राप्तैव वृत्तिर्भवेदिति. कुलक्रमागतमपि चौर्यहिंसादिकं निषेधन् तान्विशिनष्टि-अचोराणामपापानाञ्चेति । तत्र प्रदर्शनार्थं कांश्चित्प्रतिलोमजविशेषानाह-अन्त्यजाश्चान्तेवसायिनश्च तेषां सङ्करजातीनामित्यन्वयः तत्र—

"रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजातयः" ॥

अन्तेऽवसायिनस्तु चण्डालपुल्कसमातङ्गादयः तेषां परम्पराप्राप्तैव वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ॥ ३० ॥

"श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्" इति भगवदुक्तमर्थमाह-प्रायइति, द्वाभ्याम् । हे राजन् ! नृणां ब्रह्मचर्यादिरूपेणावस्थितानां सर्वेषामपि प्रायशः स्वभावविहितः सात्त्विकादिस्वभावानुसारेण विहितः । यद्वा भावः प्रकारः वर्णाश्रमादिरूपः स्वस्ववर्णाश्रमोद्देशेन विहित इत्यर्थः । इज्याऽध्ययनादिरूपः स एव धर्म इह लोके प्रेत्याऽमुत्र च लोके शर्मकृत् सुखकृद्वेददृग्भिर्मन्वादिभिः स्मृतः कथितः ॥ ३१ ॥

एवं वृत्तिरपि प्रातिस्विकीज्यायसीति वदन्नेवंवर्तमानस्य फलमाह-वृत्त्येति. स्वभावकृतया वर्णाश्रमादिस्वभावकृतया वृत्त्या अध्यापनादिरूपया जीविकया स्वकर्मण्यिज्यादिरूपे वर्तमानः स्वस्वकर्मानुतिष्ठन् स्वभावजं सात्त्विकादिस्वभावप्रयुक्तं प्राकृतसत्त्वादिगुणाश्रयताप्रयुक्तं बन्धकं पुण्यपापात्मकं कर्म हित्वा "धर्मेण पापमपनुदत्यविद्यया मृत्युं तीर्त्वा" इत्यादि श्रुत्यर्थोऽत्राभिसंहितः शनैर्निर्गुणतां सत्त्वादिगुणराहित्यं प्रकृतिसम्बन्धराहित्यं मुक्तिमितियावत् इयात् प्राप्नुयादिति शनैरित्यस्य भगवदुपासननिर्वृत्तिद्वारा प्राप्नुयादित्याशयः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्त्रीणां सामान्यलक्षणमाह-स्त्रीणामिति । अनुकूलतोककारित्वं "यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्धते । स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियः" इति वचनात् तद्बन्धुषु भर्तृबन्धुषु भागिनेयादिषु तद्व्रतधारणं पातिव्रत्यं तस्य यद्व्रतं तदेवास्या व्रतमिति वा ॥२५॥

गृहमण्डनवर्तनैर्गृहालङ्कारकरणैः ॥ २६ ॥

कामैर्विषयैः ॥ २७ ॥

अलोलुपा भयोग्याऽभिलाषरहिता अपतितं ब्रह्महत्यादिपातकरहितम् ॥ २८ ॥

अस्मिन् पत्यौ हरिः सन्निहित इति या बुद्धिः स हरिभावः "हरिरस्मिन् स्थित इति स्त्रीणां भर्तरि भावना । शिष्याणाञ्च गुरौ नित्यं शूद्राणां ब्राह्मणादिषु ॥ भृत्यानां स्वामिनि तथा हरिभाव इतीरितः" इतिवचनात्तयोरैक्यार्थः हर्यात्मना हरेर्विशेषसन्निधानवता पत्या सह ॥ २९ ॥

क्षत्रियाद्विप्रस्त्रीसुतानां विप्रात् क्षत्रियस्त्रीजातानां क्षत्रियाद्वैश्यस्त्रीसुतानां वैश्याच्छूद्रस्त्रीसुतानामित्येवं जातानां का वृत्तिरिति तत्राह,येषां जातिविशेषाः अम्बष्ठनिषादपारशवादिनाम्ना ज्ञातव्याः तदुक्तं विप्रान्मूर्धावसिक्तास्त्री राज्ञोऽम्बष्ठविशोऽङ्गना"इत्यादि अध्ययनमन्तरेणाम्बष्ठादीनां संस्कारादिकं तत्कुलानुकूल्येन तेषां गुणमाह, अचौराणामिति. यद्य यस्याविहितं तस्करणं चौर्यं तद्रहितं शूद्राद्ब्राह्मण्यां जाता अन्त्यजाः रजकादिसप्त कारवस्ततो जाता अन्तेऽवसायिनः पुल्कसमातङ्गादयः येषां तत्कुलविहित एव धर्मः "ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहिकस्तथा । शूद्राज्जातस्तु चण्डालः सर्ववर्णविगर्हितः" इति च ॥ ३० ॥

तत्तद्वर्णैस्तत्तत्स्वभावेनानुष्ठितस्य धर्मस्य फलमाह-प्रायइति, सात्त्विकादिस्वभावानुसारेण ब्राह्मणानां विहितः अत्रप्रमाणमाह, वेदेति स्मृतो ग्रन्थस्वरूपेण कृतः प्रेत्य परलोके "नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः ॥ अतो यदात्मानः पथ्यं परस्य न तदा चरेत्॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज"इत्यादिवचनात् भक्त्युपबृंहितस्य धर्मस्यापेक्षिताशेषपुरुषार्थहेतुत्वं न केवलस्येत्यभिप्रायेण प्राय इत्युक्तम्. तत्र तत्तद्विशेषणवर्णनं ग्रन्थबाहुल्यं स्यादित्युपरम्यते ॥ ३१ ॥

न केवलमनेन धर्मेण स्वर्गादिप्राप्तिरपि तु, भक्त्यादिसाधनपूर्णेन मुक्तिरपि स्यादित्याह-वृत्त्येति । स्वभावेन स्वात्मना कृतया प्रेरितया सात्त्विकादिस्वभावपूर्णया या वृत्त्या अष्टलक्षणया भक्त्या वा योग्यतया स्वविहितकर्मणि वर्तमानः पुरुषः शनैःशनैर्बहूनां जन्मनामन्ते स्वभावजं कर्म पुण्यपापलक्षणं मुक्त्वा निर्गुणतां मुक्तिम्. "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भवति" इति श्रुतेः । ज्ञानपूर्वकमनुष्ठितो नित्यानन्दाविर्भावलक्षणपुरुषार्थस्य हेतुः यदन्यमेवंविन्महत्पुण्यं कर्मं करोति "तद्धस्यान्ततः क्षीयत एव" इति श्रुतेः तत्त्वज्ञानपूर्वकं भगवद्भक्तप्रद्वेषोपरक्तः प्रवृत्तो धर्मो नित्यदुःखाविर्भावलक्षणपुरुषार्थस्य त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्त इत्यादि नित्यं प्रार्थनादिगुणोपेतो नित्यसत्त्वगुणानिमित्तसुखलक्षणस्येत्यादि ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

साध्वीनां लक्षणानि धर्मांश्चाह—स्त्रीणामिति, पञ्चभिः । पतिरेव देवः पूज्यो यासाम् ॥ २५—२८ ॥

हर्य्यात्मना पत्या सह ॥ २९ ॥

अनुलोमप्रतिलोमजानां वृत्तिमाह—वृत्तिरिति । कुलकृता कुलपरम्पराप्राप्ता यथा नापितरजकादीनां मुण्डनवस्त्रनिर्णेजनादिका अपापानामिति कुलपरम्पराप्राप्तमदिरापानविधवाविवाहादिपापवतां पापाभाव उक्तः । चौर्य्ये तु तेषामपि प्रतिषिद्धमित्याह-अचौराणामिति । अचौरत्वे सत्ये सत्येव वृत्तिः कुलकृता विहिता पापाभावश्चोक्त इति भावः । तत्र प्रदर्शनार्थं काश्चित् प्रतिलोमज विशेषानाह-अन्त्यजेति-

"रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" ॥

अन्तेऽवसायिनस्तु चाण्डालादयः ॥ ३० ॥

प्रेत्यापि परधर्मशीलोऽपि स्वधर्मः श्रेयानित्याह-प्राय इति । वेददृग्भिर्वेदज्ञैः शर्मकृत् सुखहेतुः स्मृतः भगवता चोक्तम्. "श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् इति प्रायग्रहणात् दुर्जातीनां दुराचारत्यागस्तु भाग्यकृत् ॥ ३१ ॥

शनैर्बहुजन्मान्त एव । यदुक्तम्. "स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चितामेति" इत्यादि ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ स्त्रीधर्मानाह—स्त्रीणामिति, पञ्चभिः । पतिरेव देवः पूज्यो यासां तासाम् तस्य पत्युः शुश्रूषा सेवा अनुकूलता तच्चित्तानुसारित्वं तस्य यद्व्रतं नियमस्तस्यनित्यं धारणमिति लक्षणमिति शेषः ॥ २५ ॥

'स्त्रिय संमार्जनादिभिः पतिं भजेदित्युत्तरेणाम्वयः ॥२६-२७॥

स्त्रिया अलोलुपेति छेदः स्निग्धा प्रीतिमती अपतितं भजेत् महापातकी तु आशुद्धेः परिहेयः तथाह-याज्ञवल्क्यः "आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः" इति ॥ २८ ॥

हरिरात्मा आश्रयो यस्य तेन पत्या सह ॥ २९ ॥

अन्त्यजान्तेवसायिनाम् अन्त्यजान्तेऽवसायिप्रभृतीनां सङ्करजातीनां प्रतिलोमजानां तत्तत्कुलकृता तत्तत्परम्पराप्राप्ता वस्त्रनिर्णेजनादिरूपा वृत्तिर्भवेदिति परम्पराप्राप्तमपि चौर्यहिंसादिकं त्याज्यमित्याशयेनाह-अचौराणामपापानामिति । तत्रान्त्यजाः "रजकश्चर्मकारश्च नटो वरुड एव च । केवर्त्तो मेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृताः" अन्तेऽवसायिनस्तु चाण्डालपुल्कसमातङ्गादयः ॥ ३० ॥

वेददृग्भिः वेदविद्भिः मन्वादिभिः स्वभावतः वर्णादिभावानुसारेण विहितो ऽनुष्ठातः नृणां धर्मः इह प्रेत्य च शर्मकृत्सुखदः स्मृतः तथा च स्मृतिः "श्रेयान्स्वधर्मो विगुणः परधर्मो भयावहः" इति ॥ ३१ ॥

निर्गुणतां गुणातीतताम् ॥ ३२ ॥

भाषा टीका ।

और स्त्रियों के लक्षण (धर्म) यही हैं कि पति को देवता के सदृश माने, और उसकी शुश्रूषा करे, पति के अनुकूल रहे और पति के बन्धुवर्गों का अनुवर्त्तन करे, तथा नित्य पति ही के व्रत को धारण करे ॥ २५ ॥

सम्मार्जन (झाड़ूलगाना) उपलेप (लीपनापोतना) और से मण्डलवर्त्तन (चौकपूरने) से गृह को मण्डित (भूषित)रक्खे और नित्य आप भी अपने उपकरणों से स्वयं भूषित रहे ॥ २६ ॥

सुशीला स्त्री घर के ऊंचे नीचे सब कामों में नम्रता से इन्द्रियों के जीतने से तथा सत्य और प्रिय वाक्यों से प्रेम से समय २ पर पति की सेवा करे ॥ २७ ॥

सदा सन्तोष राखे भोगों में लोलुपता छोड़े, चतुराई रक्खे साची मीठी वाणी बोले, प्रमाद छोड़कर शुद्धरहे और स्नेहवाली होकर पति को भजे यदि पति पतित न होवे तो ॥२८॥

जो स्त्री लक्ष्मी के नाई पति को हरि की भावना से भजती है, वह हरिलोक में हरि स्वरूप अपने पति के साथ लक्ष्मी के तरह मोद को प्राप्त होती है ॥ २९ ॥

रजक आदि सङ्कर जाति लोग, तथा अन्त्यज वर्णवाला लोग अपने२ कुलोचित जीविका करें चोरी और हिंसा को छोड़ कर, ॥ ३० ॥

प्राय करके मनुष्यों का युग २ में वेद दृष्टाओं ने स्वभाव विहित धर्म ही कहा है वही इस लोक और परलोक में सुख करने वाला है ॥ ३१ ॥

अपने स्वभाव से प्राप्तवृत्ति मे अपने कर्म को करता हुआ वर्त्तमान रहे, कालांतर में धीरे २ स्वभाव से जायमान कर्म को भी छोड़कर, अर्थात् कर्म करता हुआ भी परमात्मा में समर्पण कर निर्गुणता को प्राप्त हो जावे, अर्थात् गुणकर्म कृत बन्धन से छूट जावे ॥ ३२ ॥

उप्यमानं मुहुः क्षेत्रं स्वयं निर्वीर्यतामियात् ।
न कल्पते पुनः सूत्यै उप्तं बीजं च नश्यति ॥ ३३ ॥
एवं कामाशयं चित्तं कामानामतिसेवया ।
विरज्येत यथा राजन्नाग्निवत्कामबिन्दुभिः ॥ ३४ ॥
यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम् ।
यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां युधिष्ठिरनारदसंवादे सदाचारनिर्णयो नाम
एकादशोऽध्यायः ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, काम्यानि कर्माणि कुर्वतस्तत्फलभोगपरस्य कथं नैर्गुण्यं स्यात्? तदुक्तं प्रह्लादेन "औपस्थ्यजैह्व्यं बहुमन्यमानः कथं विरज्येत दुरन्तमोहः" इत्यादि तत्राधिकारिभेदेन व्यवस्थां सदृष्टान्तमाह—उप्यमानमिति द्वाभ्याम्. पुनः सूत्यै सस्यप्रसवाय ॥ ३३ ॥

कामा आशेरते वासनारूपेण यस्मिंस्तत् । अयम्भावः उत्कट-वासनाविष्टस्य सहसैव कामत्यागासम्भवाद्वर्णोक्तनियमेन बहुशः कामान् भुञ्जानस्यैव नित्यनैमित्तिकैर्विशुद्धचेतसस्तद्दोषदर्शनेन ययातिसौभरिप्रमुखानामिव शनैर्विरागो भवति यथा स बीजं क्षेत्रं शनैर्निर्वीर्यं भवति यथा च प्रज्वलितोऽग्निर्न घृतबिन्दुभिः शाम्यति महता तु घृतपूरेण शाम्यत्येव तद्वत् प्रह्लादकृतस्तुतौ कौमार एव निवृत्त्युपदेशो मन्दवासनानामधिकारेण । तदुक्तं तत्रैव "बालानदूषितधियो द्वन्द्वारामैरितेहितैः" इति अतः सर्वमनवद्यम् ॥ ३४ ॥

शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यो न जातिमात्रादित्याह—यस्येति । यद्यदि अन्यत्र वर्णान्तरेऽपि दृश्येत तद्वर्णान्तरं तेनैव लक्षणनिमित्तेनैव वर्णेन विनिर्दिशेत् न तज्जातिनिमित्तेनेत्यर्थः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु स्वभावकृतया वृत्त्या स्वकर्माणि वर्तमानस्य पुनःकामक्रोधादिवर्धकबन्धककर्मसम्भावनया कथं नैर्गुण्यप्राप्तिरिति शङ्कां निराकर्तुं गृहस्थस्य ज्ञानवैराग्यवतः शास्त्राविरुद्धान्नपानादिसेवया रागवर्धकत्वाभावे तावद्दृष्टान्तमाह—उप्यमानमिति । यथा मुहुर्मुहुरुप्यमानं क्षेत्रं निर्वीर्यतामसारतां प्राप्नुयात्पुनः सूत्यै सस्यप्रसवाय न कल्पते न समर्थमत एव उप्तं बीजं च नश्यति ॥ ३३ ॥

तथा कामानामाशयमाश्रयं चित्तं पुनः कामानामतीव सेवया विरज्येत नाग्निवदिति घृतबिन्दुभिरग्निरिव न वर्धेत इत्यर्थः । यथा प्रज्वलितोऽग्निः घृतबिन्दुभिर्न शाम्यति किन्तु महता घृतपूरेण. तथा चित्तं कामलवेन न शाम्यति महद्भिः कामैरित्यर्थः ॥ ३४ ॥

शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यो न जातिमात्रादित्याह—यस्येति । यस्य पुंसो यल्लक्षणं वर्णाभिव्यञ्जकं प्रोक्तं "शमो दमस्तपः" इत्यादिना तद्यत् यद्यन्यत्रापि वर्णान्तरेऽपि दृश्येत तर्हि तद्वर्णान्तरं तेनैव लक्षणनिमित्तेनैव वर्णेन निर्दिशेत् न जातिनिमित्तेनेत्यर्थः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु सगुणो धर्मः सगुणपुरुषार्थहेतुर्भवन्ननुकूलत्वान्निर्गुणपुरुषार्थस्य कथं विरुद्धत्वादित्याशंक्य मनो हि पुरुषार्थकारणं तद्विषयोपरक्तं दुःखोदर्कविषयसुखाय स्यात्तद्व विषयाणां क्षणभङ्गुराणां दुःखोदर्काणां दुःसाधनत्वचिन्तया वैराग्यानलभर्जितं पुनस्तदंकुरीभावासमर्थं भगवच्चरणारविन्दभक्तिसलिलसिक्तं चेत् तज्ज्ञानांकुरीकरणनिदानं भवतीत्येतमर्थं सदृष्टान्तमाह—उप्यमानमिति यथा बीजैरुप्यमानं पुनः मेदुरसाधनहीनं क्षेत्रं केदारलक्षणं निर्वीर्यतां सस्यजननशक्तिराहित्येनेति तदेव स्फुटयति पुनरिति सूत्यै उत्पत्त्यै न केवलमुत्पादनासमर्थं किन्तु बीजनाशहेतुश्च ॥ ३३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

एवं यथा० कामाशयं कामाद्याविश्रमं चित्तं विषयसेवासमये दुःखस्य तदभावे सुखस्य च स्मरणसमर्थं मनः कामानां विषयाणामतिसेवया क्षयरोगादिहेतुभूतया दुःख्यादिनाशकारणानित्यसुखाय विरज्येत विरक्तं भवति असारताबुद्धिं प्राप्नोति इदं च योग्यानामेव नायोग्यानामिति. किञ्चिद्विषयसेवया किं स्यादिति तत्राह–यथेति। कामानां बिन्दुभिः किञ्चित्सेवितैः मनो यथावत्पुरुषार्थहेतुतया न विरज्यते विरक्तं न भवति पुनः तृष्णातिशयः स्यात् कथमिव मुखकान्तिहेतुत्वात्कामः आज्यं तद्बिन्दुभिर्यथा अग्निर्वर्धते तथेति भावः॥ ३४॥

अन्यत्र वर्णादिज्ञानं यथा तारतम्यतत्पूजापि यद्योग्यस्य निःश्रेयसी यस्य एतदभावे तद्धितकरणाद्यभीष्टा सिद्धिः स्यादिति तत्राह–यस्येति. यस्य ब्राह्मणादेः ब्राह्मणत्वादिव्यञ्जकं शमदमादिलक्षणं प्रोक्तं शास्त्रेण इति शेषः। तल्लक्षणं यद्यन्यत्र व्यक्तं दृश्येत अपिशब्देनाऽन्यात्वादिदोषाभावं सूचयति-तर्हीतरलक्षणेनैव तद्वस्तु ब्राह्मणादिकमिति निर्दिशेत् उपदिशेत्. गोः किं लक्षणमिति पृष्टः सास्नादिमान् गौरिति उपदिशति. यदा तदा पुच्छवत्वशृङ्गवत्वादि व्यभिचारि विहाय यं गोपिण्डं सास्नादिमन्तं पश्यति. यथा प्रत्येति तत्प्रयुक्तं व्यवहारं करोति आप्ताद्योपदिशति च तथाऽत्रापि विरक्तिबलभाक्तिरेव ब्राह्मणादेः मुक्तिसाधनं लक्षणमिति सकलशास्त्रतात्पर्यार्थः ततः सैव मुमुक्षुभिः सम्पादनीयेति भावः॥ ३५॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

एकादशोऽध्यायः॥ ११॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

एकादशोऽध्यायः॥ ११॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अत्युत्कटवासनाविशिष्टानां तु वेदोक्तनियमेन कामत्यागासम्भवात् बहुशः कामान् निषिद्धेतरान् ययातिसौभरिप्रमुखानामिव भुञ्जानानामकुटिलचित्तानां विरागः स्यादिति सदृष्टान्तमाह–उप्यमानमिति, द्वाभ्याम्। निर्वीर्यतामेवाह, क्वचित् सुत्यै सस्य प्रसवाय न कल्पते क्वचित् उप्तमेव बीजं नश्यति उच्छ्वसति कामा आलस्येनेव शेरते वासनारूपेण यत्र तत् नाग्निरवैति यथा प्रज्वलितोऽग्निर्न घृतबिन्दुभिः शाम्यति किन्तु महता घृतपूरेण शाम्यत्येव,तद्वत्॥ ३३॥ ३४॥

किञ्च यस्य पुंसो वर्णाभिव्यञ्जकं यल्लक्षणं यथा ब्राह्मणादिजातिमभिव्यञ्जयति यत् तच्च सामान्यतो विहितमेव शमदमादिकं वस्तु विशेषतो विहितं संध्योपास्त्यादिकं यद्यन्यत्र जात्यन्तरेऽपि दृश्येत तज्जात्यन्तरमपि तेनैव ब्राह्मणादिशब्देनैव विनिर्दिशेदिति ब्राह्मणादिनुचवादरं लक्षयति न च "परधर्मो भयावहः" इति वाच्यं शमदमादीनां परधर्मत्वाभावादिति भावः॥ ३५॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।

एकादशः सप्तमस्य सङ्गतः सङ्गतस्सताम्॥ ११॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सुत्यै प्रसवाय॥ ३३॥

उत्तमाधिकारिपक्षे"कौमारे आचरेत्प्राज्ञः" इत्यादिना सर्वभोगत्यागपूर्वकं भजनमुक्तम् मन्दाधिकारिपक्षे"गृही भूत्वा वनी भवेत्" "कुर्वन्नेवेह कर्माणि, जिजीविषेच्छतं समाः" इत्याद्याश्रुतयः आश्रमाद्याश्रमान्तरगमनं यावज्जीवं तावत्कर्मानुष्ठानं च बहुभोगेन विषयेभ्यो निर्वेदोदयार्थमाहुः यथोक्तकर्मसम्पादितबहुभोगेन मनः शाम्यति न स्वल्पभोगेन बहुघृतेनाग्निर्यथा शाम्यति न घृतबिन्दुभिरित्याह–एवमिति। कामाः विषयाः आशेरते वासनारूपेण यस्मिन् तत् अतिसेवया बहुभोगेन विरज्यते विषयेभ्य उपरम्यते नतु कामबिन्दुभिः॥ ३४॥

यद्यपि प्रजापतिप्रवर्तिता वर्णा मुख्यास्तथापि कालकृतसङ्करादिदोषतस्तन्निश्चयाभावे सत्यादिलक्षणेन तत्तत्कुले ब्राह्मणादिनिश्चयः कर्तव्यः अन्यवर्णेष्वपि यद्यन्यवर्णलक्षणं दृश्येत तर्हि तेन लक्षणेनापि तं वर्णितं विजानीयादित्याह—यस्येति। यस्य पुंसो वर्णाभिव्यञ्जकं यल्लक्षणं यद्यदि अन्यत्र वर्णान्तरेऽपि दृश्येत तद्वर्णान्तरं तेनैव लक्षणादिनिमित्तेन विनिर्दिशेत्"न चैतं विद्मो ब्राह्मणाःस्मोऽब्राह्मणा वा ये यजामहे"इति श्रुतिः"जातिरत्र महासर्प मनुष्यत्वे महामते! सङ्करात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः॥ तस्माच्छीलं प्रधानेष्टं विदुर्ये तत्त्वदर्शिनः"इति स्मृतिश्चात्रानुसन्धेया॥ ३५॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

एकादशाऽध्यायार्थप्रकाशः॥ ११॥

भाषा टीका।

जिस खेत में बहु अर्थात् (बारंबार) बीज बोया जाता है वह खेत निर्वीर्य आपही होजाता है, उसमें बोया हुआ बीज

भाषा टीका ।

फिर उत्पन्न होने को नहीं समर्थ होता किन्तु वहीं नष्ट होजाता है ॥ ३३ ॥

हे राजन्! ऐसेही जिस पुरुष का चित्त सदा कामनाओं से वासित हैं उसका चित्त वैदिक कर्म करते २ नियम पूर्वक बहुत काल भोग भोगने से जैसा धीरें २ आपही वैराग्य को प्राप्त होता है, तैसा शीघ्रता से नहीं। जैसे कि? घृत के बिन्दुओं से अग्नि नहीं शान्त होती है ॥ ३४ ॥

जिन पुरुषों के वर्णों का अभिव्यंजक (जानने वाला) जो लक्षण कहा है वह यदि वर्णान्तर में देखे पड़े तब उसको भी उसी निमित्त से निर्देश करे कुछ जाति के निमित्त से नहीं जाति तो जिसकी जो है वही रहेगी ॥ ३५ ॥

इति श्रीमद्भागवत सप्तमस्कन्ध में एकादश अध्याय की भागवताचार्यकृत भाषा टीका समाप्त ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

———:*:———

॥ द्वादशोऽध्यायः ॥

नारद उवाच ।

ब्रह्मचारी गुरुकुले वसन्दान्तो गुरोर्हितम् ।
आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः ॥ १ ॥
सायं प्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् ।
उभे सन्ध्ये च यतवाग्जपन्ब्रह्म समाहितः ॥ २ ॥
छन्दांस्यधीयीत गुरोराहूतश्चेत्सुयन्त्रितः ।
उपक्रमेऽवसाने च चरणौ शिरसा नमेत् ॥ ३ ॥
मेखलाऽजिनवासांसि जटादण्डकमण्डलून् ।
बिभृयादुपवीतं च दर्भपाणिर्यथोदितम् ॥ ४ ॥
सायं प्रातश्चरेद्भैक्ष्यं गुरवे तन्निवेदयेत् ।
भुञ्जीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित् ॥ ५ ॥
सुशीलो मितभुग्दक्षः श्रद्दधानो जितेन्द्रियः ।
यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ॥ ६ ॥
वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ७ ॥
केशप्रसाधनोन्मर्दस्नपनाऽभ्यञ्जनादिकम् ।
गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादशे वर्ण्यते धर्मो ब्रह्मचारिवनस्थयोः ।
चतुर्णामाश्रमाणां च साधारण्येन कश्चन ॥ १ ॥

वर्णादीनां धर्मा उक्ताः इदानीमाश्रमधर्मा उच्यन्ते. तत्रास्मिन्द्वादशेऽध्याये ब्रह्मचारिवानप्रस्थयोरसाधारणाश्चतुर्णाम्— साधारणाश्चोच्यन्ते. त्रयोदशे यतेर्धर्माः, चतुर्दशे गृहस्थस्य पञ्चदशे सर्वधर्मसारसंग्रहः ब्रह्मचारी गुरुकुले वसन्गुर्वादीनुपासीतेत्युत्तरेणान्वयः ॥ १ ॥

तानाह—सायमिति । ब्रह्म गायत्रीं जपन् सन्ध्यात्रयमुपासीत उभे सन्ध्ये तु यतवाक् सायं प्रातः सन्ध्याकालनिमित्तं मौनं कुर्यादित्यर्थः ॥ २ ॥

उपक्रमे आदाववसाने अन्ते गुरोश्चरणौ नमेत् ॥ ३ ॥

यथोदितमिति, "पालाशो दण्डो ब्राह्मणस्य" इत्यादिनियममनतिक्रम्य, जटाधारणं तु केशप्रसाधनाभावमात्रम् ॥ ४ ॥ ५ ॥

यावदर्थं यथोपयोगमात्रमेव ॥ ६ ॥

बृहद्व्रतः ब्रह्मचर्यवान् गृहस्थव्यतिरिक्तः सर्वोऽपि प्रमदागाथां वर्जयेत् तत्र हेतुः इन्द्रियाणि बलवन्ति संयतस्यापि मनो हरन्तीति ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं चातुर्वर्ण्यादिधर्मानभिधायाथ चातुराश्रम्यधर्मानभिधास्यन्नादौ ब्रह्मचर्याश्रमधर्मानाह-ब्रह्मचारीति । ब्रह्मचर्यं द्विविधमौपकुर्वाणं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नैष्ठिकश्चेति । तत्र गार्हस्थ्यादिवन्नैष्ठिकमप्यौपकुर्वाणपूर्वकमेवेति-दर्शयितुं तावदौपकुर्वाणब्रह्मचर्यधर्मा उच्यन्ते. यो गुरुकुले वसन् स ब्रह्मचारी उपकुर्वन् ब्रह्मचारीत्यर्थः । कथम्भूतो वसन् दान्त उपशान्तः दासवन्नीचः स्वमैत्र्यमनुसन्दधत् गुरोर्हितमाचरन् गुरौ सुदृढं सौहार्दं यस्य नारदः ॥ १ ॥

किञ्च सायम्प्रातश्च गुरुमग्निमर्कं सूर्यं सुरोत्तमं भगवन्तञ्च उपासीत उभे सन्ध्ये प्रातः सायं च यतवाङ्मौनी समाहितचित्तो ब्रह्म गायत्रीं जपन् गुर्वादीनुपासीतेत्यन्वयः ॥ २ ॥

आहूतश्चेत्सुयन्त्रितः समाहितो गुरोः छन्दांसि वेदानधीयीत नित्यमध्ययनोपक्रमसमाप्त्योर्गुरोश्चरणौ शिरसा नमेत् ॥ ३ ॥

यथा विहितं मेखलादीनि बिभृयात् जटाधारणं तु केशप्रसाधनाभावमात्रं दर्भं पवित्रं पाणौ यस्य सः ॥ ४ ॥

सायं प्रातश्च भैक्षं भिक्षाकर्म चरेत्कुर्यात् तद्भिक्षया लब्धमन्नं गुरवे निवेदयेत् गुरोः पुरतो निदध्यात् ततो यदि गुरुणाऽप्यनुज्ञातश्चेत् तदन्नं भुञ्जीत नोचेत् कदाचिदुपवसेत् कदाचिदित्यनेन तन्मनः परीक्षार्थं कदाचिद्गुरुर्नाज्ञापयेदिति सूच्यते ॥ ५ ॥

मितं भुङ्क्ते इति तथा सुशीलः सुस्वभावः सदाचारो वा दक्षोऽनलसः श्रद्दधानः गुरूपदिष्टार्थेषु विश्वासयुक्तः जितानीन्द्रियाणि येन स्त्रीषु स्त्रीभिर्निर्जिता ये स्त्रीवश्यास्तेषु च यावदर्थं यावत्प्रयोजनं व्यवहारं प्राणिकं ताभिस्तैश्च सम्भाषेतेत्यर्थः ॥ ६ ॥

प्रमदागाथां स्त्रीविषयां वार्तां वर्जयेत् यतः स्वयमगृहस्थो बृहद्व्रतः ब्रह्मचर्यवान् स्त्रीसङ्गादिरहितः । ननु, तद्वार्तामात्रेण को दोषस्तत्राह—इन्द्रियाणीति । प्रमाथीनि बलवन्ति. अतः संयतचित्तस्यापि मनः प्रमदागाथाश्रवणकथनादिना स्ववशं कुर्वन्ति अतस्तां परिवर्जयेत् इत्यर्थः ॥ ७ ॥

गुरुस्त्रीभिर्गुरुपत्नीभिरन्याभिश्च युवतिभिः केशप्रसाधनादिकं न कारयेत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नीचः प्रश्रितः हितं हिताचरणं । मनोवाक्कायकर्मभिरिति शेषः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

कश्चिदपराधे सति । एकान्नादनवर्जनार्थमुपवसेदित्युक्तम् ॥५॥

स्वार्थमात्रासक्तिः तन्मात्रं यावदिति ॥ ६ ॥

बृहद्व्रतो ब्रह्मचारी स्त्र्यादिव्यवहारवर्जननिमित्तमाह—इन्द्रियाणीति । निर्जितेन्द्रियग्रामो यतिः । "ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते" इत्यभिधानात् ॥ ७ ॥

प्रसाधनं संस्करणम्—

"मधुमांसोन्मर्दनोच्छिष्टं शुक्लस्त्रीप्राणिहिंसनम् ।
भास्करालोकनाश्लीलपरिवादांश्च वर्जयेत्" ॥

इत्यपव्याख्यानं न कर्तव्यम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—४ ॥

नोचेदिति, गुरोरन्यत्र गमनाद्वा ॥ ५—१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

द्वादशे वर्णिनो धर्मो वनस्थस्याऽपि वर्ण्यते ।
साधारणश्चाश्रमाणां देहत्यागविधिस्तथा ॥

ब्रह्मचारी गुर्वादीनुपासीतेत्युत्तरेणान्वयः ब्रह्म गायत्रीम् ॥ १—५ ॥

यावदर्थं गुरुसेवार्थं गुरुगृहे भिक्षार्थं गृहस्थगृहेषु च यथोपयोगमेव च ॥ ६ ॥

अगृहस्थो गृहस्थभिन्नः सर्वोऽपि बृहद्व्रतो ब्रह्मचारी ॥ ७ ॥

कारयेदिति गुरुपत्न्यो हि शिष्यमपि पुत्रमिव वात्सल्येन पश्यन्त्यो यदि केशप्रसाधनादिकं स्वेच्छयैव कुर्वन्ति तदापि न कारयेदित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ब्रह्मचारी वनस्थयोर्धर्मः सर्वाश्रमसाधारणश्च कश्चन धर्मो द्वादशेनाऽध्यायेन वर्ण्यते. ब्रह्मचारी गुरुकुले वसन् गुरोर्हितमाचरन् उभे सन्ध्ये ब्रह्म गायत्रीं जपन् गुर्वादीनुपासीतेति त्रयोः अन्वयः ॥ १ ॥ २ ॥ ३ ॥

जटाधारणं केशप्रसाधनाभावमात्रं यथोक्तं "पालाशो दण्डो ब्राह्मणस्य" इत्यादिनियममनतिक्रम्य दर्भपाणिः कुशहस्तः ॥ ४ ॥ ५ ॥

यावदर्थं भिक्षाचर्यम् ॥ ६ ॥

बृहद्व्रतः नैष्ठिकब्रह्मचर्यवान् अगृहस्थो वानप्रस्थादिश्च प्रमाथीनि बलवन्ति यतेः जितेन्द्रियस्यापि ॥ ७ ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीप्रियवल्लभाय नमः ॥

नारद उवाच ।

नारदजी बोले, कि—ब्रह्मचारी दमन शील होकर गुरुकुल में वास करता हुआ, गुरु का हित आचरण करे और दास के नाईं नीचाऽनुसंधान कर गुरु में दृढ सौहृद राखे ॥ १ ॥

प्रातःकाल और सायंकाल में गुरु अग्नि सूर्य और देवताओं की उपासना करे, और दोनों संध्याओं में मौन होकर, सावधानी से गायत्री का जप करे ॥ २ ॥

गुरुजी के बुलाने से बड़ी नम्रता पूर्वक वेद का अध्ययन करें पढ़ने के प्रथम और पश्चात् (अन्तमें) गुरुजी के चरणों को शिरसे प्रणाम करे ॥ ३ ॥

नन्वग्निः प्रमदानाम घृतकुम्भसमः पुमान्।
सुतामपि रहो जह्यादन्यदा यावदर्थकृत्॥ ९॥
* कल्पयित्वाऽऽत्मना यावदाभासमिदमीश्वरः।
द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः॥ १०॥
एतत्सर्वं गृहस्थस्य समाम्नातं यतेरपि।
गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः॥ ११॥
अञ्जनाभ्यञ्जनोन्मर्दस्त्र्यवलेखामिषं मधु।
स्रग्गन्धलेपालङ्कारांस्त्यजेयुर्ये धृतव्रताः॥ १२॥
उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च।
त्रयीं साङ्गोपनिषदं यावदर्थं यथाबलम्॥ १३॥
दत्त्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः।
गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत्॥ १४॥
अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजम्।
भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत्॥ १५॥
एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही।
चरन्विदितविज्ञानः परं ब्रह्माधिगच्छति॥ १६॥

भाषा टीका।

जैसा शास्त्र में कहा है उस रीत से मेखला मृगचर्म वस्त्र जटा दंड कमंडलु और दर्भों को धारण करे॥ ४॥

सांझ सवेरे भिक्षाटन करके गुरुजी के अर्पण करे, जो गुरुजी आज्ञा देवें तो भोजन करे नहीं तो कभी उपवास भी करजावे॥ ५॥

सुशील मितभोजी चतुर श्रद्धावान् और जितेन्द्रिय रह कर, स्त्रियों में और स्त्रीनिर्जित अर्थात् लंपटों में जितना प्रयोजन उतना ही व्यवहार राखे॥ ६॥

बृहद्व्रत (बडे व्रत वाला) विरक्त पुरुष स्त्रियों के गीत को न सुनें, क्योंकि ? इन्द्रियें बडी मथन करने वाली हैं बलात्कार से मन को हरलेती हैं॥ ७॥

यदि आप युवा अवस्था वाला हो तो युवा अवस्था वाली गुरु पत्नियों से केशप्रसाधन, (केस सम्हारना) उन्मर्दन (उबटन) स्नान, अभ्यंजन, (तेल लगावना) इत्यादिक कार्य न करावे॥ ८॥

श्रीधरस्वामिकृतभावार्थदीपिका।

न कारयेदित्यत्र हेतुः—नन्विति। रहः एकान्ते अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे अनेकान्तावसरे वा यावदर्थं तदुक्तं कुर्यात्॥ ९॥

ननु, मिथ्यात्वात् अतिकश्मलत्वाच्च स्वयं त्यक्तप्रायं कथादि जह्यादिति कोऽयमतिनिर्बन्धः? तत्राह—कल्पयित्वेति। आत्मना स्वरूपसाक्षात्कारेणेदं देहेन्द्रियादिकम् आभासमात्रं कल्पयित्वा निश्चित्य यावदसौ जीव ईश्वरः स्वतन्त्रो न भवेत् तावत् द्वैतम् अहं पुमानियं स्त्रीति भेदो न विरमेत. ततः किमत आह, ततो हि द्वैताद्विपर्ययः गुणाध्यासेन भोक्तृताबुद्धिः अतो जह्यादेवेत्यर्थः॥ १०॥

एतत् सर्वं सुशील इत्याद्युक्तं गृहस्थस्य विशेषमाह—गुरुवृत्तिरिति॥ ११॥

अञ्जनादीनामामिषान्तानां द्वन्द्वैक्यम् अञ्जनं शरीरस्य अभ्यञ्जनं शिरसः स्त्रियश्चाधिकाश्च चित्रकर्म स्त्रीणां कुड्यादौ लेखनं वा तत्परिमर्शो वा अत्राऽप्यङ्गादि स्वरूपतो निषिध्यते पूर्वन्तु कथञ्चिदापदि प्राप्तमपि अकर्तृक निषिद्धमिति भेदः॥ १२॥

* कल्पयित्वात्मना इति वीर० पाठः।

श्रीधरस्वामिकृतभावार्थदीपिका ।

अङ्गैः शिक्षादिभिरुपनिषद्भिश्च सहितां वेदत्रयीमधीत्य अवबुध्य च तदर्थञ्च विचार्य यावदर्थं स्वाधिकारानुसारेण ॥ १३ ॥

यदीश्वरः शक्तः तर्हि गुरोः काममपेक्षितं वरं दत्त्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात्तत्रैव वा वसेत् नैष्ठिकः स्यादित्यर्थः ॥ १४ ॥

स्वधामभिः स्वाश्रयैर्भूतैर्जीवैः सह तं नियन्तृतया ॥ १५ ॥

चरन् एवमाचरन् विदितं विज्ञानं विज्ञेयं येन सः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कुतस्तन्मात्रकरणे दोषः? तत्राह—नन्विति । अग्निः अग्निसदृशी प्रमदा यथा चातीवाग्निसहचरितं घृतकुम्भं क्षरति तथा पुमानपि प्रमदासहचारी संमुह्येदित्यर्थः । अतः सुतामपि पुत्रीमपि पुमान् रह एकान्ते जह्यात् त्यजेत् अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे अनेकान्तावसरं वा यावत्तदुक्तमर्थं प्रयोजनं तावन्मात्रं करोतीति तादृशो भवेत् ॥ ९ ॥

एवं ब्रह्मचारिणो धर्मानभिधाय यदुक्तं "सुशीलो मितभुक्" इत्यादि तद्यतिगृहस्थयोरपि ब्रह्मोपासननिष्ठयोरतिदिशन् तावद्यावच्छरीरावसानमेवं धर्मा अनुष्ठेया इत्याह—कल्पयतीति । ईश्वरो भगवान् यावदिदमात्मन आभासं दृश्यं शरीरं कल्पयति प्रवृत्तिः समर्थं करोति तावद्द्वैतं देवत्वमनुष्यत्वब्राह्मणत्वाद्यभिमानरूपं भेदज्ञानमनुवर्तेत इति शेषः । नन्वनुवर्ततां ततः किं तत्राह, अस्य पुंसस्ततोऽध्यासाद्विपर्ययः उत्तरोत्तरविपर्ययः देहात्मभ्रमः पुरुषार्थविपर्ययो वा भवति तस्माद्यावद्द्वैतानुवृत्तिः स्वधर्मेभ्यो न विरमेत्। कल्पयित्वेति पाठान्तरम् तत्र यावदिदमाभासं शरीरं तावदीश्वरः प्रभुः समर्थः स्वधर्मानुष्ठानशक्तस्सन् आत्मनः स्वस्य द्वैतं मनुष्यत्वब्राह्मणत्वादिभेदं कल्पयित्वा स्थित इति शेषः । देहात्माभिमानयुक्त इत्यर्थः । अत एव तावन्न विरमेद्धर्मादिति शेषः । विरामे बाधकमाह—हि यस्मादध्यासाद्विरामाद्धाऽस्य विपर्ययः उत्तरोत्तरदेहात्मभ्रमः यद्वा यावदिदं शरीरमनुवर्तते तावदिदं द्वैतं मनुष्यत्वादिकमात्मन आभासमात्रं कल्पयित्वा द्वैतं देहाकारो न त्वात्माकार इति कल्पयित्वा देहविलक्षणमात्मानमनुसन्धायेत्यर्थः। ईश्वरः कर्तुं समर्थः न विरमेत् स्वधर्मान्नविरमेदित्यर्थः ॥ १० ॥

उक्तं यतिगृहस्थयोरप्यतिदिशति—एतदिति । एतत्सुशील इत्यादिनोक्तं सर्वं व्रतस्थस्य ब्रह्मोपासनरूपव्रतनिष्ठस्य यतेस्तुर्याश्रमिणः अपि शब्दाद्गृहस्थस्यापि समाम्नातं तत्र गृहस्थस्य किञ्चिद्विशेषमाह—गुरुवृत्तिरिति । गुर्वी वृत्तिर्गुरुवृत्तिः स्त्रीसङ्गराहित्यादिरूपा ब्रह्मचर्यवृत्तिः गृहस्थस्य तु विकल्पेन कदाचिद्भवेत् कदाचिन्न स्यात् । कदा न भवेत् ? इत्यपेक्षायां तं कालं निर्दिशन्विकल्पे हेतुं वदन् गृहस्थं विशिनष्टि—ऋतुगामिन इति । ऋतुगामित्वाद्गुरुवृत्तिर्विकल्प इति भावः । ऋतुकालेषु गुरुवृत्तिर्नास्तीति च भावः अस्या वृत्तेर्दुष्करत्वाभिप्रायेण गुर्वीति विशेषणमुपात्तम् ॥ ११ ॥

किञ्च ये धृतव्रताः गृहस्थास्ते अञ्जनादीन् त्यजेयुः अञ्जनाद्यभिप्रायं तानां द्वन्द्वैक्यं तत्राञ्जनं शरीरस्य तैलाद्यञ्जनम् शिरस अभ्यञ्जनमवशिष्टदेहस्य उन्मर्दः उद्वर्तः स्त्रियश्च लेखा कुड्यादिषु स्त्रीप्रतिकृतिलेखनमामिषं मांसं मधु मद्यमिदं चाभिप्रायाद्यभिप्रायकं स्रक् च गन्धलेपश्चाऽलङ्कारश्च तान् ॥ १२ ॥

एवं ब्रह्मचर्याश्रमधर्मानभिधायाथाश्रमान्तरधर्मान्विवक्षुस्तावदाश्रमान्तराणामुक्तविधब्रह्मचर्याश्रमपूर्वकत्वमाह, उषित्वेत्यादि, द्वाभ्याम् । द्विजस्त्रैवर्णिकः एवमित्थं गुरुकुले. उषित्वा साङ्गोपनिषदं सांगसशिरस्कां त्रयीं यथाबुद्धिबलं यावत्स्वापेक्षितमधीत्याऽवबुध्य तदर्थं ज्ञात्वा अवबध्येति पाठस्तूचितः "वेदमधीत्याभिसमावृत्य कुटुम्बे शुचौ देशे" इति श्रुत्यर्थस्याऽत्र प्रत्यभिज्ञानादवबध्य समावर्तनं कृत्वा ॥ १३ ॥

यदीश्वरः शक्तश्चेत्तर्हि गुरोः काममपेक्षितं वरं दत्त्वा गुरुणाऽभ्यनुज्ञातः गृहं वनं वा प्रविशेद्गृहस्थाश्रमं संन्यासाश्रमं वा स्वीकुर्यादित्यर्थः । वनशब्दः शुचिदेशोपलक्षकः कुटुम्बे शुचौ देशे इति श्रुत्यनुरोधात्स तु वानप्रस्थाश्रमोपलक्षकः ब्रह्मचर्यानन्तरं तत्परिग्रहानुपपत्तेः सहि गार्हस्थ्यानन्तरभावि "ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वनाद्वा" इति जाबालिश्रुतेः गार्हस्थ्यानन्तरं प्रव्रजेत् प्रव्रजनन्तु संन्यासाश्रमपरिग्रहो वानप्रस्थाश्रमपरिग्रहश्चेत्युभयविधं विवक्षितं यथेष्टं संन्यसेद्वनं वा प्रतिष्ठतेत्यर्थः । तत्र वा वसेत् तत्र शब्देन ब्रह्मचर्यं गार्हस्थ्यञ्च विवक्षितं ब्रह्मचर्य एव निष्ठितो भवेत् गृहं प्रविश्य तत्रैव वा स्थितो भवेदित्यर्थः ॥ १४ ॥

एवं यथेष्टं परिगृहीतानां सर्वाश्रमाणामनुगतं धर्मं तत्फलं चाह—द्वाभ्याम्, अग्नाविति । अग्नाविति तुर्याश्रमव्यतिरिक्ताश्रमाभिप्रायकं तस्यानग्नित्वात् गुर्वग्न्यात्मनि स्वस्मिन् सर्वभूतेषु चान्तःप्रविश्यानियमनपूर्वकं धारकतया स्थितमिति शेषः । स्थितम् अधोक्षजं भगवन्तं पश्येत् अधोक्षजो धामाऽऽधारो येषां तैर्भूतैरप्रविष्टं पश्येत् व्याप्यवस्तुगतदोषासंस्पृष्टं पश्येत् प्रविष्टवच्च पश्येत् अन्तर्बहिश्च व्याप्य स्थितत्वादिति भावः ॥ १५ ॥

एवंविधदर्शी ब्रह्मचर्याद्यन्यतमस्वस्वाश्रमधर्माननुतिष्ठन्विदितं विज्ञानं विज्ञेयं स्वात्मपरमात्मयाथात्म्यं येन तादृशः परं ब्रह्माधिगच्छति प्राप्नोति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कुतो न कार्यमत्राह—नन्विति । अन्यदा, व्यवहारयोग्यसमये ॥ ९ ॥

ननु, बन्धनिवृत्त्यर्थं भगवदर्पणबुद्ध्या धर्मोऽनुष्ठेय इति विधीयते तस्य मिथ्यात्वेन स्वत एव निवृत्त्युपपत्तेर्न तद्विधानमत्रावश्यकमित्याशङ्क्येश्वरकल्पितस्य मिथ्यात्वासम्भवेन । यद्बुद्ध्या यस्य शृङ्खलाबन्धस्तस्य तत्प्रसादेन तन्निवृत्तिवदी-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

श्वरप्रसादजनकधर्मग्रामो विधेयो ऽन्यथा बन्धानुवृत्तिरित्याश-यवांस्तस्येश्वरकल्पितत्वमाह-कल्पयेदिति। यावन्तं कालमीश्वरः स्वात्मनो जीवस्य ज्ञानवत्त्वराहित्यं ज्ञानवद्वभासमानमिदमा-त्मसमज्ञानं, कल्पयेत्तावन्तं कालं द्वैतमयथार्थज्ञानं न विरमेन्ना-पगच्छेत् ततोऽज्ञानादस्य विपर्ययो बन्धोऽनुवर्तेत इति शेषः तदुक्तम्—

(१) "बहुत्वेनैव वस्तूनां यथार्थज्ञानमुच्यते।
अद्वैतज्ञानमित्येव द्वैतज्ञानं तदन्यथा॥
(२) यथा ज्ञानं तथा वस्तु यथा वस्तु तथा मतिः।
नैव ज्ञानार्थयोर्भेदस्तत एकत्ववेदनम्" इति च।

ननु, वर्णादेर्विहितो धर्मग्रामः कियन्तं कालमनुष्ठेयो बहुश्रम-साध्यत्वे दुःखप्रयासत्वेनाशक्त्याविरक्त्यानधिकारिकः स्यादि-त्याशङ्क्याह—कल्पयेदिति। यावदीश्वर इदमाभासं मिथ्याभूतं जगत्कल्पयेत् तावद् द्वैतं वर्णाश्रमादिधर्मलक्षणं न विरमेत् नापगच्छेत् ततोऽधिष्ठानं ज्ञानं स्यात्ततो विहितधर्मग्रामस्य विपर्ययो निवृत्तिरित्ययमर्थो हिशब्दसूचितया "सत्त्वसृष्टावशक्ता हि मायासृष्टिं वितन्वत" इति स्मृत्या विरुद्धत्वेनानुपपन्नः ईश्वर इत्यनेन सत्यसृष्टिसामर्थ्यं सूचयति तात्पर्येण विधानं चानुप-पन्नं यत उक्त एवार्थः॥ १०॥

नन्वयं धर्मो ब्रह्मचारिणो भवेदुतान्यस्यापि सम्भवति? नाद्यः अतिव्याप्तेः न द्वितीयः पृथग्विधानानुपपत्तिरित्यतोऽनिब-न्धन्यायेन यथासम्भवमन्यस्यापीत्याह-एतदिति। अन्यद्वक्ष्यमाणं न केवलं गृहस्थस्यैव किन्तु यतेरपीत्याह—यतेरपीति। यथासम्भ-मित्युक्तं विवृणोति-गुरुवृत्तिरिति। गुरुवृत्तिर्गुरौ वासः ब्रह्मचर्यं भिक्षावृत्तिरित्येतत्सर्वं गृहस्थस्य निवर्तेत इत्यर्थः। विकल्पेन व्यवस्थितविकल्पेनोदितानुदितहोमवदित्यर्थः। कुतो निवर्तेत इति तत्राह-ऋतुगामिन इति॥ ११॥

पञ्चयज्ञाद्याचरणावासेन कालयापनं कुर्वतो गृहस्थस्यापि व्रतधारणं ब्रह्मचारिवदभ्यञ्जनादिकं वर्जनीयमित्याह—अञ्जनेति। अवलेपं दर्पम्॥ १२॥

अवबुध्य अर्थविचारं कृत्वा तत्त्वं ज्ञात्वा॥ १३॥

गार्हस्थ्यधर्मस्य वानप्रस्थधर्मस्य यतिधर्मस्य चानुष्ठानेन समर्थश्चेदपवर्गीष्टं कुर्यादित्याह—यदिति—

"नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ।
तदभावे * स्यतनये पत्न्यां वैश्वानरेऽपि च"॥

इति वचनात्. एतादृशस्य गुरौ वासोऽनुज्ञायते अन्यस्य गुरो-राज्ञया दूरं गत्वा गृहाश्रम इति तदुक्तं "गुरोराज्ञानुरोधेन दूरस्थो वा गृही भवेत्" इति चेति॥ १४॥

भगवदर्पणबुद्ध्याऽग्न्यादौ क्रियमाणं कर्म तस्य बुद्ध्या कर्तव्यं न तु तदेकत्वबुद्ध्येत्याशयेनाह अग्नाविति—

"सगुरुर्यः क्रियाः कृत्वा वेदमस्मै ददाति च।
उपनीय ददेद्वेदमाचार्यः स उदाहृतः॥
एकदेश उपाध्याय ऋत्विग्यज्ञकृदुच्यते।
एते मान्या यथापूर्वमेभ्यो माता गरीयसि"॥

इति वचनात् गुरुशब्देन सर्व एते विवक्ष्यन्ते सभासभिरावासस्था-नभूतैरप्रविष्टं सर्वगतं प्रविष्टवत्स्थितं अनुरूपवन्तं अप्रविष्टः सर्वगतः प्रविष्टस्त्वनुरूपवान् "एवं द्विरूपो भगवान्हरिरेको जनार्दनः" इतिवचनात्॥ १५॥

एवमाकारेण क्रियमाणस्य कर्मणः फलमाह एवं विध इति॥ १६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

गुरुवृत्तिरिति, गुर्वनुवृत्तिः॥ ११॥

अञ्जनेत्यस्य टीकायां स्त्रीकर्तृकं निषिद्धमिति विचार्यम् अभ्य-ञ्जनेनाति विशेषात्॥ १२॥

उषित्वेति युग्मकम्॥ १३—३१॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तत्र हेतुः—नन्वग्निरिति। रहः रहसि एकान्ते अन्यदा अन्यत्र अनेकान्तेपि यावदर्थकृत् यावताऽस्य स्यानिनार्थःप्रयोजनं सिद्ध्ये-त्तावदेवस्थितिं कुर्यादित्यर्थः॥ ९॥

ननु, निवृत्ताभिमानस्य विजितेन्द्रियस्य ज्ञानिनो युवतयः किम-पकर्तुं प्रभवेयुः? तत्राह—कल्पयित्वेति। ईश्वराज्ञानसमर्थोऽपि इदं देहदैहिकविषयाभिमानादिकं बाधितानुवृत्तिन्यायेनाभासं कल्प-यित्वा तत्त्वज्ञानेन विजितं नाममात्रेणैव कथनमात्रं कृत्वाऽपि यावदात्मना मनसा सह वर्तेत. तावत् द्वैतं अहं पुमान् इयं स्त्री इदं मे प्रियमिदमप्रियमिति भेदबुद्धिं न विरमेत. ततश्च विपर्ययः पूर्ववत् संसारावृत्तिः। यद्वा ननु,त्यक्तसुतभगिन्यादिसम्बन्ध-वर्गस्य जितेन्द्रियस्य किमस्माद्भयं? तत्राह-कल्पयित्वेति। व्यवहारं व्यावहारिकं वस्तु च त्यक्त्वापि आत्मना मनसा यावत् यत् प्रमाणकम् इदम् आभासं इयं मे भगिन्येव इयं माता इयं सुते-त्यादिसम्बन्धाभासं कल्पयित्वा ईश्वरः तत्तत्कृतस्नेहोत्थसुखत्व इयान् तावत् तत्प्रमाणकं द्वैतं भेदो न विरमेत् मनस्य स्तोक-त्वात् कालितत्त्वाच्च न कापिचिन्ता तत्राह—ततो हीति॥ १०॥

सर्वं सुशीलं इत्याद्युक्तं विकल्पेन कर्तव्यमित्यर्थः॥ ११॥

---

(१) वस्तूनां बहुत्वेन बहुत्वप्रकारकवस्तुविषयकत्वेन यथा-र्थज्ञानमेवाद्वैतज्ञानमित्युच्यते। वस्त्वैक्यविषयकं तु द्वैतज्ञान-मित्युच्यते तन्मतान्निरुद्धम्॥

(२) अद्वैतज्ञानस्यैव वस्त्वैक्यज्ञानत्वेन वक्तव्यत्वादित्या-शङ्कामपाकरोति-यथेति। ज्ञानार्थयोः सादृश्यलक्षणमैक्यमादाया-ऽद्वैतज्ञानं भेदज्ञानमित्युच्यते न तु वस्त्वैक्यविषयम्॥

* गुरुपुत्रे गुरुपत्न्यां चेति

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अञ्जनं शरीरस्य अभ्यञ्जनं शिरसः स्त्रियं च अवलेखां चित्र कर्म च अत्राऽभ्यञ्जनादिकं स्वरूपत एव निषिद्धमतो पूर्वन्तु कथञ्चिदापदि प्राप्तमपि स्वीकर्त्तुं निषिद्धमिति भेदः ॥ १२—१३ ॥

यदीश्वरः शक्तस्तदा गुरोः काममपेक्षितं वरं दत्वा गृहं प्रविशेत् गृहस्थो भवेदित्यर्थः । तत्रैव वा वसेत् नैष्ठिकब्रह्मचारी स्यात् ॥ १४ ॥

धामभिः स्वाश्रयैर्जीवैः सह तन्नियन्तृतया ॥ १५—१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्यदा अनैकान्ते यावदर्थं यथोपयोगं तदवालम्बनादिकम् कुर्यात् ॥ ९ ॥

सुताया एव का कथा सर्वोपि लोकवेदप्रसिद्धः ग्राह्याऽग्राह्यभेदः यावन्महाप्रलयस्तावदनिवार्य एव यस्तु सर्वं प्राकृतमिदमेकमेव किमत्राग्राह्यं वाति साहसेन ग्राह्याभेदं न स्वीकरोति तस्य विपर्ययः स्यादित्याह—कल्पयित्वेति । ईश्वरः सर्वात्मा जगज्जन्तुरिदं स्वशक्तिविकारभूतमाभासं ग्रा समन्ततः ग्राह्याग्राह्यादितया भासमानम् आत्मना कल्पयित्वा यावद्वर्तते तावत् द्वैतमिदं ग्राह्यमिदमग्राह्यमिति भेदो न विरमेत् अङ्गीकार्य्य एव भवेत् हि यस्तु नाङ्गीकरोति ततो अनङ्गीकारात् अस्वात्नङ्गीकर्त्तुः अमृतबद्विषोदकपानेन अवबदग्निस्नानेन विपर्ययः शरीरनाश एव स्यादित्यर्थः ॥ १० ॥

एतत्सर्वं सुशील इत्यादिनोक्तं गृहस्थस्य यतेस्तुल्योभयोर्यथा उपलक्षणं यतेरित्युक्तिस्तवानप्रस्थस्यापि समाम्नातम् गृहस्थस्य गुरुशुश्रूषायां विकल्पं वदन् ब्रह्मचारिप्रभृतिभिर्नित्यं गुरुशुश्रूषा यथोपयोगं कार्येति द्योतयति गुरुवृत्तिरिति गुरौ वृत्तिर्वर्तनं तच्छुश्रूषेत्यर्थः गृहस्थस्य विकल्पेन बोध्या तत्र हेतुगर्भं विशेषणम् ऋतुगामिन इति आवश्यकर्तुगमनादिपरवशस्य नित्यं गुरुशुश्रूषायामावकाशाभावादित्यर्थः ॥ ११ ॥

अञ्जनं नेत्रयोः अभ्यञ्जनं शिरसः उन्मर्दश्च उन्मर्दनं शरीरस्य स्त्री च अवलेखा च इत्यादिप्रतिकृतिश्च आमिषं च तेषां द्वन्द्वैकयम् मधु मद्यं स्रगादिकान् च ये धृतव्रतास्ते त्यजेयुः ॥ १२ ॥

अङ्गैः शिक्षादिभिरुपनिषद्भिश्च सहितां त्रयीं वेदत्रयीम् द्विज स्त्रैवर्णिकः अधीत्य तदर्थं चावबुध्य ॥ १३ ॥

यदीश्वरः समर्थस्तर्हि गुरोः कामं यथेष्टं वरं दत्वा यथेष्टां दक्षिणां दत्वा गृहं प्रविशेत् गृही भवेत् विषयेभ्यो विरक्तश्चेद्वनं वनोपलक्षितं जितेन्द्रियवासयोग्यं स्थानं प्रविशेत् तत्र द्वैविध्यमाह—प्रव्रजेत् सन्यासी भवेत् तत्र वा वसेत् तत्रैव ब्रह्मचर्याश्रमे वसेत् नैष्ठिको भवेदित्यर्थः ॥ १४ ॥

भूतैः चेतनाचेतनरूपैर्भोक्तृत्वशक्तिमयैः धामभिः अधो यथाधिष्ठितैः सहाधोक्षजं सर्वभूतेषु अन्तर्विष्टमपि विभुत्वरूपस्य शक्तिद्वयं चितस्य संश्लिष्टस्य प्रवेशाद्योगात् प्रादुर्भवत्पश्येत् एकैकस्मिन् भूते चराचरभगवद्रूपाणि पश्येत् तथोक्तम्—

"द्वरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
उत्तमः पुरुषः स्त्वन्यः परमात्मेत्युदाहृतः ॥
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" ।

अग्नौ गुरौ च तदभेदेनोपासनार्थं पश्येत् आत्मनि चोपासके आपि कृतमङ्गलमूर्तिं पश्येदित्यग्न्यादिपृथक् निर्देशाभिप्रायः ॥ १५ ॥

एवंविधः विदितं विज्ञानं तत्वत्रयज्ञानं येन सः ब्रह्मचारी वानप्रस्थो वा यतिर्वा गृही वा चरन् प्रारब्धकर्मफलं भुञ्जन् परमधोक्षजं ब्रह्माधिगच्छति भगवत्प्राप्तिरूपा मुक्तिस्तत्वत्रयज्ञानपूर्वकभगवद्ध्याननिष्ठा यस्मिन्नाश्रमे भवेत्तस्ये वाश्रमिणः स्यादिति फलितोर्थः ॥ १६ ॥

भाषा टीका ।

क्योंकि ? यह निश्चित और प्रसिद्ध है, कि—स्त्री अग्नि रूप है और पुरुष घृत कुंभमय (घीके कुप्पे के समान) है, इस लिये प्रयोजन से अधिक अपनी पुत्री को भी एकांत में त्यागदे ॥ ९ ॥

ज्ञान समर्थ होकर भी भान होने वाले इस जगत को जबतक अपने मनसे द्वैत भाव से अर्थात् स्त्री पुत्रादि रूप भेद भाव कल्पना करके वर्त्तमान है, तब तक विहित कर्मों से विराम को न प्राप्त होवे क्योंकि ? विराम को प्राप्त होने से ही इसको विपर्यय है अर्थात् उत्तरोत्तर संसार है ॥ १० ॥

ये जो सुशील मितभोजी इत्यादि षष्ठ श्लोक में कहे हुए धर्म हैं, सो गृहस्थ के और यति के भी हैं, और ऋतु गामी होने से गृहस्थ को गुरुकी वृत्ति में विकल्प है ॥ ११ ॥

जो अध्ययनादि व्रत धारण करने वाले हैं उनको अंजन (काजर) अभ्यंजन, उन्मर्दन, स्त्री चित्र दर्शन, आमिष मधु माला चंदनलेप और अलंकार ये सब वर्जित हैं ॥ १२ ॥

ब्राह्मण इस प्रकार गुरुकुल वासकर षट् अङ्ग और उपनिषदों सहित वेद का यावत्प्रयोजन और बुद्धि बलके अनुसार अध्ययनकर के गुरुजीको दक्षिणा देकर गुरुकी आज्ञापाकर यथेष्ट गृहमें प्रवेश करे, यदि समर्थ होय तो आज्ञालेकर बनमें जावे अथवा संन्यास ग्रहण करे, या गुरु के समीप ही निवास करे ॥ १३ ॥ १४ ॥

अग्नि गुरु आत्मा तथा सर्वभूतों में अपने आश्रयरूप भूतों सहित अप्रविष्ट भी ईश्वर को नियमन कर्तृत्व बुद्धिसे प्रविष्ट सरीका देखें ॥ १५ ॥

इस प्रकार का ब्रह्मचारी हो वानप्रस्थ हो यति हो वा गृहस्थ

वानप्रस्थस्य वक्ष्यामि नियमान्मुनिसम्मतान् ।
यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहाञ्जसा ॥ १७ ॥
न कृष्टपच्यमश्नीयादकृष्टं चाप्यकालतः ।
अग्निपक्वमथाऽऽमं वा अर्कपक्वमुताहरेत् ॥ १८ ॥
वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान् ।
लब्धे नवेऽन्नेऽन्नाद्ये पुराणं तु परित्यजेत् ॥ १९ ॥
अग्न्यर्थमेव शरणमुटजं वाऽद्रिकन्दरम् ।
श्रयेत हिमवाय्वग्निवर्षार्कातपषाट् स्वयम् ॥ २० ॥
केशरोमनखश्मश्रुमलानि जटिलो दधत् ।
कमण्डल्वजिने दण्डवल्कलाग्निपरिच्छदान् ॥ २१ ॥
चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ।
द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रतः ॥ २२ ॥
यदा ऽकल्पः स्वक्रियायां व्याधिभिर्जरया ऽथवा ।
आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकम् ॥ २३ ॥
आत्मन्यग्नीन्समारोप्य सन्न्यस्याहंममात्मताम् ।
कारणेषु न्यसेत्सम्यक्सङ्घातं तु यथाऽर्हतः ॥ २४ ॥

भाषा टीका ।

हो ऐसे आचरण करता हुआ विज्ञान को प्राप्त होकर पर-ब्रह्म को प्राप्त होताहै ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऋषिलोकं महर्लोकम् ॥ १७ ॥

अकृष्टमकृष्टपच्यम् अकालतः पाककालात्पूर्वमेव निष्पन्नमित्यर्थः । अर्कपक्वं फलादि आहरेदश्नीयात् ॥ १८ ॥

वन्यैर्नीवारादिभिश्चरुपुरोडाशान् कालचोदितानित्यान् पुराणं पूर्वसञ्चितम् ॥ १९ ॥

हिमादीन्सहत इति तथा ॥ २० ॥

केशादीन्मलं चाप्रक्षालनेन धारयन् कमण्डल्वादींश्च दधत् ॥ २१ ॥

कृच्छ्रतस्तपःक्लेशाद्यथा बुद्धिर्न नश्येत्तथा चरेत् ॥ २२ ॥

द्वादशाब्दाद्यनन्तरमपि यदि स्वधर्मानुष्ठाने शक्तस्तर्हि वन एव वसेत् यदि तु ज्ञानाभ्यासे योग्यस्तर्हि संन्यसेदित्युत्तराध्याये वक्ष्यति तदुभयरहितस्य तु यत्कृत्यं तदाह, यदाऽकल्पोऽसमर्थः आन्वीक्षिक्यां विद्यायां ज्ञानाभ्यासे ॥ २३ ॥

अनशनादिकरिष्यतः पूर्वकृत्यमाह—आत्मनीत्यादि, यावत्समाप्ति । यथाऽर्हतो यथायोग्यं खकारणेष्वाकाशादिषु संघातं देहं न्यसेत्प्रविलापयेत् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वानप्रस्थधर्मान् वक्तुं प्रतिजानीते—वानप्रस्थस्येति । मुनीनां सम्मतान् वानप्रस्थस्य नियमान् धर्मान् वक्ष्यामि. नियमान् विशिनष्टि—यान्नियमानिह लोके ऽनुतिष्ठन् मुनिरञ्जसा ऋषीणां लोकं महर्लोकं प्राप्यं भगवल्लोकं वा गच्छेत् ॥ १७ ॥

नियमानाह—नेति । कृष्टपच्यं कृष्याद्युपायैर्निष्पन्नं शाल्यन्नादिकं नाश्नीयादन्नस्य इति शेषः । अकृष्टपक्वमपि फलमूलादिकमकालतः पाककालात् पूर्वमेव परिपाकावस्थायाः पूर्वमेव तथाग्निपक्वमामञ्च नाश्नीयात् उतापितु अर्कपक्वं सूर्यकिरणपक्वं फलादिकमेवाहरेदश्नीयात् ॥ १८ ॥

एवं वानस्थो धर्म उक्त अथावश्यकान् नियमानाह-वन्यैरिति । वन्यैर्नीवारादिभिश्चरुपुरोडाशान् कालचोदितानित्यान्निर्वपेत् नीवारादिनिष्पन्नैरेव चरुपुरोडाशैर्यथोदितधर्मान् कुर्यादित्यर्थः । नवेऽन्ने नूतनेऽन्नाद्येऽन्ने लब्धे पुराणं पूर्वसञ्चितमन्नाद्यं परित्यजेत् ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अभ्यर्थमग्नीनां रक्षणार्थमेव उटजं पर्णशालात्मकं शरणं स्वगृहं कुर्यादथवाद्रिकन्दरं पर्वतगुहां वा श्रयेत स्वयन्तु हिमं च वायुश्चाग्निश्च वर्षश्च सूर्यातपश्च तान्सहत इति हिमवाय्वग्निवर्षार्कातपषाट् ॥ २० ॥

जटाः सम्यक्स्येति तादृशः केशादीन् देहमलश्चाघमर्षणेन धारयन् कमण्डलवादींश्च दधदग्निपरिच्छदाः स्रुक्स्रुवाद्युपकरणानि च दधत् ॥ २१ ॥

कृच्छ्रतः क्लेशाद्यथा बुद्धिर्न विपद्येत न नश्येत् तथा द्वादशाब्दान् संवत्सरानष्टौ वा चतुरो वाब्दौ द्वौ वा एकं वा चरेन्नियमानिति शेषः ॥ २२ ॥

यदा द्वादशाब्दाद्यनन्तरं व्याध्यादिभिरुत जरया वा स्वक्रियायां स्वकीयधर्माचरणे आन्वीक्षिक्यामात्मविचाररूपायां विद्यायां तुरीयाश्रमधर्मे चाशक्तस्तदाऽनशनादिकमादिशब्देनाग्न्यारोपणादिकं वक्ष्यमाणं विवक्षितं तत्कुर्यात् ॥ २३ ॥

तदेवाह—आत्मनीति । अग्नीनात्मनि समारोप्याहङ्कारममकारौ संन्यस्य त्यक्त्वा यथायोग्यं स्वस्वकारणे संघातं भूतसंघातरूपं शरीरेन्द्रियजातादिकं सम्यक् न्यसेल्लीनमनुसन्दधीत ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्मचारिवानप्रस्थनियमानां कृच्छ्रसाध्यत्वेन साऽवात्प्रथमाश्रमधर्मकथनानन्तरं वानप्रस्थधर्मानाह—वानप्रस्थस्येति । ऋषेः सर्वज्ञस्य लोकं वैकुंठं "त्वमग्ने प्रथमो अङ्गिरसः" इति श्रुतेः "ऋषिर्हरौ तापसे च ज्ञानवत्यपि कीर्तितः" इति ॥ १७ ॥

कृष्टपच्यं कर्षणादिना पक्वं व्रीह्यन्नं अकालतो विहितकालमुल्लङ्घ्य आममग्न्यादिनाऽनाप्तपाकम् आमलकादि ॥ १८ ॥

वन्यैर्नीवाराद्यादिभिः कालचोदितान् तत्तत्कालविहितान् ॥१९॥

अभ्यर्थमग्निरक्षार्थम् उटजं पर्णशालां शरणं गृहं अन्यदा हिमादिकं श्रयेत आतपनमातपः ॥ २० ॥

अग्निपरिच्छदा दर्भादयः ॥ २१ ॥

न विपद्येत क्लिष्टो न भवेत् ॥ २२ ॥

अकल्पोऽसमर्थः आन्वीक्षिक्यां आत्मविचारलक्षणायाम् अनशनमशनत्यागः तत्राशक्तौ मासे गते पक्षे वा दिवसे वा ऽश्नीयादित्यादिकमादिपदेन गृहीतं यथाह, याज्ञवल्क्यः "पक्षे गते वा प्राश्नीयान्मासे वाऽहनि वा गते" इति ॥ २३ ॥

म्रियमाणेन पुरुषेणा ऽध्यात्मं कार्यकारणजातं यत्तत्तद् कार्यमेतस्मिन्कारणे विलीयत इति ध्यानं कर्तव्यमित्यभिप्रायेणाह, कारणेष्विति । सङ्घातं कार्यजातं न्यासो ज्ञानपूर्वकं ध्यानं "कार्यस्य कारणलयज्ञानमात्रं विलापनम्" इति वचनात् ॥ २४ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अकालतः पाककालात्पूर्वमेव पक्वमित्यर्थः ॥ १८ ॥

वन्यैः नीवारादिभिः निर्वपेत् दद्यात् कालचोदितान् विहितान् ॥ १९ ॥

हिमादीन् सहत इति सः ॥ २० ॥

नखानि दन्ताद्यधावनोत्थानि ॥ २१ ॥

यदा द्वादशाब्दादि मध्य एव अकल्प- असमर्थः आन्वीक्षिक्यां ज्ञानाभ्यासे ॥ २२—२३ ॥

अनशनादिकरिष्यतः पूर्वकृत्यमाह—आत्मनीत्यादि, यावत् समाप्ति । यथार्हतः यथायोग्यं स्वकारणेष्वाकाशादिषु सङ्घातं देहं न्यसेत् प्रविलापयेत् ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ऋषिलोकं महरादिलोकं सकामश्चेद्गच्छेत् उक्तरीत्या अधोक्षजध्याननिष्ठस्य तु मुक्तिरुक्तैवेति विवेकः ॥ १७ ॥

कृष्टपच्यं कृष्या निष्पन्नं नाश्नीयात् अकृष्टमकृष्टपच्यमपि फलादिकमकालतः पक्वं नाश्नीयात् वन्यैर्वनोद्भवैः फलादिभिः कालचोदितान् कालेकाले विहितान् चरुपुरोडाशान्० निर्वपेत् दद्यात् पुराणं पूर्वसञ्चितम् ॥ १८ ॥ १९ ॥

स्वयं हिमादीन् सहते इति तथा अग्न्यर्थे तु शरणं वृष्ट्यादिनिवारकं गृहमुटजम् पर्णादिनिर्मितमद्रिकन्दरम् वा श्रयेत् ॥ २० ॥

जटाः सन्त्यस्येति जटिलः केशादीन् मलं चोत्सर्जमाना घकर्षणेन कमण्डलवादीन् अग्निपरिच्छदान् स्रुक्स्रुवादीन् दधत् चरेदित्युत्तरेणान्वयः ॥ २१ ॥

द्वादशाब्दान् अष्टौ वा चतुरो वा एकमब्दं वा यथा कृच्छ्रतः क्लेशाद्बुद्धिर्न विपद्येत नावसीदेत् तथा वने चरेत् विचरेत् ॥ २२ ॥

यदा स्वक्रियायां स्वनियमे अकल्पः असमर्थः स्यात्तदा आन्वीक्षिक्यां ज्ञानाभ्यासे यत्नेन अनशनादिकं वा कुर्यात् ॥२३॥

अनशनादिकं करिष्यतः पूर्वकृत्यमुपदिशति—आत्मनीत्यादिना । आत्मनि अग्नीन्समावेश्य प्रत्यहं पूज्यानग्नीन्परमपूज्ये आत्मनि परमात्मनि विसृज्य यथार्हतो यथायोग्यं स्वकारणेषु आकाशादिषु सङ्घातं देहं न्यसेत् प्रविलापयेत् लीनं भावयेत् ॥ २४ ॥

———

भाषा टीका ।

नारदजी बोले, कि—अब हम मुनि संमत वानप्रस्थों के, उन नियमों को कहते हैं, जहां पर मनन शील होकर जिन के अनुष्ठान करने से ऋषि लोक को प्राप्त होता है, ॥ १७ ॥

खे खानि वायौ निश्वासांस्तेजस्यूष्माणमात्मवान् ।
अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम् ॥ २५ ॥
वाचमग्नौ सवक्तव्यामिन्द्रे शिल्पं करावपि ।
पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥ २६ ॥
मृत्यौ पायुं विसर्गं च यथा स्थानं विनिर्दिशेत् ।
दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचम् ॥ २७ ॥
रूपाणि चक्षुषा राजन् ! ज्योतिष्यभिनिवेशयेत् ।
अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥ २८ ॥
मनो मनोरथैश्चन्द्रे बुद्धिं बोध्यैः कवौ परे ।
कर्माण्यध्यात्मना रुद्रे यदहम्ममता क्रिया ।
सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥ २९ ॥
अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुम् ।
कूटस्थे तच्च महति तदव्यक्ते ऽक्षरे च तत् ॥ ३० ॥
इत्यक्षरतया ऽऽत्मानं चिन्मात्रमवशेषितम् ।
ज्ञात्वा ऽद्वयो ऽथ विरमेद्दग्धयोनिरिवानलः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम् वैयासिक्यां
सप्तमस्कन्धे युधिष्ठिरनारदसम्वादे आश्रमधर्मो नाम
द्वादशोऽध्यायः ॥ १२ ॥

भाषाटीका ।

वानप्रस्थ, जोतने बोने से पैदा हुए अन्न को न भोजन करे, और बिना जोते बोये होने वाले को भी यदि बिना समय का हो, तो वर्जन करे, अग्नि पक्व वा कच्चा वा सूर्य के तेज से पक्व हो उसका आहार करे, ॥ १८ ॥

वन में स्वयं उत्पन्न होने वाले नीवारादि धान्य से समय २ पर शास्त्र विहित पुरोडाशादि का निर्वाप करे, नये २ अन्नादि के प्राप्त होने पर पुराने संचय का त्याग करता जावे ॥ १९ ॥

अग्नि की रक्षा मात्र के लिये कुटी वा पर्वतादि की कंदरा (गुहा) का शरण ले, और आप तो स्वयं हिम वायु अग्नि वर्षा सूर्य का आतप (घाम) इन सबों को सहे ॥ २० ॥

केश मस्तक पर रोम शरीर पर, नख डाढी मूँछ, और शुष्क स्नान से शरीर पर मैल, जटा कमण्डलु मृग-चर्म दण्ड वल्कल और अग्नि के उपकरण [दर्भादि] को धारण करे ॥ २१ ॥

इस प्रकार वानप्रस्थ द्वादशवर्ष आठ वर्ष चार वर्ष दो वर्ष वा एकही वर्ष वन में निवास करे जिस प्रकार अति दुःख से शरीर न नष्ट होजावे, ॥ २२ ॥

जब व्याधियों से वा जरा अवस्था से अपने क्रिया करने में असमर्थ होजावे, अथवा ज्ञानाभ्यास करने में भी अशक्त होजावे, तब अनशन व्रत को धारण करले, अर्थात् भोजनादि का त्याग करदे ॥ २३ ॥

अहंकार ममकार का त्याग कर आत्मा में अग्नि का समारोपण करके भूत संघात शरीर को अपने २ कारणों में न्यास करे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेव विभज्य दर्शयति, खे आकाशे खानि देहगतच्छिद्राणि आत्मवान्धीमान् शेषमस्थिमांसादिकाठिन्यांशम् ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं स्थूलशरीरस्य लयमुक्त्वा लिङ्गशरीररूपस्याध्यात्मादित्रयस्य लयमाह—वाचमित्यादिना । तत्र यद्यपि यथोक्तं लयस्य युक्तत्वादध्यात्मादीनां स्वस्वकारणेषु राजसाहङ्कारादिषु लयो वाच्यस्तथापीह तेषां लयभावने धर्मान्तरीणात्मप्रतिपत्तिपरेति यथाकथञ्चिल्लये भाव्ये देवतानां प्रवर्तकत्वेन प्राधान्यादिन्द्रियतद्विषययोर्देवतासु लयः कथ्यते वक्तव्यसहितां वाचमग्नौ न्यसेत् एवं सर्वत्र पदानि पादौ वयसि विष्णौ ॥ २६ ॥

मनादेन शब्देन सह अध्यात्मनि वायौ अध्यात्मनिविदीति पाठे वायाविति ज्ञातव्यम् ॥ २७ ॥

ज्योतिष्यादित्ये रूपाणि रसगन्धयोस्त्विन्द्रियाद्याकर्षकत्वेन प्राधान्यविवक्षया देवतासहितस्येन्द्रियस्य विषये लयमाह, प्रचेतसा सह जिह्वां रसनमप्सु रसरूपासु घ्राणशब्देनाश्विनोरप्युपलक्षणं अश्विभ्यां सह घ्राणं ग्रैवैर्गन्धैरुपलक्षितायां क्षिताविति अर्थः ॥ २८ ॥

परे कर्त्रौ ब्रह्मणि अध्यात्मनाऽहङ्कारेण अध्यात्मतामितिपाठे कर्माण्यहङ्कारं चेत्यर्थः कथम्भूतं रुद्रं यद्यस्मादहंममतापूर्विका क्रिया भवति तस्मिन् सत्त्वेन चेतनया गुणैर्गुणत्रयकार्यैः प्रागवशिष्टैर्वैः सह । यद्वा सत्त्वादिभिर्गुणैर्हेतुभूतैः वैकारिकं भोक्तृत्वादिविकारवन्तं क्षेत्रज्ञं परे निर्विकारे ब्रह्मणि ॥ २९ ॥

ननु, विकारवतः कथं परेऽविकारे लयः स्यात् ? विकारहेतूनां सर्वोपाधीनां लयद्वारेणेत्याह—महीमिति । अदो ज्योतिः तच्च नभः कूटस्थे ऽहम्तत्त्वे तच्च कूटस्थं महति महत्तत्त्वे तदव्यक्ते प्रधाने तच्चाऽव्यक्तमक्षरे परमात्मनि ॥ ३० ॥

इति सर्वोपाधिलयाद्वैतोरवशेषितं चिन्मात्रमात्मानं क्षेत्रज्ञमक्षरतया ज्ञात्वाऽद्वयः सन्विरमेत् दग्धकाष्ठो यथाऽनलः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव सविस्तरमाह—खमित्यादिना । खे आकाशे खानि शरीरगतच्छिद्राणि प्रलीनानि भावयेत् निश्वासान् देहगतानुच्छ्वासादीन् प्राणान् वायौ तथा ऊष्माणं तेजसि न्यसेत् आत्मवान् धीमान् असृग्रुधिरं च श्लेष्म च पूयं मूत्रादिकं चेत्येतान्यप्सु शेषमास्थिमांसादिकं कठिनांशं क्षितौ इत्येवं यथोद्भवं यद्यत उत्पन्नं तथा तदनतिक्रमेण स्वकारणेषु प्रलीनानि अनुसन्दधीत ॥२५॥

एवंभूतसङ्घातात्मकशरीरावयवानां यथोद्भवं स्वस्वकारणे लयाऽनुसन्धानमुक्तमथ सव्यापाराणां वागादीन्द्रियाणां स्वाऽधिदैवतेषु लयानुसन्धानप्रकारमाह—वाचमिति । यद्यप्यधिदैवतेभ्यो नेन्द्रियाणामुत्पत्तिरिति तत्र तेषां लयाऽनुसन्धानकथनमसङ्गतं तथापि तेषां तत्प्रवर्तकत्वेन प्रधान्यात्तैस्तावत्संश्लेषाऽनुसन्धानं तेषामपि स्वकारणे लयानुसन्धानाय कथ्यते—वक्तव्यमुक्तिः भावे तव्यः सवक्तव्यां सोक्तिकां वाचं वागिन्द्रियमग्नावधिदैवते विनिर्दिशेदित्युत्तरेणान्वयः । करौ शिल्पमादानादिरूपं व्यापारं चेन्द्रे तदधिदैवते गत्या सह पादौ वयसि कालात्मके विष्णौ रत्या सहोपस्थमिन्द्रियं प्रजापतावधिदैवते ॥ २६ ॥

सोत्सर्गं पुरीषोत्सर्गादिव्यापारसहितं अपानं पायुमिन्द्रियं मृत्यावधिदैवते यथास्थानं यत् यस्याधिदैवतरूपं स्थानं तदनतिक्रमेण निर्देशेत् संश्लिष्टमनुसन्दधीत एवं कर्मेन्द्रियाणां तदधिदैवते संश्लेषाऽनुसन्धाने क्रम उक्तः । अथ श्रोत्रादीनामिन्द्रियाणामाह, दिक्ष्विति । श्रोत्रमिन्द्रियं नादेन शब्देन विषयभूतेन सह दिक्षु अधिदेवतासु त्वचमिन्द्रियं स्पर्शेन विषयेण सहाध्यात्मनि वायावधिदैवते; हे राजन् ! चक्षुरिन्द्रियेण सह रूपाणि तद्विषयभूतानि ज्योतिषि सूर्येऽधिदैवतेऽभिनिवेशयेदभिनिविष्टं संश्लिष्टं भावयेत् ॥ २७ ॥

जिह्वां रसनेन्द्रियमप्सु रसेषु विषयभूतेषु अप्शब्दो रसोपलक्षकः प्रचेतसा वरुणेनाऽधिदैवतेन सहाभिनिवेशयेदित्यनुषङ्गः अपाणां संश्लेषमात्रविवक्षया प्रचेतसेत्यप्रधाने तृतीया ग्रैवैर्गन्धैर्विषयैः सह घ्राणमिन्द्रियं क्षितौ क्षितिशब्दोपलक्षितयोरश्विनोर्न्यसेत् मनोरथैर्व्यापारैः सह मन इन्द्रियं चन्द्रेऽधिदैवत बोध्यैर्विषयैः सह बुद्धिं परे श्रेष्ठे कवौ चतुर्मुखेऽध्यात्मना आत्मनि देहेवर्तमानेनाहङ्कारेण सह तत्कर्माणि देहात्माभिमानादिरूपाणि अहङ्काराधिदैवते रुद्रे निन्यसेत् अहङ्कारकर्माण्येव दर्शयति, यद्यस्मादहंकारात् अहंममतेति क्रियाः । देहेऽहंबुद्धिर्देहानुबन्धिषु ममकारस्तन्मूलाः क्रियाः प्रवृत्तयश्च भवन्ति चित्त चित्तावस्थमन्तःकरणं सत्त्वेन सत्त्वगुणकार्यभूतस्वच्छत्वप्रकाशत्वादिरूपचित्तवृत्त्या सह क्षेत्रज्ञेऽधिदैवते न्यसेत् ततो वैकारिकं सात्त्विकाहङ्कारं गुणैः स्वकार्यभूतैरिन्द्रियैः सह परे तत्कारणे महत्तत्त्वे न्यसेत् ॥ २८ ॥ २९ ॥

एवं वैकारिकाहङ्कारस्य महति लयाऽनुसन्धानमुक्तं पूर्वं खे खानीत्यादिना तत्तत्कार्यप्रलयानुसन्धानमुक्तम् अथ तत्त्वैः सह तत्कारणभूतस्य तामसाहङ्कारस्य महति लयाऽनुसन्धानप्रकारमाह—महीमित्यादिना । तावत्क्षितिमप्सु आपो ज्योतिषि अदः ज्योतिर्वायावमुं वायुं नभसि आकाशे तच्च कूटस्थे तामसाहङ्कारे तच्च महति महत्तत्त्वे तच्च महत्तत्त्वम् अव्यक्ते चित्समष्टिसंसृष्टे अचित्समष्ट्यात्मके प्रधाने तच्चाक्षरे परमात्मात्मके जीवे न्यसेत् ॥ ३० ॥

अत एवमवशेषितं प्रत्यगात्मानमक्षरतया परमात्मशरीरात्मकत्वस्वाभाविकस्वरूपतया ज्ञात्वाऽद्वयः आत्मनि जातिगुणाद्यभिमानरहितः विरमेत् दग्धयोनिर्निर्दग्धकाष्ठोऽनलोऽग्निर्यथा विरमति तद्वत् धर्मानुष्ठाने ऽशक्तो वानप्रस्थ एवमनुसन्दधानो देहत्यागायानशनव्रतं कुर्यादित्यर्थः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

'यथाहैत इत्युक्तं विवृणोति—खे वायूनिति । खे आकाशे खानि शरीरावच्छिन्नाकाशानि श्वासं शरीरवायुं बाह्यवायौ शारीरमूष्माणं कारणतेजसि आत्मवान् परमात्मज्ञानवान् वशीकृतमना वा श्लेष्मपूयासृक्कार्याण्यप्सु लीयन्त इति चिन्तयेत् शेषं गन्धं क्षितौ । नन्वाकाशादेर्वाय्वादीनामुत्पत्तेः कथमियत्तामेव लयश्चिन्त्यत इति तत्राह—यथोद्भवमिति—

"आकाशाल्लाघवं सौक्ष्मं शब्दं श्रोत्रं तथा बलम् ।
वायोस्तु प्रेरणा चेष्टा व्यूहनं सौक्ष्म्यमेव च ॥
अग्नेस्तु दर्शनं शक्तिरौष्ण्यं रूपप्रकाशकम् ।
रसेभ्यो रसनं शैत्यं स्नेहक्लेदनमार्दवम् ।
भूमेर्गन्धस्तथा घ्राणं गौरवं मूर्तिरेव च" ॥

इति वचनात् उत्पत्त्यनुसारेण लयश्चिन्तनीय इत्यर्थः ॥ २५ ॥

इदानीं वागादीन्द्रियाणां अग्न्यादिदेवताधीनत्वमपि चिन्तनीयमित्याह—वाचमिति । सवक्तव्यमिति क्रियाविशेषणं प्रजापतौ दक्षे ॥ २६ ॥

यथास्थानमित्यनेनाभिमानिनामभिमन्यमानानां तत्तदुत्पत्तिकारणमनुसृत्येत्युच्यते समादेन श्रोतव्येन सह त्वचं त्वगिन्द्रियं स्पर्शेन सह वायाविति शेषः ॥ २७ ॥

ज्योतिष्यादित्ये निवेशयेत् निविशतीति चिन्तयेत् जिह्वां रसनेनेति शेषः परे कवौ बृहस्पतौ उशनसोऽपि कविशब्दवाच्यत्वात्तद्व्यावृत्त्यर्थं पर इति अध्यात्मनाऽहङ्कारेण सह कर्माणि रुद्रे तत्र हेतुर्यदहमिति क्रिया यत् अहं संमता अहङ्कारादुत्पन्नत्वेन संमता इति यत्तस्मादिति शेषः सत्त्वेन साधुपुण्यकर्मणा सह चित्तं क्षेत्रज्ञे हिरण्यगर्भे निवेश्य एतल्लक्षणां विलयं स्मृत्वा वैकारिकनामानं हिरण्यगर्भं गुणैः सह क्षेत्रज्ञाख्ये परे परमात्मनि लक्ष्मीद्वारा लयमार्गं चिन्तयेत्—

"चित्तं हिरण्यगर्भे तु विलाप्य परमात्मनि ॥
क्षेत्रज्ञाख्ये लापयेच्च ततोनान्यत्स्मरेद्बुधः"

इति वाक्यमानम् ॥ २८ ॥ २९ ॥

इदानीमवाशिनां लयप्रकारं निरूपयति—अग्निरिति । तत्र नभः कूटस्थे वैकारिकतैजसतामसकूटरूपे ऽहङ्कारतत्त्वे नदहङ्कारतत्त्वं महति महत्तत्त्वे तन्महत्तत्त्वमव्यक्ते तदव्यक्तमक्षरे हरौ विलयप्रकारं स्मरेत् अत्रस्य स्वकारणैकत्वमभिमानिनो जीवस्य प्रवेशलक्षणं तत्तत्कार्यस्य हिरण्यगर्भस्योत्तररूपेणैक्यं हिरण्यगर्भस्य हरेरप्युत्तरोत्तररूपैकीकरणमिति लयभेदं तु शब्दो ज्ञापयति ॥ ३०

. इति शब्दो लयसमाप्तिसूचकः "कूटस्थोऽक्षर उच्यते" इति वचनात् अक्षरनाम्न्यां चित्प्रकृतौ स्थित्वा ऽक्षरलक्षणानित्यत्वहेतुत्वादक्षरनामत्वेन स्थितमात्मानं परमात्मानं चिन्मात्रमवशेषिते सुप्त्यादिव्यापारोदासीनं ज्ञात्वा ऽद्वयो हरिव्यतिरिक्तवस्तुज्ञातव्यस्मरणरहितो ऽग्र कृत्याद्विरमेदित्यन्वयः कृत्याद्विरमोऽकिरत्र कथमित्याह—दग्धयोनिरिति । दग्धयोनिरिन्धनक्षयाद्येन स तथा यथाऽग्निरिन्धनक्षयनात्परं कृत्यं नास्ति तथा श्रीनारायणोपासकस्य साक्षात्कारं तत्त्वज्ञानात्परं कृत्यं नेति भावः "न हरिस्मरतः कृत्यं दग्धेन्धनहुताशवत्" इति वचनात् ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

खानि देहच्छिद्राणि अभिनिवेशयेदित्युत्तरेणैव सर्वेषामन्वयः शेषं अस्थिमांसादिकाठिन्यांशम् ॥ २५ ॥

स्थूलशरीरस्य लयमुक्त्वा लिङ्गशरीरलयमाह—वाचमिति । इन्द्रियाणां तद्विषयाणां प्रवर्तकत्वेन देवतास्वेवात्र लय उक्तः, वयसि विष्णौ यथास्थानं स्थानमनतिक्रम्य तत्तत् स्थानं स्पृष्ट्वा विनिर्दिशेत् प्रथमं इमं वाचमग्नौ विलापयामीति प्रयुञ्जीत ततोऽभिनिवेशयेदित्यन्वयः ॥ २६ ॥

स ज्ञानी नादेन सहेत्यर्थः अध्यात्मनि वायौ ज्योतिषि सूर्ये ॥२७॥

प्रकृष्टं चेतो यत्र स प्रचेतास्तं मधुरादिरसवत्तेन सह जिह्वां अप्सु जलाधिष्ठातरि वरुणे प्रवेशयेद्विविधगन्धैः सह घ्राणेन्द्रियं क्षितौ क्षीयते क्षीयते ऽत्रेति क्षितिस्तदधिष्ठातृदेवता तस्यामश्विनाविव्यर्थः । मनोरथैर्मननीयैर्विषयैः बोध्यैर्बुद्धिं विषयैः परे कवौ ब्रह्मणि अध्यात्मना अहङ्कारेण सहकर्माणि तद्विषयान् रुद्रे यद्यस्मादहं ममता पूर्विका क्रिया भवति तस्मिन् रुद्रे सत्त्वेन चेतनया सह क्षेत्रज्ञे चित्ताधिष्ठातरि वासुदेवे गुणान्गुणकार्यैर्देवैः सहेति वासुदेवस्य गुणकार्यत्वाभावादिति नैरित्यर्थः । वैकारिकं जीवं परे ब्रह्मणि ॥ २८—२९ ॥

ननु, तदपि कथमष्टधाभ्यानं, स्यात्? समष्टिमत्त्वानां पृथिव्यादीनां वर्तमानत्वादिति चेत्तेषामपि यथोद्भवं लयं भावयन् एवेत्याह—अग्निरिति । अग्नौ ज्योतिः अमुं वायु तत्र नभः कूटस्थं ऽहङ्कारे तत्र कूटस्थं महति महत्तत्त्वे नदव्यक्ते प्रधाने तदक्षरे परमात्मनि ॥ ३०—३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमे द्वादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं स्थूलदेहत्रयमुक्त्वा सूक्ष्मदेहावयवानां सविषयाणामिन्द्रियाणां तत्तत्प्रवर्तके तत्तदधिदैवते तत्तल्लिवमन्ततया सम्बन्धमात्रं सूचयन् तत्प्रकारमेव माह—वाचमिति त्रिभिः । वागादिकं वक्तव्यादिसहितमग्न्यादौ प्रवर्तके नियम्यतया विनिर्दिशेत् यथास्थानम् उत्पत्तिस्थानमनतिक्रम्याभिनिवेशयेव चिन्तीनं भावयेदिति यथाक्रमान्वयः । अग्न्यादयुत्पत्तिस्थानं सात्त्विकाहंकारस्तेषां वयं तत्र भावयेत् वागादीनामुत्पत्तिस्थानं राजसाहंकारस्तेषां वयं तत्र भावयेत् अथ पदयोजना सवक्तव्यां वाचमग्नौ अधिदैवते नियम्यतया विनिर्दिशेत् यथास्थानमभिनिवेशयेच्च एवमग्रेपि पदानि पाद्यौ गतसिविष्णौ ॥ २६ ॥

सनादेन शब्देन सह अध्यात्मनि अधिदैवते वायौ ॥ २७ ॥

ज्योतिषि आदित्ये अप्सु रसरूपं सलोलुपं जिह्वां रसनेन्द्रियं प्रचेतसा अधिदैवतेन प्रवर्त्यां यथास्थानं निवेशयेत् प्रेयैर्गन्धैः सघ्राणाम् अधिदैवतं क्षितौ उत्पत्तिभूमौ राजसाहंकारे एव ॥ २८ ॥

अन्तःकरणस्य चतुर्विधस्य लयं सात्त्विकाहङ्कारे आह—मन इति । मनः मनोरथैः सह चन्द्रे बोधैः सह बुद्धिं परे कवौ ब्रह्मणि च कर्माणि अहङ्कारविषयाणि अध्यात्मना अहंकारेण सह यदस्माद्रुद्रात्प्रवर्तकादहंममतापूर्विकाक्रिया भवति तस्मिन् रुद्रे च चित्तं गुणैश्चित्तविषयभूतैः सह क्षेत्रज्ञे च नियमतया स्थितं विभाव्येति शेषः सत्त्वेन वैकारिकाहंकारेण कारणेन योजयेदिति शेषः अन्तःकरणचतुष्टयं वैकारिके अभिनिवेशयेदित्यर्थः । वैकारिकं तु परे तत्कारणे महत्तत्त्वे योजयेदित्यर्थः ॥ २९ ॥

महाभूतानां तामसाहंकारे तस्य महत्तत्त्वे तस्य प्रकृतौ प्रकृतेः परमात्मनि च लयमाह—अप्स्विति । क्षित्यादिभूतानि अबादिषु न्यसेत् कूटस्थे तामसाहङ्कारे अव्यक्ते प्रकृतौ तत्तदव्यक्तमक्षरे परमात्मनि न्यसेत् चकारोऽनुक्तसमुच्चयार्थः ॥ ३० ॥

इत्येवं दग्धयोन्यनल इवात्मवः देहेन्द्रियादिद्वयरहितोऽत एवावशेषितं चिन्मात्रं ज्ञानस्वरूपमात्मानं जीवं अक्षरतया परमात्मांशत्वेन तदपृथक्तयाज्ञात्वा विरमेत् मुक्तो भवेत् ॥ ३१ ॥

इतिश्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्वादशोऽध्यायः ॥ १२ ॥

भाषा टीका ।

जैसे कि ! छिद्रों को आकाश में श्वासों को वायु में, उष्णता को तेज में, रुधिर कफ पीवको जल में बाकी पृथिवी के विकार अस्थि आदि को पृथिवी में इस प्रकार जो जहां से उत्पन्न है उसको उसी तत्त्व में लीन होने का अनुसन्धान करता जाय ॥ २५ ॥

ऐसे ही वक्तृता सहित वाणी को अग्नि में शिल्प अर्थात् हस्तों के कर्म सहित हस्तों को इन्द्र में पाद के कर्म गति सहित पगों को पद के अधिष्ठातृ देवता विष्णु में, आनंद सहित उपस्थ इन्द्रिय को प्रजापति में निर्देश करे, ॥ २६ ॥

विसर्ग सहित पायु (गुदा) इन्द्रिय को मृत्यु में यथा स्थान निर्देश करे, शब्द सहित श्रोत्र इन्द्रिय को दिशाओं में स्पर्श सहित त्वचा को वायु में लीन होने का अनुसन्धान करे, ॥ २७ ॥

चक्षु इन्द्रिय सहित रूपको ज्योति में, प्रचेता सहित जिह्वा को जल में अश्विनी कुमार सहित नासिका को पृथिवी में लीन करे ॥ २८ ॥

मनोरथ सहित मनको चन्द्र में, बोध सहित बुद्धि को ब्रह्मा में, अध्यात्म सहित कर्मों को रुद्र में वे रुद्र कैसे हैं अहङ्कार ममकार जिनसे होता है, सत्त्व के सहित चित्त को क्षेत्रज्ञ मे और क्षेत्रज्ञ जीवको परब्रह्म में लीन माने यहां लीन होना ऐसा समुझना चाहिये कि जैसे वृक्ष में पक्षी लीन होजाते हैं अर्थात् पृथिवी को जल में जलको तेज में तेज को वायु में वायु को आकाश में आकाश को अहङ्कार में अहङ्कार को महत्तत्त्व में महान् को प्रकृति में प्रकृति को परमेश्वर में लीन भावना करे ॥ ३० ॥

इस प्रकार चैतन्यमात्र अवशिष्ट अक्षर आत्मा को जानकर तदनंतर अद्वितीय आपही एक विराम को प्राप्त होजावे, जैसे कि ? काष्ठ के जलजाने से अग्नि आपही शांत होजाती है ॥ ३१ ॥

इति श्रीमद्भागवत महापुराण सप्तमऽस्कन्ध में द्वादशअध्याय की भाषाटीका समाप्त ॥ १२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

॥ त्रयोदशोऽध्यायः ॥

नारद उवाच ।

कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ।
ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीम् ॥ १ ॥
बिभृयाद्यद्यसौ वासः कौपीनाच्छादनं परम् ।
त्यक्तं न दण्डलिङ्गादेरन्यत्किञ्चिदनापदि ॥ २ ॥
एक एव चरेद्भिक्षुरात्मारामोऽनपाश्रयः ।
सर्वभूतसुहृच्छान्तो नारायणपरायणः ॥ ३ ॥
पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये ।
आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥ ४ ॥
सुप्तप्रबोधयोः सन्धावात्मनो गतिमात्मदृक् ।
पश्यन्बन्धं च मोक्षं च मायामात्रं न वस्तुतः ॥ ५ ॥
नाभिनन्देद्ध्रुवं मृत्युमध्रुवं वाऽस्य जीवितम् ।
कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययम् ॥ ६ ॥
नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम् ।
वादवादांस्त्यजेत्तर्कान्पक्षं कं च न संश्रयेत् ॥ ७ ॥
न शिष्याननुबध्नीत ग्रन्थान्नैवाभ्यसेद्बहून् ।
न व्याख्यामुपयुञ्जीत नारम्भानारभेत्क्वचित् ॥ ८ ॥
न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः ।
शान्तस्य समचित्तस्य बिभृयादुत वा त्यजेत् ॥ ९ ॥
अव्यक्तलिङ्गो व्यक्तार्थो मनीष्युन्मत्तबालवत् ।
कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणाम् ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोदशे यतेर्धर्मः साधकस्योच्यते महान् ।
अवधूतेतिहासेन सिद्धावस्था च वर्ण्यते ॥ १ ॥

एवं ध्यात्वा कल्पो नाशनादिकं कुर्यात् आन्वीक्षिक्यां कल्पस्त्वेवं ध्यात्वा परिव्रजेदिति सम्बन्धः । किमवशेष्यम् देहव्यतिरिक्तं सर्वमित्याह—देहमात्रेति । तस्य धर्मानाह ग्रामैकरात्रेति नवभिः ॥ १ ॥

कौपीनं गुह्यमाच्छाद्यते यावता तावन्मात्रं परं केवलमभ्यधिकं वा त्यक्तं प्रैषोच्चारणात्पूर्वमेव ॥ २ ॥ ३ ॥

सदसतः परे कार्यकारणव्यतिरिक्ते ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वात्मानं परं ब्रह्मेति कथं सामानाधिकरण्यनिर्देशः ? नहि बद्धमुक्तयोरैक्यं सम्भवति तत्राह—सुप्तेति । सुषुप्तौ हि तमसावृतमात्मतत्त्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते सन्धौ तु न तमो नापि विक्षेपः अतस्तदा आत्मन्यात्मानं लक्षीकृत्य स्थितः सन्नात्मनो गतिं तत्त्वं पश्यन् अत एव बन्धं मोक्षं च माया मात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः तदुक्तं योगग्रन्थे—

"निद्रादौ जागरस्यान्ते यो भाव उपजायते ।
तं भावं भावयन्नित्यं मुच्यते नेतरो यतिः" ॥

इति ॥ ५ ॥

अस्य देहस्य प्रभवो ऽप्ययश्च यस्मात्तं कालम् ॥ ६ ॥

असच्छास्त्रेष्वनात्मपरेषु जीविकां नक्षत्रविद्यादिवृत्तिम् वादवादान् जल्पवितंडादिनिष्ठान् कञ्च कमपि पक्षं निर्बन्धेन न संश्रयेत् ॥ ७ ॥

शिष्याननुबध्नीत प्रलोभनादिना बलान्नापादयेत् आरम्भान् मठादिव्यापारान् ॥ ८ ॥

परमहंसस्य विशेषमाह—न यतेराश्रमो धर्मार्थः कथम्भूतस्य यतेः महात्मनः तस्य लक्षणं शान्तस्येत्यादि प्राय इत्यस्यायं भावः ज्ञानोत्पत्तिपर्यन्तं बहूदकादिविक्रमाश्रित्य सत्त्वशुद्ध्यर्थं यमान्नियमांश्चाचरन्नेव ज्ञानोत्पत्तौ यतेत उत्पन्ने तु ज्ञाने न नियमैः कृत्यमस्ति यमाश्च स्वत एव स्युः अतस्तदा लिङ्गादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारयेद्वा त्यजेद्वेति ॥ ९ ॥

तस्यैव ज्ञानदार्ढ्याभावे योगभ्रंशपरिहारार्थमाह—न बहिर्व्यंक्तं लिंगं यस्य व्यक्तोर्थः प्रयोजनमात्मानुसन्धानं यस्य स मनीष्युन्मत्तवद्बालवच्च कविरपि मूकवदात्मानं नृणां दृष्ट्या दर्शयेत् ते यथोन्मत्तादिरूपं मन्येरंस्तथा वर्तेत ख्यापयेति पाठे वाह्यानुसन्धानाभावेनेत्यर्थः ॥ १० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं स्वधर्मानुष्ठाने तुर्याश्रमधर्मे चाशक्तस्य वानप्रस्थस्यैवमनुसंधानपूर्वकानशनव्रतेन देहत्याग उक्तः अथ तच्छक्तस्य तुर्याश्रमपरिग्रहं वदंस्तद्धर्मानाह त्रयोदशेनाध्यायेन—कल्पइति । आश्रमान्तरधर्मानुष्ठानसमर्थश्चेदेवमनुसंदधत्परिव्रज्य संन्यस्य देहमात्रमात्रावशेषितः देहातिरिक्तं तदनुबन्धि सर्वं परित्यजेत्यर्थः ग्रामैकरात्रविधिना एकैकस्मिन् ग्रामे एकैकरात्रनयनविधिना निरपेक्षो महीं चरेत् ॥ १ ॥

यद्यसौ परिव्राट् त्यक्तं देहाद्यतिरिक्तं किञ्चन बिभृयाच्चेत्तर्हि कौपीनमाच्छादने येन तच्च वासः परं केवलं बिभृयात् दण्डकमण्डलुभ्यामन्यत्किञ्चिदप्यनापदि न बिभृयात् दण्डपात्रग्रहणमुपवीतकटिसूत्रादेरप्यावश्यकस्योपलक्षणम् अनापदीत्यनेन शीताद्यसहिष्णुत्वरूपापदि तु किञ्चिच्छीतनिवारकं वासोन्तरादिकमपि बिभृयादिति सूचितम् ॥ २ ॥

अनपाश्रयः परित्यक्तनियतनिवासदेशः एकोऽसहायः भिक्षुः भिक्षोपजीवी आत्मारामश्चरेत् सर्वेति सर्वभूतेषु तरतमेषु सुहृद्भगवदात्मकत्वानुसन्धानेन नितरामनुकूलः शान्तः क्रोधरहितः नारायणएव परायणं प्राप्यं प्रापकमाधारश्चेत्यध्यवसाययुक्त इत्यर्थः ॥ ३ ॥

सदसतः चिदचिद्भ्यां परे विलक्षणेऽतएवाव्यये स्वरूपतः स्वभावतश्च विकाररहिते आत्मनि परमात्मन्यदः इदं विश्वं पश्येत् तदायत्तसत्तास्थितिप्रवृत्तिमत्त्वेन तच्छरीरत्वेन च पश्येदित्यर्थः । तथा परं ब्रह्मात्मानं परमात्मानं सदसन्मये चिदचिदात्मके सर्वत्र जगति नियंतृतयात्मतया च स्थितं पश्येदेव वासुदेवशब्दार्थानुसन्धानमुक्तम् ॥ ४ ॥

सुप्तेति । सुप्तप्रबोधयोः सन्धौ सायंप्रातरित्यर्थः यद्वा तयोस्सन्धिमध्यमावस्थायामित्यर्थः स्वप्नावस्था तदानीं शयानदेहात्मनोर्व्यतिरेकः सुग्रहः परमात्मनो विचित्रसृष्टियोगश्च "न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजते" इति श्रुतिः एवं च सुप्तप्रबोधयोः सन्धौ स्वप्नावस्थायामात्मदेहविलक्षणप्रत्यगात्मस्वरूपविमर्शनपरः आत्मनः परमात्मनो गतिं विचित्र पथरथयोगादिसृष्ट्यादिप्रकारं पश्येदनुसन्दधीत तथा बन्धं मोक्षं च मायामात्रं न वस्तुत इति पश्येत् सम्बन्धादिकमीश्वरसंकल्परूपज्ञानाधीनं नत्वात्मस्वरूपप्रयुक्तमिति पश्येदित्यर्थः । मायाशब्दश्च ज्ञानपर्यायः "माया च वयुनं ज्ञानम्" इति नैघण्टुकाः बन्धमोक्षयोश्च परमात्मसङ्कल्पाधीनत्वं सूचितम् "पराभिध्यानात्तु तिरोहितं ततोह्यस्य बन्धविपर्ययौ" इति बन्धमोक्षयोः प्रकृत्यन्वयव्यतिरेकरूपत्वाच्च मायामात्रत्वं ननु कथंमोक्षस्य स्वरूपप्रयुक्तत्वाभावः ? बन्धप्रतियोगित्वादिति ब्रूमः नह्यबद्धस्य मोक्षसंभवः ॥ ५ ॥

ध्रुवं निश्चितं मृत्युमध्रुवमस्थिरं जीवितं च नाभिनंदेन्मृत्युमितिदृष्टान्तार्थम् वा यथा मृत्युं नाभिनन्दति तथाऽध्रुवं जीवितमपि नाभिनन्देदिति परं केवलं तु भूतानां प्रभवाप्ययौ यस्मात्समुत्पत्तिप्रलयहेतुं कालमेव प्रतीक्षेत कालगतिमेवालोचयेदित्यर्थः ॥ ६ ॥

असच्छास्त्रेष्वनाध्यात्मशास्त्रेषु न सज्जेत न सक्तो भवेत् जीविकां जीवनोपायभूतां वृत्तिं नोपजीवेत् अतिवादान् जल्पवितण्डादिनिष्ठान् तर्कान् त्यजेत् कमपि पक्षमाग्रहेण नाश्रयेत् ॥ ७ ॥

शिष्याननुबध्नीत तद्वित्तलोभाभावादिति भावः बहून् ग्रन्थांश्चैवाऽभ्यसेन्नैवपठेत व्याख्यां नोपयुञ्जीत न पाठयेदित्यर्थः, चित्तस्यान्यपरत्वप्रसङ्गादिति भावः आरंभान् मठपत्याद्यारंभान् कञ्चिदपि नारभेत् न कुर्वीत निग्रहानुग्रहादिवैषम्यप्रसङ्गादिति भावः यद्वा आरम्भान् गृहाद्यारंभान्नारभेदित्यर्थः ॥ ८ ॥

शान्तस्य समचित्तस्य महात्मनो यतेराश्रमः प्रायो न धर्महेतुः अपितु ज्ञानप्रयोजकः अतो धर्मं बिभृयाद्वा त्यजेद्वा भरत्यागौ व्यवस्थितविकल्पौ ज्ञानहीनः सन्न्यासाश्रमस्थितः धर्मं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रयोजनत्वेन बिभृयात् अन्यथा तु धर्मोऽर्थं फलं त्यजेदित्यर्थः । यद्वा उपवासादिदेहक्लेशकररूपधर्मः शरीरदौर्बल्यमुखेन योगविघातको न चेत् बिभृयात् विघातकश्चेत्तं त्यजेदित्यर्थः । यद्वा ननु, शिष्यानुबन्धनग्रन्थाऽभ्यासव्याख्योपयोजनादिभिः कश्चिद्धर्म एवार्जितः स्यादिति किमर्थं ते निषिध्यन्ते ? इत्यत्राह—नेति । यदि यतेराश्रमो धर्मार्थः स्यात्तर्हि कर्तव्याः स्युः शिष्याऽनुबन्धनादयः स तु प्रायशो न धर्महेतुः यत्याश्रमस्य धर्महेतुत्वाभावे हेतुत्वं यदस्ति तं विशिनष्टि—शान्तस्येति । शान्तस्य जितेन्द्रियस्य धर्मसाध्यैहिकामुष्मिकशब्दादिविषयभोगादिविरहितस्य समचित्तस्य अधर्मस्य इव धर्मस्यापि अफलजननद्वारा मुक्तिप्रतिबन्धकत्वज्ञानवत्त्वेन धर्माऽधर्मयोः समचित्तस्य प्राय इत्यनेन कश्चिदस्याश्रमस्यापि धर्महेतुत्वमस्त्येवेति सूचितम् । अतो यदि यतिधर्मप्रयोजनकत्वाश्रमनिष्ठत्वेऽन्विष्यानुबन्धनादीन् बिभृयात् धर्महेतुत्वाभावे तु त्यजेदित्यर्थः ॥ ९ ॥

ननु, शिष्याद्यनुबन्धनाद्यभावे स्वस्य ज्ञानित्वादिमाहात्म्यं न प्रकाशितं स्यादित आह—अव्यक्तलिङ्ग इति । अव्यक्तलिङ्गो अस्फुटचिह्नः स्वमाहात्म्यमनाविष्कुर्वन् वर्तेत यतिरिति भावः तथा च शारीरकं सूत्रम् "अनाविष्कुर्वन्नन्वयात्" इति. श्रुतिश्च "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" इति बालस्य कर्म स्वमाहात्म्याऽनाविष्काररूपं बाल्यं तेन तिष्ठासेदित्यर्थः । ज्ञानित्वाद्यनाविष्काराभिप्रायेण दृष्टान्तयति—उन्मत्तबालवदिति । उन्मत्तवद्बालवच्च किञ्चाव्यक्तार्थः परैरविदितप्रयोजनः मुनिराश्रमसंशीलनशीलश्च वर्तेताऽऽश्रमसंशीलनं शुभाश्रयपरिशीलनमेतदेव "बाल्यञ्च पाण्डित्यञ्च निर्विद्याऽथ मुनिर्भवति" इति मुनिशब्देन विहितं तद्विषयकं चेदं सूत्रम् "सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् । ३ । ४।४७ ।" इति. ननु अत्र बालवदिति दृष्टान्तेन बालस्य यत्कर्म कामचारादिकं तदभिप्रेतम् "नाविरतो दुश्चरितान्नाशान्तो नाऽसमाहितः नाऽशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्" इति दुश्चरितस्य परिनिष्पन्नसाधनविरोधित्वश्रवणात् मनीष्युन्मत्तबालवदिति पाठे मनीषयुन्मत्तादिवच्चरेदिति यथोक्त एवार्थः । कविर्विद्वानपि सुनिपुणं भाषितुं समर्थोऽपि स्वमात्मानं मूकमिव नृणां दृष्टौ दर्शयेत् यथोन्मत्तादिरूपं मन्येरंस्तथा वर्तेत स्वदृष्ट्येति पाठे स्वदृष्ट्या वेदविलक्षणया स्वात्मदृष्ट्येत्यर्थः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

क्रमप्राप्तं यतिधर्मं निरूपयति—कल्प इति । एवमुक्तं कृच्छ्रं सोढुं कल्पः समर्थस्तु शब्दस्तर्हि परिव्रज्य सन्न्यस्य महीं चरेदित्यन्वयः । देहमात्रावशेषित इत्यनेन प्रव्रजनं विशिनष्टि—

"अधीतवेदो जपकृत्पुत्रवानाऽऽत्मवद्दोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यान्तु नान्यथा" ॥ इति

नियमं तुशब्देन वारयति, "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति विशेषविधानात् ब्रह्मचारिणोऽपि तुर्याश्रमग्रहणोपपत्तेरत एव कल्प इत्युक्तं कामक्रोधादिसहजशत्रुजयसमर्थ इत्यर्थः—

"उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।
वेदमध्यापयेत्पश्चाच्छौचाचारांश्च शिक्षयेत्" ॥

इति वचनात् ब्रह्मचारिणोऽध्ययनप्रारम्भेणाऽधीतवेदत्वं युज्यत इति वा सन्न्यासाश्रमश्चतुर्धाभिधाने कुटीचको बहूदको हंसः परमहंस इति तत्र परमहंसधर्मः कथ्यत इत्यर्थद्योतको वा तुशब्दो निरपेक्षः अलोलुपः ॥ १ ॥

देहमात्रावशेषित इत्यस्यापवादमाह—बिभृयादिति । यद्यसौ भिक्षुरस्तु त्यक्तं वासः परं पश्चात्प्रतिनिधिलक्षणं बिभृयाच्चेत्तुमिच्छेत्तर्हि कौपीनलक्षणमाच्छादनं बिभृयादथवा कौपीनं शीतातपनिवारकमेकमाच्छादनं च बिभृयात् परं न बिभृयादित्यर्थः—

"शीतातपनिवारार्थमेकमाच्छादनं यतेः ।
कौपीनात्परमित्याहुरेके नान्यद्विना वपुः" इति—

वचनात् कौपीनाच्छादनं चस्त्वेकवद्भावः । नन्वयं यतिरिति केन ज्ञातुं शक्यते तत्राह—न लिङ्गेति । लिङ्गदण्डाभ्यां विना किञ्चित् न बिभृयात् लिङ्गं चक्रशङ्खादिमुद्राधारणं कमण्डल्वादिकं वा "सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः" इति वचनात् वाक्कायचेतसां दमनं त्रिदण्डित्वं लिङ्गदण्डाभ्यामिति विशेषणादेक एव तु वक्ष्यमाणो दण्डोऽन्यथा परमहंसत्वं न स्यात् दण्डो वाग्देहचेतसामिति वक्ष्यति ॥ २ ॥

अनपाश्रयः ग्रामाद्यावासरहितः यथाह, याज्ञवल्क्यः—

"एकारामः परिव्रज्य भैक्षार्थं ग्राममाश्रयेत् ।
अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने ऽनुपलक्षितः" ॥

इति वचनात् ॥ ३ ॥

नारायणपरत्वं दर्शयति—पश्येदिति । अत्रो विश्वमात्मनि पश्येत् तदाधारत्वेन स्थितमिति शेषः । आत्मनीति जीवः किं न स्यादिति तत्राह—पर इति । सदसतः परं उत्कर्षवाचित्वेन विकल्पात् सर्वनामसंज्ञा नास्ति जीवस्य संसारित्वनाऽनुत्कृष्टत्वान्नैतादृशोऽन्यो इत्यत आह—ब्रह्म [illegible] नैतावता पूर्यत इत्याह, आत्मानं चेति । सर्वत्र सदसन्मये [illegible] समवस्थितमात्मानं परं ब्रह्म पश्येदीदृशं नामानुचिन्तनम् ॥ ४ ॥

सुप्तप्रबोधयोः सुप्तिजागरयोः सन्धौ अरुणोदयकाले शयनप्रारम्भकाले चात्मनः स्वस्य गतिं "सता सोम्य ! तदा सम्पन्नो भवति" "अतः प्रबोधो स्मात्"३।२।८ इत्यादि प्रमाणबलात्परमात्माधीनलक्षणां स्थितिं हरेरस्वातन्त्र्यलक्षणां पश्यन् बन्धं मोक्षं मायामात्रमयं हरेरिच्छया निर्मितं ज्ञानं पश्यन्वस्तुतः स्वातन्त्र्येण नान्याधीनत्वेन पश्यन् ॥ ५ ॥

मृत्युं ध्रुवमिति नाभिनन्देत् स्वजीवितं वाऽध्रुवमिति तर्हि कथं निश्चय इति तत्राह—कालमिति । भूतानां प्रभवाव्ययं कालाख्यभगवदधीनं प्रतीक्षेत किं बहुना सर्वं भगवदधीनमिति पश्येत् ॥ ६ ॥

जीविकार्थेतनादिजन्मकाणां वेदवादमतीत्य तर्कादिषेवणिकादिशास्त्रनिष्ठितान् अप्रयोजकं पक्षं सिद्धान्तं "नाप्रयोजनपक्षी स्यान्न वृथा शिष्यबन्धकृत् । न चोदासीनशास्त्राणि न विरुद्धानि चाऽभ्यसेत्" ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"न व्याख्ययोपजीवेत न निषिद्धान्समाचरेत् । एवंभूतो यतिर्याति तदेकशरणो हरिम्" इति निर्णीतमानं बहून् ग्रन्थान् वेदव्यासासान् मोक्षविरुद्धान् वात्स्यायनादीन् ज्योतिःशास्त्रादीन् व्याख्ययोपजीवनं न कुर्यात् आरम्भान्निषिद्धान् कृष्यादीन् ॥ ८ ॥

कृष्यादिनोत्पन्नद्रव्येण दानादिधर्मसम्पादनोपपत्तेः कथमारम्भानारभेतेत्युच्यत इति तत्राह—न यतेरिति । आश्रमो यतेराश्रमो धर्महेतुर्न भवति किन्तु निरन्तरोपासनया ज्ञानहेतुः ज्ञानाधिकारे प्रवृत्तस्य कर्माधिकारप्रवृत्तिरधःपातहेतुः स्यात् ईश्वराज्ञोल्लङ्घनदोषापातात् समे ब्रह्मणि चित्तं सततस्मरणसमर्थमन्तःकरणं यस्य स तथा तस्यैवंविधस्य यतेः आश्रमलक्षणदण्डादि आचरणं न चावश्यकमित्याह—बिभृयादिति । यदाह याज्ञवल्क्यः "नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः । अतो यदात्मनः पथ्यं परस्य न तदाचरेत्" ॥ ९ ॥

बाह्यलिङ्गाभावेऽप्यान्तरं लिङ्गमस्तीत्याह—अव्यक्तेति । अव्यक्तं जनेनाज्ञातं मानसं कॢप्तं लिङ्गं यस्य स तथा विद्या तप आदिभिरप्रकाटितस्वरूपो वा तर्ह्यस्य किं वक्तव्यमत्राह—व्यक्तार्थ इति । अपरोक्षीकृतभगवत्स्वरूपलक्षणपुरुषार्थः अनेन लिङ्गादिदण्डधारणमेवंविधस्य नावश्यकमन्यस्येत्युक्तं भवति मनीषी निरन्तरमननशीलः अव्यक्तस्वरूपं दर्शयति—अदृश्यः प्राकृतजनाक्षेपः कविरतिक्रान्तदर्शी ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्रयोदशे यतेर्धर्मस्तत्र चाजगरी परा ।
दत्ताऽवधूतप्रह्लादसम्वादेनैव वर्ण्यते ॥

एवं व्याख्याऽकल्पश्चेदनशनादिकं कुर्यात् आन्वीक्षिक्यां कल्पस्त्वेवञ्चन्द्रस्तथा परिव्रज्य चरेदिति सम्बन्धः तस्य धर्मानाह—ग्रामैकरात्रेति, त्रिभिः ॥ १ ॥

त्यक्तं व्यावहारिकजनसङ्गं न बिभृयात् लिङ्गदण्डादिकाद्यन्यद्वस्त्रमपि न अनापदीति आपदि तु देहरक्षार्थं त्यक्तमपि धारयेत् ॥ २—३ ॥

सदसतः परे कार्यकारणव्यतिरिक्ते ॥ ४ ॥

सुप्ते सुषुप्ते हि तमसा वृतमात्मतत्त्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते सन्धौ तु न तमो नापि विक्षेपः अतस्तदा आत्मदृक् आत्मानं लक्षीकृत्य स्थितः स्वात्मनो गतिं तत्त्वं पश्यन् अत एव बन्धं मोक्षं च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः तदुक्तं योगग्रन्थे——

"निद्रादौ जागरस्यान्ते यो भाव उपजायते
तं भावं भावयेन्नित्यं मुच्यते नेतरो यतिः"

इति ॥ ५ ॥

अस्य देहस्य ॥ ६ ॥

किञ्च कमपि पक्षं न संश्रयेत् ॥ ७ ॥

नानुबध्नीयात् प्रलोभनादिना बलात्कुर्यादित्यर्थः । आरम्भान् मठादिव्यापारान् ॥ ८ ॥

संन्यासिनां मध्ये परमहंसस्य विशेषमाह—न यतेरिति । यतेराश्रमो न धर्मप्रयोजनकः तस्य च चर्यां शान्तस्येत्यादि प्रायस्त्यागेन कथञ्चित् कश्चिदपरिपक्वज्ञानस्तु सत्त्वशुद्ध्यर्थं यमनियमधर्मांश्च चरेदपि ज्ञानपरिपाके तु न नियमैः कृत्यमस्ति यमाश्च स्वत एव स्युः अतस्तदा लिङ्गादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारयेत् त्यजेद्वा इति ॥ ९ ॥

स च योगभ्रंशपरिहारार्थमेवंभूतो भवेदित्याह, न बहिर्व्यक्तं लिङ्गं यस्य स अव्यक्तार्थः प्रयोजनमात्मानुसन्धानं यस्य सः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्रयोदशे तुर्याश्रमधर्मानाह—कल्प इति । वानप्रस्थधर्मनियमाचरणेऽकल्पोऽनशनादिकं कुर्यादित्युक्तं नियमान्समाप्यापि कल्पो दृढदेहेन्द्रियश्चेद्गृहे न गच्छेत्किन्तु परिव्रज्य तुर्याश्रमी भूत्वा ग्रामैकरात्रवासविधिना महीं चरेत् ॥ १ ॥

यद्यसौ वासो बिभृयात्तर्हि कौपीनमाच्छाद्यते येन तत्कौपीनाच्छादनं परं केवलं बिभृयात् लिङ्गभूतदण्डादेरन्यत् त्यक्तं परित्यक्तं वस्त्रादिकमन्यदनापदि न बिभृयात् ॥ २ ॥

नारायणपरायणः नारायण एव परमयनमाश्रयो यस्य सः ॥ ३ ॥

सदसतः क्षेत्रक्षेत्रज्ञतः परे पुरुषोत्तमे ब्रह्मो विश्वमात्मानं च पश्येत् सर्वत्र सदसन्मये जडचेतनमये विश्वस्मिन् आत्मनि च परं ब्रह्म पुरुषोत्तमं च पश्येत् ॥ ४ ॥

सुप्तप्रबोधयोः सन्धौ सायं प्रातश्च आत्मदृक् देहेन्द्रियमनोबुद्धिप्राणादिविलक्षणस्वरूपदृक् आत्मनः स्वस्योपासकस्य गम्यते इति गतिर्भगवान् तं पश्यन् ध्यायन् मायात्रिगुणा प्रकृतिस्तया ऽनादिनस्तात्सुखबुद्धया गृहीतया बन्धः दुःखत्रयभयात्मकया मोक्षः एवं मायामात्रं न वस्तुतः केवलस्वरूपतः बन्धं मोक्षं च पश्यन् विचरेदिति शेषः ॥ ५ ॥

अस्य देहस्य ध्रुवमावश्यकं मृत्युम् अध्रुवमनित्यं जीवितं च नाभिनन्देत् प्रभवाप्ययौ जन्ममरणे यस्मात्तम् ॥ ६ ॥

असच्छास्त्रपृक्तध्यानविरोधिषु जीविकां चिकित्सानक्षत्रादिविद्यावृत्तिं नोपजीवेत वादवादान् प्राप्यजनयोग्यान् वादप्रतिवादान् तर्कान् हेतुवादान् त्यजेत् किञ्च किमपि पक्षं न संश्रयेत् भगवद्ध्यानविच्छेदनं न कुर्यादिति भावः ॥ ७ ॥

शिष्यान्नानुबध्नीयात् प्रलोभनादिना आत्मसेवार्थं वश्यांश्च कुर्यात् नाभ्यसेत् पठेत् व्याख्यानं नोपयुञ्जीत न पाठयेत् आरम्भान् जीविकाव्यापारान् ॥ ८ ॥

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रह्लादस्य च संवादं मुनेराजगरस्य च ॥ ११ ॥
तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि ।
रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् ॥ १२ ॥
ददर्श लोकान्विचरँल्लोकतत्त्वविवित्सया ।
वृतो ऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ॥ १३ ॥
कर्मणा कृतिभिर्वाचा लिङ्गैर्वर्णाश्रमादिभिः ।
न विदन्ति जना यं वै सो ऽसाविति न वेति च ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शान्तस्य "शान्त उपासीत" इतिश्रुत्युक्तध्यानार्हं शान्ति प्राप्तस्य समे भगवति चित्तं यस्य भगवद्ध्याननिष्ठस्य परमहंसभागवतनिष्ठां गतस्य महान् अतिविशुद्धः आत्मा चित्तं यस्य तस्य यतेः आश्रमः प्रायो धर्महेतुर्न भवति धर्मः प्रवर्तनीयतया हेतुर्निमित्तं फलं यस्य स तथा धर्मप्रवृत्त्यर्थो न भवति किन्तु मुक्त्यर्थं इत्यर्थः । अतः आश्रमसूचकलिङ्गादिभिः प्रयोजनाभावादाश्रमित्वाभिमानं त्यक्त्वा तानि धारयेत्त्यजेद्वा इति सिद्धान्तः "मौनानीहानिलायामदण्डा वाग्देहचेतसाम । न ह्येते यस्य सन्त्यङ्ग वेणुभिर्न भवेद्यतिः ।

ज्ञाननिष्ठो विरक्तोवामद्भक्तो वा नपेक्षकः ।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" ।

इति वक्ष्यमाणत्वाच ॥ ९ ॥

अव्यक्तं लिङ्गमाश्रमचिह्नं यस्य सः व्यक्तोऽपरोक्षोऽर्थः परमपुरुषार्थः भगवत्प्रापणं यस्य सः मनीषी भगवदनुसन्धानपरः कविरपि स्वकीये ध्येये भगवति दृष्ट्या निमग्नचित्ततया मूकवदात्मानं दर्शयेत् ॥ १० ॥

भाषा टीका ।

श्रीरुक्मिणीकान्ताय नमः ॥

नारद उवाच ।

नारद जी बोले, कि—ये अनशनादिक तो शरीर यात्रामें असमर्थ के कहे, और यदि समर्थ होवे तो संन्यास लेकर सब का परित्याग करदे, एक देहमात्र अवशिष्ट रखे, और ग्रामैकरात्र विधिसे अर्थात् एक ग्राम में एक ही रात्रि रहना अधिक नहीं, इस प्रकार निरपेक्ष होकर पृथिवी पर विचरे ॥ १ ॥

यदि कुछ रखने की इच्छा हो तो केवल एक गुह्यांग ढाकने के लिये कौपीन रखे, और आकती इच्छा हो तो एक शरीर के आच्छादन (ओढने) के लिये वस्त्र रखे बस इससे आकती नहीं, और अनापद् काल में दण्डऔर संन्यास के चिन्ह के सिवाय त्यागकिये हुए किसी पदार्थ को न ग्रहण करे, यदि कोई आपद (दुःखादि) आ पडे तो उतने मात्र काल की चिन्ता नहीं ॥ २ ॥

आत्माराम होकर किसी का आश्रय न लेकर सर्व प्राणियो का सुहृद और शान्त होकर संन्यासी एकला ही विचरे, परन्तु सदा नारायण परायण होकर ॥ ३ ॥

इस विश्वको कार्य कारण से पर अव्यय पर ब्रह्म में देखे, और आत्मा जो पर ब्रह्म है उसको कार्य कारण मय समस्त विश्व मे अनुस्यूत अर्थात् व्याप्त देखे ॥ ४ ॥

और वह आत्मज्ञानी दोनो सन्ध्याओं में अपने आत्माकी गति का चिंतन करे, तथा बन्ध और मोक्षको माया मात्र जाने वास्तव में नहीं ॥ ५ ॥

ध्रुव (निश्चित) मृत्युका अभिनन्दन न करे, अथवा अध्रुव इसके जीवित को भी न चाहे, केवल भूतों के उत्पत्तिनाश का हेतु काल मात्र की प्रतीक्षा करे ॥ ६ ॥

असत् शास्त्र में आसक्त न होवे, और किसी जीविका का उपजीवन न करे और शुष्कवाद विवाद को त्यागदे, और केवलतर्क में किसी का पक्ष न लेवे ॥ ७ ॥

और बहुत से शिष्य न करडाले और बहुत से ग्रन्थों का अभ्यास न करे, लोकप्रतिष्ठा के लिये बड़ी व्याख्या का उपयोग न करे, और बहुत से कार्यो का आरंभ न करे ॥ ८ ॥

प्राय करके यति का धर्महेतु कोई आश्रम नहीं है, शांत हो समचित्त हो तो आश्रम को धारण करे वा त्यागदे कुछ चिंता नहीं ॥ ९ ॥

अव्यक्त चिन्हों वाला अप्रकट प्रयोजन वाला मनीषी व्याख्यान समर्थ होकर भी अपने को उन्मत्त और बालक के तरह, तथा ज्ञानी होकर भीतेको मूक सदृश जनावे, ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परमहंसधर्ममेवेतिहासेन स्फुटयति—अत्रापीति चतुर्भ्याम । आजगरव्रतस्य मुनेश्च ॥ ११ ॥

तं नत्वाऽभ्यर्च्य विधिवत्पादयोः शिरसा स्पृशन् ।
विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः ॥ १५ ॥
बिभर्षि कायं पीवानं सोद्यमो भोगवान्यथा ।
वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ।
भोगिनां खलु देहोऽयं पीवा भवति नान्यथा ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

धरोपस्थे भूपृष्ठे सह्याद्रेस्तटे रजोभिर्धूसरैस्तनूदेशैर्देहावयवैर्निगूढममलं तेजो यस्य तम् ॥ १२ ॥ १३ ॥

कर्मादिभिर्जना यं न विदुस्तं पादयोः शिरसा स्पृशन्नत्वा अप्राक्षीदित्युत्तरेणान्वयः ॥ १४ ॥ १५ ॥

उद्यमसहित इव भोगवानिव पीवानं स्थूलं देहं धारयसि तत्र हेतुं वदेति तृतीयेनान्वयः उद्यमं विनैव मम भोगोऽस्तीति चेत्तत्राह, वित्तं चेति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आजगरव्रतस्य सन्यासाश्रमाऽनपेक्षित्वेऽपियदृच्छयोपनतसन्तोषस्य मोक्षविरोधिप्रवृत्त्युपरत ज्ञानाविष्कारस्य च तदपेक्षितत्वात् तदवगमनाय तमितिहासं प्रस्तौति—अत्रापीति । अत्र स्वमहात्म्यानाविष्कारादिना ज्ञानिनोऽवस्थाने इतिहासमपि दृष्टान्तत्वेन उदाहरन्ति निदर्शयन्ति इतिहासं विशिनष्टि-पुरातनं नत्वस्मत्कपोलकल्पितं प्रह्लादस्याजगरस्याजगरव्रतपरस्य मुनेश्च संवादरूपम् ॥ ११ ॥

तमजगरव्रतस्थं सह्यपर्वतस्य सानुनि कावेर्यां कावेरीतटे धरोपस्थे भूपृष्ठे शयानं रजस्वलैर्धूलिभिर्धूसरैस्तनूदेशैर्देहावयवैर्निगूढं प्रच्छन्नममलं तेजो देहकान्तिर्यस्य तं प्रह्लादो ददर्शेत्यन्वयः ॥ १२ ॥

कथम्भूतः भगवत्प्रियः कतिपयैरमात्यैः परिवृतो लोकानां तत्त्वस्य जिज्ञासया वेत्तुमिच्छया चरन् कर्मादिभिरयं सोऽसौ भवति न भवति वेत्येवं जना न विदुः । तं पादयोः शिरसा स्पृशन् नत्वा विधिवदभ्यर्च्य, वेत्तुमिच्छुर्महाभागवतः प्रह्लाद इदं वक्ष्यमाणमप्राक्षीत् पृष्टवान् ॥ १३—१५ ॥

तदेवाह—बिभर्षीति सार्द्धैस्त्रिभिः, । उद्यम्युद्यमसहितः भोगवान् देहपोषणशीलो यथा तद्वत्वं पीवानं कायं देहं बिभर्षि इति सन्देहः । ननूद्यमं विनैव मम प्रारब्धवशादेव भोगः सम्प्राप्तोमीत्यत्राह— इह लोके तावदुद्यमवतामेव वित्तं धनं भवति वित्तवतामेव भोगः । त्वन्तु निरुद्यमः कुतस्तव वित्तं कुतस्तरां भोग इति भावः । अन्तरेणापि भोगं मम देहः पीवा इत्यत्राह—भोगिनां भोगवतामिव देहः पीवा भवति भोगेन पीवा भवत्यन्यथा तु कृशीभवति तत्कथमन्तरेणापि भोगं देहपुष्टिरिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्राऽपरोक्षज्ञानाय यत्याचारे इतिहासशब्दार्थमाह—पुरातनमिति । आजगरस्य अजगरव्रतधारिणः ॥ ११ ॥

सह्यसानुनि सह्याख्यपर्वततटे कावेर्यां कावेर्युपरिस्थेत्र तनूदेशैः शरीरावयवैः ॥ १२ ॥

विविःसया वेदितुमिच्छया ॥ १३ ॥

स एव देवदत्तो सौ न वेति नाविन्दत न ज्ञातवान् ॥ १४ ॥ १५ ॥

भोगवान् सम्पन्नः ननु परिणममानस्य देहस्य पीनत्वं विशेषः परिणामोऽपि कस्माच्चित् स्वान्नादिरासेव्यस्यैव किमत्र चोद्यमत्राह-वित्तमिति । सत्यं कृष्यादुद्योगवतो देहिनो व्रीह्यादिवित्तं भवतीहलोके तद्वतां भोगः खलु भोगिनामयं देहः पीनो भवति, हेत्वन्तरं नास्तीत्याह—नान्यथेति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तं शयानमिति युग्मकम्, तनू इत्यत्र त्वङ्ग इति पाठो बहुत्र ॥ १२ ॥ १३ ॥

कर्मणेति युग्मकम् ॥ १४ ॥ १५ ॥

बिभर्षीत्यर्द्धकम् ॥ १६ ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आजगरस्य अजगरवृत्तेः ॥ ११ ॥

सह्यनाम्नः तनूदेशैः तन्ववयवैः ॥ १२ ॥ १३ ॥

जनास्तज्जन्मभूमिनिवासिनोपि विविस्तुर्विविदिषुः महाभागवत इति महाभागवतत्वादेव तत्र सन्निहिताकर्षणशक्त्यैव तं महानुभावं निश्चित्यैवेतिभावः ॥ १४ ॥ १५ ॥

न ते शयानस्य निरुद्यमस्य ब्रह्मन्नु हार्थो यत एव भोगः ।
अभोगिनोऽयं तव विप्र ! देहः पीवा यतस्तद्वद नः क्षमं चेत् ॥ १७ ॥
कविः * कल्पो निपुणदृक् चित्रप्रियकथः समः ।
लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितापि वा ॥ १८ ॥

नारद उवाच ।

स इत्थं दैत्यपतिना परिपृष्टो महामुनिः ।
स्मयमानस्तमभ्याह तद्वागमृतयन्त्रितः ॥ १९ ॥

ब्राह्मण उवाच ।

वेदेदमसुरश्रेष्ठ ! भवान्नन्वार्यसम्मतः ।
ईहोपरमयोर्नृणां पदान्यध्यात्मचक्षुषा ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पीवानं स्थूलं न च स्वभावेनैव मत्कायः पीवेति वाच्यमित्याह-उद्यमवतां वित्तं वित्तवतां भोगः भोगवतामेव देहः पीवेति पीवत्वस्यापि कारणमुद्यम एव न तु स्वभाव इत्यर्थः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

परमहंसभगवद्धर्ममेवेतिहासेन दर्शयति—अत्रापीत्यादिना । आजगरस्य अजगरवृत्तेरस्य ॥ ११ ॥

धरोपस्थे भूपृष्ठे कावेर्यां तत्समीपे सह्यसानुनि सह्यगिरितटे रजोऽवाप्तैस्तनूदेशैः शरीरावयवैर्निगूढमगलं तेजो यस्य तम् ॥ १२ ॥ १३ ॥

कर्मणा निवृत्तिप्रवृत्तिरूपेण आकृतिभिः अनाशक्तसुशक्तत्वादिचेष्टावद्भिरङ्गैः तथा वागादिभिर्जना यं न विदन्ति पादयोः शिरसा स्पृशन् नत्वा अभ्यर्च्य च अप्राक्षीदित्युत्तरेणान्वयः ॥ १४ ॥

अप्राक्षीत् पृष्टवान् ॥ १५ ॥

सोद्यमो व्यापारपरो भोगवान् यथा पीवानं पुष्टं देहं बिभर्त्ति स देहो यतः पीवा तन्नो वदेत्यनेनान्वयः ॥ १६ ॥

भाषा टीका ।

इस प्रकरण में एक पुरातन इतिहास को उदाहरण करते हैं जिसमें और आजगर मुनि श्री दत्तात्रेय का संवाद है ॥ ११ ॥

एक समय की बात है कि—भगवत्प्रिय श्रीप्रह्लादजी कितने एक मन्त्रियों सहित लोकों के तत्त्व जानने की इच्छा से लोकों में विचरते हुए, श्री कावेरी गंगा के किनारे सह्य पर्वत की शिखर पर पृथिवी के ऊपर पड़े हुए, धूलि भरे हुए, शरीर से गूढतेजवाले एक मुनि को देखते हुए ॥ १२ ॥ १३ ॥

जिन को देखकर कर्म आकृति वाणी और वर्णाश्रमोंके चिन्हों से मनुष्य नहीं जान सके ये किये वही प्रसिद्ध दत्तात्रेय जी महाराज हैं ॥ १४ ॥

प्रह्लादजीने उनकोविधिवत् पूजन करके मस्तक से चरणों को छूकर नमस्कार किया, और महा भागवत असुर प्रह्लाद जी ज्ञान की इच्छा करके यों पूछने लगे ॥ १५ ॥

प्रह्लादजी बोले, कि आप शरीर को तो ऐसे पुष्टको धारण करते हो, कि जैसे बड़ा उद्यम वाला भोगों को भोगने वाला अपने शरीर को पुष्ट रखता है परन्तु भोग तो वित्त से होता है और वित्त (धन) से भोग प्राप्त होता है, यह देह तो भोग भोगने वालों का ही ऐसा पुष्ट होता है आपसे बड़ों का और बिना भोग भोगने के नहीं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नु इति निश्चये ह इति प्रसिद्धौ तत्रार्थो नास्तीति प्रसिद्धमेवेत्यर्थः । यतोऽर्थादेव यतो हेतोः पीवा क्षमं योग्यं चेत् ॥ १७ ॥

किञ्च वित्तार्जनाद्यसमर्थोऽयं जनस्तदर्थमुद्यमं करोति त्वं तु समर्थोऽपि किमिति न करोषीत्याह—कविरिति । कल्पो दक्षः निपुणदृक् चतुरः चित्राः प्रियाः लोकरञ्जनाः कथा यस्य तथाऽपि लोकस्य कर्म कुर्वतः सतः शेषे तद्वीक्षितापि तत्सर्वं पश्य-

* कल्प इति पाठ ॥१८॥

यस्य नारायणो देवो भगवान् हृद्गतः सदा ।
भक्त्या केवलयाऽज्ञानं धुनोति ध्वान्तमर्कवत् ॥ २१ ॥
अथापि ब्रूमहे प्रश्नांस्तव राजन् ! यथाश्रुतम् ।
सम्भावनीयो(१) हि भवानात्मनः शुद्धिमिच्छताम् ॥ २२ ॥
तृष्णया भववाहिन्या योग्यैः कामैरपूरया ।
कर्माणि कार्यमाणोऽहं नानायोनिषु योजितः ॥ २३ ॥
यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन् ।
स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि पाठान्तरे न द्वेक्षि, तत्कर्म न द्वेक्षि, नौषि वा न च स्तौषीत्यर्थः ॥ १८ ॥

तस्य वागेवामृतं तेन यन्त्रितो वशीकृतः सन्नाह ॥ १९ ॥

अध्यात्मचक्षुषाऽन्तर्दृष्ट्या भवान्वेदेव आर्याणां ज्ञानिनां सम्मतो ननु भवान् इदमिति यदुक्तं तदेवाह—नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः फलानि ह्यानानि फलानीत्यर्थः ॥ २० ॥

वेदेत्यत्र हेतुः, यस्येति । हृदि प्रविष्टस्सन्नज्ञानं धुनोति नाशयतीति अर्को यथा बहिर्ध्वान्तम् ॥ २१ ॥

यथाश्रुतमित्यौद्धत्यपरिहारायोक्तम् ॥ २२ ॥

लोकः कर्मसु प्रवर्त्तते त्वं तु निवृत्तः सन्किं शेषे इति यदुक्तं तत्राऽऽह—तृष्णयेति, चतुर्भिः । भवप्रवाहकारिण्या यथोचितैरपि विषयैः पूरयितुमशक्यया तृष्णया कर्मसु प्रवर्त्यमानोऽहं पूर्वं नानायोनिषु प्रवेशितः ॥ २३ ॥

तयैव तृष्णयेमं लोकं मनुष्यदेहं यदृच्छया प्रापितः कथम्भूतं लोकं धर्मेण स्वर्गस्य द्वारं साधनम् । अधर्मेण तिरश्चां श्वसूकरादियोनेर्द्वारं निभाभ्यां ताभ्यां पुनरस्यैव मनुष्यत्वस्य द्वारं सर्वतो निवृत्त्याऽपवर्गस्य द्वारमित्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव विवृण्वन् पृच्छति—नेति । हे ब्रह्मन् ! शयानस्यात एव निरुद्यमस्य निर्व्यापारस्य तव । न ह्यर्थः नूनं वित्तं नास्ति हि नु इति निश्चये इदाति प्रसिद्धौ तथार्थो नास्तीति प्रसिद्धमेवेत्यर्थः यतो वित्तादेव हेतोर्भोगाः देहपोषणादयो भवन्ति अतो भोगरहितस्य तव देहो हे विप्र ! यतो हेतोः पीवाऽभवत् तत्कारणं नोऽस्माकं श्रोतुमितिशेषः । क्षमं योग्यं चेत्तर्हि वद कथय अगोप्यं चेत्तर्हि वर्णयेत्यर्थः ॥ १७ ॥

किञ्च त्वं कविर्विद्वान् कल्यः दक्षः निपुणश्च चतुरः चित्राः प्रियाः लोकरञ्जनाः कथा यस्य स एवंभूतोऽपि लोकस्य कर्म व्यापारं कुर्वतः सतः तद्वीक्षिताऽपि सन् उदासीनस्सन् तूष्णीं शेषे शयानोऽसि तत्कारणं च वदेति भावः ॥ १८ ॥

एवं दैत्यपतिना प्रह्लादेन पृष्टस्सन् महामुनिस्तस्य प्रह्लादस्य वागेवामृतं तेन यन्त्रितः चोदितः स्मयमानः मन्दस्मितपूर्वकमभिमुख मुक्तवान् ॥ १९ ॥

तदेवाह—यावदध्यायसमाप्ति, वेदेति । असुरश्रेष्ठ ! इदं किन्तु नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः फलानि कारणानीति यत् इदं भवानध्यात्मचक्षुषा सर्वलोकमनोऽभिप्रायविषयकज्ञानेन वेद जानात्येव कुतः यतस्त्वमार्याणामतीन्द्रियार्थदर्शिनां सम्मतोऽग्रेसरः ॥ २० ॥

किञ्च भगवान् षाड्गुण्यपूर्णः स्वतेजसा दीप्यमानो नारायणोऽनन्यप्रयोजनया भक्त्या तुष्टो यस्य त्वादृशस्य सदा हृद्गतः सन्नर्कवत् सूर्यवत् ध्वान्तमज्ञानरूपमन्धकारं धुनोति निरस्यति निःशेषनिरस्ताज्ञानानां सर्वज्ञानां भवादृशां किमविदितमस्तीति भावः ॥ २१ ॥

यद्यप्येवमथापि हे राजन् ! यथाश्रुतं तव प्रश्नान्प्रति ब्रूमहे प्रश्नानामुत्तराणि वदाम इत्यर्थः । यथाश्रुतमित्यौद्धत्यपरिहारायोक्तम् आत्मनः स्वस्य शुद्धिमिच्छता पुंसा भवानवश्यं सम्भावनीयो हि ॥ २२ ॥

लोकः कर्मसु प्रवर्त्तते त्वं तु निवृत्तः सन्किं शेषे इति यदुक्तं तत्र तावदुत्तरमाह—तृष्णयेति, चतुर्भिः । तावदहं योग्यैर्यथोचितैरपि कामैरपूरया पूरयितुमशक्यया भववाहिन्या जन्मपरम्पराकारिण्या तृष्णया विषयेच्छया कर्माणि पुण्यपापात्मकानि कार्यमाणः कर्मसु प्रवर्त्यमानः पूर्वं नानायोनिषु योजितः प्रवेशितः ॥ २३ ॥

तैरेव कर्मभिर्भ्रमन्यदृच्छया दैवादिमं लोकं मनुष्यजन्म प्रापितः लोकं विशिनष्टि स्वर्गमोक्षयोः तिरश्चां तिर्यक्त्वानां पुनरस्य मनुष्यत्वस्य च प्राप्तेर्द्वारं कारणम् । धर्मेण स्वर्गस्य द्वारं ज्ञानसम्पादनेन त्वपवर्गस्य अधर्मेण तिरश्चः तिर्यक्त्वस्य पूर्व-

(१) सम्भावनीयं इति वीर० विज० पा० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सजातीयबहुकृताऽऽचरणेन तु पुनर्मनुष्यारावस्य च कारण-मित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रकृतेऽपि तथा स्यादिति तत्राह, न त इति. यदोविदं यतो वि-चार्यावेति यत्तस्मात् वत विस्मयो जायते लोके निमित्तान्तराभावे सति पीनत्वं भोगित्वेन दृष्टम् अत्र भोगित्वं न दृश्यते पीनत्वं तु दृश्यते तस्मिन्निमित्तान्तरमस्ति तदस्माकं श्रोतुं क्षमं वक्तुमर्हसीत्यन्वयः ॥१७॥

इतोऽपि निमित्तान्तरेण भाव्यमन्यथा कविरूपस्त्वादृशो भोगि-गुणा न स्युरित्याह–कविरिति । न चेत्तर्हि वेदाननुभवसि "अन्न-मयं हि सोम्य ! मन आपोमयः प्राणस्तेजोमयी वाक्" इति श्रुतेः

"यः कण्टकैर्वितुदति चन्दनेनैव लिम्पति—

अक्रुद्धो परितुष्टश्च समस्तस्य स तस्य च" इति श्रुतेः

सर्वस्य समः न द्वेष्टि न द्वेषं करोषि नौषि स्तुतिं करोषि अनेन समत्वं विवृतम् ॥ १८ ॥

इतरत्र विरक्त्या भक्त्या श्रीनारायणचरणारविन्दस्मरण-मकरन्दपानमेव पीनत्वे निमित्तमिति परिहारमभिप्रेत्य प्रह्लादं प्रति ब्रूते इत्याह–नारद इति ॥ १९ ॥

ज्ञानिष्ठेको भवानिदं वेदेत्यन्वयः । इदमिति किं केन साध-नेन वेद इत्यत्राह—वेदेति । भवानध्यात्मचक्षुषा परमात्माऽनुग्रहो-त्पन्नज्ञानेन नृणामीहोपरमयोः प्रवृत्तिनिवृत्तिलक्षणयोर्मार्गयोः पदं निश्चितं विषयस्थानं वेदेति शेषः ॥ २० ॥

देहिनामज्ञानसम्भवात्तेष्वेकत्वात् ममाऽपि तद्विषयं ज्ञानं नास्तीति किं न स्यादित्याशङ्क्य सत्यं विद्वांसोऽस्ति तथेत्याह— यस्येति । इदृतत्वं सामान्यानीति मत्वा श्लिष्ट इत्युक्तं केवलया कलामात्राकाङ्क्षया ध्वान्तमज्ञानलक्षणाभ अन्यत्रान्धकारमज्ञानं तस्याप्रतिपत्तौ कारणत्वेन दृष्टं यतस्तत्र नास्ति तस्माद्भवान् आनातास्त्यर्थः ॥ २१ ॥

यद्यपि वक्तव्यांशो नास्त्यथापीश्वरप्रार्थीदित्यर्थविषय-प्रश्नः कुतः परिहारे प्रश्नानित्याद्यनेकविषयः कथमयं सङ्क्रान्त इति चेत्, निरुद्यमस्य वित्तं कथम् ? निर्मितस्य भोगः कथम् ? अभोगिनः पीनत्वं कथम् ? इति प्रश्नानामपि बहुत्वात् इदमित्यस्या-व्ययत्वेन अनिर्दिष्टपत्वेन चोपपत्तेः तव प्रश्नान् ब्रूमह इत्यनेन तदनुवादः क्रियते उत परिहारः नाद्यो ऽदर्शनात् द्वितीयोऽपि तद्वाचकपदप्रयोगाभावादनुपपन्नः तत्र प्रश्नानुद्दिश्य परिहा-रान् ब्रूमह इति पक्षोऽपि गौरवाद्युक्त इति चेदुच्यते "ब्रूञ् व्यक्तायां वाचि" इति धातोर्व्यक्तिर्नाम स्पष्टीकरणं तस्य परि-हारार्थोपपत्तेः यथाश्रुतमित्यनेनापि स्पष्टीकरणप्रतीतेरिति. ननु, यद्यज्ञातज्ञापकं तदेवोपादेयं न चेदं तथा प्रह्लादस्य भगवदनु-ग्रहेण ज्ञाताऽशेषार्थत्वादतः कस्मै स्पष्टीक्रियत इत्याशङ्क्य तदज्ञानमस्माभिर्न बोध्यते किन्तु महत्सम्भाषणलक्षणार्थसे-वयाऽन्तःकरणशुद्धिः स्यादिति मत्वा स्पष्टीक्रियत इत्याह— सम्भाषणीय इति । अनेन ब्रूमह इत्यात्मनेपदार्थो विवृत इति ज्ञायते ॥ २२ ॥

निवृत्तिमार्ग एव संसारोन्मूलनहेतुरिति वक्तुं प्रवृत्तिमार्गस्तु नानादुःखहेतुत्वेन हेयः प्रेक्षावतेत्येतत्स्वानुभवसिद्धमित्याह–तृष्ण-येति । भववाहिन्या भवीभवन्तमानया संसारापादिकया वा इतरेत-रीनाम्बुतुभेदेन पूर्यमाणापि स्यात्तां नास्याः कदापि पूर्तिरित्याह– प्राप्तेति ॥ २३ ॥

यदृच्छया दैवेच्छया लोकं शरीरम् "अस्माल्लोकात्प्रेत्य" इति श्रुतेः न केवलं स्वर्गादिद्वारं किन्तु तिर्यगादिजन्मनोऽपि कारणमि-त्याह—तिरश्चामिति । अस्य मनुष्यशरीरस्याऽपि द्वारमिति शेषः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तद्वीक्षितापि इत्यत्र त्वं न द्वेक्षि नौषि चेति पाठः न द्वेषीति गौडपाठः ॥ १८—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु,'पीनो देवदत्तो दिवा न भुङ्क्ते' इति वन्ममोघमादिकमनुमी-यतामिति चेत्तत्राह–नेति । नुनिश्चये ह स्पष्टं हे विप्र ! इति ब्रह्म-तेजसैव विप्रत्वस्यावगमात् ॥ १७ ॥

किमेवं ते विचारेऽयोनि चेत् त्वद्देहे सामुद्रकलक्षणरहस्या कश्चिदनल्पस्थविकमनुमाय त्वया त्वं कृतार्थीकर्तुं कमन्याचापा-मृतमिच्छामीत्याह—कविरिति । कर्म कुर्वतः कर्मोद्यमवन्तं लोक-ममाहत्य तमपश्यन्नेव शेषे शयनं करोषि तस्य वीक्षिता कौतु-केन तं पश्यन्नेव वा ॥ १८ ॥ १९ ॥

अध्यात्मचक्षुषा अन्तर्दृष्ट्या इदं भवान् वेदैव किम् ईहोपरमयोः सकामत्वनिष्कामत्वयोः पदानि स्थानानि फलानीत्यर्थः । भोगार्थ-मुद्यमं दैहपुष्टीकुर्वतां लोकानां दुःखं यदहं नाद्राक्षं तदा उद्यम-मह्मप्यकरिष्यामीति भावः ॥ २० ॥

वेदेत्यत्र हेतुः यस्येति केवलया ज्ञानकर्मायाश्रया ॥ २१ ॥

अतो मया त्वं सम्माननीय एवंस्थितः सर्वत्र मौनवतापि स्वपि मौनमनादृत्यैवोच्यते इत्याह—अथापीति । यद्यपि भवान् वेदैव अथापीति यथाश्रुतं न तु स्वकपोलकल्पितम् ॥ २२ ॥

यदहं निरुद्यमोऽस्मि तत्र कारणं प्रतिजानन्नाह-तृष्णयेति त्रिभिः । भवसंवर्धिन्या वाहिन्या नदीति यथा नद्या अम्भो दुष्पूरस्तथा तृष्णा-भवसंवर्धिन्या यापि कामैः नद्यामुद्दिश्य पूरणमात्रेऽसुभिः पूर्यते इयं तु प्राप्तयापि तृप्यमाणैः कामैर्न पूर्यते इत्याह यावद्भिरिति यथा च नद्या वाहितो-ऽर्थस्तृणकाष्ठपाषाणकणकादिषु योजयते तथैवाहमपि नानायो-निषु यथा च नद्या प्रावृत्कालजलपानवद्भिरभिर्भ्रामितोऽस्मि नानायोनि-नानासाधनानि कारयन्ते तथैवाहमपि करोमि ॥ २३ ॥

यथा च नद्या कदाचित् कश्चित्तदनुग्रहैकतदेशामपि प्राप्यते तथैवाहमपि साम्प्रतमिमं लोकं नृशरीरं कीदृशं पुण्येन स्वर्गस्य द्वारं साधनं ज्ञानमार्कण्डामपवर्गस्य पापेन तिरश्चां सूकरादि-

अत्रापि दम्पतीनां च सुखायाऽन्यापनुत्तये ।
कर्माणि कुर्वतां दृष्ट्वा निवृत्तोऽस्मि विपर्ययम् ॥ २५ ॥
सुखमस्याऽऽत्मनो रूपं सर्वेहोपरतिस्तनुः ।
मनःसंस्पर्शजान्दृष्ट्वा भोगान्स्वप्स्यामि संविशन् ॥ २६ ॥
इत्येतदात्मनः स्वार्थं सन्तं विस्मृत्य वै पुमान् ।
विचित्रामसति द्वैते घोरामाप्नोति संसृतिम् ॥ २७ ॥
जलं तदुद्भवैश्छन्नं हित्वाऽज्ञो जलकाम्यया ।
मृगतृष्णामुपाधावेद्यथाऽन्यत्रार्थदृक्स्वतः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यामेरपि पुण्यपापाभ्यां चकारात्तद्भोगान्ते च पुनरप्यस्य नृजन्म-नोऽपि द्वारम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अमं श्रावयितुं च योग्यं चेत्तर्हि नोऽस्मभ्यं वद ॥ १७ ॥

त्वं कवित्वादिगुणयुक्तोऽपि लोकस्य कर्म कुर्वतः कुर्वन्तं न द्रष्टि न करोषि स्वयं च शेषे अन्तर्भूमिरसि यतस्त्वद्दर्शनं पूर्वगामन्वयः कविः कान्तदर्शी दक्षः समर्थः निपुणारक्स्वार्थं दृढदृष्टिः चित्राः मधुराः प्रियाः कथाः यस्य सः सर्वत्र तुल्यदृष्टिः ॥ १८ ॥

स्मयमानः मन्दस्मितयुक्तः तद्वागेवामृतं तेन यन्त्रितो वशीकृतः ॥ १९ ॥

हे असुरश्रेष्ठ ! नन्वहो भवानार्यसम्मतः नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानि अध्यात्मचक्षुषा अन्तर्दृष्ट्या वेद ॥ २० ॥

केवलया तदेकविषयिण्या भक्त्या नारायणो देवः सदा हृद्गतः अज्ञानं धुनोति ध्वान्तं तिमिरमर्को यथा ॥ २१ ॥

यद्यपि भगवान् वेद तथापि ब्रूमहे यथाश्रुतमित्यनेनौद्धत्याभावः सूच्यते ॥ २२ ॥

नयपाहिन्या जन्ममरणलक्षणसंसारवाहिन्या योग्यैरपि कामैर्विषयैरपूरया कर्माणि कार्यमाणः कर्मसु प्रवर्त्यमानः नानायोनिषु योजितः ॥ २३ ॥

इमं लोकं नरदेहम् ॥ २४ ॥

भाषा टीका ।

परंच हे ब्रह्मन् ! आप तो बिना उद्यमके सोये हुए हैं, आपको धन कहां से प्राप्त होसक्ता है, और बिना धन के भोग कहां ? हे विप्र ! बिना भोग के आपका यह देह जो पुष्ट होरहा है इसका क्या कारण है ? यदि हमारे कहने के योग्य हो तो कहिये ॥ १७ ॥

आप तो कवि (पंडित) समर्थ निपुणदृष्टि वाले और विचित्र प्रिय बोलने वाले हैं, और लोगों को कर्म करते हुए देखकर भी सोते रहते हैं ॥ १८ ॥

नारद उवाच ॥

नारदजी बोले कि,—उन महामुनि श्रीदत्तात्रेय को जब दैत्यपति प्रह्लादजी ने इस प्रकार पूँछा, तब प्रह्लाद की वाणी रूप अमृत के वश होकर किञ्चित् हँसतेहुए मुनि बोले ॥ १९ ॥

ब्राह्मण उवाच ॥

दत्तात्रेयजी बोले, कि—हे असुर श्रेष्ठ, हे प्रह्लाद ! आप श्रेष्ठ लोगों के सम्मत हो और ज्ञानदृष्टि से, मनुष्यों की चेष्टा और उपराम से जो फल होता है उसको भी जानते हो ॥ २० ॥

क्योंकि ? जिन तुमारे हृदय में केवल भक्ति, से भगवान् श्री नारायण देव सदा स्थित हैं, और सूर्य जैसे तम को तैसे ही अज्ञान को नाश करते हैं ॥ २१ ॥

हे राजन् ! तथापि तुमारे प्रश्नों का उत्तर जैसा सुना है तैसा कहते हैं क्योंकि ? आप तो आत्मा की शुद्धि की इच्छा वाले महाजनों के भी माननीय हो वा संभावणीय हो ॥ २२ ॥

योग्य कार्यों से जिसका कभी पूरा न पड़े ऐसी तृष्णा के वश होकर मैंने ऊँचे नीचे बहुत प्रकार के कर्म किये फिर उन कर्मों से नाना योनियों में जोता गया ॥ २३ ॥

फिर हरीच्छा से भ्रमते २ इस मनुष्य देह को भी प्राप्त हुआ जो मनुष्य देह स्वर्ग और अपवर्ग (मोक्ष) का द्वार है, और इसी देह के कर्मों से जीव तिर्यक् योनि को तथा फिर भी इसी मनुष्य देह को प्राप्त होसक्ता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्रापि मनुष्यत्वेऽपि अन्यापनुत्तये दुःखनिवृत्त्यै विपर्ययं दृष्ट्वा निवृत्तोऽस्मि ॥ २५ ॥

ननु प्रवृत्त्या कदाचित्सुखं स्यान्निवृत्त्या तु किं स्यादिति चेत्तत्राह—सुखमस्य जीवस्य स्वस्वरूपमेव, तर्हि किं न प्रकाशते ? तत्राऽऽह—सर्वेति । तनोतीति तनुः सर्वक्रियानिवृत्तो सत्येव प्रका-

देहादिभिर्दैवतन्त्रैरात्मनः सुखमीहतः ।
दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः ॥ २९ ॥
आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् ।
मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किम् ॥ ३० ॥
पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनाम् ।
भयादलब्धनिद्राणां सर्वतोऽभिविशङ्किनाम् ॥ ३१ ॥
राजतश्चौरतः शत्रोः स्वजनात्पशुपक्षितः ।
अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयम् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शान इत्यर्थः । भोगांश्च मनःसंकल्पजान्मनोरथमात्रजानशाश्वतान् दृष्ट्वा स्वप्स्यामि निरुद्यमोऽस्मीत्यर्थः । तर्हि कदाचित्कथं भुङ्क्षे ? तत्राऽऽह—संविशन् प्रारब्धभोगान्भुञ्जान इत्यर्थः ॥ २६ ॥

एवमेकोऽपि संसारं न प्राप्नुयात्तत्राऽऽह—इत्येतदात्मनः सुखात्मकं रूपं स्वार्थं स्वस्मिन्नेव सन्तं पुरुषार्थं विस्मृत्य असत्यपि द्वैते ॥ २७ ॥

तदेव दृष्टान्तेन स्पष्टयति—जलमिति । तत्तुच्छवेल्लितृणशैवाला-दिभिः जलकाङ्क्षया जलेच्छया स्वत आत्मस्वरूपादन्यत्र पुरुषार्थं पश्यन् ॥ २८ ॥

एवं स्वस्य निरुद्यमत्वे कारणमुक्त्वा विपर्ययं दृष्ट्वेति यदुक्तं तद्विवृणोति—देहादिभिरिति, पञ्चभिः । ईहत इच्छतः अनीशस्य निर्दैवस्य पुनःपुनः प्रारब्धाः क्रियाः मोघाः विफला एव भवन्ति ॥ २९ ॥

क्रियायाः सफलत्वेऽपि फलस्याऽनुपयोगमाह—आध्यात्मिका-दिभिरिति । मर्त्यस्य मरिष्यतः कृच्छ्रेण दुःखेनोपनतैः प्राप्तैः ॥ ३० ॥

कृच्छ्रं विनैव प्राप्तेऽप्यर्थे दुःखं तदवस्थमित्याह—पश्यामीति ॥ ३१ ॥

भयं प्रपञ्चयति—राजत इति । स्वस्मात्स्वत एव कथंचित्त्याग-भोगविस्मरणादिना नाशः स्यादिति [illegible] च भयं नित्यम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अत्रापि अस्मिन्नपि मनुष्यजन्मनि स्वर्गापवर्गदेऽपि दम्पतीनां मैथुनादिसुखं तदर्थमप्याप्तये दुःखनिवृत्तये च कर्माणि कुर्वतां लोकानां विपर्ययं सुखार्थं कृतेभ्यः कर्मभ्यः दुःखप्राप्तिरूपं विपर्ययं दृष्ट्वा निवृत्तोऽस्मि ॥ २५ ॥

ननु, प्रवृत्त्या कदाचित्सुखं स्यादपि किं निवृत्त्या स्यादित्यत्राह—सुखमिति । सुखमस्यात्मनः प्रत्यगात्मनो रूपं स्वरूपमेवातो न तदर्थं यत्नः कार्य इति भावः । तर्हि स्वतः सुखरूप आत्मा तत्रैव किं नोपलभ्यते इति शङ्कां निराकरोति—सर्वासामीहानां देहगतव्यापाराणामुपरमः अभावोऽस्यात्मनस्तनुराकारः निष्क्रियं सुखमेव तस्य तनुरित्यर्थः । कार्त्स्न्येनेहोपरमपूर्वकं तद्याथात्म्य-विमर्शनेन सुखरूपतयोपलभ्यत इति भावः । यत एवमतो भोगान् शब्दादिविषयभोगान् मनसः संकल्पजान्मनोरथमात्रजानशाश्वतान् दृष्ट्वा संविशन्नात्मयाथात्म्याऽवलोकने प्रविष्टोऽहं प्रारब्धानुभवं प्रविष्टो वा स्वप्स्यामि शयानोऽस्मि ॥ २६ ॥

तर्हि सर्वोऽपि लोकस्त्वमिव सुखरूपमात्मानं किं नोपलभ्यते इति शङ्कां निराकुर्वन् स्वाभाविकसुखरूपात्मस्वरूपाविमर्शनमू-लकदेहात्मभ्रमेण न वेत्ति किन्तु संसरतीत्याह—इतीति । इत्येतदा-त्मनः सुखात्मकं रूपं स्वार्थं स्वस्य पुरुषार्थरूपं स्वत एव सन्तं विस्मृत्य स्वत एव सन्तमात्मनः सुखरूपं स्वरूपात्मकं पुरुषार्थं विस्मृत्येत्यर्थः । पुमान् देही असति स्वत आत्मन्यविद्यमाने[illegible]ऽपि द्वैते देवमनुष्यादिभेदे देवोऽहं मनुष्योऽहमित्यभिमानरूपे [illegible] मिते द्वैते[illegible] । विचित्रां गर्भजन्मजरामरणादिरूपामत एव घोरां भयङ्करां संसृतिमाप्नोति ॥ २७ ॥

एतदेव दृष्टान्तमुखेनाह—जलमिति । जलं तत्तुच्छवेल्लितृणशैवालादिच्छन्नं जलं हित्वा अज्ञो यथा जलकाम्यया मृग-तृष्णां जलत्वप्रतीतिस्थानामुपधावेत्तथा स्वतः सुखरूपमात्मनः स्वरूपं विस्मृत्याऽन्यत्र [illegible] पुरुषार्थ[illegible] बोधः स्वत आत्मनोऽन्यत्र देहादौ पुरुषार्थतया ॥ २८ ॥

विपर्ययं दृष्ट्वा निवृत्तोऽस्मीत्येतदेव विवृणोति—देहादिभिरिति, पञ्चभिः । दैवतन्त्रैः कर्माधीनैर्देहेन्द्रियादिभिरात्मनः स्वस्य सुखं दुःखनिवृत्तिं चेहतः इच्छतः अनीशस्य कर्मवशस्य पुंसः कर्माणि [illegible] इच्छता कृताः कृताः पुनःपुनरारब्धाः क्रियाः मोघाः व्यर्थाः न सुखजनका नापि दुःखनिवर्तकाश्च दृष्टा इति भावः ॥ २९ ॥

कथञ्चित्क्रियाणाममोघत्वेऽपि तज्जन्यं सुखमनुभूयमानं दुःखमेवे-त्याह—आध्यात्मिकादिभिः । आधिदैविकाधिभौ-तिकैश्च तैर्दुःखैः कर्हिचित्कदाचिदपि अविमुक्तस्य मर्त्यस्य मरणशीलस्य कृच्छ्रोपनतैर्दुःखेनार्जितैरर्थैर्नित्यं[illegible]: कामैश्च किं कियत्सुखं क्रियेत न किमपीत्यर्थः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, धनार्जने हि दुःखं लब्धधनानां तु सुखमेवेत्यत्राह—पश्यामीति । धनिनां लब्धधनानामपि क्लेशं पश्यामि क्लेशित्वे हेतुं वदन् धनिनो विशिनष्टि—लुब्धानामिति । लुब्धानामलब्धधनलिप्सया लब्धधनव्ययभयेन च क्लिश्यतामिति भावः । अजितात्मनामजितेन्द्रियाणां कामानामपर्याप्त्या च क्लिश्यतामिति भावः । भयादलब्धा निद्रा यैस्तेषां चौरादयो धनमपहरेयुरिति भयाद्विगतनिद्राणामित्यर्थः । इतोऽपि क्लेश इति भावः । भये हेतुं वदन् विशिनष्टि—सर्वतः सर्वेभ्योऽप्यतीव विशङ्किनामपहरेयुरिति शङ्कां कुर्वताम् ॥ ३१ ॥

एतदेव विवृणोति—राजत इति । राजादिभ्यः पशुतः पशुभ्यः गजाश्वादिभ्यः पक्षितः पक्षिभ्यः सस्यादिभक्षणार्थं प्रवृत्तेभ्यः कालतः स्वस्माद्दानभोगयोः प्रवृत्तात् स्वस्माच्च प्राणास्तत्तुल्यमर्थं एषामस्तीति तथा तेषां नित्यं भयमनुवर्तते ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्यायुद्योगवतो वित्तं स्यादित्यादिना यदुक्तं सुखं स्यादिति तत्परिहरति—अत्रापीति । अत्रापि मनुष्यशरीरेऽपि दम्पतीनां विपर्ययं दुःखं दृष्ट्वा निवृत्तिमार्गमाश्रितोऽस्मीत्यन्वयः । अन्यापत्तुत्तये सुखावाप्त्यर्थं दुःखस्य निरासाय "सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा" इति श्लोकेः ॥ २५ ॥

कर्मणो निवृत्तस्य दुःखस्य निरासाय सुखावाप्तौ किमन्तरङ्गमित्याशङ्क्य यदि सुखं स्वरूपाद्भिन्नं तर्हि तत्प्राप्तौ यत्नः कर्तव्यो न चैवं स्वरूपत्वात् सुखस्य तद्व्यक्तौ स्वरूपाच्छादकसर्वनिषिद्धकर्मनिवृत्त्याविर्भूतभगवत्प्रसाद एव मुख्यनिमित्तमित्याह—सुखमिति । "बलमानन्द ओजश्च सहो ज्ञानमनाकुलम् । स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोः" इत्यादि हिशब्देन दर्शयति, अस्यात्मनो जीवस्य स्वरूपभूतं यत्सुखं तत्सर्वेहोपरतेः प्रसन्नात्सर्वा पूर्णा चेष्टा यस्य स सर्वेहः "को ह्येवान्यात्" इति श्रुतेः । उपाऽधिका ऽत्युद्रिक्तारनिरानन्दो यस्य स उपरतिः "यदेष आकाश आनन्दो न स्यात्" इति श्रुतेः । सर्वेहश्च उपरतिश्च सर्वेहोपरतिस्तस्मात्स्वं राविर्भवतीति शेषः । "उपाधिके" इति सूत्रात् । ततः किं तत्राह, मनःसंस्पर्शजानिति । मनोऽधिष्ठितेन्द्रियाणां विषयैः संस्पर्शनात्सम्बन्धात् जातान्छब्दादीन् भोगादिभोगान् संविशेत् न सेवेत बुद्धिमानिति शेषः ॥ २६ ॥

एतदर्थाकारविरुद्धस्य बाधकमाह—इतीति । आत्मन इत्येतदुक्तमित्येवं तव सिद्धमिति शेषः । इति शब्दः प्रकारवचनः तव पुमान्सन्नं सदातनं स्वार्थं पुरुषार्थं विस्मृत्य असति भगवत्प्रसादेन निवर्तमाने द्वैतेऽन्यथा भाने विषये विचित्रां सुरनरादिनानायोनिविषयां घोरां संसृतिमाप्नोतीत्यन्वयः ॥ २७ ॥

स्वतृष्णाया अनिवृत्तफलत्वात्संसारस्य घोरत्वमितीममर्थं सदृष्टान्तमाह—जलमिति । तद्रुद्भवैर्जलोद्भवैः शैवलादिभिरावृतो ज्ञानरहितोऽजितेन्द्रियो मृगतृष्णां सूर्यमरीचिसम्पृक्तसिकतं यथोपधावेत्तथा स्वतः स्वतन्त्राद्धरेरन्यत्र देवदत्तादावर्थदृक् पुरुषार्थदर्शी ॥ २८ ॥

ननु, पुरुषार्थसाधनत्वेन जातैर्देहादिभिरनुष्ठिताः क्रियाः सुखादिहेतवः स्युरित्याशङ्क्य भगवदर्पणबुद्धिचिकित्सारहिता व्यर्था इत्याह—देहादिभिरिति । या याः कृताः कृताः क्रियास्तास्ताः सर्वा अपि मोघाः तत्र हेतुगर्भं विशेषणम् अनीशस्येत्यविरुद्धस्य ॥ २९ ॥

इतोऽपि वित्तापादने न प्रयतनीयम्, आध्यात्मिकादिक्लेशमाह—गृहीतत्वेन कुङ्कुमप्रस्तमयकूकवत्समृद्धशारीरबलाभावात् कृतान्तपाशबद्धगलस्य पुरुषस्य पुरतो निहितक्षीरासवचद्व्यर्थं वित्तमित्याह—आध्यात्मिकादिभिरिति । कामैः शब्दादिविषयैः ॥ ३० ॥

कस्यचिददृष्टबलादुपार्जितवित्तस्य समृद्धशारीरबलस्याऽपि लोभाभिभूतमनस्कत्वेनाऽपि भोगो दुर्घट इत्याह, पश्यामीति ॥ ३१ ॥

प्राणार्थवद्व्ययम् अर्थवतः प्राणसमं भवति प्राणवतोऽर्थवत्त्वेति वा ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्रापि मनुष्यत्वेऽपि अन्यापत्तुत्तये दुःखनिवृत्त्यै विपर्ययं दुःखमेव दृष्ट्वा निवृत्तोऽस्मि कर्ममात्रेभ्य इत्यर्थः ॥ २५ ॥

कर्मणा कदाचित् सुखं स्यादपि सर्वकर्मनिवृत्त्या किं स्यादिति चेत्तत्राह—सुखमस्य जीवस्य मम स्वरूपमेव तर्हि किं नप्रकाशते तत्राह—सर्वेति । सर्वा ईहाः कर्माणि तद्धेतुः तृष्णा च तासाम् उपरतिरेव तनुः तनुं विना यथा सुखं नोपलभ्यते तथा तामपि विनेत्यर्थः । भोगांस्तु प्राकृतान् मनःस्पर्शजान् मनोरथमात्रजान् क्षणभङ्गुरान् दृष्ट्वा तत्राकथिरेव संविशन् स्वाभाविकानश्वरात्मसुखमुपभुञ्जानः स्वप्स्यामि वापिमिवैतृष्ण्यादिदिव्यकुसुमशय्यायामिति स्वस्य पीनत्वे सुखभोग एव हेतुरुक्तः "निवृत्तिः पुष्टीकरणानाम्" इति वैद्यकोक्तेः यद्वा स्वप्स्यामि संप्रत्यपि तृष्णाभासस्यानिवृत्त्या यद्यपि सम्यगात्मसुखानुपलम्भस्तथापि पञ्चषैर्दिनैस्तस्यापि निवृत्त्या सम्यक् संविशन् शयिष्य इत्यर्थः । "सम्वेशः स्वापसीरतवन्धयोः" इति मेदिन्युक्तेरत्र सामान्यत एवोपभोगवाची संवेशशब्दो ज्ञेयः ॥ २६ ॥

एवं चेत् सर्वेऽप्येवं किमिति सुखिनो नस्युस्तत्राह—इत्येतदिति । स्वार्थं स्वीयं सुखरूपमर्थं विस्मृत्य द्वैते दुःखरूपे असति देहादौ वस्तुत आत्मनः अविद्यमानेऽपि यद्वा असति असार्वकालिके ॥ २७ ॥

एतदेव दृष्टान्तेन स्पष्टयति—जलमिति । तदुद्भवैर्जलोद्भूतैर्न तु जलादुद्भूतैस्तृणशैवालादिभिश्छन्नमिवात्मसुखं तत्रोद्भूतैर्मायिकतृष्णादिभिः छन्नं हित्वा स्वतोऽन्यत्र पुरुषार्थं पश्यन् ॥ २८ ॥

विपर्ययं दृष्ट्वेति यदुक्तं तद्विवृणोति—देहादिभिरिति पञ्चभिः । सुखं दुःखात्ययञ्च ईहत ईहमानस्य क्रिया मोघाः निष्फलाः ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यदि कथञ्चित् सफलाः स्युस्तदपि फलभोगाऽसामर्थ्यमाह—अध्यात्मिकादिभिरिति । दुःखसहितः सुखभोगोऽपि नेत्याह-मर्त्यस्य अकस्मादेव सम्भावितमृत्योः ॥ ३० ॥

तदेवमर्थैर्न दुःखनिवृत्तिः प्रत्युत दुःखाधिक्यमेवेत्याह, पश्यामीति ॥ ३१ ॥

राजभ्य इति मत एव कथञ्चिद्दानभोगविस्मरणादिना भावाः स्थायिनीति प्राणेषु अर्थेषु चासक्तिमतां भयं प्राणोऽत्र शारीरबलं सम्भोगादिप्रयोजकं देवं जीवनमात्रन्तु विहितमेव "जीवस्य तत्त्वजिज्ञासा" इत्यादौ ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अत्रापि नरदेहेऽपि सुखाय मन्यस्य दुःखस्यापनुत्तये कर्माणि कुर्वतां विपर्ययं सुखाभावं दुःखप्राप्तिञ्च दृष्ट्वा निवृत्तोऽस्मि तादृशकर्मत इति शेषः ॥ २५ ॥

सुखं तु अस्य हृदि दृश्यमानस्य भगवतः रूपं सर्वैः कुतो नाऽनुभूयते अत आह—सर्वासामीहानामुपरतिर्यस्मात्समाधिः अस्याऽस्मनस्तनुः शरीरम् ध्यानसमाधिशून्यैर्जनैर्नाऽनुभूयते इतिफलितोऽर्थः अतः मनःसंस्पर्शजान् मनसा संस्पृश्यन्ते विचार्यन्ते इति मनःसंस्पर्शाः प्रारब्धं कर्म तज्जान् भोगान् दृष्ट्वा आवश्यभोग्यतया विलोक्य संविशन् भुञ्जन् स्वप्स्यामि शयानोऽस्मीत्यर्थः ॥ २६ ॥

इत्येतज्जगद्व्यामरूपम् आत्मनः स्वार्थं स्वपुरुषार्थं सन्तं साधुमज्ञानावृतमित्यर्थः । विस्मृत्य असत्यमद्वये द्वैते द्वाभ्यां चेतनाचेतनाभ्यां युतं द्वितं तदेवद्वैतं द्वयोर्भावो द्वितायितेव द्वैतं वा तस्मिन् चेतनाचेतनात्मके प्रपञ्चे जगति घोरां भयङ्करां संसृतिं जन्ममरणादिरूपामाप्नोति ॥ २७ ॥

यथा तद्भवैस्तृणादिभिः छन्नं जलं हित्वा मृगतृष्णामध्ये एवोपधावेत् तद्वत्खलु स्वीयादीश्वरादन्यत्रार्थदृक् अज्ञ एव स्यात् ॥ २८ ॥

तस्यानीशस्य ईश्वरादन्यत्राऽर्थदृशः देहादिभिः सुखं दुःखात्ययञ्च इच्छतः कृताः कृताः पुनः पुनः प्रवर्त्तिताः क्रिया मोघाः निष्फलाः स्युः ॥ २९ ॥

कर्हिचित् कदाचित्कष्टेन कष्टसाध्यया कयाचित् क्रियया उपनीतैः प्राप्तैरपि अर्थैः धनैः कामैर्भोगैश्च मर्त्यस्य मारिष्यतः आध्यात्मिकादिभिर्दुःखैरमुक्तस्य किं न किमपि सुखमित्यर्थः ॥ ३० ॥

प्राप्तार्थस्य प्रत्युत दुःखं पश्यामीत्याह—पश्यामीति, लोभाभ्यामर्थं ३१ ॥

राजादिभिः प्राणोपलक्षितदेहबलामर्थवतो च नित्यं भयं भवति ॥ ३२ ॥

भाषा टीका ।

इस योनि में भी सुख और दुःखनिवृत्ति के लिये कर्म करने वाले स्त्री पुरुषों के विपरीत फल को देखकर अब में सुखादि की कामनाओं से कर्म करने से निवृत्त भया हूं ॥ २५ ॥

सुख तो इस आत्मा का स्वरूप ही है, पर वह मनको स्पर्शकरने वाले विषयों से जायमान भोगों को देखकर, सर्व चेष्टाओं से उपराम को प्राप्त होकर अनुभव करने से ज्ञात होता है, ऐसे ही प्रारब्ध से आनेवाले भोगों को भोगते हुए हम भी सो रहे हैं ॥ २६ ॥

पुरुष इस प्रकार के सत् स्वार्थ को विस्मरण करके देव मनुष्यादि द्वैत भाव को असत् होने पर भी विचित्र घोर संसृति को प्राप्त होता है ॥ २७ ॥

जल से उत्पन्न होने वाले शैवाल (सिमार) काई प्रभृति से छन्न (ढके हुए) जल को छोड़कर, मन्द पुरुष जलकी कामना से जैसे मृगतृष्णा को दौड़ता है । और फलको नहीं प्राप्त होता, ऐसे ही अपने अन्तर्यामी से अन्यत्र अर्थ दृष्टि करने वाला भी निष्फल प्रयत्नवान् होता है ॥ २८ ॥

प्रारब्ध के परतन्त्र इन देहादिकों से स्वयं असमर्थ होकर भी सुख प्राप्ति और दुःख के छूटने की चेष्टा करने वाले पुरुष की करीहुई सब क्रियायें निष्फल होती हैं ॥ २९ ॥

कदाचित् बड़े कष्ट उठाने से द्रव्य प्राप्त भी होजावे तोभी आध्यात्मिकादि दुःखों से नहीं छूटनेवाले पुरुष का द्रव्य से क्या स्वार्थ किया जायगा ॥ ३० ॥

और तुम कहते हो कि धन के विना भोग उपपन्न नहीं होता है, पर हम तो जिन लुब्धोंने धन जोड़२ कर इकट्ठा किया है, अजितेन्द्रिय ऐसे उन धनियों को भी मैं बड़ा दुःखी देखता हूं । भय से निद्रा उन को नहीं आती, सब ही लोगों से सदा शङ्का करते रहते हैं ॥ ३१ ॥

राज से चोरों से शत्रुओं से स्वजनों से पशु से पक्षियों से याचकों से द्रव्यवाले को भय रहता है । ऐसे ही प्राणवाले को भी ॥ ३२ ॥

शोकमोहभयक्रोधरागक्लैब्यश्रमादयः ।
यन्मूलाः स्युर्नृणां जह्यात् स्पृहां प्राणार्थयोर्बुधः ॥ ३३ ॥
मधुकारमहासर्पौ लोकेऽस्मिन्नो गुरूत्तमौ ।
वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयम् ॥ ३४ ॥
विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् ।
कृच्छ्राप्तं मधुवद्वित्तं हत्वा ऽप्यन्यो हरेत् पतिम् ॥ ३५ ॥
अनीहः परितुष्टात्मा यदृच्छोपनतादहम् ।
नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान् ॥ ३६ ॥
क्वचिदल्पं क्वचिद्भूरि भुञ्जे ऽन्नं (१) स्वाद्वस्वादु वा ।
क्वचिद्भूरिगुणोपेतं गुणहीनमुत क्वचित् ॥ ३७ ॥
श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितम् ।
भुञ्जे भुक्त्वाऽथ कस्मिंश्चिद्दिवा नक्तं यदृच्छया ॥ ३८ ॥
क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा ।
वसे ऽन्यदपि सम्प्राप्तं दिष्टभुक् तुष्टधीरहम् ॥ ३९ ॥
क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु ।
क्वचित्प्रासादपर्यङ्के कशिपौ वा परेच्छया ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतोऽनर्थहेतुत्वात्प्राणे जीवनेऽर्थे च स्पृहा न कार्येत्याह—शोकेति ॥ ३३ ॥

नन्वेवमनर्थाननुभवन्तोऽपि न केचिन्निर्विद्यन्ते न च यथालाभेन तुष्यन्ति त्वं तु कथं वैराग्यादिकं प्राप्तोऽसि ? तत्राऽऽह, मधुकारेति. मधुमक्षिकाऽजगरौ ययोः शिक्षया वृत्तपर्यालोचनया ॥ ३४ ॥

मधुकाराच्छिक्षितमाह—विराग इति । वित्तपतिं हत्वाऽन्यो वित्तं हरेदित्यर्थम् ॥ ३५ ॥

अजगराच्छिक्षितमाह—अनीह इति । सत्त्ववान्धैर्यवान् ॥ ३६ ॥

पीनत्वे हेतुं वदन्यदृच्छया प्राप्तात्परितोषं प्रपञ्चयति—क्वचिदल्पमिति, षड्भिः ॥ ३७ ॥ ३८ ॥

चीरं जीर्णवस्त्रखण्डम् वसे परिदधे दिष्टभुक् प्रारब्धकर्मफलभोगी ॥ ३९ ॥

प्रासादमध्ये पर्यङ्के तत्रापि कशिपौ तूलिकायाम् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं भयमेवापितु शोकमोहभयादयः सर्वे यन्मूलाः यदर्थमेव मूलं येषां ते नृणां स्युर्भवेयुः तस्माद्बुधः हेयोपादेयविवेकवान् तयोः प्राणार्थयोः स्पृहां जह्यात् त्यजेत् ॥ ३३ ॥

यदुपदेशात् त्वमीदृशं निवृत्तिधर्ममास्थितस्तं कथयेत्यत आह—मधुकारेति । अस्मिन् लोके नोऽस्माकं गुरुश्रेष्ठौ मधुकार महासर्पौ मधुमक्षिको अजगरावेवैतद्धर्मशिक्षकौ भवतः तदेवाह—ययोर्मधुकारमहासर्पयोः शिक्षया वृत्तिपर्यालोचनया वयं वैराग्यं परितोषं दैवाल्लब्धात् सन्तोषं च प्राप्ताः तत्र मधुकाराद्वैराग्यं महासर्पात् परितोषं च प्राप्ता इत्यर्थः ॥ ३४ ॥

एतदुभयं विवृणोति—विराग इति, द्वाभ्याम् । तावत्सर्वेभ्यः विरागो मया मधुव्रताद्भ्रमराच्छिक्षितः तच्छिक्षया मम वैराग्योदय इत्यर्थः । किं तच्छिक्षितम् ? तदाह—यथा मधुव्रतैरितस्ततः पुष्पेभ्य आनीय कश्चिन्निर्घोषितं मधु तत्कामिनो मधुव्रतान् हत्वाऽन्यो हरति तथा मधुवत् दुःखेनार्जितं धनमन्यः पतिं धनस्यपतिं हत्वा हरेदित्येतन्मधुव्रताच्छिक्षितमित्यर्थः ॥ ३५ ॥

अजगराच्छिक्षितमाह—अनीह इति । महाहिरिवाऽहमप्यनीहः निर्व्यापारः यदृच्छोपनताद्दैवाल्लब्धादाहारात् परितुष्टात्मा सन्तुष्टचित्तः नो चेत् यदृच्छोपनतं नो प्राप्तं चेत्तर्हि सत्त्ववान् धैर्यवान् बहून् अहानि शये शयानोऽस्मि ॥ ३६ ॥

पीनत्वे हेतुत्वेन यदृच्छया प्राप्तात्परितोषं प्रपञ्चयति—

(१) स्वाद्वस्वादु इति वीर० पा० ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

क्वचिदल्पमिति। क्वचित् कदाचिदल्पं कदाचिच्च भूरि बहु क्वचिच्च स्वादु क्वचिच्चास्वादसमीचीनममृष्टं क्वचिच्च गुणवद्गुरुवत् कदाचिन्निर्गुणम् ॥ ३७ ॥

कदाचिच्छ्रद्धया नीतं कदाचिन्निन्दापूर्वकमानीतं वाऽन्नादिकं भुञ्जे अपि कदाचिद्दिवा नक्तं च यदृच्छया प्राप्तं भुञ्जे ॥ ३८ ॥

एवं वस्त्रमपि दुकूलाद्यन्यतममन्यद्वा दैवाल्लब्धं वसे आच्छादयामि परिदधे च चीरं जीर्णवस्त्रञ्च एवं दिष्टभुक् प्रारब्धभुक् सन्तुष्टचित्तश्चाहम् ॥ ३९ ॥

क्वचित्तल्पपृष्ठे क्वचिच्च तृणादिषु शये क्वचिच्च प्रासादोपरि पर्यङ्के तत्रापि कशिपौ वा तस्य दीर्घ्यपर्यङ्कां निराह-परेषामिच्छयेति। इदमुत्तरत्राप्यनुषञ्जनीयः ॥ ४० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ननु, सर्वोऽनर्थशमने किं कारणमित्याशङ्क्य स्पृहा सर्वापदो निदानमतस्तत्त्याग एव प्रथमतः कारणमित्याह-शोकेति। या स्पृहा मूलं येषां ते तथा प्राणे ऽर्थे च स्पृहां नैष्यावसिद्धान्ते तद्विरोधिनो जनात् प्राणसङ्कटे प्राप्ते प्राणरक्षणे स्पृहाऽपि न कार्या किमुतार्थे इति प्रदर्शनाय प्राणग्रहणम् ॥ ३३ ॥

वित्तवतः प्राणभयं वित्तस्पृहया शोकादिकं स्यादित्याद्युक्तमर्थं मधुकराजगरदृष्टान्तेन बोधयति—मधुकरेति। गुरूत्तमाद्या शिक्षा साऽऽभ्यामेवाप्तेति गुरूत्तमावित्युक्ते ॥ ३४ ॥

यथा च तं मधुव्रतं हत्वा ऽन्यो मधु हरति तथा वित्तपादकं हत्वा कृच्छ्रादर्जितं राजाद्यन्यतमो हरेत् मधुव्रतदिति दृष्ट्वा सर्वकामेभ्यो विरागः शिक्षितः ॥ ३५ ॥

उदरपोषणप्रयत्नशून्योऽनीहः नो चेद्यदृच्छया ऽप्राप्तं चेन्महाहिरजगरः ॥ ३६ ॥

भूरिगुणोपेतं कस्मिंश्चिद्दिवाऽह्नघेव भुक्त्वा नक्तं भुञ्जे कस्मिंश्चिद्दिने नक्तं भुक्त्वाऽह्नि भुञ्जे ॥ ३७ ॥ ३८ ॥

क्षौमं दुकूलमित्यादिकमेकस्मिञ्जन्मनि यद्वा जन्मनि चेति यथायोग्यमङ्गीकर्तव्यम् दैवलब्धेन भुञ्जे इति दिष्टभुक् क्षौमाद्याच्छादनं गजादिभिश्चरणं भृत्यजन्मनि प्रासादादिशयनं भूपृष्ठशयनं च पश्वादिजन्मनि भस्मादौ शयनं श्वानादिजन्मनि बाल्ये च अजिनादि अजिनाद्याच्छादनमृष्यादिजन्मनि अस्मिन् जन्मनि जन्मान्तरे वा दिग्वासाः दिगम्बरः ॥ ३९ ॥ ४० ॥ ४१ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

क्वचिदिति, सार्द्धकं। स्वाद्वस्वादु वेत्यत्र साध्वसाधु वेति क्वचित् पाठः ॥ ३७ ॥

भुञ्जे इत्यर्द्धकम् ॥ ३८—४४ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

"प्राणार्थयोः स्पृहां जह्यात्" इति शरीरस्वाभिकार्थं धनाधिकार्थं च न यतेत स्वल्पेनापि बलेन स्वल्पेनापि धनेन पारमार्थिककृत्यसिद्धेरिति भावः ॥ ३३ ॥

ननु, कस्माद्गुरोरेतत्त्वया शिक्षितम? तत्राह-मधुकारेति ॥३४॥

मधुमक्षिकातः शिक्षितमाह—वित्तपालि हत्वाऽन्यो वित्तं हरेदिति मे वित्ते विरागः ॥ ३५ ॥

अजगरादिक्षितमाह—अनीह इति। शये स्वपिमि सत्त्ववान् धैर्यवान् ॥ ३६ ॥ ३७ ॥ ३८ ॥

वसे परिदधे ॥ ३९ ॥

वरोपस्थे वराकाण्डे "उपस्थः क्रोडेऽपि तथा क्रोडे मदनमन्दिरे" इति मेदिनी ॥ ४० ॥ ४१ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अतो नृणां शोकादयो यन्मूलाः स्युस्तां प्राणार्थयोः स्पृहां बुधो जह्यादेव ॥ ३३ ॥

यच्छिक्षया यन्मूलिपर्य्यालोचनया वैराग्यं परितोषं च वयं प्राप्ताः ॥ ३४ ॥

हत्वा पतिं वित्तपालिम ॥ ३५ ॥

यदृच्छोपनतादन्यादितः नो चेदनुपनते अप्यादौ सत्त्ववान् धैर्यवान् शये स्वपिमि ॥ ३६-३७-३८ ॥

चीरं वस्त्रखण्डम् वसे परिदधे दिष्टभुक् प्रारब्धभुक् ॥३९-४०॥

———

भाषाटीका।

शोक मोह भय क्रोध राग दैन्य श्रम ... इक सबों का मूल कारण जो, प्राण और द्रव्य की स्पृहा है, अर्थात् चाहना है, बुद्धिमान उसे छोड़ देवे ॥ ३३ ॥

मधुकार और महासर्प ये दोनों इस लोक में हमारे उत्तम गुरु हैं, हमने वैराग्य और सन्तोष नहीं की शिक्षा से पाया है ॥ ३४ ॥

सर्व कामों से वैराग्य हमने मधु की माखी से सीखा है। जैसे कि? मधुमक्षिका मधु जोड़ती है, फिर फल को नहीं प्राप्त होती है, कोई दूसरा पुरुष पति को मारकर लेता है ऐसे ही धन की दशा है ॥ ३५ ॥

और अजगर से हमने यह सीखा है, कि विना चेष्टा किये हरीच्छा से जो प्राप्त हो जाय, उसी से सन्तोष करे, यदि कभी कुछ नहीं प्राप्त होवे। तब धैर्य को धारणकर अजगर के तरह सोते रहते हैं ॥ ३६ ॥

क्वचित्स्नातोऽनुलिप्ताङ्गः सुवासाः स्रग्व्यलङ्कृतः ।
रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो ! ॥ ४१ ॥
नाऽहं निन्दे न च स्तौमि स्वभावविषमं जनम् ।
एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ॥ ४२ ॥
विकल्पं जुहुयात्(१) चित्तौ तां मनस्यर्थविभ्रमे ।
मनो वैकारिके हुत्वा तं मायायां जुहोत्यनु ॥ ४३ ॥
आत्मानुऽभूतौ तां मायां जुहुयात्सत्यदृङ् मुनिः ।
ततो निरीहो विरमेत् स्वानुभूत्याऽऽत्मनि स्थितः ॥ ४४ ॥
स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितम् ।
व्यपेतं लोकशास्त्राभ्यां भवान्हि भगवत्परः ॥ ४५ ॥

नारद उवाच ।

धर्म्मं पारमहंस्यं वै मुनेः श्रुत्वाऽसुरेश्वरः ।
पूजयित्वा ततः प्रीत आमन्त्र्य प्रययौ गृहम् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां युधिष्ठिरनारदसंवादे यतिधर्मे
त्रयोदशोऽध्यायः ॥ १३ ॥

भाषा टीका ।

कभी थोड़ा कभी बहुत स्वादु वा अस्वादु जैसा अन्न मिले वैसा भोजन करलेते हैं, कभी बहुगुण वाला, कभी किसी जगह गुणहीन भी मिलता है, तौ उसी से सन्तुष्ट रहते हैं ॥३७॥

किसी समय श्रद्धा से लाया हुआ, कभी मानवर्जित, किसी समय दिन में, कभी रात में, यदृच्छा से भोजन करलेते हैं। कभी न भोजन करके भी रहजाते हैं ॥ ३८॥

बहुत उत्तम क्षौम (अतसीका वस्त्र) कभी रेशमी कभी मृग चर्म वा चीर अथवा वल्कल अथवा और जो कुछ प्राप्त होगया उसको पहिन लेते हैं। और प्रारब्ध को भोगते हुए उसी में बुद्धि का सन्तोष करलेते हैं ॥ ३९ ॥

किसी समय पृथिवी के पृष्ठपर कभीतृण पर, कभी पत्तोंपर, कभी पत्थर पर, कभी धूलि वा भस्म में पड़े रहते हैं, किसी समय दूसरे की इच्छा से महलों में पर्यंक के ऊपर, कभी खट्वा के ऊपर सो जाते हैं ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चरे विचरामि क्वचिद्ग्रहवद्दिगम्बरो विचरामि ॥ ४१ ॥

न च मानापमानकर्तृषु मम वैषम्यमित्याह—नाहमिति । नाभिनन्दामि न च स्तौमि महात्मनि विष्णौ ॥ ४२ ॥

एवंभूतत्वेन स्थितामुपायमाह—विकल्पमिति, द्वाभ्याम् । चित्तौ भेदग्राहकमनोवृत्तौ अर्थरूपो विभ्रमो यस्मिन्मनसि तन्मनो वैकारिके ऽहङ्कारे तमहङ्कारमप्यनन्तरं महत्तत्त्वद्वारेणेत्यर्थः ॥ ४३ ॥

सत्यमेव पश्यतीति तथा ॥ ४४ ॥

मन्ददृष्ट्या लोकशास्त्राभ्यां व्यपेतं न तु तत्त्वदृष्ट्या यतो भवान्भगवत्परः ॥ ४५ ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥

(१) चित्तं तन्मनसि इति पाठः—वीर० विजय० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्नातमनुलिप्तं चन्दनेन चारु यस्य क्षौमं वासो यस्य अभिरलंकृतः रथादिभिर्यानैः चरे सञ्चरामि कश्चिद् दिग्वासा दिगम्बरः ग्रहवच्चरे हे विभो ! ॥ ४१ ॥

न च मानावमानादिकर्तृषु मम वैषम्यमित्याह—नाहमिति । स्वभावत एव विषमं जनं स्तुतिनिन्दयोः कर्तारं न स्तौमि न निन्दे च किन्तु तेषां जनानां सर्वेषां श्रेयः धर्माविरूपम् उताऽपि च महात्मनि भगवत्यैकात्म्यमेकचित्तत्वं चाशासे प्रार्थये ॥ ४२ ॥

इत्थमन्यस्याप्यवस्थितौ उपायमाह—विकल्पमिति । विकल्पं जातिरूपादिविकल्पं चित्ते मनोव्यापारे जुहुयात् प्रलीनं भावयेत् चित्तमर्थविभ्रमे देहात्मभ्रमहेतौ मनसि मनश्च वैकारिके सात्त्विकाहंकारे तं च वैकारिकं मायायां मूलप्रकृतौ जुहुयात् सर्वत्र होमो नाम तथानुसन्धानरूपः ॥ ४३ ॥

तां च मायां आत्माऽनुभूतौ जुहुयात् ततः सत्यं आत्मशरीरकं परमात्मानं पश्यतीति सत्यदृक् मुनिः तन्मननशीलः निरीहो निर्गतेहः आत्मानुभूत्यात्मनि परमात्मात्मके परिशुद्धजीवस्वरूपे स्थितः तदनुसन्धानपरः विरमेत्प्रारब्धावसाने कलेवराद्विरमेत् ॥ ४४ ॥

उक्तं वृत्तमुपसंहरति—स्वात्मवृत्तमिति । इत्थं मया गुप्तमपि आत्मनो मम वृत्तं मन्दहृदया लोकशास्त्राभ्यां व्यपेतं न तु तत्त्वदृशा व्यपेतं बहिर्भूतं ते तुभ्यमुपवर्णितं हि यस्मात्त्वं भगवत्परोऽसि गुप्तमुपवर्णितमित्यर्थः ॥ ४५ ॥

एवं मुनिनोपवर्णितं पारमहंस्यं तुर्याश्रमनिष्ठानां धर्मं श्रुत्वाऽसुरेश्वरः प्रह्लादः तं यतिं प्रीतहसन् पूजयित्वा आमन्त्र्य अनुज्ञाप्य स्वगृहं प्रति ययौ ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सत्त्वादिगुणस्वभावेन विषमं सात्त्विकराजसतामसभेदं भिन्नं सर्वेऽप्ययं मत्त इति यतिधर्मत्वात् भूतानां भद्रमेवाशासे तत्रापि भगवत्स्वामित्वं न विस्मरामीत्याह—आशास इति । उतेत्याशास इत्यनुवर्तते जगत एक एव स्वामीति भावमैकात्म्यम् उताशासे कस्मिन्विषये महात्मनि भगवद्विषय इत्यर्थः ॥ ४२ ॥

तुर्यावस्थेन विहितोपासनानन्तरमिदं च कर्तव्यं ब्रह्मप्राप्तिमार्गत्वादित्याह—विकल्पमिति । विकल्पं जगद्वस्तु मनोवृत्त्यभिमानिनि न्यसेज्जुहुयात् जगच्चित्ताख्यागन्धधीनमिति चिन्तयेत् चित्तमप्यर्थेषु भ्रममाणो भगवत्युपाश्रयमाणे मनसि मनो नामेन्द्राधीनतया तिष्ठतीति चिन्तयेत् मन इन्द्रं वैकारिके रुद्रे हुत्वा सन्निधाप्यामुं रुद्रं मायायां प्रकृतिविकारे महत्तत्त्वे विरिञ्चं सन्निधाप्य तां मायां तं विरिञ्चं वाऽऽत्मानुभूतौ चित्प्रकृतौ जुहुयात् चिन्तयेत् "चित्ताख्याऽस्मरधीनं हि जगदेतद्विचिन्तयेत् । मनो नामेन्द्रवशगमपि च प्रतिचिन्तयेत्" इति वा वाक्यात्सर्वमवगन्तव्यम् । अत्र जडकार्यस्य जडकारणात्मकत्वं चेतनस्य चेतनाधीनत्वं चिन्तनीयमित्यर्थः । तामात्मानुभूतिं स्वानुभूतेर्हुत्वा आत्मनि स्वामिनि पत्यौ निरन्तरं चिन्तयेत् ततो मुनिरनन्तरं कृतकृत्यो "वर्त्म वेदस्य सर्वस्य मुनिः सन्निरवाहृतः" इत्युत्पन्नमात्रवचनात्. किञ्च सत्यं साधुगुणपूर्णं विष्णुं पश्यतीति सत्यदृक् स्वानन्दानुभवात्मनि स्वमहिम्नि स्थितः "महिम्नि स्वे महीयते" इति वचनात् स्वरूपानन्दस्वात्मनि प्रतिष्ठित इति वा निरीहः अत एव निषिद्धव्यापाररहितो विरमेत् कृत्यादिति शेषः ॥ ४३ ॥ ४४ ॥

प्रतिपादितमर्थं निगमयति—स्वात्मेति । मया स्वात्मनो मम वृत्तं तुभ्यमनुवर्णितमित्यन्वयः । आत्मनो जीवस्य वा परमात्मनो वा कीदृशं गुप्तं लोकशास्त्राभ्यां व्यपेतं रहितं भ्रान्तानां विपरीतत्वेन प्राप्तं शास्त्रमन्यत्वाल्लोकशास्त्रीयमित्यर्थः—

"अशास्त्रीयत्वात्मगुप्तमनः स्वात्मापेतमिदं विदुः ।
शास्त्रमिश्र्यं जगत्यस्मात् लोकशास्त्रीयमभिधीयते" ॥

इति वचनादुक्त एवार्थः । इदं सिद्धमित्यभिप्रेत्याह—भवानिति ॥ ४५ ॥

ततः प्रह्लादेन किं कृतमित्यतस्तदनुगममाह—नारद इति । पारमहंस्यं परमहंसानां निवृत्तिमार्गस्थानां विद्यमानम् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवत्पर इति क्वचित् पाठः ॥ ४५ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

श्रेयो भक्तियोगं तस्य भगवतः सकाशाद्दुर्लभत्वमाशंसयाह, उतेति । ऐकात्म्यं मोक्षं महात्मनि परमात्मनि ॥ ४२ ॥

एवंभूतत्वेन योगिनः क्रियामुपायमाह—विकल्पमिति, द्वाभ्याम् । विविधं कल्पनं इति विकल्पो व्यवहारस्तं चित्ते मनोवृत्तौ तत्र एव तस्य प्रवृत्तेः तां मनसि अर्थानां विविधं स्मरणं यातायातं यतस्तस्मिन् वैकारिकेऽहंकारे तं महति तच्च महान्तं मायायाम् अत्र तं महतीति पदद्वयमध्याहार्यम् ॥ ४३ ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

लोकशास्त्राभ्यां व्यपेतं रहितमिति मन्ददृष्ट्या नतु तत्त्वदृष्ट्या किञ्च हीति हि यतो भवान् भगवत्प्रियो महाभागवतः तथाऽनेन प्रयोजनाभाव इति भावः ॥ ४५ ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
त्रयोदशः सप्तमस्य सङ्गतः सङ्गतस्सताम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीप ।

चरे विचरामि ॥ ४१ ॥

श्रेयो मुमुक्षूणां मायामयमैश्वर्यम् महात्मनि भगवति मुमुक्षूणामैकात्म्यं तद्भावापत्तिलक्षणां मोक्षम् ॥ ४२ ॥

महात्मन्यैकात्म्यलक्षणस्य मोक्षस्योपायमाह—विकल्पमिति, द्वाभ्याम् । स्वानुभूत्या स्वीयस्य परमात्मनो ध्यानेन आत्मनि परमात्मनि स्थितः भगवद्ध्याननिष्ठो मुमुक्षुः विकल्पं चित्तं चित्तो वृत्तौ जुहुयात्तां मनसि मनो वैकारिके सात्त्विकाहङ्कारे हुत्वा अनु अनन्तरं तं महत्तत्त्वद्वारा मायायां प्रकृतौ जुहोति जुहुयात् ॥ ४३ ॥

तां मायाम् आत्मानुभूतौ जगत्कारणे जुहुयात्तत्कल्पिततया तस्मिन्प्रविलाप्य स्वयमात्मनि भगवति अंशिनि दृग् दृष्टिर्यस्य सः विरमेत् संसारादिति शेषः । देवयानेन तत्पदं व्रजेदित्यर्थः ॥४४॥

भवान् भगवत्प्रियोऽतस्ते आत्मवृत्तं सुगुप्तमपि मया वर्णितम् कथम्भूतं लोकशास्त्राभ्यां लोकः प्रसिद्धः शिश्नोदरतृट्-शास्त्रं तदनुरूपं कर्मादिप्रतिपादकं भगवच्छास्त्राविरुद्धं ताभ्यां व्यपेतं दूरीभूतम ॥ ४५—४६ ॥

इति श्रीमद्भागवते महापुराणेसप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोदशाऽध्यायार्थप्रकाशः ॥ १३ ॥

भाषा टीका ।

किसी समय किसी की इच्छा से स्नान कर० चन्दन को लेपन कर सुन्दर वस्त्रों को धारण कर माला पहिन अलंकृत होकर, रथ हस्ती घोड़ाओं पर बैठकर चलते हैं । हे विभो ! और कभी दिगम्बर (नग्न) होकर, जैसे कोई राहु केतु शनि आदि नवग्रहोंमे से कोई ग्रह आगया हो वा पिशाच०हो, इस तरह विचरते रहते हैं ॥ ४१ ॥

जनतो स्वभाव से विषम हैं, कोई प्रतिकूल वर्त्तता है, कोई अनुकूल वर्त्तता है, परञ्च मैं तो किसी की निन्दा भी नहीं करता और किसी की बड़ाई भी नहीं करता हूं किन्तु इन सबों के श्रेय (मङ्गल) को मनाता हूं, और परमात्मामे एकता (निष्कपटता) चाहता हूँ ॥ ४२ ॥

मनके संकल्पविकल्पों को चित्त की वृत्तियों में हवन करे, उनको अर्थ के विभ्रम करने वाले मन में होमदे, मनको सात्त्विक अहंकार में, उसको महतत्त्व में, उसको प्रकृतिमें, हवन का अनुसंधान करे ॥ ४३ ॥

उस प्रकृति पद वाच्य माया को आत्मानुभव में हवन करे, फिर वह सत्य दृष्टा मुनि निश्चेष्ट होकर विराम को प्राप्त हो जाय, और अपने अनुभव से परमात्मा में लिन होरहे॥४४॥

हे प्रह्लाद ! अतिगुप्तभी अपना समाचार हमने तुमसे इस प्रकार वर्णन किया और यह लोक शास्त्रसे अविरुद्ध है और आप तो भगवत्प्रिय हो सब आगत ही हो ॥ ४५ ॥

नारद उवाच ॥

नारदजी बोले, । कि असुरेश्वर प्रह्लाद, इस प्रकार परमहंसों के धर्मोंको सुनकर बड़े प्रसन्न हुवे, और मुनि की पूजकरा आज्ञा लेकर घर को सिधारे ॥ ४६ ॥

इति श्रीमद्भागवत सप्तस्कन्ध में त्रयोदश अध्याय की
भागवताचार्यकृत भाषा टीका समाप्त ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

———:*:———

॥ चतुर्दशोऽध्यायः ॥

युधिष्ठिर उवाच ।
गृहस्थ एतां पदवीं विधिना येन चाञ्जसा ।
याति देवऋषे ! ब्रूहि मादृशो गृहमूढधीः ॥ १ ॥
नारद उवाच ।
साधु पृष्टं महाराज ! लोकान्साध्वनुगृह्णता ।
एतत्तुभ्यं प्रवक्ष्यामि नैष्कर्म्यं कर्मणो यतः ॥ ० ॥
गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः ।
वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥ २ ॥
शृण्वन्भगवतोऽभीक्ष्णमवतारकथामृतम् ।
श्रद्दधानो यथाकालमुपशान्तजनाऽऽ(२)वृतः ॥ ३ ॥
सत्सङ्गाच्छनकैः सङ्गमात्मजायात्मजादिषु ।
विमुच्येन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ॥ ४ ॥
यावदर्थमुपासीनो देहे गेहे च पण्डितः ।
विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ॥ ५ ॥
ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे ।
यद्वदन्ति यदिच्छन्ति चानुमोदेत निर्ममः ॥ ६ ॥
दिव्यं भौमं चाऽऽन्तरिक्षं वित्तमच्युतनिर्मितम् ।
तत्सर्वमुपभुञ्जान एतत्कुर्यात्स्वतो बुधः ॥ ७ ॥
यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्दशे गृहस्थस्य परमो धर्म ईर्यते ।
देशकालादिभेदेन पुनः श्रेयो विशेषवत् ॥ १ ॥

गृहस्थमुल्लङ्घ्य मोक्षं प्रत्यन्तरङ्गत्वे प्रथमं वनस्थयतिधर्मेष्वभिहितेषु तर्हि गृहस्थस्य मोक्षो न स्यादिति शङ्कितचित्तः पृच्छति, गृहस्थ इति ॥ १ ॥

तस्य मोक्षधर्मानाह—गृहेष्वित्यादि, यावदध्यायसमाप्ति । साक्षाद्वासुदेवार्पणं यथा भवत्येवं कुर्वन्नुपासीत ॥ २ ॥ ३ ॥

स्वयमेव मुच्यमानेषु विमुञ्चमानेषु यथा स्वप्नादुत्थितः पुमान् स्वप्नदृष्टेषु पुत्रादिषु सङ्गं विमुञ्चति तद्वत् ॥ ४ ॥

नन्वेवम्भूतस्य दुर्जनैरभिभूयमानस्य कुतो गृहोचिताः क्रियाः स्युरत आह—यावदर्थमिति । अन्तस्त्वनासक्तो बहिस्त्वासक्त इव नृलोके जनमध्ये नरतां मनुष्यतां न्यसेत् पुरुषकारमाविष्कुर्यादित्यर्थः ॥ ५ ॥

आग्रहं तु क्वापि न कुर्यादित्याह, ज्ञातय इति ॥ ६ ॥

नन्वेवं सर्वानुमोदने विघ्नबहुप्रसङ्गात्कुतो जीवनं कुतो वा कर्मकरणं तत्राह—दिव्यं वृष्ट्यादिभिर्जातं धान्यादि भौमं

* श्लोकोयमधिकः पठ्यते वीर० ॥　　(२) वृतमिति विज० पाठः ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निधानादि, आन्तरिक्षमकस्मादेव प्राप्तम्. एवं स्वत एवाऽच्युतनिर्मितं दैवलब्धं यत् एतत्पूर्वोक्तं कर्मादि ॥ ७ ॥

दैवाद्भूरिलाभे जातेऽपि तत्राऽभिमानो न कार्य इत्याह—यावदिति । म्रियेत पूर्येत ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमाश्रुताश्रमत्रयधर्मो गृहस्थाश्रमधर्मान् बुभुत्सुः पृच्छति, युधिष्ठिरः—गृहस्थ इति । हे देवर्षे ! सन्ध्यभाव आर्षः गृहेष्वेव मूढा धीर्यस्य गृहासक्तचित्तो यादृशो गृहस्थाश्रमस्थः पुमान् येन विधिना एतां पदवीं तुर्याश्रमिगम्यां पदवीं मार्गं मुक्तिमित्यर्थः । यायात् प्राप्नुयात् तं विधिं ब्रूहि ॥ १ ॥

एवमापृष्टगार्हस्थ्यधर्मो देवर्षिस्तत्प्रश्नमभिनन्दंस्तान् धर्मान् वक्तुं प्रतिजानीते—साध्विति । हे महाराज ! जानतापि त्वया लोकान् साधु यथा तथाऽनुगृह्णता साधु पृष्टमेतत्त्वत्पृष्टं गार्हस्थ्यव्रतमहं तुभ्यं प्रवक्ष्यामि यतः कर्मणः मया वक्ष्यमाणगार्हस्थ्यधर्मात् कर्मणां मुक्तिप्रतिबन्धकानां पुण्यपापात्मकानां निरासद्वारा नैष्कर्म्यं ज्ञानयोगलाभो भवेत् ॥ ० ॥

एवं प्रतिज्ञाय गार्हस्थ्यधर्मानाह—गृहेष्वित्यादिना यावदध्यायसमाप्ति । यद्यपि प्रथमाश्रमधर्मकथनानन्तरम् एवैतदाश्रमधर्मवर्णनं युक्तं क्रमप्राप्तत्वात्तथापि गार्हस्थ्यधर्माणां बाहुल्यान्महता प्रबन्धेन वर्णनीयत्वादाश्रमान्तरधर्मवर्णनानन्तरं ते कथ्यन्ते क्रमानादराद्वा । अत्र केचिद्वदन्ति मोक्षान्तरङ्गत्वेन प्रथमं वनस्थयतिधर्मानभिधाय पश्चाद्गृहस्थधर्मानभिदधातीति, तन्मन्दम् "अतस्त्वितरज्ज्यायो लिङ्गाच्च" ३।४।३९। इति शारीरकन्यायेन ब्रह्मविद्याऽनुग्राहकाल्पधर्माश्रमान्तरापेक्षया तदनुग्राहकबहुधर्मकगार्हस्थ्यस्यैवान्तरङ्गत्वादतो यथोक्त एवाशयः । हे राजन् ! गृहेष्ववस्थितः गृहाश्रमस्थः गृहोचिता आश्रमाऽनुगुणाः क्रियाः कर्माणि सन्ध्योपासनपञ्चमहायज्ञादीन्यावश्यकानि साक्षाद्वासुदेवार्पणं यथा भवति तथा कुर्वन् फलसङ्गकर्तृत्वत्यागपूर्वकं कुर्वन् महामुनीनुपासीत भगवद्गुणमननशीलान्महाभागवतानुपासीत सेवेतेत्यर्थः ॥ २ ॥

कथम्भूतः तेभ्यो भगवत अवतारकथामृतमभीक्ष्णं पुनः पुनः यथाकालमावश्यकधर्मानुष्ठानावशेषितं कालमुपशान्तजनैः सहितः श्रद्धापूर्वकं शृण्वन् ॥ ३ ॥

एवं सतां सङ्गात् देहदारपुत्रादिषु शनकैः सङ्गं विमुञ्चंस्तेष्वहंममताद्यभिमानं त्यजेदेवं मुच्यमानेषु मुक्ताऽभिमानविषयेषु सत्सु देहादिषु स्वप्नवदुत्थितो यथा स्वप्ने गच्छन्ये पुत्रादौ तस्मादुत्थितः तत्कालमात्राऽनुभाव्यतां भावयेत् ॥ ४ ॥

तथा देहे गेहेषु धनाद्यदारादिषु च पण्डितः अस्थिरत्वाऽपुरुषार्थत्वानुसन्धानवान् तत्र देहादौ स्वयं विरक्तोऽपि रक्तवदासक्तवद्यावदर्थं प्राणधारणाऽपेक्षितमर्थमुपासीनः स्वीकुर्वन् नृलोके नृशरीरे नरतां न्यसेदनुसन्दधीत नरत्वादिकं देहगतमनुसन्दधीत नत्वात्मन्यनुसन्दधीतेत्यर्थः ॥ ५ ॥

आत्मादयस्तेऽन्योऽन्ये च यद्वदन्ति, यदेच्छन्ति तत्सर्वं निर्ममः ममकाररहितो मोदेताऽनुमोदेत ॥ ६ ॥

यावदर्थपरिग्रह इत्येतदेव विवृणोति-यद्भगवता निर्मितं प्रापितं दिव्यादिभेदभिन्नं वित्तं तत्र दिव्यं वित्तं वृष्ट्यादिभिर्जातं धान्यादि भौमं भूम्याज्जातं सुवर्णादिरूपम् आन्तरिक्षमकस्मादेव प्राप्तम् यद्वा दिव्यं वित्तमर्काऽऽलोकादि आन्तरिक्षं वर्षं भौमं तृणादि तथैतत्सर्वमुपयुञ्जानो विनियुञ्जान अबुधोऽविवेकी चेत् स्वतः स्वत्वेन कुर्यात् अबुधश्चेदेतत्सर्वं स्वत्वेनाभिमन्येतेत्यर्थः । यद्वा बुध इत्येकच्छेदः विवेकी तत्सर्वमुपयुञ्जानः एतद्यथोपयुक्तं स्वतः कुर्यात् स्वत्वेन स्वीकुर्यादिदं धारणमात्रोपयुक्तमेव स्वीकुर्यादित्यर्थः ॥ ७ ॥

अधिकं न स्वीकुर्यात् इत्यभिप्रायेण तस्मिन् स्वत्वाभिमानं कुर्यादित्याह—यावदिति । हि यस्माद्यावज्जठरमुदरं म्रियेत पूर्येत तावदेव स्वत्वं देहिनामुदरभरणोपयुक्त एव हि वित्ते देहिनां स्वत्वाभिमान इत्यर्थः । एवं हि योऽधिकमपि स्वत्वेनाभिमन्येत स पुमांस्तेनश्चोर एव यत एवं ततो दण्डमेवार्हति इह दण्डाभावेऽप्यमुत्र दण्डमर्हत्येव यद्वा संसृतिरूपं दण्डमर्हतीति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्ववर्णाश्रमाणां गृहाश्रममूलत्वात्सूचीकटाहन्यायेन वर्णाश्रमधर्मं निरूप्य गृहाश्रमधर्मं निरूपयत्यस्मिन्नध्याये, तत्र "आपृष्टः कस्यचिद्ब्रूयात्" इति न्यायात् युधिष्ठिरः पृच्छतीत्याह—युधिष्ठिर इति । एतां पदवीमन्याश्रमविषयां विधिना प्रकारेण ॥ १ ॥

* नैष्कर्म्यं मोक्षसाधनत्वम् ॥ ० ॥

गृहोचिताः क्रियाः पञ्चयज्ञलक्षणाः—

"पञ्चयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् ।
बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः ॥
भूतपित्रमरब्रह्ममनुष्याणां महामखाः"—

इति याज्ञवल्क्यः । वासुदेवार्पणं कुर्वन्निति शेषः ॥ २ ॥

उपशान्तजनेन संन्यासिजनेनादृतं कामितम् ॥ ३ ॥

स्वप्नं दृष्ट्वोत्थितः स्वप्नदृष्टपदार्थसङ्गं यथा जहाति तथा जायादिसङ्गं मुञ्चेदित्यन्वयः ॥ ४ ॥

यावदर्थो यावद्देहयात्राप्रयोजनो देहादावुपासीनोऽवतिष्ठमानस्तत्र देहादौ रक्तवत् स्निग्धवन्नरतां नरत्वं न्यसेत्त्यजेत् यतिभिर्नेदित्यर्थः ॥ ५ ॥ ६ ॥

अन्तरिक्षं द्यावापृथिव्योर्मध्यमवमच्युतेन निर्मितं यन्निखिलमुपयुञ्जीरन् लोका इति शेषः तत्सर्वं जानन् स्वकीयमिति न स्वीकुर्यात् ॥ ७ ॥

यावदर्थं इत्युक्तं विवृणोति—यावदिति । जठरं यावदन्नं म्रियेत गृह्णाति तावदन्नं स्वन्नं स्वकीयमिति स्वीकुर्यात् ततोऽधिकादाने दण्डयोग्यमित्याह, अधिकमिति ॥ ८ ॥

---

* साधु पृष्टं महाभाग लोकानामनुगृह्णता । तत्त्वेन तदहं वक्ष्ये नैष्कर्म्यं येन कर्मणाम् ॥ इति मूलग्रन्थे ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गृहस्थ इति युग्मकम् ॥ १ ॥

साक्षादिति । तत्प्रीत्यर्थमेव न तु फलसाद्गुण्यार्थमित्यर्थः ॥२—११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

निवृत्तं त्रिषु निर्वर्ण्य प्रवृत्तन्तु गृहाश्रमे ।
देशकालादिभेदेन धर्म उक्तश्चतुर्दशे ॥

तदेवं ब्रह्मचारिवानप्रस्थयतिषु त्रिष्वधिकारिषु निवृत्तधर्ममुक्त्वा प्रवृत्तधर्ममेकस्मिन् गृहस्थ एवाधिकारिणि वक्तुं प्रवर्त्तमानं मुनिं प्रत्यक्षं प्रवृत्तधर्मेण जन्ममृत्युप्रवाहानुकूलेन दृष्कव्येन यदि च प्रवृत्तधर्मेणापि निवृत्तिधर्मफलं मोक्षः सिद्ध्येत्तर्हि तं ब्रूहि त्याशयेनाह—गृहस्थ इति ॥ १ ॥

वासुदेवार्पणं यथा स्यात्तथा कुर्वन् महामुनीन् उपासीत यथाकालं कालेकाले अपराह्णादौ उपशान्तजनावृतस्सन् कथाऽमृतमभीक्ष्णं शृण्वन् न तु कथाश्रवणकाले वार्त्तान्तरं शृण्वन्नित्यर्थः ॥ २—३ ॥

स्वयमेव मुच्यमानेषु वियुज्यमानेषु यथा उत्थितः प्रबुद्धः पुमान् स्वप्नदृष्टेषु पुत्रादिषु सङ्गं मुञ्चति तद्वत् ॥ ४ ॥

उपासीनो भोग्यमर्दयस्तूर्णीति शेषः । देहे गेहे च विषये पण्डित इति तत्र तत्र औदासीन्येन वर्त्तमान इत्यर्थः । रक्तवत् अन्तर्विरक्तो बहिस्त्वासक्तवत् तत्र गृहमध्यवर्तिनि नरतां पुरुषत्वं न्यसेत् पुरुषकारमाविष्कुर्यादित्यर्थः ॥ ५ ॥

निर्ममः अनासक्त एव अनुमोदेत ॥ ६ ॥

दिव्यं वृष्ट्यादिभिर्जातं धान्यादि भौममाकराद्युत्थम् आन्तरिक्षमकस्मात् प्राप्तं तत्तद्रूपत्वेन सर्वमच्युतेनैव विनिर्मितमतो विशार्थे नैव चिन्तां कुर्यादित्यर्थः । एतत् पूर्वोक्तं नित्यनैमित्तिकादि स्वतः स्वं वित्तं तेनेत्यर्थः ॥ ७ ॥

दैवाद्भूरिलाभे जातेऽपि न तत्राभिमानो नापि यथेष्टोपभोगः कार्य्य इत्याह—यावत् यावता भ्रियेत पूर्य्येत ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गृहस्थधर्म्मा वर्ण्यन्ते, चतुर्दशेऽध्याये तदेव पृच्छति—गृहस्थ इति ॥ १ ॥

वासुदेवार्पणं यथा स्यात्तथा यथोचिताः क्रियाः कुर्वन् महामुनीन् वासुदेवाश्रयान् ॥ २ ॥ ३ ॥

स्वयमेवागमापायित्वेन मुच्यमानेषु आत्मा देहकलत्रादिषु सङ्गं मुञ्चेत् यथा उत्थितः प्रबुद्धः स्वप्नवत् स्वप्नदृष्टेषु सङ्गं विमुञ्चति तद्वत् ॥ ४ ॥

यावदर्थः कार्य्याऽकार्यवित् देहे गेहे लोके च यावदर्थं यथाप्रयोजनमुपासीत सङ्गं कुर्यात् हृदि विरक्तस्तत्र रक्तवद्वर्तेत नरतां नरत्वाभिमानं न्यसेत् अहन्तां परित्यजेदित्यर्थः ॥ ५ ॥

स्वानिर्बन्धं विहाय ज्ञात्यादीनामुक्तिमिच्छांत चानुमोदेत निर्ममो ममतारहितो भवेत् ॥ ६ ॥

बुधः अच्युतसामर्थ्यवित् दिव्यं देवप्रसादलब्धं भौमं भूमिजं आन्तरिक्षमकस्मादागतं वित्तं सर्वमच्युतनिर्मितमिति मत्वा भुञ्जान एतत्प्रागुक्तं कुर्यात् ॥ ७ ॥

यावत् यावता जठरमुदरं भ्रियेत पूर्येत तावत्स्वत्वं देहिनः यस्तु अधिकमभिमन्येत स तु स्तेनश्चोरः अतो दण्डमर्हति ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीशो जयति ।

युधिष्ठिर उवाच ।

युधिष्ठिरजी बोले, कि—हे देवर्षे ! इस आप की कही हुई पदवी (मोक्षोपयोगिदशा) को जिस विधि से मेरे सदृश मूढ बुद्धि गृहस्थ भी सुलभ से प्राप्त हो जावे, सो विधि आप कहिये ॥ १ ॥

नारद उवाच ।

नारदजी बोले, कि—हे राजन् ! गृह में स्थित रहकर ही पुरुष गृह के उचित क्रियाओं को करता हुआ भी ऐसा करे कि जिस में वे क्रियायें देवतान्तर के उद्धारक साक्षात् श्री वासुदेव के अर्पण होतीं जाय—ऐसा करता हुआ महा मुनि अर्थात् ज्ञानियों की उपासना करा करे ॥ २ ॥

और सदा शान्त जनों के सत्संग में रहकर श्रद्धा युत होकर, निरन्तर गोविन्द के अवतार कथा रूप अमृत को सुनता रहे ॥ ३ ॥

और अपने को आप ही छोड़ने वाले ऐसे पुत्र कलत्रादिकों में से, सन्त सङ्ग के प्रभाव से, धीरे २ सङ्ग को छोड़ता जाय, जैसे कि—स्वप्न से उठा हुआ पुरुष, स्वप्न के देखे हुए पदार्थों में से ममता को छोड़ देता है, ॥ ४ ॥

ज्ञानी पुरुष, प्रयोजन के अनुगुण देह गेहादिकों में उदासीन रहे, परञ्च विरक्त होकर भी, ऊपर से रागवान् के तरह कुछ उद्यमता करता रहे ॥ ५ ॥

अपने जाति के लोग माता पिता पुत्र भ्राता और सुहृद लोग, जो कुछ कहें और जो २ इच्छा करें, ममता शून्य होकर उसका अनु मोदन करता रहे ॥ ६ ॥

स्वर्ग भूमि और आकाश में होने वाले जो पदार्थ परमात्मा के बनाये हुए हैं, उन सबों को भोगता हुआ बुद्धिमान पुरुष आप से ऐसे ही (पूर्वोक्त शान्ति के कार्यों को ही) किया करे ॥ ७ ॥

मृगोष्ट्रखरमर्काखु सरीसृप्खगमक्षिकाः ।
आत्मनः पुत्रवत्पश्येत्तैरेषामन्तरं कियत् ॥ ९ ॥
त्रिवर्गं नाऽतिकृच्छ्रेण भजेत गृहमेध्यपि ।
यथादेशं यथाकालं यावद्दैवोपपादितम् ॥ १० ॥
आश्वाघान्तेऽवसायिभ्यः कामान्संविभजेद्यथा ।
अप्येकमात्मनो दारां नृणां स्वत्वग्रहो यतः ॥ ११ ॥
जह्याद्यदर्थे स्वप्राणान् हन्याद्वा पितरं गुरुम् ।
तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः ॥ १२ ॥
कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम् ।
क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥ १३ ॥
सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः ।
शेषे स्वत्वं त्यजन्प्राज्ञः पदवीं महतामियात् ॥ १४ ॥
देवानृषीन्नृभूतानि पितॄनात्मानमन्वहम् ।
स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् ॥ १५ ॥
यर्ह्यात्मनोऽधिकाराद्याः सर्वाः स्युर्यज्ञसम्पदः ।
वैतानिकेन विधिना अग्निहोत्रादिना यजेत् ॥ १६ ॥

भाषा टीका ।

प्राणियों का उतना ही स्वत्व है, कि—जितने से जठर पूर्ण होता है, उतने से अधिक पदार्थ को जो अपना मानता है वही तस्कर है, और दण्ड के योग्य है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एव यं कमपि स्वगृहं क्षेत्रं वा प्रविश्य भुञ्जानं न निवारयेदित्याह—मृगेति । मर्को मर्कटः सरीसृप् सर्पः मक्षिकाश्च तैः पुत्रैरेषां मृगादीनां कियदन्तरम् ॥ ९ ॥

अतिकृच्छ्रेणापाद्य न भजेत्किन्तु यावद्दैवप्रापितं तावदेव भजेत् ॥ १० ॥

आश्वाश्च अघाश्च पतिताः अन्तेऽवसायिनश्चाण्डालादयः तानभिव्याप्य यथार्हं कामान् संविभजेत् स्वभोज्यान्विभज्य दद्यात् यद्यप्येकैवात्मनो दारा भार्या तस्यामतिथिशुश्रूषणे नियुक्तायां स्वस्य शुश्रूषा हीयेत यस्यां च नृणां स्वत्वग्रहो ममैवेयमित्याग्रहस्तामेकामपि संविभजेत् अतिथिशुश्रूषणे नियुञ्जीतेत्यर्थः । नत्वन्यथा मन्तव्यम् यथाऽर्हं विभजेदित्युक्तत्वात् ॥ ११ ॥

एवञ्चेत्तेनेश्वरो वशीकृतः स्यादित्याह—जह्यादिति । यदर्थं यन्निमित्तम् अन्यैरजितोऽपीश्वरस्तेन जित एव ॥ १२ ॥

ननु, कथमेवं तस्यां स्वत्वाऽभिमानो हातुं शक्यस्तत्राविचारेणेत्याह—कृमिविड्भस्मसु निष्ठा पर्यवसानमन्ते यस्य तदीया देहार्था रतिर्यस्यां सा स्वमहिम्ना नभो ऽपि छादयतीति तथा ॥ १३ ॥

किञ्च सिद्धैर्दैवलब्धैर्यज्ञावशिष्टार्थैः पञ्चयज्ञशेषैरन्नादिभिः महतां निवृत्तानां परमहंसानाम् ॥ १४ ॥

एतद्विवृण्वन्नाह—देवादीन्पञ्चयज्ञदेवताः आत्मानं च एवं पृथक् पुरुषमन्तर्यामिणमेव यजेत ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यतोऽधिके स्वत्वाभिमानो दण्डहेतुरत एव तद्दृष्ट्यो प्रवृत्तान्मृगोष्ट्रादीनात्मनः स्वस्य पुत्रवत्पश्येत् पुत्रानिव मन्येत नतु निगृह्णीयादित्यर्थः । तथाहि तैः पुत्रैः सह एषां मृगादीनां कियदन्तरं न किञ्चिदप्यन्तरं नाकिञ्चिदपि तारतम्यमस्तीत्यर्थः । तत्र मृगाः शुनकमार्जारादयः मर्को मर्कटः आखुः मूषकः सरीसृपा अन्ये सर्पश्च-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कर्मान्ता अन्तेवः *विमक्षिकाः विशब्दः पादपूरणार्थः विशिष्टमक्षिका इति वा सरीसृपखगांति वा पाठः ॥ ९ ॥

● विवृतमर्थमुपसंहरति-त्रिवर्गमिति । अयं गृहस्थोऽप्यनेन लघुक्तप्रकारेण निष्ठता सूच्यते. अतिक्लेशेनाऽतिप्रयासेन त्रिवर्गं धर्मार्थकामाख्यं भजेत न सेवेत. दैवात्प्राप्तैरेव तुष्येदित्यर्थः । तदेवाह—यावद्दैवेन देशकालाऽनुगुण्येन प्रापितं तदेव यथोपयुक्तम् भजेत ॥ १० ॥

धर्मान्तरमाह—श्वानश्चाथ अतिपात्मानश्चाऽन्ते ऽवसायिनश्चण्डालादयश्च तानभिव्याप्य तेभ्यः यथोचितं कामान् संविभजेद्यथाशक्ति तदपेक्षितान् अन्नादीन्दद्यादित्यर्थः । सक्तमात्मजायासुतादिषु विमुञ्चेदित्युक्तं जायासक्तत्यागमुपपादयति-अपीति। आत्मनः स्वस्य दारान् भार्यामेकामपि जह्यात्तस्यां स्वत्वाऽभिमानं त्यजेदित्यर्थः । एतदेव वक्तुं तावत्तस्या दुस्त्यजत्वमाह-यतो यस्यां भार्यायां नृणां स्वत्वग्रहः ममैवेयमित्याग्रहः ॥ ११ ॥

यदर्थे यन्निमित्ते स्वकीयान् प्राणानपि परं गुरुं वा हन्यात् एवं दुस्त्यजा भार्येत्युक्तम् । एवंभूतायां तस्यां स्त्रियां भार्यायां स्वत्वं जह्यात्स्वत्वाभिमानं न कुर्यादित्यर्थः । यः पुमानेवं जह्यात्तेन पुंसा अजितः कैरप्यजितः परमात्मा जितः वशीकृतो भवति ॥ १२ ॥

कथमेवं तस्यां स्वत्वाभिमानस्त्यक्तुं शक्यः? तत्त्वविचारेणेत्याह, कृमीति । कृमिविट्भस्मसु निष्ठा पर्यवसानमन्तो यस्य तदिदं कलेवरं क. तदीया देहार्था रतिर्यस्या सा भार्या क. नभश्छदः आकाशस्यापि छादयिता आकाशतुल्यो निर्लेप इत्यर्थः । ईदृश आत्मा क्वेत्येवं तत्त्वविचारेण जह्यादित्यर्थः ॥ १३ ॥

यावदर्थपरिग्रह इति दैवालब्धेनापि प्राणमात्रोपयुक्तान्नादिपरिग्रह उक्तः इदानीं तैरपि यज्ञाऽवशिष्टैरेवार्थैरात्मनो वृत्तिं कल्पयेदित्याह—सिद्धैरिति । सिद्धैर्दैवालब्धैः यज्ञावशिष्टैः पञ्चमहायज्ञादिभिरवशेषितैरेवार्थैरन्नादिभिरात्मनः स्वस्य वृत्तिं प्राणधारणरूपां कल्पयेत्. शेषे यज्ञाद्यनुपयुक्ते स्ववृत्त्यनुपयुक्ते च दैवालब्धेऽप्यर्थे स्वत्वाभिमानं त्यजेत् प्राज्ञः एवंविधज्ञानवान् महतां पदवीं महद्भिर्गम्यां मुक्तिरूपां पदवीं प्राप्नुयात् ॥ १४ ॥

एतद्विवृण्वन्नाह—देवानृषीन् नृन् मनुष्यान् भूतानि पितॄंश्च पञ्च महायज्ञदेवता आत्मानं च स्ववृत्त्या याजनाध्यापनादिपूर्वाकवृत्त्या आगतेनार्जितेन वित्तेनाऽन्वहमहरहः पृथक् पुरुषं देवाद्यन्तरात्मानं परमपुरुषं यजेत एकमेव परमपुरुषं देवादिशरीरकं देवाद्यन्तरात्मत्वेनाऽवस्थितमाराधयेदित्यर्थः ॥ १५ ॥

किञ्च यर्हि यदात्मनः स्वस्याधिकारः "अर्थी समर्थो विद्वांश्च" इत्युक्ताधिकारः स्यात्तदा सर्वा यज्ञसम्पदः स्युरेव यथाधिकारं सर्वे यज्ञाः कर्तव्या एवेत्यर्थः । वितानो यज्ञप्रपञ्चः श्रौतकल्पसूत्रादिरूपस्तदुक्तेन विधिनाऽग्निहोत्रादिकर्मणा परमपुरुषं यजेत ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"आखुभुक् वृषदंशश्च मार्जारो मर्क उच्यते" इत्यभिधानं चयः पक्षिणः अन्तरं भेदः कियान्न कोपि पराधीनत्वाविशेषात् ॥९॥

अतिकृच्छ्रेण शास्त्राविहितमार्गेण गुरुमातिमहादिवञ्चनेन गृहमेधी गृहस्थो ऽपि सर्वाश्रमस्थेऽपि दैवोपपादितं यथाविधिविहितमयाचितोपपन्नं वा ॥ १० ॥

कर्माङ्गं देहारम्भकं प्रयोजनं न प्राक्पभोगः तथात्वे तदापूरणस्य दुःसाध्यत्वेन तत्प्रयत्ने महान्दोष आपद्येत तदभिप्रायेणाह—यस्येति । यदर्थे येषामर्थे कामपूरणार्थं स्वप्राणान् जह्यात् पितरं वा हन्यात् तद्विरोधे सतीति शेषः । किञ्च यतो येभ्यो नृणां स्वत्वग्रहो स्वत्वगुणग्राहो धैर्यनिग्रहो भवतीति शेषः । तानेतान्महतो दारानापत्या कामान्यथायोग्यं संविभज्य श्रेयसे घटेतेति शेषः ॥ ११ ॥

यद्यङ्गना प्राणाद्यपहारिणी तर्हि तया श्रेयसे घटनं कथम्? इत्याशङ्क्याह—तस्यामिति । स्वत्वग्रह इत्यादिकमुत्तरत्रापि सम्बध्यते अजितोऽपि यस्याः स्वत्वग्रहस्तस्यां स्त्रियां तेन सत्त्वेन जितो वशं गतः स पुमांस्तस्यां स्त्रियां स्वत्वं जह्यादित्यन्वयः । यदि स्वात्मानमुल्लङ्घ्य सा वर्तेत तर्हि तस्यास्त्याग एव वरीयानिति इममर्थं हि शब्देन दर्शयति—

"हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम्" ॥

इति च—

"यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते ।
मृते जीवति वा पत्यौ या नान्यमुप गच्छति ॥
सेह कीर्तिमवाप्नोति मोदते चोमया सह ।
स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियः" ॥

इति च ॥ १२ ॥

प्राक्पश्चाच्च शरीरमेवानित्यं क्षणिकं भयप्रदं भयमुपजायते ननु नित्यमनश्च नित्यदुःखं शरीरं च कृमिविड्भस्माऽवसायि न परमेणनाकाशशरीरब्रह्मणां दुरत्ययमेतत्कल्याणमन्तरेणाऽतो दुःखहेतुत्वात् दुर्भार्यासक्तिस्त्याग एव श्रेयानित्याशयवानाह—कृमीति । तदीयदेहेन क्रियमाणा रतिर्यस्याः सा तथा आत्मा परमात्मा सर्वात्मा जीवः किं न स्वाच्छरीरसम्बन्धाविस्यन उक्तं नभश्छादीति नभसदृशविराच्छादनं यस्य स तथा नभो व्याप्यावस्थित इत्यर्थः । "आकाशशरीरं ब्रह्म" इति श्रुतेः "अणुर्ह्येष आत्मा यं वा एते सिनीतः पुण्यं च पापञ्च" इति श्रुतेर्जीवस्याणुपरिमाणत्वेन सिद्धत्वात् ॥ १३ ॥

"यज देवपूजासङ्गतिकरणदानेषु" इति धातोः यज्ञो नाम यज्ञावयवदेवपूजा तत्करणावशेषितैः सिद्धैर्धनसाधनयोग्यैरर्थैः स्ववृत्तिं देहयात्राक्षमां कल्पयेत् तत्रापि शेषं ऽवशिष्टे वस्तुनि स्वत्वं स्वकीयत्वं त्यजन्यः स प्राज्ञो महतां संन्यासिनां पदवीमाप्नोतीत्यन्वयः ॥ १४ ॥

* सरीसृपविमक्षिका इति मूलपाठः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

देवादियागेषु तदन्तर्यामित्वेन ततो भिन्नत्वेन भगवत्पूजैव विधेयेत्याशयेनाह—देवानिति ॥ १५ ॥

यर्हि यदाऽस्य यथाधिकारोऽस्ति यदा वा सर्वा यज्ञसम्पदः स्युस्तदा वैतानिकविधिनाऽग्निहोत्रविधिना वा यजेदित्यन्वयः ॥१९॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

जह्यादिति, अजितवशीकारेणैव तादृशत्वं सिद्ध्यतीति भावः ॥ १२ ॥

आत्मा परमात्मा ॥ १३—१९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

पुत्रवदिति। यथा पुत्रेभ्यो भोज्यं विभजेत् तथैव यथोचित-मेभ्योऽपि विभजेदित्यर्थः ॥ ९ ॥

अतिकृच्छ्रेण सम्यक् संपाद्य न भजेत् किन्तु अल्पाया-सेनैव दैवप्रापितं यावत् तावदेव न तु भूरिसंसारमपे-क्षेतेत्यर्थः। अविकाराद्ब्रह्मचर्य्यादिस्तु गुरुकृत्यादिषु किमुतेति भावः ॥ १० ॥

श्वानश्च अघाः पतिताश्च अन्तेऽवसायिनश्चण्डालादयश्च तानप्यभिव्याप्य यथार्हं कामान् स्वभोग्यान् दारानिति स्त्रीत्वे-कत्वे आर्षे यद्यप्येकैवात्मनः सैव भार्य्या तस्यामतिथिशुश्रूषायां नियुक्तायां स्वस्य शुश्रूषा हीयते तदपि तामपि विभजेत् अतिथ्यादिशुश्रूषायां नियुञ्जीतैव. तत्त्वन्यथा मन्तव्यं यथार्हं संविभजेदित्युक्तत्वादिति श्रीस्वामिचरणाः अन्येत्वन्यथापि व्याचक्षते यतः यस्याम् ॥ ॥ ११ ॥

स्वभार्य्यायाममिमानत्यागोऽतिदुष्कर इत्याह, जह्यादिति ॥ १२ ॥

तस्याममिमानत्यागे विवेकं दर्शयति—कृमिविड्भस्मसु निष्ठा पर्य्यवसानमन्ते यस्य तदीया रतिर्यस्यां सा क, आत्मा परमेश्वरः स्वमहिम्ना नभोऽपि छादयतीति स क्वेति. यदि तस्यामभिमानत्यागेनैव स प्राप्यते तर्हि कियदेतदिति भावः ॥ १३ ॥

यावता उदरभरणं स्यात्तावत्येव वस्तुन्यभिमानं कुर्य्या-दिति यत् पूर्वोक्तं तत्रापि व्यवस्थामाह—सिद्धैर्दिष्टयमीमान्त-रिक्षैर्यज्ञावशिष्टार्थैः पञ्च यज्ञशेषैरन्नादिभिः ॥ १४ ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मर्को मर्कटः सरीसृप् सर्पः अन्तरं भेदः ॥ ९ ॥

गृहमेध्यपि त्रिवर्गं धर्ममर्थं कामं च यथादेशं यथाकालं यावद्दैवोपपादितं भजेत् अतिकृच्छ्रेण तु न भजेत्० ॥ १० ॥

श्वा सारमेयः अघः पतितः अन्तेऽवसायी चाण्डालादिः तान-भिव्याप्य यथायोग्यं कामान् अन्नादीन् विभजेत्. यतः यस्यां स्वत्वग्रहः आत्मीयत्वाग्रहस्तामेकां स्वगृहकृत्ये अनन्यतत्परांहिता-मपि यथायोग्यं अतिथ्याद्यर्चने विभजेत् ॥ ११ ॥

जनो यदर्थे यस्याः प्रयोजनार्थे प्राणान् रणादौ स्वान् बन्धून् अन्नाद्यविभागेन जह्यात् पित्रादिकं च हन्यात् खड्गा-रादिना. स्वस्यां च: स्वत्वं जह्यात्तेनाऽजितो ऽपि भगवान् जितः ॥ १२ ॥

अहो अत्यल्पे पदार्थे ममत्वत्यागेन परमपदार्थलाभः इत्याह, कृमीति। कृम्यादिषु निष्ठा पर्यवसानमन्ते यस्य तत्तुच्छं कलेवरं क. क पुनस्तदीया कलेवरार्था रतिर्यस्यां सा. क चाऽयमात्मा अजितः स्ववैभवेन नभो ऽपि छादयतीति तथा ॥ १३ ॥

सिद्धैर्दिष्टयमीमान्तरिक्षैः यज्ञावशिष्टैः पञ्चयज्ञशेषैरर्थैरन्नादि-भिरात्मनो वृत्तिं कल्पयेत् शेषं स्वनिर्वाहादधिके स्वत्वं त्यजन् महतां निवृत्तानां पदवीं मोक्षमार्गमियात् ॥ १४ ॥

एतदेव विवृण्वन्नाह—देवादीन्पञ्चयज्ञदेवताः आत्मानं च स्वानु-त्पागतवित्तेन अन्वहं प्रतिदिनं पृथक् पुरुषमन्तर्यामिणमेव यजेत् अङ्गभूतेषु देवादिषु तदङ्गिनं भगवन्तं पूजयेदित्यर्थः ॥ १५ ॥

यर्हि आत्मनो ऽधिकाराद्याः अधिकारः यज्ञाद्यधिकारस्त-दाद्याः अर्थित्वसमर्थत्वादिसर्वाः यज्ञसम्पदः स्युः तदा वैतानि-केन वितानः कर्मप्रतिपादको ग्रन्थस्तदुक्तेन विधिना अग्निहो-त्रादिना यजेत पुरुषमित्यन्वयः ॥ १६ ॥

भाषाटीका।

मृग, उष्ट्र, खर, मर्कट, मूषक, सर्प, खग, मक्षिका, इन सबों को अपने पुत्र सदृश देखे, क्योंकि? इनसे और पुत्रादिकों से क्या अन्तर है ॥ ९ ॥

गृहमेधी पुरुष भी त्रिवर्ग को बहुत कष्ट से न सेवन करे, किंतु देश काल के अनुरूप जो प्रारब्ध से उत्पन्न होजावे, उसी से त्रिवर्ग को चलावे ॥ १० ॥

श्वान चांडाल पर्यंत यथायोग्य अन्नादि का सम्यक् विभाग कर दिया करे, और जिस स्त्री के विषै मनुष्यों का 'स्वत्वग्रह' नाम यह स्त्री केवल अनन्य होकर हमारी ही है, ऐसा ज्ञान है, उस अपनी स्त्री को भी अतिथि आदि की सेवा में उचित रीति से विभक्त कर दे ॥ ११ ॥

जिसके लिये पुरुष अपने प्राणों को त्याग देता है और पिता वा गुरु को मार डालता है उस स्त्री में जिसने

न ह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक्।
इज्येत हविषा राजन् यथा विप्रमुखे हुतैः ॥ १७ ॥
तस्माद् ब्राह्मणदेवेषु मर्त्यादिषु यथाऽर्हतः।
तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं[1] ब्राह्मणाननु ॥ १८ ॥
कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः।
श्राद्धं पित्रोर्यथावित्तं तद्बन्धूनां च वित्तवान् ॥ १९ ॥
अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये।
चन्द्रादित्योपरागे च द्वादशीश्रवणेषु च ॥ २० ॥
तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके।
चतसृष्वप्यष्टकासु हेमन्ते शिशिरे तथा ॥ २१ ॥
माघे च सितसप्तम्यां मघाराकासमागमे।
राकया चानुमत्या वा मासर्क्षाणि युतान्यपि ॥ २२ ॥
द्वादश्यामनुराधा स्याच्छ्रवणास्तिस्र उत्तराः।
तिसृष्वेकादशीवासु जन्मर्क्षश्रोणयोगयुक् ॥ २३ ॥
त एते श्रेयसः काला नृणां श्रेयोविवर्द्धनाः।
कुर्यात्सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः ॥ २४ ॥

भाषा टीका।

अपने स्वत्व का अभिमान छोड़ दिया है, उसने अजित (श्रीहरि) को भी जीत लिया अर्थात् वश कर लिया ॥ १२ ॥

अन्त में कृमि विष्ठा और भस्म भाव को प्राप्त होने वाला कहाँ ? यह तुच्छ कलेवर, और कहां इस की रति का साधन भार्या ? और आकाश के तरह निर्लेप और ज्ञानकृत विभुत्व से आकाश को भी आच्छादन करने वाला यह आत्मा कहाँ ? ॥ १३ ॥

और श्राद्ध, पंचमहायज्ञ, अथवा श्रीविष्णु के आराधन से अवशिष्ट जो सिद्ध पदार्थ, तिसी से अपना जीवन करे, और बाकी पदार्थों में से अपने स्वत्व को छोड़ता जावे, तो पूर्वोक्त परम हंसों की पदवी को प्राप्त होता है ॥ १४ ॥

तथा देवों को ऋषियों को मनुष्यों को और भूत तथा पितृगणों को एवं आत्मा अन्तर्यामी पुरुष श्रीमन्नारायण को अपनी वृत्ति से प्राप्त जो वित्त तिससे पृथक् यजन करे ॥ १५ ॥

यदि अपने को अधिकार से आदि लेकर सर्व संपदा यज्ञ की प्राप्त होवें, तो वैतानिक विधि से अग्निहोत्रादि यज्ञ से भी यजन करे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

न पुनरतिनिर्बन्धो यज्ञार्थे कार्य इत्याह—नहीति। विप्रमुखे हुतैरन्नादिभिर्यथा इज्येत पूज्येत न तथाऽग्निमुखतो हविषा इज्येत ॥ १७ ॥

ब्राह्मणेषु च देवेषु पञ्चयज्ञदेवतासु च मर्त्यादिष्वन्येष्वपि नरेषु पश्वादिषु च क्षेत्रज्ञमन्तर्यामिणं ब्राह्मणाननु मर्त्यादियजने ब्राह्मणयजनानन्तरमन्येषु यजस्व पठान्तरे ब्राह्मणा आननं यस्य तम् ॥ १८ ॥

प्रौष्ठपदे भाद्रपदे ॥ १९ ॥ २० ॥

शुक्लमासि वैशाखे शुक्लपक्षे अक्षय्यतृतीयायामित्यर्थः। हेमन्ते शिशिरे च मार्गशीर्षादिमासचतुष्टयेऽपि याश्चतस्रोऽष्टकास्तासु ॥ २१ ॥

सम्पूर्णचन्द्रा पौर्णमासी राका न्यूनचन्द्रा सैवानुमतिः तया मासर्क्षाणि तत्तन्मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि युतानि यदा स्युस्तदा तदुक्तं त्रिकाण्डशेषायाम्—

"पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे" ॥

इति ॥ २२ ॥

(1) ब्राह्मणानामिति पा०।

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनुराधा श्रवण उत्तराफाल्गुनी उत्तराषाढा उत्तराभाद्रपदा वा द्वादश्यां यदा स्यात् आसूत्तरास्वेकादशी वा यदा स्यात्तदा च जन्मनक्षत्रस्य श्रवणस्य वा योगेन युक्तं दिनं यदा तदा, योगग्रहणं सम्बन्धबाहुल्यार्थम् ॥ २३ ॥

न केवलं श्राद्धस्यैवैते कालाः किन्तु धर्ममात्रस्येत्याह— त एत इति, द्वाभ्याम् । तद्वशाऽऽयुषः अमोघं साफल्यमित्यर्थः ॥२४॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अग्निमुखाराधनाद्विप्रमुखाराधनमतीव भगवतस्तोषकमित्याह, नहीति । हे राजन् ! विप्रमुखे हुतैरन्नादिभिर्यथायं सर्वयज्ञभुग्भगवानिज्यमानोऽऽराध्यते न तथाऽग्निमुखतो हविषाऽऽराध्यते ॥१७॥

तस्माद्ब्राह्मणेषु देवेषु पञ्चमहायज्ञदेवेषु मर्त्यादिषु च यथाशक्ति यथायोग्यं च तैस्तैः कामैरन्नादिभिर्ब्राह्मणाननं ब्राह्मणा एवाननं मुखं यस्य तमेनं क्षेत्रज्ञं परमात्मानं देवाद्यवस्थजीवशरीरकं वा यजस्वाऽऽराधय ब्राह्मणानन्वितिति पाठे ब्राह्मणेषु यजमानन्तरमन्येषु मर्त्यादिषु यजस्वेत्यर्थः । युधिष्ठिरस्य गृहस्थत्वात्त्वयैवमाराधनमवश्यं कर्तव्यमित्यभिप्रायेणाऽऽह यजस्वेति मध्यमपुरुषप्रयोगः ॥ १८ ॥

किञ्च प्रोष्ठपदे भाद्रपदे मासि द्विजः त्रैवर्णिको धनवांश्चेत् यथावित्तं वित्तानुसारेण पित्रोर्मातापित्रोस्तद्बन्धूनाञ्चापरपक्षीयं कृष्णपक्षीयं श्राद्धं महालयाख्यं कुर्यात् ॥ १९ ॥

किञ्चायनादिषु कालेषु पित्रोः श्राद्धं कुर्यादित्यन्वयः तत्रायने कर्कटसङ्क्रान्तिर्मकरसङ्क्रान्तिश्च मेषतुले विषुवसंज्ञिके तथा च बृहद्वसिष्ठः—

> "अथ कर्कटसङ्क्रान्ती द्वे तूदग्दक्षिणायने ।
> विषुवे तु तुलामेषे गोलमध्ये ततोऽपराः ॥" इति

कुहुर्नष्टेन्दुकला चन्द्रादित्ययोरुपरागो ग्रहः ॥ २० ॥

शुक्लपक्षे तृतीयायाम् अक्षयतृतीयायामित्यर्थः । कार्तिके मासे शुक्लपक्षे नवम्यां हेमन्तशिशिरे च ऋतौ चतसृष्वष्टकासु मार्गशीर्षादिमासचतुष्टयकृष्णाष्टमीषु ॥ २१ ॥

माघे मासि सितसप्तम्यां शुक्लसप्तम्यां मघानक्षत्रपौर्णमास्योस्संयोगकाले च सम्पूर्णचन्द्रा पौर्णमासी राका कलाहीनचन्द्रा पौर्णमासी सानुमती ताभ्यां युक्तानि यानि मासर्क्षाणि मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि तदुपलक्षितेषु च कालेषु ॥ २२ ॥

यद्वा द्वादश्यामनूराधाश्रवणमुत्तराफाल्गुनी उत्तराषाढोत्तराभाद्रेति तिस्र उत्तरा वा स्युः अनूत्तरासूक्तासु तिसृषु एकादशी वा यदा स्यात्तदा च जन्मर्क्षश्रोणायोगयुक्तजन्मनक्षत्रस्य श्रवणनक्षत्रस्य वा योगेन युक्तः कालः तदा च योगग्रहणं सम्बन्धबाहुल्यज्ञापनायेति सूचितम् ॥ २३ ॥

न केवलं श्राद्धस्यैवैते कालाः किन्तु धर्ममात्रस्येत्याह—त इति, द्वाभ्याम् । त एते श्रवणादयः नृणां श्रेयसः श्रेयस्साधनधर्मानुष्ठानस्य योग्याः श्रेयो वर्द्धयन्तीति तथा तादृशाः कालाः तस्मात्सर्वात्मना करणत्रयैक्येन एषु कालेषु श्रेयः श्रेयस्साधनं वक्ष्यमाणं स्नानादिकमनुतिष्ठेत्तदेव ह्यायुषः अमोघममोघत्वं साफल्यमित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, मुखं होमादिकरणं भगवत्प्रीतिजनकं किम् ? तत्राह, नहीति ॥ १७ ॥

उपसंहारमुखेनोक्तार्थं निर्धारयति—तस्मादिति । ब्राह्मणा आननं यस्य स तथा तम् ॥ १८ ॥

ननु, यज्ञकर्मादि सति विशिष्टफलप्रदः कालः क इति तत्राह, कुर्यादिति । प्रौष्ठपदे कन्याख्ये सिंहमासामावास्यामारभ्य कन्यामावास्यापर्यन्ते तत्रापरपक्षीयकाले श्राद्धं कुर्यादित्युपलक्षणमेतच्च तद्बन्धूनां पितृमातृबन्धूनां पितामहमातामहादीनाम् ॥१९

अयने उत्तरदक्षिणसञ्ज्ञे विषुवं सम्वत्सरान्तसङ्क्रमणं कुहाममावास्यायां श्रवणेषु श्रवणादित्रिषु चाष्टकासप्तम्यादित्रिषु त्रयोदश्यां च तदुक्तम्—

> "सप्तम्यादित्रयं चैव तथा चैव त्रयोदशी।
> चतस्रस्त्वष्टकाः प्रोक्ताः सर्वपक्षाद्विपक्षतः"

इति ॥ २० ॥

वृश्चिकमासामावास्यामारभ्य मकरमासामावास्यापर्यन्तः कालो हेमन्तः तदुपरिकालः शिशिरः "हेमन्ते शिशिरे चैव नित्यश्राद्धे गुणोत्तरम्"इति वचनात् अयमपि विशिष्टकालः ॥ २१ ॥

राकापौर्णमासी मघा पौर्णमास्योः सङ्गमे "शशिनि सिनीवाली स्यात्, दृष्टे नष्टे कुहुरमावास्या । अनुमानिकले राका सम्पूर्णे पौर्णमासी च"इति हलायुधः राकयाऽनुमत्या युतानि मासनक्षत्राणि ॥ २२ ॥

यास्तिस्रः श्रवणादितारा आसु तारासु प्राप्तैकादशी पुण्यकालोऽत्र श्राद्धकरणं च विकल्पः एकादश्यां श्राद्धकरणस्य निषिद्धत्वात् वैष्णवसिद्धान्तिनस्तदाचरन्ति शैविकाश्चरन्ति च वा यथैकादशी पुण्यदिनम् अत्र क्रियमाणं कर्म सफलं तथा तिसृष्वपि ताराख्विति वा जन्मनक्षत्रं श्राद्धकाल इति शेषः । सौम्ययोगयुग् मृगशिरःसम्बन्धयुक्तं दिनं च ॥ २३—२७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अयने इति चतुष्कम् ॥ २०—२२ ॥

तिसृष्वेकादशी चाविति—तत्रोपवासा प्राज्ञाः वैष्णवानाम्

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तत्र श्राद्धनिषेधात् तथा हि ब्रह्मयामले "श्राद्धमेकादशीदिने" इति दीक्षासङ्कल्पनिषेधः। ब्रह्मवैवर्ते "ये कुर्वन्ति महीपाल श्राद्धञ्चैकादशीदिने। त्रयस्ते नरकं यान्ति दाता भोक्ता परेतकः" इति, पाद्मोत्तरखण्डे—एकादश्यामहस्तु प्राप्तायां मातापित्रोर्मृतेऽहनि। तद्दिनन्तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥ पुष्करखण्डे—"एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत्। तद्दिनन्तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥ २३-२४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

न पुनर्गर्गानिर्बन्धो यज्ञार्थमेव कार्यं इत्याह—नह्यीति। यथा विप्रमुखे हुतैरन्नादिभिरिज्येत तथा न अग्निमुखे इज्येत इत्यर्थः ॥ १७ ॥

ब्राह्मणा एव देवाश्चेषु भोजयद्भिः क्षेत्रज्ञं परमेश्वरं यजस्व ब्राह्मणाननु ब्राह्मणपूजानन्तरं मर्त्यादिषु च, ब्राह्मणाननमितिपाठः स्पष्टः ॥ १८ ॥

प्रौष्ठपदे भाद्रपदे ॥ १९ ॥

अयने विषुवे च कुर्यादिति श्राद्धमिति पूर्वस्यानुषङ्गः एवमग्रेपि ॥ २० ॥

शुक्लपक्षे अक्षयतृतीयायामित्यर्थः। हेमन्तशिशिरेषु च चाष्टकाष्टका भवन्ति तासु ॥ २१ ॥

मासर्क्षाणि वैशाखादिमासेषु विशाखादीनि राकया पूर्णचन्द्रया पौर्णमास्या अनुमत्या न्यूनचन्द्रया वा तया यदि युक्तानि स्युस्तदा तेष्वित्यर्थः। "कलाहीने सानुमतिः पूर्णे राका निशाकरे" इत्यमरः ॥ २२ ॥

अनुराधाश्रवणउत्तरफाल्गुनी उत्तराषाढे उत्तरभाद्रपदा वा यदि द्वादश्यां स्यात् आसु उत्तरासु तिसृषु एकादशी वा स्यादिति अत्रोपवासानर्हविद्धैकादश्येव ग्राह्या तत्र श्राद्धनिषेधात् यदुक्तम् ब्रह्मवैवर्ते—

"ये कुर्वन्ति महीपाल श्राद्धं चैकादशीदिने।
त्रयस्ते नरकं यान्ति दाता भोक्ता च प्रेरकः" ॥ इति

उपवासानर्हायास्तस्या अप्राप्तौ तु परदिने, यदुक्तम्—

एकादश्यां तु प्राप्तायां मातापित्रोर्मृतेऽहनि।
द्वादश्यां तत्प्रदातव्यं नोपवासदिने क्वचित्" ॥

पुष्करखण्डे च—

एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत्।
तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्" ॥ इति

जन्मर्क्षं [illegible] जन्मनक्षत्रं तस्य श्रोणस्य श्रवणस्य वा योगेन युक्तं यदि दिनं स्यात् तदा तत्रापि योगमहत्त्वं सम्बन्धबाहुल्यार्थम् ॥ २३ ॥

श्रेयसो धर्ममात्रस्यैव न केवलं श्राद्धमात्रस्येत्यर्थः। तदेव आयुषः अमोघममोघत्वम् ॥ २४ ॥ २५ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

किञ्च यज्ञार्थमपि नाऽतिहठः कर्त्तव्य इत्याह—नहीति। अयम् "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति प्रसिद्धः सर्वयज्ञभुग्भगवान् यथा विप्रमुखे हुतैरन्नाद्यैरिज्येत तथा अग्निमुखतो हविषा नेज्येत ॥ १७ ॥

यस्मादेवं तस्माद्ब्राह्मणेषु पश्चाद्देवेषु ब्राह्मणाननु ब्राह्मणार्चनानन्तरं मर्त्यादिषु मनुष्यपश्वादिषु च तैस्तैः कामैरेनं क्षेत्रज्ञमन्तर्यामिणं यजस्व ॥ १८ ॥

प्रौष्ठपदे भाद्रपदे मासि अमावास्यापर्यन्तो मासो बोध्यः ॥ १९ ॥

अयने मकरकर्कसङ्क्रमयो मकरकर्कसङ्क्रान्ती "द्वे तु गदक्षिणायने" इति वृद्धवसिष्ठवचनात्. विषुवे मेषतुलासङ्क्रमयो "विषुवे तु तुलामेषे गोलमध्ये तथाऽपरा" इति वृद्धवसिष्ठवचनात् "समरात्रिदिने काले विषुवद्विषुवं च तत्" इति कोशाच्च. कुर्याच्छ्राद्धमिति पूर्वस्यानुषङ्गः एवमग्रेऽपि दिनक्षये त्रिस्पृशातिथौ ॥ २० ॥

शुक्लपक्षे वैशाखे इति शेषः। तृतीयायामक्षयतृतीयाम् कार्तिके शुक्लपक्षे नवम्याम् हेमन्ते शिशिरे मार्गशीर्षादिमासचतुष्टये चतसृष्वष्टकासु अष्टमीषु ॥ २१ ॥

मघानक्षत्रसम्पूर्णचन्द्रयुक्तपौर्णमासी समागमे राका सम्पूर्णचन्द्रा पौर्णमासी सैव कलाहीनचन्द्रयुताऽनुमतिः "कलाहीने सानुमतिः पूर्णे राका निशाकरे" इति कोशात् तथा मासर्क्षाणि तत्तन्मासनामनिर्वर्तकानि नक्षत्राणि युतानि यदा स्युः तदा च यदुक्तं नामलिङ्गानुशासने "पुष्ययुक्ता पौर्णमासी पौषीमासे तु यत्र सा। नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे" इति ॥ २२ ॥

यदा द्वादश्यामनुराधा श्रवणं वा उत्तराफाल्गुनी वा उत्तराषाढा वा उत्तराभाद्रपदा वा स्यात् आसूत्तरासु एकादशी वा स्यात् तदा स्नानदानादिकं विधानतः कुर्यात् श्राद्धं तु तन्निमित्तं द्वादश्यां कुर्यात्—

"एकादश्यां यदा राम ! श्राद्धं नैमित्तिकं भवेत्।
तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरे ॥

इति पुराणान्तरात् जन्मर्क्षश्रोणायोगयुक् जन्मनक्षत्रयुक्तं श्रवणायुक्तं वा दिनं यदा तदाऽपि श्राद्धं कुर्यात ॥ २३ ॥

न एते श्रेयसः पुण्यमात्रस्य कालाः न श्राद्धमात्रस्य अत एतेषु सर्वात्मना श्रेयः कुर्यात् ततः आयुषः अमोघमेव फलं स्यात् ॥२४॥

———

एषु स्नानं जपो होमो व्रतं देवद्विजार्चनम् ।
पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरम् ॥ २५ ॥
संस्कारकालो जायाया अपत्यस्यात्मनस्तथा ।
प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ! ॥ २६ ॥
अथ देशान्प्रवक्ष्यामि धर्मादिश्रेय आवहान् ।
स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥ २७ ॥
बिम्बं भगवतो यत्र सर्वमेतच्चराचरम् ।
यत्र ह ब्राह्मणकुलं तपोविद्यादयाऽन्वितम् ॥ २८ ॥
यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम् ।
यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुताः ॥ २९ ॥
सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत ।
कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः ॥ ३० ॥
नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥ ३१ ॥
नारायणाश्रमो नन्दा सीतारामाऽऽश्रमादयः ।
सर्वे कुलाचला राजन् महेन्द्रमलयादयः ॥ ३२ ॥

भाषा टीका ।

हे राजन् ! सर्व यज्ञों के भोक्ता ये भगवान् श्रीकृष्ण, जैसे ब्राह्मणों के मुख में प्रेम से हविष्यान्न के हवन करने से तृप्त होते हैं, वैसे अग्नि के मुख से नहीं तृप्त होते, ॥ १७ ॥

तस्मात् ब्राह्मण देव मनुष्य आदिकों में इन श्रीकृष्ण का यथा योग्य यजन करो, और ब्राह्मणों के पश्चात् अपने क्षेत्रज्ञ का भी यजन करो ॥ १८ ॥

ब्राह्मण, प्रौष्ठपद नाम (भाद्रपद) मास में कृष्णपक्ष में जैसा द्रव्य हो तैसा माता पिता का श्राद्ध करे, और वित्तवाला हो तो उनके बन्धुओं का भी महालय श्राद्ध करे, (यहां अमान्त-मास मान कर पितृपक्ष को भाद्रपद के कृष्ण पक्ष में जानना चाहिये) ॥ १९ ॥

अयन अर्थात् दक्षिणायन उत्तरायण के सूर्य की गती के समय में. जैसेकि कर्क और मकर के सूर्य में, और विषुव नाम तुला और मेष के सूर्य में, व्यतीपात में, क्षय तिथिमें, सूर्यग्रहण में, चन्द्रग्रहण में, और द्वादशी श्रवण नक्षत्र में, ॥ २० ॥

अक्षयतृतीया में, कार्तिक शुक्लनवमी में और हेमन्त शिशिर ऋतुओं में चार अष्टका नाम तिथियों में ॥ २१ ॥

माघशुक्ल सप्तमी में, मघा और अमावास्या के संगम में, माघशुक्ल पूर्णमासी में, और अमावास्या वा पूर्णिमा से युक्त मास प्रधान नक्षत्रों में, (जैसे कि ? चैत्रमें चित्रायुत अमावास्या पूर्णिमा वैशाख में विशाखा युत इत्यादि) ॥ २२ ॥

जब द्वादशी में अनुराधा श्रवण उत्तरा भाद्रपद नक्षत्र होवे, और तीनों उत्तराओं में यदि अनिषिद्ध एकादशीश्राद्ध प्राप्त होवे, तो, श्राद्ध करे और जन्म नक्षत्र तथा श्रवण नक्षत्र में श्राद्ध करे ॥ २३ ॥

ये सब मांगलिक काल हैं, मनुष्यों के श्रेयकी वृद्धि करने वाले हैं, तस्मात् इनकालों में श्राद्धादि शुभकर्म करे तब आयुका अमोघ श्रेय होता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

संस्कारकाल इति, जायायाः पुंसवनादि अपत्यस्य जात-कर्मादि. आत्मनो यज्ञदीक्षादि. प्रेतस्य संस्था दहनादि. मृताहश्च सांवत्सरिकं यद्वा अन्यस्मिन्नप्यभ्युदयार्थे कर्मणि श्रेयः कुर्या-दित्यनुषङ्गः ॥ २६ ॥

यत्र यस्मिन्नेतच्चराचरमस्ति तदेव भगवतो बिम्बं रूपम

श्रीमच्छ्रीधरस्वामिकृतभावार्थदीपिका।

सत्पात्रं यत्र लभ्यते स वै पुण्यतमो देशः ॥ २७ ॥ २८ ॥ २९ ॥
महेन्द्रमलयादयः ॥ ३० ॥ ३१ ॥
सीतायारामस्य चाश्रम आदिर्येषां द्वयोः पृथक्कथनं वियोगकालाभिप्रायेण ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एषु कालेषु कृतं यज्ञपादिकं यच्च पित्राद्युद्देशेन दत्तं 'मावेक्तः' दानं च तदुद्धमनश्वरमक्षय्यफलसाधनम् ॥ २५ ॥

किञ्च हे नृप! जायापत्यात्मनां संस्कारकाले। तत्र जायायाः संस्कारः पुंसवनादिः अपत्यस्य संस्कारो जातकर्मादिः आत्मनः स्वस्य संस्कारो यज्ञदीक्षादिः एतेषां कालेषु यदा प्रेतस्य संस्था दहनादि कर्म मृताहश्च तदाऽभ्याहिमत्रऽभ्युदयार्थे कर्मणि कृतं स्नानादिकमनश्वरमिति पूर्वेणान्वयः ॥ २६ ॥

एवं श्रेयस्कराः काला उक्ताः अथ देशान्वक्तुं प्रतिजानीते— अथेति। कर्मादि श्रेयस आवहानावायकान् देशान् प्रवक्ष्यामि तान्यवं शुभो देशः श्रेयस्कर इत्याह—स इति। यत्र देशे सत्पात्रं लभ्यते ॥ २७ ॥

यत्र यस्मिन् सर्वमेतच्चराचरमाधेयतया नियाम्यतया चाऽस्ति तस्य भगवतो बिम्बं यत्र च देशे वर्त्तते यत्र च देशे तपोविद्यादयाभियुक्तं ब्राह्मणकुलं वर्त्तते ॥ २८ ॥

यत्र यत्र देशे हरेर्भगवतोऽर्चा पूजा प्रवर्त्तते स सर्वोऽपि देशः पुण्यतमः श्रेयसां पदं श्रेयःसाधनधर्मानुष्ठानयोग्यं स्थानं किञ्च यत्र येषु देशेषु पुराणेषु प्रसिद्धाः गङ्गादयो नद्यः सन्ति ॥ २९ ॥

तथा पुष्करप्रभृतीनि सरांसि च यत्र सन्तीति पूर्वेण संबन्धः। उत किञ्च यानि चाहोभिनानि महात्मभिरधिष्ठितानि क्षेत्राणि सन्ति. तान्येव दर्शयति—कुरुक्षेत्रमिति। यद्वा कुरुक्षेत्रादिव्यतिरिक्तक्षेत्राभिप्रायेणोक्तमहाभिनानीति। गयस्यासुरस्य शिरः तत्पतनस्थानं गयेत्यर्थः। प्रयागो गङ्गायमुनयोस्सङ्गमस्थानं पुलहाऽऽश्रमः सालग्रामक्षेत्रम् ॥ ३० ॥

फल्गुनी नदी गयायामेव तत्स्थानं फाल्गुनम् सेतुः रामसेतुः प्रभासः प्रत्यक्सरस्वतीसंगमस्थानं कुशस्थली द्वारवती पम्पा सरोवरम् बिन्दुसरः कर्दमाश्रमः ॥ ३१ ॥

नारायणाश्रमो बदरिकाश्रमः नन्दा अलकनन्दातटं सीतारामयोराश्रमश्चित्रकूटाद्रिः। एतत्प्रभृतयः। तथा हे राजन् महेन्द्रमलयादयः सर्वे कुलगिरयश्च ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सत्पात्रं विशिनष्टि—विश्वमिति। यस्मिन्देशे भागवतस्तादृशमराचरं सर्वं जगदस्तीति ज्ञातव्यम्—

"यतिर्यस्य गृहं भुङ्क्ते तत्र भुङ्क्ते हरिः स्वयम्।
हरिर्यस्य गृहं भुङ्क्ते तत्र भुङ्क्ते जगत्त्रयम्" इति

वचनात् ॥ २८ ॥

अर्चाः, सालग्रामादिप्रतिमाः पुराणेषु, भागवतादिषु विश्रुताः ॥ २९ ॥

कृष्णावेण्यादयश्च क्षेत्राणि पुरुषोत्तमादीनि महैः पुण्यैरगस्त्यादिभिर्नाभिताभ्यर्चितानि ॥ ३० ॥

फल्गुनं स्थानं हरपुरं कन्यातीर्थं वा "कन्यापुरं फल्गुनं स्यात्स्थानं हरपुरं च तत्" इत्यभिधानं वाराणसीपुरी काशी ॥ ३१ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

संस्कारकाले जायायाः पुंसवनादि अपत्यस्य जातकर्मादि आत्मनो यज्ञदीक्षादि प्रेतसंस्था प्रेतस्य दाहनादि मृताहः पित्रादेः सांवत्सरिकं श्राद्धम् एतेषु अन्यस्मिन्नप्यभ्युदये च श्रेयः कुर्यादित्यनुषङ्गः ॥ २६ ॥

ननु साधुश्चासौ पात्रञ्चेति सत्पात्रं तच्च कीदृशं? यत्र चराचरमेतज्जगत् तस्य भगवतो बिम्बं बिम्बतुल्यमित्यर्थः। प्रतिमा हि प्रतिबिम्बरूपेति तस्याः सकाशादपि भक्तस्योत्कर्षः अत एव भक्तः पूजाऽप्यधिकेति—

"अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः" ॥

इति च वक्ष्यति अर्चा प्रतिमा सालग्रामादिरूपा ॥ २७ ॥ २८ ॥

अर्चा स्थिरप्रतिमा श्रीजगन्नाथादिस्तदाश्रिता उत्कलादयः ॥ २९—३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अनश्वरं बहुफलम् ॥ २५ ॥

जायायाः भार्यायाः संस्कारकाले पुंसवनादौ अपत्यस्य जातकर्मादौ आत्मनो यज्ञदीक्षादौ प्रेतस्य पित्रादेः संस्था दहनादिस्तत्र यदा पित्रादिमृताहस्तत्र सांवत्सरिके अन्यस्मिन्नभ्युदयार्थे कर्मणि श्रेयः कुर्यादित्यनुषङ्गः ॥ २६ ॥

तत्र सत्पात्रं "ऊनास्मीदृति निर्दिष्टा ब्राह्मणाश्चाधिपञ्च मे" इति भगवद्वचनात् स्थस्वरूपत्वादस्य भगवतो भजनीयस्य वासस्थानं भगवद्भक्त इत्यर्थः। यत्र लभ्यते स पुण्यतमो देशः ॥ २७ ॥

यत्र सर्वमेतच्चराचरं तस्य भगवतो बिम्बं शब्दमयी वेदभागवतादिरूपा मूर्तिः। ब्राह्मणानां कुलं च यत्र देशे स पुण्यतमो देश इति पूर्वेणान्वयः ॥ २८ ॥

अर्चा मूर्तिः ॥ २९ ॥

महेन्द्राद्रिगिरयाश्रिताानि ॥ ३०—३१—३२ ॥

एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ।
एतान्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ।
धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ॥ ३३ ॥
पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः ।
हरिरेवैक उर्वीश ! यन्मयं वै चराचरम् ॥ ३४ ॥
देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ।
राजन्यदग्रपूजायां मतः पात्रतयाऽच्युतः ॥ ३५ ॥
जीवराशिभिराकीर्ण आण्डकोशाङ्घ्रिपो महान् ।
तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणम् ॥ ३६ ॥
पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः ।
शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥ ३७ ॥

भाषा टीका ।

इन कालों में स्नान जप होम व्रत देवपूजा ब्राह्मणपूजा, और पितृ देव मनुष्य भूत प्राणियों को जो दिया जाय वह नष्ट नहीं होता है ॥ २५ ॥

हे नृप ! स्त्री के पुंसवनादि काल मे, पुत्र के जातकर्मादि काल में, आप के यज्ञादि दीक्षा काल में, प्रेत के संस्था दहनादि काल में, और मृतक के वार्षिक काल मे, और अन्य कालों मे भी अभ्युदय कर्मों में श्रेय करे ॥ २६ ॥

नारद जी बोले कि ? अब हम धर्मादिश्रेयों को प्राप्तकरने वाले देशों को कहते हैं, एक तो वही निश्चित है, कि वही अति पुण्य देश जानना जहां सत्पात्र पुरुष मिलते होवें ॥२७॥

और जिसमें यह सर्वचराचर स्थित है, ऐसे भगवान् की श्रीमूर्ति जहां पर विराजमान हैं, और जहां तप विद्या और दया सहित ब्राह्मण कुल विद्यमान है ॥ २८ ॥

और जहां २ श्री हरि की अर्चा (पूजा अथवा) विद्यमान है । और जहां पुराणों में विख्यात श्रीगंङ्गा आदि पुण्य नदी विद्यमान हैं, वही देश श्रेयोंका स्थान है ॥ २९ ॥

और जहां पुष्करादि सरोवर हैं, । और महात्माओं से आश्रित जो क्षेत्र हैं, और कुरुक्षेत्र, गया, प्रयाग, पुलहाश्रम ॥ ३० ॥

नैमिषारण्य, फाल्गुनतीर्थ, सेतु, प्रभास, द्वारका, काशी, मधुपुरी, पंपासरोवर, बिन्दुसरोवर ॥ ३१ ॥

श्रीबद्रीनारायणाश्रम अलकनन्दा, श्रीचित्रकूट से आदि लेकर हे राजन् ! महेन्द्र, मलय, प्रभृति कुलपर्वत ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अर्चाश्रिताश्च स्थिरप्रतिमाश्रिताः पूर्वं तु शालिग्रामशिलाश्रयंतदेश उक्त इत्यपौनरुक्त्यम्. अत्र एषु देशेषु ईहितः कृतः सहस्रगुणमधिकस्य फलस्योदयो यस्मात्स तथा ॥ ३३ ॥

अथ पात्रमाह, हरिरेव पात्रं निरुक्तं निर्णीतम् ॥ ३४ ॥

तदेवाऽऽह, देवेषु च ऋषिषु चार्हत्सु च तपोयोगादिषु सिद्धेषु ब्रह्मात्मजादिषु सनकादिष्वपि सत्सु तत्र त्वदीये राजसूये यद्यस्मादच्युत एव पात्रतया सम्मतः ॥ ३५ ॥

संमतत्वे हेतुमाह, जीवराशिभिर्व्याप्तो ब्रह्माण्डकोश एव योऽङ्घ्रिपः सर्वजीवानामात्मनश्च तर्पणम् ॥ ३६ ॥

एतदेव पुरुषनामनिरुक्त्या द्रढयति–पुराणीति । नृतिर्यगादिरूपाणि पुराणि शरीराणि तेष्वन्तर्यामिरूपेण प्रत्यगंशेन च यतः शेते अतः पुरुष इति प्रसिद्धः ॥ ३७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा ये हरेरर्चा स्थिरा पूजा प्रतिमावा तया आश्रिताः अधिष्ठितास्त एते सर्वे पुण्यतमा देशाः विम्बं भगवतो वर्त्तते सालग्रामशिलायत्रेति देश उक्तः । अत्र तु वेंकटाद्रिस्थानादीन्युच्यन्ते इत्यपौनरुक्त्यम श्रेयस्कामः पुमानभीक्ष्णशः पुनः पुनरेतान् देशान्नितरां सेवेत ॥ ३३ ॥

पुंसां यत्फलसाधनत्वे यो धर्म उदितो विहितः स एष देशेषु कृतः सहस्रगुणमधिकस्य फलस्य उदयो यस्मात्तादृशो भवेत् । एवं देशकालौ उक्तौ. अथ पात्रमाह—पात्रंत्वित्यादिना । हे उर्वीश ! पात्रवित्तमैः सत्पात्रयाथात्म्यविद्भिः कविभिः हरिरेक एव पात्रं निरुक्तं हरिरेक एव सत्पात्रमिति निर्णीतमित्यर्थः । पात्रं पूज्य समर्हणीयं वस्तु हरि

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

विशिनष्टि—चराचरात्मकं जगद्यन्मयं यच्छरीरमुदसेनेतेन तस्य-ार्हणेन सर्वे समाहिता भवन्तीति सूचितम् ॥ ३४ ॥

हरेरेव पात्रत्वं यतो राजसूये ऽधुना त्वयैव दृष्टमित्याह, देवेष्विति । हे राजन् ! देवेषु ऋषिषु अर्हत्सु तपोयोगादिसिद्धेषु ब्रह्मादिषु सनकादिष्वपि सत्सु तत्र त्वदीयराजसूये यदस्मादच्युत एवाग्रपूजायां पात्रतया मतो ज्ञातः ॥ ३५ ॥

हरेः समर्हणेन सर्वेषामर्हणं कृतप्रायमित्याह—जीवेति । जीवराशिभिराकीर्णो व्याप्तः ब्रह्माण्डकोश एव यो महानङ्घ्रिपो वृक्षस्तस्य मूलत्वात् कारणत्वादच्युतस्यैवेज्या ऽऽराधनं सर्वेषां जीवात्मनां तर्पणं तृप्तिकरं यथाऽङ्घ्रिपस्य मूलेऽर्पितं जलं तच्छाखोपशाखानां वृद्धिकरं तथा ब्रह्माण्डकोशमूलभूतेऽच्युते कृते कृतमर्हणमण्डान्तरगतेषु सर्वेषु कृतप्रायमित्यर्थः । अत एव एकमेव पात्रमिति भावः । इतरत्रापि तदुद्देश्येनाऽर्हणं कार्यमिति च ॥ ३६ ॥

एतदेव पुरुषनामनिरुक्त्या दृढयति—पुराणीति । मनुष्यतिर्यगृषिदेवतारूपाणि पुराणि शरीराणि आत्मकानयनेन भगवता सृष्टानि सृष्टेषु च पुरेषु यतो भगवान् जीवेन रूपेण जीवात्मना शरीरेण "यस्यात्माशरीरम्" इति श्रुतेः । पुरे शेते अतो ऽसौ पुरुषः पुरुषशब्दः पुरुषत्वप्रवृत्तिनिमित्तमयः । पुरे शेते इति पुरुषः शकारस्य षकारः अकारस्योकारश्च व्यत्ययात् "अन्येष्वपि दृश्यते" इति डश्च जीवेन रूपेणोत्येनेन केवलं सर्वकारणत्वादेव तदर्हणं तत्कार्यपर्यन्तं पर्यवसानमपि तु तत्तदन्तरात्मतया तत्तद्रूपेणा ऽवस्थितत्वाच्चेत्युक्तं भवति ॥ ३७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेरङ्घ्रिश्रिताः हरिक्षेत्रादयः पुनर्वचनं सर्वस्मात्तेषां श्रैष्ठ्यद्योतनाय ॥ ३३ ॥

एतद्देशनिषेवणेन किं विशेषफलमिति तत्राह—धर्म इति ।

"कृष्णातरङ्गसम्भूतपवनस्पर्शमात्रतः ।
निर्धूतपातकाः सर्वे जना विष्णुपदं ययुः ॥"

इत्यादिशास्त्रेषु सहस्राधिकफलोदयत्वेनोदितः पात्रेष्वपि तारतम्यमस्ति तत्र मुख्यपात्रं हरिरित्याह—पात्रमिति । पात्रतारतम्यवित्तमैः कविभिः पात्रं च निरुक्तं वै मुख्यत्वेन निर्णीतं हीत्यन्वयः, किं तत्? इत्यत उक्तं हरिरिति, चराचरं यन्मयं यत्स्वामिकं यदधीनं सर्वं यस्मात्तस्माद्धरिरेव मुख्यं पात्रमित्यन्वयः ॥ ३४ ॥

इदं भवतोऽपि सिद्धमित्याह—देवेति । ब्रह्मात्मजादिषु सत्सु देवाश्च ऋषयश्च देवर्षयस्त एवार्हन्तः पूजायोग्या येष्वपि सत्सु नैव तत्र यज्ञशालायामच्युतो गुणानां च्यवनः स्वरूपतश्च च्युतिरहितत्वात् श्रीनारायणो ऽग्रपूजायां पात्रतामतस्त्वया ज्ञात इति वदतो मुख्यपात्रं हरिरित्यवधारणा युक्ता ॥ ३५ ॥

किञ्च प्रत्येकं पूजापि न विधेया भगवत्पूजया तत्तृप्ति सम्भवात्तन्मूलत्वात्तेषां तन्मूलनिबन्धनां च शाखानामिवेति मुख्यवैष्णवासिद्धान्तमाह—जीवराशिभिरिति ॥ ३६ ॥

ननु, मुख्यपात्रालाभे विहितकर्मानुष्ठानविषयाभावेन तद्विधानं व्यर्थमित्याशङ्क्य तत्तद्योग्यपात्रं वक्तुं कञ्चन सुविप्रकारमाह—पुराणीति । अनेन दयालुना हरिणा नृतिर्यगादिसंज्ञितानि पुराणि शरीराणि सृष्टानीत्यन्वयः । ततः किम्? तत्राह, शेत इति । श्रीहरिरेषु पुरेषु भोगायतनेषु जीवेन रूपेण अप्रतिबिम्बेन सह शेते इति यस्तस्मादसौ पुरुष इत्युच्यते जीवोऽपि तन्नामेति शेषः । "पुरिशयनात्पुरुषः" इति श्रुति हिशब्देन सूचयति ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देवर्षीति—तत्र, राजसूये ॥ ३५ ॥

सर्वेषां जीवानामात्मनश्च तर्पणरूपा सैव भवतीत्यर्थः ॥ ३६ ॥

पुराणीति जीवेन जीवयित्रा जीवान्तर्यामिरूपेणेत्यर्थः ॥ ३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

देशान्तरात्सहस्रगुणाधिकस्य फलस्य उदयो यस्मात् सः ॥ ३३ ॥

अत्र धर्मार्थं कस्मै देयमिति चेत् साक्षात्स्वयं वैष्णवेभ्यो ब्राह्मणेभ्यः सर्वप्राणिभ्यश्चेति वक्तुं प्रथमं दानस्य पात्र निर्वक्ति पात्रमिति ॥ ३४ ॥

हरेः पात्रत्वे निर्विवादत्वं तव राजसूययज्ञ एव सिद्धमित्याह । देवेषु ऋषिषु अर्हत्सु तपोयज्ञादिभिः सिद्धेषु ब्रह्मादिषु तदात्मजादिषु सनकादिषु च अग्रपूजायां पात्रतया अच्युत एव मतः ॥ ३५ ॥

सम्मतत्वे हेतुमाह—जीवेति । य ब्रह्माण्डकोशस्तस्य मूलत्वात् ॥ ३६ ॥

अनन्तस्यावतारसमये साक्षात्स्वरूपा एव दत्वातु तदुक्तावसत्पात्रं यत्र लभ्यते विम्बं भगवन्न इति पूर्वोक्तः, तदनन्तरं तु प्राणिमात्रेभ्य इत्याह—पुराण्यनेनेति ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरेरङ्घ्रिश्रिता इति पुनरुक्तिः अर्घ्याश्रितदेशस्याऽतिपुण्यतमत्वाभिप्राया हि यतः अत्र यत्र देशेषु देहिनः कर्तुं वाञ्छितोऽपि धर्मः किमुताऽनुष्ठितः सहस्रगुणमधिकस्य फलस्योदयो यस्मात्स तथाभूतो भवति ॥ ३३ ॥

प्रसङ्गात्पात्रमाह—पात्रमिति । हे उर्वीश! हरिरेवैकः पात्रं पूज्य इत्यर्थः ॥ ३४ ॥

तेष्वेषु भगवान्राजंस्तारतम्येन वर्त्तते ।
तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते ॥ ३८ ॥
दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप ! ।
त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥ ३९ ॥
ततो ऽर्चायां हरिं केचित्*संश्रद्धाय सपर्यया ।
उपासत उपास्तापि नाऽर्थदा पुरुषद्विषाम् ॥ ४० ॥
पुरुषेष्वपि राजेन्द्र ! सुपात्रं ब्राह्मणं विदुः ।
तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम् ॥ ४१ ॥
नन्वस्य ब्राह्मणा राजन् ! कृष्णस्य जगदात्मनः ।
पुनन्तः पादरजसा त्रिलोकीं दैवतं महत् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां सप्तमस्कन्धे सदाचारनिर्णयो नाम
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे राजन् ! तत्र त्वदीये राजसूये देवेषु ऋषिषु अर्हत्सु ब्रह्मशिष्यादिषु ब्रह्मात्मजादिषु अर्थात्पूज्येषु पूजकेषु सत्सु यत् यः सर्वोक्तः अच्युत एव अग्रतः पूजायां पात्रतया मतः तथोक्तं राजसूयप्रकरणे

"कृष्णं कमलपत्राक्षं नार्चयिष्यन्ति ये जनाः ।
जीवन्मृतास्तु ते ज्ञेया न सम्भाष्याः कदाचन"—

इत्यादि ॥ ३५ ॥

अच्युतपूजनेन सर्वपूजनं भवतीत्याह—जीवानां राशिभिः समृद्धराकीर्णो व्याप्त आगडकोश एवाङ्घ्रिपः तस्तस्याच्युतस्य मूलत्वादुक्ताङ्घ्रिपमूलवत्त्वाच्युतेज्या सर्वजीवानामात्मनश्च तर्पणं भवति ॥ ३६ ॥

तस्य सर्वत्र पूजार्थं सन्निहितत्वमाह—अनेन अच्युतेन नृतिर्यगाद्यरूपाणि पुराणि सृष्टानि तेषु पुरेषु रूपेण अन्तर्यामिरूपेण शेते, किमर्थम् ? तत्राह—जीवेन पालनीयेन सह शेते जीवपालनार्थमित्यर्थः । अतो असौ पुरेषु शेते इति पुरुष इत्युच्यते ॥ ३७ ॥

भाषाटीका ।

ये सब पुण्यतम देश हैं । और जो२ श्रीहरीकी अर्चाश्रित देश है वे बड़े पुण्यतम देश हैं श्रेय की कामना वाला पुरुष इन देशों का निरन्तर सेवन करे, इन देशों धर्म की चेष्टा करने से पुरुषों को सहस्राधिक फल होता है ॥ ३३ ॥

हे राजन् ! अच्छे पात्र अपात्र जानने वाले लोगोंने तो, जिन से चराचर जगत व्याप्त हो रहा है, उन एक श्रीहरि ही को पात्र कहा है ॥ ३४ ॥

क्योंकि ? हे राजन् ! देव, ऋषि, और ब्रह्मपुत्रादिकों में पूजनीयों के मध्य में भी, इनहीं की अग्र पूजा हुई । और बड़े बड़े कविलोगों ने पूज्यत्वेन इन ही को पात्र बताया ॥ ३५ ॥

असंख्येयजीव राशियों से व्याप्त यह ब्रह्माण्डही एक महान् वृक्ष है, उस वृक्ष का मूल रूप होने से अच्युत (श्रीकृष्ण) की पूजा सर्वजीवात्माओं की तृप्ति करने वालीहै ॥ ३६ ॥

इन श्रीकृष्ण ने मनुष्य, तिर्यक् ऋषि, देवता, आदि रूप बहुत से पुरों की सृष्टि करी है, और जीव रूप से आप उनमे शयन करते हैं, इसी से इनका नाम पुरुष भी है ॥ ३७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तारतम्येन तिर्यगादिभ्यः पुरुषे बहुगुणाधिक्येन वर्तते तस्मात्पुरुषः पात्रम् तत्रापि यावानात्मज्ञानांशो यथा यथा ईयते तप आदियोगेन यत्र यत्र प्रतीयते, तथा तथा ऽसौ पात्रमित्यर्थः । तथाच श्रुतिः "पुरुषत्वे चाविस्तरामात्मा" इत्यादि ॥ ३८ ॥

तर्हि प्रतिमादौ हरेः किमिति पूजां कुर्वन्ति ? तत्राह—दृष्ट्वेति द्वाभ्याम् । मिथोऽवज्ञानमसन्मानस्तस्मिन्नात्मा बुद्धिर्येषां तेषां भावं दृष्ट्वा क्रियायै पूजार्थम् ॥ ३९ ॥

* संश्रद्धया इति पाठः विज० ।

श्रीधरस्वामिकृतभावार्थदीपिका।

हरिमुपासते उपासिताऽप्यर्चा पुरुषद्वेषिणामर्थदा न भवति पुरुषेषु द्वेषं हित्वाऽर्चिता सती साऽपि मन्दाधिकारिणां पुरुषार्थप्रदा भवत्येवेत्यर्थः ॥ ४० ॥

पुरुषेष्वेव जात्या तप आदिभिश्च पुनर्विशेषान्तरमाह—पुरुषेष्वपीति द्वयोः धत्ते तं सुपात्रं विदुः ॥ ४१ ॥

एतदेव कैमुत्यन्यायेन द्रढयति—नन्वस्येति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इतोऽपि पुरुषशब्दवाच्यः स्वसमर्हणेनान्येषां तदाधायकत्वेत्याह—तेष्विति। हे राजन्! तिर्यगादिष्वप्येतेषु पुरुषेषु तारतम्येन स्वकीयज्ञानशक्त्यादिगुणाविर्भावतारतम्येन वर्तते भगवानतोऽसौ पुरुषः पुरु अधिकं पुरुषु शेत इति पुरुषः स एवंभूतोऽतस्तद्रूपेणैवार्हणामर्हणीयेषु भवेषु पात्रेषु विधेयमिति भावः यतो देवमनुष्यादिपुरुषेष्वन्तर्यामितया जीवशरीरकतया च भगवान् वर्तते यतश्च सर्वे पुरुषा देवादयो भगवच्छरीरभूताश्च तेन तारतम्यं व्याप्ताश्च तस्मादात्मा परमात्मा पुरुषः परमपुरुषो यावान्यावद्गुणाविर्भाववान् यथा यत्र यत्र ईयते प्रतीयते तत्तत्पात्रं यत्र यत्राधिकं भगवतो ज्ञानशक्त्यादिगुणाविर्भावस्तत्तदुत्तमम् पात्रं न्यूनाविर्भाववत्त्वमुक्तमिति भावः तदेवं भगवत एवोत्तमपात्रत्वमितरेषामपि तदात्मकत्वेनैवार्हणीयत्वं तदपि तदाविर्भावानुसारेण व्यवस्थितमिति चोक्तम् ॥ ३८ ॥

ननु, भगवतस्तदात्मकानां पुरुषाणामेवार्हणीयत्वे स्मृतिकारादिभिराराधनीयत्वेन विहिता हरिप्रतिकृतिः पूजिता न फलदा स्यादिति चेत्तत्रोत्तरमित्याह—दृष्ट्वेति द्वाभ्याम्। मिथोऽवज्ञानं तिरस्कारः तस्मिन्नात्मा बुद्धिर्येषां तेषां भावं दृष्ट्वा हे नृप! हरेः क्रियायै पूजार्थमर्चाप्रमाणं कविभिः त्रेतादिषु युगेषु कृता पूज्यत्वेन विहिता त्रेतादिष्वित्यनेन प्रायशः कृते सर्वात्मकब्रह्मोपासनमेव विहितमिति सूचितम् ॥ ३९ ॥

तत्रार्चायां पूजार्थप्रतिमायायां केचिद्धरिं संश्रयाय श्रद्धापूर्वकमुपासते एवमुपासिताराधिताप्यर्चा पुरुषद्विषां भगवदात्मकान् पुरुषान्द्विषन्तीति पुरुषद्विषः तेषां नार्थदा न पुरुषार्थदा भवति पुरुषान् बहुमन्यमानानामेवार्चाराधनं फलवदित्यर्थः ॥ ४० ॥

यदुक्तं "तस्मात्पात्रं हि पुरुषः" इत्यादि, तद्विवृणोति—पुरुषेष्विति। हे राजेन्द्र! पुरुषेष्वपि ब्राह्मणं सत्पात्रं विदुः सुपात्रतयाऽध्यात्मविदः सुपात्रत्वे हेतुं वदन्विशिनष्टि, इदं ब्राह्मणात्मकं सुपात्रं तपसा तोषेण विद्ययाऽऽत्मयाथात्म्यज्ञानपूर्वकभगवदुपासनरूपविद्यया तुष्टया दैवाल्लब्धसन्तोषेण वेदं स्वधर्मं इमादीनामप्युपलक्षणम् एभिर्गुणैर्हरेस्तनुं धत्ते बिभर्ति चशब्दः पादपूरणार्थः एवकारार्थो वा हरेरेव तनुं धत्त इत्यर्थः ॥ ४१ ॥

एतदेव कैमुत्यन्यायेन द्रढयति—नन्वस्येति। हे राजन्! न त्रिलोकीं पादरजसा पुनन्तः पवित्रीकुर्वन्तः जगदन्तरात्मनः श्रीकृष्णस्यापि ब्राह्मणा महद्दैवतं किमुतान्येषामस्मद्विधानां ब्राह्मणा दैवतमित्यर्थः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ईशो भगवांस्तेषु पुरेषु स्थितः पुरुषनामसु जीवेषु च तारतम्येन तत्तद्भक्त्यादिगुणतारतम्यानुसारेण सन्निधानतारतम्येन वर्तत इति यस्मात्तस्मात्तत्तारतम्यानुसारेण पुरुषो जीवराशिश्च पात्रं तदन्तर्यामिहरिस्मरणपूर्वकमिति शेषः अत्र सन्निधानतारतम्यमेव हरेर्नतु स्वरूपतारतम्यं तदुक्तं—

"ब्रह्मादिस्थावरान्तेषु न विशेषो परे क्वचित्।
व्यक्तिमात्रविशेषेण तारतम्यं वदन्ति च" इति.

अत्रापीत्थं भावमाह—यावानिति। पुरुषे तु आत्मा यावान् महिम्ना यथा येन प्रकारेण ज्ञायते तदानुकूल्येन जीवराशिः पात्रमित्यर्थः ॥ ३८ ॥

हरिप्रतिमापूजायाः पुरुषाख्यतपुरुषनाम्नो हरेः पूजा स्वल्पफलवतीत्याशयेनाह—दृष्ट्वेति। कविभिः ज्ञानिभिः नृणां मिथ आत्मनो हरेरवज्ञां दृष्ट्वा त्रेतायां सपर्याक्रियार्थे हरेरर्चा कृता यस्मात् ॥ ३९ ॥

ततः केचित्संश्रद्धया सपर्यया अर्चायां हरिमुपासते वै तेषां पुरुषाख्यतहरिद्विषां सांपारैहिकफलमन्तरेण परमपुरुषार्थप्रदा न भवतीत्यन्वयः ॥ ४० ॥

मुख्यपात्रमाह—पुरुषेष्विति। कीदृशो ब्राह्मणो मुख्यं पात्रमित्यतस्तद्विशिनष्टि—तपसेति। ननु प्रतिमास्थानं अत्र "शालग्रामशिलाः सन्तो विप्राश्च हरेः स्मृताः" इति वचनात् विप्रादिमात्रं हरिशालास्थानीय न किन्तु तप आदिगुणविशिष्टब्राह्मणकृतं अन्यथा हरेरर्चा सा पुरुषार्थप्रदा न स्यादिति तदुपासां विनिन्द्य सुपात्रं ब्राह्मणं विदुरिति कथनं व्यर्थं स्यादत एव ब्राह्मणा इति तत्पदं प्रायोजि ॥ ४१ ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्।
(पञ्चदशोऽध्यायः) श्रीधरीया चतुर्दशः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तेष्विति तस्मात् तारतम्यवर्तनात् पुरुषः प्रायो मनुष्यः पात्रं तत्र ज्ञानादिकं विशिष्टमिति भगवद्वर्त्तनस्याऽतिशयात् तत्राऽपि आत्मा यावान् यथा ज्ञानादिपरिमाणादिकः तथा पात्रमित्यर्थः ॥ ३८ ॥

एवं स्थितेपि कालेनोपासकदोषोत्पत्तौ सत्यां वेदद्रष्ट्या विशिष्टमधिष्ठानान्तरं प्रकाशितमित्याह—दृष्ट्वेति । क्रियायै पूजार्थम् अर्चा कृता तत्परिचर्यामार्गदर्शनाय सा प्रकाशितेत्यर्थः । एतेन तादृशदोषयुक्तेष्वपि कार्यसाधकत्वात् श्रीमदर्चाया आधिक्यमेव व्यञ्जितम् प्रतिमास्वल्पबुद्धीनामित्यत्राल्पबुद्धीनामपीत्यर्थः । श्रीनृसिंहपुराणादौ ब्रह्माम्बरीषादीनामपि तत्पूजाश्रवणात् ॥ ३९ ॥

ततः एवं प्रभावात् केचिदित्यधिष्ठानवैशिष्ट्येन पूर्वतोऽप्युत्तमसाधनतत्परा इत्यर्थः । नन्वश्रद्धातुर्द्विषोपि सिद्धिः स्यादित्याशङ्कयाऽतिप्रसङ्गनारणेच्छया प्रस्तुतपुरुषरूपाधिष्ठानादरेच्छया च तं वारयति, उपास्तापीति ॥ ४० ॥ ४१ ॥

प्रथमपुरुषे पूर्वोक्तं ब्राह्मणरूपं पात्रमेव स्तौति—नन्वस्येति, जगदात्मनः जगन्ति लोकसंग्रहधर्मादिप्रवर्त्तनेन तानियन्तुरित्यर्थः । दैवतं लीलया पूज्यत्वेन दर्शितम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

चतुर्दशोऽध्यायः ॥ १४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तारतम्येन तिर्यगादिभ्यः पुरुषे यस्मादाधिक्येन वर्त्तते तस्मात् पुरुषः पात्रं तत्रापि यथायथा ज्ञानवैराग्यादिभिर्यावानात्मा जीवः उत्कृष्टो भवेत् यः स पात्रं तथाच श्रुतिः "पुरुषत्वेचाविस्तरामात्मा" इत्यादि ॥ ३८ ॥

सर्वप्राणिसंमाननासमर्थानामवज्ञा स्पर्द्धाविमतां तु भगवत्प्रतिमैव पात्रमित्याह—दृष्ट्वेति। मिथः परस्परमवज्ञाने एवात्माबुद्धिर्येषां तेषां भावस्तत्ता ताम् ॥ ३९ ॥

उपास्ता उपासितापि पुरुषद्विषां नार्थदेति अवज्ञादिभ्योपि द्वेषेऽपराधाधिक्यं सूचयति ॥ ४० ॥

पुरुषस्येव जात्या तपआदिभिश्च श्रैष्ठ्यमाह—पुरुषेष्वपीति । वेदं ब्रह्मशब्दवाच्यं यो धत्ते ज्ञानेन स ब्राह्मण इति तद्धीते तद्वेदेत्यणा ब्राह्मणपदव्युत्पत्तिर्दर्शिता ॥ ४१ ॥

कृष्णास्य महत् दैवतमिति तेनाप्यास्त्रियते ब्रह्मण्यत्वात् नच तद्वैश्वतत्वात् ब्राह्मणादन्यस्मात् सकाशादपि तस्तुत एव पूज्या इति सिद्धान्त एवेति वाच्यं राजसूये बहुष्वपि ब्राह्मणेषु विद्यमानेषु कृष्णस्यैवाग्रपूजनात् ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

चतुर्दशः सप्तमस्य सङ्गतः सङ्गतस्सताम् ॥ १४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेष्वेषु नृतिर्यगादिषु भगवान् तारतम्येन वर्तते यस्मात्तस्मात् यावान् यथा ईयते तावान् यथा आत्मा तदन्तरात्मा पुरुषः पात्रम् नृतिर्यगादिषु यथा यथेयते तथा तथा पूज्य इत्यर्थः ॥ ३८ ॥

एवं नृतिर्यगादिषु प्राणिषु भगवदर्चनमुक्तम् । अथ तद्दृढीकरणार्थं महर्षिभिः संस्थापिता भगवत्प्रतिमा पूजा पुरुषार्थदाऽपि प्राणिद्रोहिणां नार्थदेत्याह—दृष्ट्वेति, द्वाभ्याम् । मिथोऽवज्ञानेऽन्योऽन्यतिरस्कारे आत्मा बुद्धिर्येषां तेषां भावस्तत्ता तां दृष्ट्वा क्रियायै भगवत्पूजार्थम् अर्चा प्रतिमा कविभिः त्रेतादिषु कृता प्रकटीकृता ॥ ३९ ॥

तत्रार्चायां प्रतिमायां केचिन्मुमुक्षवः हरिं संश्रद्धाय सपर्ययोपासते ततस्तान्प्रत्यर्थदा भवति. पुरुषद्विषां नृतिर्यगादिप्राणिपीडया परमेश्वरद्वेषिणां तु तदर्चनाग्रहणेनोपास्ताऽपि न भवति किमुतार्थदा न भवतीतिवाच्यम् ॥ ४० ॥

पुरुषेषु नृषु च ब्राह्मणं सुपात्रं विदुः यतस्तपआदिभिर्धृतं हरेस्तनुं मूर्तिं च धत्ते अध्ययनेन ध्यानेन च ॥ ४१ ॥

पादरजसा त्रिलोकीं पुनन्तः ब्राह्मणाः । ननु, अहो जगदात्मनः सर्वात्मनः श्रीकृष्णस्यापि महद्दैवतमादरविषयाः किमुतान्येषामित्यर्थः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

चतुर्दशाऽध्यायार्थप्रकाशः ॥ १४ ॥

———

भाषा टीका ।

हे राजन् ! इन सर्व पुरों (देहों) में भगवान् तारतम्य से वर्त्तमान हैं. पर जिस कारण से पुरुष में अधिकता से वर्त्तमान हैं, तस्मात् पुरुष ही पात्र है, पुरुषों मे भी ज्ञानी लोग और भी पात्र है ॥ ३८ ॥

भाषा टीका ।

असम्मान में अर्थात् अन्य के तिरस्कार में जिनों की बुद्धि लग्न रहती है, ऐसे मनुष्यों को भी जैसे श्री हरि में प्रीति होवे। हे राजन् ! इसी हेतु से वेद वेत्ताओं ने त्रेतादि युगों में क्रिया के अर्थ श्रीहरि की अर्चा प्रतिष्ठादि करी है, ॥ ३९ ॥

तिसी से कितने एक अन्य महात्मा जन सम्यक् श्रद्धाकर के अर्चा ही में श्रीहरि की पूजा करके उपासना करते हैं, परन्तु वह उपासित मूर्ति भी पुरुष द्वेषियों को अर्थदेने वाली नहीं होती है, अर्थात् भूतद्रोही का प्रतिमा पूजन व्यर्थ है ॥ ४० ॥

हे राजेन्द्र ! मनुष्यों में भी महाजन, ब्राह्मण को सुन्दर पात्र जानते हैं, क्यों कि ? वह, तप विद्या और सन्तोष से साक्षात् श्रीहरि के तनु रूप वेद को धारण करता है ॥ ४१ ॥

हे राजन् ! वे ब्राह्मण लोग इन जगदात्मा श्रीकृष्ण ही के प्रिय और परम दैवत अर्थात् पूजनीय हैं ॥ ४२ ॥

इति श्रीमद्भागवत सप्तमस्कन्ध में चतुर्दश अध्याय की
भागवताचार्य कृत भाषा टीका समाप्त ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥



॥ पञ्चदशोऽध्यायः ॥

नारद उवाच ।

कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठा नृपापरे ।
स्वाध्याये ऽन्ये प्रवचने ये केचिज्ज्ञानयोगयोः ॥ १ ॥
ज्ञाननिष्ठाय देयानि कव्यान्यानन्त्यमिच्छता ।
दैवे च तदभावे स्यादितरेभ्यो यथा ऽर्हतः ॥ २ ॥
द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ।
भोजयेत्सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरम् ॥ ३ ॥
देशकालोचितश्रद्धा द्रव्यपात्रार्हणानि च ।
सम्यग्भवन्ति नैतानि विस्तरात्स्वजनार्पणात् ॥ ४ ॥
देशे काले च सम्प्राप्ते मुन्यन्नं हरिदैवतम् ।
श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयम् ॥ ५ ॥
देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च ।
अन्नं संविभजन्पश्येत् सर्वं तत्पुरुषात्मकम् ॥ ६ ॥
न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् ।
मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ॥ ७ ॥
नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छताम् ।
न्यासो दण्डस्य भूतेषु मनोवाक्कायजस्य यः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः पञ्चदशे सर्ववर्णाश्रमनिबन्धनम् ।
सारतः सङ्ग्रहेणाऽथ वर्ण्यते मोक्षलक्षणम् ॥

सर्वेषामपि मोक्षधर्माणां सारसङ्ग्रहार्थमध्यायप्रारम्भः, तत्र आश्रमगतान्विशेषानाह—कर्मनिष्ठा इति । स्वाध्यायादिषु परिनिष्ठिता इति शेषः ॥ १ ॥

कव्यानि पितृनुद्दिश्य देयानि दैवे च हव्यान्यपि तस्मै देयानि यथार्हत इति सर्वत्र ज्ञानादितारतम्येन ॥ २ ॥ ३ ॥

ननु, विस्तरः कुतः प्राप्तो येन निषिध्यते तत्राह, स्वजनार्पणात् जामाता चेन्निमन्त्र्यते तत्पित्रादयः कथं वर्ज्या इत्येवं प्राप्ताद्विस्तरादित्यर्थः ॥ ४ ॥

मुन्यन्नमारण्यं नीवारादि हरिदैवतं हरये निवेदितं सत् ॥ ५ ॥

पुरुषात्मकमीश्वरस्वरूपम् ॥ ६ ॥ ७ ॥

दण्डस्य न्यासो हिंसायास्त्यागो य एतादृशो ऽन्यो धर्मो नास्ति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तपसा विद्ययेत्यादिना ब्राह्मणेष्वपि तप आदिगुणतारतम्येन पात्रत्वं तारतम्येन व्यवस्थितमिति सूचितम्, एतदेव

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विद्वद्वन्धुपात्रायैव श्राद्धादिव्यवादिकं दद्यादिति वक्ष्यन्नादावपि भागवतीयनियमानाह, देवर्षिः—कर्मनिष्ठा इत्यादिना । हे नृप ! केचित् द्विजाः, त्रैवर्णिकाः कर्मनिष्ठाः स्ववर्णाश्रमोचितकर्मनिष्ठाः केचिच्चाऽनशनादितपोनिष्ठाः केचित्स्वाध्याये प्रवचने अध्यापने च परिनिष्ठिताः केचिच्च ज्ञानयोगयोरुभयोरपि निष्ठिता इति शेषः । ज्ञानमात्मयाथात्म्यज्ञानपूर्वकभगवदुपासनात्मकम् योगोऽनभिसंहितफलकर्मयोगः ॥ १ ॥

तत्र ज्ञाननिष्ठाय ज्ञानकर्मयोगानुगृहीतभगवदुपासनात्मकज्ञानयोगनिष्ठाय पितॄनुद्दिश्य देयानि कव्यानि श्राद्धादीनि आनन्त्यमपरिमितं फलं मोक्षरूपं फलमिच्छतां पुंसां देयानि तथा दैवे च कर्मणि हव्यान्यपि ज्ञाननिष्ठायैव देयानि तदभावे ज्ञाननिष्ठस्याभावे इतरेभ्यः कर्मनिष्ठादिभ्योऽपि यथायोग्यं ज्ञानादितारतम्येन देयं स्यात् ॥ २ ॥

दैवे विश्वेदेवस्थाने द्वौ ब्राह्मणौ पितृकार्ये पितृप्रयोजने पित्रर्थमिति यावत् । त्रीन् ब्राह्मणानुभयत्र द्वयोरपि स्थानयोरेकैकं वा ब्राह्मणं भोजयेत्सुसमृद्धोऽपि धनाढ्योऽप्येवं ब्राह्मणान् भोजयेत् न तु श्राद्धे विस्तरं कुर्यात् ॥ ३ ॥

श्राद्धविस्ताराद्दोषमाह—देशेति । देशकालपात्राणि यथोक्तान्येव उचिता श्रद्धा विश्वासः कर्तव्यविषया त्वरा वा अर्हणं पूजासाधनं तानि समीचीनान्यपि स्वजनार्पणाद्विस्तराच्च सम्यग्भवन्ति विगुणान्येव स्युरित्यर्थः । ननु, कुतो विस्तरः प्राप्तः येन निषिध्यते इति शङ्कां वारयितुं स्वजनार्पणादित्युक्तं स्वजनानामर्पणाद्वौहित्रो निमन्त्रितश्चेत्तत्पुत्रादयः कथं वर्ज्या इत्याद्येवं प्राप्ताद्विस्तरादित्यर्थः ॥ ४ ॥

श्राद्धे विप्रद्वयमपि ब्राह्मणं भोजयेदित्याह—देश इति । देशे पूर्वोक्ते कालेऽपरपक्षादिरूपे मृताहादिरूपे च काले प्राप्ते कर्तव्यत्वेन प्राप्ते श्राद्धे पात्रे सत्पात्रे विधिवच्छ्रद्धया न्यस्तं मुन्यन्नमारण्यं व्रीह्यादिजमन्नं हरिदैवतं विष्णुदैवत्यं तस्मै निवेदितं तदुद्देश्येन च दत्तमन्नं कामधुक् कामदमक्षयफलदं मुक्तिसाधनं चेत्यर्थः ॥ ५ ॥

सर्वाश्रमसाधारण्यान् कांश्चिद्धर्मानाह—देवर्षीति । देवादिभ्य आत्मने स्वजनाय बन्धुजनाय चान्नं विभजन्विभज्य दद्यात् तदेवाह्निकं सर्वं प्राणिजातं पुरुषात्मकं भगवदात्मकं पश्येत् ॥ ६ ॥

आमिषं मांसं श्राद्धे पित्राद्युद्देशेन न दद्यात् इदं चात्र बाधिमात्रकं तथा धर्मयाथात्म्यविदन्नयमन्यदामिषं नाश्नीयात् यथा मुन्यन्नैरपि परोत्कृष्टा पित्रादीनां प्रीतिः स्यात्तथा पशुहिंसया न स्यात् ॥ ७ ॥

किञ्च सद्धर्ममिच्छतां नृणामेतादृशः एव परं उत्कृष्टो धर्मः कोऽसौ ? यो भूतेषु मनोवाक्कायजस्य दण्डस्य न्यासस्त्यागः कायाद्यजन्यो भूतद्रोहाभाव एव नृणां परो धर्म इत्यर्थः । एतादृशोऽन्यः परो धर्मो नास्तीति भावः । न दद्यादामिषमित्यनेन पशुप्रोक्षणादिहिंसागर्भमांसादिद्रव्यकश्राद्धादेरपि मुन्यन्नेनापि कृतं श्राद्धादिकं नितरां पित्रादीनां प्रीतिकरमित्युक्तं नैतादृश इत्यनेन भूतहितमेवोत्कृष्टधर्म इत्युक्तम् ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कर्ममार्गो ज्ञानमार्गश्च कार्ययोः कारणेषु वयः प्रवेशनामग्र्यं च तत्साधनं च मयश्च स्वरूपं च निरूपयत्यस्मिन्नध्याये । तत्र प्रथमतो ब्राह्मणादपि ज्ञाननिष्ठमुत्तमं पात्रं दैवोपलक्षणेन दृष्टेनैव नित्यनैमित्तिकक्रियाकरणं धर्माधर्मविवेकश्च कल्पते. तत्र ब्राह्मणान्विवेचयति—कर्मेति । कर्मनिष्ठा गृहस्थाः तपोनिष्ठा वानप्रस्थाः स्वाध्यायनिष्ठा ब्रह्मचारिणः प्रवचननिष्ठाः कुटीचकाः बहूदकाश्च योगनिष्ठा हंसाः ज्ञाननिष्ठाः परमहंसाः ॥ १ ॥

तत्र सन्ततेरानन्त्यं मुक्तिं चेच्छता ज्ञाननिष्ठाय परमहंसाय कव्यानि पितृभ्यो दीयमानान्यन्नानि दातव्यानीति विधिरित्यन्वयः । दैवे कर्मणि च तस्मा इति शेषः । तदभावे परमहंसाभावे इतरेभ्यो हंसादिभ्यः श्राद्धादिदानं स्यात् तत्रापि यथार्हतः यथायोग्यम् ॥ २ ॥

अत्र भोक्तुः सङ्ख्या नियममाह—द्वाविति, ॥ ३ ॥

कुतो विस्तारो न कर्तव्य इति तत्राह—देशेति । स्वजनार्पणात् आत्मीयार्पणलक्षणात् विस्तारादेतानि देशकालोचितश्राद्धादीनि सम्यक् न भवन्तीति यतस्तस्माद्विस्तारं न कुर्यादिति पूर्वेणान्वयः ॥ ४ ॥ ५ ॥ ६ ॥

यतः श्राद्धभोजने मुख्याधिकारिणो मांसनिधानं कथमुपपद्यत इति तदपवादत्वेन विधत्ते—न दद्यादिति । शास्त्रान्तरविधिमोहितेन केनचित्कामपरिमोहितेन मत्कारणात् न भोक्तव्यमिति विधत्ते-नचेति । नच श्राद्धभङ्ग इत्याह, धर्मेति—

"विना मांसेन मधुना विना दक्षिणयाऽऽशिषा ।
अक्षयं भवति श्राद्धं यतिषु श्राद्धभोजिषु ॥
ग्रामे वा नगरेऽरण्ये ज्ञातभिक्षुर्यथेप्सितः ।
तमन्तरेण यच्छ्राद्धं तदासुरमयं भवेत्"

इत्यादि स्मृतेः । तद्विधायकशास्त्रमासुरजनमोहनार्थत्वेन देशकालविशेषविषयत्वेन वा योजनीयम् आमिषाभावे भोक्तुः सौहित्याभावेन पितॄणां सौहित्यं न स्यादिति तत्राह—मुनीनामिति, मुनीनां संयमिनां यथा मुन्यन्नेन परा प्रीतिः सौहित्यं स्यात्तथा पशुहिंसया जातमांसेन न स्यात्. यथा मुनीनां पितॄणां यतिभोजनेन परा प्रीतिस्तथा पशुहिंसाजनामिषभोजनेन न स्यादिति द्विधाऽप्यन्वयो योजनीयम् "यथा यमे च सर्वेषु मुनिष्वन्दः पितृष्वपि" इत्यभिधानम्. मुनीनां सर्वज्ञानां देवानां यथा परमा प्रीतिः तथा पशुहिंसालक्षणेन यागेन नेति वा ॥ ७ ॥

श्राद्धे चतुर्थाश्रम्येव पूज्य इति नियमः प्रायिकः तद्धर्मो यस्यास्ति सोऽपि मान्य इत्याशयेनाह—नैतादृश इति । सद्धर्ममिच्छतां नृणां भूतेषु मनोवाक्कायकर्मजस्य दण्डस्य न्यासः सन्न्यासो य एतादृशो धर्मः परोऽन्यो नास्ति । अयमेव मुख्यो धर्मः तस्मादेतादृशधर्मोऽपि श्राद्धे मान्य इत्याशयः । "वाग्मिर्न संयमिः" इति वक्ष्यति न केवलं पश्वालम्भनलक्षणाहिंसाभावान्मुनीनां प्रीतिजनकोऽपि तु मनसादिना क्रियमाणदण्डलक्षणहिंसाभावोऽपीत्यतो वाह नेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ तेषु सर्वोत्कृष्टमाह—द्वाभ्याम्, कर्मनिष्ठा इत्यादिभ्याम् । कर्मनिष्ठा गृहस्थवानप्रस्थब्रह्मचारिसन्यासिनो ज्ञेयाः अनेन यथाऽत्र मुमुक्षुप्रभृतीनां ज्ञानिपूजैव मुख्या । पुरुषान्तरपूजा तु तदभाव एव, तथा प्रेमभक्तिकामानाम् प्रेमभक्तपूजापि ज्ञेया । ततः प्रेमभक्तानामपि यांश्च तस्य परमाश्रयरूपं च तदभिव्यक्तः सुतरामेवार्चाया आधिक्यमपि । एवं तदाश्रयरूपस्य चिज्ज्योतिःप्रकाशत्वादेव श्रीविष्णोः व्यापकत्वेऽपि शालग्रामादिषु निर्धार्यां तत्र च पुरुषवन्मान्तर्यामित्वद्यपेक्ष्यं किन्तु स्वभावनिर्देशः:

"तत्र श्राद्धं जपो होमः सर्वं कोटिगुणं भवेत्" ।
"शालग्रामसमीपे तु क्रोशमात्रं समन्ततः ॥
कीकटोऽपि मृतो याति वैकुण्ठभवनं नरः" इति ।

तस्मादर्चाया आधिक्यमेव स्थितम् ॥ १—१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

गृहस्थस्यैव धर्मान्तः सर्वधर्मनिरूपणम् ।
अत्र पञ्चदशे सारसङ्ग्रहाध्ये प्रदर्शितम् ॥

पूर्वत्र ब्राह्मणोत्कर्षः प्रतिपादितः तेषु ब्राह्मणेष्वपि तारतम्यमाह—कर्मनिष्ठा गृहस्था विप्राः तपोनिष्ठा वानप्रस्थाः अन्ये स्वाध्याये प्रवचने इति नैष्ठिकब्रह्मचारिणः केचित् ज्ञानयोगयोरिति संन्यासिनः समासान्तर्वर्तिना ऽपि निष्ठापदेनानुवर्तितेन अन्वयाया निष्ठावन्तो व्याख्येयाः ततश्चैषां यथोत्तरमेव श्रैष्ठ्यं दर्शितम् ॥ १ ॥

कव्यानि पित्रुद्देश्यकवस्तूनि दैवे च हव्यानि देवोद्देश्यकवस्तूनि च ज्ञाननिष्ठाय देयानि आनन्त्यं मोक्षं पितॄणां आत्मनश्चेति मोक्षार्थिना गृहस्थेन संन्यासिन एवाधिक्येन भोजनीया इति पञ्चाध्याय्या अस्या मोक्षप्रकरणपरत्वात् अत एव शुद्धभक्तानां कर्मानधिकारात् गृहस्था अपि ते अत्र कर्मज्ञानप्रकरणे न पठिताः तैस्तु सुप्रतिष्ठयेष्टदाररक्षाभारताम्बरीषादिभिरिव स्वप्रतिनिधिद्वारा कर्मकरणेन भक्तिमार्गनिन्दावादाद्यनुत्थानार्थमेव क्रियत इत्युक्तं पञ्चमे, एकादशे च प्रतिपादयिष्यते तस्मान्मोक्षार्थिनां यथा ज्ञानिपूजैव मुख्या पुरुषान्तरपूजा तु तदभाव एव; तथा प्रेमभक्त्यर्थिनामैकान्तिकभक्तपूजैव मुख्येति ज्ञापितमत्रापि "स वै पुण्यतमो देशः" इति पद्यव्याख्यायाम्—

"मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ! " ॥

इत्यादिना ज्ञानिभ्योऽपि तदुत्कर्षश्रवणात्—

"नमेऽभक्तश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः ।
तस्मै देयं ततो ग्राह्यं स हि पूज्यो यथा ह्यहम्" ॥ इति

ब्राह्मणेतरस्यापि तस्य संप्रदानत्वश्रवणाच्च यथा च ज्ञानिनामर्चायां पूजा हि "दृष्ट्वा तेषां मिथो नृणाम्" इत्यनेन कनिष्ठाधिकारिणां व्याख्याता न तथा भक्तानां व्याख्येया तेषां हि मुख्याधिकारिणामपि अर्चायां पूजादिकं मुख्यमेव भक्त्यङ्गं यदुक्तमेकादशे—

"मल्लिङ्गमद्भक्तजन दर्शनस्पर्शनार्चनम् ।
परिचर्यास्तुतिप्रह्वगुणकर्मानुकीर्तनम् ॥
ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः" ॥ इति ।
"वस्त्रोपवीताभरणपत्रस्रग्गन्धलेपनैः ।
भजेत्कुर्वीत सप्रेम मद्भक्तो मां यथोचितम्" ॥ इति

"प्रतिमास्वल्पबुद्धीनाम्" इत्यादिकं तु ज्ञानिपरमल्पबुद्धीनामपीति वा व्याख्येयम् । नृसिंहपुराणे अम्बरीषादीनामपि तत्पूजाश्रवणात् तस्याः महिमाधिक्यं विष्णुधर्मे च तामधिकृत्य अम्बरीषं प्रति श्रीविष्णुवाक्यम्—

"तस्यां चित्तं समावेश्य त्यजता ऽन्यान् व्यपाश्रयान् ।
पूजिता सैव ते भक्त्या ध्याता चैवोपकारिणी ॥
गच्छंस्तिष्ठन् स्वपन् भुंजंस्तामेवाग्रे च पृष्ठतः ।
उपर्यधस्तथा पार्श्वे चिन्तयंस्तामथात्मनः" ॥ इत्यादि

स्कान्दे च "शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम्" इति पाद्मे च

"शालग्रामसमीपे तु क्रोशमात्रं समन्ततः
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः" ॥

इति ॥ २ ॥

विस्तरं भोक्तृबाहुल्यम् ॥ ३ ॥

स्वजनार्पणात् स्वजनेभ्योऽन्नदानात् जामाता चेन्निमन्त्र्यते तत्पित्रादयः कथमुपेक्षणीया इत्येवं प्रसङ्गात् विस्तरात् ॥ ४ ॥

मुन्यन्नम् आरण्यं व्रीह्यादि न्यायार्जितं वा हरिदैवतं प्रथमं हरये निवेदितं ततः तदेव पितृभ्यो दत्तं ततः पात्रे न्यस्तम् ॥ ५—७ ॥

दण्डस्य हिंसनस्य न्यासस्त्यागः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वधर्मसारः पञ्चदशे उच्यते, तत्रादौ भागवतान् विशेषेणाह—कर्मनिष्ठा इत्यादिना । द्विजाः केचित्कर्मनिष्ठाः अपरे तपोनिष्ठा अन्ये स्वाध्याये वेदादिपाठे प्रवचने तदर्थव्याख्याने च परिनिष्ठिता इति शेषः । केचित्तु कर्मादिना निर्मलान्तःकरणा ज्ञानयोगयोः ज्ञानभक्त्योः परिनिष्ठिताः ज्ञाननिष्ठाय ज्ञानभक्त्योरत्यन्तभेदाभावादेकत्व निर्देशः ज्ञानभक्तिसम्पन्नायेत्यर्थः । कव्यानि पितॄनुद्दिश्य देयानि दैवे हव्यानि च देयानि तदभावे इतरेभ्यः कर्मनिष्ठादिभ्यो यथार्हतो देयं स्यात् ॥ १—२ ॥

दैवे विश्वेदेवकार्ये द्वौ ब्राह्मणौ पितृकार्ये त्रीन् उभयत्रैकैकं वा भोजयेत्सुसमृद्धोऽपि धनाढ्योऽपि श्राद्धे विस्तरं न कुर्यात् ॥ ३ ॥

विस्तरे दोषमाह—देशेति । विस्तरात् स्वजनेभ्यो निमन्त्रितेभ्यो ऽन्नार्पणात् देशकालोचितानि श्रद्धादीनि सम्यक् न भवन्ति ॥ ४ ॥

एके कर्ममयान्यज्ञान् ज्ञानिनो यज्ञवित्तमाः ।
आत्मसंयमनेऽनीहा जुह्वति ज्ञानदीपिते ॥ ९ ॥
द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति ।
एष माऽकरुणो हन्यादतज्ज्ञो ह्यसुतृब् ध्रुवम् ॥ १० ॥
तस्माद्दैवोपपन्नेन मुन्यन्नेनाऽपि धर्मवित् ।
सन्तुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकीः क्रियाः ॥ ११ ॥
विधर्मः परधर्मश्च आभास उपमा छलः ।
अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत्त्यजेत् ॥ १२ ॥
धर्मबाधो विधर्मः स्यात् परधर्मोऽन्यचोदितः ।
उपधर्मस्तु पाखण्डो दम्भो वा शब्दभिच्छलः ॥ १३ ॥
यस्त्विच्छया कृतः पुम्भिराभासो ह्याश्रमात्पृथक् ।
स्वभावविहितो धर्मः कस्य नेष्टः प्रशान्तये ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिदैवतं हरये निवेदितं मुन्यन्नमारण्यं श्रीह्याद्रिकं श्रद्धयोकपात्रे न्यस्तमर्पितं सर्वकामधुगक्षयं च भवति ॥ ५ ॥

देवर्ष्यादिभ्यः सर्वभागं विभजन् तत्सर्वं देवर्ष्यादिकमपुरुषात्मकं भगवदात्मकं पश्येत् ॥ ६ ॥

उत्तमाधिकारी हिंस्रं कर्म त्यजेदेवेत्याह—न दद्यादित्यादिना ॥ ७ ॥

भूतेषु मनोवाक्कायजस्य दण्डस्य हिंसनस्य न्यासस्त्यागो यः स सर्वं भगवद्भक्तिलक्षणं समीचीनं धर्ममिच्छतां परो धर्मश्रेष्ठो भक्तिसाधन एतादृशोऽन्यो धर्मो नास्ति ॥ ८ ॥

भाषा टीका ।

॥ श्रीरुक्मिणीरमणचरणनलिनेभ्यो नमः ॥

॥ नारद उवाच ॥

नारद जी बोले, कि—हे राजन् ! कितने एक ब्राह्मण, कर्म निष्ठा वाले हैं, कोई तप में निष्ठा वाले हैं, बहुत स्वाध्याय में निष्ठा करते हैं, अन्य ब्राह्मण लोग प्रवचन (वेद पढाने) में निष्ठावाले हैं, कितने एक ज्ञान में कितने एक योग में निष्ठावाले ब्राह्मण लोग हैं ॥ १ ॥

परंच देव पितृ कार्य में कव्य (देवताओं के निमित्त प्रदेय अन्न) हव्य (पितरन के निमित्त प्रदेय अन्न) केवल ज्ञान निष्ठावाले ब्राह्मण को ही देना चाहिये, यदि ज्ञाननिष्ठ न मिले तो यथा योग्य ज्ञान तारतम्य देखकर औरों को देवे ॥ २ ॥

देवकार्य में दो ब्राह्मण, पितृकार्य में तीन ब्राह्मण. अथवा दोनों कार्यों में बड़ा धनी भी एक ही एक ब्राह्मण को भोजन करावे, श्राद्ध में विस्तार कभी न करै ॥ ३ ॥

देश काल के उचित श्रद्धा, द्रव्य, पात्र, पूजन, इन सबके विस्तार से, और श्राद्ध में स्वजनों के अर्पण करने से, ये सब श्राद्धादिक कर्म समीचीन (अच्छे) नहीं होते हैं ॥ ४ ॥

श्राद्ध के देश काल प्राप्त होने पर, प्रथम श्रीहरि को निवेदन कराकर उसी निवेदित मुन्यन्न (मुनियों के अन्न, ओदनादि) को श्रद्धा से विधि पूर्वक सत्पात्र को भोजन करावे, तब वह कामनाओं को पूर्ण करने वाला और अक्षय होता है ॥ ५ ॥

देव, ऋषि, पितृ, भूत, (प्राणी) आत्मा, और स्वजनों को अन्न का विभाग करता हुआ सबों को भगवदात्मक देखे ॥६॥

धर्म के तत्त्व को जानने वाला श्राद्ध में मांस न देवे । और आप भी स्वयं मांस भक्षण न करे, जैसी पितृ लोगों को मुनि अन्न से परमप्रीति अर्थात् तृप्ति होती है, वैसी पशु हिंसा से नहीं होती है ॥ ७ ॥

बस समीचीन धर्म की इच्छा वाले मनुष्यों को इससे आगे बड़ा परमधर्म और कोई भी नहीं है, जो कि ? मन वाणी और शरीर से प्राणियों के दंडका त्याग, अर्थात् अपने मन वाणी और शरीर से प्राणि मात्र को पीड़ा न देना ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजन्तीत्याह, एक इति । अनीहा निष्कामाः ज्ञानदीपिते आत्मस्फूर्तिमत्यात्मसंयमने

धर्मार्थमपि नेहेत यात्रार्थं वा ऽधनो धनम् ।
अनीहा ऽनीहमानस्य महाहेरिव वृत्तिदा ॥ १५ ॥
सन्तुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखम् ।
कुतस्तत्कामलोभेन धावतो ऽर्थेहया दिशः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

जुह्वति मनो नियम्य तदन्तरायतया त्यजन्तीत्यर्थः । तदुक्तं सर्वज्ञसूक्तैः——

"प्रत्यक्स्फूर्तिरसत्स्फूर्तिस्तनुनिष्ठानिधानकम् ।
संलक्ष्य सन्त्यजेत्कर्म त्यजन्विघ्नहतो ऽन्यथा" ॥

इति ॥ ९ ॥

मा मामेष ध्रुवं हन्यादिति कुतः अकरुणः तत्कुतः असुतृप् प्राणतर्पकः तत्किम् अतज्ज्ञः आत्मनस्त्वाऽनभिज्ञः तथा च श्रुतिः—

"न तं विदाऽथ य इमा जजानाऽन्यद्युष्माकमन्तरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति"

इति ॥ १० ॥

प्रस्तुतमनुवर्त्तयति—तस्मादिति ॥ ११ ॥

अधर्मवत्स्वाभासानपि त्यजेत् ॥ १२ ॥

क्रममनादृत्य पञ्चापि व्याचष्टे—धर्मबाध इति धर्मबुद्ध्याऽपि यस्मिन् क्रियमाणे स्वधर्मबाधः अन्यस्य चोदितोऽन्यस्य परधर्मः उपमेति व्याचष्टे—उपधर्मस्त्विति । शब्दस्य भित् भेदो ऽन्यथा व्याख्यानं यस्मिन् यथा दशावराम्भोजयेदित्युक्ते दशभ्यो ऽवरानिति, शब्दभूरिति पाठे धर्मशब्दमात्रं बिभर्तीति तथा यथा गां दद्यादित्युक्ते मरिष्यन्त्या गोर्दानम् ॥ १३ ॥

स्वधर्मानुष्ठानाऽनन्तरं धर्मभूयस्त्वार्थमपि परधर्मो नाऽनुष्ठेयो ऽनुपयोगादित्याह—स्वभावविहित इति ॥ १४ ॥

किञ्च अधनो धर्मार्थं धनं नेहेत नापेक्षेत धनार्थं न व्याप्रियेतेति वा दैवोपपन्नेनैव स्वधर्मसिद्धेरुक्तत्वात् यात्रार्थमपि नेहेतेत्येतत् प्रपञ्चयति—अनीहेति, सार्द्धैः षड्भिः ॥ १५ ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत एवमत एव केचिज्ज्ञाननिष्ठा हिंसागर्भद्रव्ययज्ञान् जहति ज्ञानयज्ञनिष्ठाश्च भवन्तीत्याह—एक इति । यज्ञवित्तमा यज्ञयाथात्म्यविदः अनीहा निष्कामाः केचित् ज्ञानिनः पूर्वोक्तोत्कृष्टधर्मज्ञानवन्तः कर्ममयान् यज्ञान्पशुपुरोडाशादिद्रव्यकान्यज्ञान् ज्ञानदीपिते आत्मसंयमने जुह्वति. ज्ञानेन परमात्मोपासनात्मकेन दीपिते प्रज्वलिते आत्मनो मनसः संयमो नियमनं तस्मिन् योगाग्नावित्यर्थः । तत्र जुह्वति "तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिः" इत्यादि पुरुषविद्योक्तविधया क्रियामयान् यज्ञान् हित्वा ज्ञानमयान् यज्ञान् अनुतिष्ठन्तीत्यर्थः ॥ ९ ॥

एवं जुह्वतामयं भाव इत्याह—द्रव्ययज्ञा इति । द्रव्ययज्ञैः पशुपुरोडाशादिद्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि पश्वादीनि एष यक्ष्यमाणो निर्घृणोऽज्ञोऽसुतृप् अस्माकमसुभिः तृप्यतीति तादृशः मां ध्रुवं नूनं हन्यादिति बिभ्यतीत्याशयेन द्रव्ययज्ञान् हित्वा ज्ञानयज्ञाननुतिष्ठन्तीत्यर्थः ॥ १० ॥

तस्मात् पूर्वोक्तभूतसुहृत्त्वरूपोत्कृष्टधर्मवित् पुमान् दैवादुपपन्नेन मुन्यन्नेनाऽपि न तु मांसादिना ऽहरहः नित्यनैमित्तिकाश्च क्रियाः सन्तुष्टः कुर्यात् यद्यप्यत्र "मुन्यन्नैः स्यात्परा प्रीतिस्तथा न पशु हिंसया" इत्यनेन "द्रव्ययज्ञैर्यक्ष्यमाणम्" इत्यनेन च मांसश्राद्धाग्नीषोमीयादिकर्मणां हिंसागर्भत्वेन पापमिश्रत्वं प्रतीयते तच्च "अशुद्धमितिचेन्न शब्दात् ३।१।२५" इति शारीरकाधिकरणन्यायविरुद्धं तत्र ह्यग्नीषोमीयादिकर्मणां पशुहिंसादिरूपपापमिश्रत्वेनाऽशुद्धियुक्तत्वं परिचोद्य, नैतद्युक्तम् कुतः शब्दादग्नीषोमीयादेः संज्ञपनस्य स्वर्गलोकप्राप्तिहेतुतया हिंसात्वाभावशब्दात्पशोर्हि संज्ञपननिमित्तां स्वर्गलोकप्राप्तिं वदन्तं शब्दमामनन्ति "हिरण्यशरीर ऊर्ध्वं स्वर्गं लोकमेति" इत्यादिकमतिशयितोऽभ्युदयसाधनभूतो व्यापारोऽल्पदुःखदोऽपि न हिंसा, प्रत्युत रक्षणमेव तथा च मन्त्रवर्णः "न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधातु" इति. चिकित्सकश्च तादात्विकाल्पदुःखकारिणमपि रक्षकमेव वदन्ति पूजयन्ति च तज्ज्ञा इति हिंसात्वाभावः सिद्धान्तितः । तथाऽप्यत्र हिंसागर्भत्वमात्रे पश्वादिहिंसायाश्च सर्वभूतसुहृदां ज्ञानिनामननुरूपत्वे च तात्पर्यं नतु यागीयहिंसायाः पापत्वेऽपि, न एव केवलं भूतानि बिभ्यतीत्येतावदेवोक्तं नतु तद्धिंसायाः पापत्वमपीत्यतो न शारीरकन्यायविरोधः ॥ ११ ॥

तदेवं प्रातिस्विकान् साधारणांश्च वर्णाश्रमधर्मानभिधायाऽथ तेषां धर्माभासेभ्यो विविक्तत्वज्ञापनाय तान् सङ्गृह्य दर्शयन् तेषां त्याज्यत्वमाह—विधर्म इति । विधर्मादयः पञ्चेमे धर्माभासा अधर्मस्य वृक्षरूपस्य शाखाः शाखाभूताः ततस्तान् धर्मयाथात्म्यवित् अधर्मवत्त्यजेत् ॥ १२ ॥

विधर्मादीन् पञ्च व्याचष्टे—धर्मबाध इति । धर्मबुद्ध्या यस्मिन् क्रियमाणे स्वधर्मबाधः स्यात् स विधर्म इत्यर्थः । अन्यस्य क्षत्रियादेश्चोदितो, विहितो धर्मः स ब्राह्मणादेः परधर्मः उपधर्म इति पाखण्डः वेदविरुद्धागमोक्तः दम्भो वा परवञ्चनार्थो वा उपधर्म इत्यर्थः । छलं व्याचष्टे—शब्दभिच्छल इति । शब्दस्य प्रमापकस्य भिदन्यथा व्याख्यानं यस्मिन् । यथा द्वादशावरान् भोजयेद्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्युक्ते द्वादशसंख्याकेऽर्थांऽवगतेकादश दश वेत्यादि. शब्दभृदिति पाठे धर्मशब्दमात्रं बिभर्तीति तथा यथा गां दुग्धादित्युक्ते गरिष्ठ-दुग्धा गोत्वानमिति ॥ १३ ॥

आभासं व्याचष्टे—यस्त्विति । पुम्भिः स्वेच्छया पृथक् चतुर्थः आश्र-मोऽपृथक् पृथक्कल्पितः आश्रमो ऽवधूतादिः स्वधर्मानुष्ठानाऽनन्तरमपि धर्मभूयस्त्वार्थमपि परधर्मो नानुष्ठेयोऽनुपयोगादित्याह—स्वभावेति । स्वभावेन ब्राह्मणादिस्वभावा ऽनुगुणवेना ऽभिहित इज्यादिरूपः स एवाऽस्योपशान्तये मनःप्रशान्तये कल्पतेऽतो न परधर्मस्योपयोग इत्यर्थः ॥ १४ ॥

एवं भगवदुपासनाङ्गभूता वर्णाश्रमधर्मा उक्ताः अथ प्रधानभूतभगवदुपासनात्मकाष्टाङ्गयुक्तभक्तियोगानुष्ठानप्रकारं वक्ष्यंस्तदा-वतद्विरोधिनां कामक्रोधलोभभयशोकमोहदम्भतापत्रयनिद्रादीनां जयोपायानाह—धर्मार्थमपीत्यादिना । पूर्वमिदं तथा सत् इत्यन्तेन तत्र तावत्सन्तोषस्य कामात्मकस्याऽनर्थावहत्वं तन्नि-मित्ताया धनलिप्सायास्त्याज्यत्वं च वक्तुं दैवादुपनतेनैव कुर्वन्ना स्वधर्मं देहधारणं च कुर्यान्न तु तदर्थं धनं कामयेतेत्याह—धर्मार्थ मिति । यथतो, निर्धनः पुमान् स्वधर्मार्थमपि यात्रार्थं देहधा-रणार्थमपि वा धनं वित्तं नेहेत न कामयेत यात्रार्थमपि नेहेतेत्येतत्प्रपञ्चयति—अनीहेति, सार्धैः षड्भिः । महाऽहेरिवाऽनी-हमानस्य यात्रार्थं धनार्थमपि चेष्टामकुर्वतः दैवोपनतेन प्राणान् धारयमाणस्येत्यर्थः । अनीहाऽकामना एव वृत्तिदा जीवनावहा दैवादुपनतेन जीवतोऽकामयमानस्याकामतैव नितरां सुखजनन-द्वारा वृत्तिरिति भावः ॥ १५ ॥

तदेवाह—सन्तुष्टस्येति । निरीहस्य सन्तुष्टस्य दैवाल्लब्धेन सन्तुष्टस्य आत्मारामस्य स्वस्यात्माऽन्तरात्मा परम-पुरुषस्तस्मिन् रममाणस्य स्वशरीरकब्रह्मानन्दाऽनुभवपरस्य यत्सुखं तत्कामलोभेन काम्यन्त इति कामाः शब्दादयो विष-यास्तेषु लोभेन सङ्गेन निमित्तेनार्थेहया धनेच्छया कामलोभनि-मित्तकधनेच्छया सर्वा दिशः प्रतिधावतो भ्राम्यमाणस्य पुंसः कुतो हेतोर्भवति अनीहया यत्सुखं तदीहया नास्तीत्यर्थः । १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्राद्धादिकर्मप्राप्तो यत्यादिपात्रमुद्दिश्य कर्तव्यमित्यभिहितम् अधुना परमभागवतास्तदपि न कुर्वन्तीत्याशयेनाह—एक इति, "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज" इति शिक्षिताः एके भग-वदर्पितदेहयात्रा ज्ञानिनः कर्ममयान् श्राद्धादियज्ञानात्मसंय-मोऽमनःसंयमनाग्नौ जुह्वति मानसयागं कुर्वन्तीत्यन्वयः । आत्म-संयमनं दर्शयितुमाह—ज्ञानेति । ज्ञानेन्धनसन्दीपिते यज्ञवित्तमाः मान-सयज्ञप्रयोगपटवः अनीहा इति हेतुगर्भविशेषणं निवृत्तमार्गप्र-वृत्तत्वादित्यर्थः ॥ ९ ॥

ननु, द्रव्ययज्ञं सन्त्यज्य ज्ञानयज्ञकरणे किं कारणमित्या-शङ्क्य भूतभयजनकहेतुत्वेन निरयहेतुत्वमित्याशयेनाह—द्रव्येति, एष द्रव्ययज्ञकारिसमुदायो मा मां हन्यादिति भूतानि बिभ्यतीत्य-न्वयः । "अग्नीषोमीयं पशुमालभेत" इति विहितत्वात्तदुक्तं कुर्वतो हिंसा कथं भयं स्यात् ? इत्यत उक्तमतज्ज्ञ इति, विध्यभिप्रायमजा-नन् "अग्नापेयं अग्नहोत्रः" इत्यादिविहितविधेरभिप्रायः । अत एवा-ऽकरुणा इत्युक्तम् एतादृशो सुरवेदय इत्याशयेनोक्तमसुतृपिति, "नीहा-रेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति" इति श्रुतिर्ही-त्यनेन गृह्यते. असुतृबित्ययं शब्दः श्रीहरिविमुखस्यानर्थं निश्चाय-यति । "असुन्वन्तं समं जहि दूणाशं यो न ते मयः" इति श्रुतेः । ते म-यहत्त्वप्रधानकः दूणाशं दुर्नाशम् असुन्वन्तं सुन्वद्विरोधिनम् अन्यथा "सुन्वन्तं वा परिचिक्षीषां वद्गुजुहत इन्द्रा यज्वानो यज्वभिः स्पर्धमानाः" इति श्रुतेः ॥ १० ॥

ननु, तर्हि "नित्यनैमित्तिकं कुर्यात्प्रत्यवायजिहासया" इति विधानं व्यर्थमिति तदुपायमाह—यस्मादिति । दैवोपपन्नेनाऽयाचितादिवि-धिना प्राप्तेन नीवारादिना तदभावे उत्पन्नेन फलशाकादिना ॥ ११ ॥

धर्मविरुद्धं नाम तत्प्रतिपक्षधर्मभेदलक्षणं ज्ञाते सुखं स्यादि-त्यतस्तल्लक्षणमाह—विधर्म इति, ॥ १२ ॥

अधर्मशाखिधर्मादीनां स्वरूपं दर्शयति—धर्मेति । अधर्मशब्दसंपी-डनं विधर्मः अन्यस्य क्षत्रियादेर्योविहितो धर्मो ब्राह्मणे-नानुष्ठीयमानः परधर्मः दम्भेन क्रियमाणो धर्मो दम्भः स चोपधर्म इत्युच्यते धर्मशास्त्रार्थमिच्छन्तो धारको हि धर्मस्तमर्थं भिनत्तीति स छलधर्म इत्युच्यते ॥ १३ ॥

पुम्भिः काम्यफलेच्छया कृतो यो धर्मः स आभास इत्युच्यते हि शब्दः इयानेषां भेद इत्याह—धर्मप्रतिपक्षभेदस्वरूपमुक्त्वा धर्मप्रयोजनमाह—आश्रम इति । हि शब्द उत्तरत्रापि सम्बध्यते तेन वर्णी लक्ष्यति—यो ब्राह्मणादिवर्णो यश्च ब्रह्मचर्यादाश्रमः अत्र तत्तत्स्वभावानुसारेण भगवदर्पणबुद्ध्या पृथक् पृथग् विहितो यो धर्मः स जीवस्योपशान्तये संसारनिर्मूलनाय कल्पते सम-र्थोभवतीति शेषः । स्वभाववर्णाश्रमधर्मानुसारिको धर्मो मुक्तिहेतुर्नान्यः । राजसतामसः स्वर्गनरकादिहेतुः—

"धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत ।
पापं भवति धर्मोऽपि यो न भक्तैः कृतो हरे ! " ॥

इति वचनात् अहव जीवस्योपशान्तये मोक्षायेति वा ॥ १४ ॥

ननु, निष्किञ्चनेन पुरुषेण धर्मकरणं दुःसाध्यं अर्थाभावात् कस्मादधनेन तदर्थं कृष्यादिकं कर्म कर्तव्यमिति तत्राह—धर्मार्थमपीति । तर्हि देहादियात्रार्थं कर्म कर्तव्यम् अन्यथा तन्नाशो न पुरुषार्थोऽन्यथा इति, तत्राह—यात्रार्थमपीति । तन्नेवं चेत्कथं देहयात्रासिद्धिः ? इति तत्राह—अनीहेति । अत्रानीहा अदेहपोषणव्यापारनिवृत्तिः महाहेर-जगरस्य ॥ १५ ॥

निरन्तरं भगवदुपासनामृतपायिनोऽनीहा परमानन्दकारणा-मित्याह—सन्तुष्टस्येति । यदृच्छया सन्तुष्टस्य यत्सुखं कामलोभेन कामभोगेच्छयार्थेहया धनयाचनप्रवृत्त्या च दिशो धावतः पुंसः कुतः कस्मात्कर्मणस्तत्सुखं लभ्यते ? इत्यन्वयः ॥ १६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

धर्मबाध इति सार्द्धकम् । पाषण्डो वेदबाह्यः दम्भः सकपटः ॥ १३ ॥

स्वभाव इत्यर्द्धकम् ॥ १४—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अन एवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजन्तीत्याह—एक इति अनीहा निष्कामाः आत्मनो मनसो यत् संयमनं निग्रहः ज्ञानेन दीपितं तत्र कर्ममयान् यज्ञान् कर्माणि जुहति मनोनियमनस्यान्तरायतया त्यजन्तीत्यर्थः ॥ ९ ॥

एषः अकरुणो मा मां हन्यात् हनिष्यति अतज्ज्ञः आत्मतत्त्वाऽनभिज्ञः तथाच श्रुतिः "न तं विदाथ य इमा जजानाऽन्य युष्माकमन्तरम्बभूव नीहारेण प्रावृता जल्प्या (तार्किकाः मीमांसकाः कार्मिन्यः)श्चासुतृप उक्थशास(:कर्मिणः)श्चरन्तीति ॥१०॥

सर्वत्र सन्तुष्टः भूतान्यहिंसन्नित्यर्थः ॥ ११ ॥

अधर्मवत् निषिद्धमिव ॥ १२ ॥

क्रममनादृत्य पञ्चैता व्याचष्टे—धर्मबाधः धर्मबुद्ध्यापि यस्मिन् क्रियमाणे स्वधर्मबाधः स विधर्मः अन्यस्य चोदितो विहितो यः सोऽन्यस्य परधर्मः यः पाषण्डः जटाभस्मादिधारणमयः दम्भः स्वस्य धार्मिकत्वख्यापनामयो वा स उपधर्मः उपमा धर्मस्योपमा न तु धर्म इत्यर्थः । शब्दस्य भित् भेदः प्रकारान्तरेण व्याख्यानं यत्र दशावरान् विप्रान् भोजयेदित्यत्र बहुव्रीहिं त्यक्त्वा दशभ्योऽवरान् नवाष्टौ वा भोजयेदिति तत्पुरुषव्याख्यानेन यः शब्दभित् स छलः । शब्दभृदिति पाठे धर्मशास्त्रमात्रं बिभर्तीति तत् यथा गां दद्यादित्युक्ते मरिष्यन्त्या गोर्दानम् इच्छया कृतः कल्पितदेवतापूजादिमयो यः स आभासः ॥ १३ ॥

तस्मात् स्वस्य भावेन जन्मनैव प्राप्तयादि—आत्मैव विहितः ॥ १४ ॥

अधनो निर्धनः यात्रार्थं देहनिर्वाहार्थं न ईहेत न वाञ्छेत् धनं प्रति न चेष्टेतेति वा अनीहमानस्य अवाञ्छतः अनीहा निष्कामत्वं निर्व्यापारत्वं वा महाहेरजगरस्य ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एतदेव सदाचारेण दृढीकरोति—एके इति । एके उत्तमाधिकारिणः उत्तमत्वमाह—यज्ञवित्तमाः—

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय ! तत्कुरुष्व मदर्पणम् ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे" ॥

इति भगवदुक्तरीत्या यज्ञरहस्यज्ञाः ज्ञानिनः भगवद्विषयकज्ञानवन्तः अनीहा निष्कामाः कर्ममयान् ज्ञानभक्तिप्राधान्यरहितान् भगवदाराधनविरुद्धान् संसारफलकानित्यर्थः । आत्मनो मनसः संयमने भगवत्प्रावण्ये ज्ञानदीपिते भगवानेव सर्वात्मनाऽऽराधनीय इत्येवंभूतेन ज्ञानेनोद्दीपिते जुहति निःक्षिपन्ति न कुर्वन्तीत्यर्थः ॥ ९ ॥

तस्मात्सकामाधिकारिविषयाणि भूतभयावहानि हित्वा निष्कामः सन् भगवदाराधनात्मकानि कर्माणि कुर्यादित्याह—द्रव्ययज्ञैरिति, द्वाभ्याम् । द्रव्ययज्ञैर्भूतभयावहपशुपुरोडाशादिसाध्यैः मा माम् ॥ १० ॥ ११ ॥

अधर्मो निषद्धाचारः पापद्रुमस्तस्य शाखाः ॥ १२ ॥

धर्मस्य स्वधर्मस्य बाधो यस्माद्धर्मबुद्ध्या क्रियमाणात्स विधर्मः स्यात् अन्येनोदितः वनस्थादेर्विहितो गृहस्थादेः परधर्मः पाषण्डः वेदविरुद्धस्मृतिप्रोक्तः दम्भो वा स्वस्य धार्मिकत्वख्यापनाय प्रकाशितो वा उपधर्मः उपमा शब्दस्य भित् भेदनं दुराग्रहादिना मुख्यार्थोद्भियोजनं छलः ॥ १३ ॥

यत्तु आश्रमात्पृथक् स्वेच्छया कल्पितः स आभासः अधर्मं प्रशंसति—स्वभावेति । स्वभावविहितो वेदेन स्वभावतः स्वार्थं प्रामाण्यतो विहितो धर्मः प्रशान्तये कस्य नेष्टः सर्वस्येष्ट एव तस्मादधर्मशाखाः दूरतस्त्याज्या इति भावः ॥ १४ ॥

अधनो धर्मार्थं स्वभोगार्थं वा धनश्रमं न कुर्यात्किन्तु अजुधानेन धर्मरक्षणं कुर्यादित्याह——धर्मार्थमपीत्यादिना । अनीहोपरामः ॥ १५ ॥

स्वस्य क्षेत्रज्ञः स्वात्मान्तर्यामी तदारामस्यात एव सन्तुष्टस्यात एव निरीहस्य यत्सुखं तत् कामस्य भोगस्य लोभेन वा अर्थस्य धनस्येहा तया दिशो धावतः कुतो न कुतोऽपि ॥ १६ ॥

भाषा टीका ।

कितने एक यज्ञ के परमवेत्ता ज्ञानीलोग, ज्ञान से दीपित आत्मसंयम रूप अग्नि में कर्ममय यज्ञों को हवन करते हैं, अर्थात् मन का नियमन कर कर, उसके विघ्न रूप कर्म की खटपट छोड केवल श्रीहरि ही में चित्त लगाते हैं ॥ ९ ॥

द्रव्य यज्ञ से यजन करने वाले को देखकर सब जीव बड़ा भय करते हैं, कि अब यह प्राण पोषक, निर्दयी, धर्म के तत्त्व को न जानने वाला, इन बिचारे दीन जीवों को मारेगा ॥ १० ॥

तस्मात् धर्म को जानने वाला, प्रारब्ध से प्राप्त जो मुनिअन्न उसी से सन्तुष्ट होकर दिन २ प्रति नित्य नैमित्तिक क्रियाओं को बनावे ॥ ११ ॥

विधर्म, परधर्म, आभास, उपमा, छल, ये पांच अधर्म की शाखायें हैं, इसलिये धर्मज्ञ पुरुष इन को अधर्म की तरह दूर से त्याग देवे ॥ १२ ॥

सदा सन्तुष्टमनसः सर्वाः सुखमया दिशः ।
शर्कराकण्टकादिभ्यो यथोपानत्पदः शिवम् ॥ १७ ॥
सन्तुष्टः केन वा राजन्न वर्तेतापि वारिणा ।
औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः ॥ १८ ॥
असन्तुष्टस्य विप्रस्य तेजो विद्या तपो यशः ।
स्रवन्तीन्द्रियलौल्येन ज्ञानं चैवाऽवकीर्यते ॥ १९ ॥
कामस्याऽन्तं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् ।
जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः ॥ २० ॥
पण्डिता बहवो राजन् ! बहुज्ञाः संशयच्छिदः ।
सदसस्पतयो ऽप्येके असन्तोषात्पतन्त्यधः ॥ २१ ॥
असङ्कल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् ।
अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥ २२ ॥
आन्वीक्षिक्या शोकमोहौ दम्भं (१) महदुपासया ।
योगान्तरायान्मौनेन हिंसां (२) कामाद्यनीहया ॥ २३ ॥
कृपया भूतजं दुःखं दैवं जह्यात्समाधिना ।
आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया ॥ २४ ॥

भाषा टीका ।

जो धर्म की बाधा करे वह विधर्म होता है, पराये का आचरण के लिये कहा हुआ धर्म परधर्म है । पाखण्ड अथवा दम्भ का नाम उपमा । है जिसको उपधर्म भी कहते हैं, जो शब्द के अर्थ का अनर्थ करने से सिद्ध हो, उसको छल कहते हैं ॥ १३ ॥

आभास उसे कहते हैं कि ? जो आश्रमधर्मों से पृथक पुरुषों ने अपनी इच्छा से कल्पन किया हो ॥ अर्थां जिस जाति वर्ण वा आश्रम को उन के स्वभाव से जो शास्त्र विहित धर्म है, वह धर्म किस मनुष्य को शान्ति नहीं दे सक्ता है ॥ १४ ॥

निर्धन पुरुष धर्मार्थ भी धन की प्राप्ति के लिये चेष्टा (उपाय) न करे, एवं देह यात्रा के लिये भी धन प्राप्त्यर्थ चेष्टा (उपाय) न करे, यह चेष्टा का न करना ही उस पुरुष को अजगर के तरह वृत्ति (जीविका) देने वाला है ॥ १५ ॥

निस्पृह सन्तुष्ट आत्मारामों को जो सुख है, काम के लोभ से धन की इच्छा से दशों दिशाओं को दौड़ने वाले पुरुष को वह सुख कहां से होगा ! ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपानहौ पादयोर्यस्य स उपानत्पात्तस्य ॥ १७ ॥

गृहपालः श्वा तद्वदाचरति ॥ १८ ॥ १९ ॥

क्षुधा तृषा च जनः कामस्यान्तं याति तद्बाधकातिरिक्तकामान्तराभावात् क्रोधस्य चाऽन्तं याति एतस्य क्रोधस्य यत्फलं हिंसा तदर्थोदयानन्तरं दिशो जित्वा ऽपि भुवं भुक्त्वा ऽपि लोभस्य नैवान्तं यातीत्यर्थः ॥ २० ॥ २१ ॥

इदानीं कामादिजयोपायानाह—असङ्कल्पादिति, चतुर्भिः । जयेदिति यथायोग्यमन्वेति अर्थे ऽनर्थदर्शनेन तत्त्वाऽवमर्शनाद्भेदाऽनुसन्धानेन ॥ २२ ॥

आन्वीक्षिक्या आत्मानात्मविवेकेन महतां सात्त्विकानां सेवया योगस्यान्तरायान् लोकवार्तादीन् ॥ २३ ॥

येभ्यो भूतेभ्यो भयं जायेत तेष्वेव कृपया हिताचरणेन दैवं देवोपसर्गनिमित्तं दुःखं मनःपीडादि तदुक्तं याज्ञवल्क्येन "विमना देवोपसर्गनिमित्तः" इति आत्मजं देहजम् । योगवीर्येण प्राणायामादिबलेन सत्त्वनिषेवया सात्त्विकाहारादिना ॥ २४ ॥ २५ ॥

(१) महदुपाश्रयात् (२) कामाद्यनीहया इति विज० पा० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैवोपनतया वार्त्तयाऽर्थेच्छायास्त्याज्यत्वमुक्तम् अथाऽसन्तोषस्य दुःखहेतुत्वं वक्तुं तावत् सन्तोषस्य सुखहेतुत्वमाह, सदेति । सदा सन्तुष्टं दैवादुपनतेनैव सन्तुष्टं मनो यस्य तस्य पुंसः सर्वा दिशः सुखमयाः यत्र क्वापि गतस्य तस्य सुखमेवेत्यर्थः । यथा उपानहौ पादत्राणे पादयोर्यस्य स उपानत्पात् तस्योपानत्पदः शर्करादिभ्योऽपि शिवं सुखमेव तद्वत् ॥ १७ ॥

हे राजन् ! सन्तुष्टमेतरको नु पुमान् वारिणापि न वर्तेत सन्तुष्टस्तु वारिणापि यात्रां विधाय सुखयतीत्यर्थः । असन्तुष्टस्तु जनः औपस्थ्य-जैह्व्यकार्पण्यादुपस्थजिह्वासुखार्थं वैभ्याभिमित्ताद् गृहपालायते गृहपालः श्वा तद्वत् आचरति ॥ १८ ॥

किञ्च ऽसन्तुष्टस्य ब्राह्मणस्य तेज आदयः क्षयन्ति तेजो ब्रह्मवर्चसं विद्या शास्त्रजन्यं ज्ञानं तप अनशनादिरूपं यशः प्रथा तथेन्द्रियलौल्येनेन्द्रियार्थासक्त्या ज्ञानं विवेकादिजन्यमवकीर्यते च विक्षिप्यते च अपगच्छतीत्यर्थः ॥ १९ ॥

किञ्च कामक्रोधादयः सावधिकाः लोभस्त्वसन्तोषात्मको निरवधिक इत्याह—कामस्येति । जनः कामक्रोधलोभवान् जनः क्षुत्तृड्भ्याम् निवृत्ताभ्यामिति शेषः । निवृत्ताभ्यां क्षुत्तृड्भ्यां निमित्तभूताभ्यां कामस्यान्तं याति अन्नोदकादिना क्षुत्पिपासादौ निवृत्ते सति अन्नादिव्यतिरिक्तकामान्तराभावात्कामस्यान्तं गच्छतीति भावः । तथा क्रोधस्याप्यन्तं तत्फलोदयात् तस्य क्रोधस्य यत्फलं परपीडादिरूपं तस्योदयान्निष्पत्तेः हतोयाति लोभस्यान्तं तु भुवो दिशो जित्वा भुक्त्वाऽपि नैव याति ॥ २० ॥

अत एव हे राजन् ! बहवः पंडिताः शास्त्रजन्यज्ञानवन्तः बहुज्ञाः बहुविधलौकिकवैदिकन्यायाभिज्ञाः अत एव संशयानां छेत्तारः तथा ऽत एव सदसः सभायाः पतयोऽप्येके जनाः असन्तोषाद्धेतोरधो नरके पतन्ति ॥ २१ ॥

एवमसन्तोषस्याऽनर्थावहत्वमुक्तम् अथ कामादीनां जयोपायामाह—असङ्कल्पादिति, चतुर्भिः । असङ्कल्पात्संकल्पराहित्येनाबुद्धिवर्जनात्कामं शब्दादिविषयस्पृहां जयेत् । क्रोधं तु कामविवर्जनाज्जयेदित्यनुषङ्गः । क्रोधः कामानुभावविरोधिविषयको ऽमर्षः लोभं त्वसन्तोषात्मकम् अर्थाऽनर्थेक्षया अर्थे धने ऽनर्थेक्षयाऽनर्थहेतुत्वदर्शनेन जयेत् । भयं तु तत्त्वावमर्शनात् चिदचिदीश्वरयाथात्म्यरूपतत्त्वयाऽनुसन्धानात् ॥ २२ ॥

आन्वीक्षिक्या—

"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि" ॥ इत्यादिपर्यालोचनयेत्यर्थः । जातस्य विनाशो ध्रुव इति पर्यालोचनया शोक मोहौ, दम्भन्तु. महतामहदादिभक्तानां ज्ञानिनामुपासनया सेवया. योगान्तरायान् योगस्यान्तरायभूतान्, लोकवार्तादींस्तु मौनेन. भूतहिंसां कायाद्यनीहया स्वदेहादिषु निस्पृहतया जयेत् ॥ २३ ॥

भूतजं दुःखमाधिभौतिकं दुःखं कृपया येभ्यो भूतेभ्यः स्वस्य दुःखं तेष्वेव कृपया दैवमाधिदैविकं दुःखं समाधिना, इदं प्रारब्धमेव किमस्माभिर्निषेधमित्येवं मनःसमाधानेन आत्मजं देहजमाध्यात्मिकं दुःखं योगवीर्येण योगबलेन प्राणायामादिना निद्रां सत्त्वनिषेवया सात्त्विकाहारसेवनेन जयात् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दुस्त्यजेषु विषयेषु सर्वतो दिशं जाग्रत्सु निष्कर्मेषु कथं सुखमुपलभ्यते ? इति तत्राह—सदेति "यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः" इत्यादेः एतमर्थं निदर्शयति—शर्करेति । शिवं सुखमाप्नोतीति शेषः । शर्कराः पाषाणशकलानि ॥ १७ ॥

अन्नार्जनायासाभावे ऽपि प्राणधारणार्थं पानीयादिप्रयत्नः स्यादेव "आपोमयाः प्राणाः" इति श्रुतेः । इति तत्राह—सन्तुष्ट इति । केन वा येन केनापि प्रयत्नमन्तरेणोपनतेन द्रव्येण लोकविलक्षणेन परमात्मना वा सन्तुष्टः विषयानभ्युन्मुखमान् वारिणा ऽपि न वर्तेतेत्यन्वयः । ननु, सर्वात्मना सर्वनिषेधस्य कोऽभिप्रायः ? इत्याशङ्क्य किञ्चिदभ्यनुज्ञाते महान्दोषः स्यादजवत्स्यन्दनवत् विधिविना स्वतन्त्रनजनस्य कार्पण्यवशेनाचेत्याह—औपस्थ्येति । गृहं पालयते ऽसौ गृहपालः सारमेयस्तद्वदाचरति—

"कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः ॥
क्षुधाक्रान्तो जीर्णो ह्यपि धरकपालार्पितगलः
शुनीमन्वेति श्वा हतमपि च हन्त्येव मदनः"

इत्यादेः ॥ १८ ॥

उक्तार्थोऽनङ्गीकारे बाधकमाह—असन्तुष्टस्येति । तेजः शापानुग्रहशक्तिः रेतोलक्षणं वा. विद्या शास्त्रविषया, ज्ञानं मनोत्थमखण्डं शास्त्रानुपेक्षि दीपज्वालानिभमवकीर्यते विक्षिप्यते शिलानिक्षिप्तपांसुपिण्डवन्नश्यतीत्यर्थः । 'कॄ विक्षेपे' इति धातोः कृष्णनिषाण्णाहतमेतुवत् सुडागमाभावः छान्दसः "अवकीर्णी क्षतव्रतः" इत्यभिधानम् असन्तुष्टस्य विषयानभ्युन्मुखेः ॥ १९ ॥

अन्नानभ्युन्मुखेर्भेदा विषयाणामुपर्युपरिभोगतृष्णोक्ता द्वितीया विभान्तनिभाणे तत्पर्याप्तं भवतीत्यतो न व्ययामि किन्तु राशीकरोमीत्याकाङ्क्षा तत्र प्रथमाया अलाभे कामः क्रोधश्च तयोरुभयोः शान्तिरनायाससाध्या द्वितीयाया लोभाऽपरपर्यायाया नाशो दुःसाध्य इत्याह—कामस्येति । जनोक्फुरिताभ्यां क्षुत्तृड्भ्यां कामस्योपस्थादिविषयतृष्णापरपर्यायस्यान्तं नाशं याति कुत इत्यत उक्तं हीति "विषया विनिवर्तन्ते निराहारस्य देहिनः" इति स्मृतेः प्रसिद्धेः एतत्फलोदयात् एतयोः क्षुत्तृषोर्ग्रासपानलक्षणभोगाभ्यां तृप्तिलक्षणफलोत्पत्तेः तल्लाभोत्पन्नस्य क्रोधस्य च शान्ति याति. दिशो जित्वा भुवो भुक्त्वा ऽपि लोभस्यान्तं यागाद्युपाधिना वित्तव्ययेच्छालक्षणं न यातीत्यन्वयः ॥ २० ॥

ननु, बहुत्यागेन वित्तव्ययेन स्वयं नष्टः स्यात्

"अल्पमारभ्य यो मोहाद्विस्तारं कर्तुमिच्छति
स विनश्यति दुर्मेधा नारिकेलाम्बुकं यथा"

इति वचनात् तस्माल्लोभो महान्गुणो देहयात्राहेतुत्वादित्यत्राह, पण्डिता इति । पाण्डित्यं नाम सभाकम्पादिदोषराहित्यं तत्पूर्वस्यापि किं न स्यादित्यत उक्तं, बहुज्ञा इति । सर्वज्ञं षड्दीपप्रमावदेत्याह—संशयच्छिद इति । एवंविधधर्मवन्तः क इति तत्राह, सदस-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ष्वनय इति । पुत्रादयश्च केनेत्याह-एक इति । एवंविधा अपि-असन्तोषाल्लोभादयः कीदृशा दिग्विजयिनो पतन्तीति यस्मात्तस्मादर्थेषु-विषय एव लोभो मुख्यो न तु वैष्णवविषय इति भावः।एके असन्तोषादिति सम्बन्धकार्याभावो यदि तर्हि इति पदद्वयाध्याहारसूचनार्थः यदि त्रैविधा असन्तोषायया योग्यं यथालब्धद्रव्यं यथापात्रं न नियुङ्क्ते तर्हि चः पतन्तीत्यभ्युपगमसिद्धान्तो ऽयं न केवलमनन्तुष्टस्य विद्यादि नाशो ऽपि स्वधः पातः स्यादित्यतो वाह-पण्डिता इति ॥ २१ ॥

इदानीं कामादिजयोपायमाह-असङ्कल्पादिति।अत्र सङ्कल्पो ऽपि द्विविधः पुण्यविषयःपापविषयश्चेति अत्रासङ्कल्पात्पापविरुद्धपुण्यविषयादित्यर्थः। कामात् निषिद्धात् क्रोधः कामितालाभकारणकः कारणनाशेन कार्यनाश इत्यर्थः। अनर्थकार्यस्य लोभस्य नाशः केनेति तत्राह-अर्थेति। अर्थेषु राजादिनिमित्तानर्थदर्शनेनासद्व्ययो अनर्थफलहेतुरिति निरीक्षणेन च तत्त्वावमर्शनात् तत्त्वज्ञानाद्भयं वैष्णवसिद्धान्तसञ्जननम्"भी भयसञ्चलनयोः"इति धातुः ॥ २२ ॥

शोकमोहौ देहगताऽन्तःकरणस्यैव नान्यस्य ज्ञातानन्दस्वरूपस्या ऽसम्भवात् इत्यादिकया आन्वीक्षिक्या अनुकूलतर्कोपेतश्रुतिज्ञानेन आत्मन्यविद्यमानमहिमारोपो दम्भः महतां मायर्यादिगुणाकाराणां आत्मस्तुतिवर्जितानां पुरुषाणां निरन्तरनिषेवया सद्गुणाऽभ्यास लक्षणया योगान्तरायान् भगवदुपासनाविघ्नान्मौनेन सम्भाषणवर्जनेन जयेदिति शेषः। कामाद्यनीहया कामादिनिषिद्धेच्छारहितत्वेन विषादलक्षणां हिंसां जयेद् इत्यन्वयः ॥ २३ ॥

भूतजं भौतिकं दुःखमुन्मादादिकं वा कृपया मन्त्रौषधसामर्थ्येन 'कृपू सामर्थ्ये' इति धातुः अनुकम्पालक्षणगुणेन वा दैवमाधिदैविकं दुःखं समाधिनेन्द्रादिदेवताध्यानेन"यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट् करिष्यन्, "कारीर्या यजेत वृष्टिकामः"इति श्रुतेः। अनावृष्ट्यादिदुःखं जह्यात् क्षीरसागरतरङ्गसीकराप्लुतश्रीनारायणध्यानेन वा आत्मजमाध्यात्मिकं दुःखं योगवीर्येण अष्टाङ्गसामर्थ्येन पवनवशीकरणेनेत्यर्थः। सत्त्वनिषेवया सात्त्विकपुरुषनिषेवया निद्रामज्ञानम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सन्तुष्ट इति । केन वा न वर्तेत अपितु वारिणाऽपि वर्तेतेत्यर्थः ॥ १८–२१ ॥

असङ्कल्पादिति युग्मकम्। तत्त्वावमर्शेन परमेश्वराश्रितताविचारेण. कृपयेति सार्धकम् ॥ २२—२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उपानहौ पादयोर्यस्य स उपानत्पात् तस्य ॥ १७ ॥

केन वा न वर्तेत अपितु वारिणापि वर्तेतेत्यर्थः । उपस्थस्य कर्म औपस्थ्यं तत्र कार्पण्यात् गृहपालः श्वा ॥ १८ ॥

अवकीर्यते भवः क्षिप्तं भवति ॥ १९ ॥

असन्तोषो हि लोभमूलको भवति लोभस्य तु दुर्जयत्वादसन्तोषो दुर्वार इत्याह-कामस्येति, द्वाभ्याम् । क्षुत्तृड्भ्यामिति भोज्यवस्त्वाभ्यां क्षुत्तृषोरतिदीप्तत्वे धातुदाहप्रवृत्तेरिति भावः । एवमेव क्रोधस्य यत्फलं हिंसा तस्योदयाभिप्रायः द्विषो जित्वाऽपि भुवो भुक्त्वापि लोभस्य वासनात्मकत्वात्तं न प्राप्नोति अयविषयकलोभस्य तु दुरन्तत्वैव शान्तिरिति दुरुपशमत्वाभावात्तस्यासौ पृथङ्निर्देशः ॥ २० ॥

लोभप्राबल्ये गुणानां वैयर्थ्यमाह—पण्डिता इति ॥ २१ ॥

तर्हि कथमेतान् जयेत ? इत्यपेक्षायामाह—असङ्कल्पात् स्त्रीस्मरणादिना कामोत्पत्तावपि नैव स्त्री मया सम्भोक्तव्येति सङ्कल्पस्य त्यागनिश्चयात् कामं जयेत् सारद्ये नम् यथाप न भोक्ष्यामीति निश्चये सत्युपवासादौ क्षुत्पिपासाजयः कामविवर्जनात् काम इच्छाविषयः कोऽपि न हिंसनीय इति (जिघांसा नैव कार्येति) हिंसेच्छावर्जनात् क्रोधं जयेत्. अर्थे लोभ्ये वस्तुनि प्राप्त्याननर्थदर्शनाऽभ्यासाल्लोभं तत्त्वावमर्शनात् प्रारब्धफलस्यावश्यभोग्यत्वेन कः कस्य दुःखहर्तेत्यादितत्त्वविचारात् आन्वीक्षिक्या आत्मानात्मविचारेण ॥ २२ ॥ २३ ॥

येभ्यो भूतेभ्यो दुःखं जायेत तेष्वेव कृपया हिताचरणेनेत्यर्थः। दैवं देवोपसर्गनिमित्तदुःखमनःपीडादि। तदुक्तं याज्ञवल्क्येन "विमना विफलारम्भः संसीदत्यनिमित्ततः" इति समाधिना भगवति चित्तैकाग्र्येण आत्मजं देहोत्थं दुःखं योगवीर्येण प्राणायामादिबलेन सत्त्वनिषेवया सात्त्विकाद्याहारादिना प्राणिमात्रपरिचर्यया वा रजस्तमसी सत्त्वेन सत्त्वाधिक्येन सत्त्वं च उपशमेन तत्कार्यौदासीन्येन ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उपानहौ पादयोर्यस्य सः उपानत्पात्तस्य शिवमयाः कण्टकाद्यप्रचुराः ॥ १७ ॥

सन्तुष्टः वारिणा अपिशब्दाच्छाकादिना केन वा"कं ब्रह्म"इति श्रुतेः। विश्वंभरेण भगवता वा न वर्तेत न जीवेत अपितु जीवेतैवेत्यर्थः। असन्तुष्टो जनस्त्वौपस्थ्यजैह्वययोः शिश्नरसनसुखयोः कार्पण्यात् गृहपालायते गृहपालः श्वा तद्वदाचरति ॥ १८—१९ ॥

भयोद्रेकातिरिक्त कामान्तरा ऽभावात् एतत्फलोदयात्क्रोधस्य यत्फलं जयपराजयादि तदुदयात् ॥ २०—२१ ॥

कामादिजयोपायं दर्शयति-असङ्कल्पादित्यादिना। भयं संसारभयं तत्त्वावमर्शनात् तन्निवर्तकभगवज्ज्ञानादित्यर्थः ॥ २२ ॥

आन्वीक्षिक्या आत्मानात्मविवेकेन योगस्य ध्यानस्य अन्तरायान् निष्फलवादादीन् ॥ २३ ॥

कृपया भूतहिताचरणेन दैवं समाधिना पञ्चदेवाभिनिवेशेन आत्मजं मनो भवं योगवीर्येण चित्तैकाग्र्यबलेन ॥ २४ ॥

रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च ।
एतत्सर्वं गुरौ भक्त्या पुरुषो (१) ह्यञ्जसा जयेत् ॥ २५ ॥
यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ ।
मर्त्याऽसद्धीः श्रुतं (२) तस्य सर्वं कुञ्जरशौचवत् ॥ २६ ॥
एष वै भगवान् साक्षात् प्रधानपुरुषेश्वरः ।
योगेश्वरैर्विमृग्याङ्घ्रिर्लोको (३) वै मन्यते नरम् ॥ २७ ॥
षड्वर्गसंयमैकान्ताः सर्वा (४) नियमचोदनाः ।
तदन्ता यदि नो योगानावहेयुः श्रमावहाः ॥ २८ ॥
यथा वार्त्तादयो (५) ह्यर्था योगस्यार्थं न बिभ्रति ।
अनर्थाय भवेयुस्ते पूर्त्तमिष्टं तथाऽसतः ॥ २९ ॥
यश्चित्तविजये यत्तः स्यान्निःसङ्गोऽपरिग्रहः ।
एको विविक्तशरणो भिक्षुर्भैक्ष्यमिताशनः ॥ ३० ॥
देशे शुचौ समे राजन् ! संस्थाप्यासनमात्मनः ।
स्थिरं समं सुखं तस्मिन्नासीतर्ज्वङ्ग ओमिति ॥ ३१ ॥
प्राणापानौ सन्निरुन्ध्यात्पूरकुम्भकरेचकैः ।
यावन्मनस्त्यजेत्कामान् स्वनासाग्रनिरीक्षणः ॥ ३२ ॥

भाषा टीका ।

सदा ही सन्तुष्ट मन वाले को सब दिशायें आनन्द से भरी हुई हैं । जैसे कि? पगरखी (जोडी) पहिरने वाले को कांकर कंटक आदि से कभी कुछ भी दुःख नहीं ॥१७॥

हे राजन्! संतोषी पुरुष तो जलमात्र से भी संतोष कर कर रहसक्ता है, और उपस्थ इन्द्रिय और जिह्वा की दीनता से पुरुष श्वान के समान घर २ से अपमान का पात्र होता है ॥ १८ ॥

असन्तुष्ट ब्राह्मण के इन्द्रियों की चपलता से, तेज, विद्या, तप, यश, और ज्ञान, ये सब अवकीर्ण (नष्ट) हो जाते हैं ॥१९॥

काम का अंत अर्थात् नाश तो भूख प्यास से होजाता है, जिसके लिये क्रोध किया जाय उस फल के होने पर क्रोध भी नष्ट हो जाता है, परन्तु मनुष्य दशों दिशाओं को जीतकर सब पृथिवी का राज्य भोगकर भी लोभ के अंत को नहीं पहुंचता है ॥२० ॥

हे राजन्! बडे २ पंडित लोग बहुज्ञ और संशय के छेदन करने वाले कितने एक सभापति लोग भी सन्तोष के न होने से अधः पात को प्राप्त होते हैं ॥ २१ ॥

मन में सङ्कल्प के न करने से काम को जीते, और काम के वर्जन से क्रोध को जीते, धन में अनर्थपने की दृष्टि से लोभ को जीते, और तत्त्व विचार करने से भय को जीत लेवै ॥ २२ ॥

ब्रह्मविद्या के विचार से शोक और मोह को, महात्माओं की सेवा करने से दम्भ को, योग के विघ्नों को मौन धारण करने से, और शरीर की चेष्टा न करने से हिंसा को जीत लेवै ॥ २३ ॥

जिनप्राणियों से अपने को दुःख होता हो, उनपर कृपाकरे, अर्थात् यों विचारले कि? ये गरीब आपही दैवी माया के वश होकर हमको दुःख देतेहैं, ये क्या स्वाधीन थोड़े हैं, बस इस विचार से भूतज दुःखको जीतलेवै, समाधि से दैविक दुःखको जीतलवे, और अपने से होनेवाले दुःख को योग के बल से जीत लेवे, तथा सत्त्व के सेवन से निद्रा को जीतलेवे, अर्थात् सात्त्विक भोजनादि से निद्रा न्यून हो जावेगी ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, कथं गुरौ भक्त्या सर्वस्य जयः स्यात्? तस्याऽपि मनुष्यत्वेन तदवस्थत्वात्तत्राह—यस्येति । मर्त्योऽसन्धीर्मनुष्य इति दुर्बुद्धिः तस्य शास्त्रश्रवणं कुञ्जरस्नानवद्व्यर्थम् ॥ २६ ॥

ननु, गुरोरपि पुत्रादयस्तं नरमेव मन्यन्ते अत आह—एष गुरुः

(१) मनसा (२) अभिसन्धिः श्रुतः (३) संमन्यते (४) निगमचोदनाः (५) विद्या इत्येवं विजयध्वजपाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका।

साक्षाद्भगवानेव भवेत् लोकस्य नरो ऽयमिति बुद्धिर्मोहनिरित्यर्थः। यद्वा नहि तत्पुत्रादेर्मनुष्यबुद्ध्या प्रतीयमानो ऽपि गुरुर्भगवानेव भवेत् यथैव श्रीकृष्ण इत्यर्थः॥ २७॥

एवं सर्वैरुपायैः कामादिवेगं जित्वा नियतेन्द्रियो भूत्वा ध्यानपरो भवेत् अन्यथा तं प्रति सर्वेषामाश्रमाणां वैफल्यं स्यादित्याह—षड्वर्गेति। सर्वा अपि नियमचोदना इष्टापूर्तादिविषयाः षडिन्द्रियवर्गस्य यः संयमस्तस्मिन्नेवैकस्मिन्नन्तो यासां तदेकपरा इत्यर्थः। नच तावताऽपि चरितार्था इत्याह—तदन्ताः सत्यो ऽपि यदि योगान्धारणाध्यानसमाधीन्नो आवहेयुर्न साधयेयुस्तर्हि केवलं श्रमावहा एवेत्यर्थः॥ २८॥

एतदेव दृष्टान्तेनाह—यथा वार्तादयः कृष्यादयो ऽर्थास्तत्फलानि च योगस्यार्थं मोक्षं न साधयन्ति प्रत्युताऽनर्थाय संसारायैव असतो बहिर्मुखस्येष्टापूर्तादयपि तथा॥ २९॥

एवं योगं युञ्जतो ऽपि यस्य कुटुम्बादिसङ्गेन चित्तं विक्षिप्येत तस्य कृत्यमाह—यश्चित्तस्य विजये यत्त उद्युक्तः स भिक्षुः स्यात् सन्न्यसेत् तथाच स्मृतिः—

"ध्यानाहतस्य गार्हस्थ्यं ध्यानभङ्गादिकारणम्।
लक्षयित्वा गृही स्पष्टं संन्यसेदविचारयन्" ॥ इति

भिक्षया प्राप्तं मितमशनं यस्य सः॥ ३०॥

ऋजुः समः अङ्गं यस्य सः सुखं यथाभवत्येवमासीत ओमित्युच्चारयन्निति शेषः॥ ३१॥ ३२॥ ३३॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

रजस्तमश्च सत्त्वेन सात्त्विकाहाराद्युपजातसत्त्वगुणाभ्यासस्वमन्तःकरणमुपशमेन तृष्णाजननमुखेन एतदुक्तं कामादिरूपं सर्वं पुरुषो गुरौ भक्त्या त्वञ्जसा सुखेनैव जयेत्॥ २५॥

गुरुभक्त्यभावे सर्वं कामादिजयात्मकं व्यर्थमित्याह—यस्येति। साक्षाद्भगवति "आचार्यं मां विजानीयात्" इत्युक्तरीत्या भगवदभिन्नत्वेन दर्शनीये ज्ञानमेव दीपस्तत्प्रदे महोपकर्तरि गुरौ यस्य पुंसो मर्त्यबुद्धिः 'सोऽपि मादृश एव कश्चिन्मर्त्यः' इति बुद्धिस्तस्य श्रुतमध्ययनं सर्वं कामादिजयादिकञ्च कुञ्जरशौचतुल्यं यथा कुञ्जरस्य स्नानं पुनर्धूलिप्रक्षेपेण कृतमप्यकृतं तद्वत् इत्यर्थः॥ २६॥

गुरोर्भगवत्त्वं श्रीकृष्णदृष्टान्तेनाह—एष इति। एष श्रीकृष्णः साक्षात्प्रकृतिपुरुषयोरीश्वरो ऽत एव योगेश्वरैरस्मदादिभिः विमृग्यौ ध्येयौ अङ्घ्री पादौ यस्य स भगवानेव नात्र सन्देहः एवं भूतमपि यं श्रीकृष्णं नरं मन्यते तत्स्वरूपाऽनभिज्ञो लोकस्तथा गुरुयाथात्म्याऽनभिज्ञस्तं नरं मन्यते तद्याथात्म्यविन्तु साक्षाद्भगवन्तं मन्यत इत्यर्थः॥ २७॥

एवं गुरुभक्त्यभावे सर्वं विफलमित्युक्तम् अथावश्यकानां सर्वेषां वर्णधर्माणामाश्रमधर्माणां चेन्द्रियजयार्थत्वं तन्मात्रे तदेकपर्यन्तमिन्द्रियजयपर्यन्तानामपि तेषां भगवदुपासनात्मकयोगनिष्पादकत्व एव साफल्यमन्यथा वैफल्यं चाह—षड्वर्गेति। सर्वा नियमचोदनाः वर्णाश्रमानुगुणाऽऽवश्यकधर्मनियमविधयः चोदनाशब्देन चोद्यमुपलक्ष्यते चोदिता धर्मा इत्यर्थः। यद्वा नियमस्य चोदनाः येषु ते धर्माः। षड्वर्गः मनः पर्यन्तषडिन्द्रियवर्गः तस्य संयमो नियमः तदेकान्ताः तदेकप्रयोजना इत्यर्थः। अन्यथा तेषां वैफल्यमेवेति भावः। तदन्ताः षड्वर्गनियमपर्यन्ता अपि यदि योगान् योगावयवान् धारणाध्यानसमाधीन्नावहेयुर्न साधयेयुस्तर्हि केवलं श्रमाऽऽवहा एवेत्यर्थः॥ २८॥

एवमावश्यकधर्माणामिन्द्रियजयद्वारा योगावहत्वमेव साफल्यमन्यथा केवलश्रमफलकत्वञ्चोक्तम् अथ वृत्तिधर्माणामपि योगप्रयोजकत्वाभावे वैयर्थ्यं प्रत्युतानर्थावहत्वं तैः सहावश्यकानामपि वैयर्थ्यं चाह—यथेति। वार्त्तादयो ऽर्थाः वृत्तेर्जीवनस्येमे वार्त्ताऽर्थाः याजनादयः यदा योगस्यार्थे न बिभ्रति योगानुष्ठानैकप्रयोजनं जीवनं न बिभ्रति न पुष्णन्ति न कुर्वन्ति तदाऽनर्थाय नैरर्थक्याय भवेयुः असदर्थव्ययरूपानर्थाय भवेयुरिति वा तथासतस्तथा वर्तमानस्य वार्त्तानर्थान्योगैकप्रयोजनजीवनमात्रोपयुक्तान् कुर्वतः पुरुषस्य पूर्त्तं स्मार्त्तं कर्म इष्टं यागादिकं वैदिकं कर्म चानर्थकाय भवेताम्॥ २९॥

सर्वेन्द्रियजयपर्यन्तवर्णाश्रमधर्मकामादिजयनिष्ठस्य भगवद्भक्तियोगानुष्ठानप्रकारमाह—य इत्यादिना। यः पुमान् चित्तस्य विजये यत्त आयत्तो दक्षः स्यात् तर्हि निःसङ्गस्त्यक्तकलत्रपुत्रादिसङ्गोऽपरिग्रहः शरीरमात्रावशेषितः भिक्षुस्तुर्याश्रमी भूयात् भिक्षुर्भूत्वा चैकोऽसहायः विविक्तशरणः निर्जनदेशाऽऽश्रयिनः भैक्षं भिक्षया लब्धं मितं चाशनमन्नं यस्य भैक्षं मितं चादनातीति वा कर्तरि ल्युः॥ ३०॥

शुचौ परिशुद्धे समेऽनिम्नोन्नते च देशे हे राजन्! आत्मनः स्वस्यासनं "चैलाजिनकुशोत्तरम्" इत्युक्तविधमारचय्य स्थिरं चाञ्चल्यरहितं सुखं च यथा भवति तथा तस्मिन्नासने आसीत उपविशेत् ऋज्वङ्गः ऋज्ववयवकमङ्गं यस्य ऋजुकायः सन्नोम् इत्यनुसन्दधदिति शेषः॥ ३१॥

पूरकुम्भकरेचकैः प्राणाऽपानौ वायू मरुद्ग्रहणत्यागपातेन प्राणाभिमुखो रेचकः प्राणस्यापानाभिमुखः पूरकः उभयोः समानः कुम्भकः यावन्मनः कामान् शब्दादिविषयांस्त्यजेत् ताऽनुसन्दधीत तावत् स्वस्य नासाया अग्रं निरीक्षत इति निरीक्षणः कर्तरि ल्युः॥ ३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सत्त्वगुणेन रजस्तमसी उपशमेन भगवत्सिध्या सर्वत्राऽपि भगवद्भक्तिरेव प्रयोजिकेत्याशयेनाह—एतादिति॥ २५॥

विपक्षे बाधकमाह—यस्येति। अभिसन्धिरतिक्रमणं भक्त्यनुसन्धानराहित्यं अवज्ञेति यावत्॥ २६॥

कथमवज्ञाप्रकारः? इति तत्राह—एष इति। एष एवंविधमाहात्म्यो-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वेतो श्लोकौ * यं नरं सुखदुःखभोक्तारं मन्यत इत्येवमवज्ञाप्रकार इत्यर्थः ॥ २७ ॥

ननु, हरेः प्रकृतिनिलीनत्वेन मरत्वं सम्भाव्यते "तुच्छ्येनाभ्वपिहितं यदासीत्प्रकृतौ लीनः संसारमेति स च त्यक्त्वाभवत्" इति श्रुतेः । इति तत्राह-षड्वर्गेति । सर्वा निगमचोदनाः "सन्ध्यामुपासीत" इत्यादिवेदविधयोऽपि हरौ भक्तियोगं न कुर्युस्तर्हि श्रमावहाः क्लेशहेतव एवेत्यन्वयः । श्रमावहन्ति चेत्कथंकारमित्यत उक्तं षडिति, षडिन्द्रियाणां संयमो विषयाद्व्याहृत्य हृषीकविषयीकरणावशत्वा तस्मिन्नेवैकान्तो निश्चयेन तात्पर्यं यासां ताः तथाऽन्यत्रतात्पर्यं किञ्च स्यादिति तत्राह-तदन्ता इति । तस्य भक्तियोगस्यान्तो निर्णयो यासां तास्तथा यथा षड्वर्गसंयमैकान्ताः सर्वाः । निगमचोदनाः तदन्ता निगमा यदि योगं नो आवहेयुरिति वा ॥ २८ ॥

इष्टापूर्तादिना पुरुषस्य पुरुषार्थसम्भवेन तद्विधायिवेदः पूर्णार्थो लभत इत्यतो वेदस्य श्रमावहत्वं कथम् ? अत्राह-यर्थेति । यस्य पुंसो या वार्तादयो विद्यास्ता अर्थं न विधाति प्रत्युतानर्थाय भवेयुश्च तथा ऽसतस्तस्य पूर्तमिष्टं चार्थं न विधत्त इत्यन्वयः पूर्तादेरनित्यफलहेतुत्वेन निन्दितत्वात् तदर्थविधायित्वं वेदस्य जुगुप्सितम् अनर्थावधाने श्रमावहत्वं प्रकटमित्यर्थः । "इष्टापूर्तं मन्यमाना वरिष्ठम्" इत्यादिश्रुतेः ॥ २९ ॥

* यदि नो योगमित्यत्र योगशब्देन ध्यानं चोच्यते तदा तद्ध्यानं ध्येये मनो निधायोपासनापरपर्यायं भवेत्तत्र जवचरस्थैर्यान् स्थानस्य मनसो जयेन सफलं स्यात्तस्तदुपायमाह-यश्चित्तेति । यश्चित्तविजयेच्छुः स्यात्स ओमिति मन्त्रमुच्चार्य तस्मिन्नासीतेत्यन्वयः । तद्विजयोपायमाह-निःसङ्ग इति । निःसङ्गत्वं कथम् ? अत्राह-निष्परिग्रह इति । तत्फलमेक इति एकस्यापि स्वजनरहितस्य जनानामध्यस्थितस्य नानावार्ताश्रवणेन विक्षिप्तस्य पुंसो मनोजयः कथमुपपद्यते ? इत्यत उक्तं विविक्ते एतदपि गृहस्थस्य न घटत इत्यत उक्तं, भिक्षुरिति । तस्याप्यशनचिन्तया द्वितीयापेक्षमोक्तं न युक्तमित्यत उक्तं, भैक्ष्येति । भैक्ष्यमपि बहुसम्पन्नं न योगोपयोगि स्यादित्यत उक्तं मितेति ॥ ३० ॥

ऋजवङ्गः समीकृतकायशिरोग्रीवः ॥ ३१—३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उपशमेन निवृत्यात्मकेन सत्त्वेन एतद्विज्ञक्रम् । श्रुतिश्च । "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति । अतो ब्रह्मवैवर्ते "गुरुभक्त्या स मिलति स्मरणात् सेव्यते बुधैः । मिलितोऽपि न लभ्येत जीवैरहमिकापरैः" इति । पाद्मे देवद्युतिस्तुतौ "भक्तिर्यथा हरौ मेऽस्ति तद्वरिष्ठा गुरौ यदि । ममाऽस्ति तेन सत्येन स्वं दर्शयतु मे हरिः" इति ॥ २५ ॥

मर्त्योऽसद्धीरिति । अत एवोक्तं आचार्यैः । "अर्च्ये विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिर्विष्णोर्वा वैष्णवानां कलिमलमथने पादतीर्थेऽम्बुबुद्धिः । श्रीविष्णोर्नाम्नि मन्त्रे सकलकलुषहे शब्दसामान्यबुद्धिर्विष्णौ सर्वेश्वरेशे तदितरसमधीर्यस्य वा नारकी सः" इति ॥ २६ ॥

न चेदं श्लोकेष्वयमर्थः साक्षाद्भगवति तथा गमनमित्याह, एष इति ॥ २७—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अञ्जसा शीघ्रमायासमात्रेण सर्वं जयेत् सर्वरोगोपशमनमुख्यमेकमेव महौषधमित्यर्थः । अत्र कामादिजयो ज्ञानिनां गुरुभक्तेरनुसंहितं फलं शुद्धभक्तानां त्वानुषङ्गिकमिति विशेषो द्रष्टव्यः ॥ २५ ॥

किञ्च मत्यां भूयस्यामपि भक्तौ गुरौ मनुष्यबुद्धिस्तत्र सर्वमेव व्यर्थं भवतीत्याह—यस्येति । साक्षाद्भगवतीति भगवदंशबुद्धिरपि गुरौ न कार्येति भावः । यद्वा उपास्ये भगवत्येव साक्षाद्विद्यमाने मर्त्योऽसद्धीः मर्त्यं इति दुर्बुद्धिस्तस्य श्रुतं भगवन्मन्त्रादिकं शास्त्रादिकं श्रवणमननादिकं च व्यर्थमित्यर्थः ॥ २६ ॥

ननु, गुरोः पितृपुत्रादयः प्रतिवेशिनश्च तं नरमेव मन्यन्ते कथमेक एवायं शिष्यस्तं परमेश्वरं मन्यताम् ? अत आह—एष इति, भगवान् यदुनन्दनो रघुनन्दनो वा वै निश्चितमेव प्रधानपुरुषयोरीश्वरः यं लोकस्तदवतारकालोत्पन्नो जनः नरं मन्यते तेन किं स नरो भवति ? अपितु परमेश्वर एवेत्येवं गुरुरपीति भावः ॥ २७ ॥

किञ्चः य कामादिजयो गुरुभक्त्या साध्यते स एव सर्वशास्त्रोक्तनानासाधनानामपि वास्तवं फलमित्याह—षड्वर्गेति-सर्वा अपि नियमचोदना इष्टापूर्तादिविधयः षडिन्द्रियवर्गस्य यः संयमः स्तस्मिन्नेवैकस्मिन्नन्तो यासां तदेकपरा इत्यर्थः । ननु, च यथा गुरुभक्त्या कामादयो जीयन्ते भगवानपि प्राप्यते "तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया" इति "तस्मै तथा भवाय च" इति च भगवदुक्तेः तथा नियमचोदनाभिः षड्वर्गसंयमः साध्यते । भगवान् लभ्यते न वा तत्राह—तदन्तास्तदेकपरत्वादेव योगात् भगवद्ध्यानादीन् न आवहेयुः न साधयेयुः कुतो भगवन्तं प्रापयेयुरित्यर्थः । यदि च नावहेयुस्तर्हि श्रमावहा एवाऽत्र कः सन्देह इति भावः ॥ २८ ॥

एतदेव दृष्टान्तेनाह—यथा वार्तादयः कृष्याद्योऽर्थो भोग्यानर्थान् साधयन्तोऽपि योगस्यार्थे मोक्षं न साधयन्ति यदि च मोक्षं न साधयन्ति तदा ते अनर्थाय प्रयोजनाभावायैव भवेयुस्तथैव असतो भगवदभक्तस्य इष्टापूर्तादि विफलायैव ॥ २९ ॥

तदेवं गृहस्थस्यापि कामादिजयो मोक्षप्रकाशकः यस्य तु कुटुम्बादिसङ्गदोषेण कामादिजयो यतमानस्याऽपि न स्यात् स तु निःसङ्गो भिक्षुरेव स्यादित्याह—य इति । यतो यत्नवान् स भिक्षुः स्यात् तथा च स्मृतिः—

* इतिम । * यथाविधश्लोकद्वयप्रतीकम् ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

"कुम्भाहतस्य नाशः स्यद् ध्यानभङ्गादिकारणम् ।
कुर्यात्स्वा गृहीं स्पष्टं संम्यसेदांवधारयन्" ॥

इति ऋजु समग्रं यस्य सः ओमिति समुच्चारयन्निति शेषः ३०-३१ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उपशमेनोपशाम्त्या एतत्कामादिकं सर्वं गुरौ भक्त्या ॥ २५ ॥

उक्तार्थं असम्भावनादिदोषनिवृत्तये श्रीगुरौ मानुषभाववतः सर्वशास्त्रश्रवणादि निरर्थकमेवेति वदन् श्रीगुरोर्माहात्म्यमाह-यस्येति, द्वाभ्याम् । अयं मर्त्यो मनुष्य इत्यमङ्गीर्यस्य तस्य श्रुतमित्युपलक्षणम् जपतप आदि कुञ्जरशौचवन्निष्फलं भवति २६

एष श्रीगुरुरूपी साक्षात् भगवान् श्रीकृष्ण एव लोकः अयं जनः नरं मन्यते तस्याभाग्यमिति भावः ॥ २७ ॥

अथ सर्वे उपायाः भगवत्प्राप्तिसाधनानां ज्ञानभक्त्यादीनां योगानामुत्पादका यदि न स्युस्तर्हि कृष्यादिवज्जीवनोपायतया संसारपर्यवसायिन एव न मुक्तिपर्यवसायिन इत्याह—षड्वर्गेति, द्वाभ्याम् । सर्वा अपि नियमचोदना इष्टापूर्तादिविधयः षडिन्द्रियवर्गस्य यः संयमस्तस्मिन्नेवैकं साध्यभूते साधनतयाऽन्तः पर्यवसानं यासां ताः तदन्ताः स षड्वर्गः अन्ते अग्रे यासां ताः स्वफलेन षड्वर्गसंयमेन सहिता इत्यर्थः । यदि योगान् मुक्त्युपायान् नावहेयुर्न साधयेयुस्तर्हि श्रमावहाः संसारप्रदा एव ॥ २८ ॥

यथा वार्त्तादयः कृष्यादयः अर्थास्तत्फलानि च योगस्य ज्ञानवैराग्यभक्तिरूपस्य अर्थं मोक्षं न बिभ्रति ज्ञानाद्युत्पादनद्वारा मोक्षं न साधयन्ति, प्रत्युत अनर्थाय शिश्नोदरपर्यवसायितया संसाराय भवेयुः तथा असतो हरिविमुखस्य पूर्त्तादिकम् ॥ २९ ॥

मुमुक्षुर्गृहे तिष्ठन्नुक्तरीत्या कामादिविजयेन नामाभिधमसाध्यषड्वर्गसंयमेन साधितैर्ज्ञानभक्त्यादियोगैर्मुक्तः स्यादपि कुटुम्बादिसङ्गेन सर्वसाधनमूलभूतमनोनिग्रहो दुष्करस्तर्हि गृहात्परिव्रज्येदं कुर्यादित्याह—य इति, षड्भिः । यश्चित्तविजये यत्तः उद्युक्तः भिक्षया प्राप्तं मितमल्पमशनं यस्य सः दण्डादिलिङ्गयुक्ततया—

"ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः ।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" ॥

इति भगवदाज्ञया आश्रमलिङ्गादिपरित्यागेन वा भागवतो भिक्षुः स्यात् यतिर्भवतु ॥ ३० ॥

हे० राजन् ! शुचौ देशे पवित्रस्थाने आसनमास्थाय ऋज्वङ्गः समकायशिरोग्रीवः सुखं यथा भवत्येवमासीन ओमित्युच्चारयन्निति शेषः । प्राणापानौ सन्निरुन्ध्यादित्यग्रिमेण सम्बन्धः ॥ ३१ ॥

पूरकादिभिः प्राणापानौ संनिरुन्ध्यात् प्राणायामं कुर्यात् तदवधिमाह—यावन्मनः कामान् त्यजेदिति ॥ ३२ ॥

———

भाषा टीका ।

रज और तम को सत्व से जीते, उपशांति से सत्व को भी जीते. और पुरुष इन सबों को गुरुके विषे भक्ति करने से तो अनायास ही जीत सका है ॥ २५ ॥

जिस पुरुष की साक्षात् भगवत् स्वरूप ऐसे, ज्ञानदीपप्रद गुरु में खोटी मनुष्यपने की बुद्धि है, उसका सब श्रुत (वेदादिका सुनना) कुञ्जर शौचवत्, है अर्थात् हाथी के स्नान तुल्य है ॥२६॥

नारद जी सभा में बैठे हुए श्रीकृष्ण को लक्ष्य कर गुरु के विषें दृष्टान्त देने को बोले, कि हे राजन् ! ये जो तुमारी सभा में मनुष्याकार से बैठे हुए श्रीकृष्ण हैं, ये मनुष्य नहीं है, किन्तु साक्षात् प्रधान (प्रकृति) और पुरुष (जीव) के नियंता है. और बडे२ योगेश्वरों के ढूंढने योग्य चरण कमल वाले हैं, तो भी लोक इनको नर अर्थात् मनुष्य मानता है, इसीप्रकार गुरु भी मनुष्य नहीं हैं किन्तु साक्षात् भगवान ही हैं ॥ २७ ॥

षट् इन्द्रियों के जीतने में परम उपयोगी सम्पूर्ण नियम और शास्त्रीय विधियों का फल श्रीकृष्णमें ही पर्यवसान है, यदि सर्व नियम विधि आदि के अनुष्ठान से भी इनमें प्रीति न हुई, तो वे नियमादि सब श्रम मात्र देने वाले जानो ॥ २८ ॥

जैसे कि—कृषि वाणिज्य आदि वृत्ति योग के अर्थ को नहीं सिद्ध करसकी है, ऐसे ही इनमें जिसकी प्रीति नहीं ऐसे असत पुरुष के इष्ट, आपूर्त, आदि सब कर्म अनर्थ के ही करने वाले होंगे ॥ २९ ॥

जो पुरुष चित्त के जीतने का उद्योग वाला हो तो संन्यास लेकर सर्व सङ्ग और परिग्रहों (उपकरणों) को छोडकर एकला ही एकान्त स्थल का आश्रय लेकर भिक्षा से मित भोजन करता हुआ ॥ ३० ॥

हे राजन् ! सम और शुद्ध प्रदेश में स्थिर सम और सुखदाई ऐसे अपने आसन को बिछाकर, उस पर ऋजु (सीधा) अंग कर कर प्रणव (ॐकार) का उच्चारण करता हुआ बैठे ॥ ३१ ॥

पूरक कुंभक रेचक प्राणायामों से प्राण और अपान को अच्छे प्रकार निरोध करे जब तक कि अपना मन कामनाओं को न छोड देवे, और अपने नासिका के अग्र भाग का निरीक्षण भी करता जावे ॥ ३२ ॥

———

यतो यतो निःसरति मनः कामहतं भ्रमत् ।
ततस्तत उपाहृत्य हृदि रुन्ध्याच्छनैर्बुधः ॥ ३३ ॥
एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः ।
अनिशं तस्य [१]निर्वाणं यात्यनिन्धनवह्निवत् ॥ ३४ ॥
कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यत् ।
चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥ ३५ ॥
यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गाऽऽवपनात्पुनः ।
यदि सेवेत तान्भिक्षुः स[२] वै वान्ताश्यपत्रपः ॥ ३६ ॥
यैः स्वदेहः[३] स्मृतो नात्मा मर्त्यो विट्कृमिभस्मसात् ।
त एन मात्मसात्कृत्वा श्लाघयन्ति ह्यसत्तमाः ॥ ३७ ॥
गृहस्थस्य क्रियात्यागो व्रतत्यागो वटोरपि ।
तपस्विनो ग्रामसेवा भिक्षोरिन्द्रियलौल्यता ॥ ३८ ॥
आश्रमापसदा ह्येते खल्वाश्रम[४]विडम्बकाः ।
देवमायाविमूढांस्तानुपेक्षेताऽनुकम्पया ॥ ३९ ॥
आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः ।
किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति लम्पटः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवमनिशमभ्यस्यतस्तस्य यतेश्चित्तं निर्वाणं शान्तिं याति ॥ ३४ ॥

न च पुनर्विक्षिप्येतेत्याह—कामादिभिरक्षुभितं यच्चित्तं तन्नोत्तिष्ठेत् यतः प्रशान्ता अखिला वृत्तयो यस्य कुतः ब्रह्मसुखेन स्पृष्टम् ॥ ३५ ॥

यस्तु प्रव्रज्यां कृत्वा ऽपि भोगमभिलिप्सुः स्यात्तं निन्दति, य इति । त्रयाणां धर्मादीनां वर्ग आसमन्तादुप्यते यस्मिंस्तस्माद् गृहात् तान्धर्मादीन् वान्ताशी वान्तभोजी निर्लज्जश्च ॥ ३६ ॥

न चैवमघटितं दृष्टत्वादित्याह—यैः पूर्वं स्वदेहो ऽनात्मा हेयः स्मृतश्चिन्तितस्त एव पुनरेनमात्मेति मत्वा श्लाघयन्ति स्तावयन्ति हि ॥ ३७ ॥

यतिमुपलक्षणीकृत्याऽन्यानपि स्वधर्मत्यागिनो निन्दति—गृहस्थस्येति, द्वाभ्याम् ॥ ३८ ॥ ३९ ॥

नन्वात्मतत्त्वज्ञस्य भिक्षोरिन्द्रियलौल्येऽपि को दोषस्तत्राऽऽह, आत्मानं परं ब्रह्म चेज्जानीयात् ज्ञानेन धुता निरस्ता आशया वासना यस्य तस्य ज्ञानिनो लौल्यमेव न सम्भवतीत्यर्थः । तथा च श्रुतिः—

"आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन्कस्य कामाय शरीरमनुसञ्ज्वरे" ॥
इति ॥ ४० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कामैः शब्दादिविषयध्यानैर्हतं विक्षिप्तं सम्मनो भ्रमद्यतो मनः यं यं विषयं निःसरति विषयीकरोति ततस्ततो विषयात् तन्मनः उपाहृत्य प्रत्याहृत्य बुधस्तत्प्रत्याहारविद्धृदि हृदयस्थे शुभाश्रये शनैर्निरुन्ध्याच्छुभाश्रयचिन्ताप्रवणं कुर्यात् अत्र नियमोऽर्थसिद्धः चित्तविजय इति नियम उक्तः स्थिरं सुखमासीतेत्यासनम् । प्राणापानावित्यादिना प्राणायामः यावन्मन इत्यादिना ततस्तत उपाहृत्य इत्यन्तेन प्रत्याहारः निरुन्ध्याच्छनैर्बुध इत्यनेन ध्यानधारणे चोक्ते ॥ ३३ ॥

अथ समाधिमाह—एवमिति, द्वाभ्याम् । एवमनिशम् अहरहः सर्वदा चाऽभ्यसतः तस्य यतेश्चित्तमल्पीयसैव कालेन निर्वाणं याति बहिर्वृत्तिविनाशं याति अनिन्धनवह्निवत् यथाऽनिन्धनः ज्वालाधूमादिरहितो दाहरहितो ऽङ्गारकपेण ऽवशेषितोऽग्निस्तद्वत् इत्यर्थः ॥ ३४ ॥

(१) अविषयतां च (२) सपापो निरपत्रपः (३) यस्यदेहः । इति विज० पाठ० (४) विडम्बिनः । इति विज० वीर० पाठ० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न तु शिश्नसंयमनीत्याह—कामेति । यद्यस्मात् कामादिभिः शब्दादिविषयानुध्यानादिभिरनाविद्धमसंक्रान्तं प्रशान्ता अपगता अखिला वृत्तयो व्यापारात्मका यस्य तादृशं चित्तमभूत् तस्मात्तचित्तं ब्रह्मसुखस्पृष्टं ब्रह्मानुभवसुखाविष्टं सत् कर्हिचिदपि नैवोत्तिष्ठेत शुभाश्रयान्न प्रच्युतं भवति, अयमेव समाधिर्वर्द्ध ब्रह्मानुभवमप्राचिन्ततेति ॥ ३५ ॥

एवमष्टाङ्गयुक्तभगवद्भक्तियोगनिष्ठं तत्फलत्वेन त्रिवर्गं कामयमानं यतिं निन्दति—य इति । त्रिवर्गस्य धर्मार्थकामरूपस्यावपनात् क्षेत्रभूताद् गृहात्प्रव्रज्य पुनर्यः पुमांस्तान् धर्मादीनेव सेवेत सवै भिक्षुर्निरपत्रपो निर्लज्जो वान्ताशी छर्दितान्नभक्षी उद्गीर्णान्नभक्षयितृतुल्य इत्यर्थः । यद्वा प्रव्रज्यापि पुनर्भोगासक्तं यतिं निन्दति—य इति ॥ ३६ ॥

न केवलमघटितं हसत्यादित्याह—यैरिति । यैः परिव्राड्भिः पूर्वं स्वदेहो नात्मा स्मृतः आत्मत्वेन न निश्चितः किन्त्वात्मनः व्यतिरिक्तो मर्त्यः मरणशीलः विट्कृमिभस्मसान्तः क्रिम्याद्यवस्थामापत्स्यमानश्चिन्तितः त एव पुनस्तमेनं देहमेव आत्मसात्कृत्वाऽऽत्माऽभिन्नं कृत्वा श्लाघयन्ति हि, केचिदसत्तमाः परिव्राज इत्यर्थः ॥ ३७ ॥

भोगाऽऽसक्तयतिनिन्दाप्रसङ्गात्तेन सहाऽऽश्रमान्तरस्थानपि स्वधर्मादित्यागिनो निन्दति—गृहस्थस्येति । क्रियात्यागः स्ववर्णाश्रमोचितक्रियात्यागः वटोर्ब्रह्मचारिणो व्रतत्यागः गुरुकुलवासादिव्रतत्यागः तपस्विनो वानप्रस्थस्य ग्रामसेवा पुनर्ग्रामवासः भिक्षोः सन्यासिन इन्द्रियचापलता ॥ ३८ ॥

एते आश्रमापसदा येषां गृहस्थादीनां चतुर्णां क्रियात्यागादयस्त एते आश्रमेषु आश्रमस्थेषु अपसदा निकृष्टा इत्यर्थः एते ह्याश्रमान् विडम्बयन्त्यनुकुर्वन्तीत्याश्रमविडम्बिनः विडम्बनमात्रमेवैषां नत्वाश्रमसिद्धिरित्यर्थः । अतस्तान् भगवन्मायया विमूढान् अनेन नित्यनिरतिशयाऽऽनन्दरूपपरमात्मप्राप्तिसाधनभूततदुपासनतदङ्गश्रमाऽनुष्ठानोपयुक्तमनुष्यजन्मवर्णाऽऽश्रमादिरूपसामग्रीं लब्ध्वापि ये स्वधर्मादित्यागिनस्ते नूनं देवमाया मोहिता इत्युक्तम् भवति । अनुकम्पया अहो इमे उत्पतिताः किं विधेयमित्येवमनुकम्पापूर्वकचिन्तया तानुपेक्षेत नानुवर्तेतेत्यर्थः ॥ ३९ ॥

आत्मपरमात्मतत्त्वज्ञस्य ब्रह्मानुभवसुखतृप्तस्य तु यतेरिन्द्रियचापल्यमेवासम्भावितं तस्य देवमायया मोहाभावादित्याह—आत्मानमिति । परं प्रकृतिपुरुषविलक्षणमात्मानम् यद्वा आत्मानं परं परमपुरुषं च विजानीयाच्चेत् तज्ज्ञानेन निर्धूतवासनः कस्य कामाय इष्टसम्पत्तये लम्पटः किमिच्छन् देहं पुष्णाति देहपोषणेन आत्मनः परमपुरुषस्य च नेष्टं सम्पद्यते अनिष्टमेव जायेतेत्यर्थः । यद्वा इच्छन् शब्दादिविषयान्कामयमानः कस्य स्वपरयोरन्यतरस्य कस्य कामायेष्टार्थं देहं पुष्णाति किम् ? न पुष्णात्येवेत्यर्थः । कस्य कामायेत्यनेन देहपोषणं न स्वात्मनो नाऽपि परमात्मनश्च सुखावहं तयोः स्वत एव निरतिशयसुखरूपत्वादिति सूच्यते, निरतिशयानन्दपरमात्मोपासनात्मकतदनुभवतृप्तो

निरीहो देहपोषणजसुखार्थं न यतत एव, किन्तु परमात्मप्राप्तय एव यतत इति सूचितम् । देवमायाविमूढानित्यनेन परमाऽऽनन्दरूपपरमात्मप्राप्तिसाधनाऽनुष्ठानोपयुक्तशरीरेन्द्रियादिसामग्रीं लब्ध्वाऽपि ये न यतन्ते ते देवमायाविमूढा इति चोक्तम् ॥ ४० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपाहृत्य हृदि स्थिते हरौ ॥ ३३ ॥

इन्धनरहितो वह्निर्यथा निर्वाणं नाशं याति तथा चित्त प्राकृतं नाशमेति अप्राकृतं स्वरूपभूतं शरीराभिमानरहितं ब्रह्म यातीत्यन्वयः ।"वाणं शरीरं सम्प्रोक्तं वाणो वाणसुते हरः" इत्यभिधानम् "निर्वाणममृतमक्षरं ब्रह्म"इत्यभिधानम् ॥ ३४ ॥

एवं विषयीकृतब्रह्मणोऽप्राकृतस्य चित्तस्य स्वभावफलमाह, कामादिभिरिति । यन्नित्यं कामादिभिरनाविद्धत्वात् प्रशान्ताखिलवृत्तित्वाच्च ब्रह्म सुखानुस्वरूपं स्पृष्टं विषयीकुर्वत् तत्कर्हिचिदपि नोत्तिष्ठेत ततोऽन्यत्र न गच्छतीत्यर्थः ॥ ३५ ॥

ननु, कस्यचिच्चेतोऽन्यत्र गच्छति चेत्किन्दूषणमित्याशंक्य तस्य पापकारणत्वेन सर्वहास्यत्वं दूषणमित्याशयेनाह—यः प्रव्रज्येति । त्रिवर्गावपनाद्धर्मार्थकामबीजानामावपनक्षेत्रभूतात् तान् कामादीन् यदा सेवेत तर्हीति शेषः ॥ ३६ ॥

एवं विधा असुरजातय इत्यभिप्रायेणाह—यैरिति । यस्य देहिनः अनात्मा देहो विट्कृमिभस्मवत्स्मृतः तस्य तमेव देहं तामसत्वमेव भोगायतनं स्वात्मसात्कृत्वाऽहमेवात्मेति कृत्वा यं देहं श्लाघयन्ति ते असत्तमा असुरा इत्यन्वयः ।"आत्मैव हयात्" इति श्रुति हिशब्देन सूचयति—यैः स्वदेह इति पाठे यैर्स्वैरनात्मा स्वदेहो विट्कृमिभस्मवत्स्मृतः ते तमेव स्वात्मसात्कृत्वा श्लाघयन्ति नहि असत्तमा इत्यन्वयः ॥ ३७ ॥

न केवलं यतेराश्रमत्यागे दूषणमपि तु गृहस्थानामपि स्वधर्मत्यागे दोषः स्यादित्याह—गृहस्थस्येति । यस्माद्यः कस्य कस्य धर्मत्यागे दोषः स्यादित्यतो वाऽऽह—गृहस्थस्येति । वटोर्ब्रह्मचारिणः यदि गृहस्थादीनां क्रियात्यागादयः सन्ति तर्हि ते आश्रमापसदा इत्यन्वयः ॥ ३८ ॥

नन्वेतावताऽपि फलं स्यात्किं नेत्याह—स्वन्विति । आश्रमान्विडम्बयन्ति अनुकुर्वन्तीत्याश्रमविडम्बिनः खलु आश्रमफलाहेतुत्वादित्यर्थः । निषेधवाक्यालङ्कारादौ खलुशब्दप्रयोगात् न चैते पुरुषा इत्याह—देवेति । अतो भगवन्महिमेति भगवद्विषयैवाऽनुकम्पा प्रेमविशेषः ॥ ३९ ॥

यतः स्वधर्मत्यागी निन्द्योऽतो विहितानिरंकुश देहपोषो न युक्त इत्याह—आत्मानमिति । विवेकज्ञानेन धूताशयः प्रक्षीणकामः कश्चित् पुरुषः आत्मानं स्वरूपं परमात्मानं च विजानीयात् तर्हि स किं सुखमिच्छन् कस्य हेतोः सुखस्यार्थं वा लम्पटो देहा-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इन्द्रियलोलुपो भूत्वा देहं पुष्णातीत्यन्वयः "क्षुधार्थी वा त्यजेद्विद्यां विद्यार्थी वा सुखं त्यजेत्" इति वचनात् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

निर्वाणं शान्तिं याति ॥ ३४—३५ ॥

त्रिवर्गं आ उत्पद्यते यस्मिन् तस्मात् गृहात् पूर्वं प्रव्रज्य पुनः पश्चात् तानेव गृहस्थधर्मान् सेवेत वान्ताशी छर्दितभोजी निर्लज्जः ॥ ३६ ॥

अनात्मा देह आत्मा न भवतीति चिन्तितः विट्कृमिभस्म-वद्विस्यन्ते विट्कृमिभस्मरूपो भविष्यतीत्यतोऽधुनापि विट्कृमि-भस्मतुल्य इत्यर्थः । त एव एनं देहम् आत्मसात्कृत्वा आत्मानमेव मन्वेत्यर्थः ॥ ३७ ॥

लौल्यता लौल्यम् अनुकम्पया सह उपेक्षेत अनुकम्पया मदन्तिकमुपेत्य तत्रोपदेशादिकं न कुर्यात् तस्य तेषु वैयर्थ्यादिति भावः ॥ ३८ ॥

तेष्वपि मध्ये भिक्षुं विशेषतो निन्दति—आत्मानमिति। अत्र विजानीयादिति विधिलिङ् तेन चायमर्थ आक्षेपलभ्यो भवति ज्ञानधुताशयः सन् आत्मानं विजानीयादिति विधेर्विषयीभूतः स्यात्के-च्छया किमिच्छन्नित्यादि देहं पुष्णातीति जिह्वेन्द्रियलौल्यं लम्पट इत्युपहस्यलौल्यञ्च व्यञ्जितं परं देहात् पृथग्भूतम् ॥ ३९ ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भ्रमदनवस्थितम् यतो यतो यत्र यत्र विजये ॥ ३३ ॥

अनिशं निरन्तरमेवम् अभ्यसतस्तस्य यतेश्चित्तं निर्वाणं नैश्चल्यम् ॥ ३४ ॥

अनाविद्धमक्षुभितम् अत एव प्रशान्ता अखिला वृत्तयो यस्य तत् ब्रह्मणः चिन्तनीयस्य भगवतः सुखेन स्पृष्टं यत् यर्हि तर्हि तदा कर्हिचिदपि नोत्तिष्ठति ॥ ३५ ॥

ब्रह्मसुखस्पर्शाऽभावे तूत्तिष्ठति विषयेषु यतेश्चित्तमतः स निन्द्यो भवतीत्याह—त्रयाणां धर्मार्थकामानां वर्ग आ समन्तादुत्पद्यते यत्र ततो गृहात्प्रव्रज्य यदि तान् गृहस्थोचितान् धर्मादीन् पुनः सेवेत स वान्ताशी छर्दितभोजी अपत्रपो निर्लज्जश्च भवति ॥ ३६ ॥

आत्मविदोऽपि अनात्मानं देहं ये श्लाघयन्ति ते निन्द्या एवेत्याह—यैरिति । यैः स्वदेहः अनात्मा आत्मभिन्नः मर्त्यो मरणधर्मा कृमिविट्भस्मसात् च स्मृतः चिन्तितः पुनरेनमात्मसात् कृत्वा श्लाघयन्ति त असत्तमाः ॥ ३७ ॥

यतिमुपलक्षीकृत्यान्यानपि स्वधर्मत्यागिनस्तत्र धर्मत्यागीकरणार्थं निन्दति—गृहस्थस्येति, द्वाभ्याम् ॥ ३८ ॥

अनुकम्पया उपेक्षेत ननु दुरुक्त्या पीडयेत ॥ ३९ ॥

"आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्" ॥

इति श्रुत्यर्थमुपबृंहयन् जाते आत्मज्ञानेऽपि देहासक्तं निन्दति—आत्मानमिति । परं देहादन्यम् ॥ ४० ॥

भाषा टीका ।

कामनाओं की ताडना से भ्रमता हुआ मन जहां २ से निकले तहां २ से रोक कर बुद्धिमान् धीरे से हृदय में रोके ॥ ३३ ॥

इस प्रकार निरंतर अभ्यास करने वाले यति का चित्त थोड़े ही काल में शांति को प्राप्त होजाता है, जैसे, कि—विना इन्धन का अग्नि ॥ ३४ ॥

कामादिकों से क्षोभ को नहीं प्राप्त होने वाला शान्त होगई सर्व वृत्ति जिसकी और ब्रह्म सुख का स्पर्श करने वाला ऐसा यति का चित्त फिर कभी कामनाओं की तरफ नहीं उठता है ३५

जो पुरुष त्रिवर्ग के क्षेत्र रूप अपने गृह से सन्यास लेकर त्यागी होकर यदि फिर उन विषयों का सेवन करे, तो वह निर्लज्ज वान्ताशी है, अर्थात् वमन करे हुए का भक्षण करने वाला है ॥ ३६ ॥

क्योंकि, जिनोंने पहले इस देह को अनात्मा और विष्ठा कृमि भस्म रूप समझा फिर वे ही इसको आत्मा मानकर श्लाघा करें और पालन पोषण करें तो उनके सदृश असत्तम निन्दनीय और कौन है ॥ ३७ ॥

गृहस्थ होकर क्रियाओं का त्याग, ब्रह्मचारी होकर व्रतों का त्याग तपस्वी होकर ग्राम सेवा और भिक्षु होकर इन्द्रियों की चंचलता जिनकी है॥ ३८ ॥

ये लोग आश्रम धारियों में नीच हैं, और आश्रम का विडंबन करने वाले हैं, श्रीहरि की माया से मोहित ऐसे मूढों को कृपा करके दूरसे उपेक्षा करे अर्थात् उनके समीप न बैठे ॥ ३९ ॥

जिसने ज्ञान से वासनाओं का निरास किया है, ऐसा आत्मज्ञानी यति किस इच्छा से और कौन से हेतु से देह का पोषण करेगा, और वह लंपट ही क्यों होगा अर्थात् ज्ञानी ऐसा कर ही नहीं सका है ॥ ४० ॥

आहुः शरीरं रथमिन्द्रियाणि हयानभीषून्मन इन्द्रियेशम् ।
वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्बन्धुर[1]मीशसृष्टम् ॥ ४१ ॥
अक्षं दशप्राणमधर्मधर्मौ चक्रे ऽभिमानं रथिनं च जीवम् ।
धनुर्हि तस्य प्रणवं पठन्ति शरं तु जीवं परमेव लक्ष्यम् ॥ ४२ ॥
रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ।
मानो ऽवमानो ऽसूया च माया हिंसा च मत्सरः ॥ ४३ ॥
रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः ।
रजस्तमः प्रकृतयः सत्त्वप्रकृतयः क्वचित् ॥ ४४ ॥
यावन्नृकायरथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातम् ।
ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वानन्दतुष्ट उपशान्त इदं विजह्यात् ॥ ४५ ॥
नो चेत्प्रमत्तमसदिन्द्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपन्ति ।
ते दस्यवः सहयसूतममुं तमोऽन्धे संसारकूप उरुमृत्युभये क्षिपन्ति ॥ ४६ ॥
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ।
आवर्तेत प्रवृत्तेन निवृत्तेनाऽश्नुते ऽमृतम् ॥ ४७ ॥
हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशान्तिदम् ।
दर्शश्च पूर्णमासश्च चातुर्मास्यं[2] पशुः सुतः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रमत्तस्य तु कौलेन नरकपातापर्यन्तप्रमत्तेन सदा तत्त्वज्ञाने यतितव्यमितीममर्थम् "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इत्यादि श्रुत्युक्तरथरूपकप्रकारेणाह—आहुरिति, षड्भिः । इन्द्रियाणां मनोऽभीषून् रश्मीनाहुः मात्रा शब्दादीन्वर्त्मानि गन्तव्यदेशानाहुः सत्त्वं चित्तं बृहद्बृहत्यापि बन्धुरं बन्धनं चित्तं विना ह्यनिबद्धमिव शरीरं भवति ईशसृष्टमिति बन्धनकर्ता त्वीश एवेत्यर्थः ॥४१॥

प्राणादयः पञ्च "नागः कूर्मश्च कृकलो देवदत्तो धनञ्जयः" इत्येवं दशविधं प्राणमक्षम् अभिमानं साहङ्कारं जीवं रथिनं शुद्धं जीवं शरं परं ब्रह्म लक्ष्यं यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्यत इत्यर्थः ॥ ४२ ॥

रागादयो ऽनन्ताः शत्रवः ॥ ४३ ॥

तत्र रजोऽभिनिवेशाः कश्चिद्रूढसमाधेः सत्त्वप्रकृतयोऽपि परोपकारादिप्रवृत्तयः शत्रवः ॥ ४४ ॥

नृकायरूपं रथमात्मवशः उपकल्प इन्द्रियादिपरिकरो यस्मिन्स्तथाभूतं यावत् धत्ते तावदेव गरिष्ठानां गुरूणां चरणसेवया निशितं ज्ञानखड्गं बिभ्रदच्युताश्रयः सन्निरस्तशत्रुरुपशान्तः स्वानन्देन तुष्टो भूत्वेदं रथादिकमुपेक्षेतेत्यर्थः ॥ ४५ ॥

अच्युताश्रयाभावे बाधकमाह—नोचेदिति । असन्तो बहिर्मुखा ये इन्द्रियवाजिनः सूतश्च ते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयरूपेषु दस्युषु निक्षिपन्ति हयैः सूतेन च सह वर्तमानं तमोऽन्धे तमसा ऽन्धे उरु मृत्युभयं यस्मिन् ॥ ४६ ॥

ननु, वेदविहितेष्टापूर्तादिकारिणः पुंसः कथंमनमर्थप्राप्तिः स्यादित्याशङ्क्य वेदोक्तकर्मणां द्वैविध्यं दर्शयन्फलभेदमाह—प्रवृत्तं चेति, दशभिः ॥ ४७ ॥

हिंस्रं द्रव्यादि कर्म अशान्तिदमत्यामर्शयुक्तम् आदिशब्दार्थं विवृणोति दर्शश्चेति पशुः पशुयागः सुतः सोमयागः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं मयैव शरीरेन्द्रियादेः परमात्मप्राप्तिसाधनाऽनुष्ठानोपयुक्तसामर्थ्यादिकमुच्यते, अपि तूपनिषद्वाक्यान्यपि—

"आत्मानं रथिनं विद्धि शरीरं रथमेव च ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" ॥

(१ मीशधाम (२) पशुः पुन इति विज० पा० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्यादीनि संसाराध्वनः पारं वैष्णवं परं प्रेप्सुस्तमात्मानं रथित्वेन तच्छरीरादीनि रथरथाङ्गत्वेन रूपयित्वा तदाहुरित्याह—आहुरिति । शरीरादीन् रथादिभावेन रूपयन्तस्तेषां परमात्मप्राप्तिसाधनाऽनुष्ठानोपयुक्तसामग्रीत्वममीषु देहादिष्वित्यतोऽभिज्ञानीयोऽत्र प्रसिद्धरथादीनां साधनत्वमित्याहुर्वेदान्ता इत्यर्थः । शरीरं रथं रथस्थानीयमिन्द्रियाणि हयानश्वानिन्द्रियाणामश्वस्थानीयानामीशं मुख्यं मनः अभीशून् रश्मीन् रज्जूनिति यावत् मात्राः शब्दादीन् वर्त्मानि मार्गस्थानीयान् धिषणां बुद्धिं सूतं सारथिं सत्त्वं बलं बृहद् दृढं बन्धुरं देहादीनां बन्धनम् ईशासृष्टमिति यथायोग्यं विभक्तिविपरिणामेन शरीरादीनां विशेषणम् ईशेन परमात्मना सृष्टमीशसृष्टम् ॥ ४१ ॥

दशानां प्राणानां समाहारो दशप्राणं प्राणादिपञ्चकं नागकूर्मकृकलदेवदत्तधनंजयाख्योपप्राणपञ्चकात्मकम् अक्षमक्षस्थानीयम् अधर्मधर्मौ पुण्यपापे चक्रे पुण्यपापात्मकयोः कर्मणोरेव रथत्वरूपितशरीरप्रवृत्तिहेतुत्वात्तदायत्तत्वेन च चक्रत्वेन रूपणम् अभिमानिनं देहाभिमानं जीवं रथिनमाहुः तस्य रथिनः प्रणवमोङ्कारं धनुः पठन्त्याहुः शरं तु जीवं परं परमात्मानं तु लक्ष्यं पठन्ति "प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्" इति ह्यन्यत्राप्युक्तं विप्रकृष्टयोः शरलक्ष्ययोरिव जीवपरयोः सम्बन्धज्ञापनहेतुत्वात्प्रणवो धनुरुक्तम् ॥ ४२ ॥

रथित्वेन रूपितजीव एव शरत्वेनापि रूप्यते तत्र जेतव्यानाह—राग इति । रागः शब्दादि विषयाऽऽसक्तिः द्वेषः तद्विरोधिविषयाऽप्रीतिः लोभोऽसन्तोषः मोहः कार्याऽकार्योऽविवेकः भयमागामिदुःखदर्शनजं प्रतिकूलज्ञानं मदो गर्वः मानो बहुमानः अवमानतिरस्कारः असूया गुणेषु सत्स्वपि दोषाविष्कारः माया वञ्चनं हिंसा भूतद्रोहः मत्सरः परकृतद्रोहचिन्ता ॥ ४३ ॥

रजः क्रोधः स चामर्षः प्रमादो ऽनवधानता एवमादयः गतप्रभृतयः शत्रवो जेतव्याश्च एते रजस्तमःप्रकृतयः कश्चित्सत्त्वप्रकृतयश्च रजस्तमसी प्रकृती कारणे येषां ते सत्त्वं प्रकृतिः कारणं येषां ते चेति बहुव्रीहिः रजस्तमसोरन्यतरमिश्रसत्त्वप्रकृतय इत्यर्थः ॥ ४४ ॥

नरदेहं शरीरेन्द्रियमनोविषयबुद्धिबलप्राणधर्माधर्मजीवाः रथरथाङ्गादि रथ्यादिभावेन परमात्मप्राप्त्युपायसाधनाऽनुष्ठानोपयुक्तत्वज्ञापनाय रूपिताः प्रणवजीवेशास्तु जीवपरयोः सम्बन्धज्ञानजनकत्वपरमात्मैकशेषत्वप्राप्यत्वज्ञापनाय धनुःशरलक्ष्यभावेन रूपिताः हेयत्वज्ञापनाय रागादयः शत्रुत्वेन रूपिताः अथ यस्यैते रथादयो वशे तिष्ठन्ति स एवाध्वनः पारं वैष्णवपदमाप्नोतीति "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" इति श्रुतेरर्थमभिप्रयन् रथादिकमपि उपेक्षेत इत्याह—यावदिति । यावच्छरीरं समीहितसाधने दक्षं स्ववशं च तावदेव ज्ञानासिना जितरागादिशत्रुर्मुक्तिसाधनमनुतिष्ठन् शरीरादिषु निःस्पृहो भवेदित्याह—यावदिति । नृकायरथं नरशरीररूपं रथं यावदात्मवशोपक्लृप्तं स्वाधीनतयोपक्लृप्तं यथा भवति तथा धत्ते तावदेव गरिष्ठानां महतां चरणार्चनयाऽऽत्तं निशातं ज्ञानरूपं खड्गं दधद् बिभ्राणः अस्ता निरस्ताः शत्रवो रागादयो येन अच्युतः स्वाश्रितानच्यावयतीत्यच्युतो भगवानेव बलं यस्य तादृशः उपशान्तः रागाद्यकलुषितचित्तः स्वाराज्यतुष्टः स्वराडकर्मवश्यः तस्य भावः स्वाराज्यं मुक्तैश्वर्यं तेन तुष्टः अवश्यमच्युतः स्वाराज्यं दास्यतीति सन्तुष्ट इदं नृकायरथादिकं विजह्यादुपेक्षेत तेषु स्पृहारहितो भवेदित्यर्थः । इदमेतद्धि संसारकं फलं वा विवर्जितम् ॥ ४५ ॥

यद्युक्तविधो न स्यात्तदा तस्यानर्थमाह—नेति । नोचेदुक्तविधो न भवेत्तदा प्रमत्तमिमं देहिनमसन्तो बहिर्मुखा इन्द्रियवाजिन इन्द्रियाण्येवाश्वाः सूतो बुद्धिश्चैते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयरूपेषु दस्युषु निक्षिपन्ति ते विषयाख्या दस्यवः हयैः सूतेन च सह वर्तमानममुं प्रमत्तं देहिनमुर्वंधिकं मृत्युभयं पविमन्धे तमस्यन्धतामिस्रनरकतुल्ये संसारकूपे क्षिपन्ति ॥ ४६ ॥

तदेवं वर्णाश्रमधर्मान् तदनुग्राह्यं भक्तियोगं शरीरेन्द्रियादीनां तदनुष्ठानोपयुक्तत्वं तैरनुष्ठितेन वर्णाश्रमधर्मानुग्रहीतेन भक्तियोगेन स्वाराज्यप्राप्तिं सांसारिकफलाभिप्सयाऽनुष्ठितानां तु धर्माणां संसृतिरूपानर्थावहत्वं चाभिधायाऽथ तेषामेव धर्माणामिष्टापूर्तभेदेन द्वैविध्यं सांसारिकफलसाधनत्वेन कृतानां प्रवृत्तकर्माख्यत्वं पुनरावृत्तिहेतुत्वमुपासनानुग्राहकतया कृतानां तु निवृत्तकर्माख्यत्वं तस्याऽपुनरावृत्तिहेतुत्वं चाह—प्रवृत्तमिति । वैदिकं वेदविहितं कर्म प्रवृत्तं निवृत्तमिति द्विविधं तत्र प्रवृत्तेन कर्मणा आवर्तते फलाऽनुभवाय लोकान्तरं प्राप्य तत्र तदनुभूयाऽवशिष्टेन कर्मणा ततः पुनरिहावर्तते निवृत्तेन त्वमृतमश्नुते तत्फलरूपममृतं मुक्तिं प्राप्य ततः पुनर्नावर्तते ॥ ४७ ॥

प्रवृत्तनिवृत्तभेदभिन्नस्य वैदिकस्यैव कर्मणस्तत् स्वरूपमिष्टसंज्ञकत्वं च वक्तुं तद्विशिष्टस्तद्वान्तरभेदान्दर्शयति—हिंस्रमिति । अग्निहोत्रनामधेयकं कर्म आदिर्यस्य तदग्निहोत्रादि आदिशब्दग्राह्यान्दर्शयति—दर्शश्चेति । दर्शादयः शब्दाः कर्मनामधेयानि पशुः पशुयागः सुतः सोमयागः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु अयं देहो हेयश्चेत्किमनेनार्थे इत्याशङ्क्य महाप्रयोजनमस्त्येव कृतं चेदित्याशयेनाह—आहुरिति । अभीषुं प्रग्रहं इन्द्रियेशं श्रोत्रादीन्द्रियनेतारं मात्राः विषयाः धिषणा बुद्धिः ईशस्य धाम गृहस्थानीयं सत्त्वमन्तःकरणविशेषम् ॥ ४१ ॥

दशप्राणं प्राणदशकमक्षमाहुरिति सर्वत्र योज्यं प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधनञ्जयनामानो दश प्राणाः अधर्मधर्मौ पापपुण्यलक्षणौ चक्रे शकटपदस्थानीये अभिमानिमहङ्कारलक्षणं जीवं रथिनं पठन्तीत्यन्वयः । शरं तु जीवमित्यत्र तु शब्देनैतत्प्रवृत्तिविशेषमिदं सूचयति—ननु शरत्वेऽयम "प्रणवो धनुः शरो ह्यात्मा" इति श्रुतेः । अथ देवरथस्तस्य वाग्बुद्धिरिति च परं ब्रह्म ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्य रथिनो जेतव्यानाह—राग इत्यादिना "अपूज्ये पूज्यबुद्धिस्तु मानः सद्भिरुदाहृतः" इति "मानो अभिमानोऽवज्ञे च परिमाणे च पूजने" इति च "अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः" इति च माया कैतवं रागादय आभ्यन्तराः शत्रवः बाह्याः शत्रवः सौहोदरादयः आदिशब्देन कुम्भकर्णादयः सुग्रीववाल्यादयः ते सर्वे शत्रवो रागादय उपायेन परिहर्तव्या इति शेषः ॥४३॥४४

एवं रथोपयोगमाह—यावदिति । नृकायरथं मनुष्यशरीराख्यरथं "रथ गतौ" इति धातोर्ज्ञानसाधनत्वात्तच्छब्दवाच्यमिदं यावदात्मवशोपकल्पं स्ववशत्वेन कल्पितं भवेत् तावद्गुरुचरणोपासनया महापुरुषश्रीपादपूजनेन निशातं धौतं ज्ञानासिं दधदच्युतो बलं यस्य स तथा अच्युतं बलं यस्य स तथेति वा अस्तशत्रुः निरस्तरागादिशत्रुः स्वाराज्येनैश्वर्येण रसेन तुष्टो विषयाऽलम्बुद्धिमानुपशान्तः पूर्वस्मादाधिक्येनोपास्तभगवच्चित्तः पुरुष इदं संसाराख्यं हेयत्वेन सर्पनिर्मोकवत् त्यक्तं वस्तु जह्यादित्यन्वयः ॥ ४५ ॥

इतो ऽन्यथा ऽस्य मुक्तिरेव न सेत्स्यतीत्याह—नोचेदिति । नोचेदिन्द्रियग्राममात्मवशं कृत्वा ज्ञानासिना संसारानुच्छेदः शब्दादिविषयाभिलाषश्चेदपि तर्हि प्रसन्नोषिता इन्द्रियहयबुद्धिसूताः प्रमत्तं रागान्धीभूतचक्षुषममुं रथिनं उत्पथमशास्त्रमार्गं नीत्वा शब्दादिविषयलक्षणेषु दस्युषु दुःखाकारेषु चौरेषु निक्षिपन्ति ते विषयचौराः सहयसूतं इन्द्रियबुद्धिसूतमिमं रथमुरुमृत्युभये तमोलक्षणाज्ञानान्धे चक्षुरविषये संसारकूपे क्षिपन्तीत्यन्वयः ॥४६॥

ननु, स्वर्गकामो यजेत" इत्यादिशब्दार्थश्रवणसमनन्तरं तदुक्तकर्मणि प्रवर्तमानपुण्यापारसंसारकूपे पातयन्तीति कथमुच्यते तस्यापि वैदिकत्वेनाङ्गीकार्यत्वात् अन्यस्य सर्वधर्मपरित्यागस्यावैदिकस्यापि संसारोच्छेदकत्वं च कथं सर्वधर्मान्परित्यज्येति स्मृतेरिति तत्राह—प्रवृत्तं चेति । चः समुच्चये द्विविधमित्यनेनात्यन्तभिन्नविषयत्वं दर्शयति—यद्यप्यनेवंविद् महापुण्यं कर्म करोति "तद्धास्यान्ततः क्षीयते" 'नारायणोऽसौ परमो विचिन्त्यः" इत्यादिना वैदिकत्वाच्च ॥ ४७ ॥

कीदृशं तत्प्रवृत्तं येनाऽनुष्ठितेन पुनरावृत्तिः स्यादिति तत्राह, हिंस्रमित्यादिना । अश्वत्थादिद्रव्यच्छेदनात्मकत्वाद्धिंस्रमशान्तिदं मुक्तिविपरीतफलप्रदम् ॥ ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आशुरिति युग्मकम् । अधर्मोऽत्र धर्मपरित्यागरूपः सन्न्यासः । तदेतं सर्वेषां रथसामग्र्यां सत्यामपि धनुरादिकं विना वैयर्थ्यमेवेत्याह-धनुरिति ॥ ४१—४७ ॥

हिंस्रमिति युग्मकम् । सुराचार्यादिलक्षणं पूर्वत्र प्रसिद्धास्यामित्यर्थः ॥ ४८—५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यदेव देहेन्द्रियादिकं प्रमत्तस्यानर्थहेतुस्तदेवाप्रमत्तस्य योगिनस्त्वचलसाधनमितीममर्थम "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इत्यादि श्रुत्युक्तरथरूपकद्वारेणाह—आहुरिति, षड्भिः । इन्द्रियेषां मनोऽभीषून् रश्मीनाहुः मात्राः शब्दादीन् वर्त्मानि गन्तव्यदेशानाहुः सत्त्वं चित्तं वृहत् देहव्यापि बन्धुरं बन्धनमाहुः चित्तं विना शरीरस्याबद्धं भवतीति भावः । ईशासृष्टमिति बन्धनकर्त्ता त्वीश इति भावः । ईशासृष्टमिति रथादीनां सर्वेषामेव विशेषणं दशविधं प्राणमक्षम अभिमानमभिमानमयं जीवं रथिनं पठन्ति. प्रणवं गुरुप्रसादरूपमहामूल्यप्राप्तं धनुः शुद्धं जीवं शरं परं ब्रह्म लक्ष्यं यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्यत इत्यर्थः । ननु, तर्हि रथादिरूपकसाहचर्यात् परब्रह्मणोऽपि लक्ष्यत्वेन शत्रुरूपकत्वमायातं शत्रुरेव रथमारुह्य शरेण भिद्यते युज्यते च तस्य जीवशत्रुत्वम स्वमायाशक्त्या जीवबन्धकत्वात् सत्यम् । "निभृतमरुन्मनोऽक्षदृढयोगयुजो हृदि यन् मुनय उपासते तदरयोऽपि ययुः स्मरणात्" इत्यरिसाहचर्येण मुनीनां मुक्तिरिव साधर्म्यं स्यन्ति उभयेषामपि परमेश्वरं शरनिःक्षेपकत्वात् परमेश्वरस्तु स्वीयवीरत्वसुखोपकारं ज्ञानान्तर्वर्तिगुणीभूतभक्तिलक्षणमास्वाद्य उभयेभ्य एव तेभ्यो मोक्षं ददातीति क्वचित् । अन्ये तु परमात्मनो लक्ष्यत्वेऽपि द्रौपद्यादिस्वयंवरस्थमाधारचक्रवर्तिमीनाख्यमानत्वमेव तत्रान्यथा यथा चार्जुनाद्यात्मकं चापगुणबलेनैव शरेण भित्वा द्रौपद्यादिकां प्रापुस्तथैव ज्ञानिनोऽपि भक्तिबलेनैव मुक्तिमित्याचक्षते ॥ ४१ ॥ ४२ ॥

यथा च स्वयंवरकन्याप्राप्तिप्रतिबन्धकदुष्टराजन्या वीरपुरुषेण हन्यन्ते तथैव भगवद्भक्तिबलेन यतिना ज्ञानासिमाश्रित्य रागद्वेषाद्या हन्तव्या इत्याह—राग इति, त्रिभिः । रागद्वेषादयो रजस्तमःप्रकृतयः क्वचित् परोपकारादयः सत्त्वप्रकृतयः ॥४३॥४४॥

नृकायरूपं रथम् आत्मवशं उपकल्प्य इन्द्रियादिपरिकरो यस्मिन् तथाभूतं यावत्तस्ते नान्देन गरिष्ठानां गुरूणां चरणसेवया निशितं ज्ञानखड्गं बिभ्रत् अच्युतभक्तिबलः सन्नेव निरस्तशत्रुर्भूत्वा स्वाराज्यस्य आऽऽनन्दस्य प्राप्त्या तुष्टः सर्वमिदं रथादिकं त्यजेत्तदुपयोगाभावादेवेत्यर्थः । अत्र यथासाध्यस्य शत्रुजयस्य स्वाराज्यलाभस्य च सिद्धौ रथादिकात् धनुःशरादिकाच्च पुरुषो वियुज्यते तथा बलात् शरीराच्च वियुज्यते एवमेव ज्ञानी प्राथमिकात् पाप्मनः मुक्तिसाधनाज्ज्ञानाच्च वियुज्य ज्ञानान्तर्भूतया केवलया भक्तिलक्षणया सहित एव परमात्मनि सायुज्यं लभते न तु ततो वियुज्यते तस्याः स्वरूपशक्तिवृत्तित्वेन परमात्मैक्यात् ज्ञाना ऽज्ञानयोस्तु मायाशक्तिवृत्तित्वात्तद्द्वयापेक्षाममुचितैव. अत एव "धनुर्हि तस्य प्रणवं पठन्ति. शरं तु जीवं परमेव लक्ष्यम्" इत्यत्रापि यथा रथादिभ्यो धनुषश्च वियुज्यापि शरः पुरुषबलेन वेगरूपतामापन्नेन सहैव तत्प्रभावादेव लक्ष्यं प्रविशति; तथैव शुद्धजीव देहेन्द्रियादिकमशुद्धजीवं चाज्ञानरूपामविद्यां त्यक्त्वा मुक्तिसाधनज्ञानकारणप्रणवरूपां विद्यां च त्यक्त्वा अशुद्धजीववर्तिन्या भक्तिरूपैव केवलया मोहनत्वद्-

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

साक्षादेव परमात्मानं ज्ञात्वा तत्र सायुज्यं लभते । यदुक्तम् भगवता

"ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।

समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।

ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" ॥

इत्यस्य पद्यद्वयस्यायमर्थः भक्तिमिश्रज्ञानपरिपाकेनोपाध्यपगमे ब्रह्मभूतः अनावृतचैतन्यत्वेन ब्रह्मरूप इत्यर्थः । गुणमालिन्यापगमात् प्रसन्नश्चासावात्मा चेति स ततश्च पूर्ववद्यायामिव नष्टं न शोचति न चाप्राप्तं काङ्क्षति देहाद्यभिमानाभावादिति भावः । भूतेषु भद्राऽभद्रेषु समः बाह्यानुसन्धानाभावादिति भावः । ततश्च निरिन्धनाग्नाविव ज्ञाने शान्तेऽप्यनश्वरां ज्ञानान्तर्भूतां मद्भक्तिं लभते तस्या मत्स्वरूपशक्तिवृत्तित्वेन मायाशक्तिभिन्नत्वात् अविद्याविद्ययोरपगमेऽप्यनपगमात् अत एव परां निष्कामकर्मज्ञानाद्युर्वरितत्वेन केवलां लभत इति । पूर्वं ज्ञानवैराग्यादिषु मोक्षसिद्ध्यर्थं कथया वर्त्तमानाया अपि सर्वभूतेष्वन्तर्यामिण इव तस्य स्पष्टोपलब्धिर्नासीदिति भावः । अत एव कुरुते इत्यनुक्त्वा लभत इति प्रयोगः । माषमुद्गादिषु मिलितां कालेन तेषु नष्टेष्वप्यनष्टां काञ्चनमणिकामिव तेभ्यः पृथक्कया केवलां लभत इति यत् सम्पूर्णायाः प्रेमभक्तेस्तु तदानीं लाभसम्भावना नैवास्ति नापि तस्या फलं सायुज्यमित्यतःपरांप्रेमलक्षणामिति न व्याख्येयं ननु तया लब्धया भक्त्या तस्य किं स्यादित्यतोऽर्थान्तरोपन्यासेनाह-भक्त्येति । अहं यावान् यश्चास्मि तत्त्वं तत्पदार्थं ज्ञानी वा नानाविधो भक्तो वा भक्त्यैव तत्त्वतोऽभिजानाति"भक्त्याऽहमेकया ग्राह्यः"इत्यादिभगवदुक्तेः । यस्मादेवं तस्मात्ततस्तया भक्त्यैव तदनन्तरं विद्योपरामादुत्तरकाल एव मां ज्ञात्वा मां विशते मत्सायुज्यसुखमनुभवति मम मायातीतत्वात् विद्यायाश्च मायात्वात् विद्ययाऽप्यहमगम्य इति भावः यत्तु—

"साङ्ख्ययोगौ च वैराग्यं तपोभक्तिश्च केशवे ।

पञ्चपर्वेति विद्येयं यया विद्वान् हरिं विशेत्" ॥

इति विद्यावृत्तित्वेन भक्तिःश्रूयते मत्सायुज्य सुखमनु तत् खलु ह्लादिनीशक्तिवृत्तेरेव कला काचिद्विद्यासाफल्यार्थं विद्यायां प्रविष्टा यथा कर्मसाफल्यार्थं कर्मयोगेऽपि प्रविशति तथा विना कर्मज्ञानयोगादीनां श्रममात्रत्वोक्तेरतो निर्गुणा भक्तिः सत्त्वगुणमय्या विद्याया वृत्तिश्चस्तुतो न भवतीति किञ्च "सत्त्वात् सञ्जायते ज्ञानम्" इति स्मृतेः । सत्त्वजं ज्ञानं विद्येव यथा तथा भक्त्युत्थं ज्ञानं भक्तिरेवेति ज्ञानमपि द्विविधं द्रष्टव्यम् ॥ ४५ ॥

अच्युतबलत्वाभावे साध्यं न सिद्ध्येत् प्रत्युताधःपातश्च स्यादित्याह—नोचेत् यदि रथिनो बलं न स्यात् पक्षे जीवस्य यदि भक्तिर्न स्यादित्यर्थः । प्रमत्तं जीवं बलाभावेऽपि लक्ष्यवेधार्थं रथारोहणमेव प्रमादः पक्षे भक्त्यभावे मुमुक्षैव प्रमादः ते दस्यवः रागद्वेषाद्याः ॥ ४६ ॥

ननु, विषयभोगोऽपि शास्त्रेण विहितो न केवलं निषिद्ध एव सत्यम्,अधिकारिभेदात् फलभेदाच्च तत्र व्यवस्थाद्वयमपेत्याह-प्रवृत्तमिति, दशभिः । आवर्त्तते गृहस्थः अमृतमश्नुते यतिः ॥ ४७ ॥

हिंस्रं श्येनादिकर्म अशान्तिदं अशान्तकिमपदम् । आदिशब्दात् विद्धोति—दर्शश्चेति । पशुः पशुयागः सुतः सोमयागः ॥ ४८

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

"आत्मानं रथिनं विद्धि शरीरं रथमेव च" इत्यादिं श्रुत्यर्थमुपबृंहयन् श्रीगुरुप्रसादलब्धज्ञानभक्तिभ्यां सुदृढदेहादिसम्बन्धो मुक्तो भवेदिति उपदिशति—आहुरिति, पञ्चभिः । शरीरं रथम् इन्द्रियाणि हयान् इन्द्रियेशं मनो ऽभीषून् रश्मीन् मात्राः शब्दादिविषयान् वर्त्मानि उल्लङ्घनीयान् देशान् धिषणां बुद्धिं सूतं सत्त्वं चित्तं ईशेन जीवकर्मानुसारिणा सृष्टं बृहद्बन्धुरं पूर्णं बन्धनमाहुः ॥ ४१ ॥

प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधनञ्जयाऽभिधं दशप्राणमक्षम् धर्माधर्मौ चक्रे अभितो देहादौ मानो यस्य तं साधनावस्थावन्तं जीवं रथिनम् प्रणवं भगवन्मन्त्रं धनुः प्रापकं जीवं विमुक्ताभिमानं सिद्धावस्थावन्तं शरं गन्तारं परं पुरुषोत्तमं लक्ष्यं गम्यं पठन्ति. प्रणवादिभगवन्मन्त्रजपभावितो जीवो भगवन्तं प्राप्नोतीति फलितोऽर्थः ॥ ४२ ॥

शत्रूनाह—राग इति । द्वाभ्याम् ॥ ४३ ॥

रजो ऽभिनिवेशः सत्त्वप्रकृतयो ऽपि बहुपुण्यकर्मप्रवृत्तिकारिणो हि साधनावस्थायां हिना अपि ध्याननिष्ठस्य शत्रव एवात आह—सत्त्वप्रकृतयः क्वचिदिति ॥ ४४ ॥

आत्मवशः स्वायत्तः उपकल्प इन्द्रियादिनामकाश्वादिपरिकरो यस्य तथा भूतं नृकायरथं यावद्धर्त्ते तावदेव गरिष्ठस्य गुरोश्चरणसेवया निशितं ज्ञानखड्गं दधत् अच्युतबलः भगवदनन्यभक्तः जितरागादिः सन् स्वाराज्यतुष्टः भगवद्ध्यानानन्देन तुष्ट इदं संसारं विजह्यात् मुक्तो भवेदित्यर्थः ॥ ४५ ॥

गुरुचरणसेवालब्धज्ञानभक्त्यभावे संसारनिर्वृत्तिर्न स्यादित्याह—नोचेदिति । असन्तो भगवद्ज्ञानभक्त्यनुपयुक्ताः ये इन्द्रियवाजिनः सूतश्च ते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयदस्युषु निक्षिपन्ति ते दस्यवस्तु अमुं रथिनम् उरु मृत्युभयं यत्र तस्मिन् तमोन्धे तमसा व्याप्ते संसारकूपे क्षिपन्ति ॥ ४६ ॥

एवं भगवद्ज्ञानभक्तिसम्पन्नो मुक्तो भवेत्तद्सम्पन्नः संसारं प्राप्नोतीत्युक्तम् । अथ प्रवृत्तकर्मनिष्ठतया तस्यैव भगवज्ज्ञानभक्तिहीनस्य धूममार्गेणावृत्त्या संसारं निवृत्तकर्मनिष्ठतया तस्यैव भगवज्ज्ञानभक्तिसम्पन्नस्यार्चिरादिमार्गेणामुक्तिं चाह—प्रवृत्तमिति, दशभिः । अमृतं मोक्षम् ॥ ४७ ॥

प्रवृत्तं कर्माह—हिंस्रमिति, द्वाभ्याम् । हिंस्रं श्येनादिकर्म पशुशब्दः पशुयागपरः सुतः सोमयागः ॥ ४८ ॥

भाषा टीका ।

बुधजन इस शरीर को ईश्वर का बनाया हुआ रथ कहते हैं, इसमें इन्द्रियें घोड़े हैं, इन्द्रियों का ईश अर्थात् नियन्ता एसा मन बागडोर है, विषयों की वासनायें गमन के मार्ग हैं, अथवा प्रदेश हैं बुद्धि सारथी है और चित्त इसका बन्धन है ॥ ४१ ॥

एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च ।
पूर्तं सुरालयाऽऽरामकूपाऽऽजीव्यादिलक्षणम् ॥ ४९ ॥
द्रव्यसूक्ष्मविपाकश्च[1] धूमो रात्रिरपक्षयः ।
अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ॥ ५० ॥
अन्नं रेत इति क्ष्मेश ! पितृयानं पुनर्भवः ।
एकैकश्येनानुपूर्वं[2] भूत्वा भूत्वेह जायते ॥ ५१ ॥
निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः ।
इन्द्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति ॥ ५२ ॥
इन्द्रियाणि मनस्यूर्मौ वाचि वैकारिकं मनः ।
वाचं वर्णसमाम्नाये तमोङ्कारे स्वरे न्यसेत् ।
ओङ्कारं बिन्दौ नादे[3] तं तं तु प्राणे महत्यमुम् ॥ ५३ ॥
अग्निः सूर्यो दिवा प्राह्णः [4]शुक्ला राकोत्तरं स्वराट् ।
विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात् ॥ ५४ ॥

भाषा टीका ।

और दशों प्राण अक्ष अर्थात् धुरी हैं अधर्म और धर्म ये दोनों चक्र (पहिये) हैं, उसमें अभिमानी जीव चढने वाला रथी है, इसका प्रणव (ओंकार) ही धनुष है और शुद्ध जीवस्वरूप ही बाण है, और लक्ष्य (निशाना) परमेश्वर है अर्थात् जैसे बाण निशाने में लगता है ऐसे ही जीव को परमेश्वर में लगना चाहिये ॥ ४२ ॥

राग, द्वेष, लोभ, शोक, मोह, भय, मद, मान, अवमान, असूया, माया, हिंसा, मत्सर, ॥ ४३ ॥

रजोगुण, प्रमाद, क्षुधा, निद्रा, ये सब जीतने के योग्य इसके शत्रु हैं। और रजोगुणी तमोगुणी प्रकृति तथा कचित् सतोगुणी प्रकृति भी शत्रु है ॥ ४४ ॥

जब तक मनुष्य देह रूप रथ अपने वश का और समर्थ है तब तक ही गुरुजनों के चरणों की सेवा से तीक्ष्ण ज्ञानरूप खड्ग को धारण कर परमेश्वर के बलका आश्रय लेकर सर्व शत्रुओं का अस्त (नाश) कर उपशान्त होकर ब्रह्मानन्द में मग्न होकर इस रथादिक की उपेक्षा कर देवे ॥ ४५ ॥

यदि अच्युत अर्थात् अपने भक्त के कार्य से कभी न चूकने वाले श्रीगोविन्द के बल का आश्रय न लेवेगा तो दुष्ट इन्द्रियरूप घोड़े और बुद्धिरूप सारथि ये सब इस रथी को उत्पथ अर्थात् कुमार्ग में लेजाकर विषयरूप चोरों में छोड देते हैं। वे चोर, घोड़ा और सारथि सहित इस रथी को बड़े मृत्यु के भय वाले संसार रूप घोर अंधकूप में डाल देते हैं ॥ ४६ ॥

वैदिक कर्म दोप्रकार का है एकप्रवृत्तकर्म, दूसरा निवृत्तकर्म तहां प्रवृत्तकर्म के आचरण से फिर पुनरावृत्ति होती है, और निवृत्ति प्रधान कर्म के आचरण से अपुनरावृत्ति पूर्वक अमृत (मोक्ष) को प्राप्त होता है ॥ ४७ ॥

हिंसा प्रधान श्येनयागादि द्रव्यमय काम्य अग्नि होत्रादि ये अशान्तिप्रद हैं, और दर्श, पौर्णमास, चातुर्मास्य पशुयाग सोमयाग ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हुतं वैश्वदेवम् प्रहुतं बलिहरणम् एतत्सर्वमिष्टमुक्तम् एतदेव यदि काम्यमशान्तिदञ्च तर्हि प्रवृत्ताख्यमित्यर्थः । आजीव्यं प्रपादि ॥ ४९ ॥

प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह, द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहान्तरारम्भको गन्धवत्त्विषको गच्छति य एष धूमो अपगतश्लोकः "इति नु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति पाठान्तरं द्रव्यशब्देन तेजोमात्राशब्दोक्तानीन्द्रियाणि ऊर्ध्वविपाकशब्देन हृदयाग्रप्रद्योतः तथा च श्रुतिः "स इमास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति तस्य हैतस्य हृदयाग्रं प्रद्योतते तेनैष आत्मा निष्क्रामति" इति धूमादिशब्दैस्तत्तदभिमा-

(१) द्रव्यसूक्ष्मविपाकश्च (२) एकैकश्येनानुपूर्वं च (४) दिवा वायुरिति विज० पा० । (३) बिन्दुनादं तु. इति विज० वीर० पा०॥

देवयानमिदं प्राहुर्भूत्वा भूत्वाऽनुपूर्वशः ।
आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्तते ॥ ५५ ॥
य एते पितृदेवानामयने वेदनिर्मिते ।
शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निभ्यो देवताः तत्रापक्षयः कृष्णपक्षः सोमः सोमलोकः तत्र भुक्तभोगस्यावरोहणप्रकारमाह—दर्श इत्यादि, विपरीत वक्षणा वा विच्छिन्नभोगक्षयशोकाग्निना देहक्षयेनादर्शनमुच्यते एतदुक्तं भवति भूतसूक्ष्मयुक्तो धूमाद्यातिवाहिकदेवताभिः सोमलोकं प्रापितस्तद्भोगावसाने विलीनदेहो वृष्टिद्वारेणौषधिवीरुधादिसाम्यापत्तिक्रमेण जायते एवं पुनर्भवहेतुः पितृयानं प्रवृत्तकर्ममार्ग इति ॥ ५० ॥

क्ष्मेश, हे भूपते ! पुनर्भवमेवाऽऽह—एकैकश्येन प्रत्येकं क्रमेण भूत्वा तत्तत्सान्निध्यं प्राप्येह भूमौ जायते ॥ ५१ ॥

तत्राधिकारिणमाह—निषेकादीनि । अन्यक्लिष्टादिकार्यं येवं जन्म लभत इत्यर्थः । निवृत्तकर्मनिष्ठस्योपासनादिविशेषमुपदिशन्नर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमाह—इन्द्रियेष्वित्यादिना । यद्वा द्रव्ययज्ञेषु हिंसाया दुर्निवारत्वादतिमुख्यं निवृत्तं कर्मैव दर्शयन्नाह—ज्ञानेन दीप्यन्त इति तथा तेषु इन्द्रियव्यापाराणामिष्टापूर्तादीनामिन्द्रियतावन्मात्रतां भावयन्तीत्यर्थः । एवमुत्तरत्रापि ॥ ५२ ॥

ऊर्मौ दर्शनादिसङ्कल्परूपे मनसि वैकारिकं विकारयुक्तं मनो वाचि विध्यादिलक्षणायां वाचा हि मनः कर्तृत्वादिविकारं भजति. वर्णानां समाम्नाये समुदाये तद्विशेषत्वाद्वाचः स्वरे अकारादिस्वरत्रयात्मके ओङ्कारं बिन्दौ तं च नादे प्राणे सूत्रात्मनि महति ब्रह्मणि ॥ ५३ ॥

अग्निरिति तत्तदभिमानिभ्यो देवताभ्यः प्राप्नोतीति पूर्ववत् दिवाऽहः प्राह्णस्तस्यैवान्तः राका शुक्लपक्षस्यान्तः यद्वा प्राह्णो राका इति च पुराणमतम् उत्तरं त्वयनम् स्वराट् ब्रह्मा एवं ब्रह्मलोकं गतस्य भोगावसाने मोक्षप्रकारमाह—विश्व इति । विश्वः स्थूलोपाधिः सः स्थूलं सूक्ष्मे विलाप्य सूक्ष्मोपाधिस्तैजसो भवति सूक्ष्मं कारणे विलाप्य कारणोपाधिः प्राज्ञो भवति कारणं च सर्वसाक्षित्वेनान्वयात्साक्षिस्वरूपे विलाप्य तुर्यो भवति तेषां च व्यभिचारिणां साक्ष्याणां क्षये शुद्ध आत्मा भवति मुच्यत इत्यर्थः ॥ ५४ ॥

यथेतरो भूत्वा निवर्तते तथा न निवर्तत इत्यर्थः ॥ ५५ ॥

वेदेन निर्मिते "ते धूममभिसम्भवन्ति" इत्यादिना "ते अर्चिरभिसम्भवन्ति" इत्यादिना च निश्चयेन विविच्य ज्ञापिते इत्यर्थः । जनस्थोऽपि देहस्थोऽपि न मुह्यति ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हुतं वैश्वदेवं प्रहुतं बलिहरणं तदेतत्सर्वं वैदिकं कर्म इष्टमित्याख्यम् यद्यप्येतदेव कर्म हिंस्रद्रव्यमयं हिंसा विषयद्रव्यप्रचुरम् । हिंस्रमिति पाठे पश्वादिहिंसागर्भं पुरोडाशादिद्रव्यप्रचुरं च काम्यं स्वर्गादिकामार्थमशान्तिदं पूर्वोक्तरागाद्यनिवृत्तिदं स्यात्तदा प्रवृत्ताख्यमकाम्यं शान्तिदं स्यात्तदा निवृत्ताख्यमित्यर्थः । अथ पूर्तसंज्ञकं कर्माह—पूर्तमिति । देवालयादिनिर्माणरूपं कर्म पूर्तम् आजीव्यमाजीविका ॥ ४९ ॥

तत्र प्रवृत्तिधर्मपरायणस्य त्रैवर्णिकस्य तत्फलानुभवाय लोकान्तरारोहणमार्गं फलानुभवाऽवसाने ततः पुनरवरोहणमार्गमेवं सञ्चरतो भूतसूक्ष्मपरिष्वक्तत्वं चाह—द्रव्येत्यादिना, सार्धद्वयेन । निषेकादिश्मशानान्तैः गर्भाधानादि श्मशानान्तैः संस्कारैः संस्कृतो द्विजस्त्रैवर्णिकः इष्टापूर्तदत्तकारी देहत्यागानन्तरं द्रव्यसूक्ष्मविपाकः द्रव्याणां पृथिव्यादिभूतानां सूक्ष्मा विपाकाः सूक्ष्मावस्थाः यस्य सूक्ष्मावस्थपृथिव्यादिभूतयुक्तः भूतसूक्ष्मपरिष्वक्त इति यावत् हे क्ष्मेश, पृथिवीपते ! धूमादयः शब्दास्तदभिमानिदेवतापरा तत्र अपक्षयः अपरपक्षः अयनं दक्षिणं दक्षिणायनं सोमश्चन्द्र इति शब्दः प्रत्येकमन्वेति । धूम इति रात्रिरिति नानैकशः आनुपूर्व्येण भूत्वा भूत्वा । भूप्राप्तावात्मनेपदीति भवतिरत्र प्राप्त्यर्थकः प्राप्य प्राप्येत्यर्थः । धूमादिक्रमेण चन्द्रं प्राप्य तत्रामृतमयशरीरयुक्त इष्टादिकर्मफलमनुभूय ततः दर्शः दर्शस्य चन्द्रकलाक्षयहेतुत्वादिना दर्शशब्देन चन्द्रं प्राप्तस्याऽमृतमयशरीरनाशो लक्ष्यते विनष्टामृतमयशरीर इत्यर्थः । चन्द्रमसः स्थानात् क्रमेणौषध्यादीन् प्राप्येह लोके जायते एतच्च पितृयानं पुनर्भवहेतुरित्यर्थः । यद्वा चन्द्रपर्यन्तं पितृयानं ततो रेतः पर्यन्तं पुनर्भवयानमित्यर्थः । तत्र दक्षिणायनसोमयोर्मध्ये पितृलोकः आकाशश्च द्रष्टव्यः ओषधेः पूर्वं क्रमेणाकाशवायुधूमाभ्रमेघवर्षाणि द्रष्टव्यानि तत्रारोहणं धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशचन्द्रक्रमेण. अवरोहणन्तु चन्द्रमसः स्थानादाकाशवायुधूमाभ्रमेघवर्षौषधिवीरुदन्नतराश्वरेतःक्रमेणेत्यर्थः । तथा च श्रूयते छान्दोग्ये "अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड्दक्षिणैति मासांस्तानेते संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति तस्मिन् यावत्सम्पातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वा अभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षन्ति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इहं व्रीहियवा ओषधिवनस्पतयस्तिलमाषा आयन्तेऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो यो रेतः सिञ्चति तद्भूय एव भवति तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा" इति. तत्रारोहणदशायां धूमाद्यभिमानिदेवतालोकगमनमेव धूमादिभावः, अवरोहणे त्वाकाशवायुधूमाभ्रमेघवर्षेषु तद्भावो नाम तत्संसर्गकृततत्सादृश्यापत्तिरेव "तत्स्वाभाव्यापत्तिरुपपत्तेः ३।१।२२। इति शारीरकन्यायात् व्रीह्यादिभावो नाम जीवान्तराधिष्ठितव्रीह्यादिसंश्लेषमात्रम् "अन्याधिष्ठिते पूर्ववदभिलापात् ३।१।२४। इति न्यायात् एवंबान्धवः। द्रव्यसूक्ष्मविपाक इति. द्रव्यसूक्ष्मविपाकादय इत्येते सोमपर्यन्ताः पितृयानं दर्शितवो रेतःपर्यन्ताः पुनर्भवः गर्भाधानादिश्मशानान्तैः संस्कारैः इष्टाधिकारी आनुपूर्व्यात्क्रमेण भूत्वाभूत्वा राज्यादीन् प्राप्य प्राप्य पुनरिह जायते इति ॥ ५० ॥ ५१ ॥

अथापुनर्भवं देवयानं वक्तुं तेन जिगमिषोर्निवृत्तधर्मनिष्ठस्य तावत् कृत्यमनुसन्धानमाह—इन्द्रियेष्विति ज्ञानाग्निज्ञानदीपेषु ज्ञानदीपकेषु चक्षुरादीन्द्रियेषु क्रियायज्ञान्कर्मेन्द्रियव्यापारान् जुहोति देवयानेन जिगमिषव इति शेषः। चक्षुरादिभिर्ज्ञानेन्द्रियैः पाणिपादादिकर्मेन्द्रियाणि नियच्छेयुरित्यर्थः। इन्द्रियाणि चक्षुरादीनि ज्ञानेन्द्रियाणि सङ्कल्पविकल्पादिरूपोर्मिमति मनसि जुहोति मनसा तानि नियच्छेयुरित्यर्थः। वैकारिकं सत्त्वोत्तरं वाचि शास्त्रात्मिकायां मनः मनसः उच्चारणप्रवर्तित निरुन्ध्यादित्यर्थः। वाचं वर्णसमाम्नाये पञ्चाशदक्षरात्मिकामनुसन्दधीरन् वर्णसमाम्नायमोङ्कारेऽन्तर्गतं विदुः तमोकारं बिन्दुनादे चतुर्थ्यां मात्रायां बिन्दुनादञ्च प्राणे प्राणसहचारिणि मकारवाच्ये जीवे वाचकत्वेनान्तर्भावयेयुः। अमुं जीवं महति महदात्मनि परब्रह्मणि समर्पयेयुरिति मुमुक्षोरनुसन्धानप्रकार उक्तः ॥ ५२ ॥ ५३ ॥

अथ तस्य गतिहेतुभूतमर्चिरादिमार्गमंशतो दर्शयति—अग्निरिति। अग्न्यादिशब्दास्तदभिमानिदेवतापराः अत्र न क्रमविवक्षा श्रौतक्रमविरोधात् ननु सूर्योऽग्नेरनन्तरं दिवसादिभ्यः पूर्वं श्रूयते किन्त्वेवम् "तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयत्येष देवयानः पन्थाः" इति । अत्र संवत्सरादनन्तरं वायुं विद्युतोऽनन्तरं वरुणेन्द्रौ च जानीयात् कौषीतकिब्राह्मणे "एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकम्" इति श्रवणात्. अत्राऽमानवः प्रजापतिर्वा अयं च सकलश्रुत्यविरोधेन निर्णीतः क्रमो वरदगुरुभिरभिहितः "अग्निरहःसितपक्षानुद्गयनाब्दमरुदर्केन्दून् । अपि वैद्युतवरुणेन्द्रप्रजापतीनातिवाहिकानाहुः" इति. पूर्वाह्णोराकाचानधीतशाखान्तरेणामन्तव्यौ उत्तरम् उत्तरायणम् एवं मुक्तप्राप्यभगवल्लोकमार्गो दर्शितः तत्र प्राप्यस्य भगवतश्चतुर्व्यूहविशिष्टतामाह—विश्व इति। यथा सर्वब्रसंहितायाम् "सृष्टिस्थित्यन्तकारिण्यः शक्तयस्तत्र ऊर्जिताः" इत्युपक्रम्य—

> "अकारशक्तिर्विश्वाख्या उकाराख्या तु तैजसी ।
> मकारशक्तिः प्राज्ञाख्या तासां रूपं पुनःशृणु" ॥

इत्यादिना जाग्रदाद्यवस्थान्वयादिकमुक्त्वा—

> "एतास्तिस्रो दशास्तिस्रः शक्तीः संप्रीणयन्ति ताः ।
> अनिरुद्धादिरूपास्ताः भोक्तुः शक्तिर्विचिन्तयेत् ॥
> अर्धमात्राऽभिधा दिव्याऽप्रकाशार्थप्रकाशिका ।
> वासुदेवमयीं शक्तिं विद्धि तामनुपस्कृताम्" ॥ इत्युक्तम् ।

अतः स्थूलाधिष्ठाता जाग्रदवस्थानिर्वाहकोऽनिरुद्धो विश्वः स्थित्यधिष्ठाता स्वप्ननिर्वाहकः प्रद्युम्नस्तैजसः संहृत्यधिष्ठाता सुषुप्तिनिर्वाहकः संकर्षणः प्राज्ञः एते चाऽकारोकारमकारवाच्याः। सर्वकारणभूतः सर्वशक्तिर्मोक्षप्रदः प्रणवार्धमात्रावाच्यो वासुदेवस्तुर्यश्चतुर्थमात्रासहितप्रणवस्य पूर्वमनुसन्धेयतया प्रकृतत्वादेवं तस्यार्थः फलदशायां प्राप्यतयोक्तः। इदं प्रदर्शनार्थमुक्तम् । परव्यूहविभवादिसर्वाऽवस्थाविशिष्टो भगवान् मुक्तप्राप्य इत्यर्थः । समन्वयात्सर्वेषां व्यूहादीनां प्राप्यान्तर्भावादित्यर्थः ॥ ५४ ॥

इदं देवयानं प्राहुर्वेदान्ता इति शेषः। आत्मयाजी परमात्मोपासकः अनुपूर्वशः क्रमेणाऽर्चिरादीन् प्राप्य उपशान्तः निःशेषनिवृत्त आत्मा प्रकृतिर्यस्य तादृशः आत्मनि परमात्मनि स्थितः आधेयतया स्थितः आत्मन्याविर्भूतापहतपाप्मत्वादिगुणाष्टकयुक्तब्रह्मात्मके स्वस्वरूपे स्थितः उक्तविधब्रह्मशेषत्वेनात्मानमनुभवन्नित्यर्थः। पुनस्ततो न निवर्तते एवं देवयानपथगो भूत्वा न निवर्तेत जन्ममरणादिकं तद्धेतुभूतपुनरावृत्तिं च न प्राप्नोतीत्यर्थः ॥ ५५ ॥

> "नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
> तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन !" ॥

इति श्रीभगवदुक्तमार्गद्वयचिन्ताफलमाह—य एते इति। यः पुमान्मुमुक्षुर्वेददर्शिते वेदबोधिते एते पितृदेवानां अयने वर्त्मनी देवयानपितृयाने शास्त्रात्मकेन चक्षुषा वेद सोऽपि पुमान्मुह्यति जनस्थोऽपीऽति पाठे, देहस्थोऽपीत्यर्थः। स्वानुष्ठेयभगवद्भक्तियोगेन मोहं न प्राप्नोतीत्यर्थः ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हुतं चैश्वदेवं प्रहुतं हुत्वा बलिहरणमेतद्द्वयमिदं सुरालयादिविपाकान्ताः पूर्तम् आजीव्याः सर्वेऽपि कुट्टिममूला विकल्पशाखाः तरवः ॥ ४९ ॥

द्रव्यसूक्ष्मविपाकः पुरोडाशादिद्रव्यजनितापूर्वं फलं धूमइत्यादिना धूमादिशब्दवाच्यदेवतास्त्वात्र गृह्यन्ते इति ज्ञातव्यम् अपक्षयः कृष्णपक्षः सोमश्चन्द्रः पर्वदर्शाशब्देन तत्प्रयुक्तकर्मविशेषो ऽत्र तु तदभिमानिदेवा उच्यन्ते. अनेन मार्गेण गतस्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

गतिप्रकारमाह—ओषधीति । पितृयाने गतः अभ्रवृष्ट्यादिद्वारेण भुवं प्राप्तः ओषध्यादिर्भवति ॥ ५० ॥

अन्नरूपेण पितरं प्रविश्य रेतोरूपेण मातरं चेति पुनः पुनर्भवतीति पुनर्भवः, स्यादिति शेषः। न केवलमोषध्यादिभावोऽस्य, किन्तु धूमादिभावोऽप्यस्तीति भावेनोक्तं विशदयति—एकैकश्येति। अत्रानुपूर्व्यात्क्रमात्। "अथ इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति" इत्युपक्रम्य 'यो यो ह्यन्नमत्ति यो यो रेतः सिञ्चति तद्भूय एव भवत्यन्ते" अनेनायमर्थः प्रपञ्च्यते ॥५१॥

अत्र च "त इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा" इत्यादेरभिप्रायं दर्शयति—निषेकादीति। निषेको रेतःसेकः अनेनापि पुनर्भव इत्यस्य भावो विवृत इति ज्ञायते दक्षिणायनपर्यायपित्रादिमार्गाभिमानिदेववाचकं वह्निरूपं तन्मार्गगतानित्थंभूतसाधनमाह—इन्द्रियेष्विति। क्रियावत्त्वात् क्रियात्मकयज्ञाभिमानिदेवान् ज्ञानं दीपयन्ति जनयन्तीति ज्ञानदीपानि ज्ञानमेव दीपो येषां तानि तथा तेष्विन्द्रियेष्विन्द्रियाभिमानिदेवेषु जुहोति हवनं नाम तत्तद्वशत्वेन स्मरणं, तदुक्तम्—

"यज्ञाभिमानिनो देवान् स्मरन्तीन्द्रियमानिनम्।
वशगांस्तान्मनो मानिसुरेन्द्रस्य वशे स्थितान् ॥
वेदात्मिकायाः पार्वत्यास्तं तां रुद्रवशे स्थिताम्।
वर्णत्रयात्मके रुद्रं शेषे तु प्रणवात्मके ॥
बिन्दुरूपे सरस्वत्यां तं तां तस्यां पुनर्न्यसेत्।
मूलस्थनादरूपायां तां वायौ तं जनार्दने।
प्रकृत्यामथवा प्राज्ञां तामेव पुरुषोत्तमे" ॥

इति ॥ ५२ ॥

इन्द्रियाणि तदभिमानिदेवान्मनसि मनोऽभिमानीन्द्रवशे तानेवं पूर्ववत्स्मरन्तीति शेषः। त्रिशिरप्राकारपराक्रमलक्षणं कर्मास्यास्तीति वैकारिकं मनोऽभिमानिनमिन्द्रं वाचि वेदाभिमानिन्यां पार्वत्यां तामुमां वर्णसमाम्नाये पदवर्णस्वरक्रमाणां सम्यगाम्नायः सम्प्रदायोऽनन्यथापाठलक्षणो यस्मिन् स तथा अकारोकारमकाराणां त्रयाणां वर्णानां समाम्नायो मेलनं यस्मिन् ओंकारे स तथा तस्मिन् तदभिमानिनि रुद्रं स्थितामिति शेषः। तुशब्देन भार्याभर्तृभावं पूर्वस्मात्द्विशिनष्टि; तं रुद्रम् ओङ्काराभिमानिनि स्वं परमात्मानं रमयतीति स्वरः शेषः तस्मिन् स्थितं न्यसेत् मनस्याद्विषयं करोति ॥ ५३ ॥

तमोङ्कारं शेषं बिन्दुनादे बिन्दुनादरूपसरस्वत्यां तदाधारत्वेन स्थितं तुशब्देन पूर्वयोरेकत्र स्थमत्र सस्त्राभिगाधं सूचयति—तां बिन्दुरूपां मूलाधारस्थनादरूपायां प्रकृतिनाम्न्यां सरस्वत्यामेकीभूय स्थितिशब्देन तयोरेकत्वं दर्शयति—तं तां नादरूपां प्राज्ञां प्रकृष्टानन्दरूपे वायौ स्थितामत्रापि तत्र भार्याभर्तृभावमाह—अमुं वायुं महति जनार्दने स्थितं स्मरेत् अथवा प्राणनामानं वायुं महति प्रधाने प्रकृतिशब्दवाच्ये स्थितं अमुमक्षरं प्रकृतिनामानं महति पुरुषोत्तमे स्थितमिति महति शब्दो द्विरावृत्त्या व्याख्येयः एतत्सर्वं बिन्दुरूपसरस्वत्यां तं तां तस्यां पुनर्न्यसेत् इत्यादिपूर्वोक्तेन मानेन सविस्तरमुक्तम्. इदानीमर्चिरादिमार्गे देहादुत्क्रान्तस्य ज्ञानिनः प्राप्यान् देवानाह—अग्निरिति। दिवा दिवसाभिमानी शुक्लः शुक्लपक्षाभिमानी राका पूर्णिमाद्यभिमानिनी उत्तरमुत्तरायणाभिमानिनी स्वराडिन्द्रः ॥ ५४ ॥

अत्र न केवलमग्न्यादय एव प्राप्याः, अपि तु विश्वाद्या अनिरुद्धाद्या भगवतो मूर्तिविशेषाश्च प्राप्या इत्याशयेनाह—विश्व इति। अथशब्देनाऽनिरुद्धादिग्रहणं तेषामुभयेषां विष्णुरूपत्वं सूचयति,

"विश्वाद्या अनिरुद्धाद्यास्त द्विधा संप्रकीर्तिताः।
विष्णुरूपास्तदन्ये च तान्सर्वान्याति मोक्षगः" इत्युक्तेः

किञ्चान्ये च दिवस्पुत्रास्तान्निकटवर्तिनः सन्ति तेऽप्यथशब्देन सूचिताः—

"तदन्ये च दिवस्पुत्राः सर्वे च द्युसमीपगाः।
ते दिवं प्रापयन्त्येनं स वायुं स हरिं पृथक् ॥
विश्वादिरूपं तुर्यश्च वासुदेवश्च नापरः"।

इत्युक्तेः गतिक्रमोऽप्यनेन ज्ञातव्यः। न परं विश्वादिकमेवाप्तव्यं किन्तु तन्मूलरूपो हरिराप्तव्य इत्याह—आत्मेति। आत्मा विश्वादिरूपो हरिः सम्यगभ्येति अनेन ज्ञानेनेति सम्बन्धः तदुक्तं स हरिं पृथग्विश्वादिरूपमिति वासुदेवो तुर्यादन्यो नेत्याह—तुर्य इति। तुर्य आत्मा वासुदेवः "अत सातत्यगमने" इति धातोः सततगमनं व्याप्तिः "यश्चाऽस्य सततो भावः" इति श्रुतेः सर्वत्र व्यसनशीलत्वात् क्रीडारूपत्वात् जपाकुसुमाद्युपाध्यनाविलस्फटिकवन्निर्मलज्ञानरूपत्वाद्वासुदेवः—

"शुद्धस्फटिकसंकाशं वासुदेवं निरञ्जनम्" इति स्मृतिः।
एकात्म्यप्रत्ययं सारं प्रपञ्चोपशमं शिवम्।
अद्वैतं तुर्यं मन्यन्ते स आत्मा स विज्ञेयः" ॥ इति स्मृतेः

तुर्यश्च वासुदेवश्च नापर इति च किञ्च मार्गस्थानां सर्वेषां देवानामपि परमात्मनि समन्वयोऽस्तीति ज्ञापनाय समन्वय इत्युक्तम् एतस्य नाम निर्दिशति। देवयानमिति। "संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च' इत्यारभ्य 'एतस्माच्च पुनरावर्तन्त इत्येष निरोधः" इत्यन्तं वेदान्ताः प्राहुरित्यन्वयः। अस्यफलमाह भूत्वेति। अनुपूर्वशः क्रमेणोपर्युपरि सुखादिभिरधिको भूत्वात्मस्थो मुक्तो न निवर्तत इत्यन्वयः कुत आत्मयाजी परमात्मपूजकत्वात् पुनरावृत्तिलेशोऽपि तस्य नास्तीति भावेनाह, उपशान्तात्मेति. पूर्णानन्दस्वरूपः धूमादिमार्गवदस्यापि पुनरावृत्तिर्भविष्यति किमित्यतो भूत्वेति ॥ ५५ ॥

ननु, किमेतज्ज्ञानेन प्रयोजनम् ? येनावश्यं वक्तव्यतामियादिति तत्राह—य एत इति। जनस्थो देहस्थः "तद्य इत्थं विदुर्ये चामरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्ति" इत्यर्थवेदना शास्त्रेण न केवलं मोहं प्राप्नोति नीचां गतिमपि न यातीत्यतोऽपीत्युक्तं "भक्तिमार्गविहीनो नीचां गतिमवाप्नुयात्" इति स्मृतेः ॥ ५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इष्टं वैश्वदेवं प्रहुतं बलिहरणम् एतत् सर्वमिष्टमुच्यते आ- जीव्यं प्रपादि ॥ ४९ ॥

प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह—द्रव्येति। सोमपर्यन्तम् आरोहणे सोपानानि दर्शयति—प्रथमं द्रव्यस्य चरु- पुरोडाशादेः सूक्ष्मो विपाकः परिणामः देहान्तरारम्भकः येन परि- त्यक्तो गच्छति स एव भूतावयवशब्देनोक्तस्तं प्रथमं प्राप्नोति यथा हि "इह तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति. द्रव्यसूक्ष्म- विपाकश्चेति पाठे द्रव्यशब्देन तेजोमात्राशब्दोक्तानीन्द्रियाणि ऊष्म- विपाकशब्देन हृदयाग्रप्रद्योतः तदा च तत्कर्मसाधनीन्द्रियाणां प्रलयं प्राप्नोति ततो निर्याणकाले हृदयाग्रप्रद्योतं प्राप्नोति ततो धूम- मित्येव क्रमः। तथा च श्रुतिः "य इमास्तेजो मात्राः समभ्याद- दानो हृदयमेवानुक्रामति" तथा च इति तस्य 'हैतस्य हृदय- स्याग्रं प्रद्योतते तेनैष आत्मा निष्क्रामति" इति धूमादिशब्दैस्तत्तदभि- मानिन्यो देवता उच्यन्ते ततो धूमाभिमानिनीं देवतां प्राप्नोति ततो रात्र्यभिमानिनीमित्येवं अपक्षयः कृष्णपक्षः सोमः चन्द्र- लोकः धूमाद्यातिवाहिकदेवताभिः सोमं लोकं प्रापितो भोगान् भुङ्क्ते इत्यर्थः। तत्र भुक्तभोगस्य तस्यावरोहप्रकारमाह—दर्श इति। चन्द्रक्षयवत्या अमावास्यया भोगदेहक्षयो लक्षितः ततो वृष्ट्या- दिक्रमेण ओषधिलतादिः ॥ ५० ॥

ततोऽन्नं तदेव भुक्तं रेतः हे क्ष्मेश ! उक्तमवरोहप्रकारं स्पष्टयति—एकैकश्येनेति। क्रमशोऽवध्यादिकं भूत्वेत्यर्थः ॥ ५१ ॥

तत्र मुख्यं कर्माधिकारिणमाह—निषेकादिष्विति। प्रवृत्तकर्म- निष्ठमुक्त्वा निवृत्तिकर्मनिष्ठस्यार्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमाह, इन्द्रियेषु ज्ञानेन दीप्यन्ते इति तेषु क्रियायज्ञान् जुहोति इन्द्र- पूर्वादीनां क्रियायज्ञानाम् इन्द्रियव्यापारमयत्वादिन्द्रियतादात्म्या- त्तान् भावयतीत्यर्थः। एवमुत्तरत्रापि ऊर्मौ शोकमोहादितरङ्गा- त्मके तादृशे मनो वाचि विषयादिलक्षणायां तथैव मनः कर्तृ- त्वादिविकारतरङ्गवतीत्यर्थः। वर्णानां समाम्नाये समूहे तद्विक- ल्पाद्भावः स्वरं स्वरत्रयात्मकं तत्र त्रिवृन्नादे तत्र नादं प्राणा- सूत्रात्मनि अमुं प्राणं महति ब्रह्मणि ॥ ५२ ॥ ५३ ॥

अग्निरिति तत्तदभिमानिन्यो देवताः ताः प्राप्नोतीति पूर्ववत् दिवा अहः अह्नः तदैवान्तः शुक्लः शुक्लपक्षः राका तदन्त्या- तः उत्तरमुत्तरायणं स्वराट् ब्रह्मा एवं ब्रह्मलोकं गतस्य तस्य भोगावसाने मोक्षप्रकारमाह—विश्वः स्थूलोपाधिः स्थूलं सूक्ष्मे प्रविलाप्य सूक्ष्मोपाधिकस्तैजसो भवति सूक्ष्मं च कारणे प्रविलाप्य कारणोपाधिः प्राज्ञो भवति कारणं च सर्वसाक्षित्वेनान्वयात् साक्षिस्वरूपे विलाप्य तुरीय आत्मा भवति मुच्यत इत्यर्थः ॥ ५४ ॥

अर्चिरादिमार्गेभ्यो भूत्वा अनुपूर्वशः आनुपूर्व्येण क्रमेण ॥ ५५ ॥

वेदद्वारा निर्मिते "तेजसा धूममभिसम्भवन्ति" इत्यादिना "तेऽर्चि- रभिसम्भवन्ति" इत्यादिना च जनत्वोऽपि देहन्त्योऽपि ॥ ५६ ॥

—— —

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इष्टं यज्ञोदय प्रहुतं बलिहरणमित्येतान् पूर्तन्तु सुरालयादि तथाजीव्यं जलाशयारामादि एतत् प्रवृत्ताख्यम् भवति ॥ ४९ ॥

प्रवृत्तकर्मफलं जन्ममरणलक्षणं संसारं धूममार्गारोहावरो- हाभ्यां दर्शयति—द्रव्येत्यादिद्वाभ्याम्। द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहादिदेहारम्भको भूतसूक्ष्मात्मक- स्तेन तद्वाहनो जीवो ब्रह्यते धूमादिशब्दैस्तत्तदभिमानिन्यो देवताः बोध्याः अपक्षयः कृष्णपक्षः सोमः सोमलोकः भूतसूक्ष्मावृतो जीवः धूमाद्यातिवाहिकदेवताभिः सोमलोकं नीतो भोगान्भुङ्क्ते स पुनर्भोगावसाने यथेह देहं प्राप्नोति तथा ऽवरोहप्रकारं सूचयति. दर्श इति। दर्शे चन्द्रो यथा अदृश्यो भवति तथा अदृश्यः विलीन- देहवेह इत्यर्थः। उपमादीनां लोपात् लुप्तोपमालङ्कारः ततो मेघा- दिद्वारा ओषधिवीरुधः ओषध्याद्याश्लिष्टो भवति ॥ ५० ॥

ततो ऽन्नं भवति अन्नसंश्लिष्टो भवति ततो रेतो भवति सोऽपि पितृभुक्ते तद्वीर्यसंश्लिष्टो भवति एवमेकैकश्येन प्रत्येकं क्रमेणा- ऽनुपूर्वं भूत्वा भूत्वा तत्तत्संश्लेषं प्राप्य इह मातृयोनौ जायते हे क्ष्मेश ! इति पितृयाणं पुनर्भवापवर्त्तनजन्ममरणप्रवाहलक्षणसं- सारहेतुरित्यर्थः ॥ ५१ ॥

तदधिकारिणमाह—निषेकादीत्यर्द्धेन। अथ निवृत्तकर्मनिष्ठा देव- यानेन परब्रह्मभावापत्तिलक्षणां मोक्षं प्राप्नुवन्तीति वक्तुं तेषां स्थूल- देहत्यागपरतायां यत्कृत्यं तदाह—इन्द्रियेष्विति, द्वाभ्याम्। ज्ञानेन जीवेन दीप्यन्ते इति तथा आत्मप्रकाशितेषु इत्यर्थः। क्रियायज्ञान् क्रिया मुमुक्षुयोग्यं प्रत्यहमनुष्ठेयं निवृत्तं कर्म तद्रूपान् यज्ञान् भगवदाराधनात्मकान् जुहोति इन्द्रियावयवात् भावयति ॥ ५२ ॥

इन्द्रियाणां ऊर्मौ इन्द्रियाणां प्रवर्तकं ऊर्मिरूपं तत्सङ्क- ल्परूपं यन्मनस्तस्मिन् वैकारिकम् ऊर्मिरूपं मनः वाचि उपदेश- निधौ मनसो नियोजकायां च वर्णसमाम्नाये तं स्वरं ओङ्कारं ओंकारं बिन्दौ तस्मिंस्तं प्राणे भगवद्विश्वासे ऽमुं प्राणं यद्रूप- पूर्वरूपं महति "एतस्यैव महतो भूतस्य निश्वसितं यदृग्वेदः" इत्या- दिश्रुतिप्रोक्ते परे ब्रह्मणि जुहोतीत्यन्वयः ॥ ५३ ॥

अथैवंविधा येन मार्गेण भगवन्तं प्राप्नुवन्ति तमेकदेशकथ- नतः सूचयति—अग्निरित्यर्द्धेन। अग्निः सूर्यः दिवा दिनाभिमानी देव- ताः प्राह्णस्तदन्तेऽन्तकस्तदन्तर्गत एव बोध्यः शुक्लपक्षः राका तदन्तेन- त्यर्थेना सम्पूर्णचन्द्रा पूर्णमासी आन्याविशेषया पृथङ्निर्देशः उत्तरमुत्तरायणम् स्वराट् प्रजापतिः एवं मार्गं सूचयित्वा गन्तुः स्वरूपं अवस्थामात्रिकेन दर्शयति—विश्व इत्यर्द्धेन। विश्वो जाग्रदवस्थासाक्षी स एव तैजसः स्वप्नावस्थासाक्षी स एव प्राज्ञः सुषुप्त्यवस्थासाक्षी अत एव तिसृषु अवस्थासु अनन्वयात् अनुगत- त्वात् तुर्यः अवस्थात्रयातिगः आत्मा जीवात्मस्वरूपः अवस्थात्रय- गतान् भावः सर्वावस्थासाक्षी ज्ञानस्वरूपो गन्ता इति फलितो- र्थः। क्रमतत् लिङ्गात् स्थूलशरीरात्सूक्ष्मस्वरूपात् निष्कास्य स्वयं- दर्शनाक्षर यदा परं पदं गन्तुमिच्छति तदार्चिरभिमानिनाऽऽ- तिवाहिकेन सूर्यस्कुल दिनाभिमानिनं नीतस्तदैव तेन पक्षाभिमा- निनं तेन च षण्मासाभिमानिनं तेन संवत्सराभिमानिनं तेन वायुं

आद्यावन्ते * जनानां सद्बहिरन्तः परावरम् ।
ज्ञानं ज्ञेयं वचो वाच्यं तमो (१) ज्योतिस्त्वयं स्वयम् ॥ ५७ ॥
(२) आबाधितो ऽपि ह्याभासो यथा वस्तुतया स्मृतः ।
दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितम् ॥ ५८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेन स्वस्मिन् लिङ्गं दृत्वाऽऽहित्यं तथैव तेन चन्द्रमसं तेन विद्युदभिमानिनं देवमाविशेषं सोमसलमञ्च वरुणेन्द्रप्रजापतीन् प्राप्य प्राकृतमण्डलं निर्भिद्य विरजां प्राप्नोति तदा परस्मिन् लिङ्गशरीरं हित्वा तां नदीमतीत्वा परब्रह्मलोकं प्रविश्य परब्रह्मसाधर्म्यं प्राप्नोतीति ॥ ५४ ॥

आत्मयाजी परमात्मनि तदंशत्वेनात्मनिक्षेपकारी पूर्वोक्तलक्षणो गत्वा अग्न्यादिकमनुपूर्वशो भूत्वा भूत्वा येनात्मकथः मुक्तगस्य परमात्मस्थः सन् न निवर्त्तते तदिदं देवयानं प्राहुरित्यन्वयः ॥ ५५ ॥

अनयोर्मार्गयोर्हेयोपादेययोर्ज्ञानमात्रेण बद्धो ऽपि विगतमोहो भवति किमुत हेयं विहायोपादेयेन मोक्षं लब्ध्वा न विमुह्यतीत्याह, य इति । "ते धूममभिसम्भवन्ति" इत्यादिना "ते ऽर्चिषमभिसम्भवन्ति" इत्यादिना च वेदेन निर्मिते निर्णीते पितृदेवानां अयने मार्गौ यो वेद स जनस्थो जनानां मध्येवर्त्तमानो ऽपि बद्धावस्थायामपीत्यर्थः । न विमुह्यति पितृयाने क्वचिद् देवयाने क्वचित् च न करोति किमुत मुक्तः ॥ ५६ ॥

भाषा टीका ।

हुत प्रहुत अर्थात् वैश्वदेव, बलिहरण, ये सब कर्म इष्ट नाम से प्रसिद्ध है, और मंदिर बगीचा कूप तडागादि कर्मों को आपूर्त कहते हैं और यही सब कर्म कामना से किया जाय तो प्रवृत्तकर्म कहाते हैं ॥ ४९ ॥

द्रव्ययज्ञका फल यही है कि--याज्ञिकपुरुष चरुपुरोडाशादि के सूक्ष्म विपाक अर्थात् शरीरान्तर से धूमाभिमानी देवके लोक को जाताहै, वहांसे कृष्णपक्ष के अभिमानी देवके लोक को जाता है, वहां से दक्षिणायन के अभिमानी देवलोक को जाताहै, वहांसे सोमलोक को जाताहै, इस प्रकार भोग भोगने के पश्चात् विलीनदेह होकर वृष्टिद्वारा औषधि वीरुधादि के भावको प्राप्तहोकर, हे राजन्! अन्न वीर्य आदि क्रमसे फिर इसी संसार में उत्पन्न होताहै बस इसी प्रकार प्रवृत्तकर्म के आचरण से इसी प्रकार हो होकर फिरफिर जन्म लेताहै ५० ५१ ।

निषेकसे आदि लेकर श्मशानान्त संस्कारो से संस्कृत द्विज लोग ज्ञान के प्रकाशक इन्द्रियों में क्रिया यज्ञों को हवन करते हैं अर्थात् ज्ञानेन्द्रियों से कर्मेन्द्रियों के व्यापारों का नियमन करते हैं ॥ ५२ ॥

और ज्ञान इन्द्रियों संकल्पात्मक मन में और सात्त्विक मन को शास्त्ररूप वाणी में और वाणी को पञ्चाशत् अक्षरात्मक वर्ण समुदाय में इसको अक्षरात्मक ओंकार में उसको चतुर्थी मात्रा बिन्दुनादमें उसको प्राण सहचारी जीवमें न्यास करे अर्थात् अनुसन्धान करे ॥ ५३ ॥

इस प्रकार निवृत्त कर्मानुष्ठानी ज्ञानी पुरुष अर्चिरादि मार्ग से जाते समय प्रथम अग्नि लोक को जाता है फिर सूर्य लोक को पश्चात् दिवसाभिमानी देव के लोक को फिर शुक्ल पक्षाभिमानी देव के लोक को अनंतर उत्तरायणाभिमानी देव के लोक को, इत्यादि क्रम से मोक्ष में प्राप्त होकर स्वराट् होता है ॥ (अर्थात् उत्तरायणाभिमानी देव लोक से वर्षाभिमानी देव लोक में वहां से वायु लोक में वहां से सूर्य लोक में वहां से चंद्र लोक में वहां से विद्युत लोक में वहां से वरुण लोक में वहां से इन्द्र लोक में वहां से प्रजापति साक्षात् ब्रह्मा के लोक में पूजित होकर आतिवाहिकों के द्वारा सीमांत में विरजा स्नान कर श्रीवैकुंठ में प्राप्त होकर नित्य सेवा पात्र को होता है, वहां पर भी अनिरुद्ध, प्रद्युम्न, संकर्षण रूप से आप पर ब्रह्म विराजते हैं और इन सबों का जिसमें समन्वय ऐसे पूर्ण पुरुषोत्तम श्रीवासुदेव भगवान सपरिकर विराजते हैं उन को प्राप्त होता ॥ ५४ ॥

सकल वेदांत इसको देवयान कहते हैं । आत्मयाजी अर्थात् परमात्मो पासक पुरुष क्रम से इस देवयान को प्राप्त होकर अग्नि भूत गुणाष्टक होकर परमात्मा में आधेय विधेय रूप से स्थित होकर सर्व विधमें वा परायण होकर फिर इस संसार के दुःखों को कभी नहीं प्राप्त होता है ॥ ५५ ॥

जो पुरुष ईश्वर निर्मित इन दोनों पितृयान देवयानों को शास्त्र रूप चक्षु से जानता है वह संपूर्णजनों में स्थित रह कर भी मोह को प्राप्त नहीं होता है ॥ ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र हेतुमाह-आद्याविति । जनानां देहनामादौ कारणत्वेनान्ते ऽवधित्वेन यत्सत्तथा बहिर्भोग्यमन्तर्भोक्तृपरमवरं बोद्धव्यमीयम्

* जनानामिम. इति विज० जनानां यो इति वीर०
(२) सबाधित इति. विज० वीर० पाठा दृश्यते
(१) ज्योतिश्च सत्स्वयम्-इति वीज० ज्योतिश्च यत्स्वयम्-इति वीर०

क्षित्यादीनामिहार्थानां छाया न कतमा ऽपि हि ।
न सङ्घातो विकारो ऽपि न पृथङ्नान्वितो मृषा ॥ ५९ ॥
धातवो ऽवयवित्वाच्च तन्मात्रावयवैर्विना ।
न स्युर्ह्यसत्यवयविन्यसन्नवयवो ऽन्ततः ॥ ६० ॥
स्यात्सादृश्यभ्रमस्तावद्विकल्पे ऽसति वस्तुनः ।
जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ॥ ६१ ॥
भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः ।
वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः ॥ ६२ ॥
कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत् ।
अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ॥ ६३ ॥
यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणम् ।
मनोवाक्तनुभिः पार्थ ! क्रियाद्वैतं तदुच्यते ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमो ऽप्रकाशः ज्योतिः प्रकाशः तत्सर्वमयं ज्ञानी स्वयमेव न तस्माद्व्यतिरिक्तं वस्तु किञ्चिदस्ति येन मुह्येदित्यर्थः ॥ ५७ ॥

ननु तर्हि कथं पृथगर्थस्तथा ऽपि प्रतीयते तत्रा ऽऽह—आबाधितस्तर्कविरोधेन सर्वतो बाधितो ऽप्याभासः प्रतिबिम्बादिर्वस्तुतया यथा स्मृतस्तद्वदैन्द्रियकं सर्वमर्थत्वेन विकल्पितं न तु परमार्थतः दुर्घटत्वात् ॥ ५८ ॥

तदेवा ऽऽह—क्षित्यादीनां पञ्चभूतानां छाया देहादिसङ्घातारम्भपरिणामानां मध्ये कतमाप्यवयवतमापि न भवति न तावत्तेषां सङ्घातो दृषाणामिव धनम् एकदेशाकर्षणे सर्वाकर्षणानुपपत्तेः न ह्यङ्गुलिमात्रे आकृष्टे सर्वं धनमाकृष्यते न च विकार आरब्धो ऽवयवी अविद्यमानत्वात् परिणामोऽपि कुतः स किं स्वावयवेभ्यः परिणतेभ्यो वा पृथक् तदन्वितो वा न तावदत्यन्तं पृथक् तथा ऽप्रतीतेः नचान्वितः स किं प्रत्यवयवं सर्वो ऽप्येकदेशेन वा आद्ये अङ्गुलिमात्रेऽपि देहबुद्धिः स्यात् द्वितीये तस्याप्येकदेशाङ्गीकारे त्वनवस्था स्यादतो मृषैवेत्यर्थः ॥ ५९ ॥

एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह—धारयन्तीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः अवयवित्वात्तेषामपि तदवयवः सत्य इति चेत्तत्राऽऽह, उक्तप्रकारेणावयविन्यसत्यवयवोऽप्यन्ततोऽसन्नेव स्यात् अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः । तदुक्तं पञ्चमस्कन्धे "एवं निरुक्तं क्षितिशब्दवृत्तम्" इत्यादि ॥ ६० ॥

अन्वयव्यतिरेकाभावे आगमापायिषु बाल्यादिषु सोऽयं देवदत्त इति प्रत्यभिज्ञानं न स्यात् तदुक्तं भट्टैः "आविर्भावतिरोभावधर्मकेष्वनपायि यत् तद्धर्मी" इति तत्राह—स्यादिति । वस्तुनः परमात्मनो विकल्पे भेदे ऽसति यद्वा वस्तुनो ऽविद्यया विकल्पे सति पूर्वापरोपसादृश्यात्स एवेति भ्रमः स्यात् स च तावदेव यावदविद्यानिवृत्तिः । ननु, सर्वमिथ्यात्वे शास्त्रस्य विधिनिषेधकता कथम् ? तत्राह—स्वप्नमध्ये जाग्रत्स्वापव्यवस्था यथेति ॥ ६१ ॥

इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन स्पष्टीकरोति—भावाद्वैतमिति चतुर्भिः । वर्तयन्भावयन् स्वानुभूत्या आत्मतत्त्वानुभवेन त्रीन् जाग्रदादीन् त्रय आवसथास्त्रयः स्वप्न इति श्रुतेः यद्वा वस्तुभेदबुद्धिरेकः स्वप्नः ततस्तदधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः ततो मत्कर्मसाधितमेतत्फलं ममैव भोग्यमिति तृतीयः तान्धुनुते निवर्तयति ॥ ६२ ॥

कार्यकारणयोर्वस्त्वैक्यस्य मर्शनमालोचनं तन्तुरेव न पट इति ॥ ६३ ॥

मनोवाक्तनुभिः कृतानां कर्मणां समर्पणं तैः समर्पणमिति वा उद्देश्यफलभेदो हि क्रियाभेदे हेतुः ईश्वरार्पणे च तदभावात्क्रियाणामद्वैतम् ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ प्राप्यतया प्रकृतस्य भगवतः सर्वात्मकत्वमाह—भदाविति । आदौ सृष्ट्यादौ अन्ते प्रलये च मध्यस्थानां जनानामन्तर्बहिश्च सन्वर्तमानः । किञ्च परापरावरमुत्कृष्टापकृष्टं वा तत्सर्वात्कृष्टमाह

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ज्ञानं ज्ञानात्मकं जीवस्वरूपं ज्ञेयमचिद्वस्तु परं वचोनाम वाच्यं रूपं नामरूपात्मकं चिदचिदात्मकं सर्वं वस्तु इत्यर्थः । तमो मूलप्रकृतिः ज्योतिः समष्टिजीवश्चेत्येतत्सर्वं साक्षादयमेव परमात्मैव परमात्मात्मात्मकमेवेत्यर्थः ॥ ५७ ॥

एवं सर्वात्मकत्वमभिधाय तस्यैव प्राप्यस्य ब्रह्मणो निरतिशयपुरुषार्थत्वज्ञापनाय प्राकृतदेहस्य तदनुभाव्यशब्दादिविषयाणाञ्चापुरुषार्थत्वमाह–अबाधित इति । आभासो दृश्यो देहः स अबाधितोऽपि अविनष्टोऽप्यनुवर्त्तमानोऽपि अवस्तुतया अपुरुषार्थतया स्मृतः एवं शब्दाद्यर्थरूपेण विकल्पितमैन्द्रियकवस्तुजातमप्यवस्तु अपुरुषार्थं यद्वा अहङ्कारगोचरं शरीरं यथाऽनित्यं हेयं तथा ममकारगोचरः शब्दादिरप्यपुरुषार्थः न स्थिरः तस्यानित्यपुरुषार्थतया दुर्घटत्वादित्यर्थः । यद्वा आभासः स्वप्नदेहः स तदानीमनिवृत्तोऽपि प्रबोधवेलायामवस्तुतयाऽनात्मतया स्मृतः जाग्रदादिविकल्पितजाग्रच्छरीरमपि तद्वदनात्मा आत्मधर्माणां नित्यत्वादीनां तत्र दुर्घटत्वादित्यर्थः ॥ ५८ ॥

शरीरस्य सर्वत्र सर्वकाले सर्वस्मिन्नप्यात्मनाविनाकृतस्य भावाच्छरीरमप्यात्मा स्यादिति शङ्कानिरासार्थमाह—क्षित्यादीनामिति । क्षित्यादीनां पृथिव्यादिपरिणामरूपाणां वृक्षाणां छाया संघातादिष्वर्थेषु न कतमोऽपि सङ्घातादिविकारपृथग्भूतया यावद्द्रव्यभाविषु नकश्चितदपीत्यर्थः । तदेव विवृणोति—न सङ्घात इति । वृक्षसङ्घातो न छाया नापि वृक्षविकारः नापि वृक्षात्पृथक् वृक्षं हित्वा स्थातुं न योग्यः नान्वितः नाविनाभूतः यावद्वृक्षसत्ताकं नान्वितोऽप्यर्थाभिप्रायः पुल्लिङ्गनिर्देशः मृषा अनित्या एवं शरीरमप्यात्मनाविनाकृतस्यभावात्प्रतिच्छाया सदृशं नचात्मसङ्घातः शरीरं नचात्मविकारः नचात्मानं हित्वा तिष्ठति न यावदात्मभावी अनित्यत्वात् अतो नात्मा शरीरमित्यर्थः ॥ ५९ ॥

शरीरस्यानित्यत्वादात्मप्रतिपत्त्यर्थं तत्तुल्यन्यायेषु पृथिव्यादिष्वनित्यत्वमुपपादयति–धातव इति । पृथिव्यादयो धातव अवयवित्वात्सङ्घातरूपत्वात्तन्मात्रावयवैर्विना न स्युरवयवविनाशे सङ्घातो नश्यतीत्यर्थः । सङ्घातरूपत्वमेव प्रतिपादयति–असतीति–यतोऽवयवसंघातरूपोऽवयवी अतएवावयविन्यसति विनष्टे अतन्तोऽवयवोऽसन्नेव अवयविन्यनुपलभ्यमानेऽवयवा एव धातवो नह्युपलभ्यन्ते एवमवयवित्वादनित्यं शरीरं नित्यमात्मा न भवतीत्यर्थः ॥ ६० ॥

तर्हि स्थूलोऽहमितिप्रतीतिः कथमित्यपेक्षायां भ्रान्तिरित्याह–। स्यात्सादृश्यमिति । तत्रसंसर्गनिमित्ता भ्रान्तिरिति प्रतिपत्त्यर्थं सादृश्यनिमित्तत्वं प्रतिक्षिपति–स्यादिति–द्वयोरप्यर्थयोर्ज्ञानादिगुणाविकल्पे सति कस्यचिद्वस्तुनः केनचित्सादृश्यं भ्रमभेदनिमित्तं स्यात् । देहात्मनोस्तु समानजातिगुणाद्यभावात्सादृश्यमनुपपन्नम् इत्याशयेनाह संसर्गभ्रम इत्यर्थसिद्धम् एवमात्मविषयकज्ञानाभावेऽपि जानामि न जानामीति विभागप्रतिपत्तौ दृष्टान्तमाह—जाग्रत्स्वप्नाविति । कश्चित्सुषुप्तिवेलायामेव सुप्तं प्रबुद्धमात्मानं पश्यति यदा प्रबुध्यते तदा स्वप्नदृष्टप्रबोधो न वास्तव इति बुध्यते एवमनात्मविदां संसारिणां कदाचिदहञ्जानामीति ज्ञानं निषेधश्चात्मयाथात्म्यज्ञानानुवृत्तावेव भवत इति विधिनिषेधवता विधिनिषेधौ स्वप्नदृष्टस्वापप्रबोधतुल्यावित्यर्थः संसारिणामात्मज्ञानाभावाद्बाह्यार्थविषयज्ञानमप्यज्ञानतुल्यमित्युक्तं भवति यथा "तज्ज्ञानमज्ञानमतोऽन्यदुक्तम्" इति न शास्त्रविरुद्धार्थविषयज्ञानभ्रान्तिरियं ज्ञानिनां नास्तीत्याह–मायाद्वैतमिति । यद्वा एवं देहविलक्षणात्मज्ञानिनामपि यावत् स्थूलोऽहं ब्राह्मणोऽहमिति देहात्मभ्रमानुवृत्तिरप्रबाधा तावद्विधिनिषेधात्मकशास्त्रवश्यतेत्याह–जाग्रत्स्वप्नाविति । यथा स्वप्ने जाग्रत् स्वप्नौ कोऽपिजाग्रत्स्वप्नावस्थे स्वप्नपर्यन्तावेव प्रबुद्धस्य तु तावुभौ निवर्त्तेते तद्वदित्यर्थः ॥ ६१ ॥

एवं यावद्देहात्मभ्रमानुवृत्तिस्तावद्विधिनिषेधवता स्थूलोऽहं ब्राह्मणोऽहमिति प्रतीतेर्देहात्मनोरभेदे भ्रममूलकत्वेन प्रतिषिद्धे किमेवमेव सर्वमद्वैतं भ्रमविषयम् ? उतकिञ्चित्प्रमितिविषयमस्तीत्याशंकायां यच्छास्त्रानुमतमद्वैतं तत्प्रमाविषयं तन्मुमुक्षोरनुसन्धेयमेवेति वक्तुं तदनुमतं त्रिविधमद्वैतं दर्शयन् तदनुसन्धानस्य भ्रममूलकद्वैतत्रयनिरासकत्वमाह–भावाद्वैतमिति । यथा देहात्मनोर्भेदः शास्त्रानुमतोऽनुसन्धेयः तथा भावाद्वैतादिरूपं त्रिविधमद्वैतमात्मनः स्वस्य वर्त्तयन् यद्वा आत्मनो मनसो वर्त्तयन् मनसि प्रतिष्ठितं कुर्वन्नध्यवस्यन्निति यावत् इह मुनिः परमात्मोपासकः स्वानुभूत्या देहविलक्षणब्रह्मात्मकस्वात्मयाथात्म्यानुभवेन त्रीन् स्वप्नान् भावाद्वैतकर्माद्वैतद्रव्याद्वैतज्ञानानि भ्रमात्मकानि धुनते निरस्यति ॥ ६२ ॥

मायाद्वैतादिस्वरूपं विवृण्वन् त्रिविधभ्रान्तिनिरासं श्लोकत्रयेण विवृणोति–कार्येति । तत्रोपादानस्य कार्यस्य चानन्यत्वपरो भावाद्वैतविषयः श्लोकः यत्कार्यकारणयोर्वस्तुनोरैक्यदर्शनं तद्भावाद्वैतं कार्यकारणयोरैक्ये पटतन्तुवदिति दृष्टान्तः यथा तन्तूनामेव व्यतिषङ्गविशेषभाजां नामरूपात्मकावस्थान्तरापत्त्या पटावस्थत्वमिति पटस्य तेभ्योऽनन्यत्वं तद्वत्कृत्स्नं जगच्चिदचिदीश्वरात्मकं सूक्ष्मचिदचिद्विशिष्टाद्ब्रह्मणोऽनन्यदित्येतद्भावाद्वैतं भावयोः कार्यकारणवस्तुनोरद्वैतं भावाद्वैतं अवस्तुत्वाद्विकल्पस्येत्यनेन भावद्वैतं निरस्यति विकल्पस्योपादानातिरिक्तद्रव्यकल्पनरूपाज्ञानस्यावस्तुत्वाद्वस्तुशून्यत्वाच्च भावयोर्द्वैतं किन्त्वद्वैतमेवेत्यर्थः । एवमसत्कार्यवादभ्रमो निरस्तः ॥ ६३ ॥

क्रियाद्वैतं विवृणोति–यद्विति । हे पार्थ ! साक्षात्परे ब्रह्मणि यत्करणत्रयेण सर्वकर्मणां समर्पणं तत्क्रियाणामद्वैतं भगवदाराधनत्वेन सर्वकर्मणामेकफलावच्छेदः क्रियाद्वैतम् अनेन कर्मणामीश्वरप्रीतिमनपेक्ष्य स्वातन्त्र्येण फलवत्त्वभ्रमो निरस्तः ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जाग्रदाद्यवस्थाप्रवर्तकविश्वादीन् कल्पितानतिक्रम्य प्रपञ्चोपशमं तुर्यात्मा भूत्वा निर्द्वन्द्व आस्ते इति केचिद्व्याचक्षते तन्मत-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

[illegible]-आद्याविति । आद्यावुत्पत्तिकाले मुक्तिकाले च यज्ञमानाद्यं जननं विनाशं च "जनी प्रादुर्भावे" इत्यस्माड्डापि कृते जनेतिरूपं सिध्यति वध्यघातकभावो मार्जारमूषकवत् यत्र ब्रह्मादिष्वन्तर्विद्यमानि परावरमुत्तमाधमं भूतं भविष्यद्वा यत्र ज्ञानाद्रिकं सर्वस्य ग्लापकत्वात् ग्लानिजनकत्वात्तमः प्रकृतिज्योतिस्तत्त्वदवभासकः स्वप्रकाशश्च यस्तदेतत्सर्वं स्वयं तुर्यात्मा श्रीहरिस्तत्सत्ताया अपि तदधीनत्वात्स इत्युच्यते ननु तदात्मकत्वात् "पुरुष एवेदं सर्वम्" इति श्रुतेः आदौ यथा तदधीनत्वं तथान्तेऽपि श्रीनारायणाधीनत्वमित्यतो वाह आद्याविति उक्तार्थः श्लोकः निरुपचरितापराधीनत्वं हरेरेव न मुक्तस्यापीत्यतो वाह आद्याविति, आद्यावन्ते उत्पत्तेः प्रागूर्ध्वम् अयं परमात्मा वर्तत इति शेषः । कथङ्कारमत्राह-जनेति । जनकत्वेन नाशकत्वेनेत्यादिरूपेण सर्वकर्तृत्वस्वातन्त्र्येण तच्छब्दवाच्यत्वं हरेरित्युक्तं तमःशब्दस्य ग्लापकत्वादिति णिच् प्रत्ययान्तत्वेन विवरणादयमर्थो ज्ञायत इति ॥ ५७ ॥

ननु, सत्तायास्तदधीनत्वं प्रामाणिकञ्चेत् ब्रह्मत्वेनोक्तिर्घटेत नतः कात्र युक्तिरित्याशङ्क्योपपादयति-अबाधित इति । प्राकृतवैकृतलक्षणकार्येषु विविधकान्तिमत्तया भासते विद्योतत इत्याभासो देहः प्रतिबिम्बलक्षणो यथावस्तुतया "यत्र नाभासयेद्वस्तु मिथ्याप्रतिहतत्वतः" इति स्मृतेर्वस्तु परमात्मा तत्त्वेन स्मृतः "इदं हि विश्वं भगवानिवेतरः" "इन्द्रो मायाभिः" इत्यादिना ननु देहस्य सत्त्वे तत्सत्ताया भगवदधीनत्वेन तद्वक्तुं युक्तं तस्य रज्जुपटाभासवदर्थक्रियानर्हत्वादिति तत्राह, अबाधित इति. शुक्तिकायां प्रतिभासितं रजतं वलयकरणाद्यर्थक्रियानर्हत्वेन नेदं रजतमिति बाधितं स्याद्यथा न तथाऽयं बाधितः हानोपादानाद्यर्थक्रियाबोधकत्वात् अपिशब्दोऽत्र स्वातन्त्र्यशंकां सूचयति, हिशब्देन प्रत्यक्षसिद्धत्वेन रज्जुपटाभासवैलक्षण्यं दर्शयति, तद्वदर्थेन्द्रियकमिन्द्रियविषयं घटपटादिकम् अर्थशब्दो भावप्रधानः अर्थत्वेनार्थक्रियावत्त्वं प्रयोजनतया कल्पितं समर्थितं, परमात्मनेति शेषः "कर्तृकर्मक्रियादीनां सत्तावृत्तिस्तथैव च । विष्णवधीना यतः" इति वचनादर्थक्रियासामर्थ्यस्य भगवदधीनत्वेन "सर्वं खल्विदं ब्रह्म" इति सर्वस्य तत्त्वं युक्तमिति भावः । एवमनङ्गीकारे बाधकमाह—दुर्घटत्वादिति । ईश्वरान्येन कर्तुमशक्यत्वात् ॥ ५८ ॥

दुर्घटत्वमेव दर्शयति-क्षित्यादीनामिति । क्षित्यादीनामर्थानां पदार्थानां कतमापि छाया कतमोऽपि प्रकारो विचार्यमाणे सति न घटत इति शेषः "छाया रीतिः प्रकाशश्च भावश्चेत्यभिधीयते" इत्यभिधानम्. इह कार्यप्रपञ्चे हिशब्दो हेत्वर्थः निरुक्तार्थवाचिना तमप्प्रत्ययेन कस्यापि प्रकारस्यासंभवोक्तेः परमेश्वरकल्पितत्वेनैतत्कार्यं सत् इतिवक्तुं युक्तं प्रकारमावमुपपादयति-न संहात इति । परमेश्वरकल्पनामन्तरेण कार्यं भवतीति वदन् प्रष्टव्यो भवति क्षितिलक्षणं कार्यं केवलमपां पुञ्जः तद्विकारो वा तद्व्यतिरेकेणोत्पन्नं वा पृथग्द्रव्यसंयोगवद्वयोः संयोगमात्रं वा ? न प्रथम इत्याह—नेति । अपां संघातो न असम्भवात्. क्षितेः कठिनावयवारब्धत्वात्केवलमपां द्रवत्वेन तत्कार्ये पर्वतादीनां मज्जनापत्त्याश्रितेः स्वरूपक्षयप्राप्तेः आधाराभावेन सर्वप्राणिप्रायनाशप्रसङ्गात् न द्वितीय इत्याह—विकार इति । अत्र नञः अध्याहारः कर्तव्यः अपां विकारेण नोपपद्यते कालुष्यादिलक्षणविकारमात्रेण क्षितित्वानुपपत्तेः न तृतीय इत्याह—न पृथगिति । अद्भ्यः क्षितेः पृथग्द्रव्यत्वदर्शनात् नापि चतुर्थ इत्याह—नान्वित इति । सहावस्थानमात्रेण कार्योत्पत्त्यदर्शनात् क्षित्यादीनामर्थानां पदार्थानां मध्ये कतमापि छाया कतमोऽपि भावः पदार्थः कार्यजननशक्तिमान् न घटते विचारासहत्वात्. तथाहि, "अद्भ्यः पृथिवी" इति श्रूयते तत्र प्रस्तुतात्मशक्तिमन्तरेण केवलानामपां पृथिवीजनकत्वं कथमिति वा शेषं पूर्ववत् ॥ ५९ ॥

ननु, विश्लिष्टानां पदार्थानामन्योन्यं महाकार्योत्पत्त्यसामर्थ्यमस्तु । संश्लिष्टानां नेयमनुपपत्तिरित्याशंक्य श्रीनारायणकटाक्षबीजमन्तरेणावयवावयविनोरप्यनुपपत्तिः स्यादित्येतत्याह—धातव इति । धातवः क्षित्यादिपञ्चभूतादिपदार्थाः तन्मात्राद्यवयवैर्विना गन्धादिव्यतिरेकेण सुरभिगन्धवती पृथिवी शुक्लभास्वरं सलिलमित्यादिव्यावर्तकधर्माभावे स्वरूपाभावप्राप्तिरेव स्यादित्यर्थः अवयवित्वादिति तदवयविनोऽवयवाभावे अवयविव्यवहारो युक्तस्तस्मात् अयं च पदार्थे समुदायार्थे वा प्रत्यक्षसिद्धत्वादवयविस्वातन्त्र्ये अयं निर्णयः कुत इह इति तत्राह—असतीति इव यथा आसमन्तात्तत्रावयवाः सर्वात्मना तन्तुलक्षणा । अवयवा नष्टा यदि तर्ह्यसदवयविनि तन्तुरहिते पटे पटव्यवहारोऽपि नष्ट इति शेषः तन्तुव्यतिरेकेण पटाभावात् यथाऽवयवाभावो अवयवी नास्ति तथा अवयविनि निवृत्ते अवयवा अपि निवृत्ताः स्युरित्यतो वाह—आगमानवयवा अपि नष्टाः स्युरित्यर्थः यथाऽऽसन्नावयवा आतानवितानावयवावयवसंसर्गमप्राप्तास्तन्तुलक्षणा अवयवाः प्रागसत्यवयविनि पटे पटव्यवहारं न जनयन्ति तथा गन्धाद्यवयवाः प्रागसत्सु क्षित्यादिषु पश्चात्क्षित्यादिव्यवहारं न जनयन्तीत्यनन्वयभावे तदभावः स्पष्ट इत्यन्वयव्यतिरेको दर्शिताविति ज्ञातव्यमिति एवं दुर्घटत्वेनाविद्याकल्पितप्रपञ्चस्याविद्याधानन्तरमनुवृत्तस्यापि न वस्तुतत्त्वमिति कल्पनमनुपपन्नं "विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं" "ना चक्षुरस्या विचक्षते नहीदृक्तनमेव हि" इति श्रुतिस्मृतिप्रसिद्धां युक्तिशाठ्येन दर्शयति अवयवावयविन्यायमत्रावयवा न चेतिकाञ्चन्पठन्ति अयमर्थः गन्धाद्यवयवव्यतिरेकेण पृथिव्याद्यवयविनां न व्यवस्थितिः किं नाद्रक्षीमिति तत्राह—असतीति । क्षित्यामवयविन्यसति गन्धाद्यवयवा एव नास्तीत्यन्वयः अनवयवाभावे ऽवयवभावेन कारणाभावापत्त्या सर्वासत्त्वप्रसङ्गलक्षणाद्दुक्तेः इति भावः ॥ ६० ॥

तन्त्वाद्यवयवावयविनोः भावद्वयमात्रेण तदभावमवयव इति व्यवहारस्तस्मात्तद्व्यतिरेकेण नोऽपि नास्तीति कथमापद्यत इति तत्राह—स्यादिति । सत्त्वं भावद्वयभ्रमः स्यात् नात्र कश्चिन्न सन्तीति तत्राह—विकल्प इति । वस्तुनो विकल्पे भेद मतिभ्रमः यथा पट्टयादिषु रूपमसत्त्वेऽपि तत्संस्कारवतः शुक्त्यादिकरणसम्पर्केण चकासमानं कार्यं शुक्तिकाशकलं संदृश्य ह्ययं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सादृश्यमात्रादिदं रजतमिति भ्रमो दृश्यते तथाक्षित्यादिगन्धादेर्भेदे वस्तुसादृश्यमात्रेण व्यवहारः स्यात् तथात्रभेदो युज्यते स्वरूपहानितो वयवाभावे ऽवयव्यभाव आपद्यते स्वरूपत्वादिति भावः पटस्य प्रत्येकं तन्तुना भेदेऽपि समुदायरूपेणाभेदात्तुकं युक्तमिति तन्त्ववयविपदार्थसद्भावे इयं चिन्ता न एव नास्ति परमाण्वत्र एव पुञ्जीभूय कार्यं जनयन्तीत्यङ्गीकारेत्वात्मनिश्चयं विनाशाच्च प्रमेयप्राहिप्रत्यभिज्ञायाश्च संस्कारजनितसादृश्यमात्रविषयतया भ्रान्तित्वादित्यतो वाह-स्यादिति । वस्तुनो भेदे सति तदुक्तं सत्यं स्यात्तदेव नास्ति एकत्वस्य साक्षिप्रत्यक्षेणानुभूयमानत्वात् साक्षिणो भ्रान्तित्वे सर्वस्य विनाशसाधकत्वापि व्याप्तिग्राहकप्रमाणप्रामाण्यस्य साध्यात्परमाणुपुञ्जपक्षेऽपि निर्विवादत्वानिष्टत्वात् परमाणुभिर्विना पुञ्जाभावेन स्वरूपं न स्यादतो दुर्घटघटकेन केनचिद्भवितव्यं स चादृष्टकर्मणोऽभ्यनभ्युपगमेन पृथक् सामर्थ्याभावाच्चेतन एव भवेत् चेतनसामान्यस्याहिताकरणादिना पारतन्त्र्यप्रतीतेर्निरवयवत्वेन प्रवृत्त्यनुपपत्तेश्च तत्प्रवर्तकत्वेनाघटितघटकत्वेन महात्म्याकरपरमचेतनपरिकल्पनयैव शरीरपदार्थोपादानभूतपृथिव्यादियोगो दृश्यत इति सिद्धम्—

"कार्यकारणवस्तूनां विशेषो न निरूपितः ।
तथापीशेच्छयैवासौ दृश्यते नियतोऽपि च" इतिस्मृतेः

एतादृशो विशेषः कुत्र दृष्ट इति तत्राह—जाग्रदिति । यथा स्वप्ने जाग्रदिदमयं स्वप्न इतिविशेष ईश्वरेच्छया दृश्यते "य एष स्वप्नान्दर्शयति" इति श्रुतेः न तत्र "रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते" इत्यादेः स्वप्ने प्रतीयमानं सर्वमीश्वरेच्छाकर्तृकमिति ज्ञायते तथा विधिनिषेधविशेषोऽपीश्वरकल्पनयैव प्रवर्तत इत्याह—तथेति । "अग्निष्टोमेन स्वर्गकामो यजेत" इत्यादि. महाविधित्वं अरुणया पिङ्गाक्ष्यैकहायन्या गवा सोमं क्रीणातीत्याद्यवान्तरविधित्वं । तथा ब्राह्मणो न हन्तव्य इत्यादि महानिषेधत्वं न मृषा वदेदित्याद्यवान्तरनिषेधत्वं चेश्वरेच्छाकॢप्तमित्यन्वयः "स इदं सर्वमसृजत" इत्यादेः संकोचे कारणाभावान्मुख्यार्थ एवाङ्गीकर्तव्यः । अत्र तद्विशेषस्य परमेश्वरकृतत्वनिश्चयाय मिथ्याभूतजाग्रत्स्वप्नग्रहणं न तु तद्दृष्टस्वप्नस्यापि मिथ्यात्वनिश्चयाय तस्यार्थक्रियाकारित्वेन सत्यत्वनिश्चयात् अनेन सर्वस्य मिथ्यात्वे रज्जुसर्पस्य मिथ्यात्वं रज्जुखण्डं सत्यमितीयं व्यवस्था कुत इत्याशङ्क्य मिथ्याभूतस्वप्नेऽपि जाग्रत्स्वप्नव्यवहारवत् व्यवहारमात्रमत्र चेत्यादि श्रुत्योच्यत इति ॥ ६१ ॥

एवं, सर्वस्मादात्मन उपकारकत्वेन प्रेष्ठत्वाद्येन विना तत्प्रसादो न भवेदस्मिन्सति सञ्जायतीति भगवति तत्समर्पणसमये तं भवतामप्रकारं दर्शयति—भावेति । मुनिः शास्त्रतत्त्वज्ञानी आत्मनः भावाद्वैतं क्रियाद्वैतं तथा द्रव्याद्वैतञ्च वर्तयन् स्मरणं कुर्वन् स्वानुभूत्यानिर्भिन्नस्वरूपज्ञानेन । इह जगति सततोत् स्वप्नान् जाग्रदादावस्थानुभवनिमित्तादानदाब्दनाद्यानर्थान् भुङ्क्ते निरस्य तीत्यन्वयः ॥ ६२ ॥

किं तद्भावाद्वैतादिकं येन तद्वस्वयमनुध्येयमिति तदाह । कार्यकारणेति । महदादिकार्येषु प्रकृतितद्गुणादिकारणेषु च स्थितस्य वस्तुनो नित्यप्रतिहतस्य हरेरेकत्वदर्शनं तत्कथमिव पटतन्तुवत् पटस्य तन्तूनां चाभेददर्शनैकत्वं यथा प्रामाणिकं तथेत्यर्थः । "प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः" इत्यादेः सूक्ष्म इति सामानाधिकरण्येन कार्यकारणयोरभेदोक्त्या श्रीहरिसम्बन्धप्रतीतेः प्रकृतासङ्गतं स्यादिदर्शनं चैकत्वप्रकरणपरमित्युक्त एवार्थः प्रतीतार्थं परित्यज्याप्रतीतार्थकथने किं कारणमत्राह अवस्तुत्वादिति । घटादिप्रपञ्चस्यानित्यत्वेन प्रतिहतत्वात्कात एव कार्योत्पादनसामर्थ्याभावाद्वस्तुत्वादसामर्थ्यत्वाद्धिरिहत्वान्नियतत्वात्कार्यजननशक्त्यभावाद्वा, इदं च भगवन्माहात्म्यप्रकटनं गवां युगपदाविर्भावादिति श्लोकैः कार्यकारणानुविष्टानां भगवद्रूपाणामत्यैक्यमेकत्वं "तत्सृष्ट्वा तदेवानुप्राविशत्" "समाधिगतो निर्विघ्नमेवमोहः" इत्यादिश्रुतिस्मृतिभिरुच्यत इति ज्ञानपूर्वमुपासनं कार्यमिति शेषः ॥ ६३ ॥

न स्पृशते त्वाक्रियते किञ्चनादं महामर्कं मघवं चिन्मयोति क्रियाद्वैतम् ॥ ६४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मोहाभावकारणं सर्वस्य परमात्मानन्यत्वं विवृणोति । आद्यविति । यत् परमात्मलक्षणं वस्तु तत् सत्, वर्तमानं तदेव स्वयं बहिर्भोग्यम् । ज्योतिः प्रकाशश्च स्फुरति नान्यत् । अन्यस्य तद्विना स्वतः स्फुरणानिरूप्यत्वादिति भावः ॥ ५७ ॥

ननु, कथं तर्हि तस्माद्वस्त्वन्तपृथगिवार्थजातं प्रतीयते तत्राह—आबाधितः स्वातन्त्र्यसत्तायाः सकाशान्निरस्तोऽपि यथा आभासः सूर्यादिप्रतिरश्मिः वाद्यादिभिः पृथक् प्रकाशमानादर्शनादवस्तुतया स्वतन्त्रपदार्थतया स्मृतः कल्पितः । तद्वदेन्द्रियकं सर्वं मूढैः स्वतन्त्रार्थत्वेन विविधं कल्पितम् । तत्तु न तत्त्वदृष्ट्या स्वातन्त्र्यनिरूपणस्य दुर्घटत्वादित्यर्थः ॥ ५८ ॥

क्षित्यादीनामिति, तैः तत्र कुत इत्यन्ते स किम् अवयवेभ्यः पृथगारभ्यते परिणमते च तदन्वितो वेत्यूह्यम् । अतो मृषैवेत्यत्र अतो देहादेः स्वातन्त्र्येणावस्थितिर्मृषैवेत्यर्थः इति ज्ञेयम् ॥ ५९ ॥

एवं देहादेः स्वातन्त्र्येणानिरूप्यत्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि तथैवानिरूप्यत्वमाह—आतव इति । तदंशवाद एव स्वतन्त्र इति चेत्तत्राह, उक्तप्रकारेणावयविनि निरूपयितुमसति अवयवोऽप्यन्ततो निरूपयितुमसन्नेव स्यात् तस्मादेकमद्वयचिदानन्दरूपम् यत् प्रतीयते तत् सर्वं परमात्मलक्षणं सर्वकारणं वस्त्वेवेति साधूक्तः आदावन्ते जनानाम् सदित्यादिना एवमेव तृतीयेऽप्युक्तम् "इति तासां स्वशक्तीनां सतीनामसमेत्य सः । प्रसुप्तलोकतन्त्राणां निशाम्य गतिमीश्वरः ॥ कालसंज्ञां ततो देवीं बिभ्रच्छक्तिमुरुक्रमः । त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ॥ सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् । भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन्" इति अत एव "यस्य पृथिवी शरीरम्" इत्यादौ श्रुतौ परमात्मशरीरत्वेन प्रसिद्धि

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

परिणामस्तु शरीरित्वेन तदेकावयवरूपेण प्रधानपरिणामः सर्वावयवित्वेन तु परमात्मवस्त्वेवेति सिद्धं ततोऽप्यभिन्नत्वमेव जगत उपपद्येत ॥ ६० ॥

ननु, यदि परमात्मवस्त्वेव सर्वावयवी देहः स्यात्। तस्यैव ब्राह्मणत्वादिसंज्ञा प्राप्नोति तद्बोधहेतुविधि-निषेधावपि स्यातां तौ च न सम्भवतः। तस्मादन्य एव अवयवी युज्यते इत्याशङ्क्याह—स्यादिति। वस्तुतः परमात्मनः विकल्पे संशये सतीति तस्य तादात्म्येन निर्णयो यावन्न स्यादित्यर्थः। तावदेव तस्मात् सर्वैक्यबुद्धिनिदानात् पृथग्देहैक्यनिदान-बुद्धिः सादृश्यभ्रमः स्यात्। पूर्वापरावयवानुसन्धाने सति परस्परमासज्यैकत्र स्थितत्वेनावयवत्वसाधारण्येन चैक्यसाद-श्यात्। यतो प्रत्यवयवमेकतया प्रतीतेः सोऽयं देह इति भ्रम एव भवतीत्यर्थः। प्रतिपूर्वं तदिदं वनमितिवत् यथोक्तं स्वयं भगवता "सोऽयं दीपोऽर्चिषां यद्वत् स्रोतसां तदिदं जलम्। सोऽयं पुमानिति नृणां मृषागीर्धीर्मृषायुषाम्" इति। ततश्च तत्रैव ब्राह्मणत्वाद्यभिमाने सति स्वप्नविषयकौ जाग्रत्स्वप्नावि-र्भावविषयकौ विधिनिषेधौ स्यातामित्याह। तथा तेन प्रकारेण विधेर्विधिता निषेधस्य निषेधतेत्यर्थः। एवं "परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्। विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च" इत्यादिरेकादशाष्टाविंशतितमाध्यायोऽपि ज्ञेयः। तत्र "किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियान्" इत्यादिकं स्यात् सादृश्य भ्रम इत्याद्यनुसारेणैव व्याख्येयम्। अवस्तु यत् द्वैतं तस्येत्यर्थः। तस्मात् स्वातन्त्र्येण निरूपणाशक्त्या परमात्मनोऽनन्यदेव सर्वमिति प्रकरणार्थः ॥ ६१—६३ ॥

असिद्धज्ञानत्वात्तथापि स्वधर्ममेव कुर्यादित्याह—यदीति। ॥ ६४—६५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अत्र सर्वं ब्रह्मेति भावनैव मोहाभावे नैव हेतुरित्याह—आदाविति जनानां देहादीनां आदौ कारणत्वेन अन्ते चावधित्वेन यत् सत् स्वयंप्रभ तदेव बहिर्भोगं मायिकं वस्तु अन्तर्भोक्तृजीववृन्दं परावरं उत्कृष्टनिकृष्टात्मकं ज्ञानमिन्द्रियं ज्ञेयं शब्दादिवचो घट-पटादिवाच्यं आख्यादि तमो जीवस्याविद्या ज्योतिर्विद्या तस्मा-द्व्यतिरिक्तं वस्तु किमपि नास्ति येन मुह्येदिति भावः ॥ ५७ ॥

ननु कथं तर्हि तस्मादत्यन्त पृथगिवार्थ प्रतीयते तत्राह—ननु भोक्तृभोग्यादिवस्तूनां सर्वजनैरेव पृथक्तया प्रतीयमानत्वात् कथमेको यतिरेव सर्वं ब्रह्मैवेदमिति प्रत्येतु तत्राह—आबाधित इति। अत्र अद्वयं ज्ञानमेव ब्रह्मोपासनायां पद्धतिः सा च विविध-शक्तिवैचित्रीमयस्य विश्वस्य सत्यत्वप्रतीतौ नसिद्ध्येदतस्तदर्थं ज्ञानिनमधिकारिणं विश्वस्य मिथ्यात्वं प्रत्याययितुं विवर्तवादो-ऽयमृषिभिः प्रकल्प्यते यथा भक्तिमते "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्" इत्युक्तं तथैव ज्ञानिमतेऽप्युपायो ज्ञानिमनो ब्रह्म-मात्रग्रहणार्थः विश्वस्य सत्त्वे मनसा मिश्रिते तेन निरालम्बन मनसा विश्वस्याग्रहणं निषेधकोटिभिरपि दुर्घटमित्यतोऽस्य विवर्तवादेऽपि शास्त्रस्य तात्पर्यमित्यवसेयं विश्वस्य भगवद्धामनाम-रूपादेरसत्यत्वमननं तु ज्ञानिनोऽप्यधःपात इति प्राक्प्रतिपादितं प्रतिपादयिष्यते च यथास्थानमुपरिष्टादपि श्रीभरतेनापि रघु-गणप्रबोधनार्थम् "अयं जनो नाम चलन्पृथिव्याम्" इत्यादिना विश्व-मिथ्यात्वमुक्त्वा तर्हि किमित्यपेक्षायां भगवच्छब्दवाच्यं "वदन्ति तत्तत्त्वविदस्तत्त्वं" कवयो वदन्ति" इत्युपसंहृतम् अथ प्रकृतमनुसरामः आभासो हि चन्द्रादिर्मिथ्याभूतोऽपि यथा वास्तवस्तुतया स्मृतः तद्वदैन्द्रियकं सर्वमर्थत्वेन कल्पितमेव ननु वस्तुतः दुर्घटत्वात् ॥ ५८ ॥

एतदेवाह—क्षित्यादीनां पञ्चभूतानां छाया ऐक्यबुद्ध्या आलम्बनं देहादिकं संघातादं नु परिणामानां मध्ये कतमोऽपि न भवति न तावत् पञ्चभूतानां सङ्घातः तृणानामिव वनम् एकदेशाकर्षणेन सर्वाकर्षणानुपपत्तेः नह्येकस्मिन् वक्षे आकृष्टे सर्वं वनमाकृष्यते न च पञ्चभूतानां विकारः पञ्चभूतैरारब्धो ऽवयवीत्यर्थः। कुत इति चेत् तत्राह—न पृथगन्वित इति। अवयवेभ्यो ऽवयवी मता-वदस्यन्तं पृथक् तथाऽप्रतीतेः अवयवात्पृथगवयविवादिनां मते दोषान्तरमपि दृश्यं तद्यथा स्वर्णघटमहं दद्ये इति वाक्यपूर्वकस्वर्णघटदानानन्तरं तद्घटावयवस्य कपालादेर्ग्रहणे न ब्राह्मणस्य स्वर्णस्तेयजन्यं पातित्यं स्यात् दातृतत्तनुमातृकस्य दान कर्मत्वाद्दत्तस्य घटपदार्थे घटपद सत्त्वं न घटस्यैव स्वाम्यना-शात् कपालादेस्तस्य घटपदार्थभिन्नत्वात् प्रकारान्तरस्वीकारस्य गौरवसहस्रपरहतत्वादेतन्मतमनुपादेयमेव न च तेष्वन्वितः स किन्त्वत्यवयवमवयवी सर्वं प्राप्नोतीति अंशेन वा आवेशाणौ पाणि-कुल्यादौ वा देहबुद्धौ तन्नाशे देहो नष्ट इति प्रतीतिरापद्येत द्वितीये अंशत्वाद्यंशाङ्गीकारे अनवस्था स्यात् अविकारात् पञ्चभूतानां परिणामोऽपि यतो न पञ्चभूतेभ्यः स पृथक् नापि तेष्वन्वितस्तस्मात् मृषैव मिथ्यैवेति विवर्तवादपक्षोपादेय इत्यर्थः ॥ ५९ ॥

एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्या-त्वमाह—धातव इति। धारयन्तीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः अवयवित्वात्तेषामपि तदवयवः सत्य इति चेत्तत्राह उक्तप्रकारेणावयविन्यसति अवयवो ऽप्यन्ततो ऽसन्नेव स्यात् अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सत्त्वे प्रमाणाभावादित्यर्थः तदुक्तं पञ्चमे "एवं निरुक्तं क्षितिशब्दवृत्तम्" इत्यादि ॥ ६० ॥

ननु,तदपि क्षित्यादीनां सत्यत्वेन प्रतीतिः कुतो भवतीत्यत आह—स्यादिति। विकल्पे क्षित्यादावसति मिथ्याभूतेऽपि वस्तुनः सत्यभूतस्य भगवन्नित्यधामरूपादीनां सादृश्येन भ्रमः सत्यस्य जलस्य मरीचिकायामिवेत्यर्थः। यथैव सत्य एव तेजसि सत्यस्यैव जलस्य भ्रान्तिमूलकं आरोपे सति मरीचिका जलं भवेत् तथैव सत्य एव ब्रह्मणि सत्यस्यैव भगवद्धामरूपादिस्थानादेरज्ञानमूलकं आरोपे सति जगदिदं भवेदित्यर्थः। न च भगवद्धामस्वपि

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

विवर्त्तः प्रवर्त्तत इति तदप्यसत्यमिति वाच्यं भूगोलवर्णने सप्त पूर्य्यो भवन्ति तासां मध्ये साक्षात्साक्षाद्ब्रह्मगोपालपुरीहीति गोपालतापिनीश्रुत्या गोपालपुर्य्यां ब्रह्मस्वरूपभूतत्वप्रतिपादनात्ताम्नामिति निर्द्धारयामपश्यासाक्षादिति ब्रह्मेति पदयोश्च वैयर्थ्यादन्यवस्तूनामिव ब्रह्मणि गोपालपुर्य्यारोपितत्वमिति व्याख्यातुमशक्यत्वात्। किञ्च अर्वाचीना अद्वैतवादिनस्तु मायाशक्त्या तत्त्वमप विमोच्य भावे आगमापायिषु बाल्यादिषु सोऽयं देवदत्त इति प्रत्यभिज्ञानं नश्यात् तदुक्तं भट्टैः "आविर्भावतिरोभाव धर्मकेष्वनमापियत् तद्धर्मीति" तत्राह—स्याद्दिति। वस्तुतः परमात्मनो कल्पभेदो प्रसतिय इव वस्तुनो विकल्पे सति पूर्वपूर्वारोप सादृश्यात् एवेति भ्रमः स्यात्सत्यमादेवाविद्यानिवृत्तिः ननु, सर्गमिथ्यात्वे शास्त्रस्य विधिनिषेधता कथ्यते तत्राह—स्वप्नमध्ये जाग्रत्स्वप्नं यथायथेति इतिस्वामिचरणातिरिक्तामतरङ्गाह्लादिन्यादिशक्तिं तद्विलासान् भगवन्नित्यधामश्रित्यादींश्च मन्यमाना अन्धपरंपरयैव विवर्त्तमिथ्याभूतस्यैव सादृश्यभ्रममावक्षाणा विगीयन्त एव नन्वेवं जगतो मिथ्यात्वे सर्वज्ञेनापि वेदेन विधिनिषेधौ कथमुच्येते नहि मरीचिका जलस्य गुणदोषौ विज्ञेनापदिश्येते इत्यत आह—जाग्रत्स्वप्नाविति। स्वप्नमध्ये यथा जाग्रत्स्वप्नव्यवस्था तथैव मिथ्याभूते जगति तावपि मिथ्याभूतावेवेत्यर्थः। आविद्यदधिकारित्वादिति "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन" इत्यादेः॥ ६१॥

इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति—भावाद्वैतमिति चतुर्भिः। वर्त्तयन्नालोचयन् स्वानुभूत्या आत्मतत्त्वानुभवेन वस्तु भेदबुद्धिरेकः स्वप्नः तत्तन्नदधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः मत्कर्मसाधितमेतत्फलं ममैव भोग्यमिति तृतीयः तान् धुनुते निवर्त्तयति॥ ६२॥

कार्य्यकारणयोर्वस्त्वैक्यस्य मर्शनमालोचनं तंतुरेव न पट इत्येव जगत्प्रकृत्योः कार्य्यकारणयोरैक्यम्॥ ६३॥

मनोवाक्तनुभिः कृतानां कर्मणां ब्रह्मण्यर्पणमिति उद्देश्यफलभेदा हि क्रियाभेदहेतुः ईश्वरार्पणेन च तदभावात् क्रियाणामद्वैतम्॥ ६४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मुक्तप्राप्तस्य भगवतो मार्गविशेषगम्यत्ववर्णनेन प्राप्तमेकदेशित्वं निराकरोति—आद्याविति। आदौ उत्पादकरूपेण अन्ते प्रवेशस्थानत्वेन बहिर्धारकत्वेन अन्तः प्रेरकत्वेन सत् सर्वदा सत्तावत्त्वेन जनानां स्वयं साक्षादयमेव भगवान् अस्ति परं कारणमवरं कार्यं चायमेव ज्ञानं च ज्ञानतत्त्वं ज्ञेयमचेतनत्वं चाग्रमन तयोः परावरभगवच्छक्तित्वेन भगवत्पृथगवस्थानाभावात् वचो वाच्यं शब्दार्थौ चायमेव तमो ज्योतिः प्रकाश्यं प्रकाशकं वस्तु अयमेव सर्वात्मत्वात्॥ ५७॥

शरीरादुत्क्रम्य पितृयानेन सोमलोकं देवयानेन परं परमात्मानमेतीत्युक्तं तत्र देहेन्द्रियादिविलक्षणमात्मतत्त्वं प्रतिपादयन् भूतसंघात एवात्मेति पक्षं बहुपदार्थसंयोगे मदशक्तिवदुत्पद्यते तद्वद्भूतसंघाते शरीरे विज्ञानमुत्पद्यते इति पक्षं च तथा चक्षुराद्यात्मवादं च बाह्याभिमतं निराकरोति—अबाधित इत्यादि चतुर्भिः। आभासं मृगादिरूपेणाभासमानः अन्यदेहो यथा अवस्तुतया अवस्तुमृगादिरूपेऽहंभूतमात्मतत्त्वं तर्हि जलवत् स्वतः अपि निश्चये हि हेतौ यतो हेतोः निश्चयेन आबाधितः प्रबोधसमये नाहं मृगादिरूप इत्येवं निराकृतः तद्वत् ऐन्द्रियकं शरीरं अर्थविकल्पितम् अर्थात् आत्मस्वरूपाद्विकल्पेन भेदेन निर्णीतम् कुतः दुर्घटत्वात् तस्मिन् आत्मत्वासम्भवादित्यर्थः॥ ५८॥

इह वस्तुनि जीवे क्षित्यादीनां भूतानां तथाऽन्येषामिन्द्रियाद्यर्थानामचेतनपदार्थानां कतमा छायापि नास्ति न संघातः न विकारः तेषामचेतनानां मध्ये पृथगेकतमः अन्वितः छिद्ररूपो वा पदार्थस्तत्र नास्तीति किमु वक्तव्यम् तस्माद्भूतसंघातात्मवादः बहुपदार्थसंयोगजतद्विकारभूतमद्यशक्तिवत् भूतसंघातोत्थितविज्ञानात्मवादश्च मृषेत्यर्थः॥ ५९॥

भूतभौतिकानामनात्मत्वदर्शनाय तेषामनित्यतां दर्शयति—धातवन्ति नाना अवयवान् इति धातवो देहाः अवयवित्वात् पांचभौतिकत्वात् तन्मात्रावयवैर्देहसंस्थानमात्रावयवैर्भूतलेशैर्विनष्टा न भवन्तीत्यर्थः। एवं अवयविनि देहे असति नष्टे अन्ततः स्वकारणे भूते लयात् अवयवः भूतलेशः असन्भवति कारणाकारं सूक्ष्मभावं प्राप्नोतीत्यर्थः॥ ६०॥

तर्हि देहे मृते तद्भिन्न आत्मा नैवास्तीति वा शङ्का वरीयान् अत्राह—स्यादिति। लोहपिंडे अग्नौ सति अग्निसादृश्यभ्रमो भवति यथा, एवं विकल्पे आत्मभिन्ने देहे यावत्कालपर्यन्तं वस्तुनि सति तावदेव वस्तुनः सादृश्यभ्रमश्चेतनत्वभ्रमः स्यात् तस्मिन् असति न तु स्यात् तद्वस्तुदेहविलक्षणं नित्यमित्यर्थः। तर्हि देहविभिन्न आत्मा देहो नात्मेति आत्मानात्मविधानप्रतिषेधौ कदा स्याताम्? जाते ज्ञाने भवत, इत्याह—जाग्रत्स्वापाविति। यथा अयं जागरः नायं स्वापः इत्येवं विहितप्रतिषिद्धौ जाग्रत्स्वापौ अस्वप्ने प्रबोधे एव भवतः एवं जाते आत्मानात्मज्ञाने ज्ञानस्वरूपोऽहमात्मा जडवर्गो देहेन्द्रियादिरूपो नात्मेत्युभयोर्विधिनिषेधता स्यादित्यर्थः॥ ६१॥

एवमात्मस्वरूपज्ञानदाढ्यार्थं नास्तिकानां संघाताद्यात्मभ्रान्तिवादा निराकृताः अथ तार्किकमीमांसकादिभ्रान्तिवादाननन्तशक्तिमत्सर्वात्मभूतपरमात्मज्ञानदाढ्यार्थं निराकरोति—भावाद्वैतमिति चतुर्भिः। भावयोर्जगत्परमात्मनोरद्वैतं क्रियाणां परमात्मांशभूतजीवकृतानां परमात्मन्यर्पणात्मकमद्वैतं द्रव्याणां भोक्तृभोग्यपदार्थानां परमेश्वरात्मकत्वरूपमद्वैतं स्वानुभूत्या वेदान्तश्रवणाजन्येन स्वानुभावेन वर्त्तयन् चिन्तयन् आत्मनः त्रीन् स्वप्नान् स्वप्नवदागन्तुकान् दोषान् तार्किकाः जगत्परमात्मनोरत्यन्तं भेदमाहुः तच्छास्त्रश्रवणादेकः मीमांसकाः जीवकृताः क्रियास्तत्तज्जीवभो-

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मायां ननु पुरमेश्वरेऽप्येयन्ति तच्छाश्रमयणात् द्वितीयः उभयपक्षेऽपि भोक्तृभोग्यपदार्थानामत्यन्तभेदः स तृतीयः आगन्तुको दोषः एवं त्रिधान् दोषान् इहास्मिन् लोके मुनिर्वेदान्तोक्ततत्त्वावबुद्धा धुनुते निराकरोतीति ॥ ६२ ॥

कार्यकारणयोर्जगत्परमात्मनोर्वस्तुनोः कार्यत्वकारणत्वाभ्यां भिन्नयोरपि पटतन्तुवदैकवस्य मर्धानमनुसन्धानं तद्भावाऽद्वैतमुच्यते श्रुतिभिः "ब्रह्मैवेदमग्र आसीत् सदेव सोम्येदमग्र आसीत् सर्वं खल्विदं ब्रह्म" इत्यादिभिः परमात्मनोऽत्यन्तं भिन्नं जगत् परमाणुमयत्वादिति विकल्पस्य अत्यन्तभेदस्य अवस्तुत्वात् पटतन्तुवदिति दृष्टान्तेन ब्रह्म सत्यं जगन्मिथ्येति प्रच्छन्नबौद्धानां पक्षोऽपि निरस्तो वेदितव्यः। तन्तूनां मिथ्यात्वं नपटमिथ्यात्वस्यासंभवात् यद्यध्यासवादनिराकरणदर्शने कौतूहलं नर्हि अध्यासगिरिवज्राख्यो ग्रन्थो द्रष्टव्यः। पटस्य तन्त्वभिन्नत्वं दृष्टान्ते दार्ष्टान्ते तु जगतश्चेतनाचेतनरूपपरमात्मशक्तिद्वाराऽभिन्नत्वमिति विवेकः ॥ ६३ ॥

साक्षाद्ब्रह्मणि परे श्रीपुरुषोत्तमे सर्वकर्मणां कारयितरि फलदातरि मनोवाक्तनुभिः सर्वकर्मसमर्पणं यत्तत् क्रियाद्वैतम् ॥ ६४ ॥

भाषा टीका।

जनों के आदि अन्त में तथा बाहर और भीतर और जगत् में जो पर, अवर, ज्ञान, ज्ञेय, वचन, वाच्य, तम, और ज्योति अर्थात् समष्टि जीव हैं वे सबही स्वयं भगवानही हैं तस्मात् पूर्वोक्तज्ञानी को सर्ववस्तुके भगवदात्मक समुझने से कुछ मोहका कारण ही नहीं है ॥ ५७ ॥

भावहोनेवाला आत्मादि के विकल्पास्पद यहदेह सत्यहोकर भी शास्त्र में अवस्तुत्वेन अर्थात् अपुरुषार्थत्वेन कहाहै, क्योंकि—इसमें आत्मधर्म दुर्घट है इसदेह के तरह जितने इन्द्रियों के विषय हैं वे भी अपुरुषार्थ रूपही हैं ॥ ५८ ॥

इहाँपर पृथिवी के परिणाम रूप वृक्षादिकों की छाया जैसे न वृक्षों का समुदायरूपहै, न वृक्षोंका विकाररूप है, न वृक्षो के बिना स्थिति के योग्य, है और न वृक्षोंके अन्वित अर्थात् सदा वृक्षों के साथ रहनेवाली है, क्योंकि अनातप समयपर नहीं रहती है, इसी प्रकार यह शरीर भी न आत्मा का संघात न विकार न पृथक्स्थिति योग्य और न अन्वित तस्मात् मृषा अर्थात् अनित्य है, इसी से आत्मा शरीर नहीं हो सका है ॥ ५९ ॥

ऐसेही पृथिव्यादि धातुओं को भी अवयवि होने से नित्य नहीं कहसके हैं क्योंकि? वे अवयवों के विना नहीं रहसकी है, और अवयवि के असत् काल में अर्थात् नाश होने पर अन्त में अवयवों की भी उपलब्धि नहीं होती है, इस प्रकार अवयवि होने से अनित्य शरीर नित्य आत्मा नहीं हो सका है ॥ ६० ॥

यदि कहो कि शरीर आत्मा नही है तब स्थूलोहं अर्थात् मैं स्थूलहूं इस प्रकार की आत्मा को विषय करने वाली अहंप्रतीति इस देह में क्यों होती है? तहां पर कहते है कि—वस्तु के विकल्प (संशय) होने पर तो सादृश्य और भ्रम हुआ करते हैं तहां जड और चेतन का सादृश्य न होने से सादृश्य से तो ब्राह्मणोहं अर्थात् (मैं ब्राह्मण हूं) इत्यादि प्रतीति हो नहीं सकी। किन्तु अग्नि के संसर्ग से जैसे उष्ण जल (जल उष्ण है) ऐसा ज्ञान होता है, ऐसे ही शरीर और आत्मा का संसर्ग (सम्बन्ध) होने से शरीर गत स्थूलत्व आदि धर्मों का आत्मा में भ्रम होता है, अच्छा यदि आत्मा शरीर नहीं है? तो विहित और निषिद्ध का अनुष्ठान तो शरीर ही से होता दीखते हैं फिर शास्त्र आत्मा के लिये क्यों विधि निषेध कहता है? तहाँ कहते हैं कि—जैसे सोते हुए पुरुष को स्वप्नावस्था में भी स्वप्नावस्था और जाग्रत् अवस्था का अनुभव होता है, और जागने पर सोते समय की दोनो अवस्थाओं के अनुभव का उस को सम्बन्ध नहीं रहता, इसी प्रकार आत्मा को भी प्रकृति सम्बन्ध तक ही अज्ञानकी शय्या पर सोने से विधि निषेध का सम्बन्ध है, और ज्ञान दशा होने पर (मुनयोऽपि न नह्यमानाः) अर्थात् मुनि लोग भी बन्धन से छूट जाते हैं ॥ इस उक्त प्रकार से स्वस्वरूपादि का पूर्ण ज्ञान होने से विधि निषेध का पात्र नहीं होता है। और आविर्भूत गुणाष्टक होकर मुक्त होने पर भी केवल आत्मा को विधि निषेध से कुछ प्रयोजन ही नहीं रहता ॥ ६१ ॥

आत्मा का यह तीन प्रकार का अद्वैत है एक भावाद्वैत, दूसरा क्रियाद्वैत, तीसरा द्रव्याद्वैत, तहां मनन शील ज्ञानी लोग आलोचना करते हुए जाग्रदादितीनों अवस्थाओं को निवृत्त कर देते हैं, ॥ ६२ ॥

तीन प्रकार के अद्वैत में भावाद्वैत यह है, कि पट तन्तु (वस्त्र सूत) के तरह विकल्प (देव मनुष्यादि अवस्था) को कुछ वस्तु न होने से अर्थात् स्थिर न होने से कार्य कारण वस्तु का जो ऐक्य विचार है, ॥ ६३ ॥

हे युधिष्ठिर ! जो कि साक्षात् पर ब्रह्म परमात्मा में मन वाणी और शरीर से कर्मों का समर्पण है उस को क्रिया द्वैत कहते हैं ॥ ६४ ॥

आत्मजायासुतादीनामन्येषां सर्वदेहिनाम् ! ।
यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ॥ ६५ ॥
यद्यस्य वा ऽनिषिद्धं स्याद्येन यत्र यतो नृप ।
स तेनेहेत कर्माणि नरो नान्यैरनापदि ॥ ६६ ॥
एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः ।
गृहे ऽप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः ॥ ६७ ॥
यथा हि यूयं नृपदेव ! दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः ।
यत्पादपङ्केरुहसेवया * भवानहारषीन्निर्जितदिग्गजः क्रतून् ॥ ६८ ॥
अहं पुरा ऽभवं कश्चिद्गन्धर्व उपबर्हणः ।
नाम्ना ऽतीते महाकल्पे गन्धर्वाणां सुसम्मतः ॥ ६९ ॥
रूपपेशलमाधुर्यसौगन्ध्यप्रियदर्शनः ।
स्त्रीणां प्रियतमो नित्यं मत्तस्तु पुरुलम्पटः ॥ ७० ॥
एकदा देवसत्रे तु गन्धर्वाप्सरसां गणाः ।
उपहूता विश्वसृग्भिर्हरिगाथोपगायने ॥ ७१ ॥
अहं च गायंस्तद्विद्वान्स्त्रीभिः परिवृतो गतः ।
ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ।
याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मनः स्वस्य जायादीनां च स्वार्थश्च कामश्च तयोः देहादीनां पञ्चभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदावोचनेनार्थकामयोरैक्यदर्शनमित्यर्थः ॥ ६५ ॥

उक्तानाश्रमधर्मान्संक्षिप्याह—यदिति । यद्द्रव्यम् येनोपायेन यतः सकाशात् ॥ ६६ ॥

प्रस्तुतमुपसंहरति—एतैरिति । अस्य श्रीकृष्णस्य गतिम् तद्भक्तिभाक् तस्य भक्तः ॥ ६७ ॥

एतत्सर्वमाश्रमधर्मानुक्तम् भक्तस्य तु भक्तिरेव सर्वपुरुषार्थहेतुरिति पाण्डवानेव दृष्टान्तीकृत्याह—यथाहीति । हे नृपदेव ! नृपैर्देवैश्च सहायैर्दुस्त्यजादिति वा आत्मनः श्रीकृष्णादेव प्रभोर्हेतोः अडभाव आर्षः उत्कर्षेणातरतेत्यर्थः यथा यथावत् तमेव भजतेति शेषः यद्वा यथा आपद्गणादुत्तीर्णास्त्वम् यथा च क्रतूनहार्षीस्तथा श्रीकृष्णादेव तारकात्संसारादप्युत्तरतेत्यर्थः ॥ ६८ ॥

श्रीकृष्णसेवा महतामवज्ञया भ्रश्यति तत्कृपया च सिध्यतीति दर्शयन्पूर्ववृत्तमाह—अहमिति सार्द्धैः पञ्चभिः । नाम्ना उपबर्हणः ॥ ६९ ॥ पेशलं सौकुमार्यं रूपादिभिः प्रियं दर्शनं यस्य ॥ ७० ॥ ७१ ॥ तद्धेलनं विद्वान् उन्मत्तः सन् गायन्नेव गतः ॥ ७२ ॥—७४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्रव्याद्वैतं विवृणोति—आत्मेति । अर्थशब्दो धनपरः कामशब्दः काम्यस्रक्चन्दनादिभोग्यवस्तुविषयः स च भोगोपकरणभोगस्थानादि प्रदर्शनार्थः यदर्थकामयोरात्मजायादि सर्वदेहिनामैक्यं तद्द्रव्याद्वैतं वित्तगृहक्षेत्रपात्रस्रक्चन्दनादीनामात्मजायाद्यनेकभोक्तृवर्गसाधारण्यं द्रव्याद्वैतमित्यर्थः । ते एतेन गृहादीनां स्वासाधारण्यत्वभ्रमो निरस्तः यद्वा द्रव्ययोश्चिदचिद्द्रव्ययोरद्वैतं द्रव्याद्वैतं तत्र चिदचिदद्वैतं दर्शयति आत्मजायेति । आत्मादीनां सर्वदेहिनां जीवानां ज्ञानैकाकारत्वेनैकरूपेण दर्शनं चिदद्वैतं प्रकाराद्वैतम् अर्थकामादीनामचिद्रूपपरिणामरूपत्वभ्रमश्च निरस्तः ज्ञानाद्वैतमिति पाठेऽप्ययं विभवदर्शनं ज्ञानाद्वैतमित्यर्थः ॥ ६५ ॥

न केवलं त्रिविधमद्वैतमनुसन्धेयमपितु अन्यदपि शास्त्रानुमतं चेत्तदपीत्याह—यदिति । हे नृप ! येन, पौंस्येन यस्य पुंसः

* भगवान्महर्षिभिर्निर्जितदिग्जनः इति पाठः—वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

द्वैत वस्तुनो यतो यस्माद्वस्तुनः सकाशादयमद्वैतमभिनिविष्टं किम्बहुनानं स पुमान् तेनाद्वैतेनाऽनुसन्धीयमानेनेति शेषः। तदनुसन्धानपूर्वकमेव कर्माणि कर्तव्यानीहेत कुर्यादित्यर्थः शास्त्रप्रतिषिद्धेषु न कुर्यात् यतोऽयमेतादृङ् न विद्यते आप्तसंसारो यतस्तस्मात् ज्ञाननिष्ठायां वर्तमानः यथा "वाचारम्भणं विकारो नामधेयम्" "व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन!" इत्यादिशास्त्रेषु भावाद्वैतादिकं प्रतिपाद्यते न तथा प्रकाराद्वैतप्रकार्यद्वैतगुरुदैवताद्वैतादिकमपि शास्त्रैः प्रतिपाद्यत इति तदप्युपादेयमेवेत्यभिप्रायेणाऽयं श्लोकः प्रवृत्तः तत्र प्रकार्यद्वैतं नाम ब्रह्माद्वैतं "सर्वं खल्विदं ब्रह्म" इत्यादिब्रह्मप्रकरणे सामानाधिकरण्येन ब्रह्माद्वैतप्रतिपादनात्सामानाधिकरण्यस्य च प्रकारभेदविशिष्टप्रकार्यैक्यपरत्वाच्च ब्रह्माद्वैतमेव प्रकार्यद्वैतं "नित्यो नित्यानां चेतनश्चेतनानाम्" इत्यादिश्रुतिभिर्जीवस्वरूपभेदप्रतिपादनेन स्वरूपेणाभेदानुपपत्तेः बद्धमुक्तादिव्यवस्थाऽनुपपत्तेः सुखादिव्यवस्थाऽनुपपत्तेश्च कश्चिज्जीवैक्यप्रतिपादनं प्रकारैक्याभिप्रायकमेवेति तदद्वैतमेव प्रकाराद्वैतम् "आचार्यं मां विजानीयात्" "आचार्यदेवो भव" "आचार्यः स हरिः साक्षाच्चररूपी न संशयः" इत्यादिभिर्गुरुदैवतादीनामद्वैतं प्रतिपाद्यत एव ॥ ६६ ॥

यत्पूर्वं "गृहस्थ एतां पदवीं विधिना येन चाञ्जसा। यायाद्देवऋषे ब्रूहि" इति यत्पृष्टं तदुत्तरमुक्तमुपसंहरति—एतैरिति। हे राजन्! वेदोक्तैरिति वेदशब्दस्तन्मूलकस्मृतिपुराणादीनामपि प्रदर्शनार्थः वेदादिभिरुक्तैः कर्तव्यत्वेनोक्तैरेतैर्मार्गैरद्वैताऽनुसन्धानादिभिरित्यर्थः देहात्मजीवेश्वरादिभेदाऽनुसन्धानः स्वस्ववर्णाश्रमोचितकर्मभिश्च तस्य भगवतो भक्तिमात्मभक्तिं कुर्वन् गृहेऽपि जनः गृहस्थोऽपि जनोऽस्य श्रीकृष्णस्य गतिं प्राप्नुयादित्यर्थः ॥ ६७ ॥

"मादृशो गृहमूढधीः" इत्यनेनाभिप्रेतां स्वस्य मुक्तियोग्यत्वशङ्कां किम्पुनर्न्यायेन निराकरिष्यमाणः तावच्छ्रीकृष्णसेवयैव तरिष्यसीत्याह—यूयमिति। हे नृप देव! यथा प्रभोः सर्वशक्तेरात्मनोऽन्तरात्मनः श्रीकृष्णादेव हेतोर्यूयं दुस्त्यजादापदां गणादुत्तरत अडभावः अन्तादेशाभाव आत्मनेपदश्चार्षाणि उत्तरत उत्तीर्णाः. यथा च भवान् यस्य श्रीकृष्णस्य पादपङ्कजयोः सेवया हेतुभूतया निर्जिता दिग्गजा दिक्पालकाः येन तादृशः सन् महर्षिभिः सह क्रतून् कार्षीदिति शेषः. तथा तस्यैव सेवया मोक्ष्यस इत्यध्याहारः ॥ ६८ ॥

भक्ततदीयसेवामात्रेण हेतुना मादृशानां मुक्तिसम्भवं किं पुनः साक्षाद्भगवत्सेवानां मादृशामिति प्रतिपादनार्थं स्वपूर्वजन्मवृत्तान्तमाह—अहमिति। अतीते ब्रह्मकल्पे पूर्वजन्मन्यहं नाम्नोपबर्हण इति प्रसिद्धः कश्चिद्गन्धर्व अभूवम् आत्मानं विशिनष्टि—गन्धर्वाणां सुसम्मतः ॥ ६९ ॥

रूपादिभिः प्रियदर्शनः प्रियं यथा भवति तथा दृश्यत इति तथा रूपं सौन्दर्यं पेशलं सौकुमार्यं हृदिचित्तापहारित्वेन रसावहत्वं सौगन्ध्यं स्रक्चन्दनादिगन्धवत्त्वं रूपादिभिः प्रियं दर्शनं यस्येति वा स्त्रीणां नित्यं सदा प्रियतमः मत्तः सर्वाधिकं लम्पटः विषयलालसः एवं भूतोऽहं स्थितः ॥ ७० ॥

तत्रैकदा देवसत्रे हरिगुणानुगानात्मके ब्रह्मसत्रे विश्वसृग्भिः प्रजापतिभिः हरिकथागानार्थं निमन्त्रितः तदर्थं अप्सरसां गणाः उपहूताः ॥ ७१ ॥

तथाऽहमपि तद्गन्धर्वाह्वानं ज्ञात्वा स्त्रीभिः परिवृतः गायन् हरीतरगाथा गायन् तत्र गतः अगायदिति पाठे अगायदेव गत इत्यर्थः तत् मे मम हेलनमपराधं ज्ञात्वा विश्वसृजः ओजसा तपोबलेन शेपुः ॥ ७२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

आत्मजायादीनामन्येषां च देवदत्तादीनां भगवदधीनत्वदर्शनं वस्त्वर्थकामयोरैक्यं भगवद्विषयत्वदर्शनं तात्पर्यं द्रव्याद्वैतं "सर्वे तदर्पितमनोवचसात्मगेहप्राणाः पुनाति" इत्यादिनोच्यत इत्यन्वयः अनेन जीवस्य श्रीहरिणा द्वैतमुच्यते तथैव चाद्वैतशब्दार्थग्रहणं न तु स्वरूपैक्यमिति श्रियाप्नोति ज्ञायत इति ॥ ६५ ॥

उपासनाप्रकारं निरूप्यानुष्ठानादिप्रकारं दर्शयति—यस्येति। यस्य पुरुषस्य येन द्रव्येण यत्र यस्मिन्देशे काले वा यतो यस्मात् पुरुषात् स्वधर्मानिषिद्धं श्रुतिस्मृतिवाक्यविहितं स मनुष्यः तस्मिन् देशे काले वा तस्मात्पुरुषाद्द्रव्येण कर्माणि पूजालक्षणानीहेत कुर्यात् अन्यैर्निषिद्धैर्न कुर्यादित्यन्वयः। तस्यैवं तत्प्रापयत्वम् एव प्राप्त इति तत्राह—अनापदीति ॥ ६६ ॥

एतैरनापदि विहितैरन्यैरापदि विहितैः अस्य हरेर्गतिं ज्ञानं स्थानं वा यायादिति सदर्थं लिङ् आम्नातमित्यर्थः ॥ ६७ ॥

उक्तमर्थमनुभवसिद्धं करोति—ययेति। दिग्गजशब्देन दिक्पालानुपलक्षयति तस्य सेवा कर्तव्येति शेषः ॥ ६८ ॥

ममाप्यनुभवसिद्धं दर्शयितुं स्ववृत्तमाह—अहमिति। कश्चिद्दिव्यात्मा निन्द्यत्वाद् नाऽनेनोपबर्हणो गन्धर्व इति। पूर्वं अतीते महाकल्पे अतीतब्रह्मकाले "ब्रह्मकालः परं मेति महाकल्पश्च कीर्तितः" इति ॥ ६९ ॥

तत्पुरलम्पटः तासां पुरे गृहे लम्पटः स्थातुमुत्सुकमनाः ॥ ७० ॥

गन्धर्वादिगणा अगायन् ॥ ७१ ॥

तद्विदित्वा गतः स्त्रीभिः परिवृतोऽगायं हेलनं विश्वसृजां पुरतः स्त्रीभिः सम्भूय महोपरकगानवशाम ॥ ७२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

यथा येन भक्तिमात्रप्रकारेण आत्मनः स्वस्य वः प्रभुः श्रीकृष्णः तस्मादेव हेतोर्युष्मानापद्गणात् उत्तरत स्मारयन् तदेव प्रत्यापयति। ययेति ॥ —६८ ॥

तत्र स्वमपि दृष्टान्तयति—अहमित्यादिना। तत्राहमिति युग्मकम्। येनैव भक्तिमात्रप्रकारेण नारदत्वमपि लब्धवानहमिति प्रकरणार्थः ॥ ६९-७८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मनः स्वस्य जायादीनाञ्च अन्येषाञ्च स्वसम्बन्धरहितानां स्त्रीबोर्थसाधनं कामश्च तत्प्राप्त्यं यन्नोगवन्तयोः साधनसाध्ययोरैक्या- देक्यमाचनंति यावेकार्थकामौ स्वस्य तावेव सर्वेषामेव देहा- दीनां पञ्चभूतात्मकत्वेनैक्यात् सर्वेषामेव जीवात्मनां भोक्तृत्वे- नैक्याद्वैताभावादिति भावः ॥ ६५ ॥

उक्तानाश्रमधर्मान् संक्षिप्याह—यद्यदिति येनोपायेन यतः सकाशात् ॥ ६६ ॥

प्रस्तुतमुपसंहरति—एतैरिति । अस्य श्रीकृष्णस्य गतिं गृहे गृहस्थोऽपि यदि तद्भक्तिभाक् स्यादित्यर्थः ॥ ६७ ॥

एषा च पञ्चाऽध्यायी सर्वसाधारण्येनैवोक्ता ऐकान्तिक- भक्तानां तु सिद्धानां साधकानां च भगवानेव गतिः तत्र च सिद्धान् स्वयमपरोक्षीभूत एव भगवान् स्वप्रेमतरङ्गे नर्त- यितुं सत्पद्भिपदावर्तगमितांस्तान् यथावदेव कारयति तथैव ते कुर्वन्ति तदभिप्रेताचरणमेव तेषां भजनमिति तत्र पाण्डवानेव प्रमाणीकुर्वन्नाह—यूयं हीति । नृदेवैश्च सहायैः दुस्त्यजात् आप- दाक्रमणात् स्वप्रभोर्ध्यानादिलक्षणाचरणात् सेवयैवात्तरेत उत्तरथे- त्यर्थः । यत् यथा च मयास्तयैव क्रतून् अहार्षीत् तथैवान्ये उग्रसेनादयोऽपि तं सेवते इति शेषः । तेन मादृशो गृहमूढधीरि- त्युक्त्वा स्वेषां गृहस्थाकर्मिष्ठान्तर्भावो न भाव्य इति भावः ॥ ६८ ॥

यादृच्छिकसाधुसङ्गलब्धभक्तीन् साधकांश्च "धर्मान् सन्त्यज्य यः सर्वान्मां भजेत् स च सत्तमः" इत्यादि श्रीभागव- तशास्त्रस्वरूपेण स एव भगवान् यथादिशति तथैव ते कुर्वन्ति "स्वाकृतानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" इति भगवदुक्तं विधिवाक्यमेव प्रमाणीकुर्वन्तो वर्णाश्रमाचारादिकं नापेक्षन्ते तत्र पूर्वजन्मनि स्वमेव प्रमाणीकुर्वन्नाह—अहमिति, सार्द्धैः पञ्चभिः । पेशलश्चातुर्येण ॥ ६९ ॥ ७० ॥

तदाह्वानं विद्वान् उन्मत्तः सन् गायन्नेव गतः ॥ ७१ ॥ ७२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मनः स्वस्य जायादीनां च स्वार्थस्य स्वरूपस्य कर्मफल- भोक्तुः काम्यते इति कामः भोग्यवस्तुजातं तस्य चैक्यं सर्वा- र्थभूतेन भगवता सह अपृथक्त्वं यत्तद्द्वयोर्भोक्तृभोग्ययोरद्वै- तम् "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म मेतत्" इति श्रुतिरत्राऽनुसन्धेया ॥ ६५ ॥

अनापदि द्रव्यदेशकालाद्यनुसारेण कार्याणि कुर्यादित्युपदि- शन् प्रस्तुतमुपसंहरति—यद्यदित्यादिना । हे नृप ! यस्य कर्तुः यत्कार्यजातम् येन द्रव्येण यतः सकाशाच्च यस्मिन् देशे काले च अनिषिद्धं स्यात् स कर्ता तान्येव कार्याणि तेन द्रव्येण तस्मादेव तस्मिन्देशे काले च समीहेत नान्यत्कुर्या- दित्यर्थः ॥ ६६ ॥

एतैरुक्तप्रकारैरन्यैरप्युक्तैर्वेदोक्तकर्मभिर्हेतुभूतैः तस्य श्रीकृष्ण- स्य भक्तिभाङ्नरः गृहेऽपि वर्तमानः अस्य श्रीकृष्णस्य गतिं पदवीं याचात् मुक्तो भवतीत्यर्थः । अत्रेदं बोध्यं कर्मणामन्तः- करणशुद्ध्युपास्योपासकस्वरूपज्ञानद्वारा प्रेमलक्षणा भक्तिः सा जातायां तस्यां प्रेमपूरगृहीतस्य सिद्धभक्तस्य कर्मपरम्परा- णामभावात्कर्मत्याग:"धर्मान्संत्यज्य यः सर्वान्मां भजेत्स च सत्तमः" इत्यस्मिन् श्लोके एव सत्तमशब्देन सिद्धभक्तो निर्दिष्टः सा- धकस्य तु कर्माभावेऽन्तःकरणशुद्ध्यभावात् ज्ञानभक्त्य- तद्भावे मुक्त्यभाव इति दिक् ॥ ६७ ॥

हे नृपदेव ! यथा यूयं आत्मनः स्वकीयाद्गुपास्यभूतात्प्रभोः श्रीकृष्णादेव हेतुभूतात् आपद्गणाद्दुस्तरात् अडभाव आर्षः उत्कर्षेणातरतेत्यर्थः । यथा च भवान् यत्पादपंकेरुहसेवया क्रतून् अहार्षीत् तथा असौ प्रसिद्धोऽन्योऽपि गृहे वर्तमानः तत्सेवया कृतार्थः स्यादिति भावः ॥ ६८ ॥

श्रीकृष्णभक्तिमाहात्म्यं सूचयितुं स्ववृत्तान्तमाह—अहमिति सार्द्धैः पञ्चभिः । नाम्ना उपबर्हणः ॥ ६९ ॥

रूपादिभिः प्रियं दर्शनं यस्य सः तत्र पेशलं चातुर्यम् ॥ ७०—७१ ॥

अहञ्च तदाह्वानं विद्वान् स्त्रीभिः परिवृतः उन्मत्तः सन् गायन्नेव गतः ॥ ७२—७३—७४ ॥

भाषा टीका ।

अपनी स्त्री पुत्रादिकों का तथा अन्य सर्व प्राणिओं का जो अपने अर्थ और काम के निमित्त एकता होनी है इसी को द्रव्याद्वैत कहते हैं ॥ ६५ ॥

जिस मनुष्य को जिस शास्त्र से जिस विषय में जिस उपाय से जिस कार्य का निषेध नहीं किया है, हे नृप ! वह पुरुष अनापत् काल में उसी उपाय से अपने कार्यों को चलावे और से नहीं ॥ ६६ ॥

हे राजन् ! वेदोक्त इन कर्मों का अथवा और अन्य वे- दोक्त स्वकर्मों का आचारण करता हुआ श्रीहरि में भक्ति- वाला पुरुष अपने गृह में रहकर भी श्रीकृष्ण की गति को प्राप्त होता है, अर्थात् मोक्ष को प्राप्त होता है ॥ ६७ ॥

हे राजन् ! बड़े २ राजाओं से और देवों से दुस्त्यज ऐसे आपदगणों से आप को जैसे प्रभु ने छुड़ाये हैं ऐसे ही संसार के भी पार उतारेंगे क्योंकि इनही के चरण कमल की सेवा से आपने दिग्विजय करके उत्तम यज्ञ किये गये हैं ॥ ६८ ॥

अब नारद जी अपनी पहिली कथा कहने लगे । नारदजी बोले, कि—अतीत कल्प में मैं गन्धर्वों का मान्य उपबर्हण नामक एक गन्धर्व भया रहा ॥ ६९ ॥

सौन्दर्य सौकुमार्य सौगन्ध्य गुण वाला और अति प्रिय- दर्शन वाला सदा स्त्रियों को बड़ा प्रिय और उन्मत्त और बड़ा लम्पट रहा ॥ ७० ॥

तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम्।
शुश्रूषया ऽनुषङ्गेण प्राप्तो ऽहं ब्रह्मपुत्रताम् ॥ ७३ ॥
धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः।
गृहस्थो येन पदवीमञ्जसा न्यासिनामियात् ॥ ७४ ॥

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयो ऽभियन्ति।
येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ ७५ ॥
स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखाऽनुभूतिः।
प्रियः सुहृद्वः खलु मातुलेय आत्माऽर्हणीयो विधिकृद्गुरुश्च ॥ ७६ ॥
न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुततयोपवर्णितम्।
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ७७ ॥

श्रीशुक उवाच।

इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः।
पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः ॥ ७८ ॥
कृष्णपार्थावुपामन्त्र्य पूजितः प्रययौ मुनिः।
श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः ॥ ७९ ॥
इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः।
देवासुरमनुष्याद्या लोका यत्र चराचराः ॥ ८० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां प्रह्लादाऽनुचरिते युधिष्ठिरनारदसंवादे सदाचारनिर्णयो नाम
पञ्चदशोऽध्यायः ॥ १५ ॥
समाप्तश्चायं सप्तमस्कन्धः ॥ ७ ॥
हरिः ॐ तत्सत् ॥

भाषा टीका।

एक समय देवताओं के यज्ञ में विश्व सृष्टाओं ने हरि गाथा गान के लिये बहुत से गन्धर्व और अप्सराओं को बुलाये रहे ॥ ७१ ॥

उस समय उन के आह्वान को जानता हुआ स्त्रियों के झुंड सहित उन्मत्त की तरह गाता हुआ मैं भी गया, विश्व सृष्टाओं ने मेरे अपराध को जान कर एका एकी मुझे शाप दे दिया ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स्वं तु कृतार्थं मन्वानि हर्षेण पुनः पूर्वश्लोकानेव पठति यूयमिति येषं स्पष्टम् ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥

सप्तमस्कन्धगूढार्थपदभावार्थदीपिका।
संप्रेष्यतां सदा सद्भिर्यतिश्रीधरनिर्मिता ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीधरस्वामि-विरचितायां भागवतभावार्थदीपिकायाम्
पञ्चदशोऽध्यायः ॥ १५ ॥
समाप्तोयं सप्तमस्कन्धः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

शापमेवाह—याहीति । कृतं हेलनं येन स त्वं महा श्रीः सर्वशोभा यस्य स तादृशः आशु शूद्रत्वं याहि शूद्रयोनिं प्राप्नुहीति तावत्तदाहं दास्यां शूद्रायां अहं जातः तत्रापि शूद्रजन्मन्यपि ब्रह्मवादिनां शुश्रूषयाऽनुषङ्गेण तत्सङ्गेन च हेतुना अस्मिन्कल्पे ब्रह्मणश्चतुर्मुखस्य पुत्रतां प्राप्तः ॥ ७३ ॥

अध्यायद्वयोक्तार्थमुपसंहरन् तच्छ्रवणानुष्ठानफलमाह—धर्म इति । ते तुभ्यं गृहमेधीयो धर्मो वर्णितः कथंभूतः पापनाशनः येन गृहमेधीयेन धर्मेण श्रुतेनाऽनुष्ठितेन च गृहस्थः सन्यासिनां भगवति संन्यस्तात्मनां पदवीं मुक्तिरूपामित्थात्प्राप्नुयादित्यर्थः ॥ ७४ ॥

त्वं तु कृतार्थ एव इति दर्शयन् पूर्वश्लोकानेव पुनः पठति यूयमिति । श्लोकाः पुरस्तादेव व्याख्याताः केवलयाऽनिर्वाण-सुखानुभूतिः निर्दोषनिर्दुःखसुखरूपविज्ञानमयः निधिलाश्रयो-गकारी वस्तुयथा दृश्यतया ॥ ७५ ॥ ७६ ॥ ७७ ॥

स्कन्धादावुपक्रान्तम् "अजातशत्रोः पूर्वमितिहासः सुरर्षिणा" इति नारदयुधिष्ठिरसम्वादमुपसंहरति भगवान् शुकः—इतीति । इत्थं देवर्षिणा प्रोक्तं निशम्याकर्ण्य भरतर्षभो युधिष्ठिरः सुखान्तः कृष्णं भवत्प्रेक्षायां पार्श्वे स्थितं चाम्भोदाहर्षिं च प्रेम्णा विह्वलः पूजयामास ॥ ७८ ॥

ततः पूजितो देवर्षिः कृष्णपार्थावुपामन्त्र्य अनुज्ञाप्य ताभ्यामनुज्ञातः प्रययौ पार्थो युधिष्ठिरः कृष्णं परब्रह्मात्मकं श्रुत्वा परमविस्मितः निरतिशयाश्चर्ययुक्तो बभूव ॥ ७९ ॥

यत्पूर्वं षष्ठस्य तृतीयाध्यायादौ "देवासुरनृणां सर्गो नागानां मृगपक्षिणाम्" इत्यादिना तस्योत्तरं ततःप्रभृत्येतावत्पर्यन्तेन उक्तम् उत्तरप्रश्नान्तराणप्रदानाय उपसंहरति—इतीति । इत्थं दाक्षायणीनां दित्यादीनां वंशाः पृथक् तत्तत्परम्परापूर्व्या प्रकीर्तिताः कथंभूताः यत्र वंशेषु देवासुरचराचरात्मका जाता इति शेषः । यद्यपि दाक्षायणीवंशवर्णनोपसंहारः षष्ठान्तदशकस्कन्धस्तत्रैव समाप्तेः तथापि तद्वंशान्तर्भूतदितिजप्रसङ्गानुप्रसक्तशङ्कापरिहारनवनुप्रसक्तवर्णनात्मकत्वादस्य स्कन्धस्यैतदन्त एव दाक्षायणीवंशवर्णनमुपसंहृतमित्यवगन्तव्यम् ॥८०॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसक्ततत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवात्स्यश्रीवीरराघवविदुषा विरचितायां श्रीमद्भागवतचन्द्रचन्द्रिकायां श्रीभागवतव्याख्यायां सप्तमस्कन्धे

पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमते रामानुजाय नमः ॥

समाप्तोऽयं सप्तमस्कन्धः ॥ ७ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तावत्तदानीमेव मनुषङ्गेण निरन्तरसेवनिमित्तसङ्गेन भक्त्या वा "तीव्रस्नेहो ऽनुषङ्गो ऽथ नैरन्तर्यानुसेवनम्" इत्यभिधानात् ॥ ७३ ॥

अत इत्येतद्धर्माख्यं निगमयति—धर्म इति । न्यासिनां पदवीं निवृत्तिमार्गम् अर्चिरादिमार्गेण वैकुण्ठं वा ॥ ७४ ॥

यूयमित्यादिपद्यमुक्तार्थम् ॥ ७५ ॥

कैवल्येन प्रकृतिप्राकृतानिभरहित्येनाप्तं यन्निर्वाणसुखं परसुखं तस्यानुभूतिरनुभवो यस्य स तथा ॥ ७६ ॥ ७७ ॥

यत्र यस्य प्रेमरसस्तत्र स स्मातः ॥७७॥७८॥

परमप्रमेयमुपसंहरति—इतीति । दाक्षायणीवंशस्य शाखोपशाखाभेदेन वर्णितत्वात्—इतिशब्दः समाप्तिवचनः यत्र येषु वंशेषु जानमात्रं विहाय स्थावरसंग्रहणाय चराचरा इति ७९..८०

भुजाविर्भावितशौर्यं भुजङ्गमजितं विष्णुम् ।
वन्दे भुजगशयनं भुजयुगकल्पितश्रीवम् ॥
पदरत्नावलिह्येषा सप्तमस्कन्धसङ्कृता ।
तुलसीव हरेः प्रीत्यै भूयाच्छ्रिमद्धवादिनः ॥

इतिश्रीमन्महेन्द्रतीर्थपूज्यपादशिष्यविजयध्वजतीर्थमुनीन्द्रकृतायाम् पदरत्नावल्याम् श्रीभागवतटीकायां सप्तमस्कन्धे

पञ्चदशोऽध्यायः (विजयध्वजरीत्या षोडशः) ॥ १५ ॥

समाप्तोऽयं सप्तमस्कन्धः ॥ ७ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कृष्णपार्थाविति पूर्वं तावद्गूहस्य ज्ञानेन विस्मृत आसीदेव । अधुनातु परमगूहस्यज्ञानेन परम विस्मित आसीदित्यर्थः ॥ ७९—८० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

पञ्चदशोऽध्यायः ॥ १५ ॥

समाप्तश्चायं सप्तमस्कन्धः ॥ ७ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्रापि शूद्रजन्मन्यपि यद्वा तादृशाऽभिशापे सति अत्र नारदेतिहासकथनं भक्तेः प्रागभावध्वापनार्थम् अनुषङ्गेण पुनः पुनः सङ्गेन अनुकूलेन संगेन वा ॥ ७३ ॥ ७४ ॥

यूयन्तु प्रह्लादादिसर्वभक्तेभ्यो यथा श्रेष्ठास्तथा विप्रादिवर्णेभ्यो ब्रह्मचर्याद्याश्रमेभ्यश्च परमश्रेष्ठा इति व्यञ्जयन् पूर्वोक्तमेव श्लोकत्रयीं पुनराह—यूयमिति ॥ ७५ ॥ ७६ ॥ ७७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कृष्णं चक्रकारधारावत्स्वमेवंभूतो मम भ्रातेति प्रेम्णा मोहवः ॥ ७८ ॥

कृष्णपार्थौ कृष्णार्जुनौ कृष्णयुधिष्ठिरौ वा प्रयाणसमये पुनरपि पूजितः ॥ ७९ ॥ ८० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

पञ्चदशः सप्तमस्य सङ्गतः सङ्गतः सताम् ॥ १५ ॥

श्रीतिथ्यो मौल्यधर्मागिर्व्यं यद्यपि तद्दृश्म मनो विनोदाय ।

युधाः कुधा महत बहुधूयः पुरः स्फुरन्तु स मोऽनुकूलः ।

पौषस्य कृष्णैकादश्यां गान्धर्वाः सरस्तटे ।

अपूरि सप्तमस्यापि टीकेयं तत्प्रसादतः ।

समाप्तोऽयं सप्तमस्कन्धः ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मनुष्याणामिव लिङ्गानि वत्साधकृत्यादीनि यस्य तत् ॥ ७५—७६ ॥

वस्तुतया साकल्येन नोपवर्णितम् ॥ ७७—८० ॥

शुकेन विदुषा स्वल्पः सम्प्रदायानुरोधतः ।

सप्तमस्कन्धगो दीपः कृतः श्रीकृष्णप्रीतये ॥

इतिश्रीमद्भगवन्निम्बार्कचरणचिन्तकश्रीशुकदेवसुधी-

प्रणीते श्रीमद्भागवतसप्तमस्कन्धीये सिद्धान्तप्रदीपे

पञ्चदशाध्यायार्थप्रकाशः ॥ १५ ॥

ग्रन्थसंख्या २७००

समाप्तश्चायं सप्तमस्कन्धः ॥ ७ ॥

भाषा टीका ।

तदनन्तर मैं फिर दासी में उत्पन्न हुआ वहां पर भी ब्रह्मवादि ब्राह्मणों की और महात्माओं की शुश्रूषा के प्रसङ्ग से ब्रह्मा जी के पुत्रत्व को प्राप्त भया ॥ ७३ ॥

नारदजी बोले, कि—राजन् ! पापोंका नाशक ऐसा गृहस्थों का धर्म हमने यह तुमारे आगे वर्णन किया है कि जिस धर्म का आचरण करने से पुरुष घर में रहकर भी सन्यासियों की पदवी को प्राप्त होजावे ॥ ७४ ॥

बस राजन् ! मनुष्य लोक में तो तुम लोग बड़भागी हो, क्योंकि ? जिनके घरों को लोकों को पवित्र करने वाले बड़े २ मुनि लोग चले आते हैं, सो भी क्योंकि ? तुमारे घर में साक्षात् पर ब्रह्म मनुष्य नाट्य से छिपा हुआ वास करता है ॥ ७५ ॥

ये श्रीकृष्ण वही ब्रह्म है कि जिनको महात्मा लोग समाधिस्थ होकर ढूंढते हैं और वही कैवल्य सुख अनुभव के देने वाले हैं । परन्तु आपका तो प्रिय सुहृद, मातुलेय, (मामा का पुत्र) आत्मा, पूजनीय, आज्ञाकारी, और गुरु भी यही हैं ॥ ७६ ॥

जिनके रूप का साक्षात् शंकर और ब्रह्मादिक अपनी बुद्धि से वास्तवरीति से (ठीक २) वर्णन नहीं करसके हैं किंतु केवल मौन और शान्ति पूर्वक भक्ति से पूजा होते हैं वे भक्तों के पति हम पर प्रसन्न होवे, ॥ ७७ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—युधिष्ठिर महाराज ने श्रीनारदजी के इस प्रकार के कथन को सुनकर बड़े प्रसन्न होकर राजा युधिष्ठिर जीने श्रीनारदजी की पूजाकरी और श्रीकृष्ण के माहात्म्य को सुनकर प्रेम से विह्वल होकर श्रीकृष्ण की भी पूजा करी ॥ ७८ ॥

तदनंतर नारदजी भी श्रीकृष्ण और युधिष्ठर से पूजित होकर श्रीकृष्ण और युधिष्ठिर से पूछकर यदृच्छा से चले गये और श्रीकृष्ण को परब्रह्म सुनकर युधिष्ठिर भी परम विस्मय को प्राप्त हुए ॥ ७९ ॥

हे परीक्षित, हे राजन् ! इस प्रकार दक्षकी पुत्रियों के पृथक् २ वंश हमने तुमारे आगे वर्णन किये, जिनके वंश में देव असुर मनुष्य आदिक चराचर लोग सभी उत्पन्न हुए हैं ॥ ८० ॥

श्रीमद्भागवतेऽस्मिन् रुचिरकथः सप्तमस्कन्धः ॥

भागवतार्थविनिर्मितभाषाटीकासमन्वितो जयति ॥ १ ॥

इति श्रीमद्भागवत सप्तम स्कन्ध में, पंचदश अध्याय की

श्रीवृन्दावनस्थ भागवताचार्य कृत भाषा टीका समाप्त ॥

सप्तमस्कन्ध भी समाप्त भया ॥

श्रीरुक्मिणीरमणो जयति ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

———○:*:○———

समाप्तश्चायं सप्तमस्कन्धः ॥ ७ ॥

——○:*:○——

संशोधको वात्स्य ग्रन्थरत्नस्य का० 'कान्हूर' श्रीरङ्गाचार्य—वृन्दावनस्थ भागवताचार्यों ।